RIG-VEDA-SANHITA,

THE

SACRED HYMNS OF THE BRAHMANS;

TOGETHER WITH THE

COMMENTARY OF SAYANACHARYA.

EDITED BY

DR. MAX MÜLLER.

VOLUME I.

PUBLISHED UNDER THE PATRONAGE OF

THE HONOURABLE THE EAST-INDIA-COMPANY.

LONDON,

W. H. ALLEN AND CO.,

BOOKSELLERS TO THE HONOURABLE THE EAST-INDIA-COMPANY,

7, LEADENHALL STREET.

1849.

OXFORD,

PRINTED BY T. COMBE, PRINTER TO THE UNIVERSITY.

OCTOBER 1849.

TO

MAJOR-GENERAL SIR ARCHIBALD GALLOWAY, K.C.B., CHAIRMAN,

JOHN SHEPHERD, ESQ., DEPUTY CHAIRMAN,

SIR ROBERT CAMPBELL, BART.,

JOHN LOCH, ESQ.,

CHARLES MILLS, ESQ.,

JOHN MASTERMAN, ESQ., M.P.,

HENRY ST. GEORGE TUCKER, ESQ.,

HENRY ALEXANDER, ESQ.,

HENRY SHANK, ESQ.,

RUSSELL ELLICE, ESQ.,

SIR RICHARD JENKINS, G.C.B.,

JOHN COTTON, ESQ.

WILLIAM BUTTERWORTH BAYLEY, ESQ.

FRANCIS WARDEN, ESQ.,

SIR HENRY WILLOCK, K.L.S.,

SIR JAMES WEIR HOGG, BART., M.P.,

WILLIAM HENRY C. PLOWDEN, ESQ., M.P.,

LIEUTENANT-COLONEL WILLIAM H. SYKES,

MAJOR JAMES OLIPHANT,

JOHN CLARMONT WHITEMAN, ESQ.,

THE HONOURABLE WILLIAM H. L. MELVILLE,

ROSS DONNELLY MANGLES, ESQ.,

MAJOR-GENERAL JAMES CAULFEILD, C.B.,

WILLIAM JOSEPH EASTWICK, ESQ.,

DIRECTORS

FOR MANAGING THE AFFAIRS

OF

THE HONOURABLE THE EAST-INDIA-COMPANY,

THIS ORIGINAL RECORD

OF THE EARLY INSTITUTIONS OF THE NATIVES OF INDIA

IS RESPECTFULLY AND GRATEFULLY DEDICATED

BY THEIR OBEDIENT SERVANT,

OXFORD,
October 1849.

MAX MÜLLER.

PREFACE.

AFTER five years spent in the collection of materials for an Edition of the Rig-veda and its Sanskrit Commentary by Sáyanáchárya, the first volume is now completed, comprising the first Ashṭaka (Ogdoad), and about the fourth part of the whole[a].

When I first entered on this undertaking, I saw but little chance that I should ever succeed in carrying it out, and my only hope of success was derived from the firm conviction that, in the present state of philological, historical, and philosophical research, no literary work was of greater importance and interest to the philologer, the historian, and philosopher, than the *Veda*, the oldest literary monument of the Indo-European world. There were many difficulties to be overcome in carrying out this work. In the public Libraries of Germany no MSS. of the Rig-veda and its Commentary were to be found, except some old copies of the text and a small and worm-eaten fragment of Sáyaṇa's Commentary in the Royal Library at Berlin. It was necessary, therefore, to spend several years in the Libraries of Paris, London, and Oxford, in order to copy and collate all the necessary Vaidik MSS. A complete *apparatus criticus* having been brought together in this manner, it became possible to commence a philological study of the Rig-veda, and to prepare upon a safe basis a critical edition of both its text and commentary. But a still greater difficulty remained, the expense of publishing such a work. These obstacles have been such, that although the want of an edition of the Veda has been keenly felt by all Sanskrit scholars, and although there were many fully qualified for such a work, yet no one has been found to undertake it, since the first edition of the

[a] An introductory Memoir on the Veda is in the Press, and will be published separately.

Rig-veda by the late Dr. Rosen was interrupted by the early death of that highly-gifted scholar. It is owing to a concurrence of many fortunate circumstances, and particularly to the kind encouragement and liberal assistance which I have received from various quarters, that these difficulties have been at length overcome. For several years I was able to advance but slowly, being entirely left to my own resources, and having but few leisure hours to bestow upon Vaidik studies. But the further I proceeded in my work, the more encouragement I received. Amongst those who took an active interest in it, I have to mention with sincere gratitude the names of Alexander von Humboldt and Professor E. Burnouf in France, and of Chevalier Bunsen and Professor H. H. Wilson in England. The final success, however, of this undertaking is owing to the well-known liberality of the Honourable the Court of Directors of the East-India-Company, whose enlightened views on this subject cannot be better expressed than in their own words: "The Court consider that the publication of so important and interesting a work as that to which your proposals refer, is in a peculiar manner deserving of the patronage of the East-India-Company, connected as it is with the early religion, history, and language of the great body of their Indian subjects."

This first edition, however, of the Rig-veda and its Sanskrit Commentary is not intended for the general scholar, but only for those who make Sanskrit their special study, and for those among the natives of India who are still able to read their own Sacred Books in the language of the original. It would have been more agreeable to myself to have kept for my own use the materials which I had collected for the Veda, (I allude especially to the Sanskrit Commentary,) devoting all my time to their study, and communicating to the public the last results only of my researches. But I felt that I should perform a more useful work by at once making public those materials, without which no philological study of the Veda was possible. A greater number of Sanskrit scholars will thus be enabled to contribute their share towards the elucidation of Vaidik antiquities, and we may now look forward to a more complete study of Vaidik literature than it is in the power of any single individual to bestow upon so comprehensive a subject, and to a better understanding of Vaidik language, religion, and mythology, than can be expected from a scholastic Indian commentator of the fourteenth century after Christ.

I determined therefore on publishing first a complete text of the Rig-veda-

sanhitá, (the Sanhitá and the Pada-text,) together with the only complete commentary on the Rig-veda now existing, the Mádhavíya-vedártha-prakáśa by Sáyaṇáchárya. As the limits of this publication were fixed, it became necessary to save space as much as possible, in order to get at least the whole of the text and commentary into the prescribed compass of the edition. For this reason, as well as because this edition was destined for the use of Indian as well as European scholars, I had to exclude, and to reserve for a separate work, all critical and explanatory notes of my own, together with the various readings of the MSS.

My principal object in this present edition is therefore to give a correct text of the Rig-veda, and to restore from the MSS. a readable and authentic text of Sáyaṇa's commentary. The former was by far the easier task. The MSS. of the Rig-veda have generally been written and corrected by the Brahmans with so much care that there are no various readings in the proper sense of the word, except those few which are found noticed as such in the Commentaries or in the Prátiśákhyas. Even these are generally of small importance, and seldom affect the meaning of a sentence. For the most part they arise from niceties of orthography and calligraphy, which by themselves are of little importance to a European scholar, though they may become of interest if considered with reference to the peculiarities of the old Śákhas or branches of the Veda. The hymns of the Rig-veda are happily much more free from these orthographic minutiæ than the prayers of the Sáma and Yajur-veda. Of real importance, however, for critical purposes, are the alterations which the verses of the Rig-veda have undergone when incorporated into the ceremonial prayers of the Sáma, Yajur, and Atharva-vedas. But neither are these alterations to be considered in the light of *variæ lectiones*, and, as they cannot be used for a critical restoration of the received text of the Rig-veda, they will better be considered in a general critical account of the whole Vaidik literature [b].

For the text of the Rig-veda I have made use of the following MSS.

I. *Sanhitá-text.*

S. 1. A manuscript in the collection of the Rev. Dr. Mill, now belonging to the Bodleian Library at Oxford. It contains all the eight Ashtakas (Ogdoads)

[b] The importance of these alterations has been pointed out by Professor Benfey, in his valuable edition of the Sáma-veda-sanhitá; Introduction, p. lvii. "Die Hymnen des Sáma-veda herausgegeben, übersetzt und mit Glossar versehn von Theodor Benfey. Leipzig, F. A. Brockhaus, 1848.

of the Rig-veda. The first Ashṭaka consists of 89 leaves without a date, the last leaves having been replaced by a modern hand. The second comprises 70 leaves, and has no date. The third, of 92 leaves, is dated Samvat 1777. The fourth, of 100 leaves, is dated Samvat 1776. The fifth, of 102 leaves, is dated Samvat 1771. The sixth, of 104 leaves, has no date, the last leaves being of more modern origin. The seventh consists of 90 leaves, and is dated Samvat 1777. At the end of the sixth Adhyáya. Vargas 14—28 are wanting in this MS., but have been added afterwards by the original writer on two separate leaves. The eighth Ashṭaka consists of 104 leaves, without date. There are four different handwritings to be distinguished in this manuscript. Ashṭakas 3—7 are writien by the same hand, about the year A.D. 1720, at Benares. The name of the writer, however, is every where carefully scratched out with yellow ink. The last ten leaves of the sixth Ashṭaka are written by the same person, who copied the second Ashṭaka. The first and last Ashṭakas again are copied by a third writer: while some few leaves on white paper belong to a fourth and quite modern hand, and have probably been supplied by the Pandit employed by Dr. Mill.

S. 2. Another manuscript in the collection of Dr. Mill, now belonging to the Bodleian Library. This also is a complete copy of all the eight Ashṭakas. The first Ashṭaka consists of 103 leaves, without date. The second has 93 leaves, and is dated Śáka 1679 (A.D. 1757). The third fills 97 leaves, and is dated Śáka 1677. The fourth comprises 92 leaves, and is dated Śáka 1679. The fifth consists of 62 leaves; the sixth of 80 leaves; and the seventh of 76 leaves; all of them without dates. Leaves 12—37 in the seventh Ashṭaka have been supplied by a modern writer. The eighth Ashṭaka comprises 130 leaves, and is dated Śáka 1776. In this manuscript also four different writers can be distinguished: to the first belong Ashṭakas 1—4; to the second, Ashṭakas 5—7; to the third, the eighth Ashṭaka; and to the fourth, the modern additions in the seventh Ashṭaka.

S. 3. The third manuscript belongs to Mr. Colebrooke's collection, deposited in the Library of the East-India-House, where it forms Nos. 129—132 of the Catalogue. No. 129 contains the Grihya-sútras of Ásvaláyana and the first and second Ashṭakas. The first Ashṭaka contains 59 leaves, and is dated Samvat 1802: the second contains 60 leaves, and is of the same date. No. 130 contains the third and fourth Ashṭakas; the former of 53, the latter of 54 leaves;

both dated Samvat 1802. No. 131 contains Ashṭakas 5 and 6; the former of 54 leaves, the latter of 56 leaves; both dated Samvat 1802. No. 132 contains the Sarvánukrama and Ashṭakas 7 and 8; the former of 56, the latter of 61 leaves; equally dated Samvat 1802. The whole Manuscript was evidently written by one person, about the year 1745: his name is scratched out, but seems to have been Somagopakáśinátha.

II. *Pada-text.*

P. 1. A manuscript in Dr. Mill's collection, now belonging to the Bodleian Library. It contains all the eight Ashṭakas. The first Ashṭaka consists of 97 leaves, and is dated Samvat 1727, Śáka 1592 (A. D. 1670). The second contains 129 leaves, and is dated Samvat 1728. The third fills 109 leaves, and is not dated. The fourth has 107 leaves, and is dated Samvat 1727. The fifth contains 84 leaves, without a date; the last leaf having been supplied by a modern hand. The sixth Ashṭaka comprises 89 leaves, and is not dated. The seventh consists of 95 leaves, and is dated Samvat 1672 (A. D. 1615). It was difficult, however, to read the last page, which contains the date and the name of the writer, but has been pasted over with yellow paper[c]. The eighth Ashṭaka contains 86 leaves, but breaks off with the last Varga of the seventh Adhyáya. The rest has been supplied by a modern manuscript, without accents, dated Samvat 1857, Śáka 1722 (A. D. 1800). In this manuscript also four different hands may be traced. The oldest part is the seventh and eighth Ashṭakas, written in A. D. 1615: next come Ashṭakas 1—6, written in A. D. 1760: thirdly, the supplement of the eighth Ashṭaka, written in A. D. 1800: and lastly, some few leaves of still more modern origin, probably copied by a Pandit employed by Dr. Mill.

P. 2. A complete copy of the Rig-veda-sanhitá, bequeathed by John Taylor M. D., to the Hon. Court of Directors of the East-India-Company, and entered

[c] All that can be read is स्वस्ति संयत १–१२ वर्षो शे - - - श्रीवृद्ध - गरवास्तव्य । स - - - ज्ञातीयव्यवपुरुषे - -. Even this has been traced over with ink, by which it became still more illegible. Afterwards another writer has given the date at which the accents were added, but there also we can only read संवत १६— etc. To judge from the handwriting of the MS. and from the fragmentary passages which are still legible, I conclude the MS. to have been written by Damodara-Sadáśiva, who generally signs himself श्रीवृद्धनागरवास्तव्यं आभ्यंतरनागरज्ञातीयव्ययपुरुषोत्तमसुतसदाशिवेन (or दमोदरेण or दमोदरसदाशिवेन) लिखितं । He was still alive in Samvat 1706.

in the Catalogue under No. 2032. It has been copied at Bombay, and is bound together in one large volume: its date is from Śáka 1736 to 1737: the name of the writer Rámabhaṭṭa, called Śebenkara.

It was not necessary for an editor of the Rig-veda to collate a greater number of MSS., or to classify them according to their age and origin. I have seen nearly all the MSS. of the Rig-veda which exist in Europe, and I feel convinced that no use can be derived from them as manuscripts, because all of them are but transcripts, more or less carefully executed, of one and the same text[d]. If there were, as in other Sanskrit works, corrupt passages, on which doubts might exist, a comparison of the Sanhitá-text with the Pada-text, or a reference to the Commentary, would have been sufficient to remove such doubts. But so far from this being required, the reading of the Sanhitá-text, the Pada-text, and the text which the commentator had before him, can each be established with such certainty by the MSS., that it would be wrong to correct even the smallest differences in the quantity or accent of vowels which occur occasionally between these three texts, but which are always supported by the full testimony of each class of MSS. There are instances in almost every hymn where a long vowel occurs in the Sanhitá-text, while the Pada-text has a short one. The commentator considers these productions of a short vowel as Vaidik liberties. But in some cases where a long vowel seems to be regular, and the Pada-text has notwithstanding a short one instead, this shortening is equally pronounced by Sáyaṇa as a Vaidik irregularity: for instance, Rv. 1, 37, 11. च्यवयंति instead of च्यावयंति[e]; 1, 61, 14. भूम instead of भूमा[f]. Instances occur where the text followed by the commentator is different from the text of our MSS. Rv. 1, 48, 5. पद्वत is both in the Sanhitá and Pada-text an oxytone, while Sáyaṇa explains it as a paroxytone. Rv. 1, 116, 1. the Pada-text has सभेगाय, while, according to Sáyaṇa, the author of the Pada-text (Śákalya) must have read सभेऽगाय. Rv. 1, 61, 9. the Pada-text ought to have, according

[d] The late Dr. F. Rosen, who had undertaken an edition of the Rig-veda, part of which was published after his lamented death in 1837, has for the same reason given no various readings for the text of the Sanhitá: and I may also quote Dr. A. Kuhn of Berlin, on the same subject, as a later but not less weighty authority on questions connected with Vaidik literature; Jahrbücher für wissenschaftliche Kritik, Berlin, 1844, p. 131.

[e] पदकाले ह्रस्वश्छांदसः ॥

[f] छांदसमत्वं पादकारैः कृतं ॥ Cf. 1, 84, 4. मादने; 1, 84, 6. the short *i* in रथितर instead of रथीतर is called अवग्रहसमये छांदसं ह्रस्वत्वं; while 1, 11, 1. रथीतमं रथीनां is explained by रथशब्दादुत्पन्नस्येनश्छांदसं दीर्घत्वं । Cf. Páṇini, VIII. 2, 17, 2.

to Sáyaṇa, स्वऽस्तात्, but all the MSS. have खऽस्तात्. Rv. 1, 52, 10. रोदसी has no accent in the Sanhitá and Pada-text, while Sáyaṇa explains it as if it were a paroxytone[g].

Notwithstanding the great accuracy with which the MSS. are written, occasional mistakes occur. Letters, syllables, and words are sometimes left out, sometimes misplaced in one or other of the MSS., owing to inevitable inadvertencies on the part of the copyist[h]. They never occur, however, in more than one MS. in each instance, and I know only one case in the first Ashṭaka where a real *varietas lectionis* might seem to have arisen in this manner, Rv. 1, 112, 19: MSS. S. 1, 2, 3. and P. 1. have ऊहथुः, which Rosen has adopted; while P. 2. and the Commentator have निऽऊहथुः.

As to the spelling of words, I have endeavoured as much as possible to preserve consistency, and never to deviate from the general laws of Sanskrit orthography, except where Vaidik peculiarities were based on the unanimous authority of all the MSS. Each MS. has its own peculiar character, which must be known and taken into account in order to make proper use of it[i].

[g] Sáyaṇa does not explain how रोदसी could be without an accent in the text, though generally he endeavours to account for irregular accents; that is to say, to reconcile them with the rules of Pâṇini. See, for instance, 1, 61, 1. where he even admits of a स्वरश्चिंतनीयः ॥

[h] This the writers of MSS. admit themselves in several cases. For although they generally say at the end of a MS. that they have copied it as it was in the original, and that it is not their fault if mistakes occur, yet they complain frequently of the hardships and difficulties of their work. I subjoin a few specimens of their poetry:

सहृदयभावात्मतिविभ्रमाद्वा यदार्थहीनं लिखितं मयात्र ।
तत्सर्वमार्यैः परिशोधनीयं कोपं न कुर्युः खलु लेखकेषु ॥

"If I have written a mistake here, because I could not see, or my mind was wandering, noble persons may correct it all, but let them not be angry with writers."

मुनेरपि मतिभ्रंशो भीमस्यापि पराजयः ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयतां ॥

"A Muni even may err; Bhima even was vanquished: be it right or wrong, no fault must be given to me."

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न विद्यते ॥

"As I have seen the book, so I have written it; be it right or wrong, it is not my fault."

भग्नपृष्ठकटिग्रीव स्तब्धदृष्टिरधोमुखं ।
कष्टेन लिखितं ग्रंथं यत्नेन प्रतिपालयेत ॥

"My back, my hips, and my neck are broken; my sight is stiff in looking down: keep this book with care which has been written with pain." Others read बद्धमुष्टिः instead of स्तब्धदृष्टिः.

[i] Rv. 1, 50, 6 for instance, in order to support a conjecture, great stress has been laid on the fact that in भुरण्यंतं जनाँ अनु, the long *a* of जनाँ has been added by a later hand in S. 3. (Cf. Zur Literatur und Geschichte des Veda. Drei Abhandlungen von R. Roth, p. 82.) Yet though S. 3. is certainly a very accurate copy, it could scarcely be expected to have preserved traces of an older

Some MSS., for instance, avoid certain groups of double letters, not only where the reduplication arises from phonetic laws, but also where two independent letters have been joined together. This shorter way of writing occurs not only in Vaidik, but also in other MSS., and cannot be considered as affecting the pronunciation of words, because the simple letter makes the preceding vowel long, as if a double letter had been written. I have seen, therefore, no reason for adopting this way of spelling in a printed edition, because other Vaidik MSS. frequently give the double letters where they ought to stand, according to the laws of Sanskrit grammar, and because a deviation from these laws might lead to confusion. Some MSS. write a double aspirate, where, according to the laws of Sanskrit grammar, the first of the two letters ought not to be aspirated. I mean forms like अविढ्ढि instead of अविड्ढि etc. As good MSS., however, restrict this peculiarity to the group ढ्ढ instead of ड्ढ[k], and as in this case also carefully written MSS. preserve the regular form ड्ढ, it would have been to no purpose to give up a general phonetic law (on the incompatibility of two aspirates) for what may be after all a mere difference in writing[l]. But although I have tried to be as consistent as possible in the way of spelling, yet I have submitted to the authority of the MSS. in cases where their testimony was quite unanimous,

reading than Yáska had before him in the Nirukta, where this verse is quoted (Nirukta, xii. 22) with the long *a*. The fact is, as will appear from a more accurate collation of this MS., that S. 3. dispenses most frequently with writing the long vowel in cases of Anunásika in words where there can be no doubt that the long vowel is necessary, and where all the other MSS. have it. Instances of this occur continually, and have generally been corrected by the writer who added the accents; as in 1, 48, 14. स्तोमँ अभि; 1, 45, 1. रुद्राँ आदित्याँ उत; 1, 44, 1. देवाँ उषर्बुधः; 1, 44, 4. देवाँ अच्छा; 1, 44, 7. देवाँ इह; 1, 47, 5. अस्माँ अयतं, etc. Sometimes the long vowel is not written, but, according to the laws of Vaidik grammar, the quantity is marked by a particular sign: Rv. 1, 63, 1. महाँ२ऽइंद्र; 1, 62, 12. सुमाँ२ऽअसि; 1, 59, 6. मघवाँ२ऽअधूनोत्; here also another hand has added the long vowel. Rv. 1, 59, 1. again, we find जनाँ३ऽउप instead of जनाँ उप. This does not at all exclude the possibility of an old mistake in this verse (Rv. 1. 50, 6), but it shows that, in order to make proper use of a MS. it is not sufficient to collate a few passages, but that the whole character of a MS. must be studied by a careful collation before it can be used as an authority for particular passages.

[k] Other groups, which also occur occasionally, but never in all the MSS. at the same time, are ध्य, ख्ख, and च्च. Cf. Benfey, Sáma-veda, p. xxxiv.

[l] ढ्ढ may be meant for ड्ढ, in the same way as ख्ख is meant frequently for क्ख. Bukka's name is spelt बुख्ख and बुक्ख; and in words like शख्खरी and शक्खरी it is often difficult to say which form is meant; as words like पृथख्खृत also, where there can be no doubt as to the double *k* and its pronunciation, are written पृथक्खृत.

particularly with regard to nasal letters, because in such cases there was reason to suppose that certain peculiarities, if exhibited by all the MSS., might rest upon the authority of that Prátiśákhya to which our MSS. belong. Whether with the conflicting testimonies of old Grammarians, quoted in the Prátiśákhyas, it will be possible to restore the whole Sanhitá of the Rig-veda in such a manner as to include all the minute niceties of spelling prescribed by different members of each Śákhá, is a question on which I should feel inclined entirely to submit to Professor Roth's authority, who has devoted much time and learning to this interesting branch of Vaidik literature.

There is only one case where I thought it better to deviate from the way of spelling adopted by the Vaidik MSS: this is with regard to the Avagraha. The Vaidik MSS. use the Avagraha where a hiatus arises from two vowels meeting at the end and beginning of two words, while the common custom has been to use this sign to mark the elision of an initial *a*, which has been dropped in order to avoid a hiatus between it and a preceding vowel. If the Vaidik use of the Avagraha had been adopted, it would have been necessary to introduce a new sign for cases of real elision, which the Vaidik MSS. do not mark at all. Instead of this I have preferred to retain the Avagraha where it is of real use in marking the place where a letter has been dropped, and to exclude it where it has no other purpose than that of marking a hiatus [m], which is quite as clear to the eye without any such sign.

I have now to state the principles which I have followed in editing the Commentary of Sáyaṇa. If the MSS. of the Rig-veda are generally the best, the MSS. of the Commentaries are nearly the worst to be met with in Sanskrit libraries: they have generally been copied by men who did not understand what they were writing, and the number of mistakes is at first sight quite

[m] The Avagraha is used in Vaidik MSS., not only where an elision ought to have taken place, according to the general laws of Sanskrit grammar; (for instance, हव्योऽअर्यः, सुवीरेऽअति॑. येऽअपरीषु, पृथिवीऽउत;) but also after those vowels which Sanskrit grammarians call pragrihya, and which are never affected by a following vowel, like अजरयूऽअयातं, समानबंधूऽअमृतेऽअनूची, अस्मेऽआयुः. The same sign is put also after a vowel which has been modified by the influence of one immediately following, as अस्माऽअधत्तं, विष्णऽआधत्तं, दुरोणऽआवः; and even where a final consonant has been dropped on account of a following vowel, as देवाऽअनु, त्रिशाऽआजिगाति, कुंभींऽअभिंचत. By being employed for so many purposes, and this not at all consistently, the Avagraha, as it stands in Vaidik MSS., is of little use.

discouraging. No class of writings would have needed more to be copied by men who were masters of their subject than commentaries such as these, which abound in short extracts, taken, without any further reference, from other books on grammatical, etymological, ceremonial, theological, and philosophical subjects. Most of these quotations are only detached fragments, full of technical expressions, and often quite unintelligible by themselves. In order to understand, nay frequently in order to read these passages, it was necessary to have recourse to the works from which they were taken. Some of these works were already published, but others existed only in MS., and had first to be analysed, and furnished with alphabetical indices, before any use could be made of them. By this process, however, a double advantage was gained. In most cases a comparison with the work from which passages were quoted served to correct the mistakes of the Commentary; while in other cases a frequent recurrence of the same quotation in the Commentary furnished also the means of correcting false readings in the original works, or supplied, at all events, a well-authenticated *varietas lectionis.* Sometimes, however, the same passage is quoted differently in different places of the Commentary. This may be accounted for by the fact that Indian authors trust so much to their memory as to quote generally by heart. Such slight differences, therefore, I have left unaltered whenever they were supported by the testimony of the best MSS.

As to the other part of the Commentary, which contains the original explanations of Mádhava, as edited by Sáyaṇa, a similar advantage for a critical restoration of corrupt passages was derived from the frequent repetition of the same explanations in different hymns, which also made it easier to become familiar with the style of the Commentator, and his whole way of thinking and interpreting the Veda. It was a further advantage that the MSS. were most numerous for the first book of the Commentary, and, as Sáyaṇa says with regard to the first Adhyáya of his Commentary, व्युत्पन्नस्तावता सर्वं बोद्धुं शक्नोति बुद्धिमान् "he who has got through this, can understand the rest," it might, at all events, be said with some truth, that after having worked through the first Ashṭaka, an editor may go on to the rest with a smaller number of MSS.

For the first Ashṭaka I had twelve MSS. However, we have learnt from Greek and Latin philology that a great number of MSS. is not at all desirable for critical purposes. In most cases those numerous MSS. which have been

collated for classical authors have only served to spoil the text; to make the reading of doubtful passages still more doubtful; and to give rise to a mass of conjectural readings, based either upon the authority of the transcriber of a MS., or upon that of an ingenious editor. In this manner an immense deal of labour has been wasted in classical philology; so that now, after the simple rules for using MSS. have been laid down by a new school of critical philologers, such as Bekker, Dindorf, Lachmann, and others, almost all the old editions of classical authors have become useless for critical purposes, with the exception of some of the *editiones principes*, which, as they simply reproduced one MS., though generally a very bad one, can claim for themselves at least a certain degree of authenticity. Before MSS. can be used for critical purposes, it is necessary that they should themselves be examined critically, in order to determine their origin, their age, and their genealogical ramifications, and thus to fix their relative value. If it were possible to recover the original MS. of a work, as written by the author himself, there would be no need of criticism; we might dispense with all later MSS., and we should merely have to reproduce the original text, pointing out at the same time such mistakes as the author himself might have committed. But generally our MSS. are much later than the composition of the works which they contain, and, if compared with one another, they are found to differ from each other, partly in mistakes and omissions, partly in corrections and additions, arising, in the course of centuries, from the hands or heads of ignorant or learned transcribers. For the most part these various readings are not peculiar to one or the other MS. only, but the same mistakes occur generally in several MSS. at the same time. Now, if there are, for instance, certain MSS. which omit a certain number of passages that have been preserved in others, we may safely conclude that the MSS. which coincide in omitting these passages flow from the same original source. But out of the number of MSS. which thus coincide in omitting certain sentences, some may again differ in other characteristic passages, and thus form new classes and subdivisions. By carefully collecting a large number of such characteristic passages, all the MSS. of an author arrange themselves spontaneously, and form at last a kind of genealogical series, where each has its proper place, and commands, according to its position, but not according to its age, its proper share of authority. For a MS. may be of modern date, yet if by a comparison of certain classical passages it can be shown to have been

copied immediately from an old MS., it inherits, so to say, a greater share of authority than MSS. which, though of greater age, are of more distant relationship. Here, however, a distinction must be made between the authenticity and the correctness of a certain reading. As the date of the oldest MS. reaches but seldom to the age of the author of the work, we can only expect by a critical, and, so to say, genealogical arrangement of MSS., to arrive at the best authenticated, not at the original and correct text of an author. It sometimes happens, indeed, that all the MSS. of a work can be shown to have originated from one MS. which is still in existence, as is the case, for instance, with Sophocles. But most frequently there remain in the end two or more different groups of MSS., each with its own peculiar readings, and each group entirely independent of the other. In the former case the best that can be done in a merely critical edition is to reproduce the oldest and best authenticated MS. But it frequently happens, that even in the oldest MS., upon which all the others depend, mistakes occur, which have been corrected in more modern MSS., sometimes by mere conjecture, sometimes by using quotations from an author occurring in other works which have preserved a more ancient and more correct reading. Such passages are open to philological discussions, and have to be treated in notes. In the latter case, if there remain several independent branches of MSS., the task becomes more difficult; and as each class of MSS. may claim for itself the same degree of authenticity, it becomes the duty of an editor to choose in each particular case the reading of that class of MSS. which may seem to him most correct, and best in accordance with the general style of the author. Frequently, however, even in this case one class of MSS. will be discovered, which by its general character of correctness acquires a right to overrule the testimony of the other classes in doubtful passages. All this must be finally settled before a critical edition of any author can be commenced; and it is necessary, therefore, for an editor to collate most carefully even those passages where the various readings of MSS. bear the evident character of mere mistakes, but where, notwithstanding, the omission of a single letter may often serve to point out the connection of a certain class of MSS. Grave errors and long omissions are generally much less characteristic as marking a family likeness between certain MSS. than small and insignificant mistakes, because the former have often struck those who copied a MS., and have induced them to correct erroneous readings on their own authority, or to supply important

omissions from other MSS., in case they could be procured. The more insignificant mistakes, on the contrary, were more likely to be overlooked and to remain unaltered.

With regard to the twelve MSS. of the Commentary to the first Ashṭaka of the Rig-veda, I have only succeeded in reducing them to three independent classes. It is not very likely that MSS. should still be found in India contemporaneous with Sáyaṇa, though, if we could trust native authorities, copies of Sáyaṇa's works have been buried in the ground near Vidyánagara. Excluding these MSS., the existence of which is extremely problematical, I am convinced that there are no MSS. at present which have any claim to be considered as exhibiting the Commentary exactly such as it came from the hands of Sáyaṇa.

I shall proceed to give a list of those MSS. which I have made use of for this edition. I shall call the three classes, to which all the MSS. belong, A, B, and C, marking at the same time each particular MS. by its own number.

A.

A 2. A manuscript in four volumes, containing all the eight Ashṭakas. It was presented by Colebrooke to the library of the East-India-House, where it is entered under Nos. 2133—2136. It contains also the text of the hymns, but not throughout. In some Ashṭakas the accents also are marked. It is dated between 1747 and 1760 [n], and has been written by different hands at Benares. It is on the whole the most valuable MS., and the only one which represents this first class of MSS. throughout the whole of the Commentary, though in some of the later Ashṭakas long passages are wanting in this MS. also.

For the first Ashṭaka I have to include in this class—

A 1. An old MS. of the National Library at Paris, containing the first

[n] First Ashṭaka:
शाके विष्णुपदागरागकुमिते मासे नभस्याभिधे ।
पक्षे मेचकसंज्ञके मुनितिथौ वाचस्पतेर्वासरे ।
श्रीनारायणदीक्षितानुवचनादेतन्मुदा पुस्तकं ।
विश्वेशस्य पुरे व्यलीलिखदलं श्रीशंकरप्रीतये ॥
This gives Śáka 1673, or 1751 A. D.

Fourth Ashṭaka:
बालकृष्णाभिधेयेन स्वैरः संयोजितो मुदा ।
मार्गशुक्लत्रयोदश्यां नंदांगांगेंदुशाकके ॥
This gives Śáka 1669, or 1747 A. D.

Sixth Ashṭaka: संवत् १८०६ = 1749 A. D.

Seventh Ashṭaka: संवत् १८०९ वर्षे आश्विने मासे कृष्णपक्षे तृतीयायां तिथौ भौमवासरे लिखितमिदं पुस्तकं श्रीमन्नारायणदीक्षितपाठनकर्तृपनामेन स्वार्थं परार्थं च ॥ This gives 1752 A. D.

Eighth Ashṭaka: संवत् १८१७ माघमासे कृष्णपक्षे त्रयोदश्यां सोमवासरेऽयं ग्रंथः संपूर्णः । लिखितो राधकृष्णेन शास्त्रेण श्रीकाश्यां पुर्य्याम् ॥ This gives 1760 A. D.

Ashṭaka only. It is well written, and indeed gave me the first hope that a critical edition of Sáyaṇa might still be possible. It is dated Samvat 1625[o] (1682. A. D.), and is in many respects more useful than A 2. But, though of earlier date than A 2, it cannot be considered by any means as the original from which A 2. was copied: for although the omission of passages which stand in A 1. might be ascribed to the negligence of the transcriber of A 2, yet there are also whole lines which are left out in A 1, but which are not wanting in A 2. Both MSS. flow from one original source, and their authority is on the whole equal; though A 1, as being the earlier branch, has thereby some advantages over A 2. The absence of the other seven Ashṭakas in A 1. is a great loss for an edition of the Commentary.

To the same class must also be referred A 3, the MS. of the first Ashṭaka in Sir R. Chambers' collection, now in the Royal Library at Berlin. Of this old MS., which is in a very bad state of preservation, I possess no complete collation, but only short notes and extracts which I made before I had seen the MSS. at Paris and London, and before I was in a position to conceive the possibility of a critical edition of the Commentary. A comparison of several characteristic passages, however, shews the connection of this MS. with A 1. and A 2, with which it coincides in several of its right as well as of its wrong readings. As I was not able, however, to verify in each particular passage the reading of this MS., it is not to be understood as included in the general designation of class A. unless especially mentioned.

B.

The second class, B, is represented by two MSS., both of them complete copies of the Commentary. I owe my first acquaintance with this class of MSS. to the kindness and liberality of Professor E. Burnouf, who allowed me, during my stay at Paris, to copy and collate the MS. of Sáyaṇa in his possession. Besides several passages which are corrected or supplied by this MS. in places where mistakes or omissions occur in A. or C, it contains also a number of passages which evidently bear the character of later additions: they stand frequently without any connection with the rest of the Commentary, and I had no doubt that they owed their origin to marginal notes which had been added by Brahmans while studying the Veda, and which in later copies had been

[o] विद्याशंकरचरणेभ्यो नमः ॥ संवत् १६२५ वर्षे चैत्र- शुदि ९ गुरौ । अद्येह श्रीस्तंभतीर्थवास्तव्य श्रीश्रीगौडज्ञातीय पं॰ यदेवसुत पुरुषोत्तमलिखितं ॥ ॥ शुभं भवतु ॥ कल्याणं भूयात् ॥

incorporated into the text, though sometimes inserted in a wrong place. This supposition I found fully proved by another MS., which has lately been added to the library of the East-India-House, and which is evidently the very MS. from which Professor Burnouf's copy was taken. In this MS. all those spurious passages, which occur neither in A. nor C, have not yet been incorporated into the text, but appear still as marginal notes. Nay, it is even easy to see how, by mistaking the signs of reference, the transcriber was led to misplace some of these additions. I call the MS. of the East-India-House B 1, and that of Professor Burnouf B 2; though the latter is on the whole so carefully copied, that both may be considered as one MS.

C.

The third class of MSS. is much more numerously represented, but consists almost entirely of modern copies, executed, with more or less care, for the use of European scholars. Yet this class of MSS. also was indispensable for restoring a complete and correct text of Sáyaṇa: for though omissions and mistakes are very frequent, yet some difficult passages are given more correctly in this class of MSS. than in either A. or B; while others, which are partly omitted in A. or B, receive occasionally great help from a comparison of C. Modern additions occur, but very seldom, and their late origin is so evident that they cannot be mistaken. The following is a list of this last class of MSS.

C 1. A complete copy of the Commentary in the National Library at Paris. It is advantageously distinguished from the rest, in so far as some very considerable omissions common to all the C. MSS. have been supplied in C 1. from another MS. Yet there can be no doubt that, with these exceptions, all the rest of this MS. descends from the same original source as the other C. MSS. There is, for instance, a long omission at the end of the fourth Adhyáya of the first Ashṭaka: all the C. MSS. break off in the third verse of the twenty-fifth Varga (p. 534 of my edition), with the words दासीभारादि, so that twenty pages are altogether wanting. It is difficult to account for this omission, and I suppose this loss to have happened very early, because in A. and B. also, where the Commentary goes on to the end of the fourth Adhyáya, there is a peculiarity in the style of the Commentator not quite in accordance with the rest of his work. That this omission has been supplied in C 1. from a different MS. is evident, and can be traced even in the smallest particulars. Thus, for instance, throughout the whole of this supplement the merely grammatical part of the

Commentary is always divided by ॥ ॥ from the rest, while in all the rest of this MS. the beginning of the grammatical explanations is not marked at all.

C 1 *b*. A second MS. of the National Library at Paris, comprehending the first Ashṭaka only, and very negligently written.

C 2. The next MS. of this class is a copy which Dr. Mill brought over from India, and which he kindly lent me for my edition. It will hereafter be deposited in the Bodleian Library at Oxford, for which the whole collection of Dr. Mill's Sanskrit MSS. has been lately purchased. It contains all the eight Ashṭakas complete, with the usual omissions of the C. MSS., and is written very carefully and distinctly.

C 3. One volume, containing the first Ashṭaka only. It belonged formerly to the Sanskrit College at Calcutta, afterwards to Professor Wilson, and is now deposited in the Bodleian Library.

C 4. A complete copy of Sáyaṇa's Commentary, forming Nos. 78—86. in Professor Wilson's collection of Sanskrit MSS. in the Bodleian Library. It is dated Samvat 1890 = 1833 A. D.

C 5. Another copy belonging to the same collection, and entered in the Catalogue under Nos. 57—60. It comprehends the first, third, and fourth Ashṭakas only; the second being supplied by another MS., No. 74, which contains six only out of the eight Adhyáyas.

C 6. A Bengali MS., containing the text and commentary of the first two Adhyáyas of the first Ashṭaka. This likewise forms part of Professor Wilson's collection, and is entered in the Catalogue of the Bodleian Library under No. 75.

That all these MSS. must be considered as separated from the MSS. of Sáyaṇá himself by at least one degree, I conclude from the existence of such mistakes as are common to all the three classes of our MSS. I do not mean to say that Sáyaṇa may not himself have committed mistakes in writing his commentary. On the contrary, there are mistakes in all the MSS. which m[illegible] probably rest upon Sáyaṇa's own responsibility. For instance, Rv. 1. 114, 4, the grammatical explanation of दुरेवैः evidently contains a mistake: yet all the MSS. quote the same Sútra of Páṇini (III. 3, 126), and there can be little doubt that Sáyaṇa himself is the author of this wrong quotation[p]. If mistakes of this

[p] Instead of दुरुपसृष्टादेतेरीषद्दुःसुष्विति खल्, Sáyaṇa ought to have written इण् गतौ । इण्शीङ्भ्यां वनिति भावे वन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं । बहुव्रीहौ गतिकारकोपपदादित्युत्तरपदप्रकृतिस्वरत्वं ॥

kind occur only in one class of MSS., or in two, but not in all three at the same time, it must frequently remain uncertain whether they are to be laid to the charge of Sáyaṇa or his transcribers. For instance, Rv. 1, 97, 3. A. has संज्ञापूर्वकस्य विधेरनित्यत्वान्नृडभावः, while B. and C. read आगमानुशासनस्यानित्यत्वान्नृडभावः. Sáyaṇa might have written both, but I have retained the reading of A, as, in cases like this, A. generally represents the more authentic reading, B. and C. being more liable to corrections. Rv. 1, 102, 3, however, I have adopted the reading of B. and C, ममम्या डादेशः, instead of विभक्त्याकारः (A 2), because, as A 1. coincides here with B. and C, the reading of A 2. can only be considered as resting upon the authority of the transcriber of A 2, and not upon the collective authority of A. Sometimes old mistakes have been corrected in the more modern MSS. Rv. 1, 66, 3, A. and C. read समानं माद्यंत्यस्मिन्निति समदः संग्रामाः, while in B. the grammatical fault, अस्मिन्, has been corrected into एषु. Though अस्मिन् may have originated with Sáyaṇa himself, I have of course adopted the reading of B. I shall now quote, however, some passages where mistakes common to all the MSS. cannot be ascribed to the author, but must have crept into the MSS. before any of our present copies were written. There are evident traces of corruption in the text of the Commentary in explaining the grammatical formation of भृमना, Rv. 1, 110, 2. All the MSS. omit इतीकारलोपो, but have yet the च after भृभावः, which leaves no doubt that इतीकारलोपो must have preceded it. Again, Rv. 1, 115, 5, where अभिचक्षे is explained, the MSS. have only आभिमुख्येन, which explains merely the first part of अभिचक्षे, and necessarily requires the addition of either द्रष्टुं or दर्शनाय, or some similar word, to explain the second part. This, however, is omitted in all the MSS., and I was obliged to supply it by conjecture. There is one passage towards the end of the first Ashṭaka (Rv. 1, 120, 7.) where the omission of several letters is marked in the A. as well as in the C. MSS., and where the B. MSS. also, though they do not mark the omission, are of no use for restoring the text. In this case I was unable to fill out this omission, and I have marked it in the same way as the MSS. do[q]. Sometimes old omissions have been supplied by the transcribers, but not always successfully. Rv. 1, 99, 1. all the MSS. in explaining अरातीयतः read इति शस उदात्तत्वं, thus making अरातीयतः an accusative plural, while it ought to be the genitive singular, and therefore इति ङस

[q] There is probably also a corruption in the words कंचनार्त्तं which precede the *lacuna*. One might conjecture कञ्चनार्त्तं, but this must remain uncertain till new MSS. can be procured.

उदात्तत्वं. That ज्ञात is indeed nothing but a conjecture of the copyists, becomes clear when we see that A 2. has इति - - उदात्तत्वं, thus marking an old omission in the original MS. from which it was copied, without any attempt to correct it. Such blanks occur most frequently in A 2, and in some cases evidently because the MS. from which it was copied was worn off at the margin, so that the blanks return always at regular intervals, that is to say, always at the end of a line of the original MS. Yet although in many other respects too, the A. MSS. exhibit the best authenticated reading, yet it is impossible to consider either B. or C. as descending from A, on account of the omissions, additions, and mistakes which are peculiar to each of the three classes of MSS., and have never found their way from one class into another. What I had to do therefore as an editor was first to find, by a collation of the different copies of each class of MSS., the reading of each of the three principal classes, and afterwards to choose that reading which, by weighing the authority of the three classes, and by taking into account the whole style of Sáyana, seemed to be the most authentic. Considering, however, that this edition of the Commentary is not only a critical work, but at the same time destined to be useful for studying the Veda, I have never carried these critical principles so far as to leave a corruption in the text, which, though it might rest upon the authority of the best MSS., was still so evident, that any body, if acquainted with the rules of the Sanskrit language, would have seen it, and, if conversant with the style of Sáyana, would have safely corrected it. I have even added some few passages, which, though they belonged only to one class of MSS., B. or C[r], yet seemed to be useful where

[r] Rv. I. I. I. (p. 44.) the quotation तथा च पठ्यते etc., on the change of इ into ऊ, belongs only to the B. MSS., yet I have not suppressed it, as it seemed to be useful. Dr. E. Röer, who had begun an edition of Sáyaṇa's Commentary in Calcutta, (the first two Lectures of the Sanhitá of the Rig-veda, in the Bibliotheca Indica, fasciculus 1–4. Calcutta, 1848.) but who, on hearing of my edition, has kindly given up his own plan, and published instead his excellent edition of the Vṛihadáraṇyaka, has left out this passage, either because B. MSS. were not procurable at Calcutta, or because he followed different principles of criticism in his edition. Again, Rv. I. 23, I. the explanation of तीव्राः occurs only in the C. MSS., and it is evident, from the quotation of the Manoramá, that this passage could not come from the hands of Sáyaṇa: yet I thought it necessary not to suppress it on account of the accent. If तीव्रः were formed after Uṇ. S. II. 29, we should expect it to be a paroxytone; but it is formed by रक्, and not by रन्, in the same way as ऋज्रः and भद्रः, which are also oxytones. Dr. Röer gives the explanation of तीव्राः, but with some slight differences, which must be peculiar to his own MSS.

they stood. So that I may safely assert, that whatever good was to be found in the MSS. will be found in this edition, while much that was faulty in them has been corrected.

The laws of Sandhi and other euphonic laws I have endeavoured to observe in the same way as they have been practically carried out in the best Sanskrit MSS., considering it necessary, in a work like that of Sáyaṇa, to avoid the innovations of European, as well as the antiquated subtleties of Indian grammarians. I have also followed the custom of the MSS., which sometimes suspend very properly the laws of Sandhi in order to avoid certain combinations of words, by which either single words or the structure of whole sentences might become obscure and doubtful. In this manner the Sandhi becomes for the Sanskrit what punctuation is for other languages, only it is as difficult to lay down general laws for the one as for the other.

I have now only to mention those works which I made use of for verifying the quotations in Sáyaṇa's Commentary. There is first of all Páṇini, whose grammatical rules are most frequently quoted by Sáyaṇa, sometimes at full length, sometimes only with a few words by way of reference[*]. I have derived great advantage for verifying and understanding these technical rules from Professor Böhtlingk's edition of Páṇini, which, whatever may be said against some parts of it, is a most excellent and meritorious work. In the quotation of

[*] I must mention here one expression of Sáyaṇa's, which occurs very frequently, but has given rise to doubts, and is, as it seems, not yet understood rightly. There are two rules of Páṇini's, consisting of the words आमंत्रितस्य च; the one (VI. 1, 198.) teaches that a vocative case has the accent on the first syllable; the other (VIII. 1, 19.) restricts this rule, by saying that if a vocative be preceded by another word, and do not stand at the beginning of a Páda, it has no accent at all. In order to distinguish between these two rules, Sáyaṇa calls the accent prescribed by the former rule, which occurs in the sixth Ashṭaka, षाष्ठिकमाद्युदात्तत्वं; while the suppression of the accent, as prescribed by the latter rule in the eighth Ashṭaka, is called by him आष्टमिको निघातः or आष्टमिकं सर्वानुदात्तत्वं;—षाष्ठिक and आष्टमिक can therefore, as far as I can see, have no other meaning than "occurring in the sixth and occurring in the eighth Ashṭaka;" yet I find that, for some reason or other, Dr. Weber (in his edition of the Vájasaneyi-sanhitá, p. 7. lin. 6.) quotes Páṇ. VI. 1, 198. as the reference to आमंत्रितस्य च, where the effect of this rule is distinctly said to be आष्टमिको निघातः. Sáyaṇa uses also चातुर्थिकः in the same sense, as applied to a rule occurring in the fourth Ashṭaka of Páṇini: cf. Rv. 1, 84, 14, where the rule intended by the Commentator is in fact to be found in the fourth Ashtaka of Páṇini, IV. 2, 86; so that I have no doubt that Dr. Weber's quotation is to be considered as a misprint.

rules I have seldom had occasion to differ from his edition, and where I have done so, it has only been after mature consideration. In the quotation of the Várttikas also I have followed Professor Böhtlingk's edition, though it is to be regretted that he has left out many of them. These, however, could easily be found in the Calcutta edition of Páṇini, though for some of them I was obliged to have recourse to the Mahábháshya. In order to make this edition more useful, I have been induced to add the references from Páṇini in the first Adhyáyas, but afterwards I have done so only whenever a new rule was quoted for the first time. Professor Böhtlingk (now Counsellor of State to His Imperial Majesty the Emperor of Russia) could not render a more valuable service to Sanskrit philology, than by publishing a second and complete edition of Páṇini and his Commentaries, a work for which he must possess at present the most ample materials.

Two other collections of grammatical Sútras which are quoted by Sáyaṇa are the Uṇádi-sútras and the Phiṭ-sútras of Śántanáchárya. Both of them form part of the Siddhánta-kaumudí, as published at Calcutta, 1811, but they have been edited with much less care than Páṇini's Sútras. They have been reprinted in the Mémoires de l'Académie Impériale des Sciences de St. Pétersbourg, 1843 and 1844, by Professor Böhtlingk, but require, particularly the Uṇádi-sútras, a careful collation of MSS. and the help of commentaries. I have quoted the Sútras after Professor Böhtlingk's text, as being more accessible than the edition of the Siddhánta-kaumudí; but I have been continually obliged to have recourse to the MSS. and Commentaries of the Uṇádi-sútras[1].

A fourth grammatical work quoted by Sáyaṇa is the Dhátupáṭha. Of this work we have a most excellent edition by Professor Westergaard of Copenhagen, at the end of his Radices Linguæ Sanscritæ. I have quoted it only a few times, as it is very easy to find Sáyaṇa's quotations with the help of Prof.

[1] The MS. from which I have derived the greatest use is the Uṇádivṛitti, by Ujjvaladatta, a work which has been composed after a careful collation of old MSS. and Commentaries. It frequently points out words and Sútras as being of later origin, and as not occurring in old Commentaries. In our printed editions some Sútras are left out, others mixed with the Commentary; some are incomplete, others incorrect; and the meaning and formation of words are frequently mistaken. I merely mention this here to point out how unsafe it would be to make use of our present editions for lexicographic purposes; but I shall soon have an opportunity of returning to this subject, when examining the historical value of this and other works previous to Páṇini.

Westergaard's Radices. Sáyaṇa has himself written a Commentary on the Dhátupáṭha, before he wrote his Commentary on the Veda, and has frequently readings peculiar to himself, which he has defended in his Commentary[u], and which Prof. Westergaard also has generally mentioned in his edition.

Another work frequently used by Sáyaṇa for explaining the Veda is Yáska's Nirukta. This work existed only in manuscript when I began to print Sáyaṇa's Commentary, and as the greater part of the Nirukta is contained in Sáyaṇa's works, I was obliged to copy and analyse it, in order to verify Sáyaṇa's quotations. For though, with the help of the Sarvánukrama, all the passages from the Veda which are explained by Yáska may be traced back to their places in the text by referring to the Commentary on the Nirukta, where the Devatá and Rishi of each passage are given, yet it is very difficult, *vice versa*, to find always the place in the Nirukta where a passage of the Veda has been explained by Yáska; still more so when only a few words out of Yáska's explanations are quoted by Sáyaṇa. In the course of carrying this first volume through the press, a very correct edition of the Nirukta has been published by my learned friend Professor Roth in Germany. Prof. Roth had kindly informed me beforehand which of the two recensions of the Nirukta he would follow in his edition, and I am glad to find that consequently the references which I have always given, when the Nirukta is quoted by Sáyaṇa, coincide with his edition. In some few places Sáyaṇa's quotations from Yáska do not exactly correspond with the text of the Nirukta; but this is probably owing to Sáyaṇa's manner of quoting, which, as I have mentioned before, is generally done from memory. Although these differences were very slight, yet I could not, in accordance with the principles of my edition, take it upon myself to correct them. I have not added references to Sáyaṇa's quotations from the Nighaṇṭus, because these lists of Vaidik words are already arranged systematically under different heads, and thus require no further reference.

The same applies to Sáyaṇa's quotations from Kátyáyana's Sarvánukrama. I have myself compared every passage quoted from this Index of the authors, deities, metres, etc. of each hymn. But as this Index follows exactly the same order as the hymns of the Rig-veda, it would have been useless to add the references. In those cases also where Sáyaṇa quotes from the Sarvánukrama

[u] Sáyaṇa quotes his Dhátuvritti, Rv. 1, 42, 7. 1, 51, 8. 1, 82, 1. etc.

certain rules on metre and other subjects contained in the Paribhàshá, I have abstained from giving the references, because this Introduction to Kátyáyana's Sarvánukrama is likewise so well arranged, and so short, that it is as easy to find a reference as to find the quotation itself.

Another author whom Sáyaṇa quotes most frequently with regard to the Vaidik ceremonial is Áśvaláyana. There are twelve books of Śrauta-sútras, and four books of Gṛihya-sútras, none of them as yet published. Sáyaṇa quotes these Sútras continually, whenever a hymn or part of a hymn of the Rig-veda occurs which is to be employed by the Hotṛi-priests at a certain act of a sacrifice. Now if, like the Sútras to the Yajur-veda, the Sútras of Áśvaláyana followed the same order as the hymns, it would not have been difficult to find Sáyaṇa's quotations in the MSS. of Áśvaláyana's Sútras, and it would scarcely have been necessary to give a reference to each of Sáyaṇa's quotations from Áśvaláyana. But the Rig-veda has preserved its old arrangement and its genuine form, and has not been supplanted by a Hotṛi-veda, or a prayer-book for the Hotṛi-priests; such as the Yajur-veda is for the Adhvaryu-priests, and the Sáma-veda for the Udgátṛi-priests. If, like these two so-called ceremonial Vedas, the Rig-veda also consisted only of such passages as are requisite for the Brahmanic sacrifices, arranged in the same order as they have to be recited by the Hotṛi-priests at different ceremonies, the order of the hymns and of the Sútras, and probably also of the Bráhmaṇas, would be the same. But, as it is, the Rig-veda represents to us the old collection of sacred poetry, as it has been handed down by tradition in different Vaidik families, each of which claimed a certain number of ancient poets (Rishis) as their own. The poems therefore which have been incorporated in the Rig-veda-sanhitá are arranged according to the old families to which the poets of certain songs are said to have belonged, and consequently those passages which in later times were selected as most appropriate to be employed at the grand sacrifices by the Hotṛi-priests, are found scattered about in different parts of this old collection. Sáyaṇa, who of course knew Áśvaláyana's Sútras by heart, quotes these Sútras whenever one of those verses occurs which Áśvaláyana has prescribed for any one of the different sacrifices. But all that Sáyaṇa adds, to enable one who has not learnt by heart these sixteen books of ceremonial Sútras, to find their place in Áśvaláyana, consists in mentioning the name of the particular part of the ceremonial, and sometimes in giving the beginning of the chapter where a certain Sútra

occurs. By the help of Indices, however, I have succeeded in verifying these passages also, and I have always added the book and chapter where Sáyaṇa's quotations are to be found in Ásvaláyana's work. If, in the passages which Sáyaṇa quotes from the Bráhmaṇas, he had restricted himself to the Bráhmaṇas of the Rig-veda, I should have added references to these quotations also. But as Sáyaṇa takes his quotations promiscuously from all the Bráhmaṇas, whether connected with the Rig-veda or the Sáma-veda, Yajur-veda, and Atharva-veda, I determined rather to give no references whatever for these Bráhmaṇa passages than to do it incompletely [x]. Besides there was the difficulty that these Bráhmaṇas and Áraṇyakas, which as yet exist only in manuscript, are not always divided in the same manner; so that if I had adapted my references to the MSS., they might perhaps not have been found in accordance with the editions of several of the Bráhmaṇas which are now preparing for publication. In many instances I have derived great help from the original MSS. of the Bráhmaṇas, particularly as Sáyaṇa's quotations from these works are generally full of mistakes, arising from old Vaidik forms, which the transcribers did not

[x] It is not only on account of the vastness of the Bráhmaṇa literature that I found it impossible to verify every quotation, but there are many Bráhmaṇas of which there are not even MSS. to be procured in any of the European libraries. Some seem lost even in India, and are only known by name. With regard to the Bráhmaṇas of the Sáma-veda, I had stated, in a letter to my friend Professor Benfey at Göttingen, that there are eight. Prof. Benfey has kindly mentioned this in the Preface to his edition of the Sáma-veda; and as Dr. Weber has lately published some observations with regard to Prof. Benfey's and Mr. Colebrooke's statements on the Bráhmaṇa literature of the Sáma-veda, I owe it to Prof. Benfey and to myself to make good my assertion. Sáyaṇa, in his Commentary on the Sámavidhána-Bráhmaṇa, says:

अष्टौ हि ब्राह्मणग्रंथाः प्रौढं ब्राह्मणमादिमं ।
षड्विंशाख्यं द्वितीयं स्यात्ततः सामविधिर्भवेत् ॥
आर्षेयं देवताध्यायं भवेदुपनिषत्ततः ।
संहितोपनिषद्वंशो ग्रंथा अष्टावितीरिताः ॥

तत्र महाषड्विंशाख्ययोर्ग्रंथयोर्यज्ञाधिकारिणां स्वर्गादिफल-प्राप्तय एकाहाहीनसत्त्रात्मका महाक्रतवः प्रतिपादिताः । अथ सामविधानाख्ये तृतीये ब्राह्मणग्रंथे etc.

"There are eight Bráhmaṇas: the Prauḍha is the first Bráhmaṇa, (this means the large Bráhmaṇa, the Pañcavinsa, not proḍha as Dr. W. writes); the one called Shaḍvinsa or Shaḍvinsad-Bráhmaṇa is the second; then follows the Sámavidhi; then the Ársheya-Bráhmaṇa, the Devatádhyáya-Bráhmaṇa, and the Upanishat. These with the Sanhitopanishad and the Vansa are called the eight books. In the great Bráhmaṇa and the Shaḍvinsa the principal sacrifices, the Ekáha, Ahína, and Satras, have been taught by which persons, fit for offering sacrifices, may obtain life in heaven and other rewards. Now, in the third Bráhmaṇa, called Sámavidhána, other hymns will be enjoined, etc." This, I hope, will be sufficient to vindicate my assertion; for nothing is more likely to bring Vaidik studies into discredit than mere assertions and ingenious conjectures, of which I am sorry to say we have had already a great number even in print.

know and understand. Frequently, however, I found also that real differences existed between a passage as quoted by Sáyaṇa and the text as exhibited in the Bráhmaṇas, which can only be accounted for by the supposition that Sáyaṇa used some Bráhmaṇas in a Śákhá different from that which was accessible to me in manuscript.

I have only to express, in conclusion, my sincere thanks for the instruction, the advice, the encouragement, and assistance which I have received, in the course of my studies, from those distinguished Oriental scholars whose lectures I have followed at the Universities of Leipzig, Berlin, and Paris, as well as from those whom I met with there, and with whom I became connected by the ties of kindred pursuits and friendship. To mention the liberality with which foreigners are admitted to the rich collections of the National Library at Paris, the Library of the East-India-House in London, and the Bodleian Library at Oxford, would only be repeating what is known to all who have had occasion to consult these Libraries. Yet this ought not to prevent me from acknowledging the personal obligation under which I feel myself towards M. Hase, M. Reinaud and M. Munk at the National Library at Paris, and towards the Rev. Dr. Bandinel and the Rev. H. O. Coxe at the Bodleian Library at Oxford, for the kindness which I have received at their hands during my studies at Paris and Oxford. Private collections also of Sanskrit MSS. have been freely thrown open to me, in France by Professor Burnouf, in England by the Rev. Dr. Mill; and I avail myself of this opportunity to return my thanks to both of these eminent Oriental scholars. I have also thankfully to acknowledge the kind assistance of my learned friend Dr. Ch. Rieu at the British Museum, by whose careful corrections many misprints and mistakes have been removed, which, notwithstanding the great accuracy and ability of the compositor employed on the present volume, could scarcely be avoided in so extensive a work. Above all, however, my thanks are due to Professor H. H. Wilson. It would be presumptuous on my part were I to speak of his unequalled achievements in different branches of Oriental philology. But it would be ungrateful were I not to acknowledge the kindness with which he has assisted me in my undertaking. To his recommendation I owe the liberal patronage which the Honourable the Court of Directors of the East-India-Company have bestowed upon this work, and without which its publication would scarcely have been possible. While I was preparing this edition his books and manuscripts were at

my disposal; whenever I wanted advice, he was ready to give it; and he has even given his valuable time to correct the press. The English translation of the Rig-veda by Professor Wilson, which is soon to appear, will be a new proof of the interest which he has taken in this work. To have been allowed to enjoy his acquaintance, and to avail myself of his instruction, will always be to me the best compensation for what I have lost in living so long away from my own country and my old friends.

M. M.

OXFORD.
October 1849.

ऋग्वेदसंहिता

सायणाचार्यविरचितमाधवीयवेदार्थप्रकाशनामकभाष्यसहिता

शार्मण्यदेशोत्पन्नेनेंगलराडदेशनिवासिना भट्टमोक्षमूलरेण संशोधिता

श्रीमद्भारतवर्षाधिपतीनामनुमत्याच

उक्षतरणाभिधाननगरे

विद्यामंदिरसंस्थानमुद्रायंत्रालये मुद्रिता

संवत् १९०६ वर्षे

॥ प्रथमाष्टकः ॥

ओं

श्रीगणेशाय नमः

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ॥ १ ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥ २ ॥
यत्कटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः ।
आदिशन्माधवाचार्यं वेदार्थस्य प्रकाशने ॥ ३ ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात् ।
कृपालुर्माधवाचार्यो वेदार्थं वक्तुमुद्यतः ॥ ४ ॥
आध्वर्यवस्य यज्ञेषु प्राधान्याद्व्याकृतः पुरा ।
यजुर्वेदोऽथ हौत्रार्थमृग्वेदो व्याकरिष्यते ॥ ५ ॥
एतस्मिन्प्रथमोऽध्यायः श्रोतव्यः संप्रदायतः ।
व्युत्पन्नस्तावता सर्वं बोद्धुं शक्नोति बुद्धिमान् ॥ ६ ॥

अत्र केचिदाहुः । ऋग्वेदस्य प्राथम्येन सर्वत्राम्नातत्वादभ्यर्हितं पूर्वमिति न्यायेनाभ्यर्हितत्वात्तद्व्याख्यानमादौ युक्तं । प्राथम्यं च पुरुषसूक्ते विस्पष्टं । तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे । छंदांसि जज्ञिरे तस्माद्यजुस्तस्मादजायतेति । सहस्रशीर्षा पुरुष इत्युक्तत्वात्परमेश्वराद्यज्ञाद्यजनीयात्सर्वहुतः सर्वैर्हूयमानात् । यद्यपींद्रादयस्तत्र तत्र हूयंते तथापि परमेश्वरस्यैवेंद्रादिरूपेणावस्थानादविरोधः । तथा च मंत्रवर्णः । इंद्रं मित्रं वरुणमग्निमाहुरथो दिव्यः ससुपर्णो गरुत्मान् । एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुरिति ।

वाजसनेयिनश्चामनंति । तद्यदिदमाहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवा इति । तस्मात्सर्वैरपि परमेश्वर एव हूयते ॥ न केवलमृचां पाठप्राथम्येनाभ्यर्हितत्वं किंतु यज्ञांगदार्ढ्यहेतुत्वादपि । तथा च तैत्तिरीया आमनंति । यद्वै यज्ञस्य साम्ना यजुषा क्रियते तच्छिथिलं । यदृचा तद्दृढमिति । तथा च सर्ववेदगतानि ब्राह्मणानि स्वाभिहितेऽर्थे विश्वासदार्ढ्याय तदेतदृचाभ्युक्तमित्यृचमेवोदाहरंति ॥ मंत्रकांडेष्वपि यजुर्वेदगतेषु तत्र तत्राध्वर्युणा प्रयोज्या ऋचो बहव आम्नाताः । साम्नां तु सर्वेषामृगाश्रितत्वं प्रसिद्धं । आथर्वणिकैरपि स्वकीयसंहितायामृच एव बाहुल्येनाधीयंते । अतोऽन्यैः सर्वैर्वेदैरादृतत्वादभ्यर्हितत्वं प्रसिद्धं । छंदोगास्तु प्राथम्येन सनत्कुमारं प्रति नारदवाक्यमेवमामनंति । ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चेति । मुंडकोपनिषद्यप्येवमाम्नायते । ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इति । तापनीयोपनिषद्यपि मंत्रराजपादेषु क्रमेणाध्ययनमेवमामनंति । ऋग्यजुःसामाथर्वाणश्चत्वारो वेदाः सांगाः सशाखाश्चत्वारः पादा भवंतीति । एवं सर्वत्रोदाहरणीयं । तस्मादृग्वेदस्याभ्यर्हितस्यादौ व्याख्यानमुचितमिति तान्प्रत्येतदुच्यते ॥

अस्त्वेवं सर्ववेदाध्ययनतत्पारायणब्रह्मयज्ञजपादावृग्वेदस्यैव प्राथम्यं । अर्थज्ञानस्य तु यज्ञानुष्ठानार्थत्वात्तत्र तु यजुर्वेदस्यैव प्रधानत्वात्तद्व्याख्यानमेवादौ युक्तं । तत्प्राधान्यं तु काचिदृगेवाह । ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु । ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्व इति । एतस्या ऋचस्तात्पर्यं निरुक्तकारो यास्कः संक्षिप्य दर्शयति । इत्यृत्विक्कर्मणां विनियोगमाचष्ट इति । पुनरपि स एव प्रथमं पादं विवृणोति । ऋचामेकः पोषमास्ते पुपुष्वान् होतर्गर्चनीति । अस्यायमर्थः । त्वशब्द एकशब्दपर्यायो होतृविशेषणं । होतृनामक एक ऋत्विग्यज्ञकाले स्वकीयवेदगतानामृचां पुष्टिं कुर्वन्नास्ते । भिन्नप्रदेशेष्वाम्नातानामृचां संघमेकत्र संपाद्यैतावदिदं शस्त्रमिति क्लृप्तिं करोति । सेयं पुष्टिः । अर्चनीत्यमुमर्थमृक्शब्द आचष्टे । अर्च्यते प्रशस्यतेऽनया देवविशेषः क्रियाविशेषस्तत्साधनविशेषो वेत्यृक्शब्दव्युत्पत्तिरिति ॥ अथ द्वितीयं पादं विवृणोति । गायत्रमेको गायति शक्वरीषूद्गाता गायत्रं गायतेः स्तुतिकर्मणः शक्वर्य ऋचः शक्नोतेस्तद्यदाभिर्वृत्रमशकद्धंतुं तच्छक्वरीणां शक्वरीत्वमिति विज्ञायत इति । अस्यायमर्थः । उद्गातृनामक एक ऋत्विग्गायत्रशब्दाभिधेयं साम शक्वर्य इति शब्दाभिधेयास्वृक्षु गायति । धातूनामनेकार्थत्वेन

स्तुतिक्रियावाचिनो गायतिधातोरुत्पन्नो गायत्रशब्दः। शक्करीशब्दस्तु शक्नोतिधातोरुत्पन्नः। वृत्रं शत्रुं हंतुं शक्नोत्याभिर्ऋग्भिरित्येवा व्युत्पत्तिः कस्मिंश्चिद्ब्राह्मणे विज्ञायत इति ॥ अथ तृतीयं पादं विवृणोति। ब्रह्मैको जाते जाते विद्यां वदति। ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हतीति। अस्यायमर्थः। ब्रह्मनामक एक ऋत्विक् जाते जाते तदा तदोत्पन्ने यज्ञे प्रस्तुते प्रणयनादिकर्मणि विद्यामनुज्ञां वदति। ब्रह्मन्नपः प्रणेष्यामीत्येवं संबोधितः सन्नों प्रणयेत्यनुजानाति। स च ब्रह्मा वेदत्रयोक्तसर्वकर्माभिज्ञः। तस्माद्योग्यतां दृष्ट्वा तत्तदनुज्ञातुं सति प्रमादे समाधातुं च समर्थ इति। तत्र सामर्थ्ये छंदोगा आमनंति। एष एव यज्ञस्तस्य मनश्च वाक् च वर्त्तनी। तयोरन्यतरां मनसा संस्करोति ब्रह्मा। वाचा होताध्वर्युरुद्गाता चान्यतरामिति। कृत्स्नो यज्ञः प्रमादराहित्याय मनसा सम्यगनुसंधेयः। वाचा च वेदत्रयोक्तमंत्राः पठनीयाः। तत्र होत्रादयस्त्रयो मिलित्वा वाग्रूपं यज्ञमार्गं संस्कुर्वंति। ब्रह्मा त्वेक एव मनोरूपं यज्ञमार्गं कृत्स्नमपि संस्करोति। तस्मादस्यास्ति सामर्थ्यमिति ॥ अथ चतुर्थं पादं विवृणोति। यज्ञस्य मात्रां विमिमीत एकोऽध्वर्युरध्वरयुरध्वर्युरध्वरं युनक्त्यध्वरस्य नेतेति। अस्यायमर्थः। अध्वर्युनामक एक ऋत्विग्यज्ञस्य मात्रां स्वरूपं विमिमीते विशेषेण निष्पादयति। मीयते निर्मीयत इति मात्रा स्वरूपं। तन्निष्पादकत्वं चाध्वर्योर्नामनिर्वचनादवगम्यते। अध्वर्युरित्यत्र छांदस्या प्रक्रियया लुप्तमकारं पुनः प्रक्षिप्याध्वरयुरिति नाम संपादनीयं। अध्वरं युनक्तीत्यवयवार्थः। अध्वरस्य नेतेति तात्पर्यार्थ इति। एतदेवाभिप्रेत्याध्वर्युवेदस्य यागनिष्पादकत्वद्योतकं निर्वचनं यास्को दर्शयति। मंत्रा मननात्। छंदांसि छादनात्। स्तोमः स्तवनात्। यजुर्यजतेरिति। एवं सत्यध्वर्युसंबंधिनि यजुर्वेदे निष्पन्नं यज्ञशरीरमुपजीव्य तदपेक्षितौ स्तोत्रशस्त्ररूपावयवावितरेण वेदद्वयेन पूर्येते इत्युपजीव्यस्य यजुर्वेदस्य प्रथमतो व्याख्यानं युक्तं। तत ऊर्ध्वं साम्नामृगाश्रितत्वादुभयोर्मध्ये प्रथमत ऋग्व्याख्यानं युक्तमित्यृग्वेद इदानीं व्याख्यायते ॥

ननु वेद एव तावन्नास्ति। कुतस्तदवांतरविशेष ऋग्वेदः। तथा हि। कोऽयं वेदो नाम। न हि तत्र लक्षणं प्रमाणं वास्ति। न च तदुभयव्यतिरेकेण किंचिद्वस्तु प्रसिध्यति। लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति न्यायविदां मतं। प्रत्यक्षानुमानागमेषु प्रमाणविशेषेष्वंतिमो वेद इति तल्लक्षणमिति चेत्। न। मन्वादिस्मृतिष्वतिव्याप्तेः। समयबलेन सम्यक्परोक्षानुभवसाधनमित्येतस्या-

गमलक्षणस्य तास्वपि सद्भावात् ॥ अपौरुषेयत्वे सतीति विशेषणाद्दोष इति चेत् । न । वेदस्यापि परमेश्वरनिर्मितत्वेन पौरुषेयत्वात् । शरीरधारिजीवनिर्मितत्वाभावादपौरुषेयत्वमिति चेत् । सहस्रशीर्षा पुरुष इत्यादिश्रुतिभिरीश्वरस्यापि शरीरित्वात्कर्मफलरूपशरीरधारिजीवनिर्मितत्वाभावमात्रेणापौरुषेयत्वं विवक्षितमिति चेत् । न । जीवविशेषैरग्निवाय्वादित्यैर्वेदानामुत्पादितत्वात् । ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यादिति श्रुतेरीश्वरस्याग्न्यादिप्रेरकत्वेन निर्मातृत्वं द्रष्टव्यं ॥ मंत्रब्राह्मणात्मकः शब्दराशिर्वेद इति चेत् । न । ईदृशो मंत्रः । ईदृशं ब्राह्मणमित्यनयोरद्याप्यनिर्णीतत्वात् । तस्मान्नास्ति किंचिद्वेदस्य लक्षणं ॥

नापि तत्सद्भावे प्रमाणं पश्यामः । ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमित्यादिवाक्यं प्रमाणमिति चेत् । न । तस्यापि वाक्यस्य वेदांतःपातित्वेनात्माश्रयत्वप्रसंगात् । न खलु निपुणोऽपि स्वस्कंधमारोढुं प्रभवेदिति ॥ वेद एव द्विजातीनां निःश्रेयसकरः पर इत्यादिस्मृतिवाक्यं प्रमाणमिति चेत् । न । तस्याप्युक्तश्रुतिमूलत्वेन निराकृतत्वात् ॥ प्रत्यक्षादिकं शंकितुमप्ययोग्यं । वेदविषया लोकप्रसिद्धिः सार्वजनीनापि नीलं नभ इत्यादिवद्भ्रांता । तस्माल्लक्षणप्रमाणरहितस्य वेदस्य सद्भावो नांगीकर्तुं शक्यत इति पूर्वपक्षः ॥

अत्रोच्यते । मंत्रब्राह्मणात्मकत्वं तावददुष्टं लक्षणं । अत एवापस्तंबो यज्ञपरिभाषायामेवमाह । मंत्रब्राह्मणयोर्वेदनामधेयमिति । तयोस्तु रूपमुपरिष्टान्निर्णेष्यते । अपौरुषेयवाक्यत्वमितीदमपि यादृशमस्माभिर्विवक्षितं तादृशमुत्तरत्र स्पष्टीभविष्यति । प्रमाणान्यपि यथोक्तानि श्रुतिस्मृतिलोकप्रसिद्धिरूपाणि वेदसद्भावे द्रष्टव्यानि । यथा घटपटादिद्रव्याणां स्वप्रकाशत्वाभावेऽपि सूर्यचंद्रादीनां स्वप्रकाशत्वमविरुद्धं । तथा मनुष्यादीनां स्वस्कंधारोहासंभवेऽप्यकुंठितशक्तेर्वेदस्येतरवस्तुप्रतिपादकत्ववत्स्वप्रतिपादकत्वमप्यस्तु । अत एव संप्रदायविदोऽकुंठितां शक्तिं वेदस्य दर्शयंति । चोदना हि भूतं भविष्यंतं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयमर्थं शक्नोत्यवगमयितुमिति । तथा सति वेदमूलायाः स्मृतेस्तदुभयमूलाया लोकप्रसिद्धेश्च प्रामाण्यं दुर्वारं । तस्माल्लक्षणप्रमाणसिद्धो वेदो न केनापि चार्वाकादिनापोढुं शक्यत इति स्थितं ॥

नन्वस्तु नाम वेदाख्यः कश्चित्पदार्थः । तथापि नासौ व्याख्यानमर्हति । अप्रमाणत्वेनानुपयुक्तत्वात् । न हि वेदः प्रमाणं । तल्लक्षणस्य तत्र दुःसंपादत्वात् ।

तथा हि। सम्यगनुभवसाधनं प्रमाणमिति केचिल्लक्षणमाहुः। अपरे त्वनधिगतार्थगंतृ प्रमाणमित्याचक्षते। न चैतदुभयं वेदे संभवति। मंत्रब्राह्मणात्मको हि वेदः। तत्र मंत्राः केचिदबोधकाः। अम्यक्सात इंद्र ऋष्टिरित्येको मंत्रः। याहश्मिन्धायि तमपस्ययाविददित्यन्यः। सृण्येव जर्भरी तुर्फरीतू इत्यपरः। आपांतमन्युस्तृपलप्रभर्मेत्यादय उदाहार्याः। न ह्येतैर्मंत्रैः कश्चिदप्यर्थोऽवबुध्यते। एतेष्वनुभव एव यदा नास्ति तदा तत्सम्यक्त्वं तदीयसाधनत्वं च दूरापेतं। अधःस्विदासी३दुपरिस्विदासी३दिति मंत्रस्य बोधकत्वेऽपि स्थाणुर्वा पुरुषो वेत्यादिवाक्यवत्संदिग्धार्थबोधकत्वान्नास्ति प्रामाण्यं। ओषधे त्रायस्वैनमिति मंत्रो दर्भविषयः। स्वधिते मैनं हिंसीरिति क्षुरविषयः। शृणोत ग्रावाण इति पाषाणविषयः। एतेष्वचेतनानां दर्भक्षुरपाषाणानां चेतनवत्संबोधनं श्रूयते। ततो द्वौ चंद्रमसाविति वाक्यवद्विपरीतार्थबोधकत्वादप्रामाण्यं। एक एव रुद्रो न द्वितीयोऽवतस्थे। सहस्राणि सहस्रशो ये रुद्रा अधि भूम्यामित्यनयोस्तु मंत्रयोर्यावज्जीवमहं मौनीति वाक्यवद्व्याघातबोधकत्वादप्रामाण्यं। आप उंदंत्विति मंत्रो यजमानस्य क्षौरकाले जलेन शिरसः क्लेदनं ब्रूते। शुभिके शिर आरोह शोभयंती मुखं ममेति मंत्रो विवाहकाले मंगलाचरणार्थं पुष्पनिर्मितायाः शुभिकाया वरवध्वोः शिरस्यवस्थानं ब्रूते। तयोश्च मंत्रयोर्लोकप्रसिद्धार्थानुवादित्वादनधिगतार्थगंतृत्वं नास्ति। तस्मान्मंत्रभागो न प्रमाणं॥

अत्रोच्यते। अम्यगादिमंत्राणामर्थो यास्केन निरुक्तग्रंथेऽवबोधितः। तत्परिचयरहितानामनवबोधो न मंत्राणां दोषमावहति। अत एवात्र लोकन्यायमुदाहरंति। नैष स्थाणोरपराधो यदेनमंधो न पश्यति। पुरुषापराधः संभवतीति। अधःस्विदासीदिति मंत्रश्च न संदेहप्रबोधनाय प्रवृत्तः। किंतर्हि जगत्कारणस्य परवस्तुनोऽतिगंभीरत्वं निश्चेतुमेव प्रवृत्तः। तदर्थमेव हि गुरुशास्त्रसंप्रदायरहितैर्दुर्बोध्यत्वमधःस्विदित्यनया वचोभंग्योपन्यस्यति। स एवाभिप्राय उपरितनेषु को अद्धा वेदेत्यादिमंत्रेषु स्पष्टीकृतः। ओषध्यादिमंत्रेष्वपि चेतना एव तत्तदभिमानिदेवतात्वेन तेन नाम्ना संबोध्यंते। ताश्च देवता भगवता बादरायणेनाभिमानिव्यपदेशस्त्विति सूत्रे सूचिताः। एकस्यापि रुद्रस्य स्वमहिम्ना सहस्रमूर्तिस्वीकारान्नास्ति परस्परं व्याघातः। जलादिद्रव्येण शिरःक्लेदनादेर्लोकसिद्धत्वेऽपि तदभिमानिदेवतानुग्रहस्याप्रसिद्धत्वात्तद्विषयत्वेनाज्ञातार्थज्ञापकत्वं। ततो लक्षणसद्भावादस्ति मंत्रभागस्य प्रामाण्यं॥

गुणार्थेन पुनःश्रुतिरिति ॥ ११ ॥ मंत्रेण प्रतीतस्यैवार्थस्य ब्राह्मणे यत्पुनःश्रवणं तदेतच्चतुःसंख्यालक्षणगुणविधानार्थत्वेनोपयुज्यते । एतस्य विधानस्याभावे चतुर्णां मंत्राणां मध्ये येन केनाप्येकेनाभिरादीयेत ॥ नन्विमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यत्र मंत्रसामर्थ्यादेव प्राप्तस्य रशनादानस्य पुनर्ब्राह्मणवाक्यं विनियोजकमाम्नायते । तदेतन्नून्मते व्यर्थमित्याशंक्योत्तरं सूचयति ॥

परिसंख्येति ॥ १२ ॥ गर्दभाभिधानीं नादत्त इति निषेधः परिसंख्या । तदर्थमिदं ब्राह्मणवाक्यं ॥ ननु परिसंख्यायां त्रयो दोषाः प्राप्नुयुः । आदत्त इति रशनादानलक्षणं स्वार्थं जह्यात् । निषेधलक्षणः परार्थोऽस्य शब्दस्य कल्प्येत । रशनात्वसामान्येन च प्राप्तं गर्दभरशनायामादानं बाध्येतेति त्रयो दोषाः । मैवं । गर्दभरशनाया अप्राप्तत्वात् । तथा हि । त्वत्पक्षे प्रकरणपाठान्यथानुपपत्त्या मंत्रेणादानं कुर्यादिति वाक्यं परिकल्प्यते । तेन च वाक्येन मंत्रादानयोः संबंधे सति पश्चात्किंविषयकमादानमिति वीक्षायां लिंगाद्रशनामात्रस्यादानमुपेत्य गर्दभरशनायाः प्राप्तिर्वक्तव्या । सा च विलंब्यत इत्यश्वाभिधानीमिति प्रत्यक्षेण वाक्येन । मंत्रादानयोः संबंधे सति लिंगाद्रशनामात्रे प्राप्तमादानमश्वाभिधानीमिति श्रुत्या विशेषे व्यवस्थाप्यते । ततो मंत्रस्य निराकांक्षत्वाद्गर्दभरशनाया अप्राप्तत्वान्नास्ति प्राप्तबाधः । अत एव निषेधार्थो न कल्प्यते । विध्यर्थश्च न त्यज्यते । तत्र कुतो दोषत्रयं । ईदृशमप्राप्तिरूपमेव गर्दभरशनाया निवारणमभिप्रेत्य परिसंख्येति सूचितं ॥ ननूरु प्रथस्वेति प्रथयतीति ब्राह्मणस्य वैयर्थ्यं तदवस्थमेवेत्याशंक्योत्तरं सूचयति ॥

अर्थवादो वेति ॥ १३ ॥ वाशब्दो वैयर्थ्यं वारयति । अस्त्यत्रार्थवादः । यज्ञपतिमेव तत्प्रथयतीति तेनार्थवादेन संबंधाय ब्राह्मणे विधिः पठ्यते ॥ ननु प्रथयतीत्यनेनैव विधिशब्देन प्रथनमनूद्य यज्ञपतिमेवेत्यादिनार्थवादेन स्तोतव्यं तदेव तु प्रथनं कुतः प्राप्तमित्याशंक्योत्तरं सूत्रयति ॥

मंत्राभिधानादिति ॥ १४ ॥ अध्वर्युः पुरोडाशमुद्दिश्य मंत्रे प्रथस्वेत्येवमभिधत्ते। तस्मादभिधानादध्वर्युकर्तृकं प्रथनं प्राप्तं । यथा लोके यः कुर्विति ब्रूते स कारयति तथात्रापि यः प्रथस्वेति ब्रूते स प्रथयत्येव । यदुक्तं अग्निर्मूर्द्धा दिव इति पाठक्रमनियमाददृष्टार्थो मंत्र इति तत्रोत्तरं सूत्रयति ॥

अविरुद्धं परमिति ॥ १५ ॥ परं द्वितीयसूत्रोक्तमस्मत्पक्षेऽप्यविरुद्धं । न हि

वयं पाठक्रमादहृष्टं निवारयामः। किंतर्हि मंत्रोच्चारणेन जायमानमर्थप्रत्यायनं दृष्टप्रयोजनत्वान्नोपेक्षितव्यमित्येतावदेव ब्रूमः ॥ ननु प्रोक्षणीरासादयेति मंत्र-बुद्धमेवार्थं शास्ति। तदयुक्तं। सोपानत्कस्योपानदंतरासंभवादित्युक्तमिति चेत् तस्य परिहारं सूत्रयति ॥

संप्रैषकर्मणो गर्हानुपलंभः संस्कारत्वादिति ॥१६॥ संप्रैषकर्मणो गर्हा त्वदुक्तदोषो नोपलभ्यते। बुद्धस्याप्यर्थस्य मंत्रेणैवानुस्मरणे सति नियमादृष्ट-लक्षणस्य संस्कारस्य सद्भावात् ॥ यच्चोक्तं चत्वारि शृंगेति मंत्रोऽसंतमेवार्थम-भिधत्त इति तस्योत्तरं सूत्रयति ॥

अभिधानेऽर्थवाद इति ॥१७॥ असतोऽर्थस्याभिधाने वाक्ये गौणस्यार्थ-स्योक्तिर्द्रष्टव्या। तद्यथा। चत्वारो होत्रध्वर्यूद्गातृब्रह्मणोऽस्य कर्मणः शृंगाणि। प्रातःसवनादयस्त्रयः पादाः। पत्नीयजमानौ द्वे शीर्षे। गायत्र्यादीनि सप्त छंदांसि हस्ताः। ऋग्वेदादिभिस्त्रिभिर्वेदैस्त्रेधा बंधनं। कामान्वर्षतीति वृषभः। रोरवीति स्तोत्रशस्त्रादिशब्दान्पुनः पुनः करोति। महो देवः सोऽयं प्रौढो यज्ञरूपो देवो मर्त्यानाविवेशेति। लोकेऽप्येव गौणप्रयोगा दृश्यंते। चक्रवा-कस्तनी हंसदंतावली काशवस्त्रा शैवलकेशिनीत्येवं नद्याः स्तूयमानत्वात्। एव-मोषधे त्रायस्व शृणोत ग्रावाण इत्याद्यचेतनसंबोधनानि स्तुतिपरत्वेन योज-नीयानि। यस्मिन्वपन ओषधिरपि त्रायते तत्र वपनकर्ता त्रायत इति किमु वक्तव्यं। तथा ग्रावाणोऽपि प्रातरनुवाकं शृण्वंति। किमुत विद्वांसो ब्राह्मणा इत्यामंत्रणाभिप्रायः ॥ योऽप्यदितिर्द्यौरदितिरंतरिक्षमिति विप्रतिषेध उक्तस्त-स्योत्तरं सूत्रयति ॥

गुणादविप्रतिषेधः स्यादिति ॥१८॥ यथा त्वमेव पिता त्वमेव मातेत्यत्र गौणप्रयोगादविरोधस्तद्वत्। एवमेकरुद्रदेवत्ये कर्मण्येको रुद्रः। शतरुद्रदेवत्ये शतं रुद्रा इत्यविरोधः ॥ यदप्युक्तं स्वाध्यायमधीयानो माणवकः पूर्णिकाया अवहतिं न प्रकाशयितुमिच्छतीति तत्रोत्तरं सूत्रयति ॥

विद्यावचनमसंयोगादिति ॥१९॥ वेदविद्याग्रहणकालेऽर्थस्य यदवचनं तदयज्ञसंयोगादुपपद्यते। न हि पूर्णिकाया अवघातो यज्ञसंयुक्तः। नापि माण-वको यज्ञमनुतिष्ठति। अतो यज्ञानुपकारान्न तत्रार्थविवक्षा ॥ यदप्युक्तं अम्य-क्सात इंद्र ऋष्टिरस्मे सृण्येव जर्भरी तुर्फरीतू इत्यादावर्थस्य ज्ञातुमशक्यत्वान्नास्त्येवार्थ इति तत्रोत्तरं सूत्रयति ॥

सतः परमविज्ञानमिति ॥२०॥ विद्यमान एवार्थः प्रमादालस्यादिभिर्न ज्ञायते । तेषां निगमनिरुक्तव्याकरणवशेन धातुतोऽर्थः परिकल्पयितव्यः । तद्यथा। जर्भरी तुर्फरीतू इत्येवमादीन्यश्विनोरभिधानानि। तेषु हि द्विवचनांतत्वं लक्ष्यते। आश्विनं चेदं सूक्तमश्विनोः काममप्रा इति दर्शनात् । एतदेवाभिप्रेत्य निरुक्तकारो व्याचष्टे । जर्भरी भर्तारावित्यर्थस्तुर्फरीतू हंतारावित्यर्थ इति । एवमन्यत्क्सात इत्यादावप्युन्नेयं ॥ यदप्युक्तं प्रमगंदाद्यनित्यार्थसंयोगान्मंत्रस्यानादित्वं न स्यादिति तत्रोत्तरं सूचयति ॥

उक्तश्चानित्यसंयोग इति ॥२१॥ प्रथमपादस्यांतिमाधिकरणे सोऽयमनित्यसंयोगदोष उक्तः परिहृतः। तथा हि। तत्र पूर्वपक्षे वेदानां पौरुषेयत्वं वक्तुं काठकं कालापकमित्यादिपुरुषसंबंधाभिधानं हेतूकृत्यानित्यदर्शनाच्चेति हेत्वंतरं सूचितं। बबरः प्रावाहणिरकामयतेत्यनित्यानां बबरादीनामर्थानां दर्शनात्ततः पूर्वमसत्त्वात्पौरुषेयो वेद इति तस्योत्तरं सूचितं। परं तु श्रुतिसामान्यमात्रमिति। तस्यायमर्थः। यत्काठकादिसमाख्यानं तत्प्रवचननिमित्तं । यत्तु परं बबराद्यनित्यदर्शनं तच्छब्दसामान्यमात्रं । न तु तत्रानित्यो बबराख्यः कश्चित्पुरुषो विवक्षितः। किंतु बबर इति शब्दानुकृतिः । तथा सति बबरेति शब्दं कुर्वन्वायुरभिधीयते । स च प्रावाहणिः । प्रकर्षेण वहनशीलः । एवमन्यत्राप्यूहनीयं । तदेवं कस्यचिदपि दोषस्यासंभवाद्विवक्षितार्था मंत्राः स्वार्थप्रकाशनायैव प्रयोक्तव्याः ॥ नन्वर्थप्रकाशनार्थत्वे सति दृष्टं प्रयोजनं लभ्यत इति युक्तिमात्रमिदमुच्यते। न त्वेतदुपोद्बलकं किंचिच्छ्रौतं लिंगं पश्याम इत्याशंक्योत्तरं सूचयति ॥

लिंगोपदेशश्च तदर्थवदिति ॥२२॥ आग्नेय्याग्नीध्रमुपतिष्ठतेति श्रूयते । तस्यायमर्थः। अग्निर्देवता यस्या ऋचः सेयमाग्नेयी । तयाग्नीध्रस्थानमुपतिष्ठेतेति । अत्र ह्युपस्थानमुपदिशद्ब्राह्मणमग्ने नयेत्यनयोपतिष्ठेतेति मंत्रप्रतीकं पठित्वा नोपदिशति । यदा तस्यामृच्यग्निः प्राधान्येन प्रतिपाद्यते तदा तस्या ऋचोऽग्निर्देवता भवति। तथा सत्याग्नेय्येति देवतावाचितद्धितांतनिर्देश उपपद्यते । तस्मादयमुपदेशस्तन्मंत्रवाक्यमर्थवदिति बोधयति। अतो विवक्षितार्थत्वादर्थप्रत्यायनार्थं प्रयोगकाले मंत्रोच्चारणं ॥ तस्मिन्नेव विवक्षितार्थत्वे लिंगांतरं सूचयति ॥

ऊह इति ॥२३॥ प्रकृतावाम्नातस्य मंत्रस्य विकृतौ समवेतार्थत्वाय तदुचि-

तपदांतरस्य प्रक्षेपेण पाठ ऊहः । तद्यथा । अन्वेनं माता मन्यतामनु पिता न भ्रातेति प्राकृतः पशुविषयो मंत्रपाठः । तस्य च मंत्रस्य विकृतौ पशुद्वये सत्यन्वेतौ माता मन्यतामित्यूहः । पशुबहुत्वे सत्यन्वेतान्माता मन्यतामित्यूहः कर्तव्यः । एतन्मंत्रव्याख्यानरूपं ब्राह्मणमेवमाम्नायते । न माता वर्धते न पितेति । तत्रेदं चिंतनीयं । किमत्र शरीरवृद्धिर्निषिध्यते । आहोस्विच्छब्द-वृद्धिरिति । एकवचनांतस्य मातृशब्दस्य मातराविति द्विवचनांतत्वेन वा मातर इति बहुवचनांतत्वेन वा प्रयोगः शब्दवृद्धिः । न तावच्छरीरवृद्धिर्निषेद्धुं शक्यते । बाल्यकौमारयौवनादिवयोऽनुसारेण तद्वृद्धेः प्रत्यक्षत्वात् । अतः शब्द-वृद्धिनिषेध एव शिष्यते । मातृशब्दपितृशब्दयोर्विशेषाकारेण वृद्धिनिषेधादित-रस्यैनमिति शब्दस्यार्थानुसारिणी वृद्धिः सूचिता भवति । तत्र यद्यर्थो न विवक्ष्यते तदा पशुद्वित्वे द्विवचनं पशुबहुत्वे बहुवचनं च कथमूह्यते । तस्मा-द्विवक्षितार्था मंत्राः ॥ तस्मिन्नेवार्थे लिंगांतरं सूचयति ॥

विधिशब्दाश्चेति ॥ २४ ॥ मंत्रव्याख्यानरूपो ब्राह्मणगतः शब्दो विधिशब्द इत्युच्यते । सचैवमाम्नायते । शतं हिमाः शतं वर्षाणि जीव्यास्मेत्येवैतदाहेति । तत्र शतं हिमा इत्येतद्व्याख्येयमंत्रस्य प्रतीकं । अवशिष्टं तु तस्य तात्पर्यव्या-ख्यानं । मंत्रस्याविवक्षितार्थत्वे तु किं नाम तात्पर्यं मंत्रे व्याख्यायेत । तस्मा-द्विवक्षितार्था मंत्राः प्रयोगकाले स्वार्थप्रकाशनायैवोच्चारयितव्याः ॥

तत्र संग्रहश्लोकौ ॥

मंत्रा उरु प्रथस्वेति किमदृष्टैकहेतवः ।
यागेषूत पुरोडाशप्रथनादेश्च भासकाः ॥ १ ॥
ब्राह्मणेनापि तज्ज्ञानान्मंत्राः पुण्यैकहेतवः ।
न तज्ज्ञानस्य दृष्टत्वादृष्टं वरमदृष्टतः ॥ २ ॥

नन्वस्तु मंत्रभागस्य प्रामाण्यं । ब्राह्मणभागस्य तु न तद्युज्यते । तथा हि । द्विविधं ब्राह्मणं । विधिरर्थवादश्चेति । तथा चापस्तंबः । कर्मचोदना ब्राह्मणानि । ब्राह्मणशेषोऽर्थवाद इति । विधिरपि द्विविधः । अप्रवृत्तप्रवर्तनमज्ञातज्ञापनं चेति । आग्नावैष्णवं पुरोडाशं निर्वपति दीक्षणीयायामित्याद्याः कर्मकांडगत-विधयोऽप्रवृत्तप्रवर्तकाः । आत्मा वा इदमेक एवाग्र आसीदित्यादयो ब्रह्मकां-डगता अज्ञातज्ञापकाः ॥ तत्र कर्मकांडगतानां जर्तिलयवाग्वा वाजुहुयाद्गवीधुक-यवाग्वा वेत्यादिविधीनां नास्ति प्रामाण्यं । प्रवृत्त्ययोग्यद्रव्यविधानेन सम्यगनुभ-

वसाधनत्वाभावात् । अयोग्यत्वं च वाक्यशेषे समाम्नातं । अनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चेति तच्च ह्यारण्यतिलानामारण्यगोधूमानां चाहुतिद्रव्यत्वं निषिद्धं । तस्माद्बाधितो जर्तिलादिविधिरप्रमाण्यं । एवमैतरेयतैत्तिरीयादिब्राह्मणेषु तत्तन्नाहत्यं तत्तथा न कार्यमिति वाक्याभ्यां बहवो विधयो निषिद्धाः । अपि चैतरेयब्राह्मणेऽनुदितहोमं बहुधा निंदित्वा तस्मादुदिते होतव्यमित्यसकृन्निगमितं । तैत्तिरीयाश्च तथैवामनंति । यदनुदिते सूर्ये प्रातर्जुहुयादुभयमेवाग्नेयं स्यात् । उदिते सूर्ये प्रातर्जुहोतीति । पुनरपि त एवोदितहोमे दोषमामनंति । यदुदिते सूर्ये प्रातर्जुहुयाद्यथातिथये प्रद्रुताय पशून्पायावसथायाहार्यं हरंति तादृगेव तदिति । तथैवातिरात्रे षोडशिनं गृह्णातीति विधिर्नातिरात्रे षोडशिनं गृह्णातीति निषेधेन बाध्यते । ज्योतिष्टोमादिष्वप्यनुष्ठानानंतरमेव च स्वर्गादिफलं नोपलभ्यते । न हि भोजनानंतरं तृप्तेरनुपलंभोऽस्ति । तस्मात्कर्मविधिषु प्रामाण्यं दुःसंपादं ॥

अज्ञातज्ञापकेषु ब्रह्मविधिष्वपि परस्परविरोधान्नास्ति प्रामाण्यं । आत्मा वा इदमेक एवाग्र आसीदित्यैतरेयिण आमनंति । असद्वा इदमग्र आसीदिति तैत्तिरीयकाः । सोऽयं विरोधः । तस्माद्वेदे विधिभागः सर्वोऽप्यप्रमाणमिति प्राप्ते ब्रूमः ॥

अस्त्वेव जर्तिलादिविधेरप्रमाण्यं तदर्थस्याननुष्ठेयत्वात् । अनुष्ठेयस्त्वर्थ उपरितनेऽजाक्षीरेण जुहोतीति वाक्ये विधीयते । तत्प्रशंसार्थमत्र जर्तिलादिकमनूद्य निंद्यते । यथा गवामश्वानां च प्रशंसार्थमपशवो वा अन्ये गोअश्वेभ्य इति वाक्येनार्थवादरूपेणाजादीनां पशुत्वं निंद्यते तद्वत् । एवं तर्ह्यजादेर्यथा वस्तुतः पशुत्वमस्ति तथा जर्तिलादिविधिरत्र निंद्यमानोऽपि क्वचिच्छाखांतरे भवेदिति चेत् । भवतु नाम प्रामाण्यमपि तच्छाखाध्यायिनं प्रति भविष्यति । यथा गृहस्थाश्रमे निषिद्धमपि परान्नभोजनमाश्रमांतरेषु प्रामाणिकं तद्वत् । अनेन न्यायेन सर्वत्र परस्परविरुद्धा विधिनिषेधा पुरुषभेदेन व्यवस्थापनीया यथा मंत्रेषु पाठभेदः । शाखाभेदेन व्यवस्थितत्वात्तैत्तिरीया वायवस्थोपायवस्थेति मंत्रमामनंति । वाजसनेयिनस्तूपायवस्थेत्येतं भागं नामनंति । प्रत्युत शतपथब्राह्मणे स भागोऽनूद्य निराकृतः । तथा सूक्तवाग्मंत्रे शाखांतरपाठं निराकृत्य पाठांतरं तैत्तिरीया आमनंति । यद् ब्रूयात्सूपावसाना च स्वध्यवसाना चेति प्रमायुक्तो यजमानः स्यादिति निराकरणं । सूपचरणा च स्वधिचरणा

चेत्येव ब्रूयादिति पाठांतरोपदेशः। तत्रानुष्ठातृपुरुषभेदेन व्यवस्था। तद्वद्विधिषु द्रष्टव्यं। षोडशिग्रहणादिदूषणं त्वश्रुतमीमांसावृत्तांतस्य तवैव शोभते। पूर्वमीमांसायां दशमाध्यायस्याष्टमपादे षोडशिनो ग्रहणाग्रहणविकल्पो निर्णीतः। द्वितीयस्याध्यायस्य प्रथमपादे कालांतरभाविफलसिद्ध्यर्थमपूर्वं निर्णीतं। तदुत्तरमीमांसायां प्रथमाध्यायस्य चतुर्थपादे कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेरित्यस्मिन्सूत्रे जगत्कारणे परमात्मनि श्रुतेर्विप्रतिपत्तिर्निराकृता। द्वितीयस्याध्यायस्य प्रथमपादारंभाधिकरणे त्वसद्व्यपदेशान्नेति चेन्न धर्मांतरेण वाक्यशेषादिति सूत्रे तैत्तिरीयवाक्यगतस्यासच्छब्दस्य न शून्यपरत्वं किंत्वव्यक्तावस्थापरत्वमिति निर्णीतं। तथा जैमिनिश्चोदनासूत्रे विधिवाक्यं धर्मे प्रमाणमिति प्रतिज्ञायौत्पत्तिकसूत्रं तत्प्रामाण्यं समर्थयामास। व्यासोऽपि शास्त्रयोनित्वसूत्रे वेदांतानां ब्रह्मणि प्रामाण्यं प्रतिज्ञाय तत्तु समन्वयादित्यादिसूत्रैः समर्थयामास। तस्मादमीमांसकस्य तव पूर्वोक्तस्याणंधन्यायो दुःपरिहारः। अतो विधिभागस्य प्रामाण्यं सुस्थितं॥

अर्थवादभागस्य प्रामाण्यं महता प्रयत्नेन जैमिनिः समर्थयामास। तत्सूत्राणि व्याख्यास्यंते। तत्र पूर्वपक्षं सूचयति॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यत इति॥१॥ आम्नायस्य सर्वस्य क्रियाप्रतिपादनाय प्रवृत्तत्वादक्रियाप्रतिपादकानामर्थवादानां नास्ति कश्चिद्विवक्षितः स्वार्थः। ते चार्थवादा एवमाम्नायंते। सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं। स आत्मनो वपामुदखिदत्। देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्निति। यस्मादीदृशस्य वाक्यस्य विवक्षितार्थः कश्चिदपि नास्ति तस्मादिदं वाक्यमनित्यमुच्यते। यद्यप्यनादित्वात्स्वरूपेणानित्यत्वं नास्ति तथापि धर्मावबोधनलक्षणस्य नित्यकार्यस्याभावादनित्यैः काव्यालापैः समानत्वादप्रमाणमित्यर्थः॥ ननूदाहृतानामर्थवादानामनुष्ठेये धर्मे प्रामाण्याभावेऽपि स्वार्थप्रामाण्यमस्तु तत्प्रत्यायकत्वेन स्वतः प्रामाण्यस्यापवदितुमशक्यत्वादित्याशंक्यान्येषु केषुचिदर्थवादेषु मानांतरविरोधदर्शनादप्रामाण्ये सति तद्दृष्टांतेन सर्वेषामप्यर्थवादानामप्रामाण्यमित्यभिप्रेत्य सूचयति॥

शास्त्रदृष्टविरोधाच्चेति॥२॥ शास्त्रविरोधो दृष्टविरोधः शास्त्रदृष्टविरोध इति त्रिविधोऽर्थवादेषूपलभ्यते। तथा हि। स्तेनं मनोऽनृतवादिनी वागित्यत्र श्रूयमाणं मानसं चौर्यं वाचिकमनृतवदनं च प्रतिषेधशास्त्रेण विरुद्धं। तस्माद्धूम

एवाग्नेर्दिवा ददृशे नार्चिस्तस्मादर्चिरेवाग्नेर्नक्तं ददृशे न धूम इत्यत्र दृष्टविरोधः। तथा न चैतद्विद्मो वयं ब्राह्मणा वा स्मोऽब्राह्मणा वेत्यत्रापि प्रत्यक्षविरोधः। को हि तद्वेद यद्यमुष्मिंल्लोकेऽस्ति वा न वेत्यत्र शास्त्रदृष्टविरोधः। स्वर्गकामो यजेतेत्यादिशास्त्रे ह्यामुष्मिकं फलं दृश्यते। तस्माद्विरोधादर्थवादानामप्रामाण्यं॥ ननु सोऽरोदीदित्यादीनां निःप्रयोजकत्वात्स्तेनं मन इत्यादीनां च विरोधादप्रामाण्येऽपि फलप्रतिपादकानामर्थवादानां तदुभयवैलक्षण्यादस्तु प्रामाण्यमित्याशंक्योत्तरं सूचयति॥

तथा फलाभावादिति ॥३॥ यथा मानांतरविरुद्धमर्थवादैरुक्तं तथा फलमप्यविद्यमानमेव तैरुच्यते। तथा हि गर्गत्रिरात्रं प्रकृत्य श्रूयते। शोभतेऽस्य मुखं य एवं वेदेति। दर्शपूर्णमासयोर्वेदाभिमर्शनं प्रकृत्य श्रूयते। आस्य प्रजायां वाजी जायते य एवं वेदेति। न च वयं वेदितॄणां तत्फलमुपलभामहे॥ नन्वैहिकफलवाक्यानां विसंवादादप्रामाण्येऽप्यामुष्मिकफलवाक्यानामस्तु प्रामाण्यमित्याशंक्योत्तरं सूचयति॥

अन्यानर्थक्यादिति ॥४॥ एवं हि श्रूयते। पूर्णाहुत्या सर्वान्कामानवाप्नोति। पशुबंधयाजी सर्वांल्लोकानभिजयति। तरति मृत्युं तरति पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते। य उ चैनमेवं वेदेति। तत्राग्न्याधेयगतया पूर्णाहुत्या सर्वकामप्राप्तेरन्यान्यग्निहोत्रादीन्युत्तरकालीनान्यनर्थकानि स्युः। तथा निरूढपशुबंधानुष्ठानेन सर्वलोकाभिजयाज्ज्योतिष्टोमादीनामानर्थक्यं। अध्ययनकालीनेनैवाश्वमेधवेदनेन ब्रह्महत्यादितरणात्तदनुष्ठानं च व्यर्थं स्यात्। तस्मादामुष्मिकफलवाक्यानामप्यप्रामाण्यं॥ ननु मा भूत्फलवाक्यानां प्रामाण्यं। तथापि निषेधवाक्येषु विरोधानुपलंभादस्तु प्रामाण्यमित्याशंक्योत्तरं सूचयति॥

अभागिप्रतिषेधादिति ॥५॥ न पृथिव्यामग्निश्चेतव्यो नांतरिक्षे न दिवीत्यत्रांतरिक्षस्य च दिवश्च प्रतिषेधभागित्वं नास्ति तत्र चयनप्रसंगस्यैवाभावात्। मा भूत्तर्हि निषेधानां प्रामाण्यं॥ बबरः प्रावाहणिरकामयतेत्यादीनां पूर्वपुरुषवृत्तांताभिधायिनां विरोधानुपलंभादस्तु प्रामाण्यमित्याशंक्योत्तरं सूचयति॥

अनित्यसंयोगादिति ॥६॥ बबरादिरूपेणानित्येनार्थेन संयोगे सत्यस्य वाक्यस्य ततः पूर्वाभावात्कालिदासादिवाक्यवत्पौरुषेयत्वं प्रसज्येत। किं बहुना। सर्वथापि नास्त्येवार्थवादानां प्रामाण्यमिति पूर्वः पक्षः॥

सिद्धांतं सूचयति। विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युरिति ॥७॥

तुशब्दोऽर्थवादानामप्रामाण्यं वारयति। वायुर्वै क्षेपिष्ठेत्येवमादीनामर्थवादानां वायव्यं श्वेतमालभेतेत्यादिना विधिना सहैकवाक्यत्वादस्ति धर्मे प्रामाण्यं। न च विधिवाक्यस्यार्थवादनैरपेक्ष्येण पदान्वयसंपूर्तेस्तत्रार्थवादानां नास्त्युपयोग इति शंकनीयं। ते ह्यर्थवादाः पुरुषप्रवृत्तिमाकांक्षतां विधीनां स्तुत्यर्थत्वेनोपयुक्ताः स्युः। स्तुत्या च प्रलोभितः पुरुषस्तत्र प्रवर्तते॥ नन्वर्थवादानां प्रमादपठितत्वेनोपेक्षणीयत्वात्किमनेनैकवाक्यताप्रयासेनेत्याशंक्याह॥

तुल्यं च सांप्रदायिकमिति॥८॥ अनध्यायवर्जनादिनियमपुरःसरं गुरुसंप्रदायादध्ययनं यत्तत्सांप्रदायिकं। तच्च विधीनामर्थवादानां समानं। तस्माद्विधिवदेतेषामपि प्रमादपाठो न भवति। ननु शास्त्रदृष्टविरोधाच्चेत्येवमर्थवादेष्वनुपपत्तिरुक्तेत्याशंक्याह॥

अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधः स्याच्छब्दार्थस्त्वप्रयोगभूतस्तस्मादुपपद्येत इति॥९॥ तंत्रवार्त्तिके त्वेतत्सूत्रमध्याहृत्य त्रिधा व्याख्यातं। अप्राप्तां चानुपपत्तिं। अप्राप्ता चानुपपत्तिः। अप्राप्तं चानुपपत्तिमिति। स्तेनं मन इत्यादौ शास्त्रविरोधादनुपपत्तिरप्राप्ता प्रयोगस्यानुक्तत्वात्। प्रयोगे हि स्तेयादीनामुच्यमाने शास्त्रविरोधः स्यात्। न चात्र स्तेयं कर्तव्यमिति प्रयोग उच्यते। किंतु स्तेनशब्दार्थ एवोच्यते। न च शब्दार्थः प्रयोगभूतः। तस्माच्छब्दार्थवचनमात्रेण शास्त्रविरोधाभावादयमर्थवाद उपपन्न एव॥ ननु स्तुत्यर्थेन विधीनां स्युरिति यदुक्तं तदसद्वैयाधिकरण्यात्। वेतसशाखया चावकाभिश्चाग्निं विकर्षत्यापो वै शांता इत्यत्र वेतसावके विधीयेते आपश्च स्तूयंत इति वैयाधिकरण्यमित्याशंक्याह॥

गुणवादस्त्विति॥१०॥ तुशब्दो वैयाधिकरण्यदोषं वारयति। गुणवादो ह्यत्र विवक्षितः। यथा लोके कश्मीराभिजनो देवदत्तः कश्मीरदेशेषु स्तूयमानेषु स्तुतमात्मानं मन्यते। एवमत्राप्यद्भ्यो जाते वेतसावके अप्सु स्तुतासु स्तुते एव भवतः। शांताभ्योऽद्भ्यो जातत्वाद्वेतसावके स्वयमपि शांते सत्यौ यजमानस्यानिष्टं शमयत इत्येतादृशस्य गुणस्य वादोऽत्राभिप्रेतः। सोऽरोदीदित्यत्रापि रजतस्य पतिताश्रुरूपत्वाद्रजतदाने गृहेऽपि रोदनप्रसंगाद्बर्हिषि रजतं न देयमिति तन्निषेधेन विधेयेनार्थवादस्यैकवाक्यत्वं। तत्र रजतदानाभावे रोदनाभावरूपो गुणोऽत्र विवक्षितः। तेन च गुणेन रजतदाननिवारणरूपो विधिः स्तूयते। यद्यपि रजतस्याश्रुप्रभवत्वमत्यंतमसत्। तथापि यथोक्तनीत्या विधेः

स्तुतिः संपद्यते। यः प्रजाकामः पशुकामः स्यात्स एनं प्राजापत्यमजं तूपरमालभेतेत्ययं विधिः प्रजापतिवपोत्खेदेन स्तूयते। यस्मात्प्रजापतिः स्ववपामप्युत्खिद्याग्नौ प्रहृत्य ततो जातं तूपरमजमात्मार्थमालभ्य प्रजाः पशूंश्च लब्धवान्तस्मात्प्रजादिसंपादकोऽयं तूपर इति तूपरगुणस्य वादोऽत्र विवक्षितः। आदित्यः प्रायणीयश्चरुरित्येष विधिर्दिशो न प्राजानन्नित्यनेन दिग्मोहेन स्तूयते। यदीयमदितिर्देवता दिग्मोहमपनीय दिग्विशेषं ज्ञापयति। तथा बहुविधकर्मसमुदायरूपे सोमयागेऽनुष्ठानविषयं भ्रममपनयतीति किमु वक्तव्यमित्येवमदितिदेवतागतस्य गुणस्य वादोऽत्र विवक्षितः। स्वकीयवपोत्खेदो देवयजनाध्यवसानमात्रेण दिग्मोहश्चेत्युभयमस्तु वा मा वा। सर्वथापि स्तुतिपरत्वमभ्युपगच्छतामस्माकं न किंचिद्धीयते। शिखा ते वर्धतां वत्स गुडूचीं श्रद्धया पिबेत्यादावविद्यमानेनाप्यर्थेन लोके स्तुतिदर्शनात्। अथ पूर्वपक्षिणा शास्त्रविरोधं दर्शयितुमुदाहृतं स्तेनं मनोऽनृतवादिनी वागिति तत्रोत्तरं सूचयति॥

रूपात्प्रायादिति॥११॥ हिरण्यं हस्ते भवत्यथ गृभ्णातीत्येतं विधिं स्तोतुमर्थवाद उच्यते। यथा लोके किमृषिणा देवदत्त एव पूजयितव्य इत्यत्र देवदत्तपूजां स्तोतुमेवौदासीन्यमृषावुपन्यस्यते न तु पूज्यत्वमृषेर्वारयितुं। एवमत्रापि हस्ते हिरण्यग्रहणं प्रशंसितुं मनसः स्तेनरूपत्वं वाचोऽनृतवादिनीत्वं चोपन्यस्यते। तत्र गुणवादेन शब्दार्थो योजनीयः। यथा स्तेनाः प्रच्छन्नरूपा एवं मनोऽपीति प्रच्छन्नरूपत्वमत्र गुणः। प्रायेण वागनृतं वक्तीति प्रायिकत्वं तत्र गुणः। हस्तस्तु न प्रच्छन्नो नाप्यनृतबाहुलः। अतो हस्ते हिरण्यधारणं प्रशस्तमिति स्तूयते। यदपि दृष्टविरोधाय धूम एवाग्नेर्दिवा ददृश इत्यादिकमुदाहृतं तत्रोत्तरं सूचयति॥

दूरभूयस्त्वादिति॥१२॥ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति। सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातरित्येतौ विधी स्तोतुं सोऽर्थवादः। यस्मादर्चिर्दिवा न दृश्यते तस्मात्सूर्यमंत्र एव प्रातः प्रयोक्तव्यः। यस्माद्रात्रावर्चिरेव दृश्यते तस्मादग्निमंत्रो रात्रौ प्रयोक्तव्यः सूर्यमंत्रश्च दिवेत्येवं तयोर्मंत्रयोः स्तुतिः। धूमार्चिषोरदर्शनोपन्यासस्तु दूरभूयस्त्वगुणनिमित्तः। भूयसि हि दूरे पर्वताग्रे वृक्षादयोऽपि न विस्पष्टं दृश्यंते। किंतु तृणमाहग्येन तेषां दर्शनाभास एव। तद्वदत्रापि। यदप्यन्यदृष्टविरोधायैवोदाहृतं न चैतद्विद्मो वयं ब्राह्मणा वा स्मोऽब्राह्मणा वेति तत्रोत्तरं सूचयति॥

स्यपराधात्कर्तुश्च पुत्रदर्शनादिति ॥ १३ ॥ प्रवरे प्रव्रियमाणे ब्रूयाद्देवाः पितर इत्यस्य विधेः स्तावको ऽयमर्थवादः। यदि यजमानो देवाः पितर इत्यादिमंत्रेण प्रवरमनुमंत्रयेत्तदानीमब्राह्मणो ऽपि ब्राह्मणो भवेदित्यनुमंत्रणस्य स्तुतिः। न चैतद्विद्म इत्येतदज्ञानवचनं दुर्ज्ञानत्वगुणेन तत्र प्रयुज्यते। यत्र स्त्रियो ऽपराधो भवति तत्र कर्तुरुत्पादयितुर्जारस्यापि पुत्रो दृश्यते। अतः पत्युपपत्योरुभयोः पुत्रदर्शनात्स्वकीयजन्म कीदृशमिति दुर्ज्ञानं। अनेनाभिप्रायेण प्रयुक्तत्वान्नास्ति तत्र दृष्टविरोधः। न हि तत्र दृश्यमाणं स्वब्राह्मण्यमपवदितुं न चैतद्विद्म इत्युपन्यस्तं॥ यदपि शास्त्रीयदर्शनविरोधायोदाहृतं को हि तद्वेद यद्यमुष्मिंल्लोके ऽस्ति वा न वेति तत्रोत्तरं सूत्रयति॥

आकालिकेत्येति ॥ १४॥ दिक्ष्वतिकाशान्करोतीति प्राचीनवंशस्य द्वारविधिः। तस्य शेषो ऽयं को हि तद्वेदेति। धूमाद्युपद्रवपरिहारेण प्रत्यक्षेण फलेन द्वारविधिः स्तूयते। स्वर्गप्राप्तिरूपं तु फलमाकालिकं। अकाले भवमाकालिकं विप्रकृष्टकालीनं नत्विदानींतनमित्यर्थः। तस्येप्सा तस्य प्राप्तुमिच्छा। सा च को हि तद्वेदेत्यनिश्चयोपन्यासे कारणं। यथा भाविकालीनपौत्रप्रपौत्रादिवृत्तांतो निश्चेतुं न शक्यते। तद्वत्स्वर्गप्राप्तिर्भाविकालीनेति गुणयोगादनिश्चयोपन्यासः। धूमादिपरिहारस्तु प्रत्यक्षत्वान्निश्चित इत्यभिप्रायः॥ यदप्यन्यदृष्टविरोधायोदाहृतं शोभते ऽस्य मुखं य एवं वेदेति तत्रोत्तरं सूत्रयति॥

विद्याप्रशंसेति ॥ १५ ॥ सो ऽयं गर्गत्रिरात्रविधेः शेषः। तद्विषयं वेदनमपि मुखशोभाहेतु किमुतानुष्ठानमिति स्तूयते। यथा कर्णाभरणादिना मुखं शोभितं भवत्येवं वेदितुरुत्साहेनैव विकसितं वदनं शोभितमिव शिष्यैरुद्वीक्ष्यते। अतः शोभासादृश्यगुणयोगात् शोभत इत्युच्यते। यदप्यन्यद्विरोधायोदाहृतमास्य प्रजायां वाजी जायते य एवं वेदेति सो ऽपि वेदानुमंत्रणविधेः शेषः। अत्रापि कैमुतिकन्यायेन स्तुतिः पूर्ववद्योजनीया। वेदितुः पुत्रः पितृशिक्षया स्वयमपि विद्वान्भवति। ततः प्रतिग्रहेणान्नं प्राप्नोति। तस्मादीदृशं गुणमभिप्रेत्य वाजी जायत इत्युक्तं। यदप्यन्यदानर्थक्यायोदाहृतं पूर्णाहुत्या सर्वान्कामानवाप्नोतीति तत्रोत्तरं सूत्रयति॥

सर्वत्वमाधिकारिकमिति ॥ १६ ॥ पूर्णाहुतिं जुहुयादित्यस्य विधेः शेषो ऽयं। सर्वकामावाप्तिहेतुत्वात्प्रशस्तेयमाहुतिरिति स्तूयते। यथा सर्वे ब्राह्मणा भोजयितव्या इत्यत्र सर्वत्वं स्वगृहागतब्राह्मणविषयं। एवं पूर्णाहुत्या कर्मसांगत्वे

यत्फलं तस्मिन्नधिकारे प्रस्तावे संभावितं तद्विषयमेव सर्वत्वं द्रष्टव्यं। पूर्णाहुतेरभावे सत्याधानरूपं कर्मांगविकलं भवति। तच्च वैकल्यं पूर्णाहुत्या समाधीयत इत्येकः कामः। तस्मिन्समाहिते सत्याहवनीयाद्यग्नयोऽग्निहोत्रादिकर्मसु योग्या भवंतीत्यन्यः कामः। तैश्च कर्मभिस्तत्फलं प्राप्यत इति कामांतरं। ईदृशी सर्वकामावाप्तिराहुत्यंतरेष्वपि विद्यत इति चेत्। विद्यतां नाम। किं नश्छिन्नं। न खल्वेतावता पूर्णाहुतिस्तुतेः काचिद्धानिरस्ति॥ ननु पूर्णाहुतेरंगभावत्वात्तदीयफलश्रुतेरर्थवादत्वेन स्तावकत्वं भवतु। द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवाद इति सूत्रेण निर्णीतत्वात्। पशुबंधवाक्यस्य तु कर्मविधायकत्वात्सर्वलोकाभिजयस्य मुख्यफलत्वादत्यानर्थक्यं दुर्वारमित्याशंक्योत्तरं सूचयति॥

फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः सारतो वा फलविशेषः स्यादिति॥१७॥ पृथिव्यंतरिक्षद्युलोकेष्वन्यतमलोकाभिजयरूपं फलं पशुबंधकर्मणा निष्पाद्यते। तेषां च पृथिव्यादीनां फलानां कर्मांतरेण परिमाणाधिक्यं सारत्वं वा संपाद्यते। ततः फलविशेषः स्यादिति नास्त्यानर्थक्यं। लोकवदित्युक्तार्थे दृष्टांतः। यथा लोके निष्केण खारीपरिमितान्व्रीहीन्विक्रीय निष्कांतरेण पुनः क्रये सति परिमाणाधिक्यं भवति। यथा वा निष्केण वस्त्रमात्रं लभ्यते निष्कद्वयेन तु सारभूतं दुकूलं। तथा भोगाधिक्यं भोगसारत्वं वा कर्मांतरेण द्रष्टव्यं। ब्रह्महत्याया अपि मानस्यास्त्वल्पाया वेदनमात्रेण तरणं। कायिक्यास्तु महत्या अश्वमेधेनेति नास्त्यन्यानर्थक्यं॥ योऽपि नांतरिक्षे न दिवीत्यप्रसक्तप्रतिषेध उदाहृतः। तथा बबरः प्रावाहणिरित्यनित्यसंयोग उदाहृतस्तत्रोभयोत्तरं सूचयति॥

अंत्ययोर्यथोक्तमिति॥१८॥ अंत्ययोरुदाहरणयोरुत्तरं पूर्वोक्तमेव द्रष्टव्यं। अंतरिक्षादौ चयननिंदारूपोऽर्थवादो हिरण्यं निधाय चेतव्यमित्यस्य विधेः शेषः। अतोऽत्र स्तुत्यर्थे विधीनां स्युरित्युक्तमेवोत्तरं। अंतरिक्षे चयनप्रसक्त्यभावात्तन्निंदा नित्यानुवादोऽस्तु। तेनापि विधिः स्तोतुं शक्यते। नित्यसिद्धार्थानुवादिना वायोः क्षेपिष्ठत्वेन पशुविधेः स्तुतत्वात्॥ बबरः प्रावाहणिरकामयतेत्यत्रापि बबरनामकः कश्चिदनित्यः पुरुषो मनुष्यो न विवक्षितः। किंतु बबरध्वनियुक्तः प्रकर्षेण वहनशीलो वायुर्व्यवहारदशायां नित्य एवार्थो विवक्षित इत्येतदुत्तरं प्रथमपादस्यांतिमाधिकरणे प्रोक्तं। तस्मात्संभावितदोषाणां परिहृतत्वादर्थवादानामस्ति प्रामाण्यं॥

तत्र संग्रहश्लोकाः ॥

वायुर्वा इत्येवमादेरर्थवादस्य मानता ।
न विधेयेऽस्ति धर्मे किं किं वासौ तत्र विद्यते ॥ १ ॥
विध्यर्थवादशब्दानां मिथोऽपेक्षापरिक्षयात् ।
नास्त्येकवाक्यता धर्मे प्रामाण्यं संभवेत्कुतः ॥ २ ॥
विध्यर्थवादौ साकांक्षौ प्राशस्त्यपुरुषार्थयोः ।
तेनैकवाक्यता तस्माद्वादानां धर्ममानता ॥ ३ ॥

तदेवं वेदे विद्यमानानां त्रयाणां मंत्रविध्यर्थवादभागानामप्रामाण्यकारणाभावाद्बोधकानां तेषां प्रामाण्यस्य स्वतस्त्वांगीकारात्कृत्स्नस्यापि वेदस्य प्रामाण्यं सिद्धं ॥

नन्वेवमपि वेदस्य पौरुषेयत्वेन विप्रलंभकवाक्यवदप्रामाण्यं स्यात् । पौरुषेयत्वं च प्रथमपादे पूर्वपक्षत्वेन जैमिनिः सूत्रयामास ॥

वेदांश्चैके संनिकर्षं पुरुषाख्येति ॥ १ ॥ एके वादिनो वेदान्प्रति संनिकर्षं मन्यंते । कालिदासादिभिर्निर्मितानां रघुवंशादिग्रंथानां समुच्चयार्थश्चकारः । ते ह्यत्र दृष्टांततया समुच्चीयंते । यथा रघुवंशादय इदानींतनास्तथा वेदा अपि । न तु वेदा अनादयः । अत एव वेदकर्तृत्वेन पुरुषा आख्यायंते । वैयासिकं भारतं वाल्मीकीयं रामायणमित्यत्र यथा भारतादिकर्तृत्वेन व्यासादय आख्यायंते । तथा काठकं कौथुमं तैत्तिरीयमित्येवं तत्तद्वेदशाखाकर्तृत्वेन कठादीनामाख्यातत्वाद्वेदाः पौरुषेयाः ॥ ननु नित्यानामेव सतां वेदानामुपाध्यायवत्संप्रदायप्रवर्तकत्वेन काठकादिसमाख्या स्यादित्याशंक्य युक्त्यंतरं सूत्रयति ॥

अनित्यदर्शनाच्चेति ॥ २ ॥ अनित्या जननमरणवंतो बबरादयो वेदार्थे श्रूयंते । बबरः प्रावाहणिरकामयत । कुसुरुविंद औद्दालकिरकामयतेति । तथा सति बबरादिभ्यः पूर्वमभावादनित्या वेदाः । विमतं वेदवाक्यं पौरुषेयं वाक्यत्वात्कालिदासादिवाक्यवदित्यनुमानसमुच्चयार्थश्चकारः ॥

सिद्धांतं सूत्रयति ॥ उक्तं तु शब्दपूर्वत्वमिति ॥ ३ ॥ तुशब्दो वेदानामनित्यत्वं वारयति । शब्दस्य वेदरूपस्य कठादिपुरुषेभ्यः पूर्वत्वमनादित्वं प्राचीनैश्च सूत्रैरुक्तं । औत्पत्तिकस्तु शब्दस्यार्थेन संबंध इत्यस्मिन्सूत्र औत्पत्तिकशब्देन सर्वेषां शब्दानां वेदानां तदर्थानां तदुभयसंबंधानां च नित्यत्वं प्रतिज्ञायोत्तराभ्यां शब्दाधिकरणवाक्याधिकरणाभ्यामुपपादितत्वात्का तर्हि काठकाद्याख्यायिकाया गतिरित्याशंक्य संप्रदायप्रवर्तनात्सेयमुपपद्यत इत्युत्तरं सूत्रयति ॥

आख्याप्रवचनादिति ॥ ४ ॥ अस्त्वियमाख्यायिकाया गतिः ॥ ततः परं बबराद्यनित्यदर्शनं यदुक्तं तस्य किमुत्तरमित्याशंक्योत्तरं सूचयति ॥

परं तु श्रुतिसामान्यमात्रमिति ॥ ५ ॥ यत्परं बबरादिकं तत्तच्छब्दसामान्यमेव न तु मनुष्यो बबरनामकोऽत्र विवक्षितः । बबरध्वनियुक्तस्य प्रवाहणस्वभावस्य वायोरत्र वक्तुं शक्यत्वात् ॥ ननु वेदे क्वचिदेव श्रूयते वनस्पतयः सत्रमासत सर्पाः सत्रमासतेति । तत्र वनस्पतीनामचेतनत्वात्सर्पाणां चेतनत्वेऽपि विद्यारहितत्वान्न तदनुष्ठानं संभवति । अतो जरद्गवो गायति मद्रकाणीत्याद्युन्मत्तबालवाक्यसदृशत्वात्केनचित्कृतो वेद इत्याशंक्योत्तरं सूचयति ॥

कृते चाविनियोगः स्यात्कर्मणः समत्वादिति ॥ ६ ॥ यदि ज्योतिष्टोमादिवाक्यं केनचित्पुरुषेण क्रियेत । तदानीं कृते तस्मिन्वाक्ये स्वर्गसाधनत्वे ज्योतिष्टोमस्य विनियोगो न स्यात् । साध्यसाधनभावस्य पुरुषेण ज्ञातुमशक्यत्वात् । श्रूयते तु विनियोगः । ज्योतिष्टोमेन स्वर्गकामो यजेतेति । न चैतदुन्मत्तवाक्यसादृशं लौकिकविधिवाक्यवद्भाव्यकरणेतिकर्तव्यतारूपैस्त्रिभिरंशैरुपेताया भावनाया अवगमात् । लोके हि ब्राह्मणान्भोजयेदिति विधौ किं केन कथमित्याकांक्षायां तृप्तिमुद्दिश्यौदनेन द्रव्येण शाकसूपादिपरिवेषणप्रकारेणेति यथोच्यते । ज्योतिष्टोमविधावपि स्वर्गमुद्दिश्य सोमेन द्रव्येण दीक्षणीयाद्यंगोपकारप्रकारेणेत्युक्ते कथमुन्मत्तवाक्यसदृशं भवेदिति वनस्पत्यादिसत्रवाक्यमपि न तत्सदृशं तस्य सत्रकर्मणो ज्योतिष्टोमादिना समत्वात् । यत्परो हि शब्दः स शब्दार्थ इति न्यायविद आहुः । ज्योतिष्टोमादिवाक्यस्य विधायकत्वादनुष्ठाने तात्पर्यं । वनस्पत्यादिसत्रवाक्यस्यार्थवादत्वात्प्रशंसायां तात्पर्यं । सा चाविद्यमानेनापि कर्तुं शक्यते । अचेतना अविद्वांसोऽपि सत्रमनुष्ठितवंतः । किं पुनश्चेतना विद्वांसो ब्राह्मणा इति सत्रस्तुतिः । चकारः पूर्वपक्षोक्तस्य वाक्यत्वहेतोः कर्त्रनुपलंभेन पराहतिं समुच्चिनोति । तस्मान्नास्ति वेदस्य पौरुषेयत्वं ॥

अत्रैतौ संग्रहश्लोकौ ॥

पौरुषेयं न वा वेदवाक्यं स्यात्पौरुषेयता ।
काठकादिसमाख्यानाद्वाक्यत्वाच्चान्यवाक्यवत् ॥ १ ॥
समाख्यानं प्रवचनाद्वाक्यत्वं तु पराहतं ।
तत्कर्त्रनुपलंभेन स्यात्ततोऽपौरुषेयता ॥ २ ॥

ननु भगवता बादरायणेन वेदस्य ब्रह्मकार्यत्वं सूचितं । शास्त्रयोनित्वादिति ।

ऋग्वेदादिशास्त्रकारणत्वाद्ब्रह्म सर्वज्ञमिति सूत्रार्थः । बाढं । नैतावता पौरुषेयत्वं भवति । मनुष्यनिर्मितत्वाभावात् । ईदृशमपौरुषेयत्वमभिप्रेत्य व्यवहारदशायामाकाशादिवन्नित्यत्वं बादरायणेनैव देवताधिकरणे सूचितं । अत एव च नित्यत्वमिति श्रुतिस्मृती चात्र भवतः । वाचा विरूपनित्ययेति श्रुतिः । अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवेति स्मृतिः । तस्मात्कर्तृदोषशंकाया अनुदयान्मंत्रब्राह्मणात्मकस्य वेदस्य निर्विघ्नं प्रामाण्यं सिद्धं ॥

ननु मंत्रब्राह्मणात्मकत्वं वेदस्य न युक्तं । तयोः स्वरूपस्य निर्णेतुमशक्यत्वात् । मैवं । द्वितीयाध्यायस्य प्रथमपादे सप्तमाष्टमयोरधिकरणयोर्निर्णीतत्वात् । सप्तमाधिकरणमारचयति ॥

अहे बुध्निय मंत्रं म इति मंत्रस्य लक्षणं ।
नास्त्यस्ति वास्य नास्त्येतदव्याप्त्यादेरवारणात् ॥ १ ॥
याज्ञिकानां समाख्यानं लक्षणं दोषवर्जितं ।
तेऽनुष्ठानस्मारकादौ मंत्रशब्दं प्रयुंजते ॥ २ ॥

आधान इदमाम्नायते । अहे बुध्निय मंत्रं मे गोपायेति । तत्र मंत्रस्य लक्षणं नास्ति । अव्याप्त्यतिव्याप्त्योर्वारयितुमशक्यत्वात् । विहितार्थाभिधायको मंत्र इत्युक्ते वसंताय कपिंजलानालभत इत्यस्य मंत्रस्य विधिरूपत्वादव्याप्तिः । मननहेतुर्मंत्र इत्युक्ते ब्राह्मणेऽतिव्याप्तिः । एवमसिपदांतो मंत्र उत्तमपुरुषांतो मंत्र इत्यादिलक्षणानां परस्परमव्याप्तिरिति चेत् । मैवं । याज्ञिकसमाख्यानस्य निर्दोषलक्षणत्वात् । तच्च समाख्यानमनुष्ठानस्मारकादीनां मंत्रत्वं गमयति । उरु प्रथस्वेत्यादयोऽनुष्ठानस्मारकाः । अग्निमीळे पुरोहितमित्यादयः स्तुतिरूपाः । इषे त्वेत्यादयस्त्वांताः । अग्न आयाहि वीतय इत्यादय आमंत्रणोपेताः । अग्नीदग्नीन्विहरेत्यादयः प्रैषरूपाः । अधःस्विदासी३दुपरिस्विदासी३दित्यादयो विचाररूपाः । अंबे अंबाले अंबिके न मानयति कश्चनेत्यादयः परिदेवनरूपाः । पृच्छामि त्वा परमंतं पृथिव्या इत्यादयः प्रश्नरूपाः । वेदिमाहुः परमंतं पृथिव्या इत्यादय उत्तररूपाः । एवमन्यदप्युदाहार्यं । ईदृशेष्वत्यंतविजातीयेषु समाख्यानमंतरेण नान्यः कश्चिदनुगतो धर्मोऽस्ति यस्य लक्षणत्वमुच्येत । लक्षणस्य चोपयोगः पूर्वाचार्यैर्दर्शितः । ऋषयोऽपि पदार्थानां नांतं यांति पृथक्त्वशः । लक्षणेन तु सिद्धानामंतं यांति विपश्चित इति । तस्मादभियुक्तानां मंत्रोऽयमिति समाख्यानं लक्षणं ॥

अष्टमाधिकरणमारचयति ॥

नास्त्येतद्ब्राह्मणेऽन्यच्चलक्षणं विद्यतेऽथवा ।
नास्तीयंतो वेदभागा इति कॢप्तेरभावतः ॥ १ ॥
मंत्रश्च ब्राह्मणं चेति द्वौ भागौ तेन मंत्रतः ।
अन्यद्ब्राह्मणमित्येतद्भवेद्ब्राह्मणलक्षणं ॥ २ ॥

चातुर्मास्येष्विदमाम्नायते । एतद्ब्राह्मणान्येव पंच हवींषीति । तत्र ब्राह्मणस्य लक्षणं नास्ति । कुतः । वेदभागानामियत्तानवधारणेन । ब्राह्मणभागेष्वन्यभागेषु च लक्षणस्याव्याप्त्यतिव्याप्त्योः शोधयितुमशक्यत्वात् । पूर्वोक्तमंत्रभाग एकः । भागांतराणि च कानिचित्पूर्वैरुदाहर्तुं संगृहीतानि । हेतुर्निर्वचनं निंदा प्रशंसा संशयो विधिः । परक्रिया पुराकल्पो व्यवधारणकल्पनेति । तेन ह्यन्नं क्रियत इति हेतुः । तद्दध्नो दधित्वमिति निर्वचनं । अमेध्या वै माषा इति निंदा । वायुर्वै क्षेपिष्ठेति प्रशंसा । तद्व्यचिकित्स जुहवानी३मा हौषा३मिति संशयः । यजमानेन संमितौदुंबरी भवतीति विधिः । माषानेव मह्यं पचंतीति परकृतिः । पुरा ब्राह्मणा अभैषुरिति पुराकल्पः । यावतोऽश्वान्परिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेदिति विशेषावधारणकल्पना । एवमन्यदप्युदाहार्यं । न च हेत्वादीनामन्यतमं ब्राह्मणमिति लक्षणं । मंत्रेष्वपि हेत्वादिसद्भावात् । इंद्रवो वामुशंति हीति हेतुः । उदानिषुर्महीरिति तस्मादुदकमुच्यत इति निर्वचनं । मोघमन्नं विंदते अप्रचेता इति निंदा । अग्निर्मूर्द्धा दिवः ककुदिति प्रशंसा । अधःस्विदासी३दुपरिस्विदासी३दिति संशयः । वसंताय कपिंजलानालभत इति विधिः । सहस्रमयुतं ददामीति परकृतिः । यज्ञेन यज्ञमयजंत देवा इति पुराकल्पः । इतिकरणबहुलं ब्राह्मणमिति चेत् । न । इत्यददा इत्ययजथा इत्यपच इति ब्राह्मणो गायेदित्यस्मिन्ब्राह्मणेन गातव्ये मंत्रेऽतिव्याप्तेः । इत्याहेत्यनेन वाक्येनोपनिबद्धं ब्राह्मणमिति चेत् । न । राजा चिद्यं भगं भक्षीत्याह । यो मायातुं यातुधानेत्याह यो वा रक्षाः शुचिरस्मीत्याहेत्यनयोर्मंत्रयोरतिव्याप्तेः । आख्यायिकारूपं ब्राह्मणमिति चेत् । न । यमयमीसंवादसूक्तादावतिव्याप्तेः । तस्मान्नास्ति ब्राह्मणस्य लक्षणमिति प्राप्ते ब्रूमः । मंत्रब्राह्मणरूपौ द्वावेव वेदभागावित्यंगीकारान्मंत्रलक्षणस्य पूर्वमभिहितत्वादवशिष्टो वेदभागो ब्राह्मणमित्येतल्लक्षणं भविष्यति । तदेतल्लक्षणद्वयं जैमिनिः सूत्रयामास । तच्चोदकेषु मंत्राख्या । शेषे ब्राह्मणशब्द इति । तच्चोदकेषु तदभिधायकेषु वाक्येषु

मंत्र इति समाख्या संप्रदायविद्भिर्व्यवह्रियते । मंत्रानधीमह इति । मंत्रव्यतिरिक्तभागे तु ब्राह्मणशब्दस्तैर्व्यवहृत इत्यर्थः ॥

ननु ब्रह्मयज्ञप्रकरणे मंत्रब्राह्मणव्यतिरिक्ता इतिहासादयो भागा आम्नायंते । यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान् गाथा नाराशंसीरिति । मैवं । विप्रपरिव्राजकन्यायेन ब्राह्मणाद्यवांतरभेदानामेवेतिहासादीनां पृथगभिधानात् । देवासुराः संयत्ता आसन्नित्यादय इतिहासाः । इदं वा अग्रे नैव किंचिदासीदित्यादिकं जगतः प्रागवस्थामुपक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणं । कल्पस्त्वारुणकेतुकचयनप्रकरणे समाम्नायत इति मंत्राः कल्पोऽत ऊर्ध्वं यदि बलिं हरेदिति । अग्निचयने साम गाथाभिः परिगायतीति विहिता मंत्रविशेषा गाथाः । मनुष्यवृत्तांतप्रतिपादका ऋचो नाराशंस्यः । तस्मान्मंत्रब्राह्मणव्यतिरिक्तभागाभावान्मंत्रब्राह्मणस्वरूपस्य लक्षितत्वात्तदुभयात्मकत्वं वेदस्य सुस्थितं ॥

मंत्रावांतरविशेषश्च तस्मिन्नेव पाद इत्थं विचारितः ।

नर्क्सामयजुषां लक्ष्म सांकर्यादिति शंकिते ।
पादश्च गीतिः प्रश्लिष्टपाठ इत्यस्त्यसंकरः ॥

इदमाम्नायते । अहे बुध्निय मंत्रं मे गोपाय यमृषयस्त्रैविदा विदुः । ऋचः सामानि यजूंषीति त्रीन्वेदान्विदंतीति त्रिविदः । त्रिविदां संबंधिनोऽध्येतारस्त्रैविदाः । ते च यं मंत्रभागमृगादिरूपेण त्रिविधमाहुस्तं गोपायेति योजना । तत्र त्रिविधानामृक्सामयजुषां व्यवस्थितं लक्षणं नास्ति । कुतः । सांकर्यस्य दुःपरिहरत्वात् । अध्यापकप्रसिद्धेष्वृग्वेदादिषु पठितो मंत्र इति हि लक्षणं वक्तव्यं । तच्च संकीर्णं । देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरित्ययं मंत्रो यजुर्वेदसंप्रतिपन्नयजुषां मध्ये पठितः । न च तस्य यजुष्ट्वमस्ति तद्ब्राह्मणे सावित्र्यर्चेत्यृक्त्वेन व्यवहृतत्वात् । एतत्साम गायन्नास्त इति प्रतिज्ञाय किंचित्साम यजुर्वेदे गीतं । अक्षितमस्यच्युतमसि प्राणसंशितमसीति त्रीणि यजूंषि सामवेदे समाम्नातानि । तथा गीयमानस्य साम्न आश्रयभूता ऋचः सामवेदे समाम्नायंते । तस्मान्नास्ति लक्षणमिति चेत् । न । पादादीनामसंकीर्णलक्षणत्वात् । पादेनार्धर्चेनोपेता वृत्तबद्धमंत्रा ऋचः । गीतिस्वरूपमंत्राः सामानि । वृत्तगीतिवर्जितत्वेन प्रश्लिष्टपठिता मंत्रा यजूंषीत्युक्ते न क्वापि संकरः । तदेतत्त्रैविध्यं जैमिनिना सूत्रत्रयेण लक्षितं । तेषामृग्यत्रार्थवशेन पादव्यवस्था । गीतिषु सामाख्या । शेषे यजुःशब्द इति । एतमेव

मंत्रावांतरविशेषमुपजीव्य वेदानामृग्वेदो यजुर्वेदः सामवेद इति त्रैविध्यं संपन्नं ॥

तेषां च वेदानां सर्वेषामन्यतमस्य वा स्वप्रज्ञानुसारेणाध्ययनमुपनीतेन कर्तव्यं। तथा च याज्ञवल्क्यः स्मरति। वेदानधीत्य वेदौ वा वेदं वापि यथाक्रममिति। एकवेदपक्षे पितृपितामहादिपरंपराप्राप्त एव वेदोऽध्येतव्य इत्यभिप्रेत्य स्वाध्यायोऽध्येतव्य इति स्वशब्द आम्नातः। तच्चाध्ययनं न काम्यं किंतु नित्यं। अत एव पुरुषार्थानुशासने सूचितं ॥

वेदस्याध्ययनं नित्यमनध्ययने पातादिति ॥ पातित्यं चैवमाम्नायते। अपहतपाप्मा स्वाध्यायो देवपवित्रं वा एतत्। तं योऽनुसृजत्यभागो वाचि भवत्यभागो नाके। तदेषाभ्युक्ता। यस्तित्याज सखिविदं सखायं न तस्य वाच्यपि भागो अस्ति। यदीं शृणोत्यलकं शृणोति न हि प्रवेद सुकृतस्य पंथामिति। तस्मात्स्वाध्यायोऽध्येतव्य इति। अध्येतारं पुरुषं तदीयप्रयासाभिज्ञानेन सखिवत्पालयतीति सखिविद्वेदः। बहुद्रव्यप्रयाससाध्यक्रतुफलस्याध्ययनमात्रेण संपादनं तत्पालनं। तदप्याम्नायते। यं यं क्रतुमधीते तेनास्येष्टं भवत्यग्नेर्वायोरादित्यस्य सायुज्यं गच्छतीति। यद्यप्येतद्ब्रह्मयज्ञस्वाध्यायफलं तथापि ग्रहणार्थाध्ययनमंतरेण ब्रह्मयज्ञासंभवात् तदीयफलमपि संपद्यते। ईदृशं सखिविदं वेदरूपं सखायं यः पुमानध्ययनं मा कृत्वा परित्यजति। तस्य वाच्यपि भाग्यं नास्ति। फले भाग्यं नास्तीति किमु वक्तव्यं। सकलदेवतानां धर्मस्य परब्रह्मतत्वस्य च प्रतिपादकं वेदमनुच्चार्य परनिंदानृतकलहहेतुं लौकिकीं वार्तां सर्वत्रोच्चारयतः स्पष्ट एव वाचि भाग्याभावः। अत एवाम्नायते। नानुध्यायान्बहून् शब्दान्वाचो विग्लापनं हि तदिति। यद्यप्यसौ काव्यनाटकं शृणोति तथापि निरर्थकमेव तच्छ्रवणं। तेन सुकृतमार्गज्ञानाभावादित्यर्थः। स्मृतिरपि। योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमं। स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वय इति। एवमन्यान्यपि बहूनि वचनान्यत्रोदाहर्तव्यानि ॥

नन्वधीते वेदे पश्चादध्ययनविध्यर्थ ज्ञानं। ज्ञाने सति पश्चादध्ययनप्रवृत्तिरित्यन्योन्याश्रय इति चेत्। बाढं। अत एव गुरुमतानुसारिण आचार्यकर्तृकाध्यापनप्रवृत्तिं माणवकाध्ययनस्य महता प्रयासेन संपादयंति। मतांतरानुसारिणस्तु प्रकाशात्मादयोऽध्ययनात्प्रागेव संध्यावंदनादिविधिज्ञानवत्पित्रादिभ्योऽध्ययनविज्ञानं वर्णयंति। यद्यध्यापनविधिप्रयुक्तिः। यदि वा स्वविधिप्रयुक्तिः।

सर्वथाप्युपनीतैरध्येतव्य एव वेदः। तस्य चाध्ययनस्य दृष्टार्थत्वमक्षरग्रहणांतत्वं च पुरुषार्थानुशासने सूचितं। तानि सूत्राणि तद्वृत्तिं चोदाहरामः। अध्ययनस्य दृष्टार्थत्वं साधयितुं पूर्वपक्षयति॥

अदृष्टार्था त्वधीतिर्विहितत्वादिति॥१॥ दृष्टफलसाधने भोजनादौ विध्यदर्शनाद्विहितमध्ययनमदृष्टार्थमवगंतव्यं॥ अदृष्टविशेषो न श्रुत इति चेत्तत्राह॥

घृतकुल्याद्यतिदेशः स्वर्गकल्पनं वेति॥२॥ ब्रह्मयज्ञजपाध्ययनार्थवादं नित्याध्ययनेऽतिदिश्य तत्रत्यं घृतकुल्यादिकं रात्रिसत्रन्यायेन फलत्वेन कल्पनीयं। ये त्वर्थवादातिदेशं नेच्छंति तैर्विश्वजिन्न्यायेन स्वर्गः कल्पनीयः॥ दृष्टफलयोः संस्कारप्राप्त्योः संभवे कथमदृष्टकल्पनेत्यत आह॥

अयुक्ते संस्कारप्राप्ती इति॥३॥ संस्कृतस्वाध्यायस्य क्वचित्क्रतौ विनियोगादर्शनात्प्राप्तेः स्वयमपुरुषार्थत्वाच्चेत्यर्थः॥ स्वाध्यायप्राप्तिरर्थप्रतिपत्तिहेतुतया पुरुषार्थ इत्याशंक्य विषनिर्हरणादिकार्यविनियुक्तमंत्रवदध्ययनांगतया विनियुक्तानां ज्योतिष्टोमादिवाक्यानां न स्वार्थे प्रामाण्यमित्याह॥

अन्यांगं नार्थप्रमापकमिति॥४॥ अध्ययनविधायकं तु वाक्यं स्वविहिताध्ययनस्यैवांगमिति कृत्वा स्वार्थे प्रमाणमित्याह॥

अध्ययनवाक्यमनन्यांगमिति॥५॥ नन्वेवमदृष्टार्थत्वे कर्मकारकभूतस्वाध्यायगतफलाभावादध्येतव्य इति कर्मवाची तव्यप्रत्ययो विरुध्येतेत्यत आह॥

सक्तुवत्करणपरिणाम इति॥६॥ सक्तूञ्जुहोतीत्यत्र कर्मत्वेन प्रधानभूतान्सक्तूनुद्दिश्य होमसंस्कारविधाने प्रतीयमानेऽपि होमसंस्कृतानां भस्मीभूतानां सक्तूनामन्यत्र विनियोगाभावात्कर्मप्राधान्यं हित्वा सक्तुभिर्जुहोतीति करणपरिणामः कृतः। एवमत्रापि कर्मगतयोः संस्कारप्राप्त्योरसंभवात् स्वाध्यायेनाधीयीतेति वाक्यपरिणामः कर्तव्यः॥ इदानीं दृष्टफले सत्यदृष्टफलं न कल्प्यमिति सिद्धांतयति॥

दृष्टे तु नादृष्टमिति॥७॥ किं तद्दृष्टफलमिति तदाह॥

दृष्टौ प्राप्तिसंस्काराविति॥८॥ अक्षरप्राप्तेः परंपरया पुरुषार्थत्वमाह॥

प्राप्त्यार्थबोध इति॥९॥ जायत इति शेषः॥ न च भोजनादिवदन्वयव्यतिरेकसिद्धत्वाद्विधिवैयर्थ्यमिति शंकनीयं। अवघातादिवन्नियमादृष्टाय विध्युपपत्तेरित्याह॥

विधिनिष्पत्त्या इति॥१०॥ यत्तूक्तं संस्कृतस्य स्वाध्यायस्य विनियोगादर्शनान्न संस्कार इति तत्राह॥

संस्कारसिद्धिः ऋत्वध्ययनविधिद्वयोपादानादिति ॥ ११ ॥ ऋतुविधयो विषयावबोधमपेक्षमाणास्तदवबोधे स्वाध्यायं विनियुंजते । अध्ययनविधिश्च लिखितपाठादि व्यावृत्याध्ययनसंस्कृतत्वं स्वाध्यायस्य गमयति । अत उभयोपादानात्तत्सिद्धिः ॥ ननु संस्कारो नामादृष्टातिशयः । स च न स्वाध्यायगतः । तव्यप्रत्ययेन स्वपदोपात्तप्रकृत्यर्थभूताध्ययनोपरक्ताया भावनाया अपूर्वाभिधानात् । ततः कथं स्वाध्यायस्य संस्कृतत्वमिति तत्राह ॥

तव्यः कर्म वादृष्टवाचीति ॥ १२ ॥ अत्र तव्यप्रत्ययस्य कर्माभिधायितया कर्मकारकस्य स्वाध्यायस्य तव्यप्रत्ययं प्रति प्रकृत्यर्थादध्ययनादपि प्रत्यासन्नत्वात्स्वाध्यायगतमेवापूर्वं तव्यप्रत्ययो वक्ति । अपूर्वस्य धात्वर्थजन्यत्वनियमेऽपि तदुपरक्तत्वानियमादिति भावः । यच्चोक्तमन्यांगं नार्थप्रमापकमिति तदसत् । यतो मंत्राणां स्वतंत्रादृष्टशेषाणां तथात्वं युज्यते । इह तु स्वाध्यायाश्रितमदृष्टं ॥ तस्य च स्वाध्यायगताक्षरसामर्थ्यसिद्धार्थावबोधे फले सति फलांतरकल्पनायोगात्प्रामाण्यस्योपबृंहकमेवादृष्टं न तु प्रतिबाधकमित्याह ॥

स्वतंत्रादृष्टशेषत्वान्न स्वार्थप्रमा प्रतिबध्यत इति ॥ १३ ॥ सक्तुन्यायेन कर्मकारकप्राधान्ये परित्यक्ते स्वतंत्रादृष्टमेवात्रापि स्यादित्यत्राह ॥

यथाश्रुतोपपत्तेर्न सक्तुन्याय इति ॥ १४ ॥ सक्तुषु गत्यभावाच्छ्रुतं परित्यज्याश्रुतं कल्प्यतां नाम । नेहतद्युक्तं प्रदर्शितत्वादित्यर्थः ॥ इत्थमध्ययनविधेर्दृष्टार्थत्वं प्रसाध्यार्थावबोधपर्यंततां निराकर्तुं पूर्वपक्षयति ॥

वैधमर्थनिर्णयं भट्टगुरुविधेः पुमार्थावसानादिति ॥ १ ॥ सर्वत्र विधेः पुरुषार्थपर्यवसायित्वनियमादत्रापि पुरुषार्थभूतं फलवदर्थनिश्चयमध्ययनविधिप्रयुक्तं भट्टगुरू मन्येते ॥ ननु सकृदध्ययनादावृत्तिसहिताद्वार्थनिश्चयो नोपलभ्यत इत्याशंक्य । तथा सति तत्सिद्धये सोऽध्ययनविधिरर्थनिश्चयहेतुं विचारं कल्पयिष्यतीत्याह ॥

स विचारमाक्षिपेदिति ॥ २ ॥ ननु स्वविधेयतदुपकारिणोरेव विधिः प्रयोजक इति सर्वत्र नियमः । तथा सत्यतादृशं कथमत्राध्ययनविधिमाक्षेप्स्यतीत्यत आह ॥

अविधेयानुपकार्याक्षेपोऽवघातावृत्तिवदिति ॥ ३ ॥ व्रीहीनवहंतीत्यत्रावघातमात्रं विधेयं न तु तदावृत्तिः । तस्या धात्वर्थत्वात् । नापि सा विधेयोपकारिणी । अंतरेणावृत्तिं सकृन्मुशलघातादवघातसिद्धेः । तथापि तंडुलनिष्पत्तिफलसिद्धये स विधिरावृत्तिं यद्वदाचिक्षेप तद्वत्प्रकृतेऽप्यवगंतव्यं ॥ ननु वेदमात्राध्यायिनो

ऽर्थावबोधानुदयेऽपि व्याकरणाद्यंगसहितवेदाध्यायिनस्तदुदयसद्भावात्तं प्रति व्यर्थं विचारं विधिर्न कल्पयेदित्याशंक्यार्थगतविरोधपरिहारायापेक्षित एव विचार इत्याह ॥

सांगाध्ययनात्तद्भावे विचारो विरोधापनुदिति ॥ ४ ॥

सिद्धांतयति ॥ प्राप्तिस्तु गवादिवत्पुमर्थत्वाद्विधिस्तदंत इति ॥ ५ ॥

यथा फलभूतस्य क्षीरादेर्हेतवो गवादयोऽपि पुरुषैरर्थ्यंते। तथा फलवदर्थावबोधहेतोरक्षरप्राप्तेरपि पुरुषार्थत्वादध्ययनविधिरक्षरप्राप्त्यवसानोऽवगंतव्यः ॥ नन्वक्षरप्राप्तेः पुरुषार्थत्वं फलवदर्थावबोधप्रयुक्तं चेत्तर्हि तद्बोधस्य मुख्यपुरुषार्थत्वाद्बोधांत एव विधिः किं न स्यादित्यत आह ॥

फलवद्बोधांतत्वेऽध्ययनाकात्स्र्न्यमिति ॥ ६ ॥ बोधस्य हि फलं कर्मानुष्ठानं। तथा सति यस्य ब्राह्मणादेर्यस्मिन्बृहस्पतिसवादावधिकारस्तस्य तद्वाक्यमात्राध्ययनं स्यात्। न तु राजसूयादिवाक्याध्ययनं। तत्र प्रवृत्त्यादिफलाभावात्। स्वपक्षे तु नायं दोष इत्याह ॥

कृत्स्नप्राप्तिर्जपार्थेति ॥ ७ ॥ न चाबोधकत्वेऽर्थावबोध एव न सिध्येदिति शंकनीयं। प्रमाणस्य प्रमेयबोधकत्वस्वाभाव्यात्। लौकिकाप्तवाक्यानामंतरेणैव विधिबोधकत्वदर्शनादित्याह ॥

लोकवत्तेभ्यो बोध इति ॥ ८ ॥ ननु बोधस्य विधिफलत्वे बोधकाममुद्दिश्य विधातुं शक्यत्वात्सुलभोऽधिकारी स्यादित्याशंक्य प्राप्तिपक्षेऽपि प्राप्तिकाम उपनीताष्टवर्षब्राह्मणो वाधिकारी सुलभ एवेति परिहारं स्पष्टत्वादुपेक्ष्य बोधस्य काम्यत्वं दूषयति ॥

सोऽकाम्यः प्राग्बोध्यभानाभानयोरिति ॥ ९ ॥ बोध्यस्याग्निहोत्रादिलक्षणवेदार्थस्याध्ययनात्प्राक् संध्योपासनादिवत्पित्राद्युपदेशत एव भाने सिद्धत्वादेव सोऽर्थबोधो न काम्यः। अभाने कामयितुमशक्यः। ज्ञात एव विषये कामतानियमात् ॥ ननु सामान्यतो ज्ञाते विशेषतो बुभुत्सा संभवति। यद्वा विशेषतोऽपि पित्राद्युपदेशादवगते सत्यौपदेशिकज्ञानस्य प्रामाण्यनिर्णयाय पुनर्बोधकामता युक्तेवेत्याशंक्यैवमप्यर्थावबोधमुद्दिश्याध्ययनविधानं न संभवतीत्याह ॥

उद्देशायोगादिति ॥ १० ॥ अग्निहोत्रादिविशेषज्ञानानां न तावदेकबुद्ध्या विशेषाकारेणोद्देशः संभवति। अनंतत्वात्सामान्याकारेणोद्देशे सामान्यमेव विधिफलं स्यान्न तु ज्ञानविशेषः। ततो नोद्देशो युक्तः ॥ नन्वर्थावबोधमुद्दिश्योच्चारणा-

भावे वेदस्य स्वार्थे तात्पर्यं न स्यादित्याशंक्योपक्रमादिलिंगगम्यं तात्पर्यं शब्दबलादेव सिध्यतीत्याह ॥

तात्पर्यशब्दादिति ॥ ११ ॥ तदर्थज्ञानमुद्दिश्य शब्दोच्चारणं लोके व्यर्थं स्यादिति चेत् । न । पुरुषसंबंधकृतदोषाख्यप्रतिबंधपरिहारार्थत्वादित्याह ॥

उद्दिश्योच्चारणं दोषघ्नं वै लोक इति ॥ १२ ॥ नन्वध्ययनविधेर्बोधांतत्वाभावे विचारशास्त्रं न प्रवर्तेत प्रयोजकाभावादित्याशंक्याह ॥

विचार उत्तरविधिप्रयुक्त उपपद्यत इति ॥ १३ ॥ क्रतुबोधविधयः सांगवेदाध्ययनादापातप्रतिपन्नाः । विरोधपरिहारेण प्रतिष्ठितं निर्णयज्ञानमंतरेणानुष्ठापयितुमशक्नुवंतस्तं निर्णयाय क्रतुविचारं प्रयोजयंति । श्रवणविधिस्तु साक्षादेव ब्रह्मविचारं विधत्ते । एवं सति श्रवणविधेः स्वविधेयप्रयोजकत्वं क्रतुविधीनां च विधेयोपकारिप्रयोजकत्वमित्युपपद्यतेतरां । अध्ययनविधिप्रयुक्तिपक्षे तु तद्विधेः क्रतुद्वारा स्वर्गसिद्धिपर्यंतत्वात्क्रत्वनुष्ठानस्यापि तत्प्रयुक्तौ क्रतुविधिवैयर्थ्यमापद्येत ॥ नन्वध्ययनविधेस्त्रैवर्णिकमात्रं प्रति नित्यत्वात्तत्प्रयुक्तौ विचारस्यापि तल्लभ्येत । नान्यथेति चेत् । क्रतुविचारस्य त्रैवर्णिकमात्रेऽपि नित्यत्वसिद्धिः किं वा ब्रह्मविचारस्य । तत्राद्योऽस्मन्मतेऽपि सम इत्याह ॥

अतो नित्यः क्रतुविचारस्त्रैवर्णिकमात्रस्येति ॥ १४ ॥ यतोऽकरणे प्रत्यवायश्रवणात्क्रतवस्त्रैवर्णिकानां नित्या अत इत्यर्थः ॥ द्वितीयोऽनिष्ट इत्याह ॥

ब्रह्मविचारः पुनः परमहंसस्यैवेति ॥ १५ ॥ नित्योऽनुषंग इति ॥ ननूक्तनीत्याध्ययनस्याक्षरग्रहणांतत्वेऽर्थज्ञानमविहितं स्यात् । मैवं । वाक्यांतरेण तद्विधानात् । ब्राह्मणेन निःकारणो धर्मः षडंगो वेदोऽध्येयो ज्ञेयश्चेति तद्विधिः । तत्र निःकारणशब्देनाध्ययनज्ञानयोः काम्यत्वं निर्वार्यते । अर्थज्ञाने पुरुषप्रवृत्तिकरं वचनद्वयं शाखांतरगतं निरुक्तकारो यास्क एवमुदाजहार । अथापि ज्ञानप्रशंसा भवत्यज्ञाननिंदा च ।

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थं ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥
यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचिदिति ॥

अस्मिन्मंत्रद्वये योऽर्थज्ञ इत्यनेनैवार्द्धेन वेदार्थज्ञानं प्रशस्यते । इतरेणार्द्धत्रयेण ज्ञानराहित्यं निंद्यते । यो वेदार्थं जानाति सोऽयमिह लोके सकलं श्रेयः

प्राप्नोति। तथा तेन ज्ञानेन पापक्षये सति मृतः स्वर्गं प्राप्नोति। तदेतदैहिकामुष्मिकं च ज्ञानफलं तैत्तिरीया मंत्रोदाहरणेन तदीयतात्पर्याभिधायिब्राह्मणेन च स्पष्टीचक्रुः। तदेषाभ्युक्ता। ये अर्वाङुत वा पुराणे वेदं विद्वांसमभितो वदंत्यादित्यमेव ते परिवदंति। सर्वेऽग्निं द्वितीयं तृतीयं च हंसमिति। यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसंति। तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यान्नाश्लीलं कीर्तयेदेता एव देवताः प्रीणातीति। वेदं विद्वानर्थाभिज्ञः पुरुषः। स च द्विविधः। अर्वाचीनकाले समुत्पन्नश्चतुर्दशविद्यास्थानकुशलः कश्चिदुपाध्यायः पुरातनकाले समुत्पन्नो व्यासादिश्च। तमेतमुभयविधं विद्वांसं विद्यामदधनमदकुलमदोपेताः पंडितंमन्या ये पुरुषा अभितो विद्यादिषु दूषयंति सर्वेऽप्यादित्यमेव प्रथमं दूषयंति। आदित्यापेक्षया द्वितीयमग्निं दूषयंति। तदुभयापेक्षया तृतीयं हंसं दूषयंति। हंति सदा गच्छतीति हंसो वायुः। अग्न्यादिरूपत्वं च वेदविद आम्नातं। अग्नेर्वायोरादित्यस्य सायुज्यं गच्छतीति। न केवलमेतद्देवतात्रयं किंतु सर्वा अपि देवता वेदविदि वसंति। ब्राह्मणान्वेदविदो दृष्ट्वा स्मृत्वा वा प्रतिदिनं नमस्कुर्यान्न तु तस्मिन्विद्यमानमपि दोषं कीर्तयेत्। एवं सति तत्र मंत्रार्थभूताः सर्वा अपि देवता वेदार्थविदा स्मर्यमाणतया तदीयहृदयेऽवस्थिता अयं नमस्कर्ता तोषयति। न चैतदध्ययनस्यैव फलमिति शंकनीयं। विद्वांसमित्याम्नातत्वात्। अन्यथा वेदमधीयानमित्याम्नायेत। तस्मात्सर्वदेवताबुद्ध्या प्राणिभिः पूज्यस्य वेदार्थविदो लोकद्वयेऽपि श्रेयःप्राप्तिरुपपद्यते। यस्तु वेदमधीत्यार्थं न विजानाति सोऽयं पुमान्भारमेव हरति धारयति। स्थाणुरिति दृष्टांतः। छिन्नशाखं शुष्कं वृक्षमूलं स्थाणुशब्देनोच्यते। स च यथेंधनार्थमेवोपयुज्यते न तु पुष्पफलार्थं। तथा केवलपाठकस्य व्रात्यत्वं न भवतीत्येतावदेव। न ह्यनुष्ठानं स्वर्गादिफलसिद्धिर्वास्ति। किलेत्यनेन लोकप्रसिद्धिर्द्योत्यते। लोकेऽपि पाठकस्य यावती धनादिपूजा ततोऽप्यधिका विदुषि दृश्यते। किंच यद्वेदवाक्यमाचार्याद्गृहीतमर्थज्ञानरहितं पाठरूपेणैव पुनः पुनरुच्चार्यते। तत्कदाचिदपि न ज्वलति न प्रकाशयति। यथाग्निरहितप्रदेशे प्रक्षिप्तं शुष्ककाष्ठं न ज्वलति तद्वत्। तथा सति तस्य वाक्यस्य वेदत्वमेव मुख्यं न स्यात्। अलौकिकं पुरुषार्थोपायं वेत्त्यनेनेति वेदशब्दनिर्वचनं। तथा चोक्तं। प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते। एतं विदंति वेदेन तस्मा-

द्वेदस्य वेदतेति। अतो मुख्यवेदसिद्धये ज्ञातव्य एव तदर्थः ॥ किंचात्र यास्केन काचिदन्याप्युदाहृता।

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनां।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासा इति।

तत्र पूर्वार्द्धस्य तात्पर्यं स एव दर्शयति। अप्येकः पश्यन्न पश्यति वाचमपि च शृण्वन्न शृणोत्येनामित्यविद्वांसमाहार्द्धमिति। अस्यायमर्थः। यः पुमानर्थं न वेत्ति तं प्रति पूर्वार्द्धेण मंत्रो ब्रूते। एकः पुरुषः पाठमात्रपर्यवसितो वेदरूपां वाचं पश्यन्नपि न सम्यक् पश्यति। एकवचनबहुवचनविवेकाभावे पाठशुद्धेरपि कर्तुमशक्यत्वात्। वायुमेव स्वेन भागधेयेनोपधावति। स एवैनं भूतिं गमयति। आदित्यानेव स्वेन भागधेयेनोपधावति। त एवैनं भूतिं गमयंतीत्यादावव्युत्पन्नः कथं पाठं निश्चिनुयात्। अन्यः कश्चिदर्थज्ञानाय व्याकरणाद्यंगानि शृण्वन्नपि मीमांसाराहित्यादेनां वेदरूपां वाचं न सम्यक् शृणोति। यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेदिति। अत्र व्याकरणमात्रेण प्रतिगृहीतुरिष्टिः प्रतीयते। मीमांसायां तु न्यायेन दातुरिति निर्णीतं। तस्मादुभयविधमप्यविद्वांसं प्रत्येवमाहेति ॥ तृतीयपादतात्पर्यं दर्शयति ॥ अप्येकस्मै तन्वं विसस्रे स्वमात्मानं विवृणुते ज्ञानं प्रकाशनमर्थस्याहानया वाचेति। अस्यायमर्थः। अपिशब्दपर्याय उतोशब्दः। स च पूर्वोक्तानभिज्ञवैलक्षण्याय प्रयुक्तो निपातानामनेकार्थत्वात्। यः पुमान्व्याकरणाद्यंगैः स्वशब्दार्थमीमांसया तात्पर्यं च शोधयितुं प्रवृत्तस्तस्मा एकस्मै वेदः स्वकीयां तनुं विसस्रे। स्वमित्यादिकं पदव्याख्यानं। ज्ञानमित्यादिकं तात्पर्यव्याख्यानं। वेदार्थप्रकाशनं सम्यक् ज्ञानमनया तृतीयपादरूपया वाचा मंत्र आहेति ॥ चतुर्थपादतात्पर्यं दर्शयति ॥ उपमोत्तमया वाचा जायेव पत्ये कामयमाना सुवासा ऋतुकालेषु सुवासाः कल्याणवासाः कामयमाना ऋतुकालेषु यथा स एनां पश्यति शृणोतीत्यर्थज्ञप्रशंसेति। अस्यायमर्थः। उत्तमया चतुर्थपादरूपया वाचा तृतीयपादार्थस्योपमोच्यते। उशतीत्येतस्य व्याख्यानं कामयमानेति। यद्यप्यन्हि गृहकृत्यवेलायां मलिनवासास्तथापि संभोगकालेषु कल्याणवासा भवति। तत्र हेतुः। कामयमाना ऋतुकालेष्विति। यथा स पतिरेनां जायां साकल्येनादरयुक्तः पश्यति किंच तयोक्तार्थं हितबुद्ध्या शृणोति। तथायं चतुर्दशविद्यास्था-

नपरिशीलनोपेतः पुरुषो वेदार्थरहस्यं सम्यक् पश्यति। वेदोक्तं च धर्मब्रह्मरूपमर्थं हितबुद्ध्या स्वीकरोति। सेयमुक्ता वेदार्थाभिज्ञस्य प्रशंसेति ॥

पुनरप्यृगंतरं यास्क उदाजहार। तस्योत्तरा भूयसे निर्वचनाय।

उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वंत्यपि वाजिनेषु।

अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पामिति।

अयमर्थः। पूर्वोदाहृताया उत त्वः पश्यन्नित्यादिकाया ऋचोऽनंतरमेषाम्नाता तस्य पूर्वोक्तमंत्रार्थस्य भूयसे निर्वचनाय संपद्यते। तमर्थमतिशयेन प्रतिपादयितुं प्रभवति। कथमिति चेत्। तदुच्यते। अपि चैकं चतुर्दशविद्यास्थानकुशलं पुरुषं वेदरूपाया वाचः सख्ये स्थित्वा स्थैर्येण वेदोक्तार्थामृतपानयुक्तमाहुः। अभिज्ञाः कथयंति। सखिविदं सखायमिति मंत्रे वेदस्य सखित्वमुदाहृतं। यद्वा स्वर्गलोके वेदानां सख्ये स्थित्वातिशयेन पीतामृतमाहुः। वाचामिना ईश्वराः सभासु प्रगल्भा वा वाजिनाः। तेषु मध्येऽप्येनं वेदार्थकुशलं चोदयितुं न हिन्वंति। न केऽपि प्राप्नुवंति। तेन सह विवदितुमसमर्थत्वात्। यस्त्वन्यः पाठमात्रपरः पुष्पफलरहितां वाचं शुश्रुवान्भवति। पूर्वकांडोक्तस्य धर्मस्य ज्ञानं पुष्पं। उत्तरकांडोक्तस्य ब्रह्मणो ज्ञानं फलं। यथा लोके पुष्पं फलस्योत्पादकं तथा वेदानुवचनादिधर्मज्ञानमनुष्ठानद्वारा फलात्मकब्रह्मज्ञानेच्छां जनयति। तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसा नाशकेनेति श्रुतेः। यथा च फलं तृप्तिहेतुस्तथा ब्रह्मज्ञानं कृतकृत्यत्वहेतुः। यत्पूर्णानंदैकबोधस्तद्ब्रह्माहमस्मीति कृतकृत्यो भवतीति श्रुतेः। तादृशपुष्पफलरहितवेदपाठकः स एष पुमानधेन्वा मायया सह चरति। नवप्रसूतिका क्षीरदोग्ध्री गौः प्रीतिहेतुत्वाद्धिनोतीति व्युत्पत्त्या धेनुरित्युच्यते। पाठमात्रपरं प्रति वेदरूपा वाग्धर्मब्रह्मज्ञानरूपं क्षीरं न दोग्धीत्यधेनुः। अत एवासौ मायाकपटरूपा। ऐंद्रजालिकनिर्मितगोसदृशगोरूपत्वात्। तया मायया सह चरन्नयं परमपुरुषार्थं न लभत इत्यर्थः। इत्थं यास्केन ज्ञानस्तुत्यज्ञाननिंदोदाहरणस्य प्रपंचितत्वाद्यच्च स्तूयते तद्विधीयत इति न्यायेनाध्ययनवदर्थज्ञानस्यापि विधिरूपगंतव्यः ॥

किंच नक्षत्रेष्टिकांडे प्रतीष्टि फलवाक्यं यागतद्वेदनयोः समानमेवाम्नायते। यथा ह वा अग्निर्देवानामन्नदः। एवं ह वा एष मनुष्याणां भवति। य एतेन हविषा यजते य उ चैतदेवं वेदेति। अतो यागवत्फलाय स्ववेदनमपि विधी-

द्वेदस्य वेदितेति । अतो मुख्यवेदसिद्धये ज्ञातव्य एव तदर्थः ॥ किंचात्र यास्केन काचिदृगुदाहृता ।

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनां ।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासा इति ।

तत्र पूर्वार्द्धस्य तात्पर्यं स एव दर्शयति । अप्येकः पश्यन्न पश्यति वाचमपि च शृण्वन्न शृणोत्येनामित्यविद्वांसमाहार्द्धमिति । अस्यायमर्थः । यः पुमानर्थं न वेत्ति तं प्रति पूर्वार्द्धेण मंत्रो ब्रूते । एकः पुरुषः पाठमात्रपर्यवसितो वेदरूपां वाचं पश्यन्नपि न सम्यक् पश्यति । एकवचनबहुवचनविवेकाभावे पाठशुद्धेरपि कर्तुमशक्यत्वात् । वायुमेव स्वेन भागधेयेनोपधावति । स एवैनं भूतिं गमयति । आदित्यानेव स्वेन भागधेयेनोपधावति । त एवैनं भूतिं गमयंतीत्यादावव्युत्पन्नः कथं पाठं निश्चिनुयात् । अन्यः कश्चिदर्थज्ञानाय व्याकरणाद्यंगानि शृण्वन्नपि मीमांसाराहित्यादेनां वेदरूपां वाचं न सम्यक् शृणोति । यावतो ऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेदिति । अत्र व्याकरणमात्रेण प्रतिगृहीतुरिष्टिः प्रतीयते । मीमांसायां तु न्यायेन दातुरिति निर्णीतं । तस्मादुभयविधमप्यविद्वांसं प्रत्येवमाहेति ॥ तृतीयपादतात्पर्यं दर्शयति ॥ अप्येकस्मै तन्वं विसस्रे स्वमात्मानं विवृणुते ज्ञानं प्रकाशनमर्थस्याहानया वाचेति । अस्यायमर्थः । अपिशब्दपर्याय उतोशब्दः । स च पूर्वोक्तानभिज्ञवैलक्षण्याय प्रयुक्तो निपातानामनेकार्थत्वात् । यः पुमान्व्याकरणाद्यंगैः स्वशब्दार्थमीमांसया तात्पर्यं च शोधयितुं प्रवृत्तस्तस्मा एकस्मै वेदः स्वकीयां तनुं विसस्रे । स्वमित्यादिकं पदव्याख्यानं । ज्ञानमित्यादिकं तात्पर्यव्याख्यानं । वेदार्थप्रकाशनं सम्यक् ज्ञानमनया तृतीयपादरूपया वाचा मंत्र आहेति ॥ चतुर्थपादतात्पर्यं दर्शयति ॥ उपमोत्तमया वाचा जायेव पत्ये कामयमाना सुवासा ऋतुकालेषु सुवासाः कल्याणवासाः कामयमाना ऋतुकालेषु यथा स एनां पश्यति शृणोतीत्यर्थज्ञप्रशंसेति । अस्यायमर्थः । उत्तमया चतुर्थपादरूपया वाचा तृतीयपादार्थस्योपमोच्यते । उशतीत्येतस्य व्याख्यानं कामयमानेति । यद्यप्यहि गृहकृत्यवेलायां मलिनवासास्तथापि संभोगकालेषु कल्याणवासा भवति । तत्र हेतुः । कामयमाना ऋतुकालेष्विति । यथा स पतिरेनां जायां साकल्येनादरयुक्तः पश्यति किंच तयोक्तार्थं हितबुद्ध्या शृणोति । तथायं चतुर्दशविद्यास्था-

नपरिशीलनोपेतः पुरुषो वेदार्थरहस्यं सम्यक् पश्यति। वेदोक्तं च धर्मब्रह्मरूपमर्थं हितबुद्ध्या स्वीकरोति। सेयमुक्ता वेदार्थाभिज्ञस्य प्रशंसेति ॥

पुनरप्यृगंतरं यास्क उदाजहार। तस्योत्तरा भूयसे निर्वचनाय।

उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वंत्यपि वाजिनेषु।

अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पामिति।

अयमर्थः। पूर्वोदाहृताया उत त्वः पश्यन्नित्यादिकाया ऋचोऽनंतरमेषाम्नाता तस्य पूर्वोक्तमंत्रार्थस्य भूयसे निर्वचनाय संपद्यते। तमर्थमतिशयेन प्रतिपादयितुं प्रभवति। कथमिति चेत्। तदुच्यते। अपि चैकं चतुर्दशविद्यास्थानकुशलं पुरुषं वेदरूपाया वाचः सख्ये स्थित्वा स्थैर्येण वेदोक्तार्थामृतपानयुक्तमाहुः। अभिज्ञाः कथयंति। सखिविदं सखायमिति मंत्रे वेदस्य सखित्वमुदाहृतं। यद्वा स्वर्गलोके वेदानां सख्ये स्थित्वातिशयेन पीतामृतमाहुः। वाचामिना ईश्वराः सभासु प्रगल्भा वा वाजिनाः। तेषु मध्येऽप्येनं वेदार्थकुशलं चोदयितुं न हिन्वंति। न केऽपि प्राप्नुवंति। तेन सह विवदितुमसमर्थत्वात्। यस्त्वन्यः पाठमात्रपरः पुष्पफलरहितां वाचं शुश्रुवान्भवति। पूर्वकांडोक्तस्य धर्मस्य ज्ञानं पुष्पं। उत्तरकांडोक्तस्य ब्रह्मणो ज्ञानं फलं। यथा लोके पुष्पं फलस्योत्पादकं तथा वेदानुवचनादिधर्मज्ञानमनुष्ठानद्वारा फलात्मकब्रह्मज्ञानेच्छां जनयति। तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसा नाशकेनेति श्रुतेः। यथा च फलं तृप्तिहेतुस्तथा ब्रह्मज्ञानं कृतकृत्यत्वहेतुः। यत्पूर्णानंदैकबोधस्तद्ब्रह्माहमस्मीति कृतकृत्यो भवतीति श्रुतेः। तादृशपुष्पफलरहितवेदपाठकः स एष पुमानधेन्वा मायया सह चरति। नवप्रसूतिका क्षीरदोग्ध्री गौः प्रीतिहेतुत्वाद्धिनोतीति व्युत्पत्त्या धेनुरित्युच्यते। पाठमात्रपरं प्रति वेदरूपा वाग्धर्मब्रह्मज्ञानरूपं क्षीरं न दोग्धीत्यधेनुः। अत एवासौ मायाकपटरूपा। ऐंद्रजालिकनिर्मितगोसदृशगोरूपत्वात्। तया मायया सह चरन्नयं परमपुरुषार्थं न लभत इत्यर्थः। इत्थं यास्केन ज्ञानस्तुत्यज्ञाननिंदोदाहरणस्य प्रपंचितत्वाद्यच्च स्तूयते तद्विधीयत इति न्यायेनाध्ययनवदर्थज्ञानस्यापि विधिरूपगंतव्यः ॥

किंच नक्षत्रेष्टिकांडे प्रतीष्टि फलवाक्यं यागतद्वेदनयोः समानमेवाम्नायते। यथा ह वा अग्निर्देवानामन्नादः। एवं ह वा एष मनुष्याणां भवति। य एतेन हविषा यजते य उ चैतदेवं वेदेति। अतो यागवत्फलाय स्ववेदनमपि विधी-

यते । अनेन न्यायेन सर्वेष्वपि ब्राह्मणेषु वेदनविधयो द्रष्टव्याः । ननु विद्याप्रशंसेति सूत्रे वेदनफलानां प्रशंसारूपत्वं जैमिनिना सूचितमिति चेत् । अस्तु नाम । विद्यमानेनापि फलेन प्रशंसितुं शक्यत्वात् । दर्शयागस्य पूर्णमासयागस्य चातिपाते सति प्रायश्चित्तरूपां वैश्वानरेष्टिं विधातुं विद्यमानेनैव स्वर्गफलेन स्तुतिः क्रियते । सुवर्गाय लोकाय दर्शपूर्णमासाविज्येते इति । एतच्चाचार्यैर्ब्रह्मज्ञानफलवाक्यस्य स्वार्थेऽपि तात्पर्यं दर्शयितुमुदाहृतं । इच्छाम्येवार्थवादत्वं वचसोऽन्यपरत्वतः । यथावस्त्वभिधायित्वान्न त्वभूतार्थवादता ॥ इज्येते स्वर्गलोकाय दर्शादर्शौ यथातथा । न त्वभूतार्थवादत्वं पापश्लोका श्रुतिर्यथेति ॥ न च वेदनमात्रेण फलसिद्धावनुष्ठानवैयर्थ्यमिति शंकनीयं । फलभूयस्त्वेन परिहृतत्वात् । उदाहृतं चात्र जैमिनिसूत्रं । फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः सारतो वा फलविशेषः स्यादिति । एतच्चास्माभिस्तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदेत्युदाहरणेन व्याख्यातं । छंदोगाश्च केवलादनुष्ठानाद्विद्यासहितेऽनुष्ठाने फलातिशयमामनंति । तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद । नाना तु विद्या चाविद्या च । यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति । यद्यप्यंगावबद्धोपास्तिरत्र विद्याशब्देन विवक्षिता । तथापि न्यायः सर्वास्वपि विद्यासु समानः ॥

कुतस्त्वैतावती वेदने भक्तिरिति चेत् । कुतो वा तत्रैषोऽत्र द्वेषः । प्रशंसास्माभिर्भूयसी दर्शिता । निंदां तु न क्वाप्युपलभामहे । किंतु कर्मजन्यमपूर्वं यथा मरणादूर्ध्वं जीवेन सह गच्छति । तथा विद्याजन्यमप्यपूर्वं गच्छति । तथा च वाजसनेयिन आमनंति । तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेति । तस्मादध्ययनवदर्थज्ञानस्यापि विहितत्वादर्थज्ञानाय वेदो व्याख्यातव्यः ॥

विषयप्रयोजनसंबंधाधिकारिज्ञानमंतरेण श्रोतृप्रवृत्त्यभावाद्विषयादयो निरूप्यंते । व्याख्यानस्य व्याख्येयो वेदो विषयः । तदर्थज्ञानं प्रयोजनं । व्याख्यानव्याख्येयभावः संबंधः । ज्ञानार्थी चाधिकारी । यद्यप्येतावत्प्रसिद्धं तथापि वेदस्य विषयाद्यभावे व्याख्यानस्यापि परमविषयादिकं न स्यात् । अतो वेदस्य चतुष्टयमुच्यते । वेदे पूर्वोत्तरकांडयोः क्रमेण धर्मब्रह्मणी विषयः । तयोरनन्यलभ्यत्वात् । तथा च पुरुषार्थानुशासने सूचितं । धर्मब्रह्मणी वेदैकवेद्ये इति । जैमिनीये च द्वितीयसूत्रे चोदनैव धर्मे प्रमाणं । चोदना प्रमाणमेवेति नियमद्वयं संप्रदायविद्भिरभिहितं । चोदनैवेत्यमुमर्थमुपपादयितुं चतुर्थसूत्रे प्रत्यक्षविषयत्वं

धर्मस्य निराकृतं । प्रत्यक्षमनिमित्तं विद्यमानोपलंभनत्वादिति । अनुष्ठानादूर्ध्वमुत्पत्स्यमानस्य धर्मस्य पूर्वमविद्यमानत्वान्न प्रत्यक्षयोग्यतास्ति । उत्तरकालेऽपि रूपादिराहित्यान्नेंद्रियैरवगम्यते । अत एवादृष्टमिति सर्वैरभिधीयते । लिंगराहित्यान्नानुमानविषयत्वमप्यस्ति । सुखदुःखे धर्माधर्मयोर्लिंगमिति चेत् । बाढं । अयमपि लिंगलिंगिभावो वेदेनैव गम्यते । ततश्चोदनैव धर्मे प्रमाणं ॥ वैयासिकस्य तृतीयसूत्रस्य द्वितीयवर्णके ब्रह्मणः सिद्धवस्तुनोऽपि शास्त्रैकविषयत्वं भाष्यकृद्भिर्व्याख्यातं । शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यत इत्यभिप्रायः । इति श्रुतिश्च भवति । नावेदविन्मनुते तं बृहंतमिति । तत्रोपपत्तिः पूर्वाचार्यैरेवमुदीरिता । रूपलिंगादिराहित्यान्न मानांतरयोग्यतेति । तस्मादनन्यलभ्यत्वादस्ति धर्मब्रह्मणोर्वेदविषयत्वं । तदुभयज्ञानं वेदस्य साक्षात्प्रयोजनं । न च तस्य ज्ञानस्य सप्तद्वीपा वसुमती राजासौ गच्छतीत्यादिज्ञानवदपुरुषार्थपर्यवसायित्वं शंकनीयं । धर्मप्रयुक्तस्य पुरुषार्थस्य स्रूयमानत्वात् । धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पंति । धर्मेण पापमपनुदति धर्मे सर्वं प्रतिष्ठितं । तस्माद्धर्मं परमं वदंतीति । उद्दंडस्य राज्ञो नियामकत्वाद्विवादमानयोः पुरुषयोर्मध्ये दुर्बलस्यापि राजसाहाय्यवज्जयहेतुत्वाच्च धर्मः पुरुषार्थः । तथा च वाजसनेयिनः सृष्टिप्रकरणे समामनंति । तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्त्यथोऽबलीयान्बलीयांसमाशंसते । धर्मेण यथैव राज्ञैवमिति । ब्रह्मविदाप्नोति परं ब्रह्म वेद ब्रह्मैव भवति । तरति शोकमात्मविदित्यादिश्रुतिषु ब्रह्मज्ञानप्रयुक्तपुरुषार्थः प्रसिद्धः । तदुभयज्ञानार्थी वेदेऽधिकारी । स च त्रैवर्णिकः पुरुषः । स्त्रीशूद्रयोस्तु सत्यामपि ज्ञानापेक्षायामुपनयनाभावेनाध्ययनराहित्याद्वेदेऽधिकारः प्रतिबद्धः । धर्मब्रह्मज्ञानं तु पुराणादिमुखेनोत्पाद्यते । तस्मात्त्रैवर्णिकपुरुषाणां वेदमुखेनार्थज्ञानेऽधिकारः ॥ संबंधस्तु वेदस्य धर्मब्रह्मभ्यां सह प्रतिपाद्यप्रतिपादकभावः । तदीयज्ञानेन सह जन्यजनकभावः । त्रैवर्णिकपुरुषैः सहोपकार्योपकारकभावः । तदेवं विषयाद्यनुबंधचतुष्टयमवगत्य समाहितधियः श्रोतारो वेदव्याख्याने प्रवर्तंतां ॥

अतिगंभीरस्य वेदस्यार्थमवबोधयितुं शिक्षादीनि षडंगानि प्रवृत्तानि । अत एव तेषामपरविद्यारूपत्वं मुंडकोपनिषद्याथर्वणिका आमनंति । द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदंति । परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः

सामवेदोऽथर्ववेदः। शिक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यत इति। साधनभूतधर्मज्ञानहेतुत्वात्षडंगसहितानां कर्मकांडानामपरविद्यात्वं। परमपुरुषार्थभूतब्रह्मज्ञानहेतुत्वादुपनिषदां परविद्यात्वं॥

वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा। तथा च तैत्तिरीया उपनिषदारंभे समामनंति। शिक्षां व्याख्यास्यामः। वर्णः स्वरः मात्रा बलं साम संतान इत्युक्तः शिक्षाध्याय इति॥ वर्णोऽकारादिः॥ स चांगभूतशिक्षाग्रंथे स्पष्टमुदीरितः। त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः संभवतो मताः। प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवेत्यादिना॥ स्वर उदात्तादिः॥ सोऽपि तत्रोक्तः। उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रय इति॥ मात्रा ह्रस्वादिः॥ सापि तत्रोक्ता। ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचीति॥ बलं स्थानप्रयत्नौ॥ तत्राष्टौ स्थानानि वर्णानामित्यादिना स्थानमुक्तं। अचोऽस्पृष्टा यणस्त्वीषदित्यादिना प्रयत्न उक्तः॥ सामशब्देन साम्यमुक्तं॥ अतिद्रुतातिविलंबितगीत्यादिदोषराहित्येन माधुर्यादिगुणयुक्तत्वेनोच्चारणं साम्यं। गीती शीघ्री शिरःकंपीत्यादिनोपांशु दष्टं त्वरितमित्यादिना दोषा उक्ताः। माधुर्यमक्षरव्यक्तिरित्यादिना गुणा उक्ताः॥ संतानः संहिता॥ वायवायाहीत्यत्रावादेशः। इंद्राग्नी आगतमित्यत्र प्रकृतिभावः। एतच्च व्याकरणेऽभिहितत्वाच्छिक्षायामुपेक्षितं। शिक्ष्यमाणवर्णादिवैकल्ये बाधस्तत्रोदाहृतः। मंत्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोऽपराधादिति। इंद्रशत्रुर्वर्धस्वेत्यस्मिन्मंत्र इंद्रस्य शत्रुर्घातक इत्यस्मिन्विवक्षितेऽर्थे तत्पुरुषसमासः समासस्येति सूत्रेण तत्पुरुषत्वादंतोदात्तेन भवितव्यं। आद्युदात्तस्तु प्रयुक्तः। तथा सति पूर्वपदप्रकृतिस्वरत्वेन बहुव्रीहित्वादिंद्रो घातको यस्येत्यर्थः संपन्नः। तस्मात्स्वरवर्णाद्यपराधपरिहाराय शिक्षाग्रंथोऽपेक्षितः॥

कल्पस्त्वाश्वलायनापस्तंबबोधायनादिसूत्रं। कल्प्यते समर्थ्यते यागप्रयोगोऽत्रेति व्युत्पत्तेः। नन्वाश्वलायनः किं मंत्रकांडमनुसृत्य प्रवृत्तः किं वा ब्राह्मणमनुसृत्य। नाद्यः। दर्शपूर्णमासौ तु पूर्वं व्याख्यास्याम इत्येवं तेनोपक्रांतत्वात्। न ह्यग्निमीळ इत्यादयो मंत्रा दर्शपूर्णमासयोः क्वचिद्विनियुक्ताः। न द्वितीयः। आग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपंति दीक्षणीयायामित्येवं

दीक्षणीयेष्टेर्ब्राह्मणे प्रक्रांतत्वात् । अत्रोच्यते । मंत्रकांडो ब्रह्मयज्ञादिजपक्रमेण प्रवृत्तो न तु यागानुष्ठानक्रमेण । ब्रह्मयज्ञश्चैवं विहितः । यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञ इति । सोऽयं ब्रह्मयज्ञजपोऽग्निमीळ इत्याम्नायक्रमेणैवानुष्ठेयः । तथा सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानि वाच स्तोमे पारिप्लवं शंसतीति विधीयंते । तथाश्विने शस्यमाने सूर्यो नोदियादपि सर्वा दाशतयीरनुब्रूयादिति विधीयते । तथा रिच्यत इव वा एष प्रेव रिच्यते । यो याजयति यो वा प्रतिगृह्णाति याजयित्वा प्रतिगृह्य वानश्नन् त्रिः स्वाध्यायं वेदमधीयीतेति प्रायश्चित्तरूपं वेदपारायणं विहितं । इत्यादिषु कृत्स्नमंत्रकांडविनियोगेषु संप्रदायपारंपर्यागत एव क्रम आदरणीयः । विशेषविनियोगस्तु मंत्रविशेषानां श्रुतिलिंगवाक्यादिप्रमाणान्युपजीव्याश्वलायनो दर्शयति । अतो मंत्रकांडक्रमाभावेऽपि न कश्चिद्विरोधः । इषे त्वेत्यादिमंत्रास्तु क्रत्वनुष्ठानक्रमेणैवाम्नाता इत्यापस्तंबादयस्तेनैव क्रमेण सूत्रनिर्माणे प्रवृत्ताः । आम्नातत्वादेव जपादिष्वपि स एव क्रमः । यद्यपि ब्राह्मणे दीक्षणीयेष्टिरुपक्रांता । तथापि तस्या इष्टेर्दर्शपूर्णमासविकृतित्वेन तदपेक्षत्वादाश्वलायनस्यादौ तद्व्याख्यानं युक्तं । अतः कल्पसूत्रं मंत्रविनियोगेन क्रत्वनुष्ठानमुपदिश्योपकरोति । तर्हि प्र वो वाजा इत्यादीनां सामिधेनीनामृचामेव विनियोगमाश्वलायनो ब्रवीतु । नमः प्रवक्त इत्यादयस्त्वनाम्नाताः । कुतो विनियुज्यंत इति चेत् । नायं दोषः । शाखांतरसमाम्नातानां ब्राह्मणांतरसिद्धस्य विनियोगस्य गुणोपसंहारन्यायेनात्र वक्तव्यत्वात् । सर्वशाखाप्रत्ययमेकं कर्मेति न्यायविदः । तस्माच्छिक्षेव कल्पोऽप्यपेक्षितः ॥

व्याकरणमपि प्रकृतिप्रत्ययाद्युपदेशेन पदस्वरूपतदर्थनिश्चयायोपयुज्यते । तथा चैंद्रवायवग्रहब्राह्मणे समाम्नायते । वाग्वै पराच्यव्याकृतावदत्ते देवा इंद्रमब्रुवन्निमां नो वाचं व्याकुर्विति । सोऽब्रवीद्वरं वृणै मह्यं चैवैष वायवे च सह गृह्याता इति तस्मादैंद्रवायवः सह प्रगृह्यते । तामिंद्रो मध्यतोऽवक्रम्य व्याकरोत् । तस्मादियं व्याकृता वागुद्यत इति । अग्निमीळे पुरोहितमित्यादिवाक् पूर्वस्मिन्काले पराची समुद्रादिध्वनिवदेकात्मिका सती । अव्याकृता प्रकृतिः प्रत्ययः पदं वाक्यमित्यादिविभागकारिग्रंथरहितासीत् । तदानीं देवैः प्रार्थित इंद्र एकस्मिन्नेव पात्रे वायोः स्वस्य च सोमरसस्य ग्रहणरूपेण वरेण तुष्टस्तामखंडां वाचं मध्ये विच्छिद्य प्रकृतिप्रत्ययादिभागं सर्वत्राकरोत् । तस्मादियं वागिदा-

नीमपि पाणिन्यादिमहर्षिभिर्व्याकृता सर्वैः पठ्यत इत्यर्थः । तस्यैतस्य व्याकरणस्य प्रयोजनविशेषो वररुचिना वार्त्तिके दर्शितः । रक्षोहागमलघ्वसंदेहाः प्रयोजनमिति । एतानि रक्षादिप्रयोजनानि प्रयोजनांतराणि च महाभाष्ये पतंजलिना स्पष्टीकृतानि ॥ रक्षार्थं वेदानामध्येयं व्याकरणं । लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यति वेदार्थं चाध्यवस्यति ॥ ऊहः खल्वपि । न सर्वैर्लिंगैर्न सर्वाभिर्विभक्तिभिर्वेदमंत्रा निगदिताः । ते चावश्यं यज्ञांगत्वेन यथायथं विपरिणमयितव्याः । तान्नावैयाकरणः शक्नोति विपरिणमयितुं । तस्मादध्येयं व्याकरणं ॥ आगमः खल्वपि । ब्राह्मणेन निष्कारणो धर्मः षडंगो वेदोऽध्येयो ज्ञेयश्चेति । प्रधानं च षट्स्वंगेषु व्याकरणं । प्रधाने च कृतो यत्नः फलवान्भवति ॥ लघ्वर्थं चाध्येयं व्याकरणं । बृहस्पतिरिंद्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच । बृहस्पतिश्च वक्ता । इंद्रश्चाध्येता । दिव्यं वर्षसहस्रमध्ययनकालः । अंतं च न जगाम । अद्य तु पुनर्यदि परमायुर्भवति स वर्षशतं जीवति । तत्र कुतः प्रतिपदपाठेन सकलपदावगमः । कुतस्तरां प्रयोगेन ॥ असंदेहार्थं चाध्येयं व्याकरणं । याज्ञिकाः पठंति । स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति । तत्र न ज्ञायते किं स्थूलानि पृषंति यस्याः सा स्थूलपृषती । किंवा स्थूला चासौ पृषती च स्थूलपृषतीति । तान्नावैयाकरणः स्वरतोऽध्यवस्यति । यदि समासांतोदात्तत्वं तदा कर्मधारयः । अथ पूर्वपदप्रकृतिस्वरत्वं । ततो बहुव्रीहिरिति ॥ इमानि च भूयः शब्दानुशासनस्य प्रयोजनानीति । तेऽसुराः । दुष्टः शब्दः । यदधीतं । यस्तु प्रयुंक्ते । अविद्वांसः । विभक्तिं कुर्वंति । यो वा इमां । चत्वारि । उत त्वः । सक्तुमिव । सारस्वतीं । दशम्यां पुत्रस्य । सुदेवो असि वरुणेति ॥ तेऽसुराः । तेऽसुराः हेलयो हेलय इति कुर्वंतः पराबभूवुः । तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै । म्लेच्छो ह वा एष यदपशब्दः । म्लेच्छा मा भूमेत्यध्येयं व्याकरणं ॥ दुष्टः शब्दः । दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोऽपराधादिति । दुष्टाञ्छब्दान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणं ॥ यदधीतं । यदधीतमविज्ञातं निगदेनैव शब्द्यते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् । अविज्ञातमनर्थकं माधिगीष्महीत्यध्येयं व्याकरणं ॥ यस्तु प्रयुंक्ते । यस्तु प्रयुंक्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले । सोऽनंतमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः । कः । वाग्योग-

विदेव। यो हि शब्दाञ्जानाति। अपशब्दानप्यसौ जानाति। यथैव शब्दज्ञाने च धर्म एवमपशब्दज्ञानेऽप्यधर्मः प्राप्नोति। अथवा भूयानधर्मः प्राप्नोति। भूयांसो ह्यपशब्दा अल्पीयांसः शब्दाः। एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः। यथा गौरित्येतस्य शब्दस्य गावीगोणीगोपोतलिकेत्येवमादयः। अथ योऽवाग्योगविद्ज्ञानं तस्य शरणं। विषम उपन्यासः। नात्यंताज्ञानं शरणं भवितुमर्हति। यो ह्यजानन्वै ब्राह्मणं हन्यात्सुरां वा पिबेत्सोऽपि मन्ये पतितः स्यात्। एवं तर्हि कः। अवाग्योगविदेव। अथ यो वाग्योगविज्ज्ञानं तस्य शरणं॥ अविद्वांसः। अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः। कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेदिति। स्त्रीवन्मा भूमेत्यध्येयं व्याकरणं॥ विभक्तिं कुर्वंति। विभक्तिं कुर्वंति। याज्ञिकाः पठंति। प्रयाजाः सविभक्तिकाः कर्तव्या इति। न चांतरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुं। तस्मादध्येयं व्याकरणं॥ यो वा इमां। यो वा इमां पदशः स्वरशोऽक्षरशो वर्णशो वाचं विदधाति। स आर्त्विजीनो भवति। आर्त्विजीनाः स्यामेत्यध्येयं व्याकरणं॥ चत्वारि। चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश। चत्वारि शृंगा। चत्वारि पदजातानि। नामाख्यातोपसर्गनिपाताश्च। त्रयो अस्य पादाः। त्रयः कालाः। द्वे शीर्षे। सुप्तिङश्च। सप्त हस्तासो अस्य। सप्त विभक्तयः। त्रिधा बद्धः। त्रिषु स्थानेषु बद्धः। उरसि कंठे शिरसि। वृषभो वर्षणात्सर्वकामानां। रोरवीति। रौतिः शब्दकर्मा। महो देवो मर्त्याँ आविवेश। महता देवेन नस्तादात्म्यं यथा स्यादित्यध्येयं व्याकरणं॥ अथवा चत्वारि। चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंति। ये मनीषिणो मनस ईषिणः। गुहायां त्रीणि निहितानि नेंगयंति। न चेष्टंते न निमिषंति। तुरीयं वाचो मनुष्या वदंति। तुरीयं ह वा एतद्वाचो यन्मनुष्येषु वर्तते॥ उत त्वः। उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनां। उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः। अपि खल्वेकः पश्यन्नपि न पश्यति। अपि खल्वेकः शृण्वन्नपि न शृणोत्येनां। अविद्वांसमाहार्द्धं। त्वस्मै अन्यस्मै तन्वं विसस्रे। तनुं विवृणुते। जायेव पत्य उशती सुवासाः। यथा जाया पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते।

एवं वाग्वाग्विदे स्वमात्मानं विवृणुते । वाग्नो विवृणुयादित्यध्येयं व्याकरणं ॥ सक्तुमिव । सक्तुमिव तितउना पुनंतो यत्र धीरा मनसा वाचमक्रत । अत्रासखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि । सक्तुः सच तेर्दुर्धावो भवति । कसतेर्वा स्याद्विपरीतस्य विकसितो भवति । तितउ परिपवनं भवति । ततवद्वा तुन्नवद्वा । धीराः प्रज्ञावंतो ध्यानवंतो मनसा प्रज्ञानेन वाचमक्रत । वाचमकृषत । अत्रासखायः सख्यानि जानते । सयुज्यानि जानते । क एव दुर्गमो मार्गः एकगम्यो वाग्विषयः । के पुनस्ते वैयाकरणाः । कुत एतत् । भद्रैषां वाचि निहिताधि वाचि । एषां वाचि भद्रा लक्ष्मीर्निहिता भवति ॥ सारस्वतीं । सारस्वतीं याज्ञिकाः पठंति । आहिताग्निरपशब्दं प्रयुंजानः प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति । प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणं ॥ दशम्यां पुत्रस्य । दशम्यां पुत्रस्य जातस्य नाम विदध्याद्घोषवदाद्यंतरंतस्थमभिनिष्ठानांतं द्व्यक्षरं चतुरक्षरं वा । कृतं नाम कुर्यात् । न तद्धितमिति । न चांतरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुं । तस्मादध्येयं व्याकरणं ॥ सुदेवो असि । सुदेवो असि वरुण यस्य ते सप्त सिंधवः । अनुक्षरंति काकुदं सूर्म्यं सुषिरामिव । सप्त सिंधवः सप्त विभक्तयः । ककुज्जिह्वा । सास्मिन्विद्यत इति काकुदं तालु । सूर्मिः स्थूला लोहप्रतिमेति । एवं सिद्धे शब्दार्थसंबंध इत्यादिवार्त्तिकोक्तान्यत्रापि प्रयोजनान्यनुसंधेयानि ॥

अथ निरुक्तप्रयोजनमुच्यते । अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तं । गौः ग्मा ज्मा क्ष्मा क्षा क्षमेत्यारभ्य वसवः वाजिनः देवपत्न्यो देवपत्न्य इत्यंतो यः पदानां समाम्नायः समाम्नातस्तस्मिन्ग्रंथे पदार्थावबोधाय परापेक्षा न विद्यते । एतावंति पृथिवीनामान्येतावंति हिरण्यनामानीत्येवं तत्र तत्र विस्पष्टमभिहितत्वात् । तदेतन्निरुक्तं त्रिकांडं । तच्चानुक्रमणिकाभाष्ये दर्शितं ॥

आद्यं नैघंटुकं कांडं द्वितीयं नैगमं तथा ।
तृतीयं दैवतं चेति समाम्नायस्त्रिधा मतः ॥
गौराद्यपारपर्यंतमाद्यं नैघंटुकं मतं ।
जहाद्युल्बमृबीसांतं नैगमं संप्रचक्षते ॥
अग्न्यादिदेवपत्न्यंतं दैवताकांडमुच्यते ।
अग्न्यादिर्देवी ऊर्जाहुत्यंतः क्षितिगतो गणः ॥

वाय्वादयो भगांताः स्युरंतरिक्षस्थदेवताः ।
सूर्यादिदेवपत्न्यंता द्युस्थाना देवता इति ॥
गवादिदेवपत्न्यंतं समाम्नायमधीयत इति ।

एकार्थवाचिनां पर्यायशब्दानां संघो यत्र प्रायेणोपदिश्यते । तत्र निघंटुशब्दः प्रसिद्धः । तादृशेष्वमरसिंहवैजयंतीहलायुधादिषु दश निघंटव इति व्यवहारात् । एवमत्रापि पर्यायशब्दसंघोपदेशादाद्यकांडस्य नैघंटुकत्वं । तस्मिन्कांडे त्रयोऽध्यायाः । तेषु प्रथमे पृथिव्यादिलोकदिक्कालादिद्रव्यविषयाणि नामानि । द्वितीये मनुष्यतदवयवादिद्रव्यविषयाणि । तृतीये तदुभयद्रव्यगततनुबहुत्वह्रस्वत्वादिधर्मविषयाणि ॥ निगमशब्दो वेदवाची । यास्केन तत्र तत्रापि निगमो भवतीत्येवं वेदवाक्यानामवतारितत्वात्तस्मिन्निगम एव प्रायेण वर्तमानानां शब्दानां चतुर्थाध्यायरूपे द्वितीयस्मिन्कांड उपदिष्टत्वात्तस्य कांडस्य नैगमत्वं ॥ पंचमाध्यायरूपस्य तृतीयकांडस्य दैवत्वं विस्पष्टं ॥ पंचाध्यायरूपकांडत्रयात्मक एतस्मिन्ग्रंथे परनिरपेक्षितया पदार्थस्योक्तत्वात्तस्य ग्रंथस्य निरुक्तत्वं । तद्व्याख्यानं च समाम्नायः समाम्नात इत्यारभ्य तस्यास्तस्यास्ताद्भाव्यमनुभवत्यनुभवतीत्यंतैर्द्वादशभिरध्यायैर्यास्को निर्ममे । तदपि निरुक्तमित्युच्यते । एकैकस्य पदस्य संभाविता अवयवार्थास्तत्र निःशेषेणोच्यंत इति व्युत्पत्तेः । तत्र हि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्चेति प्रतिज्ञायोच्चावचेष्वर्थेषु निपतंतीति निपातस्वरूपं निरुच्यैवमुदाहृतं । नेति प्रतिषेधार्थीयो भाषायामुभयमन्वध्यायन्नेंद्रं देवममंसतेति प्रतिषेधार्थीय इति । दुर्मदासो न सुरायामित्युपमार्थीय इति च । तत्र लोके केवलप्रतिषेधार्थीयस्यापि नकारस्य वेदे प्रतिषेधोपमालक्षणार्थोदाहरणमस्मिन्ग्रंथेऽवगम्यते । एवं ग्रंथकारेणोक्तास्तत्तत्पदनिर्वचनविशेषास्तत्तन्मंत्रव्याख्यानावसर एवास्माभिरुदाहरिष्यंते । न च निर्वचनानां निर्मूलत्वं शंकनीयं । एतद्व्युत्पत्त्यर्थमेव ब्राह्मणेषु पदनिर्वचनानां केषांचिदुक्तत्वात् । तदाहुतीनामाहुतित्वमिति । तमिदंद्रं संतमिंद्र इत्याचक्षत इति । यदप्रथयत्तत्पृथिव्याः पृथिवीत्वमिति च । ग्रंथकारोऽपि तत्र तत्र स्वोक्तनिर्वचनमूलभूतब्राह्मणान्युदाहरिष्यति । केषांचिन्निर्वचनानां व्याकरणबलेन सिद्धावपि न सर्वेषां सिद्धिरस्ति । अत एव ग्रंथकार आह । तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकं चेति । तस्माद्वेदार्थावबोधायोपयुक्तं निरुक्तं ॥

तथा छंदोग्रंथोऽप्युपयुज्यते । छंदोविशेषाणां तत्र तत्र विहितत्वात् । तस्मात्सप्र

चतुरुत्तराणि छंदांसि प्रातरनुवाकेऽनूच्यंत इति ह्याम्नातं। गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगतीत्येतानि सप्त छंदांसि। चतुर्विंशत्यक्षरा गायत्री। ततोऽपि चतुर्भिरक्षरैरधिकाष्टाविंशत्यक्षरोष्णिक्। एवमुत्तरोत्तराधिका अनुष्टुबादयोऽवगंतव्याः। तथान्यत्रापि श्रूयते। गायत्रीभिर्ब्राह्मणस्यादध्यात्। त्रिष्टुब्भी राजन्यस्य। जगतीभिर्वैश्यस्येति। तत्र मगणयगणादिसाध्यो गायत्र्यादिविवेकश्छंदोग्रंथमंतरेण न सुविज्ञेयः। किंच यो ह वा अविदितार्षेयच्छंदोदैवतब्राह्मणेन मंत्रेण याजयति वाध्यापयति वा। स्थाणुं वर्च्छति। गर्त्ते वा पत्यते। प्र वा मीयते। पापीयान्भवति। तस्मादेतानि मंत्रे मंत्रे विद्यादिति श्रूयते। तस्मात्तद्वेदनाय छंदोग्रंथ उपयुज्यते॥

ज्योतिषस्य प्रयोजनं तस्मिन्नेव ग्रंथे विहितं। यज्ञकालार्थसिद्धय इति। कालविशेषविधयश्च श्रूयंते। संवत्सरमेतद्व्रतं चरेत्संवत्सरमुख्यं भृत्वेत्येवमादयः संवत्सरविधयः। वसंते ब्राह्मणोऽग्निमादधीत। ग्रीष्मे राजन्य आदधीत। शरदि वैश्य आदधीतेत्याद्या ऋतुविधयः। मासि मासि सत्रपृष्ठान्युपयंति। मासि मास्यतिग्राह्या गृह्यंत इति मासविधयः। यं कामयेत वसीयान्स्यादिति तं पूर्वपक्षे याजयेदित्याद्याः पक्षविधयः। एकाष्टकायां दीक्षेरन् फल्गुनीपूर्णमासे दीक्षेरन्नित्याद्यास्तिथिविधयः। प्रातर्जुहोति सायं जुहोतीत्याद्याः प्रातःकालादिविधयः। कृत्तिकास्वग्निमादधीतेत्याद्या नक्षत्रविधयः। अतः कालविशेषानवगमयितुं ज्योतिषमुपयुज्यते॥

एतेषां वेदार्थोपकारिणां षण्णां ग्रंथानां वेदांगत्वं शिक्षायामेवमुदीरितं॥

छंदः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषमयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतं।
तस्मात्सांगमधीत्यैव ब्रह्मलोके महीयत इति॥

षडंगवत्पुराणादीनामपि वेदार्थज्ञानोपयोगो याज्ञवल्क्येन स्मर्यते। पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशेति॥ इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरेदितीत्यन्यत्रापि स्मर्यते। ऐतरेयतैत्तिरीयकाठकादिशाखासूक्तानि हरिश्चंद्रनाचिकेताद्युपाख्यानानि धर्मब्रह्मावबोधोपयुक्तानि तेषु तेष्वितिहासग्रंथेषु स्पष्टीकृतानि। उपनिषदुक्ताः सृष्टिस्थितिलयादयो ब्राह्मपाद्मवैष्णवादिपुराणेषु

स्पष्टीकृताः। सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च। वंशानुचरितं चेति पुराणं पंचलक्षणमिति। सृष्ट्यादेः पुराणप्रतिपाद्यत्वावगमनात्। न्यायशास्त्रे प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतादीनां षोडशपदार्थानां निरूपणात्तदनुसारेणेदं वाक्यमस्मिन्नर्थे प्रमाणं भवति नेतरदिति निर्णयः कर्तुं शक्यते। पूर्वोत्तरमीमांसयोर्वेदार्थोपयोगोऽतिस्पष्ट एव। मन्वत्रिविष्णुहारीतादिप्रोक्तासु स्मृतिषु वेदोक्तसंध्यावंदनादिविधयः प्रपंचिताः। तदु हा वा एते ब्रह्मवादिनः पूर्वाभिमुखाः संध्यायां गायत्र्याभिमंत्रिता आप ऊर्ध्वं विक्षिपंतीत्यादिकः संध्यावंदनविधिः। पंच वा एते महायज्ञाः सततं प्रतायंत इत्यादिको महायज्ञविधिः। एवं विध्यंतराणि द्रष्टव्यानि। उक्तप्रकारेण पुराणादीनां वेदार्थज्ञानोपयोगाद्विद्यास्थानत्वं युक्तं। एतैः पुराणादिभिश्चतुर्दशभिर्विद्यास्थानैरुपबृंहिताया विद्याया ग्रहणेऽधिकारिविशेषः शाखांतरगतैश्चतुर्भिर्मंत्रैरुपदर्शितः। तांश्च मंत्रान्यास्क उदाजहार ॥

तत्रायं प्रथमो मंत्रः ॥

विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि।
असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्यामिति ॥

विद्याभिमानिनी देवता ब्राह्मणमुपदेष्टारमाचार्यमाजगाम। आगत्य चैवं प्रार्थयामास। हे ब्राह्मण मामनधिकारिणेऽनुपदिश्य पालय। तवाहं निधिवत्पुरुषार्थहेतुरस्मि। तादृश्यां मयि तदुपदेष्टरि त्वयि च योऽसूयां करोति। यश्चार्जवेन विद्यां नाभ्यस्यति। योऽपि स्नानाचमनाद्याचारनियतो न भवति। तादृशेभ्यः शिष्याभासेभ्यो मां न ब्रूयाः। तथा सति त्वद्धृदये स्थित्वा फलप्रदा भवेयं ॥

अथ द्वितीयो मंत्रः ॥

य आतृणत्त्यवितथेन कर्णावदुःखं कुर्वन्नमृतं संप्रयच्छन्।
तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत्कतमच्चनाहेति ॥

पूर्वस्मिन्मंत्र आचार्यस्य नियममभिधायास्मिन्मंत्रे शिष्यस्य नियमोऽभिधीयते। वितथमनृतमपुरुषार्थभूतं लौकिकं वाक्यं। तद्विपरीतं सत्यं वेदवाक्यमवितथं। तादृशेन वाक्येन य आचार्यः शिष्यस्य कर्णावातृणत्ति। सर्वतस्तर्दनं पूरणं करोति। उपसर्गवशादौचित्याच्च तृणत्तिधातोरर्थांतरे वृत्तिः। सर्वदा वेदं यः श्रावयतीत्यर्थः। किं कुर्वन्। न दुःखं कुर्वन्। मंदप्रज्ञस्य माणवकस्यादा-

वर्द्धर्चमृचं वा ग्रहीतुमशक्तस्य यथा दुःखं न भवति तथा पादं पादैकदेशं वा ग्राहयन्। किंच। अमृतं संप्रयच्छन्। अमृतत्वस्य देवजन्मनो मोक्षस्य वा प्रापकत्वादमृतं वेदार्थः। तस्य प्रदानं कुर्वन्। तं तादृशमाचार्यं सच्छिष्यो मुख्यमातापितृरूपं मन्येत। पूर्वसिद्धौ तु मातापितरावधमस्य मनुष्यस्य शरीरस्य प्रदानादमुख्यौ। तस्मै मुख्यमातापितृरूपायाचार्यायैकमपि द्रोहं न कुर्यात्॥

अथ तृतीयो मंत्रः॥

अध्यापिता ये गुरुं नाद्रियंते विप्रा वाचा मनसा कर्मणा वा।
यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तदिति॥

ये त्वधमा विप्रा गुरुणाध्यापिताः संतो विनयोक्त्या तदीयहितचिंतनेन शुश्रूषया वा गुरुं नाद्रियंते। आदररहितास्ते शिष्याभासा गुरोर्न भोजनीयाः। अनुभवयोग्या न भवंति। न हि तेषु गुरुः कृपां करोति। यथैव गुरुणा ते न पालनीयास्तथैव तानधमाञ्छिष्यान्तच्छ्रुतं गुरूपदिष्टं वेदवाक्यं न पालयति। फलप्रदं न भवतीत्यर्थः॥

अथ चतुर्थो मंत्रः॥

यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नं।
यस्ते न द्रुह्येत्कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन्निति॥

हे आचार्य यमेव मुख्यशिष्यं शुचित्वादिगुणोपेतं जानीयाः। किंच यो मुख्यशिष्यस्तुभ्यं कदाचिदपि न द्रुह्येत्। तस्मै तु मुख्यशिष्याय त्वदीयनिधिपालकाय ब्रह्मन् वेदरूपां मां विद्यां ब्रूयाः। इत्थं विद्यादेवतया प्रार्थितत्वादाचार्येण मुख्यशिष्याय वेदविद्योपदेष्टव्या। तदर्थमृग्वेदोऽस्माभिः षडंगानुसारेण व्याख्यायते। मंत्रब्राह्मणात्मके वेदे ब्राह्मणस्य मंत्रव्याख्यानोपयोगित्वादादौ ब्राह्मणमारण्यकांडसहितं व्याख्यातं। अथ तत्र तत्र ब्राह्मणोदाहरणेन मंत्रात्मकः संहिताग्रंथो व्याख्यातव्यः॥

स चाग्निमीळ इत्यारभ्य यथा वः सुसहासतीत्यंतोऽष्टकांडैर्दशमंडलैश्चतुःषष्ट्याध्यायैरीषदधिकसहस्रसूक्तैरीषदधिकद्विसहस्रवर्गैरीषदधिकाभिर्दशसहस्रसंख्याभिर्ऋग्भिश्चोपेतः। तस्य च ग्रंथस्य कृत्स्नस्याप्याम्नातक्रमेणैव सामान्यविनियोगो ब्रह्मयज्ञजपादौ पूर्वमेवाभिहितः। विशेषविनियोगस्तु तत्तत्क्रतौ सूत्रकारेण प्रदर्शितः। स च त्रिविधः। सूक्तविनियोगस्तृचादिविनियोग एकैकस्या ऋचो विनियोगश्चेति। तत्राग्निमीळ इति सूक्तं प्रातरनुवाक आग्नेये क्रतौ विनि-

युक्तं। स विनियोग आश्वलायनेन चतुर्थाध्यायस्य त्रयोदशे खंडे सूचितः। अवा नो अग्न इति षळग्निमीळेऽग्निं दूतमिति। तत्र हीनपादग्रहणात्सूक्तनिश्चयः। सूक्तं सूक्तादौ हीने पादे। आ॰ १.१.। इति परिभाषितत्वात्। तस्मिन्सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोगः। स च द्वितीयाध्यायस्य प्रथमखंडे सूचितः। साह्वान्विश्वा अभियुजोऽग्निमीळे पुरोहितमिति संयाज्ये इति। तत्र कृत्स्नपादग्रहणादृगित्यवगम्यते। ऋचं पादग्रहणे। आ॰ १.१.। इति परिभाषितत्वात्। तथा संयाज्ये इत्युक्ते सौविष्टकृती प्रतीयात्। आ॰ १.२.। इति परिभाषितत्वात्स्विष्टकृत्संबंधनिश्चयः। तत्रापि द्वितीयमंत्रत्वेनोदाहृतत्वाद्याज्यात्वं। यद्यपि साह्वानित्यनया पुरोनुवाक्ययैव देवताया अनुस्मरणरूपसंस्कारः सिद्धः। तथापि याज्यानुवाक्ययोः समुच्चयो द्वादशेऽध्याये चतुर्थपादे मीमांसितः॥

पुरोनुवाक्यया याज्या विकल्प्या वा समुच्चिता।
विकल्प्यान्यतरेणैव देवतायाः प्रकाशनात्॥

पुरोनुवाक्यासमाख्यानाद्वचनाच्च समुच्चयः। देवताप्रकाशनकार्यस्यैकत्वात्। युग्मयोर्यथा विकल्पस्तथैवैकयुग्मयोरेतयोरिति चेत्। मैवं। पुरोनुवाक्येति समाख्याया उत्तरकालीनयाज्यामंतरेणानुपपत्तेः। किंच पुरोनुवाक्यामनूच्य याज्यया जुहोतीति प्रत्यक्षवचनेन देवतोपलक्षणहविःप्रदानकार्ये भेदोक्तिपुरःसरं साहित्यं विधीयते। तस्मात्समुच्चय इति॥

एतच्चाग्निमित्यादिसूक्तं नवर्चं। अग्निं नव मधुच्छंदा वैश्वामित्र इत्यनुक्रमणिकायामुक्तत्वात्। विश्वामित्रपुत्रो मधुच्छंदोनामकस्तस्य सूक्तस्य द्रष्टृत्वात्तदीय ऋषिः। ऋष गताविति धातुः। सर्वधातुभ्य इन्। उ॰ ४.११९.। इगुपधात्कित्। उ॰ ४.१२१.। वेदप्राप्त्यर्थं तपोऽनुतिष्ठतः पुरुषान्स्वयंभूर्वेदपुरुषः प्राप्नोत्। तथा च श्रूयते। अजान्ह वै पृश्नींस्तपस्यमानान्ब्रह्म स्वयंभ्वभ्यानर्षत्तदृषयोऽभवन्निति। तथातींद्रियस्य वेदस्य परमेश्वरानुग्रहेण प्रथमतो दर्शनादृषित्वमित्यभिप्रेत्य स्मर्यते। युगांतेऽतर्हितान्वेदान्सेतिहासान्महर्षयः। लेभिरे तपसा पूर्वमनुज्ञाता स्वयंभुवेति। ऋष्यादिज्ञानाभावे प्रत्यवायः स्मर्यते। अविदित्वा ऋषिं छंदो दैवतं योगमेव च। योऽध्यापयेज्जपेद्वापि पापीयाञ्जायते तु सः॥ ऋषिच्छंदोदेवतानि ब्राह्मणार्थं स्वराद्यपि। अविदित्वा प्रयुंजानो मंत्रकंटक उच्यत इति। वेदनविधिश्च स्मर्यते। स्वरो वर्णोऽक्षरं मात्रा विनि-

योगोऽर्थ एव च । मंत्रजिज्ञासमानेन वेदितव्यं पदे पद इति । अग्निमित्यादिसूक्तस्य छंदोऽनुक्रमणिकायां यद्यप्यत्र नोक्तं तथापि परिभाषायामेवमुक्तं ॥ आदौ गायत्रं प्राक् हिरण्यस्तूपादिति । हिरण्यस्तूप ऋषिर्येषां मंत्राणां वक्ष्यते ततः प्राचीनेषु मंत्रेषु सामान्येन गायत्रं छंद इत्यर्थः । पुरुषस्य पापसंबंधं वारयितुमाच्छादकत्वाच्छंद इत्युच्यते । तच्चारण्यकांडे समाम्नायते । छादयंति ह वा एनं छंदांसि पापात्कर्मण इति । अथ वा चीयमानाग्निसंतापस्याच्छादकत्वाच्छंदः । तच्च तैत्तिरीया आमनंति । प्रजापतिरग्निमचिनुत । स क्षुरपविर्भूत्वातिष्ठत् । तं देवा बिभ्यतो नोपायन् । ते छंदोभिरात्मानं छादयित्वोपायन् । तच्छंदसां छंदस्त्वमिति । यद्वाप मृत्युं वारयितुमाच्छादयतीति छंदः । तदपि छंदोग्योपनिषद्याम्नातं । देवा वै मृत्योर्बिभ्युः । त्रयीं विद्यां प्राविशन् । ते छंदोभिरात्मानमाच्छादयन् । यदेभिराच्छादयंस्तच्छंदसां छंदस्त्वमिति ॥ तथा द्योतनार्थदीव्यतिधातुनिमित्त देवशब्द इत्येतदाम्नायते । दिवा वै नोऽभूदिति तद्देवानां देवत्वमिति । अतो दीव्यतीति देवः । मंत्रेण द्योत्यत इत्यर्थः । अस्मिन् सूक्ते स्तूयमानत्वादग्निर्देवः । तथा चानुक्रमणिकायामुक्तं । मंडलादिष्वाग्नेयमैंद्रादिति । तस्य सूक्तस्य प्रथमामृचं भगवान्वेदपुरुष आह ।

ओं अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं । होतारं रत्नधातमं ॥ १ ॥

अग्निं । ईळे । पुरःऽहितं । यज्ञस्य । देवं । ऋत्विजं । होतारं । रत्नऽधातमं ॥ १ ॥

अग्निनामकं देवमीळे । स्तौमि । ईड स्तुतौ । धा० २४. ९. । इति धातुः । डकारस्य ळकारो बह्वृचाध्येतृसंप्रदायप्राप्तः । तथा च पठ्यते । अज्मध्यस्थडकारस्य ळकारं बह्वृचा जगुः । अज्मध्यस्थढकारस्य ळ्हकारं वै यथाक्रममिति ॥ मंत्रस्य होत्रा प्रयोज्यत्वादहं होता स्तौमीति लभ्यते । कीदृशमग्निं । यज्ञस्य पुरोहितं । यथा राज्ञः पुरोहितस्तदभीष्टं संपादयति तथाग्निरपि यज्ञस्यापेक्षितं होमं संपादयति । यद्वा यज्ञस्य संबंधिनि पूर्वभाग आहवनीयरूपेणावस्थितं । पुनः कीदृशं । देवं । दानादिगुणयुक्तं । पुनः कीदृशं । होतारमृत्विजं । देवानां यज्ञेषु होतृनामक ऋत्विगग्निरेव । तथा च श्रूयते । अग्निर्वै देवानां होतेति । पुनरपि कीदृशं । रत्नधातमं । यागफलरूपाणां रत्नानामतिशयेन धारयितारं पोषयितारं वा । अत्राग्निशब्दस्य यास्को बहुधा निर्वचनं दर्शयति । नि० ७. १४. । अथातोऽनुक्रमिष्यामोऽग्निः पृथिवीस्थानस्तं प्रथमं व्याख्यास्यामोऽग्निः

कस्मादग्रणीर्भवत्यग्रं यज्ञेषु प्रणीयतेऽङ्गं नयति संनममानोऽक्नोपनो भवतीति स्थौलाष्ठीविर्न क्नोपयति न स्नेहयति त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिरितादक्ताद्दग्धाद्वा नीतात्स खल्वेतेरकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परस्तस्यैषा भवतीति। अग्निमीळे इति। अस्यायमर्थः। सामान्येन सर्वदेवतानां लक्षणस्याभिहितत्वादनंतरं यतः प्रतिपदं विशेषेण वक्तव्यत्वमाकांक्षितमतोऽनुक्रमेण वक्ष्यामः। तत्र पृथिवीलोके स्थितोऽग्निः प्रथमं व्याख्यास्यते। कस्मात्प्रवृत्तिनिमित्तादग्निशब्देन देवताभिधीयत इति प्रश्नस्याग्रणीरित्यादिकमुत्तरं। देवसेनामग्रे स्वयं नयतीत्यग्रणीः। एतदेकमग्निशब्दस्य प्रवृत्तिनिमित्तं। तथा च ब्राह्मणांतरं। अग्निर्वै देवानां सेनानीरिति। एतदेवाभिप्रेत्य बह्वृचा मंत्रब्राह्मणे आमनंति। अग्निर्मुखं प्रथमो देवतानामिति मंत्रः। अग्निर्वै देवानामवम इति ब्राह्मणं। तथा तैत्तिरीयाश्चामनंति। अग्निरग्रे प्रथमो देवतानामिति मंत्रः। अग्निरवमो देवतानामिति च। वाजसनेयिनस्त्वेवमामनंति। स वा एषोऽग्रे देवतानामजायत तस्मादग्निर्नामेति। यज्ञेष्वग्निहोत्रेष्टिपशुसोमरूपेष्वग्रं पूर्वदिग्वर्त्याहवनीयदेशं प्रति गार्हपत्यात्प्रणीयत इति द्वितीयं प्रवृत्तिनिमित्तं। संनममानः सम्यक् स्वयमेव प्रह्वीभवन्नंगं स्वकीयं शरीरं नयति काष्ठदाहे हविःपाके च प्रेरयतीति तृतीयं प्रवृत्तिनिमित्तं। स्थूलाष्ठीविनामकस्य महर्षेः पुत्रो निरुक्तकारः कश्चिदक्नोपन इत्यग्निशब्दं निर्वक्ति। तत्र न क्नोपयतीत्युक्ते न स्नेहयति। किंतु काष्ठादिकं रूक्षयतीत्युक्तं भवति। शाकपूणिनामको निरुक्तकारो धातुत्रयादग्निशब्दनिष्पत्तिं मन्यते। इत इण् गतौ। धा॰ २४. ३६.। इति धातुः। अक्तो अञ्जू व्यक्तिम्रक्षणगतिषु। धा॰ २९. २१.। इति धातुः। दग्धो दह भस्मीकरणे। धा॰ २३. २२.। इति धातुः। नीतो णीञ् प्रापणे। धा॰ २२. ५.। इति धातुः। अग्निशब्दो ह्यकारगकारनिशब्दानपेक्षमाण एतिधातोरुत्पन्नादयनशब्दादकारमादत्ते। अनक्तिधातुगतस्य ककारस्य गकारादेशं कृत्वा तमादत्ते। यद्वा दहतिधातुजन्याद्दग्धशब्दाद्गकारमादत्ते। नीरिति नयतिधातुः। स च ह्रस्वो भूत्वा परो भवति। ततो धातुत्रयं मिलित्वाग्निशब्दो भवति। यज्ञभूमिं गत्वा स्वकीयमंगं नयति काष्ठदाहे हविःपाके च प्रेरयतीति समुदायार्थः। तस्याग्निशब्दार्थस्य देवताविशेषस्य प्राधान्येन स्तुतिदर्शनायैषाग्निमीळ इत्यृग्भवतीति। तामेतामृचं यास्क एवं व्याख्यातवान्। अग्निमीळेऽग्निं याचामीळिरध्येषणाकर्मा पूजाकर्मा वा पुरोहितो व्याख्यातो यज्ञस्य देवो दानाद्वा दीपनाद्वा

द्योतनाद्वा द्युस्थानो भवतीति वा यो देवः सा देवता होतारं ह्वातारं जुहोते-र्होतेत्यौर्णवाभो रत्नधातमं रमणीयानां धनानां दातृतमं। नि० ७. १५.। इति। अस्यायमर्थः। ईडतिधातोः स्तुत्यर्थत्वं प्रसिद्धं। धातूनामनेकार्थत्वमिति न्यायमाश्रित्य याच्ञाध्येषणापूजा अयचोचितत्वात्तदर्थतया व्याख्याताः। पुरोहितशब्दो द्वितीयेऽध्याये। नि० २. १२.। यद्देवापिः शं तनवे पुरोहित इत्येतामृचमुदाहृत्य पुर एनं दधातीति व्याख्यातः। तैत्तिरीयाश्च पौरोहित्ये स्पर्द्धमानस्य पश्वनुष्ठानं विधाय तत्फलत्वेन पुर एनं दधत इत्यामनंति। देवशब्दो दानदीपनद्योतनानामन्यतममर्थमाचष्टे। यज्ञस्य दाता दीपयिता द्योतयितायमग्निरित्युक्तं भवति। दीपनद्योतनयोरेकार्थत्वेऽप्यस्ति धातुभेदः। यद्यप्यग्निः पृथिवीस्थानस्तथापि देवान्प्रति हविर्वहनाद्द्युस्थानो भवति। देवशब्ददेवताशब्दयोः पर्यायत्वान्मंत्रप्रतिपाद्या काचिदग्निव्यतिरिक्ता देवता नान्वेषणीया। होतृशब्दस्य ह्वयतिधातोरुत्पन्नत्वेन देवानामाह्वातारमिति। और्णवाभनामकस्तु मुनिर्जुहोतिधातोरुत्पन्नो होतृशब्द इति मन्यते। अग्नेश्च होतृत्वं होमाधिकरणत्वेन द्रष्टव्यं। रत्नशब्दो द्वितीयाध्याये मघमित्यादिष्वष्टाविंशतौ धननामसु पठितः। रमणीयत्वाद्रत्नत्वं। दधातिधातुरत्र दानार्थवाचीति। तदिदं निरुक्तकारस्य यास्कस्य मंत्रव्याख्यानं। अथ व्याकरणप्रक्रियोच्यते। अगिधातोर्गत्यर्थात्। धा० ५. ३८। अंगेर्नलोपश्चेत्यौणादिकसूत्रेण। उ० ४. ५१.। निप्रत्ययः। इदित्त्वान्नुमागमेन प्राप्तस्य नकारस्य। पा० ७. १. ५८.। लोपश्च भवति। अंगति स्वर्गं गच्छति हविर्नेतुमित्यग्निः। तत्र धातोः। पा० ६. १. १६२.। इत्यकार उदात्तः। आद्युदात्तश्च। पा० ३. १. ३.। इति प्रत्ययगत इकारोऽप्युदात्तः। अनुदात्तं पदमेकवर्जं। पा० ६. १. १५८.। इति द्वयोरन्यतरमुदात्तमवशिष्येतरस्यानुदात्तत्वं प्राप्तं। तत्र धातुस्वरे प्रथमतोऽवस्थिते सति पश्चादुपदिश्यमानः प्रत्ययस्वरोऽवशिष्यते। सति शिष्टस्वरो बलीयान्। पा०. ६. १. १५८. ९.। इति हि न्यायः। ततोऽंतोदात्तमग्निप्रातिपदिकं। अनुदात्तौ सुप्पितौ। पा० ३. १. ४.। इत्यमित्येतद्द्वितीयैकवचनमनुदात्तं। तस्यामि पूर्वः। पा० ६. १. १०७.। इति यत्पूर्वरूपं तदुदात्तमेकादेश उदात्तेनोदात्तः। पा० ८. २. ५.। इति सूचितत्वात्। अग्निशब्दो धातुजन्मेति मते सेयं प्रक्रिया सर्वापि द्रष्टव्या। मतद्वयं यास्केन प्रदर्शितं। नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च। न सर्वाणीति गार्ग्यो वैयाकरणानां चैके। नि० १. १२.। इति। गार्ग्यस्य मतेऽग्निशब्दस्याखंडप्रातिपदिकत्वान्फिषोऽंत

उदात्तः । फि° १. १. । इत्यंतोदात्तत्वं । पूर्वोक्तेष्वयणीरित्यादिनिर्वचनेषु प्रकृतिप्रत्ययाद्यशेषप्रक्रिया यथोचितं कल्पनीया । एतदेवाभिप्रेत्य यास्क आह । अथ निर्वचनं । तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां तथा तानि निर्ब्रूयादथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद्वृत्तिसामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्न त्वेव न निर्ब्रूयात् । नि°. २. १. । इति । अस्यायमर्थः । तत्र निर्वचनीयपदसमूहमध्ये येष्वग्न्यादिपदेषु पूर्वोक्तरीत्या स्वरसंस्कारौ समर्थौ व्याकरणसिद्धौ स्यातां । स्वर उदात्तादिः । संस्कारो निप्रत्ययादिः । किंच तौ स्वरसंस्कारौ प्रादेशिकेन गुणेनान्वितौ स्यातां । शब्दस्यैकदेशः पूर्वोक्तोऽगिधातुः प्रदेशः । तत्र भवो गुणो गतिरूपोऽर्थः । तेनान्वितौ । तान्यग्न्यादिपदानि तथा व्याकरणानुसारेण निर्ब्रूयात् । तच्च निर्वचनमस्माभिः प्रदर्शितं । अथ पूर्वोक्तवैलक्षण्येन कश्चित्स्वेन विवक्षितोऽर्थो नान्वितस्तस्मिञ्शब्देऽनुगतो न भवेत् । तस्यैव व्याख्यानमप्रादेशिके विकार इति । अग्रनयनादिरूपः क्रियाविशेषो विकारः । स च प्रदेशेनाग्निशब्दैकदेशेनाच नाभिधीयत इत्यप्रादेशिकः । एवं सति यः पुमानर्थनित्यः स्वविवक्षितेऽर्थे नियतो निर्बंधवान् । ब्राह्मणानुसारेण वा देवतांतरविशेषणत्वेन योजयितुं वा सन्निर्बंधः । तदानीं स पुमान्केनचिद्वृत्तिसामान्येन स्वविवक्षितमर्थं परीक्षेत । तस्मिञ्शब्दे योजयेत् । वृत्तिः क्रिया । तद्रूपेण सामान्यं सादृश्यं । अस्माभिश्चाग्रनयनादिरूपं क्रियात्वसामान्यमुपजीव्याग्रणीत्वाद्यर्थो योजितः । तदिदं यास्काभिमतं निर्वचनं । स्थौलाष्ठीविरक्षरसाम्यान्निर्वक्ति । अक्रोपनशब्दस्यादौ निषेधार्थमकाररूपमक्षरं विद्यते । अग्निशब्दस्याप्यादावकारोऽस्ति । तदिदमक्षरसाम्यं । शाकपूणिस्तु वर्णसाम्यान्निर्ब्रूते । दग्धशब्दाग्निशब्दयोर्गकारवर्णेन साम्यं । सर्वथापि निर्वचनं न त्याज्यमिति ॥ ईळे इत्येतत्पदं कृत्स्नमप्यनुदात्तं । तिङ्ङतिङः । पा° ८. १. २८. । इत्यतिङंतादग्निशब्दात्परस्येळे इत्यस्य तिङंतस्य निघातविधानात् । पदद्वयसंहिताकाले त्वीकारस्य धातुगतस्योदात्तादनुदात्तस्य स्वरितः । पा° ८. ४. ६६. । इति स्वरितत्वं । तस्मादूर्ध्वभाविन एकारस्य तिङ्प्रत्ययरूपस्य स्वरितात्संहितायामनुदात्तानाम् । पा°. १. २. ३९. । इत्येकश्रुत्यं प्रचयनामकं भवति । पुरःशब्दोऽंतोदात्तः । अयं पुरो भव इत्यत्र तथैवाम्नातत्वात् । पूर्वाधरावराणामसि पुरधवश्चैषां । पा° ५. ३. ३९. । इति पूर्वशब्दादस्प्रत्ययः पुरादेशश्च । ततोऽत्र प्रत्ययस्वरः । पा° ३. १. ३. । धाञो निष्ठायां दधातेर्हिः । पा° ७. ४. ४२. । इत्यादेशे

सति प्रत्ययस्वरेणांतोदात्तो हितशब्दः। तच समासांतोदात्तत्वे प्राप्ते। पा॰ ६. १. २२३.। तदपवादत्वेन तत्पुरुषे तुल्यार्थेत्यादिना। पा॰ ६. २. २.। अव्ययपूर्वपदप्रकृतिस्वरत्वं। यद्वा पुरोऽव्ययं। पा॰. १. ४. ६७.। इति गतिसंज्ञायां गतिरनंतरः। पा॰ ६. २. ४९.। इति पूर्वपदप्रकृतिस्वरत्वं। तत ओकार उदात्तः। अवशिष्टानामनुदात्तस्वरितप्रचयाः पूर्ववद्द्रष्टव्याः। आद्याक्षरस्य संहितायां प्रचयप्राप्तौ। पा॰ १. २. ३९.। उदात्तस्वरितपरस्य सन्नतरः। पा॰ १. २. ४०.। इत्यतिनीचोऽनुदात्तः। यद्यपि पदकाले हितशब्दांतर्गतस्येकारस्य स्वरितत्वं दुर्लभमुदात्तपरत्वाभावात्। मात्रा ह्रस्वस्तावदवग्रहांतरमिति। प्रा॰ १. ३. १.। प्रातिशाख्येऽवमानविधानात्। तैत्तिरीया अनुदात्तमेवाभिधीयते। तथापि यथा संधीयमानानामनेकीभवतां स्वरः। उपदिष्टस्तथा विद्यादक्षराणामवग्रहे। प्रा॰ ३. ३. ५.। इति प्रातिशाख्येऽभिदेशादिष्टसिद्धिः। यजयाचेत्यादिना। पा॰ ३. ३. ९०.। यजतेर्नङ्प्रत्यये सत्यंतोदात्तो यज्ञशब्दः। विभक्तेः सुप्स्वरेणानुदात्तत्वे सति। पा॰ ३. १. ४.। पश्चात्स्वरितत्वं। देवशब्दः पचाद्यजंतः। पा॰ ३. १. १३४.। स च फिट्स्वरेण। फि॰ १. १.। प्रत्ययस्वरेण। पा॰ ३. १. ३.। चित्स्वरेण। पा॰ ६. १. १६३.। वांतोदात्तः। ऋत्विक्शब्द ऋतौ यजतीति विग्रहे सत्यृत्विग्दधृक्। पा॰ ३. २. ५९.। इति निपातितः। गतिकारकोपपदात्कृत्। पा॰ ६. २. १३९.। इति कृदुत्तरपदप्रकृतिस्वरेणांतोदात्तः। विभक्तिस्वरः पूर्ववत्। होतृशब्दस्तृन्प्रत्ययांतः। पा॰ ३. २. १३५.। नित्स्वरेणाद्युदात्तः। पा॰ ६. १. १९७.। स्वरितप्रचयौ पूर्ववत्। रत्नशब्दो नविषयस्यानिसंतस्य। फि॰ २. ३.। इत्याद्युदात्तः। तथा चाम्नायते रत्नं धातेति। रत्नानि दधातीति विग्रहः। समासत्वादंतोदात्तो रत्नधाशब्दः। यद्वा कृदुत्तरपदप्रकृतिस्वरः। तमपप्रत्ययस्य। पा॰ ५. ३. ५५.। पित्स्वरेणानुदात्ते सति। पा॰ ३. १. ४.। स्वरितप्रचितौ। संहितायामाद्याक्षरस्य प्रचयो द्वितीयाक्षरस्य सन्नतरत्वमिति। वेदावतार आद्याया ऋचोऽर्थश्च प्रपंचितः। विज्ञातं वेदगांभीर्यमथ संक्षिप्य वर्ण्यते ॥

आग्नेयसूक्तस्य द्वितीयामृचमाह ॥

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत। स देवाँ एह वक्षति ॥ २ ॥

अग्निः। पूर्वेभिः। ऋषिऽभिः। ईड्यः। नूतनैः। उत। सः। देवान्। आ। इह। वक्षति ॥ २ ॥

अयमग्निः पूर्वेभिः पुरातनैर्भृग्वंगिरःप्रभृतिभिर्ऋषिभिरीड्यः स्तुत्यो नूतनैरुतेदानीतनैरस्माभिरपि स्तुत्यः। सोऽग्निः स्तुतः सन्निह यज्ञे देवान्हविर्भुज

आवक्षति । वह प्रापणे इति धातुः । आवहत्वित्यर्थः । पूर्वेभिरित्यत्र बहुलं छंदसि । पा० ७. १. १०. । इति भिस ऐसादेशाभावः । पूर्व पर्व मर्व पूरणे इति धातुः । पूर्वतिधातोरन्प्रत्यय औणादिकः । इन्प्रत्ययांत ऋषिशब्द ऋषंधकेति निपातनात् । पा० ४. १. ११४. । लघूपधगुणाभावः कित्प्रत्ययो वात्र ज्ञेयः । उ० ४. १२१. । तौ शब्दौ नित्स्वरेणाद्युदात्तौ । ईड्यशब्दस्य ण्यत्प्रत्ययांतत्वात्तित्स्वरितम् । पा० ६. १. १८५. । इति स्वरिते शेषानुदात्तत्वे च प्राप्ते तदपवादत्वेनेडवंदेत्यादिना । पा० ६. १. २१४. । आद्युदात्तत्वं । नवस्य नू त्नप्तनप्खाश्च । पा० ५. ४. ३०. २. । इति वार्त्तिकेन नवशब्दस्य नू इत्यादेशस्तनन्प्रत्ययश्च महावार्त्तिके विहितः । ततो नित्स्वरेणाद्युदात्तः । अवशिष्टस्वरा अग्न्यादिषु नूतनांतेषु पूर्ववदुन्नेयाः । उतशब्दो यद्यपि विकल्पार्थे प्रसिद्धस्तथापि निपातत्वेनानेकार्थत्वादौचित्येनात्र समुच्चयार्थो द्रष्टव्यः । उच्चावचेष्वर्थेषु निपतंतीति निपातत्वं । तर्हि निपाता आद्युदात्ताः । फि० ४. १२. । इत्युकारस्योदात्तः प्राप्त इति चेत् । न । प्रातःशब्दवदंतोदात्तत्वात् । यथा प्रातःशब्दोऽतोदात्तत्वेन स्वरादिषु पठितः । एवमुतशब्दस्यापि पाठो द्रष्टव्यः स्वरादेराकृतिगणत्वात् । यद्वा । एवादीनामंतः । फि० ४. १३. । इत्यंतोदात्तः । स इत्यत्र फिट्स्वरः । देवशब्दः पूर्ववत् । देवानित्यस्य नकारस्य संहितायां दीर्घादटि । पा० ८. ३. ९. । इति रुत्वं । अत्रानुनासिकः । पा० ८. ३. २. । इत्यनुवृत्तावातोऽटि नित्यम् । पा० ८. ३. ३. । इत्याकारः सानुनासिकः । भोभगो । पा० ८. ३. १७. । इति रोर्यकारः । स च लोपः शाकल्यस्य । पा० ८. ३. १९. । इति लुप्यते । तस्यासिद्धत्वात् । पा० ८. २. १. । न पुनः संधिः कार्यः । आङो निपातत्वादाद्युदात्तत्वं । इदमो हप्रत्यये सति निष्पन्नत्वात् । पा० ५. ३. ११. । इहशब्दे प्रत्ययस्वरः । वहतिधातोर्लोडर्थे छांदसो लृट् । तस्य प्रत्ययगतस्य यकारस्य लोपोऽपि छांदसः । यद्वा लेटि सिब्बहुलम् । पा० ३.१. ३४. । इति सिप्प्रत्ययः । लेटोऽडाटौ । पा० ३. ४. ९४. । इत्यडागमश्च । ततो वक्षतीति संपद्यते । तस्य तिङंतत्वान्निघातः । संहितास्वराः पूर्ववत् ॥

आधाने तृतीयेष्टौ प्रथमाज्यभागस्यानुवाक्या सूक्तगता तृतीया । तां तृतीयामृचमाह ॥

अ॒ग्निना॑ र॒यिम॑श्नव॒त्पोष॑मे॒व दि॒वेदि॑वे । य॒शसं॑ वी॒रव॑त्तमं ॥३॥

अ॒ग्निना॑ । र॒यिं । अ॒श्न॒व॒त् । पोषं॑ । ए॒व । दि॒वेऽदि॑वे । य॒शसं॑ । वी॒रव॑त्ऽतमं ॥३॥

योऽयं होत्रा स्तुत्योऽग्निस्तेनाग्निना निमित्तभूतेन यजमानो रयिं धनमश्नवत्। प्राप्नोति। कीदृशं रयिं। दिवे दिवे पोषमेव। प्रतिदिनं पुष्यमाणतया वर्द्धमानमेव। न तु कदाचिदपि क्षीयमाणं। यशसं। दानादिना यशोयुक्तं। वीरवत्तमं। अतिशयेन पुत्रभृत्यादिवीरपुरुषोपेतं। सति हि धने पुरुषाः संपद्यंते॥ रयिशब्दो मघमित्यादिधननामसु पठितः। तत्र फिट्स्वरः। अश्नोतेर्धातोर्लेटि व्यत्ययेन तिप्। इतश्च लोपः। पा० ३. ४. ९७.। इतीकारलोपः। लेटोऽडाटौ। पा० ३. ४. ९४.। इत्यडागमः। ततोऽश्नवदिति भवति। तस्य निघातः। घञंतत्वात्। पा० ६. १. १९७.। पोषशब्द आद्युदात्तः। एवशब्दस्य निपातत्वेऽथेवादीनामंत इत्यंतोदात्तत्वं। वकारांताद्दिव्शब्दात्परस्याः सप्तम्याः सुपां सुलुक्। पा० ७. १. ३९.। इत्यादिना शेभावे सति। सावेकाच इत्यादिना। पा० ६. १. १६८.। ऊडिदंपदादीत्यादिना वा। पा० ६. १. १७१.। तस्योदात्तत्वं। नित्यवीप्सयोः। पा० ८. १. ४.। इति द्विर्भावे सत्युत्तरभागस्यानुदात्तं च। पा० ८. १. ३.। इत्यनुदात्तत्वं। यशोऽस्यास्तीति विग्रहे सत्यर्शआदिभ्योऽच्। पा० ५. २. १२७.। इत्यच्प्रत्ययः। चित्स्वरं व्यत्ययेन बाधित्वा मध्योदात्तत्वं। फिट्स्वरेणांतोदात्ताद्वीरशब्दादुत्तरयोर्मतुप्तमपोः पित्त्वादनुदात्तत्वं। ह्रस्वनुड्भ्याम्। पा० ६. १. १७६.। इति तु न। सावर्णांतत्वात्। न गोश्वन्। पा० ६. १. १८२.। इति प्रतिषेधः॥

अभिप्लवषडहस्य मध्यवर्त्तिषूक्थ्येषु तृतीयसवने मैत्रावरुणस्याग्ने यं यज्ञमित्यादिको वैकल्पिकोऽनुरूपस्तृचः। एतच्च सप्तमाध्याय एवू ष्वित्यादिखंडे सूचितं। अग्निं वो वृधंतमग्ने यं यज्ञमध्वरं। आ० ७. ८.। इति। तस्मिंस्तृचे या प्रथमा सा सूक्ते चतुर्थी। तामेतां चतुर्थीमृचमाह॥

अग्ने॒ यं य॒ज्ञम॑ध्व॒रं वि॒श्वतः॑ परि॒भूरसि॑। स इद्दे॒वेषु॑ गच्छति॥४॥

अग्ने॑। यं। य॒ज्ञं। अ॒ध्व॒रं। वि॒श्वतः॑। परि॒ऽभूः। असि॑। सः। इत्। दे॒वेषु॑। ग॒च्छ॒ति॒॥४॥

हे अग्ने त्वं यं यज्ञं विश्वतः सर्वासु दिक्षु परिभूः परितः प्राप्तवानसि स इत् स एव यज्ञो देवेषु तृप्तिं प्रणेतुं स्वर्गं गच्छति। प्राच्यादिचतुर्दिगंतेष्वाहवनीयमार्जालीयगार्हपत्याग्नीध्रीयस्थानेष्वग्निरस्ति। परिशब्देन होत्रियादिधिष्ण्यव्याप्तिर्विवक्षिता। कीदृशं यज्ञं। अध्वरं। हिंसारहितं। न ह्यग्निना सर्वतः पालितं यज्ञं राक्षसादयो हिंसितुं प्रभवंति। अग्निशब्दस्य षाष्ठिकं। पा० ६. १. १९८.। आमंत्रिताद्युदात्तत्वं। न विद्यते ध्वरोऽस्येति बहुव्रीहौ नञ्सुभ्यां। पा० ६.

२. १७२.। इत्यंतोदात्तत्वं। विश्वत इत्यत्र तसिलः प्रत्ययस्वरत्वं बाधित्वा पूर्ववर्णस्य लिति । पा० ६. १. १९३.। इत्युदात्तत्वं । परिभूरित्यत्राव्ययपूर्वपदप्रकृतिस्वरत्वे प्राप्ते । पा० ६. २. २.। तदपवादत्वेन कृदुत्तरपदप्रकृतिस्वरत्वं । पा० ६. २. १३९.। असीति तिङंतस्य यद्वृत्तान्नित्यं । पा० ८. १. ६६.। इति निघाताभावः ॥

पंचमीमृचमाह ॥

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः । देवो देवेभिरा गमत् ॥ ५ ॥

अग्निः। होता। कविऽक्रतुः। सत्यः। चित्रश्रवःऽतमः। देवः। देवेभिः। आ। गमत् ॥ ५ ॥

अयमग्निर्देवोऽन्यैर्देवैर्हविर्भोजिभिः सहागमत् । अस्मिन्यज्ञे समागच्छतु । कीदृशोऽग्निः। होता होमनिष्पादकः। कविक्रतुः। कविशब्दोऽत्र क्रांतवचनो न तु मेधाविनाम। क्रतुः प्रज्ञानस्य कर्मणो वा नाम। ततः क्रांतप्रज्ञः क्रांतकर्मा वा। सत्यः। अनृतरहितः। फलमवश्यं प्रयच्छतीत्यर्थः। चित्रश्रवस्तमः। श्रूयत इति श्रवः कीर्तिः। अतिशयेन विविधकीर्तियुक्तः ॥ कविक्रतुश्चित्रश्रवस्तम इत्यत्रो-भयत्र बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरत्वं। सत्सु साधुः सत्यः सत्यादशपथे । पा० ५. ४. ६६.। इत्यत्रांतोदात्तो हरदत्तेन निपातितः । लोडंतस्य गच्छत्विति शब्दस्य छत्वाभावः। उकारलोपश्छांदसः। ततो रूपं गमदिति भवति। स्पष्टमन्यत् ॥

॥ इत्यृक्संहितायां वेदार्थप्रकाशे प्रथमकांडस्य प्रथमाध्याये प्रथमो वर्गः ॥

आग्नेयसूक्ते षष्ठीमृचमाह ॥

यदंग दाशुषे त्वमग्ने भद्रं करिष्यसि । तवेत्तत्सत्यमंगिरः ॥ ६ ॥

यत्। अंग। दाशुषे। त्वं। अग्ने। भद्रं। करिष्यसि। तव। इत्। तत्। सत्यं। अंगिरः ॥ ६ ॥

अंगेत्यभिमुखीकरणार्थो निपातः। अंगाग्ने हे अग्ने त्वं दाशुषे हविर्दत्तवते यजमानाय तत्प्रीत्यर्थं यद्भद्रं वित्तगृहप्रजापशुरूपं कल्याणं करिष्यसि तद्भद्रं तवेत्। तवैव सुखहेतुरिति शेषः। हे अंगिरोऽग्ने। एतच्च सत्यं न त्वत्र विसंवा-दोऽस्ति। यजमानस्य वित्तादिसंपत्तौ सत्यामुत्तरक्रत्वनुष्ठानेनाग्नेरेव सुखं भवति। भद्रशब्दार्थं शाट्यायनिनः समामनंति । यद्वै पुरुषस्य वित्तं तद्भद्रं गृहा भद्रं प्रजा भद्रं पशवो भद्रमिति ॥ अंगशब्दस्य निपातत्वेऽपि। फि० ४. १२.। अभ्या-दित्वादंतोदात्तत्वं। दाश्वान् साह्वान् । पा० ६. १. १२.। इति सूत्रेण दाशृ दान इति धातोः क्वसुप्रत्ययो निपातितः। तत्र प्रत्ययस्वरः। आमंत्रितस्याग्निशब्दस्य

पदात्परत्वेनाष्टमिकानुदात्तत्वं। पा० ८. १. १९.। न शंकनीयं। अपादादौ। पा० ८. १. १८.। इति पर्युदस्तत्वात्। ततः षाष्ठिकं। पा० ६. १. १९८.। आद्युदात्तत्वमेव। भद्रशब्दस्य नब्विषयत्वेन। फि० २. ३.। आद्युदात्तत्वप्रसक्तावपि भदि कल्याण इति धातोरुपरि रक्प्रत्ययेन निपातनात्। उ० २. २९.। अंतोदात्तत्वं। अस्मिन्वाक्ये यच्छब्दप्रयोगान्निपातैर्यद्यदिहंत। पा० ८. १. ३०.। इति निघाते प्रतिषिद्धे स्यप्रत्ययस्वरेण। पा० ३. १. ३३.। सति शिष्टेन करिष्यसिशब्द उपांत्योदात्तः। तवेत्यत्र युष्मदस्मदोर्ङसि। पा० ६. १. २११.। इत्याद्युदात्तत्वं। अंगिरा अंगारा इति यास्कः। ऐतरेयिणोऽपि प्रजापतिदुहितृध्यानोपाख्याने समामनंति। येऽंगारा आसंस्तेऽंगिरसोऽभवन्निति। तस्मादंगिरोनामकमुनिकारणत्वादंगाररूपस्याग्नेरंगिरस्त्वं। अत्र पदात्परत्वेनाष्टमिकानुदात्तत्वं॥

अग्नीषोमप्रणयन उप त्वाग्न इत्यादिकोऽनुवचनीयस्तृचः। एतच्च ब्राह्मणे समाम्नातं। उप त्वाग्ने दिवे दिव उप प्रियं पनिप्रतमिति तिस्रश्चैकां चान्वाहेति। तस्मिंस्तृचे या प्रथमा सा सूक्ते सप्तमी। तामेतां सप्तमीमृचमाह॥

उप॑ त्वाग्ने दि॒वेदि॑वे॒ दोषा॑वस्तर्धि॒या व॒यं। नमो॒ भर॑न्त॒ एम॑सि ॥ ७ ॥

उप॑। त्वा॒। अ॒ग्ने॒। दि॒वेऽदि॑वे। दोषा॑ऽवस्तः। धि॒या। व॒यं। नमः॑। भर॑न्तः। आ। इ॒म॒सि॒ ॥ ७ ॥

हे अग्ने वयमनुष्ठातारो दिवे दिवे प्रतिदिनं दोषावस्ता रात्रावहनि च धिया बुध्या नमो भरंतो नमस्कारं संपादयंत उप समीपे त्वैमसि। त्वामागच्छामः॥ उपशब्दस्य निपातस्वरः। फि० ४. १२.। त्वामौ द्वितीयायाः। पा०. ८. १. २३.। इति युष्मच्छब्दस्यानुदात्तस्त्वादेशः। दोषाशब्दो रात्रिवाची। वस्त इत्यहर्वाची। द्वंद्वसमासे कार्तकौजपादित्वात्। पा० ६. २. ३७.। आद्युदात्तः। सावेकाचः। पा० ६. १. १६८.। इति धियो विभक्तिरुदात्ता। नम इति निपातः। भरंत इत्यत्र शपः पित्त्वाच्छतुर्लसार्वधातुकत्वाच्चानुदात्तत्वे सति। पा० ३. २. १२८.। धातुस्वरः शिष्यते। इमसीत्यत्रेदंतो मसिः। पा० ७. १. ४६.। इत्यादेशो निघातश्च॥

अष्टमीमृचमाह॥

राज॑न्तमध्व॒राणां॑ गो॒पामृ॒तस्य॒ दीदि॑विं। वर्ध॑मानं॒ स्वे दमे॑ ॥ ८ ॥

राज॑न्तं। अ॒ध्व॒राणां॑। गो॒पां। ऋ॒तस्य॑। दीदि॑विं। वर्ध॑मानं। स्वे। दमे॑ ॥ ८ ॥

पूर्वमंत्रे त्वामुपैम इत्यग्निमुद्दिश्योक्तं। कीदृशं त्वां। राजंतं। दीप्यमानं।

अध्वराणां राक्षसकृतहिंसारहितानां यज्ञानां गोपां रक्षकं। ऋतस्य सत्यस्यावश्यं भाविनः कर्मफलस्य दीदिविं पौनःपुन्येन भृशं वा द्योतकं। आहुत्याधारमग्निं दृष्ट्वा शास्त्रप्रसिद्धं कर्मफलं स्मर्यते। स्वे दमे स्वकीयगृहे यज्ञशालायां हविर्भिर्वर्द्धमानं॥ राजंतं वर्द्धमानमित्यत्रोभयत्र पूर्ववज्ज्ञातुस्वरः शिष्यते। दीदिविशब्दस्याभ्यस्तानामादिः। पा०. ६. १. १८९। इत्याद्युदात्तत्वं। दमशब्दो वृषादित्वात्। पा०. ६. १. २०३। आद्युदात्तः॥

नवमीमृचमाह॥

स नः॑ पि॒तेव॑ सू॒नवेऽग्ने॑ सूपाय॒नो भ॑व। सच॑स्वा नः स्व॒स्तये॑॥९॥

सः। नः॒। पि॒ताऽइ॑व। सू॒नवे॑। अग्ने॑। सु॒ऽउ॒पा॒य॒नः। भ॒व॒। सच॑स्व। नः॒। स्व॒स्तये॑॥९॥

हे अग्ने स त्वं नोऽस्मदर्थं सूपायनः शोभनप्राप्तियुक्तो भव। तथा नोऽस्माकं स्वस्तये विनाशराहित्यार्थं सचस्व समवेतो भव। तत्रोभयत्र दृष्टांतः। यथा सूनवे पुत्रार्थं पिता सुप्रापः प्रायेण समवेतो भवति तद्वत्॥ अस्मच्छब्दादेशस्य न इत्येतस्यानुदात्तं सर्वं। पा० ८. १. १८.। इत्यनुदात्तत्वं। चादयोऽनुदात्ताः। फि० ४. १५.। इतीवशब्दोऽनुदात्तः। इवेन नित्यसमासः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यं। पा० २. १. ४. १.। इति समस्तः पितेवेति शब्दो मध्योदात्तः। शोभनमुपायनं यस्येति बहुव्रीहौ नञ्सुभ्यामित्यंतोदात्तत्वं। सचस्वेत्यत्र पदात्परत्वं नास्तीति न निघातः लसार्वधातुकानुदात्तत्वे सति धातुस्वरावशेषः॥

॥ इति प्रथमस्य प्रथमे द्वितीयो वर्गः॥

अग्निमीळ इत्यादिसूक्तमग्निष्टोमस्य प्रातरनुवाके यथा विनियुक्तं तथा वायावायाहीत्यादयस्तृचाः प्रउगशस्त्रे विनियुक्ताः। तत्रेदं चिंत्यते। शस्त्रं किं देवतास्मरणरूपं संस्कारकर्म किंवादृष्टफलं प्रधानकर्मेत्यत्र पूर्वपक्षं जैमिनिः सूत्रयामास॥

स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवताभिधानत्वादिति॥१॥ आज्यैः स्तुवते पृष्ठैः स्तुवत प्रउगं शंसति निष्केवल्यं शंसतीति श्रूयते। तत्र स्तुतिः शंसनं च गुणिनिष्ठगुणाभिधानं। इंद्रस्य नु वीर्याणि प्रवोचमित्यत्र दृष्टत्वात्। एवं सति याज्यान्यायेन गुणिन्या देवताया अभिधायकत्वेन स्तुतशस्त्रयोः संस्काररूपत्वमभ्युपेयं। याज्यायास्तद्रूपत्वं दशमाध्यायस्य चतुर्थपादे दृष्टार्थलाभेन निर्णीतं। तद्वदत्रापि तुशब्दः प्रधानकर्मत्वं व्यावर्तयति॥ सिद्धांतितं पक्षं दूषयति॥

अर्थेन त्वपकृष्येत देवतानामचोदनार्थस्य गुणभूतत्वादिति ॥ २ ॥ तुशब्देन संस्कारत्वं वारयति । संस्कारपक्षे प्रयोजनवशेन मंत्रः स्वस्थानादपकृष्येत । कुतः । मंत्रगतं देवतावाचकं यदिंद्रादि नामास्ति तच्चोदनयामंत्ररूपया प्रतिपाद्यस्य देवतारूपस्यार्थस्य गुणभूतं । तस्माद्यत्र प्रधानभूतदेवतास्ति तत्र गुणभूतो मंत्रो नेतव्यः । तद्यथा । माहेंद्रग्रहसंनिधावभि त्वा शूरेत्ययं प्रगाथ आम्नातः । स चेंद्रं प्रकाशयति न तु महेंद्रं । ततो यत्रैंद्रं कर्म तत्रायं प्रगाथोऽपकर्षणीयः । तथा सति क्रमसांनिधी बाध्येयातां । तदेतत्सिद्धांतिनाभिहितं दूषणं पूर्वपक्षी समाधत्ते ॥

वशावद्वा गुणार्थं स्यादिति ॥ ३ ॥ वाशब्दः प्रगाथस्यान्यत्रनयनं वारयति । मंत्रे यदेतदिंद्रशब्दाभिधानं तदेतन्महगुणोपलक्षणार्थं स्यात् । यथा सा वा एषा सर्वदेवत्या यदजा वशा वायव्यामालभेतेत्यत्राजावशाशब्देन चोदिते कर्मणि छागशब्देन केवलेन युक्ता निगमा वशात्वगुणमप्युपलक्षयंति तद्वत् । तस्मान्महत्वगुणयुक्ते चोदिते कर्मणि निर्गुणेनेंद्रशब्देनाभिधानमविरुद्धं । लोकेऽपि महाराजे केवलराजशब्दप्रयोगमपि पश्यामः । तदेतत्समाधानं सिद्धांती दूषयति ॥

न श्रुतिसमवायित्वादिति ॥ ४ ॥ यदुक्तं वशान्यायेन राजन्यायेन वास्य ग्रहस्येंद्रो देवता युज्यत इति । तन्न । देवतात्वस्य तद्धितश्रुतिसमवायित्वात् । माहेंद्रग्रह इत्यत्र सास्य देवतेत्यस्मिन्नर्थे महेंद्राद्घाणौ च । पा॰ ४. २. २९. । इति महेंद्रशब्दादण्प्रत्ययो विहितः । तस्मान्महेंद्र एव देवता न त्विंद्रः । विपक्षे बाधमाह ॥

गुणश्चानर्थक इति ॥ ५ ॥ यदींद्रो देवता स्यात्तदानीमिंद्रग्रह इत्येतावतैवार्थावगतौ माहेंद्र इति महत्वगुणोऽनर्थकः स्यात् । चकारः पूर्वहेतुना समुच्चयार्थः । हेत्वंतरमाह ॥

तथा याज्यापुरोरुचोरिति ॥ ६ ॥ इंद्रमहेंद्रयोर्देवतयोर्भेदे यथा महत्वगुणः सार्थकस्तथा याज्यापुरोनुवाक्ययोर्भेदोऽप्यस्मिन्नेव पक्ष उपपद्यते । एंद्र सानसिमित्यादिके इंद्रस्य याज्यापुरोनुवाक्ये । महां इंद्रो य ओजसेत्यादिके महेंद्रस्य । पूर्वपक्षिणोक्ते वशादृष्टांते वैषम्यमाह ॥

वशायामर्थसमवायादिति ॥ ७ ॥ या वशा विधिवाक्ये श्रुता तस्या एव निगमेषु छागशब्देन व्यवहारो न विरुद्धः । छागत्वलक्षणस्यार्थस्य वशायां

समवेतत्वात्। तच्च प्रत्यक्षेणोपलभ्यते। इंद्रमहेंद्रयोस्तु भेद उपपादितः। तस्माद्विषमो दृष्टांतः। एवं संस्कारपक्षे प्रगाथस्येंद्रकर्मण्यपकर्षप्रसंगात्तद्वारयितुं स्तोत्रशस्त्रयोः प्रधानकर्मत्वमिति सिद्धांतिनो मतं ॥ पुनरपि पूर्वपक्षी तदेतन्मतं निराचष्टे ॥

यत्रेति वार्थवत्त्वात्स्यादिति ॥ ८ ॥ वाशब्दः सिद्धांतिमतव्यावृत्त्यर्थः। यत्रैंद्रं कर्म तत्र प्रगाथो नेतव्य इत्ययमेव पक्षः स्यात्। कुतः। अर्थवत्त्वात्। ऐंद्रो मंत्र इंद्रं प्रकाशयितुं समर्थ इत्यर्थवान्स्यात्। महेंद्रं तु प्रकाशयितुमसमर्थत्वादानर्थक्यं प्रगाथस्य प्रसज्येत। तस्माद्देवताप्रकाशनरूपसंस्कारकर्मत्वमेव स्तोत्रशस्त्रयोर्युक्तमिति स्थितः पूर्वपक्षः। अथ सिद्धांतमाह ॥

अपि वा श्रुतिसंयोगात्प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदध्यातामिति ॥ ९ ॥ अपि वेत्यनेन संस्कारकर्मत्वं व्यावर्त्यते। स्तौतिधातुः शंसतिधातुश्चेत्येतावुभावपि स्वप्रकरण एव कस्याश्चित्प्रधानक्रियाया उत्पत्तिं विदध्यातां। कुतः। श्रुतिसंयोगात्। तयोर्धात्वोर्वाच्योऽर्थः श्रुतिरित्युच्यते। तत्संयोगः प्रधानकर्मत्वे सिध्यति। तथा हि गुणिनमुपसर्जनीकृत्य तन्निष्ठानां गुणानां प्राधान्येन कथनं स्तुतिः। यो देवदत्तः स चतुर्वेदाभिज्ञ इत्युक्ते सर्वे जनाः स्तुतिमवगच्छंति। गुणस्योपसर्जनत्वे तु न स्तुतिः प्रतीयते। यश्चतुर्वेदाभिज्ञस्तमाकारयेत्युक्ते स्तुतिं न मन्यंते किंत्वाह्वानप्राधान्यमेव बुध्यंते। एवं मंत्रेष्वपि या देवता सेयमीदृशैर्गुणैरुपेतेति गुणप्राधान्यविवक्षायां मुख्यः स्तौतिधात्वर्थो विधीयते। त्वत्पक्षे तु येयमीदृग्गुणयुक्ता सेयं देवतेति देवतास्मरणस्य प्राधान्यादियं स्तुतिर्न स्यात्। ततः श्रुतिवशादेते प्रधानकर्मणी। तथा सति देवताप्रकाशने तात्पर्याभावादैंद्रोऽपि प्रगाथः स्वप्रकरणगते महेंद्रकर्मण्येवावतिष्ठते। यदि देवतास्मरणरूपं दृष्टं प्रयोजनं न लभ्येत तर्ह्यदृष्टमस्तु। प्रधानकर्मत्वे हेत्वंतरमाह ॥

शब्दपृथक्त्वाच्चेति ॥ १० ॥ द्वादशाग्निष्टोमस्य स्तोत्राणि द्वादश शस्त्राणीत्यत्र द्वादशशब्देन स्तोत्राणां पृथक्त्वमवगम्यते। देवताप्रकाशनपक्षे सर्वैरपि मंत्रसंघैः कृतस्य प्रकाशनस्यैकत्वेन द्वादशसंख्या न स्यात्। प्रधानकर्मणां त्वाज्यस्तोत्रपृष्ठस्तोत्रादिनामकानां भिन्नत्वाद्द्वादशत्वसंख्योपपद्यते। एवं शस्त्रवाक्येऽपि योज्यं। विपक्षे बाधमाह ॥

अनर्थकं च तद्वचनमिति ॥ ११ ॥ अग्निष्टुतिः श्रूयते। आग्नेया ग्रहा भवंतीति। तत्रैव पुनरप्यन्यदुच्यते। आग्नेयीषु स्तुवते। आग्नेयीः शंसतीति।

त्वत्पक्षे तद्वचनमनर्थकं स्यात् । चोदकप्राप्तेषु स्तोत्रशस्त्रमंत्रेष्वाग्नेयग्रहानुसारेण देवतापदस्योहे सत्याग्नेयत्वसिद्धेः । प्रधानकर्मपक्षे तु देवताप्रकाशनरूपत्वाभावेनोहाभावादाग्नेयमंत्रांतरविधिवचनमर्थवद्भवति । पुनरपि हेत्वंतरमाह ॥

अन्यश्चार्थः प्रतीयत इति ॥ १२ ॥ संबद्धे वै स्तोत्रशस्त्रे इति ह्याम्नातं । संबंधश्च द्वयोर्भवति न त्वेकस्य । तस्मात्स्तोत्रशस्त्रयोरर्थभेदः प्रतीयते । स च संस्कारपक्षे न संभवति । देवताप्रकाशनरूपस्यार्थस्यैकत्वात् । प्रधानकर्मपक्षे तु स्तोत्रकर्म शस्त्रकर्म चेत्यर्थभेद उपपद्यते । यद्यपि ष्टुञ् स्तुतौ शंसु स्तुतावित्येकार्थौ तथापि प्रतिगीतमंत्रसाध्यं स्तोत्रं । अप्रतिगीतमंत्रसाध्यं शस्त्रमिति तयोर्विवेकः । हेत्वंतरमाह ॥

अभिधानं च कर्मवदिति ॥ १३ ॥ यथा प्रधानकर्माग्निहोत्रं जुहोतीति द्वितीयासंयोगेनाभिहितं तथा प्रउगं शंसतीत्यभिधीयते । अतस्तत्साहश्यात्प्रधानकर्मत्वं । हेत्वंतरमाह ॥

फलनिवृत्तेश्चेति ॥ १४ ॥ स्तुतस्य स्तुतमसीति स्तोत्रानुमंत्रणमाम्नायवाक्यशेषे स्तोत्रफलमेवाम्नातं । इंद्रियावंतो वनामहे धुक्षीमहि प्रजामिषमिति । न तु देवताप्रयुक्तं फलमाम्नातं । अतो न देवतासंस्कारः किंतु प्रधानकर्मेति स्थितं । अनेन तु निर्णयेन प्रयोजनं विकृतिषूहाभावः । संस्कारपक्षे तु यस्यां विकृतौ देवतांतरं तत्र तद्वाचकं पदमूहनीयं स्यात् । तन्मा भूदिति प्रधानकर्मत्वमुक्तं । एतच्च दशमाध्याये सूचितं । ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यादिति ॥

अत्र संग्रहश्लोकौ ॥

प्रउगं शंसतीत्यादौ गुणतो न प्रधानता ।
दृष्टा देवस्मृतिस्तेन गुणता स्तोत्रशस्त्रयोः ॥
स्मृत्यर्थत्वे स्तौतिशंस्योर्धात्वोः श्रौतार्थबाधनं ।
तेनादृष्टमुपेत्यापि प्राधान्यं श्रुतये मतमिति ॥

अग्निष्टोमे सुत्यादिने सूर्योदयात्पूर्वं प्रेषितो होता प्रातरनुवाकमनुब्रूयात् । एतच्चैतरेयब्राह्मणे प्रपंचितं । देवेभ्यः प्रातर्यावभ्यो होतरनुब्रूहीत्याहाध्वर्युरित्यादि ब्राह्मणं । तस्मिंश्च प्रातरनुवाकेऽग्निमीळ इत्यादिसूक्तमंतर्भूतं । तच्च व्याख्यातं । प्रातःसवने वैश्वदेवग्रहणादूर्ध्वं प्रउगशस्त्रं होत्रा शंसनीयं । तच्च शस्त्रं वायवायाहीत्यादिसप्ततृचात्मकं • एतच्च ब्राह्मणे ग्रहोक्थमित्यादिखंडे प्रपंचितं । तथा

पंचमाध्याये । आ० ५. १०. । स्तोत्रमये शस्त्रादित्यादिखंडे सूचितं च ॥ अत्रेयमनुक्रमणिका । वायो वायव्यैंद्रवायवमैत्रावरुणास्तृचा अश्विना द्वादशाश्विनैंद्रवैश्वदेवसारस्वतास्तृचाः । सप्तैताः प्रउगदेवता इति । अस्यायमर्थः । वायवायाहीत्यादिकं नवर्चं सूक्तं । अग्निं नवेत्यतो नवशब्दस्यानुवृत्तेः । तत्राद्यस्तृचो वायुदेवताकः । द्वितीय इंद्रवायुदेवताकः । तृतीयो मित्रावरुणदेवताकः । अश्विनेत्यादिकं द्वादशर्चं सूक्तं । तत्राद्यस्तृच आश्विनः । द्वितीय ऐंद्रः । तृतीयो वैश्वदेवः । चतुर्थः सारस्वतः । तेषु तृचेषु प्रतिपाद्या वाय्वादयः सरस्वत्यंताः सप्तसंख्याकाः प्रउगशस्त्रस्य देवता इति । मधुच्छंदसोऽनुवर्त्तनात्स एवर्षिः । तथैवानुवृत्त्या गायत्रं छंदः । वायव्ये तृचे प्रथमा ग्रहस्यैंद्रवायवस्यैका पुरोनुवाक्या । एतच्च ब्राह्मणे समाम्नातं । वायव्या पूर्वा पुरोनुवाक्यैंद्रवायव्युत्तरेति । तथा सूचितं च । वायवायाहि दर्शतेंद्रवायू इमे सुता इत्यनुवाक्ये इति । वायव्यतृचे प्रथमामृचमाह ॥

वायवा याहि दर्शतेमे सोमा अरंकृताः । तेषां पाहि श्रुधी हवं ॥ १ ॥

वायो इति । आ । याहि । दर्शत । इमे । सोमाः । अरंऽकृताः । तेषां । पाहि । श्रुधि । हवं ॥ १ ॥

हे दर्शत दर्शनीय वायो कर्मण्येतस्मिन्नायाहि । आगच्छ । त्वदर्थमिमे सोमा अरंकृताः । अभिषवादिसंस्कारोऽलंकारः । तेषां । तान्सोमान् । यद्वा तेषामेकदेशमित्यध्याहारः । पाहि । स्वकीयं भागं पिबेत्यर्थः । तत्पानार्थं हवमस्मदीयमाह्वानं श्रुधि । शृणु । अत्र यास्कः । वायवायाहि दर्शनीयेमे सोमा अरंकृता अलंकृतास्तेषां पिब शृणु नो ह्वानं । नि० १०. २. । इति ॥ दर्शतेत्यत्र भृमृदृशीत्यादिसूत्रेण । उ० ३. १०९. । अतच्प्रत्यय औणादिकः । चित्त्वादंतोदात्तस्यामंत्रितानुदात्तत्वं । अर्तिस्तुस्वित्यादिना । उ० १. १३८. । मन्प्रत्ययांतस्य सोमशब्दस्य नित्स्वरः । अलमित्यत्र छांदसो रेफादेशः । अरंकृतशब्दे समासांतोदात्तत्वं । पा० ६. १. २२३. । बाधित्वाव्ययपूर्वपदप्रकृतिस्वरप्राप्तौ । पा० ६. २. २. । भूषणेऽलं । पा० १. ४. ६४. । इत्यलंशब्दस्य गतिसंज्ञायां गतिकारकेत्यादिना । पा० ६. २. १३९. । कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते तदपवादत्वेन गतिरनंतरः । पा० ६. २. ४९. । इति पूर्वपदप्रकृतिस्वरत्वं । निपातत्वादलंशब्द आद्युदात्तः । पाहीत्यत्र पिबादेशाभावश्छांदसः । श्रुधीत्यत्र श्रुशृणुपॄकृवृभ्यश्छंदसीत्यादिना । पा० ६. ४. १०२. । हेर्धिभावः । तिङंतादुत्तरस्य निघातो नास्ति । सेर्ह्यपिच्च । पा० ३. ४. ८७. । इति पित्त्वनिषेधादनुदात्ते निवारिते

प्रत्ययस्वरः। हवमित्यत्र ह्वयतिधातोर्बहुलं छंदसि। पा॰ ६. १. ३४.। इति संप्रसारणे सत्युकारांतत्वादृदोरप्। पा॰ ३. ३. ५७.। इत्यप्प्रत्ययः। तस्य पित्त्वादनुदात्ते सति धातुस्वरः शिष्यते। संहितायां श्रुधीत्यस्यान्येषामपि दृश्यते। पा॰ ६. ३. १३७.। इति दीर्घः॥

द्वितीयामृचमाह॥

वाय उक्थेभिर्जरंते त्वामच्छा जरितारः। सुतसोमा अहर्विदः॥ २॥

वायो इति। उक्थेभिः। जरंते। त्वां। अच्छ। जरितारः। सुतऽसोमाः। अहःऽविदः॥ २॥

हे वायो जरितारः स्तोतार ऋत्विग्यजमानास्त्वामच्छ त्वामभिलक्ष्योक्थेभिराज्यप्रउगादिशस्त्रैर्जरंते। स्तुवंति। कीदृशाः। सुतसोमाः। अभिषुतेन सोमेनोपेताः। अहर्विदः। अहःशब्द एकेनाह्ना निष्पाद्येऽग्निष्टोमादिक्रतौ वैदिकव्यवहारेण प्रसिद्धः। क्रतुभिज्ञा इत्यर्थः॥ अर्चतिगायतीत्यादिषु चतुश्चत्वारिंशत्स्वर्चतिकर्मसु धातुषु जरते ह्वयतीति पठितं। स्तुतेरप्यर्चनाविशेषत्वादौचित्येनात्र स्तुत्यर्थो जरतिधातुः। अच्छशब्दस्य संहितायां निपातस्य च। पा॰ ६. ३. १३६.। इति दीर्घः। सुतसोमा इत्यत्र बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरः। पा॰ ६. २. १.। अहर्विद इत्यत्र समासस्वरं। पा॰ ६. १. २२३.। बाधित्वा तत्पुरुषे तुल्यार्थेत्यादिना। पा॰ ६. २. २.। द्वितीयापूर्वपदप्रकृतिस्वरे प्राप्ते तदपवादत्वेन गतिकारकोपपदात्कृत्। पा॰ ६. २. १३९.। इति कृदुत्तरपदप्रकृतिस्वरः॥

तृतीयामृचमाह॥

वायो तव प्रपृंचती धेना जिगाति दाशुषे। उरूची सोमपीतये॥ ३॥

वायो इति। तव। प्रऽपृंचती। धेना। जिगाति। दाशुषे। उरूची। सोमऽपीतये॥ ३॥

हे वायो तव धेना वाक् सोमपीतये सोमपानार्थं दाशुषे दाश्वांसं दत्तवंतं यजमानं जिगाति। गच्छति। हे यजमान त्वया दत्तं सोमं पास्यामीत्येवं वायुर्ब्रूत इत्यर्थः। कीदृशी धेना। प्रपृंचती। प्रकर्षेण सोमसंपर्कं कुर्वती। सोमगुणं वर्णयंतीत्यर्थः। उरूची। उर्वन्बह्वन्यजमानान् गच्छंती। ये ये सोमयाजिनस्तान् सर्वान्वर्णयंतीत्यर्थः॥ प्रपृंचतीत्यत्र शतुरनुमः। पा॰ ६. १. १७३.। इति ङीबुदात्तः। श्लोको धारेत्यादिषु सप्तपंचाशत्सु वाङ्नामसु गणो धेना ग्नेति पठितं। वर्ततेऽयत इत्यादिषु द्वाविंशाधिकशतसंख्येषु गतिकर्मसु गाति जिगातीति

पठितं। दाशुष इत्यत्र गत्यर्थकर्मणि। पा० २. ३. १२.। इति चतुर्थी। उरूचीत्यत्र गौरादित्वेन। पा० ४. १. ४१.। ङीषि कृते प्रत्ययस्वरः। सोमपीतय इत्यत्र बहुव्रीहित्वाभावेऽपि व्यत्ययेन पूर्वपदप्रकृतिस्वरः॥

ऐंद्रवायवे तृचे प्रथमामृचमाह॥

इंद्रवायू इमे सुता उप प्रयोभिरा गतं। इंदवो वामुशंति हि॥४॥

इंद्रवायू इति। इमे। सुताः। उप। प्रयःऽभिः। आ। गतं। इंदवः। वां। उशंति। हि॥४॥

एतस्या ऋच ऐंद्रवायवग्रहे द्वितीयपुरोनुवाक्यारूपेण विशेषविनियोगः पूर्वमेवोक्तः॥ हे इंद्रवायू भवदर्थमिमे सोमाः सुताः। अभिषुताः। तस्माद्युवां प्रयोभिरन्नैरस्मभ्यं दातव्यैः सहोपागतं। अस्मत्समीपं प्रत्यागच्छतं। हि यस्मादिंदवः सोमा वां युवामुशंति। कामयंते। तस्मादागमनमुचितं॥ इंद्रवायूशब्दस्यामंत्रिताद्युदात्तत्वं। प्रीणयंति भोक्तॄनिति प्रयांस्यन्नानि। प्रीञ्धातोरंतर्भावितण्यर्थात्। पा० ३. १. २६.। असुन्प्रत्यये सति नित्स्वरः। गमिधातोर्लोण्मध्यमपुरुषद्विवचने बहुलं छंदसि। पा० २. ४. ७३.। इति शपो लुकि सत्यनुदात्तोपदेशेत्यादिना। पा० ६. ४. ३७.। मकारलोपः। ततो गतमिति भवति। उंदी क्लेदन इति धातोरुंदेरिच्चादेः। उ० १. १२.। इत्युन्प्रत्ययः। आद्यक्षरस्येकारादेशः। तत इंदुशब्दस्य नित्स्वरः। सोमरसस्य द्रवत्वात्क्लेदनं संभवति। युष्मच्छब्दादेशस्य वामित्येतस्यानुदात्तं सर्वमपादादावित्यनुदात्तः। उशंतीत्यस्य निघाते हि च। पा० ८. १. ३४.। इति सूत्रेण प्रतिषिद्धे सति प्रत्ययस्वरः। हिशब्दस्य निपातस्वरः॥

द्वितीयामृचमाह॥

वायविंद्रश्च चेतथः सुतानां वाजिनीवसू। तावा यातमुप द्रवत्॥५॥

वायो इति। इंद्रः। च। चेतथः। सुतानां। वाजिनीवसू इति वाजिनीऽवसू। तौ। आ। यातं। उप। द्रवत्॥५॥

अत्र चकारेणान्यः समुच्चीयते। संनिहितत्वाद्वायुरेव। हे वायो त्वमिंद्रश्च युवामुभौ सुतानामभिषुतान्सोमान् चेतथः। जानीथः। यद्वा। अभिषुतानां सोमानां विशेषमित्यध्याहारः। कीदृशौ युवां। वाजिनीवसू। वाजिनीशब्दो यद्यप्युषोनामसु पठितस्तथाप्यत्रासंभवान्न गृह्यते। वाजोऽन्नं। तद्यस्यां हविःसंततावस्ति सा वाजिनी। तस्यां वसत इति तौ वाजिनीवसू। आमं-

चितत्वादनुदात्तः । तौ तथाविधौ युवां द्रवत्क्षिप्रमुप समीप आयातं । आगच्छतं । षड्विंशसंख्याकेषु क्षिप्रनामसु नु क्षिप्रं मक्षु द्रवदिति पठितं । तत्र फिट्स्वरः ॥

॥ इति प्रथमस्य प्रथमे तृतीयो वर्गः ॥

ऐंद्रवायवे तृचे तृतीयामृचमाह ॥

वायविंद्रश्च सुन्वत आ यातमुप निष्कृतं । मक्ष्वि१ त्था धिया नरा ॥ ६ ॥

वायो इति । इंद्रः । च । सुन्वतः । आ । यातं । उप । निःऽकृतं । मक्षु । इत्था । धिया । नरा ॥ ६ ॥

हे वायो त्वमिंद्रश्च सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य निष्कृतं संस्कृतं संस्कर्तारं वा सोममुपायातं । आगच्छतं । नरा हे नरौ पुरुषौ पौरुषेण सामर्थ्येनोपेतौ । युवयोरागतयोश्च सतोर्धियामुना कर्मणा मक्षु त्वरया संस्कारः संपत्स्यते । इत्था सत्यं ॥ वायो इत्यस्यामंत्रितस्येति षाष्ठिकमाद्युदात्तत्वं । इंद्रशब्द ऋज्रेंद्रेत्यादिना । उ० २. २९. । रन्प्रत्ययांतत्वेन निपातितो ञ्नित्यादिर्नित्यं । पा० ६. १. १९७. । इत्याद्युदात्तः । चशब्दश्चादयोऽनुदात्ताः । फि० ४. १५. । इत्यनुदात्तः । सुन्वत इत्यत्र शतुरनुमो नद्यजादी । पा० ६. १. १७३. । इति विभक्तेरुदात्तत्वं । निरित्येष समित्येतस्य स्थान इति यास्कः । कृतशब्द आदिकर्मणि कर्तरि क्तः । पा० ३. ४. ७१. । संस्कर्तुं प्रवृत्त इत्यर्थः । कुगतिप्रादयः । पा० २. २. १८. । इति समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वे प्राप्ते थाथघञ्क्ताजबित्रकाणां । पा० ६. २. १४४. । इत्यंतोदात्तः । गतिरनंतरः । पा० ६. २. ४९. । इति तु निस उदात्तत्वं न भवति । तद्धि कर्मणि क्ते विहितं । पा० ६. २. ४८. । निष्करोतीति निष्कृदिति क्विबंतव्याख्याने तु गतिकारकोपपदात्कृत् । पा० ६. २. १३९. । इत्यृकार उदात्तः स्यात् । धिया । सावेकाचस्तृतीयादिः । पा० ६. १. १६८. । इति विभक्तिरुदात्ता । नरा । सुपां सुलुगित्यादिना संबोधनद्विवचनस्य डादेशः । पदात्परत्वादामंत्रितस्येत्याष्टमिको निघातः ॥

मित्रं हुव इति मैत्रावरुणस्तृचो गवामयन आरंभणीये चतुर्विंशेऽहनि प्रातःसवने मैत्रावरुणस्य स्तोत्रियः । तत्रैवाभिप्लवषडहेऽपि विनियुक्तः । तथा चाश्वलायनेन चतुर्विंशे होताजनिष्टेत्यादिखंडे मित्रं वयं हवामहे मित्रं हुवे पूतदक्षं । आ० ७. २. । इत्यादि सूचितं । तथाहाभिप्लवपृष्ठ्याहानीति खंडे परिशिष्टानावापानुद्धृत्य मित्रं वयं हवामहे मित्रं हुवे पूतदक्षं । आ० ७. ५. । इति च । तस्य मैत्रावरुणतृचस्य प्रथमामृचमाह ॥

मित्रं हुवे पूतदक्षं वरुणं च रिशादसं । धियं घृताचीं साधंता ॥७॥

मित्रं । हुवे । पूतऽदक्षं । वरुणं । च । रिशादसं । धियं । घृताचीं । साधंता ॥७॥

अहमस्मिन्कर्मणि हविःप्रदानाय पूतदक्षं पवित्रबलं मित्रं हुवे । तथा रिशादसं रिशानां हिंसकानामदसमत्तारं वरुणं हुवे। आह्वयामि। कीदृशौ मित्रावरुणौ । घृतमुदकमंचति भूमिं प्रापयति या धीर्वर्षणकर्म तां घृताचीं धियं साधंता साधयंतौ कुर्वंतौ ॥ मित्रशब्दः पुल्लिंगः प्रातिपदिकस्वरेणांतोदात्तः । हुव इति ह्वयतेर्बहुलं छंदसीति शपो लुकि सति ह्वः संप्रसारणं । पा० ६. १. ३२. । इत्यनुवृत्तौ बहुलं छंदसीति संप्रसारण उवङादेशः । तिङ्ङतिङ इति निघातः । पूतशब्दः प्रत्ययस्वरेणांतोदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । वरुणशब्दः कृवृदारिभ्य उनन् । उ० ३. ५३. । इत्युनन्प्रत्ययांतो निल्वादाद्युदात्तः । रिशंति हिंसंतीति रिशाः शत्रवः । इगुपधज्ञाप्रीकिरः कः । पा० ३. १. १३५. । इति कः । प्रत्ययस्वरेणोदात्तः । तानत्तीति रिशादाः । तं । सर्वधातुभ्योऽसुन् । उ० ४. १९०. । इत्यसुन्प्रत्ययः । नित्स्वरेणोत्तरपदमाद्युदात्तं । कृदुत्तरपदप्रकृतिस्वरेण स एवावशिष्यते । शेषनिघाते सत्येकादेश उदात्तेनोदात्तः । पा० ८. २. ५. । इति सवर्णदीर्घोऽप्युदात्त एव । धीरित्यप इत्यादिषड्विंशतौ कर्मनामसु पठितः । प्रातिपदिकस्वरेणोदात्तः । घृतमंचतीति घृताची । ऋत्विग्दधृगित्यादिना । पा० ३. २. ५९. । क्विन्यनिदितां । पा० ६. ४. २४. । इति नकारलोपः । अंचतेश्चोपसंख्यानं । पा० ४. १. ६. २. । इति ङीप् । अचः । पा० ६. ४. १३८. । इत्यकारलोपे चौ । पा० ६. ३. १३८. । इति दीर्घत्वं । घृतशब्दो नब्विषयस्यानिसंतस्येत्याद्युदात्तं बाधित्वा घृतादीनां च । फि० १. २२. । इत्यंतोदात्तः । समासस्येत्यंतोदात्तस्यापवादकं तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरं बाधित्वा गतिकारकोपपदादित्युत्तरपदप्रकृतिस्वरेणोदात्तस्य धात्वकारस्य लोपे सत्यनुदात्तस्य च यत्रोदात्तलोपः । पा० ६. १. १६१. । इति ङीप उदात्तत्वे प्राप्ते चौ । पा० ६. १. २२२. । इति पूर्वपदांतोदात्तत्वं । साधंता । राध साध संसिद्धावित्यस्मादंतर्भावितण्यर्थाल्लटः शत्रादेशे । पा० ३. २. १२४. । श्नुं बाधित्वा व्यत्ययेन शप् । अदुपदेशत्वादुपरि शतृप्रत्ययस्य लसार्वधातुकानुदात्तत्वं । द्वितीयाद्विवचनस्य शपश्चानुदात्तौ सुप्पितावित्यनुदात्तत्वे धातोरिति धातुस्वर एव शिष्यते । सुपां सुलुगित्यादिना विभक्तेराकारादेशः ॥

द्वितीयामृचमाह ॥

ऋतेन॑ मि॒त्राव॑रुणावृतावृधावृतस्पृशा । क्रतुं॑ बृ॒हन्त॑माशाथे ॥ ८ ॥

ऋ॒तेन॑ । मि॒त्रा॒व॒रु॒णौ॒ । ऋ॒त॒ऽवृ॒धौ॒ । ऋ॒त॒ऽस्पृ॒शा॒ । क्रतु॑म् । बृ॒हन्त॑म् । आ॒शा॒थे॒ इति॑ ॥ ८ ॥

हे मित्रावरुणौ युवां क्रतुं प्रवर्तमानमिमं सोमयागमाशाथे । आनशाथे । व्याप्नवंतौ । केन निमित्तेन । ऋतेन । अवश्यंभावितया सत्येन फलेन । अस्मभ्यं फलं दातुमित्यर्थः । कीदृशौ युवां । ऋतावृधौ । ऋतमित्युदकनाम सत्यं वा यज्ञं वेति यास्कः । उदकादीनामन्यतमस्य वर्द्धयितारौ । अत एव ऋतस्पृशा । उदकादीन् स्पृशंतौ । कीदृशं क्रतुं । बृहंतं । अंगैरुपांगैश्चातिप्रौढं ॥ ऋतशब्दो घृतादित्वादंतोदात्तः । मित्रावरुणावित्यत्र मित्रश्च वरुणश्चेति मित्रावरुणौ । देवताद्वंद्वे च । पा० ६. ३. २६. । इति पूर्वपदस्यानङादेशः । ऋतस्य वर्द्धयितारावित्यर्थेऽतर्भावितण्यर्थाद्वृधेः क्विप् । अन्येषामपि दृश्यते । पा० ६. ३. १३७. । इति पूर्वपदस्य दीर्घः । ऋतस्पृशा । सुपां सुलुगिति डादेशः । मित्रावरुणावित्याद्यामंत्रितत्रयस्य स्वस्वपूर्वपदात्परत्वादामंत्रितस्येत्याष्टमिको निघातः । ननु ऋतेनेत्येतस्य सुबामंत्रिते परांगवत्स्वरे । पा० २. १. २. । इति परांगवद्भावेनामंत्रितानुप्रवेशात्पादादित्वेन पदात्परत्वेन वाष्टमिकनिघाताभावादामंत्रितस्य चेत्याद्युदात्तेन भवितव्यमिति चेत् । न । परांगवद्भावस्य सुबामंत्रिताश्रयत्वेन पदविधित्वात्समर्थः पदविधिः । पा० २. १. १. । इति नियमात् । इह च ऋतेन मित्रावरुणावित्यनयोराशाथे इत्याख्यातेनैवान्वयेन परस्परमसामर्थ्यात् । यत्र पुनः परस्परान्वयेन सामर्थ्यं तत्र परांगवद्भावात्पादादेराद्युदात्तत्वं भवत्येव । यथा मरुतां पितस्तदहं गृणामीति । मृग्रोरुतिः । उ० १. ९४. । इत्युतिप्रत्ययांतत्वेन पृश्न्यै वै पयसो मरुतो जाता इत्यादावंतोदात्तोऽपि हि मरुच्छब्दो मरुतां पितरित्यत्र सामर्थ्यात्परांगवद्भावादेवाद्युदात्तो जातः । प्रकृते त्वृतेनेत्यस्यासामर्थ्यादेव न परांगवद्भाव इति ॥ ऋतावृधावित्यत्र द्वितीयामंत्रितस्य निघाते कर्तव्य आमंत्रितं पूर्वमविद्यमानवत् । पा० ८. १. ७२. । इति प्रथमामंत्रितेनाविद्यमानवद्भवितव्यमिति चेत् । भवतु । अत एव तस्याव्यवधायकत्वादृतेनेति प्रथमपदात्परत्वेनैव द्वितीयामंत्रितं निहन्यते । यथा । इमं मे गंगे यमुन इत्यादौ गंगेशब्दस्याविद्यमानवद्भावेऽपि तस्याव्यवधायकत्वादेव म इत्येतदेव पदमुपजीव्य यमुनेशब्दस्य निघातः । किंच प्रकृते मित्रावरुणावित्यामंत्रितं सामान्यवचनं । तस्य विशेषणतया विशेषवच-

नमृतावृधाविति। अतो नामंत्रिते समानाधिकरणे सामान्यवचनं। पा॰ ८. १. ७३.। इति पूर्वस्याविद्यमानवद्भावप्रतिषेधादपि निरंतरायो द्वितीयस्य निघातः॥ नन्वेवमप्यपादादावित्यनुवृत्तेर्ऋतावृधेत्यस्य द्वितीयपादादित्वान्न भवितव्यं निघातेन। अत एव हीमं मे गंग इत्यत्र शुतुद्रिपदस्य पदात्परस्यामंत्रितस्यापि पादादित्वादेवानिघातादाद्युदात्तत्वं जातं। तद्वदत्रापि भवितव्यं वक्तव्यो वा विशेष इति। उच्यते। मित्रावरुणपदस्य सुबामंत्रित इति परांगवद्भावेन परानुप्रवेशादेव ऋतावृधेत्यस्य न पादादित्वं॥ शुतुद्रिपदमपि तर्ह्येवमेव पूर्वस्य सरस्वतिपदस्य परांगवद्भावेन न पादादिरिति निहन्येतेति चेत्। परांगवद्भावस्तावत्सुबंतमामंत्रितं चाश्रित्य प्रवृत्तः पदविधिः। अतस्तयोः सत्येव परस्परान्वये परांगवद्भावेन भवितव्यं। समर्थः पदविधिरिति नियमात्। शुतुद्रिसरस्वतिपदयोश्च न परस्परेणान्वयः। किंतु सचतेत्यनेनेत्यसामर्थ्यान्न परांगवद्भावः। प्रकृते तु मित्रावरुणावृतावृधाविति द्वयोरपि सामानाधिकरण्येन परस्परान्वयादस्ति सामर्थ्यमिति भवितव्यं परांगवद्भावेन। यथा मरुतां पितरित्यत्रेति विशेषः॥ नन्वत एव तर्हि मित्रावरुणपदस्य परांगवद्भावेन पादादित्वादपादादाविति पर्युदासादामंत्रितनिघातो न स्यादिति चेत्। न। पूर्वं सुबंतं परं चामंत्रितमाश्रित्य यः स्वरः प्रवर्तते तत्र सुबामंत्रित इति परांगवद्भावः। भवति चैवंविध ऋतावृधपदनिघात इति। तत्र पूर्वस्य परांगवद्भावेनापादादित्वात्स प्रवर्तते। मित्रावरुणपदनिघातस्तु पूर्वमेव पदमुपजीवति। न परमामंत्रितमिति न परांगवद्भावः॥ ननु परांगवद्भाववन्निघातोऽपि पदविधिरिति। ऋतेनेत्यनेनासमर्थ्यात्ततः पदात्परस्य मित्रावरुणपदस्य न स्यादिति चेत्। न। समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः। पा॰ २. १. १. ९.। इति निघाते पदविधावपि समानवाक्यत्वमेव पर्याप्तं न परांगवद्भाववत्परस्परान्वयोऽपीत्यलं। क्रतुं। कृञः क्रतुः। उ॰ १. ७७.। प्रत्ययस्वरेणादिरुदात्तः। आशाथे। आनशाथे। छंदसि लुङ्लङ्लिटः। पा॰ ३. ४. ६.। इति वर्तमाने लिट्। नुडभावश्छांदसः॥

तृतीयामृचमाह॥

कवी नो मित्रावरुणा तुविजाता उरुक्षया। दक्षं दधाते अपसं॥ ९॥

कवी इति। नः। मित्रावरुणा। तुविऽजातौ। उरुऽक्षया। दक्षं। दधाते इति। अपसं॥ ९॥

मित्रावरुणावेतौ देवौ नोऽस्माकं दक्षं बलमपसं कर्म च दधाते। पोषयतः। कीदृशौ। कवी। मेधाविनौ। तुविजातौ। बहूनामुपकारकतया समुत्पन्नौ। उरुक्षया। बहुनिवासौ॥ विप्रो धीर इत्यादिषु चतुर्विंशतिसंख्याकेषु मेधाविनामसु कविर्मनीषीति पठितं। उरु तुवीत्येतौ शब्दौ द्वादशसु बहुनामसु पठितौ। ओजः पाज इत्यादिष्वष्टाविंशतिसंख्याकेषु बलनामसु दक्षो विस्वितिं पठितं। अपस्शब्दः षड्विंशतिसंख्याकेषु कर्मनामसु पठितः। मित्रावरुणा। मित्रशब्दः प्रातिपदिकस्वरेणांतोदात्तः। वरुणशब्दो नित्स्वरेणाद्युदात्तः। द्वंद्वे देवताद्वंद्वे च। पा० ६. २. १४१.। इत्युभाववशिष्येते। तुविजातौ। बहूनामुपकारकतया तत्संबंधित्वेन जाताविति षष्ठीसमासे समासांतोदात्तत्वे। चतुर्थीसमासे हि क्ते च। पा० ६. २. ४५.। इति पूर्वपदप्रकृतिस्वरः स्यात्। उरूणां बहूनां क्षयावुरुक्षयौ। क्षि निवासगत्योरिति धातोः क्षियंत्यस्मिन्निति क्षयः। अधिकरणे एरच्। पा० ३. ३. ५६.। इत्यच्प्रत्ययांतस्य चित इत्यंतोदात्तत्वे प्राप्ते क्षयो निवासे। पा० ६. १. २०१.। इत्याद्युदात्तत्वं विहितं। समासे तु समासस्येत्यंतोदात्तत्वं बाधित्वा कृदुत्तरपदप्रकृतिस्वरेण प्राप्तमुत्तरपदाद्युदात्तत्वं यद्यपि थाथादिस्वरेणांतोदात्तेन बाध्यते तथापि परादिश्छंदसि बहुलं। पा० ६. २. १९९.। इत्युत्तरपदाद्युदात्तत्वं द्रष्टव्यं। दक्षो दक्षतेरुत्साहकर्मणो घञ्। ञित्वादाद्युदात्तः। आप्यते फलमनेनेत्यपः कर्म। आपः कर्माख्यायां ह्रस्वो नुट् च। उ० ४. १०९.। इत्यसुन्नंतस्यापसस्पारे इत्यादौ नित्वादाद्युदात्तस्याप्यपस्शब्दस्यात्र व्यत्ययेन प्रत्ययाद्युदात्तत्वं॥

॥ इति प्रथमस्य प्रथमे चतुर्थो वर्गः ॥

आश्विनस्तृचः प्रातरनुवाकस्याश्विने क्रतौ विनियुक्तः। तथा च सूचितं। अथाश्विन एषो उषाः प्रातर्युजेति चतस्रोऽश्विना यज्वरीरिषः। आ० ४. १५.। इति। तत्र प्रथमामृचमाह॥

अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती। पुरुभुजा चनस्यतं॥ १॥

अश्विना। यज्वरीः। इषः। द्रवत्पाणी इति द्रवत्ऽपाणी। शुभः। पती इति। पुरुऽभुजा। चनस्यतं॥ १॥

हे अश्विनौ युवामिषो हविर्लक्षणान्यन्नानि चनस्यतं। इच्छतं। भुंजाथामित्यर्थः। यद्यपि चनःशब्दोऽन्नवाची तथापीष इत्यनेन सह नास्ति पुनरुक्तिदोषः।

इच्छामुपलक्षयितुं प्रयुक्तत्वात्। वक्तव्यमुवाच। समूलकाषं कषतीत्यादौ यथा पुनरुक्त्यभावस्तद्वत्। कीदृशीरिषः। यज्वरीः। यागनिष्पादिकाः। कीदृशावश्विनौ। द्रवत्पाणी। हविर्ग्रहणाय द्रवद्भ्यां धावद्भ्यां पाणिभ्यामुपेतौ। शुभस्पती। शोभनस्य कर्मणः पालकौ। पुरुभुजा। विस्तीर्णभुजौ बहुभोजिनौ वा॥ अश्विना। आमंत्रितस्येति षाष्ठिकमाद्युदात्तत्वं। यज्वरीः। यागकरणानामयज्वानामसिञ्छिनत्तीतिवत् स्वव्यापारे कर्तृत्वविवक्षया सुयजोर्ङ्वनिप्। पा॰ ३. २. १०३.। इति ङ्वनिप्प्रत्ययः। वनो र च। पा॰ ४. १. ७.। इति ङीप्। तत्संनियोगेन रेफादेशः। प्रत्ययत्रयस्यानुदात्तौ सुप्पितावित्यनुदात्तत्वाद्धातुस्वर एवावशिष्यते। इषःशब्दे शसोऽनुदात्तत्वात्प्रातिपदिकस्वर एव शिष्यते। द्रवंतौ धावंतौ पाणी ययोस्तयोः संबोधनं द्रवत्पाणी इति। तस्यामंत्रिताद्युदात्तत्वं न पुनराष्टमिको निघातोऽपादादाविति प्रतिषेधात्। इष इति पूर्वपदस्य सुबामंत्रित इति परांगवद्भावेन मित्रावरुणावृतावृधावितिवदपादादित्वमिति चेत्। न। तत्र सामानाधिकरण्येन परस्परान्वयात्। इह त्विषो द्रवत्पाणी इत्यनयोः सरस्वतिशुतुद्रिपदवदसामर्थ्येन प्रयुक्तत्वात्। शुभ इति शुभ शुंभ दीप्तावित्यस्य संपदादित्वाद्भावे क्विंतस्य षष्ठ्येकवचनं। षष्ठ्याः पतिपुत्र। पा॰ ८. ३. ५३.। इति विसर्जनीयस्य सत्वं। तस्य पती इत्यामंत्रिते परतः परांगवद्भावादामंत्रिताद्युदात्तत्वं। न पुनराष्टमिको निघातः। तस्मिन्कर्तव्ये द्रवत्पाणी इति पूर्वस्यामंत्रितस्यामंत्रितं पूर्वमविद्यमानवदित्यविद्यमानवद्भावेन पादादित्वादपादादाविति प्रतिषेधात्॥ ननु मित्रावरुणावृतावृधावितिवन्नामंत्रिते समानाधिकरण इत्यविद्यमानवद्भावप्रतिषेधेन भवितव्यमिति चेत्। न। मित्रावरुणपदं हि सामान्यवचनमिति युक्तस्तस्याविद्यमानवत्त्वप्रतिषेधः। द्रवत्पाणीपदं तु न तथेति वैषम्यात्। पुरुभुजौ। पुरू विस्तीर्णौ भुजौ ययोस्तौ। आमंत्रिताद्युदात्तत्वं। सुपां सुलुगिति डादेशः। पुरु बहु भुंजाते इति वा। चनस्यतमित्यत्र चायतेरन्ने ह्रस्वश्च। उ॰ ४. २०१.। इति चायृ पूजानिशामनयोरित्यस्यासुन्प्रत्यय आकारस्य ह्रस्वे चानुकृष्टे नुडागमे च। उ॰ ४. १९८.। लोपो व्योर्वलि। पा॰ ६. १. ६६.। इति यकारलोपे चनस्शब्दोऽन्ननामसु पठितः। तदात्मन इच्छतीति सुप आत्मनः क्यच्। पा॰ ३. १. ८.। सनाद्यंताः। पा॰ ३. १. ३२.। इति धातुत्वाल्लोण्मध्यमद्विवचनं। क्यचः प्रत्ययस्वरेणोदात्तत्वं। शपैकादेशे कृत एकादेश उदात्तेनोदात्तः। पा॰ ८. २. ५.। इत्युदात्तः। उपर्याख्यातस्य लसार्वधातुकानुदात्तत्वे

स्वरितत्वं। न च तिङ्ङतिङ इति निघातः। पूर्वस्यामंत्रितस्याविद्यमानवद्भावेन पदादपरत्वात्पादादित्वाद्वा तदप्राप्तेः ॥

द्वितीयामृचमाह ॥

अश्विना पुरुदंससा नरा शवीरया धिया। धिष्ण्या वनतं गिरः ॥ २ ॥

अश्विना। पुरुऽदंससा। नरा। शवीरया। धिया। धिष्ण्या। वनतं। गिरः ॥ २ ॥

अश्विना हे अश्विनौ युवां गिरोऽस्मदीयाः स्तुतीर्धियादरयुक्तया बुध्या वनतं। संभजतं। स्वीकुरुतं। कीदृशावश्विनौ। पुरुदंससा। बहुकर्माणौ। षड्विंशतिसंख्याकेषु कर्मनामसु दंस इति पठितं। नरा। नेतारौ। धिष्ण्या धार्ष्ट्ययुक्तौ बुद्धिमंतौ वा। कीदृश्या धिया। शवीरया। गतियुक्तया। अप्रतिहतप्रसरयेत्यर्थः ॥ अश्विनेत्याद्यामंत्रितचतुष्टयस्य षाष्ठिकमामंत्रिताद्युदात्तत्वं। पादादित्वान्नाष्टमिको निघातः। पुरुदंससेत्यपि हि पादादिरेवामंत्रितं पूर्वमविद्यमानवदिति पूर्वस्याविद्यमानवत्त्वात्। नामंत्रिते समानाधिकरण इति पूर्वस्य सामान्यवचनत्वेनास्य विशेषवचनत्वेन नाविद्यमानवत्त्वमिति चेत्। न। अश्विशब्दवत्पुरुदंससः शब्दस्याप्यश्विनोरेव रूढ्या प्रयुज्यमानतया सामान्यशब्दत्वात्। सामान्यवचनं नाविद्यमानवदित्युक्तेऽर्थात्परस्य विशेषवचनत्वावगमात् ॥ उभयोः सामान्यवचनत्वे पर्यायत्वेन पौनरुक्त्यात्सहाप्रयोग इति चेत्। न। गुणविशेषसंकीर्तनवत्प्रसिद्धानेकनामविशेषसंबंधसंकीर्तनस्यापि स्तुत्युपयोगेन सप्रयोजनत्वान्निःप्रयोजनपुनर्वचनस्यैव पुनरुक्तत्वात्। अश्विपुरुदंसःशब्दयोरेकार्थवृत्तित्वेऽपि पर्यायत्वादेव प्रवृत्तिनिमित्तभेदाभावेनासामानाधिकरण्यादपि नाविद्यमानवत्त्वप्रतिषेधः। भिन्नप्रवृत्तिनिमित्तानामेव ह्येकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यं ॥ अश्विशब्दस्याश्विसंबंधो निमित्तं पुरुदंसःशब्दस्य तु बहुकर्मसंबंध इति प्रवृत्तिनिमित्तभेद इति चेत्। न। तद्धि द्वयं व्युत्पत्तिमात्रनिमित्तं न प्रवृत्तिनिमित्तं। व्युत्पत्तिनिमित्तभेदमात्रेणापि सामानाधिकरण्याभिधाने वृक्षमहीरुहशब्दयोरपि तथात्वप्रसंगः। अत एव हीळे रंतेऽदिते सरस्वति प्रिये प्रेयसि महि विश्रुति। एतानि ते अघ्न्ये नामानीत्यत्र सहस्रतमीप्रशंसोपयोगित्वेनेडादिशब्दानामेतानि ते अघ्न्ये नामानीति वचनेन पर्यायाणामप्यनेकविशिष्टनामसंबंधनिबंधस्तुत्यर्थत्वेनैव सहप्रयोगः। स्तुत्युपयोगेनैव व्युत्पत्तिनिमित्तभेदविवक्षायामपि पर्यायत्वेनासामानाधिकरण्यादेव नामंत्रित इति निषेधाभावादामंत्रितं पूर्वमविद्य-

मानवदिति पूर्वपूर्वस्याविद्यमानवत्त्वात्सर्वेषां षाष्ठिकमाद्युदात्तत्वं । तत्रप्रकृतेऽपि । कॄगॄपॄकटिपटिशौटिभ्य ईरन् । पा० ४. ३०. । इत्यत ईरन्नित्यनुवृत्तौ बहुलवचनादन्यत्रापीत्यनेन शु श्रु गताविति धातोरीरन्प्रत्यये कृते सति नित्त्वाच्छवीरयाशब्द आद्युदात्तः । धियेत्यत्र सावेकाच इति विभक्तिरुदात्ता । वनतमित्यत्र शपः पित्त्वाल्लोण्मध्यमद्विवचनस्य लसार्वधातुकत्वाच्च वन षण संभक्ताविति धातूदात्तत्वमेव शिष्यते । न च तिङ्ङतिङ इति निघातः पूर्वामंत्रितस्याविद्यमानत्वेन पादादित्वात् । गिरः । सुपोऽनुदात्तत्वे प्रातिपदिकस्वरः शिष्यते ॥

तृतीयामृचमाह ॥

दस्रा॑ यु॒वाक॑वः सु॒ता नास॑त्या वृ॒क्तब॑र्हिषः । आ या॑तं रुद्रवर्तनी ॥ ३ ॥

दस्रा॑ । यु॒वाक॑वः । सु॒ताः । नास॑त्या । वृ॒क्तऽब॑र्हिषः । आ । या॒तं॒ । रु॒द्र॒व॒र्त॒नी॒ इति॑ रु॒द्र॒ऽव॒र्त॒नी ॥ ३ ॥

अत्राश्विनेत्यनुवर्तते । हे अश्विनावायातमस्मिन्कर्मण्यागच्छतं । किमर्थमिति तदुच्यते । सुता युष्मदर्थं सोमा अभिषुताः । तान् स्वीकर्तुमिति शेषः । कीदृशावश्विनौ । दस्रा । शत्रूणामुपक्षयितारौ । यद्वा देववैद्यत्वेन रोगाणामुपक्षयितारौ । अश्विनौ वै देवानां भिषजाविति श्रुतेः । नासत्या । असत्यमनृतभाषणं । तद्रहितौ । अत्र यास्कः । सत्यावेव नासत्यावित्यौर्णवाभः । सत्यस्य प्रणेतारावित्याग्रायण इति । रुद्रवर्तनी । रुद्रशब्दस्य रोदनं प्रवृत्तिनिमित्तं । यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति तैत्तिरीयाः । तद्यद्रोदयंति तस्माद्रुद्रा इति वाजसनेयिनः । रुद्राणां शत्रुरोदनकारिणां शूरभटानां वर्तनिर्मार्गो धाटीरूपो ययोस्तौ रुद्रवर्तनी । यथा शूरा धाटीमुखेन शत्रून् रोदयंति तद्वदेतावित्यर्थः । युवाकव इत्यभिषुतसोमानां विशेषणं । वसतीवरीभिरेकधनाभिश्चाद्भिर्मिश्रिता इत्यर्थः । वृक्तबर्हिषः । वृक्तानि मूलैर्वर्जितानि बर्हींष्यास्तरणरूपाणि येषां सोमानां ते वृक्तबर्हिषः । यद्वा भरता इत्यादिष्वष्टस्वृत्विङ्नामसु वृक्तबर्हिष इति । तदानीं तृतीयार्थे प्रथमा । ऋत्विग्भिरभिषुता इत्यन्वयः ॥ दस्रा । आमंत्रितस्येत्याद्युदात्तः । युवाकवः । यु मिश्रणे । युवंति मिश्रीभवंति वसतीवरीप्रभृतिभिः श्रयणद्रव्यैरिति युवाकवः । कटिकुषादिष्वगणितस्यापि यौतेर्बहुलग्रहणात् । उ० ३. ७६. । काकुप्रत्ययः । तस्य कित्त्वेन गुणाभावादुवङादेशः । प्रत्ययस्वरेणाकार उदात्तः । न विद्यतेऽसत्यमनयोरिति नासत्यौ । नभ्राण्नपान्नवेदानासत्येत्यादिना । पा० ६. ३. ७५. ।

प्रकृतिवद्भावान्नञो नलोपाभावः। पादादित्वेन निघाताभावादामंत्रिताद्युदात्तत्वं। वृक्तबर्हिषः। वृक्तं मूलैर्वर्जितं बर्हिरास्तीर्णं येषां सोमानां ते वृक्तबर्हिषः। पूर्वपदप्रकृतिस्वरेण क्तप्रत्ययस्वर एव शिष्यते। आ इत्यत्रोपसर्गश्चाभिवर्जे। फि॰ ४. १२.। इत्युदात्तः। रुद्रवर्तनी। आमंत्रितस्य चेत्यामंत्रितनिघातः ॥

ऐंद्रे तृचे प्रथमामृचमाह ॥

इंद्रा याहि चित्रभानो सुता इमे त्वायवः। अण्वीभिस्तना पूतासः ॥ ४ ॥

इंद्र। आ। याहि। चित्रभानो इति चित्रऽभानो। सुताः। इमे। त्वाऽयवः। अण्वीभिः। तना। पूतासः ॥ ४ ॥

चित्रभानो चित्रदीप्ते हे इंद्रास्मिन्कर्मण्यायाहि। आगच्छ। सुता अभिषुता इमे सोमास्त्वायवस्त्वां कामयमाना वर्तंते। अण्वीभिः। अग्रुव इत्यादिषु द्वाविंशतिसंख्याकेष्वंगुलिनामस्वण्व्य इति पठितं। ऋत्विजामंगुलिभिः सुता इत्यन्वयः। किंच। एते सोमास्तना नित्यं पूतासः पूताः शुद्धा दशापवित्रेण शोधितत्वात् ॥ इंद्रशब्दं यास्को बहुधा निर्वक्ति। नि॰ १०. ८.। इंद्र इरां दृणातीति वेरां ददातीति वेरां दधातीति वेरां दारयतीति वेरां धारयतीति वेंदवे द्रवतीति वेंदौ रमत इति वेंद्धे भूतानीति वा तद्यदेनं प्राणैः समैंधंस्तदिंद्रस्येंद्रत्वमिति विज्ञायत इदंकरणादित्याग्रायण इदंदर्शनादित्यौपमन्यव इंदतेर्वैश्वर्यकर्मण इंदञ्छत्रूणां दारयिता वा द्रावयिता वादारयिता च यज्वनामिति। अस्यायमर्थः। दृ विदारण इति धातुः। इरामन्नमुद्दिश्य तन्निष्पादकजलसिद्ध्यर्थं दृणाति मेघं विदीर्णं करोतीतींद्रः। डुदाञ् दान इति धातुः। इरामन्नं वृष्टिनिष्पादनेन ददातीतींद्रः। धाञ् पोषणार्थः। इरामन्नं तृप्तिकारणं सस्यं दधाति जलप्रदानेन पुष्णातीतींद्रः। इरामुत्पादयितुं कर्षकमुखेन भूमिं विदारयतीतींद्रः। पूर्वोक्तपोषणमुखेनेरां धारयति विनाशराहित्येन स्थापयतीतींद्रः। इंदुः सोमो वल्लीरसः। तदर्थं यागभूमौ द्रवति धावतीतींद्रः। इंदौ यथोक्ते सोमे रमते क्रीडतीतींद्रः। ञि इंधी दीप्ताविति धातुः। भूतानि प्राणिदेहानिंद्धे जीवचैतन्यरूपेणांतः प्रविश्य दीपयतीतींद्रः। एतदेवाभिप्रेत्य वाजसनेयिन आमनंति। इंधो ह वै नामैष योऽयं दक्षिणेक्षन्पुरुषः। तं वा एतमिंधं संतमिंद्र इत्याचक्षते। परोक्षेण परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विष इति। तद्यदित्यादिकं ब्राह्मणांतरवाक्यं। तत्रेंद्रविषये निर्वचनमुच्यत इति शेषः। यद्यस्मात्कारणादेनं परमात्मरूपमिंद्रं देवं प्राणैर्वाक्चक्षुरा-

दीद्रियैः प्राणापानादिवायुभिश्च सहितं समैधन्। उपासका ध्यानेन सम्यक् प्रकाशितवंतः। तत्तस्मात्कारणादिंद्रनाम संपन्नं। अस्मिन्पक्ष इध्यते दीप्यत इति कर्मणि व्युत्पत्तिः। आग्रायणनामको मुनिरिदंकरणादिंद्र इति निर्वचनं मन्यते। इंद्रो हि परमात्मरूपेणेदं जगत्करोति। औपमन्यवनामको मुनिरिदंदर्शनादिंद्र इति निर्वचनमाह। इदमित्यापरोक्ष्यमुच्यते। विवेकेन हि परमात्मानमापरोक्ष्येण पश्यति। एतदेवाभिप्रेत्यारण्यकांडे समाम्नायते। स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमितीऽ३। तस्मादिदंद्रो नामेदंद्रो ह वै नाम तमिदंद्रं संतमिंद्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवा इति। इदि परमैश्वर्ये इति धातुः। स्वमायया जगद्रूपत्वं परमैश्वर्यं। तद्योगादिंद्रः। अनेनाभिप्रायेण श्रूयते। इंद्रो मायाभिः पुरुरूप इति। इनशब्दस्येश्वरवाचकस्याकारलोपे सति नकारांतमिन्निति पदं भवति। दॄ भय इति धातुः। स च परमेश्वरः शत्रूणां दारयिता भीषयितेतींद्रः। द्रु गताविति धातुः। शत्रूणां द्रावयिता पलायनं प्रापयितेतींद्रः। यज्वनां यागानुष्ठायिनामादरयिता भयस्य परिहर्ता। एवमेतानि निर्वचनानि द्रष्टव्यानीति॥ इंद्रेत्यत्रामंत्रिताद्युदात्तत्वं। आ इत्यत्र निपातत्वेनाद्युदात्तः। चित्रभानो। पदात्परत्वादामंत्रितनिघातः। त्वामिच्छंतीत्यर्थे युष्मच्छब्दात्सुप आत्मनः क्यच्। पा° ३. १. ८.। प्रत्ययोत्तरपदयोश्च। पा° ७. २. ९८.। इति मपर्यंतस्य त्वादेशः। क्याच्छंदसि। पा° ३. २. १७०.। इति क्यजंतादुप्रत्ययः। त्वत्यव इति प्राप्तौ युष्मदस्मदोरनादेशे। पा° ७. २. ८६.। इत्यविभक्तावपि हलादौ व्यत्ययेनात्वं। उकारः प्रत्ययस्वरेणाद्युदात्तः। अणुशब्दः सौक्ष्म्यवाचकस्तद्योगात्प्रकृतेऽंगुलीषु वर्तते। वोतो गुणवचनात्। पा° ४. १. ४४.। इति ङीषि प्राप्ते व्यत्ययेन ङीन्। नित्त्वादाद्युदात्तः। तना इत्ययं निपातो नित्यमित्यर्थे निपातत्वादाद्युदात्तः। पूतासः। आज्जसेरसुक्। पा° ७. १. ५०.। इत्यसुक्॥

द्वितीयामृचमाह॥

इंद्रा याहि धियेषितो विप्रजूतः सुतावतः। उप ब्रह्माणि वाघतः॥ ५॥

इंद्र। आ। याहि। धिया। इषितः। विप्रऽजूतः। सुतऽवतः। उप। ब्रह्माणि। वाघतः॥ ५॥

इंद्र त्वमायाह्यस्मिन्कर्मण्यागच्छ। किमर्थं। वाघत ऋत्विजो ब्रह्माणि वेदरूपाणि स्तोत्राण्युपैतुं। कीदृशस्त्वं। धियास्मदीयया प्रज्ञयेषितः प्राप्तः। अस्मद्भक्त्या

प्रेरित इत्यर्थः । विप्रजूतः । यथा यजमानभक्त्या प्रेरितस्तथान्यैरपि विप्रैर्मेधाविभिर्ऋत्विग्भिः प्रेरितः । कीदृशस्य वाघतः । सुतावतः । अभिषुतसोमयुक्तस्य ॥ केत इत्यादिष्वेकादशसु प्रज्ञानामसु धीरिति पठितं । चतुर्विंशतिसंख्याकेषु मेधाविनामसु विप्रो धीर इति पठितं । भरता इत्यादिष्वष्टस्वृत्विङ्नामसु वाघत इति पठितं । इषित इत्यत्रेष गतावित्यस्मान्निष्ठायामिडागमः । आगमा अनुदात्ताः । पा० ३. १. ३. १. । इतीटोऽनुदात्तत्वात् क्तस्वरः शिष्यते । विप्रजूतः । टुवप् बीजतंतुसंतान इति धातोर्ऋज्रेंद्राग्रवज्रविप्रेत्यादिना । उ० २. २९. । रन्प्रत्ययांतो विप्रशब्दो निपातितः । निपातनादुपधाया इकारो लघूपधगुणाभावश्च । नित्त्वादाद्युदात्तः । तैर्जूतः प्राप्तः । जू इति सौत्रो धातुर्गत्यर्थः । श्र्युकः किति । पा० ७. २. ११. । इतीट्प्रतिषेधः । तृतीया कर्मणि । पा० ६. २. ४८. । इति पूर्वपदप्रकृतिस्वरत्वं । सुतावतः । छांदसं दीर्घत्वं । मतुपोऽनुदात्तत्वात् क्तप्रत्ययस्वर एव शिष्यते । ब्रह्माणि । नब्विषयस्यानिसंतस्येत्याद्युदात्तः । वाघच्छब्द ऋत्विङ्नामसु पठितः । प्रातिपदिकस्वरः ॥

तृतीयामृचमाह ॥

इंद्रा याहि तूतुंजान उप ब्रह्मांणि हरिवः । सुते दंधिष्व नश्चनः ॥ ६ ॥

इंद्र । आ । याहि । तूतुंजानः । उपं । ब्रह्मांणि । हरिऽवः । सुते । दधिष्व । नः । चनः ॥ ६ ॥

हरिशब्द इंद्रसंबंधिनोरश्वयोर्नामधेयं । हरी इंद्रस्य रोहितोऽग्नेरिति तदीयाश्वनामत्वेन पठितत्वात् । हे हरिवः । अश्वयुक्तेंद्र त्वं ब्रह्माण्युपैतुमायाहि । कीदृशस्त्वं । तूतुजानः । त्वरमाणः । आगत्य चास्मिन्सुते सोमाभिषवयुक्ते कर्मणि नोऽस्मदीयं चनोऽन्नं हविर्लक्षणं दधिष्व । धारय । स्वीकुर्वित्यर्थः ॥ तूतुजानः । तुजेर्लिटि लिटः कानज्वा । पा० ३. २. १०६. । इति कानजादेशः । तुजादीनां दीर्घोऽभ्यासस्य । पा० ६. १. ७. । इत्यभ्यासस्य दीर्घत्वं । अभ्यस्तानामादिः । पा० ६. १. १८९. । इत्याद्युदात्तत्वं । हरिव इत्यत्र हरयोऽस्य संतीति मतुपि छंदसीरः । पा० ८. २. १५. । इति मकारस्य वत्वं । संबुद्धावुगिदचां । पा० ७. १. ७०. । इति नुम् । संयोगांतलोपः । पा० ८. २. २३. । नकारस्य मतुवसो रुः संबुद्धौ छंदसि । पा० ८. ३. १. । इति रुत्वं । आष्टमिको निघातः । ब्रह्माणीत्यस्य हरिव इत्यनेनासामर्थ्यात्समर्थः पदविधिरिति नियमात्सुबामंत्रितपरांगवद्भावाभावेनामंत्रितनिघाताभावादाद्युदात्तत्वे सत्युपेत्यकारस्य सन्नतरः । दधिष्वेत्यत्र दधातेर्लोटि

थास् । थासः से । पा० ३. ४. ८०. । सवाभ्यां वामौ । पा० ३. ४. ९१. । इत्येकारस्य वादेशः । छंदस्युभयथा । पा० ३. ४. ११७. । इति सार्वधातुकार्धधातुकसंज्ञयोः सत्योः सार्वधातुकत्वेन शपि । पा० ३. १. ६८. । तस्य श्लौ च द्विर्भावः । पा० ६. १. १०. । आर्धधातुकत्वेनेडागमश्च । पा० ७. २. ३५. । आतो लोप इटि च । पा० ६. ४. ६४. । इत्याकारलोपः । चनः । चायतेरन्ने ह्रस्वश्च । उ० ४. २०१. । इत्यसुन्नंतः । चकाराचुडागमे यलोपः ॥

॥ इति प्रथमस्य प्रथमे पंचमो वर्गः ॥

वैश्वदेवतृचे प्रथमामृचमाह ॥

ओमा॑सश्चर्षणीधृतो॒ विश्वे॑ देवास॒ आ ग॑त । दा॒श्वांसो॑ दा॒शुषः॑ सु॒तं ॥ ७ ॥

ओमा॑सः । च॒र्ष॒णि॒ऽधृ॒तः॒ । विश्वे॑ । दे॒वा॒सः॒ । आ । ग॒त॒ । दा॒श्वांसः॑ । दा॒शुषः॑ । सु॒तं ॥ ७ ॥

हे विश्वे देवास एतन्नामका देवविशेषाः । दाशुषो हविर्दत्तवतो यजमानस्य सुतमभिषुतं सोमं प्रत्यागत । आगच्छत । ते च देवा ओमासो रक्षकाः । चर्षणीधृतो मनुष्याणां धारकाः । दाश्वांसः फलस्य दातारः ॥ मनुष्या इत्यादिषु पंचविंशतिसंख्याकेषु मनुष्यनामसु चर्षणिशब्दः पठितः । अश्विनावित्यादिष्वेकत्रिंशत्संख्याकेषु देवविशेषनामसु विश्वे देवाः साध्या इति पठितं । एतामृचं यास्क एवं व्याख्यातवान् । अवितारो वावनीया वा मनुष्यधृतः सर्वे च देवा इहागच्छत दत्तवंतो दत्तवतः सुतमिति तदेतदेकमेव वैश्वदेवं गायत्रं तृचं दशतयीषु विद्यते यत्तु किंचिद्बहुदैवतं तद्वैश्वदेवानां स्थाने युज्यते यदेव विश्वलिंगमिति शाकपूणिः । नि० १२.४०. । इति । अत्र विश्वशब्दः सर्वशब्दपर्याय इति यास्कस्य मतं । देवविशेषस्यैवासाधारणं लिंगमिति शाकपूणेर्मतं । अवंतीत्योमासो देवाः । मन्निन्त्यनुवृत्तावविसिविसिशुषिभ्यः कित् । उ० १. १४२. । इति मन्प्रत्ययः । ज्वरत्वरस्रिव्यविमवामुपधायाश्च । पा० ६. ४. २०. । इत्यूट् । मनः कित्त्वेऽपि बाहुलकत्वाद्गुणः । आज्जसेरसुक् । पा० ७. १. ५०. । इति जसेरसुगागमः । आमंत्रिताद्युदात्तत्वं । चर्षणयो मनुष्यास्तान्वृष्टिदानादिना धारयंतीति चर्षणीधृतो देवाः । पूर्वस्यामंत्रितस्य सामान्यवचनस्य विभाषितं विशेषवचने बहुवचनं । पा० ८. १. ७४. । इत्यविद्यमानवत्त्वप्रतिषेधादपादादित्वेन निघातः । नन्वत एव विद्यमानवत्त्वात्सुबामंत्रित इति परांगवत्त्वेनैकपदीभावात्पदादपरत्वेन कथं निघात इति चेत् । न । वत्करणं स्वाश्रयमपि यथा स्यादिति वचनात्पदभेदप्रयुक्तस्य निघातस्या-

प्युपपत्तेः। एकपद्येऽप्याद्युदात्तत्वेऽनुदात्तं पदमेकवर्जमिति सुतरामेव निघातो भविष्यति॥ इत्यमेव तर्हि द्रवत्पाणी शुभस्पती इत्यत्रापि परांगवद्भावेनैकपद्यादुत्तरस्य शेषनिघातप्रसंग इति चेत्। न। तत्र परांगवद्भावस्य परेणामंत्रितं पूर्वमविद्यमानवदित्यविद्यमानवद्भावेन बाधितत्वात्। इह पुनर्विभाषितं विशेषवचने बहुवचनमित्यविद्यमानवत्त्वस्य निषेधात्। पूर्वस्याप्यामंत्रितस्य विद्यमानवत्त्वात्परांगवत्त्वं स्वीकृतमिति वैषम्यं। विश्वे। पादादित्वादाद्युदात्तः। गणदेवतावचनश्चात्र विश्वशब्दो न सर्वशब्दपर्याय इति विशेष्यपरतया सामान्यवचनत्वादोमास इत्यनेन न समानाधिकरण्यं। सामानाधिकरण्ये हि पूर्वस्य पादस्य परांगवद्भावे सति मित्रावरुणावृतावृधावित्यादाविवात्राप्यामंत्रिताद्युदात्तता न स्यात्। विश्वे इत्यस्य विशेषणं देवास इति। दीव्यंतीति देवाः प्रकाशवंतः। नन्ववयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसीति रूढ एवार्थो देवशब्दस्य ग्राह्यो न यौगिकः। यौगिकत्वे ह्यवयवार्थानुसंधानव्यवधानेन प्रतिपत्तिर्विलंबिता स्यात्। समुदायप्रसिद्धौ तु न विलंब इति चेत्। न। समुदायप्रसिद्धौ हि देवशब्दस्य सामान्यपरतया विशेषवचनत्वाभावाद्विभाषितं विशेषवचने बहुवचनमित्यनेनानिषिद्धत्वाद्विश्वे इत्यस्याविद्यमानवत्त्वेन शुभस्पती इति पदवद्देवा इत्यस्याप्याद्युदात्तत्वं स्यात्। स्वरानुसारेण च रूढित्यागेनापि देवशब्दस्य योगस्वीकारो युक्त एव। आगत। आगच्छत। बहुलं छंदसीति शपो लुकि सत्यनुदात्तोपदेशेत्यादिना मकारलोपः। आङः पदात्परत्वान्निघातः। दाश्वांसः। दाशृ दान इत्यस्य क्वसौ दाश्वान् साह्वान् मीढ्वांश्च। पा० ६. १. १२.। इति निपातनात्क्रादिनियमप्राप्त इडागमो द्विर्वचनं च। पा० ७. २. १३.। न भवति। प्रत्ययस्वरेण क्वसोरुदात्तत्वं। दाशुष इत्यत्र वसोः संप्रसारणं। पा० ६. ४. १३१.। इति संप्रसारणं। संप्रसारणाच्च। पा० ६. १. १०८.। इति पूर्वरूपत्वं। शासिवसिघसीनां च। पा० ८. ३. ६०.। इति षत्वं॥

द्वितीयामृचमाह॥

विश्वे॑ दे॒वासो॑ अ॒प्तुरः॑ सु॒तमा ग॑न्त॒ तूर्ण॑यः। उ॒स्रा इ॑व॒ स्वस॑राणि॥८॥

विश्वे॑। दे॒वासः॑। अ॒प्ऽतुरः॑। सु॒तं। आ। ग॒न्त॒। तूर्ण॑यः। उ॒स्राःऽइ॑व। स्वस॑राणि॥८॥

विश्वे देवास एतन्नामकागणरूपा देवविशेषाः सुतं सोममागंत। आगच्छंतु। कीदृशाः। अप्तुरः। तत्तत्काले वृष्टिप्रदा इत्यर्थः। तूर्णयः। त्वरायुक्ताः। यजमा-

नमनुग्रहीतुमालस्यरहिता इत्यर्थः । विश्वेषां देवानां सोमं प्रत्यागमन उस्रा इत्यादिर्दृष्टांतः । उस्राः सूर्यरश्मयः स्वसराण्यहानि प्रत्यालस्यरहिता यथा समागच्छंति तद्वत् । खेदय इत्यादिषु पंचदशसु रश्मिनामसूस्रा वसव इति पठितं । वस्तोरित्यादिषु द्वादशस्वहर्नामसु स्वसराणि घंसो घर्म इति पठितं । तच्च पदं यास्केन व्याख्यातं । स्वसराण्यहानि भवंति स्वयंसारीण्यपि वा स्वरादित्यो भवति स एतानि सारयति । उस्रा इव स्वसराणीत्यपि निगमो भवतीति ॥ देवासः । पचाद्यजंतश्चित्त्वादंतोदात्तः । पा॰ ३. १. १३४. । अप्तुरः । तुर त्वरणे ह्युविकरणी । तुतुरति त्वरयंतीत्यर्थे क्विप्चेति क्विप् । गतिकारकोपपदात्कृदित्युत्तरपदप्रकृतिस्वरत्वं । आगंत । आगच्छंत्वित्यर्थे व्यत्ययेन मध्यमपुरुषबहुवचनं । बहुलं छंदसीति शपो लुक् । तस्य तप्तनप्तनथनाश्च । पा॰ ७. १. ४५. । इति तबादेशेऽपित् । पा॰ १. २. ४. । इति प्रतिषेधादङित्त्वादनुनासिकलोपाभावः । तिङ्ङतिङ इति निघातः । जित्वरा संभ्रम इति धातोस्त्वरंत इति तूर्णयः । निरित्यनुवृत्तौ वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् । उ॰ ४. ५२. । इति नित् । नित्त्वादाद्युदात्तः । उस्रा इवेत्यत्रेवेन नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेति समासे पूर्वपदप्रकृतिस्वरत्वं नित्यं । सरतीति सरः सूर्यः । पचाद्यच् । स्वः सरो येषां तानि स्वसराण्यहानि । बहुव्रीहौ प्रकृत्या पूर्वपदमिति स्वशब्द आद्युदात्तः ॥

तृतीयामृचमाह ॥

विश्वे॑ दे॒वासो॑ अ॒स्रिध॒ एहि॑मायासो अ॒द्रुहः॑ । मेधं॑ जुषंत॒ वह्न॑यः ॥ ९ ॥

विश्वे॑ । दे॒वासः॑ । अ॒स्रिधः॑ । एहि॑ऽमायासः । अ॒द्रुहः॑ । मेधं॑ । जु॒षं॒त॒ । वह्न॑यः ॥ ९ ॥

विश्वे देवास एतन्नामका देवविशेषा मेधं हविर्यज्ञसंबद्धं जुषंत । सेवंतां । कीदृशाः । अस्रिधः । क्षयरहिताः शोषरहिता वा । एहिमायासः । सर्वतो व्याप्तप्रज्ञाः । यद्वा सौचीकमग्निमप्सु प्रविष्टमेहि मा यासीरिति यदवोचन् तदनुकरणहेतुकोऽयं विश्वेषां देवानां व्यपदेश एहिमायास इति । अद्रुहः । द्रोहरहिताः । वह्नयः । वोढारः । धनानां प्रापयितारः ॥ स्रिधेः क्षयार्थस्य शोषणार्थस्य वा संपदादिभ्यो भावे क्विपि नञा बहुव्रीहिः । पूर्वपदप्रकृतिस्वरं बाधित्वा नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । एहिमायासः । ईह चेष्टायां । आ समंतादीहत इत्येहिः । इन् । उ॰ ४. ११९. । इति सर्वधातुसाधारण इन्प्रत्ययो नित्त्वादाद्युदात्तः । एहिमाया

प्रज्ञा येषामिति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। अथवा। आङ उदात्तादुत्तरस्येहीति लोण्मध्यमैकवचनस्य तिङ्ङतिङ इति निघात एकादेश उदात्तेनोदात्त इत्येकार उदात्तः। एहीत्येतत्पदयुक्तं मा यासीरित्यत्र मायेत्यक्षरद्वयं येषां त एहिमायासः। पूर्वपदप्रकृतिस्वरः। अद्रुहः। द्रुह जिघांसायां। संपदादित्वाद्भावे क्विपि। पा० ३. ३. १०८. ९.। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। मेधं। मेधृ संगमे च। मेध्यते देवैः संगम्यत इति मेधं हविः। कर्मणि घञ्। ञित्त्वादाद्युदात्तः। जुषंत सेवंतामित्यर्थे छंदसि लुङ्लङ्लिटः। पा० ३. ४. ६.। इति धातुसंबंधे लङ्। यत उक्तरूपा विश्वे देवा अतो जुषंतेति द्रुहादिधात्वर्थैः संबंधात्। बहुलं छंदस्यमाङ्योगेऽपि। पा० ६. ४. ७५.। इत्यडागमाभावः। वह्नयः। निरित्यनुवृत्तौ वहिश्रीत्यादिना विहितस्य निप्रत्ययस्य नित्त्वादाद्युदात्तत्वं॥

सारस्वते तृचे या प्रथमा सान्वारंभणीयेष्टौ सरस्वत्याः पुरोनुवाक्या। तथा दर्शपूर्णमासावारप्स्यमान इत्यस्मिन्खंडे पावका नः सरस्वती पावीरवी कन्या चित्रायुः। आ० २. ८.। इति सूचितं। तामेतामृचमाह॥

पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः॥ १०॥

पावका। नः। सरस्वती। वाजेभिः। वाजिनीऽवती। यज्ञं। वष्टु। धियाऽवसुः॥ १०॥

सरस्वती देवी वाजेभिर्हविर्लक्षणैरन्नैर्निमित्तभूतैः। यद्वा यजमानेभ्यो दातव्यैरन्नैर्निमित्तभूतैर्नोऽस्मदीयं यज्ञं वष्टु। कामयतां। कामयित्वा च निर्वहत्वित्यर्थः। तथा चारण्यककांडे श्रुत्यैव व्याख्यातं। यज्ञं वष्ट्विति यदाह यज्ञं वहत्वित्येव तदाहेति। कीदृशी सरस्वती। पावका। शोधयित्री। वाजिनीवती। अन्नवत्क्रियावती। धियावसुः। कर्मप्राप्यधननिमित्तभूता। वाग्देवतायास्तथाविधं धननिमित्तत्वमारण्यककांडे श्रुत्या व्याख्यातं। यज्ञं वष्टु धियावसुरिति। वाग्वै धियावसुरिति। श्येनः सोम इत्यादिषु पंचत्रिंशत्संख्याकेषु देवताविशेषवाचिषु पदेषु सरमा सरस्वतीति पठितं। एतामृचं यास्क एवं व्याचष्टे। पावका नः सरस्वत्यन्नैरन्नवती यज्ञं वष्टु धियावसुः कर्मवसुः। नि० ११. २६.। इति॥ पवनं पावः शुद्धिस्तं कायतीति पावका। कै गै रै शब्दे। आतोऽनुपसर्गे कः। पा० ३. २. ३.। कृदुत्तरपदप्रकृतिस्वरत्वेनांतोदात्तत्वं। यद्वा। पुनातीत्यर्थे ण्वुलि प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुप। पा० ७. ३. ४४.। इतीत्वस्याभावोऽंतोदात्तत्वं च छांदसं द्रष्टव्यं। सरःशब्दः सर्तेरसुनंतत्वादाद्युदात्तः। मतुप्ङीपोः पित्त्वादनुदात्तत्वं। वाजेभिः। वाजशब्दो

वृषादित्वादाद्युदात्तः। स ह्यवृत्कृतत्वादाकृतिगणः। वाजोऽन्नमास्त्विति वाजिन्यः क्रियाः। अत इनिठनौ। पा० ५. २. ११५.। इतीनिप्रत्ययः। ताः क्रिया यस्याः संति सा सरस्वती वाजिनीवती। छंदसीर इति मतुपो वत्वं। मतुप्ङीपोः पित्त्वेनानुदात्तत्वादिनेः प्रत्ययाद्युदात्तत्वमेव शिष्यते। यज्ञं। यजयाचेत्यादिना। पा० ३. ३. ९०.। नङ्प्रत्ययस्वरेणांतोदात्तः। वष्टु। वश कांतौ। कांतिरभिलाषः। अदिप्रभृतिभ्यः शप इति शपो लुक्। निघातः। धियावसुः। धिया कर्मणा वसु यस्याः सकाशाद्भवति सा धियावसुः। सावेकाच इति विभक्तिरुदात्ता। बहुव्रीहौ प्रकृत्या पूर्वपदमिति विभक्तिस्वर एव शिष्यते। छांदसस्तृतीयाया अलुक्॥

द्वितीयामृचमाह॥

चोदयित्री सूनृतानां चेतंती सुमतीनां। यज्ञं दधे सरस्वती ॥ ११ ॥

चोदयित्री। सूनृतानां। चेतंती। सुऽमतीनां। यज्ञं। दधे। सरस्वती ॥ ११ ॥

या सरस्वती सेयमिमं यज्ञं दधे। धारितवती। कीदृशी। सूनृतानां प्रियाणां सत्यवाक्यानां चोदयित्री प्रेरयित्री। सुमतीनां शोभनबुद्धियुक्तानामनुष्ठातॄणां चेतंती। तदीयमनुष्ठेयं ज्ञापयंती॥ चोदयित्री। चुद प्रेरणे। ण्यंतात्तृच्। चित्त्वादंतोदात्तः। ऋन्नेभ्यो ङीप्। पा० ४. १. ५.। इति ङीप्। तस्योदात्तयणो हल्पूर्वात्। पा० ६. १. १७४.। इत्युदात्तत्वं। सूनृतानां। ऊन परिहाणे इत्यतः क्विप्चेति क्विपि सुतरामूनयत्यप्रियमिति सून् इति प्रियमुच्यते। तच्च तदृतं सत्यं चेति सूनृतं। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। चेतंती। चिति संज्ञाने। अत्र शपो ङीपश्च पित्त्वादनुदात्तत्वं। शतुश्चादुपदेशाल्लसार्वधातुकस्वरेणानुदात्तत्वं। धात्वंतस्वर एव शिष्यते। सुमतिशब्दस्य मतुपि ह्रस्वत्वान्नामन्यतरस्यां। पा० ६. १. १७७.। इति विभक्तेरुदात्तत्वं॥

तृतीयामृचमाह॥

महो अर्णः सरस्वती प्र चेतयति केतुना। धियो विश्वा वि राजति ॥ १२ ॥

महः। अर्णः। सरस्वती। प्र। चेतयति। केतुना। धियः। विश्वाः। वि। राजति ॥ १२ ॥

द्विविधा हि सरस्वती विग्रहवद्देवता नदीरूपा च। तत्र पूर्वाभ्यामृग्भ्यां विग्रहवती प्रतिपादिता। अनया तु नदीरूपा प्रतिपाद्यते। तादृशी सरस्वती केतुना कर्मणा प्रवाहरूपेण महो अर्णः प्रभूतमुदकं प्रचेतयति। प्रकर्षेण ज्ञाप-

यति । किंच । स्वकीयेन देवतारूपेण विश्वा धियः सर्वाण्यनुष्ठातृप्रज्ञानानि विराजति । विशेषेण दीपयति । अनुष्ठानविषयबुद्धीः सर्वदोत्पादयतीत्यर्थः । सरस्वत्या द्विरूपत्वं यास्को दर्शयति । तत्र सरस्वतीत्येतस्य नदीवद्देवतावच्च निगमा भवंतीति । एकशतसंख्याकेषूदकनामस्वर्णः क्षोद इति पठितं । एतामृचं यास्को व्याचष्टे । महदर्णः सरस्वती प्रचेतयति प्रज्ञापयति केतुना कर्मणा प्रज्ञया वेमानि च सर्वाणि प्रज्ञानान्यभिविराजति । नि॰. ११. २७. । इति । महो अर्णः । महदिति तकारस्य व्यत्ययेन सकारः । तस्य रुत्वोत्वगुणाः । प्रातिपदिकस्वरेणांतोदात्तः । एङः पदांतादति । पा॰ ६. १. १०९. । इति पूर्वरूपे प्राप्ते प्रकृत्यांतःपादमव्यपरे । पा॰ ६. १. ११५. । इति प्रकृतिभावः । अर्तेर्न्यर्णः । उदके नुट् च । उ॰ ४. १९८. । इत्यसुन्प्रत्ययो नुडागमश्च । केतुना । प्रातिपदिकस्वरेणांतोदात्तः । विश्वाः । विश्वशब्दः क्वन्प्रत्ययांत आद्युदात्तः ॥

॥ इति प्रथमस्य प्रथमे षष्ठो वर्गः ॥

॥ इति प्रथममंडले प्रथमोऽनुवाकः ॥

प्रथमे मंडले द्वितीयानुवाके चत्वारि सूक्तानि । तत्र सुरूपेत्यादिकं दशर्चं प्रथमं सूक्तं सुरूपकृत्नुं दशेत्यनुक्रांतत्वात् । पूर्ववन्मधुच्छंदसो गायत्रस्य चानुवृत्तेस्त एवर्षिच्छंदसी । इंद्रं पृच्छेति चतुर्थ्यामृचि लिंगदर्शनादिंद्रो देवता । अभिप्लवषडहे ब्राह्मणाच्छंसिनः प्रातःसवने स्तोमवृद्धावावापार्थानि सुरूपकृत्नुमूतय इत्यादीनि षट् सूक्तानि । सूचितं चाभिप्लवपृष्ठ्याहानीति खंडे ब्राह्मणाच्छंसिनः सुरूपकृत्नुमूतय इति षट् सूक्तानि । आ॰ ७. ५. । इति ॥ आद्यानि त्रीणि सूक्तानि महाव्रते निष्केवल्य औष्णिहतृचाशीतौ शस्तव्यानि । उक्तं च शौनकेन । सुरूपकृत्नुमूतय इति त्रीण्येंद्र सानसिं रयिमिति सूक्ते इति ॥ चतुर्विंशेऽहनि माध्यंदिने सवने ब्राह्मणाच्छंसिनः सुरूपकृत्नुमूतय इति वैकल्पिकः स्तोत्रियस्तृचः । होत्रकाणामिति खंडे मदे मदे हि नो ददिः सुरूपकृत्नुमूतये । आ॰ ७. ४. । इति सूचितत्वात् ॥ अग्निष्टोमे वैश्वदेवशस्त्रे सुरूपकृत्नुमूतय इति धाय्या । सुरूपकृत्नुमूतये तक्षन्नृथमिति सूचितत्वात् । तामेतां सूक्तगतां प्रथमामृचमाह ॥

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे । जुहूमसि द्यविद्यवि ॥ १ ॥

सुरूपऽकृत्नुं । ऊतये । सुदुघांऽइव । गोऽदुहे । जुहूमसि । द्यविऽद्यवि ॥ १ ॥

सुरूपकृत्नुं शोभनरूपोपेतस्य कर्मणः कर्तारमिंद्रमूतयेऽस्मद्रक्षार्थं द्यवि द्यवि

प्रतिदिनं जुहूमसि। आह्वयामः। आह्वाने दृष्टांतः। गोदुहे गोधुगर्थं सुदुघामिव सुष्ठु दोग्ध्रीं गामिव। यथा लोके गोर्यो दोग्धा तदर्थं तस्याभिमुख्येन दोहनीयां गामाह्वयति तद्वत्। वस्तोरित्यादिषु द्वादशस्वहर्नामसु द्यवि द्यवीति पठितं॥ सुरूपकृत्नुं। करोतीति कृत्नुः। कृहनिभ्यां क्नुः। उ० ३. ३०। कित्वाद्गुणाभावः। तकारोपजनश्छांदसः। समासांतोदात्तः। ऊतये। अवतेर्धातोरुदात्त इत्यनुवृत्तावूतियूतिजूतिसातिहेतिकीर्तयश्च। पा० ३. ३. ९७। इति क्तिनुदात्तो निपातितः। सुदुघां। सुष्ठु दुग्ध इति सुदुघा। दुहः कब्घश्च। पा० ३. २. ७०। इति कप्प्रत्ययो हकारस्य च घकारः। कित्वाद्गुणाभावः। कपः पित्वादनुदात्तत्वे धातुस्वरेणोकार उदात्तः। सुशब्देन गतिसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन स एव स्वरः। इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेतीवसमासे स एव। गां दोग्धीति गोधुक्। सत्सूद्विषेत्यादिना। पा० ३. २. ६१। क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं। जुहूमसि। ह्वयतेर्लट्युत्तमपुरुषबहुवचने बहुलं छंदसीति शपः श्लुः। पा० २. ४. ७६। अभ्यस्तस्य च। पा० ६. १. ३३। इत्यभ्यस्तकारणस्य ह्वयतेः प्रागेव द्विर्वचनात्संप्रसारणं। संप्रसारणाच्च। पा० ६. १. १०८। इति परपूर्वत्वं। हलः। पा० ६. ४. २। इति दीर्घः। ततः श्लाविति द्विर्वचनं। अभ्यासस्य ह्रस्वः। पा० ७. ४. ५९। चुत्वजश्त्वे। पा० ७. ४. ६२. ८. ४. ५४। इदंतो मसिः। पा० ७. १. ४६। इतीकारागमः। प्रत्ययस्वरेण मकारस्योदात्तत्वं। द्यवि द्यवि। द्योशब्दः प्रातिपदिकस्वरेणांतोदात्तः। नित्यवीप्सयोः। पा० ८. १. ४। इति द्विर्भावः। तस्य परमाम्रेडितं। पा० ८. १. २। अनुदात्तं च। पा० ८. १. ३। इति द्वितीयस्यानुदात्तत्वं॥

द्वितीयामृचमाह॥

उप नः सवना गहि सोमस्य सोमपाः पिब। गोदा इद्रेवतो मदः॥ २॥

उप। नः। सवना। आ। गहि। सोमस्य। सोमऽपाः। पिब। गोऽदाः। इत्। रेवतः। मदः॥ २॥

हे सोमपाः सोमस्य पातरिंद्र सोमं पातुं नोऽस्मदीयानि सवना त्रीणि सवनानि प्रत्युप समीप आगहि। आगच्छ। आगत्य च सोमस्य सोमं पिब। रेवतो धनवतस्तव मदो हर्षो गोदा इत्। गोप्रद एव। त्वयि हृष्टे सत्यस्माभिर्गावो लभ्यंत इत्यर्थः॥ उप। निपातत्वादाद्युदात्तः। सवना। सूयते सोम

एष्विति सवनानि। अधिकरणे ल्युट्। पा० ३. ३. ११७.। सुपो डादेशष्टिलोपश्च। लितीति प्रत्ययात्पूर्वस्याकारस्योदात्तत्वं। गहि। गमेर्बहुलं छंदसीति शपो लुक्। हेर्ङित्त्वादनुदात्तोपदेशेत्यादिना। पा० ६. ४. ३७.। मकारलोपः। अतो हेः। पा० ६. ४. १०५.। इत्याभाच्छास्त्रीये लुकि कर्तव्येऽसिद्धवदत्रा भात्। पा० ६. ४. २२.। इत्याभाच्छास्त्रीयो मकारलोपोऽसिद्धवद्भवति। सोमपाः। आमंत्रितस्य चेति निघातः। तस्याविद्यमानवत्त्वेऽपि पूर्वापेक्षया तिङ्ङतिङ इति पिबेत्यस्य निघातः। न च पूर्वस्यापि परांगवद्भावेनाविद्यमानवत्त्वं। असामर्थ्येन तदभावात्। गां ददातीति गोदाः। क्विप्च। पा० ३. २. ७६.। इति क्विपं परमपि सरूपं बाधित्वा प्रतिपदविधित्वादातो मनिन्क्वनिब्वनिपश्च। पा० ३. २. ७४.। इति विच। क्विपि हि घुमास्थेत्यादिना। पा० ६. ४. ६६.। धातोराकारस्येत्वं स्यात्। रेवान्। रयिर्धनमस्यास्तीति मतुप्। ह्रस्वनुड्भ्यां मतुप्। पा० ६. १. १७६.। इति मतुबुदात्तः। छंदसीरः। पा० ८. २. १५.। इति वत्वं। रयेर्मतौ बहुलं छंदसि। पा० ६. १. ३७. २.। इति संप्रसारणपरपूर्वत्वे गुणश्च। मदः। मदोऽनुपसर्गे। पा० ३. ३. ६७.। इत्यप्। पित्त्वादनुदात्तः॥

तृतीयामृचमाह॥

अथा ते अंतमानां विद्याम सुमतीनां। मा नो अति ख्य आ गहि॥ ३॥

अथ। ते। अंतमानां। विद्याम। सुऽमतीनां। मा। नः। अति। ख्यः। आ। गहि॥ ३॥

अथ सोमपानानंतरं हे इंद्र ते तवांतमानामंतिकतमानामतिशयेन समीपवर्तिनां सुमतीनां शोभनमतियुक्तानां शोभनप्रज्ञानां पुरुषाणां मध्ये स्थित्वा विद्याम। वयं त्वां जानीयाम। यद्वा। सुमतीनां शोभनबुद्धीनां कर्मानुष्ठानविषयाणां लाभार्थमित्यध्याहारः। बुद्धिलाभाय त्वां स्मरेमेत्यर्थः। त्वमपि नोऽति मा ख्यः। अस्मानतिक्रम्यान्येषां त्वत्स्वरूपं मा प्रकथय। किंत्वागह्यस्मानेवागच्छ॥ अथेति निपात आद्युदात्तः। निपातस्य चेति दीर्घत्वं। अंतमानां। अतिशयेनांतिका इत्यतिशायने तमप्। पा० ५. ३. ५५.। तमे तादेश्च। पा० ६. ४. १४९. ५.। इति तादिलोपः। अंतोऽस्यास्तीत्यंतिकः समीपः। अत इनिठनाविति ठन्। नित्त्वादाद्युदात्तः। दूरोत्कर्षस्य ह्यवसानं नास्ति। सामीप्योत्कर्षस्य पुनर्यो यस्य समीपः स एव तस्यांत इत्यंतवत्त्वात्समीपमंतिकमुच्यते। विद्याम। वेत्तेर्लिङि यासुट् परस्मैपदेषूदात्तो ङिच्च। पा० ३. ४. १०३.। इति यासुडुदात्तः।

पादादित्वात्तिङ्ङतिङ इति न निघातः । सुमतीनां । मतिशब्दे क्तिनंतेऽपि मंत्रे वृषेषपचमनविदभूवीरा उदात्तः । पा० ३. ३. ९६. । इतीकार उदात्तः । शोभना मतिर्येषां ते सुमतय इति । बहुव्रीहौ पूर्वपदप्रकृतिस्वरापवादेन नञ्सुभ्यामित्युत्तरपदांतोदात्तः । शोभना मतयः सुमतय इति कर्मधारयेऽप्यव्ययपूर्वपदप्रकृतिस्वरापवादः । कृदुत्तरपदप्रकृतिस्वरेणांतोदात्ततैव । अतो मतुपि ह्रस्वादंतोदात्ताच्च सुमतिशब्दात्परस्य नामो नामन्यतरस्यामित्युदात्तत्वं । ख्यः । ख्या प्रथन इत्यस्य लुङि सिपस्यतिवक्तिख्यातिभ्योऽङ् । पा० ३. १. ५२. । इति च्लेरङादेशः । आतो लोप इटि च । पा० ६. ४. ६४. । इत्याकारलोपः । इतश्च । पा० ३. ४. १००. । इतीकारलोपो रुत्वविसर्गौ । न माङ्योगे । पा० ६. ४. ७४. । इत्यडभावः । गहि । गमेर्बहुलं छंदसीति शपो लुकि हेर्ङित्त्वादनुदात्तोपदेशेति मकारलोपस्यासिद्धवदत्राभादित्यसिद्धत्वादतो हेरिति लुक् न भवति ॥

चतुर्थीमृचमाह ॥

परेहि विग्रमस्तृतमिंद्रं पृच्छा विपश्चितं । यस्ते सखिभ्य आ वरं ॥ ४ ॥

परा । इहि । विग्रं । अस्तृतं । इंद्रं । पृच्छ । विपःऽचितं । यः । ते । सखिऽभ्यः । आ । वरं ॥ ४ ॥

अत्र यजमानं प्रति होता ब्रूते । हे यजमान त्वमिंद्रं परेहि । इंद्रस्य समीपे गच्छ । गत्वा च विपश्चितं मेधाविनं होतारं मां पृच्छ । असौ होता सम्यक् स्तुतवान्न वेत्येवं प्रश्नं कुरु । य इंद्रस्ते तव यजमानस्य सखिभ्य ऋत्विग्भ्यो वरं श्रेष्ठं धनं पुत्रादिकमा समंतात्प्रयच्छतीति शेषः । तादृशमिंद्रमिति पूर्वत्रान्वयः । पुनरपि कीदृशं । विग्रं । मेधाविनं । अस्तृतं । अहिंसितं । विप्र इत्यादिषु चतुर्विंशतिसंख्याकेषु मेधाविनामसु विग्रविपश्चिच्छब्दौ पठितौ ॥ विग्रं । वृषादित्वादाद्युदात्तः । अस्तृतं । अव्ययपूर्वपदप्रकृतिस्वरत्वं । इंद्रशब्द ऋज्रेंद्राग्रेत्यादिना रन् । नित्त्वादाद्युदात्तः । सखिभ्यः । समाने ख्यश्चोदात्तः । उ० ४. १३८. । इति समान उपपदे ख्यातेरिण् । डिदित्यनुवृत्तेस्तस्य डित्त्वाट्टिलोपश्च । पा० ६. ४. १४३. । तत्संनियोगेन यलोपः । उपपदस्योदात्तत्वं । समानस्य छंदस्यमूर्धप्रभृत्युदर्केषु । पा० ६. ३. ८४. । इति सभावः । अतः सखिशब्द आद्युदात्तः । व्रियत इति वरः । ग्रहवृदृनिश्चिगमश्च । पा० ३. ३. ५८. । इत्यप् । तस्य पित्त्वाद्धातुस्वर एव ॥

पंचमीमृचमाह ॥

उत ब्रुवंतु नो निदो निरन्यतश्चिदारत । दधाना इंद्र इद्दुवः ॥ ५ ॥

उत । ब्रुवंतु । नः । निदः । निः । अन्यतः । चित् । आरत । दधानाः । इंद्रे । इत् । दुवः ॥ ५ ॥

नोऽस्माकं संबंधिन ऋत्विज इति शेषः । ते ब्रुवंतु । इंद्रं स्तुवंतु । उत । अपि च हे निदो निंदितारः पुरुषा निरारत । इतो देशान्निर्गच्छत । अन्यतश्चित् । अन्यस्मादपि देशान्निर्गच्छत । कीदृशा ऋत्विजः । इंद्रे दुवः परिचर्यां दधानाः । कुर्वाणाः । इच्छब्दोऽवधारणे । सर्वदा परिचर्यां कुर्वंत एव तिष्ठंत्वित्यर्थः ॥ निंदंतीति निदः । निदि कुत्सायां । क्विपि नुमभावश्छांदसः । सुपोऽनुदात्तत्वाद्धातुस्वरः । आमंत्रितत्वेऽपि वाक्यांतरत्वेन स्ववाक्यगतपदादपरत्वान्न निघात इत्याद्युदात्तत्वमेव । अन्यतः । लितीति प्रत्ययपूर्वस्योदात्तत्वं । चिदित्यपिशब्दार्थे । तेन न केवलमितः । इतो निर्गत्यान्यतोऽपि निर्गच्छतेति गम्यते । स एष धात्वर्थयोः संबंध आरतेति लुङा द्योत्यते । स हि धातुसंबंधाधिकारे विधीयते । आरत । अर्तेश्छंदसि लुङ्लङ्लिट इति लोडर्थे लुङ् । मध्यमबहुवचनस्य तादेशः । सर्तिशास्त्यर्तिभ्यश्च । पा० ३. १. ५६. । इति च्लेरङादेशः । ऋदृशोऽङि गुणः । पा० ७. ४. १६. । इति गुणः । आडागमः । दधानाः । शानचश्चित्त्वात्प्राप्तमंतोदात्तं बाधित्वा परत्वादभ्यस्तानामादिरित्याद्युदात्तत्वं । दुवः परिचर्या । इरज्यतीत्यादिषु दुवस्यतीति पाठात् । नब्विषयस्यानिसंतस्येत्याद्युदात्तः ॥

॥ इति प्रथमस्य प्रथमे सप्तमो वर्गः ॥

सुरूपेतिसूक्ते षष्ठीमृचमाह ॥

उत नः सुभगाँ अरिर्वोचेयुर्दस्म कृष्टयः । स्यामेदिंद्रस्य शर्मणि ॥ ६ ॥

उत । नः । सुऽभगान् । अरिः । वोचेयुः । दस्म । कृष्टयः । स्याम । इत् । इंद्रस्य । शर्मणि ॥ ६ ॥

हे दस्म शत्रूणामुपक्षयितरिंद्र त्वदनुग्रहादरिरुत शत्रवोऽपि नोऽस्मान् सुभगान् शोभनधनोपेतान्वोचेयुः । उच्यासुः । कृष्टयो मनुष्या अस्मिन्मित्रभूता वदंतीति किमु वक्तव्यमिति शेषः । ततो धनसंपन्ना वयमिंद्रस्य शर्मणीद्रप्रसादलब्धे सुखे स्यामेत् । भवेमैव । मघमित्यादिष्वष्टाविंशतिसंख्याकेषु धननामसु रयिः क्षत्रं भग इति पठितं । मनुष्या इत्यादिषु पंचविंशतिसंख्याकेषु मनुष्य-

नामसु कृष्टय इति पठितं ॥ उत । एवमादीनामंतः । फि॰ ४. १३.। इत्यंतोदात्तः । सुभगान् । भगशब्दस्य क्रत्वादिषु पाठान्नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं बाधित्वा क्रत्वादयश्च । पा॰ ६. २. ११८.। इत्युत्तरपदाद्युदात्तत्वं । संहितायां दीर्घादटि समानपादे । पा॰ ८. ३. ६.। इति नकारस्य रुत्वं । भोभगो । पा॰ ८. ३. १७.। इति यत्वं । लोपः शाकल्यस्य । पा॰ ८. ३. १९.। इति यलोपः । तस्यासिद्धवत्त्वान्न पुनः संधिकार्यं । आतोऽटि नित्यं । पा॰ ८. ३. ३.। इत्याकारस्य सानुनासिकता । अरिः । वचनव्यत्ययः । अच इः । उ॰ ४. १४०.। इतीप्रत्ययांतः । प्रत्ययस्वरेणांतोदात्तः । वोचेयुः । उच्यासुः । वच परिभाषणे इत्यस्मादाशीर्लिङि झेर्जुसादेशे । पा॰ ३. ४. १०८.। लिङ्याशिष्यङ् । पा॰ ३. १. ८६.। इत्यङ्प्रत्यये वच उम् । पा॰ ७. ४. २०.। इत्युमागमः । गुणः । किदाशिषि । पा॰ ३. ४. १०४.। इति यासुट् । छंदस्युभयथा । पा॰ ३. ४. ११७.। इति लिङादेशस्य सार्वधातुकत्वाल्लिङः सलोपोऽनंत्यस्य । पा॰ ७. २. ७९.। इति सकारलोपः । अतो येयः । पा॰ ७. २. ८०.। आद्गुणः । पा॰ ६. १. ८७.। अङोऽदुपदेशत्वाल्लसार्वधातुकस्वरेण लिङोऽनुदात्तत्वं । अङ्प्रत्ययस्वर एव शिष्यते । तेन सहैकारस्य गुण एकादेश उदात्तेनोदात्त इत्युदात्तः । दस्म । दसु उपक्षय इत्यस्मादंतर्भावितण्यर्थादिषियुधीधिदसिश्याधूसूभ्यो मक् । उ॰ १. १४३.। पदात्परत्वादामंत्रितनिघातः । कृष्टयः । क्तिच्क्तौ च संज्ञायां । पा॰ ३. ३. १७४.। इति क्तिचि मनुष्यनामत्वाच्चित इत्यंतोदात्तः । स्याम । अस भुवि । श्नसोरल्लोपः । पा॰ ६. ४. १११.। यासुट उदात्तत्वं । पादादित्वादनिघातः । शर्मणि । शॄ हिंसायां । हिनस्ति दुःखमिति शर्म । अन्येभ्योऽपि दृश्यंते । पा॰ ३. २. ७५.। इति मनिन् । नेड्वशि कृति । पा॰ ७. २. ८.। इतीट्प्रतिषेधः । नित्त्वादाद्युदात्तत्वं ॥

सप्तमीमृचमाह ॥

एमाशुमाशवे भर यज्ञश्रियं नृमादनं । पतयन्मंदयत्सखं ॥ ७ ॥

आ । ईं । आशुं । आशवे । भर । यज्ञऽश्रियं । नृऽमादनं । पतयत् । मंदयत्ऽसखं ॥ ७ ॥

ईमिति निपात इदंशब्दार्थे वर्तते । हे यजमान । आशवे कृत्स्नसोमयागव्याप्तायेंद्राय । ईमाभर । इमं सोममाहर । कीदृशं सोमं । आशुं । सवनत्रयव्याप्तं । यज्ञश्रियं । यज्ञस्य संपद्रूपं । नृमादनं । नृणामृत्विग्यजमानानां हर्षहेतुं । पतयत् । पतयंतं । कर्माणि प्राप्नुवंतं । मंदयत्सखं । य इंद्रो मंदयति यजमानान् हर्षयति तस्मिन्निंद्रे सखिभूतोऽयं सोमः । तत्प्रीतिहेतुत्वात्तृप्तिहेतुत्वाद्वा ॥ आशुं ।

कृवापाजिमिस्वदिसाध्यशूभ्य उण् । उ० १. १. । इत्युण् । प्रत्ययस्वरः । आशवे । पूर्ववत् । यज्ञश्रियं । समासस्येत्यंतोदात्तः । माद्यंतेऽनेनेति मादनः । करणाधिकरणयोश्च । पा० ३. ३. ११७. । इति ल्युट् । तस्य लित्वात्पूर्व आकार उदात्तः । गतिकारकोपपदात्कृदिति स एव शिष्यते । पतयत् । पतेरदंतस्य चौरादिको णिच् । पा० ३. १. २५. । अतो लोपः । पा० ६. ४. ४८. । तस्य स्थानिवत्त्वादुपधाया वृद्ध्यभावः । पा० ७. २. ११६. । लटः शत्रादेशः । तस्य छंदस्युभयथेत्यार्धधातुकत्वेन शबभावाददुपदेशादिति निघाताभावेन प्रत्ययाद्युदात्तत्वमेव भवति । आर्धधातुकत्वेऽपि सर्वे विधयश्छंदसि विकल्प्यंत इति णेरनिटि । पा० ६. ४. ५१. । इति णिलोपाभावः । सुपां सुलुगित्यमो लुक् । न लुमता । पा० १. १. ६३. । इति प्रत्ययलक्षणनिषेधादुगिदचां । पा० ७. १. ७०. । इति न नुम् । एवं मंदयच्छब्दोऽंतोदात्तः । मंदयतींद्रे सखा । सप्तमीति योगविभागात्समासः । तत्पुरुषे तुल्यार्थेति सप्तमीपूर्वपदप्रकृतिस्वरत्वं ॥

अष्टमीमृचमाह ॥

अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः । प्रावो वाजेषु वाजिनं ॥ ८ ॥

अस्य । पीत्वा । शतक्रतो इति शतऽक्रतो । घनः । वृत्राणां । अभवः । प्र । आवः । वाजेषु । वाजिनं ॥ ८ ॥

हे शतक्रतो बहुकर्मयुक्तेंद्र त्वमस्य सोमस्य संबंधिनमंशं पीत्वा वृत्राणां वृत्रनामकासुरप्रमुखानां शत्रूणां घनोऽभवः । हंताभूः । ततो वाजेषु संग्रामेषु वाजिनं संग्रामवंतं स्वभक्तं प्रावः । प्रकर्षेण रक्षितवानसि ॥ अस्येतीदंशब्देन प्रयोगसमये पुरोदेशस्थः सोमो निर्दिश्यते न तु पूर्वप्रकृतः सोमः परामृश्यते । अतोऽनन्वादेशत्वान्नाचेदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ । पा० २. ४. ३२. । इत्यशादेशः । अतो न सर्वानुदात्तत्वं किंतु त्यदाद्यत्वे । पा० ७. २. १०२. । हलि लोपेऽकारः प्रातिपदिकस्वरेणोदात्त इत्यंतोदात्तादित्यनुवृत्तावूडिदंपदाद्यप्पुम्रैद्युभ्यः । पा० ६. १. १७१. । इति विभक्तिरुदात्ता । पीत्वा । पिबतेः क्त्वाप्रत्यये घुमास्थादिनेत्वं । प्रत्ययस्वरेणोदात्तः । असामर्थ्यान्न परामंत्रितांगवद्भावः । घनः । मूर्तौ घनः । पा० ३. ३. ७७. । इति हंतेर्धातोः काठिन्येऽप्प्रत्ययः । तदस्यास्तीत्यर्शआदित्वादजंतः । चित्त्वादंतोदात्तः । वाजेषु । वृषादित्वादाद्युदात्तः । वाजिनं । इनिप्रत्ययस्वरः ॥

नवमीमृचमाह ॥

तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो । धनानामिंद्र सातये ॥ ९ ॥

तं । त्वा । वाजेषु । वाजिनं । वाजयामः । शतक्रतो इति शतऽक्रतो । धनानां । इंद्र । सातये ॥ ९ ॥

हे शतक्रतो बहुकर्मयुक्त यद्वा बहुप्रज्ञानयुक्तेंद्र धनानां सातये संभजनार्थं वाजेषु युद्धेषु वाजिनं बलवंतं त्वा पूर्वमंत्रोक्तगुणयुक्तं त्वां वाजयामः । अन्नवंतं कुर्मः । रण इत्यादिषु षट्चत्वारिंशत्सु संग्रामनामसु पौंस्ये महाधने वाजेऽज्मन्निति पठितं । अष्टाविंशतिसंख्याकेष्वन्ननामस्वंधो वाजः पाज इति पठितं । उरु तुवीत्यादिषु द्वादशसु बहुनामसु शतं सहस्रमिति पठितं । अप्नोऽप्न इत्यादिषु षड्विंशतिसंख्याकेषु कर्मनामसु शक्म क्रतुरिति पठितं । केतः केतुरित्यादिष्वेकादशसु प्रज्ञानामसु क्रतुरसुरिति पठितं ॥ त्वा । अनुदात्तं सर्वमित्यनुवृत्तौ त्वामौ द्वितीयाया इति त्वादेशः । वाजेषु । वज व्रज गतौ । वाजयति गमयति शरीरनिर्वाहमनेनेति वाजो बलमन्नं वा । ण्यंतात्करणे घञ् । तत्र ञित्स्वरस्यापवादे कर्षात्वतः । पा० ६. १. १५९. । इत्यंतोदात्तत्वे प्राप्ते तस्याप्यपवादत्वेन वृषादीनां च । पा० ६. १. २०३. । इत्याद्युदात्तत्वं । वाजयामः । वाजोऽस्यास्तीति वाजवान् । तं कुर्म इत्यर्थे तत्करोति । पा० ३. १. २१. । तदाचष्टे । पा० ३. १. २५. । इति णिच् । इष्टवण्णौ प्रातिपदिकस्य । पा० ६. ४. १५५. १. । इति तस्मिन्परत इष्टवद्भावाद्विन्मतोर्लुक् । पा० ५. ३. ६५. । इति मतुपो लुक् । टेः । पा० ६. ४. १५५. । इत्यकारलोपः । णिचश्चित्त्वादंतोदात्तत्वं । शपः पित्त्वेनानुदात्तत्वं । लसार्वधातुकस्वरेणाख्यातस्याप्यनुदात्तत्वं । पादादित्वान्निङ्तिङ इति न निघातः । शतक्रतो । आमंत्रितनिघातः । धनानां । नद्विषयस्यानिसंतस्येत्याद्युदात्तः । सातये । उदात्त इत्यनुवृत्तावूतियूतिजूतिसातिहेतिकीर्तयश्चेति क्तिन्नुदात्तः ॥

दशमीमृचमाह ॥

यो रायो३ऽवनिर्महान्त्सुपारः सुन्वतः सखा । तस्मा इंद्राय गायत ॥ १० ॥

यः । रायः । अवनिः । महान् । सुऽपारः । सुन्वतः । सखा । तस्मै । इंद्राय । गायत ॥ १० ॥

य इंद्रो रायो धनस्यावनी रक्षकः स्वामी वा तस्मा इंद्राय गायत । हे

ऋत्विजस्तत्प्रीत्यर्थं स्तुतिं कुरुत। कीदृश इंद्रः। महान्। गुणैरधिकः। सुपारः। सुष्ठु कर्मणः पूरयिता। सुन्वतो यजमानस्य सखा सखिवत्प्रियः॥ रायः। ऊडिदंपदाद्यप्पुम्रैद्युभ्य इति विभक्तेरुदात्तत्वं। अवनिः। अव रक्षणगतिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिंगनहिंसादहनभाववृद्धिषु चेत्यस्मादर्तिसृधृधम्यम्यश्यवितृभ्योऽनिः। उ० २. ९८.। इत्यनिः। प्रत्ययाद्युदात्तत्वं। सुपारः। पृ पालनपूरणयोरित्यस्माण्णिजंतात्कर्तरीत्यनुवृत्तौ। पा० ३. १. ६८.। पचाद्यच्। पा० ३. १. १३४.। चित इत्यंतोदात्तः। सुन्वतः। शतुरनुमो नद्यजादी। पा० ६. १. १७३.। इति विभक्तिरुदात्ता। सखा। समाने ख्यश्चोदात्तः। उ० ४. १३८.। इतीण्प्रत्ययांतः। तत्संनियोगेन यलोपः। सशब्दस्य चोदात्तः। डित्वाट्टिलोपः। तस्मै। आदिरित्यनुवृत्तौ त्यजितनियजिभ्यो डित्। उ० १. १३०.। इति तनोतेरदिप्रत्ययः। डित्वाट्टिलोपे प्रत्ययस्वरेण तच्छब्द उदात्तः। त्यदाद्यत्वं। एकादेश उदात्तेनोदात्त इत्युदात्तः। सावेकाचस्तृतीयादिर्विभक्तिरिति विभक्तेरुदात्तत्वप्राप्तौ प्रथमैकवचनेऽवर्णांतत्वान्न गोश्वन्साववर्ण। पा० ६. १. १८२.। इति निषेधः। इंद्राय। इंद्रशब्दो रन्प्रत्ययांतो निपातितः। नित्वादाद्युदात्तः। कर्मणा यमभिप्रैति स संप्रदानं। पा० १. ४. ३२.। इत्यत्र क्रियाग्रहणं कर्तव्यं। पा० १. ४. ३२. १.। इति वचनाद्गानक्रियया प्राप्यत्वात्संप्रदानत्वेन चतुर्थी॥

॥ इति प्रथमस्य प्रथमेऽष्टमो वर्गः॥

आ त्विति द्वितीयं सूक्तं दशर्चं। सुरूपकृत्नुं दशेत्यनुवृत्तावा तु युंजंतीत्येवमनुक्रांतत्वात्। ऋषिच्छंदोदेवताविनियोगाः पूर्ववत्। विशेषविनियोगस्तु। अतिरात्रे तृतीयपर्याये मैत्रावरुणशस्त्रे स्तोत्रियोऽयं तृचः। अतिरात्रे पर्यायाणामिति खंड आ त्वेता निषीदत। आ० ६. ४.। इत्युक्तत्वात्। तत्र प्रथमामृचमाह॥

आ त्वेता नि षीदतेंद्रमभि प्र गायत। सखायः स्तोमवाहसः॥ १॥

आ। तु। आ। इत। नि। सीदत। इंद्रं। अभि। प्र। गायत। सखायः। स्तोमऽवाहसः॥ १॥

तुशब्दः क्षिप्रार्थो निपातः। द्वाभ्यामाङ्भ्यामान्वेतुमितशब्दोऽभ्यसनीयः। हे सखाय ऋत्विजः क्षिप्रमस्मिन्कर्मण्यागच्छतागच्छत। आदरार्थोऽभ्यासः।

आगत्य च निषीदत। उपविशत। उपविश्य चेंद्रमभिप्रगायत। सर्वतः प्रकर्षेण स्तुत। कीदृशाः सखायः। स्तोमवाहसः। त्रिवृत्पंचदशादिस्तोमानस्मिन्कर्मणि वहंति। प्रापयंति ॥ आ। निपातत्वादाद्युदात्तः। इत। इण् गतौ। द्व्यचोऽतस्तिङः। पा॰ ६. ३. १३५.। इति संहितायां दीर्घत्वं। नि। निपातत्वादाद्युदात्तः। सीदत। पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः। पा॰ ७. ३. ७८.। सदेः सीदादेशः। सदिरप्रतेः। पा॰ ८. ३. ६६.। इति संहितायां षत्वं। अभि। उपसर्गाश्चाभिवर्जमिति वचनात्प्रातिपदिकांतोदात्तत्वं। स्तोमवाहसः। अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिणीभ्यो मन्। उ॰ १. १३८.। इति स्तौतेर्मन्प्रत्ययांत स्तोमशब्दो नित्त्वादाद्युदात्तः। स्तोमं वहंतीति स्तोमवाहसः। वहिहाधाञ्भ्यश्छंदसि। उ॰ ४. २२०.। इत्यसुन्प्रत्ययः। तत्र णिदित्यनुवृत्तेरत उपधाया इत्युपधाया वृद्धिः कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च। उ॰ ४. २२६.। इत्यौणादिकसूत्रात्समास आद्युदात्तः ॥

द्वितीयामृचमाह ॥

पुरूतमं पुरूणामीशानं वार्याणां। इंद्रं सोमे सचा सुते ॥ २॥

पुरुऽतमं। पुरूणां। ईशानं। वार्याणां। इंद्रं। सोमे। सचा। सुते ॥ २ ॥

सखायोऽभिप्रगायतेति पदद्वयमत्रानुवर्तते। हे सखाय ऋत्विजः सचा यूयं सर्वे सह। यद्वा सचा परस्परसमवायेन सुतेऽभिषुते सोमे प्रवृत्ते सतींद्रमभिप्रगायत। कीदृशमिंद्रं। पुरूतमं। पुरून्बहूञ्छत्रून्तमयति ग्लापयतीति पुरूतमः। पुरूणां बहूनां वार्याणां वरणीयानां धनानामीशानं स्वामिनं ॥ पुरूतमं। तमु ग्लान इति धातोरंतर्भावितण्यर्थात्पचाद्यचि चित्त्वादंतोदात्तेऽपि कृदुत्तरपदप्रकृतिस्वरत्वं बाधित्वा परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। पुरूणां। पॄ पालनपूरणयोरित्यस्मात् कुरित्यनुवृत्तौ पृभिदिव्यधिगृधिधृषिहृशिभ्यः। उ॰ १. २३.। इति कुप्रत्ययः। कित्त्वाद्गुणनिषेध उदोष्ठ्यपूर्वस्य। पा॰ ७. १. १०२.। इत्युकारः। उरण् रपरः। पा॰ १. १. ५१.। प्रत्ययस्वरेणांतोदात्तः पुरुशब्दः। अतो मतुपि ह्रस्वादंतोदात्तात्पुरुशब्दात्परस्य नामो नामन्यतरस्यां। पा॰ ६. १. १७७.। इत्यंतोदात्तत्वं। ईशानं। ईश ऐश्वर्ये इति धातोरनुदात्तेत्त्वात्परस्य शानचो लसार्वधातुकानुदात्तत्वं। वार्याणां। वृङ् संभक्तावित्यस्मादृहलोर्ण्यत्। पा॰ ३. १. १२४.। क्यब्विधौ हि वृञ एव ग्रहणं न वृङः। पा॰ ३. १. १०९. १.। तित्स्वरितं। पा॰ ६.

१.१८५.। इति प्रत्ययस्वरितं बाधित्वा ईडवंदवृशंसदुहां ण्यतः । पा॰ ६.१.२१४.। इति ण्यदंतस्याद्युदात्तत्वं । यतोऽनावः । पा॰ ६.१.२१३.। इत्यत्र तु ण्यतो ग्रहणं न भवति तस्य द्यनुबंधकत्वात्। एकानुबंधग्रहणे न द्यनुबंधकस्येति नियमात्। सचा। षच समवाये। धात्वादेः षः सः। संपदादित्वाद्भावे क्विबिति क्विप्। तृतीयैकवचनं। धातुस्वरेणाद्युदात्तः। सर्वे विधयश्छंदसि विकल्प्यंत इति न्यायेन सावेकाच इति सूत्रं न प्रवर्तते। सचेत्यस्य निपातत्वपक्षे स्पष्टमाद्युदात्तत्वं ॥

तृतीयामृचमाह ॥

स घा नो योग आ भुवत्स राये स पुरंध्यां। गमद्वाजेभिरा स नः ॥ ३ ॥

सः। घ। नः। योगे। आ। भुवत्। सः। राये। सः। पुरंऽध्यां। गमत्। वाजेभिः। आ। सः। नः ॥ ३ ॥

घशब्दोऽवधारणार्थो निपातः। सर्वत्रसच्छब्दः संबध्यते। स घ स एवेंद्रः पूर्वमंत्रोक्तगुणविशिष्टो नोऽस्माकं योगे पूर्वमप्राप्तस्य पुरुषार्थस्य संबंध आभुवत्। आभवतु। पुरुषार्थं साधयत्वित्यर्थः। स एव राये धनार्थमाभुवत्। आभवतु। स एव पुरंध्यां योषित्याभुवत्। यद्वा। बहुविधायां बुद्धावाभुवत्। पुरंधिर्बहुधीः। नि॰ ६.१३.। इति यास्कः। स एव वाजेभिर्देयैरन्नैः सह नोऽस्मानागमत्। आगच्छतु॥ घा। चादयोऽनुदात्ता इत्यनुदात्तः। संहितायामृचि तुनुघमक्षुतङ्कुत्रोरुष्याणां। पा॰ ६.३.१३३.। इति दीर्घः। योगे। घञो ञित्वादाद्युदात्तत्वं। भुवत्। भूयात्। भवतेराशीर्लिङि परतो लिङ्याशिष्यङित्यङ्प्रत्ययः। तस्य ङित्त्वेन गुणाभावादुवङादेशः। किदाशिषीति यासुडत्र भवत्यनित्यमागमशासनमिति वचनात्। तिङ्ङतिङ इति निघातः। ऊडिदंपदाद्यप्पुम्रैद्युभ्य इति राय इत्येतस्य विभक्तेरुदात्तत्वं। पुरंध्यां। पुरंधिः पुरुधीः। पृषोदरादित्वात्। पा॰ ६.३.१०९.। उकारस्यामादेश ईकारस्य ह्रस्वश्च। आद्युदात्तप्रकरणे दिवोदासादीनां छंदस्युपसंख्यानं। पा॰ ६.२.९१.१.। इत्याद्युदात्तत्वं। अथवा पुरं शरीरं धीयतेऽस्यामिति कर्मण्यधिकरणे च। पा॰ ३.३.९३.। इति किप्रत्ययः। अलुक् छांदसः। नविषयस्यानिसंतस्येति पुरशब्द आद्युदात्तः। दासीभारादित्वात्। पा॰ ६.२.४२.। पूर्वपदप्रकृतिस्वरत्वं। गमत्। गमेर्लेटस्तिप्। इतश्च लोपः परस्मैपदेष्वितीकारलोपः। बहुलं छंदसीति शपो लुक्। लेटोऽडाटावित्यडागमः। आगमा अनुदात्ता इति तस्यानुदात्तत्वे धातुस्वर एव शिष्यते। वाजेभिः। वृषादित्वादाद्युदात्तः॥

चतुर्थीमृचमाह ॥

यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः । तस्मा इंद्राय गायत ॥ ४ ॥

यस्य । संऽस्थे । न । वृण्वते । हरी इति । समत्ऽसु । शत्रवः । तस्मै । इंद्राय । गायत ॥ ४ ॥

समत्सु युद्धेषु यस्येंद्रस्य संस्थे रथे युक्तौ हरी ह्रावश्वौ शत्रवो न वृण्वते । न संभजंते । रथमश्वौ च दृष्ट्वा पलायंत इत्यर्थः । तस्मा इंद्राय तत्संतोषार्थं हे ऋत्विजो गायत । स्तुतिं कुरुत । रण इत्यादिषु षट्चत्वारिंशत्सु संग्रामनामसु समत्सु समरण इति पठितं ॥ संस्थे । सम्यक् तिष्ठतीति संस्थो रथः । आतश्चोपसर्गे । पा० ३. १. १३६. । इति कप्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वं । वृण्वते । प्रत्ययस्वरेणाकार उदात्तः । सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः । पा० ६. १. १५८. ९. । तिङ्ङतिङ इति निघातो न भवति यद्वृत्तान्नित्यमिति प्रतिषेधात् । पंचमीनिर्देशेऽप्यत्र । पा० १. १. ६७. । व्यवहितेऽपि कार्यमिष्यते । हरतो रथमिति हरी अश्वौ । इन्नित्यनुवृत्तौ हृपिषिरुहिवृतिविदिच्छिदिकीर्तिभ्यश्च । उ० ४. १२०. । इतीन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं । समत्सु । संपूर्वादत्तेः क्विप् । शत्रवः । शतिः सौत्रो धातुर्हिंसार्थः । रुशतिभ्यां क्रुन् । उ० ४. १०६. । नित्त्वादाद्युदात्तत्वं । तस्मै । सावेकाच इति विभक्त्युदात्तस्य न गोश्वन्सावर्णेति प्रतिषेधात्प्रातिपदिकस्वर एव ॥

पंचमीमृचमाह ॥

सुतपाव्ने सुता इमे शुचयो यंति वीतये । सोमासो दध्याशिरः ॥ ५ ॥

सुतऽपाव्ने । सुताः । इमे । शुचयः । यंति । वीतये । सोमासः । दधिऽआशिरः ॥ ५ ॥

इमे सोमासोऽस्मिन्कर्मणि संपादिताः सोमाः सुतपाव्नेऽभिषुतस्य सोमस्य पानकर्त्रे । षष्ठ्यर्थे चतुर्थी । तस्य पातुर्वीतये भक्षणार्थं यंति । तमेव प्राप्नुवंति । कीदृशाः सोमाः । सुताः । अभिषुताः । शुचयः । दशापवित्रेण शोधितत्वाच्छुद्धाः । दध्याशिरः । अवनीयमानं दध्याशीर्दोषघातकं येषां सोमानां ते दध्याशिरः ॥ सुतपाव्ने । सुतं पिबतीति सुतपावा । वनिपः पित्त्वाद्धातुस्वर एव शिष्यते । समासे द्वितीयापूर्वपदप्रकृतिस्वरं बाधित्वा कृदुत्तरपदप्रकृतिस्वरत्वं । शुचयः । शुच दीप्तौ । इन्नित्यनुवृत्ताविगुपधात्कित् । उ० ४. १२१. ।

इतीनः किच्वाल्लघूपधगुणाभावः । नित्वादाद्युदात्तत्वं । वीतये । वी गतिप्रजननकांत्यसनखादनेष्वित्यस्मान्मंत्रे वृषेषपचमनविदभूवीरा उदात्तः । पा० ३. ३. ९६.। इति क्तिनुदात्तः । सोमासः । षुञ् अभिषवे । अर्तिस्तुसुहुसृधृक्षीत्यादिना । उ० १. १३८.। मन् । नित्वादाद्युदात्तः । आज्जसेरसुक् । पा० ७. १. ५०.। इत्यसुगागमः । दध्याशिरः । दधाति पुष्णातीति दधि । डुधाञ् धारणपोषणयोः । आदृगमहनजनः किकिनौ लिट् च । पा० ३. २. १७१.। इति किन् । लिड्वद्भावाद्द्विर्भावः । कित्वादाकारलोपः । नित्वादाद्युदात्तत्वं । शॄ हिंसायां । शृणाति हिनस्ति सोमेऽवनीयमानं सत्सोमस्य स्वाभाविकं रसमृजीषत्वप्रयुक्तं नीरसं दोषं वेत्याशीः । श्विप्यृत इद्धातोः । पा० ७. १. १००.। इतीत्वं रपरत्वं च । दध्येवाशीर्येषां सोमानां ते दध्याशिरः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य प्रथमे नवमो वर्गः ॥

आ त्वेति सूक्तस्य षष्ठीमृचमाह ॥

त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः । इंद्र ज्यैष्ठ्याय सुक्रतो ॥ ६ ॥

त्वं । सुतस्य । पीतये । सद्यः । वृद्धः । अजायथाः । इंद्र । ज्यैष्ठ्याय । सुक्रतो इति सुऽक्रतो ॥ ६ ॥

सुक्रतो शोभनकर्मन् शोभनप्रज्ञ वा हे इंद्र त्वं सुतस्याभिषुतस्य सोमस्य पीतये पानार्थं ज्यैष्ठ्याय देवेषु ज्येष्ठत्वार्थं च सद्यस्तस्मिन्नेव क्षणे वृद्धोऽजायथाः । अभिवृद्ध्योत्साहेन युक्तोऽभूः ॥ पीतये । पा पान इत्यस्मात्स्थागापापचो भावे । पा० ३. ३. ९५.। इति क्तिन् । घुमास्थेत्यादिना । पा० ६. ४. ६६.। ईत्वं । तस्य नित्त्वेऽपि व्यत्ययेन प्रत्ययोदात्तत्वं । उत्तरसूत्रगतमुदात्तपदमत्रापि वा योजनीयं । सद्यः । सद्यः परुत्परारीति सूत्रेण । पा० ५. ३. २२.। समानेऽहनीत्यर्थे समानस्य सभावो द्यश्च प्रत्ययो निपात्यते । प्रत्ययस्वरेणोदात्तः । वृद्धः । वृधु वृद्धौ । उदितो वा । पा० ७. २. ५६.। इति क्त्वाप्रत्यय इटो विकल्पितत्वाद्यस्य विभाषा । पा० ७. २. १५.। इति निष्ठायामिट्प्रतिषेधः । प्रत्ययस्वरेणोदात्तः । ज्यैष्ठ्याय । ज्येष्ठस्य भावो ज्यैष्ठ्यं । गुणवचनब्राह्मणादिभ्यः कर्मणि च । पा० ५. १. १२४.। इति ष्यञ् । ञित्वादाद्युदात्तः ॥

सप्तमीमृचमाह ॥

आ त्वा विशंत्वाशवः सोमास इंद्र गिर्वणः । शं ते संतु प्रचेतसे ॥ ७ ॥

आ । त्वा । विशंतु । आशवः । सोमासः । इंद्र । गिर्वणः । शं । ते । संतु । प्रऽचेतसे ॥ ७ ॥

हे इंद्र त्वां सोमासः सोमा आविशंतु । आभिमुख्येन प्रविशंतु । कीदृशाः सोमाः । आशवः । सवनत्रये प्रकृतिविकृत्योर्वा व्याप्तिमंतः । कीदृशेंद्र । गिर्वणः । गीर्भिः स्तुतिभिः संभजनीय देवविशेष । गिर्वणा देवो भवति गीर्भिरेनं वनयंति । नि० ६. १४. । इति यास्कः । तथाविध हे इंद्र ते तव प्रचेतसे प्रकृष्टज्ञानाय शं सुखरूपाः सोमाः संतु ॥ गिर्वणः । गृणंतीति गिरः स्तुतयः । गॄ शब्दे । क्विपि ॠत इद्धातोः । पा० ७. १. १००. । इतीत्वं रपरत्वं च । गीर्भिर्वन्यते सेव्यत इति गिर्वणाः । वण षण संभक्तौ । संभक्तिः सेवा । सर्वधातुभ्योऽसुन् । उ० ४. १९०. । इत्यसुन्प्रत्ययः । प्रचेतसे । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

अष्टमीमृचमाह ॥

त्वां स्तोमा अवीवृधन्त्वामुक्था शतक्रतो । त्वां वर्धंतु नो गिरः ॥ ८ ॥

त्वां । स्तोमाः । अवीवृधन् । त्वां । उक्था । शतक्रतो इति शतऽक्रतो । त्वां । वर्धंतु । नः । गिरः ॥ ८ ॥

हे शतक्रतो बहुकर्मन्बहुप्रज्ञ वेंद्र त्वां स्तोमाः सामगानां स्तोत्राण्यवीवृधन् । वर्धितवंति । तथा बह्वृचानामुक्था शस्त्राणि त्वामवीवृधन् । यस्मात्पूर्वमेवमासीत्तस्मादिदानीमपि नोऽस्माकं गिरः स्तुतयस्त्वां वर्धंतु । वर्धयंतु । अतिवृद्धं कुर्वंतु ॥ स्तोमाः । मनो नित्त्वादाद्युदात्तः । अवीवृधन् । वृधु वृद्धौ । ण्यंतात् । पा० ३. १. २६. । लुङि चङि । पा० ३. १. ४८. । उर्ॠत् । पा० ७. ४. ७. । इति वृधेरुपधाया ॠकारस्य ॠकारविधानादंतरंगोऽपि गुणो बाध्यते । द्विर्भाव । पा० ६. १. ११. । हलादिशेष । पा० ७. ४. ६०. । सन्वद्भाव । पा० ७. ४. ९३. । इत्व । पा० ७. ४. ७९. । दीर्घत्व । पा० ७. ४. ९४. । अडागमाः । पा० ६. ४. ७१. । उक्था । उक्थानि । पातॄतुदिवचिरिचिसिचिभ्यस्थक् । उ० २. ७. । इति थक्प्रत्ययः । तस्य कित्त्वात्संप्रसारणं । शेश्छंदसि बहुलं । पा० ६. १. ७०. । इति शिलोपो नलोपश्च । प्रत्ययस्वरेणांतोदात्तः । असामर्थ्यादामंत्रितपरस्यापि न परांगवद्भाव इति नाद्युदात्तत्वं । वर्धंतु । अंतर्भावितण्यर्थाद्वृधेर्व्यत्ययेन परस्मैपदं ॥

नवमीमृचमाह ॥

अक्षितोतिः सनेदिमं वाजमिंद्रः सहस्रिणं । यस्मिन्विश्वानि पौंस्या ॥ ९ ॥

अक्षितऽऊतिः । सनेत् । इमं । वाजं । इंद्रः । सहस्रिणं । यस्मिन् । विश्वानि । पौंस्या ॥ ९ ॥

इंद्र इमं वाजं सोमरूपमन्नं सनेत् । संभजेत् । कीदृश इंद्रः । अक्षितोतिः । अहिंसितरक्षणः । कदाचिदपि रक्षां न विमुंचतीत्यर्थः । कीदृशं वाजं । सहस्रिणं । प्रकृतौ विकृतिषु च प्रवर्तमानत्वेन सहस्रसंख्यायुक्तं । यस्मिन्वाजे विश्वानि सर्वाणि पौंस्या पुंस्त्वानि बलानि वर्तंते तादृशं वाजमिति पूर्वत्रान्वयः ॥ अक्षितोतिः । ननु क्षि क्षय इत्ययं धातुरकर्मकः । तस्य च कर्माभावादधिकरणे भावे कर्तरि वा क्तप्रत्ययेन भवितव्यं । तदिह यदि कर्तर्यधिकरणे वा स्यात्तदा तयोरर्थयोर्ण्यत्प्रत्ययस्याविधानात्क्षिय इत्यनुवृत्तौ । पा० ६. ४. ५९. । निष्ठायामण्यदर्थे । पा० ६. ४. ६०. । इति दीर्घेण भवितव्यं । तथा च क्षियो दीर्घात् । पा० ८. २. ४६. । इति निष्ठानत्वेऽक्षीणेति स्यात् न त्वक्षितेति । अथ नपुंसके भावे क्तः । पा० ३. ३. ११४. । इति भावपरः क्षितशब्दो गृह्यते । तदा तस्य ण्यदर्थत्वेनाण्यदर्थ इति निषेधाद्दीर्घनत्वयोरभावात्क्षितमिति सिध्यति । तदा तु नञ्तत्पुरुषः प्रकृतेन नान्वेतीति न विद्यते क्षितमस्येति बहुव्रीहिणैव भवितव्यं । तथा च नञ्सुभ्यां । पा० ६. २. १७२. । इत्युत्तरपदांतोदात्तत्वं स्यात् । पुनरूतिशब्देन बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन स एव स्वरस्तिष्ठेदित्यभिमतमाद्युदात्तत्वं न सिध्येदिति । सत्यं । अत एवात्र क्षिधातुरंतर्भावितण्यर्थो गृह्यते । तेन सकर्मकत्वात्कर्मण्येषा निष्ठा । ततश्चाण्यदर्थ इति निषेधाद्दीर्घो निष्ठानत्वं च न भविष्यति । तथा च नञ्तत्पुरुषे न क्षिताक्षिताक्षयितेत्यर्थः । तत्र चाव्ययपूर्वपदप्रकृतिस्वरत्वेन नञ उदात्तत्वं । पुनरूतिपदेन बहुव्रीहौ स एव स्वरः स्यास्यतीति न कोऽपि दोषः । रिक्षिचिरिञ्जिरिदाशट्टु जिघांसायामिति क्षिणोतेर्हिंसार्थस्य वा कर्मणि निष्ठा । तथा चाहिंसितोतिरित्यर्थ उक्तक्रमेण स्वरः सिध्यतीति न दोषः । सनेत् । वन षण संभक्तौ । भौवादिकः । वाजं । वृषादित्वादाद्युदात्तः । इंद्रः । रन्रो निच्चादाद्युदात्तः । सहस्रिणं । सहस्रमस्यास्ति । अत इनिठनौ । पा० ५. २. ११५. । प्रत्ययस्वरः । विश्वानि । विशेः क्वनि । उ० १. १५०. । नित्त्वादाद्युदात्तः । पुंसः कर्माणि पौंस्यानि । ब्राह्मणादेराकृतिगण-

त्वाद्गुणवचनब्राह्मणादिभ्यः कर्मणि च । पा० ५. १. १२४. । इति ष्यञ् । जिह्वादाद्युदात्तः । प्रथमाबहुवचनस्य सुपां सुलुगित्यादिना डादेशः । ननु स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् । पा० ४. १. ८७. । इत्यनेन धान्यानां भवने क्षेत्रे खञ् । पा० ५. २. १. । इत्येतत्पर्यंतेष्वपत्याद्यर्थेषु नञ्स्नञोर्विधानाद्यथा पुंसोऽपत्यं पौंस्नः पुंस आगतः पौंस्न इत्यादिवत्पुंसो भावः कर्म वेत्यस्मिन्नप्यर्थे ष्यञं बाधित्वा पौंस्नानीत्येव भवितव्यं । कथमुच्यते पौंस्यानीति । उच्यते । आ च त्वात् । पा० ५. १. १२०. । इति सूत्रे त्वादित्यवधिनिर्देशाद्ब्रह्मणस्त्वः । पा० ५. १. १३६. । इत्येतत्पर्यंतैरिमनिजादिभिः प्रत्ययैः सह त्वतलोः समावेशः । एवं तत्रैव चशब्दान्नञ्स्नञोरपि ष्यञादिभिः समावेश एव । न बाध्यबाधकभावः ॥

दशमीमृचमाह ॥

मा नो मर्ता अभि द्रुहन्तनूनामिंद्र गिर्वणः । ईशानो यवया वधं ॥ १० ॥

मा । नः । मर्ताः । अभि । द्रुहन् । तनूनां । इंद्र । गिर्वणः । ईशानः । यवय । वधं ॥ १० ॥

हे गिर्वण इंद्र मर्ता विरोधिनो मनुष्या नोऽस्मदीयानां तनूनां शरीराणां माभिद्रुहन् । अभितो द्रोहं मा कुर्युः । ईशानः समर्थस्त्वं वधं वैरिभिः संपाद्यमानं यवय । अस्मत्तः पृथक्कुरु । मनुष्या इत्यादिषु पंचविंशतिसंख्याकेषु मनुष्यनामसु मर्ता व्राता इति पठितं ॥ मर्ताः । असिहसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन । उ० ३. ८५. । इति तन् । नित्त्वादाद्युदात्तः । अभि । एवमादीनामंतः । फि० ४. १३. । द्रुहन् । द्रुह जिघांसायां । लिङर्थे लेट् । पा० ३. ४. ७. । इति प्रार्थनायां । पा० ३. ३. १६१. । लेट् । तस्य झि । पा० ३. ४. ७८. । झोऽन्तः । पा० ७. १. ३. । इतश्च लोपः परस्मैपदेषु । पा० ३. ४. ९७. । इतीकारलोपः । शपो लुक् । सार्वधातुकमपित् । पा० १. २. ४. । इति ङित्त्वाल्लघूपधगुणाभावः । पा० १. १. ५. । तनूनां । असामर्थ्यान्न परांगवद्भावः । इंद्र गिर्वणः । गतं । ईशानः । धातोरनुदात्तेत्त्वाच्छपो लुकि लसार्वधातुकानुदात्तत्वे धातुस्वर एव शिष्यते । यवया । यौतेर्णिचि संज्ञापूर्वको विधिरनित्य इति वृद्धिर्न क्रियते । अथवा यौतीति यवः । पचाद्यच् । पा० ३. १. १३४. । यवं करोतीत्यर्थे तत्करोति तदाचष्टे । पा० ३. १. २१. २५. । इति णिच् । इष्ठवद्भावाट्टिलोपः । पा० ६. ४. १५५. १. । तस्य स्थानिवद्भावाद्वृद्ध्यभावः । पा० १. १. ५७. । वधं । हनश्च वधः । पा० ३. ३. ७६. ।

इति भावेऽप् । तत्संनियोगशिष्टः स्थानिवद्भावेनांतोदात्तो वधादेशः । उदात्तनिवृत्तिस्वरेणाप उदात्तत्वं ॥

॥ इति प्रथमस्य प्रथमे दशमो वर्गः ॥

सुरूपेत्यादिषु षट्सूक्तेषु तृतीयस्य युंजंतीति सूक्तस्य मंत्रसंख्या ऋषिच्छंदोदेवतानि विनियोगश्चेत्येते पूर्ववदवगंतव्याः । दशर्चे तस्मिन्सूक्त आद्यास्तिस्रोऽंतिमा चेत्येताश्चतस्र ऐंद्र्यः । आ दहेत्येतां चतुर्थीमारभ्य षडृचो मारुत्यः । तासु मध्ये वीळु चिदिंद्रेणेत्येते द्वे ऋचौ मारुत्यौ सत्यावैंद्र्यावपि भवतः । तदेतत्सर्वमनुक्रमणिकायामुक्तं । सुरूपकृत्नुं दशेंद्रमा तु युंजंत्यादहेत्येताः षण्मारुत्यो वीळु चिदिंद्रेणेत्यैंद्र्यौ चेति । एतस्मिन्सूक्ते युंजंतीत्यसौ तृचस्तृतीये रात्रिपर्याये ब्राह्मणाच्छंसिनोऽनुरूपः । तथा चातिरात्रे पर्यायाणामिति खंडे योगे योगे तवस्तरं युंजंति ब्रध्नमरुषं । आ० ६.४. । इति सूत्रितं ॥

तत्र प्रथमामृचमाह ॥

युंजंति ब्रध्नमरुषं चरंतं परि तस्थुषः । रोचंते रोचना दिवि ॥ १ ॥

युंजंति । ब्रध्नं । अरुषं । चरंतं । परि । तस्थुषः । रोचंते । रोचना । दिवि ॥ १ ॥

इंद्रो हि परमैश्वर्ययुक्तः । परमैश्वर्यं चाग्निवाय्वादित्यनक्षत्ररूपेणावस्थानादुपपद्यते । ब्रध्नमादित्यरूपेणावस्थितं । अरुषं । हिंसकरहिताग्निरूपेणावस्थितं । चरंतं । वायुरूपेण सर्वतः प्रसरंतमिंद्रं परि तस्थुषः परितोऽवस्थिता लोकत्रयवर्तिनः प्राणिनो युंजंति । स्वकीये कर्मणि देवतात्वेन संबद्धं कुर्वंति । तस्यैवेंद्रस्य मूर्तिविशेषभूता रोचना नक्षत्राणि दिवि द्युलोके रोचंते । प्रकाशंते । अस्य मंत्रस्योक्तार्थपरत्वं ब्राह्मणांतरे व्याख्यातं । युंजंति ब्रध्नमित्याह । असौ वा आदित्यो ब्रध्नः । आदित्यमेवास्मै युनक्ति । अरुषमित्याह । अग्निर्वा अरुषः । अग्निमेवास्मै युनक्ति । चरंतमित्याह । वायुर्वै चरन् । वायुमेवास्मै युनक्ति । परि तस्थुष इत्याह । इमे वै लोकाः परि तस्थुषः । इमानेव लोकानस्मै युनक्ति । रोचंते रोचना दिवीत्याह । नक्षत्राणि वै रोचना दिवि । नक्षत्राण्येवास्मै रोचयंतीति । पंचविंशतिसंख्याकेषु महन्नामसु महो ब्रध्न इति पठितं । आदित्यस्यापि महत्त्वादेव ब्रध्नत्वं ॥ युंजंति । अंतः प्रत्ययस्वरेणाद्युदात्तत्वं । ब्रध्नं । प्रातिपदिकांतोदात्तः । अरुषं । रुष रिष हिंसार्थाः । रोषंतीति रुषा

हिंसकाः। इगुपधज्ञाप्रीकिरः कः। पा० ३.१.१३५.। इति कः। प्रत्ययस्वरेणोदात्तः। अवंति रुषा यस्यासावरुषः। नञ्सुभ्यां। पा० ६.२.१७२.। इत्युत्तरपदांतोदात्तत्वं। अमि पूर्वः। पा० ६.१.१०७.। इति पूर्वरूप एकादेश उदात्तेनोदात्तः। पा० ८.२.५.। इत्युदात्तत्वं। चरंतं। शपः पित्त्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते। तस्थुषः। तिष्ठतेर्लिटः क्वसुरादेशः। पा० ३.२.१०७.। वस्वेकाजाद्घसां। पा० ७.२.६७.। इतीटमंतरंगमपि बाधित्वा संप्रसारणं। संप्रसारणाश्रयं च बलीय इति शसि परतो भत्वात्। पा० १.४.१८.। वसोः संप्रसारणं। पा० ६.४.१३१.। परपूर्वत्वं। शासिवसिघसीनां च। पा० ८.३.६०.। इति षत्वं। वसोः प्रत्ययस्वरेणोदात्तत्वं। रोचंते। तिङो लसार्वधातुकानुदात्तत्वं। शपः पित्त्वादनुदात्तत्वं। धातुस्वर एव। रोचना। अनुदात्तेतश्च हलादेः। पा० ३.२.१४९.। इति युच्। युवोरनाकौ। पा० ७.१.१.। इत्यनादेशः। चित इत्यंतोदात्तत्वं। दिवि। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं॥

द्वितीयामृचमाह॥

युं॒जंत्य॑स्य॒ काम्या॒ हरी॒ विप॑क्षसा॒ रथे॑। शोणा॑ धृ॒ष्णू नृ॒वाह॑सा॥२॥

युं॒जंति॑। अ॒स्य॒। काम्या॑। हरी॒ इति॑। विऽप॑क्षसा। रथे॑। शोणा॑। धृ॒ष्णू इति॑। नृ॒ऽवाह॑सा॥२॥

अस्य ब्रध्नादिशब्दप्रतिपाद्यस्यादित्यादिमूर्तिभिस्तत्र तत्रावस्थितस्येंद्रस्य रथे हरी एतन्नामानौ द्वावश्वौ सारथयो युंजंति। इंद्रसंबंधिनोरश्वयोर्हरिनामत्वं हरी इंद्रस्य रोहितोऽग्नेरिति पठितत्वात्। कीदृशौ हरी। काम्या। कामयितव्यौ। विपक्षसा। विविधे पक्षसी रथस्य पार्श्वौ ययोरश्वयोस्तौ विपक्षसौ। रथस्य द्वयोः पार्श्वयोर्योजितावित्यर्थः। शोणा। रक्तवर्णौ। धृष्णू। प्रगल्भौ। नृवाहसा। नृणां पुरुषाणामिंद्रतत्सारथिप्रमुखानां वोढारौ॥ अस्य ब्रध्नमित्युक्तस्य परामर्शादिमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ। पा० २.४.३२.। इत्यश्। शित्त्वात्। पा० १.१.५५.। सर्वादेशोऽनुदात्तः। विभक्तिरनुदात्तैवेति सर्वानुदात्तत्वं। काम्या। कमु कांतौ। कमेर्णिङ्। पा० ३.१.३०.। कामयतेरचो यत्। पा० ३.१.९७.। तित्स्वरितापवादत्वेन यतोऽनावः। पा० ६.१.२१३.। इत्याद्युदात्तत्वं। सुपां सुलुगिति द्विवचनस्य डादेशः। हरतो रथमिति हरी। हृपिषीत्यादिना। उ० ४.१२०.। इन्। नित्त्वादाद्युदात्तः। विपक्षसा। पचिवचिभ्यां सुट् च। उ० ४.

२१९.। इति पचेरसुन्। सुडागमः। विभिन्ने पक्षसी पार्श्वौ ययोस्तौ। विशब्दो निपातत्वादुदात्तः। पूर्वपदप्रकृतिस्वरेण स एव शिष्यते। द्विवचनस्य डादेशः। रथे। रमंतेऽस्मिन्निति रथः। रमु क्रीडायां। हनिकुषिनीरमिकाशिभ्यः क्थन्। उ० २. २.। इति क्थन्। कित्त्वादनुदात्तोपदेशेत्यादिना। पा० ६. ४. ३७.। मकारलोपः। नित्स्वरेणाद्युदात्तः। शोणा। शोणृ वर्णगत्योः। गमनकरणत्वात्करणे घञ्। ञित्त्वादाद्युदात्तः। सुपां सुलुगिति डादेशः। धृष्णू। ञिधृषा प्रागल्भ्ये। त्रसिगृधिधृषिक्षिपेः क्नुः। पा० ३. २. १४०.। कित्त्वाद्गुणाभावः। प्रत्ययस्वरः। नृवाहसा। नॄन्वहत इति वहेर्वहिहाधाञ्भ्यश्छंदसि। उ० ४. २२०.। इत्यसुन्। णिदित्यनुवृत्तेर्वृद्धिः। नित्त्वादाद्युदात्तः। कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते॥

तृतीयामृचमाह॥

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः॥३॥

केतुं। कृण्वन्। अकेतवे। पेशः। मर्याः। अपेशसे। सं। उषत्ऽभिः। अजायथाः॥३॥

हे मर्या मनुष्या इदमाश्चर्यं पश्यतेत्यध्याहारः। किमाश्चर्यमिति तदुच्यते। आदित्यरूपोऽयमिंद्र उषद्भिर्दाहकैः रश्मिभिः प्रतिदिनमुषःकालैर्वा संभूयाजायथाः। उदपद्यत। अथवा सूर्यस्यैवास्तमये मरणमुपचर्य। व्यत्ययेन बहुवचनं कृत्वा संबोधनं क्रियते। हे मर्य प्रतिदिनं त्वमजायथा इति योज्यं। किं कुर्वन्। अकेतवे रात्रौ निद्राभिभूतत्वेन प्रज्ञानरहिताय प्राणिने केतुं कृण्वन्। प्रातः प्रज्ञानं कुर्वन्। अपेशसे। रात्रावंधकारावृतत्वेनानभिव्यक्तत्वाद्रूपरहिताय पदार्थाय प्रातरंधकारनिवारणेन पेशो रूपमभिव्यज्यमानं कुर्वन्॥ पेश इति रूपनाम पिंशतेरिति यास्कः। अकेतवेऽपेशस इति चतुर्थ्यौ षष्ठ्यर्थे द्रष्टव्यौ। केतुं। प्रातिपदिकस्वरः। कृण्वन्। कृविर्हिंसाकरणयोश्च। लटः शत्रादेशः। इदितो नुम् धातोः। पा० ७. १. ५८.। इति नुमागमः। कर्तरि शपि प्राप्ते धिन्विकृण्व्योरच्च। पा० ३. १. ८०.। इत्युप्रत्ययः। तत्संनियोगेन वकारस्य चाकारः। अतो लोपः। पा० ६. ४. ४८.। इत्यकारलोपः। तस्य स्थानिवद्भावात्पूर्वस्य लघूपधगुणो न भवति। पा० ७. ३. ८६.। अकारस्य प्रत्ययस्वरेणोदात्तत्वं। अकेतवे। बहुव्रीहौ नञ्सुभ्यां। पा० ६. २. १७२.। इत्युत्तरपदांतोदात्तत्वं। पेशः। नब्विषयस्यानिसंतस्य। फि० २. ३.। इत्याद्युदात्तः। मर्याः। छंदसि निष्टर्क्येत्यादौ

। पा० ३. १. १२३.। म्रियतेर्निपातः। आमंत्रितनिघातः। पा० ८. १. १९.। असामर्थ्यात्पूर्वस्य न परांगवद्भावः। अपेशसे। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। सं। निपात आद्युदात्तः। उषद्भिः। उष प्लुष दाहे। ज्वलद्भिः रश्मिभिः। लटः शत्रादेशे शपि प्राप्ते व्यत्ययेन शः। सार्वधातुकमपित्। पा० १. २. ४.। इति तस्य ङित्त्वाल्लघूपधगुणो न भवति। शस्य प्रत्ययस्वरेणोदात्तत्वं। उपरि शतुरदुपदेशाल्लसार्वधातुकानुदात्तत्वं। एकादेश उदात्तेनोदात्तः। अजायथाः। अजायतेत्यर्थे पुरुषव्यत्ययः। निघातः॥

चतुर्थीमृचमाह॥

आदह स्वधामनु पुनर्गर्भत्वमेरिरे। दधाना नाम यज्ञियं॥४॥

आत्। अह। स्वधां। अनु। पुनः। गर्भऽत्वं। आऽईरिरे। दधानाः। नाम। यज्ञियं॥४॥

अत्रास्ति विशेषविनियोगः। चतुर्विंशेऽहनि प्रातःसवने ब्राह्मणाच्छंसिशस्त्र आदह स्वधामन्विति द्वे ऋचौ। इंद्रेण सं हि दृक्षस इत्येका। अयं तृचः षळहस्तोत्रियसंज्ञकः। तथा च सूत्रितं चतुर्विंशे होताजनिष्टेति खंडे। इंद्रेण सं हि दृक्षस आदह स्वधामन्वित्येका द्वे च। आ० ७. २.। इति। यद्यप्येतदैंद्रं सूक्तं तथाप्यादहेत्यादिषु षट्सु मरुतो वर्ण्यंते। प्रायेणैंद्रे मरुत इत्यनुक्रमणिकायामुक्तत्वात्। अ० परि० १. २.॥ आदित्ययमानंतर्यार्थे निपातः। अहेत्यवधारणार्थः। आदह वर्षर्तोरनंतरमेव। स्वधामनु। इतः परं जनिष्यमाणमन्नमुदकं वानुलक्ष्य मरुतो देवा गर्भत्वमेरिरे। मेघमध्ये जलस्य गर्भाकारं प्रेरितवंतः। जलस्य कर्तारं पर्जन्यं प्रेरितवंतः। प्रतिसंवत्सरमेवं कुर्वतीति दर्शयितुं पुनःशब्दः प्रयुक्तः। कीदृशा मरुतः। यज्ञियं यज्ञार्हं नाम दधानाः। धारयंतः। सप्तसु गणेषु मरुतामीदृङ्चान्याहदृङ्चेत्यादीनि यज्ञयोग्यानि नामान्यत्राम्नातानि। अंध इत्यादिष्वष्टाविंशतिसंख्याकेष्वन्ननामसूर्क् रसः स्वधेति पठितं। अर्ण इत्यादिष्वेकशतसंख्याकेषूदकनामसु तेजः स्वधाक्षरमिति पठितं॥ आत्। अह। निपातावाद्युदात्तौ। स्वधा। स्वं लोकं दधाति पुष्णातीति स्वधा। आतोऽनुपसर्गे कः। पा० ३. २. ३.। कृदुत्तरपदप्रकृतिस्वरत्वं। अनुपुनःशब्दौ निपातावाद्युदात्तौ। गर्भस्य भावो गर्भत्वं। प्रत्ययस्वरः। एरिरे। अंतर्भावितण्यर्थादीर गतावित्यस्मादनुदात्तेतः परस्य लिटो झस्य। पा० ३. ४. ८१.। इरेच्। चित्त्वादंतोदात्तः। सह सुपा। पा० २. १. ४.। इत्यत्र सुपेति योगविभागादाङा सह तिङः समासेऽपि समासस्य

। पा० ६. १. २२३. । इत्यंतोदात्तत्वं । इजादेश्च गुरुमतोऽनृच्छः । पा० ३. १. ३६. । इत्याम् न भवति मंत्रत्वात् । अहशब्दयोगान्निघाताभावः । तुपश्यपश्यताहैः पूजायां । पा० ८. १. ३९. । इति निषेधात् । दधानाः । शानचश्चित्त्वादंतोदात्तत्वे प्राप्तेऽभ्यस्तानामादिः । पा० ६. १. १८९. । इत्याद्युदात्तत्वं । यज्ञमर्हति यज्ञियं । यज्ञर्त्विग्भ्यां घखञौ । पा० ५. १. ७१. । इति घप्रत्ययः । आयनेयीनीयियः फढखछघां प्रत्ययादीनां । पा० ७. १. २. । इतीयादेशः । प्रत्ययस्वरेणेकार उदात्तः ॥

पंचमीमृचमाह ॥

वीळु चिदारुजत्नुभिर्गुहा चिदिंद्र वह्निभिः । अविंद उस्रिया अनु ॥ ५ ॥

वीळु । चित् । आरुजत्नुऽभिः । गुहा । चित् । इंद्र । वह्निऽभिः । अविंदः । उस्रियाः । अनु ॥ ५ ॥

अस्ति किंचिदुपाख्यानं । पणिभिर्देवलोकाद्गावोऽपहृता अंधकारे प्रक्षिप्ताः । तांश्चेंद्रो मरुद्भिः सहाजयदिति । एतच्चानुक्रमणिकायां सूचितं । अ० ८. ६. १. । पणिभिरसुरैर्निगूळ्हा गा अन्वेष्टुं सरमां देवशुनीमिंद्रेण प्रहितामयुग्भिः पणयो मित्रीयंतः प्रोचुरिति । मंत्रांतरे च दृष्टांततया सूचितं । निरुद्धा आपः पणिनेव गाव इति । तदेतदुपाख्यानमभिप्रेत्योच्यते ॥ हे इंद्र वीळु चित् । दृढमपि दुर्गमस्थानमारुजत्नुभिर्भंजद्भिर्वह्निभिर्वोढृभिरन्यत्र नेतुं समर्थैर्मरुद्भिः सहितस्त्वं गुहा चित् । गुहायामपि स्थापिता उस्रिया गा अन्वविंदः । अन्विष्य लब्धवानसि । ओजः पाज इत्यादिष्वष्टाविंशतिसंख्याकेषु बलनामसु दृळ्हो वीळु च्यौत्नमिति पठितं । नवसंख्याकेषु गोनामस्वघ्न्योस्रोस्रियेति पठितं ॥ वीळु । प्रातिपदिकस्वरः । चित् । चादिरनुदात्तः । आरुजत्नुभिः । रुजो भंग इत्यौणादिकः कत्नुच्प्रत्ययः । कित्त्वाद्गुणाभावः । चित्त्वादंतोदात्तत्वं । समासे कृदुत्तरपदप्रकृतिस्वरत्वं । गुहा । सप्तम्या डादेशः । यामादीनां च । फि० २. १५. । इत्याद्युदात्तः । वह्निभिः । वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् । उ० ४. ५२. । इति वहेर्निप्रत्ययः । नित्त्वादाद्युदात्तः । अविंदः । शे मुचादीनां । पा० ७. १. ५९. । इति नुमागमः । लुङ्लङ्लृङ्क्ष्वडुदात्तः । पा० ६. ४. ७१. । वसंतीत्युस्रियाः । वसेः कर्तरि रियक्प्रत्ययः । षत्वाभावश्च बाहुलकादूहनीयः । उक्तं हि । यत्र पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यमिति । इकारः प्रत्ययस्वरेणोदात्तः ॥

॥ इति प्रथमस्य प्रथम एकादशो वर्गः ॥

युंजंतीति सूक्ते षष्ठीमृचमाह ॥

देवयंतो यथा मतिमच्छा विदद्वसुं गिरः । महामनूषत श्रुतं ॥ ६ ॥

देवऽयंतः । यथा । मतिं । अच्छ । विदत्ऽवसुं । गिरः । महां । अनूषत । श्रुतं ॥ ६ ॥

देवयंतो मरुत्संज्ञकान्देवानिच्छंतो गिरः स्तोतार ऋत्विजो महां प्रौढं मरुद्गणमच्छ प्राप्तुमनूषत । स्तुतवंतः । कीदृशं मरुद्गणं । विदद्वसुं । वेदयद्भिः स्वमहिमप्रख्यापकैर्वसुभिर्धनैर्युक्तं । श्रुतं । विख्यातं । मरुद्गणस्य दृष्टांतः । यथा मतिं । मंतारमिंद्रं यथा स्तुवंति तथेत्यर्थः ॥ देवयंतः । देवानात्मन इच्छंतः । सुप आत्मनः क्यच् । पा॰ ३. १. ८. । क्यचि च । पा॰ ७. ४. ३३. । इतीत्वम- कृत्सार्वधातुकयोर्दीर्घः । पा॰ ७. ४. २५. । इति दीर्घत्वं च न भवति । न छंदस्य- पुत्रस्य । पा॰ ७. ४. ३५. । इत्यनेन क्यचि यत्प्राप्तमीत्वं दीर्घत्वं वा तस्य सर्वस्य प्रतिषेधात् । यद्यपीत्वमेव प्रकृतं तथापि व्यवहितस्यापि दीर्घत्वस्य स प्रतिषेध इति विज्ञायते । अश्वायंत इत्यादावश्वाघस्यात् । पा॰ ७. ४. ३७. । इत्यात्वविधा- नादिति युक्तं । क्यजंताच्छतृप्रत्ययः । क्यचश्चित्त्वाच्चित इत्यंतोदात्तत्वं । शपः पित्त्वेन शतुश्च लसार्वधातुकस्वरेणानुदात्तत्व एकादेश उदात्तेनोदात्त इत्यु- दात्तः । यथा । प्रकारवचने थाल् । पा॰ ५. ३. २३. । लितीति प्रत्ययात्पूर्व- मुदात्तत्वं । मतिं । मंत्रे वृषेषपचमनेत्यादिना । पा॰ ३. ३. ९६. । क्तिन्नुदात्तः । मतिशब्दो ज्ञानपरोऽप्युपचाराज्ज्ञातरींद्रे वर्तते । अथवा पदांतरे विशेष्यानु- पादानादिंद्रस्यैषा संज्ञा । ततश्च क्तिच्क्तौ च संज्ञायां । पा॰ ३. ३. १७४. । इति मन्यतेः कर्तरि क्तिच् । तस्योपदेशेऽनुदात्तत्वादिट्प्रतिषेधः । पा॰ ७. २. १०. । चित्त्वादंतोदात्तत्वं । अच्छ । अध्याहृतगच्छत्यर्थयोगादच्छ गत्यर्थवदेषु । पा॰ १. ४. ६९. । इति गतिसंज्ञया सह निपातसंज्ञाया अपि समावेशात् । पा॰ १. ४. ६०. । निपाता आद्युदात्ताः । फि॰ ४. १२. । इत्याद्युदात्तत्वं । विदद्वसुं । विद ज्ञान इत्यस्मादंतर्भावितण्यर्थाच्छतृप्रत्यये विदंत्यौदार्यातिशयवत्तया ज्ञापयंति वसूनि धनानि यं स विदद्वसुः । विदेः शतृप्रत्ययेऽदिप्रभृतिभ्यः शपः । पा॰ २. ४. ७२. । इति शपो लुकि प्रत्ययस्वरेण शतुरुदात्तत्वं । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन तदेव शिष्यते । गृणंति स्तुवंतीति गिरः । गृणातेः क्विप्यृत इद्धातोः । पा॰ ७. १. १००. । इतीत्वं । रपरत्वं । धातुस्वरेणोदात्तत्वं । महां । महांतं । नकारत-

कारयोर्लोपश्छांदसः । प्रातिपदिकस्वरेणोदात्तत्वं । अनूषत । णु स्तुतौ । व्यत्ययेनात्मनेपदं । लुङि कुस्यादादेशः । पा० ७. १. ५. । सिचि कुटादित्वेन । पा० १. २. १. । ङित्त्वाद्गुणाभावः । इड्भाव उकारदीर्घत्वं च छांदसं । निघातः । श्रुतं । प्रत्ययस्वरः ॥

सप्तमीमृचमाह ॥

इंद्रे॑ण॒ सं हि दृक्ष॑से संज॒ग्मा॒नो अबि॑भ्युषा । मं॒दू स॑मा॒नव॑र्चसा ॥ ७ ॥

इंद्रे॑ण । सं । हि । दृक्ष॑से । सं॒ऽज॒ग्मा॒नः । अबि॑भ्युषा । मं॒दू इति॑ । स॒मा॒नऽव॑र्चसा ॥ ७ ॥

हे मरुद्गण त्वमिंद्रेण संजग्मानः संगच्छमानः संदृक्षसे हि । सम्यग्दृश्येथाः खलु । अवश्यमस्माभिर्द्रष्टव्य इत्यर्थः । कीदृशेनेंद्रेण । अबिभ्युषा । भीतिरहितेन । कीदृशाविंद्रमरुद्गणौ । मंदू । नित्यप्रमुदितौ । समानवर्चसा । तुल्यदीप्ती । पुरा कदाचिद्वृत्रवधदशायामिंद्रस्य सखायः सर्वे देवा वृत्रश्वासेनापसारिताः । तदानीमिंद्रस्य वृत्रसंबंधिसकलसेनाजयार्थं मरुद्भिः संगमोऽभूत् । सोऽयमर्थो वृत्रस्य त्वाश्वसथादिति मंत्रे संगृहीतः । इंद्रो वै वृत्रं हनिष्यन्निति ब्राह्मणे प्रपंचितश्च ॥ इंद्रशब्दः परमैश्वर्यवंतं मरुद्गणं वाभिधत्ते । तदानीमिंद्रस्य संबोधनं बहिरेवाध्याहर्तव्यं । तथा चेयमृग्यास्केन व्याख्याता । इंद्रेण हि संदृश्यसे संगच्छमानोऽबिभ्युषा गणेन मंदू मदिष्णू युवां स्थोऽपि वा मंदुना तेनेति स्यात्समानवर्चसेत्येतेन व्याख्यातं । नि० ४. १२. । इति ॥ संदृक्षसे । संपश्येथाः । दृशेश्चेति वक्तव्यं । पा० १. ३. २९. २. । इत्यात्मनेपदं । दृशेर्लिङर्थे लेट् । पा० ३. ४. ७. । इति प्रार्थनायां लेट् । थासः से । पा० ३. ४. ८०. । लेटोऽडाटौ । पा० ३. ४. ९४. । इत्यडागमः । सिब्बहुलं लेटि । पा० ३. १. ३४. । इति सिप् । संज्ञापूर्वको विधिरनित्य इति गुणाभावः । व्रश्चादिना षत्वं । पा० ८. २. ३६. । षढोः कः सि । पा० ८. २. ४१. । इति कत्वं । आदेशप्रत्यययोः । पा० ८. ३. ५९. । इति सिपः षत्वं । बहुलग्रहणात्सिपः परस्ताच्छबपि भवति । सिपा व्यवधानात्पश्यादेशो न भवति । पा० ७. ३. ७८. । शपः पित्त्वादनुदात्तत्वं । उत्तरस्य लसार्वधातुकानुदात्तत्वं । धातुस्वर एव शिष्यते । हिशब्दयोगात्तिङ्ङतिङ इति निघातो न भवति । हि च । पा० ८. १. ३४. । इति प्रतिषेधात् । संजग्मानः । गमेः संपूर्वाच्छंदसि लुङ्लङ्लिटः । पा० ३. ४. ६. । इति वर्तमाने लिट् । समो गम्यृच्छिभ्यां । पा० १. ३. २९. । इत्यात्मनेपदविधानाल्लिटः कानजादेशः । पा० ३. २. १०६. । द्विर्भावः

। पा० ६. १. ८. । हलादिःशेषः । पा० ७. ४. ६०. । अभ्यासस्य चुत्वं । पा० ७. ४. ६२. । गमहनेत्युपधालोपः । पा० ६. ४. ९८. । कानचश्चित्त्वादंतोदात्तत्वं । गतिसमासे कृदुत्तरपदप्रकृतिस्वरत्वं । अबिभ्युषा । ञिभी भये । पूर्ववल्लिट् । शेषात्कर्तरि परस्मैपदं । पा० १. ३. ७८. । इति परस्मैपदं । क्वसुश्च । पा० ३. २. १०७. । इति लिटः क्वसुरादेशः । तस्य कित्त्वाद्गुणाभावः । द्विर्भावः । अभ्यासस्य ह्रस्वजश्त्वे । । पा० ७. ४. ५९. ८. ४. ५४. । क्रादिनियमात् । पा० ७. २. १३. । प्राप्त इड्वस्वेकाजाद्घसां । पा० ७. २. ६७. । इति नियमान्निवर्तते । नञ्समासे तृतीयैकवचने भत्वाद्वसोः संप्रसारणं । पा० ६. ४. १३१. । इति वकारस्योकारः । संप्रसारणाच्च । पा० ६. १. १०८. । इति पूर्वरूपत्वं । शासिवसिघसीनां च । पा० ८. ३. ६०. । इति षत्वं । इयङादेशं बाधित्वेरनेकाचोऽसंयोगपूर्वस्य । पा० ६. ४. ८२. । इति यणादेशः । अव्ययपूर्वपदप्रकृतिस्वरत्वं । पूर्वेण सह संहितायामोकारस्यैङः पदांतादति । पा० ६. १. १०९. । इति परपूर्वत्वे प्राप्ते प्रकृत्यांतःपादमव्यपरे । पा० ६. १. ११५. । इति प्रकृतिभावः । मंदू । मदि स्तुतिमोदमदस्वप्नकांतिगतिषु । इदितो नुम् धातोः । पा० ७. १. ५८. । इति नुमागमः । कुरित्यनुवृत्तौ खरुशंकुपीयुनीलंगुलिगु । उ० १. ३६. । इत्यचाविभक्तिकनिर्देशाद्दतेर्हिगुरितिवद्धात्वंतरादपि कुरित्युक्तं । प्रत्ययस्वरेणांतोदात्तः । द्विवचनमौ । प्रथमयोः पूर्वसवर्णः । पा० ६. १. १०२. । तृतीयैकवचने चेत् सुपां सुलुगित्यादिना पूर्वसवर्णदीर्घत्वं । समानवर्चसा । समानं वर्चो ययोरिति वा यस्येति वा बहुव्रीहिः । द्विवचने सुपां सुलुगित्यादिनाकारादेशः । समानपादस्य प्रातिपदिकांतोदात्तत्वं । बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण तदेव शिष्यते ॥

अष्टमीमृचमाह ॥

अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति । गणैरिंद्रस्य काम्यैः ॥ ८ ॥

अनवद्यैः । अभिद्युऽभिः । मखः । सहस्वत् । अर्चति । गणैः । इंद्रस्य । काम्यैः ॥ ८ ॥

मखः प्रवर्तमानोऽयं यज्ञोऽनवद्यैर्दोषरहितैरभिद्युभिर्द्युलोकमभिगतैः काम्यैः फलप्रदत्वेन कामयितव्यैर्गणैर्मरुत्समूहैः सहितमिंद्रस्येंद्रं सहस्वद्बलोपेतं यथा भवति तथार्चति । पूजयति । अयं यज्ञो मरुत इंद्रं चातिशयेन प्रीणयतीत्यर्थः । यज्ञ इत्यादिषु पंचदशसु यज्ञनामसु मखो विष्णुरिति पठितं । चतुश्चत्वारिंशत्स्वर्चतिकर्मस्वर्चति गायतीति पठितं ॥ न विद्यतेऽवद्यं येषां

तेऽनवद्याः । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । अभिगता द्यौर्यैस्तेऽभिद्यवः । तैरभिद्युभिः । अभिशब्दः प्रातिपदिकस्वरेणांतोदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण स एव शिष्यते । मखः । प्रातिपदिकस्वरः । सहो बलमस्मिन्नर्चने शर्मण्यस्तीति सहस्वत् । तसौ मत्वर्थे । पा० १. ४. १९. । इति भसंज्ञया पदसंज्ञाया बाधितत्वात्सकारस्य रुत्वाभावः । मादुपधायाश्च मतोर्वोऽयवादिभ्यः । पा० ८. २. ९. । इति वा झयः । पा० ८. २. १०. । इति वा मतुपो मस्य वत्वं । सहस्शब्दो नब्विषयस्यानिसंतस्येत्याद्युदात्तः । मतुपः पित्त्वात्स एव शिष्यते । काम्यैः । कमेर्णिङ् । अत उपधायाः । पा० ७. २. ११६. । इति वृद्धिः । जनी जृष् क्नसु रंजोऽमंताश्च । धा० पा० १९. ६३. ६७. । इत्यमंतत्वेन प्राप्तस्य मित्त्वस्य न कम्यमि चमामिति प्रतिषेधात् । धा० पा० १९. ६९. । मितां ह्रस्वः । पा० ६. ४. ९२. । इत्युपधाह्रस्वत्वं न भवति । ण्यंतादचो यत् । पा० ३. १. ९७. । णिलोपः । पा० ६. ४. ५१. । तित्स्वरितमिति प्राप्ते यतोऽनावः । पा० ६. १. २१३. । इत्याद्युदात्तत्वं ॥

नवमीमृचमाह ॥

अतः परिज्मन्नागहि दिवो वा रोचनादधि । समस्मिन्नृंजते गिरः ॥ ९ ॥

अतः । परिऽज्मन् । आ । गहि । दिवः । वा । रोचनात् । अधि । सं । अस्मिन् । ऋंजते । गिरः ॥ ९ ॥

हे परिज्मन् परितो व्यापिन्मरुद्गण । अतोऽस्मान्मरुद्गणस्थानादंतरिक्षादागहि । अस्मिन्कर्मण्यागच्छ । दिवो वा । द्युलोकाद्वा समागच्छ । रोचनादधि । दीप्यमानादादित्यमंडलाद्वा समागच्छ । अस्मदीयकर्मकाले यत्र यत्र तिष्ठसि ततः सर्वस्मादागच्छेत्यर्थः । किमर्थमागमनमिति तदुच्यते । अस्मिन्कर्मणि वर्त्तमान ऋत्विग्गिरः स्तुतीः समृंजते । सम्यक् प्रसाधयति । ऋंजतिः प्रसाधनकर्मेति यास्कः । एताः स्तुतीः श्रोतुमागच्छेत्यर्थः । यद्यप्यृत्विजा मंत्रस्य प्रयुज्यमानत्वादृंजतिधातोरुत्तमपुरुषेण भवितव्यं । तथापि परोक्षकृतत्वेन निर्देशात्प्रथमपुरुषप्रयोगः । परोक्षकृतलक्षणं च यास्क आह । तास्त्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृता आध्यात्मिक्यश्च । तत्र परोक्षकृताः सर्वाभिर्नामविभक्तिभिर्युज्यंते प्रथमपुरुषैश्चाख्यातस्येति ॥ अतः । पंचम्यास्तसिल् । पा० ५. ३. ७. । एतदोऽश् । पा० ५. ३. ५. । शित्त्वात्सर्वादेशः । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । परिज्मन् । अज गतिक्षेपणयोः । अन्येभ्योऽपि दृश्यंते । पा० ३. २. ७५. । इति मनिन् । अकारलोपश्छांदसः ।

आमंत्रितनिघातः। गहि। गमेर्बहुलं छंदसि। पा० २. ४. ७३.। इति शपो लुक्। हेर्ङित्त्वादनुदात्तोपदेशेत्यादिना। पा० ६. ४. ३७.। मलोपः। अतो हेः। पा० ६. ४. १०५.। इति हिलोपो न भवति तस्मिन्कर्तव्येऽसिद्धवदत्रा भात्। पा० ६. ४. २२.। इति मलोपस्यासिद्धत्वेनानकारांतत्वात्। दिवः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। वा। चादयोऽनुदात्ताः। फि० ४. १५.। इत्यनुदात्तः। रोचनात्। रुच दीप्तौ। अनुदात्तेतश्च हलादेः। पा० ३. २. १४९.। इति युच्। युवोरनाकौ। पा० ७. १. १.। इत्यनादेशः। चितित्यंतोदात्तः। अधि। अधिपरी अनर्थकौ। पा० १. ४. ९३.। इति कर्मप्रवचनीयत्वेन सह निपातसंज्ञायाः समावेशान्निपाता आद्युदात्ता इत्याद्युदात्तः। अस्मिन्। परिज्मन्नित्यादिष्वस्यैवान्वादेशादिदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ। पा० २. ४. ३२.। इत्यश् अनुदात्तः। शित्त्वात्सर्वादेशः। विभक्तिरनुदात्ता सुप्पितौ। पा० ३. १. ४.। इत्यनुदात्तेति सर्वानुदात्तत्वं। ऋंजते। ऋजि भृजी वर्जने। अस्मिन्नुपसर्गयोगात्प्रसाधने वर्तते। निघातः। गिरः। प्रातिपदिकस्वरः॥

दशमीमृचमाह॥

इतो वा सातिमीमहे दिवो वा पार्थिवादधि। इंद्रं महो वा रजसः॥१०॥

इतः। वा। सातिं। ईमहे। दिवः। वा। पार्थिवात्। अधि। इंद्रं। महः। वा। रजसः॥१०॥

इंद्रं देवं प्रति सातिं धनदानमधीमहे। आधिक्येन याचामहे। कस्माल्लोकादिति तदुच्यते। इतोऽस्मादभिदृश्यमानात्पार्थिवात्पृथिवीलोकाद्वा। दिवो वा॰। द्युलोकाद्वा। महो महतः प्रौढाद्रजसो वा। पक्ष्यादीनां रंजकादंतरिक्षलोकाद्वा। अयमिंद्रो यतःकुतश्चिदानीयास्मभ्यं धनं प्रयच्छत्वित्यर्थः। सप्तदशसु याञ्चाकर्मस्वीमहे यामीति पठितं॥ इतः। इदम्शब्दात्पंचम्यास्तसिल्। इदम इश्। पा० ५. ३. ३.। इतीश्। शित्त्वात्सर्वादेशः। अनोडिदमित्यस्यावकाशः। आभ्यां। एभिः। पा० ६. १. १७१.। लितीत्यस्यावकाशः। पा० ६. १. १९३.। पचनं पाचकः। उभावपि नित्यौ। तत्र परत्वाद्विप्रतिषेधे परं कार्यमिति लितीतीकारस्योदात्तत्वं। पश्चात्तसेः प्राग्दिशो विभक्तिः। पा० ५. ३. १.। इति विभक्तिसंज्ञत्वादूडिदमित्यादिनाऽसर्वनामस्थानविभक्तेरुच्यमानमुदात्तत्वं भवति। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेत्यूडिदमित्यस्य पुनरप्रवृत्तिरेवेति चेत्। न।

लक्ष्यानुरोधेन पुनः प्रसंगविज्ञानं चेति स्वीकारात्। नन्वेवं यतस्तत इत्यादावपि परेण लित्स्वरेण बाधितमपि सावेकाच इति तसिल उदात्तत्वं स्यादिति चेत्। न। यत्तच्छब्दयोः सावववर्णांतत्वे न गोश्वन्सावववर्णेति। पा० ६. १. १८२.। निषेधात्। न च पुनः प्रसंगविज्ञानं चेत्येतत्सार्वत्रिकं लक्ष्यानुरोधेन क्वचिदेव तदाश्रयणादिति। सातिं। षण दाने। धात्वादेः षः सः। पा० ६. १. ६४.। भावे क्तिन्। जनसनखनां सञ्झलोः। पा० ६. ४. ४२.। इति नकारस्यात्वं। तितुत्रतथसिसुसरकसेषु च। पा० ७. २. ९.। इति निषेधादिण् न भवति। नित्स्वरे प्राप्त उदात्त इत्यनुवृत्तावूतियूतिजूतिसातिहेतिकीर्तयश्चेति निपातनादंतोदात्तत्वं। ईमहे। ईङ् गतौ। श्यनोऽपि बहुलं छंदसीति लुक्। अस्य धातोर्ङित्त्वात्तास्यनुदात्तेन्ङिद्‌दुपदेशात्। पा० ६. १. १८६.। इति लसार्वधातुकस्यानुदात्तत्वे धातुस्वर एव शिष्यते। न च तिङ्ङतिङः इति निघातः। चवायोगे प्रथमा। पा० ८. १. ५९.। इति निषेधात्। उत्तरवाक्ययोरपि हि वाशब्दयोगादन्यथा वाक्यापरिपूर्तेस्तिङ्विभक्तेरवश्यमध्याहारात्तदपेक्षयैषा प्रथमा तिङ्विभक्तिरिति। दिवः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। पार्थिवात्। प्रथ प्रख्याने। प्रथत इति पृथिवी। प्रथेः षिवन्संप्रसारणं च। उ० १. १४९.। इति षिवनप्रत्ययः। षिद्गौरादिभ्यश्च। पा० ४. १. ४१.। इति ङीष्। प्रत्ययस्वरेणांतोदात्तः। शेषनिघातेनानुदात्तादिः पृथिवीशब्दः। पृथिव्या विकार इत्यर्थे ओरञित्यनुवृत्तावनुदात्तादेश्च। पा० ४. ३. १४०.। इत्यञ्। यस्येति च। पा० ६. ४. १४८.। इतीकारलोपः। तद्धितेष्वचामादेः। पा० ७. २. ११७.। इत्यादिवृद्धी रपरत्वं। ञ्नित्यादिर्नित्यमित्याद्युदात्तः। अधि। निपातत्वादाद्युदात्तः। इंद्रं। रन्प्रत्ययांत आद्युदात्तः। महः। महत इत्यस्याकारतकारयोर्लोपश्छांदसः। सावेकाच इति विभक्तेरुदात्तत्वं। रजसः। नब्विषयस्यानिसंतस्येत्याद्युदात्तत्वं॥

॥ इति प्रथमस्य प्रथमे द्वादशो वर्गः॥

इंद्रमित्यादिकं दशर्चं यत्सूक्तं तत्सुरूपकृत्नुमित्यादिषु चतुर्थं। ऋषिश्छंदोदेवता विनियोगश्च पूर्ववत्। विशेषविनियोगस्तूच्यते। महाव्रते निष्केवल्यशस्त्रमिंद्रमिद्गाथिन इति सूक्तं। तथा च पंचमारण्यके सूचितं। गिरा गायत्रमिंद्रमिद्गाथिन इति। तथा चतुर्विंशेऽहनि ब्राह्मणाच्छंसिनः शस्त्र इंद्रमिद्गाथिन इति षळहस्तोत्रियस्तृचः। चतुर्विंशे होताजनिष्टेत्युपक्रम्यायाहि सुषुमा हि त इंद्र-

मिद्गाथिनो बृहत् । आ० ७.२.। इति सूत्रितत्वात् । अतिरात्रे प्रथमे पर्यायेऽच्छावाकशस्त्रेऽयमेव तृचोऽनुरूपः । सूत्रितं च । इंद्राय मद्वने सुतमिंद्रमिद्गाथिनो बृहत् । आ० ६.४.। इति ॥

तत्र प्रथमामृचमाह ॥

इंद्रमिद्गाथिनो बृहदिंद्रमर्केभिरर्किणः । इंद्रं वाणीरनूषत ॥ १ ॥

इंद्रं । इत् । गाथिनः । बृहत् । इंद्रं । अर्केभिः । अर्किणः । इंद्रं । वाणीः । अनूषत ॥ १ ॥

गाथिनो गीयमानसामयुक्ता उद्गातार इंद्रमिदिंद्रमेव बृहत् । त्वामिद्धि हवामहे । ऋ० वे० ४.७.२७.। इत्यस्यामृच्युत्पन्नेन बृहन्नामकेन साम्नानूषत । स्तुतवंतः । अर्किणोऽर्चनहेतुमंत्रोपेता होतारोऽर्केभिर्ऋग्रूपैर्मंत्रैरिंद्रमेवानूषत । ये त्ववशिष्टा अध्वर्यवस्ते वाणीर्वाग्भिर्यजूरूपाभिरिंद्रमेवानूषत । अर्कशब्दस्य मंत्रपरत्वं यास्केनोक्तं । अर्को मंत्रो भवति यदनेनार्चंति । नि० ५.५.। इति । श्लोक इत्यादिषु सप्तपंचाशत्सु वाङ्नामसु वाणी वाणीति पठितं ॥ गाथिनः । उषिकुषिगार्तिभ्यस्थन् । उ० २.४.। इति गायतेस्थन्प्रत्ययः । नित्त्वादाद्युदात्तः । गाथा एषां संतीति गाथिनः । व्रीह्यादिभ्यश्च । पा० ५.२.११६.। इतीनिः । प्रत्ययस्वरेणेकार उदात्तः । स च सति शिष्टः । बृहत् । बृहता । तृतीयैकवचनस्य सुपां सुलुगिति लुक् । पृषद्बृहन्महज्जगच्छतृवत् । उ० २.८१.। इत्यंतोदात्तो निपातितः । अर्केभिः । अर्च पूजायां । अर्च्यंत एभिरित्यर्का मंत्राः । पुंसि संज्ञायां घः प्रायेण । पा० ३.३.११८.। इति घः । चजोः कु घिण्ण्यतोः । पा० ७.३.५२.। इति कुत्वं । प्रत्ययस्वरेणांतोदात्तः । बहुलं छंदसि । पा० ७.१.१०.। इति भिस ऐसादेशो न भवति । अर्का स्तुतिसाधनभूता मंत्रा एषां संतीत्यर्किणः । वाणीः । वृषादीनां च । पा० ६.१.२०३.। इत्याद्युदात्तः । दीर्घाज्जसि च । पा० ६.१.१०५.। इति पूर्वसवर्णदीर्घनिषेधस्य वा छंदसि । पा० ६.१.१०६.। इति विकल्पितत्वाद्दीर्घत्वं । तृतीयार्थे प्रथमा । अनूषत । णु स्तुतौ । णो नः । पा० ६.१.६५.। इति नत्वं । लुङि व्यत्ययेनात्मनेपदं । कुस्यादादेशः । पा० ७.१.५.। सिच इडभाव उकारस्य दीर्घत्वं च छांदसं । धातोः कुटादित्वात् । पा० १.२.१.। सिचो ङित्त्वेन । पा० १.१.५.। गुणाभावः ॥

द्वितीयामृचमाह ॥

इंद्र इद्धर्योः सचा संमिश्ल आ वचोयुजा । इंद्रो वज्री हिरण्ययः ॥ २ ॥

इंद्रः । इत् । हर्योः । सचा । सम्ऽमिश्लः । आ । वचःऽयुजा । इंद्रः । वज्री ।

हिरण्ययः ॥ २ ॥

इंद्र इदिंद्र एव हर्योर्हरिनामकयोरश्वयोः सचा सह युगपदा संमिश्लः सर्वतः सम्यग्मिश्रयिता । कीदृशोर्हर्योः । वचोयुजा । इंद्रस्य वचनमात्रेण रथे युज्यमानयोः सुशिक्षितयोरित्यर्थः । अयमिंद्रो वज्री वज्रयुक्तः । हिरण्ययः । हिरण्मयः सर्वाभरणभूषित इत्यर्थः ॥ हर्योः । हरत इति हरी । इन् । नित्त्वादाद्युदात्तः । सचा । सहेत्युक्तं । संमिश्लः । मिश्रणं मिश्रः । मिश्रयतेर्घञ् । पा० ३. ३. १८. । सम्यक् मिश्रो यस्यासौ संमिश्लः । लत्वं छांदसं । सम्यक् मिश्रयितेत्यर्थः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । वचोयुजा । वचसा युज्येते इति वचोयुजौ । तयोः । षष्ठीद्विवचनस्य सुपां सुलुगित्याकारादेशः । युजशब्दो धातुस्वरेणांतोदात्तः । कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते । वज्री । वज्रमस्यास्ति । अत इनिठनौ । प्रत्ययस्वरः । हिरण्ययः । ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छंदसि । पा० ६. ४. १७५. । इति हिरण्यमयशब्दस्य मकारलोपो निपात्यते । अकारः प्रत्ययस्वरेणोदात्तः । पूर्वेणानुदात्तेन सहैकादेश उदात्तेनोदात्त इत्युदात्तः ॥

तृतीयामृचमाह ॥

इंद्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि । वि गोभिरद्रिमैरयत् ॥ ३ ॥

इंद्रः । दीर्घाय । चक्षसे । आ । सूर्यं । रोहयत् । दिवि । वि । गोभिः । अद्रिं ।

ऐरयत् ॥ ३ ॥

अयमिंद्रो दीर्घाय प्रौढाय निरंतराय चक्षसे दर्शनाय दिवि द्युलोके सूर्यमारोहयत् । पुरा वृत्रासुरेण जगति यदाधानितं तमस्तन्निवारणेन प्राणिनां दृष्टिसिद्ध्यर्थमादित्यं द्युलोके स्थापितवानित्यर्थः । स च सूर्यो गोभिः स्वकीयरश्मिभिरद्रिं पर्वतप्रमुखं सर्वं जगद्व्यैरयत् । विशेषेण दर्शनार्थं प्रेरितवान् । प्रकाशितवानित्यर्थः । अथवा । इंद्र एव गोभिर्जलैर्निमित्तभूतैरद्रिं मेघं व्यैरयत् । विशेषेण प्रेरितवान् । पंचदशसंख्याकेषु रश्मिनामसु खेदयः किरणा गाव इति पठितं । त्रिंशत्संख्याकेषु मेघनामस्वद्रिर्ग्रावेति पठितं ॥ दीर्घाय । प्रातिपदिक-

स्वरेणांतोदात्तः । चक्षसे । चक्षेः सर्वधातुभ्योऽसुन्नित्यसुन् । बहुलग्रहणात्ख्या-ञादेशाभावः । नित्त्वादाद्युदात्तः । सूर्यं । सुवति प्रेरयतीति सूर्यः । षू प्रेरणे । धात्वादेः षः सः । राजसूयसूर्येत्यादिना । पा० ३. १. ११४. । क्यप्प्रत्ययः । तस्य रुडागमश्च निपात्यते । क्यपः कित्त्वाद्गुणाभावः । पित्त्वादनुदात्तत्वं । धातुस्वर एव शिष्यते । रोहयत् । रुहेर्ण्यंताल्लङि बहुलं छंदस्यमाङ्योगेऽपि । पा० ६. ४. ७५. । इत्यडभावो निघातश्च । दिवि । ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । अद्रिं । अदिशदिभूशुभिभ्यः क्रिन् । उ० ४. ६६. । इति क्रिन्प्रत्ययः । अदंति पशवस्तृणा-दिकमत्रेत्यद्रिः । नित्त्वादाद्युदात्तत्वं । ऐरयत् । ईर गतौ । ण्यंताल्लङ् । निघातः ॥

चतुर्थीमृचमाह ॥

इंद्र वाजेषु नोऽव सहस्रप्रधनेषु च । उग्र उग्राभिरूतिभिः ॥ ४ ॥

इंद्र । वाजेषु । नः । अव । सहस्रऽप्रधनेषु । च । उग्रः । उग्राभिः । ऊतिऽभिः ॥ ४ ॥

हे इंद्र । उग्रः शत्रुभिरप्रधृष्यस्त्वमुग्राभिरप्रधृष्याभिरूतिभिरस्मद्विषयरक्षा-भिर्वाजेषु युद्धेषु नोऽस्मानव । रक्ष । तथा सहस्रप्रधनेषु च । सहस्रसंख्याकग-जाश्वादिलाभयुक्तेषु महायुद्धेष्वपि रक्ष ॥ वाजेषु । वृषादीनां च । पा० ६. १. २०३. । इत्याद्युदात्तत्वं । नोऽव । नसः सकारस्य रुत्वोत्वगुणेषु प्रकृत्यांतःपादमिति प्रकृतिभावो न भवति । अव्यपर इति निषेधात् । पा० ६. १. ११५. । अव रक्षणे । तिङ्ङतिङ इति निघातः । यद्यपि सहस्रप्रधनेष्ववेत्यध्याहृतां क्रियामपेक्ष्य प्रथ-मायाः श्रूयमाणाया अवेति क्रियायाश्चवायोगे प्रथमा । पा० ८. १. ५९. । इति निघातनिषेधः प्राप्तः । तथापि वाजेष्वित्यत्र चकारस्य लुप्तत्वाच्चादिलोपे विभाषा । पा० ८. १. ६३. । इति निषेधस्य विकल्पितत्वादत्र निघातः प्रवर्तते । सहस्रशब्दः कर्दमादीनां च । फि० ३. १०. । इति मध्योदात्तः । सहस्रप्रधनेषु वाजेषु । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । उग्रः । उच समवाये । चस्य गः । ऋज्रेंद्रेति रन् । व्यत्ययेनांतोदात्तः । ऊतिभिः । ऊतियूतीत्यादिना क्तिन्नुदात्तः ॥

पंचमीमृचमाह ॥

इंद्रं वयं महाधन इंद्रमर्भे हवामहे । युजं वृत्रेषु वज्रिणं ॥ ५ ॥

इंद्रं । वयं । महाऽधने । इंद्रं । अर्भे । हवामहे । युजं । वृत्रेषु । वज्रिणं ॥ ५ ॥

वयमनुष्ठातारो महाधने प्रभूतधननिमित्तमिंद्रं हवामहे । आह्वयामः ।

अर्भेऽर्भके स्वल्पेऽपि धने निमित्तभूते सतींद्रं हवामहे । कीदृशमिंद्रं । युजं । सहकारिणं समाहितं वा । वृत्रेषु शत्रुषु धनलाभविरोधिषु प्राप्तेषु तन्निवारणाय वज्रिणं वज्रोपेतं ॥ महाधनशब्दो यद्यपि संग्रामनामसु पठितस्तथापि महाधनवचनमत्र संग्राम इति बहुव्रीहित्वे सत्यंतोदात्तत्वासिद्धेर्नात्र तद्गृहीतं । महाधने महच्च धनं चेति समासस्येत्यंतोदात्तः । अर्भे । अर्तिगृभ्यां भन् । उ० ३. १५०. । नित्त्वादाद्युदात्तः । हवामहे । ह्वेञ् स्पर्द्धायां शब्दे च । जित्त्वात्कर्त्रभिप्राये । पा० १. ३. ७२. । आत्मनेपदं । लटः स्थाने महिङ् । टित आत्मनेपदानां । पा० ३. ४. ७९. । इति टेरेत्वं । कर्तरि शप् । पा० ३. १. ६८. । ह्वः संप्रसारणं । पा० ६. १. ३२. । इत्यनुवृत्तौ बहुलं छंदसि । पा० ६. १. ३४. । इति संप्रसारणं । वकारस्योकारः । परपूर्वत्वं । गुणावादेशौ । अतो दीर्घो यञि । पा० ७. ३. १०१. । इति दीर्घत्वं । तिङ्ङतिङ इति निघातः । युजं । युज समाधावित्यस्य क्विप् । युजेरसमासे । पा० ७. १. ७१. । इति नुम् न भवति । स हि युजेरिति निर्देशादिकाररहितस्य न भवति । अनित्यमागमशासनमिति वा युजियोग इत्यस्यापि नुम् न भवति । वृत्रेषु । वृतु वर्तने । प्रतिकूलतया वर्तत इति वृत्राणि शत्रुकुलानि । स्फायितंचीत्यादिना रक्प्रत्ययः । उ० २. १३. । कित्त्वाद्गुणाभावः । प्रत्ययस्वरः । वज्रिणं । अत इनिठनाविती नः प्रत्ययस्वरः ॥

॥ इति प्रथमस्य प्रथमे त्रयोदशो वर्गः ॥

इंद्रमिद्गाथिन इति सूक्ते षष्ठीमृचमाह ॥

स नो॑ वृषन्न॒मुं च॒रुं सत्रा॑दाव॒न्नपा॑ वृधि । अ॒स्मभ्य॒मप्र॑तिष्कुतः ॥ ६ ॥

सः । नः॒ । वृ॒ष॒न् । अ॒मुं । च॒रुं । सत्रा॑ऽदावन् । अप॑ । वृ॒धि॒ । अ॒स्मभ्यं॑ । अप्र॑तिऽस्कुतः ॥ ६ ॥

हे सत्रादावन् । अस्मदभीष्टानां सर्वेषां फलानां सह प्रदातः । अतो व्रीह्यादिनिष्पत्त्यर्थं हे वृषन् वृष्टिप्रदेंद्र नोऽस्मदर्थममुं दृश्यमानं चरुं मेघमपावृधि । उद्घाटय । तथैवास्मभ्यमस्मदर्थमप्रतिष्कुतः प्रतिशब्दरहितः । यद्यदस्माभिर्याच्यते तत्र सर्वत्र नेति प्रतिशब्दं नोच्चारयति । अतोऽस्मद्विषये कदाचिदप्यप्रतिस्खलितः । एतदेवाभिप्रेत्य यास्क आह । अप्रतिष्कुतोऽप्रतिष्कृतोऽप्रतिस्खलितो वेति ॥ वृषन् । आमंत्रितनिघातः । अमुं । प्रातिपदिकस्वरेणांतोदात्तः । चरुं ।

चरतीति चरुः। भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः। उ० १.७.। इत्यु-प्रत्ययः। प्रत्ययस्वरेणांतोदात्तः। सचादावन्। सचाशब्दः सहार्थे। अभिमत-फलजातं सकलं सह ददातीति सचादावा। आतो मनिन्क्वनिब्वनिपश्च। पा० ३.२.७४.। इति वनिप्। आमंत्रितस्य चेत्युदात्तत्वं। पादादित्वान्न निघातः। अप। निपातस्य चेति दीर्घः। निपात आद्युदात्तः। वृधि। वृञ् वरणे। लोटः सिप्। तस्य सेर्ह्यपिच्च। पा० ३.४.८७.। इति हिः। स्वादिभ्यः श्नुः। पा० ३.१.७३.। तस्य बहुलं छंदसीति लुक्। श्रुशृणुपृकृवृभ्यश्छंदसि। पा० ६.४.१०२.। इति हेर्धिरादेशः। तस्य ङित्वात्पूर्वस्य गुणाभावः। निघातः। अस्मभ्यं। अस्मच्छब्दाद्भ्यसो भ्यं। पा० ७.१.३०.। इति भ्यमादेशः। शेषे लोपः। पा० ७.२.९०.। इति दकारलोपः। बहुवचने झल्येत्। पा० ७.३.१०३.। इत्येत्वं न भवति। अंगवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येत्युक्तं। म० भा० ७.१.३०.। प्रतिपदिकस्वरेण मेत्यकार उदात्तः। भ्यसोऽभ्यमित्यभ्यमादेशपक्षे शेषे लोप इति मपर्यंतशेष-स्यास्मदशब्दस्य लोपः। तदोदात्तनिवृत्तिस्वरेणाभ्यमादेरकारस्योदात्तत्वं। पा० ६.१.१६१.। अप्रतिष्कुतः। केनचिदप्रतिशब्दितः। कुङ् शब्दे। निष्ठेति कर्मणि क्तप्रत्ययः। प्रतेः प्राक्प्रयोगः। पारस्करादेराकृतिगणत्वात्सुडागमः। पा० ६.१.१५७.। सुषामादेराकृतिगणत्वात्षत्वं। पा० ८.३.९८.। नञ्समासेऽव्ययपूर्वपदप्रकृ-तिस्वरत्वं॥

सप्तमीमृचमाह॥

तुंजेतुंजे य उत्तरे स्तोमा इंद्रस्य वज्रिणः। न विंधे अस्य सुष्टुतिं॥७॥

तुंजेऽतुंजे। ये। उतऽतरे। स्तोमाः। इंद्रस्य। वज्रिणः। न। विंधे। अस्य। सुऽस्तुतिं॥७॥

तस्मिंस्तस्मिन्फलदातरि देवांतरे ये स्तोमाः स्तोत्रविशेषा उत्तर उत्कृष्टाः संति तैः स्तोमैः सर्वैरपि वज्रिणो वज्रयुक्तस्येंद्रस्य सुष्टुतिं योग्यां शोभनस्तुतिं न विंधे। न विंदामि। इंद्रस्यात्यंतगुणबाहुल्येन देवांतरेषूत्तमत्वेन प्रसिद्धान्यपि स्तोत्राणि न पर्याप्तानीत्यर्थः॥ एतामृचं यास्क एवं व्याचष्टे। तुंजस्तुंजतेर्दान-कर्मणः। दाने दाने य उत्तरे स्तोमा इंद्रस्य वज्रिणो नास्य तैर्विंदामि समाप्तिं स्तुतेः। नि० ६.१८.। इति॥ तुंजे तुंजे। तुंजतिर्दानकर्मेत्युक्तं। ततः कर्तरि प्रचाद्यच्। पा० ३.१.१३४.। चित इत्यंतोदात्तत्वं। नित्यवीप्सयोः। पा० ८.१.४.। इति

द्विर्भावः। तस्य परमाम्रेडितं। पा० ८. १. २.। इति द्वितीयस्याम्रेडितसंज्ञा। अनुदात्तं च। पा० ८. १. ३.। इत्यनुदात्तत्वं। दातरि दातरीत्यर्थः। निरुक्ते तु दाने दान इत्यर्थतो व्याख्यानं। उत्तरे। तॄ प्लवनतरणयोः। भावे ऋदोरप्। पा० ३. ३. ५७.। उच्छब्द उत्कृष्टवचनः। उत्कृष्टस्तरो यस्येति बहुव्रीहिः। उच्छब्दो निपाता आद्युदात्ता इत्याद्युदात्तः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। स्तोमाः। अर्तिस्तुस्वित्यादिना। उ० १. १३८.। स्तोमशब्दो मनंतो नित्त्वादाद्युदात्तः। विंधे। विदॢ लाभे। लट्। स्वरितेत्त्वादात्मनेपदं। उत्तमैकवचनमिट्। पा० ३. ४. ७८.। तुदादिभ्यः शः। पा० ३. १. ७७.। शे मुचादीनामिति नुम्। पा० ७. १. ५९.। दकारस्य व्यत्ययेन धकारः। अस्य। प्रकृतस्येंद्रस्य परामर्शादन्वादेश इदमोऽश्। पा० २. ४. ३२.। शित्त्वात्सर्वादेशोऽनुदात्तः। सुष्टुतिं। ष्टुञ् स्तुतौ। धात्वादेः षः सः। पा० ६. १. ६४.। इति सत्वं। स्त्रियां क्तिन्। पा० ३. ३. ९४.। इति भावे क्तिन्। स्वित्युदात्तेनोपसर्गेण प्रादिसमासः। उपसर्गात्सुनोतीत्यादिना षत्वं। पा० ८. ३. ६५.। अत्राव्ययपूर्वपदप्रकृतिस्वरत्वेन सोः प्राप्तमुदात्तत्वं बाधित्वा गतिकारकोपपदात्कृत्। पा० ६. २. १३९.। इत्युत्तरपदप्रकृतिस्वरेण धातोरुदात्तत्वे प्राप्ते तदपवादत्वेन तादौ च निति कृत्यतौ। पा० ६. २. ५०.। इत्यनंतरस्य गतिसंज्ञस्य सोरेवोदात्तत्वेन भवितव्यं। तत्तु मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः। पा० ६. २. १५१.। इत्युत्तरपदांतोदात्तत्वेन बाध्यते। तथा च सुहवां सुष्टुती हुवे। ऋ० वे० २. ७. १५.। वृष्णे चोदस्व सुष्टुतिं। ऋ० वे० ६. ५. २५.। यास्ते राके सुमतयः। ऋ० वे० २. ७. १५.। इत्यादावंतोदात्तत्वमित्याहुः। यथा तु मन्क्तिन्नित्यादौ वृत्तावुक्तं तथैव तन्न घटत इति लक्ष्यते। तत्र हि कारकाद्दत्तश्रुतयोरेवाशिषि। पा० ६. २. १४८.। इत्यतः कारकादित्यनुवृत्तेः पाणिनिकृतिरित्यादावेव मन्क्तिन्नित्यादिसूत्रमित्युक्तं। कारकादित्येव प्रकृतिः प्रहृतिरिति प्रत्युदाहृतं। स्यादेतत्। स्तूयतेऽनयेति स्तुतिरिति क्तिना कारणभूतर्गभिधीयते। सुशब्देन च करणमेव विशेष्यते न धात्वर्थः। तथा च सुष्टुतिरित्यत्र सुशब्दः कारकपर एव भविष्यति। प्रकृतिः प्रहृतिरित्यादौ तु प्रशब्दो धात्वर्थे विशेषणमेवेति तत्प्रत्युदाहरणोपपत्तिरिति। न। एवं सति सुशब्दस्य क्रियायोगाभावादुपसर्गाः क्रियायोगे। पा० १. ४. ५९.। इत्युक्ताऽउपसर्गसंज्ञा न स्यात्। तथा चोपसर्गात्सुनोतिसुवतीत्यादिना। पा० ८. ३. ६५.। षत्वं न स्यात्। ननु क्तिना करणमभिधीयते। क्रियासाधनं च करणं। तथा च करणविशेषणस्यापि सुशब्दस्य

करणांतर्गतक्रियायोगादुपसर्गता भविष्यतीति। न। तथा सति यत्क्रियायुक्तास्तं प्रत्युपसर्गसंज्ञका इति करोत्यर्थमेव प्रति सोरुपसर्गता न तु स्तुधात्वर्थं प्रतीत्यस्य षत्वं न स्यादेव। ननु स्तुधात्वर्थद्वारेव तत्करणस्य सुशब्दो विशेषणं भविष्यति। या हि शोभना स्तुतिस्तत्करणमपि शोभनमेवेति। एवं च स्तुधात्वर्थसंबंधात्तं प्रत्युपसर्गत्वेन षत्वमपि भविष्यतीति वृत्त्यविरोधेनैव मन्क्तिनादिसूत्रस्य सुष्टुतिशब्दो विषयो भविष्यति। प्रकृतिः प्रहृतिरित्यत्र भावे क्तिन्निति प्रत्युदाहृते इति। न। तत्र प्रशब्दस्य करणपरत्वं। करणे क्तिनुदाहरणेऽपि धात्वर्थमात्रविशेषणतैव विवक्षिता न तद्द्वारा प्रत्ययार्थविशेषणतापीति तत्प्रत्युदाहरणोपपत्तिरिति। सुष्टुतिरित्यत्र पुनः क्तिनभिधेयकरणपर्यंतं सुशब्दस्य व्यापार इत्युदाहरणतैव न प्रत्युदाहरणतेति। न। किमत्र सुशब्दः श्रुत्यैव प्रकृतिप्रत्ययार्थोभयविशेषणपरः। उत श्रुत्यैकं विशिनष्टि। अर्थादितरदिति। यदाप्युभयपरत्वं तदापि यौगपद्येन उत क्रमेणेति। आद्ये प्रति विशेष्यं विशेषणपदावृत्तिरिति प्रसंगः। द्वितीये विरम्य व्यापारापातः। न च शब्दबुद्धिकर्मणां विरम्य व्यापारः कस्यचिद्दृष्ट इष्टो वा। अतो न श्रुत्योभयपरत्वं। अथैकत्र श्रुत्या तात्पर्यं। अपरत्र त्वर्थादिति। तत्र धात्वर्थसंबंधस्यार्थिकत्वे षत्वासिद्धिः। प्रत्ययार्थसंबंधस्यार्थिकत्वे मन्क्तिन्नित्यादिस्वरासिद्धिः। आर्थिकेनापि कारकसंबंधेनोदाहरणत्वाभिधाने प्रकृतिः प्रहृतिरित्याद्युदाहरणं न स्यात्। श्रुत्या धात्वर्थमात्रसंबंधस्यापि प्रशब्दस्यार्थात्तत्करणसंबंधः केन वारयितुं शक्यत इत्येषा दिक्। अत इह प्रत्ययार्थमात्रसंबंधपरत्वांगीकारेण स्वरः सिध्यतु षत्वं तु छांदसमस्तु। शोभना स्तुतिर्यस्यामिति बहुव्रीहिर्वा भवतु। एवं च नञ्सुभ्यां। पा० ६.२.१७२.। इत्यंतोदात्तं भविष्यति। अथवा सुष्टु स्तुवंतीति सुष्टुतय इति करणभूता ऋचः स्तुतिशब्देनोच्यंते। क्तिच्क्तौ च संज्ञायां। पा० ३. ३. १७४.। इति क्तिच्प्रत्यये सति चित्त्वादंतोदात्तता भविष्यति। न च करणीभूतानामृचां कर्तृप्रत्ययेन क्तिचा कथमभिधानमिति वाच्यं। काष्ठानि पचंतीतिवत्तासामपि स्वव्यापारविवक्षया करणत्वोपपत्तेरिति॥

अष्टमीमृचमाह॥

वृषा॑ यू॒थेव॒ वंस॑गः कृ॒ष्टीरि॑य॒र्त्योज॑सा। ईशा॑नो॒ अप्र॑तिष्कुतः॥ ८॥

वृषा॑। यू॒थाऽइ॑व। वंस॑गः। कृ॒ष्टीः। इ॒य॒र्ति॒। ओज॑सा। ईशा॑नः। अप्र॑तिऽस्कुतः॥ ८॥

वृषा कामानां वर्षितेंद्र ओजसा स्वकीयबलेनानुग्रहीतुं कृष्टीर्मनुष्यानियर्ति।

प्राप्नोति। कीदृश इंद्रः। ईशानः। समर्थः। अप्रतिष्कुतः। प्रतिशब्दरहितः। याच्यमानं न परिहरतीत्यर्थः। इंद्रस्य दृष्टांतः। वंसगो वननीयगतिर्वृषभो यूथेव गोयूथानि यथा प्राप्नोति तद्वत् ॥ वृषा। कनिन्युवृषितक्षिधन्विराजिधृप्रतिदिवः। उ० १. १५५.। इति वर्षतेः कनिन्प्रत्ययः। कित्त्वाद्गुणाभावः। नित्त्वादाद्युदात्तः। यूथाऽइव। युवंति मिश्रीभवंतीति यूथानि। यु मिश्रणामिश्रणयोः। तिथपृष्ठगूथयूथप्रोथाः। उ० २. १२.। इति थप्रत्ययांतो निपातितः। निपातनाद्दीर्घत्वं। प्रत्ययस्वरेणाकार उदात्तः। शेश्छंदसि बहुलमिति लुक्। इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यं। पा० २. २. १८. १०.। इति समासेऽपि स एव स्वरः। वंसगः। पृषोदरादित्वादभिमतरूपस्वरसिद्धिः। पा० ६. ३. १०९.। कर्षतीति कृष्टयः। क्तिच्क्तौ च संज्ञायामिति क्तिच्। चित्त्वादंतोदात्तः। इयर्ति। ऋ सृ गतौ। तिप्। शपः श्लुः। श्लाविति द्विर्भावः। अभ्यासस्योरदत्वहलादिशेषौ। पा० ७.४. ६६. ६०.। अर्तिपिपर्त्योश्च। पा० ७.४.७७.। इत्यकारस्यऽइकारः। अभ्यासस्यासवर्णे। पा० ६.४.७८.। इतीयङादेशः। अंगस्य गुणो रपरत्वं। ओजसा। उब्जेर्बले बलोपश्च। उ० ४. १९३.। इत्यसुन्। तत्संनियोगेन बकारलोपः। लघूपधगुणः। नित्त्वादाद्युदात्तः। ईशानः। ईश ऐश्वर्ये। लटः शानच्। अदिप्रभृतिभ्यः शप इति शपो लुक्। चिदित्यंतोदात्तं बाधित्वानुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वेन धातुस्वर एव शिष्यते। अप्रतिष्कुतः। अप्रतिशब्दितः। कु शब्दे। कर्मणि क्तः। पारस्करादेराकृतिगणत्वात्सुडागमः। सुषामादित्वात्षत्वं। नञ्समासः। अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥

नवमीमृचमाह ॥

य एकश्चर्षणीनां वसूनामिरज्यति। इंद्रः पंच क्षितीनां ॥ ९ ॥

यः। एकः। चर्षणीनां। वसूनां। इरज्यति। इंद्रः। पंच। क्षितीनां ॥ ९ ॥

य इंद्रः स्वयमेक एव चर्षणीनां मनुष्याणामिरज्यति। ईष्टे। तथा वसूनां धनानामिरज्यति स इंद्रः पंच निषादपंचमानां क्षितीनां निवासार्हाणां वर्णानामनुग्रहीतेति शेषः ॥ एकः। इण् गतौ। इणभीकापाशल्यतिमर्चिभ्यः कन्। उ० ३. ४३.। इति कन्। बाहुलकात्कलोपाभावः। नित्त्वादाद्युदात्तत्वं। चर्षणीनां। प्रातिपदिकस्वरेणांतोदात्तः। अंतोदात्तादित्यनुवृत्तौ नामन्यतरस्यामिति विभक्तेरुदात्तत्वं। वसूनां। निदित्यनुवृत्तौ भृमृशीङ्तृचरित्सरितनिधनिमिमस्जिभ्य उः... शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबंधि-

मनिभ्यश्च । उ॰ १. १०. । इत्युप्रत्ययः । नित्वादाद्युदात्तः । इरज्यति । कंड्वादिष्विरज् ईर्षायां । अत्रैश्वर्यार्थः । कंड्वादिभ्यो यक् । पा॰ ३. १. २७. । प्रत्ययस्वरेणोदात्तः । पंच । पचि व्यक्तीकरणे । पंचेश्चेति कनिन् । नित्वादाद्युदात्तः । क्षितीनां । प्रातिपदिकस्वरेणांतोदात्तः । नामन्यतरस्यामिति विभक्तेरुदात्तत्वं ॥

आश्विनं शंसिष्यन्निंद्रं वो विश्वतस्परीति जुहुयात् । संस्थितेष्वाश्विनाय स्तुवत इति खंडे बण्महां असि सूर्येति द्वाभ्यामिंद्रं वो विश्वतस्परि । आ॰ ६. ५. । इति सूत्रितं ॥ चतुर्विंशेऽहनि प्रातःसवने ब्राह्मणाच्छंसिन इंद्रं वो विश्वतस्परीत्यारंभणीया । चतुर्विंश इत्युपक्रम्य ऋजुनीती नो वरुण इंद्रं वो विश्वतस्परि । आ॰ ७. २. । इति सूत्रितं । तामेतां दशमीमृचमाह ॥

इंद्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ।१०॥

इंद्रं । वः । विश्वतः । परि । हवामहे । जनेभ्यः । अस्माकं । अस्तु । केवलः ॥ १० ॥

हे ऋत्विग्यजमानाः । विश्वतः सर्वेभ्यो जनेभ्यः परि । उपर्यवस्थितमिंद्रं वो युष्मदर्थं हवामहे । आह्वयामः । अतः स इंद्रोऽस्माकं केवलोऽसाधारणोऽस्तु । इतरेभ्योऽप्यधिकमनुग्रहमस्मासु करोत्वित्यर्थः ॥ इंद्रं । रन्प्रत्ययांतो नित्वादाद्युदात्तः । वः । अनुदात्तं सर्वमित्यनुवृत्तौ बहुवचनस्य वस्नसौ । पा॰ ८. १. २१. । इति वस् । विश्वतः । लितीति प्रत्ययात्पूर्वमुदात्तं । परि । निपातत्वादाद्युदात्तः । संहितायां पंचम्याः परावध्यर्थे । पा॰ ८. ३. ५१. । इति विसर्जनीयस्य सत्वं । हवामहे । ह्वेञः शपि बहुलं छंदसीति संप्रसारणं । परपूर्वत्वं । गुणावादेशौ । जनेभ्यः । जन्यंत इति जनाः । जनयतेः कर्मणि घञ् । जनिवध्योश्च । पा॰ ७. ३. ३५. । इत्युपधाया वृद्ध्यभावः । ञित्वादाद्युदात्तत्वं । अस्माकं । अस्मच्छब्दोऽंतोदात्तः । शेषे लोप इत्यंतलोपपक्षे साम आकं । पा॰ ७. १. ३३. । इत्याकारेणैकादेश उदात्तः । टिलोपपक्ष उदात्तनिवृत्तिस्वरेणाकार उदात्तः । केवलः । वृषादेराकृतिगणत्वादाद्युदात्तः ॥

॥ इति प्रथमस्य प्रथमे चतुर्दशो वर्गः ॥

॥ इति प्रथमे मंडले द्वितीयोऽनुवाकः ॥

तृतीयेऽनुवाके चत्वारि सूक्तानि । तत्रेंद्र सानसिमित्यादिकं प्रथमं दशर्चं सूक्तं सुरूपकृत्नुमित्यादिषु षट्सु पंचमं । ऋष्यादयस्तु पूर्ववत् । विशेषविनियोगस्तु । महाव्रते निष्केवल्य औष्णिहतृचाशीतावेंद्र सानसिं रयिमित्यादिके द्वे सूक्ते ।

पंचमारण्यक औष्णिहतृचाशीतिरिति खंडे शौनकेन सूचितं । मुरूपकृत्नुमूतय इति त्रीण्येंद्र सानसिं रयिमिति द्वे इति ॥ अतिरात्रे प्रथमे पर्यायेऽच्छावाकशस्त्र एंद्र सानसिमिति सूक्तं । सूचितं च इंद्रमिन्नाथिनो बृहदेंद्र सानसिं । आ० ६. ४. । इति ॥ दर्शयाग इंद्रयाजिनः सान्नायस्यानुवाक्या । एंद्र सानसिं रयिमिति । उक्ता देवता इत्यस्मिन्खंड एंद्र सानसिं रयिं प्र ससाहिषे पुरुहूत शत्रून् । । आ० १. ६. । इति सूचितं । तस्मिन्सूक्ते तामेतां प्रथमामृचमाह ॥

एंद्र सानसिं रयिं सजित्वानं सदासहं । वर्षिष्ठमूतये भर ॥ १ ॥

आ । इंद्र । सानसिं । रयिं । सऽजित्वानं । सदाऽसहं । वर्षिष्ठं । ऊतये । भर ॥ १ ॥

हे इंद्र । ऊतयेऽस्मद्रक्षार्थं रयिं धनमाभर । आहर । कीदृशं रयिं । सानसिं । संभजनीयं । सजित्वानं । समानशत्रुजयशीलं । धनेन हि शूरान्भृत्यान्संपाद्य शत्रवो जीयंते । सदासहं । सर्वदा शत्रूणामभिभवहेतुं । वर्षिष्ठं । अतिशयेन वृद्धं प्रभूतमित्यर्थः ॥ सानसिं । वन षण संभक्तावित्यस्मादसिप्रत्ययो वृद्धिरंतोदात्तत्वं च सानसिवर्णसीत्यादिना । उ० ४. १०७. । निपात्यते । रयिं । प्रातिपदिकस्वरेणांतोदात्तः । सजित्वानं । समानानरीञ्जेतुं शीलमस्य । अन्येभ्योऽपि दृश्यंते । पा० ३. २. ७५. । इति क्वनिप् । उपपदसमासः । समानस्य छंदस्यमूर्धप्रभृत्युदर्केषु । पा० ६. ३. ८४. । इति समानस्य सभावः । कृदुत्तरपदप्रकृतिस्वरेण धातुस्वर एव शिष्यते । वृद्धशब्दादतिशायने तमबिष्ठनौ । पा० ५. ३. ५५. । इतीष्ठन् । प्रियस्थिरेत्यादिना । पा० ६. ४. १५७. । वृद्धशब्दस्य वर्षादेशः । इष्ठनो नित्त्वादाद्युदात्तत्वं । ऊतये । उदात्त इत्यनुवृत्तावूतियूतिजूतिसातीत्यादिना क्तिन्नुदात्तो निपातितः । भर । हृग्रहोर्भश्छंदसि । पा० ८. २. ३२. १. । इति हकारस्य भकारः । ते प्राग्धातोः । पा० १. ४. ८०. । इति धातोः प्राक्प्रयोक्तव्यस्याङो व्यवहिताश्च । पा० १. ४. ८२. । इति छंदसि व्यवहितप्रयोगः ॥

द्वितीयामृचमाह ॥

नि येन मुष्टिहत्यया नि वृत्रा रुणधामहै । त्वोतासो न्यर्वता ॥ २ ॥

नि । येन । मुष्टिऽहत्यया । नि । वृत्रा । रुणधामहै । त्वाऽऊतासः । निऽअर्वता । २ ॥

येन धनेन संपादितानां भटानां नि मुष्टिहत्यया नितरां मुष्टिप्रहारेण वृत्रा शत्रून्निरुणधामहै निरुद्धान्करवाम तादृशं धनमावहेत्यर्थः । त्वोतासस्त्वया रक्षिता

वयमर्वतास्मदीयेनाश्वेन निरुणधामहा इत्यनुषंगः। पदातियुद्धेनाश्वयुद्धेन च शत्रून्विनाशयामेत्यर्थः ॥ मुष्टिहत्यया। हनस्त च। पा० ३. १. १०८.। इति सुबंत उपपदे क्यप्। तत्संनियोगेन नकारस्य तकारः। कृदुत्तरपदप्रकृतिस्वरे प्राप्ते परादिश्छंदसि बहुलं। पा० ६. २. १९९.। इति बहुलग्रहणेन क्वचिच्चक्रेणाप्यंतोदात्तत्वाभिधानात्। पा० ६. २. १९९. १.। अंतोदात्तत्वं। नि। आख्यातसंबंधस्यापि नेरुपसर्गस्य व्यवहिताश्चेति व्यवहितप्रयोगः। वृत्रा। शेश्छंदसि बहुलमिति शेर्लोपः। नलोपः। रुणधामहै। आट्संयोगेन पित्त्वात्। पा० ३. ४. ९२.। श्नसोरल्लोपः। पा० ६. ४. १११.। इत्यकारलोपो न भवति। पित्त्वादेव चाख्यातस्यानुदात्तत्वेन विकरणस्य श्नम एवोदात्तत्वं शिष्यते। ननु तिङ्ङतिङः इति निघातेन भवितव्यं। न। द्वे ह्यत्र तिङ्विभक्ती। निविडया मुष्ट्या निरुणधामहा इत्यत्र मुख्या श्रुतैका। अर्वता निरुणधामहा इत्यत्रानुषक्ता द्वितीया। तयोः समुच्चयार्थश्चकारो लुप्यते। तेन चादिलोपे विभाषा। पा० ८. १. ६३.। इति प्रथमेयं तिङ्विभक्तिर्न निहन्यते। यथा नात्मना तृप्यति नान्यस्मै ददातीत्यत्र हि समुच्चयार्थस्य चशब्दस्य लोपात्तृप्यतीति प्रथमा तिङ्विभक्तिर्न निहन्यते ददातीति द्वितीया तु निहन्यत एव ॥ ननु तत्र द्वे तिङ्विभक्ती श्रूयेते। इह पुनरेकैव श्रुता। सैवोत्तरत्रानुषज्यते नान्या श्रूयत इति द्वितीयाभावात्कथमियं प्रथमा। न। अनुषंगलब्धद्वितीयापेक्षमपि प्राथम्यमुपजीव्य निघातनिषेधदर्शनात्। पुरोडाशं चाधिश्रयत्याज्यं च। प्रोक्षणीश्चासादयत्याज्यं चेत्यत्र ह्यधिश्रयत्यासादयतीत्याख्यातयोः प्रथमवाक्यद्वयश्रुतयोरुत्तरवाक्यद्वयेऽनुषंगमपेक्ष्यैव प्राथम्यस्वीकारेण चवायोगे प्रथमा। पा० ८. १. ५९.। इति निघातनिषेधो दृष्ट इति। त्वयोता रक्षितास्त्वोतासः। प्रत्ययोत्तरपदयोश्च। पा० ७. २. ९८.। इति मपर्यंतस्य त्वादेशे दकारलोपश्छांदसः। अवतेर्निष्ठायामिडभावश्च। ज्वरत्वरस्रिव्यविमवामुपधायाश्च। पा० ६. ४. २०.। इत्यूट्। एत्येधत्यूठ्सु। पा० ६. १. ८९.। इति वृद्ध्यभावश्छांदसः। तृतीया कर्मणि। पा० ६. २. ४८.। इति पूर्वपदप्रकृतिस्वरेणाकार उदात्तः। एकादेश उदात्तेनोदात्त इत्युदात्तः। अर्वता। अर्वति गच्छतीत्यर्वा। अर्व गतौ। अन्येभ्योऽपि दृश्यंत इति वनिप्प्रत्ययः। नेड्वशि कृति। पा० ७. २. ८.। इतीट्प्रतिषेधः। लोपो व्योर्वलि। पा० ६. १. ६६.। इति वकारलोपः। अर्वणस्त्रसावनञः। पा० ६. ४. १२७.। इति तकारः। वनिपः पित्त्वाद्धातुस्वर एव ॥

तृतीयामृचमाह ॥

इंद्र त्वोतास आ वयं वज्रं घना ददीमहि। जयेम सं युधि स्पृधः ॥ ३ ॥

इंद्र। त्वाऽऊतासः। आ। वयं। वज्रं। घना। ददीमहि। जयेम। सं। युधि। स्पृधः ॥ ३ ॥

हे इंद्र त्वोतासस्त्वया पालिता वयं घना घनं शत्रुप्रहरणायात्यंतं दृढं वज्रमायुधमाददीमहि। स्वीकुर्मः। तेन च वज्रेण युधि युद्धे स्पृधः स्पर्द्धमानाञ्छत्रून्संजयेम। सम्यक् जयेम ॥ त्वोतासः। उक्तं। वज्रं। वज व्रज गतौ। ऋज्रेंद्राग्रेत्यादिना रन्प्रत्ययांतो निपातः। घना। घनः काठिन्यं। तदस्यास्तीत्यर्शआदित्वादच्। चित्त्वादंतोदात्तः। सुपां सुलुगिति डादेशः। ददीमहि। डुदाञ् दाने। प्रार्थनायां लिङ्। क्रियाफलस्य कर्तृगामित्वात्स्वरितञितः। पा० १. ३. ७२। इत्यात्मनेपदोत्तमपुरुषबहुवचनं ददीमहि। जुहोत्यादित्वाच्छपः श्लुः। श्लाविति द्विर्भावः। लिङः सलोपोऽनंत्यस्य। पा० ७. २. ७९.। इति सलोपः। श्नाभ्यस्तयोरातः। पा० ६. ४. ११२.। इत्याकारलोपः। जयेम। शपः पित्त्वादनुदात्तत्वं। तिङश्च लसार्वधातुकस्वराद्धातुस्वर एव शिष्यते। छंदसि परेऽपि। पा० १. ४. ८१.। इति समः परः प्रयोगः। युधि। युध संप्रहारे। संपदादित्वाद्भावे क्विप्। सावेकाच इति विभक्तेरुदात्तत्वं। स्पर्धंत इति स्पृधः। स्पर्ध संघर्षे। क्विप्चेति क्विप्। बहुलं छंदसीति रेफस्य संप्रसारणमृकारः। अकारलोपश्च ॥

चतुर्थीमृचमाह ॥

वयं शूरेभिरस्तृभिरिंद्र त्वया युजा वयं। सासह्याम पृतन्यतः ॥ ४ ॥

वयं। शूरेभिः। अस्तृऽभिः। इंद्र। त्वया। युजा। वयं। ससह्याम। पृतन्यतः ॥ ४ ॥

वयं कर्मानुष्ठातारः शूरेभिः शौर्ययुक्तैरस्तृभिरायुधानां प्रक्षेप्तृभिर्भटैः संयुज्येमहीति शेषः। हे इंद्र तादृशभटसहिता वयं युजा सहायभूतेन त्वया पृतन्यतः सेनामिच्छतः शत्रून्सासह्याम। अतिशयेनाभिभवेम ॥ शूरेभिः। शु श्रु गतौ। क्रन्नित्यनुवृत्तौ शुषिचिमीनां दीर्घश्च। उ० २. २६.। इति क्रन्। कित्त्वाद्गुणाभावः। नित्त्वादाद्युदात्तत्वं। बहुलं छंदसीत्यैसो निषिद्धत्वाद्बहुवचने झल्येदित्येत्वं। सहयोगे तृतीयाबलाद्वयमित्यस्तत्पदसमभिव्याहाराच्च वयं संयुज्येमहीति गम्यं। विनापि सहशब्देन वृद्धो यूना। पा० १. २. ६५.। इति निपातनादिति ह्युक्तं। पा० २. ३. १९.। अस्तृभिः। शस्त्रास्त्रप्रक्षेपणशीलैः। तद्धर्मभिस्तत्साधुकारिभिर्वा। असु क्षेपणे।

तृन्निति ताच्छील्यादिषु तृन्। नित्त्वादाद्युदात्तः। रधादिभ्यश्च। पा॰ ७.२.४५.। इति विकल्पविधानादयं पक्ष इडभावः। वस्तुतस्तु रधादावभावात्तृन्तृचौ शंसिक्षदादिभ्यः। उ॰ २.९०.। इत्यनेनानिट् तृन्। त्वया युधसिभ्यां मदिक्। उ॰ १.१३७.। कित्त्वाद्गुणाभावः। युष्मदः प्रत्ययस्वरेणाकार उदात्तः। तृतीयैकवचनं टा। त्वमावेकवचने। पा॰ ७. २. ९७.। इति मपर्यंतस्य त्वादेशः। अतो गुणे। पा॰ ६. १. ९७.। इति पररूपत्वं। एकादेश उदात्तेनोदात्त इत्युदात्तः। युजा। अंचुयुजिक्रुंचां च। पा॰ ३. २. ५९.। इति क्विन्। सावेकाच इति विभक्तेरुदात्तत्वं। सासह्याम। भृशं पुनः पुनः सहेमहि। षह मर्षणे। धात्वादेः षः सः। धातोरेकाचो हलादेः क्रियासमभिहारे यङ्। पा॰ ३. १. २२.। यङोऽचि च। पा॰ २. ४. ७४.। इति लुक्। सन्यङोः। पा॰ ६.१.९.। इति द्विर्भावः। हलादिःशेषः। पा॰ ७.४.६०.। दीर्घोऽकितः। पा॰ ७. ४. ८३.। इति दीर्घः। प्रार्थनायां लिङ्। चर्करीतं परस्मैपदमदादिवच्च द्रष्टव्यं। सि॰ कौ॰ ति॰ य॰। इति परस्मैपदोत्तमपुरुषबहुवचनं मस्। कर्तरि शप्। अदादिवद्भावाल्लुक्। नित्यं ङितः। पा॰ ३. ४. ९९.। इत्यंत्यसकारलोपः। यासुट् परस्मैपदेषूदात्तो ङिच्च। पा॰ ३.४.१०३.। इति यासुट्। लिङः सलोपोऽनंत्यस्य। पा॰ ७. २. ७९.। इति सकारलोपः। सति शिष्टत्वाद्यासुट एवोदात्तत्वं शिष्यते। पादादित्वान्न निघातः। पृतन्यतः। युयोत्सुं पृतनामात्मन इच्छतः। सुप आत्मनः क्यजिति क्यच्। सनाद्यंता धातवः। पा॰ ३.१.३२.। इति धातुसंज्ञायां सुपो धातुप्रातिपदिकयोः। पा॰ २.४.७१.। इति सुपो लुक्। क्यचि चेत्यनुवृत्तौ कव्यध्वरपृतनस्यर्चि लोपः। पा॰ ७.४.३९.। इत्याकारलोपः। पृतन्यधातुश्चित्त्वादंतोदात्तः। उपरि लटः शत्रादेशः। कर्तरि शप्। पित्त्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वरेणोदात्तेन सहैकादेश उदात्तेनोदात्त इति पृतन्यच्छब्दोऽंतोदात्तः। शसः सुप्स्वरेणानुदात्तस्यांतोदात्तादित्यनुवृत्तौ शतुरनुमो नद्यजादी। पा॰ ६. १. १७३.। इत्युदात्तत्वं ॥

पंचमीमृचमाह ॥

म॒हाँ इंद्रः॑ प॒रश्च॒ नु म॑हि॒त्वम॑स्तु व॒ज्रिणे॑। द्यौर्न प्र॑थि॒ना शवः॑ ॥ ५ ॥

म॒हान्। इंद्रः॑। परः॑। च॒। नु। म॒हि॒ऽत्वं। अ॒स्तु॒। व॒ज्रिणे॑। द्यौः। न। प्र॒थि॒ना। शवः॑ ॥ ५ ॥

अयमिंद्रो महान् शरीरेण प्रौढः परश्च गुणैरुत्कृष्टोऽपि। नु किंच वज्रिणे वज्रयुक्तायेंद्राय महित्वं पूर्वोक्तं द्विविधमाधिक्यं सर्वदास्तु। स्वभावसिद्धस्यापि

भक्त्या प्रार्थनमेतत् । किंच । द्यौर्न । द्युलोक इव शवो बलमिंद्रस्य सेनारूपं प्रथिना प्रथिम्ना पृथुत्वेन युज्यतामिति शेषः । यथा द्युलोकः प्रभूत एवमस्य सेना प्रभूता । नुशब्दो यद्यपि क्षिप्रनामसु नु मक्ष्विति पठितस्तथाप्यत्र तस्यान्वयाभावान्निपातत्वेनानेकार्थत्वसंभवाच्च समुच्चयार्थोऽत्र गृहीतः । नशब्दो लोके प्रतिषेधार्थ एव । स्वाध्याये तु प्रतिषेधार्थ उपमानार्थश्चेति द्विविधः । येन पदेनान्वीयते तस्मात्पूर्वं प्रयुज्यमानः प्रतिषेधार्थः । उपरिष्टात्प्रयुज्यमान उपमार्थः । तथा च यास्क उदाहरति । उभयमन्वध्यायं नेंद्रं देवममंसतेति प्रतिषेधार्थीयः पुरस्तादुपचारस्तस्य यत्प्रतिषेधति । दुर्मदासो न सुरायामित्युपमार्थीय उपरिष्टादुपचारस्तस्य येनोपमिमीते । नि॰ १.४.। इति । अत्रोपमावाचिनो द्युशब्दस्यापि प्रयुक्तत्वादुपमार्थः स्वीकृतः । अष्टाविंशतिसंख्याकेषु बलनामस्वोजः पाजः शव इति पठितं ॥ महानिति नकारस्य संहितायां दीर्घादटि समानपादे । पा॰ ८. ३. ९. । इति रुत्वं । आतोऽटि नित्यं । पा॰ ८. ३. ३. । इति पूर्वस्याकारस्यानुनासिकः । भोभगोअघोअपूर्वस्य योऽशि । पा॰ ८. ३. १७. । इति यकारः । तस्य लोपः । पा॰ ८. ३. १९. । तस्यासिद्धत्वात् । पा॰ ८. २. १. । स्वरसंधिर्न भवति । महेरिन् । उ॰ २. ५७. । इत्यौणादिक इन् । महेर्भावो महित्वं । त्वमिति प्रत्ययस्वरेणोदात्तः । स एव शिष्यते । वज्रिणे । इकारः प्रत्ययस्वरेणोदात्तः । द्यौः । द्योशब्दः प्रातिपदिकस्वरेणांतोदात्तः । गोतो णित् । पा॰ ७.१.९०. । इति विभक्तेर्णित्त्वादचो ञ्णिति । पा॰ ७.२.११५. । इति वृद्धिरांतरतम्यादुदात्तैव भवति । प्रथिना । प्रथिम्ना । पृथोर्भाव इत्यर्थे पृथ्वादिभ्य इमनिज्वा । पा॰ ५. १. १२२. । इतीमनिच् । र ऋतो हलादेर्लघोः । पा॰ ६. ४. १६१. । इति ऋकारस्य रभावः । तुरिष्ठेमेयःसु । पा॰ ६. ४. १५४. । इत्यनुवृत्तौ टेः । पा॰ ६. ४. १५५. । इति टिलोपः । प्रथिमन्शब्दश्चित्त्वादंतोदात्तः । तृतीयैकवचने भत्वादल्लोपोऽनः । पा॰ ६. ४. १३४. । इत्यकारलोपः । छांदसो मकारलोपः । अनुदात्तस्य च यत्रोदात्तलोप इति विभक्तेरुदात्तत्वं । शवः । नब्विषयस्यानिसंतस्येत्याद्युदात्तत्वं ॥

॥ इति प्रथमस्य प्रथमे पंचदशो वर्गः ॥

एंद्र सानसिमिति सूक्ते षष्ठीमृचमाह ॥

समोहे वा य आशंत नरस्तोकस्य सनितौ । विप्रासो वा धियायवः ॥ ६ ॥

संऽओहे । वा । ये । आशंत । नरः । तोकस्य । सनितौ । विप्रासः । वा । धियाऽयवः ॥ ६ ॥

ये नरः पुरुषाः समोहे संग्रामे तोकस्यापत्यस्य सनितौ वा लाभे वाशत। व्याप्नुवंतः। इंद्रं स्तुत्येति शेषः। वा। अथवा विप्रासो मेधाविनो धियायवः प्रज्ञाकामाः संत आशत ते सर्वे लभंत इत्यध्याहारः। रण इत्यादिषु षट्चत्वारिंशत्संग्रामनामसु समोहे समिथ इति पठितं। पंचदशस्वपत्यनामसु तुक् तोकमिति पठितं॥ समोहे। प्रातिपदिकांतोदात्तत्वं। वा। चादयोऽनुदात्ता इत्यनुदात्तः। आशत। अशू व्याप्तौ। छांदसश्लेर्लोपः। आडागम उदात्तः। पा० ६.४.७२। सति शिष्टत्वेन स एव शिष्यते। नरः। प्रातिपदिकस्वरः। सनितौ। स्त्रियां क्तिन्। तितुत्रेष्वग्रहादीनामिति वचनात्। पा० ७. २. ९. १। निर्गृहीतिर्निपठितीरिति-वदिडागमः। विप्रासः। ऋज्रेंद्रेत्यादिना विप्रशब्दो रन्प्रत्ययांतो निपातितः। धियायवः। धि धारणे। धीयते धार्यतेऽवबुध्यते श्रुतमज्ञातमनयेति धिया प्रज्ञा। तामात्मन इच्छंतीति क्यच्। क्याच्छंदसि। पा० ३. २. १७०। इत्युप्रत्ययः। अतो लोपः। प्रत्ययस्वरेणोदात्तः॥

सप्तमीमृचमाह॥

यः कुक्षिः सोमपातमः समुद्र इव पिन्वते। उर्वीरापो न काकुदः॥ ७॥

यः। कुक्षिः। सोमऽपातमः। समुद्रःऽइव। पिन्वते। उर्वीः। आपः। न। काकुदः॥ ७॥

यः कुक्षिरस्येंद्रस्योदरप्रदेशः सोमपातमोऽतिशयेन सोमस्य पाता। स कुक्षिः समुद्र इव पिन्वते। वर्द्धते। सेचनार्थो धातुरौचित्येन वृद्धिं लक्षयति। काकुदो मुखसंबंधिन्य उर्वीर्बह्व्य आपो न। जलानीव। जिह्वासंबंधमास्योदकं यथा कदाचिदपि न शुष्यति तथेंद्रस्य कुक्षिः सोमपूरितो न शुष्यतीत्यर्थः। यद्यपि श्लोक इत्यादिषु सप्तपंचाशत्सु वाङ्नामसु काकुज्जिह्वेति पठितं तथाप्युदकसंबंधसिद्ध्यर्थमत्र काकुच्छब्देन मुखमुपलक्ष्यते। संबंधिवाचिनस्तद्धितस्यात्र छांदसो लोपो द्रष्टव्यः॥ सोमपातमः। सोमं पिबतीति सोमपाः। आकारो धातुस्वरेणोदात्तः। कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते। तमपः पित्त्वादनुदात्तत्वं। समुद्रशब्दः प्रातिपदिकत्वादंतोदात्तः। इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेति प्रकृतिस्वरः। पिन्वते। पिवि सेचने। इदितो नुम् धातोरिति नुमागमः। शपः पित्त्वेनानुदात्तत्वं। तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते। उर्वीः। उरुशब्दोऽंतोदात्तः। वोतो गुणवचनात्। पा० ४. १. ४४। इति ङीष्। यणादेशः।

उदात्तयणो हल्पूर्वात् । पा॰ ६. १. १७४. । इतीकार उदात्तः । जसा सहैकादेश उदात्तेनोदात्त इत्येकादेश उदात्तः ॥

अभिप्लवषडहगतेषूक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिन एवा ह्यस्य सूनृतेत्यनुरूपस्तृचः । एद्वृषु ब्रवाणि ते । आ॰ ७. ८. । इति खंडे । अथवा ब्राह्मणाच्छंसिन इत्युपक्रम्य एवा ह्यसि वीरयुरेवा ह्यस्य सूनृता । आ॰ ८. ३. । इति सूचितं । तस्मिन्तृचे प्रथमां सूक्तेऽष्टमीमृचमाह ॥

एवा ह्यस्य सूनृता विरप्शी गोमती मही । पक्वा शाखा न दाशुषे ॥ ८ ॥

एव । हि । अस्य । सूनृता । विऽरप्शी । गोऽमती । मही । पक्वा । शाखा । न । दाशुषे ॥ ८ ॥

अस्येंद्रस्य सूनृता प्रियसत्यरूपा वाग्दाशुषे हविर्दत्तवते यजमानाय तदर्थमेवा हि । एवं खलु । अनंतरपदवक्ष्यमाणगुणोपेता भवतीत्यर्थः । कीदृशी । विरप्शी । विविधरपणोपेतवाक्ययुक्ता बहुविधोपचारवादिनीत्यर्थः । गोमती । बह्वीभिर्गोभिरुपेता गोप्रदेत्यर्थः । अत एव मही महती पूज्या । यथोक्तवाचो दृष्टांतः । पक्वा शाखा न । यथा बहुभिः पक्वैः फलैरुपेता पनसवृक्षादिशाखा प्रीतिहेतुस्तद्वत् । यद्यपि महन्नामसु व्राधं विरप्शीति पठितं तथाप्यत्र महीत्यनेन पुनरुक्तिप्रसंगादवयवार्थो गृहीतः ॥ एवा । एवमादीनामंत इत्यंतोदात्तः । संहितायां निपातस्य चेति दीर्घः । हि । निपात आद्युदात्तः । अस्य । प्रकृतस्येंद्रस्य परामर्शादिदमोऽन्वादेश इत्यादिनाशादेशोऽनुदात्त इति सर्वानुदात्तः । सूनृता । ऊन परिहाणे । सुतरामूनयत्यप्रियमिति सून् । सा चासावृता सत्या चेति सूनृता प्रियसत्यवाक् । परादिश्छंदसि बहुलमित्यृकार उदात्तः । विरप्शी । विविधं विचित्रं रपणं विरप् । रप लप व्यक्तायां वाचि । संपदादित्वाद्भावे क्विप् । तदेतदेषामस्तीति विरप्शानि वाक्यानि । तानि यस्यां वाचि संति सा वाग्विरप्शिनी । अत इनिठनाविनीनिः । यस्येति चेत्यकारलोपः । ऋन्नेभ्यो ङीप् । पा॰ ४. १. ५. । इति ङीप् । इकारः प्रत्ययस्वरेणोदात्तः । नकारलोपश्छांदसः । सवर्णदीर्घ एकादेश उदात्तेनोदात्त इत्युदात्तः । गावोऽस्यां संतीति गोमती । मतुप्ङीपौ पित्त्वादनुदात्तौ । प्रातिपदिकस्वर एव शिष्यते । मही । महती । उगितश्च । पा॰ ४. १. ६. । इति ङीप् । तस्य पित्त्वादनुदात्तत्वे प्राप्ते शतु-

रनुमो नद्यजादी इत्यत्र वृहन्महतोरुपसंख्यानं। पा० ६. १. १७३. १.। इत्युदात्तत्वं। अच्छन्दलोपश्छांदसः। पक्का। डुपचष् पाके। निष्ठेति क्तप्रत्ययः। पचो वः। पा० ८. २. ५२.। इति वत्वं। चोः कुः। पा० ८. २. ३०.। इति कुत्वं। प्रत्ययस्वरेणांतोदात्तः। टापा सह सवर्णदीर्घ एकादेश उदात्तेनोदात्त इत्युदात्तः। शाखा। शाखृ श्लाखृ व्याप्तौ। पचाद्यच्। चित्त्वादंतोदात्ते प्राप्ते वृषादेराकृतिगणत्वाद्वृषादित्वादाद्युदात्तत्वं। दाश्रुषे। दाशृ दाने। दाश्वान्साह्वान्मीढ्वांश्च। पा० ६. १. १२.। इति निपातनात्कसाविडभावो द्विर्वचनाभावश्च। चतुर्थ्येकवचने यचि भं। पा० १. ४. १८.। इति भसंज्ञायां वसोः संप्रसारणं। पा० ६. ४. १३१.। इति संप्रसारणं। वकारस्योकारः। परपूर्वत्वं। शासिवसिघसीनां चेति षत्वं। प्रत्ययस्वरेणोकार उदात्तः ॥

नवमीमृचमाह ॥

एवा हि ते विभूतय ऊतयं इंद्र मावते। सद्यश्चित्संति दाश्रुषे ॥ ९ ॥

एव। हि। ते। विऽभूतयः। ऊतयः। इंद्र। माऽवते। सद्यः। चित्। संति। दाश्रुषे ॥ ९ ॥

हे इंद्र ते तव विभूतय ऐश्वर्यविशेषा एवा हि। एवंविधाः खलु। किंविधा इति तदुच्यते। मावते मत्सदृशाय दाश्रुषे हविर्दत्तवते यजमानायोतयस्त्वदीयरक्षारूपाः सद्यश्चित्संति। यदा कर्मानुष्ठितं तदैव भवंति ॥ मावते। मत्सदृशाय। वतुप्प्रकरणे युष्मदस्मद्भ्यां छंदसि सादृश्य उपसंख्यानं। पा० ५. २. ३९. १.। इत्यस्मच्छब्दाद्वतुप्। मपर्यंतस्य प्रत्ययोत्तरपदयोश्च। पा० ७. २. ९८.। इति मादेशः। अदशब्देन सहातो गुणे। पा० ६. १. ९७.। इति पररूपत्वं। दृग्दृशवतुष्वित्यनुवृत्तावा सर्वनाम्नः। पा० ६. ३. ९१.। इति दकारस्याकारः। सवर्णदीर्घत्वं। वतुपः पित्त्वात्प्रातिपदिकस्वर एव शिष्यते। सद्यः। समाने द्यवीत्यर्थे सद्यः परुत्परार्येषमः। पा० ५. ३. २२.। इत्यादिना निपातितं। प्रत्ययस्वरेणांतोदात्तत्वं। चित्। चादयोऽनुदात्ता इत्यनुदात्तः। संति। अस भुवि। लटः स्थाने झि। झोऽंतः। अदिप्रभृतिभ्यः शप इति शपो लुक्। तिङः प्रत्ययाद्युदात्तत्वं। प्रत्ययलोपे प्रत्ययलक्षणं। पा० १. १. ६२.। इति शबकारमाश्रित्य लसार्वधातुकानुदात्तत्वं न भवति। वर्णाश्रयविधौ प्रत्ययलक्षणं नास्ति। पा० १. १. ५६.। इति निषेधात्। दाश्रुषे। गतमंत्रे गतं ॥

दशमीमृचमाह ॥

एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या । इंद्राय सोमपीतये ॥ १० ॥

एव । हि । अस्य । काम्या । स्तोमः । उक्थं । च । शंस्या । इंद्राय । सोम-पीतये ॥ १० ॥

अस्येंद्रस्य स्तोमः सामसाध्यं स्तोत्रमुक्थं चऋक्साध्यं शस्त्रमप्येवा ह्येते उभे एवंविधे खलु । किंविधे इति तदुच्यते । काम्या । कामयितव्ये । शंस्या । ऋत्विग्भिः शंसनीये । किमर्थं शंसनमिति तदुच्यते । इंद्राय सोमपीतये । इंद्रस्य सोमपानार्थं ॥ एवा ह्यस्य । व्यवहितमंत्रे गतं । काम्या । कमेर्णिङंतादचो यत् । पा० ३. १. ९७. । णेरनिटि । पा० ६. ४. ५१. । इति णिलोपः । तित्स्वरितमिति स्वरिते प्राप्ते यतोऽनावः । पा० ६. १. २१३. । इत्याद्युदात्तत्वं । सुपो डादेशः । स्तोमः । अर्तिस्तुस्वित्यादिना । उ० १. १३८. । मन्प्रत्ययः । उक्थं । वच् परिभाषणे । पातॄतुदिवचिरिचिसिचिभ्यस्थक् । उ० २. ७. । इति थक् । किंत्वात्संप्रसारणं । परपूर्वत्वगुणाभावौ । शंस्या । शंसु स्तुतौ । ण्यंतादचो यत् । यतोऽनाव इत्याद्युदात्तत्वं । सुपो डादेशः । सोमस्य पीतये । सोमस्य पीतिः । कृदुत्तरपदप्रकृतिस्वरे प्राप्ते व्यत्ययेनाद्युदात्तत्वं । अथवा सोमस्य पीतिर्यस्येंद्रस्येति सोमपीतिरिंद्रः । बहुव्रीहौ प्रकृत्या पूर्वपदमिति पूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य प्रथमे षोडशो वर्गः ॥

इंद्रेहीत्यादिकं दशर्चं सूक्तं सुरूपकृत्नुमित्यादिषु षष्ठं । ऋष्यादयस्तस्य पूर्ववत् । विशेषस्त्वतिरात्रे द्वितीयपर्यायेऽच्छावाकशस्त्र इंद्रेहीत्यनुरूपस्तृचः । अतिरात्रे पर्यायाणामिति खंड इदं वसो सुतमंध इंद्रेहि मत्स्यंधसः । आ० ६. ४. । इति सूचितं । तस्मिन्सूक्ते प्रथमामृचमाह ॥

इंद्रेहि मत्स्यंधसो विश्वेभिः सोमपर्वभिः । महाँ अभिष्टिरोजसा ॥ १ ॥

इंद्र । आ । इहि । मत्सि । अंधसः । विश्वेभिः । सोमपर्वऽभिः । महान् । अभिष्टिः । ओजसा ॥ १ ॥

हे इंद्र एहि । अस्मिन्कर्मण्यागच्छ । आगत्य च विश्वेभिः सर्वैः सोमपर्वभिः सोमरसरूपैरंधसोऽधोभिरन्नैर्मत्सि । माद्य हृष्टो भव । तत ऊर्ध्वमोजसा बलेन

महान्भूत्वाभिष्टिः शत्रूणामभिभविता भवेति शेषः। अष्टाविंशतिसंख्याकेषु बलनामस्वोजः पाज इति पठितं ॥ आ। इहि। आङ्गुणः। पा० ६. १. ८७.। इंद्र एहि। यो ह्युभयोः स्थाने लभतेऽसावन्यतरव्यपदेशमित्याङ्माङोरेकादेशस्याङ्व्यपदेशादोमाङोश्च। पा० ६. १. ९५.। इति पररूपं। मत्सि। माद्य। मदी हर्षग्लपनयोः। लोटः सिप्। सर्वे विधयश्छंदसि विकल्प्यंत इति सेर्हिरादेशः। पा० ३. ४. ८७.। न भवति। दिवादिभ्यः श्यन्निति श्यन्। बहुलं छंदसीति श्यनो लुक्। न लुमतांगस्य। पा० १. १. ६३.। इति प्रत्ययलक्षणप्रतिषेधाच्छमामष्टानां दीर्घः श्यनि। पा० ७. ३. ७४.। इत्युपधादीर्घो न भवति। सिपः पित्त्वाद्धातुस्वर एव। अंधसः। अदेर्नुम् धश्च। उ० ४. २०७.। इत्यसुन्। व्यत्ययेन तृतीयाबहुवचनं कर्तव्यं। नित्त्वादाद्युदात्तः। विश्वेभिः। अशिप्रुषीत्यादिना। उ० १. १५०.। क्वन्। नित्त्वादाद्युदात्तत्वं। ऐसादेशो बहुलं छंदसीति न भवति। सोमपर्वभिः। लतारूपं सोमं पृणंति पूरयंतीति सोमपर्वाणः सोमरसाः। पॄ पालनपूरणयोः। अन्येभ्योऽपि दृश्यंत इति वनिप्। गुणो रपरत्वं। वनिपः पित्त्वाद्धातुस्वर एव। उपपदसमासे कृदुत्तरपदप्रकृतिस्वरेण पुनः स एव भवति। अभिष्टिरभिगंता। इष गतौ। मंत्रे वृषेत्यादिना। पा० ३. ३. ९६.। क्तिन्नुदात्तः। स हि भावपरोऽपि भवितारं लक्षयति। कित्त्वाल्लघूपधगुणाभावः। तितुत्रतथसिसुसरकसेषु च। पा० ७. २. ९.। इतीडागमो न भवति। अभिशब्दस्येकार एमन्नादिषु पररूपं वक्तव्यं। पा० ६. १. ९४. ६.। इति पररूपत्वं। प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वं। ओजसा। उब्जेर्बले बलोपश्चेत्यसुन्। नित्त्वादाद्युदात्तः॥

द्वितीयामृचमाह॥

एमे॑नं सृजता सु॒ते म॒न्दिमिन्द्रा॑य म॒न्दिने॑। चक्रिं॒ विश्वा॑नि॒ चक्र॑ये॥ २॥

आ। ई॒म्। ए॒न॒म्। सृ॒ज॒त॒। सु॒ते। म॒न्दिम्। इन्द्रा॑य। म॒न्दिने॑। चक्रि॑म्। विश्वा॑नि। चक्र॑ये॥ २॥

ईमित्यनर्थकः पादपूरणाय प्रयुक्तः। हे अध्वर्यवः सुतेऽभिषुते चमसस्थे सोम एनं सोममिंद्रायेंद्रार्थमासृजत। पुनरभ्युन्नयत। शुक्रामंथिचमसगणे पुनरभ्युन्नयनमापस्तंबेनोक्तं। होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्धुत्वा शुक्रस्याभ्युन्नीयोपावर्तध्वमितीति। कीदृशमेनं। मंदिं। हर्षहेतुं। चक्रिं। साधुकरणशीलं। कीदृशायेंद्राय। मंदिने। हर्षयुक्ताय। विश्वानि सर्वाणि कर्माणि चक्रये कृतवते सर्वकर्मनिष्पादनशीलायेत्यर्थः॥ ईमित्यस्य पादपूरणार्थत्वं यास्क आह। अथ

ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रंथेषु वाक्यपूरणा आगच्छंति पादपूरणार्थे मिताक्षरेष्वनर्थकाः कमीमिद्विति । नि० १.९. । इति । अस्यायमर्थः । अन्यैरेव पदैर्विवक्षितेऽर्थे समाप्ते सति ये शब्दा ईमित्यादयः प्रयुक्तास्ते शब्दा अमिताक्षरेषु छंदोराहित्येन परिमिताक्षररहितेषु ब्राह्मणादिवाक्येषु वाक्यपूरणार्था द्रष्टव्याः । मिताक्षरेषु छंदोयुक्तेषु ग्रंथेषु पादपूरणार्थाः । ते च कमीमित्यादय इति । ईमित्यस्य शब्दस्यानर्थक्यायैतामृचमुदाजहार । एमेनं सृजता सुते । आमृजतैनं सुत इति ॥ एनं । इदमो द्वितीयायां द्वितीयाटौःस्वेनः । पा० २. ४. ३४. । इत्येनादेशोऽनुदात्त इत्यनुवृत्तेः सर्वानुदात्तः । सृजता । संहितायामन्येषामपि दृश्यते । पा० ६. ३. १३७. । इति दीर्घः । मंदिं । प्रमोदहेतुं । मदि स्तुतिमोदमदस्वप्नकांतिगतिषु । इदितो नुम् धातोरिति नुम् । मंदमानं प्रयुंक्त इत्यर्थे हेतुमति च । पा० ३. १. २६. । इति णिच् । ण्यंतस्याजंतत्वादच इः । उ० ४. १४०. । इतीकारप्रत्ययः । णेरनिटीति णिलोपः । प्रत्ययस्वरेणांतोदात्तत्वं । मंदिने । मंदेः पूर्ववत् । चतुर्थ्येकवचनेऽनपुंसकस्यापि । पा० ७. १. ७३. । व्यत्ययेन नुमागमः । चक्रिं । डुकृञ् करणे । आदृगमहनजनः किकिनौ लिट् च । पा० ३. २. १७१. । इति तच्छीलतद्धर्मतत्साधुकारिषु कर्तृषु किन्प्रत्ययः । तस्य कित्त्वाद्गुणाभावः । यणादेशः । लिड्वद्भावाद्विर्वचनं । द्विर्वचनेऽचि । पा० १. १. ५९. । इति यणादेशस्य स्थानिवद्भावात्कृशब्दो द्विरुच्यते । अभ्यासस्योरत्त्वरपरत्वश्चुत्वहलादिशेषाः । किनो नित्त्वादाद्युदात्तः । विश्वानि । विशेः क्वन् । नित्त्वादाद्युदात्तः । अस्य चक्रय इति कृदंतेन योगेऽपि कर्तृकर्मणोः कृति । पा० २. ३. ६५. । इति षष्ठी न भवति । किकिनौ लिट् चेति किकिनोर्लिड्वद्भावेन न लोकाव्ययनिष्ठाखलर्थतृनां । पा० २. ३. ६९. । इति निषेधात् ॥

तृतीयामृचमाह ॥

मत्स्वा सुशिप्र मंदिभिः स्तोमेभिर्विश्वचर्षणे । सचैषु सवनेष्वा ॥ ३ ॥

मत्स्व । सुऽशिप्र । मंदिऽभिः । स्तोमेभिः । विश्वऽचर्षणे । सचा । एषु । सवनेषु । आ ॥ ३ ॥

हे सुशिप्र हे शोभनहनो शोभननासिक वा । शिप्रे हनू नासिके वा । नि० ६. १७. । इति यास्केनोक्तत्वात् । तादृश हे इंद्र मंदिभिर्हर्षहेतुभिः स्तोमेभिः स्तोत्रैर्मत्स्व । हृष्टो भव । हे विश्वचर्षणे सर्वमनुष्ययुक्त सर्वैर्यजमानैः पूज्येत्यर्थः । तादृशेंद्र त्वमेषु यागगतेषु त्रिषु सवनेषु सचा देवैरन्यैः सहागच्छेति शेषः ॥ मदि

स्तुतीत्यस्य लोट्छ्वनित्यमागमशासनमिति कृत्वेदितो नुम् धातोरिति नुम् न भवति । अनुदात्तेत्त्वात्तास्यनुदात्तेन्ङिददुपदेशादिति लसार्वधातुकानुदात्तत्वं । धातुस्वर एव । संहितायां द्व्यचोऽतस्तिङः । पा० ६. ३. १३५. । इति दीर्घत्वं । सुशिप्रेत्यामंत्रितनिघातः । मंदिभिः । गतमंत्रे व्याख्यातं । स्तोमेभिः । मन्प्रत्ययस्य नित्त्वादाद्युदात्तत्वं । बहुलं छंदसीति भिस ऐसादेशो न भवति । विश्वचर्षणे । निघातः । सचा । उक्तं । एषु । ऊडिदमित्यादिना विभक्तेरुदात्तत्वं ॥

चतुर्थीमृचमाह ॥

असृग्रमिंद्र ते गिरः प्रति त्वामुदहासत । अजोषा वृषभं पतिं ॥ ४ ॥

असृग्रं । इंद्र । ते । गिरः । प्रति । त्वां । उत् । अहासत । अजोषाः । वृषभं । पतिं ॥ ४ ॥

हे इंद्र गिरस्त्वदीयाः स्तुतीरसृग्रं । सृष्टवानस्मि । ताश्च गिरः स्वर्गेऽवस्थितं त्वां प्रत्युदहासत । उद्गत्य प्राप्नुवन् । तादृशीर्गिरस्त्वमजोषाः । सेवितवानसि । कीदृशं त्वां । वृषभं । कामानां वर्षितारं । पतिं । सोमस्य पातारं यजमानानां पालयितारं वा । पाता पालयिता वा । नि० ४. २६. । इति यास्केनोक्तत्वात् ॥ असृग्रं । असृजं । सृज विसर्गे । लटो मिप् । तुदादिभ्यः शः । बहुलं छंदसि । पा० ७. १. ८. । इत्यच विकरणस्य रुडागमः । जकारस्य गकारः । लुङ्लङ्लृङ्क्ष्वडुदात्त इत्यडागम उदात्तः । सति शिष्टत्वात्स एव शिष्यते । गिरः । प्रातिपदिकस्वरः । अहासत । हाङ् गतौ । लुङ् । झस्यादादेशः । च्लेः सिच् । अडागमो निघातश्च । अजोषाः । जुषी प्रीतिसेवनयोः । लङः स्थास् । तुदादिभ्यः शः । तस्य छंदस्युभयथा । पा० ३. ४. ११७. । इत्यार्धधातुकत्वेन ङित्त्वाभावाल्लघूपधगुणः । थासस्थकारलोपश्छांदसः । सवर्णदीर्घः । अडागमः । सति शिष्टत्वादुदात्तः शिष्यते । वृषभं । पृषु वृषु सेचने । अभजित्यनुवृत्तावृषिवृषिभ्यां कित् । उ० ३. १२२. । इत्यभच्प्रत्ययः । कित्त्वाद्गुणाभावः । चित्त्वादंतोदात्तः । पतिं । पा रक्षणे । पातेर्डतिः । उ० ४. ५८. । डित्वाट्टिलोपः । प्रत्ययाद्युदात्तत्वं ॥

पंचमीमृचमाह ॥

सं चोदय चित्रमर्वाग्राध इंद्र वरेण्यं । असदित्ते विभु प्रभु ॥ ५ ॥

सं । चोदय । चित्रं । अर्वाक् । राधः । इंद्र । वरेण्यं । असत् । इत् । ते । विऽभु । प्रऽभु ॥ ५ ॥

हे इंद्र वरेण्यं श्रेष्ठं राधो धनं चित्रं मणियुक्तादिरूपेण बहुविधमर्वागस्मद-

भिमुखं यथा भवति तथा संचोदय। सम्यक् प्रेरय। भोगाय यावत्पर्याप्तं तावद्वि-भुशब्देनोच्यते। ततोऽप्यधिकं प्रभुशब्देन। तादृशं धनं ते तवैवासदित्। अस्त्येव। तस्मादस्मभ्यं प्रयच्छेत्यर्थः ॥ मघमित्यादिष्वष्टाविंशतिधननामसु रायो राध इति पठितं। चोदय। चुद प्रेरणे। एयंताल्लोट्। तिङ्ङतिङ इति निघातः। राधः। राध्नुवंत्यनेनेति राधो धनं। सर्वधातुभ्योऽसुन्। नित्त्वादाद्युदात्तः। वरेण्यं। वृञ्। एण्यः। वृषादित्वादाद्युदात्तः। असत्। अस भुवि। लेट्। तिप्। इतश्च लोप इतीकारलोपः। लेटोऽडाटावित्यडागमः। अदिप्रभृतिभ्यः शप इति शपो लुक्। आगमा अनुदात्ता इत्यटोऽनुदात्तत्वाद्धातुस्वर एव। विभु। विभवतीति विभु। भुव इत्यनुवृत्तौ विप्रसंभ्यो ड्वसंज्ञायां। पा० ३. २. १८०.। इति डुप्रत्ययः। डित्त्वाट्टिलोपः। प्रत्ययस्वरेणोकार उदात्तः। कृदुत्तरप-दप्रकृतिस्वरेण स एव शिष्यते। एवं प्रभु ॥

॥ इति प्रथमस्य प्रथमे सप्तदशो वर्गः ॥

इंद्रेहीति सूक्ते षष्ठीमृचमाह ॥

अस्मान्त्सु तत्र चोदयेंद्र राये रभस्वतः। तुविद्युम्न यशस्वतः ॥ ६ ॥

अस्मान्। सु। तत्र। चोदय। इंद्र। राये। रभस्वतः। तुविऽद्युम्न। यशस्वतः ॥ ६ ॥

हे तुविद्युम्न प्रभूतधनेंद्र राये धनसिद्ध्यर्थमस्माननुष्ठातॄन्तत्र कर्मणि सु चोदय। सुष्ठु प्रेरय। कीदृशानस्मान्। रभस्वतः। उद्योगवतः। यशस्वतः। कीर्तिमतः ॥ तत्र। तच्छब्दात्सप्तम्यास्त्रल्। लितीति प्रत्ययात्पूर्वोदात्तत्वं। इंद्र। आमंत्रिताद्युदात्तत्वं। पादादित्वान्न निघातः। राये। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। रभस्वतः। रभ राभस्ये। राभस्यं कार्योपक्रमः। सर्वधातु-भ्योऽसुन्। नित्त्वादाद्युदात्तः। मतुपः पित्त्वादनुदात्तत्वं। स्वादिष्वसर्वनामस्थाने। पा० १. ४. १७.। इति न पदत्वं तसौ मत्वर्थे। पा० १. ४. १९.। इति भसंज्ञया बाधितत्वात्। आ कडारादेका संज्ञा। पा० १. ४. १.। इति नियमात्। तुविद्युम्न। तुवि बहु द्युम्नं धनं यस्य। षाष्ठिकमामंत्रिताद्युदात्तत्वं। यशस्वतः। यशोऽस्या-स्तीति मतुप्। अस्मायामेधास्रजो विनिः। पा० ५. २. १२१.। इति विनिना न बाध्यते मतुपः सर्वत्र समुच्चयात्। यशस्शब्दो नब्विषयस्यानिसंतस्येत्याद्युदात्तः। मतुपः पित्त्वात्स एव शिष्यते ॥

सप्तमीमृचमाह ॥

सं गोमदिंद्र वाजवदस्मे पृथु श्रवो बृहत् । विश्वायुर्धेह्यक्षितं ॥ ७ ॥

सं । गोऽमत् । इंद्र । वाजऽवत् । अस्मे इति । पृथु । श्रवः । बृहत् । विश्वऽआयुः । धेहि । अक्षितं ॥ ७ ॥

हे इंद्र श्रवो धनमस्मे संधेहि । अस्मभ्यं सम्यक् प्रयच्छ । कीदृशं श्रवः । गोमत् । बह्वीभिर्गोभिरुपेतं । वाजवत् । प्रभूतेनान्नेनोपेतं । पृथु । परिमाणेनाधिकं । बृहत् । गुणैरधिकं । विश्वायुः । कृत्स्नायुःकारणं । अक्षितं । विनाशरहितं ॥ गोमत् । वाजवत् । उभयत्र मतुपोऽनुदात्तत्वात्प्रातिपदिकस्वर एव । वाजशब्दो वृषादित्वादाद्युदात्तः । अस्मे । अस्मच्छब्दाच्चतुर्थीबहुवचनस्य सुपां सुलुगित्यादिना शे आदेशः । शित्वात्सर्वादेशः । प्रातिपदिकस्येत्यंतोदात्तत्वं । शेषे लोपष्टिलोप इति पक्ष उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं । अंत्यलोपपक्षेऽतो गुण इति पररूप एकादेश उदात्तेनोदात्त इत्युदात्तत्वं । पृथु । प्रथ प्रख्याने । प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च । उ० १. २८. । इति कुप्रत्ययः । रेफस्य संप्रसारणमृकारः । परपूर्वत्वं । कोः कित्वान्न लघूपधगुणः । श्रूयत इति श्रवो धनं । असुन्प्रत्ययः । नित्वादाद्युदात्तः । बृहत् । प्रातिपदिकस्वरः । विश्वायुः । विश्वमायुर्यस्मिन्धने । विश्वशब्दः क्वन्प्रत्ययांतः । तस्य बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे प्राप्ते परादिश्छंदसि बहुलमिति पूर्वपदांतोदात्तत्वं । एकादेश उदात्तेनोदात्त इत्युदात्तः । अक्षितं । क्षि क्षय इत्यस्मादंतर्भावितण्यर्थात्कर्मणि निष्ठा । तेन ण्यर्थत्वान्निष्ठायामण्यदर्थे । पा० ६. ४. ६०. । इति न दीर्घत्वं । अत एव क्षियो दीर्घात् । पा० ८. २. ४६. । इति न निष्ठानत्वं । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं ॥

अष्टमीमृचमाह ॥

अस्मे धेहि श्रवो बृहद्द्युम्नं सहस्रसातमं । इंद्र ता रथिनीरिषः ॥ ८ ॥

अस्मे इति । धेहि । श्रवः । बृहत् । द्युम्नं । सहस्रऽसातमं । इंद्र । ताः । रथिनीः । इषः ॥ ८ ॥

हे इंद्र बृहच्छ्रवो महतीं कीर्तिमस्मे धेहि । अस्मभ्यं प्रयच्छ । तथा सहस्रसातममतिशयेन सहस्रसंख्यादानोपेतं द्युम्नं धनमस्मे धेहि । तथा ता व्रीहियवादिरूपेण प्रसिद्धा रथिनीर्बहुरथोपेता इषोऽन्नान्यस्मे धेहि ॥ अस्मे । सुपां

सुलुगित्यादिना शे आदेशः। धेहि। घ्वसोरेद्धावभ्यासलोपश्च। पा॰ ६.४.११९। इत्येत्वाभ्यासलोपौ। श्रूयत इति श्रवः। असुनो नित्त्वादाद्युदात्तत्वं। सहस्रं सनुते ददातीति सहस्रसाः। षणु दाने। जनसनखनक्रमगमो विट्। पा॰ ३.२.६७। विड्वनोरनुनासिकस्यात्। पा॰ ६.४.४१। इत्याकारादेशः। धातुस्वरेणांतोदात्तः। पुनः कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते। रथा आसां संतीति रथिन्य इति प्रत्ययस्याद्युदात्तत्वं। ऋन्नेभ्यो ङीप्। पा॰ ४.१.५। स च पित्त्वादनुदात्तः। इषो यौगिकत्वे धातुस्वरः। रूढत्वे प्रातिपदिकस्वरः॥

नवमीमृचमाह॥

वसो॒रिंद्रं॒ वसु॑पतिं गी॒र्भिर्गृ॒णंत॑ ऋ॒ग्मिय॑म्। होम॒ गंता॑रमू॒तये॑॥ ९॥

वसोः॑। इंद्रं॑। वसु॑ऽपतिं। गीः॒ऽभिः। गृ॒णंतः॑। ऋ॒ग्मिय॑म्। होम॑। गंता॑रं। ऊ॒तये॑॥ ९॥

वसोर्वसुनोऽस्मदीयस्य धनस्योतये रक्षार्थमिंद्रं होम। वयमाह्वयामः। किं कुर्वंतः। गीर्भिः स्तुतिभिर्गृणंतः। स्तुवंतः। कीदृशमिंद्रं। वसुपतिं। धनपालकं। ऋग्मियं। ऋचां मातारं। गंतारं। यागदेशे गमनशीलं॥ वसोः। वस निवासे। भृस्वृच्छिहीत्यादिना। उ॰ १.१०। उप्रत्ययः। निदित्यनुवृत्तेर्नित्त्वादाद्युदात्तः। वसुपतिं। समासांतोदात्तत्वे प्राप्ते पत्यावैश्वर्ये। पा॰ ६.२.१८। इति पूर्वपदप्रकृतिस्वरत्वं। गीर्भिः। सावेकाच इति विभक्तेरुदात्तत्वं। गृणंतः। गॄ शब्दे। लटः शतृ। क्र्यादिभ्यः श्ना। शतुः सार्वधातुकमपिदिति ङित्त्वात् श्नाभ्यस्तयोरातः। पा॰ ६.४.११२। इत्याकारलोपः। शतुरकारस्य प्रत्ययस्वरेणोदात्तत्वं। ऋग्मियं। ऋचो मिमीत इत्यृग्मीः। तमृग्मियं। माङ् माने शब्दे च। क्विप्चेति क्विप्। घुमास्थेत्यादिना। पा॰ ६.४.६६। ईत्वं। चकारस्य चोः कुः। झलां जशोऽंते। पा॰ ८.२.३९। इति जश्त्वं। गकारः। द्वितीयैकवचनेऽचि श्नुधात्वित्यादिना। पा॰ ६.४.७७। इयङादेशः। एरनेकाच इति यणादेशः। पा॰ ६.४.८२। सर्वे विधयश्छंदसि विकल्प्यंत इति न भवति। कृदुत्तरपदप्रकृतिस्वरेणेकार उदात्तः। होम। आह्वयामः। ह्वेञ् स्पर्द्धायां शब्दे च। लट्। तस्यास्मदो बहुत्वेऽपि व्यत्ययेन मिप्। इकारस्य व्यत्ययेनाकारः। शपो बहुलं छंदसीति शपो लुक्। बहुलं छंदसीति ह्वः संप्रसारणं परपूर्वत्वं गुणः। धातोरित्योकार उदात्तः। मिपः पित्स्वरेणानुदात्तत्वं। गंतारं। गम्लृ सृप्लृ गतौ। ताच्छील्ये तृन्। नित्त्वादाद्युदात्तः। ऊतये। ऊतीत्यादिना क्तिन्नुदात्तो निपातितः॥

दशमीमृचमाह ॥

सुतेसुते न्योकसे बृहद्बृहत एदरिः । इंद्राय शूषमर्चति ॥ १० ॥

सुतेऽसुते । निऽओकसे । बृहत् । बृहते । आ । इत् । अरिः । इंद्राय । शूषं । अर्चति ॥ १० ॥

आकार इच्छब्दश्च पादपूरणौ । यद्वा व्याप्तिवचन आकारः । आ ईषदर्थेऽभिव्याप्तावित्यभिधानात् । इच्छब्दोऽपिशब्दार्थः । इयर्ति गच्छत्यनुष्ठेयं कर्म प्राप्नोतीत्यरिर्यजमानः । एदरिः सर्वोऽपि यजमान इंद्राय सुते । इंद्रार्थमभिषुते तत्तत्सोमे शूषं बलमर्चति । स्तौति । इंद्रस्य पराक्रमं प्रशंसतीत्यर्थः । कीदृशं शूषं । बृहत् । प्रौढं । कीदृशायेंद्राय । न्योकसे । नियतस्थानाय । बृहते । प्रौढाय ॥ सुते सुते । षुञ् अभिषवे । क्तप्रत्ययः प्रत्ययस्वरेणोदात्तः । नित्यवीप्सयोरिति वीप्सायां द्विर्भावः । तस्य परमाम्रेडितमिति द्वितीयस्याम्रेडितत्वेनानुदात्तं च । पा० ८. १. ३. । इत्यनुदात्तत्वं । न्योकसे । नियतमोको यस्य तस्मै । निशब्दो निपाता आद्युदात्ता इत्युदात्तः । तस्य यणादेश उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य । पा० ८. २. ४. । इत्योकारः स्वरितः । बृहते । बृहन्महतोरुपसंख्यानं । पा० ६. १. १७३. १. । इत्यजादिविभक्तेरुदात्तत्वं । अरिः । ऋ गतौ । अच इः । उ० ४. १४०. । इतीकारप्रत्ययः । गुणो रपरत्वं । प्रत्ययस्वरेणेकार उदात्तः । इंद्राय । ऋज्रेंद्रेत्यादिना रन्प्रत्यय इकार उदात्तः । शूषं । अष्टाविंशतिसंख्याकेषु बलनामसु शूषं सह इति पठितं । प्रातिपदिकस्वरः । अर्चति । निघातस्वरः ॥

॥ इति प्रथमस्य प्रथमेऽष्टादशो वर्गः ॥

गायंतीति सूक्तस्य मंत्रसंख्या छंदोविशेषश्चैवमनुक्रम्यते । गायंति द्वादशानुष्टुभं त्विति । तु हि ह वा इत्यादिपरिभाषायां तुशब्दस्य सूक्तद्वये परिभाषितत्वादस्य सूक्तस्य वक्ष्यमाणस्य चानुष्टुभत्वं द्रष्टव्यं । ऋषिदेवते पूर्ववत् ॥ अभिप्लवषडहस्योक्थ्ये तृतीयसवनेऽच्छावाकस्य गायंतीति स्तोत्रियस्तृचः । एह्यूष्विति खंडे गायंति त्वा गायत्रिण आ त्वा गिरो रथीरिव । आ० ७. ८. । इति सूचितं । अस्मिंस्तृचे प्रथमामृचमाह ॥

गायंति त्वा गायत्रिणोऽर्चंत्यर्कमर्किणः ।
ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥ १ ॥

गायंति । त्वा । गायत्रिणः । अर्चंति । अर्कं । अर्किणः ।

ब्रह्माणः । त्वा । शतक्रतो इति शतऽक्रतो । उत् । वंशंऽइव । येमिरे ॥ १ ॥

हे शतक्रतो बहुकर्मन्बहुप्रज्ञ वेंद्र त्वां गायत्रिण उद्गातारो गायंति । स्तुवंति । अर्किणोऽर्चनहेतुमंत्रयुक्ता होतारोऽर्कमर्चनीयमिंद्रमर्चंति । शस्त्रगतैर्मंत्रैः प्रशंसंति । ब्रह्माणो ब्रह्मप्रभृतय इतरे ब्राह्मणास्त्वामुद्येमिरे । उन्नतिं प्रापयंति । तत्र दृष्टांतः । वंशमिव । यथा वंशाग्रे नृत्यंतः शिल्पिनः प्रौढं वंशमुन्नतं कुर्वंति । यथा वा सन्मार्गवर्तिनः स्वकीयं कुलमुन्नतं कुर्वंति । तद्वत् । एतामृचं यास्क एवं व्याचष्टे । नि० ५. ५. । गायंति त्वा गायत्रिणः प्रार्चंति तेऽर्कमर्किणो ब्राह्मणास्त्वा शतक्रत उद्येमिरे वंशमिव । वंशो वनशयो भवति वननाच्छ्रूयत इति वेति । अर्कशब्दं च बहुधा व्याचष्टे । नि० ५. ४. । अर्को देवो भवति यदेनमर्चंत्यर्को मंत्रो भवति यदेनेनार्चंत्यर्कमन्नं भवत्यर्चति भूतान्यर्को वृक्षो भवति स वृतः कटुकिम्नेति ॥ गायंति । शप्पिङौ पित्त्वात्सार्वधातुकत्वाच्चानुदात्तौ । धातुरुदात्तः । गायत्रिणः । गायत्रं साम येषामुद्गातॄणामस्ति ते । अत इनिठनौ । प्रत्ययस्वरेणेकार उदात्तः । अर्चंति । अर्च पूजायां । भौवादिकः । शप्पिङावनुदात्तौ । धातुस्वर एव । पादादित्वान्न निघातः । अर्कं । अर्चंत्येभिरित्यर्का मंत्राः । तैरर्चनीयतया तदात्मक इंद्रोऽपि लक्षणयार्कः । पुंसि संज्ञायां घः प्रायेण । पा० ३. ३. ११८. । इति करणे घः । चजोः कु घिण्यतोः । पा० ७. ३. ५२. । इति चकारस्य कुत्वं । ककारः । प्रत्ययस्वरेणांतोदात्तः । अर्का मंत्रा एषां संतीत्यर्किणो होतारः । एकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ । पा० ५. २. ११५. २. । इति कृदंतादिनिठनौ यद्यपि प्रतिषिद्धौ तथाप्यत्र व्यत्ययादिनिः । प्रत्ययस्वरेणेकार उदात्तः । ब्रह्माणः । प्रातिपदिकस्वरेणांतोदात्तः । शतक्रतो । निघातः । संहितायामवादेशे लोपः शाकल्यस्य । पा० ८. ३. १९. । इति वकारलोपः । वंशशब्दः प्रातिपदिकस्वरेणांतोदात्तः । इवेन समासे विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेति स एव शिष्यते । येमिरे । यम उपरमे । तिङ्ङतिङ इति निघातः ॥

द्वितीयामृचमाह ॥

यत्सानोः सानुमारुहद्भूर्यस्पष्ट कर्त्वं ।

तदिंद्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥ २ ॥

यत्। सानोः। सानुं। आ। अरुहत्। भूरि। अस्पष्ट। कर्त्वं।
तत्। इंद्रः। अर्थं। चेतति। यूथेन। वृष्णिः। एजति ॥ २ ॥

यद्यदा सानोः सानुमारुहत्। यजमानः सोमवल्लीसमिदाद्याहरणायैकस्मात्पर्वतभागादपरं पर्वतभागमारूढवान्। तथा भूरि प्रभूतं कर्त्वं कर्म सोमयागरूपमस्पष्ट। स्पृष्टवानुपक्रांतवानित्यर्थः। तत्तदानीमिंद्रोऽर्थं यजमानस्य प्रयोजनं चेतति। जानाति। ज्ञात्वा च वृष्णिः कामानां वर्षिता सन् यूथेन मरुद्गणेन सहैजति। कंपते। स्वस्थानाद्यज्ञभूमिमागंतुमुद्युक्त इत्यर्थः ॥ सानोः। षणु दाने। सनोति ददाति निवसतामवकाशमिति सानुः। दृसनिजनिचरिचटिरहिभ्यो ञुण्। उ० १. ३.। णित्त्वादुपधाया वृद्धिः। ञित्त्वादाद्युदात्तत्वं च। अरुहत्। रुहेर्लङि तिपि शपि संज्ञापूर्वको विधिरनित्य इति लघूपधगुणो न भवति। लुङ्लङ्लृङ्क्ष्वडुदात्तः। सति शिष्टत्वात्स एव शिष्यते। निपातैर्यद्यदिहंतेति निषेधान्निघातो न भवति। भूरि। अदिशदिभूशुभिभ्यः क्रिन्। उ० ४. ६६.। कित्त्वाद्गुणाभावः। नित्त्वादाद्युदात्तः। अस्पष्ट। स्पश बाधनस्पर्शनयोः। स्वरितजित इत्यात्मनेपदं। लङः प्रथमपुरुषैकवचनं त। बहुलं छंदसीति शपो लुक्। व्रश्चादिषत्वष्टुत्वे। पा० ८. २. ३६. ८. ४. ४१.। लुङ्लङ्लृङ्क्ष्वडुदात्त इत्यडागम उदात्तः। स एव शिष्यते। अनुषंगेण यच्छब्दयोगान्निघाताभावः। कर्त्वं। डुकृञ् करणे। अन्येभ्योऽपि दृश्यंते। पा० ३. २. ७५.। इति विच्। गुणो रपरत्वं। विचः सर्वापहारी लोपः। करो भावः कर्त्वं। अर्थं। अर्तेरुषिकुषिगार्तिभ्यस्थन्। उ० २. ४.। नित्त्वादाद्युदात्तः। यूथेन। तिथपृष्ठगूथयूथप्रोथाः। उ० २. १२.। इति थक्प्रत्ययांतो निपातितः। वृष्णिः। निरित्यनुवृत्तौ सृवृषिभ्यां कित्। उ० ४. ५०.। इति निप्रत्ययांतः। कित्त्वाद्गुणाभावः। प्रत्ययस्वरेणांतोदात्तः। एजति। एजृ कंपने। तिङ्ङतिङ इति निघातः ॥

तृतीयामृचमाह ॥

युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा।
अथा न इंद्र सोमपा गिरामुपश्रुतिं चर ॥ ३ ॥
युक्ष्व। हि। केशिना। हरी इति। वृषणा। कक्ष्यऽप्रा।
अथ। नः। इंद्र। सोमऽपाः। गिरां। उपऽश्रुतिं। चर ॥ ३ ॥

हे सोमपाः सोमपानयुक्तेंद्र हरी त्वदीयावश्वौ युक्ष्वा हि। सर्वथा संयोजय। अथानंतरं नोऽस्मदीयानां गिरां स्तुतीनामुपश्रुतिं समीपे श्रवणमुद्दिश्य चर। तत्प्रदेशं गच्छ। कीदृशौ हरी। केशिना। स्कंधप्रदेशे लंबमानकेशयुक्तौ। वृषणा। सेचनसमर्थौ युवानौ। कक्ष्यप्रा। अश्वस्योदरबंधनरज्जुः कक्ष्यः। तस्य पूरकौ पुष्टांगावित्यर्थः॥ युक्ष्व। श्नमो लोपश्छांदसः। सति शिष्टत्वेन प्रत्ययस्वरः शिष्यते। द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं। केशिना। प्रशस्ताः केशा अनयोः संतीति मत्वर्थीय इनिः। प्रत्ययस्वरः। सुपां सुलुगित्यादिना द्विवचनस्याकारादेशः। वृषणा। पृषु वृषु मृषु सेचने। कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः। उ० १. १५५.। इति कनिन्। ञ्नित्यादिर्नित्यमित्याद्युदात्तः। वा षपूर्वस्य निगमे। पा० ६. ४. ९.। इत्युपधायाः पक्षे दीर्घाभावः। पूर्ववदाकारः। कक्ष्यप्रा। कक्षयोर्भवं कक्ष्यं सूत्रं। तत्प्रातः पूरयतः पुष्टत्वादिति कक्ष्यप्रौ। प्रा पूरणे। आतोऽनुपसर्गे कः। पा० ३. २. ३.। इति कप्रत्ययः। कृदुत्तरपदप्रकृतिस्वरेणांतोदात्तत्वं। आकारः पूर्ववत्। अथ। निपातस्येति संहितायां दीर्घः। नः। अनुदात्तं सर्वमपादादावित्यनुवृत्तौ बहुवचनस्य वस्नसाविति नसादेशोऽनुदात्तः। इंद्र सोमपा। उभावामंत्रितस्य चेति सर्वानुदात्तौ। गिरां। सावेकाचस्तृतीयादिर्विभक्तिरिति विभक्तिरुदात्ता। उपशब्दो निपातत्वादाद्युदात्तः। श्रुतिशब्देन प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते तादौ च निति कृत्यतौ। पा० ६. २. ५५.। इति तुवर्जिततादिपरत्वाद्गतेः प्रकृतिस्वरः। चर। निघातः॥

विशेषविनियोगस्तु यत्र श्रौतो न सूचितः। स्मार्तं तत्र विजानीयादृग्विधानादिसूचतः॥ एहि स्तोमानित्यृगेषा सूत्रेऽविशेषाकारेण विनियुक्ता। साधारणविनियोगस्तु ब्रह्मयज्ञादौ सर्वत्रानुसंधेयः॥ तामेतां सूक्तगतां चतुर्थीमृचमाह॥

एहि स्तोमाँ अभि स्वराभि गृणीह्या रुव।

ब्रह्म च नो वसो सचेंद्र यज्ञं च वर्धय॥४॥

आ। इहि। स्तोमान्। अभि। स्वर। अभि। गृणीहि। आ। रुव।

ब्रह्म। च। नः। वसो इति। सचा। इंद्र। यज्ञं। च। वर्धय॥४॥

हे वसो निवासकारणभूतेंद्र। एहि। अस्मिन्कर्मण्यागच्छ। आगत्य च स्तोमानुज्ञातृप्रयुक्तानि स्तोत्राण्यभिस्वर। अभिलक्ष्य प्रशंसारूपं शब्दं कुरु। तथाध्वर्यवमभिलक्ष्य गृणीहि। शब्दं कुरु। तथा होतृप्रयुक्तानि शस्त्राण्यालक्ष्य रुव।

शब्दं कुरु। परितोषेण सर्वानृत्विजः प्रशंसेत्यर्थः। तत ऊर्ध्वं नोऽस्माकं ब्रह्म चान्नं च यज्ञं चानुष्ठीयमानं कर्म च सचा सह वर्धय। सांगत्वसंपादनेन यज्ञं वर्धयित्वा तत्फलमन्नं च प्रवृद्धं कुरु। अंध इत्यादिष्वष्टाविंशत्यन्ननामसु ब्रह्म वर्च इति पठितं॥ इहि। इण् गतौ। सेर्हिः। हेरपित्त्वेन ङित्वाद्गुणाभावः। निघातः। आङा सह गुण एकादेश उदात्तेनोदात्त इत्युदात्तः। स्तोमान्। अर्तिस्तुस्वित्यादिना मन्। नित्त्वादाद्युदात्तः। उत्तरपदेन संहितायां नकारस्य दीर्घादटि समानपाद इति रुत्वं। आतोऽटि नित्यमित्याकारस्यानुनासिकः। भोभगोअघोअपूर्वस्य योऽशीति यत्वं। तस्य लोपः शाकल्यस्येति लोपः। तस्यासिद्धत्वात्स्वरसंधिर्न भवति। अभि। एवमादीनामंत इत्यंतोदात्तः। स्वर। स्वृ शब्दोपतापयोः। निघातः। अभि। गतं। गृणीहि। गृ शब्दे। सेर्ह्यपिच्चेति हिः। क्र्यादिभ्यः श्ना। ई हल्यघोः। पा ६. ४. ११३.। इतीत्वं। प्वादीनां ह्रस्वः। पा० ७. ३. ८०.। इत्यृकारस्य ऋकारः। ऋवर्णाच्चेति वक्तव्यं। पा० ८. ४. १. १.। इति णत्वं। तिङ्ङतिङ इति निघातः। रुव। रु शब्दे। सेर्ह्यपिच्च। शपि प्राप्ते व्यत्ययेन शः। तस्य ङित्त्वेन गुणाभावादुवङादेशः। अतो हेरिति हेर्लुक्। तिङ्ङतिङ इति निघातः। ब्रह्म। तृहि वृहि वृद्धौ। मनिन्नित्यनुवृत्तौ बृंहेरम् नलोपश्च। उ० ४. १४७.। इति मनिन्। तत्संनियोगेन नलोपः। अमागमश्च। मिदचोऽत्यात्परः। पा० १. १. ४७.। इत्यृकारात्परः। यणादेशः। मनिनो नित्त्वाद्युदात्तत्वं। वसो। आमंत्रितनिघातः। यज्ञं। यज याचेत्यादिना। पा० ३. ३. ९०.। नङ्। प्रत्ययस्वरः। वर्धय। निघातः। अत्र चकारद्वयश्रवणादियमेव तिङ्विभक्तिः पूर्ववाक्येष्वनुषज्यते। अतोऽनुषक्तैव प्रथमा न श्रुतेति श्रुतायाश्चवायोगे प्रथमा। पा० ८. १. ५९.। इति निघातनिषेधो न भवति॥

अभिप्लवषडहगतोक्थ्येष्वच्छावाकस्य तृतीयसवन उक्थमिंद्राय शंस्यमित्यनुरूपस्तृचः। एह्यूष्विति खंड इंद्रं विश्वा अवीवृधन्नुक्थमिंद्राय शंस्यं। आ० ७. ८.। इति सूचितं। तस्मिंस्तृचे प्रथमां सूक्ते पंचमीमृचमाह॥

उक्थमिंद्राय शंस्यं वर्धनं पुरुनिष्षिधे।
शक्रो यथा सुतेषु णो रारणत्सख्येषु च॥ ५॥

उक्थं। इंद्राय। शंस्यं। वर्धनं। पुरुनिःऽसिधे।
शक्रः। यथा। सुतेषु। नः। ररणत्। सख्येषु। च॥ ५॥

इंद्रायेंद्रार्थं वर्धनं वृद्धिसाधनमुक्थं शस्त्रं शंस्यमस्माभिः शंसनीयं। कीदृशा- येंद्राय। पुरुनिष्षिधे। बहूनां शत्रूणां निषेधकारिणे। शक्रः शक्त इंद्रो नोऽस्मदी- येषु सुतेषु पुत्रेषु सख्येषु च सखित्वेष्वपि यथा येन प्रकारेण रारणत्। अतिशयेन शब्दं कुर्यात्तथा शंस्यमिति पूर्वेणान्वयः। अस्मदीयेन शस्त्रेण परितुष्ट इंद्रोऽस्माकं पुत्रानस्मत्सख्यानि च बहुधा प्रशंसत्वित्यर्थः ॥ उक्थं। वचेस्थक्प्रत्ययः। उ० २. ७.। प्रत्ययस्वरः। शंस्यं। शंसु स्तुतौ। ण्यंताद्चो यत्। णेरनिटीति णिलोपः। तित्स्वरिते प्राप्ते यतोऽनाव इत्याद्युदात्तत्वं। वर्धनं। करणाधिकरणयोश्चेति करणे ल्युट्। लितीति प्रत्ययपूर्वस्योदात्तत्वं। पुरुनिष्षिधे। बहूनां शत्रूनां निषेधकाय। षिध गत्यां। धात्वादेः षः सः। अत्र निरित्युपसर्गस्य निशब्दसमानार्थस्य प्राक्प्र- योगः। क्विप्चेति क्विप्। क्विपः सर्वापहारी लोपः। कुगतिप्रादयः। पा० २.२.१८.। इति समासः। निसः सकारेणेणो व्यवधानं छांदसत्वादनाहत्योपसर्गात्सुनोती- त्यादिना। पा० ८. ३. ६५.। धातुसकारस्य षत्वं। निसः सकारस्य ष्टुना ष्टुः। पा० ८. ४. ४१.। इति षत्वं। पुरुशब्देन कर्मणि षष्ठ्यंतेन समासः। षिधो धातुस्वरे- णोदात्तत्वं। निष्षिध इति प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वं। कृद्ग्रहणे गतिका- रकपूर्वस्यापि ग्रहणात्पुनः कारकसमासेऽपि स एव स्वरः। शक्नोतीति शक्रः। स्फायितंचिवंचिशकीत्यादिना। उ० २. १३.। रक्प्रत्ययः। यथा। प्रकारवचने थाल्। लित्स्वरेण प्रत्ययात्पूर्वोऽकार उदात्तः। सुतेषु। क्तः प्रत्ययस्वरेणोदात्तः। नः। नसो नकारस्य नश्च धातुस्थोरुषुभ्यः। पा० ८. ४. २७.। इति संहितायां णत्वं। रार- णत्। रण शब्दार्थः। धातोरेकाचः। पा० ३. १. २२.। इति यङ्। यङोऽचि चेति लुक्। प्रत्ययलक्षणेन। पा० ६. १. ९.। द्विर्भावो हलादिशेषः। दीर्घोऽकितः। पा० ७. ४. ८३.। इति दीर्घः। प्रत्ययलक्षणेन सन्नाद्यंता धातव इति धातुसंज्ञायां लिङर्थे लेडिति हेतुहेतुमद्भावलक्षणे। पा० ३. ३. १५६.। लिङर्थे लेट्। अत्र हींद्रकर्तृकं रारणनमुक्थशंसनस्य कर्तव्यत्वे हेतुः। लेटस्तिप्। इतश्च लोपः परस्मैपदेष्वि- तीकारलोपः। लेटोऽडाटावित्यडागमः। कर्तरि शप्। तस्य चर्करीतं परस्मैप- दमदादिवच्च द्रष्टव्यमित्यदादिवद्भावाददिप्रभृतिभ्यः शप इति प्राप्तो लुग्बहुलं छंदसीति निषिध्यते। शपोऽनुदात्तत्वाद्धातोरंतोदात्त एव शिष्यते। शपा लसार्व- धातुकस्य व्यवधानात्तत्र परतो विधीयमानमभ्यस्तानामादिरित्याद्युदात्तत्वं न भवति। न च तिङ्ङतिङ इति निघातः। अत्र यथाशब्दयोगेन यावद्यथाभ्यां । पा० ८. १. ३६.। इति निषेधात्। चवायोगे प्रथमेति वात्र निघातो न भवि-

यति। अत्र ह्युत्तरवाक्ये सख्येषु चेति चानुकृष्टविभक्त्यपेक्षयेयं प्रथमा तिङ्विभक्तिः। सख्येषु। सख्युः कर्माणि सख्यानि तेषु। कर्मणि चेत्यनुवृत्तौ सख्युर्यः। पा० ५. १. १२६.। इति सखिशब्दाद्यप्रत्ययः। तत्र भसंज्ञायां यस्येति च। पा० ६. ४. १४८.। इतीकारलोपः। प्रत्ययस्वरः ॥

षष्ठीमृचमाह ॥

तमित्सखित्व ईमहे तं राये तं सुवीर्ये।

स शक्र उत नः शकदिंद्रो वसु दयमानः ॥ ६ ॥

तम्। इत्। सखिऽत्वे। ईमहे। तं। राये। तं। सुऽवीर्ये।

सः। शक्रः। उत। नः। शकत्। इंद्रः। वसु। दयमानः ॥ ६ ॥

सखित्वे निमित्तभूते सति तमित्तमेवेंद्रमीमहे। प्राप्नुमः। तथा राये धनार्थं तमीमहे। तथा सुवीर्ये शोभनसामर्थ्यनिमित्तं तमीमहे। उत। अपि च शक्रः शक्तिमान्स इंद्रो नोऽस्मभ्यं वसु धनं दयमानः प्रयच्छन् शकत्। अस्मदीयरक्षणे शक्तोऽभूत्। सप्तदशयाच्ञाकर्मस्वीमहे यामीति पठितं। तदनुसारेणेंद्रं याचामह इति व्याख्येयं ॥ सख्युर्भावः सखित्वं। तस्य भावस्त्वतलौ। पा० ५. १. ११९.। इति त्वः। प्रत्ययस्वरेणोदात्तः। ईमहे। ईङ् गतौ। ङित्त्वादात्मनेपदं। दिवादिभ्यः श्यन्। बहुलं छंदसीति श्यनो लुक्। तिङ्ङतिङ इति निघातः। राये। ऊडिदमिति विभक्तेरुदात्तत्वं। सुवीर्ये। शोभनं वीर्यं यस्यासौ सुवीर्यः। भवितृवाचिनानेन भावो लक्ष्यते। सुवीर्यत्व इत्यर्थः। बहुव्रीहाविव्यनुवृत्तौ वीरवीर्यौ च। पा० ६. २. १२०.। इत्युत्तरपदाद्युदात्तत्वं। शक्नोतीति शक्रः। स्फायितंचिवंचिशकीत्यादिना रक्। प्रत्ययस्वरः। शकत्। शकॢ शक्तौ। धातुसंबंधाधिकारे छंदसि लुङ्लङ्लिटः। पा० ३. ४. ६.। इति लुङ्। यतः शक्नोत्यतस्तमीमह इति धातुसंबंधः। लुङस्तिप्। पुषादिद्युताद्यॢदितः परस्मैपदेषु। पा० ३. १. ५५.। इति च्लेरङादेशः। बहुलं छंदसीत्यडागमाभावः। तिङ्ङतिङ इति निघातः। वसु। निदित्यनुवृत्तौ वसेरुप्रत्ययः। उ० १. १०.। नित्त्वादाद्युदात्तत्वं। दयमानः। दय दानगतिरक्षणहिंसादानेषु। अनुदात्तेत्त्वादात्मनेपदं। लटः शानजादेशः। शपः पित्त्वादनुदात्तत्वं। शानचश्चित इत्यंतोदात्तत्वं बाधित्वादुपदेशाच्छप उत्तरत्वेन परत्वाल्लसार्वधातुकत्वानुदात्तत्वं। धातुस्वर एव शिष्यते ॥

॥ इति प्रथमस्य प्रथम एकोनविंशो वर्गः ॥

गायंतीति सूक्ते सप्तमीमृचमाह ॥

सुविवृतं सुनिरजमिंद्र त्वादातमिद्यशः ।

गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः ॥ ७ ॥

सुऽविवृतं । सुनिःऽअजं । इंद्र । त्वाऽदातं । इत् । यशः ।

गवां । अप । व्रजं । वृधि । कृणुष्व । राधः । अद्रिऽवः ॥ ७ ॥

हे इंद्र यशोऽन्नं कर्मफलभूतं सुविवृतं सुष्ठु सर्वत्र प्रसृतं सुनिरजं सुखेन निःशेषं प्राप्तुं शक्यं त्वादातमित्त्वया शोधितं च संपन्नमिति शेषः । इतः परं क्षीरादिरसलाभार्थं गवां व्रजं निवासस्थानमपवृधि। अपवृतमुद्घाटितद्वारं कुरु। हे अद्रिवः पर्वतोपलक्षितवज्रयुक्तेंद्र राधो धनं कृणुष्व। संपादय॥ सुविवृतं। वृञ् वरणे। कर्मणि क्तप्रत्ययः। विशब्देन प्रादिसमासः। विवृतमित्यत्र कृदुत्तरपद-प्रकृतिस्वरं बाधित्वा कर्मवाचिनि क्तांते परतो गतिरनंतरः। पा॰ ६. २. ४९। इति पूर्वपदप्रकृतिस्वरे प्राप्ते परादिश्छंदसि बहुलं। पा॰ ६. २. १९९। इत्युकार उदात्तः। पुनः सुशब्देन समासे कृदुत्तरपदप्रकृतिस्वरेण स एवकार उदात्तः। ननु वृतमित्येव कृदंतं न तु विवृतमिति प्रत्ययग्रहणे यस्मात्स विहितस्तदादे-स्तदंतस्य ग्रहणमिति वचनात्। सुविवृतमित्यत्र च समासे वृतमित्येतावन्मात्रं नोत्तरपदं किंतु विवृतमिति। तत्कथं कृदुत्तरपदप्रकृतिस्वरत्वमिति चेत्। उच्यते। प्रत्ययग्रहणपरिभाषापवादेन कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमि-त्यनेन विवृतमित्यस्यापि कृदंतव्यपदेशोपपत्तेः। ननु विवृतमित्यस्य यथा कृदंत-व्यपदेशः। एवं क्तांतव्यपदेशोऽप्यस्ति तयैव परिभाषया। तथा च कर्मणि क्तांत उत्तरपदे परतो गतिरनंतर इति सुशब्दस्य प्रकृतिस्वरः प्राप्नोति। न चात्रापि परादिश्छंदसि बहुलमित्येवं नास्ति विस्तारः। तथा हि। सति सुविवृतमित्यत्र विवृतमित्येवोत्तरपदमिति तदादिरिकार एवोदात्तः स्यात्। विवृतमिति समासे यद्यप्युकारः पदादिर्भवति तथापि सुविवृतमिति समासस्य सति शिष्टत्वेन बली-यस्त्वात्तत्र एवोत्तरपदादाविकार एवोदात्तस्वरेण भवितव्यमिति। उच्यते। गतिरनंतर इत्यत्रानुवृत्तेः क्तग्रहणे कृद्ग्रहणपरिभाषा नाश्रीयते। तदाश्रयणे व्यवहितगतावपि प्रकृतिस्वरे सत्यनंतरग्रहणमनर्थकं स्यात्। अनेनैव चाभि-प्रायेणानंतरग्रहणस्य प्रयोजनमभ्युद्धृतमित्यत्र व्यवहितस्याभिशब्दस्य मा भूदिति प्रत्युदाहृतं। तस्मात्सुविवृतमित्युकार एवोदात्त इति स्थितं। सुनिरजं। अना-

यासेन निरवशेषं प्राप्यं। अज गतिक्षेपणयोः। सुनिसोरुपसर्गयोः प्राक्प्रयोगः। ईषद्दुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खल्। पा॰ ३. ३. १२६.। न चात्र सुशब्दस्य निसा व्यवधानं शंकनीयं। सुशब्दस्य ह्युपपदमात्रं। खलो निमित्तं नानंतर्ये। अत एव सुपरिहरं दुःपरिहरमित्यादयः प्रयोगा इति। पूर्ववद्गतिसमासे लितीति प्रत्ययात्पूर्वमुदात्तमिति धात्वकार उदात्तः। निसा समासे कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते। पुनः सुशब्देन समासे कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषया कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते। त्वादातं। त्वया शोधनेन विशदीकृतं। दैप् शोधने। आदेच उपदेशेऽशिति। पा॰ ६. १. ४५.। इत्यात्वं। सत्यपि हि पकारे नानुबंधकृतमनेजंतत्वमित्येजंत एवायं। निष्ठेति कर्मणि क्तः। दाधा घ्वदाप्। पा॰ १. १. २०.। इत्यत्रादाबिति प्रतिषेधेन घुसंज्ञाया अभावाद्दो दद्घोः। पा॰ ७. ४. ४६.। इति ददादेशो न भवति। ननु दाप् लवन इति प्रतिपदोक्तस्यैव दापस्तत्रादाबिति निषेधः। न पुनर्लाक्षणिकस्य दैपः। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्येति नियमादिति चेत्। न। गामादाग्रहणेष्वविशेष इति प्रतिप्रसवात्। युष्मच्छब्दात्तृतीयैकवचनस्य सुपां सुलुगिति डादेशः। त्वमावेकवचन इति मपर्यंतस्य त्वादेशः। अतो गुण इति पररूपत्वं। भसंज्ञायां टेरित्यद्शब्दस्य लोप उदात्तनिवृत्तिस्वरेणाकार उदात्तः। कर्तृकरणे कृता बहुलं। पा॰ २. १. ३२.। इति तृतीयायाः समासः। तत्पुरुषे कृति बहुलं। पा॰ ६. ३. १४.। इति तृतीयाया अप्यलुक्। कृदुत्तरपदप्रकृतिस्वरे प्राप्ते तृतीया कर्मणि। पा॰ ६. २. ४८.। इति पूर्वपदप्रकृतिस्वरत्वं। यशः। अशू व्याप्तौ। अशेर्युट् च। उ॰ ४. १९२.। इत्यसुन्। तत्संनियोगेन धातोर्युडागमः। नित्त्वादाद्युदात्तत्वं। गवां। प्रातिपदिकस्वरः। सावेकाच इति विभक्तेरुदात्तत्वं प्राप्तं। न गोश्वन्साववर्णेति निषिध्यते। वृधि। वृञ् वरणे। श्रुशृणुपॄकृवृभ्यश्छंदसि। पा॰ ६. ४. १०२.। इति हेर्धिरादेशः। बहुलं छंदसीति श्नोरपि लुक्। निघातः। कृणुष्व। कृवि हिंसाकरणयोश्च। इदितो नुम्। व्यत्ययेनात्मनेपदं। लोटस्थास्। पा॰ ३. ४. ७८.। थासः से। पा॰ ३. ४. ८०.। सवाभ्यां वामौ। पा॰ ३. ४. ९१.। कर्तरि शपि प्राप्ते। पा॰ ३. १. ६८.। धिन्विकृण्व्योरच्च। पा॰ ३. १. ८०.। इत्युप्रत्ययः। तत्संनियोगेन वकारस्य चाकारः। तस्यातो लोपः। पा॰ ६. ४. ४८.। इति लोपः। अचः परस्मिन्पूर्वविधौ। पा॰ १. १. ५७.। इत्यकारलोपस्य स्थानिवद्भावाल्लघूपधगुणो न भवति। अत्र सति

शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति सति शिष्टमपि विकरणस्वरं बाधित्वा तिङ एव प्रत्ययाद्युदात्तत्वं। राधः। असुनंतो नित्त्वादाद्युदात्तः। अद्रिवः। अद्रिर्वज्रं। तदस्यास्तीति मतुप्। छंदसीरः। पा० ८. २. १५.। इति वत्वं। संबुद्धावुगिदचां। पा० ७.१.७०.। इति नुम्। हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्। पा० ६. १. ६८.। मतुवसो रु संबुद्धौ छंदसि। पा० ८. ३. १.। इति रुत्वं। विसर्जनीयः। आमंत्रितस्य च निघातः॥

अष्टमीमृचमाह॥

नहि त्वा रोदसी उभे ऋघायमाणमिन्वतः।
जेषः स्वर्वतीरपः सं गा अस्मभ्यं धूनुहि॥ ८॥

नहि। त्वा। रोदसी इति। उभे इति। ऋघायमाणं। इन्वतः।
जेषः। स्वः ऽवतीः। अपः। सं। गाः। अस्मभ्यं। धूनुहि॥ ८॥

हे इंद्र ऋघायमाणं शत्रुबधं कुर्वाणं त्वां रोदसी उभे द्यावापृथिव्यावपि त्वदीयं महिमानं व्याप्तुं नहीन्वतः। न समर्थे इत्यर्थः। तादृशस्त्वं स्वर्वतीः स्वर्लोकयुक्ता अपो वृष्टिरूपा जेषः। जयेः। प्रेरयेत्यर्थः। अपां स्वर्गसंबंधश्चान्यत्र दिवो वृष्टिं च्यावयतीति श्रुतं। किंच वृष्टिप्रदानादन्नसंपत्तेरूर्ध्वमस्मभ्यं क्षीरादिरसप्रदा गाः संधूनुहि। सम्यक् प्रेरय॥ नहि। नञो हिशब्देन सह सुपा। पा० २. १. ४.। इति समासः। समासत्वादंतोदात्तत्वं। त्वा। अनुदात्तं सर्वमित्यनुवृत्तौ त्वामौ द्वितीयाया इति त्वादेशः। रोदसी। रुदेरसुन्। नित्त्वादाद्युदात्तः। उगितश्च। पा० ४. १. ६.। इति ङीप्। उभे। प्रातिपदिकस्वरेणांतोदात्तः। श्या सहैकादेश उदात्तः। ऋघायमाणं। नृन्हंतीत्यृघा। अन्येभ्योऽपि दृश्यंत इति विच्। दृशिग्रहणस्य विध्यंतरोपसंग्रहणार्थत्वान्नकारलोपो हकारस्य च घकारः। अनृघा ऋघा भवतीत्यभूततद्भावे लोहितादिडाज्भ्यः क्यष्। पा० ३. १. १३.। इति क्यष् प्रत्ययो भवति। स ह्याकृतिगणः। लोपश्च हलः। पा० ३. १. १२.। इत्यनुवृत्तेर्नकारलोपश्च। वा क्यषः। पा० १. ३. ९०.। इत्यात्मनेपदं। लटः शानच्। शपोऽदुपदेशात्पराच्छानचो लसार्वधातुकानुदात्तत्वं। शपः पित्त्वादनुदात्तत्वं। क्यषः प्रत्ययस्वरः। एकादेशस्योदात्तत्वं। इन्वतः। इवि व्याप्तौ। इदितो नुम् धातोरिति नुम्। शपः पित्त्वादनुदात्तत्वं। लडादेशस्य तसश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते। हि चेति निषेधात्तिङ्ङतिङ इति निघातो न

भवति। जेषः। जेः प्रार्थनायां लिङर्थे लेट्। तस्य मध्यमपुरुषैकवचनं सिप्। इतश्च लोपः परस्मैपदेष्वितीकारलोपः। कर्तरि शपि प्राप्ते तदपवादः सिब्बहुलं लेटीति सिप्। अडागमस्यानुदात्तत्वाद्धातुस्वर एव शिष्यते। स्वरासामस्तीति स्वर्वत्यः। न्यङ्स्वरौ स्वरितौ। फि॰ ४.६.। इति स्वरशब्दः स्वरितः। मतुब्ङीपौ पित्त्वादनुदात्तौ। संहितायां स्वरितात्संहितायामनुदात्तानां। पा॰ १. २. ३९.। इत्येकश्रुतिः। स्वरित एव शिष्यते। अपः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। धूनुहि। धूञ् कंपने। लोटः सेर्ह्यपिच्च। स्वादिभ्यः श्नुः। उतश्च प्रत्ययादसंयोगपूर्वात्। पा॰ ६. ४. १०६.। इति प्राप्तस्य लुकश्छांदसत्वादभावः॥

अभिप्लवषडहस्योक्थ्येषु तृतीयसवनेऽच्छावाकस्य षट्स्तोत्रियानुरूपयुगलेषु द्वितीयस्मिन्युगल आश्रुत्कर्णेति तृचोऽनुरूपः। एह्यूष्विति खंडे श्रुधी हवं तिरश्चा आश्रुत्कर्ण श्रुधी हवं। आ॰ ७. ८.। इति सूचितं। तस्मिंस्तृचे प्रथमां सूक्ते नवमीमृचमाह॥

आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः।
इंद्र स्तोममिमं मम कृष्वा युजश्चिदंतरं॥ ९॥
आश्रुत्ऽकर्ण। श्रुधि। हवं। नु। चित्। दधिष्व। मे। गिरः।
इंद्र। स्तोमं। इमं। मम। कृष्व। युजः। चित्। अंतरं॥ ९॥

हे आश्रुत्कर्ण सर्वतः श्रोतारौ कर्णौ यस्य तादृगिंद्र हवमस्मदीयमाह्वानं नु क्षिप्रं श्रुधि। शृणु। मे मम होतुर्गिरश्चित्स्तुतीरपि दधिष्व। चित्ते धारय। किंच। मम मदीयमिमं स्तोमं स्तोत्ररूपं वाक्समूहं युजश्चित्स्वकीयसख्युरप्यंतरं कृष्व। आसन्नं कुरु। यथा वचनं तस्य प्रियं मन्यसे तद्वदस्मदीयस्तुतिष्वपि प्रीतिं कुर्वित्यर्थः॥ आश्रुत्कर्ण। आ समंताच्छृणुत इत्याश्रुत्। क्विप्। ह्रस्वस्य तुक्। तादृशौ कर्णौ यस्य। आमंत्रितस्य चेत्याद्युदात्तत्वं। श्रुधी। श्रु श्रवणे। लोटो हिः। श्रुवः शृ च। पा॰ ३. १. ७४.। इति विहितश्नोर्बहुलं छंदसीति लुक्। तत्सन्नियोगशिष्टत्वाच्छृभावोऽपि निवर्तते। श्रुशृणुपृकृवृभ्यश्छंदसि। पा॰ ६. ४. १०२.। इति हेर्धिः। सति शिष्टत्वात्प्रत्ययस्वरः। आमंत्रितं पूर्वमविद्यमानवत्। पा॰ ८. १. ७२.। इत्यविद्यमानवत्त्वेन पदादपरत्वान्निङ्तिङ इति निघातो न भवति। संहितायामन्येषामपि दृश्यत इति दीर्घः। हवं। ह्वेञ् स्पर्धायां शब्दे च। बहुलं छंदसीत्यनैमित्तिके संप्रसारणे कृते पश्चादुकारां-

तत्वेन ऋदोरप् । पा० ३. ३. ५७. । इत्यप्प्रत्ययः । अपः पित्त्वादनुदात्तत्वेन धातुस्वरः । नु । संहितायामृचि तुनुघमक्षुतङ्कुत्रोरुष्याणां । पा० ६. ३. १३३. । इति दीर्घः । चित् । चादिरनुदात्तः । दधिष्व । दधातेर्लोट् । थासस्से । सवाभ्यां वामौ । पा० ३. ४. ९१. । शपः श्लुः । अभ्यासस्य ह्रस्वत्वादि । छंदस्युभयथेत्यार्धधातुकस्यापि स्वीकारादिडागमः । आकारलोपः । निघातः । मे । मम । तवममौ ङसि । पा० ७. २. ९६. । इत्यनेन मपर्यंतस्य ममादेशः । प्रातिपदिकस्वरेणांतोदात्तत्वे प्राप्ते युष्मदस्मदोर्ङसि । पा० ६. १. २११. । इत्याद्युदात्तत्वं । कृष्व । डुकृञ् करणे । लोट् । थासस्से । सवाभ्यां वामौ । शपो बहुलं छंदसीति लुक् । सति शिष्टत्वात्प्रत्ययस्वरः । पादादित्वान्न निघातः । युजः । सावेकाच इति विभक्तेरुदात्तत्वं । अंतरं । वृषादित्वादाद्युदात्तः ॥

दशमीमृचमाह ॥

विद्मा हि त्वा वृषंतमं वाजेषु हवनश्रुतं ।
वृषंतमस्य हूमह ऊतिं सहस्रसातमां ॥ १० ॥
विद्म । हि । त्वा । वृषन्ऽतमं । वाजेषु । हवनऽश्रुतं ।
वृषन्ऽतमस्य । हूमहे । ऊतिं । सहस्रऽसातमां ॥ १० ॥

हे इंद्र त्वां विद्म । जानीमः । कीदृशं त्वां । वृषंतमं । कामानामतिशयेन वर्षितारं । वाजेषु संग्रामेषु हवनश्रुतं । अस्मदीयस्याह्वानस्य श्रोतारं । वृषंतमस्यातिशयेन कामादीनां वर्षितुस्तवोतिं रक्षामस्मद्विषयामुद्दिश्य हूमहे । त्वामाह्वयामः । कीदृशीमूतिं । सहस्रसातमां । अतिशयेन धनसहस्राणां दात्रीं ॥ विद्म । विदो लटो वा । पा० ३. ४. ८३. । इति मसो मादेशः । प्रत्ययस्वरेणांतोदात्तः । द्व्यचोऽतस्तिङ इति संहितायां दीर्घः । वृषंतमं । पृषु वृषु मृषु सेचने । कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः । उ० १. १५५. । इति कनिन् । नित्त्वादाद्युदात्तः । तमपः पित्त्वात्स एव शिष्यते । अयस्मयादीनि छंदसि । पा० १. ४. २०. । इति भत्वेन पदत्वाभावान्नलोपाभावः । पा० ८. २. ७. । पदत्वाच्च टिलोपाभावः । पा० ६. ४. १४३. । वाजेषु । वाजशब्दो वृषादिराद्युदात्तः । हवनश्रुतं । ह्वः इत्यनुवृत्तौ बहुलं छंदसीति ल्युटि संप्रसारणं । हवनं शृणोतीति हवनश्रुत् । तुगागमः । वृषंतमस्य । उक्तं । हूमहे । बहुलं छंदसीति संप्रसारणं । शप इत्यनुवृत्तौ बहुलं छंदसीति शपो लुक् । ऊतिं । ऊतियूतीत्यादिनांतोदात्तो निपातितः । सहस्रसातमां ।

सहस्रं सनोतीति सहस्रसाः । षणु दाने । जनसनखनक्रमगमो विट् । पा० ३. २. ६७. । विड्वनोरनुनासिकस्यात् । पा० ६. ४. ४१. । इत्याकारादेशः । कृदुत्तरपद-प्रकृतिस्वरत्वं तमपः पित्त्वादेव शिष्यते ॥

एकादशीमृचमाह ॥

आ तू न इंद्र कौशिक मंदसानः सुतं पिब ।

नव्यमायुः प्र सू तिर कृधी सहस्रसामृषिं ॥ ११ ॥

आ । तु । नः । इंद्र । कौशिक । मंदसानः । सुतं । पिब ।

नव्यं । आयुः । प्र । सु । तिर । कृधि । सहस्रऽसां । ऋषिं ॥ ११ ॥

हे इंद्र तु क्षिप्रं नोऽस्मान्प्रत्यागच्छेति शेषः । हे कौशिक कुशिकस्य पुत्रेंद्र मंदसानो हृष्टो भूत्वा सुतमभिषुतं सोमं पिब । यद्यपि विश्वामित्रः कुशिकस्य पुत्रस्तथापि तद्रूपेणेंद्रस्यैवोत्पन्नत्वात्कुशिकपुत्रत्वमविरुद्धं । अयं वृत्तांतोऽनुक्रमणिकायामुक्तः । कुशिकस्त्वैषीरथिरिंद्रतुल्यं पुत्रमिच्छन्ब्रह्मचर्यं चचार । तस्येंद्र एव गाथी पुत्रो जज्ञ इति । हे इंद्र नव्यं सर्वदेवैः स्तुत्यं कर्मानुष्ठानपरमायुर्जीवितं प्र सु तिर । प्रकर्षेण सुष्ठु वर्धय । ततो मां सहस्रसां सहस्रसंख्याकलाभोपेतमृषिमतींद्रियद्रष्टारं कृधि । कुरु ॥ तु । संहितायामृचि तुनुघमक्षुतङ्कुत्रोरुष्याणामिति दीर्घः । नः । संहितायामुदात्तादनुदात्तस्य स्वरितः । इंद्र । आमंत्रितनिघातः । कौशिक । निघातः । मंदसानः । हृष्यन् । मदि स्तुतिमोदमदस्वप्नकांतिगतिषु । असानजित्यनुवृत्तावृंजिवृधिमंदिसहिभ्यः कित् । उ० २. ८४. । इत्यसानच्प्रत्ययः । चित्त्वादंतोदात्तः । सुतं । प्रत्ययस्वरः । नव्यं । णु स्तुतौ । अचो यत् । गुणः । वांतो यि प्रत्यये । पा० ६. १. ७९. । इत्यवादेशः । यतोऽनाव इत्याद्युदात्तत्वं । आयुः । उसि निदित्यनुवृत्तावेतेर्णिच्च । उ० २. ११४. । इत्युसिप्रत्ययः । णित्त्वाद्वृद्ध्यायादेशौ । नित्त्वादाद्युदात्तत्वं । सु । निपातस्येति संहितायां दीर्घत्वं । तिर । तरतेर्व्यत्ययेन शः । ऋत इद्धातोः । पा० ७. १. १००. । इतीत्वं । अतो हेरिति हेर्लुक् । कृधि । डुकृञ् करणे । बहुलं छंदसीति शपो लुक् । श्रुशृणुपृकृवृभ्यश्छंदसीति हेर्धिरादेशः । सहस्रसां । उक्तं । ऋषिं । ऋषी गतौ । इगुपधात्कित् इन्नित्यनुवृत्ताविगुपधात्किच्च । कित्त्वाद्गुणाभावः । नित्त्वादाद्युदात्तत्वं ॥

प्रवर्ग्ये परि त्वेत्याभष्टुयात् । स्पृष्ट्वोदकमिति खंडे परि त्वा गिर्वणो गिरोऽधि

द्वयोरदधा उक्थ्यं वचः । आ० ४. ६. । इति सूचितं । तथा हविर्धानप्रवर्तने सेयं परिधानीया । हविर्धाने प्रवर्तयंतीति खंडे परि त्वा गिर्वण इति परिदध्यात् । आ० ४. ९. । इति सूचितं । तथा ब्राह्मणं च । परि त्वा गिर्वणो गिर इत्युत्तमया परिदधातीति । तामेतां द्वादशीमृचमाह ॥

परि॑ त्वा गिर्वणो॒ गिर॑ इ॒मा भ॑वंतु वि॒श्वतः॑ ।
वृ॒द्धायु॑मनु॒ वृद्ध॑यो॒ जुष्टा॑ भवंतु॒ जुष्ट॑यः ॥ १२ ॥
परि॑ । त्वा॒ । गि॒र्व॒णः॒ । गिरः॑ । इ॒माः । भ॒वं॒तु॒ । वि॒श्वतः॑ ।
वृ॒द्धऽआ॑युं । अनु॑ । वृद्ध॑यः । जुष्टाः॑ । भ॒वं॒तु॒ । जुष्ट॑यः ॥ १२ ॥

हे गिर्वणः । अस्मदीयस्तुतिभागिंद्र विश्वतः सर्वेषु कर्मसु प्रयुज्यमाना इमा गिरोऽस्मदीया स्तुतयस्त्वा त्वां परि भवंतु । सर्वतः प्राप्नुवंतु । कीदृश्यो गिरः । वृद्धायुमनु प्रवृद्धेनायुष्येणोपेतं त्वामनुसृत्य वृद्धयो वर्धमानाः । किंचता गिरो जुष्टास्त्वया सेविताः सत्यो जुष्टयोऽस्माकं प्रीतिहेतवो भवंतु ॥ गिर्वणः । गीर्भिर्वन्यत इति गिर्वणाः । वन षण संभक्तौ । सर्वधातुभ्योऽसुन् । गिर उपधाया दीर्घाभावश्छांदसः । आमंत्रितनिघातः । विश्वतः । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । वृद्धायुं । वृधु वृद्धौ । क्तप्रत्ययः । उदितो चेतीटः क्तप्रत्यये विकल्पितत्वाद्यस्य विभाषेति निष्ठायामिडभावः । प्रत्ययस्वरः । इण् गतौ । छंदसीणः । उ० १. २. । इत्युण् । णित्त्वाद्वृद्धिः । आयादेशश्च । वृद्धमायुर्यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । वृद्धयः । वृधेः क्तिनि तितुत्रतथसिसुसरकसेषु च । पा० ७. २. ९. । इतीडभावः । नित्त्वादाद्युदात्तत्वं । जुष्टाः । श्वीदितो निष्ठायां । पा० ७. २. १४. । इतीडभावः । जुष्टार्पिते इत्यनुवृत्तौ नित्यं मंत्रे । पा० ६. १. २१०. । इत्याद्युदात्तत्वं । जुष्टयः । जुषी प्रीतिसेवनयोः । क्तिन् । तितुत्रेतीडभावः । नित्त्वादाद्युदात्तः ॥

॥ इति प्रथमस्य प्रथमे विंशो वर्गः ॥

इंद्रं विश्वा इत्यष्टर्चस्य सूक्तस्य मधुच्छंदसः पुत्रो जेतृनामक ऋषिः । तथा चानुक्रांतं । इंद्रमष्टौ जेता माधुच्छंदस इति । छंदस्त्वानुष्टुभमिति पूर्वसूक्तोक्तं । इंद्रो देवतानुवर्तते । विनियोगस्तु । महाव्रते निष्केवल्ये कृत्स्नसूक्तं शंसनीयं ।

उक्त इति खंडे शौनकेन सूचितं। इंद्रं विश्वा अवीवृधन्नित्यानुष्टुभं। तस्य प्रथमायाः पूर्वमर्धर्चं शस्त्वोत्तरेणार्धर्चेनोत्तरस्याः पूर्वमर्धर्चं व्यतिषंजति पादैः पादानुष्टुप्कारं प्रागुत्तमाया इति। ब्राह्मणं च प्रथमारण्यके पठ्यते। प्र वो मह इति खंड इंद्रं विश्वा अवीवृधन्निति पदानुषंगा इति। तथा पृष्ठ्यस्य पंचमेऽहनि निष्केवल्ये शस्त्र इंद्रं विश्वा अवीवृधन्नित्यनुरूपस्तृचः। स्तोमे वर्धमान इति खंडे सूचितं। उप नो हरिभिः सुतमिंद्रं विश्वा अवीवृधन्। आ॰ ७. १२.। इति। अस्मिन्सूक्ते प्रथमामृचमाह ॥

इंद्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः।
रथीतमं रथीनां वाजानां सत्पतिं पतिं ॥ १ ॥
इंद्रं। विश्वाः। अवीवृधन्। समुद्रऽव्यचसं। गिरः।
रथिऽतमं। रथिनां। वाजानां। सत्ऽपतिं। पतिं ॥ १ ॥

विश्वाः सर्वा गिरोऽस्मदीयाः स्तुतय इंद्रमवीवृधन्। वर्धितवत्यः। कीदृशमिंद्रं। समुद्रव्यचसं। समुद्रवद्व्याप्तवंतं। रथीनां रथयुक्तानां योद्धृणां मध्ये रथीतमं। अतिशयेन रथयुक्तं। वाजानामन्नानां पतिं स्वामिनं। सत्पतिं सतां सन्मार्गवर्तिनां पालकं ॥ विश्वाः। विशेः क्वन्। नित्स्वरः। अवीवृधन्। वृधेर्णिचि चङ्युर्वृदित्यनुवृत्तौ नित्यं छंदसि। पा॰ ७.४.८.। इत्यृकारस्य ऋकारविधानाल्लघूपधगुणाभावः। निघातस्वरः। समुद्रव्यचसं। व्यचेरसुन्। गाङ्कुटादिभ्योऽञ्णिन्ङित्। पा॰ १.२.१.। प्राप्तस्य ङित्त्वस्य व्यचेः कुटादित्वमनसि। पा॰ १.२.१.१.। इत्यसिनिषेधाद्ग्रहिज्येत्यादिना ङिति विधीयमानं संप्रसारणं। पा॰ ६. १. १६.। न भवति। समुद्रव्यच इव व्यचो यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। रथीतमं रथीनां। रथशब्दादुत्पन्नस्येनश्छांदसं दीर्घत्वं। प्रत्ययस्वरेणोदात्तत्वं च। वाजानां। वृषादित्वादाद्युदात्तत्वं। सत्पतिं। पत्यावैश्वर्ये। पा॰ ६. २. १८.। इति पूर्वपदप्रकृतिस्वरत्वं ॥

द्वितीयामृचमाह ॥

सख्ये त इंद्र वाजिनो मा भेम शवसस्पते।
त्वामभि प्र णोनुमो जेतारमपराजितं ॥ २ ॥

सख्ये । ते । इंद्र । वाजिनः । मा । भेम । शवसः । पते ।
त्वां । अभि । प्र । नोनुमः । जेतारं । अपराऽजितं ॥ २ ॥

हे शवसस्पते बलस्य पालकेंद्र ते तव सख्येऽनुग्रहप्रयुक्ते सखित्वे वर्तमाना वयं वाजिनोऽन्नवंतो भूत्वा मा भेम । शत्रुभ्यो भीतिं प्राप्ता मा भूम । अतस्त्वामभयहेतुमभिप्रणोनुमः । सर्वतः प्रकर्षेण स्तुमः । कीदृशं त्वां । जेतारं । युद्धेषु जयशीलं । अपराजितं । क्वापि पराजयरहितं ॥ सख्ये । सख्युः कर्म सख्यं । सख्युर्यः । पा० ५. १. १२६. । प्रत्ययस्वरः । वाजिनः । वाजोऽन्नमेषामस्तीति वाजिनः । प्रत्ययस्वरः । भेम । ञिभी भये । लुङुत्तमबहुवचनं मस् । नित्यं ङितः । पा० ३. ४. ९९. । इति सलोपः । बहुलं छंदसीति च्लेर्लुक् । छंदस्युभयथेति तिङ आर्धधातुकत्वेन ङित्त्वाभावाद्गुणः । न माङ्योगे । पा० ६. ४. ७४. । इत्यडागमप्रतिषेधः । शवसस्पते । शवसः षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु । पा० ८. ३. ५३. । इति विसर्जनीयस्य संहितायां सत्वं । सुबामंत्रितपरांगवत्स्वरे इति षष्ठ्यंतस्य परांगवद्भावेन । पा० २. १. २. । पदद्वयनिघातः । नोनुमः । णु स्तुतौ । णो नः । पा० ६. १. ६५. । इति नत्वं । यङो लुक् । प्रत्ययलक्षणेन सन्यङोरिति द्विर्भावः । गुणो यङ्लुकोः । पा० ७. ४. ८२. । इत्यभ्यासस्य गुणः । प्रत्ययलक्षणेन धातुसंज्ञायां लटो मस् । अदादिवद्भावाच्छपो लुक् । उपसर्गादसमासेऽपि णोपदेशस्य । पा० ८. ४. १४. । इति संहितायां णत्वं । जेतारं । जि जये । ताच्छील्यादिषु तृन् । ञ्नित्यादिर्नित्यं । पा० ६. १. १९७. । इत्याद्युदात्तत्वं । अपराजितं । अव्ययपूर्वपदप्रकृतिस्वरत्वेन नञ उदात्तत्वं ॥

तृतीयामृचमाह ॥

पूर्वीरिंद्रस्य रातयो न वि दस्यंत्यूतयः ।
यदी वाजस्य गोमतः स्तोतृभ्यो मंहते मघं ॥ ३ ॥

पूर्वीः । इंद्रस्य । रातयः । न । वि । दस्यंति । ऊतयः ।
यदि । वाजस्य । गोऽमतः । स्तोतृऽभ्यः । मंहते । मघं ॥ ३ ॥

इंद्रस्य संबंधिन्यो रातयो धनदानानि पूर्वीरनादिकालसिद्धाः प्रभूता वा । अस्येंद्रस्य सर्वदा यष्टृभ्यो धनदानमेव स्वभाव इत्यर्थः । एवं सतीदानींतनोऽपि यजमानः स्तोतृभ्य ऋत्विग्भ्यो गोमतो गोसहितस्य वाजस्यान्नस्य पर्याप्तं मघं

धनं यदि मंहते। दक्षिणारूपेण ददाति तदानीमूतयो बहुधनदानपूर्वकाणींद्रस्यास्मद्विषयाणि रक्षणानि न विदस्यंति। विशेषेण नोपक्षीयंते ॥ मघं रेक्ण इत्यादिष्वष्टाविंशतिसंख्याकेषु धननामसु मघशब्दः पठितः। दाति दासतीत्यादिषु दशसु दानकर्मसु मंहत इति पठितं। पूर्वीः। पुरुशब्दस्य वोतो गुणवचनादिति ङीष्। आद्यस्योकारस्य दीर्घश्छांदसः। जसि दीर्घाज्जसि चेति निषेधं बाधित्वा वा छंदसि। पा॰ ६. १. १०६.। इति पूर्वसवर्णदीर्घत्वं। ङीषः प्रत्ययस्वरेणोदात्तत्वं। रातयः। मंत्रे वृषेषपचमनविदभूवीरा उदात्तः। पा॰ ३. ३. ९६.। इति क्तिन उदात्तत्वं। दस्यंति। दस उपक्षये। दिवादिभ्यः श्यन्। निघातः। ऊतयः। ऊतियूतीत्यादिना क्तिन्नुदात्तः। यदि। निपातत्वादाद्युदात्तः। संहितायां निपातस्य चेति दीर्घत्वं। स्तोतृभ्यः। ष्टुञ् स्तुतौ। धात्वादेः षः सः। तृचश्चित्त्वादंतोदात्तत्वं। मंहते। शपः पित्त्वादनुदात्तत्वं। तिङश्च लसार्वधातुकस्वरेण तिङ्तिङ इति निघातो न भवति निपातैर्यद्यदिहंतेति निषेधात् ॥

अभिप्लवषडहस्योक्थ्येषु तृतीयसवनेऽछावाकस्य पुरां भिंदुर्युवा कविरिति स्तोत्रियस्तृचः। तथा च सूत्रितं। एह्यूष्वित्युपक्रम्य पुरां भिंदुर्युवा कविर्वृषा ह्यसि राधसे। आ॰ ७. ८.। इति। तस्मिंस्तृचे प्रथमां सूक्ते चतुर्थीमृचमाह ॥

पुरां भिंदुर्युवा कविरमितौजा अजायत।
इंद्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥ ४ ॥
पुरां। भिंदुः। युवा। कविः। अमितऽओजाः। अजायत।
इंद्रः। विश्वस्य। कर्मणः। धर्ता। वज्री। पुरुऽस्तुतः ॥ ४ ॥

अयमिंद्र उच्यमानगुणयुक्तोऽजायत। संपन्नः। कीदृग्गुणक इति तदुच्यते। पुरामसुरपुराणां भिंदुर्भेत्ता। युवा। कदाचिदपि बलीपलितादिवार्धकरहितः। कविर्मेधावी। अमितौजाः। प्रभूतबलः। विश्वस्य कर्मणः कृत्स्नस्य ज्योतिष्टोमादेर्धर्ता पोषकः। वज्री। यजमानरक्षणार्थं सर्वदा वज्रयुक्तः। पुरुष्टुतः। बहुविधे तत्तत्कर्मणि स्तुतः ॥ भिंदुः। भिदिर् विदारणे। कुरित्यनुवृत्तौ पृभिदिव्यधिगृधिधृषिहृशिभ्यः। उ॰ १.२३.। इति कुप्रत्ययः। तस्य छंदस्युभयथेति सार्वधातुकसंज्ञायां रुधादिभ्यः श्नम्। मित्त्वादंत्यादचः परो भवति। श्नसोरल्लोपः। अनुस्वारपरसवर्णौ। पा॰ ८. ४. ५८.। अचः परस्मिन्पूर्वविधाविति प्राप्तस्य

स्थानिवद्भावस्य न पदांतेत्यादिना । पा॰ १. १. ५८. । निषेधः । युवा । यु मिश्रणाभिमिश्रणयोः । कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिव इति कनिन् । नित्त्वादाद्युदात्तः । कविः । कु शब्दे । अच इरितीप्रत्ययस्वरः । अमितौजाः । अमितशब्दस्याव्ययपूर्वपदप्रकृतिस्वरत्वं । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन तदेव शिष्यते । विश्वस्य । अशिप्रुषीत्यादिना । उ॰ १. १५०. । क्वन् । नित्त्वादाद्युदात्तः । कर्मणः । अन्येभ्योऽपि दृश्यंत इति मनिन् । नित्स्वरः । धर्ता । तृच् । चित्त्वादंतोदात्तः । वज्री । मत्वर्थीय इनिः । प्रत्ययस्वरः । पुरुष्टुतः । स्तुतस्तोमयोश्छंदसि । पा॰ ८. ३. १०५. । इति षत्वं । बहुषु प्रदेशेषु स्तुतः । थाथघञ्क्ताजबित्रकाणां । पा॰ ६. २. १४४. । इत्यंतोदात्तत्वं । तृतीयासमासे हि थाथादिस्वरापवादः । तृतीया कर्मणि । पा॰ ६. २. ४८. । इति पूर्वपदप्रकृतिस्वरः स्यात् ॥

पंचमीमृचमाह ॥

त्वं वलस्य गोमतोऽपावरद्रिवो बिलं ।
त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥ ५ ॥
त्वं । वलस्य । गोऽमतः । अप । अवः । अद्रिऽवः । बिलं ।
त्वां । देवाः । अबिभ्युषः । तुज्यमानासः । आविषुः ॥ ५ ॥

वलनामकः कश्चिदसुरो देवसंबंधिनीर्गा अपहृत्य कस्मिंश्चिद्बिले गोपितवान् । तदानीमिंद्रस्तद्बिलं स्वसैन्येन समावृत्य तस्माद्बिलात्ता निःसारयामास । तदिदमुपाख्यानमिंद्रो वलस्य बिलमपौर्णोदित्यादिब्राह्मणेषु मंत्रांतरेषु च प्रसिद्धं । तदेतद्धृदि निधायायं मंत्रः प्रवर्तते ॥ हे अद्रिवः । वज्रयुक्तेंद्र त्वं गोमतो वलस्य गोभिर्युक्तस्य वलनामकस्यासुरस्य संबंधि बिलमपावः । स्वसैन्यमुखेनापावृतवानसि । तदानीं तुज्यमानासो वलेन हिंस्यमाना देवा अबिभ्युषस्त्वदीयरक्षया वलादभीताः संतस्त्वामाविषुः । प्राप्नवंतः ॥ अप । निपातत्वादाद्युदात्तः । अवः । वृञ् वरणे । लङ् । सिप् । इतश्च लोपः । स्वादिभ्यः श्नुः । तस्य बहुलं छंदसीति लुक् । गुणो रपरत्वं हल्ङ्यादिलोपः । विसर्जनीयः । अडागमः । अद्रिवः । अद्रिरस्यास्तीति मतुप् । छंदसीर इति वत्वं । संबोधन उगिदचामिति नुम् । हल्ङ्यादिसंयोगांतलोपौ । मतुवसो रु संबुद्धौ छंदसि । पा॰ ८. ३. १. । इति रुत्वं । बिलं । नव्विषयस्यानिसंतस्येत्याद्यु-

दात्तत्वं। अबिभ्युषः। ञिभी भये। लिट्। द्विर्भावः। अभ्यासस्य ह्रस्वजश्त्वे। क्कसुश्चेति लिटः क्कसुरादेशः। क्रादिनियमात्प्राप्त इट् वस्वेकाजाद्घसामिति नियमान्निवर्तते। जसि सर्वनामस्थानेऽपि व्यत्ययेन भत्वाद्वसोः संप्रसारणं। परपूर्वत्वं। शासिवसिघसीनां चेति षत्वं। अचि श्नुधात्वित्यादिना प्राप्तमियङादेशं बाधित्वा एरनेकाच इति यणादेशः। नञ्समासः। अव्ययपूर्वपदप्रकृतिस्वरत्वं। तुज्यमानासः। तुजेर्हिंसार्थात्परस्य कर्मणि लटः स्थाने शानच्। सार्वधातुके यक्। पा० ३. १. ६७.। इति यक्। तस्माददुपदेशादुत्तरस्य लसार्वधातुकस्यानुदात्तत्वं। यकार एव प्रत्ययस्वरः शिष्यते। आविषुः। अव रक्षणादिषु। अस्मात्प्रत्यर्थाल्लुङो झिः। तस्य सिजभ्यस्तविदिभ्यश्च। पा० ३. ४. १०९.। इति जुस्। सिच इडागमः। आडजादीनां। पा० ६. ४. ७२.। इत्याडागमः। आदेशप्रत्यययोरिति षत्वं॥

षष्ठीमृचमाह॥

तवाहं शूर रातिभिः प्रत्यायं सिंधुमावदन्।
उपातिष्ठंत गिर्वणो विदुष्टे तस्य कारवः॥ ६॥

तव। अहं। शूर। रातिऽभिः। प्रति। आयं। सिंधुं। आऽवदन्।
उप। अतिष्ठंत। गिर्वणः। विदुः। ते। तस्य। कारवः॥ ६॥

हे शूर संग्रामे शौर्ययुक्तेंद्र तव रातिभिस्त्वदीयैर्धनदानैर्निमित्तभूतैरहं होता प्रत्यायं। त्वां पुनरागतोऽस्मि। पुरा बहुषु कर्मसु त्वत्तो धनस्य लब्धत्वादस्मिन्कर्मणि प्रत्यागमनमित्युच्यते। किं कुर्वन्। सिंधुं स्यंदमानं सोममावदन्। सर्वतः कथयन्। अस्मिन्सोमयागे त्वदीयां धनदानकीर्तिं प्रकटयन्नित्यर्थः। हे गिर्वणः। गीर्भिर्वननीयेंद्र। कारवः कर्तार ऋत्विग्यजमाना उपातिष्ठंत। पुरा धनलाभार्थं त्वामुपस्थितवंतः। उपस्थाय च तस्य तादृशस्यौदार्योपेतस्य ते तव धनदानं विदुः। जानंति॥ गिर्वणस्शब्दं यास्क इत्थं निर्ब्रूते। गिर्वणा देवो भवति गीर्भिरेनं वनयंति। नि० ६. १४.। इति। रेभो जरितेत्यादिषु त्रयोदशसु स्तोतृनामसु कारुशब्दः पठितः। तव। युष्मदस्मदोर्ङसीत्याद्युदात्तत्वं। रातिभिः। मंत्रे वृषेत्यादिना क्तिन्नुदात्तः। आयं। इणो लङ्। तस्थस्थमिपां तान्तन्तामः। पा० ३. ४. १०१.। इत्यमादेशः। अदिप्रभृतिभ्यः शप इति शपो लुक्। आडागमः। वृद्ध्यायादेशौ। तिङ्ङतिङ इति निघातः। सिंधुं। स्यंदू प्रस्रवणे। निदित्यनुवृत्तौ स्यंदेः संप्रसारणं

धश्च । उ॰ १. ११. । इत्युप्रत्ययो धकारश्चांतादेशः । नित्त्वादाद्युदात्तः । आवदन् । वद व्यक्तायां वाचि । लटः शतृ । शपः पित्त्वादनुदात्तत्वं । शतुश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते । आङा सह कुगतिप्रादयः । पा॰ २. २. १८. । इति समासः । कृदुत्तरपदप्रकृतिस्वरत्वं । अतिष्ठंत । उपान्मंत्रकरणे । पा॰ १. ३. २५. । इत्यात्मनेपदं । गिर्वणः । वन षण संभक्तौ । असुन् । आमंत्रितस्य चेति निघातः । विदुः । विद ज्ञाने । लट् । अदिप्रभृतिभ्यः शप इति शपो लुक् । विदो लटो वा । पा॰ ३. ४. ८३. । इति झेरुस् । पादादित्वान्न निघातः । संहितायां युष्मत्तत्ततक्षुःष्वंतःपादं । पा॰ ८. ३. १०३. । इति षत्वं । ष्टुना ष्टुरित्युत्तरस्य तकारस्य ष्टुत्वं । तस्य । सावेकाच इति विभक्तेरुदात्तत्वं प्राप्तं न गोश्वन्साववर्णेति निषिध्यते । कारवः । कृवापाजीत्यादिना । उ॰ १. १. । उण् । प्रत्ययस्वरः ॥

सप्तमीमृचमाह ॥

मायाभिरिंद्र मायिनं त्वं शुष्णमवातिरः ।
विदुष्टे तस्य मेधिरास्तेषां श्रवांस्युत्तिर ॥ ७ ॥

मायाभिः । इंद्र । मायिनं । त्वं । शुष्णं । अव । अतिरः ।
विदुः । ते । तस्य । मेधिराः । तेषां । श्रवांसि । उत् । तिर ॥ ७ ॥

हे इंद्र त्वं मायिनं नानाविधकपटोपेतं शुष्णं भूतानां शोषणहेतुमेतन्नामकमसुरं मायाभिस्तत्प्रतिकूलैः कपटविशेषैः । यद्वा तद्वधोपायगोचरप्रज्ञाभिः । हिंसितवानसि । एतच्च यास्केनोक्तं । इंद्रःशुष्णं जघान । नि॰ ३. ११. । इति । शुष्णं पिप्रुमित्यादिमंत्रे चायमर्थो विस्पष्टः । मेधिरा मेधावंतोऽनुष्ठातारस्तस्य तादृशस्य ते तव महिमानं विदुः । जानंति । तेषां जानतामनुष्ठातॄणां श्रवांस्यन्नान्युत्तिर । वर्धय ॥ केतः केतुरित्यादिष्वेकादशसु प्रज्ञानामसु माया वयुनमिति पठितं । श्रवःशब्दं यास्को निर्वक्ति । श्रव इत्यन्ननाम श्रूयत इति सतः । नि॰ १०. ३. । इति । मायाभिः । माङ् माने । माच्छाससिसूभ्यो यः । उ॰ ४. १११. । इति यप्रत्ययः । प्रत्ययस्वरः । मायिनं । मायास्यास्तीति मायी । व्रीह्यादित्वादिनिप्रत्ययः । प्रत्ययस्वरः । शुष्णं । शुष शोषणे । अस्मादंतर्भावितण्यर्थान्नित्यनुवृत्तौ तृषिशुषिरसिभ्यः कित्च । उ॰ ३. १२. । इति नप्रत्ययः । नित्त्वादाद्युदात्तः । अतिरः । तरतेर्लङि व्यत्ययेन शः । तस्य ङित्त्वेन गुणाभावादृत इद्धातोरितीत्वं । विदुष्टे

तस्य। गतमंत्रे गतं। मेधिराः। मिधृ मेधृ मेधाहिंसनयोः। औणादिक इरन्। नित्त्वादाद्युदात्तः। श्रवांसि। नब्विषयत्वादाद्युदात्तः॥

अष्टमीमृचमाह॥

इंद्रमीशा॑नमोज॑साभि स्तोमा॑ अनूषत।

सहस्रं॒ यस्य॑ रा॒तय॑ उ॒त वा॒ संति॒ भूय॑सीः॥८॥

इंद्रं॑। ईशा॑नं। ओज॑सा। अ॒भि। स्तोमाः॑। अ॒नू॒ष॒त।

स॒हस्रं॑। यस्य॑। रा॒तयः॑। उ॒त। वा॒। संति॑। भूय॑सीः॥८॥

स्तोमाः स्तोतार ऋत्विज ओजसा बलेनेशानं जगतो नियामकमिंद्रमभ्यनूषत। सर्वत्र स्तुतवंतः। यस्येंद्रस्य रातयो धनदानानि सहस्रं सहस्रसंख्योपेतानि संति। उत वा। अथवा भूयसीः सहस्रसंख्याया अप्यधिकाः संति। तमिंद्रमिति पूर्वत्रान्वयः॥ इंद्रं। ऋज्रेंद्रेत्यादिना रन्। नित्त्वादाद्युदात्तः। ईशानं। लटः शानच्। अदिप्रभृतिभ्यः शप इति शपो लुक्। धातोरनुदात्तेत्त्वात्तास्यनुदात्तेत्यादिना शानचोऽनुदात्तत्वं। ओजसा। नब्विषयत्वादाद्युदात्तः। स्तोमाः। अर्तिस्तुस्वित्यादिना मन्प्रत्ययः। नित्त्वादाद्युदात्तः। अनूषत। णु स्तुतौ। णो नः। लुङ्। व्यत्ययेन ऊस्यादादेशः। पा॰ ७.१.५.। च्लेः सिच्। अस्य धातोः कुटादित्वेन सिचो ङित्त्वाद्गुणाभावः। इडभावश्छांदसः। दीर्घत्वं च। अडागमः। सहस्रं। कर्दमादीनां च। फि॰ ३.१०.। इति द्वितीयाक्षरमुदात्तं। रातयः। मंत्रे वृषेत्यादिना क्तिन्नुदात्तः। उत। प्रातिपदिकस्वरः। वा। चादिरनुदात्तः। संति। प्रत्ययादाद्युदात्तत्वं। तिङ्ङतिङ इति निघातो न भवति यद्वृत्तान्नित्यमिति प्रतिषेधात्। स हि व्यवहितोऽपि भवतीत्युक्तं। भूयसीः। सहस्रादतिशयेन बह्व्यो भूयस्यः। अत्र विभक्तव्यस्य सहस्रस्य संनिधिबलादुपपदत्वप्रतीतेर्द्विवचनविभज्योपपदे तरबीयसुनौ। पा॰ ५.३.५७.। इति बहुशब्दादीयसुन्। बहोर्लोपो भू च बहोः। पा॰ ६.४.१५८.। इतीकारलोपः प्रकृतेर्भूरादेशश्च। ईयसुनो नित्त्वादाद्युदात्तत्वं। उगितश्चेति ङीप्॥

॥ इति प्रथमस्य प्रथम एकविंशो वर्गः॥

॥ इति प्रथमे मंडले तृतीयोऽनुवाकः॥

चतुर्थानुवाके षट् सूक्तानि। तत्राग्निं दूतमित्यादिकस्य द्वादशर्चस्य प्रथमस्य सूक्तस्य काण्वपुत्रो मेधातिथिर्ऋषिः। अपवादाभावादनुवर्तमानं प्राग्घिरण्यस्तूपादित्युक्तं गायत्रमेव छंदः। अग्निर्देवताकत्वं विस्पष्टं। अत एवानुक्रम्यते। अग्निं द्वादश मेधातिथिः काण्व आग्नेयमग्निनेति पादौ द्व्यग्निदैवतौ निर्मथ्य आहवनीयश्चेति। विनियोगस्तु प्रातरनुवाक आग्नेये क्रतौ गायत्रे छंदस्यग्निं दूतमिति सूक्तं। अथैतस्या रात्रेर्विवासकाल इति खंडेऽग्निमीळेऽग्निं दूतं। आ० ४. १३.। इति सूचितं। तथा पृष्ठ्यषडहस्य द्वितीयेऽहनीदमेव सूक्तमाज्यशस्त्रं। पृष्ठ्यस्याभिप्लवेनोक्त अहनी इति खंडे सूचितं। अग्निं दूतमिति द्वितीये। आ० ७. १०.। इति। दर्शपूर्णमासयोः सामिधेनीष्वग्निं दूतमित्येका नमः प्रवक्त इति खंडे सूचितं। ईळेन्यो नमस्यस्तिरोऽग्निं दूतं वृणीमहे। आ० १. २.। इति। अस्मिन्सूक्ते प्रथमामृचमाह ॥

अग्निं दूतं वृणीमहे होतारं विश्ववेदसं। अस्य यज्ञस्य सुक्रतुं ॥ १ ॥

अग्निं। दूतं। वृणीमहे। होतारं। विश्वऽवेदसं। अस्य। यज्ञस्य। सुऽक्रतुं ॥ १ ॥

अग्नेर्दूतत्वमेतन्मंत्रव्याख्याने तैत्तिरीयब्राह्मणे समाम्नायते। अग्निर्देवानां दूत आसीदुशनाः काव्योऽसुराणामिति। तादृशं देवदूतमग्निमस्मिन्कर्मणि वृणीमहे। संभजामः। कीदृशं। होतारं। देवानामाह्वातारं। विश्ववेदसं। सर्वधनोपेतं। अस्य प्रवर्तमानस्य यज्ञस्य निष्पादकत्वेन सुक्रतुं। शोभनकर्माणं शोभनप्रज्ञं वा ॥ मघमित्यादिष्वष्टाविंशतिसंख्याकेषु धननामसु वेदस्शब्दः पठितः। होतारं। ह्वेञ् स्पर्द्धायां शब्दे च। ताच्छील्यादिषु तृन्। बहुलं छंदसीति संप्रसारणे परपूर्वत्वे गुणः। नित्वादाद्युदात्तः। विश्ववेदसं। बहुव्रीहौ विश्वं संज्ञायां। पा० ६. २. १०६.। इति पूर्वपदांतोदात्तत्वं। अस्य। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। सुक्रतुं। क्रत्वादयश्च। पा० ६. २. ११८.। इत्याद्युदात्तत्वं ॥

द्वितीयामृचमाह ॥

अग्निमग्निं हवीमभिः सदा हवंत विश्पतिं। हव्यवाहं पुरुप्रियं ॥ २ ॥

अग्निंऽअग्निं। हवीमऽभिः। सदा। हवंत। विश्पतिं। हव्यऽवाहं। पुरुऽप्रियं ॥ २ ॥

यद्यप्यग्निः स्वरूपेणैक एव तथापि प्रयोगभेदादाहवनीयादिस्थानभेदात्पाव-

कादिविशेषणभेदाद्वा बहुविधत्वमभिप्रेत्याग्निमग्निमिति वीप्सा। तं हवीमभिराह्वानकरणैर्मंत्रैः सदा हवंत। निरंतरमनुष्ठातार आह्वयंति। कीदृशं। विश्पतिं। विशां प्रजानां होत्रादीनां पालकं। हव्यवाहं। यजमानसमर्पितस्य हविषो देवान्प्रति वोढारं। अत एव पुरुप्रियं। बहूनां प्रीत्यास्पदं॥ अग्निमग्निं। नित्यवीप्सयोरिति वीप्सायां द्विर्भावः। तस्य परमाम्रेडितमित्युत्तरस्याम्रेडितसंज्ञायामनुदात्तं चेत्यनुदात्तत्वं। हवीमभिः। ह्वेञ् स्पर्द्धायां शब्दे च। आह्वानकरणभूतेषु मंत्रेषु स्वव्यापारस्वातंत्र्यात्कर्तृत्वविवक्षयान्येभ्योऽपि दृश्यंत इति कर्तरि मनिन्। तस्य छांदस ईडागमः। बहुलं छंदसीति धातोः संप्रसारणं परपूर्वत्वं गुणावादेशौ। निक्त्वादाद्युदात्तत्वं। सदा। सर्वैकान्येत्यादिना। पा० ५.३.१५.। सर्वशब्दाद्दाप्रत्ययः। सर्वस्य सोऽन्यतरस्यां दि। पा० ५.३.६.। इति सभावः। व्यत्ययेनाद्युदात्तत्वं। हवंत। ह्वेञो लट्। झस्यांतादेशः। टेरेत्वाभावश्छांदसः। शपि बहुलं छंदसीति संप्रसारणं। तिङ्ङतिङ इति निघातः। विश्पतिं। पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरे प्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। हव्यवाहं। वह प्रापणे। वहश्च। पा० ३.२.६४.। इति ण्विप्रत्ययः। कृदुत्तरपदप्रकृतिस्वरत्वं। पुरुप्रियं। पुरूणां प्रियं। समासांतोदात्तत्वं॥

तृतीयामृचमाह॥

अग्ने॑ दे॒वाँ इ॒हा व॑ह जज्ञा॒नो वृ॒क्तब॑र्हिषे। असि॒ होता॑ न॒ ईड्यः॑॥ ३॥

अग्ने॑। दे॒वान्। इ॒ह। आ। व॒ह॒। ज॒ज्ञा॒नः। वृ॒क्तऽब॑र्हिषे। असि॑। होता॑। नः॒। ईड्यः॑॥ ३॥

हे अग्ने जज्ञानोऽरण्योरुत्पन्नस्त्वं वृक्तबर्हिष आस्तरणार्थं छिन्नेन बर्हिषा युक्ताय। तं यजमानमनुग्रहीतुमिह कर्मणि हविर्भुजो देवानावह। नोऽस्मदर्थं होता देवानामाह्वाता त्वमीड्यः स्तुत्योऽसि॥ देवानित्यत्र संहितायां दीर्घादटि समानपाद इति रुत्वं। आतोऽटि नित्यमित्यनुनासिकभावः। जज्ञानः। जनी प्रादुर्भावे। लिटः कानच्। गमहनेत्युपधालोपः। द्विर्वचनेऽचि। पा० १.१.५९.। इति तस्य स्थानिवद्भावाद्द्विर्वचनं। चित्त्वादंतोदात्तः। वृक्तबर्हिषे। ओव्रश्चू छेदने। निष्ठेति क्तप्रत्ययः। यस्य विभाषेतीट्प्रतिषेधः। वृक्तं बर्हिर्यजमानाय येन वा ऋत्विजा। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। असि। अस्तेः सिप्। अदिप्रभृतिभ्यः शप इति शपो लुक्। तासस्त्योर्लोपः। पा० ७.४.५०.। इति

सकारस्य लोपः । पादादित्वान्न निघातः । होता । ह्वयतेस्ताच्छील्यादिषु तृन् । बहुलं छंदसीति संप्रसारणं । नित्त्वादाद्युदात्तः । ईड्यः । ईड स्तुतौ । ऋहलोर्ण्यत् । पा० ३. १. १२४. । तित्स्वरिते प्राप्ते ईडवंदवृशंसदुहां ण्यतः । पा० ६. १. २१४. । इत्याद्युदात्तत्वं ॥

चतुर्थीमृचमाह ॥

ताँ उ॑श॒तो वि बो॑धय॒ यद॑ग्ने॒ यासि॑ दू॒त्यं॑ । दे॒वैरा स॑त्सि ब॒र्हिषि॑ ॥ ४ ॥

तान् । उ॒श॒तः । वि । बो॒ध॒य॒ । यत् । अ॒ग्ने॒ । यासि॑ । दू॒त्यं॑ । दे॒वैः । आ । स॒त्सि॒ । ब॒र्हिषि॑ ॥ ४ ॥

हे अग्ने यद्यस्मात्कारणाद्दूत्यं यासि । देवानां दूतकर्म प्राप्नोषि तस्मात्कारणादुशतो हविः कामयमानान्तान्देवान् हविःस्वीकारार्थं विबोधय । विबोध्य च बर्हिष्यस्मिन्कर्मणि तैर्देवैः सह आसत्सि । आसीद । आगत्योपविश ॥ तान् । दीर्घादटि समानपाद इति संहितायां रुत्वं । आतोऽटि नित्यमित्यनुनासिकभावः । उशतः । वश कांतौ । लटः शतृ । अदिप्रभृतिभ्यः शप इति शपो लुक् । ग्रहिज्येत्यादिना संप्रसारणं । शतुरनुमो नद्यजादी इति विभक्तेरुदात्तत्वं । यासि । यद्वृत्तान्नित्यमिति निघातप्रतिषेधः । दूतस्य भागः कर्म वा दूत्यं । दूतस्य भागकर्मणी । पा० ४. ४. १२०. । इति यत् । तस्य तित्स्वरितापवादत्वेन यतोऽनाव इति प्राप्तमाद्युदात्तत्वं सर्वे विधयश्छंदसि विकल्प्यंत इति निवर्तते । अतस्तित्स्वरितमित्येव भवति । शेषनिघातः । सत्सि । सीदसि । षद्लृ विशरणगत्यवसादनेषु । लटः सिपि शपो बहुलं छंदसीति लुक् । न लुमतांगस्येति प्रत्ययलक्षणप्रतिषेधात् पाघ्रेत्यादिना सीदादेशो न भवति । बर्हिषि । बृह बृहि वृद्धौ । बृंहेर्नलोपश्च । उ० २. १०५. । इतीसिप्रत्ययः । प्रत्ययस्वरेणेकार उदात्तः ॥

पंचमीमृचमाह ॥

घृता॑हवन दीदिवः॒ प्रति॑ ष्म॒ रिष॑तो दह । अग्ने॒ त्वं र॒क्षस्विनः॑ ॥ ५ ॥

घृत॑ऽआहवन । दीदि॒ऽवः॒ । प्रति॑ । स्म॒ । रिष॑तः । द॒ह॒ । अग्ने॑ । त्वं । र॒क्षस्विनः॑ ॥ ५ ॥

हे घृताहवन घृतेनाहूयमान दीदिवो दीप्यमानाग्ने त्वं रक्षस्विनो रक्षोयुक्तान् रिषतो हिंसकान् शत्रून्प्रत्यस्माकं प्रतिकूलान्दह स्म । सर्वथा भस्मीकुरु ॥ घृतेनाहूयतेऽस्मिन्निति करणाधिकरणयोश्चेत्यधिकरणे ल्युट् । अत्र जुहोतेरवि-

वक्षितकर्मत्वेनाकर्मकत्वाद्धृतस्य करणत्वमेव न तु कर्मत्वं। अतो नैषा तृतीया च होश्छंदसि । पा॰ २. ३. ३.। इति कर्मणि तृतीया। किंतु कर्तृकरणयोस्तृतीया । पा॰ २. ३. १८.। इति करणवाचिन्येव । अतः कर्तकरणे कृता बहुलं । पा॰ २. १. ३२.। इति समासः । तत्र पूर्वपदप्रकृतिस्वरापवादे कृदुत्तरपदप्रकृतिस्वरे प्रातिपदिकावस्थायामेव कृते सति पश्चाद्विभक्तावुत्पन्नायामामंत्रितस्य चेत्याद्युदात्तत्वं। दीदिवः । दीव्यतेर्लिटः क्वसुः । तस्य वस्वेकाजाद्घसामिति नियमादिडभावः। द्विर्वचनं। हलादिशेषः। उत्तरवकारस्य लोपो व्योर्वलीति लोपः । क्वसुः। कित्त्वाद्गुणाभावः। तुजादीनां दीर्घो ऽभ्यासस्य। पा॰ ६. १. ७.। इति दीर्घत्वमभ्यासस्य। संबुद्धावुगिदचामिति नुम्। संयोगांतस्य लोप इति सकारलोपे नकारस्य मतुवसो रु संबुद्धौ छंदसीति रुत्वं। विसर्गः। पदात्परत्वादामंत्रितनिघातः। ननु पूर्वामंत्रितस्याविद्यमानत्वात्पादादित्वेन न निघातोपपत्तिः। न च नामंत्रिते समानाधिकरणे सामान्यवचनमित्यविद्यमानवत्त्वप्रतिषेधः। उभयोरग्निपदविशेषणत्वेन विशेषवचनत्वात्। अत एव परस्परमनन्वयेनासामर्थ्यात्समर्थः पदविधिरिति नियमात्पूर्वस्य न परांगवद्भावो येनैकपद्येन निघातः स्यात्। अत एव हीडे रंते ऽदिते सरस्वतीत्यादौ पृथक् प्रथगाद्युदात्तत्वमिति। उच्यते। अत्र दीदिव इति नाग्निपदविशेषणं किंतु घृताहवनपदस्यैव द्योतनार्थं। घृताहवन इति विशेष्यत्वेन विवक्षितत्वात्। विशिष्टस्य तु पश्चादग्निविशेषणता। तत्र दीदिवःपदं प्रति घृताहवनपदस्य विशेष्यत्वान्नामंत्रिते समानाधिकरण इत्यविद्यमानवत्त्वप्रतिषेधान्निघातोपपत्तिः। अत एव परस्परविशेषणविशेष्यभावेन सामर्थ्यात्सुबामंत्रित इति परांगवद्भावे शेषनिघातेनापि स्वरोपपत्तिरिति। इडे रंत इत्यादौ तु नैवं परस्परान्वय इति वैषम्यं। रिषतः। रुष रिष हिंसार्था इति। भौवादिकस्य लटः शत्रादेशे शपि छांदसो गुणाभावः। तौदादिकस्य वा रुश रिश हिंसायामित्यस्य छांदसं षत्वं। विकरणस्य शस्य ङित्त्वाद्गुणाभावः। रक्षस्शब्दादस्मायामेधास्रजो विनिः। पा॰ ५. २. १२१.। इति मत्वर्थीयो विनिः। तस्य प्रत्ययाद्युदात्तत्वं॥

अग्निमंथने ऽग्निनाग्निः समिध्यत इत्येषानुवचनीया। प्रातर्वैश्वदेव्यां प्रेषित इति खंडे सूचितं। अग्निनाग्निः समिध्यते त्वं ह्यग्ने अग्निना। आ॰ २. १६.। इति। एषैवाग्निमत इत्यस्यानुवाक्या। अथाग्नेय्य इति खंडे ऽग्नावग्निप्रणयन

इत्युपक्रम्य सूत्रितं। यद्वो वयं प्रमिनाम व्रतान्यग्निनाग्निः समिध्यते। आ० ३. १३.। इति। तामेतां षष्ठीमृचमाह ॥

अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा। हव्यवाड् जुह्वास्यः ॥ ६ ॥

अग्निना। अग्निः। सं। इध्यते। कविः। गृहऽपतिः। युवा। हव्यऽवाट्। जुहुऽआस्यः ॥ ६ ॥

अग्निराहवनीयाख्यस्तस्मिन्प्रक्षिप्यमाणेनाग्निना निर्मथ्येन प्रणीतेन वा सह समिध्यते। सम्यक् दीप्यते। कीदृशोऽग्निः। कविः। मेधावी। गृहपतिः। यजमानगृहस्य पालकः। युवा। नित्यतरुणः। हव्यवाट्। हविषो वोढा। जुह्वास्यः। जुहूरूपेण मुखेन युक्तः ॥ गृहपतिः। पत्यावैश्वर्ये इति पूर्वपदप्रकृतिस्वरत्वं। युवा। यु मिश्रणे। कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिव इति कनिन्। नित्त्वादाद्युदात्तः। हव्यं वहतीति हव्यवाट्। वहश्चेति ण्विप्रत्ययः। णित्त्वादुपधावृद्धिः। गतिकारकोपपदात्कृदुत्तरपदप्रकृतिस्वरत्वं। जुह्वास्यः। हूयतेऽनयेति जुहूः। हुवः श्लुवच्च। उ० २. ६१.। इति क्विप्। तत्संनियोगाद्दीर्घः। श्लुवद्भावाद्द्विर्भावः। चुत्वजश्त्वे। प्रातिपदिकस्वरेणांतोदात्तः। जुहूरास्यं यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन स एव शिष्यते। शेषनिघातः। यणादेश उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य। पा० ८. २. ४.। इत्याकारः स्वरितः ॥

॥ इति प्रथमस्य प्रथमे द्वाविंशो वर्गः ॥

सूक्ते सप्तमीमृचमाह ॥

कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे। देवममीवचातनं ॥ ७ ॥

कविं। अग्निं। उप। स्तुहि। सत्यऽधर्माणं। अध्वरे। देवं। अमीवऽचातनं ॥ ७ ॥

हे स्तोतृसंघ। अध्वरे क्रतावग्निमुपस्तुहि। उपेत्य स्तुतिं कुरु। कीदृशं। कविं। मेधाविनं। सत्यधर्माणं। सत्यवदनरूपेण धर्मेणोपेतं। देवं। द्योतमानं। अमीवचातनं। अमीवानां हिंसकानां शत्रूणां रोगाणां वा घातकं॥ सत्यं धर्मो यस्येति सत्यधर्मा। धर्मादनिच् केवलात्। पा० ५. ४. १२४.। इत्यनिच् समासांतः। अंतःपदेन तस्य समासत्वाभिधानाद्बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे शेषनिघातेनानुदात्तत्वं। अमीवशब्दोऽम रोग इत्यस्मात् शेवयह्वजिह्वाग्रीवा-

प्वामीवाः । उ० १. १५३. । इति वन्प्रत्यय ईडागमे च निपातः । नित्त्वादाद्युदात्तः । चते चदे याचने चेत्यस्माद्धिंसार्थात् णिजंतान्नंद्यादित्वात् ल्युः । पा० ३. १. १३४. । योरनादेशः । णेरनिटीति णेर्लोपः । लितीति धातोरकारस्योदात्तत्वं । न च स्वरे कर्तव्ये णिलोपस्य स्थानिवद्भावः । न पदांतद्विर्वचनेत्यादिना प्रतिषेधात् । अमीवानां चातन इति समासे कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते ॥

अष्टमीमृचमाह ॥

यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति । तस्य स्म प्राविता भव ॥ ८ ॥

यः । त्वां । अग्ने । हविःऽपतिः । दूतं । देव । सपर्यति । तस्य । स्म । प्रऽअविता । भव ॥ ८ ॥

हे अग्ने देव यो हविष्पतिर्यजमानो देवदूतं त्वां सपर्यति । परिचरति । तस्य यजमानस्य प्राविता भव स्म । अवश्यं रक्षको भव ॥ हूयत इति हविः । अर्चिशुचीत्यादिना । उ० २. १०४. । इसिः । प्रत्ययस्वरेणेकार उदात्तः । हविषः पतिर्हविष्पतिः । नित्यं समासेऽनुत्तरपदस्थस्य । पा० ८. ३. ४५. । इति षत्वं । पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वं । सपरशब्दात्कंड्वादिभ्यो यगिति यक् । धातुप्रकरणाद्गुणप्रतिषेधाद्यर्थोयकः कित्त्वाच्च सपरशब्दस्य धातुत्वात्ततो विहितस्य यक आर्द्धधातुकत्वे सत्यतो लोप इति लोपः । सनाद्यंता धातव इति धातुसंज्ञायां तिप् । कर्तरि शप् । तस्मिन्पूर्वस्यातो गुण इति परपूर्वत्वं । यकः प्रत्ययस्वरेणोदात्तत्वं । शपा सहैकादेशस्यैकादेश उदात्तेनोदात्त इत्युदात्तत्वं । तिङ्ङतिङ इति निघातो न भवति यद्वृत्तान्नित्यमिति प्रतिषेधात् ॥

गार्हपत्याहवनीययोः परस्परसंसर्गे विहितस्य हविषो याज्या यो अग्निं देववीतय इत्येषा । अथाग्नेय्य इष्टय इति खंड सूचितं । यो अग्निं देववीतये कुवित्सु नो गविष्टये । आ० ३. १३. । इति । तामेतां याज्यां सूक्तगतां नवमीमृचमाह ॥

यो अग्निं देववीतये हविष्माँ आविवासति । तस्मै पावक मृळय ॥ ९ ॥

यः । अग्निं । देवऽवीतये । हविष्मान् । आऽविवासति । तस्मै । पावक । मृळय ॥ ९ ॥

हविष्मान् हविर्युक्तो यो यजमानो देववीतये देवानां हविर्भक्षणहेतुयागार्थ-

मग्निमाविवासति। अग्नेः समीपे विशेषेणागत्य परिचर्यां करोति। हे पावकाग्ने तस्मै मृळय। तं यजमानं सुखय॥ देववीतये। वी गतिप्रजननकांत्यशनखादनेष्वित्यस्मादशनार्थात् क्तिन्। देवानां वीतिर्यस्मिन्यागे स देववीतिः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। नञ्विषयस्यानिसंतस्येति पर्युदासाद्वविःशब्दोऽंतोदात्तः। मतुपः सर्वानुदात्तत्वात्स एव शिष्यते। आविवासति। वा गतिगंधनयोः। अस्मादंतर्भावितण्यर्थादागमयितुमिच्छतीत्यर्थे सन्। आह्वानेच्छा परिचर्यायां पर्यवस्यतीति विवासतिशब्दः परिचर्यार्थे निघंटौ पठितः। द्विर्भावः। अभ्यासस्य ह्रस्वः। सन्यतः। पा० ७.४.७९.। इतीत्वं। ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं। तिङ्ङतिङ इति निघातो न भवति यद्वृत्तान्नित्यमिति प्रतिषेधात्। तिङि चोदात्तवति। पा० ८.१.७१.। इत्याङो निघातः। सह सुपा। पा० २.१.४.। इत्यत्र सहेति योगविभागादाङस्तिङा सह समासे समासांतोदात्तत्वे प्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। तस्मै। क्रियाग्रहणं कर्तव्यमिति संप्रदाने चतुर्थी॥

पवमानेष्टावग्नेः पावकस्यानुवाक्या स नः पावक दीदिव इति पौर्णमासेनेष्टिपशुसोमा उपादिष्टा इति खंडे सूचितं। स नः पावक दीदिवोऽग्ने पावक रोचिषा। आ० २.१.। इति। तामेतामनुवाक्यां सूक्तगतां दशमीमृचमाह॥

स नः पावक दीदिवोऽग्ने देवाँ इहा वह। उप यज्ञं हविश्च नः॥१०॥

सः। नः। पावक। दीदिऽवः। अग्ने। देवान्। इह। आ। वह। उप। यज्ञं। हविः। च। नः॥१०॥

हे दीदिवो दीप्यमान पावक शोधकाग्ने स त्वं नोऽस्मदर्थमिह देवयजनदेशे देवानावह। ततो नोऽस्मदीयं यज्ञं तच्चत्यं हविश्चोप देवसमीपे प्रापयेति शेषः॥ दीदिवः। दिवु क्रीडादौ। छंदसि लुङ्लङ्लिट इति वर्तमाने लिट्। क्वसुः। द्विर्भावो हलादिशेषः। तुजादीनां दीर्घोऽभ्यासस्येत्यभ्यासस्य दीर्घत्वं। वस्वेकाजाद्घसामिति नियमाद्वसोरिट्प्रतिषेधः। उत्तरवकारस्य लोपो व्योर्वलीति लोपः। क्वसुः। कित्त्वाद्गुणाभावः। संबुद्धावुगिदचामित्यादिना नुम्। हल्ङ्याब्भ्यो दीर्घात्‌ इत्यादिलोपः संयोगांतलोपः। नकारस्य तु मतुवसोरुरिति रुत्वं। विसर्गः। अग्ने। पादादित्वान्न निघातः। देवां इहेत्यत्र दीर्घादटि समानपाद इति रुत्वं। आतोऽटि नित्यमित्याकारस्यानुनासिकः। भोभगोअघोअपूर्वस्य योऽशीति रोर्यकारः। लोपः शाकल्यस्येति यकारलोपः। तस्यासिद्धत्वाद्गुणो न भवति।

इह। इदमो ह इति सप्तम्यंताड्ड्प्रत्ययः। इदम इश्। तद्धितांतत्वात्प्रातिपदिकत्वे सुपो धातुप्रातिपदिकयोः। पा० २. ४. ७१। इति सप्तम्या लुक्। तद्धितश्चासर्व-विभक्तिः। पा० १. १. ६८। इत्यव्ययादाप्सुपः। पा० २. ४. ८२। इत्युत्तरस्याः सप्तम्या लुक्। अकारः प्रत्ययस्वरेणोदात्तः॥

एकादशीमृचमाह॥

स नः स्तवान आ भर गायत्रेण नवीयसा। रयिं वीरवतीमिषं॥ ११॥

सः। नः। स्तवानः। आ। भर। गायत्रेण। नवीयसा। रयिं। वीरऽवतीं। इषं॥ ११॥

हे अग्ने नवीयसा नवतरेण पूर्वैरप्यसंपादितेन गायत्रेण गायत्रीछंदस्के-नानेन सूक्तेन स्तवानः स्तूयमानः स त्वं नोऽस्मदर्थं रयिं धनं वीरवतीं भृत्यपु-त्रप्रभृत्यपत्ययुक्तामिषमन्नं चाभर। संपादय॥ स्तवानः। ष्टुञ् स्तुतौ। धात्वादेः षः सः। स्वरितञित इत्यात्मनेपदं। लटः शानच्। कर्तरि शप्। बहुलं छंदसीति लुगभावः। गुणावादेशौ। आने मुक्। पा० ७. २. ८२। इति मुग्न भवत्य-नित्यमागमशासनमित्यागमानुशासनस्यानित्यत्वात्। शपः पित्वादनुदात्तत्वं। शानचश्चित्वादंतोदात्तस्यादुपदेशाच्छपः परत्वाल्लसार्वधातुकानुदात्तत्वं। धातुस्वर एव शिष्यते। भर। हृग्रहोर्भश्छंदसीति भत्वं। गायत्रेण। गायत्र्याः संबंधि गायत्रं। तस्येदं। पा० ४. ३. १२०। इत्यण्प्रत्ययः। प्रत्ययस्वरः। नवीयसा। नवशब्दादातिशायनिक ईयसुन्प्रत्ययः। नित्वादाद्युदात्तः। वीरवतीं। मतुब्ङीपोः पित्वादनुदात्तत्वं। अकारः प्रातिपदिकस्वरेणोदात्तः॥

द्वादशीमृचमाह॥

अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिः। इमं स्तोमं जुषस्व नः॥ १२॥

अग्ने। शुक्रेण। शोचिषा। विश्वाभिः। देवहूतिऽभिः। इमं। स्तोमं। जुषस्व। नः॥ १२॥

हे अग्ने शुक्रेण शोचिषा त्वदीयश्वेतवर्णदीप्त्या विश्वाभिर्देवहूतिभिस्त्वत्कृ-तसर्वदेवताह्वानसाधनस्तोत्रैश्च युक्तस्त्वं नोऽस्मदीयमिमं स्तोमं स्तोत्रविशेषं जुषस्व। सेवस्व॥ विश्वशब्दो विशेः क्वनंतो नित्वादाद्युदात्तः। देवहूतिभिः। देवशब्दः पचाद्यजंतः। चित्वादंतोदात्तः। देवानां हूतय आह्वानान्यासु स्तुति-

ष्विति देवहूतयः स्तुतयः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। स्तूयतेऽनेनेति स्तोमः। अर्तिस्तुस्वित्यादिना मन्। नित्त्वादाद्युदात्तः ॥

॥ इति प्रथमस्य प्रथमे त्रयोविंशो वर्गः ॥

सुसमिद्ध इत्यादिकं द्वादशर्चं द्वितीयमाप्रीसूक्तं। तस्य काण्वो मेधातिथिर्ऋषिः। गायत्रं छंदः। प्रत्यृचं प्रतीयमानाः सुसमिद्धतनूनपादादिका द्वादश देवताः। तथा चानुक्रमणिकायामृक्संख्यामृषिं छंदश्चानुवृत्तिबलात्सिद्धवत्कृत्य देवता उदाहृताः। सुसमिद्ध इतीध्मः समिद्धो वाग्निस्तनूनपान्नराशंस इळो बर्हिर्देवीर्द्वार उषासानक्ता दैव्यौ होतारौ प्रचेतसौ तिस्रो देव्यः सरस्वतीळाभारत्यस्त्वष्टा वनस्पतिः स्वाहाकृतय इति प्रत्यृचं देवता। एतदाप्रीसूक्तमिति। विनियोगस्तु पशौ सुसमिद्धो न आवहेति काण्वमाप्रीसूक्तं। एकादशप्रयाजा इति खंडे सूचितं। समिद्धो अद्येति सर्वेषां यथर्षि वा। आ० ३. २.। इति। तस्मिन्सूक्ते प्रथमामृचमाह ॥

सुसमिद्धो न आ वह देवाँ अग्ने हविष्मते। होतः पावक यक्षि च ॥ १ ॥

सुऽसमिद्धः। नः। आ। वह। देवान्। अग्ने। हविष्मते। होतरिति। पावक। यक्षि। च ॥ १ ॥

हे अग्ने सुसमिद्धनामकस्त्वं नोऽस्मदीयाय हविष्मते यजमानाय तदनुग्रहार्थं देवानावह। हे पावक शोधक होतर्होमनिष्पादकाग्ने यक्षि च। यज च ॥ सुसमिद्धः। समः क्रियाविशेषणत्वेन गतिसंज्ञकत्वात्प्रादिसमासः। शोभनवाचिनः सुशब्दस्य तु विशेषणं विशेष्येण बहुलं। पा० २. १. ५७.। इति समिद्धपदेन कर्मधारयसमासः। सुशब्दः प्रातिपदिकस्वरेणोदात्तः। कर्मधारयेऽनिष्ठा। पा० ६. २. ४६.। इति पूर्वपदप्रकृतिस्वरत्वं। क्रियाविशेषणत्वे हि सुशब्दस्य गतित्वात्प्रादिसमासे गतिरनंतर इति समो यदुदात्तत्वं तदेव कृदुत्तरपदप्रकृतिस्वरत्वेन स्थास्यतीति सुशब्दोऽनुदात्तःस्यात्। देवां अग्ने। पूर्ववद्रुत्वानुनासिके। हविष्मते। हविरस्यास्तीति मतुप्। तसौ मत्वर्थे। पा० १. ४. १९.। इति भत्वेन पदत्वस्य बाधितत्वान्न रुत्वं। होतःपावकशब्दयोरामंत्रितयोः पृथक्पृथगेव क्रियान्वये परस्परमसामर्थ्यात्परांगवद्भावान्न तन्निबंधनमैकस्वर्यं। न च द्वितीय-

स्यामंत्रितस्याष्टमिकनिघातेनैकस्वर्ये। आमंत्रितं पूर्वमविद्यमानवदिति पूर्वस्याविद्यमानवत्त्वेन पदात्परत्वाभावात्पादादित्वाच्च परस्परसामानाधिकरण्येऽपि होतरित्यस्य विशेषणत्वे समानमेवाविद्यमानवत्त्वं। अत एवाविद्यमानवत्त्वात्सामर्थ्येऽपि न परांगवद्भाव इति नैकस्वर्यसिद्धिः। अतो होतरिति विशेष्यं। अतः पुनातीति पावक इत्यवयवप्रसिद्धिस्वीकारेण विशेषणत्वाद्धोतरिति विशेष्यं। तच्च सामान्यवचनमिति नामंत्रिते समानाधिकरण इत्यविद्यमानवत्त्वप्रतिषेधात्पदात्परत्वादपादादित्वाच्च द्वितीयामंत्रितस्याष्टमिकनिघातेन च परांगवद्भावे सति शेषनिघातेन वा सर्वानुदात्तत्वसिद्धिः। यक्षि। यजेर्लोटः सिपि बहुलं छंदसीति शपो लुक्। व्रश्चादिना षत्वं। षढोः कः सीति कत्वं। सेर्ह्यादेशश्छांदसत्वान्न भवति। सिपः पित्त्वेनानुदात्तत्वाद्धातुस्वर एव शिष्यते। न च तिङ्ङतिङ इति निघातः। पूर्वकस्य पावकेत्यामंत्रितस्याविद्यमानवत्त्वेन पदादपरत्वात्। अत एव तस्याव्यवधायकत्वेन होतरित्यपेक्ष्य निघातः स्यादिति चेत्। न। यक्षिपदापेक्षया होतरित्यस्यापि पूर्वत्वेनाविद्यमानवत्त्वात्। ननु नामंत्रिते सामानाधिकरण इति तस्य निषिद्धमविद्यमानवत्त्वं। न च पावकपदस्याविद्यमानवत्त्वेन समानाधिकरणपरत्वाभावः। यक्षिपदस्यैव हि कार्यं प्रति पावकपदं पूर्वत्वादविद्यमानवत्स्यात्। होतःपदकार्यमविद्यमानत्वप्रतिषेधं प्रति तु परत्वाद्विद्यमानवदेवेति भवत्येवेति भवत्येव होतरित्यस्याविद्यमानवत्त्वप्रतिषेधः। अतस्तस्य विद्यमानवत्त्वात्तदपेक्षया यक्षीत्यस्य निघातः प्राप्नोत्येव। सत्यं। अत्र यक्षीत्यस्य चशब्दपरत्वाच्चादिषु चेति निघातप्रतिषेधो भविष्यतीत्यदोषः॥

द्वितीयामृचमाह॥

मधुमंतं तनूनपाद्यज्ञं देवेषु नः कवे। अद्या कृणुहि वीतये॥२॥

मधुऽमंतं। तनूऽनपात्। यज्ञं। देवेषु। नः। कवे। अद्य। कृणुहि। वीतये॥२॥

हे कवे मेधाविन् अग्ने तनूनपादेतन्नामकस्त्वमद्यास्मिन्दिने नोऽस्मदीयं मधुमंतं रसवंतं यज्ञं हविर्वीतये भक्षणार्थं देवेषु कृणुहि। कुरु प्रापयेत्यर्थः॥ मधुमंतं। फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च। उ॰ १. १८.। इति मन्यतेरुप्रत्ययो धकारश्चांतादेशः। निदित्यनुवृत्तेः प्रत्ययस्य नित्त्वादाद्युदात्तो मधुशब्दः। तनूनपात्। आमंत्रितनिघातः। अद्या। सद्यःपरुदित्यादिनास्मिन्काल इत्यर्थे द्यप्रत्ययांतो निपातितः। प्रत्ययस्वरेणांतोदात्तः। तद्धितश्चासर्वविभक्तिरित्यव्यय-

त्वादव्ययादाप्सुप इत्युपरि सप्तम्या लुक् । संहितायामन्येषामपि दृश्यत इति दीर्घत्वं । कृणुहि । कृवि हिंसाकरणयोश्च । इदितो नुम् धातोरिति नुम् । लोटः सेर्हिरादेशः । धिन्विकृण्व्योरश्चेति शपोऽपवादो विकरण उप्रत्ययः । तत्संनियोगेन वकारस्याकारः । तस्यातो लोप इति लोपः । तस्य स्थानिवद्भावाल्लघूपधगुणो न भवति । उतश्च प्रत्ययादसंयोगपूर्वात् । पा० ६. ४. १०६. । इति हेर्लुग्न भवत्युतश्च प्रत्ययाच्छंदो वावचनं । पा० ६. ४. १०६. १. । इति वचनात् । तिङ्ङतिङ इति निघातः । वीतये । मंत्रे वृषेषपचमनविदभूवीरा उदात्त इति क्तिन्नुदात्तः ॥

तृतीयामृचमाह ॥

नराशंसमिह प्रियमस्मिन्यज्ञ उप ह्वये । मधुजिह्वं हविष्कृतं ॥ ३ ॥

नराशंसं । इह । प्रियं । अस्मिन् । यज्ञे । उप । ह्वये । मधुऽजिह्वं । हविःऽकृतं ॥ ३ ॥

इह देवयजनदेशेऽस्मिन्प्रवर्तमाने यज्ञे नराशंसमेतन्नामकमग्निमुपह्वये । आह्वयामि । कीदृशं । प्रियं । देवानां प्रीतिहेतुं । मधुजिह्वं । मधुरभाषिजिह्वोपेतं । माधुर्यरसास्वादकजिह्वोपेतं वा । हविष्कृतं । हविषो निष्पादकं ॥ नराशंसः । नरशब्दो नॄ नय इत्यस्मादचंतः । प्रत्ययस्य पित्त्वाद्धातुस्वर एव शिष्यते । शंसत्यस्मिन्निति शंसः । हलश्चेत्यधिकरणे घञ् । नराणां शंस इति समासे कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्त उभे वनस्पत्यादिषु युगपत् । पा० ६. २. १४०. । इति पूर्वोत्तरपदे प्रकृतिस्वरे भवतः । अत एव वनस्पत्यादिषु पाठान्नरशब्दस्य दीर्घत्वं । इह । इदमो ह इति हप्रत्ययः । इदम इशितीशादेशः । प्रत्ययस्वरः । प्रियं । प्रीणातीति प्रियः । इगुपधज्ञाप्रीकिरः क इति कः । प्रत्ययस्वरः । अस्मिन् । ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । ह्वये । निघातः । मधुजिह्वं । मधुशब्दस्याद्युदात्तत्वमुक्तं । बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण स एव शिष्यते । हविष्कृतं । हविः करोतीति हविःकृत् । क्विपि ह्रस्वस्य तुक् । नित्यं समासेऽनुत्तरपदस्थस्येति षत्वं । कृदुत्तरपदप्रकृतिस्वरत्वं ॥

चतुर्थीमृचमाह ॥

अग्ने सुखतमे रथे देवाँ ईळित आ वह । असि होता मनुर्हितः ॥ ४ ॥

अग्ने । सुखऽतमे । रथे । देवान् । ईळितः । आ । वह । असि । होता । मनुःऽहितः ॥ ४ ॥

इट्शब्दाभिधेय हे अग्ने। ईळितोऽस्माभिः स्तुतः सन् सुखतमेऽतिशयेन सुखहेतौ कस्मिंश्चिद्रथे देवान्स्थापयित्वा कर्मभूमावावह। इट्शब्दाभिधेयत्वमत्र सूचयितुमीडित इति विशेषणं। मनुर्हितः। मनुना मंत्रेण मनुष्येण वा यजमानादिरूपेण हितोऽत्र स्थापितस्त्वं होता देवानामाह्वातासि ॥ सुखतमे। सुखमस्मिन्नस्तीति मतुप्। तस्य गुणवचनेभ्यो मतुपो लुग्वक्तव्यः। पा॰ ५. २. ९४. १.। इति लुक्। अतिशयेन सुखः सुखतमः। तमपोऽनुदात्तत्वात्प्रातिपदिकस्वरः। रथे। रमु क्रीडायां। रमंतेऽस्मिन्निति रथः। हनिकुषिनीरमिकाशिभ्यः क्थन्। उ॰ २. २.। इति क्थन्। एकाच उपदेशेऽनुदात्तात्। पा॰ ७. २. १०.। इतीट्प्रतिषेधः। अनुदात्तोपदेशेत्यादिना। पा॰ ६. ४. ३७.। मकारलोपः। नित्त्वादाद्युदात्तत्वं। ईडितः। ईड स्तुतौ। निष्ठेति क्तः। इडागमः। तस्यागमा अनुदात्ता इत्यनुदात्तः। प्रत्ययस्वरः। देवानिति नकारस्य संहितायां दीर्घादटि समानपाद इति रुत्वं। आतोऽटि नित्यमित्याकारस्यानुनासिकभावः। भोभगो इत्यादिना रोर्यत्वं। तस्य लोपः शाकल्यस्येति लोपः। तस्यासिद्धत्वाद्गुणो न भवति। आ। निपातत्वादाद्युदात्तः। असि। असु भुवि। लटः सिप्। अदिप्रभृतिभ्यः शप इति शपो लुक्। तासस्त्योर्लोप इति सकारस्य लोपः। होता। ताच्छील्ये तृन्। सौ ऋदुशन इत्यादिना। पा॰ ७. १. ९४.। अनङ्। ङित्त्वादंतादेशः। अप्तृन्नित्यादिना। पा॰ ६. ४. ११.। उपधादीर्घः। हल्ङ्यादिलोपनलोपौ। नित्त्वादाद्युदात्तः। मनुर्हितः। मन्यत इति मनुः। मन ज्ञाने। शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबंधिमनिभ्यश्च। उ॰ १. १०.। इत्युप्रत्ययः। तत्र निदित्यनुवृत्तेर्नित्त्वादाद्युदात्तः। हितः। दधातेर्निष्ठेति कर्मणि क्तः। दधातेर्हिरिति हिरादेशः। मनुना हित इति समासे तृतीयायाः स्थाने सुपां सुलुगित्यादिना स्वित्यादेशः। तस्य रुत्वं। लुगभावश्छांदसः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं ॥

पंचमीमृचमाह ॥

स्तृणीत बर्हिरानुषग्घृतपृष्ठं मनीषिणः। यत्रामृतस्य चक्षणं ॥ ५ ॥

स्तृणीत। बर्हिः। आनुषक्। घृतऽपृष्ठं। मनीषिणः। यत्र। अमृतस्य। चक्षणं ॥ ५ ॥

हे मनीषिणो बुद्धिमंत ऋत्विजः। बर्हिर्दर्भं स्तृणीत। वेदेरुपर्याच्छादयत। अत्रापि बर्हिर्नामकोऽग्निः सूच्यते। कीदृशं बर्हिरास्तरणीयं। आनुषक्।

अनुक्रमेण सक्तं। परस्परं संबद्धं। घृतपृष्ठं। घृतपूर्णानां स्रुचां बर्हिष्यासादितत्वाद्घृतं पृष्ठ उपरिभागे यस्य बर्हिषस्तद्घृतपृष्ठं। यत्र यस्मिन्बर्हिष्यमृतस्यामृतसमानस्य घृतस्य चक्षणं दर्शनं भवति। यद्वा। मरणरहितस्य देवस्य बर्हिनामकस्याग्नेर्दर्शनं भवति। तद्बर्हिः स्तृणीतेति पूर्वत्रान्वयः॥ स्तृणीत। स्तृञ् आच्छादने। लोण्मध्यमपुरुषस्य बहुवचनं। लोटो लङ्वत्। पा० ३. ४. ८५। तस्थस्थमिपां। पा० ३.४.१०१। इति थस्य तादेशः। क्र्यादिभ्यः श्ना। ई हल्यघोः। पा० ६. ४. ११३। इतीत्वं। ऋवर्णाच्चेति वक्तव्यं। पा० ८. ४. १. १। इति णत्वं। प्वादीनां ह्रस्वः। पा० ७. ३. ८०। इति धातोर्ह्रस्वत्वं। सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः। अतस्तिङ एव प्रत्ययस्वरेणोदात्तत्वं। बर्हिः। बृंहेर्नलोपश्च। उ० २. १०५। इतीसप्रत्ययनलोपौ। प्रत्ययस्वरः। आनुषक्। आ समंतादनुषजतीत्यानुषक्। षंज संगे। धात्वादेः षः सः। क्विप्चेति क्विप्। अनिदितां। पा० ६. ४. २४। इति लोपः। आङन्वोरुपसर्गयोः प्राक्प्रयोगः। गतिसमासः। उपसर्गात्सुनोतीत्यादिना षत्वं। घृतपृष्ठं। घृ क्षरणदीप्त्योः। निष्ठेति क्तः। प्रत्ययस्वरेणोदात्तः। घृतयुक्तं पृष्ठमस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। मनीषिणः। आमंत्रितनिघातः। अमृतस्य। न विद्यते मृतं मरणमस्मिन्नित्यमृतं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं बाधित्वा नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वे प्राप्ते नञो जरमरमित्रमृताः। पा० ६. २. ११६। इत्युत्तरपदाद्युदात्तत्वं। चक्षणं। चक्षिङ् व्यक्तायां वाचि। वागभिव्यक्तिवाचिधातुरिहाभिव्यक्तिमात्रं लक्षयति। ल्युट् च। पा० ३. ३. ११५। इति भावे ल्युट्। योरनादेशः। तस्यार्द्धधातुकत्वाच्चक्षिङः ख्याञ्। पा० २. ४. ५४। इति ख्याञादेशे प्राप्तेऽसनयोश्च। पा० २. ४. ५४. ३। इति प्रतिषेधः॥

षष्ठीमृचमाह॥

वि श्रयंतामृतावृधो द्वारो देवीरसश्चतः। अद्या नूनं च यष्टवे॥ ६॥

वि। श्रयंतां। ऋतऽवृधः। द्वारः। देवीः। असश्चतः। अद्य। नूनं। च। यष्टवे॥ ६॥

द्वारो यज्ञस्य शालाद्वाराणि विश्रयंतां कपाटोद्घाटनेन विश्रियंतां। कीदृश्यः। ऋतावृधः। ऋतस्य सत्यस्य यज्ञस्य वा वर्द्धयित्र्यः। देवीः। द्योतमानाः। असश्चतः। असश्चंत्यः। उद्घाटनेन प्रवेष्टृपुरुषसंगरहिताः। यद्वा। असश्चतः। प्रवेष्टृपुरुषरहितान्यज्ञगृहान्तत्पुरुषप्रवेशाय द्वाराभिमानिन्य एतत्संज्ञका अग्नि-

विशेषमूर्तयो विश्रयंतां। विशेषेण सेवंतां। द्वारसेवया तत्र पुरुषप्रवेशेन वा किं प्रयोजनमिति तदुच्यते। अद्यास्मिन्दिने नूनमवश्यं यष्टवे यष्टुं। चकाराद्दिनांतरेष्वपीति द्रष्टव्यं॥ ऋतावृधः। ऋतं वर्धयंतीत्यर्थे वृधेरंतर्भावितण्यर्थात्क्विप्चेति क्विप्। उपपदसमासः। अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घत्वं। वृधिधातुस्वरेणोदात्तः। समासे कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते। देवीः। वा छंदसीति पूर्वसवर्णदीर्घत्वं। देवशब्दात्पचाद्यजंतात्पुंयोगादाख्यायां। पा० ४. १. ४८.। इति ङीष्। प्रत्ययस्वरेणोदात्तः। विभक्त्या सहैकादेश उदात्तेनोदात्त इत्युदात्तः। असश्चतः। ग्लुंचु षस्ज गतौ। जकारस्य व्यत्ययेन चकारः। लटः शत्रादेशः। द्वाराभावे न विद्यंते सश्चंतो गच्छंतो येषु प्राग्वंशादिषु तानसश्चतः। अद्या। सद्यःपरुदित्यादिना द्यप्रत्ययांतो निपातितः। तद्धितश्चासर्वविभक्तिरित्यव्ययसंज्ञकत्वात्परस्या विभक्तेर्लुक्। प्रत्ययस्वरेणांतोदात्तः। संहितायामन्येषामपि दृश्यत इति दीर्घत्वं। नूनं। एवमादीनामंत इत्यंतोदात्तत्वं। यष्टवे। यजेस्तुमर्थे सेसेनित्यादिना। पा० ३. ४. ९.। तवेन्प्रत्ययः। व्रश्चादिना षत्वं। नित्त्वादाद्युदात्तः॥

॥ इति प्रथमस्य प्रथमे चतुर्विंशो वर्गः॥

सूक्ते सप्तमीमृचमाह॥

नक्तोषासा सुपेशसास्मिन्यज्ञ उप ह्वये। इदं नो बर्हिरासदे॥ ७॥

नक्तोषसा। सुऽपेशसा। अस्मिन्। यज्ञे। उप। ह्वये। इदं। नः। बर्हिः। आऽसदे॥ ७॥

नक्तशब्द उषःशब्दश्च लोके कालविशेषवाचिनौ। इह तु तत्कालाभिमानिवह्निमूर्तिद्वये प्रयुज्येते। नक्तोषसा नक्तोषोनामिके वह्निमूर्ती अस्मिन्प्रवर्तमाने यज्ञकर्मण्युपह्वये। आह्वयामि। किमर्थं। नोऽस्मदीयमिदं वेद्यामास्तीर्णं बर्हिर्दर्भमासदे। आसत्तुं। प्राप्तुं। कीदृश्यौ। सुपेशसा। शोभनरूपयुक्ते॥ नक्तं चोषाश्च नक्तोषसा। द्वितीयाद्विवचनस्य सुपां सुलुगित्याकारः। मलोप उपधादीर्घश्छांदसौ। देवताद्वंद्वे च। पा० ६. २. १४१.। इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं। सुपेशसा। शोभनं पेशो रूपं ययोस्ते। पूर्ववदाकारः। पेशःशब्दो नब्विषयत्वादाद्युदात्तः। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वस्यापवादत्वेना-

द्युदात्तं द्व्यच् छंदसि । पा॰ ६. २. ११९. । इत्युत्तरपदाद्युदात्तत्वं । अस्मिन् । ऊडिदमित्यादिना विभक्तिरुदात्ता । आसदे । षद्लृ विशरणगत्यवसादनेषु । धात्वादेः षः सः । आङ्पूर्वादस्मात्संपदादिभ्यो भावे क्विप् । प्रादिसमासः । कृदुत्तरपदप्रकृतिस्वरत्वं ॥

अष्टमीमृचमाह ॥

ता सुजिह्वा उप ह्वये होतारा दैव्या कवी । यज्ञं नो यक्षतामिमं ॥ ८ ॥

ता । सुऽजिह्वौ । उप । ह्वये । होतारा । दैव्या । कवी इति । यज्ञं । नः । यक्षतां । इमं ॥ ८ ॥

तच्छब्दोऽत्र सर्वनामत्वात्प्रसिद्धार्थवाची । ता तौ याज्ञिकानां प्रसिद्धौ द्वावग्नी उपह्वये । आह्वयामि । नोऽस्मदीयमिमं यज्ञं यक्षतां । तावुभौ यजतामनुतिष्ठतां । कीदृशौ । सुजिह्वा । शोभनजिह्वोपेतौ । प्रियवचनौ शोभनज्वालौ वेत्यर्थः । होतारा । होमनिष्पादकौ । दैव्या । दैव्यौ देवसंबंधिनौ । अत एवेमावग्नी दैव्यहोतृनामकौ । कवी । मेधाविनौ ॥ ता तौ । द्वितीयाद्विवचनस्य सुपां सुलुगित्याकारः । एकादेश उदात्तेनोदात्त इत्युदात्तः । सुजिह्वौ । शोभना जिह्वा ययोस्तौ । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । पूर्ववदेकादेशस्वरः । संहितायामावादेशः । वस्य लोपः शाकल्यस्येति लोपः । होतारा । जुहोतेस्तृन् । द्विवचने ऋतो ङि । पा॰ ७. ३. ११०. । इति गुणः । अप्तृन्नित्युपधादीर्घः । पूर्ववदाकारः । नित्त्वादाद्युदात्तः । दैव्या । देवानामिमौ । देवाद्यञञौ । पा॰ ४. १. ८५. ३. । इति यञ् । यस्येति चेत्यकारलोपः । ञ्नित्यादिर्नित्यमित्याद्युदात्तः । पूर्ववदाकारः । यक्षतां । यजतां । लोटि शपि परतः सिब्बहुलं लेटीति बहुलग्रहणात्सिप् । कुत्वचर्त्वषत्वानि ॥

नवमीमृचमाह ॥

इळा सरस्वती मही तिस्रो देवीर्मयोभुवः । बर्हिः सीदंत्वस्रिधः ॥ ९ ॥

इळा । सरस्वती । मही । तिस्रः । देवीः । मयःऽभुवः । बर्हिः । सीदंतु । अस्रिधः ॥ ९ ॥

अत्र महीशब्दो महत्त्वगुणयुक्तां भारतीमाचष्टेऽन्येष्वाप्रीसूक्तेषु सहशेष्विळा सरस्वती भारतीत्याम्नातत्वात् । इळादिशब्दाभिधेया वह्निमूर्तयस्तिस्रो देवीर्दीप्यमाना बर्हिर्वेद्यामास्तीर्णं सीदंतु । प्राप्नुवंतु । कीदृश्यः । मयोभुवः । सुखोत्पा-

दकाः । अस्रिधः । शोषेण क्षयेण वा रहिताः ॥ इळा । ईड स्तुतौ । छांदसं हस्वत्वं । क्विप् । धातुस्वरः । टापं चापि हलंतानां यथा वाचा दिशा निशेति टाप् । सरस्वती । सरोऽसुनंतो निच्वादाद्युदात्तः । तदस्यास्तीति मतुप् । अदुपधात्वं । तसौ मत्वर्थ इति भत्वेन पदत्वस्य बाधितत्वादुत्वाद्यभावः । उगितश्चेति ङीप् । मतुप्ङीपौ पित्वादनुदात्तौ । मही । महतीशब्दे तकारलोपश्छांदसः । यस्येति चेत्यकारलोपः । उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वं । तिस्रः । त्रिशब्दाज्जसि त्रिचतुरोः स्त्रियां तिसृचतसृ । पा० ७. २. ९९. । इति तिस्रादेशः । अचि र ऋतः । पा० ७. २. १००. । इति रेफादेशः । तिसृभ्यो जसः । पा० ६. १. १६६. । इति जस उदात्तत्वं । देवीः । देवानां पत्न्यो देव्यः । पुंयोगादाख्यायामिति ङीष् । यस्येति चेत्यकारलोपः । प्रत्ययस्वरेण ङीष उदात्तत्वं । जसि दीर्घाज्जसि चेति निषिद्धं दीर्घत्वं वा छंदसीति पक्षेऽभ्यनुज्ञायते । मयोभुवः । मीञ् हिंसायां । हिनस्ति दुःखमिति सुखं मयः । तद्भावयंतीति मयोभुवः । अंतर्भावितण्यर्थाद्भुवः क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वं । बर्हिः । बृंहेर्नलोपश्चेतीसिप्रत्ययः । प्रत्ययस्वरः । सीदंतु । षद्लृ विशरणादौ । पाघ्रेत्यादिना सीदादेशः । अस्रिधः । स्रिधेर्हिंसार्थस्य शोषणार्थस्य वा संपदादिभ्यो भावे क्विपि नञा बहुव्रीहिः । पूर्वपदप्रकृतिस्वरं बाधित्वा नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं ॥

पत्नीसंयाजे त्वष्टुः पुरोनुवाक्येह त्वष्टारमग्रियमिति । शं युवाकाय संप्रेषित इति खंडे सूत्रितं । सं ते पयांसि समु यंतु वाजा इह त्वष्टारमग्रियं । आ० १. १०. । इति । तामेतां पुरोनुवाक्यां सूक्ते दशमीमृचमाह ॥

इह त्वष्टारमग्रियं विश्वरूपमुप ह्वये । अस्माकमस्तु केवलः ॥ १० ॥

इह । त्वष्टारं । अग्रियं । विश्वऽरूपं । उप । ह्वये । अस्माकं । अस्तु । केवलः ॥ १० ॥

त्वष्टारं त्वष्टृनामकमग्निमिह कर्मण्युप ह्वये । कीदृशं । अग्रियं । श्रेष्ठं । विश्वरूपं । बहुविधरूपोपेतं । सोऽस्माकं केवलोऽसाधारणोऽस्तु । इतरयजमानेभ्योऽप्यधिकमनुग्रहं करोत्वित्यर्थः ॥ त्वष्टारं । तक्षू त्वक्षू तनूकरणे । तृन् । स्वरतिसूतिसूयतिधूञूदितो वा । पा० ७. २. ४४. । इतीडभावपक्षे स्कोः संयोगाद्योरंते च । पा० ८. २. २९. । इति ककारलोपः । ष्टुत्वं । द्वितीयैकवचने ऋतो ङिसर्वनामस्थानयोरिति गुणेऽप्तृन्नित्यादिनोपधाया दीर्घः । तृनो नित्वादाद्युदात्तत्वं । अग्रियं । अग्रादित्यनुवृत्तौ घच्छौ च । पा० ४. ४. ११७. । इति घच् । आयनेयीत्यादिना

। पा० ७. १. २.। घकारस्य इयादेशः । यस्येति लोपः । आयनादिषूपदेशिव-द्वचनं स्वरसिद्ध्यर्थं । पा० ७. १. २. १.। इत्युपदेशिवद्भावात्प्रत्ययाद्युदात्तत्वाद्वच-श्चित्त्वादंतोदात्तत्वं । विश्वरूपं । विश्वानि रूपाणि त्वष्ट्रुत्पन्नत्वेन यस्य । त्वष्टा वै पशूनां मिथुनानां रूपकृदिति श्रुतेः । विश्वशब्दस्याद्युदात्तत्वात्पूर्वपदप्रकृतिस्वरत्वे प्राप्ते बहुव्रीहौ विश्वं संज्ञायां । पा० ६. २. १०६.। इति पूर्वपदांतोदात्तत्वं । अस्माकं । असु क्षेपणे । युष्मसिभ्यां मदिक् । उ० १. १३७.। प्रत्ययस्वरेणांतोदात्तः । षष्ठीब-हुवचनमाम् । अच परमपि योऽचि । पा० ७. २. ८९.। इति यत्वं बाधित्वा नित्यत्वात्प्रतिपदविधित्वाच्चाम आकमादेशे कृतेऽनादेश इति निषेधेन । पा० ७. २. ८६.। यत्वाभावाच्छेषे लोप इति दकारलोपेऽकारांतत्वेन पश्चात्प्राप्तस्यापि सुटः । पा० ७. १. ५२.। साम इति निर्देशे स्थानिन्यंतभावेन । पा० ७. १. ३३.। निवृत्तिः । एवमर्थ एव हि साम इति ससुट्कस्य निर्देशः । केवलः । वृषादे-राकृतिगणत्वादाद्युदात्तः ॥

एकादशीमृचमाह ॥

अवं सृजा वनस्पते देवं देवेभ्यो हविः । प्र दातुरस्तु चेतनं ॥ ११ ॥

अवं । सृज । वनस्पते । देवं । देवेभ्यः । हविः । प्र । दातुः । अस्तु । चेतनं ॥ ११ ॥

हे वनस्पते । एतन्नामकाग्ने देव हविर्भुग्भ्यो देवेभ्योऽस्मदीयं हविरवसृज । समर्पयेत्यर्थः । प्र दातुर्यजमानस्य चेतनं परलोकविषयं विज्ञानं त्वत्प्रसादादस्तु ॥ वनस्पते । आमंत्रितनिघातः । देव । पादादित्वान्न निघातः । षाष्ठिकमामंत्रि-ताद्युदात्तत्वं । हविः । इसः प्रत्ययस्वरः । दातुः । ददातेस्तृच् । चित इत्यंतोदात्तः । ङसि ऋत उत् । पा० ६. १. १११.। इत्युत्वं । एकादेशः । रपरत्वं च । रात्सस्य । पा० ८. २. २४.। इति सलोपः । एकादेशस्वरेणोकार उदात्तः । चेतनं । चिती संज्ञाने । करणे ल्युट् । योरनादेशः । लघूपधगुणः । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं ॥

द्वादशीमृचमाह ॥

स्वाहा यज्ञं कृणोतनेंद्राय यज्वनो गृहे । तत्र देवाँ उप ह्वये ॥ १२ ॥

स्वाहा । यज्ञं । कृणोतन । इंद्राय । यज्वनः । गृहे । तत्र । देवान् । उप । ह्वये ॥ १२ ॥

स्वाहाशब्दो हविःप्रदानवाची सन् एतन्नामकमग्निविशेषं लक्षयति । तदग्निसंपादितं यज्ञमिंद्रायेंद्रतुष्ट्यर्थं यज्वनो यजमानस्य गृहे ऋत्विजः कृणोतन ।

कुरुत। तत्र यज्ञे देवानुपह्वये ॥ कृणोतन। कृवि हिंसाकरणयोश्च। इदित्त्वान्नुम्। लोण्मध्यमबहुवचनस्य तस्थस्थमिपामिति तादेशः। तप्तनप्तनथनाश्च। पा० ७.१.४५.। इति तनबादेशः। शपि प्राप्ते धिन्विकृण्व्योरच्चेत्युप्रत्ययः। तत्संनियोगेन वकारस्य चाकारः। तस्यातो लोप इति लोपः। अचः परस्मिन्निति स्थानिवद्भावादकारस्य लघूपधगुणो न भवति। तनपः पित्त्वेनाङित्त्वादुकारस्य गुणः। इंद्राय। ऋज्रेंद्रेत्यादिना रन्। नित्त्वादाद्युदात्तः। यज्वनः। यज देवपूजासंगतिकरणदानेषु। सुयजोर्ङ्वनिप्। पा० ३.२.१०३.। ङसि भसंज्ञायामल्लोपे प्राप्ते न संयोगाद्वमंतात्। पा० ६.४.१३७.। इति निषेधः। वनिपः पित्त्वेन धातुस्वर एव शिष्यते। गृहे। ग्रह उपादाने। गेहे कः। पा० ३.१.१४४.। इति कप्रत्ययः। ग्रहिज्येत्यादिना संप्रसारणं। परपूर्वत्वं। प्रत्ययस्वरः। तत्र। चल्। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं। देवां उपेत्यत्र संहितायां दीर्घादटीति नकारस्य रुत्वं। आतोऽटि नित्यमित्याकारस्यानुनासिकादेशः। भोभगो इति यत्वं। तस्य लोपः शाकल्यस्येति लोपः ॥

॥ इति प्रथमस्य प्रथमे पंचविंशो वर्गः ॥

ऐभिरग्न इत्यादिकस्य द्वादशर्चस्य तृतीयसूक्तस्य ऋषिश्छंदसी पूर्ववत्। तत्र सूक्तं बहुदेवताकं। अत एवानुक्रम्यते। ऐभिर्वैश्वदेवमिति। विनियोगस्तु व्यूढद्वादशाहस्य प्रथमे छंदोमे तृतीयसवने वैश्वदेवशस्त्रे। ऐभिरग्ने दुवो गिर इति सूक्तं। तथा च सूचितं। अथ छंदोमाः समुद्रादूर्मिरित्युपक्रम्यैभिरग्ने दुवो गिर इति वैश्वदेवं। आ० ८.९.। तत्र प्रथमामृचमाह ॥

ऐभि॑रग्ने दु॒वो॒ गिरो॒ विश्वे॑भिः॒ सोम॑पीतये। दे॒वेभि॑र्याहि॒ यक्षि॑ च ॥१॥

आ। ए॒भिः॒। अ॒ग्ने॒। दुवः॑। गिरः॑। विश्वे॑भिः। सोम॑ऽपीतये। दे॒वेभिः॑। या॒हि॒। यक्षि॑। च॒ ॥१॥

हे अग्ने। एभिरस्मिन्यज्ञे संभावितैर्विश्वेभिर्देवेभिः सर्वैर्देवैः सह सोमपीतये सोमपानोपेतयागार्थं दुवोऽस्मदीयां परिचर्यां गिरोऽस्मदीयाः स्तुतीश्च प्रत्यायाहि। आगच्छ। यक्षि च। आगत्य यज च ॥ एभिः। पूर्वनिर्दिष्टानां देवानामिदमा परामर्शादिदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ। पा० २.४.३२.। इत्यशनुदात्तः। शित्त्वात्सर्वादेशः। नेदमदसोरकोः। पा० ७.१.११.। इति भिस

ऐसादेशाभावः। विभक्तिरनुदात्तैव। न चोडिदमित्यादिना विभक्तेरुदात्तत्वं तत्रां-
तोदात्तादित्यधिकारात्। दुवः। नविषयस्यानिसंतस्येत्याद्युदात्तत्वं। विश्वेभिः।
विश्वशब्दो विशेः क्वनंतो नित्त्वादाद्युदात्तः। बहुलं छंदसीति भिस ऐस् न भवति।
बहुवचने झल्येत्। पा० ७. ३. १०३.। इत्येत्वं। सोमपीतये। सोमशब्दोऽर्तिस्तु-
स्वित्यादिना मनंतो नित्त्वादाद्युदात्तः। सोमस्य पीतिर्यस्मिन्यागे स सोमपीतिः।
तस्मै। तादर्थ्ये चतुर्थी। देवेभिः। बहुलं छंदसीति भिस ऐसादेशाभावः। बहु-
वचने झल्येदित्येत्वं। यक्षि। यजेर्लोटः सिप्। बहुलं छंदसीति शपो लुक्।
व्रश्चादिना षत्वं। षढोः कः सीति कत्वं। सेर्हिरादेशश्छांदसत्वान्न भवति। सिपः
पित्त्वेनानुदात्तत्वाद्धातुस्वर एव॥

द्वितीयामृचमाह॥

आ त्वा कण्वा अहूषत गृणंति विप्र ते धियः। देवेभिरग्न आ गहि॥२॥

आ। त्वा। कण्वाः। अहूषत। गृणंति। विप्र। ते। धियः। देवेभिः। अग्ने। आ। गहि॥२॥

हे विप्र मेधाविन् अग्ने कण्वा मेधाविन ऋत्विजस्त्वा यज्ञनिष्पादकं त्वा-
महूषत। आह्वयंति। तथा ते धियस्त्वदीयानि कर्माणि गृणंति कथयंति। ततो
हे अग्ने देवेभिर्देवैः सहागहि। आगच्छ॥ विप्र इत्यादिषु चतुर्विंशतिसंख्याकेषु
मेधाविनामसु कण्व ऋभुरिति पठितं। त्वा। त्वामौ द्वितीयाया इति त्वादेशः।
सर्वानुदात्तः। कण्वाः। कण शब्दार्थः। अशिप्रुषिलटिकणिखटीत्यादिना क्वन्।
नित्त्वादाद्युदात्तः। अहूषत। ह्वेञ् स्पर्द्धायां शब्दे च। छंदसि लुङ्लङ्लिट इति
वर्तमाने लुङ्। ञित्त्वादात्मनेपदं। झ आत्मनेपदेष्वनत इत्यदादेशः। च्लेः सिच्।
एकाच इतीट्प्रतिषेधः। पा० ७. २. १०.। बहुलं छंदसीति संप्रसारणं परपूर्वत्वं।
हलः। पा० ६. ४. २.। इति दीर्घत्वं। आदेशप्रत्यययोरिति षत्वं। छांदसत्वादूकारस्य
न गुणः। अडागमः। गृणंति। गॄ शब्दे। लट्। झि। झोऽंतः। क्र्यादिभ्यः
श्ना। प्वादीनां ह्रस्व इति धातोर्ह्रस्वत्वं। श्नाभ्यस्तयोरातः। पा० ६. ४. ११२.।
इत्याकारलोपः। ऋवर्णाच्चेति वक्तव्यमिति णत्वं। तिङः स्वर एव शिष्यते।
विप्र। आमंत्रितनिघातः। ते। अनुदात्तमित्यनुवृत्तौ तेमयावेकवचनस्य। पा०
८. १. २२.। इति षष्ठ्यास्ते इत्यादेशः। देवेभिः। छांदस ऐस अभावः। गहि।
गम्लृ सृप्लृ गतौ। लोटः सिप्। सेर्हिरपिच्च। कर्तरि शप्। तस्य बहुलं छंदसीति

लुक्। अनुदात्तोपदेशेत्यादिना मकारलोपः। तस्यासिद्धवदत्राभादित्यसिद्धत्वा-
दतो हेरिति हेर्लुग्न भवति ॥

तृतीयामृचमाह ॥

इंद्रवायू बृहस्पतिं मित्राग्निं पूषणं भगं। आदित्यान्मारुतं गणं ॥ ३ ॥

इंद्रवायू इति। बृहस्पतिं। मित्रा। अग्निं। पूषणं। भगं। आदित्यान्। मारुतं।
गणं ॥ ३ ॥

इंद्रादिदेवान्मारुतं मरुतां वायूनां संबंधिनं गणं च हे अग्ने यक्षीति पदद्व-
यमनुवर्तते ॥ इंद्रश्च वायुश्चेंद्रवायू। देवताद्वंद्वे च। पा० ६. ३. २६.। इति प्राप्त-
स्यानङ उभयत्र वायोः प्रतिषेधो वक्तव्यः। पा० ६. ३. २६. १.। इति प्रतिषेधः।
देवताद्वंद्वे च। पा० ६. २. १४१.। इति प्राप्तस्योभयपदप्रकृतिस्वरस्य नोत्तरपदेऽनु-
दात्तादौ। पा० ६. २. १४२.। इति निषेधः। समासांतोदात्तत्वमेव। बृहस्पतिं।
तद्बृहतोः करपत्योश्चोरदेवतयोरभिधेययोः सुट् तलोपो वक्तव्यः। पा० ६. १.
१५७.। इति तलोपः सुडागमश्च। बृहच्छब्दमाद्युदात्तं केचिद्वर्णयंतीति वामनः।
पा रक्षणे। पातीति पतिः। पातेर्डतिः। उ० ४. ५८.। प्रत्ययस्वरेणाद्युदात्तः।
समास उभे वनस्पत्यादिषु युगपदित्युभयपदप्रकृतिस्वरत्वं। मित्रा। द्वितीयायाः
सुपां सुलुगित्यादिना विभक्तेराजादेशः। आदित्यान्। अदितेरपत्यान्यादित्याः।
दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः। पा० ४. १. ८५.। प्रत्ययस्वरः। मारुतं। मरुतां
विकारः। अनुदात्तादेश्च। पा० ४. ३. १४०.। इत्यञ्। ञित्वादाद्युदात्तः ॥

चतुर्थीमृचमाह ॥

प्र वो भ्रियंत इंदवो मत्सरा मादयिष्णवः। द्रप्सा मध्वश्चमूषदः ॥ ४ ॥

प्र। वः। भ्रियंते। इंदवः। मत्सराः। मादयिष्णवः। द्रप्साः। मध्वः। चमूऽसदः ॥ ४ ॥

हे इंद्रादिदेवाः। वो युष्मदर्थमिंदवः सोमाः प्रभ्रियंते। प्रकर्षेण संपाद्यंते।
कीदृशाः। मत्सराः। तृप्तिकराः। मत्सरः सोमो मंदतेस्तृप्तिकर्मणः। नि० २. ५.।
इति यास्कः। मादयिष्णवः। हर्षहेतवः। द्रप्साः। विंदुरूपाः। मध्वः। मधुराः।
चमूषदः। चमूषु चमसादिपात्रेष्ववस्थिताः ॥ प्र। प्राग्व्यवहिताश्चेति व्यव-
हितप्रयोगः। भ्रियंते। भृञो यकि रिङ् शयग्लिङ्क्षु। पा० ७. ४. २८.। इति रिङा-

देशः। हञो वा। ह्यग्रहोर्भश्छंदसीति हकारस्य भकारः। इंदवः। उंदी क्लेदने। उंदंति पाचाणीति। निदित्यनुवृत्तावुंदेरिच्चादेः। उ० १. १२.। इत्युप्रत्ययः। आदिरिकारश्च नित्त्वादाद्युदात्तः। मत्सराः। मद तृप्तियोगे। चिदित्यनुवृत्तौ कृधूमदिभ्यः कित्। उ० ३. ७२.। इति सरप्रत्ययः। तितुत्रतथसिसुसरकसेषु चेतीट्प्रतिषेधः। चित्त्वादंतोदात्तः। मादयिष्णवः। मदी हर्षग्लपनयोः। मदेर्ण्यंताच्छंदसि। पा० ३. २. १३७.। इतीष्णुच्। णेरनिटीति णिलोपे प्राप्तेऽयामंताल्वाय्येत्न्विष्णुषु। पा० ६. ४. ५५.। इत्ययादेशः। चित्त्वादंतोदात्तः। मध्वः। मधुशब्द आद्युदात्त उक्तः। मधुशब्दस्य व्यत्ययेन पुंलिंगत्वं। संज्ञापूर्वको विधिरनित्य इति जसि च। पा० ७. ३. १०९.। इति गुणो न भवति। चमूषदः। चमु छमु जमु झमु अदने। चम्यते भक्ष्यते येषु चमसेषु ते चम्वः। कृषिचमीत्यादिना। उ० १. ८१.। ऊः। तत्र सीदंतीति चमूषदः। सत्सूद्विषेत्यादिना। पा० ३. २. ६१.। क्विप्। सुषामादेराकृतिगणत्वात्षत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं ॥

पंचमीमृचमाह ॥

ईळते त्वामवस्यवः कण्वासो वृक्तबर्हिषः। हविष्मंतो अरंकृतः ॥ ५ ॥

ईळते। त्वां। अवस्यवः। कण्वासः। वृक्तऽबर्हिषः। हविष्मंतः। अरंऽकृतः ॥ ५ ॥

हे अग्ने त्वामीळते। ऋत्विजः स्तुवंति। कीदृशाः। अवस्यवः। अवनं रक्षणं तद्धेतून्देवानिच्छंतः। कण्वासः। मेधाविनः। वृक्तबर्हिषः। आस्तरणार्थं छिन्नदर्भाः। हविष्मंतः। हविर्युक्ताः। अरंकृतः। अलंकर्तारः ॥ ईळते। ईड स्तुतौ। अनुदात्तेत्त्वाल्लटो झः। अदिप्रभृतिभ्यः शप इति शपो लुक्। झस्यादादेशः। टेरेत्वं। तास्यनुदात्तेदित्यादिना लसार्वधातुकस्यानुदात्तत्वाद्धातुस्वर एव शिष्यते। अवस्यवः। अवंतीत्यवा देवाः। ताननितिशयेनेच्छंति। सुप आत्मनः क्यच्। क्यचि चेतीत्वं न भवति। न छंदस्यपुत्रस्य। पा० ७. ४. ३५.। इति निषेधात्। सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्यः। पा० ७. १. ५१. ३.। इति सुक्। क्याच्छंदसीत्युप्रत्ययः। अतो लोपः। प्रत्ययस्वरेणांतोदात्तत्वं। कण्वासः। कण शब्दार्थः। कणंति ध्वनंति स्तोत्रादिपाठेनेति कण्वा ऋत्विजः। अशिप्रुषीत्यादिना क्वन्। नित्त्वादाद्युदात्तः। आज्जसेरसुक्। पा० ७. १. ५०.। इत्यसुक्। वृक्तबर्हिषः। वृक्तमुक्तं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। हविष्मंतः। हविरेषामस्तीति हवि-

ष्मंतः। तसौ मत्वर्थे इति भत्वेनापदत्वान्न रुत्वं। अरंकृतः। अलंकुर्वंतीत्यरंकृतः। क्विप् चेति क्विप्। ह्रस्वस्य तुक्। कपिलकादीनां संज्ञाच्छंदसोर्वा लो रत्वमापद्यते। पा० ८. २. १८. ३.। इति लकारस्य रेफादेशः॥

षष्ठीमृचमाह॥

घृतपृष्ठा मनोयुजो ये त्वा वहंति वह्नयः। आ देवान्त्सोमपीतये॥ ६॥

घृतऽपृष्ठाः। मनःऽयुजः। ये। त्वा। वहंति। वह्नयः। आ। देवान्। सोमऽपीतये॥ ६॥

हे अग्ने त्वा त्वां येऽश्वा रथेन वहंति। कीदृशाः। घृतपृष्ठाः। पुष्टांगत्वेन दीप्तपृष्ठाः। मनोयुजः। मनःसंकल्पमात्रेण रथे युज्यमानाः। वह्नयः। वोढारः। तैरश्वैः सोमपानहेतुयागार्थं देवानावहेति शेषः॥ घृतपृष्ठाः। घृ क्षरणदीप्त्योः। घृतं दीप्तं पृष्ठं येषां ते घृतपृष्ठाः। घृतशब्दः प्रत्ययस्वरेणांतोदात्तः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। मनसा युंजत इति मनोयुजः। ऋत्विग्दधृगित्यादिना क्विन्। कृदुत्तरपदप्रकृतिस्वरत्वं। त्वा। त्वामौ द्वितीयाया इत्यनुदात्तस्त्वादेशः। वहंति। शप्तिपोरनुदात्तत्वाद्धातुस्वरः। यद्वृत्तयोगान्निघाताभावः। वह्नयः। निरित्यनुवृत्तौ वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्। उ० ४. ५२.। इति निप्रत्ययः। तस्य नित्त्वादाद्युदात्तत्वं। सोमपीतये। उक्तं। मकारे परतो नकारस्य संहितायां नश्छ। पा० ८. ३. ३०.। इति धुगागमः। खरि चेति चर्त्वं। चयो द्वितीयाः शरि पौष्करसादेः। पा० ८. ४. ४८. ३.। इति द्वितीयस्थकारः॥

॥ इति प्रथमस्य प्रथमे षड्विंशो वर्गः॥

सूक्ते सप्तमीमृचमाह॥

तान्यजत्राँ ऋतावृधोऽग्ने पत्नीवतस्कृधि। मध्वः सुजिह्व पायय॥ ७॥

तान्। यजत्रान्। ऋतऽवृधः। अग्ने। पत्नीऽवतः। कृधि। मध्वः। सुऽजिह्व। पायय॥ ७॥

हे अग्ने तानिंद्रादीन्देवान्यजत्रान्यजनीयान् ऋतावृधः सत्यस्य यज्ञस्य वा वर्द्धकान् पत्नीवतः पत्नीयुक्तान्कृधि। कुरु। हे सुजिह्व शोभनजिह्वोपेत मध्वो मधुरस्य सोमस्य भागं देवान्पायय॥ यजत्रान्। अमिनक्षियजिवधिपतिभ्योऽत्रन्। उ० ३. १०४.। इति यजेरत्रन्प्रत्ययः। ऋतावृधः। वृधु वृद्धौ। अंतर्भा-

वितरणार्थात् क्विप् चेति क्विप् । अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घत्वं । वृधेर्धातुस्वरः । समासे कृदुत्तरपदप्रकृतिस्वरत्वं । अग्ने । पादादित्वान्नामंत्रितनिघातः । षाष्ठिकमाद्युदात्तत्वं । पत्नीवतः । पत्युर्नो यज्ञसंयोगे । पा० ४. १. ३३. । इति ङीप् । इकारस्य च नकारः । ता एषां संतीति मतुप् । छंदसीर इति वत्वं । पतिशब्दो डतिप्रत्ययांतत्वादाद्युदात्तः । ङीम्मतुपोरनुदात्तत्वात्स एव शिष्यते । कृधि । कृञो लोटः सिः । सेर्ह्यपिच्चेति हिः । बहुलं छंदसीति विकरणलुक् । श्रुशृणुपृकृवृभ्यश्छंदसि । पा० ६. ४. १०२. । इति हेर्धिरादेशः । ङित्त्वाद्गुणाभावः । मध्वः । उक्तं । सुजिह्व । आमंत्रितनिघातः । पायय । पा पाने । पिबंतं प्रयुंक्त इति हेतुमति चेति णिच् । शाच्छासाह्वाव्यावेपां युक् । पा० ७. ३. ३७. । इति युक् । पूर्वस्यामंत्रितस्याविद्यमानवत्त्वं । अत एवाव्यवधायकत्वान्मध्व इत्यपेक्ष्य तिङ्ङतिङ इति निघातः ॥

अष्टमीमृचमाह ॥

ये यजत्रा य ईड्यास्ते ते पिबंतु जिह्वया । मधोरग्ने वषट्कृति ॥ ८ ॥

ये । यजत्राः । ये । ईड्याः । ते । ते । पिबंतु । जिह्वया । मधोः । अग्ने । वषट्ऽकृति ॥ ८ ॥

ये देवा यजत्रा यष्टव्याः । तथा ये देवा ईड्याः स्तुत्याः । ते सर्वेऽपि वषट्कृति वषट्कारकाले वषट्कारयुक्ते यागे वा हे अग्ने ते त्वदीयया जिह्वया मधोर्मधुरस्य सोमस्य भागं पिबंतु ॥ ये यजत्राः । गतं । ईड्याः । ईड स्तुतौ । ऋहलोर्ण्यत् । तित्स्वरिते प्राप्ते ईडवंदवृशंसदुहां ण्यत इत्याद्युदात्तत्वं । द्वितीयस्य तेशब्दस्य युष्मदादेशस्य सर्वानुदात्तत्वं । मधोः । उप्रत्ययस्य नित्त्वादाद्युदात्तत्वमुक्तं । अग्ने । आमंत्रितनिघातः । वषट्कृति । करोतेः संपदादिभ्यो भावे क्विप् । वषडित्यस्य करणं यस्मिन्याग इति बहुव्रीहिः । वषडित्यस्य निपातत्वादाद्युदात्तत्वं । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

नवमीमृचमाह ॥

आकीं सूर्यस्य रोचनाद्विश्वान्देवाँ उषर्बुधः । विप्रो होतेह वक्षति ॥ ९ ॥

आकीं । सूर्यस्य । रोचनात् । विश्वान् । देवान् । उषःऽबुधः । विप्रः । होता । इह । वक्षति ॥ ९ ॥

विप्रो मेधावी होता होमनिष्पादकोऽग्निरुषर्बुध उषःकाले यागगम-

नाय बुध्यमानान्विश्वान्देवान्सूर्यस्य संबंधिनो रोचनात्स्वर्गलोकादिह कर्मण्याकी वक्षति । आवहतु ॥ आकी । निपात आद्युदात्तः । सूर्यस्य । सूर्यशब्दो राजसूयसूर्येत्यादिना । पा॰ ३. १. ११४. । क्यप्प्रत्ययांतो निपातितः । क्यपः पित्त्वाद्धातुस्वरेणाद्युदात्तः । रोचनात् । रोचमानात् । रुच दीप्तौ । अनुदात्तेतश्च हलादेः । पा॰ ३. २. १४९. । इति कर्तरि युच् । चित इत्यंतोदात्तत्वं । विश्वान् । विशेः क्वनंतो नित्त्वादाद्युदात्तः । उषर्बुधः । उषर्बुध्यंत इत्युषर्बुधः । क्विप् चेति क्विप् । धातुस्वरेणोकार उदात्तः । समासे कृदुत्तरपदप्रकृतिस्वरत्वं । विप्रः । ऋज्रेंद्रेत्यादिना रन् । नित्त्वादाद्युदात्तः । होता । ह्वयतेस्ताच्छील्ये तृन् । बहुलं छंदसीति संप्रसारणं । परपूर्वत्वं । गुणः । नित्त्वादाद्युदात्तः । इह । इदमो ह इति हप्रत्ययः । इदम इशितीश् । शित्त्वात्सर्वादेशः । प्रत्ययस्वरः । वक्षति । वहेः प्रार्थनायां लिङर्थे लेट् । तस्य तिप् । कर्तरि शप् । शपि परतः सिब्बहुलं लेटीति सिप् । ढत्वकत्वषत्वानि । तिङ्ङतिङ इति निघातः ॥

अग्निष्टोमे प्रउगशस्त्रस्य याज्या विश्वेभिः सोम्यं मध्विति स्तोत्रमग्रे शस्त्रादिति खंडे सूत्रितं । विश्वेभिः सोम्यं मध्विति याज्या । आ॰ ५. १०. । इति । तामेतां याज्यां सूक्ते दशमीमृचमाह ॥

विश्वे॑भिः सो॒म्यं मध्वग्न॒ इंद्रे॑ण वा॒युना॑ । पिबा॑ मि॒त्रस्य॒ धाम॑भिः ॥ १० ॥

विश्वे॑भिः । सो॒म्यं । मधु॑ । अग्ने॑ । इंद्रे॑ण । वा॒युना॑ । पिब॑ । मि॒त्रस्य॑ । धाम॑ऽभिः ॥ १० ॥

हे अग्ने त्वं विश्वेभिः सर्वैः पूषभगादिभिर्देवैरिंद्रेण वायुना मित्रस्य संबंधिभिर्धामभिस्तेजोभिर्मूर्तिविशेषरूपैश्च सह सोम्यं सोमसंबंधि मधु मधुरं भागं पिब ॥ विश्वेभिः । बहुलं छंदसीति भिस ऐसादेशाभावः । सोम्यं । सोममर्हति य इत्यनुवृत्तौ मये च । पा॰ ४. ४. १३८. । इति यप्रत्ययः सोमस्य विकार इत्यर्थे । यस्येति चेत्यकारलोपः । प्रत्ययस्वरः । मधु । फलिपाटिनमिमनीत्यादिना । उ॰ १. १८. । उप्रत्ययः । निदित्यनुवृत्तेर्नित्त्वादाद्युदात्तः । वायुना । कृवापाजीत्यादिना उण् । आतो युक् चिण्कृतोः । पा॰ ७. ३. ३३. । इति युक् । प्रत्ययस्वरः । पिबा । पा पाने । लोटः सेर्हिरादेशः । शपि पाघ्रेत्यादिना पिबादेशः । अतो हेरिति हेर्लुक् । शपः पित्त्वादनुदात्तत्वे धातुस्वरः । पादादित्वान्न निघातः । द्व्यचोऽतस्तिङ इति संहितायां दीर्घः । धामभिः । धाञ् । आतो मनिन्निति मनिन् । नित्स्वरः ॥

एकादशीमृचमाह ॥

त्वं होता मनुर्हितोऽग्ने यज्ञेषु सीदसि । सेमं नो अध्वरं यज ॥ ११ ॥

त्वं । होता । मनुःऽहितः । अग्ने । यज्ञेषु । सीदसि । सः । इमं । नः । अध्वरं । यज ॥ ११ ॥

हे अग्ने मनुर्हितो मनुषा होत्रादिरूपेण मनुष्येण हितः संपादितो होता होमनिष्पादको यस्त्वं यज्ञेषु सीदसि । तिष्ठसि । स त्वं नोऽस्मदीयमिममध्वरं यज्ञं यज । निष्पादय ॥ मनुर्हितः । मन्यत इति मनुः । जनेरुसिरित्यनुवृत्तौ बहुलमन्यत्रापि । उ० २. ११६. । इत्युस् । अर्तिपृवपीत्यादिना निदित्यनुवृत्तौ नित्त्वा-दाद्युदात्तः । हितः । धाञो धातोर्निष्ठेति क्तप्रत्ययः । दधातेर्हिरिति हिरादेशः । मनुषा हितो मनुर्हितः । कर्तृकरणे कृता बहुलमिति समासः । कृत्स्वरापवादेन तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं । सीदसि । षद्लृ विशरणगत्यवसादनेषु । लटः सिप् । शपि पाघ्राध्मेत्यादिना सीदादेशः । निघातः । सेममित्यत्र संहि-तायां सोऽचि लोपे चेत्पादपूरणं । पा० ६. १. १३४. । इति सेर्लोपे गुणः । अध्वरं । न विद्यते ध्वरो हिंसा यस्मिन्स अध्वरः । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । नो अध्वरमित्यत्र संहितायामेङः पदांतादति । पा० ६. १. १०९. । इति पूर्वरूपं प्राप्तं प्रकृत्यांतःपादमव्यपर इति प्रकृतिभावान्निवर्तते ॥

द्वादशीमृचमाह ॥

युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः । ताभिर्देवाँ इहा वह ॥ १२ ॥

युक्ष्व । हि । अरुषीः । रथे । हरितः । देव । रोहितः । ताभिः । देवान् । इह । आ । वह ॥ १२ ॥

हे देवाग्ने रोहितो रोहिच्छब्दाभिधेयास्त्वदीया बडवा रथे युक्ष्व । युज योजय । हिशब्दः पादपूरणार्थः । कीदृशीः । अरुषीः । गतिमतीः । हरितः । हर्तुं रथा-रूढान्पुरुषान्नेतुं समर्थाः । ताभिर्बडवाभिरिहास्मिन्कर्मणि देवानावह ॥ युक्ष्व । युजिर् योगे । लोट् । स्वरितेत्त्वादात्मनेपदं । थासः से । सवाभ्यां वामौ । रुधादिभ्यः श्नम् । तस्य बाहुलकाल्लुक् । कुत्वषत्वे । प्रत्ययस्वरेणांतोदात्तः । संहि-तायां द्व्यचोऽतस्तिङ इति दीर्घः । अरुषीः । ऋ गतौ । रंति गच्छंतीत्यरुष्यो बडवाः । ऋहनिभ्यामुषन् । उ० ४. ७४. । धातोर्गुणो रपरत्वं । नित्त्वादाद्युदात्तोऽरु-

षशब्दः । तस्मात्स्त्रियां छांदसो ङीप् । शसि प्रथमयोः पूर्वसवर्ण इति दीर्घः । रथे । रमेरौणादिकः क्थन्प्रत्ययः । नित्त्वादाद्युदात्तः । हरितः । हृसृरुहियुषिभ्य इतिः । उ० १.९७. । इति हरतेरितिप्रत्ययः । इकारः प्रत्ययस्वरेणोदात्तः । रोहितः । रुहेरपि तेनैव सूत्रेणेतिः । इकारः प्रत्ययस्वरेणोदात्तः । ताभिः । सावेकाच इति विभक्तेः प्राप्तमुदात्तत्वं सावर्णेति निषिध्यते । देवानित्यत्र पूर्ववद्रुत्वानुनासिकौ ॥

॥ इति प्रथमस्य प्रथमे सप्तविंशो वर्गः ॥

इंद्र सोममित्यादिकस्य द्वादशर्चस्य चतुर्थस्य सूक्तस्य ऋषिच्छंदसी पूर्ववत् । यद्यप्येतत्सूक्तं कृत्स्नमृतुदेवताकं तथापि प्रत्यृचमिंद्रादिदेवतांतराणि मिलितानि । तथा चानुक्रम्यते । इंद्र सोममृतव्यं तत्रैंद्री मारुती त्वाष्ट्र्याग्नेय्यैंद्री मैत्रावरुणी चतस्रो द्रविणोदस आश्विन्याग्नेय्यृतुदेवताः सर्वत्रेति । विनियोगस्तु स्मार्तो द्रष्टव्यः । तस्मिन्सूक्ते प्रथमामृचमाह ॥

इंद्र सोमं पिब ऋतुना त्वा विशंत्विंदवः । मत्सरासस्तदोकसः ॥ १ ॥

इंद्र । सोमं । पिब । ऋतुना । आ । त्वा । विशंतु । इंदवः । मत्सरासः । तत्ऽओकसः ॥ १ ॥

हे इंद्र ऋतुना सह सोमं पिब । इंदवः पीयमानाः सोमास्त्वा त्वामाविशंतु । कीदृशाः । मत्सरासः । तृप्तिकराः । तदोकसः । तन्निवासाः । सर्वदा त्वदुदरस्थायिन इत्यर्थः ॥ इंद्र । पाष्ठिकमामंत्रिताद्युदात्तत्वं । सोमं । अर्तिस्तुसुस्वित्यादिना मन् । नित्त्वादाद्युदात्तः । पिब । पिबा मित्रस्येत्यत्रोक्तं । अस्या त्वा विशंत्वित्युत्तरवाक्यगताख्यातार्थेन सह समुच्चयार्थश्चशब्दो लुप्तः । अतश्चादिलोपे विभाषेतीयं प्रथमा तिङ्विभक्तिर्न निहन्यते । विशंत्विति चलोपसाम्येऽपि द्वितीयात्वान्निहन्यत एव । संहितायामाङ्गुण इति प्राप्तस्य गुणस्य ऋत्यकः । पा० ६. १. १२८. । इति शाकल्यमते प्रकृतिभावादभावः । इंदवः । प्र वो भ्रियंत इत्यत्रोक्तं । मत्सरासः । तत्रैवोक्तं । आज्जसेरसुगित्यसुक् । तदोकसः । तदेवौकः स्थानं येषां ते तथोक्ताः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

द्वितीयामृचमाह ॥

मरुतः पिबत ऋतुना पोत्राद्यज्ञं पुनीतन । यूयं हि ष्ठा सुदानवः ॥ २ ॥

मरुतः । पिबत । ऋतुना । पोत्रात् । यज्ञं । पुनीतन । यूयं । हि । स्थ । सुऽदानवः ॥ २ ॥

हे मरुतः ऋतुना सह पोत्रात्पोतृनामकस्य ऋत्विजः पात्रात्सोमं पिबत । ततोऽस्मदीयं यज्ञं पुनीतन । शोधयत । हे सुदानवः । शोभनदातारो मरुतः । हि यस्माद्यूयं स्थ । युष्माकं शोधयितृत्वं प्रसिद्धं । तस्माच्छोधयतेत्यर्थः ॥ पिबत । अत्र तिङोऽदुपदेशाच्छपः परत्वाल्लसार्वधातुकानुदात्तत्वं । धातुस्वरः । पूर्वामंत्रितस्याविद्यमानवत्त्वेन पदादपरत्वान्निघाताभावः । पूर्ववत्प्रकृतिभावः । पोत्रात् । पोतुः संबंधि पात्रं पोत्रं । तस्येदमित्यण् । तद्धितेष्वचामादेः । पा॰ ७. २. ११७. । इति प्राप्ता वृद्धिः सर्वे विधयश्छंदसि विकल्प्यंत इति न भवति । नन्वेवमंत्यस्य ऋकारस्याचो ञ्णिति । पा॰ ७. २. ११५. । इति वृद्धिः प्राप्नोति । त्वाष्ट्रो जागत इत्यत्र हि विप्रतिषेधे परं कार्यमिति परयादिवृद्ध्यांत्योपधलक्षणा वृद्धिर्बाध्यत इत्युक्तं । इह तु परस्या आदिवृद्धेश्छांदसत्वेन निवृत्तत्वादंत्यवृद्धिः प्राप्नोत्येवेति । एवं तर्ह्यत्राप्यादिवृद्धिरौकारः क्रियतां । तस्य तु छांदस ओकारो भविष्यति । पुनीतन । पूञ् पवने । लोट् । लोटो लङ्वदिति लङ्वद्भावात्तस्य तस्थस्थमिपामिति तादेशः । क्र्यादिभ्यः श्ना । ई हल्यघोरितीकारः । तप्तनप्तनथनाश्चेति तनादेशः । प्वादीनां ह्रस्व इति ह्रस्वः । प्रत्ययद्वयस्यापि सार्वधातुकमपिदिति ङित्त्वात्स्वस्वपूर्वयोरिकोर्गुणाभावः । यूयं । युष्मदः परस्य जसो ङेप्रथमयोरम् । पा॰ ७. १. २८. । इत्यमादेशः । न विभक्तौ तुस्माः । पा॰ १. ३. ४. । इति मकारस्येत्संज्ञाप्रतिषेधः । यूयवयौ जसि । पा॰ ७. २. ९३. । इति मपर्यंतस्य यूयादेशः । शेषे लोपः । अत्र यूयादेशात्प्रागेवांतरंगत्वात्प्रातिपदिकस्यांतोदात्तत्वं । शेषनिघातः । ततो यूयादेशः स्थानेऽंतरतमः । पा॰ १. १. ५०. । इति सर्वानुदात्तः । तत्र शेषलोपोऽंत्यलोप इति पक्षे पूर्वसवर्णदीर्घत्वं बाधित्वा योऽयममि पूर्व इति प्रातिपदिकांतेनोदात्तेन सहानुदात्तस्य सुप एकादेशः स एकादेश उदात्तेनोदात्त इत्युदात्तः । टिलोपपक्षे तूदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं । स्थ । अस भुवि । लटो मध्यमबहुवचनं थ । अदिप्रभृतिभ्यः शप इति शपो लुक् । श्नसोरल्लोप इत्यकारलोपः । व्यत्ययेन षत्वं । हि चेति निषेधात्तिङ्ङतिङ इति निघातो न भवति । संहिता-

यामन्येषामपि दृश्यत इति दीर्घत्वं। अत्र हे सुदानवो यूयं हि स्थेति विवक्षितं। सुदानवः। दाभाभ्यां नुः। उ॰ ३.३२.। सोः प्रादिसमासः। आमंत्रितनिघातः। अत्र यूयमित्युद्दिश्य सुदानवः स्थेति न विधीयते येनानामंत्रितान्निघातो न स्यात्। किंतु सुदानव इति सिद्धवद्दातृत्वेन संबोध्यान्येषु मारुतसूक्तेषु मरुतां प्रसिद्धात्प्रभवातिशयाद्यूयं स्थेति युष्मच्छब्देन प्रतिनिर्दिश्य पुनीतनेति प्रार्थने पवने तेषां हेतुत्वं हिशब्देनोच्यते ॥

तृतीयामृचमाह ॥

अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना। त्वं हि रत्नधा असि ॥३॥

अभि। यज्ञं। गृणीहि। नः। ग्नावः। नेष्टरिति। पिब। ऋतुना। त्वं। हि।
रत्नऽधाः। असि ॥३॥

ग्नाशब्दः स्त्रीवाची। तथा च यास्क आह। मेना ग्ना इति स्त्रीणां मेना मानयंत्येना ग्ना गच्छंत्येनाः। नि॰ ३.२१.। इति। ग्ना अस्य संतीति ग्नावान्। नेष्टृशब्दोऽत्र त्वष्टारं देवमाह। कस्मिंश्चिद्देवसत्रे नेष्टृत्वेन त्वष्टुर्वृतत्वात्। हे ग्नावः पत्नीयुक्त नेष्टः। त्वष्टः। नोऽस्मदीयं यज्ञमभिगृणीहि। अभितो देवानां समीपे स्तुहि। ऋतुना सह त्वं सोमं पिब। हि यस्मात्त्वं रत्नधा असि। रत्नानां दातासि। दाता भवसि। तस्मात्सोमं पातुमर्हसीत्यर्थः ॥ अभि। उपसर्गाश्चाभिवर्जमिति पर्युदासादभेरंतोदात्तत्वं। गृणीहि। गॄ शब्दे। लोटि सिपो हिः। क्र्यादिभ्यः श्ना। हलिश्नात्वादी हल्यघोरितीत्वं। श्नाप्रत्ययस्य ङित्त्वाद्गुणाभावः। प्वादीनां ह्रस्वः। तिङ्ङतिङ इति निघातः। ग्ना अस्य संतीति मतुप्। व्यत्ययेन वत्वं। संबुद्धौ मतुवसो रुरिति रुत्वं। विसर्गः। पादादित्वेनामंत्रितनिघाताभावात् षाष्ठिकमामंत्रिताद्युदात्तत्वं। ग्नाव इत्यस्य विशेषणतया विशेषवचनत्वान्नामंत्रिते समानाधिकरणे इति निषेधाभावादविद्यमानवत्त्वेनोत्तरस्य नेष्टृशब्दस्य षाष्ठिकमाद्युदात्तत्वं। पिब। शपः पित्त्वाद्धातुस्वरः। पूर्वयोरामंत्रितयोरविद्यमानवत्त्वेन निघाताभावः। रत्नानि दधातीति रत्नधाः। क्विप् चेति क्विप्। धातुस्वरः। समासे कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते। असि। सिपः पित्त्वाद्धातुस्वरः। तिङ्ङतिङ इति निघातो न भवति हि चेति प्रतिषेधात् ॥

चतुर्थीमृचमाह ॥

अग्ने देवाँ इहा वह सादया योनिषु त्रिषु। परि भूष पिब ऋतुना ॥ ४ ॥

अग्ने। देवान्। इह। आ। वह। सादय। योनिषु। त्रिषु। परि। भूष। पिब।
ऋतुना ॥ ४ ॥

हे अग्ने देवानिहास्मिन्कर्मण्यावह। ततो योनिषु स्थानेषु त्रिषु सवनेषु सादया। देवानुपवेशय। ततस्तान्परिभूष। अलंकुरु। ऋतुना सह त्वं सोमं पिब ॥ अग्ने देवानित्ययं पादो गतः। योनिषु। यु मिश्रणे। वहिश्रीत्यादिना उ॰ ४. ५२.। निप्रत्ययः। निन्त्वादाद्युदात्तः। त्रिषु। षट्त्रिचतुर्भ्यो हलादिः। पा॰ ६. १. १७९.। इति विभक्तेरुदात्तत्वं। भूष अलंकारे। तिङ्ङतिङ इति निघातः। पिब। ऋतुना। गतौ ॥

पंचमीमृचमाह ॥

ब्राह्मणादिंद्र राधसः पिबा सोममृतूँरनु। तवेद्धि सख्यमस्तृतं ॥ ५ ॥

ब्राह्मणात्। इंद्र। राधसः। पिब। सोमं। ऋतून्। अनु। तव। इत। हि। सख्यं।
अस्तृतं ॥ ५ ॥

हे इंद्र ब्राह्मणाद्ब्राह्मणाच्छंसिसंबद्धाद्राधसो धनभूतात्पात्रात्सोमं पिब। किं कृत्वा। ऋतूननु। ऋतुदेवाननुसृत्य। ऋतवोऽपि पिबंत्वित्यर्थः। हि यस्मात्तवेत्तव सख्यमस्तृतमृतूनामविच्छिन्नं। तस्मादृतुभिः सह पानं युक्तं ॥ ब्राह्मणात्। ब्रह्मशब्देनात्र ब्रह्मवर्गे द्वितीयो ब्राह्मणाच्छंसी कथ्यते। स च पुल्लिंगे शेषनिघातेनानुदात्तादिः। तस्य संबंध्युच्छिष्टश्चमसः। स च तस्यैवावयववन्नियत इत्यवयवविवक्षायामनुदात्तादेरञ्। पा॰ ४. २. ४४.। तेन ञ्नित्वादाद्युदात्तश्चमसपरोऽत्र ब्राह्मणशब्दः। राधसः। सर्वधातुभ्योऽसुन्। निन्त्वादाद्युदात्तः। पिब। पादादित्वादाद्युदात्तत्वं। द्व्यचोऽतस्तिङ इति दीर्घत्वं। ऋतूँरन्वित्यत्र दीर्घादटि समानपाद इति नकारस्य रुत्वं। अत्रानुनासिकः पूर्वस्य तु वा। पा॰ ८. ३. २.। इत्यृकारस्यानुनासिकत्वं। तव। युष्मदस्मद्भ्यां ङसोऽश्। पा॰ ७. १. २७.। शित्त्वात्सर्वादेशः। तवममौ ङसीति तवादेशः। युष्मदस्मदोर्ङसीत्याद्युदात्तत्वं। सख्यं। सख्युः कर्म सख्यं। सख्युर्यः। यस्येति लोपः। प्रत्ययस्वरः। अस्तृतं। स्तृणातेर्हिंसार्थस्य क्तः। नञ्समासः। अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥

षष्ठीमृचमाह ॥

युवं दक्षं धृतव्रत मित्रावरुण दूळभं। ऋतुना यज्ञमाशाथे ॥ ६ ॥

युवं। दक्षं। धृतऽव्रता। मित्रावरुणा। दुःऽदभं। ऋतुना। यज्ञं। आशाथे इति ॥ ६ ॥

हे धृतव्रता स्वीकृतकर्माणौ मित्रावरुणा हे मित्रनामकवरुणनामकौ देवौ युवमुभौ युवामृतुना सहास्मदीयं यज्ञमाशाथे। व्याप्नुथः। कीदृशं यज्ञं। दक्षं। प्रवृद्धं। दूळभं। दुर्दहं। शत्रुभिर्दग्धुं विनाशयितुमशक्यमित्यर्थः ॥ युवं। प्रथमाद्विवचनस्य ङेप्रथमयोरमित्यमादेशः। युवावौ द्विवचने। पा॰ ७. २. ९२.। इति मपर्यंतस्य युवादेशः। शेषे लोप इति टिलोपोऽंत्यलोपो वा। अमि पूर्वत्वं। भाषायामेव ह्यात्वं। टिलोपपक्ष उदात्तनिवृत्तिस्वरेणाम उदात्तत्वं। अंत्यलोपपक्ष एकादेश उदात्तः। दक्षं। दक्ष वृद्धौ। दक्षंत्यनेनेति करणे घञ्। एवं हि पुल्लिंगत्वनियमः। अन्यस्यानियम इति नपुंसकत्वं। धृतव्रता मित्रावरुणा। धृतानि व्रतानि याभ्यां तौ धृतव्रतौ। मित्रश्च वरुणश्च मित्रावरुणौ। उभयत्र सुपां सुलुगित्यादिना विभक्तेराकारः। मित्रशब्दस्य देवताद्वंद्वे चेत्यानङादेशः। प्रथमस्यामंत्रितनिघातः। द्वितीयस्य पादादित्वादाद्युदात्तत्वं। संहितायां छांदसं ह्रस्वत्वं। दूलभं। दह भस्मीकरणे। दुःखेन दह्यत इति दुर्दहं। ईषद्दुःसुष्वित्यादिना। पा॰ ३. ३. १२६.। दुरुपपदे दग्धेः खल्। व्यत्ययो बहुलमित्युकारस्य ऊकारो रेफस्य लोपो दकारस्य डकारो हकारस्य भकारः। लितीति प्रत्ययात्पूर्वमुदात्तं। कृदुत्तरपदत्वेन स एव शिष्यते। आशाथे। अशू व्याप्तौ। छंदसि लुङ्लङ्लिट इति वर्तमाने लिट्। मध्यमद्विवचनमाथां। टेरेत्वं। अत आदेः। पा॰ ७. ४. ७०.। इत्यभ्यासस्य दीर्घः। अश्नोतेश्च। पा॰ ७. ४. ७२.। इति प्राप्तो नुडागमोऽनित्यमागमशासनमिति निवर्तते ॥

॥ इति प्रथमस्य प्रथमेऽष्टाविंशो वर्गः ॥

सूक्ते सप्तमीमृचमाह ॥

द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे। यज्ञेषु देवमीळते ॥ ७ ॥

द्रविणःऽदाः। द्रविणसः। ग्रावऽहस्तासः। अध्वरे। यज्ञेषु। देवं। ईळते ॥ ७ ॥

अध्वरेऽग्निष्टोमे प्रकृतिरूपे यज्ञेषु विकृतिरूपेषूक्थ्यादिषु च देवमग्नि-

मीळते । ऋत्विजः स्तुवंति । कीदृशा ऋत्विजः । द्रविणसः । धनार्थिनः । ग्रावहस्तासः । अभिषवसाधनपाषाणधारिणः । कीदृशं देवं । द्रविणोदाः । धनप्रदं । यद्वा धनप्रदोऽग्निः सोमं पिबत्विति शेषः । तमेतं मंत्रं यास्क एवं निर्वक्ति । नि० ८. १. । द्रविणोदाः कस्माद्धनं द्रविणमुच्यते यदेनदभिद्रवंति बलं वा द्रविणं यदेनेनाभिद्रवंति तस्य दाता द्रविणोदास्तस्यैषा भवति । द्रविणोदा द्रविणस इत्यादि । सोऽयं यास्कोक्तो निर्वचनप्रपंचस्तस्मिन्नेव ग्रंथेऽवगंतव्यः ॥ द्रविणोदाः । द्रुदक्षिभ्यामिनन् । उ० २. ५१. । नित्त्वादाद्युदात्तो द्रविणशब्दः । तद्ददातीति द्रविणोदाः । क्विप् चेति क्विप् । पूर्वपदस्य सकारोपजनश्छांदसः । रुत्वोत्वे । कृदुत्तरपदप्रकृतिस्वरत्वं । देवविशेषणत्वेनैकवाक्यतापक्षे द्वितीयायाः स्वादेशः । अथवा द्रविणमात्मन इच्छंति द्रविणस्यंति । सुप आत्मनः क्यच् । सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्यः । पा० ७. १. ५१. ३. । इति क्यचि परतः सुगागमः । द्रविणस्यतेः संपदादित्वाद्भावे क्विप् । अतो लोपः । क्वौ लुप्तं न स्थानिवद्भवति । पा० १. १. ५८. २. । इति तस्य स्थानिवत्त्वप्रतिषेधाद्यलोपः । एवं द्रविणस्शब्दो धनेच्छावचनः । द्रविणेच्छां दस्यति यथेष्टधनप्रदानेनोपक्षपयतीत्यर्थे दसु उपक्षय इत्यस्मादंतर्भावितण्यर्थात्क्विप् चेति क्विप् । एवं द्रविणोदःशब्दः सकारांतो भवति । तथा द्राविणोदसाः प्रवादा भवंतीति नैरुक्तो व्यवहार उपपद्यते । नि० ८. २. । अतो द्रविणोदस्शब्दो भिन्नवाक्यत्वे स्वार्थे प्रथमा । एकवाक्यत्वे तु व्यत्ययेन द्वितीयार्थो भवति । द्रविणस इत्यत्रापि वाक्यभेदपक्षे द्रविणसः सोमस्येत्यर्थे सकारोपजनश्छांदसः । आद्युदात्तत्वं तु नियमेन स्थितं । ऋत्विग्विशेषणत्वेनैकवाक्यत्वपक्षे तु क्यजंतात्क्विप् । अतो लोपादि पूर्ववत् । अत्र तु पक्षे क्यचश्चित्त्वेनांतोदात्तत्वे प्राप्ते व्यत्ययेनाद्युदात्तत्वं । ग्रावयुक्ता हस्ता येषां ते ग्रावहस्तासः । आज्जसेरसुक् । ग्रावशब्दो वृषादित्वादाद्युदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । अध्वरे । न विद्यते ध्वरो हिंसा यस्मिन् । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । ईळते । अनुदात्तेत्त्वादात्मनेपदं । अदिप्रभृतिभ्य इति शपो लुक् । ळस्यादादेशः ॥

अष्टमीमृचमाह ॥

द्रविणोदा ददातु नो वसूनि यानि शृण्विरे । देवेषु ता वनामहे ॥ ८ ॥

द्रविणःऽदाः । ददातु । नः । वसूनि । यानि । शृण्विरे । देवेषु । ता । वनामहे ॥ ८ ॥

द्रविणोदा देवो नोऽस्मभ्यं वसूनि धनानि ददातु यानि धनानि शृण्विरे हविरुपयुक्तत्वेन श्रूयंते। तानि च सर्वाणि धनानि देवेषु निमित्तभूतेषु वनामहे। संभजामः। धनैर्देवान्यष्टुं तानि स्वीकुर्म इत्यर्थः॥ द्रविणोदाः। गतं। वसूनि। शृस्वृस्निहीत्यादिना। उ० १. १०.। उप्रत्ययः। निदित्यनुवृत्तेराद्युदात्तः। शृण्विरे। श्रु श्रवणे। छंदसि लुङ्लङ्लिट इति वर्तमाने लिट्। रु इरेच्। पा० ३. ४. ८१.। छंदस्युभयथेति सार्वधातुकत्वे व्यत्ययेन श्नुः। तत्संनियोगेन शृभावश्च। उवङि प्राप्ते हुश्नुवोः सार्वधातुके। पा० ६. ४. ८७.। इति यणादेशः। चित इत्यंतोदात्तत्वं। यद्वृत्तान्नित्यमिति निघातप्रतिषेधः। ता। शेश्छंदसि बहुलमिति शेर्लोपः। नलोपः प्रातिपदिकांतस्य। पा० ८. २. ७.। इति नलोपः। वनामहे। वन षण संभक्तौ। व्यत्ययेनात्मनेपदं॥

नवमीमृचमाह॥

द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत। नेष्ट्रादृतुभिरिष्यत॥ ९॥

द्रविणःऽदाः। पिपीषति। जुहोत। प्र। च। तिष्ठत। नेष्ट्रात्। ऋतुऽभिः। इष्यत॥ ९॥

द्रविणोदा देव ऋतुभिः सह नेष्ट्रान्नेष्टृसंबंधिपात्रात्पिपीषति। सोमं पातुमिच्छति। ततो हे ऋत्विज इष्यत। होमस्थाने गच्छत। गत्वा च जुहोत। होमं कुरुत। हुत्वा प्रतिष्ठत च। होमस्थानात्स्थानांतरं प्रति प्रस्थानमपि कुरुत॥ द्रविणोदाः। गतं। पिपीषति। पा पाने। पातुमिच्छतीति सन्। छांदस ईकारः। तिङ्ङतिङ इति निघातः। जुहोत। लोण्मध्यमबहुवचनं। तस्य लङ्वद्भावात्तादेशः। तस्य तप्तनप्तनथनाश्चेति तबादेशः। तस्य पित्त्वाद्गुणः। अभ्यस्तानामादिरित्यनुवृत्तावनुदात्ते च। पा० ६. १. १९०.। इत्याद्युदात्तत्वे प्राप्ते भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति। पा० ६. १. १९२.। इत्योकार उदात्तः। तिष्ठत। ष्ठा गतिनिवृत्तौ। लोण्मध्यमबहुवचनस्य थस्य लङ्वद्भावात्तादेशः। शपि पाघ्राध्मेत्यादिना तिष्ठादेशः। समवप्रविभ्यः स्थः। पा० १. ३. २२.। इत्यात्मनेपदं न भवति। तत्रानुवृत्तस्य निर्दिष्टग्रहणस्यानंतर्यार्थत्वात्। अत्र चशब्देन व्यवधानात्त प्राग्धातोरित्युपसर्गत्वेन प्राक्प्रयोक्तव्यस्यापि प्रशब्दस्य व्यवहिताश्चेति छंदसि व्यवहितप्रयोगः। अत्र चशब्दो जुहोतेति पूर्वेण सह समुच्चयार्थः। न पुनरिष्यतेत्युत्तरेण। तेनाप्रथमत्वाच्चवायोगे प्रथमा। पा० ८. १. ५९.। इति निषेधाभावात्तिङ्ङतिङ इति निघातः। नेष्ट्रात्। पोत्राद्यज्ञं पुनी-

तनेत्यत्र पोत्रशब्देन यदुक्तं तदत्र द्रष्टव्यं । इषत । इष गतौ । लोएमध्यमबहुवचनं ॥

दशमीमृचमाह ॥

यत्त्वा तुरीयमृतुभिर्द्रविणोदो यजामहे । अध स्मा नो ददिर्भव ॥ १० ॥

यत् । त्वा । तुरीयं । ऋतुऽभिः । द्रविणःऽदः । यजामहे । अध । स्म । नः ।
ददिः । भव ॥ १० ॥

हे द्रविणोदो देव यद्यस्मात्कारणादृतुभिः सह त्वां यजामहे । अधेत्ययं निपातस्तच्छब्दार्थः । तस्मात्कारणान्नोऽस्मभ्यं ददिर्धनस्य दाता भव स्म । अवश्यं भव ॥ तुरीयं । चतुर्णां पूरणं । चतुरश्छयतावाद्यक्षरलोपश्च । पा० ५. २. ५१. १. । इति छप्रत्ययः । तस्य प्रत्ययस्वरेणोदात्तत्वात्प्रागेवायनेयीनित्यादिना । पा० ७. १. २. । ईयादेशः । आयनादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति वचनात्कृत आदेशे प्रत्ययस्वरेणेकार उदात्तः । द्रविणोदः । उक्तं । पादादित्वादामंत्रिताद्युदात्तत्वं । यजामहे । अत्र शपः पित्त्वेन तिङश्च लसार्वधातुकस्वरे धातुस्वर एव । पूर्वस्यामंत्रितस्याप्यविद्यमानवत्त्वाद्यद्वृत्तयोगाद्वा न निघातः । व्यवहितयोगेऽपि हि स निषेध इत्युक्तं । अध । छांदसो धकारः । स्म । चादिरनुदात्तः । संहितायां निपातस्य चेति दीर्घः । ददिः । डुदाञ् दाने । आदृगमहनजनः किकिनौ लिट् च । पा० ३. २. १७१. । इति किप्रत्ययः । लिड्वद्भावाद्द्विर्वचनादि । आतो लोप इटि च । पा० ६. ४. ६४. । इत्याकारलोपः । प्रत्ययस्वरः ॥

एकादशीमृचमाह ॥

अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता । ऋतुना यज्ञवाहसा ॥ ११ ॥

अश्विना । पिबतं । मधु । दीद्यग्नी इति दीदिऽअग्नी । शुचिऽव्रता । ऋतुना ।
यज्ञऽवाहसा ॥ ११ ॥

हे अश्विनौ मधु माधुर्योपेतं सोमं पिबतं । कीदृशौ । दीद्यग्नी । द्योतमानाहवनीयाद्यग्नियुक्तौ । शुचिव्रता । शुद्धकर्माणौ । ऋतुना । ऋतुदेवतया सह । यज्ञवाहसा । यज्ञस्य निर्वाहकौ ॥ अश्विना । संबोधनद्विवचनस्य सुपां सुलुगित्याकारः । आमंत्रिताद्युदात्तः । पिबतं । शपः पित्त्वादनुदात्तत्वं । तिङश्च

लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते । मधु । फलिपाटीत्यादिना उप्रत्ययः । निदित्यनुवृत्तेर्नित्त्वादाद्युदात्तः । दीद्यग्नी । दिवु क्रीडादौ । अन्येभ्योऽपि दृश्यंत इति विच् । वेरपृक्तलोपाद्वलि लोपो बलीयानिति प्रथमवकारस्य लोपः । पा० ६. १. ६६. ६७. । प्रथमं प्रत्ययलोपेऽहि वर्णाश्रयविधौ प्रत्ययलक्षणं नास्तीति निषेधाद्वलि लोपो न स्यात् । छांदसं द्विर्वचनं । तुजादित्वादभ्यासस्य दीर्घत्वं । यङ्लुगंताद्वा संज्ञापूर्वको विधिरनित्य इत्यभ्यासस्य गुणाभावः । दीदिरग्निर्ययोस्तौ दीद्यग्नी । आमंत्रिताद्युदात्तत्वं । पादादित्वान्न निघातः । शुचिव्रता । शुचि व्रतं ययोस्तौ । सुपां सुलुगित्याकारः । दीद्यग्निशब्दस्य सामान्यवचनत्वेन नामंत्रित इत्यविद्यमानवत्त्वप्रतिषेधादाष्टमिकनिघातत्वं । पूर्वस्य परांगवद्भावाद्वैकस्वर्यं । यज्ञवाहसा । वह प्रापणे । यज्ञं वहत इति यज्ञवाहसौ । वहिहाधाञ्भ्यश्छंदसि । उ० ४. २२०. । इत्यसुन् । तत्र हि गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति वचनात्सोपपदानामपि भवति । उ० ४. २२६. । इत्युक्तं । णिदित्यनुवृत्तेरुपधावृद्धिः । सुपां सुलुगित्यादिना विभक्तेराकारः । आमंत्रितनिघातः । असामर्थ्यात्पूर्वस्य न परांगवद्भावः ॥

द्वादशीमृचमाह ॥

गार्हपत्येन संत्य ऋतुना यज्ञनीरसि । देवान्देवयते यज ॥ १२ ॥

गार्हऽपत्येन । संत्य । ऋतुना । यज्ञऽनीः । असि । देवान् । देवऽयते । यज ॥ १२ ॥

हे संत्य फलप्रदाग्निदेव गार्हपत्येन गृहपतिसंबंधिना रूपेण युक्तः सन् ऋतुना ऋतुदेवेन सह यज्ञनीर्यज्ञस्य निर्वाहकोऽसि । तस्मात्त्वं देवयते देवविषयकामनायुक्ताय यजमानाय देवान्यज ॥ गार्हपत्येन । गृहपतिना संयुक्ते ञ्यः । पा० ४. ४. ९०. । यस्येति लोपः । ञित्त्वादादिवृद्धिराद्युदात्तत्वं च । गृहपतित्वमित्यर्थे पत्यंतपुरोहितादिभ्यः । पा० ५. १. १२८. । इति यकि त्वंतोदात्तत्वं स्यात् । संत्य । सनने भव । षण दाने । क्तिच्क्तौ चेति क्तिच् । न क्तिचि दीर्घश्च । पा० ६. ४. ३९. । इति दीर्घनलोपाभावः । भवे छंदसीति यत् । तत्र साधुरिति वा । निघातः । यज्ञं नयतीति यज्ञनीः । सत्सूद्विषेत्यादिना क्विप् । कृदुत्तरपदप्रकृतिस्वरः । देवयते । देवानात्मन इच्छतीति देवयन् । तस्मै । क्यचि चेतीत्वं न भवति । न छंदस्यपुत्रस्येति निषेधात् । अश्वाघस्येत्यात्वविधानादात्वनिषेधे प्राप्तस्य दीर्घस्याप्येष निषेध इत्युक्तं । शतुरनुमो नद्यजादी इति विभक्तेरुदात्तत्वं । अत्र

क्वचश्चित्त्वादंतोदात्तत्वं। शपः पित्त्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वरेणोभयोः क्वचा सहैकादेश एकादेश उदात्तेनोदात्त इत्युदात्तः। तस्मादंतोदात्तत्वात्परस्या विभक्तेः शतुरनुमो नद्यजादी इत्युदात्तत्वं ॥

॥ इति प्रथमस्य प्रथम एकोनत्रिंशो वर्गः ॥

आ त्वा वहंत्विति पंचमं नवर्चं सूक्तं। ऋषिच्छंदसी पूर्ववत् ॥ अनुवर्तते विशेषादेशाभावादिंद्रो देवता। विनियोगस्तु प्रातःसवने मैत्रावरुणस्योन्नीयमाने सूक्तमा त्वा वहंतु हरय इति। तथा च द्विदेवत्यैश्चरंतीति खंडे सूचितं। उन्नीयमानेभ्योऽन्वाहा त्वा वहंतु। आ० ५.५.। इति। तथा षोडशिशस्त्र आ त्वा वहंतु हरय इति तिस्रः। तथा सूचितमथ षोळशीति खंडे। आ त्वा वहंतु हरय इति तिस्रो गायत्र्यः। आ० ६.२.। इति। तस्मिन्सूक्ते प्रथमामृचमाह ॥

आ त्वा वहंतु हरयो वृषणं सोमपीतये। इंद्र त्वा सूरचक्षसः ॥ १ ॥

आ। त्वा। वहंतु। हरयः। वृषणं। सोमऽपीतये। इंद्र। त्वा। सूरऽचक्षसः ॥ १ ॥

हे इंद्र वृषणं कामानां वर्षितारं त्वां सोमपीतये सोमपानार्थं हरयस्त्वदीया अश्वा आवहंतु। अस्मिन्कर्मण्यानयंतु। तथा सूरचक्षसः सूर्यसमानप्रकाशयुक्ता ऋत्विजस्त्वां मंत्रैः प्रकाशयंत्विति शेषः ॥ हरंतीति हरयः। इन् सर्वधातुभ्यः। उ० ४.११९.। इतीन्। नित्त्वादाद्युदात्तः। वृषणं। कनिन्युवृषितक्षीत्यादिना कनिन्। कित्त्वाल्लघूपधगुणाभावः। वा षपूर्वस्य निगमे। पा० ६.४.९.। इति विकल्पितमुपधादीर्घत्वं। सोमपीतये। ऐभिरग्न इत्यत्रोक्तं। सूरचक्षसः। चक्षिङ् व्यक्तायां वाचि। सर्वधातुभ्योऽसुन्। चक्षिङः ख्याञिति न भवति। असनसोः प्रतिषेधो वक्तव्यः। पा० २.४.५४.३.। इति निषेधात्। षू प्रेरणे। सवतीति सूरः। सुसूधागृधिभ्यः क्रन्। उ० २.२५.। इति क्रन्। कित्त्वाद्गुणाभावः। नित्त्वादाद्युदात्तः। सूरवत्ख्यानं प्रकाशो येषां। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

द्वितीयामृचमाह ॥

इमा धाना घृतस्नुवो हरी इहोप वक्षतः। इंद्रं सुखतमे रथे ॥ २ ॥

इमाः। धानाः। घृतऽस्नुवः। हरी इति। इह। उप। वक्षतः। इंद्रं। सुखऽतमे। रथे ॥ २ ॥

हरिशब्द इंद्ररथस्य वोढारावश्वावाचष्टे। तथा च श्रुत्यंतरं हर्योः स्थातेति। हरिभ्यां त्वेंद्रो देवतां गमयत्विति च। एतदेवाभिप्रेत्य निघंटुकार आह। हरी इंद्रस्येति। तादृशौ हरी इमा यागार्थं वेद्यामासादितत्वेन पुरोवर्तिनीर्धाना भ्रष्टयवतंडुलानुद्दिश्य सुखतमे रथ इंद्रं स्थायास्मिन्कर्मण्युपवक्षतः। वेदिसमीपे वहतां। कीदृशीर्धानाः। घृतस्नुवः। अलंकरणोपस्तरणाभिघरणेन घृतस्राविणीः॥ धीयंत इति धानाः। धापॄवस्यज्यतिभ्यो नः। उ॰ ३.६.। इति नः। प्रत्ययस्वरः। घृतस्नुवः। घृतं स्नुवंतीति घृतस्नुवः। क्विपि तुगभावश्छांदसः। धातुस्वरः। समासे कृदुत्तरपदप्रकृतिस्वरत्वं। स्नोः संयोगपूर्वत्वेन यणभावादुवङादेशः। हरी। हृञ् हरणे। सर्वधातुभ्य इन्। नित्त्वादाद्युदात्तः। प्रगृह्यत्वात्संहितायां प्रकृतिभावः। वक्षतः। प्रार्थनाख्ये लिङर्थे लेट्। तस्य प्रथमपुरुषद्विवचनं तस्। लेटोऽडाटावित्यडागमः। शपि प्राप्ते सिब्बहुलं लेटीति सिप्। ढत्वकत्वषत्वानि। तिङ्ङतिङ इति निघातः। सुखतमे। गतं॥

तृतीयामृचमाह॥

इंद्रं प्रातर्हवामह इंद्रं प्रयत्यध्वरे। इंद्रं सोमस्य पीतये॥३॥

इंद्रं। प्रातः। हवामहे। इंद्रं। प्रऽयति। अध्वरे। इंद्रं। सोमस्य। पीतये॥३॥

प्रातः कर्मारंभे प्रातःसवन इंद्रं हवामहे। आह्वयामः। तथैवाध्वरे सोमयागे प्रयति प्रगच्छति प्रारभ्य वर्तमाने सति माध्यंदिने सवने तमिंद्रं हवामहे। तथा यज्ञस्य समाप्त्यवसरे तृतीयसवने सोमस्य पीतये सोमपानार्थं हवामहे॥ प्रातः। स्वरादिष्वंतोदात्तो निपातितः। हवामहे। ह्वेञो लटि शपि परतो ह्वः संप्रसारणमित्यनुवृत्तौ बहुलं छंदसीति संप्रसारणं। परपूर्वत्वं। गुणावादेशौ। प्रयति। इण् गतौ। लटः शतृ। अदिप्रभृतिभ्यः शप इति शपो लुक्। शतुर्ङित्त्वाद्गुणाभावः। प्रादिसमासः। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति वचनात्प्रत्ययग्रहण इति नियमाभावात् शतुरनुमो नद्यजादी इति विभक्तेरुदात्तत्वं। अध्वरे। उक्तं। संहितायामुदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य। पा॰ ८.२.४.। इत्यकारस्य स्वरितत्वं। पीतये। पा पाने। क्तिनि छांदसमंतोदात्तत्वं॥

चतुर्थीमृचमाह ॥

उप नः सुतमा गहि हरिभिरिंद्र केशिभिः । सुते हि त्वा हवामहे ॥ ४ ॥

उप । नः । सुतं । आ । गहि । हरिऽभिः । इंद्र । केशिऽभिः । सुते । हि । त्वा । हवामहे ॥ ४ ॥

हे इंद्र केशिभिः केशरयुक्तैर्हरिभिरश्वैस्त्वं नोऽस्मदीयं सुतमभिषुतं सोमं प्रत्युप समीप आगहि । आगच्छ । सुतेऽभिषुते सोमे निमित्तभूते सति यस्मात्कारणात्त्वां हवामहे । त्वामाह्वयामः । तस्मादागच्छेति पूर्वत्रान्वयः ॥ गहि । गमेर्लोटः सेर्हिः । शप इत्यनुवृत्तौ बहुलं छंदसीति शपो लुक् । इषुगमियमां छः । पा० ७. ३. ७७. । इति छत्वं न भवति । न लुमतांगस्येति प्रतिषेधात् । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः । तस्यासिद्धवदत्रा भादित्यसिद्धत्वादतो हेरिति हेर्लुङ् भवति । केशिभिः । क्लिशेरन् लो लोपश्च । उ० ५. ३३. । इत्यन् । मत्वर्थीय इनिः । प्रत्ययस्वरः । हवामहे । ह्व इत्यनुवृत्तौ बहुलं छंदसीति संप्रसारणं । शपः पित्त्वादनुदात्तत्वं । तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव । तिङ्ङतिङ इति न निघातो हि चेति प्रतिषेधात् ॥

पंचमीमृचमाह ॥

सेमं नः स्तोममा गह्युपेदं सवनं सुतं । गौरो न तृषितः पिब ॥ ५ ॥

सः । इमं । नः । स्तोमं । आ । गहि । उप । इदं । सवनं । सुतं । गौरः । न । तृषितः । पिब ॥ ५ ॥

हे इंद्र स त्वं नोऽस्मदीयमिमं स्तोमं स्तुतिं प्रत्यागहि । आगच्छ । आगमने हेतुरुच्यते । उप देवयजनसमीपे सुतमभिषुतसोमयुक्तमिदमिदानीमनुष्ठीयमानं सवनं प्रातःसवनादिरूपं कर्म वर्तते । तस्माद्गौरो न गौरमृग इव तृषितः सन्निमं सोमं पिब ॥ सः इममित्यत्र संहितायां सोऽचि लोपे चेत्पादपूरणमिति सुलोपः । गहि । गतं । सवनं । सूयतेऽस्मिन्सोम इत्यधिकरणे ल्युट् । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । ल्युडंतात्सप्तम्याः सुपां सुपो भवंतीति वक्तव्यमिति वचनाद्द्वितीया । अभिषुतसोमयुक्तमिदं सवनमिति कर्मण्येव वा द्वितीया । तदा

सुतशब्दादर्शआदित्वादच् । पा० ५. २. १२७.। तृषितः । जितृष पिपासायां । निष्ठेति क्तः । प्रत्ययस्वरेणोदात्तः । पश्चादिट् । आगमा अनुदात्ता इत्यनुदात्तत्वं ॥

॥ इति प्रथमस्य प्रथमे त्रिंशो वर्गः ॥

सूक्ते षष्ठीमृचमाह ॥

इमे सोमास इंदवः सुतासो अधि बर्हिषि । ताँ इंद्र सहसे पिब ॥ ६ ॥

इमे । सोमासः । इंदवः । सुतासः । अधि । बर्हिषि । तान् । इंद्र । सहसे । पिब ॥ ६ ॥

इंदुशब्द उंदी क्लेदन इति धातोरुत्पन्नः । इंदवः क्लेदनयुक्ता इमे वेद्यामवस्थिताः सोमासस्तत्पात्रगताः सोमा बर्हिषि यज्ञेऽध्याधिक्येन सुतासोऽभिषुताः । हे इंद्र सहसे बलार्थं तान्सोमान्पिब ॥ सोमासः । आज्जसेरसुगिति जसोऽसुगागमः । इंदवः । उक्तं । सुतासः । पूर्ववदसुक् । संहितायां प्रकृत्यांतःपादमव्यपर इति प्रकृतिभावात्परपूर्वत्वं न भवति । बर्हिषि । बृंहेर्नलोपश्चेतीसुप्रत्ययस्वरः । ताँ इंद्रेत्यत्र दीर्घादटि समानपाद इति रुत्वं । यत्वयलोपौ । अनुनासिकः । सहसे । षह मर्षणे । असुनंतो नित्त्वादाद्युदात्तः ॥

सप्तमीमृचमाह ॥

अयं ते स्तोमो अग्रियो हृदिस्पृगस्तु शंतमः । अथा सोमं सुतं पिब ॥ ७ ॥

अयं । ते । स्तोमः । अग्रियः । हृदिऽस्पृक् । अस्तु । शम्ऽतमः । अथ । सोमं । सुतं । पिब ॥ ७ ॥

हे इंद्र । अयमस्माभिः क्रियमाणः स्तोमः स्तोत्रविशेषोऽग्रियः श्रेष्ठः सन् ते तव हृदिस्पृक् मनस्यंगीकृतः शंतमः सुखतमोऽस्तु । अथ स्तुतेरनंतरं सुतमभिषुतं सोमं पिब ॥ अग्रियः । अग्रादित्यनुवृत्तौ घच्छौ चेति घच् । चित्त्वादंतोदात्तः । हृदि स्पृशतीति हृदिस्पृक् । स्पृशोऽनुदके क्विन् । पा० ३. २. ५८. । तत्पुरुषे कृति बहुलमित्यलुक् । क्विन्प्रत्ययस्य कुः । पा० ८. २. ६२. । इति शकारस्य कुत्वं । कृदुत्तरपदप्रकृतिस्वरत्वं । शंतमः । सुखकरद्रव्यवचनोऽत्र शम्शब्दः । ततस्तमप् । अत्र सुखप्रकर्षस्य गुणद्वारा गुणनिष्ठद्रव्ये संक्रांतत्वादद्रव्यप्रकर्ष इति निषेधात् । पा० ५. ३. ५५. २. । किमेत्तिङव्ययेत्यादिना । पा० ५. ४. ११. । आम्

न भवति द्रव्यस्य स्वतः प्रकर्षाभावात् । ईदृगर्थ एव हि स निषेधः । अथा सोमं । संहितायां निपातस्येति दीर्घः ॥

अष्टमीमृचमाह ॥

विश्वमित्सवनं सुतमिंद्रो मदाय गच्छति । वृत्रहा सोमपीतये ॥ ८ ॥

विश्वं । इत् । सवनं । सुतं । इंद्रः । मदाय । गच्छति । वृत्रऽहा । सोमऽपीतये ॥ ८ ॥

वृत्रहा शत्रुघातक इंद्रः सोमपीतये सोमपानाय मदाय तत्पानजन्यहर्षाय च विश्वमित्सर्वमपि सुतमभिषुतसोमयुक्तं सवनं प्रातःसवनादिरूपं कर्म गच्छति ॥ विश्वं । अशिप्रुषीत्यादिना क्वन् । नित्त्वादाद्युदात्तः । सवनं सुतं । पूर्ववत् । मदाय । मदोऽनुपसर्ग इत्यप्प्रत्ययः । पित्त्वाद्धातुस्वरः । गच्छति । इषुगमियमां छः । वृत्रहा । वृत्रं हतवान् । ब्रह्मभ्रूणवृत्रेषु क्विप् । पा० ३. २. ८७. । इन्हनित्यादिना नियतं दीर्घत्वं सौ च । पा० ६. ४. १२. १३. । इति प्रतिप्रसवाद्भवति । कृदुत्तरपदप्रकृतिस्वरत्वं । सोमपीतये । व्यधिकरणबहुव्रीहिरित्युक्तं । तत्पुरुषे वा दासीभारादित्वात् । पा० ६. २. ४२. । पूर्वपदप्रकृतिस्वरत्वं ॥

नवमीमृचमाह ॥

सेमं नः काममा पृण गोभिरश्वैः शतक्रतो । स्तवाम त्वा स्वाध्यः ॥ ९ ॥

सः । इमं । नः । कामं । आ । पृण । गोभिः । अश्वैः । शतक्रतो इति शतऽक्रतो । स्तवाम । त्वा । सुऽआध्यः ॥ ९ ॥

हे शतक्रतो स त्वं नोऽस्मदीयमिमं कामं काम्यमानं फलं गोभिरश्वैश्च सहापृण । सर्वतः पूरय । वयमपि स्वाध्यः सुष्ठु सर्वतो ध्यानयुक्ताः संतस्त्वां स्तवाम ॥ सेमं । संहितायां सोऽचि लोपे चेत्पादपूरणमिति सुलोपः । कामं । कामेर्घञि कर्षात्वतो घञोऽंत उदात्तः । पा० ६. १. १५९. । इत्यंतोदात्तत्वे प्राप्ते वृषादिषु पाठादाद्युदात्तत्वं । पृण । पृण प्रीणने । लोटः सेर्हिः । तुदादिभ्यः शः । तस्य ङित्त्वाद्गुणाभावः । अतो हेरिति हेर्लुक् । गोभिः । सावेकाच इति प्राप्तं विभक्तेरुदात्तत्वं न गोश्वन्साववर्णेति प्रतिषिध्यते । अश्वैः । क्वनंत इत्युक्तं । असामर्थ्यान्न परांगवद्भावः । स्तवाम । ष्टुञ् स्तुतौ । धात्वादेः षः सः । लोडुत्तमबहुवचनस्य लोटो लङ्वदिति लङ्वद्भावान्नित्यं ङितः । पा० ३.४.९९. । इति सकारस्य

लोपः । आडुत्तमस्य पिच्च । पा॰ ३. ४. ९२. । इत्याडागमः । प्रत्ययस्य पित्त्वादनुदात्तत्वं । धातुस्वर एव । स्वाध्यः । ध्यै चिंतायां । स्वाङोरुपसर्गयोः प्राक्प्रयोगः । अन्येभ्योऽपि दृश्यंत इति क्विप् । दृशिग्रहणस्य विध्यंतरोपसंग्रहणार्थत्वादत्र संप्रसारणे सति परपूर्वत्वं । हल इति दीर्घः । जस्येरनेकाचः । पा॰ ६. ४. ८२. । इति यणादेशः । गतिकारकोपपदात्कृदित्युत्तरपदप्रकृतिस्वरत्वं । उदात्तयणो हल्पूर्वादिति जस उदात्तत्वं न भवति तचासर्वनामस्थानमित्यनुवृत्तेः । अत उदात्तस्वरितयोर्यणः स्वरितानुदात्तस्येति स्वरितत्वमेव भवति ॥

॥ इति प्रथमस्य प्रथम एकत्रिंशो वर्गः ॥

इंद्रावरुणयोरित्यादिकं नवर्चं षष्ठं सूक्तं । अत एव नवशब्दानुवृत्तावनुक्रम्यते । इंद्रावरुणयोरिंद्रावरुणं युवाकु पादनिचृताविति । अत्र देवता विस्पष्टा । ऋषिश्छंदसी तु पूर्ववदनुवर्तेते । अयं तु विशेषः । युवाकु हीत्यादिके द्वे ऋचौ पादनिचृन्नामकच्छंदोयुक्ते । विनियोगस्तु स्मार्त्तो लैंगिको वा कश्चिदवगंतव्यः । तस्मिन्सूक्ते प्रथमामृचमाह ॥

इंद्रावरुणयोरहं सम्राजोरव आ वृणे । ता नो मृळात ईदृशे ॥ १ ॥

इंद्रावरुणयोः । अहं । संऽराजोः । अवः । आ । वृणे । ता । नः । मृळातः ।
ईदृशे ॥ १ ॥

अहमनुष्ठाता सम्राजोः समीचीनराज्योपेतयोः सम्यग्दीप्यमानयोर्वेंद्रावरुणयोर्देवयोः संबंध्यवो रक्षणमावृणे । सर्वतः प्रार्थये । ता तौ देवावीदृशे एवंविधेऽस्मदीयवरणे निमित्तभूते सति मृळातः । अस्मान्सुखयतः ॥ इंद्रशब्दो रन्प्रत्ययांतः । वरुणशब्द उनन्प्रत्ययांतः । उभौ नित्त्वादाद्युदात्तौ । समासे देवताद्वंद्वे चेति पूर्वपदस्यानङादेशः । उभे युगपदित्यनुवृत्तौ देवताद्वंद्वे चेति युगपदुभयपदप्रकृतिस्वरत्वं । सम्राजोः । राजृ दीप्तौ । सत्सूद्विषेत्यादिना क्विप् । समो मोऽनुस्वारः । पा॰ ८. ३. २३. । इत्यनुस्वारे प्राप्ते मो राजि समः क्वौ । पा॰ ८. ३. २५. । इति मकारादेशः । कृदुत्तरपदप्रकृतिस्वरत्वं । कर्तृकर्मणोः कृति । पा॰ २. ३. ६५. । इति कर्तरि षष्ठी । अव रक्षणादिषु । भावेऽसुन् । नित्त्वादाद्युदात्तः । ता । सुपां सुलुगित्यादिना द्विवचनस्य डादेशः । टिलोपे विभक्तेरुदात्तनिवृत्तिस्वरः । मृळातः । मृड सुखने । प्रार्थनायां लिङर्थे लेट् । द्विवचनं तस् ।

लेटोऽडाटावित्याडागमः। तुदादिभ्यः शः। ङित्त्वाल्लघूपधगुणाभावः। ईदृशे। त्यदादिषु दृशोऽनालोचने कञ् च। पा० ३. २. ६०.। इतीदमशब्द उपपदे दृशेः कञ्। उपपदसमास इदंकिमोरीश्की। पा० ६. ३. ९०.। इतीदम ईश्। शित्त्वात्सर्वादेशः। कञः कित्त्वाद्गुणाभावः। ञित्त्वादुत्तरपदस्याद्युदात्तत्वं। उपपदसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते॥

द्वितीयामृचमाह॥

गंतारा हि स्थोऽवसे हवं विप्रस्य मावतः। धर्तारा चर्षणीनां॥ २॥

गंतारा। हि। स्थः। अवसे। हवं। विप्रस्य। माऽवतः। धर्तारा। चर्षणीनां॥ २॥

हे इंद्रावरुणौ। अवसेऽवितुमनुष्ठातारं रक्षितुं मावतो मद्विधस्य विप्रस्य ब्राह्मणर्त्विजो हवमाह्वानं गंतारौ स्थो हि। प्राप्तशीलौ भवथः खलु। कीदृशौ। चर्षणीनां मनुष्याणां धर्तारौ। योगक्षेमसंपादनेन धारयितारौ॥ गंतारा। गमेस्ताच्छील्ये तृन्। द्विवचनस्य सुपां सुलुगित्यादिनाकारादेशः। ऋदृशोऽङि गुणः। अप्तृन्नित्यादिनोपधादीर्घत्वं। तृनो नित्त्वादाद्युदात्तत्वं। स्थः। अस भुवि। लङ्मध्यमपुरुषद्विवचनं थस्। अदिप्रभृतिभ्यः शप इति शपो लुक्। हि चेति निघातप्रतिषेधः। अवसे। अव रक्षणे। तुमर्थे सेसेन्नित्यसेन्। नित्त्वादाद्युदात्तः। हवं। ह्वेञो बहुलं छंदसीत्यनैमित्तिके संप्रसारणे परपूर्वत्वे च ऋदोरबित्यप्। गुणावादेशौ। अपः पित्त्वादनुदात्तत्वं। धातुस्वर एव। विप्रस्य। टुवप् वीजतंतुसंताने। अस्य ऋज्रेंद्रेत्यादिना रन् निपातितः। नित्त्वादाद्युदात्तः। मावतः। वतुप्प्रकरणे युष्मदस्मद्भ्यां छंदसि सादृश्य उपसंख्यानं। पा० ५. २. ३९. १.। वतुप्। प्रत्ययोत्तरपदयोरस्मदो मपर्यंतस्य मादेशः। पा० ७. २. ९८.। आ सर्वनाम्नः। पा० ६. ३. ९१.। इति दकारस्याकारः। सवर्णदीर्घः। मतुपः पित्त्वादनुदात्तत्वं। प्रातिपदिकांतोदात्तत्वे स एव शिष्यते। धर्तारा। धृञ् धारणे। ण्वुल्तृचौ। पा० ३. १. १३३.। इति तृच्। एकाच उपदेश इतीट्प्रतिषेधः। गुणो रपरत्वं। अप्तृन्नित्यादिनोपधादीर्घः। सुपां सुलुगित्याकारः। तृचश्चित्त्वादंतोदात्तत्वं। चर्षणीनां। कृषेरादेश्च चः। उ० २. १००.। इत्यनिप्रत्ययः। तत्संनियोगेन ककारस्य चकारः। प्रत्ययाद्युदात्तत्वं बाधित्वा छांदसमंतोदात्तत्वं। अत एव नामन्यतरस्यामिति विभक्तेरुदात्तत्वं। तत्र हि मतुपि यो ह्रस्वांतस्तत उत्तरस्य नाम उदात्तत्वमिति व्याख्यातं॥

तृतीयामृचमाह ॥

अनुकामं तर्पयेथामिंद्रावरुण राय आ। ता वां नेदिष्ठमीमहे ॥ ३ ॥

अनुऽकामं। तर्पयेथां। इंद्रावरुणा। रायः। आ। ता। वां। नेदिष्ठं। ईमहे ॥ ३ ॥

इंद्रावरुण हे इंद्रावरुणौ। अनुकाममस्मदीयाभिलाषमनु रायो धनस्य प्रदानेनातर्पयेथां। सर्वतोऽस्मांस्तृप्तान् कुरुतं। वयं यदा यदा धनं कामयामहे तदा तदा प्रयच्छतमित्यर्थः। ता वां तादृशौ युवां नेदिष्ठमतिशयेन सामीप्यं यथा भवति तथा ईमहे। याचामहे। कालविलंबमंतरेण धनं दातव्यमित्यर्थः॥ सप्तदशसु याच्ञाकर्मस्वीमहे पठितं। अनुकामं। कामस्य पश्चादनुकामं। अथवा कामे कामेऽनुकामं। अनुरिह पश्चादर्थे। अथवा वीप्सालक्षणे यथार्थे। योग्यता वीप्सा पदार्थानतिवृत्तिः सादृश्यं चेति चत्वारो हि यथार्था गृहीताः। अव्ययं विभक्तीत्यादिना। पा॰ २.१.६.। अव्ययीभावसमासः। अव्ययीभावश्च। पा॰ १.१.४१.। इत्यव्ययसंज्ञायामव्ययादाप्सुपः। पा॰ २.४.८२.। इति प्राप्तस्य लुकोऽपवादो नाव्ययीभावादतोऽम् त्वपंचम्याः। पा॰ २.४.८३.। इति विभक्तेरमादेशः। समासस्येत्यंतोदात्तत्वं। तर्पयेथां। तृप्यतेर्ण्यंताल्लोटो णिचश्च। पा॰ १.३.७४.। इत्यात्मनेपदं। मध्यमद्विवचनमाथां। टेरेत्व आमेतः। पा॰ ३.४.९०.। इत्यामादेशः। शपि सत्यतो येयः। पा॰ ७.२.८०.। इत्यनुवृत्तावातो ङितः। पा॰ ७.२.८१.। इत्याकारस्येयादेशः। आद्गुणो यलोपश्च। इंद्रावरुणा। सुपां सुलुगिति द्विवचनस्याकारः। आमंत्रिताद्युदात्तत्वं। संहितायामाकारस्य ह्रस्वत्वं। रायः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। ता। सुपां सुलुगिति विभक्तेराकारः। पदात्परत्वाद्युवामित्यस्य वामादेशोऽनुदात्तः। नेदिष्ठं। अतिशयेनांतिकं। अतिशायन इष्ठन्। अंतिकबाढयोर्नेदसाधौ। पा॰ ५.३.६३.। इति नेदादेशः। यस्येति लोपः। इष्ठनो नित्त्वादाद्युदात्तत्वं। ईमहे। ईङ् गतौ। ङित्त्वादात्मनेपदं। बहुलं छंदसीति श्यनो लुक्। निघातः॥

चतुर्थीमृचमाह ॥

युवाकु हि शचीनां युवाकु सुमतीनां। भूयाम वाजदाव्नां ॥ ४ ॥

युवाकु। हि। शचीनां। युवाकु। सुऽमतीनां। भूयाम। वाजऽदाव्नां ॥ ४ ॥

हि यस्मात्कारणाच्छचीनामस्मदीयकर्मणां संबंधि सोमरूपं हविर्युवाकु

वसतीवर्यैकधनात्मकैरुदकैः पयःसक्त्वादिद्रव्यांतरैश्च मिश्रितं । तथा सुमतीनां शोभनबुद्धियुक्तानामृत्विजां स्तोत्ररूपं वचनमपि युवाकु नानाविधैः स्तुत्यगुणैर्मिश्रितं । तस्मात्कारणात् हे इंद्रावरुणौ तथाविधं हविः स्वीकुर्वतोर्युवयोः प्रसादाद्वयं वाजदाव्नामन्नप्रदानां पुरुषाणां मध्ये मुख्या भूयाम । भवेम ॥ अपो ऽप्न इत्यादिषु षड्विंशतिसंख्याकेषु कर्मनामसु शची शमीति पठितं । युवाकु । यु मिश्रणे । कटिकुषिभ्यां काकुः । उ० ३. ७६. । इत्यत्र बाहुलकाद्यौतेरपि काकुः प्रत्ययः । कित्वेन गुणाभावादुकारस्योवङादेशः । प्रत्ययस्वरेण मध्योदात्तत्वं । शचीशब्दः केषांचिन्मते शार्ङ्गरवादिः । ङीनंतो नित्वादाद्युदात्तः । पा० ४. १. ७३. । इत्युभे वनस्पत्यादिषु युगपदित्यत्र । पा० ६. २. १४०. । वृत्तिकृतोक्तं । सुमतीनां । विद्याम सुमतीनामित्यत्रोक्तं । भूयाम । प्रार्थनायां लिङ् । उत्तमबहुवचने नित्यं ङित इति सकारलोपः । यासुट् परस्मैपदेषूदात्तो ङिच्च । पा० ३. ४. १०३. । इत्युदात्तो यासुडागमः । लिङः सलोपो ऽनंत्यस्य । पा० ७. २. ७९. । इति सकारलोपः । बहुलं छंदसीति शपो लुक् । सति शिष्टत्वाद्यासुडुदात्त एव शिष्यते । वाजदाव्नां । वाजं ददातीति वाजदावानः । आतो मनिन्नित्यादिना वनिप् । तस्य पित्वाद्धातुस्वर एव शिष्यते । समासे कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । अल्लोपो ऽनः । पा० ६. ४. १३४. । इत्यकारलोपः । तस्याचः परस्मिन्निति स्थानिवद्भावाल्लोपो व्योर्वलीति वकारलोपो न भवति ॥

पंचमीमृचमाह ॥

इंद्रः सहस्रदाव्नां वरुणः शंस्यानां । क्रतुर्भवत्युक्थ्यः ॥ ५ ॥

इंद्रः । सहस्रऽदाव्नां । वरुणः । शंस्यानां । क्रतुः । भवति । उक्थ्यः ॥ ५ ॥

अयमिंद्रः सहस्रदाव्नां सहस्रसंख्याकधनप्रदानां मध्ये क्रतुर्धनदानस्य कर्ता भवति । प्रभूतं ददातीत्यर्थः । तथा वरुणः शंस्यानां स्तुत्यानां मध्य उक्थ्यः स्तुत्यो भवति । अतिशयेन स्तुत्य इत्यर्थः ॥ वरुणः । उनन्प्रत्ययो नित्वादाद्युदात्तः । शंस्यानां । शंसु स्तुतौ । ऋहलोर्ण्यत् । तित्स्वरितमिति प्राप्ते ईडवंदवृशंसदुहां ण्यत इत्याद्युदात्तः । क्रतुः । कृञः कतुरिति कतुः । कित्वाद्गुणाभावे यणादेशः । प्रत्ययस्वरेणाद्युदात्तः । उक्थ्यः । उक्थं शस्त्रं । तेन स्तुत्यत्वेन तत्र भव उक्थ्यः । भवे छंदसीति यत् । यस्येति लोपः । अत्र तित्स्वरितमित्येतद्बाधित्वा तीर्थ्याय कूप्यायेत्यादिवद्बह्वच्त्वाद्यतो ऽनाव इति प्राप्तमाद्युदात्तत्वं सर्वे विधयश्छंदसि वि-

कल्प्यंत इति न क्रियते। ननु यस्येति लोपात्प्रागेव तित्स्वरितत्वमस्तु। न हि तदा यतोऽनाव इत्येतदस्ति द्व्यच्त्वाभावात्। अत एव द्यूर्म्याय च सूर्म्याय चेत्यादौ स्वरितत्वं दृश्यते। न च परत्वान्नित्यत्वाच्च यस्येति लोपेन प्रथमतो भाव्यमिति वाच्यं। प्रकृतिप्रत्ययाश्रयाद्बहिरंगाद्यस्येति लोपात्प्रत्ययमात्राश्रयतयांतरंगत्वेन तित्स्वरितमित्येतस्य प्राबल्यात्। अत ऊर्म्यायेत्यादिवदुक्थ्य इत्यत्रापि लक्षणत एव स्वरितत्वं भविष्यतीति। किं छांदस्येन। यत्र हि लोपमंतरेणैव द्व्यच्त्वं तत्र यतोऽनाव इत्येतद्भवति। यथा चेयं येयमिति। लोपनिबंधनद्व्यच्त्वप्रदेशेषु तु स्वरितेनैव भवितव्यमिति। एवं तर्हि तीर्थ्याय कूप्यायेत्यादौ यदाद्युदात्तत्वं तदेव छांदसमस्तु। अथात्र तु वर्णादांगं बलीय इत्यंतरंगत्वेऽपि स्वरितत्वं बाधित्वा लोप एव भविष्यति। तर्ह्युक्थ्य ऊर्म्याय सूर्म्यायेत्यादौ च छांदस्यमस्तु। सर्वथैकत्र छांदस्यान्न मुच्यते ॥

॥ इति प्रथमस्य प्रथमे द्वात्रिंशो वर्गः ॥

सूक्ते षष्ठीमृचमाह ॥

तयोरिदवसा वयं सनेम नि च धीमहि। स्यादुत प्ररेचनं ॥ ६ ॥

तयोः। इत्। अवसा। वयं। सनेम। नि। च। धीमहि। स्यात्। उत। प्रऽरेचनं ॥ ६ ॥

तयोरित्पूर्वोक्तयोरिंद्रावरुणयोरेवावसा रक्षणेन वयमनुष्ठातारः सनेम। संभजेम धनमिति शेषः। निधीमहि च। प्राप्ते धने यावदपेक्षितं तावद्भुक्त्वा ततोऽवशिष्टं धनं क्वचिन्निधिरूपेण स्थापयामश्च। उत। अपि च प्ररेचनं भुक्तान्निहितात्च प्रकर्षेणाधिकं धनं स्यात्। संपद्यतां ॥ अवसा। असुन्। नित्त्वादाद्युदात्तः। वयं। यूयं हि ष्ठेत्यत्र यदुक्तं तदत्र द्रष्टव्यं। सनेम। आशिषि लिङ्। तस्य मस्। नित्यं ङित इति सकारलोपः। किदाशिषीति यासुट्। छंदस्युभयथेति सार्वधातुकमपस्तीति लिङः सलोपोऽनंत्यस्येति सकारलोपः। अतो येय इतीयादेशः। लोपो व्योर्वलीति यलोपः। लिङ्याशिष्यङ्। पा० ३.१.८६.। इत्यङ्। आद्गुणः। पादादित्वान्न निघातः। धीमहि। डुधाञ् धारणपोषणयोः। आशिषि लिङो महिङ्। तस्य छंदस्युभयथेति सार्वधातुकार्धधातुकसंज्ञे। तत्र सार्वधातुकत्वेन लिङः सलोपोऽनंत्यस्येति सकारलोपः। सार्वधातुकमपिदिति ङित्त्वं शप् च। बहुलं छंदसीति जुहोत्यादेरपि शपो लुक्। आर्धधातुकत्वादातो लोप इटि च। पा०

६. ४. ६४.। इत्याकारलोपः। निघातः। सनेमेत्यपेक्षया द्वितीयत्वादच्च चवायोगे प्रथमेति न निषेधः। स्यात्। अस्तेः प्रार्थनायां लिङ्। तिप्। इतश्चेतीकारलोपः। यासुट् परस्मैपदेषूदात्तो ङिच्चेति यासुड्ङित्त्वे। अदिप्रभृतिभ्यः शप इति शपो लुक्। श्नसोरल्लोप इत्यकारलोपः। पादादित्वादनिघातः। उत। एवमादीनामंत इत्यंतोदात्तः। प्रेचनं। रिचिर् विरेचने। भावे ल्युट्। योरनादेशः। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं। प्रादिसमासः। कृदुत्तरपदप्रकृतिस्वरत्वं॥

सप्तमीमृचमाह॥

इंद्रावरुण वामहं हुवे चित्राय राधसे। अस्मान्त्सु जिग्युषस्कृतं॥ ७॥

इंद्रावरुणा। वां। अहं। हुवे। चित्राय। राधसे। अस्मान्। सु। जिग्युषः। कृतं॥ ७॥

इंद्रावरुण हे इंद्रावरुणौ वां युवामुभावहं हुवे। आह्वयामि। किमर्थं। चित्राय मणियुक्तादिरूपेण विविधाय राधसे धनाय। तत आहुतौ युवामस्माननुष्ठातॄन् सुजिग्युषः शत्रुविषये सुष्ठु जययुक्तान् कृतं। कुरुतं॥ इंद्रावरुण। सुपां सुलुगित्यादिना संबोधनस्याकारः। देवताद्वंद्वे चेति पूर्वपदस्यानङ्। आमंत्रिताद्युदात्तत्वं। संहितायां छांदसं ह्रस्वत्वं। हुवे। ह्वयतेर्लडुत्तमैकवचनं मिप्। शप इत्यनुवृत्तौ बहुलं छंदसीति लुक्। ह्व इत्यनुवृत्तौ बहुलं छंदसीति संप्रसारणं परपूर्वत्वं। अचि श्नुधात्वित्यादिनोवङ्। न च हुश्नुवोरित्यादिना यणादेशः। जुहोतेरेव हि प्रतिपदोक्तस्य तत्। न पुनरस्य लाक्षणिकत्वात्। इटः प्रत्ययस्वरेणोदात्तत्वं। पादादित्वान्न निघातः। राधसे। असुन्। नित्त्वादाद्युदात्तत्वं। अस्मान्। शसि द्वितीयायां चेत्यात्वं। शसो न। पा० ७. १. २९.। इति नत्वं। जिग्युषः। जि जये। लिटः क्वसुश्चेति क्वसुः। द्विर्भावः। सन्लिटोर्जेः। पा० ७. ३. ५७.। इति द्वितीयस्य कुत्वं। क्वसोः कित्त्वाद्गुणाभावः। क्रादिनियमात्प्राप्तस्येटो वस्वेकाजाद्घसामिति नियमेन निवृत्तिः। द्वितीयाबहुवचनं शस्। भसंज्ञायां वसोः संप्रसारणमिति संप्रसारणं। परपूर्वत्वं। एरनेकाच इति यणादेशः। शासिवसिघसीनां चेति षत्वं। प्रत्ययस्वरेणोकार उदात्तः। कृतं। डुकृञ् करणे। लोण्मध्यमद्विवचनस्य लङ्वद्भावात्तमादेशः। शपो बहुलं छंदसीति लुक्। तिङ्ङतिङ इति निघातः॥

अष्टमीमृचमाह ॥

इंद्रावरुण नू नु वां सिषासंतीषु धीष्वा । अस्मभ्यं शर्म यच्छतं ॥ ८ ॥

इंद्रावरुणा । नु । नु । वां । सिसासंतीषु । धीषु । आ । अस्मभ्यं । शर्म । यच्छतं ॥ ८ ॥

इंद्रावरुण हे इंद्रावरुणौ धीष्वस्मदीयबुद्धिषु वां युवां सिषासंतीषु सनितुं संभक्तुं सम्यक् सेवितुमिच्छंतीषु तदानीमा समंतादस्मभ्यं शर्म सुखं नू नु । अतिशयेन क्षिप्रं प्रयच्छतं । दत्तं ॥ षड्विंशतिसंख्याकेषु क्षिप्रनामसु नु मक्ष्विति पठितं । तस्य द्विरावृत्तिबलादतिशयो लभ्यते । इंद्रावरुण । उक्तं । नू नु । ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणां । पा॰ ६. ३. १३३. । इति पूर्वस्य दीर्घत्वं । सिषासंतीषु । वन षण संभक्तौ । धात्वादेः षः सः । इच्छायां सन् । द्विर्भावो हलादिशेषः । सन्यत इतीत्वं । आदेशप्रत्यययोरिति षत्वं । सनीवंतेत्यादिना । पा॰ ७. २. ४९. । विकल्पादिडभावः । जनसनखनां सञ्झलोः । पा॰ ६. ४. ४२. । इति नकारस्याकारः । उपरि लटः शतृ । कर्तरि शप् । उगितश्चेति ङीप् । शप्श्यनोर्नित्यमिति नुम् । ङीपः शपश्च पित्त्वाच्छतुश्च लसार्वधातुकत्वेनानुदात्तत्वं । सनो नित्त्वादाद्युदात्तत्वं । तदेव शिष्यते । धीषु । सावेकाच इति विभक्तेरुदात्तत्वं । अस्मभ्यं । अस्मभ्यमप्रतिष्कुत इत्यत्रोक्तं । यच्छतं । दाण् दाने । शपि पाघ्रेत्यादिना यच्छादेशः ॥

नवमीमृचमाह ॥

प्र वामश्नोतु सुष्टुतिरिंद्रावरुण यां हुवे । यामृधाथे सधस्तुतिं ॥ ९ ॥

प्र । वां । अश्नोतु । सुऽस्तुतिः । इंद्रावरुणा । यां । हुवे । यां । ऋधाथे इति । सधऽस्तुतिं ॥ ९ ॥

इंद्रावरुण हे इंद्रावरुणौ यामस्मत्कर्तृकां शोभनस्तुतिं प्रति हुवे । युवामुभावाह्वयामि । किंच सधस्तुतिं युवयोरुभयोः साहित्येन क्रियमाणया स्तवक्रियया युक्तां यां सुष्टुतिं प्रतिलभ्य युवामृधाथे । वर्धाथे । तादृशी सुष्टुतिः शोभनस्तुतिहेतुभूत ऋक्समूहो वामश्नोतु । युवां व्याप्नोतु ॥ अश्नोतु । अशू व्याप्तौ । लोटो व्यत्ययेन तिप् । स्वादिभ्यः श्नुः । सुष्टुतिः । न विंधे अस्य सुष्टुतिमित्यत्रोक्तं । इंद्रावरुण । हुवे । उक्तं । अत्र तु यद्वृत्तयोगान्न निघातः । ऋधाथे । ऋधु

वृद्धौ । लट् । व्यत्ययेनात्मनेपदं । मध्यमद्विवचने थ्योर्बहुलं छंदसीति लुक् । प्रत्ययस्वरेणाकार उदात्तः । यच्छब्दयोगान्न निघातः । सधस्तुतिं । सह स्तुतिर्यस्यां सुष्टुतौ सा सधस्तुतिः । अत्र सुष्टुतिरित्यन्यपदार्थे स्तुतिशब्दस्य स्तूयतेऽनयेति करणसाधनत्वेन ऋक्परत्वेऽयं स्तुतिशब्दो भावसाधनतया स्तवनक्रियापरः । तस्मिन्भावसाधनत्वेन क्रियापरेऽयं करणसाधनतया ऋक्पर इति समस्यमानपदार्थादन्यः । सहेत्यत्र हकारस्य व्यत्ययेन धकारः । सहशब्द एवमादित्वादंतोदात्तः । बहुव्रीहित्वेन पूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य प्रथमे त्रयस्त्रिंशो वर्गः ॥

॥ इति प्रथममंडले चतुर्थोऽनुवाकः ॥

पंचमेऽनुवाके षट् सूक्तानि । तत्र सोमानमित्यादिकं नवर्चं प्रथमं सूक्तं । ऋषिच्छंदसी पूर्ववत् । देवताविशेषस्त्वेवमनुक्रम्यते । सोमानमिति पंच ब्राह्मणस्पत्याश्चतुर्थ्यामिंद्रश्च सोमश्च पंचम्यां दक्षिणा चान्याः सादसस्पत्या नाराशंसी वांत्येति । सूक्तगता आद्याः पंचर्चो ब्रह्मणस्पतिदेवताकाः । तासां मध्ये स घा वीर इत्येतस्याश्चतुर्थ्या ऋचो ब्रह्मणस्पतिरिंद्रश्च सोमश्चेति तिस्रो देवताः । त्वं तमित्येतस्याः पंचम्या दक्षिणया सह पूर्वोक्तास्तिस्रो देवताः । षष्ठीमारभ्य तिसृणां सदसस्पतिर्देवता । नराशंसमित्येतस्या नवम्याः सदसस्पतिर्नराशंसो वा विकल्प्यते । विनियोगस्तु पूर्ववत् ॥ तस्मिन्सूक्ते प्रथमामृचमाह ॥

सोमानं स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवंतं य औशिजः ॥ १ ॥

सोमानं । स्वरणं । कृणुहि । ब्रह्मणः । पते । कक्षीवंतं । यः । औशिजः ॥ १ ॥

हे ब्रह्मणस्पते । एतन्नामकदेव सोमानमभिषवस्य कर्तारं मामनुष्ठातारं स्वरणं देवेषु प्रकाशनवंतं कृणुहि । कुरु । अत्र दृष्टांतः । कक्षीवंतमेतन्नामकमृषिं । इवशब्दोऽत्राध्याहर्तव्यः । कक्षीवान्यथा देवेषु प्रसिद्धस्तद्वदित्यर्थः । यः कक्षीवानृषिरौशिजः । उशिजः पुत्रः । तमिवेति पूर्वयोजना । कक्षीवतोऽनुष्ठातृषु मुनिषु प्रसिद्धिस्तैत्तिरीयैराम्नायते । एवं वै पर आहारः कक्षीवानौशिजो वीतहव्यः श्रायसस्त्रसदस्युः पौरुकुत्स्यः प्रजाकामा अचिन्वतेति । ऋगंतरेऽप्यृषित्वकथनेनानुष्ठातृत्वप्रसिद्धिः सूच्यते । अहं कक्षीवां ऋषिरस्मि विप्र इति । तस्मा-

दस्यानुष्ठातारं प्रति दृष्टांतत्वं युक्तं । सोऽयं मंत्रो यास्केनैवं व्याख्यातः । नि० ६. १०. । सोमानं सोतारं प्रकाशनवंतं कुरु ब्रह्मणस्पते कक्षीवंतमिव य औशिजः । कक्षीवान्कक्ष्यावानौशिज उशिजः पुत्र उशिग्वष्टेः कांतिकर्मणोऽपि त्वयं मनुष्यकक्ष एवाभिप्रेतः स्यात्तं सोमानं सोतारं मा प्रकाशनवंतं कुरु ब्रह्मणस्पत इति । अस्मिन्मंत्रे सोमानमिति पादेन कृणुहि ब्रह्मण इति पादेन सूचितं तात्पर्यं तैत्तिरीया आमनंति । सोमानं स्वरणमित्याह सोमपीथमेवावरुंधे । कृणुहि ब्रह्मणस्पत इत्याह ब्रह्मवर्चसमेवावरुंध इति ॥ सोमानं । सुनोतीति । षुञ् अभिषवे । अन्येभ्योऽपि दृश्यंत इति मनिन् । दृशिग्रहणस्य विध्यंतरोपसंग्रहणार्थत्वान्नित्त्वेऽपि नाद्युदात्तत्वं किंतु प्रत्ययस्वर एव । उंछादिषु वा सोमन्शब्दो द्रष्टव्यः । पा० ६. १. १६०. । बहुलग्रहणादौणादिको वा मनिर्द्रष्टव्यः । स्वरणं । प्रख्यातं । स्वृ शब्दोपतापयोः । कृत्यल्युटो बहुलं । पा० ३. ३. ११३. । इति कर्मणि ल्युट् । लितीत्यकार उदात्तः । कृणुहि । कृवि हिंसाकरणयोश्च । इदितो नुम् धातोरिति नुम् । लोटः सिपो हिः । शपि प्राप्ते धिन्विकृण्व्योरच्चेत्युप्रत्ययः । तत्संनियोगेन वकारस्य चाकारः । तस्यातो लोप इति लोपः । तस्य स्थानिवद्भावान्न पूर्वस्य लघूपधगुणः । हेर्ङित्त्वादुकारस्य न गुणः । उतश्च प्रत्ययाच्छंदो वावचनं । पा० ६. ४. १०६. १. । इति हेर्लुक् न । सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वचनाद्धेरेव प्रत्ययस्वरेणोदात्तत्वं । पादादित्वान्न निघातः । ब्रह्मणः । षष्ठ्याः पतिपुत्रेत्यादिना । पा० ८. ३. ५३. । संहितायां विसर्जनीयस्य सकारः । सुबामंत्रितपरांगवद्भावात्पदद्वयस्यामंत्रितनिघातः । कक्षीवंतं । कक्षे भवा कक्ष्या । अश्वोदरसंबंधिनी रज्जुः । भवे छंदसि । पा० ४. ४. ११०. । इति यत्प्रत्ययः । सास्यास्तीत्यर्थे आसंदीवदष्ठीवच्चक्रीवत्कक्षीवत् । पा० ८. २. १२. । इत्यृषिविशेषनाम कक्षीवच्छब्दो निपातितः । पा० ६. १. ३७. ३. । छंदसीर इति वत्वं । यप्रत्ययस्वरेण तदादेशो निपातित ईकार उदात्तः । मतुप्सुपौ पित्त्वादनुदात्तौ । औशिजः । वश कांतौ । इजीत्यनुवृत्तौ वशेः किच्च । उ० २. ७०. । इतीजिप्रत्ययः । तस्य कित्त्वाद्ग्रहिज्येत्यादिना संप्रसारणं परपूर्वत्वं गुणाभावः । स तस्यापत्यं । पा० ४. १. ९२. । इति प्राग्दीव्यतोऽण् । पा० ४. १. ८३. । आदिवृद्धिः । प्रत्ययस्वरेणांतोदात्तत्वं ॥

द्वितीयामृचमाह ॥

यो रेवान्यो अमीवहा वसुवित्पुष्टिवर्धनः । स नः सिषक्तु यस्तुरः ॥ २ ॥

यः । रेवान् । यः । अमीवऽहा । वसुऽवित् । पुष्टिऽवर्धनः । सः । नः । सिसक्तु । यः । तुरः ॥ २ ॥

यो ब्रह्मणस्पती रेवान्धनवान्यश्चामीवहा रोगाणां हंता वसुविद्धनलब्धा पुष्टिवर्धनः पुष्टेर्वर्धयिता यश्च तुरस्त्वरोपेतः शीघ्रफलदः स ब्रह्मणस्पतिर्नोऽस्मान् सिषक्तु । सेवतां । परिगृह्यानुगृह्णात्वित्यर्थः ॥ अत्र सिषक्तुशब्दस्य सेवार्थत्वं यास्क आह । सिषक्तु सचत इति सेवमानस्येति प्रत्यायकौ शब्दाविति शेषः । रेवान् । रयिरस्यास्तीति मतुप् । रयेर्मतौ बहुलं । पा० ६.१.३७.२. । इति यकारस्य संप्रसारणं परपूर्वत्वं। छंदसीर इति वत्वं । आद्गुणः । ननु वत्वस्यासिद्धत्वाद्बहिरंगत्वाच्च प्रागेव गुणे कृत इवर्णाभावान्न वत्वं । न चांतादिवच्च । पा० ६.१.८५. । इत्यादिवद्भावेनेवर्णसंपादनं वर्णाश्रयविधौ तत्प्रतिषेधात् । अन्यथा खल्वाभिरित्यत्र सवर्णदीर्घस्यांतवद्भावेन अकारत्वादतो भिस ऐस् । पा० ७.१.९. । इत्यैसादेशःस्यात् । न च निरवकाशत्वेन वत्वस्यानवकाशत्वं । अग्निवान्वैदर्भ स्तंभः । उप ब्रह्माणि हरिव इत्यादाववकाशलाभात् । सत्यं । अत्र गुणप्रवृत्तेः प्रागिकारात्परो मतुप् । कदाचिदिवर्णात्परस्य मतुपः पश्चादेकारादेशेनेवर्णाभावेऽपि भवति वत्वमिति छंदसीर इति सूत्रकृता विवक्षितं । अमुनैवाभिप्रायेण हरिव इत्यादिकमुदाहृत्याप्यंते वृत्तिकृता रेवानित्यप्युदाहृतं । ह्रस्वनुड्भ्यामित्यत्रारेशब्दान्मतुप इत्युदात्तत्वं वक्तव्यं । पा० ६.१.१७६.१. । इत्यत्रारेशब्दो रेशब्दस्याप्युपलक्षणं । अत एव हि रेवां इंद्रेत्यादौ मतुप उदात्तत्वं दृष्टं । अथवा ह्रस्वनुड्भ्यामित्यत्रापि कदाचिद्ध्रस्वात्परस्य मतुप उदात्तत्वमित्येव व्याख्येयं । एवं च संप्रसारणपरपूर्वत्वयोः कृतयोर्गुणात्प्राग्घ्रस्वात्परो मतुबिति रेवानारेवानित्यादौ सर्वत्रोदात्तत्वं सिध्यति । अयमेव सूत्रकृतोऽभिप्रायो वार्तिककृता व्याख्यात इति । अमीवहा । अम रोग इत्येतस्माद्वन्प्रत्ययेनामीवशब्दो निपातितः । तं हंतीति बहुलं छंदसीति क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वं । वसुवित् । वसु विंदतीति वसुवित् । क्विप् चेति क्विप् । उत्तरपदप्रकृतिस्वरत्वं । पुष्टिवर्धनः । वर्धयतेर्नंद्यादित्वाल्ल्युः । पा० ३.१.१३४. । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । पुष्टेर्वर्धन इति कर्मणि षष्ठ्या समासः । कृदुत्तरपदप्रकृतिस्वरत्वं । सिषक्तु । षच समवाये ।

लोटि बहुलं छंदसीति शपः श्लुः। श्लाविति द्वित्वे हलादिशेषे बहुलं छंदसीत्यभ्यासस्याकारस्येकारः। पा० ७. ४. ७८.। तुरः। तुर त्वरणे। इगुपधज्ञाप्रीकिरः कः। प्रत्ययस्वरः ॥

तृतीयामृचमाह ॥

मा नः शंसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य। रक्षा णो ब्रह्मणस्पते ॥ ३ ॥

मा। नः। शंसः। अररुषः। धूर्तिः। प्रणक्। मर्त्यस्य। रक्ष। नः। ब्रह्मणः। पते ॥ ३ ॥

अररुषो मर्त्यस्योपद्रवं कर्तुमस्मत्समीपं प्राप्तस्य शत्रुरूपस्य मनुष्यस्य धूर्तिर्हिंसकः शंसः शंसनमधिक्षेप इत्यर्थः। तादृशो वाग्विशेषो नोऽस्मान्मा प्रणक्। मा संपृणक्तु। शत्रूणां प्रयुक्तोऽधिक्षेपः कदाचिदस्मान्मा प्राप्नोत्वित्यर्थः। तदर्थं हे ब्रह्मणस्पते नोऽस्मानृक्ष। पालय ॥ मा। निपातः। शंसनं शंसः। भावे घञ्। ञित्त्वादाद्युदात्तः। अररुषः। अर्तेररुः। उ० ४. ८०.। इत्यंतर्भावितण्यर्थाद गताविस्मादरुस्। गुणो रपरत्वं। प्रत्ययस्वरे प्राप्ते वृषादित्वादाद्युदात्तः। धूर्तिः। धुर्वि हिंसायां। क्तिच्क्तौ च संज्ञायामिति क्तिच्। तितुत्रतथसिसुसरकसेषु चेतीट्प्रतिषेधः। उपधायाश्च। पा० ७.१.१०१.। इत्युपधादीर्घत्वं। वलि लोपं बाधित्वोटि प्राप्ते। पा० ६. ४. १९.। राल्लोपः। पा० ६. ४. २१.। इति वकारलोपः। प्रणक्। पृची संपर्के। लङस्तिप्। इतश्चेतीकारलोपः। हल्ङ्याब्भ्यो दीर्घादिति हल्ङ्यादिलोपः। कुत्वं। रुधादिभ्यः श्नम्। तस्य व्यत्ययो बहुलमित्यडागमः। यणादेशः। अकारस्यागमानुदात्तत्वं बाधित्वा व्यत्ययेनोदात्तत्वं। चादिलोपे विभाषेति निघाताभावः। मर्त्यस्य। मृङ् प्राणत्यागे। असिहसिमृ इत्यादिना। उ० ३. ८५.। औणादिकस्तन्प्रत्ययः। मर्तेषु भव इत्यर्थे भवे छंदसीति यत्। यतोऽनाव इत्याद्युदात्तत्वं। रक्ष। रक्ष पालने। शपः पित्त्वादनुदात्तत्वं। धातुस्वर एव शिष्यते। पादादित्वान्न निघातः। रक्षा णः। द्व्यचोऽतस्तिङ इति दीर्घः। उपसर्गाद्बहुलं। पा० ८. ४. २८. १.। इति बहुलग्रहणादनुपसर्गादपि नसो णत्वं। ब्रह्मणस्पते। षष्ठ्याः पतिपुत्रेति संहितायां विसर्गस्य सकारः। सुबामंत्रिते परांगवद्भावात्पदद्वयस्यामंत्रितनिघातः ॥

चतुर्थीमृचमाह ॥

स घा वीरो न रिष्यति यमिंद्रो ब्रह्मणस्पतिः। सोमो हिनोति मर्त्यं ॥ ४ ॥

सः। घ। वीरः। न। रिष्यति। यं। इंद्रः। ब्रह्मणः। पतिः। सोमः। हिनोति। मर्त्यं ॥ ४ ॥

इंद्रो देवो यं मर्त्यं यक्ष्यमाणं हिनोति। प्राप्नोति वर्धयति वा। तथा ब्रह्मणस्पतिर्देवो हिनोति। तथा सोमो हिनोति। स घ स एव यजमानो वीरो वीर्ययुक्तः सन् न रिष्यति। न विनश्यति॥ घा। चादिरनुदात्तः। संहितायामृचि तुनुघमक्षुतङ्कुत्रोरुष्याणां। पा॰ ६. ३. १३३.। इति दीर्घः। ब्रह्मणस्पतिः। उक्तं। हिनोति। हि गतौ वृद्धौ च। स्वादिभ्यः श्नुः। तिपः पित्वात् श्नुप्रत्ययस्वर एव शिष्यते॥

पंचमीमृचमाह॥

त्वं तं ब्रह्मणस्पते सोम इंद्रश्च मर्त्यं। दक्षिणा पात्वंहसः॥५॥

त्वं। तं। ब्रह्मणः। पते। सोमः। इंद्रः। च। मर्त्यं। दक्षिणा। पातु। अंहसः॥५॥

हे ब्रह्मणस्पते त्वं तं मर्त्यमनुष्ठातारं मनुष्यमंहसः पापात्पाहीति शेषः। तथा सोमः पात्विंद्रश्च पातु दक्षिणाख्या देवता च पातु॥ दक्षिणा। दक्ष वृद्धौ। द्रुदक्षिभ्यामिनन्। उ॰ २. ५१.। नित्वादाद्युदात्तः। अंहसः। नब्विषयस्येत्यादिराद्युदात्तः॥

॥ इति प्रथमस्य प्रथमे चतुस्त्रिंशो वर्गः॥

अनुप्रवचनीयचरोर्होमे सदस्पतिमित्येषा विनियुक्ता। तथा च गृह्ये मेखलामाबध्येति खंडे पठ्यते। आचार्यः समन्वारब्धे जुहुयात्सदसस्पतिमद्भुतं। गृ॰ १. २२.। इति। तामेतां सूक्ते षष्ठीमृचमाह॥

सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यं। सनिं मेधामयासिषं॥६॥

सदसः। पतिं। अद्भुतं। प्रियं। इंद्रस्य। काम्यं। सनिं। मेधां। अयासिषं॥६॥

मेधां लब्धुं सदसस्पतिमेतन्नामकं देवमयासिषं। प्राप्तवानस्मि। कीदृशं। अद्भुतं। आश्चर्यकरं। इंद्रस्य प्रियं। सोमपाने सहचारित्वात्। काम्यं। कमनीयं। सनिं। धनस्य दातारं॥ सदसः। षद्लृ विशरणादौ। सर्वधातुभ्योऽसुन्। नित्वादाद्युदात्तः। पतिं। पातेर्डतिः। टिलोपः। प्रत्ययस्वरः। प्रियं। इगुपधज्ञाप्रीकिरः कः। इयङादेशः। प्रत्ययस्वरः। काम्यं। कामयतेरचो यत्। णेरनिटीति णिलोपः। यतोऽनाव इत्याद्युदात्तत्वं। सनिं। षणु दाने। धात्वादेः षः सः। अच इरित्यनुवृत्तौ खनिकष्यज्यसिवसिवनिसनिध्वनिग्रंथिचरिभ्यश्च। उ॰ ४. १४१.। इति

इप्रत्ययः । प्रत्ययस्वरः । अयासिषं । या प्रापणे । लुङ् । मिपोऽमादेशः । यमरमनमातां सक् च । पा० ७. २. ७३. । इति सिच इडागमः । धातोः सगागमः । निघातः ॥

सप्तमीमृचमाह ॥

यस्मा॑दृ॒ते न सिध्य॑ति य॒ज्ञो वि॑प॒श्चित॑श्च॒न । स धी॒नां योग॑मिन्वति ॥ ७ ॥

यस्मा॑त् । ऋ॒ते । न । सिध्य॑ति । य॒ज्ञः । वि॒पः॒ऽचितः॑ । च॒न । सः । धी॒नां । योग॑म् । इ॒न्व॒ति॒ ॥ ७ ॥

यज्ञोऽयमनुष्ठातव्यो विपश्चितश्चन विदुषोऽपि यजमानस्य यस्मात्सदसस्पतिदेवादृते न सिध्यति । सोऽयं सदसस्पतिर्देवो धीनां मनोऽनुष्ठानविषयाणामस्मद्बुद्धीनामनुष्ठेयकर्मणां वा योगं संबंधमिन्वति । व्याप्नोति । यजमानमनुगृह्य तदीयं यज्ञं निष्पादयतीत्यर्थः ॥ यस्मात् । अन्यारादित्यादिना । पा० २. ३. २९. । ऋतेयोगात्पंचमी । सावेकाच इति विभक्तेरुदात्तत्वे प्राप्ते न गोश्वन्सावर्णेति प्रतिषेधः । सिध्यति । षिधु संसिद्धौ । श्यनो नित्त्वादाद्युदात्तत्वं । यद्वृत्तान्नित्यमिति निघातप्रतिषेधः । धीनां । सावेकाच इति विभक्तेरुदात्तत्वं । योगं । युजिर् योगे । घञो ञित्त्वादाद्युदात्तत्वं । इन्वति । इवि व्याप्तौ । शप् । इदितो नुम् धातोरिति नुम् । निघातः ॥

अष्टमीमृचमाह ॥

आदृ॑ध्नोति ह॒विष्कृ॑तिं॒ प्राञ्चं॑ कृणो॒त्य॑ध्व॒रं । होत्रा॑ दे॒वेषु॑ गच्छति ॥ ८ ॥

आत् । ऋ॒ध्नो॒ति॒ । ह॒विः॒ऽकृ॑तिं । प्राञ्चं॑ । कृ॒णो॒ति॒ । अ॒ध्व॒रं । होत्रा॑ । दे॒वेषु॑ । ग॒च्छ॒ति॒ ॥ ८ ॥

आदनंतरमेव हविष्कृतिं हविःसंपादनयुक्तं यजमानमृध्नोति । सदसस्पतिर्देवो वर्धयति । हविर्धानानंतरमेव फलं प्रयच्छतीत्यर्थः । तथाविधफलसिद्ध्येऽध्वरं यजमानेनानुष्ठीयमानं यज्ञं प्रांचं प्रकर्षेण गच्छंतमविघ्नेन परिसमाप्तियुक्तं कृणोति । करोति । होत्रा हूयमाना देवता तुष्टा सती यजमानं प्रख्यापयितुं देवेषु गच्छति । यद्वा होत्रास्मदीयस्तुतिरूपा वाक् देवान्परितोषयितुं देवेषु गच्छति ॥ श्लोको धारेत्यादिषु सप्तपंचाशत्सु वाङ्नामसु होत्रा गीरिति पठितं । हविष्कृतिं । हविषः कृतिः संपादनं यस्य यजमानस्य सोऽयं हविष्कृतिः । बहुव्रीहौ प्रकृत्येति

पूर्वपदप्रकृतिस्वरत्वं । प्राचं । अनिगंतौ वप्रत्यये । पा॰ ६. २. ५२. । इति गतेः प्रकृतिस्वरत्वं । पश्चादेकादेशस्वरः । अध्वरं । न विद्यते ध्वरो हिंसा यस्मिन् । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । हूयतेऽस्यामिति होत्रा देवता । हुयामाश्रुभसिभ्यस्त्रन् । उ॰ ४. १६९. । इति त्रन् । नित्वादाद्युदात्तः ॥

नवमीमृचमाह ॥

नराशंसं सुधृष्टममपश्यं सप्रथस्तमं । दिवो न सद्ममखसं ॥ ९ ॥

नराशंसं । सुऽधृष्टमं । अपश्यं । सप्रथःऽतमं । दिवः । न । सद्मऽमखसं ॥ ९ ॥

नराशंसमेतन्नामकं देवविशेषं । यद्वावयवार्थव्युत्पत्त्या सदसस्पतिदेवपरोऽयं शब्दः । व्युत्पत्तिं च यास्को दर्शयति । नराशंसो यज्ञ इति कात्थक्यो नरा अस्मिन्नासीनाः शंसंत्यग्निरिति शाकपूणिर्नरैः प्रशस्यो भवति । नि॰ ८.६. । इति । अत्राग्निवत्सदसस्पतेरपि नरैः प्रशस्यमानत्वान्नराशंसत्वं । एवमेवाभिप्रायं हृदि निधाय ब्राह्मणमेवमाम्नायते । प्रजा वै नरो वाक् शंस इति । अतो मनुष्यैः शस्यमानो यः सदसस्पतिर्यो वा नराशंसनामको देवस्तमपश्यं । शास्त्रदृष्ट्या दृष्टवानस्मि । कीदृशं । सुधृष्टमं । अत्याधिक्येन धार्ष्ट्ययुक्तं । सप्रथस्तमं । अतिशयेन प्रख्यातं । सद्ममखसं । प्राप्ततेजस्कं । तत्र दृष्टांतः । दिवो न । द्युलोकानिव । आदित्यचंद्रादिभिरधिष्ठिता द्युलोकविशेषा यथा तेजस्विनस्तद्वदयं नराशंसस्तेजस्वीत्यर्थः ॥ सुधृष्टमं । शोभनं धृष्णोतीति सुधृक् । क्विप् चेति क्विप् । आतिशायनिकस्तमप् । षकारस्य जश्त्वाभावश्छांदसः । कृदुत्तरपदप्रकृतिस्वरत्वेन ऋकार उदात्तः । अपश्यं । पाघ्राध्मेत्यादिना पश्यादेशः । लुङ्लङ्लृंक्ष्वडुदात्तः । पा॰ ६. ४. ७१. । इत्यट उदात्तत्वं । पादादित्वान्न निघातः । सप्रथस्तमं । प्रथ प्रख्याने । प्रथनं प्रथः । सर्वधातुभ्योऽसुन् । नित्वादाद्युदात्तत्वं । सह प्रथसा वर्तत इति तेन सहेति तुल्ययोगे । पा॰ २. २. २८. । इति बहुव्रीहिसमासः । वोपसर्जनस्य । पा॰ ६. ३. ८२. । इति सादेशः । पूर्वपदप्रकृतिस्वरत्वे प्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । दिवः । ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । सद्ममखसं । सीदतीति सद्म । षद्लृ विशरणादौ । अन्येभ्योऽपि दृश्यंत इति मनिन् । नित्वादाद्युदात्तः । सद्म महो यस्येति बहुव्रीहौ हकारस्य व्यत्ययेन खकारः ॥

॥ इति प्रथमस्य प्रथमे पंचत्रिंशत्तमो वर्गः ॥

प्रति त्यमिति नवर्चं द्वितीयं सूक्तं। ऋषिश्छंदसी पूर्ववत्। देवता त्वनुक्रम्यते। प्रति त्यमग्निमारुतमिति। कारीरीष्टौ प्रति त्यमित्येषा धाय्या। तथा च सूचितं। वर्षकामेष्टिः कारीरी तस्यां प्रति त्यं चारुमध्वरमीळे अग्निं स्ववसं नमोभिरिति धाय्ये। अ॰ २. १३.। इति। तामेतां सूक्तगतां प्रथमामृचमाह॥

प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे। मरुद्भिरग्न आ गहि॥१॥

प्रति। त्यं। चारुं। अध्वरं। गोऽपीथाय। प्र। हूयसे। मरुत्ऽभिः। अग्ने। आ। गहि॥१॥

त्यच्छब्दः सर्वनाम तच्छब्दपर्यायः। हे अग्ने यो यज्ञश्चारुरंगवैकल्यरहितः। त्यं तथाविधं चारुमध्वरं प्रतिलभ्य गोपीथाय सोमपानाय प्रहूयसे। प्रकर्षेण त्वं हूयसे। तस्मादस्मिन्नध्वरे त्वं मरुद्भिः सह देवविशेषैः सहागहि। आगच्छ॥ सेयमृग्यास्केनैवं व्याख्याता। तं प्रति चारुमध्वरं सोमपानाय प्रहूयसे सोऽग्ने मरुद्भिः सहागच्छ। नि॰ १०. ३६.। इति॥ प्रति। निपात आद्युदात्तः। त्यं। त्यदादीनामः। पा॰ ७. २. १०२.। प्रातिपदिकस्वरः। चारुं। दृसनिजनिचरीत्यादिना। उ॰ १. ३.। ञुण्। अत उपधाया इति वृद्धिः। जिह्वादाद्युदात्तः। गोपीथाय। निशीथगोपीथावगथाः। उ॰ २. ९.। इति थक्प्रत्ययांतो निपातितः। प्र। निपातस्वरः॥

द्वितीयामृचमाह॥

नहि देवो न मर्त्यो महस्तव क्रतुं परः। मरुद्भिरग्न आ गहि॥२॥

नहि। देवः। न। मर्त्यः। महः। तव। क्रतुं। परः। मरुत्ऽभिः। अग्ने। आ। गहि॥२॥

हे अग्ने महो महतस्तव संबंधि क्रतुं कर्मविशेषमुल्लंघ्य परो नहि। उत्कृष्टो देवो न भवति खलु। तथा मर्त्यो मनुष्यश्च परो न भवति। ये मनुष्यास्त्वदीयं क्रतुमनुतिष्ठंति ये च देवास्त्वदीये क्रताविज्यंते त एवोत्कृष्टा इत्यर्थः। मरुद्भिरित्यादि पूर्ववत्॥ नहि। एवमादीनामंत इत्यंतोदात्तः। देवः। पचाद्यजंतश्चित्त्वादंतोदात्तः। महः। महतस्तलोपश्छांदसः। बृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वं। तव। युष्मदस्मदोर्ङसीत्याद्युदात्तत्वं। क्रतुं। कृञः कतुः। उ॰ १. ७. ७.। प्रत्ययाद्युदात्तत्वं। गहि। गम्लृ सृप्लृ गतौ। लोटः सेर्हिः। बहुलं छंदसीति शपो

पूर्वपदप्रकृतिस्वरत्वं । प्रांचं । अनिगंतो वप्रत्यये । पा॰ ६. २. ५२. । इति गतेः प्रकृतिस्वरत्वं । पश्चादेकादेशस्वरः । अध्वरं । न विद्यते ध्वरो हिंसा यस्मिन् । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । हूयतेऽस्यामिति होत्रा देवता । हुयामाश्रुभसिभ्यस्त्रन् । उ॰ ४. १६९. । इति त्रन् । नित्त्वादाद्युदात्तः ॥

नवमीमृचमाह ॥

नराशंसं सुधृष्टममपश्यं सप्रथस्तमं । दिवो न सद्ममखसं ॥ ९ ॥

नराशंसं । सुऽधृष्टमं । अपश्यं । सप्रथःऽतमं । दिवः । न । सद्मऽमखसं ॥ ९ ॥

नराशंसमेतन्नामकं देवविशेषं । यद्वावयवार्थव्युत्पत्त्या सदसस्पतिदेवपरोऽयं शब्दः । व्युत्पत्तिं च यास्को दर्शयति । नराशंसो यज्ञ इति कात्थक्यो नरा अस्मिन्नासीनाः शंसंत्यग्निरिति शाकपूणिर्नरैः प्रशस्यो भवति । नि॰ ८. ६. । इति । अत्राग्निवत्सदसस्पतेरपि नरैः प्रशस्यमानत्वान्नराशंसत्वं । एवमेवाभिप्रायं हृदि निधाय ब्राह्मणमेवमाम्नायते । प्रजा वै नरो वाक् शंस इति । अतो मनुष्यैः शस्यमानो यः सदसस्पतिर्यो वा नराशंसनामको देवस्तमपश्यं । शास्त्रदृष्ट्या दृष्टवानस्मि । कीदृशं । सुधृष्टमं । अत्याधिक्येन धार्ष्ट्ययुक्तं । सप्रथस्तमं । अतिशयेन प्रख्यातं । सद्ममखसं । प्राप्ततेजस्कं । तत्र दृष्टांतः । दिवो न । द्युलोकानिव । आदित्यचंद्रादिभिरधिष्ठिता द्युलोकविशेषा यथा तेजस्विनस्तद्वदयं नराशंसस्तेजस्वीत्यर्थः ॥ सुधृष्टमं । शोभनं धृष्णोतीति सुधृक् । क्विप् चेति क्विप् । आतिशायनिकस्तमप् । षकारस्य जश्त्वाभावश्छांदसः । कृदुत्तरपदप्रकृतिस्वरत्वेन ऋकार उदात्तः । अपश्यं । पाघ्राध्मेत्यादिना पश्यादेशः । लुङ्लङ्लृङ्क्ष्वडुदात्तः । पा॰ ६. ४. ७१. । इत्यट उदात्तत्वं । पादादित्वान्न निघातः । सप्रथस्तमं । प्रथ प्रख्याने । प्रथनं प्रथः । सर्वधातुभ्योऽसुन् । नित्त्वादाद्युदात्तत्वं । सह प्रथसा वर्तत इति तेन सहेति तुल्ययोगे । पा॰ २. २. २८. । इति बहुव्रीहिसमासः । वोपसर्जनस्य । पा॰ ६. ३. ८२. । इति सादेशः । पूर्वपदप्रकृतिस्वरत्वे प्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । दिवः । ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । सद्ममखसं । सीदतीति सद्म । षद्लृ विशरणादौ । अन्येभ्योऽपि दृश्यंत इति मनिन् । नित्त्वादाद्युदात्तः । सद्म महो यस्येति बहुव्रीहौ हकारस्य व्यत्ययेन खकारः ॥

॥ इति प्रथमस्य प्रथमे पंचत्रिंशतितमो वर्गः ॥

प्रति त्यमिति नवर्चं द्वितीयं सूक्तं। ऋषिश्छंदसी पूर्ववत्। देवता त्वनुक्रम्यते। प्रति त्यमग्निमारुतमिति। कारीरीष्टौ प्रति त्यमित्येषा धाय्या। तथा च सूचितं। वर्षकामेष्टिः कारीरी तस्यां प्रति त्यं चारुमध्वरमीळे अग्निं स्ववसं नमोभिरिति धाय्ये। अ० २. १३.। इति। तामेतां सूक्तगतां प्रथमामृचमाह॥

प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे। मरुद्भिरग्न आ गहि॥१॥

प्रति। त्यं। चारुं। अध्वरं। गोऽपीथाय। प्र। हूयसे। मरुत्ऽभिः। अग्ने। आ। गहि॥१॥

त्यच्छब्दः सर्वनाम तच्छब्दपर्यायः। हे अग्ने यो यज्ञश्चारुरंगवैकल्यरहितः। त्यं तथाविधं चारुमध्वरं प्रतिलभ्य गोपीथाय सोमपानाय प्रहूयसे। प्रकर्षेण त्वं हूयसे। तस्मादस्मिन्नध्वरे त्वं मरुद्भिः सह देवविशेषैः सहागहि। आगच्छ॥ सेयमृग्यास्केनैवं व्याख्याता। तं प्रति चारुमध्वरं सोमपानाय प्रहूयसे सोऽग्ने मरुद्भिः सहागच्छ। नि० १०. ३६.। इति॥ प्रति। निपात आद्युदात्तः। त्यं। त्यदादीनामः। पा० ७. २. १०२.। प्रातिपदिकस्वरः। चारुं। दृसनिजनिचरीत्यादिना। उ० १. ३.। ञुण्। अत उपधाया इति वृद्धिः। जित्त्वादाद्युदात्तः। गोपीथाय। निशीथगोपीथावगथाः। उ० २. ९.। इति थक्प्रत्ययांतो निपातितः। प्र। निपातस्वरः॥

द्वितीयामृचमाह॥

नहि देवो न मर्त्यो महस्तव क्रतुं परः। मरुद्भिरग्न आ गहि॥२॥

नहि। देवः। न। मर्त्यः। महः। तव। क्रतुं। परः। मरुत्ऽभिः। अग्ने। आ। गहि॥२॥

हे अग्ने महो महतस्तव संबंधि क्रतुं कर्मविशेषमुल्लंघ्य परो नहि। उत्कृष्टो देवो न भवति खलु। तथा मर्त्यो मनुष्यश्च परो न भवति। ये मनुष्यास्त्वदीयं क्रतुमनुतिष्ठंति ये च देवास्त्वदीये क्रताविज्यंते त एवोत्कृष्टा इत्यर्थः। मरुद्भिरित्यादि पूर्ववत्॥ नहि। एवमादीनामंत इत्यंतोदात्तः। देवः। पचाद्यजंतश्चित्त्वादंतोदात्तः। महः। महतस्तलोपश्छांदसः। बृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वं। तव। युष्मदस्मदोर्ङसीत्याद्युदात्तत्वं। क्रतुं। कृञः कतुः। उ० १. ७. ७.। प्रत्ययस्याद्युदात्तत्वं। गहि। गम्लृ सृप्लृ गतौ। लोटः सेर्हिः। बहुलं छंदसीति शपो

लुक्। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः। तस्यासिद्धवदत्रा भादित्यसिद्धत्वादतो हेरिति लुङ् भवति। निघातः ॥

तृतीयामृचमाह ॥

ये महो रजसो विदुर्विश्वे देवासो अद्रुहः। मरुद्भिरग्न आ गहि ॥ ३ ॥

ये। महः। रजसः। विदुः। विश्वे। देवासः। अद्रुहः। मरुत्ऽभिः। अग्ने। आ। गहि ॥ ३ ॥

हे अग्ने ये मरुतो महो रजसो महत उदकस्य वर्षणप्रकारं विदुस्तैर्मरुद्भिरित्यन्वयः। कीदृशा मरुतः। विश्वे। सर्वे सप्तविधगणोपेताः। सप्तगणा वै मरुत इति श्रुतेः। देवासाः। द्योतमानाः। अद्रुहः। द्रोहरहिताः। वर्षणेन सर्वभूतोपकारित्वात्। तथा चोपरिष्टादाम्नायते। उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिण इति। शाखांतरेऽपि मंत्रांतरस्य ब्राह्मणमेवमाम्नायते। मरुतं पृषयंत स्येत्याह मरुतो वै वृष्ट्या ईशत इति। रजःशब्दो यास्केन बहुधा व्याख्यातः। रजो रजतेर्ज्योती रज उच्यत उदकं रज उच्यते लोका रजांस्युच्यंतेऽसृगहनी रजसी उच्येते। नि० ४. १९. १.। इति ॥ रजसः। नब्विषयस्यानिसंतस्येत्याद्युदात्तः। विदुः। विद ज्ञाने। विदो लटो वा। पा० ३. ४. ८३.। इति झेरुसादेशः। प्रत्ययस्वरः। यद्वृत्तयोगान्निघाताभावः। विश्वे। विशेः क्वनंतस्य नित्त्वादाद्युदात्तत्वं। देवासः। आज्जसेरसुक्। देवशब्दः पचाद्यजंतः। चित्त्वादंतोदात्तः। अद्रुहः। संपदादित्वाद्भावे क्विपि बहुव्रीहौ नञ्सुभ्यामित्यंतोदात्तत्वं। कर्तरि वा क्विप्। तत्पुरुषे ह्यव्ययपूर्वपदप्रकृतिस्वरत्वं स्यात्। न च कृदुत्तरपदप्रकृतिस्वरत्वं। यतो नञ् न गतिर्न च कारक इति। पा० ६. २. १३९. ॥

चतुर्थीमृचमाह ॥

य उग्रा अर्कमानृचुरनाधृष्टास ओजसा। मरुद्भिरग्न आ गहि ॥ ४ ॥

ये। उग्राः। अर्कं। आनृचुः। अनाधृष्टासः। ओजसा। मरुत्ऽभिः। अग्ने। आ। गहि ॥ ४ ॥

ये मरुत उग्रास्तीव्राः संतोऽर्कमुदकमानृचुः। अर्चितवंतः। वर्षणेन संपादितवंत इत्यर्थः। तैर्मरुद्भिरित्यन्वयः। कीदृशा मरुतः। ओजसा बलेनानाधृष्टासोऽतिरस्कृताः। सर्वेभ्योऽपि प्रबला इत्यर्थः ॥ अर्कशब्दस्योदकवाचित्वं

वाजसनेयिन आमनंति । आपो वा अर्क इति । तन्निर्वचनं च त एवामनंति । सोऽर्चन्नचरत्तस्यार्चत आपोऽजायंतार्चतो वै मे कमभूदिति तदेवार्कस्यार्कत्वमिति । जगत्सृष्ट्वा हिरण्यगर्भे उदकं स्रष्टुमुद्युक्तोऽर्चन् उदकसत्यसंकल्पमहिमप्रख्यापनेन स्वात्मानं पूजयन्नचरत् । तथा पूजयतो हिरण्यगर्भस्य सकाशादुदकमुत्पन्नं । तदानीमर्चतो मन्नः कमभूदित्यवोचत् । तेनोदकस्यार्कनाम निष्पन्नमित्यर्थः । आनृचुः । अर्चतेः । अपस्पृधेथामित्यादिना । पा० ६. १. ३६. । निपातः । प्रत्ययस्वरः । यद्वृत्तयोगान्न निघातः । अनाधृष्टासः । अव्ययपूर्वपदप्रकृतिस्वरत्वं । ओजसा । उब्जेर्बले बलोपश्चेत्यसुन् । नित्वादाद्युदात्तः ॥

पंचमीमृचमाह ॥

ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः । मरुद्भिरग्न आ गहि ॥ ५ ॥

ये । शुभ्राः । घोरऽवर्पसः । सुऽक्षत्रासः । रिशादसः । मरुत्ऽभिः । अग्ने । आ । गहि ॥ ५ ॥

ये मरुतः शुभ्रत्वादिगुणोपेतास्तैर्मरुद्भिरित्यन्वयः । शुभ्राः । शोभमानाः । घोरवर्पसः । उग्ररूपधराः । सुक्षत्रासः । शोभनधनोपेताः । रिशादसः । हिंसकानांभक्षकाः ॥ मघमित्यादिष्वष्टाविंशतिसंख्याकेषु धननामसु क्षत्रं भग इति पठितं । शुभ्राः । स्फायितंचीत्यादिना शुभेरौणादिको रक्प्रत्ययः । प्रत्ययस्वरः । घोरवर्पसः । घोरं वर्पो येषां च बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । सुक्षत्रासः । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । आद्युदात्तं द्व्यच् छंदसि । पा० ६. २. ११९. । इत्येव तु न भवति क्षत्रशब्दस्यांतोदात्तत्वात् । रिशंति हिंसंतीति रिशाः । तानदंतीति रिशादसः । सर्वधातुभ्योऽसुन्प्रत्ययः । नित्स्वरेणोत्तरपदमाद्युदात्तं । कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते ॥

॥ इति प्रथमस्य प्रथमे षट्त्रिंशो वर्गः ॥

सूक्ते षष्ठीमृचमाह ॥

ये नाकस्याधि रोचने दिवि देवास आसते । मरुद्भिरग्न आ गहि ॥ ६ ॥

ये । नाकस्य । अधि । रोचने । दिवि । देवासः । आसते । मरुत्ऽभिः । अग्ने । आ । गहि ॥ ६ ॥

ये मरुतो नाकस्याधि दुःखरहितस्य सूर्यस्योपरि दिवि द्युलोके रोचने दीप्यमाने ये देवासः स्वयमपि दीप्यमाना आसते । तैर्मरुद्भिरित्यन्वयः ॥ नाकस्य । कं सुखं । तद्यस्मिन्नास्त्यसावक इति बहुव्रीहिं कृत्वा पश्चान्नञ् । न अको नाक इति नञ्तत्पुरुषः । नलोपो नञः । पा॰ ६.३.७३. । इति लोपो न भवति । नभ्राण्नपादित्यादिना । पा॰ ६.३.७५. । प्रकृतिभावात् । तत्पुरुषे तुल्यार्थेत्यादिना । पा॰ ६.२.२. । अव्ययपूर्वपदप्रकृतिस्वरत्वेनोदात्तत्वं । प्रथमतस्तत्पुरुषं कृत्वा पश्चाद्बहुव्रीहावुत्तरपदांतोदात्तत्वं स्यात् । अधिशब्द उपर्यर्थे । उपसर्गप्रतिरूपको निपातः । रोचने । रुच दीप्तौ । अनुदात्तेतश्च हलादेरिति युच् । चित इत्यंतोदात्तत्वं । दिवि । ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । देवासः । आज्जसेरसुगित्यसुक् । आसते । आस उपवेशने । अनुदात्तेत्त्वादात्मनेपदं । रुस्यादादेशः । अदिप्रभृतिभ्यः शप इति शपो लुक् । अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वं । यद्वृत्तयोगान्न निघातः ॥

सप्तमीमृचमाह ॥

य ईंखयंति पर्वतान्तिरः समुद्रमर्णवं । मरुद्भिरग्न आ गहि ॥ ७ ॥

ये । ईंखयंति । पर्वतान् । तिरः । समुद्रं । अर्णवं । मरुत्ऽभिः । अग्ने । आ । गहि ॥ ७ ॥

ये मरुतः पर्वतान्मेघानीखयंति । चालयंति । तथार्णवमुदकयुक्तं समुद्रं तिरः कुर्वंतीति शेषः । निश्चलस्य जलस्य तरंगाद्युत्पत्तये चालनं तिरस्कारः । तैर्मरुद्भिरित्यन्वयः ॥ ईंखयंति । उख ऊखीत्यादावीखिर्गत्यर्थः । हेतुमति चेति णिच् । इदितो नुम् धातोरिति नुम् । णिजंतधातोश्चित इत्यंतोदात्तत्वं । शपः पित्त्वादनुदात्तत्वं । तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते । पर्वतान् । पूर्व पर्व मर्व पूरणे । औणादिको भृमृदशीत्यादिनातच्प्रत्ययः । प्रत्ययस्वरः ॥

अष्टमीमृचमाह ॥

आ ये तन्वंति रश्मिभिस्तिरः समुद्रमोजसा । मरुद्भिरग्न आ गहि ॥ ८ ॥

आ । ये । तन्वंति । रश्मिऽभिः । तिरः । समुद्रं । ओजसा । मरुत्ऽभिः । अग्ने । आ । गहि ॥ ८ ॥

ये मरुतो रश्मिभिः सूर्यकिरणैः सहातन्वंति । आभुवंत्याकाशमिति शेषः ।

किंच। ओजसा स्वकीयबलेन समुद्रं तिरस्कुर्वंति। तैर्मरुद्भिरित्यन्वयः॥ तन्वंति। तनु विस्तारे। लटो झोऽंतः। तनादिकृञ्भ्य उः। पा॰ ३. १. ७९.। सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति तिङ एवाद्युदात्तत्वं। समुद्रं। उंदी क्लेदने। स्फायितंचीति रक्। समासे कृदुत्तरपदप्रकृतिस्वरत्वं॥

नवमीमृचमाह॥

अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु। मरुद्भिरग्न आ गहि॥९॥

अभि। त्वा। पूर्वऽपीतये। सृजामि। सोम्यं। मधु। मरुत्ऽभिः। अग्ने। आ। गहि॥९॥

हे अग्ने पूर्वपीतये पूर्वकाले प्रवृत्ताय पानाय त्वां प्रति सोम्यं मधु सोमसंबंधिनं मधुरसमभिसृजामि। सर्वतः संपादयामि। अतस्त्वं मरुद्भिः सहागच्छ॥ अभि। एवमादीनामंत इत्यंतोदात्तत्वं। त्वामौ द्वितीयाया इति त्वादेशः सर्वानुदात्तः। पूर्वपीतये। पूर्वा चासौ पीतिश्च। पुंवत्कर्मधारयेत्यादिना। पा॰ ६. ३. ४२.। पुंवद्भावः। सृजामि। सृज विसर्गे। मिपः पित्त्वादनुदात्तत्वं। विकरणस्वरः। सोम्यं। सोममर्हति यः। प्रत्ययस्वरेणांतोदात्तः। मधु। फलिपाटिनमीत्यादिना उप्रत्ययः। निदित्यनुवृत्तेराद्युदात्तत्वं। अन्यत्प्रतं। अत्र यास्कः। अभि सृजामि त्वा पूर्वपीतये पूर्वपानाय सोम्यं मधु सोममयं सोऽग्ने मरुद्भिः सहागच्छ। नि॰ १०. ३७.। इति॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमार्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहितायां प्रथमाष्टके प्रथमोऽध्यायः समाप्तः॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथ प्रथमाष्टके द्वितीयोऽध्याय आरभ्यते । तत्रायं देवायेत्यष्टर्चं सूक्तं । तस्य ऋषिश्छंदसी पूर्ववत् । ऋभुदेवताकत्वमनुक्रम्यते । अयमष्टावार्भवमिति । विनियोगस्तु सूक्तस्य लैंगिकः स्मार्तो वा द्रष्टव्यः । व्यूढस्य प्रथमे छंदोमे वैश्वदेवशस्त्रेऽयं देवाय जन्मन इत्यार्भवस्तृचः । अथ छंदोमा इति खंडे सूत्रितं । अभि त्वा देव सवितः प्रेतां यज्ञस्य शंभुवायं देवाय जन्मन इति तृचाः । आ० ८.९. । इति । तस्मिन्सूक्ते प्रथमामृचमाह ॥

अयं देवाय जन्मने स्तोमो विप्रेभिरासया । अकारि रत्नधातमः ॥ १ ॥

अयं । देवाय । जन्मने । स्तोमः । विप्रेभिः । आसया । अकारि । रत्नऽधातमः ॥ १ ॥

ऋभवो हि मनुष्याः संतस्तपसा देवत्वं प्राप्ताः । ते चात्र सूक्ते देवताः । तत्संघो जायमानवाचिना जन्मशब्देनैकवचनांतेनात्र निर्दिश्यते । जन्मने जायमानाय ऋभुसंघरूपाय देवाय तत्प्रीत्यर्थमयं स्तोमः स्तोत्रविशेषो विप्रेभिर्मेधाविभिर्ऋत्विग्भिरासया स्वकीयेनास्येनाकारि । निष्पादितः । कीदृशः स्तोमः । रत्नधातमः । अतिशयेन रमणीयमणिमुक्तादिधनप्रदः । स्तोत्रेण तुष्टा ऋभवो धनं प्रयच्छंतीत्यर्थः ॥ आसया । आस्यशब्दात्तृतीयैकवचनस्य सुपां सुलुगित्यादिना याजादेशः । व्यत्ययेन प्रकृतियकारस्य लोपः । चित इत्यंतोदात्तः । रत्नधातमः । रत्नानि दधातीति रत्नधाः । कृदुत्तरपदप्रकृतिस्वरत्वं ॥

द्वितीयामृचमाह ॥

य इंद्राय वचोयुजा ततक्षुर्मनसा हरी । शमीभिर्यज्ञमाशत ॥ २ ॥

ये । इंद्राय । वचःऽयुजा । ततक्षुः । मनसा । हरी इति । शमीभिः । यज्ञं । आशत ॥ २ ॥

ये ऋभव इंद्रायेंद्रप्रीत्यर्थं वचोयुजा ताडनादिकं विना वाङ्मात्रेण रथे युज्यमानौ सुशिक्षितौ हरी एतन्नामकावश्वौ मनसा ततक्षुः । संपादितवंतः । ऋभूणां

सत्यसंकल्पत्वात्तत्संकल्पमात्रेणेंद्रस्याश्वौ संपन्नावित्यर्थः। ते ऋभवः शमीभिर्यह-चमसादिनिष्पादनरूपैः कर्मभिर्यज्ञमस्मदीयमाशत । व्याप्नवंतः ॥ अपोऽप्न इत्यादिषु षड्विंशतिसंख्याकेषु कर्मनामसु शमी शिमीति पठितं । वचोयुजा । वचसा युंजाते। सत्सूद्विषेत्यादिना क्विप्। सुपां सुलुगित्यादिना विभक्तेराकारः। कृदुत्तरपदप्रकृतिस्वरः । ततक्षुः । तक्षू त्वक्षू तनूकरणे । लिटि झेरुसादेशः । पादादित्वादनिघातः। शमीभिः। शमयंति पापानीति शम्यः कर्माणि। औणा-दिक इन्। कृदिकारादक्तिनः। पा० ४.१.४५.। इति ङीष्। वृषादित्वादाद्युदात्तः। आशत। अशू व्याप्तौ। लङि झस्यादादेशः। स्वादिभ्यः श्नुः। तस्य बहुलं छंद-सीति लुक्। आडागमः। तिङ्ङतिङ इति निघातः॥

तृतीयामृचमाह ॥

तक्षन्नासत्याभ्यां परिज्मानं सुखं रथं। तक्षन्धेनुं सबर्दुघां ॥ ३ ॥

तक्षन्। नासत्याभ्यां। परिऽज्मानं। सुऽखं। रथं। तक्षन्। धेनुं। सबःऽदुघां ॥ ३ ॥

नासत्याभ्यामश्विदेवप्रीत्यर्थं रथं तक्षन्। ऋभवो देवाः कंचिद्रथमतक्षन्। तक्षणेन संपादितवंतः। कीदृशं रथं। परिज्मानं। परितो गंतारं। सुखं। उपर्युपवेशने सुखकरं। किंच। धेनुं कांचिद्गां तक्षन्। धातूनामनेकार्थत्वात्तक्ष-तिरत्र संपादनवाची। कीदृशीं धेनुं। सबर्दुघां। सबरः क्षीरस्य दोग्ध्रीं॥ तक्षन्। बहुलं छंदसीत्यडभावः। नासत्याभ्यां। न विद्यते सत्यं ययोस्तावसत्यौ। न असत्यौ नासत्यौ। नभ्राण्नपादित्यादिना नलोपाभावः। परिज्मा। अजेः परिपूर्वस्य श्वन्नुक्षन्नित्यादिना। उ० १.१५८.। मन्प्रत्ययेऽकारलोप आद्युदात्तत्वं च निपातनात्। सबर्दुघां। सबः पयो दोग्धीति सबर्दुघा। दुहः कब्घश्च। पा० ३.२.७०.। इति कप्। सबरिति रेफांतं प्रातिपदिकं क्षीरवाचीति संप्रदायविदः। कपः पित्त्वादनुदात्तत्वं। धातुस्वर एव शिष्यते। समासे कृदुत्तरपदप्रकृतिस्वरः॥

द्वितीये छंदोमे वैश्वदेवशस्त्रे युवाना पितरा पुनरित्यार्भवस्तृचः। द्वितीयस्याग्निं वो देवमिति खंडे सूचितं : मही द्यौः पृथिवी च नो युवाना पितरा पुनरिति तृचौ। आ० ८.१०.। इति। तस्मिंस्तृचे प्रथमां सूक्ते चतुर्थीमृचमाह ॥

युवाना पितरा पुनः सत्यमंत्रा ऋजूयवः। ऋभवो विष्ट्यक्रत ॥ ४ ॥

युवाना। पितरा। पुनरिति। सत्यऽमंत्राः। ऋजुऽयवः। ऋभवः। विष्टी। अक्रत ॥ ४ ॥

ऋभव एतन्नामका देवाः पितरौ स्वकीयौ मातापितरौ पर्वं वृद्धावपि पुनर्युवाना तरुणावक्रत । कृतवंतः । कीदृशाः । सत्यमंत्राः । अवितथमंत्रसामर्थ्योपेताः । पुरश्चरणाद्यनुष्ठानेन सिद्धमंत्रत्वाद्यद्यत्फलमुद्दिश्य मंत्राः प्रयुज्यंते तत्तत्फलं तथैव संपद्यते । तस्माज्जीर्णयोः पित्रोर्युवत्वं संपादयितुं समर्था इत्यर्थः । ऋजूयवः । ऋजुतामात्मन इच्छंतः । छलरहिता इत्यर्थः । अत एवैतेषामनुष्ठिता मंत्रा सिध्यंति । विष्टी । विष्टयो व्याप्तियुक्ताः । सर्वेषु कार्येष्वेतदीयस्य मंत्रसामर्थ्यस्याप्रतिघातोऽत्र व्याप्तिरुच्यते ॥ ऋभुशब्दं यास्क एवं निर्वक्ति । ऋभव उरु भांतीति वर्तेन भांतीति वर्तेन भवंतीति वा । नि० ११. १५. । इति । युवाना । युवन्शब्दो यौतेः कनिनंतो नित्त्वादाद्युदात्तः । सुपां सुलुगित्यादिना विभक्तेराकारः । पितरा । पूर्ववदाकारः । सत्यमंत्राः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । ऋजुशब्दो भावपरः । ऋजुत्वमात्मन इच्छंति । क्यच् । अकृत्सार्वधातुकयोर्दीर्घः । पा० ७. ४. २५. । इति दीर्घः । क्याच्छंदसीत्युप्रत्ययः । प्रत्ययस्वरः । विष्टी । विष्लृ व्याप्तौ । क्तिच्क्तौ च संज्ञायामिति क्तिच् । तितुत्रेत्यादिनेट्प्रतिबंधः । तस्माज्जस इयाडियाजीकाराणामुपसंख्यानं । पा० ७. १. ३९. ३. । इति तस्येकारादेशः । स चालोऽन्त्यस्य । पा० १. १. ५२. । इति सकारस्य भवति । तत आद्गुण इति गुणे कृते प्रथमयोः पूर्वसवर्णः । पा० ६. १. १०२. । इति पूर्वसवर्णदीर्घः । तं बाधित्वा परत्वाज्जसि च । पा० ७. ३. १०९. । इति ह्रस्वस्य गुणेन भवितव्यमिति चेत् । न । संज्ञापूर्वकस्य विधेरनित्यत्वात् । अक्रत । कृञो लुङ् । आत्मनेपदं । च्लेः सिचः आदेशः । मंत्रे घसेत्यादिना च्लेर्लुक् । यणादेशः । अडागमः । निघातः ॥

पंचमीमृचमाह ॥

सं वो मदा॑सो अग्मतेंद्रे॑ण च म॒रुत्व॑ता । आ॒दि॒त्येभि॑श्च॒ राज॑भिः ॥ ५ ॥

सं । वः॒ । मदा॑सः । अ॒ग्म॒त॒ । इंद्रे॑ण । च॒ । म॒रुत्व॑ता । आ॒दि॒त्येभिः॑ । च॒ । राज॑ऽभिः ॥ ५ ॥

हे ऋभवो युष्माकं संबंधिनो मदासो मदहेतवः सोमा इंद्रेण चादित्येभिरादित्यैश्च समग्मत । संगताः । ऋभूणामिंद्रादित्यैः सह सोमपानं तृतीयसवनेऽस्ति । अत एवावाहननिगद आश्वलायनेनैवं पठितः । इंद्रमादित्यवंतमृभुमंतं विभुमंतं वाजवंतं बृहस्पतिमंतं विश्वदेव्यावंतमावहेति । कीदृशेनेंद्रेण । मरुत्वता । मरुद्भिर्युक्तेन । अत एव मंत्रांतरमेवमाम्नायते । मरुद्भिरिंद्र सख्यं ते अस्त्विति । कीदृशैरादित्येभिः । राजभिः । दीप्यमानैः ॥ मदासः । माद्यंत्येभिरिति

मदाः सोमाः । मदोऽनुपसर्गे । पा॰ ३. ३. ६७. । इत्यप् । तस्य पित्त्वादनुदात्तत्वं । धातुस्वर एव शिष्यते । आज्जसेरसुगिति जसोऽसुगागमः । अग्मत । गमेः संपूर्वाल्लुङ् । समो गम्यृच्छीत्यादिना । पा॰ १. ३. २९. । आत्मनेपदं । च्लेः सिजादेशः । मंत्रे घसेत्यादिना च्लेर्लुक् । गमहनेत्यादिना । पा॰ ६. ४. ९८. । उपधालोपः । व्यवहिताश्चेति समो व्यवहितप्रयोगः । निघातः । मरुत्वता । मरुतोऽस्य संतीति मरुत्वान् । तसौ मत्वर्थ इति भसंज्ञया पदसंज्ञाया बाधितत्वाज्जश्त्वाभावः । झयः । पा॰ ८. २. १०. । इति मतुपो वत्वं । आदित्येभिः । बहुलं छंदसीति भिस ऐसादेशाभावे बहुवचने झल्येदित्येत्वं । राजभिः । राजन्शब्दस्य कनिनंतत्वेन नित्त्वादाद्युदात्तत्वं ॥

॥ इति प्रथमस्य द्वितीये प्रथमो वर्गः ॥

सूक्ते षष्ठीमृचमाह ॥

उत त्यं चमसं नवं त्वष्टुर्देवस्य निष्कृतं । अकर्त चतुरः पुनः ॥ ६ ॥

उत । त्यं । चमसं । नवं । त्वष्टुः । देवस्य । निःऽकृतं । अकर्त । चतुरः । पुनरिति ॥ ६ ॥

उतापि च त्वष्टुरेतन्नामकस्य देवस्य । देवसंबंधी तक्षणव्यापारः । नवं नूतनं त्यं चमसं तं सोमधारणक्षमं काष्ठपात्रविशेषं निष्कृतं निःशेषेण संपादितमकरोदिति शेषः । तक्षणव्यापारकुशलस्य त्वष्टुः शिष्या ऋभवस्तेन निर्मितं तमेकं चमसं पुनरपि चतुरोऽकर्त । चतुर्धा विभक्तांश्चमसान्कृतवंतः । एकस्य चतुर्विधत्वकरणरूपोऽयमर्थो मंत्रांतरेऽपि विस्पष्टः । एकं चमसं चतुरः कृणोतनेति ॥ नवं । णु स्तुतौ । नूयत इति नवं । कर्मणि अप्प्रत्ययः । स हि घञोऽपवादत्वाद्घञर्थे सर्वत्र भवति । पा॰ ३.३.५६.५७. । घञ्प्रत्ययश्चाकर्तरि च कारके संज्ञायां । पा॰ ३. ३. १९. । इति कर्तृव्यतिरिक्ते सर्वत्र कारके भवति । यद्यपि तत्र संज्ञायामित्युक्तं तथापि चकारस्य संज्ञाव्यभिचारार्थत्वादसंज्ञायामपि भवत्येव । संबध्यत इति संबंधः । कर्मणि घञित्युक्तं । त्वष्टुः । तक्षू त्वक्षू तनूकरणे । औणादिकस्तृन् । ऊदित्त्वात्पक्ष इडभावः । पा॰ ७. २. ४४. । स्कोः संयोगाद्योरंते च । पा॰ ८. २. २९. । इति ककारलोपः । निष्कृतं । कृञो निरुपसृष्टात्कर्मणि क्तः । प्रादिसमासे नित्यं समासेऽनुत्तरपदस्थस्य । पा॰ ८. ३. ४५. । इति षत्वं । अत्र कर्तृकर्मणोः कृति । पा॰ २. ३. ६५. । इति प्राप्ता षष्ठी यद्यपि न लोकाव्ययेति

निषिद्धा । पा० २. ३. ६९. । तथापि कर्तुः शेषत्वेन विवक्षितत्वात्कर्तृकरणयोस्तृतीया । पा० २. ३. १८. । इत्येतस्याः प्राप्तेः शैषिकी षष्ठी । यथा कर्मणि शेषत्वेन विवक्षिते । पा० २. ३. ५२. । माषाणामश्नीयादिति । गतिरनंतर इति निस उदात्तत्वं । अकर्त । अकृषत । कृञो लुङि झस्य व्यत्ययेन तादेशः । मंत्रे घसेत्यादिना च्लेर्लुक् । छंदस्युभयथेति तिङ आर्धधातुकत्वाद्ङित्त्वाभावेन गुणः । चतुरः शसि । पा० ६. १. १६७. । इत्युकार उदात्तः । पुनः । स्वरादिष्वाद्युदात्तः पठितः ॥

तृतीये छंदोमे वैश्वदेवशस्त्रे ते नो रत्नानि धत्तनेति द्वे ऋचावावाभेर्ष्यौ । तृतीयस्यागन्म महेति खंडे सूचितं । इंद्र इषे ददातु नस्ते नो रत्नानि धत्तनेत्येका द्वे च । आ० ८. ११. । इति । तयोराद्यां सूक्ते सप्तमीमृचमाह ॥

ते नो रत्नानि धत्तन त्रिरा साप्तानि सुन्वते । एकमेकं सुशस्तिभिः ॥ ७ ॥

ते । नः । रत्नानि । धत्तन । त्रिः । आ । साप्तानि । सुन्वते । एकंऽएकं । सुशस्तिऽभिः ॥ ७ ॥

पूर्वास्वृक्षु ये प्रतिपादिता ऋभवस्ते यूयं सुशस्तिभिः शोभनैरस्मदीयशंसनैर्युक्ताः संतो नोऽस्माकं संबंधिने सुन्वते सोमाभिषवं कुर्वते यजमानाय रत्नानि रमणीयानि सुवर्णमणिमुक्तादीनि धनान्येकमेकं क्रमेण प्रत्येकं धत्तन । प्रयच्छत । सुवर्णादीनां मध्ये प्रतिद्रव्यं यावदपेक्षितं तावदिति विवक्षयैकमेकमित्युक्तं । कीदृशानि रत्नानि । त्रिरा । त्रिवारमावृत्तानि । उत्तमानि मध्यमान्यधमानि चेत्येवं रत्नानां त्रिरावृत्तिः । किंच साप्तानि । सप्तसंख्यानिष्पन्नवर्गरूपाणि कर्माणि च धत्तन । संपादयत । कीदृशानि साप्तानि । त्रिरा । त्रिवारमावृत्तानि । अग्न्याधेयं दर्शपूर्णमासादीनां सप्तानां हविर्यज्ञानामेको वर्गः । औपासनहोमो वैश्वदेवमित्यादीनां सप्तानां पाकयज्ञानां वर्गो द्वितीयः । अग्निष्टोमोऽत्यग्निष्टोम इत्यादीनां सप्तानां सोमसंस्थानां वर्गस्तृतीयः ॥ रत्नानि । रमु क्रीडायां । नित्यनुवृत्तौ रमेस्त च । उ० ३. १४. । इति नप्रत्ययः । तत्संनियोगेन मकारस्य तकारः । नित्त्वादाद्युदात्तः । धत्तन । धत्त । तप्तनप्तनथनाश्चेति तशब्दस्य तनादेशः । सप्तानां वर्गः साप्तं । सप्तनोऽञ् छंदसि । पा० ५. १. ६१. । इति वर्गेऽञ्प्रत्ययः । नस्तद्धिते । पा० ६. ४. १४४. । इति टिलोपः । ञित्त्वादादिवृद्धिराद्युदात्तत्वं च । अत्र वर्गप्रवचनेन वर्गिणो लक्ष्यंते । तेन बहुवचनं । अन्यथा ह्येक एव वर्गस्त्रिरावृत्त इत्येकवचनमेव स्यात् । सुन्वते । शतुरनुम इति विभक्तेरुदात्तत्वं ।

एकमेकं। नित्यवीप्सयोरिति वीप्सायां द्विर्भावः। एकशब्द इणः कन्नंतो निद्वा-दाद्युदात्तः। द्वितीयस्यैकशब्दस्य तस्य परमाम्रेडितमित्याम्रेडितसंज्ञायामनुदात्तं चेत्यनुदात्तत्वं। सुशस्तिभिः। शस्यत आभिरिति शस्तय ऋचः। शंसु स्तुतौ। करणे क्तिन्। तस्य क्तिच्चाद्नलोपः। शोभनाः शस्तय इति प्रादिसमासे यद्यपि च क्तिनो नित्त्वादाद्युदात्तत्वेन कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव प्राप्तं तत्तु परेण मन्क्तिन्व्याख्यानेत्यादिनोत्तरपदांतोदात्तत्वेन बाध्यते। पा० ६. २. १५१.॥

अष्टमीमृचमाह॥

अधारयंत वह्नयोऽभजंत सुकृत्यया। भागं देवेषु यज्ञियं॥ ८॥

अधारयंत। वह्नयः। अभजंत। सुऽकृत्यया। भागं। देवेषु। यज्ञियं॥ ८॥

वह्नयश्चमसादिसाधननिष्पादनेन यज्ञस्य वोढार ऋभवोऽधारयंत। पूर्वं मनुष्यत्वेन मरणयोग्या अप्यमृतत्वलाभेन प्राणान्धारितवंतः। तथा च मंत्रांतरमाम्नायते। मर्तासः संतो अमृतत्वमानशुरिति। किंचैते सुकृत्यया यज्ञसाधनद्रव्यसंपादनरूपेण शोभनव्यापारेण देवेषु मध्ये स्थित्वा यज्ञियं यज्ञार्हं भागं हविर्लक्षणमभजंत। सेवितवंतः। अयमर्थः सौधन्वना यज्ञियं भागमानशेत्यादिमंत्रांतरे विस्पष्टः। ब्राह्मणेऽप्यृभवो वै देवेषु तपसा सोमपीथमभ्यजयन्नित्याद्युपाख्यानं विस्पष्टं॥ वह्नयः। निरित्यनुवृत्तौ वहिश्रीत्यादिना निप्रत्ययः। अभजंत। पादादित्वादनिघातः। सुकृत्यया। विभाषा कृवृषोः। पा० ३. १. १२०। इति कृञः कर्मणि क्यप्। शोभनं कृत्यं यस्या भजनक्रियायाः सा सुकृत्या। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं बाधित्वा नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। ननु कृत्यशब्दे क्यपः पित्त्वेनानुदात्तत्वाद्धातुस्वरेणादिरुदात्तः। ततश्चाद्युदात्तं द्व्यच्छंदसीत्यनेनाद्युदात्तत्वेन भवितव्यं। तेन हि पुरस्तादपवादेन परमपि नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं बाध्यत इत्युक्तं। एवं तर्हि कृञः श च। पा० ३. ३. १००। इति स्त्रियां भावे क्यप्प्रत्ययांतः कृत्याशब्दः। क्यपः पित्त्वेऽपि व्यत्ययेनोदात्तत्वं। प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते। भागं। कर्षात्वत इत्यंतोदात्तः। यज्ञियं। यज्ञमर्हतीत्यर्थे यज्ञर्त्विग्भ्यां घखञौ। पा० ५. १. ७१। इति घः। तस्य इयादेशः। प्रत्ययस्वरः॥

॥ इति प्रथमस्य द्वितीये द्वितीयो वर्गः॥

इहेंद्राग्नी इत्यादिकं षळृचं चतुर्थं सूक्तं। तस्य ऋषिच्छंदसी पूर्ववत्। देवता त्वनुक्रम्यते। इह षळैंद्राग्नमिति। विनियोगस्त्वग्निष्टोमेऽच्छावाकशस्त्र इहेंद्राग्नी उपह्वय इति सूक्तं। स्तोत्रमग्रे शस्त्रादिति खंड इहेंद्राग्नी उपेयं वामस्य मन्मन इति नव। आ० ५.१०.। इति सूचितत्वात्। तथाभिप्लवषडहे प्रातःसवनेऽच्छावाकशस्त्रे स्तोमातिशंसनार्थमेतदेव सूक्तं। तथा च सूचितं। अभिप्लवपृष्ठ्याहानीत्युपक्रम्येहेंद्राग्नी इंद्राग्नी आगतं। आ० ७.५.। इति। तस्मिन्सूक्ते प्रथमामृचमाह ॥

इहेंद्राग्नी उप ह्वये तयोरित्स्तोममुश्मसि। ता सोमं सोमपातमा ॥ १ ॥

इह। इंद्राग्नी इति। उप। ह्वये। तयोः। इत्। स्तोमं। उश्मसि। ता। सोमं। सोमऽपातमा ॥ १ ॥

इहास्मिन्कर्मणींद्राग्नी देवावुपह्वये। आह्वयामि। तयोरिदिंद्राग्न्योरेव स्तोमं स्तोत्रमुश्मसि। कामयामहे। सोमपातमा। अतिशयेन सोमं पातुं क्षमौ तौ द्वौ देवौ सोमं पिबतामिति शेषः ॥ इंद्राग्नी। अत्र देवताद्वंद्वेऽपि पूर्वपदस्यानङ् न भवति। तत्र हि द्वंद्व इत्यनुवृत्तौ पुनर्द्वंद्वग्रहणाल्लोकप्रसिद्धसाहचर्याणामेव द्वंद्व आनङित्युक्तं। पा० ६.३.२६.। तस्मादत्रावग्रहे ह्रस्व इंद्रशब्दः। समासस्येत्यंतोदात्तत्वं। देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं तु न भवति। अग्निशब्दस्यानुदात्तादित्वेन नोत्तरपदेऽनुदात्तादौ। पा० ६.२.१४२.। इति प्रतिषेधात्। उश्मसि। वश कांतौ। लटो मस्। इदंतो मसिरितीकारोपजनः। अदादित्वाच्छपो लुक्। मसेर्ङित्त्वाद्ग्रहिज्येत्यादिना संप्रसारणं। ता सोमपातमा। उभयत्र सुपां सुलुगित्याकारः ॥

द्वितीयामृचमाह ॥

ता यज्ञेषु प्र शंसतेंद्राग्नी शुंभता नरः। ता गायत्रेषु गायत ॥ २ ॥

ता। यज्ञेषु। प्र। शंसत। इंद्राग्नी इति। शुंभत। नरः। ता। गायत्रेषु। गायत ॥ २ ॥

हे नरो मनुष्या ऋत्विजः। ता पूर्वोक्तौताविंद्राग्नी यज्ञेष्वनुष्ठीयमानकर्मसु प्रशंसत शस्त्रैः। तथा शुंभत। नानाविधैरलंकारैः शोभितौ कुरुत। तथा ता पूर्वोक्ताविंद्राग्नी गायत्रेषु गायत्रीच्छंदस्केषु मंत्रेषु सामरूपेण गायत ॥ ता।

सुपां सुलुगित्याकारः । शुंभता । अस्य संहितायामन्येषामपि दृश्यत इति दीर्घः ॥

तृतीयामृचमाह ॥

ता मित्रस्य प्रशस्तय इंद्राग्नी ता हवामहे । सोमपा सोमपीतये ॥ ३ ॥

ता । मित्रस्य । प्रऽशस्तये । इंद्राग्नी इति । ता । हवामहे । सोमऽपा । सोमऽपीतये ॥ ३ ॥

मित्रस्य स्नेहविषयस्य ममानुष्ठातुः प्रशस्तये ता पूर्वोक्तौ देवौ संपद्येतामिति शेषः । यद्वा मित्रस्य मम संबंधिनौ ताविंद्राग्नी प्रशस्तये प्रशंसितुमिच्छाम इति शेषः । सोमपा सोमपानक्षमौ ता पूर्वोक्ताविंद्राग्नी सोमपीतये सोमपानार्थं हवामहे । आह्वयामः ॥ प्रशस्तये । तुमर्थाच्च भाववचनात् । पा० २. ३. १५. । इति चतुर्थी । कृदुत्तरपदप्रकृतिस्वरत्वं बाधित्वा तादौ च निति कृत्यतौ । पा० ६. २. ५०. । इति गतेः प्रकृतिस्वरत्वं । सोमपीतये । सोमस्य पीतिर्यस्मिन्कर्मणि तस्मै । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । सोमस्य पीतिरिति तत्पुरुषे वा दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं ॥

चतुर्थीमृचमाह ॥

उग्रा संता हवामह उपेदं सवनं सुतं । इंद्राग्नी एह गच्छतां ॥ ४ ॥

उग्रा । संता । हवामहे । उप । इदं । सवनं । सुतं । इंद्राग्नी इति । आ । इह । गच्छतां ॥ ४ ॥

सुतमभिषवोपेतमिदमनुष्ठीयमानं सवनं प्रातःसवनादिरूपं कर्मोप सामीप्येन प्राप्तुमुग्रा संता वैरिवधादिषु क्रूरौ संतौ देवौ हवामहे । आह्वयामः । इंद्राग्नी देवाविह कर्मण्यागच्छतां ॥ संता । अस्तेः शतरि श्नसोरल्लोपः । सवनं सुतमिति द्वयं सेमं नः स्तोममा गहीत्यत्रोक्तं ॥

पंचमीमृचमाह ॥

ता महांता सदस्पती इंद्राग्नी रक्ष उब्जतं । अप्रजाः संत्वत्रिणः ॥ ५ ॥

ता । महांता । सदस्पती इति । इंद्राग्नी इति । रक्षः । उब्जतं । अप्रजाः । संतु । अत्रिणः ॥ ५ ॥

तौ पूर्वोक्ताविंद्राग्नी रक्षो राक्षसजातिमुब्जतं । ऋजुकुरुतं । क्रौर्यं परित्याजयतमित्यर्थः । कीदृशौ । महांता । महांतौ गुणैरधिकौ । सदस्पती । सभापालकौ । तयोः प्रसादादत्रिणो भक्षका राक्षसा अप्रजा अनुत्पन्नाः संतु ॥ महांता । सांतमहतः संयोगस्य । पा० ६.४.१०. । इति दीर्घः । सदस्पती । सदसस्पती इति समासे षष्ठ्या लुकि प्रातिपदिकसकारस्य रुत्वाभावश्छांदसः । उभे वनस्पत्यादिषु युगपदित्युभयपदप्रकृतिस्वरत्वं । इंद्राग्नी । आमंत्रिताद्युदात्तत्वं । अप्रजाः । प्रजायंत इति प्रजाः । अन्येष्वपि दृश्यते । पा० ३. २. १०१. । इति जनेर्डप्रत्ययः । न प्रजा अप्रजाः । प्रजाशब्दस्य बहुव्रीहौ हि नित्यमसिच् प्रजामेधयोः । पा० ५.४.१२२. । इत्यसिजादेशः स्यात् । अव्ययपूर्वपदप्रकृतिस्वरः । अत्रिणः । तृजंतस्यातृशब्दस्य जसश्छांदस इनुडागमः । चित इति ऋकार उदात्तः । तस्य यणादेश उदात्तयणो हल्पूर्वादितीकार उदात्तः ॥

षष्ठीमृचमाह ॥

तेन॑ स॒त्येन॑ जागृत॒मधि॑ प्रचे॒तुने॑ प॒दे । इंद्रा॑ग्नी॒ शर्म॑ यच्छतं ॥ ६ ॥

तेन॑ । स॒त्येन॑ । जा॒गृ॒तं॒ । अधि॑ । प्र॒ऽचे॒तुने॑ । प॒दे । इंद्रा॑ग्नी॒ इति॑ । शर्म॑ । य॒च्छ॒तं॒ ॥ ६ ॥

हे इंद्राग्नी सत्येनावश्यफलप्रदानादवितथेन तेनास्माभिरनुष्ठितेन कर्मणा प्रचेतुने प्रकर्षेण फलभोगज्ञापके पदे स्वर्गलोकादिस्थानेऽधि जागृतं । आधिक्येन सावधाना भवतं । ततोऽस्मभ्यं शर्म यच्छतं । सुखं गृहं वा दत्तं ॥ गयः कृदर इत्यादिषु द्वाविंशतिसंख्याकेषु गृहनामसु शर्म वर्मेत्युक्तं । जागृतं । जागृ निद्राक्षये । अदिप्रभृतिभ्यः शप इति शपो लुक् । तिङ्ङतिङः इति निघातः । प्रचेतुने । चिती संज्ञान इत्यस्माण्ण्यंताच्छ्केरुनोंत । उ० ३.४९. । इति विहितत्वाद्बहुलकादौणादिक उनप्रत्ययः । समासे कृदुत्तरपदप्रकृतिस्वरत्वं । इंद्राग्नी । इहेंद्राग्नी इत्यत्रोक्तं । आमंत्रितत्वादाद्युदात्तत्वमत्र विशेषः । शृणाति हिनस्ति दुःखमिति शर्म । शॄ हिंसायां । अन्येभ्योऽपि दृश्यंत इति मनिन् । यच्छतं । इषुगमियमां छ इति छः ॥

॥ इति प्रथमस्य द्वितीये तृतीयो वर्गः ॥

प्रातर्युजेत्यादिकमेकविंशत्यृचं पंचमं सूक्तं । तस्य ऋषिश्छंदसी पूर्ववत् । देवताविशेषस्त्वनुक्रम्यते । प्रातर्युजा सैका चतस्र आश्विन्यस्तथा सावित्र्य आग्नेय्यौ द्वे देवीनामेकेंद्राणीवरुणान्यग्नायीनां द्यावापृथिव्ये पार्थिवी षड्वैष्णव्योऽतो

देवा दैवी वेति । सूक्तसंख्यानुवर्तत इत्यस्मिन्खंडेऽनिरुक्ता संख्या विंशतिरिति परिभाषितत्वात् प्रातर्युजेति सूक्ते संख्याविशेषस्यानिरुक्ता संख्या विंशतिसंख्या द्रष्टव्या । सा च विंशतिरेकयाधिकया सह वर्तत इति सैका । तत्रादौ चतस्र ऋचोऽश्विदेवताकाः । पंचमीमारभ्याष्टम्यंताश्चतस्रः सवितृदेवताकाः । नवमी दशमी चोभे अग्निदेवताके । एकादश्या ऋचो देवसंबंधिन्यो देव्यो देवताः । द्वादश्या इंद्रवरुणाग्निपत्न्य इंद्राणीवरुणान्यग्नाय्यो देवताः । त्रयोदशीचतुर्दश्यौ द्यावापृथिवीदेवताके । पंचदशी पार्थिवी पृथिवीदेवीदेवताका । षोडशीमारभ्यैकविंश्यंत्याः षड्विष्णुदेवताकाः । अतो देवा इत्येतस्याः षोडश्यास्तु कृत्स्ना देवा विष्णुर्वा विकल्पेन देवता । अत्र सूक्तविनियोगो लैंगिकः । प्रातरनुवाक आश्विने क्रतौ प्रातर्युजा विबोधयेति चतस्र ऋचः । सूचितं च । अथाश्विन एषो उषाः प्रातर्युजेति चतस्रः । आ० ४. १५. । इति । आश्विनग्रहस्य प्रातर्युजेत्येका पुरोनुवाक्या द्विदेवत्यैश्चरंतीति खंडे सूचितं । आश्विनस्य प्रातर्युजा विबोधय । आ० ५. ५. । इति । तत्र प्रथमामृचमाह ॥

प्रातर्युजा वि बोधयाश्विनावेह गच्छतां । अस्य सोमस्य पीतये ॥ १ ॥

प्रातःऽयुजा । वि । बोधय । अश्विनौ । आ । इह । गच्छतां । अस्य । सोमस्य ।
पीतये ॥ १ ॥

अत्र होताध्वर्युमुद्दिश्य ब्रूते । हे अध्वर्यो प्रातर्युजा प्रातःसवनग्रहेण संयुक्तावश्विनौ देवौ विबोधय । विशेषेण प्रबुद्धौ कुरु । अश्विनौ प्रबुद्धौ चाश्विनौ देवावस्याभिषवसंस्कारयुक्तस्य सोमस्य पीतये पानायेह कर्मण्यागच्छतां ॥ प्रातर्युजाते गृह्यमाणेन ग्रहेण सहेति प्रातर्युजा । सत्सूद्विषेत्यादिना क्विप् । सुपां सुलुगित्याकारः । कृदुत्तरपदप्रकृतिस्वरत्वं । अस्य । ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । पीतये । व्यत्ययेन क्तिन उदात्तत्वं ॥

द्वितीयामृचमाह ॥

या सुरथा रथीतमोभा देवा दिविस्पृशा । अश्विना ता हवामहे ॥ २ ॥

या । सुऽरथा । रथिऽतमा । उभा । देवा । दिविऽस्पृशा । अश्विना । ता ।
हवामहे ॥ २ ॥

योभाश्विना देवा यावुभावश्विनौ देवौ सुरथा शोभनरथयुक्तौ रथीतमा

रथीनां मध्येऽतिशयेन रथिनौ। दिविस्पृशा द्युलोकनिवासिनौ। ता हवामहे। तादृशावश्विनावाह्वयामहे ॥ येत्यादिष्वष्टसु पदेषु सुपां सुलुगिति द्विवचनस्याकारः। सुरथा। शोभनो रथो ययोस्तौ सुरथौ। समासांतोदात्तत्वापवादं बहुव्रीहौ पूर्वपदप्रकृतिस्वरं बाधित्वा नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वे प्राप्त आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं। रथीतमा। अन्येषामपि दृश्यत इति संहितायामिकारस्य दीर्घत्वं। दिविस्पृशा। दिवि स्पृशत इति दिविस्पृशौ। क्विप् चेति क्विप्। तत्पुरुषे कृति बहुलमित्यलुक्। गतिकारकोपपदात्कृदिति कृदुत्तरपदप्रकृतिस्वरत्वं ॥

तृतीयामृचमाह ॥

या वां कशा मधुमत्यश्विना सूनृतावती। तया यज्ञं मिमिक्षतं ॥ ३ ॥

या। वां। कशा। मधुऽमती। अश्विना। सूनृताऽवती। तया। यज्ञं। मिमिक्षतं ॥ ३ ॥

अश्विना हे अश्विनौ देवौ वां युवयोः संबंधिनी या कशाश्वताडनी विद्यते तया सहागत्य यज्ञमस्मदीयं मिमिक्षतं। सोमरसेन सेक्तुमिच्छतं। कशयाश्वान्दृढं ताडयित्वा सहसा समागत्य भवद्विषयां सोमरसाहुतिं निष्पादयितुमुद्युक्तौ भवतमित्यर्थः। कीदृशी कशा। मधुमती। अर्णः क्षोद इत्यादिष्वेकशतसंख्याकेषूदकनामसु मधु पुरीषमिति पठितं। तस्मादुदकवतीत्युक्तं भवति। अश्वस्य शीघ्रगत्या यत्स्वेदोदकं भवति तेनेयं कशा क्लिन्नेत्यर्थः। सूनृतावती। प्रियसत्यवाग्युक्ता तीव्रेण कशाताडनेन यो ध्वनिर्निष्पद्यते। ताडनवेलायामश्वारूढेन च य आक्रोशः क्रियते। तदुभयं शीघ्रगमनहेतुत्वेन यजमानस्य च प्रियं। यद्वा। श्लोको धारेत्यादिषु सप्तपंचाशद्वाङ्नामसु कशा धिषणेति पठितं। अश्विनोर्या वाक् मधुमती माधुर्योपेता पारुष्यरहिता सूनृतवती प्रियत्वसत्यत्वोपेता फलप्रदानविषयेत्यर्थः। तया वाचा युक्तौ यज्ञं मिमिक्षतमिति योजनीयं ॥ कशा। कश गतिशासनयोः। पचाद्यच्। वृषादित्वादाद्युदात्तः। सूनृतवती। ऊन परिहाणे। सुष्ठूनयत्यप्रियमिति सून्। तथाविधमृतं सत्यं यस्यां वाचि सा सूनृता। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं बाधित्वा परादिश्छंदसि बहुलमिति ऋकार उदात्तः। सा यस्या अस्ति सा कशा सूनृतवतीति कशायाः संज्ञा। एवंनामा कशेत्यर्थः। संज्ञायां। पा० ८. २. ११.। इति मतुपो वत्वं। मिमिक्षतं। मिहः सन्। हलंताच्चेति किल्त्वाद्गुणाभावः। ढत्वकत्वषत्वानि ॥

चतुर्थीमृचमाह ॥

नहि वामस्ति दूरके यत्रा रथेन गच्छथः । अश्विना सोमिनो गृहं ॥ ४ ॥

नहि । वां । अस्ति । दूरके । यत्र । रथेन । गच्छथः । अश्विना । सोमिनः । गृहं ॥ ४ ॥

अश्विना हे अश्विनौ देवौ युवां सोमिनः सोमवतो यजमानस्य गृहं प्रति रथेन गच्छथः । स मार्गो वां युवयोर्दूरके दूरदेशे नह्यस्ति । न वर्तते खलु । यद्वा । यत्र गृहे गच्छथस्तच्च गृहं दूरे न भवति ॥ नहि । एवमादीनामंत इत्यंतोदात्तः । अस्ति । चादिलोपे विभाषेति निघाताभावः । अत्र हि गृहं दूरे च नास्ति युवां च रथेन गच्छथ इति समुच्चयश्चार्थो गम्यते । चशब्दो न प्रयुज्यत इति चलोपे प्रथमा तिङ्विभक्तिरस्तीति । यत्र । निपातस्य चेति संहितायां दीर्घत्वं । गच्छथः । इयं यद्यपि न प्रथमा तथापि यत्रेति यद्वृत्तयोगान्न निघातः ॥

व्यूढस्य द्वितीये छंदोमे वैश्वदेवशस्त्रे हिरण्यपाणिमूतय इति सावित्र्यश्चतस्रः । द्वितीयस्येति खंडे सूत्रितं । हिरण्यपाणिमूतय इति चतस्रो मही द्यौः पृथिवी च नः । आ० ८. १०. । इति । तत्र प्रथमां सूक्ते पंचमीमृचमाह ॥

हिरण्यपाणिमूतये सवितारमुप ह्वये । स चेत्ता देवता पदं ॥ ५ ॥

हिरण्यऽपाणिं । ऊतये । सवितारं । उप । ह्वये । सः । चेत्ता । देवता । पदं ॥ ५ ॥

ऊतयेऽस्मद्रक्षणार्थं सवितारं देवमुपह्वये । आह्वयामि । स च सविता देव एतन्मंत्रप्रतिपाद्यदेवता भूत्वा पदं यजमानेन प्राप्यं स्थानं चेत्ता । ज्ञापयिता भवति । कीदृशं सवितारं । हिरण्यपाणिं । यजमानाय दातुं हस्ते सुवर्णधारिणं । यद्वा । देवकर्तृके यागे सविता स्वयमृत्विग्भूत्वा ब्रह्मत्वेनावस्थितः । तदानीं कस्यांचिदिष्टावध्वर्यवस्तस्मै सवित्रे ब्रह्मणे प्राशित्रनामकं पुरोडाशभागं दत्तवंतः । तच्च प्राशित्रं हस्ते सवित्रा गृहीतं सत्तदीयपाणिं चिच्छेद । ततः प्राशित्रस्य दातारोऽध्वर्यवः सुवर्णमयं पाणिं निर्माय प्रक्षिप्तवंतः । सोऽयमर्थः कौशीतकीब्राह्मणे समाम्नातः । सवित्रे प्राशित्रं प्रतिजहुस्तत्तस्य पाणी चिच्छेद तस्मै हिरण्मयौ प्रतिदधुस्तस्माद्धिरण्यपाणिरिति स्तुत इति । हिरण्यशब्दं पाणिशब्दं च यास्क एवं निर्वक्ति । हिरण्यं कस्माद्ध्रियत आयम्यमानमिति वा ह्रियते

जनाज्जनमिति वा हितरमणं भवतीति वा हृदयरमणं भवतीति वा हर्यतेर्वा स्यात्प्रेप्साकर्मणः । नि० २. १०. । इति । तथा पाणिः । पणायतेः पूजाकर्मणः । नि० २. २६. । इति । हिरण्यशब्दो नब्विषयत्वादाद्युदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । ऊतये । उदात्त इत्यनुवृत्तावूतियूतिजूतिसातीत्यादिना क्तिनंतोऽंतोदात्तो निपातितः । सवितारं । तृचश्चित्त्वादंतोदात्तत्वं । चेत्ता । चिती संज्ञाने । अस्मादंतर्भावितण्यर्थात्ताच्छील्ये तृन् । अनित्यमागमशासनमितीडभावः । नित्त्वादाद्युदात्तः । देवता । देवात्तल् । पा० ५. ४. २७. । इति स्वार्थे तल् । लितीति प्रत्ययात्पूर्वमुदात्तं । पदशब्दः पचाद्यजंतः । चित इत्यंतोदात्तः ॥

॥ इति प्रथमस्य द्वितीये चतुर्थो वर्गः ॥

सूक्ते षष्ठीमृचमाह ॥

अपां नपातमवसे सवितारमुप स्तुहि । तस्य व्रतान्युश्मसि ॥ ६ ॥

अपां । नपातं । अवसे । सवितारं । उप । स्तुहि । तस्य । व्रतानि । उश्मसि ॥ ६ ॥

अत्र होता सामगमृत्विजमन्यं वा शस्त्रिणं ब्रूते । अवसेऽस्मान्रक्षितुं सवितारमुपस्तुहि । तस्य सवितुः संबंधीनि व्रतानि कर्माणि सोमयागादिरूपाण्युश्मसि । कामयामहे । कीदृशं सवितारं । अपां नपातं । जलस्य न पालकं । संतापेन शोषकमित्यर्थः ॥ अपां । ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । नपातं । पा रक्षणे । अस्य शत्रंतः पाच्छब्दः । तस्य नञा समासे नभ्राण्नपादित्यादिना नलोपप्रतिषेध इति वृत्तिकरः । अग्निर्ह्यपो न पाति तच्छोषकत्वात् । तर्हि कथमपामिति षष्ठी । न लोकाव्ययनिष्ठाखलर्थतॄनां । पा० २. ३. ६९. । कर्मणि षष्ठ्याः प्रतिषेधादिति चेत् । तर्ह्येषा शेषलक्षणास्तु । अग्न्यादित्यावपां करणतया संबंधिनावग्नेराप इति श्रुतेः । आदित्याज्जायते वृष्टिरिति स्मृतेश्च । अस्मिन्पक्ष उगिदचामिति नुमभावोऽपि निपातनादेवेति मंतव्यं । पातेः क्विबंतस्य तुग्वा निपातनाद्द्रष्टव्यः । अथवा न पातयतीति नपात् । पत्लृ गताविति धातोर्ण्यंतात्क्विप् । अग्न्यादित्यौ ह्यपां न प्रापकौ प्रत्युत तच्छोषकौ । अव्ययपूर्वपदप्रकृतिस्वरत्वं । अवसे । तुमर्थे सेसेनित्यादिना असेन् । नित्त्वादाद्युदात्तः । उश्मसि । वश कांतौ । अदिप्रभृतिभ्य इति शपो लुक् । इदंतो मसिरितीकारोपजनः ॥

सप्तमीमृचमाह ॥

विभक्तारं हवामहे वसोश्चित्रस्य राधसः । सवितारं नृचक्षसं ॥ ७ ॥

विऽभक्तारं । हवामहे । वसोः । चित्रस्य । राधसः । सवितारं । नृऽचक्षसं ॥ ७ ॥

वसोर्निवासहेतोश्चित्रस्य सुवर्णरजतादिरूपेण बहुविधस्य राधसो धनस्य विभक्तारं । अस्य यजमानस्यैतावद्धनदानमुचितमिति विभागकारिणं । नृचक्षसं । मनुष्याणां प्रकाशकारिणं सवितारं हवामहे ॥ कौशीतकिन एतस्या ऋचो व्याख्यानरूपे ब्राह्मणे सवितुर्विभागहेतुत्वमेव समामनंति । यदेतद्वसोश्चित्रं राधस्तदेष सविता विभक्ताभ्यः प्रजाभ्यो विभजतीति ॥ विभक्तारं । तृचश्चित्त्वादंतोदात्तत्वं । कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते । हवामहे । ह्वयतेर्बहुलं छंदसीति संप्रसारणं । वसोः । वस निवासे । शृस्वृस्निहीत्यादिना उः । निदित्यनुवृत्तेर्नित्त्वादाद्युदात्तः । राधसः । असुनंतो नित्त्वादाद्युदात्तः । नृचक्षसं । नॄंश्चष्ट इति नृचक्षाः । तं नृचक्षसं । चक्षेर्बहुलं शिच्च । उ० ४. २३२. । इत्यसुन् । शित्त्वादनार्धधातुकत्वेन ख्याञादेशाभावः । कृदुत्तरपदप्रकृतिस्वरत्वं ॥

अष्टमीमृचमाह ॥

सखाय आ नि षीदत सविता स्तोम्यो नु नः । दाता राधांसि शुंभति ॥ ८ ॥

सखायः । आ । नि । सीदत । सविता । स्तोम्यः । नु । नः । दाता । राधांसि । शुंभति ॥ ८ ॥

सखिभूता हे ऋत्विजः । आनिषीदत । सर्वत्रोपविशत । नोऽस्माकमयं सविता नु क्षिप्रं स्तोम्यः स्तुतियोग्यः । राधांसि धनानि दाता प्रदातुमुद्युक्तः । एष सविता शुंभति । शोभते ॥ समानाः संतः ख्यांति प्रकाशंत इति सखायः । ख्या प्रकथने । समाने ख्यश्चोदात्तः । उ० ४. १३८. । इतीण्प्रत्ययः । तत्संनियोगेन डित्त्वं यलोपश्च । डित्त्वादाकारलोपः । समानस्य छंदसीत्यादिना समानशब्दस्य सादेशः । इण्संनियोगेनोदात्तत्वं च । जसि सख्युरसंबुद्धाविति णित्त्वाद्वृद्धिरायादेशः । निषीदत । सदेरप्रतेः । पा० ८. ३. ६६. । इति षत्वं । स्तोमेषु प्रतिपाद्यत्वेन भवः स्तोम्यः । भवे छंदसीति यत् । यतोऽनाव इत्याद्युदात्तत्वं । दाता । दानशीलः । ताच्छील्ये तृन् । नित्त्वादाद्युदात्तः । राधांसि । गतं । कर्तृकर्मणोः कृतीति प्राप्तायाः षष्ठ्या न लोकाव्ययेति प्रतिषेधः ॥

अग्निष्टोमे प्रातःसवनेऽग्ने पत्नीरिहावहेति नेष्टुः प्रस्थितयाज्यप्रशास्ता। ब्राह्मणाच्छंसीति खंडे सूचितं। अग्ने पत्नीरिहावहोक्षां नाय वशां नायेति॥

तामेतां सूक्ते नवमीमृचमाह॥

अग्ने पत्नीरिहा वह देवानामुशतीरुप। त्वष्टारं सोमपीतये॥९॥

अग्ने। पत्नीः। इह। आ। वह। देवानां। उशतीः। उप। त्वष्टारं। सोमऽपीतये॥९॥

हे अग्ने उशतीः कामयमाना देवानां पत्नीरिंद्राण्याद्या इह देवयजनदेश आवह। तथा त्वष्टारं देवं सोमपीतये सोमपानार्थमुप समीप आवह॥ पत्नीः। इत्यंतः पतिशब्द आद्युदात्तः। पत्युर्नो यज्ञसंयोगे। पा॰ ४. १. ३३.। इति ङीप्। तत्संनियोगेन नकारश्च ङीपः पित्त्वाद्धृतिस्वर एव। उशतीः। वश कांतौ। लटः शतृ। अदिप्रभृतिभ्यः शप इति शपो लुक्। शतुर्ङित्त्वाद्ग्रहिज्यादिना संप्रसारणं। उगितश्चेति ङीप्। शतुरनुम इति ङीप् उदात्तः॥

दशमीमृचमाह॥

आ ग्ना अग्न इहावसे होत्रां यविष्ठ भारतीं। वरूत्रीं धिषणां वह॥१०॥

आ। ग्नाः। अग्ने। इह। अवसे। होत्रां। यविष्ठ। भारतीं। वरूत्रीं। धिषणां। वह॥१०॥

हे अग्ने। अवसेऽस्मानवितुं ग्ना देवपत्नीरिहावह। तथा हे यविष्ठ युवतमाग्ने होत्रां होमनिष्पादकाग्निपत्नीं भारतीं भरतनामकस्यादित्यस्य पत्नीं वरूत्रीं वरणीयां धिषणां वाग्देवीं चावह॥ वाग्वै धिषणेति वाजसनेयकं। भरत आदित्य इति यास्केनोक्तत्वात्तस्य पत्नी भारतीत्युच्यते। गम्यंत इति ग्नाः। गम्लृ सृप्लृ गतौ। औणादिको ड्नप्रत्ययः। डित्त्वाट्टिलोपः। प्रत्ययस्वरः। होत्रां। हुयामाश्रुभसिभ्यस्त्रन्। उ॰ ४. १६९.। इति त्रनतो नित्त्वादाद्युदात्तः। अतिशयेन युवा यविष्ठः। अतिशायने तमबिष्ठनौ। स्थूलदूरेत्यादिना यणादिपरस्य लोपः पूर्वस्य च गुणः। भारतीं। शार्ङ्गरवादेराकृतित्वात् ङीनंतो नित्त्वादाद्युदात्तः। वरूत्रीं। ग्रसितस्कभितेत्यादौ। पा॰ ७. २. ३४.। यद्यपि वरूतृशब्दस्तृजंत इत्युक्तं तथाप्यंत इतिकरणस्य प्रदर्शनार्थत्वाद्वरूतृशब्दस्तृनंतोऽपि द्रष्टव्यः। तेन नित्त्वादाद्युदात्तत्वं। शेषनिघातेन ऋकारस्यानुदात्तत्वादुदात्तयणो हल्पूर्वादित्यपि

न ङीप उदात्तत्वं । धिषणां । क्युप्रत्ययानुवृत्तौ धृषेर्धिष् च संज्ञायां । उ० २. ८०. । इति क्युः ॥

॥ इति प्रथमस्य द्वितीये पंचमो वर्गः ॥

सूक्त एकादशीमृचमाह ॥

अभि नो देवीरवसा महः शर्मणा नृपत्नीः । अच्छिन्नपत्राः सचंतां ॥ ११ ॥

अभि । नः । देवीः । अवसा । महः । शर्मणा । नृऽपत्नीः । अच्छिन्नऽपत्राः । सचंतां ॥ ११ ॥

देवीर्देव्यो देवपत्न्योऽवसा रक्षणेन महो महता शर्मणा च सुखेन च सह नोऽस्मानभि सचंतां । आभिमुख्येन सेवंतां । कीदृश्यो देव्यः । नृपत्नीः । मनुष्याणां पालयित्र्यः । अच्छिन्नपत्राः । अच्छिन्नपक्षाः । न हि पक्षिरूपाणां देवपत्नीनां पक्षाः केनचिच्छिद्यंते ॥ देवीः । पुंयोगादाख्यायां । पा० ४. १. ४८. । इति ङीषंतः । प्रत्ययस्वरेणांतोदात्तः । दीर्घाज्जसि चेति प्रतिषेधस्य वा छंदसीति याज्ञिकस्योक्तेः पूर्वसवर्णदीर्घत्वं । अवसा । अव रक्षणे । असुन् । नित्त्वादाद्युदात्तः । महः । मह पूजायां । क्विप् । सुपां सुपो भवंतीति तृतीयैकवचनस्य ङसादेशः । सावेकाच इति विभक्तेरुदात्तत्वं । नृपत्नीः । समासांतोदात्तत्वे प्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । अच्छिन्नपत्राः । न छिन्नान्यच्छिन्नानि । अव्ययपूर्वपदप्रकृतिस्वरत्वं । अच्छिन्नानि पत्राणि यासां ताः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

द्वादशीमृचमाह ॥

इहेंद्राणीमुप ह्वये वरुणानीं स्वस्तये । अग्नायीं सोमपीतये ॥ १२ ॥

इह । इंद्राणीं । उप । ह्वये । वरुणानीं । स्वस्तये । अग्नायीं । सोमऽपीतये ॥ १२ ॥

इहास्मिन्कर्मणि स्वस्तयेऽस्माकमविनाशाय सोमपीतये सोमपानाय चेंद्रवरुणाग्नीनां पत्नीराह्वयामि ॥ इंद्राणी । वरुणानी । इंद्रवरुणेत्यादिना । पा० ४. १. ४९. । पुंयोगे ङीष्प्रत्यय आनुगागमश्च । प्रत्ययस्वरः । अग्नायी । वृषाकप्यग्निकुसितकुसिदानामुदात्तः । पा० ४. १. ३७. । इति ङीप् । तत्संनियोगेनैकारस्यैकार उदात्तः । सोमपीतये । असकृत्पूर्वोक्तं ॥

द्वितीये छंदोमे वैश्वदेवशस्त्रे मही द्यौः पृथिवी च न इति द्यावापृथिव्यो निविद्धानीयस्तृचः। द्वितीयस्याग्निं व इति खंडे सूचितं। मही द्यौः पृथिवी च नो युवाना पितरा पुनः। आ० ८. १०.। इति ॥ आग्रयणेष्टौ मही द्यौरित्येषा द्यावापृथिव्यैककपालस्यानुवाक्या। आग्रयणं ब्रीहिश्यामाकेति खंडे सूचितं। ये के च ज्मामहिनो अहिमाया मही द्यौः पृथिवी च नः। आ० २. ९.। इति ॥ अग्निमंथनेऽप्येषा विनियुक्ता। प्रातर्वैश्वदेव्यामिति खंडे सूचितं। अभि त्वा देव सवितर्मही द्यौः पृथिवी च नः। आ० २. १६.। इति ॥ विष्यंदमानं सान्नाय्यमनयैवाहवनीयदेशे निनयेत्। विध्यपराध इति खंडे तथैव सूचितं। विष्यंदमानं मही द्यौः पृथिवी च न इत्यंतःपरिधिदेशे निनयेयुः। आ० ३. १०.। इति ॥ आश्विनशस्त्रेऽप्येषा संस्थितेष्वाश्विनायेति खंडे सूचितं। मही द्यौः पृथिवी च नस्ते हि द्यावापृथिवी विश्वशंभुवा। आ० ६. ५.। इति ॥ तामेतां सूक्ते त्रयोदशीमृचमाह ॥

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां। पिपृतां नो भरीमभिः ॥ १३ ॥

मही। द्यौः। पृथिवी। च। नः। इमं। यज्ञं। मिमिक्षतां। पिपृतां। नः। भरीमऽभिः ॥ १३ ॥

मही महती द्यौर्द्युलोकदेवता पृथिवी भूमिदेवता च नोऽस्मदीयमिमं यज्ञं मिमिक्षतां। स्वकीयसारभूतेन रसेन मिमिक्षतां। सेक्तुमिच्छतां। तथा भरीमभिर्भरणैः पोषणैर्नोऽस्मान्पिपृतां। उभे देव्यौ पूरयतां ॥ मही। महच्छब्दादुगितश्चेति ङीप्। अच्छब्दलोपश्छांदसः। बृहन्महतोरुपसंख्यानमिति ङीप उदात्तत्वं ॥ द्यौः। दिव्शब्दः प्रातिपदिकस्वरेणांतोदात्तः। गोतो णित्। पा० ७. १. ९०.। इति ततः परस्य सोर्णिद्भावाद्भवंती वृद्धिरपि स्थानिवद्भावेनोदात्ता। पृथिवी। प्रथ प्रख्याने। प्रथेः षिवन्संप्रसारणं च। उ० १. १४९.। इति षिवन्प्रत्ययः। षिद्गौरादिभ्यश्च। पा० ४. १. ४१.। इति ङीष्। प्रत्ययस्वरः। मिमिक्षतां। मिह सेचने। सनि द्विर्भावहलादिशेषौ। ढत्वकत्वषत्वानि। पिपृतां। पृ पालनपूरणयोः। ह्रस्व इत्येके। शपः श्लुः। अर्तिपिपर्त्योश्च। पा० ७. ४. ७७.। इत्यभ्यासस्याकारस्य इकारः। तिङः प्रत्ययस्वरः। भरीमभिः। डुभृञ् धारणपोषणयोः। हृसृभृधृस्वृस्तृभ्य ईमन्नितीमन्। नित्त्वादाद्युदात्तः ॥

चतुर्दशीमृचमाह ॥

तयोरिद्घृतवत्पयो विप्रा रिहंति धीतिभिः । गंधर्वस्य ध्रुवे पदे ॥ १४ ॥

तयोः । इत् । घृतऽवत् । पयः । विप्राः । रिहंति । धीतिऽभिः । गंधर्वस्य । ध्रुवे । पदे ॥ १४ ॥

गंधर्वस्य ध्रुवं पदमंतरिक्षं । तथा च तापनीयशाखायां समाम्नायते । यक्षगंधर्वाप्सरोगणसेवितमंतरिक्षमिति । तेनांतरिक्षेणोपलक्षित आकाशे वर्तमानयोरिद्यावपृथिव्योरेव संबंधि पयो जलं घृतवद्घृतसदृशं विप्रा मेधाविनः प्राणिनो धीतिभिः कर्मभी रिहंति । लिहंति । यद्वा । घृतवद्घृतं सारं तेनोपेतं रिहंति ॥ लिहेर्व्यत्ययेन रेफः । गंधर्वस्य । धृञ् धारणे । गवि गं धृञो व इति वप्रत्ययः । तत्संनियोगेन गोशब्दस्य च गमादेशः ॥

स्योना पृथिवीत्येषा महानाम्नीव्रते भूमिस्पर्शने विनियुक्ता । एतद्विदं ब्रह्मचारिणमिति खंडे सूचितं । स्योना पृथिवि भवेति समाप्य । आ० ८. ४. । इति ॥ स्मार्ते हेमंतप्रत्यवरोहणेऽप्येषा जप्या । मार्गशीर्ष्या प्रत्यवरोहणमिति सूचितं । तस्मिन्नुपविश्य स्योना पृथिवि भवेति जपित्वा । आ० गृ० २. ३. । इति । तामेतां सूक्ते पंचदशीमृचमाह ॥

स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथः ॥ १५ ॥

स्योना । पृथिवि । भव । अनृक्षरा । निऽवेशनी । यच्छ । नः । शर्म । सऽप्रथः ॥ १५ ॥

हे पृथिवि स्योनत्वादिगुणयुक्ता भव । स्योनशब्दो विस्तीर्णवाची । तथा च वाजसनेयब्राह्मणे स्योनशब्दोपेतं कंचिन्मंत्रमुदाहृत्य व्याख्यातं । इंद्रस्योरुमाविश स्योन स्योनमिति विस्तीर्ण विस्तीर्णमित्येव तदाह । यद्वा । स्योनशब्दः सुखवाची । तथा च यास्कवाक्यमुदाहरिष्यते । अनृक्षरा । कंटकरहिता । निवेशनी । निवासस्थानभूता । सुप्रथो विस्तारयुक्तं शर्म शरणं नोऽस्मभ्यं यच्छ । हे पृथिवि देहि ॥ तामेतामृचमुदाहृत्य यास्क एवं व्याचष्टे । सुखा नः पृथिवि भवानृक्षरा निवेशन्यृक्षरः कंटक ऋच्छतेः कंटकः कंतपो वा कृंततेर्वा कंटतेर्वा स्याद्गतिकर्मण उद्गततमो भवति यच्छ नः शर्म शरणं सर्वतः पृथु । नि० ९. ३२. । इति ॥ स्योना । षिवु तंतुसंताने । सिवेष्टेर्यो च । उ० ३. ९. । इति नप्रत्ययः । टेश्च यो इत्यादेशः । प्रत्ययस्वरः । स्योना पृथिवीत्यनयोर्भवेत्याख्यातेनैवान्वयो न

परस्परं। अतोऽसामर्थ्येनैव परांगवद्भावाभावादोकारस्य नामंत्रिताद्युदात्तत्वं। अनृक्षरा। ऋषि गतौ। गच्छत्यंतरित्यृक्षरः कंटकः। तन्यृषिभ्यां क्सरन्। उ० ३. ७४.। षढोः कः सीति कत्वं। आदेशप्रत्यययोरिति षत्वं। नञा बहुव्रीहिः। तस्मान्नुडचि। पा० ६. ३. ७४.। इति नुडागमः। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। निविशत्यस्यामिति निवेशनी। करणाधिकरणयोश्चेति ल्युट्। लिटीति प्रत्ययात्पूर्वस्योदात्तत्वं। यच्छ। दाण् दाने। पाघ्रेत्यादिना यच्छादेशः। द्व्यचोऽतस्तिङ इति दीर्घः। सप्रथः। प्रथ प्रख्याने। असुन्। प्रथसा सह वर्तत इति तेन सहेति तुल्ययोगे। पा० २. २. २८.। इति समासः। वोपसर्जनस्य। पा० ६. ३. ८२.। इति सभावः। कृत्स्वरः॥

॥ इति प्रथमस्य द्वितीये षष्ठो वर्गः॥

प्रातःसवने सोमातिरेक एकं शस्त्रं शंसनीयं। अत्रातो देवा इत्याद्याः षडृचः सोमातिरेक इति खंडे सूचितं। महां इंद्रो य ओजसातो देवा अवंतु न इत्यैंद्रीभिर्वैष्णवीभिश्च। आ० ६. ७.। इति॥ आप्तोर्यामेऽच्छावाकातिरिक्तोक्थ्येऽप्येताः षडृचः स्तोत्रियानुरूपार्थाः। तथा च यस्य पशव इति खंडे सूचितं। अतो देवा अवंतु न इति स्तोत्रियानुरूपौ। आ० ९. ११.। इति॥ दर्शपूर्णमासयोः प्रायश्चित्तहोमेऽप्याद्या विनियुक्ता। तथैव वेदं पत्न्या इति खंडे सूचितं। अतो देवा अवंतु न इति द्वाभ्यां व्याहृतिभिश्च। आ० १. ११.। इति॥ याज्यानुवाक्ययोर्मध्ये लौकिकभाषणेऽतो देवा इत्येषा जप्या। सूचितं हि। आपद्यतो देवा अवंतु न इति जपेदिति॥ तामेतां सूक्ते षोडशीमृचमाह॥

अतो॑ दे॒वा अ॑वंतु नो॒ यतो॒ विष्णु॑र्विचक्र॒मे। पृ॒थि॒व्याः स॒प्त धाम॑भिः॥ १६॥

अतः॑। दे॒वाः। अ॒व॒न्तु॒। नः॒। यतः॑। विष्णुः॑। वि॒ऽच॒क्र॒मे। पृ॒थि॒व्याः। स॒प्त। धाम॑ऽभिः॥ १६॥

विष्णुः परमेश्वरः सप्त धामभिः सप्तभिर्गायत्र्यादिभिश्छंदोभिः साधनभूतैर्यतः पृथिव्या यस्माद्भूप्रदेशाद्विचक्रमे। विविधपादक्रमणं कृतवान्। अतोऽस्मात्पृथिवीप्रदेशान्नोऽस्मान्देवा अवंतु॥ विष्णोः पृथिव्यादिलोकेषु छंदोभिः साधनैर्जयं तैत्तिरीया आमनंति। विष्णुमुखा वै देवाश्छंदोभिरिमान् लोकाननपजय्यमभ्यजयन्निति विष्णोस्त्रिविक्रमावतारे पादत्रयक्रमणस्य पृथिव्यपादानं।

पृथिवीप्रदेशाद्रक्षणं नाम भूलोके वर्तमानानां पापनिवारणं ॥ अतः । एतच्छब्दात्पंचम्यास्तसिलिति तसिल् । एतदोऽश् । पा० ५. ३. ५.। इत्यशादेशः । लित्स्वरेणाकार उदात्तः । यतः । तसिलः प्राग्दिशो विभक्तिः । पा० ५. ३. १.। इति विभक्तिसंज्ञायां त्यदाद्यत्वं । लित्स्वरः । विष्णुः । विषेः किच्च । उ० ३. ३९.। इति नुप्रत्ययः । कित्त्वान्न गुणः । निदित्यनुवृत्तेराद्युदात्तत्वं । विचक्रमे । सुबित्यत्र योगविभागाद्विशब्दस्य समासः । समासांतोदात्तत्वं । यद्वृत्तयोगान्न निघातः । सप्त । सुपां सुलुगिति भिसो लुक् । धामभिः । दधातेरातो मनिन्निति मनिन् । नित्स्वरः ॥

वैष्णवोपांशुयाजस्येदं विष्णुरित्येषानुवाक्या । उक्ता देवता इति खंडे सूचितं । इदं विष्णुर्विचक्रमे त्रिर्देवः पृथिवीमेष एतां । आ० १. ६.। इति ॥ गार्हपत्याहवनीययोर्मध्ये श्वातिक्रमणेऽनयैव श्वपदेषु भस्म प्रक्षिपेत् । विध्यपराध इति खंडे सूचितं । भस्मना शुनः पदं प्रतिवपेदिदं विष्णुर्विचक्रमे । आ० ३. १०.। इति॥ आतिथ्यायां प्रधानस्य हविष एषैवानुवाक्या । अथातिथ्येक्रांतेति खंडे सूचितं । इदं विष्णुर्विचक्रमे तदस्य प्रियमभि पाथो अश्यां । आ० ४. ५.। इति ॥ उपसत्सु वैष्णवस्यैषैवानुवाक्या । अथोपसदिति खंडे सूचितं । गयस्फानो अमीवहेदं विष्णुर्विचक्रमे । आ० ४. ८.। इति ॥ तामेतां सूक्ते सप्तदशीमृचमाह ॥

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदं । समूळ्हमस्य पांसुरे ॥ १७ ॥

इदं । विष्णुः । वि । चक्रमे । त्रेधा । नि । दधे । पदं । संऽऊळ्हं । अस्य । पांसुरे ॥ १७ ॥

विष्णुस्त्रिविक्रमावतारधारीदं प्रतीयमानं सर्वं जगदुद्दिश्य विचक्रमे । विशेषेण क्रमणं कृतवान् । तदा त्रेधा त्रिभिः प्रकारैः पदं निदधे । स्वकीयं पादं प्रक्षिप्तवान् । अस्य विष्णोः पांसुरे धूलियुक्ते पादस्थाने समूढमिदं सर्वं जगत्सम्यगंतर्भूतं ॥ सेयमृग्यास्केनैवं व्याख्याता । विष्णुर्विशतेर्वा व्यश्नोतेर्वा । यदिदं किंच तद्विक्रमते विष्णुस्त्रेधा निधत्ते पदं त्रेधाभावाय पृथिव्यामंतरिक्षे दिवीति शाकपूणिः समारोहणे विष्णुपदे गयशिरसीत्यौर्णवाभः समूळ्हमस्य पांसुरेऽप्यायनेऽंतरिक्षे पदं न दृश्यतेऽपि वोपमार्थे स्यात्समूळ्हमस्य पांसुर इव पदं न दृश्यत इति पांसवः पादैः सूयंत इति वा पन्नाः शेरत इति वा पंसनीया भवंतीति वा । नि० १२. १९.। इति ॥ त्रेधा । एधाच्च । पा० ५. ३. ४६.। इत्येधाच्-

प्रत्ययः। चितोऽंतोदात्तः। समूळ्हं। वह प्रापणे। निष्ठेति क्तः। वचिस्वपीत्यादिना। पा० ६. १. १५.। संप्रसारणं। ढत्वधत्वष्टुत्वढलोपदीर्घत्वानि। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। अस्य। इदमोऽशादेश इत्यशनुदात्तः। प्रत्ययश्च सुप्स्वरेण। पांसुरे। नगपांसुपांडुभ्यश्चेति वक्तव्यं। पा० ५. २. १०७. २.। इति मत्वर्थीयो रप्रत्ययः। प्रत्ययस्वरः॥

उपसदि वैष्णवयागस्य प्रातःकाले याज्या सायंकालेऽनुवाक्या त्रीणि पदेत्येषा। सूत्रितं च। त्रीणि पदा विचक्रम इति स्विष्टकृदालुप्यते। आ० ४. ८.। इति॥ तामेतामष्टादशीमृचमाह॥

त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन्॥ १८॥

त्रीणि। पदा। वि। चक्रमे। विष्णुः। गोपाः। अदाभ्यः। अतः। धर्माणि। धारयन्॥ १८॥

अदाभ्यः केनापि हिंसितुमशक्यो गोपाः सर्वस्य जगतो रक्षको विष्णुः पृथिव्यादिस्थानेष्वत एतेषु त्रीणि पदानि विचक्रमे। किं कुर्वन्। धर्माण्यग्निहोत्रादीनि धारयन्। पोषयन्॥ पदा। सुपां सुलुगित्यादिना विभक्तेर्डादेशः। तस्य स्थानिवद्भावेनानुदात्तत्वे प्राप्त उदात्तनिवृत्तिस्वरेणोदात्तत्वं। गोपाः। गोपामृतस्येत्यत्रोक्तं। अदाभ्यः। दभेश्छंदसि ण्यत्। ऋहलोर्ण्यदिति ण्यत्। नञ्समासः। अव्ययपूर्वपदप्रकृतिस्वरत्वं। धारयन्। शपः पित्त्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वरेण णिच एव स्वरः शिष्यते॥

एकोनविंशीमृचमाह॥

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इंद्रस्य युज्यः सखा॥ १९॥

विष्णोः। कर्माणि। पश्यत। यतः। व्रतानि। पस्पशे। इंद्रस्य। युज्यः। सखा॥ १९॥

हे ऋत्विगादयः। विष्णोः कर्माणि पालनादीनि पश्यत। यतो यैः कर्मभिर्व्रतान्यग्निहोत्रादीनि पस्पशे। सर्वो यजमानः स्पृष्टवान्। विष्णोरनुग्रहादनुतिष्ठतीत्यर्थः। तादृशो विष्णुरिंद्रस्य युज्यो योज्योऽनुकूलः सखा भवति। विष्णोरिंद्रानुकूल्यं त्वष्टा हतपुत्र इत्यनुवाकेऽथ वै तर्हि विष्णुरित्यादिना प्रपंचेन तैत्तिरीया आमनंति॥ पस्पशे। स्पश बाधनस्पर्शनयोः। लिट्। द्विर्भावे

शर्पूर्वाः खयः । पा० ७. ४. ६१. । इति पकारः शिष्यते । सकारो लुप्यते । यद्वृत्त-योगादनिघातः । युज्यः । युजेर्बाहुलकात्क्यप् । कित्वाद्गुणाभावः । क्यपः पित्वा-दनुदात्तत्वं । धातुस्वरः ॥

विंशीमृचमाह ॥

तद्विष्णोः परमं पदं सदा पश्यंति सूरयः । दिवीव चक्षुराततं ॥ २० ॥

तत् । विष्णोः । परमं । पदं । सदा । पश्यंति । सूरयः । दिविऽइव । चक्षुः । आऽततं ॥ २० ॥

सूरयो विद्वांस ऋत्विगादयो विष्णोः संबंधि परममुत्कृष्टं तच्छास्त्रप्रसिद्धं पदं स्वर्गस्थानं शास्त्रदृष्ट्या सर्वदा पश्यंति । तत्र दृष्टांतः । दिवीव । आकाशे यथा-ततं सर्वतः प्रसृतं चक्षुर्निरोधाभावेन विशदं पश्यति तद्वत् ॥ सदा । सर्व-कान्येति । पा० ५. ३. १५. । दाप्रत्ययः । सर्वस्य सोऽन्यतरस्यां दि । पा० ५. ३. ६. । इति सर्वशब्दस्य सभावः । व्यत्ययेनाद्युदात्तत्वं । दिवि । ऊडिदमित्यादिना विभ-क्तेरुदात्तत्वं । इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेति तदेव शिष्यते । चक्षुः । नब्विषयस्येत्याद्युदात्तत्वं । आततं । तनोतेः कर्मणि क्तः । यस्य विभाषे-तीट्प्रतिषेधः । अनुदात्तोपदेशेत्यादिना नलोपः । कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते गतिरनंतर इति गतेरुदात्तत्वं ॥

एकविंशीमृचमाह ॥

तद्विप्रासो विपन्यवो जागृवांसः समिंधते । विष्णोर्यत्परमं पदं ॥ २१ ॥

तत् । विप्रासः । विपन्यवः । जागृऽवांसः । सं । इंधते । विष्णोः । यत् । परमं । पदं ॥ २१ ॥

पूर्वोक्तं विष्णोर्यत्परमं पदमस्ति तत्पदं विप्रासो मेधाविनः समिंधते । सम्यक् दीपयंति । कीदृशाः । विपन्यवः । विशेषेण स्तोतारः । जागृवांसः । शब्दार्थयोः प्रमादराहित्येन जागरूकाः ॥ विप्रासः । आज्जसेरसुक् । विपन्यवः । स्तुत्यर्थस्य पनेर्बाहुलक औणादिको युप्रत्ययः । तत्र प्रत्ययस्वरः । जागृवांसः । जागृ निद्राक्षये । लिटः क्वसुः । क्रादिनियमात्प्राप्तस्येटो वस्वेकाजाद्घसामिति नियमान्निवृत्तिः ॥

॥ इति प्रथमस्य द्वितीये सप्तमो वर्गः ॥

तीव्रा इति चतुर्विंशत्यृचं षष्ठं सूक्तं। अत्रेयमनुक्रमणिका। तीव्राश्चतुर्विंशतिर्वायव्यैकेंद्रवायव्यौ मैत्रावरुणमरुत्वतीयवैश्वदेवपौष्णास्तृचाः शेषा आप्योऽंत्याध्यर्द्धाग्नेय्यप्स्वंतः पुरउष्णिक् परानुष्टुप्तिस्रश्चांत्या एकविंशी प्रतिष्ठेति। ऋषिश्चान्यस्मादिति परिभाषयानुवर्तनान्मेधातिथिः काण्व ऋषिः। अप्स्वंतरित्येषा पुरउष्णिक्। प्रथमपादस्य द्वादशाक्षरेणाद्यश्चेत्पुरउष्णिगिति लक्षणसद्भावात्। अप्सु मे सोम इत्येषानुष्टुप्। इदमाप इत्याद्यास्तिस्रोऽनुष्टुभः। शिष्टा एकोनविंशतिसंख्याका ऋचो गायत्र्यः। आदौ गायत्रमिति परिभाषितत्वात्। आद्या वायुदेवताका। ततो द्वे ऋचाविंद्रवायूदेवताके। तत एकस्तृचो मित्रावरुणदेवत्यः। तत उत्तरतृचस्य मरुद्गणविशिष्टेंद्रो देवता। तत एकस्तृचो वैश्वदेवः। तदनंतरभावी पौष्णः। शिष्टा ऋचोऽब्देवताकाः। पयस्वानग्न इत्यर्द्धर्चयुक्ता सं माग्न इत्येषा त्वग्निदेवताका॥ सूक्तविनियोगो लिंगादवगंतव्यः। अभिप्लवषडहस्य द्वितीयेऽहनि प्रउगशस्त्रे वायव्यतृचस्य तीव्राः सोमास इत्येषा तृतीया। द्वितीयस्य चतुर्विंशेनेति खंडे सूचितं। तीव्राः सोमास आगहीत्येका। आ० ७. ६.। इति। पृष्ठ्यषडहेऽपि द्वितीयेऽहनि प्रउग एषा। तामेतां सूक्ते प्रथमामृचमाह॥

तीव्राः सोमास आ गह्याशीर्वंतः सुता इमे। वायो तान्प्रस्थितान्पिब॥ १॥

तीव्राः। सोमासः। आ। गहि। आशीःऽवंतः। सुताः। इमे। वायो इति। तान्।
प्रऽस्थितान्। पिब॥ १॥

हे वायो। इमे सोमास ऐंद्रवायवग्रहादिरूपाः सोमाः सुता अभिषुताः। ते च तीव्राः। प्रभूतत्वात्तर्पयितुं समर्थाः। आशीर्वंतः। आशिरयुक्ताः। अतस्त्वमागहि। अस्मिन्कर्मण्यागच्छ। प्रस्थितानुत्तरवेदिं प्रत्यानीतान्तान्सोमान्पिब॥ तीव्राः। तिज निशाने। रक् दीर्घत्वं जस्य व इति ऋज्रेंद्रेत्यत्र मनोरमा। सोमासः। अर्तिस्तुस्वित्यादिना मन्। नित्त्वादाद्युदात्तः। आज्जसेरसुक्। गहि। महद्भिरग्न आगहीत्यत्रोक्तं। आशीर्वंतः। शीञ् पाके। अपस्पृधेथामित्यादिसूत्रे। पा० ६.१.३६.। आङ्पूर्वस्य क्विपि शिरादेशो निपातितः। करणस्यापि श्रयणद्रव्यस्य स्वव्यापारे कर्तृत्वविवक्षया कर्तरि क्विप् न विरुध्यते। आशीरेषामस्तीत्याशीर्वंतः। छंदसीर इति वत्वं। वायो। आमंत्रिताद्युदात्तत्वं। प्रस्थितान्। प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वं बाधित्वा व्यत्ययेनाव्ययपूर्वपदप्रकृतिस्वरत्वं॥

पूर्वोक्त एव शस्त्र उभा देवा दिविस्पृशेति द्वे ऐंद्रवायवतृचस्य प्रथमाद्वितीये। तथा च द्वितीयस्येति खंडे सूचितं। उभा देवा दिविस्पृशेति द्वे। आ० ७. ६.। इति। तयोः प्रथमां सूक्ते द्वितीयामृचमाह ॥

उभा देवा दिविस्पृशेंद्रवायू हवामहे। अस्य सोमस्य पीतये ॥ २ ॥

उभा। देवा। दिविऽस्पृशा। इंद्रवायू इति। हवामहे। अस्य। सोमस्य। पीतये ॥ २ ॥

दिविस्पृशा द्युलोकवर्तिनावुभा देवा द्वौ देवाविंद्रवायू हवामहे। आह्वयामः। किमर्थं। अस्य सोमस्य पीतये। असकृद्व्याख्यातं ॥ उभा देवा। सुपां सुलुगित्याकारः। दिविस्पृशा। हृद्युभ्यां ङेरुपसंख्यानं। पा० ६. ३. ९. १.। इति सप्तम्या अलुक्। कृदुत्तरपदप्रकृतिस्वरत्वं। इंद्रवायू। इंद्रश्च वायुश्चेति द्वंद्वः। उभयत्र वायोः प्रतिषेधो वक्तव्यः। पा० ६. ३. २६. १.। इत्यानङो निषेधः। देवताद्वंद्वे चेति प्राप्तस्योभयपदप्रकृतिस्वरत्वस्य नोत्तरपदेऽनुदात्तादौ। पा० ६. २. १४२.। इति निषेधात्समासांतोदात्तत्वमेव शिष्यते। हवामहे। ह्वेञ् स्पर्द्धायां शब्दे च। बहुलं छंदसीति संप्रसारणं। संप्रसारणाच्चेति परपूर्वत्वं। शप्। गुणावादेशौ। शपः पित्त्वादनुदात्तत्वं। तिङश्च लसार्वधातुकस्वरेण पदस्याद्युदात्तत्वे प्राप्ते तिङ्ङतिङ इत्याष्टमिको निघातः। अस्य। ऊडिदमित्यादिना षष्ठ्या उदात्तत्वं। पीतये। पा पाने। स्थागापापचः। पा० ३. ३. ९५.। इति भावे क्तिन्। घुमास्थेतीत्वं। व्यत्ययेनांतोदात्तत्वं ॥

तृतीयामृचमाह ॥

इंद्रवायू मनोजुवा विप्रा हवंत ऊतये। सहस्राक्षा धियस्पती ॥ ३ ॥

इंद्रवायू इति। मनःऽजुवा। विप्राः। हवंते। ऊतये। सहस्रऽअक्षा। धियः। पती इति ॥ ३ ॥

विप्रा मेधाविन ऋत्विग्यजमाना ऊतये रक्षणार्थमिंद्रवायू हवंते। आह्वयंति। कीदृशौ। मनोजुवौ। मन इव वेगयुक्तौ। सहस्राक्षा। सहस्रनयनयुक्तौ। यद्यपींद्र एव सहस्राक्षस्तथापि छत्रिन्यायेन वायुरपि तथोच्यते। धियस्पती। कर्मणो बुद्धेर्वा पालकौ। मनोजुवा। जवतिर्गतिकर्मा। मनोवज्जवत इति मनोजुवा मन इव वेगयुक्तौ। कृदुत्तरपदप्रकृतिस्वरत्वं। सुपां सुलुगित्याकारः। विप्राः। औणादिको रन्। रन्प्रत्ययांत आद्युदात्तः। ऊतये। ऊतियूतीत्यादिना

क्तिन उदात्तत्वं । सहस्राक्षा । सहस्रमक्षीणि ययोस्तौ । बहुव्रीहौ सक्थ्यक्ष्णोः । पा० ५. ४. ११३. । इति षच्समासांतः । बहुव्रीहिस्वरे प्राप्ते समासांतप्रत्ययस्य सति शिष्टत्वाच्चित इत्यंतोदात्तत्वं । धियः । सावेकाच इति ङस उदात्तत्वं । षष्ठ्याः पतिपुत्रेति संहितायां विसर्जनीयस्य सकारः । पती । इत्यंत आद्युदात्तः ॥

चतुर्विंशकेऽहनि प्रातःसवने मैत्रावरुणशस्त्रे मित्रं वयं हवामह इति तृचः षळहस्तोत्रियः । चतुर्विंश इति खंडे सूत्रितं । आ नो मित्रावरुणा मित्रं वयं हवामहे । आ० ७. २. । इति ॥ अभिप्लवषडहेऽपि प्रातःसवने मैत्रावरुणस्यायं तृच आवापार्थः । अभिप्लवपृष्ठ्याहानीति खंडे सूत्रितं । परिशिष्टानावापानुद्धृत्य मित्रं वयं हवामहे । आ० ७. ५. । इति ॥ मैत्रावरुणस्य मित्रं वयं हवामह इत्येषा प्रातःसवने प्रस्थितयाज्या । प्रशास्ता ब्राह्मणाच्छंसीत्युपक्रम्येदं ते सौम्यं मधु मित्रं वयं हवामह इति सूत्रितं ॥ तामेतां सूक्ते चतुर्थीमृचमाह ॥

मित्रं वयं हवामहे वरुणं सोमपीतये । जज्ञाना पूतदक्षसा ॥ ४ ॥

मित्रं । वयं । हवामहे । वरुणं । सोमऽपीतये । जज्ञाना । पूतऽदक्षसा ॥ ४ ॥

वयमनुष्ठातारः सोमपीतये सोमपानार्थं मित्रं वरुणं चोभावाह्वयामः । कीदृशावुभौ । जज्ञाना । कर्मप्रदेशे प्रादुर्भवंतौ । पूतदक्षसा । शुद्धबलौ ॥ वरुणं । वृञ् वरणे । कृवृदारिभ्य उनन् । उ० ३. ५३. । नित्त्वादाद्युदात्तः । सोमपीतये । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं । जज्ञाना । जनी प्रादुर्भावे । छंदसि लिट् । पा० ३. २. १०५. । तस्य लिटः कानज्वा । पा० ३. २. १०६. । इति कानजादेशः । गमहनेत्यादिना । पा० ६. ४. ९८. । उपधालोपः । तस्याचः परस्मिन्निति स्थानिवद्भावाज्जनशब्दस्य द्विर्वचनं । स्तोः श्चुना श्चुः । पा० ८. ४. ४०. । इति नकारस्य ञकारः । चित इत्यंतोदात्तत्वं । पूर्ववदाकारः । पूतदक्षसा । पूञ् पवने । निष्ठेति क्तः । श्र्युकः किति । पा० ७. २. ११. । इतीट्प्रतिषेधः । पूतं दक्षो ययोस्तौ । बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वरत्वं ॥

पंचमीमृचमाह ॥

ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती । ता मित्रावरुणा हुवे ॥ ५ ॥

ऋतेन । यौ । ऋतऽवृधौ । ऋतस्य । ज्योतिषः । पती इति । ता । मित्रावरुणा । हुवे ॥ ५ ॥

यौ मित्रावरुणावृतेन सत्यवचनेन याजमानानुग्रहकारिणा ऋतावृधौ। ऋतमवश्यंभावितया सत्यं कर्मफलं तस्य वर्धकौ। ऋतस्य सत्यस्य प्रशस्तस्य ज्योतिषः प्रकाशस्य पती पालकौ। श्रुत्यंतरे मित्रावरुणयोरदितिपुत्रत्वेन श्रुतत्वाद्द्वादशादित्येष्वंतर्भूतत्वेन ज्योतिःपालकत्वं युक्तं। श्रुत्यंतरे चाष्टौ पुत्रासो अदितेरित्युपक्रम्य मित्रश्च वरुणश्चेत्यादिकमाम्नातं। ता मित्रावरुणा तथाविधौ मित्रावरुणौ हुवे। आह्वयामि ॥ ऋतावृधौ। वृधु वृद्धौ। क्विप् चेति क्विप्। अन्येषामपि दृश्यत इति दीर्घः। कृदुत्तरपदप्रकृतिस्वरत्वं। ज्योतिषः। द्युत दीप्तौ। द्युतेरिसिन्नादेश्च जः। उ० २. १०६.। इतीसिन्प्रत्ययः। नित्त्वादाद्युदात्तः। षष्ठ्याः पतिपुत्रेति संहितायां विसर्जनीयस्य सत्वं। मित्रावरुणा। देवताद्वंद्वे चेत्यानङ्। देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं। सुपां सुलुगिति पूर्वसवर्णदीर्घ आकारः। हुवे। ह्वेञ्। आत्मनेपदोत्तमपुरुषैकवचने संप्रसारणे परपूर्वत्वे च कृते बहुलं छंदसीति शपो लुक्। टेरेत्वं। गुणे प्राप्ते क्ङिति च। पा० १. १. ५.। इति प्रतिषेधः। उवङादेशः। तिङ्ङतिङ इति निघातः ॥

॥ इति प्रथमस्य द्वितीयेऽष्टमो वर्गः ॥

षष्ठीमृचमाह ॥

वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः। करतां नः सुराधसः ॥ ६ ॥

वरुणः। प्रऽअविता। भुवत्। मित्रः। विश्वाभिः। ऊतिऽभिः। करतां। नः।
सुऽराधसः ॥ ६ ॥

अयं वरुणोऽस्माकं प्राविता भुवत्। प्रकर्षेण रक्षको भवतु। मित्रश्च विश्वाभिरूतिभिः सर्वाभी रक्षाभिः प्राविता भुवत्। तावुभावपि नोऽस्मान्सुराधसः प्रभूतधनयुक्तान्करतां। कुरुतां ॥ अविता। तृचश्चित्त्वादंतोदात्तत्वं। प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते। भुवत्। भू सत्तायां। लेटस्तिप्। लेटोऽडाटावित्यडागमः। इतश्च लोप इतीकारलोपः। बहुलं छंदसीति शपो लुक्। गुणे प्राप्ते भूसुवोस्तिङि। पा० ७. ३. ८८.। इति प्रतिषेधः। उवङादेशः। तिङ्ङतिङ इति निघातः। विश्वाभिः। अशिप्रुषीत्यादिना क्वनंतो विश्वशब्द आद्युदात्तः। टाप्सुपोरनुदात्तत्वात्तदेव शिष्यते। ऊतिभिः। ऊतियूतीत्यादिना क्तिन्नुदात्तः। करतां। कृञ् करणे। भौवादिकः। लोटस्तस्। तसस्तां। कर्तरि

शप्। गुणो रपरत्वं। शपः पित्त्वादनुदात्तत्वं। तिङश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। सुराधसः। राध साध संसिद्धौ। राध्नोत्यनेनेति राधो धनं। शोभनं राधो येषां ते। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे प्राप्ते नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं प्राप्तं सोर्मनसी अलोमोषसी। पा० ६. २. ११७.। इत्युत्तरपदाद्युदात्तत्वेन बाध्यते ॥

सप्तमीमृचमाह ॥

मरुत्वंतं हवामह इंद्रमा सोमपीतये। सजूर्गणेन तृंपतु ॥ ७ ॥

मरुत्वंतं। हवामहे। इंद्रं। आ। सोमऽपीतये। सऽजूः। गणेन। तृंपतु ॥ ७ ॥

मरुत्वंतं मरुद्भिर्युक्तमिंद्रं सोमपीतये सोमपानाय हवामहे। आह्वयामः। स चेंद्रो गणेन मरुत्समूहेन सजूः सह तृंपतु। तृप्तो भवतु ॥ मरुत्वंतं। मरुतोऽस्य संतीति मरुत्वान्। झयः। पा० ८. २. १०.। इति मतुपो वत्वं। तसौ मत्वर्थे। पा० १. ४. १९.। इति भसंज्ञायां पदसंज्ञाया बाधितत्वाज्जश्त्वाभावः। मतुप्सुपौ पित्त्वादनुदात्तौ। ननु ह्रस्वनुड्भ्यां मतुप्। पा० ६. १. १७६.। इति मतुप उदात्तत्वेन भवितव्यं स्वरविधौ व्यंजनमविद्यमानवदिति तकारस्याविद्यमानवत्त्वेन ह्रस्वात्परत्वात्। न। ह्रस्वनुड्भ्यामित्यत्र नुड्ग्रहणसामर्थ्यादविद्यमानपरिभाषा नाश्रीयत इति वृत्तावुक्तं। अतो मरुच्छब्दस्य स्वर एव शिष्यते। सजूः। जुषी प्रीतिसेवनयोः। संपदादिलक्षणः क्विप्। समाना प्रीतिर्यस्येति बहुव्रीहिः। समानस्य छंदसीति सभावः। ससजुषो रुः। पा० ८. २. ६६.। इति रुत्वं। स र्वोरुपधायाः। पा० ८. २. ७६.। इत्युपधादीर्घः। बहुव्रीहिस्वरे प्राप्ते चिचक्रादीनां छंदसि। पा० ६. २. १९९. १.। इत्युत्तरपदांतोदात्तत्वं। तृंपतु। तृप तृंप तृप्तौ। तुदादिभ्यः शः। शे मुचादीनामिति नुमागमः ॥

अष्टमीमृचमाह ॥

इंद्रज्येष्ठा मरुद्गणा देवासः पूषरातयः। विश्वे मम श्रुता हवं ॥ ८ ॥

इंद्रऽज्येष्ठाः। मरुत्ऽगणाः। देवासः। पूषऽरातयः। विश्वे। मम। श्रुत। हवं ॥ ८ ॥

हे देवास इंद्रमरुद्रूपा विश्वे सर्वे यूयं मम हवमाह्वानं श्रुत। शृणुत। कीदृशाः। इंद्रज्येष्ठाः। इंद्रो ज्येष्ठो मुख्यो येषु ते तथाविधा मरुद्गणाः मरुत्समूहरूपाः। पूषरातयः। पूषाख्यो देवो रातिर्दाता येषामिंद्रमरुतां ते पूषरातयः ॥

इंद्रज्येष्ठाः । आमंत्रितायुदात्तत्वं । पादादित्वादनिघातः । मरुद्गणाः । विभाषितं विशेषवचने बहुवचनं । पा॰ ८. १. ७४. । इति पूर्वस्याविद्यमानवत्त्वादनिघातः । देवासः पूषरातयः । पूर्ववत् । श्रुत । श्रु श्रवणे । लोण्मध्यमबहुवचनं थ । तस्थस्थमिपां । पा॰ ३. ४. १०१. । इति तादेशः । व्यत्ययेन शप् । बहुलं छंदसीति शपो लुक् । सार्वधातुकार्धधातुकयोरिति गुणे प्राप्ते क्ङिति चेति प्रतिषेधः । द्व्यचोऽतस्तिङ इति दीर्घः । हवं । ह्वेञ् स्पर्द्धायां शब्दे च । भावेऽनुपसर्गस्येत्यप् । संप्रसारणं परपूर्वत्वं गुणावादेशौ । पित्त्वादनुदात्तत्वं । धातुस्वरः शिष्यते ॥

नवमीमृचमाह ॥

हत वृत्रं सुदानव इंद्रेण सहसा युजा । मा नो दुःशंस ईशत ॥ ९ ॥

हत । वृत्रं । सुऽदानवः । इंद्रेण । सहसा । युजा । मा । नः । दुःशंसः । ईशत ॥ ९ ॥

हे सुदानवः शोभनदानयुक्ता मरुद्गणाः सहसा बलवता युजा योग्येनेंद्रेण सह वृत्रं शत्रुं हत । नाशयत । दुःशंसो दुष्टेन शंसनेन कीर्तनेन युक्तो वृषो नोऽस्मान्प्रति मेशत । समर्थो मा भूत् ॥ हत । हन हिंसागत्योः । लोटस्थ । तस्य त । अदिप्रभृतिभ्यः शप इति शपो लुक् । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः । सुदानवः । डुदाञ् दाने । दाभाभ्यां नुः । उ॰ २. ३२. । इत्यौणादिको नुप्रत्ययः । प्रादिसमास आमंत्रितत्वान्निघातः । युजा । युजिर् योगे । ऋत्विगित्यादिना क्विन् । सावेकाच इति तृतीयैकवचनस्योदात्तत्वं । दुःशसः । ईषद्दुःसुष्विति खल् । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । ईशत । ईश ऐश्वर्ये । माङि लुङि प्राप्ते छंदसि लुङ्लङ्लिट इति व्यत्ययेन लङ् । तस्य बहुलं छंदसीति शपो लुगभावः । न माङ्योग इत्याडागमाभावः । तिङ्ङतिङ इति निघातः ॥

दशमीमृचमाह ॥

विश्वान्देवान्हवामहे मरुतः सोमपीतये । उग्रा हि पृश्निमातरः ॥ १० ॥

विश्वान् । देवान् । हवामहे । मरुतः । सोमऽपीतये । उग्राः । हि । पृश्निऽमातरः ॥ १० ॥

मरुतो मरुत्संज्ञकान्विश्वान्सर्वान्देवान्सोमपीतये हवामहे । सोमपानार्थमाह्वयामः । ते मरुत उग्राः शत्रुभिरसह्यबलाः । पृश्निमातरः पृश्निर्नानावर्णयुक्ताया

भूमेः पुत्राः । हिशब्दः प्रसिद्ध्यर्थः । सा च प्रसिद्धिः पृश्नेः पुत्रा इति मंत्रांतरादवगंतव्या ॥ पृश्निमातरः । पृश्निर्माता येषां ते । पृश्निशब्दो घृणिपृश्निरित्युणादावाद्युदात्तो निपातितः । उ० ४. ५३. । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य द्वितीये नवमो वर्गः ॥

एकादशीमृचमाह ॥

जयंतामिव तन्यतुर्मरुतामेति धृष्णुया । यच्छुभं याथना नरः ॥ ११ ॥

जयंतांऽइव । तन्यतुः । मरुतां । एति । धृष्णुऽया । यत् । शुभं । याथन । नरः ॥ ११ ॥

मरुतां देवानां तन्यतुः शब्दो धृष्णुया धार्ष्ट्ययुक्तः सन्नेति । गच्छति । केषामिव । जयतां विजययुक्तानां शूराणां भटानामिव । हे नरो नेतारो मरुतो यूयं यद्यदा शुभं शोभनं देवयजनं याथन । प्राप्नुथ । तदा त्वदीयः शब्दो गच्छतीति पूर्वत्रान्वयः ॥ तन्यतुः । तनु विस्तारे । ऋतन्यंजीत्यादिना । उ० ४. २. । यतुच्प्रत्ययः । धृष्णुया । ञिधृषा प्रागल्भ्ये । त्रसिगृधिधृषिक्षिपेः क्नुः । पा० ३. २. १४०. । सुपां सुलुगिति सोर्याचादेशः । चित्त्वादंतोदात्तः । याथन । तप्तनप्तनथनाश्चेति थनादेशः । यच्छब्दयोगान्निघाताभावः ॥

द्वादशीमृचमाह ॥

हस्काराद्विद्युतस्पर्यतो जाता अवंतु नः । मरुतो मृळयंतु नः ॥ १२ ॥

हस्कारात् । विऽद्युतः । परि । अतः । जाताः । अवंतु । नः । मरुतः । मृळयंतु । नः ॥ १२ ॥

हस्काराद्दीप्तिकराद्विद्युतो विशेषेण दीप्यमानात् । अतोऽतरिक्षात्परि जाताः सर्वत उत्पन्ना मरुतो नोऽस्मानवंतु । रक्षंतु । तथाविधा मरुतो नोऽस्मान्मृळयंतु । सुखयंतु ॥ हस्कारात् । हसे हसने । अत्र तु प्रकाशमात्रे वर्तते । अस्मात्संपदादिलक्षणः क्विप् । अस्मिन्नुपपदे डुकृञ् करण इत्यस्मात्कर्मण्यण् । पा० ३. २. १. । इत्यण्प्रत्ययः । तत्पुरुषे तुल्यार्थेत्यादिना पूर्वपदप्रकृतिस्वरत्वे प्राप्ते गतिकारकेत्यादिना कृदुत्तरपदप्रकृतिस्वरत्वं । अतः कृकमीत्यादिना । पा० ८. ३. ४६. । विसर्जनीयस्य सत्वं ॥

त्रयोदशीमृचमाह ॥

आ पूषन् चित्रबर्हिषमाघृणे धरुणं दिवः । आजा नष्टं यथा पशुं ॥ १३ ॥

आ । पूषन् । चित्रऽबर्हिषं । आघृणे । धरुणं । दिवः । आ । अज । नष्टं । यथा ।
पशुं ॥ १३ ॥

हे पूषन् चित्रबर्हिषं विचित्रैर्दर्भैर्युक्तं धरुणं यागस्य धारकं सोमं दिव आ द्युलोकादा हरेति शेषः । पूषा विशेष्यते । आघृणे । आगतदीप्तियुक्त । तत्र दृष्टांतः । हे अज गमनशील । यथा लोके नष्टं पशुं महारण्यादावन्वीक्ष्य कश्चिदाहरति तद्वत् ॥ आघृणे । घृ क्षरणदीप्त्योरित्यस्माद्धृणिपृश्निरिति निप्रत्ययो निपातितः । ऋवर्णाच्चेति वक्तव्यमिति णत्वं । प्रादिसमासः । आमंत्रिताद्युदात्तत्वं । धरुणं । धृञ् धारणे । अस्मात् ण्यंताद्धातोरर्जेर्णिलुक् च । उ० ३. ५८.। इति चकाराद्धृधातोरुनन्प्रत्ययः । व्यत्ययेन नित्स्वराभावे प्रत्ययस्वरः । दिवः । ऊडिदमित्यादिना षष्ठ्या उदात्तत्वं । अजा । अज गतिक्षेपणयोः ॥

चतुर्दशीमृचमाह ॥

पूषा राजानमाघृणिरपगूळ्हं गुहा हितं । अविंदच्चित्रबर्हिषं ॥ १४ ॥

पूषा । राजानं । आघृणिः । अपऽगूळ्हं । गुहा । हितं । अविंदत् । चित्रऽबर्हिषं ॥ १४ ॥

आघृणिः पूषा राजानं सोममविंदत् । अलभत । कीदृशं । अपगूळ्हं । अत्यंतगूढं । तत्र हेतुः । गुहा हितं । गुहासदृशे दुर्गमे द्युलोके स्थितं । तथा चित्रबर्हिषं ॥ अपगूळ्हं । गुहू संवरणे । निष्ठेति कर्मणि क्तः । हो ढ इति ढत्वं । झषस्तथोर्धोऽधः । पा० ८.२.४०.। इति धकारः । ष्टुत्वढलोपदीर्घाः । समासे गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । गुहा । सुपां सुलुगिति सप्तम्या लुक् । हितं । निष्ठायां दधातेर्हिः ॥

पंचदशीमृचमाह ॥

उतो स मह्यमिंदुभिः षड्युक्ताँ अनुसेषिधत् । गोभिर्यवं न चर्कृषत् ॥ १५ ॥

उतो इति । सः । मह्यं । इंदुऽभिः । षट् । युक्तान् । अनुऽसेसिधत् । गोभिः । यवं ।
न । चर्कृषत् ॥ १५ ॥

उतो। अपि च स पूषा मह्यं यजमानायेंदुभिर्यागहेतुभिः सोमैर्युक्तान् षड्वसंतादीनृतूननुसेषिधत्। अनुक्रमेण पुनः पुनर्नयन्वर्तत इति शेषः। तत्र दृष्टांतः। गोभिर्बलीवर्दैर्यवं न चर्कृषत्। नशब्द उपमार्थः। यथा यवमुद्दिश्य भूमिं प्रतिसंवत्सरं पुनः पुनः कृषति तद्वत्॥ मह्यं। ङयि च। पा० ६. १. २१२. इत्याद्युदात्तत्वं। इंदुभिः। उंदी क्लेदने। उंदेरिच्चादेः। उ० १. १२. इत्युप्रत्ययः। उकारस्येकारादेशश्च। निदित्यनुवृत्तेराद्युदात्तत्वं। युक्तान्। दीर्घादटि समानपाद इति संहितायां नकारस्य रुत्वं। आतोऽटि नित्यमिति सानुनासिक आकारः। अनुसेषिधत्। षिधु गत्यां। धातोरेकाचः। पा० ३. १. २२. इति यङ्। यङोऽचि च। पा० २. ४. ७४. इति तस्य लुक्। प्रत्ययलक्षणेन सन्यङोः। पा० ६. १. ९. इति द्विर्भावः। हलादिशेषः। गुणो यङ्लुकोः। पा० ७. ४. ८२. इत्यभ्यासस्य गुणः। इणकोः। पा० ८. ३. ५७. इति षत्वं। सनादित्वाद्धातुसंज्ञायां लटः शतृ। कर्तरि शप्। अदादिवच्चेति वचनात्तस्य लुक्। नाभ्यस्ताच्छतुः। पा० ७. १. ७८. इति नुम्प्रतिषेधः। प्रत्ययस्वरे प्राप्तेऽभ्यस्तानामादिरित्याद्युदात्तत्वं। गोभिः। सावेकाच इति भिस उदात्तत्वे प्राप्ते न गोश्वन्निति प्रतिषेधः। चर्कृषत्। कृष विलेखने। यङ्लुकि द्विर्भावः। हलादिशेषोरत्वचर्त्वानि। रुग्रिकौ च लुकि। पा० ७. ४. ९१. इत्यभ्यासस्य ऋगागमः। अस्माद्यङ्लुगंताल्लेटस्तिप्। इतश्च लोपः। लेटोऽडाटावित्यडागमः। अदिप्रभृतिभ्यः शप इति शपो लुक्। लघूपधगुणे प्राप्ते नाभ्यस्तस्याचि पिति। पा० ७. ३. ८७. इति निषेधः। तिङ्ङतिङ इति निघातः॥

॥ इति प्रथमस्य द्वितीये दशमो वर्गः॥

अग्नीषोमीय एकधनासूपानीतासु स्वयमनुगच्छन्नंबय इति द्वे अनुब्रूयात्। तृतीययापो देवीरित्यनयैकधनासु हविर्धानं प्रविष्टासु स्वयमनुप्रविशेत्। तथैव सूचितं। अंबयो यंत्यध्वभिरिति तिस्र उत्तमयानुप्रपद्येतेति। अस्मिंस्तृचे प्रथमां सूक्ते षोडशीमृचमाह॥

अंबयो यंत्यध्वभिर्जामयो अध्वरीयतां। पृंचतीर्मधुना पयः॥ १६॥

अंबयः। यंति। अध्वऽभिः। जामयः। अध्वरिऽयतां। पृंचतीः। मधुना। पयः॥ १६॥

अध्वरीयतामध्वरमात्मन इच्छतामस्माकमंबयो मातृस्थानीया आपः। तथा च कौशीतकिब्राह्मणे समाम्नायते। अंबयो यंत्यध्वभिरित्यापो वा अंबय इति।

ता आपोऽध्वभिर्देवयजनमार्गैर्यंति। गच्छंति। कीदृश्य आपः। जामयः। हितकारिण्यो बंधवः। तथा मधुना माधुर्यरसेन युक्तं पयः पृंचतीः। गवादिषु योजयंत्यः॥ अंबयः। रबि लबि अबि शब्दे। एतस्मादच इः। उ० ४. १४०। इति प्रकरणे बाहुलकादिः। प्रत्ययस्वरः। अध्वभिः। अदेर्ध च। उ० ४. ११७। इति क्वनिप्। पित्त्वात्प्रत्ययस्यानुदात्तत्वे धातुस्वरः। जामयः। जमु अदने। बाहुलकादिः। अध्वरीयतां। अध्वरशब्दात्सुप आत्मनः क्यजिति क्यच्। क्यचि चेतीत्वं। अपुत्रादीनामिति वक्तव्यमिति वचनान्न छंदस्यपुत्रस्येतीत्वनिषेधाभावः। सर्वे विधयश्छंदसि विकल्प्यंत इति कव्यध्वरपृतनस्य। पा० ७. ४. ३९। इत्यकारलोपोऽपि न भवति। क्यच्प्रत्ययांतधातोर्लटः शतृ। शपः पित्त्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वरेण तयोः क्यचा सहैकादेशः। एकादेश उदात्तेनोदात्त इत्यंतोदात्तत्वे सति शतुरनुमो नद्यजादी इति षष्ठ्या उदात्तत्वं। पृंचतीः। पृची संपर्के। लटः शतृ। रुधादिभ्यः श्नम्। श्नसोरल्लोपः। अनुस्वारपरसवर्णौ। उगितश्चेति ङीप्। वा छंदसीति पूर्वसवर्णदीर्घत्वं। शतुरनुम इति ङीप उदात्तत्वं॥

सप्तदशीमृचमाह॥

अमूर्या उप सूर्ये याभिर्वा सूर्यः सह। ता नो हिन्वंत्वध्वरं॥ १७॥

अमूः। याः। उप। सूर्ये। याभिः। वा। सूर्यः। सह। ताः। नः। हिन्वंतु। अध्वरं॥ १७॥

या अमूरापः सूर्ये उप समीपेनावस्थिताः। आपः सूर्ये समाहिता इति श्रुत्यंतरात्। वा। अथवा सूर्यो याभिरद्भिः सह वर्तते। पूर्वत्रापां प्राधान्यमुत्तरत्र सूर्यस्येति विशेषः। तास्तादृश्य आपो नोऽस्मदीयमध्वरं यागं हिन्वंतु। प्रीणयंतु॥ प्रक्रिया स्पष्टा। याभिः। सावेकाच इति विभक्त्युदात्तस्य न गोश्वन्साववर्णेति प्रतिषेधः॥

अष्टादशीमृचमाह॥

अपो देवीरुप ह्वये यत्र गावः पिबंति नः। सिंधुभ्यः कर्त्वं हविः॥ १८॥

अपः। देवीः। उप। ह्वये। यत्र। गावः। पिबंति। नः। सिंधुऽभ्यः। कर्त्वं। हविः॥ १८॥

नोऽस्मदीया गावो यत्र यास्वप्सु पिबंति। पानं कुर्वंति। ता अपो देवीरुपह्वये। आह्वयामि। सिंधुभ्यः स्यंदनशीलाभ्योऽद्भ्यो देवताभ्यो हविः कर्त्वं।

अस्माभिः कर्तव्यं ॥ अपः । ऊडिदमित्यादिना शस उदात्तत्वं । पिबंति । पाघ्रेत्यादिना पिबादेशः । शपः पित्त्वादनुदात्तत्वं । तिङश्च लसार्वधातुकस्वरेण धातुस्वरेणाद्युदात्तत्वं । निपातैर्यद्यदीत्यादिना निघाताभावः । कर्त्वं । डुकृञ् करणे । कृत्यार्थे तवैकेन्केन्यत्वनः । पा० ३. ४. १४. । इति कर्मणि त्वन्प्रत्ययः । गुणः । नित्स्वरेणाद्युदात्तत्वं ॥

एकोनविंशीमृचमाह ॥

अप्स्व१न्तरमृतमप्सु भेषजमपामुत प्रशस्तये । देवा भवत वाजिनः ॥ १९ ॥

अप्ऽसु । अंतः । अमृतं । अप्ऽसु । भेषजं । अपां । उत । प्रऽशस्तये । देवाः । भवत । वाजिनः ॥ १९ ॥

अप्सु जलेष्वंतर्मध्येऽमृतं पीयूषं वर्तते । तस्याब्विकारत्वात् । अमृतं वा आप इति श्रुत्यंतराच्च । तथैवाप्सु भेषजमौषधं वर्तते । क्षुद्रोगनिवर्तकस्यान्नस्याप्कार्यत्वात् । उत । अपि च तादृशीनामपां देवतानां प्रशस्तये प्रशंसार्थं हे देवा ऋत्विजादयो ब्राह्मणाः । एते वै देवाः प्रत्यक्षं यद्ब्राह्मणा इति श्रुत्यंतरात् । वाजिनो वेगवंतो भवत । शीघ्रं स्तुतिं कुरुतेत्यर्थः ॥ अप्सु । ऊडिदमित्यादिना सप्तम्या उदात्तत्वं । संहितायामुदात्तस्वरितयोर्यणः स्वरित इति स्वरितत्वं । अमृतं । नञो जरमरमित्रमृताः । पा० ६. २. ११६. । इत्युत्तरपदाद्युदात्तत्वं । प्रशस्तये । तादौ च निति । पा० ६. २. ५०. । इति गतेः प्रकृतिस्वरत्वं । भवत । आमंत्रितं पूर्वमविद्यमानवदिति पूर्वस्यामंत्रितस्याविद्यमानवत्त्वेन पादादित्वान्न निघातः ॥

कारीर्यामुत्तमस्याज्यभागस्याप्सु म इत्येषानुवाक्या । वर्षकामेष्टिरिति खंडेऽप्स्वग्ने सधिष्टवाप्सु मे सोमो अब्रवीत् । आ० २. १३. । इति सूचितं ॥ विंशीमृचमाह ॥

अप्सु मे सोमो अब्रवीदंतर्विश्वानि भेषजा ।
अग्निं च विश्वशंभुवमापश्च विश्वभेषजीः ॥ २० ॥

अप्ऽसु । मे । सोमः । अब्रवीत् । अंतः । विश्वानि । भेषजा ।
अग्निं । च । विश्वऽशंभुवं । आपः । च । विश्वऽभेषजीः ॥ २० ॥

अप्सु जलेष्वंतर्मध्ये विश्वानि भेषजा सर्वाण्यौषधानि संतीति मे मह्यं मंत्रदर्शिने मुनये सोमो देवोऽब्रवीत् । तथा विश्वशंभुवं सर्वस्य जगतः सुखकरमे-

तन्नामकं चाग्निं चाप्सु वर्तमानं सोमोऽब्रवीत् । तथा च तैत्तिरीयाः । अग्नेस्त्रयो ज्यायांस इत्यनुवाके सोऽपः प्राविशदित्यग्नेरप्सु प्रवेशमामनंति । लतागुल्मवृक्षमूलादीनामौषधानां वृष्टिजन्यत्वेन जलवर्तित्वं प्रसिद्धं । विश्वभेषजीः । विश्वानि भेषजानि यासु तथाविधा अपोऽप्यब्रवीत् ॥ भेषजा । सुपां सुलुगित्याकारः । विश्वशंभुवं । भवतेरंतर्भावितण्यर्थात् क्विप् । व्यत्ययेन पूर्वपदप्रकृतिस्वरत्वं । यद्वा । विश्वे सर्वेऽपि व्यापाराः सुखकरा यस्य । बहुव्रीहौ विश्वं संज्ञायां । पा० ६. २. १०६. । इति पूर्वपदांतोदात्तत्वं । आपः । कर्मणि शसि प्राप्ते व्यत्ययेन जस् । अप्तृन्नित्यादिनोपधादीर्घः । विश्वभेषजीः । विश्वशंभुरितिवत् ॥

॥ इति प्रथमस्य द्वितीय एकादशो वर्गः ॥

एकविंशीमृचमाह ॥

आपः पृणीत भेषजं वरूथं तन्वे३ मम । ज्योक् च सूर्यं दृशे ॥ २१ ॥

आपः । पृणीत । भेषजं । वरूथं । तन्वे । मम । ज्योक् । च । सूर्यं । दृशे ॥ २१ ॥

हे आपो मम तन्वे शरीरार्थं वरूथं रोगनिवारकं भेषजमौषधं पृणीत । पूरयत । किंच ज्योक् चिरं सूर्यं दृशे द्रष्टुं नीरोगा वयं शक्नुयामेति शेषः ॥ पृणीत । पृ पालनपूरणयोः । लोणमध्यमबहुवचनं । यस्य तस्थस्थमिपामिति तादेशः । क्र्यादिभ्यः श्ना । प्वादीनां ह्रस्व इति ह्रस्वः । ई हल्यघोरितीत्वं । ऋवर्णाच्चेति णत्वं । सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति तिङः स्वरः शिष्यते । आप इत्यस्यामंत्रितं पूर्वमविद्यमानवदित्यविद्यमानवत्त्वे पादादित्वान्निघाताभावः । वरूथं । वृञ् वरणे । जॄवृञ्भ्यामूथन् । उ० २. ६. । नित्त्वादाद्युदात्तः । तन्वे । ङिति ह्रस्वश्च । पा० १. ४. ६. । इति नदीसंज्ञा पाक्षिकीत्याडागमाभावः । उदात्तयणोर्हल्पूर्वादिति विभक्त्युदात्तत्वे प्राप्ते व्यत्ययेनोदात्तस्वरितयोरिति स्वरितत्वं । दृशे । दृशे विख्ये च । पा० ३. ४. ११. । इति तुमर्थे निपात्यते ॥

पशौ मार्जन इदमापः प्रवहतेत्येषा विनियुक्ता । हुतायां वपायामिति खंडे सूचितं । इदमापः प्रवहत । आ० ३. ५. । इति ॥ एषैवावभृथेष्टौ स्नाने विनियुक्ता । पत्नीसंयाजेष्वेति खंड इदमापः प्रवहत सुमित्र्या न आप ओषधयः संतु । आ० ६. १३. । इति सूचितं ॥ तामेतां सूक्ते द्वाविंशीमृचमाह ॥

इदमापः प्र वहत यत्किं च दुरितं मयि ।
यद्वाहमभिदुद्रोह यद्वा शेप उतानृतं ॥ २२ ॥
इदं । आपः । प्र । वहत । यत् । किं । च । दुःऽइतं । मयि ।
यत् । वा । अहं । अभिऽदुद्रोह । यत् । वा । शेपे । उत । अनृतं ॥ २२ ॥

मयि यजमाने यत्किंच दुरितमज्ञानान्निष्पन्नं । वा । अथवाहं यजमानोऽभिदुद्रोह । सर्वतो बुद्धिपूर्वकं द्रोहं कृतवानस्मि । वा । अथवा शेपे । साधुजनं शप्तवानस्मीति यदस्ति । उत । अपि चानृतमुक्तवानिति यदस्ति । तदिदं सर्वमपराधजातं प्रवहत । मत्तोऽपनीय प्रवाहेणान्यतो नयत ॥ मयि । मपर्यंतस्य त्वमावेकवचन इति मादेशे कृतेऽतो गुण इति पररूपे च सति योऽचीति दकारस्य यकारादेशः । एकादेशस्वरेण मकारात्परस्याकारस्योदात्तत्वं । दुद्रोह । द्रुह जिघांसायां । णलि गुणे द्विर्वचनह्रस्वहलादिशेषाः । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । यद्वृत्तयोगान्निघाताभावः । शेपे । शप आक्रोशे । लिटि व्यत्ययेन तङ् । उत्तमैकवचनमिट् । टेरेत्वं । अत एकहल्मध्ये । पा० ६. ४. १२०. । इत्येत्वाभ्यासलोपौ । प्रत्ययस्वरेणांतोदात्तत्वं । पूर्ववन्निघाताभावः ॥

पश्चावाहवनीयोपस्थान आपो अद्यान्वचारिषमित्येषा । मनोतायै संप्रेषित इति खंडे सूचितं । एत्योपतिष्ठंत आपो अद्यान्वचारिषं । आ० ३. ६. । इति । तामेतां सूक्ते त्रयोविंशीमृचमाह ॥

आपो अद्यान्वचारिषं रसेन समगस्महि ।
पयस्वानग्न आ गहि तं मा सं सृज वर्चसा ॥ २३ ॥
आपः । अद्य । अनु । अचारिषं । रसेन । सं । अगस्महि ।
पयस्वान् । अग्ने । आ । गहि । तं । मा । सं । सृज । वर्चसा ॥ २३ ॥

अद्यास्मिन्दिनेऽवभृथार्थमापोऽन्वचारिषं । जलान्यनुप्रविष्टोऽस्मि । प्रविश्य च रसेन जलसारेण समगस्महि । संगताः स्मः । हे अग्ने पयस्वान् जले वर्तमानत्वेन पयोयुक्तस्त्वमागहि । अस्मिन्कर्मण्यागच्छ । तं मा तादृशं स्नातं मां वर्चसा तेजसा संसृज । संयोजय ॥ आपः । कर्मणि शसि प्राप्ते व्यत्ययेन जस् । अचारिषं । चर गत्यर्थः । लुङि च्लेः सिच् । आर्धधातुकस्येड्वलादेः । पा० ७. २. ३५. ।

इतीट्। नेटि। पा० ७. २. ४.। इति वृद्धिप्रतिषेधे प्राप्ते तदपवादतयातो ल्रांतस्य। पा० ७. २. २.। इत्युपधाया वृद्धिः। अगस्महि। समो गमृच्छिभ्यां। पा० १. ३. २९.। इत्यात्मनेपदं। च्लेः सिच्। मंत्रे घसेत्यादिना च्लेर्लुगभावश्छांदसः। एकाच उपदेशेऽनुदात्तादितीट्प्रतिषेधः। वा गमः। पा० १. २. १३.। इति सिचः कित्त्वादनुदात्तोपदेशेत्यादिनानुनासिकलोपः। गहि। लोटि गमेः सिपो हिः। अपित्त्वेन ङित्त्वादनुदात्तोपदेशेत्यादिनानुनासिकलोपः। अतो हेरिति लुग्न भवति। असिद्धवदत्रा भादिति मलोपस्यासिद्धत्वात्॥

चतुर्विंशीमृचमाह॥

सं मा॑ग्ने॒ वर्च॑सा सृज॒ सं प्र॒जया॒ समायु॑षा।
वि॒द्युर्मे॑ अ॒स्य दे॒वा इंद्रो॑ वि॒द्यात्स॒ह ऋषि॑भिः॥ २४॥
सं। मा॒। अ॒ग्ने॒। वर्च॑सा। सृ॒ज॒। सं। प्र॒ऽजया॑। सं। आयु॑षा।
वि॒द्युः। मे॒। अ॒स्य॒। दे॒वाः। इंद्रः॑। वि॒द्या॒त्। स॒ह। ऋषि॑ऽभिः॥ २४॥

हे अग्ने वर्चःप्रजायुर्भिर्मां संयोजय। देवाः सोमपातारोऽस्य मे यजमानस्य विद्युः। अनुष्ठानं जानीयुः। किंच। इंद्रश्च ऋषिगणैः सह ममानुष्ठानं विद्यात्। जानीयात्॥ विद ज्ञाने। लिङि झेर्जुस्। पा० ३. ४. १०८.। यासुट्। लिङः सलोपः। पा० ७. २. ७९.। इति सकारलोपः। उस्यपदांतात्। पा० ६. १. ९६.। इति पररूपत्वं। यासुट उदात्तत्वेनैकादेश उकारोऽप्युदात्तः। अस्य। इदमोऽन्वादेश इत्यशनुदात्तः। विभक्तिरपि सुप्त्वेनानुदात्ता। सह ऋषिभिरित्यत्र ऋत्यकः। पा० ६. १. १२८.। इति प्रकृतिभावः॥

॥ इति प्रथमस्य द्वितीये द्वादशो वर्गः॥

॥ इति ऋक्संहितायां प्रथमे मंडले पंचमोऽनुवाकः॥

प्रथममंडलस्य षष्ठेऽनुवाके सप्त सूक्तानि। तत्र कस्य नूनमिति पंचदशर्चं प्रथमं सूक्तं। अजीगर्तपुत्रस्य शुनःशेपस्यार्षं। त्रैष्टुभं। अभि त्वा देवेति तृचो गायत्रः। आद्याया अनिरुक्तत्वात्प्रजापतिर्देवता। अग्नेर्वयमित्यस्याग्निः। अभि त्वा देवेत्यस्य तृचस्य सविता। भगभक्तस्येत्येषा भगदेवताका वा। शेषा वारुण्यः। तथा चानुक्रांतं। कस्य पंचोनाजिगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो

देवरातो वारुणं तु त्रैष्टुभमादौ काव्याग्नेय्यौ सावित्रस्तृचो गायत्रोऽस्यांता भागी वेति ॥ राजसूयेऽभिषेचनीयेऽहनि मरुत्वतीये परिसमाप्ते सत्येतदादिकं सूक्तसप्तकमभिषिक्तस्य पुत्रादिभिः परिवृतस्य राज्ञः पुरस्ताद्धोत्राख्यातव्यं । तथा च सूत्रेऽभिहितं । संस्थिते मरुत्वतीये दक्षिणत आहवनीयस्य हिरण्यकशिपावासीनोऽभिषिक्ताय पुत्रापत्यपरिवृताय राज्ञे शौनःशेपमाचक्षीत। आ॰ ९. ३.। इति। ब्राह्मणं च भवति। तदेतत्परऋक्शतगाथं शौनःशेपमाख्यानं तद्धोता राज्ञेऽभिषिक्तायाचष्टे हिरण्यकशिपावासीनः प्रतिगृणातीति॥ तस्मिन्सूक्ते प्रथमामृचमाह ॥

कस्य नूनं कतमस्यामृतानां मनामहे चारु देवस्य नाम ।
को नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं च ॥ १ ॥
कस्य । नूनं । कतमस्य । अमृतानां । मनामहे । चारु । देवस्य । नाम ।
कः । नः । मह्यै । अदितये । पुनः । दात् । पितरं । च । दृशेयं । मातरं । च ॥ १ ॥

कस्येत्यनयर्चा शुनःशेपो यूपे बद्धः कांदिशीकः कं देवमुपधावानीति विचिकित्सति । तथा चाम्नायते । हंताहं देवता उपधावानीति । स प्रजापतिमेव प्रथमं देवतानामुपससारेति । वयं शुनःशेपनामका अमृतानां देवतानां मध्ये कतमस्य किंजातीयस्य कस्य देवस्य चारु शोभनं नाम मनामहे। उच्चारयामः । को देवो मां मुमूर्षुं पुनरपि मह्यै महत्यै अदितये पृथिव्यै दात् । दद्यात् । तेन दानेनाहममृतः सन् पितरं मातरं च दृशेयं । पश्येयं । को ह वै नाम प्रजापतिरिति श्रुतेः कस्येति शब्दसामान्यादनया प्रजापतिरेवोपसृत इति गम्यते ॥ कतमस्य । किंशब्दाद्वा बहूनां जातिपरिप्रश्ने डतमच् । पा॰ ५. ३. ९३.। चित इत्यंतोदात्तत्वं । अमृतानां । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वे प्राप्ते नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं । मनामहे । मन ज्ञाने । व्यत्ययेन शप् । पादादित्वादनिघातः । मह्यै । उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं । दात् । गातिस्था । पा॰ २. ४. ७७.। इति सिचो लुक् । बहुलं छंदस्यमाङ्योगेऽपीत्यडागमाभावः । दृशेयं । दृशिर् प्रेक्षणे । आशीर्लिङि मिपोऽम् । दृशेरग्वक्तव्यः । पा॰ ३. १. ८६. ३.। इत्यक्प्रत्ययः । अतो येयः । आद्गुणः । यासुटः स्वरेणैकार उदात्तः । मातरं चेत्यत्र च शब्दाद्दृशेयमित्यनुषज्यते । अतस्तदपेक्षयैषा तिङ्विभक्तिः प्रथमेति चवायोगे प्रथमेति न निहन्यते ॥

द्वितीयामृचमाह ॥

अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारु देवस्य नाम ।
स नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं च ॥ २ ॥
अग्नेः । वयं । प्रथमस्य । अमृतानां । मनामहे । चारु । देवस्य । नाम ।
सः । नः । मह्यै । अदितये । पुनः । दात् । पितरं । च । दृशेयं । मातरं । च ॥ २ ॥

इत्थं प्रथमयर्चा विचिकित्सां कृत्वा प्रजापतेः सकाशात्तं देवमग्निं निश्चित्यानया तुष्टाव । तथा च श्रूयते । तं प्रजापतिरुवाचाग्निर्वै देवानां नेदिष्ठस्तमेवोपधावेति । सोऽग्निमुपससाराग्नेर्वयं प्रथमस्यामृतानामित्येतयर्चेति । पूर्ववद्योजना । दाद्दातु दृशेयं पश्यानीत्येवमाशीःपरत्वेन पदद्वयं योज्यं ॥

प्रथमे छंदोमे वैश्वदेवशस्त्र अभि त्वा देव सवितरिति सावित्रस्तृचः सूक्तस्थानीयः । अथ छंदोमा इति खंडेऽभि त्वा देव सवितः प्रेतां यज्ञस्य शंभुवा । आ० ८. ९. । इति सूचितं ॥ अभि त्वेत्येषाग्निमंथनेऽपि विनियुक्ता । प्रातर्वैश्वदेव्यामिति खंडेऽभि त्वा देव सवितर्मही द्यौः पृथिवी च नः । आ० २. १६. । इति सूचितं । श्रूयते च । अभि त्वा देव सवितरिति सावित्रीमन्वाहेति ॥ तथा प्रवर्ग्येऽप्येषा विनियुक्ता । अथोत्तरमिति खंडेऽभि त्वा देव सवितः शमी वत्सं न मातृभिः । आ० ४. ७. । इति सूचितं ॥ तथा ग्रावस्तोत्रेऽपि ग्रावस्तुदिति खंडे मध्यमस्वरेणेदं सवनमभि त्वा देव सवितः । आ० ५. १२. । इति सूचितं । तामेतां सूक्ते तृतीयामृचमाह ॥

अभि त्वा देव सवितरीशानं वार्याणां । सदावन्भागमीमहे ॥ ३ ॥
अभि । त्वा । देव । सवितः । ईशानं । वार्याणां । सदा । अवन् । भागं । ईमहे ॥ ३ ॥

अथाग्निना प्रेरितः सन्सवितारमभि त्वेत्यनेन तृचेन प्रार्थयते । तथैव श्रूयते । तमग्निरुवाच । सविता वै प्रसवानामीशे तमेवोपधावेति । स सवितारमुपससाराभि त्वा देव सवितरित्येतेन तृचेनेति । हे सदावन् सदा सर्वदा रक्षक हे सवितर्देव वार्याणां वरणीयानां धनानामीशानं स्वामिनं त्वां प्रति भागं भजनीयं धनमभि सर्वत ईमहे । याचामहे ॥ ईशानं । ईश ऐश्वर्ये । लटः शानच् । तास्यनुदात्तेदिति लसार्वधातकानुदात्तत्वे धातुस्वरः । वार्याणां । वृङ् संभक्तौ ।

ऋहलोर्ण्यत् । ईडवंदेत्यादिनाद्युदात्तत्वं । अवन् । आमंत्रितनिघातः । भागं । कर्षात्वत इति घञोऽंत उदात्तः ॥

चतुर्थीमृचमाह ॥

यश्चिद्धि त इत्था भगः शशमानः पुरा निदः । अद्वेषो हस्तयोर्दधे ॥ ४ ॥

यः । चित् । हि । ते । इत्था । भगः । शशमानः । पुरा । निदः । अद्वेषः । हस्तयोः । दधे ॥ ४ ॥

हे सवितर्यो भगो भजनीयो धनविशेषस्ते तव हस्तयोर्दधे । धृतोऽभूत्तं धनविशेषमीमह इति पूर्वत्रान्वयः । चिच्छब्दः पूजार्थे हिशब्दः प्रसिद्धौ । धनस्य पूज्यत्वं सर्वत्र प्रसिद्धं । तामेव पूज्यत्वप्रसिद्धिं विशदयति । इत्था शशमानः । अनेन प्रकारेण शश्यमानः । स्तूयमानः । धनस्तुतिप्रकारं च सर्वे जानंति । ननु स्वकीये धने वैरिभिरपहृते सति वैरिगृहीतं धनं सर्वो लोको निंदति द्वेष्टि च । अतो धनस्तुतिर्न नियतेत्याशंक्याह । निदः पुरा अद्वेषः । निंदायाः पूर्वं स्वकीयत्वेन व्यवस्थिते सति तदानीं द्वेषरहितः । तस्मात्स्वकीयत्वाभिप्रायेण स्तूयमानत्वमुक्तमित्यर्थः ॥ इत्था । प्रकारवचन इदमस्थमुः । पा॰ ५.३.२४. । सुपां सुलुगिति व्यत्ययेन विभक्तेर्डादेशः । टिलोप उदात्तनिवृत्तिस्वरेणाकार उदात्तः । शशमानः । शश प्लुतगतौ । इह तु स्तुत्यर्थः । ताच्छील्यवयोवचनेति । पा॰ ३. २. १२९. । ताच्छीलिकश्चानश् । कर्तरि शप् । चित इत्यंतोदात्तत्वं । निदः । णिदि कुत्सायां । संपदादिलक्षणः क्विप् । सावेकाच इति पंचम्या उदात्तत्वं । अद्वेषः । न विद्यते द्वेषोऽस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । दधे । कर्मणि लिट् । तस्यार्द्धधातुकत्वेनाभ्यस्तानामादिरित्याद्युदात्तो न भवति । प्रत्ययस्वर एव शिष्यते । यद्वृत्तयोगान्निघाताभावः ॥

पंचमीमृचमाह ॥

भगभक्तस्य ते वयमुदशेम तवावसा । मूर्द्धानं राय आरभे ॥ ५ ॥

भगऽभक्तस्य । ते । वयं । उत् । अशेम । तव । अवसा । मूर्द्धानं । रायः । आऽरभे ॥ ५ ॥

हे सवितः ते त्वदीया वयं शुनःशेपनामानः भगभक्तस्य धनेन संयुक्तस्य तवावसा रक्षणेनोदशेम । उत्कर्षेण व्याप्नुमः । किं कर्तुं । रायो धनस्य मूर्द्धानमुत्कर्षमारभे । प्रारब्धुं । धनिकत्वप्रसिद्ध्या व्याप्ता भूयामेत्यर्थः ॥ भगशब्दो वृषा-

दित्वादाद्युदात्तः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। अशेम। अशू व्याप्तौ। लिङ्। व्यत्ययेन परस्मैपदं। शप्। रायः। ऊडिदमिति षष्ठ्या उदात्तत्वं। आरभे। कृत्यार्थे तवैकेनिति तुमर्थे केन्प्रत्ययः। नित्स्वरेणाद्युदात्तत्वं॥

॥ इति प्रथमस्य द्वितीये त्रयोदशो वर्गः॥

षष्ठीमृचमाह॥

नहि ते॑ क्ष॒त्रं न सहो॒ न म॒न्युं वय॑श्च॒नामी प॒तय॑न्त आ॒पुः।

नेमा आपो॑ अनिमि॒षं चर॑न्ती॒र्न ये वात॑स्य प्र मि॒नन्त्यभ्व॑॥ ६॥

नहि। ते। क्ष॒त्रं। न। सहः॑। न। म॒न्युं। वयः॑। च॒न। अ॒मी इति॑। प॒तय॑न्तः। आ॒पुः।

न। इ॒माः। आपः॑। अ॒नि॒ऽमि॒षं। चर॑न्तीः। न। ये। वात॑स्य। प्र॒ऽमि॒नन्ति॑। अभ्व॑॥ ६॥

अथ सविता प्रेरितः शुनःशेप एतदादिसूक्तशेषेणोत्तरेण च सूक्तेन वरुणं तुष्टाव। तथा च श्रूयते। तं सवितोवाच। वरुणाय वै राज्ञे नियुक्तोऽसि तमेवोपधावेति स वरुणं राजानमुपससारात उत्तराभिरेकत्रिंशतेति। हे वरुण पतयंतः प्रौढे वियत्युत्पतंतोऽमी दृश्यमाना वयश्चन श्येनादयः पक्षिणोऽपि ते क्षत्रं त्वदीयं शरीरबलं न ह्यापुः। नैव प्राप्ताः। त्वत्सदृशं शरीरबलं पक्षिणामपि नास्तीत्यर्थः। तथा सहस्त्वदीयं पराक्रमं तव सामर्थ्यमपि न प्रापुः। तथा मन्युं त्वदीयं कोपमपि न प्रापुः। त्वयि क्रुद्धे सति सोढुमशक्ता इत्यर्थः। अनिमिषं सर्वदा चरंतीः प्रवाहरूपेण गच्छंत्य आपस्त्वदीयं बलं न प्रापुः। वातस्य वायोर्ये गतिविशेषास्त्वदीयमभ्वं वेगं न प्रमिनंति। न हिंसंति। अतिक्रमं कर्तुं न शक्ता इत्यर्थः। तेऽपि न प्रापुरिति पूर्वत्रान्वयः॥ पतयंतः। पत गतौ। चुरादिरदंतः। लटः शतृ। शप्। गुणायादेशौ। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे णिचः स्वरः। आपुः। आप्लृ व्याप्तौ। लिट्युसि द्विर्भावहलादिशेषौ। अत आदेः। पा० ७.४.७०। इत्यात्वं। अत्र न सहो न मन्युमित्यादिभिरापुरित्यस्य संबंधात्तदपेक्षया प्राथम्याच्चादिलोपे विभाषेति प्रथमा तिङ्विभक्तिर्न निहन्यते। चरंतीः। वा छंदसीति पूर्वसवर्णदीर्घः। प्रमिनंति। मीञ् हिंसायां। क्र्यादिभ्यः श्ना। श्नाभ्यस्तयोरातः। पा० ६.४.११२। इत्याकारलोपः। मीनातेर्निगमे। पा० ७.३.८१। इति ह्रस्वत्वं। प्रत्ययस्वरः। तिङि चोदात्तवति। पा० ८.१.७१। इति गतिरनुदात्तः। यद्वृत्तयोगादनिघातः॥

सप्तमीमृचमाह ॥

अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः ।
नीचीनाः स्थुरुपरि बुध्न एषामस्मे अंतर्निहिताः केतवः स्युः ॥ ७ ॥

अबुध्ने । राजा । वरुणः । वनस्य । ऊर्ध्वं । स्तूपं । ददते । पूतऽदक्षः ।
नीचीनाः । स्थुः । उपरि । बुध्नः । एषां । अस्मे इति । अंतः । निऽहिताः । केतवः ।
स्युरिति स्युः ॥ ७ ॥

पूतदक्षः शुद्धबलो वरुणो राजाबुध्ने मूलरहितेऽतरिक्षे तिष्ठन्वनस्य वननीयस्य तेजसः स्तूपं संघमूर्ध्वमुपरिदेशे ददते । धारयति । नीचीनाः स्थुः । ऊर्ध्वदेशे वर्तमानस्य वरुणस्य रश्मय इत्यध्याहार्यं । ते ह्यधोमुखास्तिष्ठंति । एषां रश्मीनां बुध्नो मूलमुपरि तिष्ठतीति शेषः । तथा सति केतवः प्रज्ञापकाः प्राणा अस्मेऽस्मास्वंतर्निहिताः स्थापिताः स्युः । मरणं न भविष्यतीत्यर्थः ॥ अबुध्ने । न विद्यते बुध्नो मूलमस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । स्तूपं । स्त्यै शब्दसंघातयोः । स्त्यः संप्रसारणमूङ् चेति पप्रत्ययः । तत्संनियोगेन यकारस्य संप्रसारणं परपूर्वत्व ऊकारादेशश्च । निदित्यनुवृत्तेराद्युदात्तत्वं । ददते । भौवादिकः । नीचीनाः । निपूर्वादंचतेर्ऋत्विगित्यादिना क्विन् । अनिदितामिति नलोपः । न्यच्शब्दात्स्वार्थे विभाषाञ्चेरदिक्स्त्रियां । पा॰ ५. ४. ८. । इति खः । आयन्नित्यादिना तस्येनादेशः । आयनादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति वचनादीकार उदात्तः । अच इत्यकारलोपे चाविति दीर्घत्वं । स्थुः । गातिस्थेत्यादिना । पा॰ २. ४. ७७. । सिचो लुक् । आतः । पा॰ ३. ४. ११०. । इति झेर्जुसादेशः । उस्यपदांतात् । पा॰ ६. १. ९६. । इति पररूपत्वं । बहुलं छंदस्यमाङ्योगेऽपीत्यडागमाभावः । अस्मे । सुपां सुलुगिति सप्तम्याः शे आदेशः । स्युः । अस्तेर्लिङि श्नसोरल्लोपः ॥

अष्टमीमृचमाह ॥

उरुं हि राजा वरुणश्चकार सूर्याय पंथामन्वेतवा उ ।
अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ॥ ८ ॥

उरुं । हि । राजा । वरुणः । चकार । सूर्याय । पंथां । अनुऽएतवे । ऊं इति ।
अपदे । पादा । प्रतिऽधातवे । अकः । उत । अपऽवक्ता । हृदयऽविधः । चित् ॥ ८ ॥

वरुणो राजा सूर्याय सूर्यस्य पंथां मार्गमुरुं विस्तीर्णं चकार । हिशब्दः प्रसिद्धौ । उत्तरायणदक्षिणायणमार्गस्य विस्तारः प्रसिद्धः । किमर्थमेवं कृतवानिति तदुच्यते । अन्वेतवा उ । अनुक्रमेणोदयास्तमयौ गंतुमेव । तथापदे पादरहितेऽतरिक्षे पादा प्रतिधातवे । पादौ प्रक्षेप्तुं । अकः । मार्गं कृतवान् । पूर्वंच रथस्य मार्गः अत्र पादयोरिति विशेषः । यद्वा । अपदे यूपे बद्धेन मया गंतुमशक्ये भूप्रदेशे पादौ प्रक्षेप्तुमुपायं बंधविमोचनरूपं करोत्वित्यर्थः । उत अपि च हृदयाविधश्चिदस्मदीयवेधकस्य शत्रोरप्यपवक्तापवदिता निराकर्ता भवतु ॥ चकार । लिट्स्वरेणाकार उदात्तः । हि चेति निघातप्रतिषेधः । पंथां । पथिमथ्यृभुक्षामात् । पा० ७. १. ८५. । इति द्वितीयायामपि व्यत्ययेनात्वं । पथिशब्दस्य पतस्थ च । उ० ४. १२. । इति प्रत्ययांतत्वेनांतोदात्तत्वे प्राप्ते पथिमथोः सर्वनामस्थाने । पा० ६. १. १९९. । इत्याद्युदात्तत्वं । अन्वेतवै । अनुपूर्वादेतेस्तुमर्थे सेसेनिति तवैप्रत्ययः । तवै चांतश्च युगपत् । पा० ६. २. ५१. । इत्याद्यंतयोरुदात्तत्वं । पादा । सुपां सुलुगित्याकारः । प्रतिधातवे । दधातेस्तुमर्थ इति सूत्रेणैव तवेन्प्रत्ययः । तादौ च निति । पा० ६. २. ५०. । इति गतेः प्रकृतिस्वरत्वं । अकः । करोतेश्छंदसि लुङ्लङ्लिट इति लोडर्थे लङ् । तस्य तिप् । मंत्रे घसेत्यादिना च्लेर्लुक् । गुणो रपरत्वं । हल्ङ्याब्भ्यः । पा० ६. १. ६८. । इति तिपो लोपः । अडागमः । हृदयाविधः । हृञ् हरणे । वृहोः षुक्दुकौ च । उ० ४. १०३. । इति कयन् । व्यध ताडने । क्विप् । नहिवृतीत्यादिना । पा० ६. ३. ११६. । पूर्वपदस्य दीर्घत्वं । कृदुत्तरपदप्रकृतिस्वरत्वं ॥

नवमीमृचमाह ॥

श॒तं ते॑ राजन्भि॒षजः॑ स॒हस्र॑मु॒र्वी ग॑भी॒रा सु॑म॒तिष्टे॑ अस्तु ।
बाध॑स्व दू॒रे निरृ॑तिं परा॒चैः कृ॒तं चि॒देनः॒ प्र मु॑मु॒ग्ध्यस्मत् ॥ ९ ॥

श॒तं । ते॒ । रा॒ज॒न् । भि॒षजः॑ । स॒हस्र॑ं । उ॒र्वी । ग॒भी॒रा । सु॒ऽम॒तिः । ते॒ । अ॒स्तु॒ ।
बाध॑स्व । दू॒रे । निः॒ऽऋ॑तिं । प॒रा॒चैः । कृ॒तं । चि॒त् । एनः॑ । प्र । मु॒मु॒ग्धि॒ । अ॒स्मत् ॥ ९ ॥

हे राजन्वरुण ते तव शतं भिषजो बंधनिवारकाणि शतसंख्याकान्यौषधानि वैद्या वा संति । ते तव सुमतिरस्मदनुग्रहबुद्धिरुर्वी विस्तीर्णा गभीरा गांभीर्योपेता स्थिरास्तु । निर्ऋतिमस्मदनिष्टकारिणीं निर्ऋतिं पापदेवतां पराचैः पराङ्मु-

त्वां कृत्वा दूरेऽस्मत्तो व्यवहिते देशे स्थापयित्वा तां बाधस्व । कृतं चिदस्माभि-रनुष्ठितमप्येनः पापमस्मत्तः प्रमुमुग्धि । प्रकर्षेण मुक्तं नष्टं कुरु ॥ सुमतिः । तादौ चेति पूर्वपदप्रकृतिस्वरत्वे प्राप्ते मन्क्तिन्नित्यादिनोत्तरपदांतोदात्तत्वं । संहितायां विसर्जनीयसकारस्य युष्मत्तत्ततक्षुःष्वंतःपाद । पा॰ ८. ३. १०३. । इति षत्वं । बाधस्व । बाधृ विलोडने । शपः पित्त्वादनुदात्तत्वं । तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते । निर्ऋतिं । तादौ चेति गतेः प्रकृतिस्वरत्वं । मुमुग्धि । मुच्लृ मोक्षणे । बहुलं छंदसीति श्लुः । हुझल्भ्यो हेर्धिः । पा॰ ६. ४. १०१. । तस्यापित्त्वेन ङित्त्वाद्गुणाभावः । चोः कुः । पा॰ ८. २. ३०. । इति कुत्वं ॥

दशमीमृचमाह ॥

अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुह चिद्दिवेयुः ।
अदब्धानि वरुणस्य व्रतानि विचाकशच्चंद्रमा नक्तमेति ॥ १० ॥

अमी इति । ये । ऋक्षाः । निऽहितासः । उच्चा । नक्तं । ददृश्रे । कुह । चित् । दिवा । ईयुः ।
अदब्धानि । वरुणस्य । व्रतानि । विऽचाकशत् । चंद्रमाः । नक्तं । एति ॥ १० ॥

अमी रात्रावस्माभिर्दृश्यमाना ऋक्षाः सप्त ऋषयः । तथा च वाजसनेयिन आमनंति । ऋक्षा इति ह स्म वै पुरा सप्त ऋषीनाचक्षत इति । यद्वा । ऋक्षाः सर्वेऽपि नक्षत्रविशेषाः । ऋक्षाः स्तृभिरिति नक्षत्राणां । नि॰ ३. २०. । इति यास्केनोक्तत्वात् । उच्चा उच्चैरुपरि द्युप्रदेशे निहितासः स्थापिता ये संति ते ऋक्षा नक्तं रात्रौ ददृश्रे । सर्वैरपि दृश्यंते । दिवाहनि कुह चिदीयुः । क्वापि गच्छेयुः । न दृश्यंत इत्यर्थः । वरुणस्य राज्ञो व्रतानि कर्माणि नक्षत्रदर्शनादिरूपाण्यदब्धानि । केनाप्यहिंसितानि । किंच वरुणस्याज्ञयैव चंद्रमा नक्तं रात्रौ विचाकशत् । विशेषेण दीप्यमान एति । गच्छति ॥ निहितासः । आज्जसेरसुक् । थाथादिस्वरेणोत्तरपदांतोदात्तत्वे प्राप्ते गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । ददृश्रे । दृशेर्लिटि इरयो रे । पा॰ ६. ४. ७६. । इति रे आदेशः । व्यत्ययेनाद्युदात्तत्वं । यद्वृत्तयोगादनिघातः । कुह । वा ह च च्छंदसि । पा॰ ५. ३. १३. । इति किंशब्दादुत्तरस्य चलो हादेशः । कु तिहोः । पा॰ ७. २. १०४. । इति किंशब्दस्य कु आदेशः । स्थानिवद्भावाल्लित्स्वरेणाद्युदात्तत्वं । विचाकशत् । कशेर्दीप्त्यर्थाद्यङ्लुगंताच्छतृप्रत्ययः । अभ्यस्तानामादिरित्याद्युदात्तत्वं । समासे कृत्स्वरः । यद्वा । काशतेर्वा व्यत्य-

येनोपधाह्रस्वत्वं। चंद्रमाः। चंद्रे मो डित्। उ॰ ४. २२७.। इत्यसिप्रत्ययः। कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य द्वितीये चतुर्दशो वर्गः ॥

एकादशिनस्य वारुणस्य पशोर्वपापुरोळाशयोस्तत्त्वा यामीति द्वे ऋचौ याज्ये। सूचितं च। तत्त्वा यामि ब्रह्मणा वंदमान इति द्वे अस्तभ्नाद्यां। आ॰ ३.७.। इति। वरुणप्रघासेषु वारुणस्य हविषो याज्या तत्त्वा यामीत्येषा पंचम्यां पौर्णमास्यामित्यत्र सूचितं। इमं मे वरुण श्रुधि तत्त्वा यामि ब्रह्मणा वंदमानः। आ॰ २. १७.। इति। तामेतां सूक्त एकादशीमृचमाह ॥

तत्त्वा यामि ब्रह्मणा वंदमानस्तदा शास्ते यजमानो हविर्भिः।
अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्र मोषीः ॥ ११ ॥

तत्। त्वा। यामि। ब्रह्मणा। वंदमानः। तत्। आ। शास्ते। यजमानः। हविःऽभिः।
अहेळमानः। वरुण। इह। बोधि। उरुऽशंस। मा। नः। आयुः। प्र। मोषीः ॥ ११ ॥

हे वरुण मुमूर्षुरहं त्वां प्रति तदायुर्यामि। याचे। कीदृशः। ब्रह्मणा प्रौढेन स्तोत्रेण वंदमानः। स्तुवन्। मर्वत्र यजमानोऽपि हविर्भिस्तदायुराशास्ते। प्रार्थयते। त्वं चेह कर्मण्यहेळमानोऽनादरमकुर्वन्बोधि। अस्मदपेक्षितं बुध्यस्व। हे उरुशंस। बहुभिः स्तुत्य नोऽस्मदीयमायुर्मा प्रमोषीः। प्रमुषितं मा कुरु ॥ सप्तदशसंख्याकेषु याच्ञाकर्मस्वीमहे यामीति पठितं। चाशब्दलोपश्छांदसः। अहेळमानः। हेड़ अनादरे। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे शपश्च पित्त्वादनुदात्तत्वे सति धातुस्वरः शिष्यते। ततो नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं। बोधि। बुध अवगमने। लोटः सेर्हिः। बहुलं छंदसीति विकरणस्य लुक्। वा छंदसि। पा॰ ३. ४. ८८.। इत्यपित्त्वाभावेन ङित्त्वाभावाल्लघूपधगुणः। हुझल्भ्यो हेर्धिरिति हेर्धिरादेशः। धातोरंत्यलोपश्छांदसः। मोषीः। मुष स्तेये। लोडर्थे छांदसो लुङ्। वदव्रजेति प्राप्ताया वृद्धेर्नेटि। पा॰ ७. २. ४.। इति प्रतिषेधे सति लघूपधगुणः। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः ॥

द्वादशीमृचमाह ॥

तदिन्नक्तं तद्दिवा मह्यमाहुस्तद॒यं केतो॑ हृद आ वि च॑ष्टे ।

शुनःशेपो यमह्वद्गृभीतः सो अस्मान्राजा वरुणो मुमोक्तु ॥ १२ ॥

तत् । इत् । नक्तं । तत् । दिवा । मह्यं । आहुः । तत् । अयं । केतः । हृदः । आ । वि । चष्टे ।

शुनःशेपः । यं । अह्वत् । गृभीतः । सः । अस्मान् । राजा । वरुणः । मुमोक्तु ॥ १२ ॥

तदिन्नदेव वरुणविषयं स्तोत्रं नक्तं रात्रौ मह्यं शुनःशेपायाहुः । कर्तव्यत्वेनाभिज्ञाः कथयंति । तथा दिवापि तदेवाहुः । हृदो मदीयमनसो निष्पन्नोऽयं केतः प्रज्ञाविशेषोऽपि तदेव कर्तव्यत्वेनाविचष्टे । सर्वतो विशेषेण प्रकाशयति । गृभीतो गृहीतो यूपे बद्धः शुनःशेप एतन्नामको जनो यं वरुणमह्वत् । आहूतवान् । स वरुणो राजास्मान् शुनःशेपान्मुमोक्तु । बंधान्मुक्तान्करोतु ॥ मह्यं । ङयि चेत्याद्युदात्तत्वं । आहुः । ब्रुवः पंचानां । पा० ३. ४. ८४. । इति ब्रूञो लटि झेरुसादेशः । धातोराहादेशश्च । हृदः । पद्दन्नित्यादिना । पा० ६. १. ६३. । हृदयशब्दस्य हृदादेशः । ऊडिदंपदादीति पंचम्या उदात्तत्वं । शुनःशेपः । शुन इव शेपो यस्येति समासे शुनः शेपपुच्छलांगुलेषु संज्ञायां षष्ठ्या अलुग्वक्तव्यः । पा० ६. ३. २१. ५. । इत्यलुक् । पूर्वपदप्रकृतिस्वरत्वे प्राप्ते उभे वनस्पत्यादिषु । पा० ६. २. १४०. । इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं । अह्वत् । ह्वेञो लुङि लिपिसिचिह्वश्च । पा० ३. १. ५३. । इति च्लेरङादेशः । आतो लोप इटि च । पा० ६. ४. ६४. । इत्याकारलोपः । अडागम उदात्तः । यद्वृत्तयोगादनिघातः । गृभीतः । हृग्रहोर्भ इति भत्वं । सो अस्मान् । प्रकृत्यांतःपादमिति प्रकृतिभावः । मुमोक्तु । बहुलं छंदसीति विकरणस्य श्लुः ॥

त्रयोदशीमृचमाह ॥

शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः ॥

अवैनं राजा वरुणः ससृज्याद्विद्वाँ अदब्धो वि मुमोक्तु पाशान् ॥ १३ ॥

शुनःशेपः । हि । अह्वत् । गृभीतः । त्रिषु । आदित्यं । द्रुपदेषु । बद्धः ।

अव । एनं । राजा । वरुणः । ससृज्यात् । विद्वान् । अदब्धः । वि । मुमोक्तु ।

पाशान् ॥ १३ ॥

गृभीतो बंधनाय गृहीतस्त्रिसंख्याकेषु द्रुपदेषु द्रोः काष्ठस्य यूपस्य पदेषु प्रदेशविशेषेषु बद्धः शुनःशेप आदित्यमदितेः पुत्रं यं वरुणमह्वत् । आहूतवान् । हि यस्मादेवं तस्मात्स वरुणो राजैनं शुनःशेपमवसृज्यात् । अवसृष्टं बंधनाद्विमुक्तं करोतु । विमोकप्रकार एव स्पष्टीक्रियते । विद्वान् । विमोकप्रकाराभिज्ञः । अदब्धः । केनाप्यहिंसितो वरुणः पाशान्बंधनरज्जुविशेषान्विमुमोक्तु । विच्छिद्यैनं मुक्तं करोतु ॥ त्रिषु । षट्त्रिचतुर्भ्यो हलादिः । पा० ६.१.१७९. । इति विभक्तेरुदात्तत्वं । संहितायामुदात्तस्वरितयोर्यण इति पर आकारः स्वर्यते । ससृज्यात् । सृज विसर्गे । प्रार्थनायां लिङ् । बहुलं छंदसीति विकरणस्य श्लुः । विद्वान् । विद ज्ञाने । विदेः शतुर्वसुः । पा० ७.१.३६. । उगिदचामिति नुम् । हल्ङ्याब्भ्यादिसंयोगांतलोपौ । संहितायां दीर्घादटि समानपाद इति नकारस्य रुत्वं । आतोऽटि नित्यमिति सानुनासिक आकारः । अदब्धः । दंभु दंभे । निष्ठायामनिदितामिति नलोपे झषस्तथोर्धोऽधः । पा० ८.२.४०. । इति धत्वं । अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥

अवभृथेऽव ते हेळ इति द्वे ऋचौ वारुणस्य हविषो याज्यानुवाक्ये । पत्नीसंयाजैश्चरित्वेति खंडे सूत्रितं । अव ते हेळो वरुण नमोभिरिति द्वे । आ० ६.१३. । इति । तयोराद्यां सूक्ते चतुर्दशीमृचमाह ॥

अव॑ ते॒ हेळो॑ वरुण॒ नमो॑भि॒रव॑ य॒ज्ञेभि॑रीमहे ह॒विर्भिः॑ ।
क्षय॑न्न॒स्मभ्य॑मसुर प्रचेता॒ राज॒न्नेनां॑सि शिश्रथः कृ॒तानि॑ ॥ १४ ॥
अव॑ । ते॒ । हेळः॑ । व॒रु॒ण॒ । नमः॑ऽभिः । अव॑ । य॒ज्ञेभिः॑ । ई॒म॒हे॒ । ह॒विःऽभिः॑ ।
क्षय॑न् । अ॒स्मभ्यं॑ । अ॒सु॒र॒ । प्र॒चे॒त॒ इति॑ प्रऽचेतः । राज॑न् । एनां॑सि । शि॒श्र॒थः॒ ।
कृ॒तानि॑ ॥ १४ ॥

हे वरुण ते तव हेळः क्रोधं नमोभिर्नमस्कारैरवेमहे । अवनयामः । तथा यज्ञैः सांगानुष्ठानेन पूज्यैर्हविर्भिरवेमहे । वरुणं परितोष्य क्रोधमपनयामः । हे असुर । अनिष्टक्षेपणशील । प्रचेतः । प्रकर्षेण प्रज्ञायुक्त । राजन् । दीप्यमान वरुण । अस्मभ्यमस्मदर्थं क्षयन्नस्मिन्कर्मणि निवसन्कृतान्यस्माभिरनुष्ठितान्येनांसि पापानि शिश्रथः । श्रथितानि शिथिलानि कुरु ॥ हेळः । असुनो नित्त्वादाद्युदात्तत्वं । यज्ञेभिः । बहुलं छंदसीत्यैसभावः । ईमहे । ईङ् गतौ । विकरणस्य लुक् । क्षयन् । क्षि निवासगत्योः । लटः शतृ । व्यत्ययेन शप् । आमंत्रितत्वादाद्यु-

दात्तत्वं । असुर । असेरुरन् । उ० १. ४२. । आमंत्रितनिघातः । शिश्रथः । श्रथ दौर्बल्ये । चुरादिरदंतः । छांदसे लुङि णिश्रिद्रुस्रुभ्यः । पा० ३. १. ४८. । इति चङ् । द्विर्भावहलादिशेषौ । अग्लोपित्वात् । पा० ७. ४. २. । सन्वद्भावाभावेऽपि । पा० ७. ४. ९३. । बहुलं छंदसि । पा० ७. ४. ७८. । इत्यभ्यासस्येत्वं । पूर्ववदडभावः ॥

पंचदशीमृचमाह ॥

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।

अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ १५ ॥

उत् । उत्ऽतमं । वरुण । पाशं । अस्मत् । अव । अधमं । वि । मध्यमं । श्रथय ।

अथ । वयं । आदित्य । व्रते । तव । अनागसः । अदितये । स्याम ॥ १५ ॥

हे वरुण उत्तममुत्कृष्टं शिरसि बद्धं पाशमस्मदस्मत्त उच्छ्रथाय । उत्कृष्य शिथिलं कुरु । अधमं निकृष्टं पादेऽवस्थितं पाशमवश्रथाय । अवगमयाधस्तादवकृष्य वा शिथिलीकुरु । मध्यमं नाभिप्रदेशगतं पाशं विश्रथाय । वियुज्य शिथिलीकुरु । अथानंतरं हे आदित्य अदितेः पुत्र वरुण वयं शुनःशेपास्तव व्रते त्वदीये कर्मण्यदितये खंडनराहित्यायानागसोऽपराधरहिताः स्याम । भवेम ॥ उत्तमं । तमपः पित्त्वादनुदात्तत्वेनाद्युदात्तत्वे प्राप्त उत्तमशश्वत्तमौ सर्वत्रेत्युञ्छादिषु पाठादंतोदात्तत्वं । अधमं । अवद्यावमाधमार्वरेफाः कुत्सिते । उ० ५. ५४. । इत्यवतेरमच् । वस्य धः । श्रथाय । श्रथ दौर्बल्ये । संहितायां छांदसो दीर्घः । तव । युष्मदस्मदोर्ङसीत्याद्युदात्तत्वं । अनागसः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । नञ्सुभ्यामिति तु व्यत्ययेन प्रवर्तते । यद्वा । आगसशब्दादस्मायामेधेति । पा० ५. २. १२१. । मत्वर्थीयो विनिः । तस्य विन्मतोर्लुगिति लुक् । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य द्वितीये पंचदशो वर्गः ॥

यच्चिदित्येकविंशत्यृचं द्वितीयं सूक्तं । तथा चानुक्रांतं । यच्चित्सैकेति । ऋषिश्चान्यस्मादिति परिभाषया शुनःशेप एव ऋषिः । आदौ गायत्रमिति परिभाषितत्वाद्गायत्री छंदः । वारुणं त्विति पूर्वोक्तत्वात्तुह्यादिपरिभाषया वरुणो देवता । विनियोग उक्तः शौनःशेपाख्याने । विशेषविनियोगस्तु । आभिप्लवषडह इदं

सूक्तं होत्रकशस्त्रे स्तोमनिमित्तमावापार्थं। अभिप्लवपृष्ठ्याहानामिति खंडे तथैव सूचितं। यच्चिद्धि ते विश इति वारुणमेतस्य तृचमावपेत मैत्रावरुणः। आ० ७.५.। इति ॥ तस्मिन्सूक्ते प्रथमामृचमाह ॥

यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतं। मिनीमसि द्यविद्यवि ॥ १ ॥

यत्। चित्। हि। ते। विशः। यथा। प्र। देव। वरुण। व्रतं। मिनीमसि।
द्यविऽद्यवि ॥ १ ॥

हे वरुण यथा लोके विशः प्रजाः कदाचित्प्रमादं कुर्वंति तथा वयमपि ते तव संबंधि यच्चिद्धि यदेव किंचिद्व्रतं कर्म द्यवि द्यवि प्रतिदिनं प्रमिनीमसि। प्रमादेन हिंसितवंतः। तदपि व्रतं प्रमादपरिहारेण सांगं कुर्विति शेषः ॥ यथा। लित्स्वरेणाद्युदात्तत्वे प्राप्ते यथेति पादांते। फि० ४. १५.। इति सर्वानुदात्तत्वं। मिनीमसि। मीञ् हिंसायां। इदंतो मसिः। क्र्यादिभ्यः श्ना। मीनातेर्निगमे। पा० ७. ३. ८१.। इति ह्रस्वत्वं। ई हल्यघोरितीकारः। सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वचनात्तिङ एव स्वरः शिष्यते। यद्वृत्तयोगान्निघाताभावः ॥

द्वितीयामृचमाह ॥

मा नो वधाय हत्नवे जिहीळानस्य रीरधः। मा हृणानस्य मन्यवे ॥ २ ॥

मा। नः। वधाय। हत्नवे। जिहीळानस्य। रीरधः। मा। हृणानस्य। मन्यवे ॥ २ ॥

हे वरुण जिहीळानस्यानादरं कृतवतो हत्नवे हंतुः पापहननशीलस्य तव संबंधिने त्वत्कर्तृकाय वधाय नोऽस्मान्मा रीरधः। संसिद्धान्विषयभूतान्मा कुरु। हृणानस्य हृणीयमानस्य क्रुद्धस्य तव मन्यवे क्रोधाय मा अस्मान् रीरधः ॥ वधाय। हनश्च वध इत्यवंतो वधशब्दः। उञ्छादिषु पाठादंतोदात्तः। हत्नवे। हन हिंसागत्योः। कृहनिभ्यां क्नुः। उ० ३. ३०.। इति क्नुप्रत्ययः। धातोर्नकारस्य तकारः। जिहीळानस्य। हेडृ अनादरे। अस्माल्लिटः कानच्। द्विर्भावहलादिशेषह्रस्वचुत्वजश्त्वानि। एकारस्य ईकारादेशश्छांदसः। चित इत्यंतोदात्तत्वं। रीरधः। राध साध संसिद्धौ। चङि णिलोप उपधाह्रस्वत्वं। द्विर्वचनहलादिशेषः। ह्रस्वत्वसन्वद्भावेत्वाभ्यासदीर्घाः। न माङ्योग इत्यडभावः। हृणानस्य। हृणीङ् लज्जायां। अस्माच्छानचि पृषोदरादित्वादभिमतरूपसिद्धिः ॥

तृतीयामृचमाह ॥

वि मृळीकाय ते मनो रथीरश्वं न संदितं। गीर्भिर्वरुण सीमहि ॥ ३ ॥

वि। मृळीकाय। ते। मनः। रथीः। अश्वं। न। संऽदितं। गीःऽभिः। वरुण। सीमहि ॥ ३ ॥

हे वरुण मृळीकायास्मत्सुखाय ते तव मनो गीर्भिः स्तुतिभिर्विसीमहि। विशेषेण बध्नीमः। प्रसादयाम इत्यर्थः। तत्र दृष्टांतः। रथीः रथस्वामी संदितं सम्यक् खंडितं दूरगमनेन श्रांतमश्वं न। अश्वमिव। यथा स्वामी श्रांतमश्वं घासप्रदानादिना प्रसादयति तद्वत् ॥ रथीः। मत्वर्थीय ईकारः। संदितं। दो अवखंडने। निष्ठेति क्तः। द्यतिस्यतिमास्थामि ति किति। पा० ७.४.४०। इती-कारांतादेशः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। गीर्भिः। सावेकाच इति भिस उदात्तत्वं। सीमहि। षिवु तंतुसंताने। व्यत्ययेनात्मनेपदं। बहुलं छंदसीति विकरणस्य लुक्। वलि लोपः। पा० ६.१.६६.। यद्वा षिञ् बंधन इत्यस्मा-द्विकरणस्य लुक्। दीर्घश्छांदसः ॥

चतुर्थीमृचमाह ॥

परा हि मे विमन्यवः पतंति वस्यइष्टये। वयो न वसतीरुप ॥ ४ ॥

परा। हि। मे। विऽमन्यवः। पतंति। वस्यःऽइष्टये। वयः। न। वसतीः। उप ॥ ४ ॥

हे वरुण मे मम शुनःशेपस्य विमन्यवः क्रोधरहिता बुद्धयो वस्यइष्टये वसी-यसोऽतिशयेन वसुमतो जीवनस्य प्राप्तये परा पतंति। पराङ्मुखाः पुनरावृत्ति-रहिताः प्रसरंति। हिशब्दोऽस्मिन्नर्थे सर्वजनप्रसिद्धिमाह। परापतने दृष्टांतः। वयो न। पक्षिणो यथा वसतीर्निवासस्थानान्युप सामीप्येन प्राप्नुवंति तद्वत् ॥ पतंति। पादादित्वान्निघाताभावः। वस्यइष्टये। वसुमच्छब्दाद्विन्मतोर्लुगिति मतुपो लुकि टिलोप ईयसुनो यकारलोपश्छांदसः। वसतीः। शतुरनुम इति ङीप उदात्तत्वं ॥

पंचमीमृचमाह ॥

कदा क्षत्रश्रियं नरमा वरुणं करामहे। मृळीकायोरुचक्षसं ॥ ५ ॥

कदा। क्षत्रऽश्रियं। नरं। आ। वरुणं। करामहे। मृळीकाय। उरुऽचक्षसं ॥ ५ ॥

मृळीकायास्मत्सुखाय कदा कस्मिन्काल आकरामहे । अस्मिन्कर्मण्यागतं करवाम । कीदृशं । क्षत्रश्रियं बलसेविनं नरं नेतारं । उरुचक्षसं । बहूनां द्रष्टारं ॥ क्षत्रश्रियं । क्षत्राणि श्रयतीति क्षत्रश्रीः । क्विप् । वचीत्यादिना । पा॰ ३. २. १७८. । क्विप् दीर्घश्च । कृदुत्तरपदप्रकृतिस्वरत्वं । नरं । ऋदोरबित्यबंत आद्युदात्तः । करामहे । करोतेर्व्यत्ययेन शप् । उरुचक्षसं । चक्षेर्बहुलं शिच्च । उ॰ ४. २३२. । इत्यसुन् । शिद्वद्भावात्ख्याञादेशाभावः ॥

॥ इति प्रथमस्य द्वितीये षोडशो वर्गः ॥

षष्ठीमृचमाह ॥

तदित्स॒मान॒मा॑शाते॒ वेन॑न्ता॒ न प्र यु॑च्छतः । धृ॒तव्र॑ताय दा॒शुषे॑ ॥ ६ ॥

तत् । इत् । स॒मा॒नम् । आ॒शा॒ते॒ इति॑ । वेन॑न्ता । न । प्र । यु॒च्छ॒तः॒ । धृ॒तऽव्र॑ताय । दा॒शुषे॑ ॥ ६ ॥

धृतव्रतायानुष्ठितकर्मणे दाशुषे हविर्दत्तवते यजमानाय वेनंतौ कामयमानौ मित्रावरुणाविति शेषः । तावुभौ समानं साधारणं तदिदस्माभिर्दत्तं तदेव हविराशाते । अश्नुवाते । न प्रयुच्छतः । कदाचिदपि प्रमादं न कुरुतः ॥ आशाते । अश्नोतेर्लिटि द्विर्भावहलादिशेषौ । अत आदेः । पा॰ ७. ४. ७०. । इत्यात्वं । अनित्यमागमशासनमिति वचनादश्नोतेश्च । पा॰ ७. ४. ७२. । इति नुडभावः । वेनंता । वेनतिः कांतिकर्मा । सुपां सुलुगित्याकारः । प्रयुच्छतः । युच्छ प्रमादे । दाशुषे । दाशृ दान इत्यस्माद्दाश्वान् साह्वानिति क्वसुप्रत्ययो निपातितः । वसोः संप्रसारणमिति संप्रसारणं । शासिवसिघसीनां चेति षत्वं ॥

सप्तमीमृचमाह ॥

वेदा॒ यो वी॒नां प॒दम॒न्तरि॑क्षेण॒ पत॑ताम् । वेद॑ ना॒वः स॑मु॒द्रियः॑ ॥ ७ ॥

वेद॑ । यः । वी॒नाम् । प॒दम् । अ॒न्तरि॑क्षेण । पत॑ताम् । वेद॑ । ना॒वः । स॒मु॒द्रियः॑ ॥ ७ ॥

अंतरिक्षेण पततामाकाशमार्गेण गच्छतां वीनां पक्षिणां पदं यो वरुणो वेद । तथा समुद्रियः समुद्रेऽवस्थितो वरुणो नावो जले गच्छंत्याः पदं वेद । जानाति । सोऽस्मान्बंधनान्मोचयत्विति शेषः ॥ वेद । विद ज्ञाने । विदो लटो वा । पा॰ ३. ४. ८३. । इति तिपो णल् । लित्स्वरेणाद्युदात्तत्वं । अचोऽतस्तिङ

इति संहितायां दीर्घः । वीनां । नामन्यतरस्यामिति नाम उदात्तत्वं । पततां । शपः पित्त्वादनुदात्तत्वं । शतुश्च लसार्वधातुकस्वरेण धातुस्वरः । नावः । सावेकाच इति षष्ठ्या उदात्तत्वं । समुद्रियः । भवार्थे समुद्राभ्राद्घः । पा० ४. ४. ११८. । इति घप्रत्ययः ॥

अष्टमीमृचमाह ॥

वेद॒ मासो॑ धृ॒तव्र॑तो॒ द्वाद॑श प्र॒जाव॑तः । वेदा॒ य उ॑प॒जाय॑ते ॥ ८ ॥

वेद॑ । मासः॑ । धृ॒तऽव्र॑तः । द्वाद॑श । प्र॒जाऽव॑तः । वेद॑ । यः । उ॒प॒ऽजाय॑ते ॥ ८ ॥

धृतव्रतः स्वीकृतकर्मविशेषो यथोक्तमहिमोपेतो वरुणः प्रजावतस्तदा तदोत्पद्यमानप्रजायुक्तान्द्वादश मासश्चैत्रादीन्फाल्गुनांतान्वेद । जानाति । यस्त्वयोदशोऽधिकमास उपजायते सम्वत्सरसमीपे स्वयमेवोत्पद्यते तमपि वेद । वाक्यशेषः पूर्ववत् ॥ मासः । पद्दन्नित्यादिना । पा० ६. १. ६३. । मासशब्दस्य मासित्यादेशः । ऊडिदमित्यादिना शस उदात्तत्वं । द्वादश । द्वौ च दश चेति द्वंद्वः । द्व्यष्टनः संख्यायां । पा० ६. ३. ४७. । इत्यात्वं । संख्या । पा० ६. २. ३५. । इति सूत्रेण पूर्वपदप्रकृतिस्वरत्वं । प्रजा एषां संतीति तदस्यास्त्यस्मिन्निति मतुप् । पा० ५. २. ९४. । मादुपधाया इति मतुपो वत्वं । उपजायते । जनेः कर्मकर्तरि लट् । कर्मवद्भावादात्मनेपदं यक् । पा० ३. १. ८७. । जनादीनामुपदेश एवात्वं वक्तव्यं । पा० ६. १. १९५. १. । इति वचनादचः कर्तृयकि । पा० ६. १. १९५. । इत्याद्युदात्तत्वं । तिङि चोदात्तवति । पा० ८. १. ७१. । इत्युपसर्गस्य निघातः । न च तिङ्ङतिङ इति निघातः । यद्वृत्तान्नित्यमिति प्रतिषेधात ॥

नवमीमृचमाह ॥

वेद॒ वात॑स्य वर्त॒निमु॒रोरृ॒ष्वस्य॑ बृह॒तः । वेदा॒ ये अ॒ध्यास॑ते ॥ ९ ॥

वेद॑ । वात॑स्य । व॒र्त॒निं । उ॒रोः । ऋ॒ष्वस्य॑ । बृ॒ह॒तः । वेद॑ । ये । अ॒धि॒ऽआस॑ते ॥ ९ ॥

उरोर्विस्तीर्णस्य ऋष्वस्य दर्शनीयस्य वृहतो गुणैरधिकस्य वातस्य वायोर्वर्तनिं मार्गं वेद । वरुणो जानाति । ये देवा अध्यासते । उपरि तिष्ठंति तानपि वेद । जानाति ॥ वातस्य । असिहसीत्यादिना तन्प्रत्ययांतो वातशब्दो नित्त्वादाद्युदात्तः । वर्तनिं । वर्ततेऽनेनेति वर्तनिः स्तोत्रं । पा० ६. १. १६०. । इति स्तोत्रवाचकस्य वर्तनिशब्दस्यांतोदात्तत्वसिद्ध्यर्थमुञ्छादिषु पाठात्तस्य प्रत्ययस्वरेण

मध्योदात्तत्वे प्राप्तेऽंतोदात्तत्वं। बृहतः। बृहन्महतोरुपसंख्यानमिति ङस उदात्तत्वं। अध्यासते। लसार्वधातुकानुदात्तत्वे सति धातुस्वरः ॥

दशमीमृचमाह ॥

नि षसाद धृतव्रतो वरुणः पस्त्या३स्वा। साम्राज्याय सुक्रतुः ॥ १० ॥

नि। ससाद। धृतऽव्रतः। वरुणः। पस्त्यासु। आ। सांऽराज्याय। सुऽक्रतुः ॥ १० ॥

धृतव्रतः पूर्वोक्तो वरुणः पस्त्यासु दैवीषु प्रजास्वानिषसाद। आगत्य निषण्णवान्। किमर्थं। प्रजानां साम्राज्यसिद्ध्यर्थं सुक्रतुः शोभनकर्मा ॥ निषसाद। सदेरप्रतेरिति षत्वं। साम्राज्याय। सम्राजो भावः साम्राज्यं। गुणवचनब्राह्मणादिभ्य इति ष्यञ्। ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं। सुक्रतुः। क्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वं ॥

॥ इति प्रथमस्य द्वितीये सप्तदशो वर्गः ॥

एकादशीमृचमाह ॥

अतो विश्वान्यद्भुता चिकित्वाँ अभि पश्यति। कृतानि या च कर्त्वा ॥ ११ ॥

अतः। विश्वानि। अद्भुता। चिकित्वान्। अभि। पश्यति। कृतानि। या। च। कर्त्वा ॥ ११ ॥

अतोऽस्माद्वरुणाद्विश्वान्यद्भुता सर्वाण्याश्चर्याणि चिकित्वान् प्रज्ञावानभिपश्यति। सर्वतोऽवलोकयति। या कृतानि। यान्याश्चर्याणि पूर्वं वरुणेन संपादितानि। चकारादन्यानि यान्याश्चर्याणि कर्त्वा। इतः परं कर्तव्यानि तानि सर्वाण्यभिपश्यतीति पूर्वत्रान्वयः ॥ अद्भुता। शेश्छंदसि बहुलमिति शेर्लोपः। प्रत्ययलक्षणेन नपुंसकस्य झलचः। पा॰ ७. १. ७२.। इति नुम्। नलोपः। चिकित्वान्। कित ज्ञाने। लिटः क्वसुः। अभ्यासहलादिशेषचुत्वानि। वस्वेकाजाद्घसामिति नियमादिडभावः। रुत्वानुनासिकावुक्तौ संहितायां। पश्यति। पाघ्रेत्यादिना दृशेः पश्यादेशः। कर्त्वा। कृत्यार्थे तवैकेन्केन्यत्वनः। पा॰ ३. ४. १४.। इति करोतेस्त्वन्। नित्त्वादाद्युदात्तत्वं। पूर्ववच्छेर्लोपः ॥

द्वादशीमृचमाह ॥

स नो॑ वि॒श्वाहा॑ सु॒क्रतु॑रादि॒त्यः सु॒पथा॑ करत् । प्र ण॒ आयूं॑षि तारिषत् ॥ १२ ॥

सः । नः॒ । वि॒श्वाहा॑ । सु॒ऽक्रतुः॑ । आ॒दि॒त्यः । सु॒ऽपथा॑ । क॒र॒त् । प्र । नः॒ । आयूं॑षि । ता॒रि॒ष॒त् ॥ १२ ॥

सुक्रतुः शोभनप्रज्ञः स आदित्यो वरुणो विश्वाहा सर्वेष्वहःसु नोऽस्मान् सुपथा शोभनमार्गेण सहितान्करत् । करोतु । किंच नोऽस्माकमायूंषि प्रतारिषत् । प्रवर्धयतु ॥ सुपथा । स्वती पूजायामिति समासे न पूजनात् । पा० ५. ४. ६९. । इति समासांतप्रतिषेधः । अव्ययपूर्वपदप्रकृतिस्वरे प्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । यद्वा तृतीयाया आलादेशः । पा० ७. १. ३९. । अव्ययपूर्वपदप्रकृतिस्वरत्वं लित्स्वरेण बाध्यते । क्रत्वादयश्चेत्तन्न भवति । अबहुव्रीहित्वात् । बहुव्रीहौ हि तद्विधीयते । आद्युदात्तं द्व्यच्छंदसि । प्रा० ६. २. ११९. । इत्येतदपि न भवति । पथिन्शब्दस्यांतोदात्तत्वात् । करत् । करोतेर्लेटि व्यत्ययेन शप् । शपो लुकि लेटोऽडाटावित्यडागमः । इतश्च लोप इतीकारलोपः । यद्वा छांदसे लुङि कृमृदृरुहिभ्यः । पा० ३. १. ५९. । इति च्लेरङ् । ऋदृशोऽङि गुणः । पा० ७. ४. १६. । इति गुणः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । प्र णः । उपसर्गाद्बहुलं । पा० ८. ४. २८. १. । इति नसो णत्वं । तारिषत् । तारयतेर्लेट्यडागमः । बहुलं लेटीति सिप् । आदेशप्रत्यययोरिति षत्वं ॥

त्रयोदशीमृचमाह ॥

बिभ्र॑द्द्रा॒पिं हि॑र॒ण्ययं॒ वरु॑णो वस्त नि॒र्णिज॑म् । परि॒ स्पशो॒ नि षे॑दिरे ॥ १३ ॥

बिभ्र॑त् । द्रा॒पिम् । हि॒र॒ण्यय॑म् । वरु॑णः । व॒स्त॒ । निः॒ऽनिज॑म् । परि॑ । स्पशः॑ । नि । से॒दि॒रे॒ ॥ १३ ॥

हिरण्ययं सुवर्णमयं द्रापिं कवचं बिभ्रद्धारयन्वरुणो निर्णिजं पुष्टं स्वशरीरं वस्त । आच्छादयति । स्पशो हिरण्यस्पर्शिनो रश्मयः परितो निषेदिरे । सर्वतो निषण्णाः ॥ बिभ्रत् । बिभर्तेः शतरि नाभ्यस्ताच्छतुः । पा० ७. १. ७८. । इति नुमभावः । अभ्यस्तानामादिरित्याद्युदात्तत्वं । द्रापिं । द्रा कुत्सायां गतौ । द्रापयतीषून्कुत्सितां गतिं प्रापयतीति द्रापिः कवचं । अर्तिह्रीत्यादिना । पा० ७. ३. ३६. । पुगागमः । औणादिक इप्रत्यये णिलोपः । हिरण्ययं । ऋत्व्यवास्त्व्य-

वास्त्वमाध्वीहिरण्ययानि छंदसीति हिरण्यशब्दाद्विकारार्थे विहितस्य मयटो मशब्दलोपो निपातितः। वस्त। वस आच्छादने। लङ्घ्रादादित्वाच्छपो लुक्। पूर्ववदडभावः। निर्णिजं। णिजिर् शौचपोषणयोः। स्पशः। स्पश बाधनस्पर्शनयोः। क्विप् चेति क्विप्। निषेदिरे। षद्लृ विशरणगत्यवसादनेषु। अस्माद्गत्यर्थात्कर्मणि लिट्येत्वाभ्यासलोपौ। सदेरप्रतेरिति षत्वं ॥

चतुर्दशीमृचमाह ॥

न यं दिप्संति दिप्सवो न द्रुह्वाणो जनानां। न देवमभिमातयः ॥ १४ ॥

न। यं। दिप्संति। दिप्सवः। न। द्रुह्वाणः। जनानां। न। देवं। अभिऽमातयः ॥ १४ ॥

दिप्सवो हिंसितुमिच्छंतो वैरिणो यं वरुणं न दिप्संति। भीताः संतो हिंसितुमिच्छां परित्यजंति। जनानां प्राणिनां द्रुह्वाणो दोग्धारोऽपि यं वरुणं प्रति न द्रुह्यंति। अभिमातयः पाप्मानः। पाप्मा वा अभिमातिरिति श्रुत्यंतरात्। देवं तं वरुणं न स्पृशंति ॥ दिप्संति। दंभु दंभे। अस्मात्सनि सनीवंतर्धेत्यादिना। पा० ७. २. ४९.। इडभावः। हलंताच्च। पा० १ २. १०.। इत्यत्र हल्ग्रहणस्य जातिवाचित्वात्सनः कित्त्वाद्दंभ इच्च। पा० ७.४.५६.। इति दकारात्परस्याकारस्येकारः। अनिदितामिति नलोपः। भष्भावाभावश्छांदसः। पा० ८. २. ३७.। अत्र लोपोऽभ्यासस्य। पा० ७. ४. ५८.। इत्यभ्यासलोपः। शपः पित्त्वादनुदात्तत्वं। तिङश्च लसार्वधातुकस्वरेण सनो नित्त्वान्नित्स्वरेणाद्युदात्तत्वं। यद्वृत्तयोगादनिघातः। दिप्सवः। सनंताद्दंभेः सनाशंसभिक्ष उः। पा० ३. २. १६८.। इत्युप्रत्ययः। प्रत्ययस्वरः। द्रुह्वाणः। द्रुह जिघांसायां। अन्येभ्योऽपि दृश्यंत इति क्वनिप्। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तत्वं ॥

पंचदशीमृचमाह ॥

उत यो मानुषेष्वा यशश्चक्रे असाम्या। अस्माकमुदरेष्वा ॥ १५ ॥

उत। यः। मानुषेषु। आ। यशः। चक्रे। असामि। आ। अस्माकं। उदरेषु। आ ॥ १५ ॥

उत अपि च यो वरुणो मानुषेषु यशोऽन्नमाचक्रे। सर्वतः कृतवान्। स वरुणः कुर्वन्नपा सर्वत असामि। संपूर्णं चक्रे न तु न्यूनं कृतवान्। विशेषतोऽस्माकमुदरेष्वा सर्वतश्चक्रे॥ मानुषेषु। मनोर्जातावञ्यतौ षुक् च। पा० ४. १. १६१.। इत्यञ्। ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं। चक्रे। प्रत्ययस्वरः। असामि। अव्यये

नञ्कुनिपातानामिति वक्तव्यं । पा० ६. २. २. १.। इत्यव्ययपूर्वपदप्रकृतिस्वरत्वं । यशः । अश्नेर्युट् चेत्यसुन् । उदरेषु । उदि दृणातेरजलौ पूर्वपदांत्यलोपश्च । उ० ५. १९. । इत्यल् । लित्स्वरः । गतिकारकोपपदादित्युत्तरपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य द्वितीयेऽष्टादशो वर्गः ॥

षोडशीमृचमाह ॥

परा मे यंति धीतयो गावो न गव्यूतीरनु । इच्छंतीरुरुचक्षसं ॥ १६ ॥

परा । मे । यंति । धीतयः । गावः । न । गव्यूतीः । अनु । इच्छंतीः । उरुऽचक्षसं ॥ १६ ॥

उरुचक्षसं बहुभिर्द्रष्टव्यं वरुणमिच्छंतीर्मे धीतयः शुनःशेपस्य बुद्धयः परा यंति । पराङ्मुखा निवृत्तिरहिता गच्छंति । तत्र दृष्टांतः । गावो न । यथा गावो गव्यूतीरनु गोष्ठान्यनुलक्ष्य गच्छंति तद्वत् ॥ गव्यूतीः । गावोऽत्र यूयंत इत्यधिकरणे क्तिन् । गोर्यूतौ छंदसि । पा० ६. १. ७९. २. । इत्यवादेशः । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं । यद्वा यूतिर्यवनं । गवां यवनमत्रेति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । इच्छंतीः । इषु इच्छायां । लटः शतृ । तुदादिभ्यः शः । इषुगमियमां छ इति छत्वं । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः शिष्यते ॥

सप्तदशीमृचमाह ॥

सं नु वोचावहै पुनर्यतो मे मध्वाभृतं । होतेव क्षदसे प्रियं ॥ १७ ॥

सं । नु । वोचावहै । पुनः । यतः । मे । मधु । आऽभृतं । होताऽइव । क्षदसे ।
प्रियं ॥ १७ ॥

यतो यस्मात्कारणान्मे मज्जीवनार्थं मधुरं हविराभृतं । अंजःसवाख्ये कर्मणि संपादितं । अतः कारणाद्धोतेव होमकर्तेव त्वमपि प्रियं हविः क्षदसे । अश्नासि । पुनर्हविःस्वीकारादूर्ध्वं तृप्तस्त्वं जीवन्नहं च नु अवश्यं संवोचावहै । संभूय प्रियवार्तां करवावहै ॥ वोचावहै । लोडर्थे छांदसे लुङि ब्रुवो वचिः । अस्यतिवक्तीति च्लेरङादेशः । वच उमित्युमागमे गुणः । व्यत्ययेन टेरेत्वं । यद्वा लोट एव लुङादेशः । स्थानिवद्भावादैत्वं । आभृतं । हृग्रहोर्भः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥

अष्टादशीमृचमाह ॥

दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि । एता जुषत मे गिरः ॥ १८ ॥

दर्शं । नु । विश्वऽदर्शतं । दर्शं । रथं । अधि । क्षमि । एताः । जुषत । मे । गिरः ॥ १८ ॥

विश्वदर्शतं सर्वदर्शनीयमस्मदनुग्रहार्थमत्राविर्भूतं वरुणं दर्शं नु । अहं दृष्टवान्खलु । क्षमि क्षमायां भूमौ रथं वरुणसंबंधिनमधिदर्शं । आधिक्येन दृष्टवानस्मि । एता उच्यमाना मे गिरो मदीयाः स्तुतीर्जुषत । वरुणः सेवितवान् ॥ दर्शं । दृशेरिरितो वा । पा० ३. १. ५७. । इति च्लेरङादेशः । ऋदृशोऽङि गुणः । पा० ७. ४. १६. । इति गुणः । विश्वदर्शतं । दृशेर्भृमृदृशीत्यादिना । उ० ३. १०९. । अतच्प्रत्ययांतो दर्शतशब्दः । मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं । यद्वा विश्वं दर्शनीयमस्येति बहुव्रीहौ विश्वं संज्ञायां । पा० ६. २. १०६. । इति पूर्वपदांतोदात्तत्वं । क्षमि । आतो धातोः । पा० ६. ४. १४०. । इत्यत्रात इति योगविभागादाकारलोपः ॥

वरुणप्रघासेष्विमं मे वरुणेति वारुणस्य हविषोऽनुवाक्या । पंचम्यां पौर्णमास्यामिति खंडे सूत्रितं । इमं मे वरुण श्रुधि तत्त्वा यामि ब्रह्मणा वंदमानः । आ० २. १७. । इति । तामेतां सूक्त एकोनविंशीमृचमाह ॥

इमं मे वरुण श्रुधी हवमद्या च मृळय । त्वामवस्युरा चके ॥ १९ ॥

इमं । मे । वरुण । श्रुधि । हवं । अद्य । च । मृळय । त्वां । अवस्युः । आ । चके ॥ १९ ॥

हे वरुण मे मदीयमिमं हवमाह्वानं श्रुधि । शृणु । किंच । अद्यास्मिन्दिने मृळय । अस्मान्सुखय । अवस्युः रक्षणेच्छुरहं त्वां वरुणमाभिमुख्येन चके । शब्दयामि । स्तौमीत्यर्थः ॥ श्रुधि । श्रु श्रवणे । लोटो हिः । श्रुशृणुपृकृवृभ्यश्छंदसीति हेर्धिरादेशः । बहुलं छंदसीति विकरणस्य लुक् । अन्येषामपि दृश्यत इति संहितायां दीर्घः । अवस्युः । अवस्शब्दात्सुप आत्मनः क्यच् । क्याच्छंदसीत्युप्रत्ययः । आचके । कै गै शब्दे । अस्माल्लिट्यादेचः । पा० ६. १. ४५. । इत्यात्वं । द्विर्भावचुत्वे । आतो लोप इटि च । पा० ६. ४. ६४. । इत्याकारलोपः । तिङ्ङतिङ इति निघातः ॥

विंशीमृचमाह ॥

त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि । स यामनि प्रति श्रुधि ॥ २० ॥

त्वं । विश्वस्य । मेधिर । दिवः । च । ग्मः । च । राजसि । सः । यामनि । प्रति । श्रुधि ॥ २० ॥

हे मेधिर मेधाविन्वरुण त्वं दिवश्च द्युलोकस्यापि ग्मश्च भूलोकस्यापि । एवमात्मकस्य विश्वस्य सर्वस्य जगतो मध्ये राजसि । दीप्यसे । स तादृशस्त्वं यामनि क्षेमप्रापणेऽस्मदीये प्रतिश्रुधि । प्रतिश्रवणमाज्ञापनं कुरु । रक्षिष्यामीति प्रत्युत्तरं देहीत्यर्थः ॥ दिवः । ऊडिदमित्यादिना षष्ठ्या उदात्तत्वं । ग्मः । ग्मेत्येतद्भूनामसु पठितं । आतो धातोरित्यत्रात इति योगविभागादातो लोप इति प्रतिषेधेऽपि व्यत्ययेनाकारलोपः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं । यामनि । या प्रापणे । आतो मनिन्क्वनिब्वनिपश्चेति मनिन् । नित्त्वादाद्युदात्तत्वं । श्रुधि । उक्तं ॥

एकविंशीमृचमाह ॥

उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत । अवाधमानि जीवसे ॥ २१ ॥

उत् । उत्ऽतमं । मुमुग्धि । नः । वि । पाशं । मध्यमं । चृत । अव । अधमानि । जीवसे ॥ २१ ॥

नोऽस्माकमुत्तमं शिरोगतं पाशमुन्मुमुग्धि । उत्कृष्य मोचय । मध्यममुदरगतं पाशं विचृत । वियुज्य नाशय । जीवसे जीवितुमधमानि मदीयान्पादगतान्पाशानवचृत । अवकृष्य नाशय ॥ उत्तमं । उञ्छादिषु पाठादंतोदात्तत्वं । मुमुग्धि । मुच्ऌ मोक्षणे । बहुलं छंदसीति विकरणस्य श्लुः । द्विर्भावः । हलादिशेषः । हुझल्भ्यो हेर्धिः । पा० ६. ४. १०१. । इति हेर्धिरादेशः । तिङ्ङतिङ इति निघातः । चृत । चृती हिंसाग्रंथनयोः । लोटो हिः । तुदादिभ्यः शः । अतो हेरिति हेर्लुक् । जीवसे । जीव प्राणधारणे । तुमर्थे सेसेनित्यसेप्रत्ययः । प्रत्ययस्वरः ॥

॥ इति प्रथमस्य द्वितीय एकोनविंशो वर्गः ॥

त्वमिष्वेति दशर्चं तृतीयं सूक्तं । अत्रानुक्रम्यते । त्वमिष्वा दशाग्नेयं त्विति । शुनःशेप ऋषिः । गायत्री छंदः । इदमुत्तरं च सूक्तमाग्नेयं । प्रातरनुवाक आग्नेये

ऋतौ गायत्रे छंदस्येतदादिसूक्तद्वयमनुवक्तव्यं। तथा च सूचितं। वसिष्वा हीति सूक्तयोरुत्तमामुद्धरेदिति ॥ अस्मिन्सूक्ते प्रथमामृचमाह ॥

वसि॑ष्वा॒ हि मि॑येध्य॒ वस्त्रा॑ण्यूर्जां पते। सेमं नो॑ अध्व॒रं य॑ज ॥ १ ॥

वसि॑ष्व। हि। मि॒ये॒ध्य॒। वस्त्रा॑णि। ऊ॒र्जा॒म्। प॒ते॒। सः। इ॒मम्। नः॒। अ॒ध्व॒रम्। य॒ज॒ ॥ १ ॥

वरुणेनाग्निस्तुतौ प्रेरितः शुनःशेप एतदादिसूक्तद्वयेनाग्निमस्तौत्। तथा चाम्नायते। तं वरुण उवाचाग्निर्वै देवानां मुखं सुहृदयतमः। तं नु स्तुह्यथ त्वोत्स्रक्ष्यामीति सोऽग्निं तुष्टावात उत्तराभिर्द्वाविंशत्येति ॥ हे मियेध्य मेधस्य यज्ञस्य योग्य। ऊर्जां पते। अन्नानां पालकाग्ने वस्त्राण्याच्छादकानि तेजांसि वसिष्व। आच्छादय। प्रज्वलितस्तेजसा भवेत्यर्थः। हि यस्मात्प्रज्वलितस्तस्मात्स तादृशस्त्वं नोऽस्मदीयमिममध्वरं यज। निष्पादय ॥ वसिष्व। वस आच्छादने। लोटि थासः से। सवाभ्यां वामौ। छंदस्युभयथेत्यार्धधातुकत्वादार्धधातुकस्येड्वला-देरितीडागमः। लसार्वधातुकानुदात्तत्वे धातुस्वरः। अन्येषामपि दृश्यत इति संहितायां दीर्घः। मियेध्य। मकारेकारयोर्मध्य इयागमश्छांदसः। ऊर्जां पते। सुबामंत्रित इति परांगवद्भावात् षष्ठ्यामंत्रितस्य समुदायस्याष्टमिको निघातः। सेमं। सोऽचि लोपे चेत्पादपूरणमिति सोर्लोपः ॥

द्वितीयामृचमाह ॥

नि नो॒ होता॒ वरे॑ण्यः॒ सदा॑ यविष्ठ॒ मन्म॑भिः। अग्ने॑ दि॒वित्म॑ता॒ वचः॑ ॥ २ ॥

नि। नः॒। होता॑। वरे॑ण्यः। सदा॑। य॒वि॒ष्ठ॒। मन्म॑ऽभिः। अग्ने॑। दि॒वित्म॑ता। वचः॑ ॥ २ ॥

सदा यविष्ठ सर्वदा युवतम हे अग्ने वरेण्यो वरणीयस्त्वं नोऽस्माकं होता होमनिष्पादको भूत्वा दिवित्मता दीप्तिमता वचो वचसा स्तूयमानः सन् निषीदेति शेषः। कीदृशस्त्वं। मन्मभिर्ज्ञापकैस्तेजोभिर्युक्त इति शेषः ॥ यविष्ठ। युवशब्दा-दिष्ठनि स्थूलदूरेत्यादिना यणादिपरस्य लोपः। पूर्वस्योकारस्य गुणश्च। अवा-देशः। आमंत्रितनिघातः। मन्मभिः। मन ज्ञाने। अन्येभ्योऽपि दृश्यंत इति मनिन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं। दिवित्मता। दिवु क्रीडादौ। इक्श्तिपौ धातु-निर्देश इतीक्प्रत्ययः। तेन च धातुवाचिना दिविशब्देन धात्वर्थो दीप्तिर्लक्ष्यते। यद्वा। औणादिको भावे किप्रत्ययः। दिविशब्दान्मतुपि तकारोपजनश्छांदसः।

यद्वा। बाहुलकाद्विवेर्भाव इतक्। मतुपि तसौ मत्वर्थ इति भत्वाज्जश्त्वाभावः। वचः। सुपां सुलुगिति तृतीयैकवचनस्य लुक् ॥

तृतीयामृचमाह ॥

आ हि ष्मा सूनवे पितापिर्यजत्यापये। सखा सख्ये वरेण्यः ॥ ३ ॥

आ। हि। स्म। सूनवे। पिता। आपिः। यजति। आपये। सखा। सख्ये। वरेण्यः ॥ ३ ॥

हे अग्ने वरेण्यो वरणीयः पितापि पितृस्थानीयस्त्वं सूनवे पुत्रस्थानीयाय मह्यमभीष्टं देहीति शेषः। हि ष्मेति निपातद्वयं सर्वथेत्यमुमर्थमाचष्टे। अभीष्टदाने दृष्टांतद्वयमुच्यते। यथापिर्बंधुरापये बंधव आयजति हि स्म। सर्वथा ददातीति शेषः। सखा प्रियः सख्ये प्रियायाभीष्टं सर्वथा ददाति तथा त्वमपि देहि ॥ स्मा सूनवे। निपातस्य चेति दीर्घः। यजतीत्यस्य सखा सख्य इत्यचाप्यनुषंगात्तदपेक्षयेयं प्रथमेति चादिलोपे विभाषेति न निहन्यते। यद्वा हि चेति निघातप्रतिषेधः। सख्ये। समाने ख्यश्चोदात्त इति सखिशब्द इणप्रत्ययांत आद्युदात्तः। सुपः पित्त्वादनुदात्तत्वे स एव शिष्यते ॥

चतुर्थीमृचमाह ॥

आ नो बर्ही रिशादसो वरुणो मित्रो अर्यमा। सीदंतु मनुषो यथा ॥ ४ ॥

आ। नः। बर्हिः। रिशादसः। वरुणः। मित्रः। अर्यमा। सीदंतु। मनुषः। यथा ॥ ४ ॥

हे अग्ने वरुणादयो देवास्त्वद्बंधवस्त्वया प्रेरिता रिशादसो हिंसकानदंतो नोऽस्मदीयं बर्हिर्यज्ञमासीदंतु। तत्र दृष्टांतः। यथा मनुषः प्रजापतेर्यज्ञमासीदंति। तद्वत् ॥ बर्ही रिशादसः। विसर्जनीयस्य रुत्वे कृते रो रि। पा० ८. ३. १४.। इति रेफलोपः। ढ्रलोपे पूर्वस्य दीर्घोऽणः। पा० ६. ३. १११.। इतीकारस्य दीर्घत्वं। रिशादसः। रिश हिंसायां। रिशंति हिंसंतीति रिशाः शत्रवः। इगुपधज्ञाप्रीकिरः कः। तानदंतीति रिशादसः। सर्वधातुभ्योऽसुन्। कृदुत्तरपदप्रकृतिस्वरत्वं। सीदंतु। षद्लृ विशरणगत्यवसादनेषु। पाघ्रेत्यादिना सीदादेशः। शपः पित्त्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। मनुषः। मन ज्ञाने। मन्यते जानातीति मनुः प्रजापतिः। जनेरुसिर्निच्च। उ० २. १११. ११३.। इत्यनु-

वृत्तौ बहुलमन्यत्रापीत्यौणादिक उसिप्रत्ययः। निर्त्त्वादाद्युदात्तत्वं। यथा। यथेति पादांते। फि० ४. १५.। इति सर्वानुदात्तत्वं ॥

पंचमीमृचमाह ॥

पूर्व्य होतरस्य नो मंदस्व सख्यस्य च। इमा उ षु श्रुधी गिरः ॥ ५ ॥

पूर्व्य। होतः। अस्य। नः। मंदस्व। सख्यस्य। च। इमाः। ऊं इति। सु। श्रुधि। गिरः ॥ ५ ॥

हे पूर्व्य। अस्मदादेः पूर्वमुत्पन्न होतर्होमनिष्पादकाग्ने नोऽस्मदीयस्यास्य प्रवर्तमानस्य यज्ञस्य सख्यस्य चास्मदनुग्रहस्य च सिद्ध्यर्थं मंदस्व। त्वं हृष्टो भव। इमा अस्माभिः प्रयुज्यमाना गिर उ षु स्तुतिरूपा वाचोऽपि श्रुधि। शृणु ॥ पूर्व्य। आमंत्रितनाद्युदात्तत्वं। होतरित्यस्य नामंत्रिते समानाधिकरण इति पूर्वस्य विद्यमानत्वादाष्टमिको निघातः। अस्य। ऊडिदमिति षष्ठ्या उदात्तत्वं। मंदस्व। मदि स्तुतिमोदमदस्वप्नकांतिगतिषु। शपः पित्त्वादनुदात्तत्वं। तिङश्च लसार्वधातुकस्वरेण धातुस्वरः। अपादादाविति पर्युदासादाष्टमिकनिघाताभावः। सख्यस्य। सख्युः कर्म सख्यं। सख्युर्यः। पा० ५. १. १२६.। इति यप्रत्ययः। यस्येति लोपे प्रत्ययस्वरः। उ षु। सुञः। पा० ८.३.१०७.। इति षत्वं। श्रुधि। श्रु श्रवणे। श्रुशृणुपृकृवृभ्यश्छंदसीति हेर्धिरादेशः। बहुलं छंदसीति शपो लुक् ॥

॥ इति प्रथमस्य द्वितीये विंशो वर्गः ॥

षष्ठीमृचमाह ॥

यच्चिद्धि शश्वता तना देवंदेवं यजामहे। त्वे इद्धूयते हविः ॥ ६ ॥

यत्। चित्। हि। शश्वता। तना। देवंऽदेवं। यजामहे। त्वे इति। इत्। हूयते। हविः ॥ ६ ॥

हे अग्ने यच्चिद्धि यद्यपि शश्वता शाश्वतेन नित्येन तना विस्तृतेन हविषा देवं देवमन्यमन्यं वरुणेंद्रादिरूपं नानाविधं देवताविशेषं यजामहे। तथापि तद्धविः सर्वं त्वे इत्त्वय्येव हूयते। अतो देवांतरविषयो यागोऽपि त्वदीयैव सेवेत्यर्थः ॥ तना। तनु विस्तारे। क्विप् चेति क्विप्। यद्वा पचाद्यच्। सुपां सुलुगिति तृतीयाया आकारः। देवं देवं। नित्यवीप्सयोरिति द्विर्भावः। तस्य

परमाम्रेडितमित्युत्तरस्याम्रेडितसंज्ञायामनुदात्तं चेति सर्वानुदात्तत्वं। यजामहे। निपातैर्यद्यदिहंतेति निघातप्रतिषेधः। त्वे। युष्मच्छब्दात्सप्तम्येकवचनस्य सुपां सुलुगिति शे आदेशः। त्वमावेकवचन इति मपर्यंतस्य त्वादेशः। शेषलोपेऽतो गुण इति पररूपत्वं। शे इति प्रगृह्यसंज्ञायां प्लुतप्रगृह्या अचि। पा॰ ६.१.१२५। इति प्रकृतिभावः। हूयते। अकृत्सार्वधातुकयोः। पा॰ ७.४.२५। इति दीर्घः॥

सप्तमीमृचमाह॥

प्रियो नो अस्तु विश्पतिर्होता मंद्रो वरेण्यः। प्रिया स्वग्नयो वयं॥७॥

प्रियः। नः। अस्तु। विश्पतिः। होता। मंद्रः। वरेण्यः। प्रियाः। सुऽअग्नयः। वयं॥७॥

विश्पतिर्विशां प्रजानां पालको होता होमनिष्पादको मंद्रो हृष्टो वरेण्यो वरणीयोऽग्निर्नोऽस्माकं प्रियोऽस्तु। वयमपि स्वग्नयः शोभनाग्नियुक्ताः संतस्तव प्रिया भूयास्मेति शेषः॥ विश्पतिः। पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरे प्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। वरेण्यः। वृञ्। एण्यः। वृषादित्वादाद्युदात्तत्वं। स्वग्नयः। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं॥

अष्टमीमृचमाह॥

स्वग्नयो हि वार्यं देवासो दधिरे च नः। स्वग्नयो मनामहे॥८॥

सुऽअग्नयः। हि। वार्यं। देवासः। दधिरे। च। नः। सुऽअग्नयः। मनामहे॥८॥

स्वग्नयः शोभनाग्नियुक्ता देवासो दीप्यमाना ऋत्विजो नोऽस्मदीयं वार्यं वरणीयं हविर्हि यस्माद्दधिरे। धृतवंतः। तस्माद्वयं स्वग्नयः शोभनाग्नियुक्ताः संतो मनामहे। त्वां याचामहे॥ वार्यं। वृञ् वरणे। वृङ् संभक्तौ। ऋहलोर्ण्यत्। ईडवंदेत्यादिनाद्युदात्तत्वं। दधिरे। इरयश्चित्त्वादंतोदात्तत्वं। हि चेति निघातप्रतिषेधः। मनामहे। मन ज्ञाने। व्यत्ययेन शप्॥

नवमीमृचमाह॥

अथा न उभयेषाममृत मर्त्यानां। मिथः संतु प्रशस्तयः॥९॥

अथ। नः। उभयेषां। अमृत। मर्त्यानां। मिथः। संतु। प्रऽशस्तयः॥९॥

हे अग्ने अमृत मरणरहिताग्ने। अथ कर्मानुष्ठानानंतरं मर्त्यानां मनुष्याणां

नोऽस्माकमस्मत्स्वामिनस्तव चोभयेषां मिथः परस्परं प्रशस्तयः प्रशंसारूपा वाचः संतु । सम्यगनुष्ठितमिति यजमानविषया प्रशंसा । सम्यगनुगृहीतमित्यग्निविषया ॥ अथ । निपातस्य चेति संहितायां दीर्घः । अमृत । अपादादाविति पर्युदासात्षाष्ठिकमाद्युदात्तत्वं । मर्त्यानां । मृङ् प्राणत्यागे । असिहसीत्यादिना तन्प्रत्ययांतो मर्तशब्दः । तस्माद्भवे छंदसि । पा॰ ४. ४. ११०. । इति यत् । यतोऽनाव इत्याद्युदात्तत्वं । संतु । श्नसोरल्लोपः । प्रशस्तयः । तादौ चेति गतेः प्रकृतिस्वरत्वं ॥

दशमीमृचमाह ॥

विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः । चनो धाः सहसो यहो ॥ १० ॥

विश्वेभिः । अग्ने । अग्निऽभिः । इमं । यज्ञं । इदं । वचः । चनः । धाः । सहसः । यहो इति ॥ १० ॥

सहसो बलस्य यहो पुत्र हे देवतारूपाग्ने विश्वेभिरग्निभिः सर्वैराहवनीयादिभिर्युक्तस्त्वमिममस्मदीयं यज्ञमिदमस्मदीयं वचः स्तोत्रं च सेवमानश्चनोऽन्नं धाः । अस्मभ्यं धेहि ॥ विश्वेभिः । बहुलं छंदसीति भिस ऐसादेशाभावः । चनः । चायृ पूजानिशामनयोः । चायेरन्ने ह्रस्वश्चेत्यसुन् । तत्संनियोगेन नुडागमश्च । नित्त्वादाद्युदात्तत्वं । धाः । लुङि गातिस्थेति सिचो लुक् । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । सहसो यहो इति सुबामंत्रित इति परांगवद्भावादामंत्रितस्य चेति षष्ठ्यामंत्रितसमुदायो निहन्यते ॥

॥ इति प्रथमस्य द्वितीय एकविंशो वर्गः ॥

अश्वं न त्वेति त्रयोदशर्चं चतुर्थं सूक्तं । पूर्ववदृष्यादयः । त्रयोदश्या नमो महद्भ्य इत्यस्यास्त्रिष्टुप् छंदः । विश्वे देवा देवता । तथा चानुक्रांतं । अश्वं सप्तोना गायत्रेऽंत्या दैवी त्रिष्टुबिति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तमावर्जितस्य सूक्तस्य विनियोग उक्तः । तस्मिन्सूक्ते प्रथमामृचमाह ॥

अश्वं न त्वा वारवंतं वंदध्या अग्निं नमोभिः । सम्राजंतमध्वराणां ॥ १ ॥

अश्वं । न । त्वा । वारऽवंतं । वंदध्यै । अग्निं । नमःऽभिः । संऽराजंतं । अध्वराणां ॥ १ ॥

अध्वराणां यज्ञानां सम्राजंतं सम्राटस्वरूपं स्वामिनमग्निं त्वां नमोभिः स्तुति-

भिर्वंदध्यै वंदितुं प्रवृत्ता इति शेषः। अत्र दृष्टांतः। वारवंतं वालयुक्तमश्वं न। अश्वमिव। अश्वो यथा वालैर्बाधकान्मशकमक्षिकादीन्परिहरति तथा त्वमपि ज्वालाभिरस्मद्विरोधिन परिहरसीत्यर्थः॥ वारवंतं। मतुपः पित्त्वादनुदात्तत्वं। घञो ञित्त्वादाद्युदात्तो वारशब्दः। कर्षात्वत इत्यंतोदात्तत्वं व्यत्ययेन न प्रवर्तते। यद्वा वारयति दंशकानिति वारः। पचाद्यच्। कपिलादित्वाल्लत्वविकल्पः। वृषादिः। वंदध्यै। वदि अभिवादनस्तुत्योः। इदितो नुम् धातोरिति नुम्। तुमर्थे सेसेनित्यध्यैप्रत्ययः। प्रत्ययस्वरः। सम्राजंतं। शपः पित्त्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। समासे कृदुत्तरपदप्रकृतिस्वरेण स एव। अध्वराणां। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं॥

द्वितीयामृचमाह॥

स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः। मीढ्वाँ अस्माकं बभूयात्॥२॥

सः। घ। नः। सूनुः। शवसा। पृथुऽप्रगामा। सुऽशेवः। मीढ्वान्। अस्माकं। बभूयात्॥२॥

स घ स एवाग्निर्नोऽस्माकं सुशेवः सुसुखो भवत्विति शेषः। कीदृशः। शवसा बलस्य सूनुः पुत्रः। पृथुप्रगामा। पृथुप्रगमनः। किंच। अस्माकं मीढ्वान् कामानां वर्षिता बभूयात्। भवतु॥ घा नः। ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणां। पा० ६.३.१३३.। इति दीर्घः। शवसा। सुपां सुपो भवंतीति ङसष्टादेशः। पृथुप्रगामा। प्रकर्षेण गमनं प्रगामः। हलश्चेति घञ्। पृथुः प्रगामा यस्यासौ पृथुप्रगामा। सुपां सुलुगिति पूर्वसवर्ण आकारः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। सुशेवः। इणशीङ्भ्यां वन्। उ० १.१५१.। इति शेवशब्दो वन्प्रत्ययांत आद्युदात्तः। ततो बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वे प्राप्ते आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं। मीढ्वान्। मिह सेचन इत्यस्मात्क्वसुप्रत्ययांतो दाश्वान् साह्वान् मीढ्वांश्चेति निपातितः। बभूयात्। भवतेश्छांदसस्य लिटस्तिङां तिङो भवंतीति लिङादेशः। यासुट्स्यानिवद्भावादार्धधातुकत्वाच्छबभावः। द्विर्वचने भवतेरः। पा० ७.४.७३.। इत्यत्वं। तिङ्ङतिङ इति निघातः। यद्वा। एतस्मादेव लिङि छांदसः श्लुः। भुवतेर इति लिटि विहितमभ्यासस्य सर्वे विधयश्छंदसि विकल्प्यंत इत्यत्वं॥

तृतीयामृचमाह ॥

स नो दूराच्चासाच्च नि मर्त्यादघायोः । पाहि सदमिद्विश्वायुः ॥ ३ ॥

सः । नः । दूरात् । च । आसात् । च । नि । मर्त्यात् । अघऽयोः । पाहि । सदं । इत् । विश्वऽआयुः ॥ ३ ॥

हे अग्ने विश्वायुर्व्याप्तगमनः स त्वं दूराच्च दूरेऽपि । आसाच्चासन्नदेशेऽपि । अघायोरघं पापमनिष्टं कर्तुमिच्छतो मर्त्यान्मनुष्याद्वैरिणो नोऽस्मान्सदमित् सर्वदैव निपाहि । नितरां पालय ॥ अघायोः । सुप आत्मनः क्यच् । अश्वाघस्यादित्यात्वं । पाहि । पादादित्वादनिघातः । विश्वायुः । इण् गतावित्यस्माद्भावे एतेर्णिच्च । उ० २. ११४. । इत्युसिः । विश्वमयनं गमनं यस्येति बहुव्रीहिः । बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं ॥

चतुर्थीमृचमाह ॥

इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसं । अग्ने देवेषु प्र वोचः ॥ ४ ॥

इमं । ऊं इति । सु । त्वं । अस्माकं । सनिं । गायत्रं । नव्यांसं । अग्ने । देवेषु । प्र । वोचः ॥ ४ ॥

हे अग्ने त्वमस्माकमस्मत्संबंधिनमिममू षु पुरोदेशेऽनुष्ठीयमानमपि सनिं हविर्दानं नव्यांसं नवतरं गायत्रं स्तुतिरूपं वचोऽपि देवेषु देवानामग्रे प्रवोचः । प्रब्रूहि ॥ ऊ षु । निपातस्य चेति संहितायां दीर्घत्वं । सुञ इति षत्वं । नव्यांसं । नवशब्दादीयसुनीकारलोपश्छांदसः । ईयसुनो नित्त्वादाद्युदात्तत्वं । वोचः । छंदसि लुङ्लङ्लिट इति लोडर्थे प्रार्थनायां लुङ्अस्यतिवक्तीति च्लेरङादेशः । वच उम् ॥

पंचमीमृचमाह ॥

आ नो भज परमेष्वा वाजेषु मध्यमेषु । शिक्षा वस्वो अंतमस्य ॥ ५ ॥

आ । नः । भज । परमेषु । आ । वाजेषु । मध्यमेषु । शिक्ष । वस्वः । अंतमस्य ॥ ५ ॥

हे अग्ने परमेषूत्कृष्टेषु द्युलोकवर्तिषु वाजेष्वन्नेषु नोऽस्मानाभज । सर्वतः प्रापय । मध्यमेष्वंतरिक्षलोकवर्तिषु वाजेष्वाभज । अंतमस्यांतिकतमस्य भूलोकस्य संबंधीनि वस्वो वसूनि शिक्ष । देहि ॥ शिक्ष विद्योपादाने । शपः पित्त्वाद्धा-

तुस्वरः । अचोऽतस्तिङ इति संहितायां दीर्घः । अंतमस्य । अंतिकतमस्य तमे तादेश्चेति तिकशब्दलोपः ॥

॥ इति प्रथमस्य द्वितीये द्वाविंशो वर्गः ॥

षष्ठीमृचमाह ॥

विभक्तासि चित्रभानो सिंधोरूर्मा उपाक आ । सद्यो दाशुषे क्षरसि ॥ ६ ॥

विऽभक्ता । असि । चित्रभानो इति चित्रऽभानो । सिंधोः । ऊर्मा । उपाके । आ । सद्यः । दाशुषे । क्षरसि ॥ ६ ॥

हे चित्रभानो विचित्ररश्मियुक्ताग्ने विभक्ता । विशिष्टस्य धनस्य प्रापयितासि । तत्र दृष्टांत उच्यते । आकार उपमार्थः । यथा सिंधोर्नद्या उपाके समीप ऊर्मावूर्मितरंगोपलक्षितं कुल्यादिरूपं प्रवाहं विभजंति तद्वत् । दाशुषे हविर्दत्तवते यजमानाय सद्यस्तदानीमेव क्षरसि । कर्मफलभूतां वृष्टिं करोषि ॥ सिंधोः । स्यंदू प्रस्रवणे । स्यंदेः संप्रसारणं धश्च । उ० १. ११. । इत्युप्रत्ययः । निदित्यनुवृत्तेराद्युदात्तत्वं । ऊर्मिः । अर्तेरूच्च । उ० ४. ४५. । इति मिः । प्रत्ययस्वरः । दाशुषे । धृतव्रताय दाशुष इत्यत्रोक्तं ॥

सप्तमीमृचमाह ॥

यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः । स यंता शश्वतीरिषः ॥ ७ ॥

यं । अग्ने । पृत्ऽसु । मर्त्यं । अवाः । वाजेषु । यं । जुनाः । सः । यंता । शश्वतीः । इषः ॥ ७ ॥

हे अग्ने पृत्सु संग्रामेषु यं मर्त्यं यजमानमवाः । अवसि । रक्षसि । यं पुरुषं वाजेषु संग्रामेषु जुनाः । प्रेरयसि । स नरो यजमानः शश्वतीरिषो नित्यान्यन्नानि यंता । नियंतुं समर्थो भवति ॥ पृत्सु । पदादिषु मांस्पृत्स्नूनामुपसंख्यानं । पा० ६. १. ६३. १. । इति पृतनाशब्दस्य पृदादेशः । सावेकाच इति विभक्तेरुदात्तत्वं । अवाः । आवः । अकाराकारयोर्विपर्ययः । यद्वा लेट्याडागमः । इतश्चेति सिप इकारस्य लोपः । जुनाः । जू इति गत्यर्थः सौत्रो धातुः । लङः सिप् । क्र्यादिभ्यः श्ना । बहुलं छंदस्यमाङ्योगेऽपीत्यडागमाभावः । यद्वृत्तयोगादनिघातः । यंता । तृनो नित्वादाद्युदात्तत्वं । शश्वतीः । उगितश्चेति ङीप् ॥

अष्टमीमृचमाह ॥

नकिरस्य सहंत्य पर्येता कयस्य चित्। वाजो अस्ति श्रवाय्यः ॥ ८ ॥

नकिः। अस्य। सहंत्य। परिऽएता। कयस्य। चित्। वाजः। अस्ति। श्रवाय्यः ॥ ८ ॥

हे सहंत्य शत्रूणामभिभवनशीलाग्ने। अस्य त्वद्भक्तस्य यजमानस्य कयस्य चित्कस्यापि पर्येता नकिः। आक्रमिता नास्ति। किंचास्य यजमानस्य श्रवाय्यः श्रवणीयो वाजोऽस्ति। बलविशेषोऽस्ति ॥ कयस्य। यकारोपजनश्छांदसः। श्रवाय्यः। श्रुदक्षिस्पृहिगृहिभ्य आय्यः। उ० ३. ९५.। इत्याय्यप्रत्ययः ॥

नवमीमृचमाह ॥

स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता। विप्रेभिरस्तु सनिता ॥ ९ ॥

सः। वाजं। विश्वऽचर्षणिः। अर्वत्ऽभिः। अस्तु। तरुता। विप्रेभिः। अस्तु। सनिता ॥ ९ ॥

विश्वचर्षणिः सर्वमनुष्यैरुपेतः सोऽग्निरर्वद्भिरश्वैर्वाजं संग्रामं तरुता तारयितास्तु। विप्रेभिर्मेधाविभिर्ऋत्विग्भिः सहितस्तुष्टोऽग्निः सनिता फलस्य दातास्तु ॥ विश्वचर्षणिः। विश्वे चर्षणयो यस्य। बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं। अर्वद्भिः। ऋ गतौ। अन्येभ्योऽपि दृश्यंत इति वनिप्। भिस्यर्वणस्तसावनञः। पा० ६. ४. १२७.। इति नकारस्य तृ इत्ययमादेशः। तरुता। तॄ प्लवनतरणयोः। अस्माद्ग्रसितस्कभितेत्यादौ तृनंतो निपातितः। निपातनादेवकारस्योत्वं ॥

अप्तोर्यामे होतुरतिरिक्तोक्थे जराबोध तद्विविड्ढीति स्तोत्रियस्तृचः। यस्य पशवो नोपधरेरन्निति खंडे सूचितं। अतिरिक्तोक्थानि जराबोध तद्विविड्ढि। आ० ९. ११.। इति। तामेतां सूक्ते दशमीमृचमाह ॥

जराबोध तद्विविड्ढि विशेविशे यज्ञियाय। स्तोमं रुद्राय दृशीकं ॥ १० ॥

जराऽबोध। तत्। विविड्ढि। विशेऽविशे। यज्ञियाय। स्तोमं। रुद्राय। दृशीकं ॥ १० ॥

हे जराबोध जरया स्तुत्या बोधमानाग्ने विशे विशे तत्तद्यजमानरूपप्रजानुग्रहार्थं यज्ञियाय यज्ञसंबंध्यनुष्ठानसिद्ध्यर्थं तदेव यजनं विविड्ढि। प्रविश। यजमानोऽपि रुद्राय क्रूरायाग्नये तुभ्यं दृशीकं दर्शनीयं समीचीनं स्तोमं स्तोत्रं

करोतीति शेषः। अत्र यास्क एवं व्याख्यातवान्। जरा स्तुतिर्जरतेः स्तुतिकर्मणस्तां बोध तया बोधयितरिति वा तद्विविड्ढि तत्कुरु मनुष्यस्य मनुष्यस्य यज्ञियाय स्तोमं रुद्राय दर्शनीयं। नि° १०. ८.। इति ॥ जराबोध। जॄष् वयोहानौ। अत्र तु स्तुत्यर्थः। षिद्भिदादिभ्योऽङ्। पा° ३. ३. १०४.। इत्यङ्प्रत्ययः। ततष्टाप्। जरया स्तुत्या बोधो यस्यासौ जराबोधः। यद्वा जरया बोध्यत इति जराबोधः। कर्मणि घञ्। आमंत्रितायुदात्तत्वं। विविड्ढि। विश प्रवेशने। लोटो हि। बहुलं छंदसीति शपः श्लुः। अभ्यासहलादिशेषौ। हुझल्भ्यो हेर्धिरिति हेर्धिरादेशः। षत्वष्टुत्वे। यद्वा विष्लृ व्याप्तावित्यस्माल्लोणमध्यमैकवचनेऽभ्यासस्य गुणाभावः। विशे विशे। सावेकाच इति चतुर्थ्या उदात्तत्वं। अनुदात्तं चेत्याम्रेडितानुदात्तत्वं। यज्ञियाय। यज्ञर्त्विग्भ्यां घखञौ। पा° ५. १. ७१.। इति घः। दृशीकं। अनिदृशिभ्यां च। उ° ४. १७.। इति कीकन्प्रत्ययः। नित्त्वादाद्युदात्तः ॥

॥ इति प्रथमस्य द्वितीये त्रयोविंशो वर्गः ॥

एकादशीमृचमाह ॥

स नो॑ म॒हाँ अ॑निमा॒नो धू॒मके॑तुः पुरु॒श्च॒न्द्रः। धि॒ये वाजा॑य हिन्वतु ॥ ११ ॥

सः। नः॒। म॒हान्। अ॒नि॒ऽमा॒नः। धू॒म॒ऽके॒तुः। पु॒रु॒ऽच॒न्द्रः। धि॒ये। वाजा॑य। हि॒न्व॒तु॒ ॥ ११ ॥

सोऽग्निर्नोऽस्मान्धिये कर्मणे वाजायान्नाय च हिन्वतु। प्रीणयतु। कीदृशः। महान्। गुणाधिकः। अनिमानः। निमानवर्जितः। अपरिच्छिन्न इत्यर्थः। धूमकेतुः। धूमेन ज्ञाप्यमानः। पुरुश्चंद्रः। बहुदीप्तिः ॥ महाँ अनीत्यत्र संहितायां नकारस्य रुत्वानुनासिकावुक्तौ। अनिमानः। न विद्यते निमानोऽस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। धूमकेतुः। इषियुधींधिदसिश्याधूसूभ्यो मक्। उ° १. १४३.। चायः किः। उ° १. ७३.। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। पुरुश्चंद्रः। चदि आह्लादने दीप्तौ च। अस्मात्स्फायितंचीत्यादिना कर्तरि रक्। पुरुश्चासौ चंद्रश्चेति समासांतोदात्तत्वं। ह्रस्वाच्चंद्रोत्तरपदे मंत्रे। पा° ६. १. १५१.। इति सुट्। तस्य श्चुत्वेन शकारः। धियै। सावेकाच इति चतुर्थ्या उदात्तत्वं। हिन्वतु। हिवि प्रीणनार्थः। इदितो नुम् धातोरिति नुम् ॥

द्वादशीमृचमाह ॥

स रेवाँ इव विश्पतिर्दैव्यः केतुः शृणोतु नः । उक्थैरग्निर्बृहद्भानुः ॥ १२ ॥

सः । रेवान्ऽइव । विश्पतिः । दैव्यः । केतुः । शृणोतु । नः । उक्थैः । अग्निः । बृहत्ऽभानुः ॥ १२ ॥

सोऽग्निरुक्थैः स्तोत्रैर्युक्तान् नोऽस्मान् शृणोतु । तत्र दृष्टांतः । रेवानिव । यथा लोके धनवान् राजा वंदिनां स्तोत्रं शृणोति तद्वत् । कीदृशः । विश्पतिः । प्रजापालकः । दैव्यः । देवानां संबंधी । अग्निर्वै देवानां होतेति श्रुत्यंतरात् । केतुः । दूतवज्ज्ञापकः । अग्निर्वै देवानां दूत आसीदिति श्रुतेः । बृहद्भानुः । प्रौढरश्मिः ॥ स रेवान् । एतत्तदोः । पा॰ ६. १. १३२. । इति सोर्लोपः । रयेर्मतौ बहुलमिति संप्रसारणं । परपूर्वत्वं । आद्गुणः । छंदसीर इति मतुपो वत्वं । आरेशब्दाच्च मतुप उदात्तत्वं वक्तव्यं । पा॰ ६. १. १७६. १. । इति मतुप उदात्तत्वं । विश्पतिः । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । बृहद्भानुः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

दर्शपूर्णमासयोः स्रुगादापनात्पूर्वभाविनि जपे नमो महद्भ्य इत्येषा । ब्राह्मौदने प्राशिष्यमाण इति खंडे सूर्यो नो दिवस्पातु नमो महद्भ्यो नमो अर्भकेभ्यः । आ॰ १. ४. । इति सूत्रितं । तामेतां त्रयोदशीमृचमाह ॥

नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः ।
यजाम देवान्यदि शक्नवाम मा ज्यायसः शंसमा वृक्षि देवाः ॥ १३ ॥

नमः । महत्ऽभ्यः । नमः । अर्भकेभ्यः । नमः । युवऽभ्यः । नमः । आशिनेभ्यः ।
यजाम । देवान् । यदि । शक्नवाम । मा । ज्यायसः । शंसं । आ । वृक्षि । देवाः ॥ १३ ॥

अग्निना प्रेरितः शुनःशेपो विश्वान्देवाननया तुष्टाव । तथा चाम्नायते । तमग्निरुवाच विश्वान्नु देवान् स्तुह्यथ त्वोत्स्रक्ष्यामीति स विश्वान्देवांस्तुष्टाव नमो महद्भ्यो नमो अर्भकेभ्य इत्येतयर्चेति ॥ महांतो गुणैरधिकाः । अर्भका गुणैर्न्यूनाः । युवानस्तरुणाः । आशिना वयसा व्याप्ता वृद्धाः । यथोक्तचतुर्विधदेहयुक्तेभ्यो देवेभ्यो नमोऽस्तु । यदि शक्नवाम । कथंचिद्धनादिसंपत्त्या शक्ताश्चेत्तदानीं देवान्यजामहे । देवा ज्यायसो ज्येष्ठस्य देवताविशेषस्य आ सर्वतः प्रसृतं शंसं स्तोत्रं

मा वृक्षि । अहं विच्छिन्नं मा कार्षं ॥ आशिनेभ्यः । अशू व्याप्तौ । बहुलमन्यत्रापीत्यौणादिक इनच्प्रत्ययः । चित इत्यंतोदात्तत्वं । यजाम । शपः पित्त्वादनुदात्तत्वं । तिङश्च लसार्वधातुकस्वरेण धातुस्वरः । शक्रवाम । शक्लृ शक्तौ । आद्युदात्तस्य पिच्चेति तिङः पित्त्वाभावादनुदात्तत्वे सति विकरणस्वरः । निपातैर्यद्यदिहंतेति निघातप्रतिषेधः । ज्यायसः । प्रशस्यशब्दादीयसुनि ज्य च । पा० ५. ३.६१. । इति ज्यादेशः । ज्यादादीयसः । पा० ६.४.१६०. । इतीयसुन ईकारस्यात्वं । नित्त्वादाद्युदात्तत्वं । शंसं । हलश्चेति घञ् । वृक्षि । ओव्रश्चू छेदने । व्यत्ययेनात्मनेपदोत्तमपुरुषैकवचनमिट् । च्लेः सिच् । स्वरतिसूतीत्यादिना इडभावः । स्कोः संयोगाद्योरित्युपधासकारलोपः । व्रश्चादिना षत्वं । षढोः कः सीति कत्वं । आदेशप्रत्यययोरिति षत्वं । न माङ्योग इत्यडभावः ॥

॥ इति प्रथमस्य द्वितीये चतुर्विंशो वर्गः ॥

यत्र ग्रावेति पंचमं सूक्तं नवर्चं । आदितः षडनुष्टुभः । आयजी इत्याद्यास्तिस्रो गायत्र्यः । आदितश्चतसृणामिंद्रो देवता । ततो द्वे उलूखलदेवत्ये । तदनंतरभाविन्यावुलूखलमुसलदेवताके । अंत्याया उच्छिष्टमित्यस्या हरिश्चंद्राधिषवणचर्मसोमानामन्यतमो देवता । तथा च बृहद्देवतायामुक्तं ॥ चर्माधिषवणीयं वा सोमं वांत्या प्रशंसतीति । तदुक्तमनुक्रमण्यां । यत्र ग्रावा नव षळनुष्टुबादि यच्चिद्धौलूखल्यौ परे मौसल्यौ च प्रजापतेर्हरिश्चंद्रस्यांत्या चर्मप्रशंसा वेति ॥ आद्याश्चतस्रोऽजःसवे होमे विनियुक्ताः । पंचम्याद्याश्चतस्रोऽभिषवे । अंत्या द्रोणकलशे सोमावनयने । तथा च ब्राह्मणं । अथ हैनं शुनःशेपोऽजःसवं ददर्श तमेताभिश्चतसृभिरभिसुषाव यच्चिद्धि त्वं गृहेगृह इत्यथैनं द्रोणकलशमभ्यववनिनायोच्छिष्टं चम्वोर्भरेत्येतयर्चाथ हास्मिन्नन्वारब्धे पूर्वाभिश्चतसृभिः सस्वाहाकाराभिर्जुहवां चकारेति । तत्र प्रथमामृचमाह ॥

यत्र ग्रावा पृथुबुध्न ऊर्ध्वो भवति सोतवे ।
उलूखलसुतानामवेद्विंद्र जल्गुलः ॥ १ ॥
यत्र । ग्रावा । पृथुऽबुध्नः । ऊर्ध्वः । भवति । सोतवे ।
उलूखलऽसुतानां । अव । इत् । ऊं इति । इंद्र । जल्गुलः ॥ १ ॥

हे इंद्र यत्र यस्मिन्नंजःसवकर्मणि सोतवेऽभिषवार्थं ग्रावा पाषाणः पृथुबुध्नः स्थूलमूल ऊर्ध्व उन्नतो भवति तस्मिन्कर्मण्युलूखलसुतानामुलूखलेनाभिषुतानां रसमवेत् स्वकीयत्वेनावगत्यैव जल्गुलः। भक्षय ॥ पृथुबुध्नः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। भवति। निपातैर्यद्यदिहंतेति निघातप्रतिषेधः। सोतवे। षुञ् अभिषवे। तुमर्थे सेसेनिति तवेन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं। उलूखलसुतानां। उलूखलेन सुतानां। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। जल्गुलः। गल अदने। अस्मद्यङो लुकि लेण्मध्यमैकवचने लेटोऽडाटावित्यडागमः। इतश्च लोप इतीकारलोपः। उपधाया उत्वं च हलादिशेषाभावश्च पृषोदरादित्वात् ॥

द्वितीयामृचमाह ॥

यत्र द्वाविव जघनाधिषवण्या कृता।
उलूखलसुतानामवेद्विंद्र जल्गुलः ॥ २ ॥
यत्र। द्वौऽइव। जघना। अधिऽसवन्या। कृता।
उलूखलऽसुतानां। अव। इत्। ऊं इति। इंद्र। जल्गुलः ॥ २ ॥

यस्मिन्कर्मण्यधिषवण्या उभे अधिषवणफलके द्वाविव जघना। द्वौ जघनप्रदेशाविव। जघनं जघन्यतेरिति यास्कः। नि० ९. २०.। कृता। विस्तीर्णे कृते संपादिते। अन्यत्पूर्ववत् ॥ जघना। हंतेः शरीरावयवे द्वे च। उ० ५. ३२.। इति हन्धातोरच्। द्वित्वं। कर्दमादित्वान्मध्योदात्तः। सुपां सुलुगित्याकारः। अधिषवण्या। षुञ् अभिषवे। ल्युट्। भवे छंदसीति यत्। उपसर्गात्सुनोतीति षत्वं। तित्स्वरित इति स्वरितः। न च यतोऽनाव इत्याद्युदात्तत्वं। तत्र हि निष्ठा च द्व्यजनात्। पा० ६. १. २०५.। इत्यस्यानुवृत्तेर्द्व्यच्कस्यैव तदिति। कृता। पूर्ववदाकारः ॥

तृतीयामृचमाह ॥

यत्र नार्यपच्यवमुपच्यवं च शिक्षते।
उलूखलसुतानामवेद्विंद्र जल्गुलः ॥ ३ ॥
यत्र। नारी। अपऽच्यवं। उपऽच्यवं। च। शिक्षते।
उलूखलऽसुतानां। अव। इत्। ऊं इति। इंद्र। जल्गुलः ॥ ३ ॥

यत्र यस्मिन्कर्मणि नारी पत्न्यपच्यवं शालाया निर्गमनमुपच्यवं च शालाप्राप्तिं च शिक्षते । अभ्यासं करोति । अन्यत्पूर्ववत् ॥ अपच्यवं । च्युङ् गतौ । ऋदोरबित्यप् । गुणावादेशौ । थाथादिना । पा॰ ६. २. १४४. । उत्तरपदांतोदात्तत्वं । शिक्षते । शिक्ष विद्योपादाने । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । निपातैर्यद्यदिहंतेति निघातप्रतिषेधः ॥

चतुर्थीमृचमाह ॥

यत्र मंथां विबध्नते रश्मीन्यमितवा इव ।

उलूखलसुतानामवेद्विंद्र जल्गुलः ॥ ४ ॥

यत्र । मंथां । विऽबध्नते । रश्मीन् । यमितवेऽइव ।

उलूखलऽसुतानां । अव । इत् । ऊं इति । इंद्र । जल्गुलः ॥ ४ ॥

यत्र यस्मिन्कर्मणि मंथामागिरमथनहेतुं मंथानं विबध्नंति । तत्र दृष्टांतः । रश्मीनश्वबंधनार्थान्प्रग्रहान्यमितवा इव । नियंतुमिव । अन्यत्पूर्ववत् ॥ मंथां । पथिमथ्यृभुक्षामात् । पा॰ ७. १. ८५. । इति द्वितीयायामपि व्यत्ययेनात्वं । प्रातिपदिकस्वरेणांतोदात्तत्वे पथिमथोः सर्वनामस्थाने । पा॰ ६. १. १९९. । इत्याद्युदात्तत्वं । यद्वा मथ्यतेऽनयेति मंथा । मथि विलोडन इत्यस्माद्धलश्चेति करणे घञ् । ततष्टाप् । जिह्वादाद्युदात्तत्वं । विबध्नते । बंध बंधने । क्र्यादिभ्यः श्ना । अनिदितामिति नलोपे श्नाभ्यस्तयोरात इत्याकारलोपः । प्रत्ययस्वरः । तिङि चोदात्तवतीति गतेर्निघातः । यमितवे । यम उपरमे । तुमर्थे सेसेनिति तवेप्रत्ययः । इडागमश्छांदसः । यद्वा ण्यंतात्तवेप्रत्ययस्येडागमे सति णिलोपश्छांदसः । अंतश्च तवै युगपत् । पा॰ ६. १. २००. । इत्याद्यंतयोरुदात्तत्वं ॥

अभिषवे विनियुक्तासु चतसृषु मध्ये प्रथमां सूक्ते पंचमीमृचमाह ॥

यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे ।

इह द्युमत्तमं वद जयतामिव दुंदुभिः ॥ ५ ॥

यत् । चित् । हि । त्वं । गृहेऽगृहे । उलूखलक । युज्यसे ।

इह । द्युमत्ऽतमं । वद । जयतांऽइव । दुंदुभिः ॥ ५ ॥

हे उलूखलक यच्चिद्धि यद्यपि त्वमवघातार्थं गृहे गृहे युज्यसे तथापीह वैदिके

कर्मणि तीव्रमुसलप्रहारेण द्युमत्तममतिशयेन दीप्तं प्रभूतध्वनियुक्तं शब्दं वद । तत्र दृष्टांतः । जयतामिव दुंदुभिः । यथा युद्धे जयं प्राप्नुवतां राज्ञां दुंदुभिर्महांतं ध्वनिं करोति तद्वत् ॥ उलूखलशब्दं यास्क एवं व्याख्यातवान् । उलूखलमुरुकरं वोर्करं वोर्ध्वखं वोरु मे कुर्वित्यब्रवीत्तदुलूखलमभवदुरुकरं वै तदुलूखलमित्याचक्षते परोक्षेणेति च ब्राह्मणं । नि० ९. २०. । इति ॥ उलूखलक । अपादादाविति पर्युदासादाष्टमिकनिघाताभावे षाष्ठिकमाद्युदात्तत्वं । युज्यसे । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे यक्स्वरः शिष्यते । न च तिङ्ङतिङ इति निघातः । निपातैर्यद्यदिहंतेति प्रतिषेधात् । द्युमत्तमं । दीव्यतेर्दीप्त्यर्थस्य संपदादिलक्षणः क्विप् । दिव उत् । पा० ६. १. १३१. । इत्युत्वं । यणादेशे ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं । ननु दिव उदित्यत्र प्रातिपदिकं गृह्यते न धातुरित्युक्तत्वात् । अक्षद्यूरित्यादाविवात्राप्यूठा भवितव्यं । पा० ६. ४. १९. । एवं तर्हि दीप्तिमत्स्वर्गवाचकेन दिवप्रातिपदिकेन दीप्तिर्लक्ष्यत इत्युत्वं भविष्यति ॥

॥ इति प्रथमस्य द्वितीये पंचविंशो वर्गः ॥

षष्ठीमृचमाह ॥

उत स्म ते वनस्पते वातो वि वात्यग्रमित् ।
अथो इंद्राय पातवे सुनु सोममुलूखल ॥ ६ ॥
उत । स्म । ते । वनस्पते । वातः । वि । वाति । अग्रं । इत् ।
अथो इति । इंद्राय । पातवे । सुनु । सोमं । उलूखल ॥ ६ ॥

उत अपि च हे वनस्पते उलूखलरूप वृक्ष तेऽग्रमित्तव पुरत एव वातो विवाति स्म । त्वरोपेतमुसलप्रहारैर्वायुर्विशेषेण प्रसरति खलु । अथोऽनंतरं हे उलूखल इंद्रायेंद्रोपकारार्थं पातवे पातुं सोमं सुनु । सोमाभिषवं कुरु ॥ वनस्पते । पारस्करादित्वात्सुट् । कार्ये कारणशब्दः । पातवे । पा पाने । तुमर्थे सेसेनिति तवेन्प्रत्ययः । ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं । सुनु । उतश्च प्रत्ययादसंयोगपूर्वादिति हेर्लुक् । विकरणस्वरेणांतोदात्तत्वं । पादादित्वादनिघातः । उलूखल । ऊर्ध्वं खमस्येत्युलूखलः । पृषोदरादिः ॥

सप्तमीमृचमाह ॥

आयजी वाजसातमा ता ह्युच्चा विजर्भृतः । हरी इवांधांसि बप्सता ॥ ७ ॥

आयजी इत्याऽयजी । वाजऽसातमा । ता । हि । उच्चा । विऽजर्भृतः । हरी इवेति हरीऽइव । अंधांसि । बप्सता ॥ ७ ॥

हे उलूखलमुसले आयाजी सर्वतो यज्ञसाधने वाजसातमा अतिशयेनान्नप्रदे ता हि ते खलूच्चा प्रौढध्वनिर्यथा भवति तथा विजर्भृतः । विशेषेण पुनः पुनर्विहारं कुरुतः । तत्र दृष्टांतः । अंधांस्यन्नानि चणकादीनि खाद्यानि बप्सतौ भक्षयंतौ हरी इव । इंद्रस्याश्वाविव ॥ अत्र यास्क एवं व्याचख्यौ । आयाजी आयष्टव्ये अन्नानां संभक्तृतमे ते ह्युच्चैर्विह्रियेते हरी इवान्नानि भक्षयंतौ । नि० ९. ३६. । इति ॥ आयजी । यजेरौणादिकः करण इप्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वं । वाजसातमा । वाजं सनोतीति वाजसाः । षणु दाने । जनसनेत्यादिना विट्प्रत्ययः । विड्वनोरनुनासिकस्यादित्यात्वं । कृदुत्तरपदप्रकृतिस्वरत्वं । आतिशायनिकस्तमप् । सुपां सुलुगिति पूर्वसवर्णदीर्घः । विजर्भृतः । हृञ् हरणे । अस्माद्यङ्लुक्यभ्यासहलादिशेषोरतजश्त्वेषु कृतेषु रुग्रिकौ च लुकि । पा० ७. ४. ९१. । इति रुगागमः । ततः प्रत्ययलक्षणेन धातुसंज्ञायां लिटि द्विर्वचनं तम् । अदादिवच्चेति वचनाच्छपो लुक् । गुणे प्राप्ते क्ङिति चेति प्रतिषेधः । हृग्रहोर्भश्छंदसीति भत्वं । प्रत्ययस्वरः । हि चेति निघातप्रतिषेधः । बप्सता । भस भक्षणदीप्त्योः । लटः शतृ । जुहोत्यादिभ्यः श्लुः । घसिभसोर्हलि च । पा० ६. ४. १००. । इत्युपधालोपः । नाभ्यस्ताच्छतुः । पा० ७. १. ७८. । इति नुमप्रतिषेधः । अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥

अष्टमीमृचमाह ॥

ता नो अद्य वनस्पती ऋष्वावृष्वेभिः सोतृभिः । इंद्राय मधुमत्सुतं ॥ ८ ॥

ता । नः । अद्य । वनस्पती इति । ऋष्वौ । ऋष्वेभिः । सोतृऽभिः । इंद्राय । मधुऽमत् । सुतं ॥ ८ ॥

अद्यास्मिन्कर्मणि हे वनस्पती उलूखलमुसलरूपौ तौ युवामृष्वेभिर्दर्शनीयैः सोतृभिरभिषवहेतुभिः सह ऋष्वौ तौ दर्शनीयौ भूत्वेंद्रायेंद्रार्थं मधुमत् माधुर्योपेतं सोमद्रव्यं नोऽस्मदीयं सुतं । अभिषुणुतं ॥ ता । सुपां सुलुगित्याकारः ।

नो अद्य। प्रकृत्यांतःपादमिति प्रकृतिभावः। वनस्पती। उभयपदप्रकृतिस्वरे प्राप्त आमंत्रितस्येति सर्वानुदात्तत्वं। प्लुतप्रगृह्या अचीति प्रकृतिभावः। सुतं। षुञ् अभिषवे। बहुलं छंदसीति विकरणस्य लुक्। निघातः॥

सोमावनयने विनियुक्तां सूक्ते नवमीमृचमाह॥

उच्छिष्टं चम्वोर्भर सोमं पवित्र आ सृज। नि धेहि गोरधि त्वचि॥९॥

उत्। शिष्टं। चम्वोः। भर। सोमं। पवित्रे। आ। सृज। नि। धेहि। गोः।
अधि। त्वचि॥९॥

हे ऋत्विग्विशेष हरिश्चंद्रदेवतापक्षे हरिश्चंद्रेति वा। चम्वोः सोमस्य भक्षत्वसंपादकयोरधिषवणफलकयोः शिष्टमभिषवराहित्येनावशिष्टं सोममुद्भर। शकटस्योपरि हर। सोममभिषुतं सोमं पवित्रे दशापवित्र आसृज। आनीय प्रक्षिप। प्रक्षेपे सत्यवशिष्टं सोमं गोस्त्वच्यानडुहे चर्मण्यधि निधेहि। अध्यारोप्य स्थापय॥ चम्वोः। चमु अदने। चम्यते भक्ष्यतेऽत्रेति चमूः। कृषिचमीत्यादिना। उ० १. ८१। औणादिक ऊप्रत्ययः। प्रत्ययस्वरः। सप्तमीद्विवचनस्योदात्तस्वरितयोर्यणः स्वरित इति स्वरितत्वमुदात्तयणो हल्पूर्वादिति व्यत्ययेन भवति। भर। हृग्रहोर्भः। धेहि। घ्वसोरेद्धावभ्यासलोपश्चेत्येत्वाभ्यासलोपौ। निघातः। त्वचि। सावेकाच इति विभक्तेरुदात्तत्वं॥

॥ इति प्रथमस्य द्वितीये षड्विंशो वर्गः॥

यच्चिद्धि सत्य सोमपा इति षष्ठं सूक्तं सप्तर्चं शुनःशेपस्यार्षं पांक्तमैंद्रं। अनुक्रमणिका च यच्चिद्धि सप्त पांक्तमिति। पृष्ठ्यषडहस्य पंचमेऽहनि माध्यंदिने सवने होत्रका यच्चिद्धीति सप्तर्चं सूक्तं। त्रींस्तृचान्कृत्वा स्वस्वशस्त्र एकैकं तृचमावपेरन्। चतुर्थेऽहनीति खंडे यच्चिद्धि सत्य सोमपा इत्येकैकमेवमेव। आ० ७. ११। इति सूत्रितं॥ तत्र प्रथमामृचमाह॥

यच्चिद्धि सत्य सोमपा अनाशस्ता इव स्मसि।
आ तू न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ॥१॥

यत्। चित्। हि। सत्य। सोमऽपाः। अनाशस्ताःऽइव। स्मसि।
आ। तु। नः। इंद्र। शंसय। गोषु। अश्वेषु। शुभ्रिषु। सहस्रेषु। तुविऽमघ॥१॥

विश्वैर्देवैः प्रेरितः शुनःशेप एतदादिकाभिर्द्वाविंशतिसंख्याकाभिर्ऋग्भिरिंद्रं तुष्टाव। तथा च ब्राह्मणं। तं विश्वे देवा ऊचुरिंद्रो वै देवानामोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतमस्तं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति स इंद्रं तुष्टाव यच्चिद्धि सत्य सोमपा इत्येतेन सूक्तेनोत्तरस्य च पंचदशभिरिति ॥ हे सोमपाः सोमस्य पातः सत्य सत्यवादिन्निंद्र यच्चिद्धि यद्यपि वयमनाशस्ता इव स्मसि। अप्रशस्ता इव भवामः। तथापि हे तुवीमघ बहुधनेंद्र त्वं गोष्वश्वेषु शुभ्रिषु शोभनेषु सहस्रेषु सहस्रसंख्याकेषु च निमित्तभूतेषु नोऽस्मानाशंसय। सर्वतः प्रशस्तान्कुरु। अस्मद्दोषमनपेक्ष्य गवादीन्प्रयच्छेत्यर्थः ॥ सोमपाः। विजंतः। आमंत्रितनिघातः। अनाशस्ता इव। शंस स्तुतौ। निष्ठेति भावे क्तः। यस्य विभाषेतीट्प्रतिषेधः। नञो बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। स्मसि। इदंतो मसिः। तू नः। ऋचि तुनुघेत्यादिना दीर्घः। गोषु। सावेकाच इति प्राप्तस्य विभक्त्युदात्तत्वस्य न गोश्वन्सावर्णेति प्रतिषेधः। अश्वेषु। अश्नुतेऽध्वानमित्यश्वः। अशिप्रुषीत्यादिना क्वन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं। शुभ्रिषु। शुभ दीप्तौ। अदिशदिभूशुभिभ्यः क्रिन्निति क्रिन्प्रत्ययः। व्यत्ययेनांतोदात्तत्वं ॥

द्वितीयामृचमाह ॥

शिप्रिन्वाजानां पते शचीवस्तव दंसना।
आ तू न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ २ ॥
शिप्रिन्। वाजानां। पते। शचीऽवः। तव। दंसना।
आ। तु। नः। इंद्र। शंसय। गोषु। अश्वेषु। शुभ्रिषु। सहस्रेषु। तुविऽमघ ॥ २ ॥

हे शचीवः शक्तिमन् शिप्रिन् शोभनहनूयुक्त वाजानां पते। अन्नानां पालक। तव दंसना कर्मविशेषोऽनुग्रहरूपः सर्वदा वर्तते। अन्यत्पूर्ववत् ॥ शिप्रिन्। शिप्रे हनू नासिके वेति यास्कः। अत इनिठनाविति मत्वर्थीय इनिः। आमंत्रिताद्युदात्तत्वं। वाजानां पते। सुबामंत्रित इति परांगवद्भावात् षष्ठ्यामंत्रितसमुदायनिघातः। न चामंत्रितं पूर्वमविद्यमानवदिति शिप्रिन्नित्यस्याविद्यमानवत्त्वेन पदात्परत्वात्पादादित्वाच्च न निघातः। नामंत्रिते समानाधिकरणे सामान्यवचनमित्यविद्यमानवत्त्वप्रतिषेधात्। शचीवः। छंदसीर इति मतुपो वत्वं। मतुवसो रुरिति रुत्वे खरवसानयोर्विसर्जनीयः। पा॰ ८.३.१५.। पादादित्वादामंत्रितनिघाताभावः ॥

तृतीयामृचमाह ॥

निष्वापया मिथूदृशा सस्तामबुध्यमाने ।

आ तू न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ३ ॥

नि । स्वापय । मिथुऽदृशा । सस्तां । अबुध्यमाने इति ।

आ । तु । नः । इंद्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ ३ ॥

मिथूदृशा परस्परं संगतत्वेन दृश्यमाने यमदूत्यौ निष्वापय । नितरां सुप्ते कुरु । ते चास्मान्मारयितुमबुध्यमाने सत्यौ सस्तां । निद्रां प्राप्नुतां । अन्यत्पूर्ववत् ॥ निष्वापय । सुषामादित्वात् षत्वं । अन्येषामपि दृश्यत इति दीर्घः । मिथुनतया युगलरूपेण पश्यत इति मिथूदृशा । क्विप् चेति दृशेः कर्तरि क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वं । पूर्ववत्पूर्वपदस्य दीर्घः । सुपां सुलुगिति विभक्तेराकारः । सस्तां । षस स्वप्ने । लोटि तसस्ताम् । अदिप्रभृतिभ्य इति शपो लुक् । प्रत्ययस्वरः । पादादित्वान्निघाताभावः । अबुध्यमाने । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं ॥

चतुर्थीमृचमाह ॥

ससंतु त्या अरातयो बोधंतु शूर रातयः ।

आ तू न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ४ ॥

ससंतु । त्याः । अरातयः । बोधंतु । शूर । रातयः ।

आ । तु । नः । इंद्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ ४ ॥

त्या अस्माभिरदृश्यमानाः परोक्षास्ता अरातयोऽदानशीलाः शत्रवः ससंतु । निद्रां कुर्वंतु । हे शूर शौर्ययुक्तेंद्र रातयो दानशीला बंधवो बोधंतु । अस्मान्बुध्यंतां । अन्यत्पूर्ववत् ॥ ससंतु । प्रत्ययस्वरः । अरातयः । रा दाने । मंत्रे वृषेत्यादिना भावे क्तिन् । न विद्यते रातिरेष्विति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । नञ्सुभ्यामिति तु सर्वे विधयश्छंदसि विकल्प्यंत इति न भवति । यद्वा क्तिच्क्तौ च संज्ञायामिति कर्तरि क्तिच् । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं । बोधंतु । पादादित्वात्तिङ्ङतिङ इति निघाताभावः ॥

पंचमीमृचमाह ॥

समिंद्र गर्दभं मृण नुवंतं पापयामुया ।
आ तू न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ५ ॥
सं । इंद्र । गर्दभं । मृण । नुवंतं । पापया । अमुया ।
आ । तु । नः । इंद्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ ५ ॥

हे इंद्र अमुयानयास्माभिः श्रूयमाणया पापया निंदारूपया वाचा नुवंतं स्तुवंतं । अपकीर्तिं प्रकटयंतमित्यर्थः । तादृशं गर्दभं गर्दभसमानवैरिणं संमृण । सम्यक् मारय । यथा गर्दभः श्रोतुमशक्यं परुषं शब्दं करोति तथा शत्रुरपि । अन्यत्पूर्ववत् ॥ गर्दभं । तर्द गर्द शब्दे । कॄशृशलिकलिगर्दिभ्योऽभच् । उ० ३. १२१. । चित इत्यंतोदात्तत्वं । मृण । मृण हिंसायां । तौदादिकः । शस्य ङित्त्वाद्गुणाभावः । नुवंतं । णु स्तुतौ । शतर्यदिप्रभृतित्वाच्छपो लुक् । शतुर्ङित्त्वाद्गुणाभाव उवङादेशः । प्रत्ययाद्युदात्तत्वं ॥

षष्ठीमृचमाह ॥

पताति कुंडृणाच्या दूरं वातो वनादधि ।
आ तू न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ६ ॥
पताति । कुंडृणाच्या । दूरं । वातः । वनात् । अधि ।
आ । तु । नः । इंद्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ ६ ॥

वातोऽस्मत्प्रतिकूलो वायुः कुंडृणाच्या कुटिलगत्या स त्वस्मान्परित्यज्य वनादध्यारण्यादप्यधिकं दूरं देशं पताति । पततु । अन्यत्पूर्ववत् ॥ पताति । लेटोऽडागमः । कुंडृणाच्या । कुडि दाहे । अस्मात् ल्युडंते कुंडनशब्दे डकारात्परस्याकारस्य ऋकारश्छांदसः । ऋवर्णाच्चेति वक्तव्यमिति णत्वं । तदंचतीति कुंडृणाची । ऋत्विगित्यादिना क्विन् । अनिदितामिति नलोपेऽंचतेश्चेति वक्तव्यं । पा० ४. १. ६. २. । इति ङीप् । अच इत्यकारलोपः । चाविति पूर्वपदस्य दीर्घत्वं । अंचतेश्च चौ । पा० ६. १. २२२. । इत्याकारस्योदात्तत्वं ॥

सप्तमीमृचमाह ॥

सर्वं परिक्रोशं जहि जंभया कृकदाश्वं ।

आ तू न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ७ ॥

सर्वं । परिऽक्रोशं । जहि । जंभय । कृकदाश्वं ।

आ । तु । नः । इंद्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ ७ ॥

परिक्रोशमस्मद्विषये सर्वत आक्रोशकर्तारं सर्वं पुरुषं जहि । मारय । कृकदाश्वमस्मद्विषये हिंसाप्रदं शत्रुं जंभय । मारय । अन्यत्पूर्ववत् ॥ परिक्रोशं । क्रुश आह्वाने । परितः क्रोशयतीति परिक्रोशः । पचाद्यच् । कृदुत्तरपदप्रकृतिस्वरत्वं । जहि । हन हिंसागत्योः । हंतेर्जः । पा॰ ६. ४. ३६. । इति जादेशः । तस्यासिद्धवदत्रा भादित्यसिद्धत्वादतो हेरिति हेर्लुक् न भवति । जंभय । जभि नाशने । चुरादित्वात्स्वार्थिको णिच् । शपः पित्त्वादनुदात्तत्वे णिच एव स्वरः शिष्यते । कृकदाश्वं । कृञ् हिंसायां । कृदाधारार्चिकलिभ्यः कन् । उ॰ ३. ४०. । इति कन्प्रत्ययः । किदित्यनुवृत्तेर्गुणाभावः । तथा च कृको हिंसा । तां दाशति प्रयच्छतीति कृकदाशुः । बहुलग्रहणाद्दशतेरपि कृक उपपदे कृके वचः कश्च । उ॰ १. ६. । इत्युण् । प्रत्ययस्वरेणोदात्तः । द्वितीयायाममि पूर्वत्वे प्राप्ते वा छंदसीति तस्य बाधितत्वाद्यणादेशः । उदात्तस्वरितयोर्यण इति विभक्तेः स्वरितत्वं ॥

॥ इति प्रथमस्य द्वितीये सप्तविंशो वर्गः ॥

आ व इंद्रमिति द्वाविंशत्यृचं सप्तमं सूक्तं शुनःशेपस्यार्षं गायत्रं । अस्माकमित्येषा पादनिचृद्गायत्री । त्रयः सप्तकाः पादनिचृदित्युक्तत्वात् । शश्वदिंद्र इत्येषा त्रिष्टुप् । आदितः षोडशर्च ऐंद्र्यः । आश्विनावश्वावत्येत्याद्यास्तिस्र आश्विन्यः । कस्त उष इत्याद्यास्तिस्र उषोदेवताकाः । तथा चानुक्रमणिका । आ वो द्व्यधिकास्माकं पादनिचृत् शश्वत्त्रिष्टुप् परौ तृचावाश्विनोषस्याविति ॥ प्रथमामृचमाह ॥

आ व इंद्रं क्रिविं यथा वाजयंतः शतक्रतुं । मंहिष्ठं सिंच इंदुभिः ॥ १ ॥

आ । वः । इंद्रं । क्रिविं । यथा । वाजऽयंतः । शतऽक्रतुं । मंहिष्ठं । सिंचे । इंदुऽभिः ॥ १ ॥

वाजयंतोऽन्नमिच्छंतो वयं शुनःशेपाः । हे ऋत्विग्यजमाना वो युष्माकं संबंधिनमिममिंद्रमिंदुभिः सोमैरासिंचे । सर्वतः सिंचामहे । तर्पयामः । कीदृशं ।

शतक्रतुं। शतसंख्याककर्मोपेतं। मंहिष्ठं। अतिशयेन प्रवृद्धं। सेचने दृष्टांतः। यथा येन प्रकारेण क्रिविमवटं जलेन पूरयंति तद्वत्। क्रिविशब्दो वध्रः कार इत्यादिषु चतुर्दशसु कूपनामसु क्रिविः कूपः सूद इति पठितं॥ क्रिविं। कृती इत्यादौ। उ॰ ४.५७.। क्रिव्प्र- छेदने। कृत्यत इति क्रिविः। क्रिविघृष्विच्छविस्थवीत्यादौ। उ॰ ४.५७.। छिन्नप्र- त्ययांतो निपातितः। अत एव तशब्दलोपः। नित्त्वादाद्युदात्तत्वं। वस्तुतस्तु डुकृञ् करणे क्रि विडागमश्च निपात्यत इति निघंटुभाष्यं। यथा। यथेति पादांत इति सर्वानुदात्तत्वं। वाजयंतः। वाजमात्मन इच्छंतः। सुप आत्मनः क्यच्। न छंदस्यपुत्रस्येतीत्वदीर्घत्वयोर्निषेधः। अश्वाघस्यादिति पुनर्दीर्घविधानज्ञाप- नात्। मंहिष्ठं। मंहि वृद्धौ। अतिशयेन मंहिता मंहिष्ठः। तुश्छंदसि। पा॰ ५. ३.५९.। इति तृजंतादिष्ठन्प्रत्ययः। तुरिष्ठेमेयःसु। पा॰ ६.४.१५४.। इति तृलोपः। इष्ठनो नित्त्वादाद्युदात्तत्वं। सिंचे। षिचिर् क्षरणे। व्यत्ययेनैकवचनं। शे मुचा- दीनामिति नुमागमः॥

द्वितीयामृचमाह॥

शतं वा यः शुचीनां सहस्रं वा समाशिरां। एदु निम्नं न रीयते॥२॥

शतं। वा। यः। शुचीनां। सहस्रं। वा। संऽआशिरां। आ। इत्। ऊं इति। निम्नं। न। रीयते॥२॥

य इंद्रः शुचीनां शुद्धानां सोमानां शतं वा शतसंख्याकं समूहं वा। समा- शिरां समीचीनेनाशीराख्येन श्रपणद्रव्येणोपेतानां सोमानां सहस्रं वा सहस्र- संख्याकं समूहं वा एदु रीयते। आगच्छत्येव। सोऽस्माननुगृह्णात्विति शेषः। सोमप्राप्तौ दृष्टांतः। निम्नं न। यथा निम्नप्रदेशमाप आभुवंति तद्वत्॥ समा- शिरां। श्रीञ् पाक इत्यस्य समाङ्पूर्वस्य क्विपपस्पृधेथामित्यादावाशीरादेशो निपातितः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। रीयते। रीङ् श्रवणे। दिवा- दिभ्यः श्यन्॥

तृतीयामृचमाह॥

सं यन्मदाय शुष्मिण एना ह्यस्योदरे। समुद्रो न व्यचो दधे॥३॥

सं। यत्। मदाय। शुष्मिणे। एना। हि। अस्य। उदरे। समुद्रः। न। व्यचः। दधे॥३॥

यत्पूर्वोक्तं शतं सहस्रं वा शुष्मिणे बलवत इंद्रस्य मदाय मदार्थं संगतं भवति। एना ह्यनेनैव शतेन सहस्रेण चास्येंद्रस्योदरे व्यचो व्याप्तिर्दधे। धृता-

भवति । तत्र दृष्टांतः । समुद्रो न । समुद्र इव । यथा समुद्रमध्ये जलं व्याप्नं तद्वत् ॥ एना । सुपां सुलुगिति तृतीयाया डादेशः । व्यचः । व्यचेः कुटादित्वमनसि । पा॰ १. २. १. १. । इति ङित्त्वभावस्य प्रतिषिद्धत्वाद्ग्रहिज्येत्यादिना संप्रसारणं न भवति । असुनो नित्त्वादाद्युदात्तत्वं । दधे । दधातेः कर्मण्यभ्यासह्रस्वजश्त्वेषु कृतेष्वातो लोप इटि चेत्याकारलोपः । प्रत्ययस्वरेणांतोदात्तत्वं । हि चेति प्रतिषेधान्निघाताभावः ॥

चतुर्थीमृचमाह ॥

अयमु ते समतसि कपोतं इव गर्भधिं । वचस्तच्चिन्न ओहसे ॥ ४ ॥

अयं । ऊं इति । ते । सं । अतसि । कपोतःऽइव । गर्भऽधिं । वचः । तत् । चित् । नः । ओहसे ॥ ४ ॥

हे इंद्र अयमु । अयमपि दृश्यमानः सोमस्ते त्वदर्थं संपादितः । यं सोमं समतसि । सम्यक् सातत्येन प्राप्नोषि । तत्र दृष्टांतः । कपोत इव । यथा कपोताख्यः पक्षी गर्भधिं गर्भधारिणीं कपोतीं प्राप्नोति तद्वत् । तच्चित्तस्मादेव कारणान्नोऽस्मदीयं वच ओहसे । प्राप्नोषि ॥ अतसि । अत सातत्यगमने । कपोत इव । कवेरोतच् पश्च । उ॰ १. ६२. । इत्योतच् । व्यत्ययेन मध्योदात्तः । गर्भधिं । गर्भोऽस्यां धीयत इति गर्भधिः । कर्मण्यधिकरणे चेति किप्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वं । ओहसे । तुहिर् दुहिर् उहिर् अर्दने । व्यत्ययेनात्मनेपदं ॥

पंचमीमृचमाह ॥

स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते । विभूतिरस्तु सूनृता ॥ ५ ॥

स्तोत्रं । राधानां । पते । गिर्वाहः । वीर । यस्य । ते । विऽभूतिः । अस्तु । सूनृता ॥ ५ ॥

हे इंद्र राधानां पते धनानां पालक गिर्वाहो गीर्भिरुह्यमान वीर शौर्योपेत । यस्य ते तव स्तोत्रमीदृशं भवति तस्य तव विभूतिर्लक्ष्मीः सूनृता प्रियसत्यरूपास्तु ॥ स्तोत्रं । दाम्नीशसेति ष्ट्रन् । पा॰ ३. २. १८२. । पश्चादर्शआद्यच् । अथवा स्तोतुरिदमित्यर्थेऽण् । संज्ञापूर्वको विधिरनित्य इति वृद्धिर्न । राधानां पते । राध्नुवंत्येभिरिति राधानि धनानि । सुबामंत्रित इति परांगवद्भावात्षष्ठ्यामंत्रितसमुदायस्य निघातः । गिर्वाहः । वह प्रापणे । वहिहाधाञ्भ्यश्छंदसीति कारकपूर्वस्यापि वहतेरसुन्प्रत्ययः । गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेत्यु-

क्त्वात् । णिदित्यनुवृत्तेरुपधावृद्धिः । पूर्वपदस्यर्वोरुपधाया इति दीर्घस्याभावश्छांदसः । षाष्ठिकमामंत्रिताद्युदात्तत्वं । विभूतिः । तादौ च नितीति गतेः प्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य द्वितीयेऽष्टाविंशो वर्गः ॥

षष्ठीमृचमाह ॥

ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन्वाजे शतक्रतो । समन्येषु ब्रवावहै ॥ ६ ॥

ऊर्ध्वः । तिष्ठ । नः । ऊतये । अस्मिन् । वाजे । शतक्रतो इति शतऽक्रतो । सं । अन्येषु । ब्रवावहै ॥ ६ ॥

हे शतक्रतो शतसंख्याककर्मोपेत । अस्मिन्प्रसक्ते वाजे संग्रामे नोऽस्माकमूतये रक्षणायोर्ध्व उन्नत उत्सुकस्तिष्ठ । भव । त्वं चाहं च मिलित्वान्येषु कार्यांतरेषु संब्रवावहै । सम्यक् विचारयावः ॥ तिष्ठ । द्व्यचोऽतस्तिङ इति संहितायां दीर्घः । ऊतये । ऊतियूतीत्यादिना क्तिन उदात्तत्वं । अस्मिन् । ऊडिदमित्यादिना सप्तम्या उदात्तत्वं ॥

सप्तमीमृचमाह ॥

योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इंद्रमूतये ॥ ७ ॥

योगेऽयोगे । तवःऽतरं । वाजेऽवाजे । हवामहे । सखायः । इंद्रं । ऊतये ॥ ७ ॥

योगे योगे प्रवेशे प्रवेशे तत्तत्कर्मोपक्रमे वाजे वाजे कर्मविघातिनि तस्मिंस्तस्मिन्संग्रामे तवस्तरमतिशयेन बलिनमिंद्रमूतये रक्षार्थं सखायः सखिवत्प्रिया वयं हवामहे । आह्वयामः ॥ योगे योगे । युजिर् योगे । हलश्चेति घञ् । चजोः कु घिण्यतोरिति कुत्वं । घञो ञित्वादाद्युदात्तत्वं । नित्यवीप्सयोरिति वीप्सायां द्विर्भावे सत्याम्रेडितानुदात्तत्वं । तवस्तरं । तवसः शब्दादस्मायामेधेति । पा० ५. २. १२१. । मत्वर्थीयो विनिः । तस्य छांदसो लोपः ॥

अष्टमीमृचमाह ॥

आ घा गमद्यदि श्रवत्सहस्रिणीभिरूतिभिः । वाजेभिरुप नो हवं ॥ ८ ॥

आ । घ । गमत् । यदि । श्रवत् । सहस्रिणीभिः । ऊतिऽभिः । वाजेभिः । उप । नः । हवं ॥ ८ ॥

यद्ययमिंद्रो नोऽस्मदीयं हवमाह्वानं शृणुयात् । तदानीं स्वयमेव सहस्रिणीभिरूतिभिर्बहुभिः पालनैर्वाजेभिरन्नैश्च सहोप समीप आ घ । अवश्यमागमत् । आगच्छेत् ॥ घ । ऋचि तुनुघेत्यादिना संहितायां दीर्घः । गमत् । लिङर्थे लेट् । लेटोऽडाटावित्यडागमः । इतश्च लोप इतीकारलोपः । यद्वा छांदसे लुङि पुषादिद्युताद्यॢदितः परस्मैपदेष्विति च्लेरङादेशः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । श्रवत् । श्रु श्रवणे । पूर्ववल्लेट्यडागमः । वाजेभिः । बहुलं छंदसीति भिस ऐसादेशाभावः । हवं । भावेऽनुपसर्गस्येति ह्वयतेरप् संप्रसारणं च । अपः पित्त्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तत्वं ॥

नवमीमृचमाह ॥

अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरं । यं ते पूर्वं पिता हुवे ॥ ९ ॥

अनु । प्रत्नस्य । ओकसः । हुवे । तुविऽप्रतिं । नरं । यं । ते । पूर्वं । पिता । हुवे ॥ ९ ॥

प्रत्नस्य पुरातनस्यौकसः स्थानस्य स्वर्गरूपस्य सकाशात्तुविप्रतिं बहून्यजमानान्प्रतिगंतारं नरं पुरुषमिंद्रमनु हुवे । अनुक्रमेण कर्मस्वाह्वयामि । यं ते त्वामिंद्रं पितास्मदीयो जनकः पूर्वं पुरा स्वकीयानुष्ठानकाले हुवे । आहूतवान् । तमाह्वयामीति पूर्वत्रान्वयः ॥ ओकसः । नब्विषयस्येत्याद्युदात्तत्वं । हुवे । ह्वेञ् स्पर्धायां शब्दे च । इटि बहुलं छंदसीति संप्रसारणं परपूर्वत्वं । गुणे प्राप्ते क्ङिति चेति प्रतिषेधः । उवङादेशः । प्रत्ययस्वरेणांतोदात्तत्वं । पादादित्वादनिघातः । तुविप्रतिं । तुवीनां बहूनां प्रतिगंतारं । अत्र प्रतिशब्दो भीमसेनो भीम इतिवत् प्रतिगंतृशब्दं लक्षयित्वा तद्द्वारा तदर्थं लक्षयति । अतः प्रतिः प्रतिनिधिप्रतिदानयोः । पा० १. ४. ९२. । इतिवत्सत्त्ववचनत्वेनानिपातत्वादनव्ययत्वे पूरणगुणेत्यादिना । पा० २. २. ११. । न षष्ठीसमासनिषेधः । हुवे । ह्वेञो लिटि बहुलं छंदसीति पूर्ववत्संप्रसारणपरपूर्वत्वे । द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यं । पा० ६. १. ८. ३. । इति द्विर्वचनाभावः । यद्वृत्तयोगादनिघातः ॥

दशमीमृचमाह ॥

तं त्वा वयं विश्ववारा शास्महे पुरुहूत । सखे वसो जरितृभ्यः ॥ १० ॥

तं । त्वा । वयं । विश्वऽवार । आ । शास्महे । पुरुऽहूत । सखे । वसो इति । जरितृऽभ्यः ॥ १० ॥

हे विश्ववार सर्ववरणीय पुरुहूत बहुभिः स्वस्वकर्मण्याहूत सखे सखिवत्प्रिय वसो निवासहेतो इंद्र तं पूर्वोक्तगुणयुक्तं त्वां जरितृभ्यः स्तोतॄणामनुग्रहार्थमाशास्महे । प्रार्थयामहे ॥ आशास्महे । आङ्शासु इच्छायां । अदिप्रभृतिभ्यः शप इति शपो लुक् । वसो । नामंत्रिते समानाधिकरण इति पूर्वस्याविद्यमानवत्त्वनिषेधात्परांगवद्भावेऽपि सति शेषनिघातेन वामंत्रितस्य चेति वा सर्वानुदात्तत्वं । जरितृभ्यः । जरति स्तुतिकर्मा । तृचश्चित्त्वादंतोदात्तत्वं ॥

॥ इति प्रथमस्य द्वितीय एकोनत्रिंशो वर्गः ॥

एकादशीमृचमाह ॥

अस्माकं शिप्रिणीनां सोमपाः सोमपाव्नां । सखे वज्रिन्त्सखीनां ॥ ११ ॥

अस्माकं । शिप्रिणीनां । सोमऽपाः । सोमऽपाव्नां । सखे । वज्रिन् । सखीनां ॥ ११ ॥

हे सोमपाः सोमस्य पातः सखे सखिवत्प्रिय वज्रिन्वज्रयुक्तेंद्र सखीनां सखिवत्प्रियाणां सोमपाव्नां सोमस्य पातॄणामस्माकं शिप्रिणीनां दीर्घाभ्यां हनूभ्यां नासिकाभ्यां वा युक्तानां गवां समूहस्त्वत्प्रसादादस्त्विति शेषः ॥ शिप्रिणीनां । ऋन्नेभ्यो ङीबिति ङीप् । तस्य पित्त्वादनुदात्तत्वे सति प्रत्ययस्वरः शिष्यते । सोमपाः । आमंत्रितस्य सति शिष्टत्वादामंत्रिताद्युदात्तत्वं । सोमपाव्नां । आतो मनिन्क्वनिबित्यादिना वनिप् । अल्लोपोऽनः । पा० ६.४.१३४. । इत्यनोऽकारस्य लोपः ॥

द्वादशीमृचमाह ॥

तथा तदस्तु सोमपाः सखे वज्रिन्तथा कृणु । यथा त उश्मसीष्टये ॥ १२ ॥

तथा । तत् । अस्तु । सोमऽपाः । सखे । वज्रिन् । तथा । कृणु । यथा । ते । उश्मसि । इष्टये ॥ १२ ॥

हे सोमपाः सखे वज्रिन् इष्टयेऽभिलषितार्थं ते तवानुग्रहं यथा येन प्रकारेणोश्मसि । वयं कामयामहे । त्वं तथा कुरु । त्वत्प्रसादात्तदभीष्टं तथास्तु ॥ कृणु । कृवि हिंसाकरणयोश्च । इदित्त्वान्नुम् । धिन्विकृण्व्योरच्चेत्युप्रत्ययः । तत्संनियोगेन वकारस्य चाकारः । अतो लोप इति तस्य लोपः । तस्य स्थानिवद्भावाल्लघूपधगुणाभावः । उतश्च प्रत्ययादसंयोगपूर्वादिति हेर्लुक् । उश्मसि । वश कांतौ । इदंतो मसिः । अदादित्वाच्छपो लुक् । ग्रहिज्यादिना संप्रसारणं । प्रत्ययस्वरः ।

यद्वृत्तयोगादनिघातः। इष्टये। इषु इच्छायां। क्तिनि तितुत्रेत्यादिनेट्प्रतिषेधः। यद्वा यजतेः क्तिनि वचिस्वपीत्यादिना संप्रसारणं। व्रश्चादिना षत्वे ष्टुत्वं। पूर्वस्मिन्पक्षे मंत्रे वृषेति क्तिन उदात्तत्वं। द्वितीये तु व्यत्ययेन ॥

त्रयोदशीमृचमाह ॥

रेवतीर्नः सधमाद इंद्रे संतु तुविवाजाः। क्षुमंतो याभिर्मदेम ॥ १३ ॥

रेवतीः। नः। सधऽमादे। इंद्रे। संतु। तुविऽवाजाः। क्षुऽमंतः। याभिः। मदेम ॥ १३ ॥

क्षुमंतोऽन्नवंतो वयं याभिर्गोभिः सह मदेम। हृष्येम। इंद्रे सधमादेऽस्माभिः सह हर्षयुक्ते सति नोऽस्माकं ता गावो रेवतीः क्षीराज्यादिधनवत्यः तुविवाजाः प्रभूतबलाश्च संतुः ॥ रेवतीः। रयिशब्दान्मतुपि रयेर्मतौ बहुलमिति संप्रसारणं परपूर्वत्वं। छंदसीर इति मतुपो वत्वं। वा छंदसीति पूर्वसवर्णदीर्घः। आरेशब्दाच्च मतुप उदात्तत्वं वक्तव्यमिति रेशब्दादुत्तरस्यापि भवतीति पूर्वमेवोक्तं। सधमादे। मद तृप्तियोगे। चौरादिकः। सधमादे। सह मादयतीति सधमादः। पचाद्यच्। सध मादस्थयोश्छंदसि। पा० ६. ३. ९६.। इति सहशब्दस्य सधादेशः। थाथादिनोत्तरपदांतोदात्तत्वे प्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। तुविवाजाः। तु इति सौत्रो धातुर्वृद्ध्यर्थः। अच इरिति इः। संज्ञापूर्वकत्वाद्गुणो न भवति। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। क्षुमंतः। टुक्षु शब्दे। अस्मात्क्विपि तुगभावश्छांदसः। ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं। मदेम। मदी हर्षे। व्यत्ययेन शप्। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे शपः पित्त्वादनुदात्तत्वं। ततो धातुस्वरः शिष्यते ॥

चतुर्दशीमृचमाह ॥

आ घ त्वावान्त्मनाप्तः स्तोतृभ्यो धृष्णवियानः। ऋणोरक्षं न चक्र्योः ॥ १४ ॥

आ। घ। त्वाऽवान्। त्मना। आप्तः। स्तोतृऽभ्यः। धृष्णो इति। इयानः। ऋणोः।
अक्षं। न। चक्र्योः ॥ १४ ॥

हे धृष्णो धार्ष्ट्ययुक्तेंद्र त्वावान् त्वत्सदृशो देवताविशेषस्त्मनाप्तस्त्वदनुग्रहवशात्स्वयमेवाप्तः सन् इयानोऽस्माभिर्याच्यमानः स्तोतृभ्यः स्तोतॄणामनुग्रहाय तदभीष्टमर्थं घ अवश्यमा ऋणोः। आनीय प्रक्षिपतु। तत्र दृष्टांतः। चक्र्योः रथस्य चक्रयोरक्षं न। यथाक्षं प्रक्षिपंति तद्वत् ॥ त्वावान्। वतुप्प्रकरणे युष्म-

दस्मद्भ्यां छंदसि सादृश्य उपसंख्यानमिति वतुप्। प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः। आ सर्वनाम्नः। पा॰ ६. ३. ९१.। इति दकारस्यात्वं। वतुपः पित्त्वादनुदात्तत्वे प्रातिपदिकस्वरः शिष्यते। त्मना। मंत्रेष्वाङ्यादेरात्मनः। पा॰ ६. ४. १४१.। इत्याकारलोपः। धृष्णो। ञिधृषा प्रागल्भ्ये। त्रसिगृधिधृषिक्षिपेः क्नुः। पा॰ ३. २. १४०.। आमंत्रितानुदात्तत्वं। इयानः। ईङ् गतौ। छंदसि लिट्। पा॰ ३. २. १०५.। तस्य लिटः कानज्वेति कानजादेशः। अचि श्नुधात्वित्यादिना। पा॰ ६. ४. ७७.। इयङादेशः। द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति वचनादभ्यासो न क्रियते। चित इत्यंतोदात्तत्वं। ऋणोः। ऋण गतौ। लङि व्यत्ययेन तिपः सिपीतश्चेतीकारलोपः। तनादिकृञ्भ्य उः। पा॰ ३. १. ७९.। सार्वधातुकगुणः। बहुलं छंदस्यमाङ्योगेऽपीत्यडागमाभावः। विकरणस्वरेणोदात्तत्वं। अक्षं। अक्षस्यादेवनस्य। फि॰ २. १२.। इत्याद्युदात्तत्वं। चक्र्योः। चक्रियोः। अकारस्येकारश्छांदसः॥

पंचदशीमृचमाह॥

आ यद्दुवः शतक्रतवा कामं जरितॄणां। ऋणोरक्षं न शचीभिः॥ १५॥

आ। यत्। दुवः। शतक्रतो इति शतऽक्रतो। आ। कामं। जरितॄणां। ऋणोः। अक्षं। न। शचीभिः॥ १५॥

हे शतक्रतो इंद्र यद्दुवो धनं कामितार्थरूपमा स्तोतृभिराप्तव्यमस्ति तं कामं जरितॄणां स्तोतॄणामनुग्रहाय आ ऋणोः। आनीय प्रक्षिपसि। तत्र दृष्टांतः। शचीभिः कर्मभिः शकटोचितव्यापारविशेषरक्षं न। यथाक्षं प्रक्षिपंति तद्वत्॥ शचीभिः। शचीशब्दः शार्ङ्गरवादिङीनंत आद्युदात्तः॥

॥ इति प्रथमस्य द्वितीये त्रिंशो वर्गः॥

षोडशीमृचमाह॥

शश्वदिंद्रः पोप्रुथद्भिर्जिगाय नानदद्भिः शाश्वसद्भिर्धनानि।
स नो हिरण्यरथं दंसनावान्स नः सनिता सनये स नोऽदात्॥ १६॥

शश्वत्। इंद्रः। पोप्रुथत्ऽभिः। जिगाय। नानदत्ऽभिः। शाश्वसत्ऽभिः। धनानि। सः। नः। हिरण्यऽरथं। दंसनाऽवान्। सः। नः। सनिता। सनये। सः। नः। अदात्॥ १६॥

तुष्टेनेंद्रेण दत्तं हिरण्यरथमनया प्रतिजग्राह। तथा च ब्राह्मणं। तस्मा इंद्रः स्तूयमानः प्रीतो मनसा हिरण्यरथं ददौ। तमेतयर्चा प्रतीयाय शश्वदिंद्र इतीति॥ इंद्रः शश्वत्सर्वदा धनानि वैरिसंबंधीनि जिगाय। जितवान्। अश्वैरिति शेषः। कीदृशैः। पोप्रुथद्भिः। घासभक्षणानंतरभाविनमोष्ठशब्दं कुर्वद्भिः। नानदद्भिः। नादमास्यगतं हेषाशब्दं कुर्वद्भिः। शाश्वसद्भिः। पुनः पुनर्भृशं वा श्वसद्भिः। दंसनावान् कर्मवान् सनिता दाता स इंद्रो नोऽस्माकं सनये संभजनार्थं हिरण्यरथं सुवर्णेन निमित्तं रथमदात्। दत्तवान्। स नः स न इति द्विरुक्तिरादरार्थं॥ पोप्रुथद्भिः। प्रोथृ पर्याप्तौ। अस्माद्यङ्लुक्यभ्यासहलादिशेषौ। हृस्व इति हृस्वत्वे कृते गुणो यङ्लुकोः। पा० ७. ४. ८२.। इति गुणः। धातोरुपधाया उत्वं छांदसं। अस्माद्यङ्लुगंताच्छतर्यभ्यस्तानामादिरित्याद्युदात्तत्वं। जिगाय। जि जये। लिटो णलि वृद्धिर्द्विर्वचनेऽचीति स्थानिवद्भावाज्जि इत्यस्य द्विर्वचनं। सन्लिटोर्जेः। पा० ७. ३. ५७.। इत्यभ्यासादुत्तरस्य कुत्वं। नानदद्भिः। णद अव्यक्ते शब्दे। पूर्ववद्यङ्लुकि दीर्घोऽकित इत्यभ्यासस्य दीर्घः। पूर्ववदाद्युदात्तत्वं। शाश्वसद्भिः। श्वस प्राणने। अन्यत्सर्वं पूर्ववत्। हिरण्यरथं। समासस्येत्यंतोदात्तत्वं। अदात्। गातिस्थेति सिचो लुक्। दंसनावान्। दंसशब्द अप्नो दंसो वेष इति कर्मनामसु पठितः। दंस एव दंसना। तदस्यास्तीति मतुप्। दस्यतेऽनेनेति दंसना॥

प्रातरनुवाक आश्विने क्रतौ गायत्रे छंदस्याश्विनावश्वावत्येति तृचः। अथाश्विन इति खंडेऽश्विना यज्वरीरिष आश्विनावश्वावत्या। आ० ४. १५.। इति सूत्रितं। तृचे प्रथमां सूक्ते सप्तदशीमृचमाह॥

आश्विनावश्वावत्येषा यातं शवीरया। गोमद्दस्रा हिरण्यवत्॥ १७॥

आ। अश्विनौ। अश्वऽवत्या। इषा। यातं। शवीरया। गोऽमत्। दस्रा। हिरण्यऽवत्॥ १७॥

इंद्रेण प्रेरितः शुनःशेपोऽश्विनौ तुष्टाव। तथा च ब्राह्मणं। तमिंद्र उवाचाश्विनौ नु स्तुह्यथ त्वोत्स्रक्ष्यामीति सोऽश्विनौ तुष्टावात उत्तरेण तृचेनेति। हे अश्विनौ। अश्वावत्या बहुभिरश्वैर्युक्तया शवीरया प्रेर्यमाणयेषान्नेन सह आयातं। अस्मिन्कर्मण्यागच्छतं। हे दस्रा। अश्विनौ युवयोः प्रसादाद्गोमद्बहुभिर्गोभिर्युक्तं हिरण्यवद्बहुना हिरण्येन युक्तमस्मदीयं गृहमस्त्विति शेषः॥

अश्वावत्या। मंत्रे सोमाश्वेंद्रियविश्वदेवस्य मतौ। पा॰ ६. ३. १३१.। इति दीर्घत्वं। इषा। सावेकाच इति तृतीयाया उदात्तत्वं। यातं। या प्रापणे। लोटि तसस्तं। अदादित्वाच्छपो लुक्। शवीरया। शु गतौ। कॄशॄपॄकटिपटिशौटिभ्य ईरन्। उ॰ ४. ३०.। इतीरन्प्रत्ययो बहुलवचनादस्मादपि भवति। नित्त्वादाद्युदात्तत्वं॥

अष्टादशीमृचमाह॥

समानयोजनो हि वाँ रथो दस्रावमर्त्यः। समुद्रे अश्विनेयते॥ १८॥

समानऽयोजनः। हि। वां। रथः। दस्रौ। अमर्त्यः। समुद्रे। अश्विना। ईयते॥ १८॥

हे दस्रावश्विनौ वां युवयोः संबंधी रथः समानयोजनस्तुल्ययोजनः। युवयोर्द्वयोरेकरथारूढत्वादुभयार्थं सकृदेव युज्यते। युक्तः स रथोऽमर्त्यो विनाशरहितः। अप्रतिहतगतिरित्यर्थः। अत एवाश्विनौ हि यस्मात्समुद्रेऽतरिक्ष ईयते। गच्छति। समुद्र इत्यंतरिक्षनामसु पठितं। समुद्रशब्दं यास्क एवं व्याचख्यौ। समुद्रः कस्मात्समुद्द्रवंत्यस्मादापः समभिद्रवंत्येनमापः संमोदंतेऽस्मिन्भूतानि समुदको भवति समुनत्तीति वा। नि॰ २.१०.। इति। समानयोजनः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। अमर्त्यः। अव्ययपूर्वपदप्रकृतिस्वरत्वं। ईयते। ईङ् गतौ। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे श्यनो नित्त्वादाद्युदात्तत्वं। हि चेति निघातप्रतिषेधः॥

एकोनविंशीमृचमाह॥

न्य१घ्न्यस्य मूर्धनि चक्रं रथस्य येमथुः। परि द्यामन्यदीयते॥ १९॥

नि। अघ्न्यस्य। मूर्धनि। चक्रं। रथस्य। येमथुः। परि। द्यां। अन्यत्। ईयते॥ १९॥

हे अश्विनौ युवामघ्न्यस्य हंतुं विनाशयितुमशक्यस्य दृढस्य पर्वतस्य मूर्धन्युपरि चक्रं भवदीयरथसंबंध्येकं चक्रं नियेमथुः। नियमितवंतौ। अन्यच्चक्रं परि द्यां द्युलोकस्य परित ईयते। गच्छति॥ अघ्न्यस्य। अहननमघ्नः। घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थं। पा॰ ३. ३. ५८. ४.। इति हंतेः कप्रत्ययः। अघ्नमर्हत्यघ्न्यः। छंदसि च। पा॰ ५. १. ६७.। इति यप्रत्ययः। प्रत्ययस्वरेणांतोदात्तत्वं। येमथुः। यम उपरमे। किति लिट्यत एकहल्मध्य इत्येत्वाभ्यासलोपौ॥

प्रातरनुवाक आश्विनशस्त्र उषस्ये क्रतौ गायत्रे छंदसि कस्त उष इति तृचः। अथोषस्य इति खंडे कस्त उष इति तिस्रः। आ॰ ४. १४.। इति सूत्रितं। तस्मिंस्तृचे प्रथमां सूक्ते विंशीमृचमाह॥

कस्त उषः कधप्रिये भुजे मर्तो अमर्त्ये। कं नक्षसे विभावरि ॥ २० ॥

कः। ते। उषः। कधऽप्रिये। भुजे। मर्तः। अमर्त्ये। कं। नक्षसे। विभाऽवरि ॥ २० ॥

अश्विभ्यां प्रेरितः शुनःशेप उषसं तुष्टाव। तथा च ब्राह्मणं। तमश्विना ऊचतुरुषसं नु स्तुह्यथ त्वोत्स्रक्ष्याव इति स उषसं तुष्टावात उत्तरेण तृचेन तस्य ह स्मर्च्युक्तायां वि पाशो मुमुचे कनीय ऐक्ष्वाकस्योदरं भवत्युत्तमस्यामेवर्च्युक्तायां वि पाशो मुमुचेऽगद ऐक्ष्वाक आसेति। हे कधप्रिये स्तुतिप्रिये। अमर्त्ये मरण-रहित उष एतच्छब्दाभिधेय उषःकालाभिमानिनि देवते। भुजे तव भोगाय मर्तो मनुष्यः को विद्यते। हे विभावरि विशेषप्रभावयुक्त उषो देवि कं पुरुषं नक्षसे। प्राप्नोषि। तवोचितं भोगं दातुं न कोऽपि मनुष्यः समर्थः। अत एव त्वं कमपि पुरुषं भोगापेक्षया न प्राप्नोषि। ईदृशस्तव महिमेत्यर्थः ॥ ते। तेमया-वेकवचनस्य। पा० ८. १. २२.। इति युष्मच्छब्दस्य ते आदेशः सर्वानुदात्तः। कधप्रिये। कथ वाक्यप्रबंधे। चुरादिरदंतः। णावतो लोपस्य स्थानिवद्भावादु-पधावृद्ध्यभावः। चिंतिपूजिकथिकुंबिचर्चश्च। पा० ३. ३. १०५.। इत्यङ्प्रत्ययः। णेरनिटीति णिलोपः। ततष्टाप्। षष्ठीसमासे ङ्यापोः संज्ञाच्छंदसोर्बहुलं। पा० ६. ३. ६३.। इति ह्रस्वत्वं। थकारस्य धकारश्छांदसः। आमंत्रितानुदात्तत्वं। भुजे। भुज पालनाभ्यवहारयोः। संपदादिलक्षणः क्विप्। सावेकाच इति विभक्तेरु-दात्तत्वं। मर्तः। असिहसीत्यादिना तन्प्रत्ययांत आद्युदात्तः। नक्षसे। तृक्ष स्तृक्ष णक्ष गतौ। विभावरि। भा दीप्तौ। विपूर्वादस्मादातो मनिन्क्वनिब्वनिपश्चेति वनिप्। वनो र च। पा० ४. १. ७.। इति ङीप्। तत्संनियोगेन नकारस्य रेफा-देशः। अम्बार्थनद्योर्ह्रस्वः। पा० ७. ३. १०७.। इति ह्रस्वत्वं ॥

एकविंशीमृचमाह ॥

वयं हि ते अमन्मह्यांतादा पराकात्। अश्वे न चित्रे अरुषि ॥ २१ ॥

वयं। हि। ते। अमन्महि। आ। अंतात्। आ। पराकात्। अश्वे। न। चित्रे। अरुषि ॥ २१ ॥

अश्वे व्यापनशीले। चित्रे चायनीये। अरुषि आरोचमान उषःकाला-भिमानिनि देवते तव स्वरूपमांतात्समीपपर्यंतमापराकाद्दूरपर्यंतं वयं मनुष्या नामन्महि। न बोद्धुं समर्थाः। हिशब्दः प्रसिद्धौ। देवतामहिम्नः पारावारयोर-

विज्ञानमस्मासु प्रसिद्धमित्यर्थः ॥ अमन्महि । मन ज्ञाने । बहुलं छंदसीति बहुलवचनात् श्यनो लुक्। लुङ्लङ्लृङ्क्ष्वडुदात्तः। हि चेति निघातप्रतिषेधः। अश्वे । अशू व्याप्तौ । अशिप्रुषीत्यादिना क्वन्प्रत्ययः । आमंत्रिताद्युदात्तत्वं ॥

द्वाविंशीमृचमाह ॥

त्वं त्येभिरा गहि वाजेभिर्दुहितर्दिवः । अस्मे रयिं नि धारय ॥ २२ ॥

त्वं । त्येभिः । आ । गहि । वाजेभिः । दुहितः । दिवः । अस्मे इति । रयिं । नि । धारय ॥ २२ ॥

हे दिवो दुहितर्द्युदेवतायाः पुत्रि। उषो देवि त्येभिर्वाजेभिस्तैरन्नैः सह त्वमागहि । अत्रागच्छ । अस्मे अस्मासु रयिं धनं निधारय । नितरां स्थापय ॥ त्येभिः । बहुलं छंदसीति त्यदशब्दाद्भिस ऐसादेशाभावः । गहि । असकृदुक्तं । दुहितर्दिवः। परस्यापि दिव इत्यस्य दिवो दुहितरित्यन्वये सति पूर्ववत्त्वात्सुबामंत्रित इति परांगवद्भावेन षष्ठ्यामंत्रितसमुदायस्य सर्वानुदात्तत्वं । यद्वा कार्यकालं हि संज्ञापरिभाषमिति न्यायेन सुबामंत्रित इत्यस्यामंत्रितस्य चेत्याष्टमिकेन योगेनैकवाक्यत्वे सति परत्वात् परांगवद्भावे सति सर्वानुदात्तत्वं । कृतस्वरयोः षष्ठ्यामंत्रितयोः पश्चाद्व्यत्ययो बहुलमिति व्यत्यस्तप्रयोगः । अस्मे । सुपां सुलुगिति सप्तम्याः शे आदेशः ॥

॥ इति प्रथमस्य द्वितीय एकत्रिंशो वर्गः ॥

॥ इति प्रथममंडले षष्ठोऽनुवाकः ॥

सप्तमेऽनुवाके पंच सूक्तानि। तत्र त्वमग्ने प्रथम इति प्रथमं सूक्तमष्टादशर्चं। आंगिरसो हिरण्यस्तूप ऋषिः । अष्टमीषोडश्यष्टादश्यस्त्रिष्टुभः । शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः । अग्निर्देवता । तथा चानुक्रमणिका । त्वमग्ने ऊना हिरण्यस्तूप आग्नेयं त्रिष्टुबंत्याष्टमीषोळश्यौ चेति ॥ प्रातरनुवाक आग्नेये क्रतावाश्विनशस्त्रे च त्वमग्ने प्रथम इति सूक्तं। अथैतस्या रात्रेरिति खंडे त्वमग्ने प्रथमो अंगिरा ऋषिर्नू चित्सहोजा अमृतो नितुंदत । आ० ४. २३. । इति सूचितं ॥ अभिप्लवषडहस्य तृतीयेऽहन्याग्निमारुते शस्त्र इदं सूक्तं जातवेदस्यनिविद्धानीयं । तथा च तृतीयस्य त्र्यर्यमेति खंडे सूचितं । त्वमग्ने प्रथमो अंगिरा इत्याग्निमारुतं । आ० ७. ७. । इति ॥ वाजपेय आग्निमारुत एतत्सूक्तं

जातवेदस्यं निविद्धानीयं तृतीयेनाभिप्लविकेनोक्तं तृतीयसवनमित्यतिदिष्टत्वात् ॥ तस्मिन्सूक्ते प्रथमामृचमाह ॥

त्वमग्ने प्रथमो अंगिरा ऋषिर्देवो देवानामभवः शिवः सखा।
तव व्रते कवयो विद्मनापसोऽजायंत मरुतो भ्राजदृष्टयः ॥ १ ॥
त्वं। अग्ने। प्रथमः। अंगिराः। ऋषिः। देवः। देवानां। अभवः। शिवः। सखा।
तव। व्रते। कवयः। विद्मनाऽअपसः। अजायंत। मरुतः। भ्राजत्ऽऋष्टयः ॥ १ ॥

हे अग्ने त्वं प्रथम आद्य आंगिरसानामृषीणां सर्वेषां जनकत्वात्। तादृशोऽंगिरोनामक ऋषिरभवः। तथा च ब्राह्मणं। येऽंगारा आसंस्तेऽंगिरसोऽभवन्निति। तथा स्वयं देवो भूत्वा देवानामन्येषां शिवः शोभनः सखाभवः। तव व्रते त्वदीये कर्मणि कवयो मेधाविनो विद्मनापसो ज्ञानेन व्याप्नुवाना ज्ञातकर्माणो वा भ्राजदृष्टयो दीप्यमानायुधा मरुतो मरुत्संज्ञका देवा अजायंत ॥ विद्मनापसः। विद ज्ञाने। विद्मो वेदनं। बहुलग्रहणादौणादिको मक्प्रत्ययः। तदस्यास्तीति पामादिलक्षणो नः। पा० ५. २. १००। प्रत्ययस्वरेणांतोदात्तत्वं। विद्मनान्यपांसि येषां ते विद्मनापसः। पूर्वपदस्यान्येषामपि दृश्यत इति दृशिग्रहणादवग्रहसमयेऽपि दीर्घत्वं। अजायंत। जनी प्रादुर्भावे। तस्य श्यनि ज्ञाजनोर्जा। पा० ७. ३. ७९। इति जादेशः। भ्राजदृष्टयः। भ्राज दीप्तौ। व्यत्ययेन शतृ। तस्य लसार्वधातुकानुदात्तत्वे धातुस्वरः। ऋषी गतावित्यस्मात् क्तिच्क्तौ च संज्ञायामिति क्तिजंत ऋष्टिशब्दः। ततो बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

द्वितीयामृचमाह ॥

त्वमग्ने प्रथमो अंगिरस्तमः कविर्देवानां परि भूषसि व्रतं।
विभुर्विश्वस्मै भुवनाय मेधिरो द्विमाता शयुः कतिधा चिदायवे ॥ २ ॥
त्वं। अग्ने। प्रथमः। अंगिरःऽतमः। कविः। देवानां। परि। भूषसि। व्रतं।
विऽभुः। विश्वस्मै। भुवनाय। मेधिरः। द्विऽमाता। शयुः। कतिधा। चित्। आयवे ॥ २ ॥

हे अग्ने त्वं प्रथम आद्य अंगिरस्तमोऽतिशयेनांगिरा भूत्वा कविर्मेधावी

सन् देवानामन्येषां व्रतं कर्म परिभूषसि। परितोऽलंकरोषि। कीदृशस्त्वं। विश्वस्मै भुवनाय समस्तलोकानुग्रहार्थं विभुः। बहुविधः। आहवनीयाद्यनेकरूपधारीत्यर्थः। मेधिरो मेधावान्। द्विमाता। द्वयोररण्योरुत्पन्नः। यद्वा द्वयोर्लोकयोर्निर्माता। आयवे मनुष्यार्थं कतिधा चित् कतिभिः प्रकारैः सर्वत्र शयुः शयानः। तत्तन्मनुष्यगृहेऽवस्थितस्य तव प्रकारा इयंत इति न केनापि ज्ञायत इत्यर्थः॥ भूषसि। भूष अलंकारे। भौवादिकः। विभुः। विप्रसंभ्यो ड्वसंज्ञायां। पा० ३.२.१८०। इति विपूर्वाद्भवतेर्डुप्रत्ययः। कृदुत्तरपदप्रकृतिस्वरत्वं। भुवनाय। भूसूधूभ्रस्जिभ्यश्छंदसि। उ० २.७८। इति क्युन्। योरनादेशे नित्स्वरेणाद्युदात्तत्वं। मेधिरः। मेधृ संगमे च। अस्माद्बाहुलक इरन्प्रत्ययः। नित्स्वरः। द्विमाता। द्वौ मातरौ यस्यासौ द्विमाता। नद्यृतश्च। पा० ५.४.१५३। इति कप्प्रत्ययो न भवति मातृमातृकयोर्भेदेनोपादानान्नद्यृतश्चेति कवपि विभाष्यत इति तस्य मातृशब्दविषये पाक्षित्वोक्तिः। चित्त्रक्रादित्वादुत्तरपदांतोदात्तत्वं। यद्वा द्वयोर्माता द्विमाता। समासस्येत्यंतोदात्तत्वं। शयुः। शीङ् स्वप्ने। भृमृशीत्यादिना उप्रत्ययः। कतिधा। डत्यंतस्य किमशब्दस्य बहुगणवतुडति संख्या। पा० १.१.२३। इति संख्यासंज्ञायां संख्याया विधार्थे धा। पा० ५.३.४२। इति धाप्रत्ययः। आयवे। छंदसीण इत्येतेरुणप्रत्ययः॥

तृतीयामृचमाह॥

त्वमग्ने प्रथमो मातरिश्वन आविर्भव सुक्रतूया विवस्वते।
अरेजेतां रोदसी होतृवूर्येऽसघ्नोर्भारमयजो महो वसो॥ ३॥

त्वं। अग्ने। प्रथमः। मातरिश्वने। आविः। भव। सुक्रतुऽया। विवस्वते।
अरेजेतां। रोदसी इति। होतृऽवूर्ये। असघ्नोः। भारं। अयजः। महः। वसो इति॥ ३॥

हे अग्ने त्वं मातरिश्वने प्रथमो मुख्यो भूत्वा वर्तसे। अग्निर्वायुरादित्य इति वायूपेक्षया सर्वत्र मुख्यत्वावगमात्। तादृशस्त्वं सुक्रतूया शोभनकर्मेच्छया विवस्वते परिचरते यजामानायाविर्भव। प्रकटो भव। तव सामर्थ्यं दृष्ट्वा रोदसी द्यावापृथिव्यावरेजेतां। अकंपेतां। भ्यसते रेजत इति भयवेपनयोः। नि० ३.२१। इति यास्कः। होतृवूर्ये होतृवरणयुक्ते कर्मणि भारं भरणमसघ्नोः। ऊढवानसि। हे वसो निवासहेतो वह्ने महः पूज्यान्देवानयजः। इष्टवानसि॥ मातरिश्वने।

निर्माणहेतुत्वान्मातांतरिक्षं। तत्र श्वसिति प्राणितीति मातरिश्वा वायुः। श्वनु-क्षन्नित्यादौ। उ० १.१५८.। मातरिश्वन्शब्दः कन्प्रत्ययांतो निपातितः। सुक्रतूया। सुक्रतुमात्मन इच्छति। सुप आत्मनः क्यच्। अकृत्सार्वधातुकयोरिति दीर्घः। पा० ७.४.२५.। क्यजंतस्य धातुसंज्ञायाम् अ प्रत्ययात्। पा० ३.३.१०२.। इति भावेऽकारप्रत्ययः। ततष्टाप्। सुपां सुलुगिति तृतीयैकवचनस्य डादेशः। टिलोप उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वं। संहितायामन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घः। विवस्वते। विवासतिः परिचरणकर्मा। अस्मात्संपदादिलक्षणः क्विप्। व्यत्ययेनोपधाह्रस्वत्वं। तदस्यास्तीति मतुप्। मादुपधाया इति मतोर्वत्वं। तसौ मत्वर्थ इति भत्वेन पदत्वाभावादुत्वाभावः। मतुपः पित्त्वादनुदात्तत्वं। धातुस्वरः शिष्यते। रोदसी। वा छंदसीति पूर्वसवर्णदीर्घत्वं। होतृवूर्ये। होता व्रियत इति होतृवूर्यो यज्ञः। वृञ् वरणे। बहुलग्रहणादौणादिकः क्यप्। उदोष्ठ्यपूर्वस्येत्युत्वं। हलि चेति दीर्घः। यद्वा वृञ् वरण इत्यस्मादेतिस्तुशास्वित्यादिना। पा० ३.१.१०९.। क्यप्। अनित्यमागमशासनमिति तुगभावः। अकृत्सार्वधातुकयोरिति दीर्घत्वे पूर्ववदुत्वदीर्घौ। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः। कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते। असघ्नोः। षघ हिंसायामत्र तु वहनार्थः। स्वादिभ्यः श्नुः। पादादित्वादनिघातः। अयजः। भारमित्यस्य पूर्वपदस्य वाक्यांतरगतत्वात्तदपेक्षयास्य निघातो न भवति। समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः। पा० ८.१.१८.१.। इति वचनात्। महः। मह पूजायां। क्विप् चेति क्विप्। सुपां सुपो भवंतीति शसो ङसादेशः। सावेकाच इति तस्योदात्तत्वं। यद्वा शसि महच्छब्दस्याच्छब्दलोपश्छांदसः। बृहन्महतोरुपसंख्यानमिति शस उदात्तत्वं॥

चतुर्थीमृचमाह॥

त्वम॑ग्ने मन॑वे द्याम॑वाशयः पुरू॒रव॑से सु॒कृते॑ सु॒कृत्त॑रः।
श्वा॒त्रेण॒ यत्पि॒त्रोर्मुच्य॑से॒ पर्या त्वा॒ पूर्व॑मनयन्नाप॑रं॒ पुनः॑ ॥ ४॥

त्वं। अ॒ग्ने॒। मन॑वे। द्यां। अ॒वा॒श॒यः॒। पु॒रू॒रव॑से। सु॒ऽकृते॑। सु॒कृत्ऽत॑रः।
श्वा॒त्रेण॑। यत्। पि॒त्रोः। मुच्य॑से। परि॑। आ। त्वा॒। पूर्वं॑। अ॒न॒य॒न्। आ। अप॑रं।
पुन॒रिति॑ ॥ ४॥

हे अग्ने त्वं मनवे मनोरनुग्रहार्थं द्यां द्युलोकमवाशयः। शब्दितवानसि।

पुण्यकर्मभिः साध्यो द्युलोक इति प्रकटितवानसि। सुकृते तव परिचरणं कुर्वते पुरूरवस एतन्नामकस्य राज्ञोऽनुग्रहार्थं सुकृत्तरः। अतिशयेन शोभनफलकार्यभूः। यद्यदा पित्रोररण्योः श्वात्रेण क्षिप्रमथनेन परिमुच्यसे। परितो मुक्तो भवसि। उत्पद्यस इत्यर्थः। तदानीं त्वा अरण्योरुत्पन्नं त्वां पूर्वं वेदेः पूर्वदेशमानयन्। आहवनीयत्वेन स्थापितवंतः। पुनः पश्चादपरं पश्चिमदेशमानयन्। गार्हपत्यरूपेण प्रापितवंतः। आहवनीयकर्मानुष्ठानादूर्ध्वं गार्हपत्यरूपेण धारितवंत इत्यर्थः ॥ श्वात्रशब्दः। वाश्वृ शब्दे। पुरूरवसे। पुरु रौतीति पुरूरवाः। रु शब्दे। अस्मादौणादिकेऽसुनि पुरसि च पुरूरवाः। उ० ४. २३१.। इति पूर्वपदस्य दीर्घो निपात्यते। सुकृते। सुकर्मपापमंत्रपुण्येषु कृञः। पा० ३. २. ८९.। इति क्विप्। ततस्तुक्। पित्रोः। उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं। मुच्यसे। अदुपदेशाल्लसार्वधातुकानुदात्तत्वं। यद्यपि सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वचनाद्विकरणस्वरः सति शिष्टोऽपि लसार्वधातुकस्वरस्य बाधको न भवति। तथापि धातुस्वरं बाधत एव धातुस्वरं शास्वर इत्युक्तत्वात्। अतो यक एव स्वरे प्राप्ते व्यत्ययेनाद्युदात्तत्वं ॥

पंचमीमृचमाह ॥

त्वमग्ने वृषभः पुष्टिवर्धन उद्यतस्रुचे भवसि श्रवाय्यः।
य आहुतिं परि वेदा वषट्कृतिमेकायुरग्रे विश आविवासति ॥ ५ ॥

त्वं। अग्ने। वृषभः। पुष्टिऽवर्धनः। उद्यतऽस्रुचे। भवसि। श्रवाय्यः।
यः। आऽहुतिं। परि। वेद। वषट्ऽकृतिं। एकऽआयुः। अग्रे। विशः। आऽविवासति ॥ ५ ॥

हे अग्ने त्वं वृषभः कामानां वर्षिता पुष्टिवर्धनो यजमानस्य धनादिपोषाभिवृद्धिहेतुः। उद्यतस्रुच उद्धृतया स्रुचा युक्ताय यजमानाय तदनुग्रहार्थं श्रवाय्यो मंत्रैः श्रवणीयो भवसि। यो यजमानो वषट्कृतिं वषट्कारयुक्तामाहुतिं परिवेद। परितो जानाति। समर्पयतीत्यर्थः। एकायुर्मुख्यान्नस्त्वमग्ने प्रथमं तं यजमानं विशस्तदनुकूलाः प्रजा आविवासति। सर्वत्र प्रकाशयसि ॥ पुष्टिवर्द्धनः। वृधु वृद्धौ। अस्माण्णिजंतान्नंदादित्वात् ल्युः। लित्स्वरेणोत्तरपदस्याद्युदात्तत्वं। कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते। उद्यतस्रुचे। यम उपरमे।

अस्मादुत्पूर्वान्निष्ठेति क्तप्रत्यय अनुदात्तोपदेशेत्यादिनानुनासिकलोपः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । उद्यता स्रुक् येनेति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । वेद । द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं ॥

॥ इति प्रथमस्य द्वितीये द्वात्रिंशो वर्गः ॥

षष्ठीमृचमाह ॥

त्वमग्ने वृजिनवर्तनिं नरं सक्मन्पिपर्षि विदथे विचर्षणे ।

यः शूरसाता परितक्म्ये धने दभ्रेभिश्चित्समृता हंसि भूयसः ॥ ६ ॥

त्वं । अग्ने । वृजिनऽवर्तनिं । नरं । सक्मन् । पिपर्षि । विदथे । विऽचर्षणे ।

यः । शूरऽसाता । परिऽतक्म्ये । धने । दभ्रेभिः । चित् । संऽऋता । हंसि ।

भूयसः ॥ ६ ॥

हे विचर्षणे विशिष्टज्ञानयुक्ताग्ने त्वं वृजिनवर्तनिं विप्लुतमार्गं सदाचाररहितं नरं पुरुषं सक्मन् सचनीये समवेतुं योग्ये विदथे कर्मणि पिपर्षि । पालयसि पूरयसि वा । सत्कर्मानुष्ठानयुक्तं करोषीत्यर्थः । यस्त्वं परितक्म्ये परितो गंतव्ये धने धनवच्छूराणां प्रियतमे शूरसाता शूरैः संभजनीये युद्धे दभ्रेभिश्चिदल्पैरपि शौर्यरहितैः पुरुषैः । दभ्रमर्भकमित्यल्पस्य । नि० ३. २०. । इति यास्कः । समृता सम्यक् योद्धुं प्राप्ते सति तदनुग्रहार्थं भूयसः प्रौढान्प्रतिपक्षिणः शत्रून् हंसि । मारयसि। ईदृशस्तव महिमेत्यर्थः ॥ वृजिनवर्तनिं। वृजिना वर्तनिर्यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। सक्मन् । षच समवाये। अन्येभ्योऽपि दृश्यंत इति मनिन्। नेड्वशि कृतीतीट्प्रतिषेधः । न्यंक्वादित्वात् । पा० ७. ३. ५३. । कुत्वं । सुपां सुलुगिति सप्तम्या लुक् । पिपर्षि । पॄ पालनपूरणयोः । सिपि श्लौ द्विर्भावह्रस्वोरदत्वहलादिशेषाः । अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं । शूरसाता । शु गतौ । शुसिचिमीनां दीर्घश्चेति शूरशब्दो रन्प्रत्ययांत आद्युदात्तः । वन षण संभक्तावित्यस्मात् क्तिनंतः सातिशब्दः । जनसनखनां सञ्झलोरित्यात्वं । शूराणां सातिः संभजनमत्रेति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । सुपां सुलुगिति सप्तम्या डादेशः । परितक्म्ये । तक हसने। अस्मादौणादिको भावे मक्। तदर्हतीति छंदसि च । पा० ५. १. ६७. । इति यः । प्रादयो गताद्यर्थे प्रथमयेति समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं। दभ्रेभिः। दंभु दंभे । स्फायितंचीत्यादिना रक् । बहुलं छंदसीति भिस ऐसादेशाभावः ।

समृता । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । पूर्ववदाकारः । हंसि । हंतेः सिपि नश्चापदांतस्य झलि । पा० ८.३.२४.। इत्यनुस्वारः । यद्वृत्तयोगादनिघातः । भूयसः । बहोर्लोपो भू च बहोरिति बहुशब्दादुत्तरस्येयसुन ईकारलोपो बहोर्भूभावश्च । नित्त्वादाद्युदात्तत्वं ॥

सप्तमीमृचमाह ॥

त्वं तम॑ग्ने अमृत॒त्व उ॑त्त॒मे मर्तं॑ दधासि॒ श्रव॑से दि॒वेदि॑वे ।

यस्ता॑तृषा॒ण उ॒भया॑य॒ जन्म॑ने॒ मयः॑ कृ॒णोषि॒ प्रय॒ आ च॑ सू॒रये॑ ॥ ७ ॥

त्वं । तं । अ॒ग्ने॒ । अ॒मृ॒त॒ऽत्वे । उ॒त्ऽत॒मे । मर्तं॑ । द॒धा॒सि॒ । श्रव॑से । दि॒वेऽदि॑वे ।

यः । त॒तृ॒षा॒णः । उ॒भया॑य । जन्म॑ने । मयः॑ । कृ॒णोषि॑ । प्रयः॑ । आ । च॒ । सू॒रये॑ ॥ ७ ॥

हे अग्ने त्वं तं मर्तं तथाविधं त्वत्सेविनं मनुष्यं दिवे दिवे प्रतिदिनं श्रवसेऽन्नार्थमुत्तमेऽमृतत्व उत्कृष्टे मरणरहिते पदे दधासि । धारयसि । यो यजमान उभयाय जन्मने द्विविधजन्मार्थं । द्विपदां चतुष्पदां लाभायेत्यर्थः । तातृषाणोऽतिशयेन तृष्णायुक्तो भवति तस्मै सूरयेऽभिज्ञाय यजमानाय मयः सुखं । यद्वै सुखं तन्मय इति श्रुत्यंतरात् । प्रयश्चान्नमप्याकृणोषि । सर्वतः करोषि ॥ तातृषाणः । ञितृषा पिपासायां । लिटः कानच् । चित्त्वादंतोदात्तत्वं । संहितायां दीर्घश्छांदसः । कृणोषि । कृवि हिंसाकरणयोश्च । धिन्विकृण्व्योरचेत्युप्रत्ययः । चादिलोपे विभाषेति निघातप्रतिषेधः ॥

अष्टमीमृचमाह ॥

त्वं नो॑ अग्ने स॒नये॒ धना॑नां य॒शसं॑ का॒रुं कृ॑णुहि॒ स्तवा॑नः ।

ऋ॒ध्याम॒ कर्मा॒पसा॒ नवे॑न दे॒वैर्द्या॑वापृथिवी॒ प्राव॑तं नः ॥ ८ ॥

त्वं । नः॒ । अ॒ग्ने॒ । स॒नये॑ । धना॑नां । य॒शसं॑ । का॒रुं । कृ॒णु॒हि॒ । स्तवा॑नः ।

ऋ॒ध्याम॑ । कर्म॑ । अ॒पसा॑ । नवे॑न । दे॒वैः । द्या॒वा॒पृ॒थि॒वी॒ इति॑ । प्र । अ॒व॒तं॒ । नः॒ ॥ ८ ॥

हे अग्ने स्तवानः स्तूयमानस्त्वं नोऽस्माकं धनानां सनये दानार्थं यशसं यशोयुक्तं कारुं कर्मणां कर्तारं पुत्रं कृणुहि । कुरु । नवेन नूतनेनापसा प्राप्तेन त्वद्दत्तेन पुत्रेण कर्म यागदानादिरूपमृध्याम । वर्धयाम । हे द्यावापृथिवी उभे देवते देवैरन्यैः सह नोऽस्मान्प्रावतं । प्रकर्षेण रक्षतं ॥ यशसं । अर्शआदित्वा-

दच्प्रत्ययः। व्यत्ययेन प्रत्ययात्पूर्वस्योदात्तत्वं। यद्वा सर्वप्रातिपदिकेभ्यः क्विब्वक्तव्यः । पा॰ ३. १. ११. ४.। इति यशस्शब्दात् क्विप्। तस्य प्रत्ययांतस्य सनाद्यंतत्वाद्धातुसंज्ञायां क्विप् चेति क्विप्प्रत्ययांतधातोः सति शिष्टत्वाद्धातोरित्यंतोदात्तत्वं। कृणुहि। उतश्च प्रत्ययाच्छंदो वावचनमिति हेर्लुगभावः। स्तवानः। सम्यानच् स्तुवः। उ॰ २. ८६.। इति बहुलवचनात्केवलस्यापि स्तौतेरानच्प्रत्ययः। वृषादित्वादाद्युदात्तत्वं। ऋध्याम। ऋधु वृद्धौ। बहुलं छंदसीति विकरणस्य लुक्। यासुट उदात्तत्वं। द्यावापृथिवी। दिवो द्यावा। पा॰ ६. ३. २९.। इति द्यावादेशः। आमंत्रितानुदात्तत्वं॥

नवमीमृचमाह॥

त्वं नो॑ अग्ने पि॒त्रोरु॒पस्थ॒ आ दे॒वो दे॒वेष्व॑नवद्य॒ जागृ॑विः।
त॒नू॒कृद्बो॑धि॒ प्रम॑तिश्च का॒रवे॒ त्वं क॑ल्याण॒ वसु॒ विश्व॒मोपि॑षे॥ ९॥

त्वं। नः॒। अ॒ग्ने॒। पि॒त्रोः। उ॒पऽस्थे॑। आ। दे॒वः। दे॒वेषु॑। अ॒न॒व॒द्य॒। जागृ॑विः।
त॒नू॒ऽकृत्। बो॒धि॒। प्रऽम॑तिः। च॒। का॒रवे॑। त्वं। क॒ल्या॒ण॒। वसु॑। विश्व॑म्। आ।
ऊ॒पि॒षे॒॥ ९॥

हे अनवद्य दोषरहिताग्ने देवेषु सर्वेषु मध्ये जागृविर्जागरूकस्त्वं पित्रोर्मातृपितृरूपयोर्द्यावापृथिव्योरुपस्थे समीपस्थाने वर्तमानः सन् नोऽस्माकं तनूकृत् पुत्ररूपशरीरकारी भूत्वा बोधि। बुध्यस्व। अनुगृहाणेत्यर्थः। तथा कारवे कर्मकर्त्रे यजमानाय प्रमतिश्चानुग्रहरूपप्रकृष्टमतियुक्तश्च भवेति शेषः। हे कल्याण मंगलरूपाग्ने त्वं विश्वं वसु सर्वमपि धनमोपिषे। यजमानार्थमावपसि॥ उपस्थे। सुपि स्थः। पा॰ ३. २. ४.। इति तिष्ठतेः कः प्रत्ययः। आतो लोप इटि चेत्याकारलोपः। मरुद्वृधादीनां छंदस्युपसंख्यानमिति पूर्वपदांतोदात्तत्वं। जागृविः। जागृ निद्राक्षये। जृशॄस्तृजागृभ्यः क्विन्। उ॰ ४. ५५.। इति क्विन्। नित्त्वादाद्युदात्तत्वं। बोधि। बुध अवगमने। बहुलं छंदसीति शपो लुक्। वा छंदसीति हेरपित्त्वस्य विकल्पितत्वेन पित्त्वादङित्त्वे सत्यङितश्च। पा॰ ६. ४. १०३.। इति हेर्धिरादेशः। लघूपधगुणः। धातोरंत्यलोपश्छांदसः। प्रमतिः। मन ज्ञाने। क्तिन्यनुदात्तोपदेशेत्यादिनानुनासिकलोपः। प्रकृष्टा मतिर्यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। ओपिषे। टुवप् बीजसंताने। छांदसे लिटि थासः

से । वचिस्वपीत्यादिना संप्रसारणपरपूर्वत्वे । द्विर्भावहलादिशेषौ । ऋादिनियमादिट् ॥

दशमीमृचमाह ॥

त्वम॑ग्ने प्रम॑तिस्त्वं पि॒तासि॑ न॒स्त्वं व॑य॒स्कृत्तव॑ जा॒मयो॑ व॒यं ।
सं त्वा॒ रायः॑ श॒तिनः॒ सं स॑ह॒स्रिणः॑ सु॒वीरं॑ यंति व्रत॒पाम॑दाभ्य ॥ १० ॥

त्वं । अ॒ग्ने॒ । प्रऽम॑तिः । त्वं । पि॒ता । अ॒सि॒ । नः॒ । त्वं । व॒यः॒ऽकृत् । तव॑ । जा॒मयः॑ । व॒यं ।
सं । त्वा॒ । रायः॑ । श॒तिनः॑ । सं । स॒ह॒स्रिणः॑ । सु॒ऽवीरं॑ । यं॒ति॒ । व्र॒त॒ऽपां । अ॒दा॒भ्य॒ ॥ १० ॥

हे अग्ने त्वं प्रमतिरस्मदनुग्रहरूपप्रकृष्टमतियुक्तोऽसि । तथा त्वं नोऽस्माकं पिता पालकोऽसि । तथा त्वं वयस्कृत् । आयुष्प्रदोऽसि । वयमनुष्ठातारस्तव जामयो बंधवः । हे अदाभ्य केनाप्यहिंसनीयाग्ने सुवीरं शोभनपुरुषयुक्तं व्रतपां कर्मणः पालकं त्वां शतिनः शतसंख्यायुक्ता रायो धनानि संयंति । सम्यक् प्राप्नुवंति । तथा सहस्रिणः सहस्रसंख्याका रायः संयंति ॥ सुवीरं । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वे प्राप्ते वीरवीर्यौ च । पा० ६. २. १२०. । इत्युत्तरपदाद्युदात्तत्वं । अदाभ्य । दभिः प्रकृत्यंतरमस्तीति केचिदाहुः । दभेश्चेति वक्तव्यं । पा० ३. १. १२४. ३. । इति ण्यत् ॥

॥ इति प्रथमस्य द्वितीये त्रयस्त्रिंशो वर्गः ॥

एकादशीमृचमाह ॥

त्वाम॑ग्ने प्रथ॒मम॒ायुम॒ायवे॑ दे॒वा अ॑कृण्व॒न्नहु॑षस्य वि॒श्पतिं॑ ।
इळा॑मकृण्व॒न्मनु॑षस्य॒ शास॑नीं पि॒तुर्यत्पु॒त्रो मम॑कस्य॒ जाय॑ते ॥ ११ ॥

त्वां । अ॒ग्ने॒ । प्र॒थ॒मं । आ॒युं । आ॒यवे॑ । दे॒वाः । अ॒कृ॒ण्व॒न् । नहु॑षस्य । वि॒श्पतिं॑ ।
इळां॑ । अ॒कृ॒ण्व॒न् । मनु॑षस्य । शास॑नीं । पि॒तुः । यत् । पु॒त्रः । मम॑कस्य ।
जाय॑ते ॥ ११ ॥

हे अग्ने त्वां प्रथमं पुरा देवा आयव आयोर्मनुष्यरूपस्य नहुषस्यैतन्नामकराजविशेषस्यायुं मनुष्यरूपं विश्पतिं सेनापतिमकृण्वन् । कृतवंतः । तथा मनुषस्य मनोरिळामेतन्नामधेयां पुत्रीं शासनीं धर्मोपदेशकर्त्रीमकृण्वन् । कृतवंतः । तथा

च तैत्तिरीयैराम्नायते । इडा वै मानवी यज्ञानुकाशिन्यासीदिति । वाजसनेयिनोऽप्येवमामनंति । प्रयाजानुयाजानां मध्ये मामवकल्पय मया सर्वानवाप्स्यसि कामानिति सा मनुमन्वशादिति यत् शादिति । यद्यदा ममकस्य मदीयस्य हिरण्यस्तूपसंबंधिनो यः पितांगिरास्तस्य पितुः पुत्रो जायते । तदानीं हे अग्ने त्वमेव पुत्ररूप आसीरिति शेषः ॥ आयवे । षष्ठ्यर्थे चतुर्थी वक्तव्येति चतुर्थी । नहुषस्य । णह बंधने । नहिकलिहन्यर्तिलमिभ्य उपच् । उ० ४. ७६. । वृषादित्वादाद्युदात्तत्वं । विश्पतिं । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । मनुषस्य । मनेर्निदित्युषच् । नित्त्वादाद्युदात्तत्वं । बहुलकाद्वृद्ध्यभावः । शासनीं । शिष्यतेऽनयेति शासनी । करणाधिकरणयोश्चेति ल्युट् । टिड्ढाणञित्यादिना । पा० ४. १. १५. । ङीप् । लित्स्वरेणाद्युदात्तत्वं । ममकस्य । ममेदमित्यर्थे तस्येदमित्यणि तवकममकावेकवचने । पा० ४. ३. ३. । इत्यस्मच्छब्दस्य ममकादेशः । संज्ञापूर्वको विधिरनित्य इति वृद्ध्यभावः । व्यत्ययेनाद्युदात्तत्वं ॥

द्वादशीमृचमाह ॥

त्वं नो॑ अग्ने॒ तव॑ देव पा॒युभि॑र्म॒घोनो॑ रक्ष त॒न्व॑श्च वंद्य ।
त्रा॒ता तो॒कस्य॒ तन॑ये॒ गवा॑म॒स्यनि॑मेषं॒ रक्ष॑माण॒स्तव॑ व्र॒ते ॥ १२ ॥

त्वं । नः॒ । अ॒ग्ने॒ । तव॑ । दे॒व॒ । पा॒युऽभिः॑ । म॒घोनः॑ । र॒क्ष॒ । त॒न्वः॑ । च॒ । व॒न्द्य॒ ।
त्रा॒ता । तो॒कस्य॑ । तन॑ये । गवा॑म् । अ॒सि॒ । अनि॑ऽमेषं । रक्ष॑माणः । तव॑ । व्र॒ते ॥ १२ ॥

हे वंद्य वंदनीयाग्ने देव त्वं तव पायुभिस्त्वदीयैः पालनैर्मघोनो धनयुक्तान्नोऽस्मान् रक्ष । तथा तन्वश्च तनूः पुत्रदेहानपि रक्ष । तोकस्यास्मदीयस्य पुत्रस्य यस्तनयोऽस्मत्पौत्रादिस्तव व्रते त्वदीये कर्मण्यनिमेषं निरंतरं रक्षमाणः सावधानो वर्तते तस्मिन्या गावः संति तासां गवां त्राता रक्षकोऽसि । ईदृशस्य तवास्मद्रक्षणे किमु वक्तव्यमित्यर्थः ॥ मघोनः । शसि श्वयुवमघोनामतद्धिते । पा० ६. ४. १३३. । इति संप्रसारणं । तन्वः । सुपां सुपो भवंतीति शसो जसादेशः । पूर्वसवर्णदीर्घस्य दीर्घाज्जसि चेति प्रतिषेधः । उदात्तस्वरितयोर्यण इति स्वरितत्वं । शसि ह्युदात्तयणो हल्पूर्वादिति विभक्त्युदात्तत्वं स्यात् ॥

त्रयोदशीमृचमाह ॥

त्वमग्ने यज्यवे पायुरंतरोऽनिषंगाय चतुरक्ष इध्यसे ।
यो रातहव्योऽवृकाय धायसे कीरेश्चिन्मंत्रं मनसा वनोषि तं ॥ १३ ॥

त्वं । अग्ने । यज्यवे । पायुः । अंतरः । अनिषंगाय । चतुःऽअक्षः । इध्यसे ।
यः । रातऽहव्यः । अवृकाय । धायसे । कीरेः । चित् । मंत्रं । मनसा । वनोषि । तं ॥ १३ ॥

हे अग्ने त्वं यज्यवे यज्योर्यजमानस्य पायुः पालकः । अंतरः समीपवर्ती सन् अनिषंगाय रक्षोभिरसंबद्धाय यज्ञाय चतुरक्षो दिक्चतुष्टयेऽपींद्रियस्थानीयज्वालायुक्त इध्यसे । दीप्यसे । अवृकायाहिंसकाय धायसे पोषकाय तुभ्यं रातहव्यो दत्तहविष्को यो यजमानोऽस्ति । कीरेश्चित्स्तोतुरेव सतस्तस्य संबंधिनं मंत्रं त्वदीयस्तोत्ररूपं मनसा त्वदीयेन चित्तेन वनोषि । याचसि ॥ यज्यवे । यजिमनिशुंधीत्यादिना । उ० ३. २०. । यजतेर्युप्रत्ययः । पायुः । कृवापाजीत्यादिना उण् । आतो युक् चिण्कृतोः । पा० ७. ३. ३३. । इति युगागमः । अनिषंगाय । षंज संगे । न विद्यते निषंगोऽस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । चतुरक्षः । चत्वार्यक्षीणि ज्वालारूपाणि यस्यासौ चतुरक्षः । बहुव्रीहौ सक्थ्यक्ष्णोः । पा० ५. ४. ११३. । इति समासांतः षच्प्रत्ययः । चित इत्यंतोदात्तत्वं । धायसे । वहिहाधाञ्भ्यश्छंदसीत्यसुन् । णिदित्यनुवृत्तेरातो युक् चिण्कृतोरिति युगागमः । कीरेः । कृत संशब्दने । अस्माण्ण्यंतादच इरितीप्रत्यये णिलोपे धातोरंत्यलोपश्छांदसः । मंत्रं । मत्रि गुप्तभाषणे । पचाद्यचि वृषादिषु पाठादाद्युदात्तत्वं । वनोषि । वनु याचने । तनादिकृञ्भ्य उः । प्रत्ययस्वरः ॥

चतुर्दशीमृचमाह ॥

त्वमग्न उरुशंसाय वाघते स्पार्हं यद्रेक्णः परमं वनोषि तत् ।
आध्रस्य चित्प्रमतिरुच्यसे पिता प्र पाकं शास्सि प्र दिशो विदुष्टरः ॥ १४ ॥

त्वं । अग्ने । उरुऽशंसाय । वाघते । स्पार्हं । यत् । रेक्णः । परमं । वनोषि । तत् ।
आध्रस्य । चित् । प्रऽमतिः । उच्यसे । पिता । प्र । पाकं । शास्सि । प्र । दिशः ।
विदुःऽतरः ॥ १४ ॥

हे अग्ने त्वमुरुशंसाय बहुभिः स्तोतव्याय वाघते ऋत्विजे तदुपकारार्थं स्पार्हं स्पृहणीयं परममुत्तमं यद्रेक्णो धनमस्ति तद्धनं वनोषि। अनुष्ठाता लभतामिति कामयसे। तथा त्वमाध्रस्य चित् सर्वतो धारणीयस्य पोषणीयस्य दुर्बलस्य यजमानस्यापि प्रमतिः प्रकृष्टबुद्धियुक्तः पिता पालक इत्यभिज्ञैरुच्यसे। तथा विदुष्टरोऽतिशयेनाभिज्ञस्त्वं पाकं शिशुं। पोतः पाकोऽर्भको डिंभ इत्यभिधानात्। यास्कोऽप्येवमाह। पाकः पक्तव्यो भवति। नि० ३. १२.। तथाविधं यजमानं प्रशास्सि। प्रकर्षेणानुशिष्टं करोषि। तथा दिशः प्राच्यादिकाः प्रशास्सि। त्वदीयशासनाभावेऽनुष्ठातॄणां विभ्रमः स्यात्। तथा च श्रूयते। देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्निति। स भ्रमो दक्षिणादिग्गतोऽग्निना निवर्तते। तदपि तत्रैवाम्नातं। पथ्यां स्वस्तिमयजन् प्राचीमेव तया दिशं प्राजानन्नग्निना दक्षिणेति। ऐतरेयिणापि तथैवाम्नातं। अथो एनं वरमवृणीत मयैव प्राचीं दिशं प्रजानाथाग्निना दक्षिणामिति॥ उरुशंसाय। शंसु स्तुतौ। शस्यत इति शंसः। कर्मणि घञ्। ञित्स्वरेणाद्युदात्तत्वं। कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते। स्पार्हं। स्पृहासंबंधि। तस्येदमित्यण्। रेक्णः। रिचिर् विरेचने। रिचेर्धने घिच्च। उ० ४. २००.। इत्यसुन्। चकारान्नुडागमः। चजोः कु घिण्ण्यतोः। पा० ७. ३. ५२.। इति कुत्वं। आध्रस्य। ध्यै तृप्तौ। आदेच उपदेशेऽशितीत्यात्वं। आतश्चोपसर्गे। पा० ३. १. १३६.। इति कप्रत्ययः। शास्सि। शासु अनुशिष्टौ। अदादित्वाच्छपो लुक्। सिपः पित्त्वादनुदात्तत्वे धातुस्वरः। पाकं च प्रशास्सि दिशश्च प्रशास्सीत्यत्र चार्थो गम्यते। अतश्चादिलोपे विभाषेति प्रथमा तिङ्विभक्तिर्न निहन्यते। विदुष्टरः। विद्वच्छब्दात्तरप्ययस्मयादीनि छंदसीति भसंज्ञायां वसोः संप्रसारणमिति संप्रसारणं परपूर्वत्वं। शासिवसीति षत्वं। तरपः पित्त्वादनुदात्तत्वे वसोः स्वरेणोकार उदात्तः॥

पंचदशीमृचमाह॥

त्वम॑ग्ने॒ प्रय॑तदक्षिणं॒ नरं॒ वर्मे॑व स्यू॒तं परि॑ पासि वि॒श्वतः॑।
स्वा॒दु॒क्षद्मा॒ यो व॑स॒तौ स्यो॑न॒कृज्जी॑वया॒जं यज॑ते॒ सो॑प॒मा दि॒वः॥ १५॥

त्वं। अ॒ग्ने॒। प्रय॑तऽदक्षिणं। नरं॑। वर्म॑ऽइव। स्यू॒तं। परि॑। पा॒सि॒। वि॒श्वतः॑।
स्वा॒दु॒ऽक्षद्मा॑। यः। व॒स॒तौ। स्यो॒न॒ऽकृत्। जी॒व॒ऽया॒जं। यज॑ते। सः। उ॒प॒ऽमा। दि॒वः॥ १५॥

हे अग्ने त्वं प्रयतदक्षिणं येन यजमानेन ऋत्विग्भ्यो दक्षिणा दत्ता तादृशं नरं पुरुषं यजमानं विश्वतः सर्वतः परिपासि । सम्यक् पालयसि । तत्र दृष्टांतः । स्यूतं निश्छिद्रत्वेन सूचिभिः सम्यक् निष्पादितं वर्मेव यथा कवचं युद्धे पालयति तद्वत् । स्वादुक्षद्मा स्वादन्नो वसतौ निवासभूते स्वगृहे स्योनकृत् अतिथीनां सुखकारी यो यजमानो जीवयाजं जीवयजनसहितं यज्ञं यद्वा जीवनिष्पाद्यं यजते । अनुतिष्ठति । स यजमानो दिवः स्वर्गस्योपमा दृष्टांतो भवति । यथा स्वर्गोऽनुष्ठातॄन्सुखयति तथा त्वमप्यृत्विगादीनित्यर्थः ॥ स्यूतं । षिवु तंतुसंताने । निष्ठेति क्तः । यस्य विभाषेतीट्प्रतिषेधः । च्छ्वोः शूडनुनासिके च । पा॰ ६. ४. १९. । इति वकारस्योडादेशः । स्वादून्क्षदतीति स्वादुक्षद्मा । क्षदतिरत्तिकर्मा । अन्येभ्योऽपि दृश्यंत इति मनिन् । नित्त्वादाद्युदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वं बहुव्रीहौ तु व्यत्ययेन । जीवयाजं । जीवा ऋत्विज इज्यंते दक्षिणाभिः पूज्यंतेऽत्रेत्यधिकरणे घञ् । कुत्वाभावश्छांदसः । यद्वा जीवैः पशुभिर्याजनं जीवयाजः । याजयतेर्घञ् । णेरनिटीति णिलोपस्याचः परस्मिन्निति स्थानिवद्भावात्तजोः कु घिण्यतोरिति कुत्वाभावः । थाथादिस्वरेणोत्तरपदांतोदात्तत्वं । सोपमा । सोऽचि लोपे चेत्पादपूरणमिति संहितायां सोर्लोपः । दिवः । ऊडिदमिति विभक्तेरुदात्तत्वं ॥

॥ इति प्रथमस्य द्वितीये चतुस्त्रिंशो वर्गः ॥

इमामग्न इत्यनयानाहिताग्निरार्त्विज्यं कृत्वा स्वाग्नावाहुतिं जुहुयात् । ऋत्विजो वृणीतेति खंड एवमनाहिताग्निर्गृह्य इमामग्ने शरणिं मीमृषो नः । गृ॰ सू॰ १. २३. । इति सूत्रितं । तामेतां सूक्ते षोडशीमृचमाह ॥

इमामग्ने शरणिं मीमृषो न इममध्वानं यमगाम दूरात् ।
आपिः पिता प्रमतिः सोम्यानां भृमिरस्यृषिकृन्मर्त्यानां ॥ १६ ॥

इमां । अग्ने । शरणिं । मीमृषः । नः । इमं । अध्वानं । यं । अगाम । दूरात् ।
आपिः । पिता । प्रऽमतिः । सोम्यानां । भृमिः । असि । ऋषिऽकृत् । मर्त्यानां ॥ १६ ॥

हे अग्ने त्वं नोऽस्मत्संबंधिनीमिमामिदानीं संपादितां शरणिं हिंसां व्रतलोपरूपां मीमृषः । क्षमस्व । तथा त्वदीयसेवामग्निहोत्रादिरूपां परित्यज्य दूराद्

रदेशं यमिममध्वानमगाम। वयं गतवंतः। तमपि क्षमस्वेति शेषः। सोम्यानां सोमार्हाणामनुष्ठातॄणां मर्त्यानां त्वमाप्यादिगुणयुक्तोऽसि। आपिः। प्रापणीयः। पिता। पालकः। प्रमतिः। प्रकृष्टमननयुक्तः। भृमिः। भ्रामकः कर्मनिर्वाहक इत्यर्थः। ऋषिकृत्। दर्शनकारी। अनुजिघृक्षया प्रत्यक्षो भवसीत्यर्थः॥ शरणिं। शॄ हिंसायामित्यस्मादौणादिकोऽनिप्रत्ययः। मीमृषः। मृष तितिक्षायां। अस्माण्णौ चङि गुणे प्राप्ते नित्यं छंदसीत्युपधाऋकारस्य ऋकारादेशः। णि-लोपद्विर्भावहलादिशेषोरदत्वसन्वद्भावेत्वदीर्घत्वानि। तिङ्ङतिङ इति निघातः। अगाम। इण् गतौ। इणो गा लुङि। पा० २. ४. ४५.। इति गादेशः। गाति-स्थेति सिचो लुक्। अडागम उदात्तः। भृमिः। भ्रमु अनवस्थाने। भ्रमेः संप्र-सारणं च। उ० ४. १२२.। इतीन्प्रत्ययः। संप्रसारणे परपूर्वत्वं। इगुपधात्किदित्य-नुवृत्तेः कित्त्वाद्गुणप्रतिषेधः। नित्त्वादाद्युदात्तत्वं॥

सप्तदशीमृचमाह॥

मनुष्वदग्ने अंगिरस्वदंगिरो ययातिवत्सदने पूर्ववच्छुचे।
अच्छ याह्या वहा दैव्यं जनमा सादय बर्हिषि यक्षि च प्रियं॥ १७॥

मनुष्वत्। अग्ने। अंगिरस्वत्। अंगिरः। ययातिऽवत्। सदने। पूर्वऽवत्। शुचे।
अच्छ। याहि। आ। वह। दैव्यं। जनं। आ। सादय। बर्हिषि। यक्षि। च। प्रियं॥ १७॥

हे शुचे शुद्धियुक्तांगिरः। अंगनशील। हविरादानाय तत्र तत्र गमनशी-लाग्ने। अच्छाभिमुख्येन सदने देवयजनदेशे याहि। गच्छ। तत्र चत्वारो दृष्टांताः। मनुष्वत्। यथा मनुरनुष्ठानदेशे गच्छति। अंगिरस्वत्। यथा चां-गिरा गच्छति। ययातिवत्। यथा ययातिर्नाम राजा गच्छति। पूर्ववत्। अन्ये च पूर्वपुरुषा यथा गच्छंति। यथा मन्वादयो यज्ञे गच्छंति तद्वत्। अथवा मन्वादीनां यज्ञे यथा त्वं गच्छसि तद्वत्। गत्वा च दैव्यं देवतासमूहरूपं जन-मावह। अस्मिन्कर्मण्यानय। आनीय बर्हिष्यास्तीर्णे दर्भ आसादय। तान्देवा-नुपवेशय। उपवेश्य च प्रियमभीष्टं हविर्यक्षि च। देहि॥ मनुष्वत्। तेन तुल्यमिति प्रथमार्थे वा तत्र तस्येवेति षष्ठ्यर्थे वा वतिः। पा० ५. १. ११५. ११६.। अयस्मयादित्वेन भत्वादुत्वाद्यभावः। प्रत्ययस्वरः। एवमंगिरस्वदित्यादिषु। वहा। द्व्यचोऽतस्तिङ इति संहितायां दीर्घः। यक्षि। लोटि बहुलं छंदसीति शपो लुक्। सेर्ह्यपिच्चेति हेरभावश्छांदसः। षत्वकत्वे॥

साग्निचयने ऋतावुषासंभरणीयायामिष्टावग्नेर्ब्रह्मखतः पुरोनुवाक्यैतेनाग्न इत्येषा। दर्शपूर्णमासाभ्यामिष्ट्वेति खंड एतेनाग्ने ब्रह्मणा वावृधस्व ब्रह्म च ते जातवेदो नमश्च। आ० ४.१.। इति सूत्रितं। तामेतां सूक्तेऽष्टादशीमृचमाह ॥

एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत्ते चकृम विदा वा।
उत प्र णेष्यभि वस्यो अस्मान्त्सं नः सृज सुमत्या वाजवत्या ॥ १८ ॥

एतेन। अग्ने। ब्रह्मणा। ववृधस्व। शक्ती। वा। यत्। ते। चकृम। विदा। वा।
उत। प्र। नेषि। अभि। वस्यः। अस्मान्। सं। नः। सृज। सुऽमत्या। वाजऽवत्या ॥ १८ ॥

हे अग्ने। एतेनास्मत्प्रयुक्तेन ब्रह्मणा मंत्रेण वावृधस्व। अभिवृद्धो भव। शक्ती वा विदा वा। अस्मदीयशक्त्या चास्मदीयज्ञानेन च। ते तव यत्स्तोत्रं चकृम। वयं कृतवंतः। एतेन ब्रह्मणेति पूर्वेणान्वयः। उत अपि चास्मान-नुष्ठातॄन् वस्यो वसुमत्तरत्वलक्षणं श्रेयः प्रणेषि। प्रकर्षेण प्रापय। नोऽस्मान्वा-जवत्या प्रभूतान्नयुक्तया सुमत्यानुष्ठानविषयया शोभनबुद्ध्या संसृज। संयोजय ॥ वावृधस्व। वृधु वृद्धौ। लेट्यडागमः। बहुलं छंदसीति शपः श्लुः। द्विर्भावह-लादिशेषोरदत्वानि। अभ्यासस्य संहितायां दीर्घश्छांदसः। शक्ती। सुपां सुलुगि-त्यादिना तृतीयायाः पूर्वसवर्णदीर्घत्वं। क्तिनो नित्त्वादाद्युदात्तत्वं। विदा। सा-वेकाच इति तृतीयाया उदात्तत्वं। नेषि। णीञ् प्रापणे। बहुलं छंदसीति शपो लुक्। उपसर्गादसमास इति णत्वं। सुमत्या। मन्क्तिनित्यादिनोत्तरपदांतोदात्तत्वं प्रथमाध्याये प्रपंचितं। उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं ॥

॥ इति प्रथमस्य द्वितीये पंचत्रिंशो वर्गः ॥

इंद्रस्य नु वीर्याणीति पंचदशर्चं द्वितीयं सूक्तं। आंगिरसो हिरण्यस्तूप ऋषिः। त्रिष्टुप् छंदः। इंद्रो देवता। इंद्रस्य पंचोनेत्यनुक्रमणिका। अग्निष्टोमे माध्यंदिने सवने निष्केवल्यशस्त्र इंद्रस्य नु वीर्याणीति निविद्धानीयं सूक्तं। निष्केवल्यस्येति खंड इंद्रस्य नु वीर्याणीत्येतस्मिन्नैंद्रीं निविदं दध्यात्। आ० ५. १५.। इति ॥ विषुवत्यपि तस्मिन् शस्त्र एतद्विनियुक्तं। विषुवान्दिवा कीर्त्य इति खंड सूत्रितं। इंद्रस्य नु वीर्याणीत्येतस्मिन्नैंद्रीं निविदं शस्त्वा। आ० ८. ६.। इति ॥

महाव्रते निष्केवल्येऽप्येतदेव विनियुक्तं। राथंतरो दक्षिणः पक्ष इति खंडे चतस्रः सतीः षड् बृहतीः करोतींद्रस्य नु वीर्याणि प्रवोचमिति ॥ तत्र प्रथमामृचमाह ॥

इंद्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री।
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानां ॥ १ ॥
इंद्रस्य। नु। वीर्याणि। प्र। वोचं। यानि। चकार। प्रथमानि। वज्री।
अहन्। अहिं। अनु। अपः। ततर्द। प्र। वक्षणाः। अभिनत्। पर्वतानां ॥ १ ॥

वज्री वज्रयुक्त इंद्रः प्रथमानि पूर्वसिद्धानि मुख्यानि वीर्याणि पराक्रमयुक्तानि कर्माणि चकार। तस्येंद्रस्य तानि वीर्याणि नु क्षिप्रं प्रब्रवीमि। कानि वीर्याणीति तदुच्यते। अहिं मेघमहन्। हतवान्। तदेतदेकं वीर्यं। अनु पश्चादपो जलानि ततर्द। हिंसितवान्। भूमौ निपातितवानित्यर्थः। इदं द्वितीयं वीर्यं। पर्वतानां संबंधिनीर्वक्षणाः प्रवहणशीला नदीः प्राभिनत्। भिन्नवान्। कूलद्वयकर्षणेन प्रवाहितवानित्यर्थः। इदं तृतीयं वीर्यं। एवमुत्तरत्रापि द्रष्टव्यं ॥ वीर्याणि। शूर वीर विक्रांतौ। ण्यंतादचो यदिति यत्। णेरनिटीति णिलोपः। तित्स्वरितमिति स्वरितत्वं। यतोऽनाव इत्याद्युदात्तत्वं न भवति। आद्युदात्तत्वे हि सुशब्देन बहुव्रीहावाद्युदात्तं द्व्यच्छंदसीत्यनेनैवोत्तरपदाद्युदात्तत्वस्य सिद्धत्वाद्वीरवीर्यौ चेति पुनस्तद्विधानमनर्थकं स्यात्। अतोऽवगम्यते यतोऽनाव इत्याद्युदात्तत्वं वीरशब्दे न प्रवर्तत इति। अतः परिशेषात्तित्स्वरितमिति प्रत्ययस्य स्वरितत्वमेव। वोचं। अस्यतिवक्तिख्यातिभ्योऽङिति च्लेरङादेशः। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। चकार। णलि लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं। यद्वृत्तयोगादनिघातः। अहन्। लङीतश्चेतीकारलोपे हल्ङ्याब्भ्य इति तकारलोपः। अहिं। आङ्पूर्वाद्धंतेराङि श्रिहनिभ्यां ह्रस्वश्च। उ॰ ४. १३९.। इतीण्प्रत्ययः। आङो ह्रस्वत्वं च। चशब्देन वेञो डित् समाने ख्यश्चोदात्त इति डित्त्वं पूर्वपदोदात्तत्वं चानुकृष्यते। ततष्टिलोपे पूर्वपदस्योदात्तत्वं। ततर्द। उतृदिर् हिंसानादरयोः। तिङ्ङतिङ इति निघातः। वक्षणाः। वक्ष रोषे। क्रुधमंडार्थेभ्यश्च। पा॰ ३. २. १५१.। इति युच्। चित्स्वरं बाधित्वा व्यत्ययेन प्रत्ययस्वरः ॥

द्वितीयामृचमाह ॥

अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष ।
वाश्रा इव धेनवः स्यंदमाना अंजः समुद्रमव जग्मुरापः ॥ २ ॥

अहन् । अहिं । पर्वते । शिश्रियाणं । त्वष्टा । अस्मै । वज्रं । स्वर्यं । ततक्ष ।
वाश्राःऽइव । धेनवः । स्यंदमानाः । अंजः । समुद्रं । अव । जग्मुः । आपः ॥ २ ॥

पर्वते शिश्रियाणमाश्रितमहिं मेघमहन् । हतवान् । अस्मा इंद्राय स्वर्यं सुष्ठु प्रेरणीयं यद्वा शब्दनीयं स्तुत्यं त्वष्टा विश्वकर्मा वज्रं ततक्ष । तनूकृतवान् । तेन वज्रेण मेघे भिन्ने सति स्यंदमानाः प्रस्रवणयुक्ता आपः समुद्रमंजः सम्यगवजग्मुः । प्राप्ताः । तत्र दृष्टांतः । वाश्रा वत्सान्प्रति हंभारवोपेता धेनव इव । यथा धेनवः सहसा वत्सगृहे गच्छंति तद्वत् ॥ शिश्रियाणं । श्रिञ् सेवायां । लिटः कानच् । द्विर्भावहलादिशेषयणादेशाः । चित इत्यंतोदात्तत्वं । स्वर्यं । ऋ गतौ । अस्मात्सुपूर्वादृहलोर्ण्यदिति ण्यत् । संज्ञापूर्वको विधिरनित्य इति वृद्ध्यभावः । यद्वा स्वृ शब्दोपतापयोरित्यस्मात् ण्यति पूर्ववद्वृद्ध्यभावः । तित्स्वरितमिति स्वरितत्वं । वाश्यंत इति वाश्राः । वाशृ शब्दे । स्फायितंचीत्यादिना रक् । जग्मुः । उसि गमहनेत्युपधालोपः ॥

तृतीयामृचमाह ॥

वृषायमाणोऽवृणीत सोमं त्रिकद्रुकेष्वपिबत्सुतस्य ।
आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजामहीनां ॥ ३ ॥

वृषऽयमाणः । अवृणीत । सोमं । त्रिऽकद्रुकेषु । अपिबत् । सुतस्य ।
आ । सायकं । मघऽवा । अदत्त । वज्रं । अहन् । एनं । प्रथमऽजां । अहीनां ॥ ३ ॥

वृषायमाणो वृष इवाचरन्निंद्रः सोममवृणीत । वृतवान् । त्रिकद्रुकेषु । ज्योतिर्गौरायुरित्येतन्नामकास्त्रयो यागास्त्रिकद्रुका उच्यंते । तेषु सुतस्याभिषुतस्य सोमस्यांशमपिबत् । पीतवान् । मघवा धनवानिंद्रः सायकं बंधकं वज्रमादत्त । स्वीकृतवान् । तेन च वज्रेणाहीनां मेघानां मध्ये प्रथमजां प्रथमोत्पन्नं मेघमहन् । हतवान् ॥ वृषायमाणः । वृष इवाचरन् । कर्तुः क्यङ् सलोपश्च । पा०

३. १. ११.। इति क्यङ्। अकृत्सार्वधातुकयोरिति दीर्घः। अदुपदेशाद्धातोरंतोदात्तत्वे क्यङंताद्धातोरंतोदात्तत्वं। सायकं। षिञ् बंधने। सिनोतीति सायकः। ण्वुल्। लित्स्वरेणाद्युदात्तत्वं। प्रथमजां। प्रथमं जायत इति प्रथमजाः। जनसनखनक्रमगमो विट्। विड्वनोरित्यात्वं॥

चतुर्थीमृचमाह॥

यदिंद्राहन्प्रथमजामहीनामान्मायिनाममिनाः प्रोत मायाः।
आत्सूर्यं जनयन्द्यामुषासं तादीत्ना शत्रुं न किला विवित्से॥४॥

यत्। इंद्र। अहन्। प्रथमऽजां। अहीनां। आत्। मायिनां। अमिनाः। प्र। उत। मायाः।
आत्। सूर्यं। जनयन्। द्यां। उषसं। तादीत्ना। शत्रुं। न। किल। विवित्से।॥४॥

उत अपि च हे इंद्र यद्यदाहीनां मेघानां मध्ये प्रथमजां प्रथमोत्पन्नं मेघमहन्। हतवानसि। आत् तदनंतरं मायिनां मायोपेतानामसुराणां संबंधिनीर्मायाः प्रामिनाः। प्रकर्षेण नाशितवानसि। अनंतरं सूर्यमुषासमुषःकालं द्यामाकाशं च जनयन् उत्पादयन्नावरकमेघनिवारणेन प्रकाशयन् वर्तसे। तादीत्ना तदानीमावरकांधकाराभावाच्छत्रुं घातकं वैरिणं न विवित्से किल। त्वं न लब्धवान्खलु॥ अहन्। हंतेर्लङि हल्ङ्याब्भ्य इति सिलोपः। अडागम उदात्तः। यद्वृत्तयोगादनिघातः। मायिनां। मायाशब्दस्य व्रीह्यादिषु पाठाद्व्रीह्यादिभ्यश्च। पा॰ ५. २. ११६.। इति मत्वर्थीय इनिः। अमिनाः। मीञ् हिंसायां। क्र्यादिकः। मीनातेर्निगमे। पा॰ ७. ३. ८१.। इति ह्रस्वत्वं। तादीत्ना। तदानीमित्यस्य पृषोदरादित्वाद्वर्णविपर्ययः। किल। निपातस्येति दीर्घत्वं। विवित्से। विद्लृ लाभे। क्रादिनियमात्प्राप्त इट् व्यत्ययेन न भवति॥

पंचमीमृचमाह॥

अहन्वृत्रं वृत्रतरं व्यंसमिंद्रो वज्रेण महता वधेन।
स्कंधांसीव कुलिशेना विवृक्णाहिः शयत उपपृक्पृथिव्याः॥५॥

अहन्। वृत्रं। वृत्रऽतरं। विऽअंसं। इंद्रः। वज्रेण। महता। वधेन।
स्कंधांसिऽइव। कुलिशेन। विऽवृक्णा। अहिः। शयते। उपऽपृक्। पृथिव्याः॥५॥

अयमिंद्रो वज्रेण संपादितो यो महान्वधस्तेन वज्रेण वृत्रतरमतिशयेन लो-

कानामावरकमंधकाररूपं। यद्वा वृत्रैरावरणैः सर्वांश्छत्रून्तरति तं वृत्रमेतन्नामकमसुरं व्यंसं विगतांसं छिन्नबाहुर्यथा भवति तथाहन्। हतवान्। अंसच्छेदने दृष्टांतः। कुलिशेन कुठारेण विवृक्णा विशेषतश्छिन्नानि स्कंधांसीव। यथा वृक्षस्कंधाश्छिन्ना भवंति तद्वत्। तथा सत्यहिर्वृत्रः पृथिव्या उपर्युपपृक् सामीप्येन संपृक्तः शयते। शयनं करोति। छिन्नकाष्ठवद्भूमौ पततीत्यर्थः॥ वृत्रतरं। वृतु वर्तने। स्फायितंचीत्यादिना भावे रक्प्रत्ययांतो वृत्रशब्दः। वृत्रेणावरणेन सर्वं तरतीति वृत्रतरः। तरतेः पचाद्यच्। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। तरपि तु व्यत्ययेन। व्यंसं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्व उदात्तस्वरितयोर्यण इति स्वरितत्वं। वधेन। हनश्च वध इति भावेऽप्। तत्संनियोगेन धातोर्वधादेशः। स चांतोदात्तः। अंत्यस्याकारस्यातो लोप इति लोप उदात्तनिवृत्तिस्वरेण प्रत्ययस्योदात्तत्वं। विवृक्णा। ओव्रश्चू छेदने। कर्मणि निष्ठा। यस्य विभाषेतीट्प्रतिषेधः। ओदितश्च। पा॰ ८. २. ४५.। इति परत्वान्निष्ठानत्वं। ततो व्रश्चभ्रस्जेति षत्वे प्राप्ते निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वक्तव्यः। पा॰ ८. २. ६. ६.। इति नत्वस्य सिद्धत्वेन झल्परत्वाभावात् षत्वं न भवति। कुत्वे तु कर्तव्ये तदसिद्धमेव। पा॰ ८. २. १.। इति चोः कुरिति कुत्वं। शेश्छंदसि बहुलमिति शेर्लोपः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। शयते। बहुलं छंदसीति शपो लुगभावः। पृथिव्याः। उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं॥

॥ इति प्रथमस्य द्वितीये षट्त्रिंशो वर्गः॥

षष्ठीमृचमाह॥

अयोद्धेव दुर्मद आ हि जुह्वे महावीरं तुविबाधमृजीषं।
नातारीदस्य समृतिं वधानां सं रुजानाः पिपिष इंद्रशत्रुः॥ ६॥

अयोद्धाऽइव। दुःऽमदः। आ। हि। जुह्वे। महाऽवीरं। तुविऽबाधं। ऋजीषं।
न। अतारीत्। अस्य। संऽऋतिं। वधानां। सं। रुजानाः। पिपिषे। इंद्रऽशत्रुः॥ ६॥

दुर्मदो दुष्टमदोपेतो दर्पयुक्तो वृत्रोऽयोद्धेव योद्धृरहित इवेंद्रं जुह्वे हि। आहूतवान्खलु। कीदृशमिंद्रं। महावीरं। गुणैर्महान्भूत्वा शौर्योपेतं। तुविबाधं। बहूनां बाधकं। ऋजीषं। शत्रूणामपार्जकं। अस्येदृशस्येंद्रस्य संबंधिनो ये शत्रुवधाः संति तेषां वधानां समृतिं संगमं नातारीत्। पूर्वोक्तो दुर्मदस्तरीतुं ना-

शक्नोत्। इंद्रशत्रुः। इंद्रः शत्रुर्घातको यस्य वृत्रस्य तादृशो वृत्र इंद्रेण हतो नदीषु पतितः सन् रुजाना नदीः संपिपिषे। सम्यक् पिष्टवान्। सर्वान् लोकानावृण्वतो वृत्रदेहस्य पातेन नदीनां कूलानि तत्रत्यपाषाणादिकं च चूर्णीभूतमित्यर्थः॥ अयोद्धा इव। न विद्यते योद्धास्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। समासांतविधेरनित्यत्वान्नद्यृतश्च। पा॰ ५.४.१५३.। इति कबभावः। जुह्वे। ह्वेञ् स्पर्द्धायां शब्दे च। अभ्यस्तस्य च। पा॰ ६.१.३३.। इति संप्रसारणं। उवङादेशाभावश्छांदसः। यद्वा छंदस्युभयथेति सार्वधातुकसंज्ञायां हुश्नुवोः सार्वधातुके। पा॰ ६. ४. ८७.। इति यणादेशः। अत्र लक्षणप्रतिपदोक्तपरिभाषा लक्ष्यानुरोधान्नाश्रीयते। इतरथा ह्याजुह्वान इत्यादिषु यणादेशो न स्यात्। न चैवं सति सातये हुवे वामित्यादावपि तथा स्यादिति। वाच्यं। अनेकाच्त्वाभावात्। अनेकाच इति हि तत्रानुवर्तते। प्रत्ययस्वरेणांतोदात्तत्वं। हि चेति निघातप्रतिषेधः। महावीरं। महांश्चासौ वीरश्च महावीरः। आन्महतः। पा॰ ६. ३. ४६.। इत्यात्वं। तुविबाधं। बाधृ विलोडने। तुवीन्प्रभूतान्बाधत इति तुविबाधः। पचाद्यच्। कृदुत्तरपदप्रकृतिस्वरत्वं। समृतिं। तादौ चेति गतेः प्रकृतिस्वरत्वं। रुजानाः। रुजो भंगे। रुजंति कूलानीति रुजाना नद्यः। रुजाना नद्यो भवंति रुजंति कूलानि। नि॰ ६. ४.। इति यास्कः। व्यत्ययेन शानच्। तुदादिभ्यः शः। नुमभावश्छांदसः। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः। पिपिषे। पिष्लृ संचूर्णने। व्यत्ययेन लिट्। इंद्रशत्रुः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥

सप्तमीमृचमाह॥

अपादहस्तो अपृतन्यदिंद्रमास्य वज्रमधि सानौ जघान।
वृष्णो वध्रिः प्रतिमानं बुभूषन्पुरुत्रा वृत्रो अशयद्व्यस्तः॥७॥

अपात्। अहस्तः। अपृतन्यत्। इंद्रं। आ। अस्य। वज्रं। अधि। सानौ। जघान।
वृष्णः। वध्रिः। प्रतिऽमानं। बुभूषन्। पुरुऽत्रा। वृत्रः। अशयत्। विऽअस्तः॥७॥

अपाद्वज्रेण छिन्नत्वात्पादरहितः। अहस्तो हस्तरहितो वृत्र इंद्रमुद्दिश्यापृतन्यत्। पृतनां युद्धमैच्छत्। द्वेषाधिक्येन बहुधा विद्धोऽपि युद्धं न परित्यक्तवानित्यर्थः। अस्य हस्तपादहीनस्य वृत्रस्य सानौ पर्वतसानौ पर्वतसानुसदृशे प्रौढस्कंधेऽध्युपरि वज्रमाजघान। इंद्र आभिमुख्येन प्रक्षिप्तवान्। अशक्तस्यापि

युद्धेच्छायां दृष्टांतः। वध्रिश्छिन्नमुष्कः पुरुषो वृष्णो रेतःसेचनसमर्थस्य पुरुषांतरस्य प्रतिमानं सादृश्यं बुभूषन्। प्राप्तुमिच्छन् यथा न शक्नोति तद्वदयमिति शेषः। स वृत्रः पुरुत्रा बहुष्ववयवेषु व्यस्तो विविधं क्षिप्रस्ताडितः सन् अशयत्। भूमौ पतितवान्॥ अपात्। बहुव्रीहौ पादशब्दस्यांत्यलोपश्छांदसः। अहस्तः। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। अपृतन्यत्। सुप आत्मनः क्यच्। कव्यध्वरपृतनस्येत्यंत्यलोपः। बुभूषन्। सनि ग्रहगुहोश्च। पा० ७. २. १२.। इतीट्प्रतिषेधः। पुरुत्रा। देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलं। पा० ५. ४. ५६.। इति सप्तम्यर्थे त्राप्रत्ययः। अशयत्। व्यत्ययेन परस्मैपदं। बहुलं छंदसीति शपो लुगभावः। व्यस्तः। असु क्षेपणे इत्यस्मात्कर्मणि क्तः। यस्य विभाषेतीट्प्रतिषेधः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। संहितायामुदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं॥

अष्टमीमृचमाह॥

नदं न भिन्नममुया शयानं मनो रुहाणा अति यंत्यापः।
याश्चिद्वृत्रो महिना पर्यतिष्ठत्तासामहिः पत्सुतःशीर्बभूव॥ ८॥

नदं। न। भिन्नं। अमुया। शयानं। मनः। रुहाणाः। अति। यंति। आपः।
याः। चित्। वृत्रः। महिना। परिऽअतिष्ठत्। तासां। अहिः। पत्सुतःऽशीः।
बभूव॥ ८॥

अमुयामुष्यां पृथिव्यां शयानं पतितं मृतं वृत्रमापो जलान्यतियंति। अतिक्रम्य गच्छंति। तत्र दृष्टांतः। भिन्नं बहुधाभिन्नकूलं नदं न। सिंधुमिव। तथा वृष्टिकाले प्रभूता आपो नद्याः कूलं भित्त्वातिक्रम्य गच्छंति तद्वत्। कीदृश्य आपः। मनो रुहाणाः। नृणां चित्तमारोहंत्यः। पुरा वृत्रे जीवति सति तेन निरुद्धा मेघस्थिता आपो भूमौ वृष्टा न भवंति। तदानीं नृणां मनः खिद्यते। मृते तु वृत्रे निरोधरहिता आपो वृत्रशरीरमुल्लंघ्य प्रवहंति। तदा वृष्टिलाभेन तु मनुष्यास्तुष्यंतीत्यर्थः। तदेतदुत्तरार्धेन स्पष्टीक्रियते। वृत्रो जीवनदशायां महिना स्वकीयेन महिम्ना याश्चिद्या एव मेघगता आपः पर्यतिष्ठत्। परिवृत्य स्थितवान्। अहिर्वृत्रो मेघस्तासामपां पत्सुतःशीः पादस्याधःशयानो बभूव। यद्यप्यपां पादो नास्ति तथाप्यद्भिर्वृत्रस्याभिलंघितत्वात्पादस्याधःशयनमुपपद्यते॥

भिन्नं। रदाभ्यां निष्ठातो नः। पा० ८. २. ४२.। इति नत्वं। अमुया। सुपां सुलुगिति सप्तम्या याजादेशः। शयानं। शीङः सार्वधातुके गुणः। पा० ७. ४. २१.। धातोर्ङित्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः। रुहाणाः। रुह बीजजन्मनि प्रादुर्भावे। व्यत्ययेन शानच्। कर्तरि शपि प्राप्ते व्यत्ययेन शः। अनित्यमागमशासनमिति वचनान्मुगभावः। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरे प्राप्ते व्यत्ययेन धातुस्वरः। महिना। मह पूजायां। इन्सर्वधातुभ्य इतीन्प्रत्ययः। व्यत्ययेन विभक्तेरुदात्तत्वं। यद्वा महिना महिम्ना। महच्छब्दस्य पृथ्वादिषु पाठात्तस्य भाव इत्येतस्मिन्नर्थे पृथ्वादिभ्य इमनिज्वेतीमनिच्प्रत्ययः। टेरिति टिलोपः। चित इत्यंतोदात्तत्वं। तृतीयैकवचनेऽल्लोपे सत्युदात्तनिवृत्तिस्वरेण तस्योदात्तत्वं। मकारलोपश्छांदसः। पत्सुतःशीः। पादस्याधः शेत इति पत्सुतःशीः। क्विप् चेति क्विप्। तसि पद्दन्नित्यादिना पादशब्दस्य पदादेशः। शस्प्रभृतिष्विति प्रभृतिशब्दः प्रकारवचन इति शलादोषणीत्यत्रापि दोषनादेशो भवति। पा० ६. १. ६३.। इत्युक्तत्वात्। मध्ये सु इति शब्दोपजनश्छांदसः। यद्वा पादशब्दस्य सप्तमीबहुवचने पदादेशे कृत इतराभ्योऽपि दृश्यंते। पा० ५. ३. १४.। इति सप्तम्यर्थे तसिल्। लुगभावश्छांदसः॥

नवमीमृचमाह॥

नीचावया अभवद्वृत्रपुत्रेंद्रो अस्या अव वधर्जभार।
उत्तरा सूरधरः पुत्र आसीद्दानुः शये सहवत्सा न धेनुः॥ ९॥
नीचाऽवयाः। अभवत्। वृत्रऽपुत्रा। इंद्रः। अस्याः। अव। वधः। जभार।
उत्ऽतरा। सूः। अधरः। पुत्रः। आसीत्। दानुः। शये। सहऽवत्सा। न। धेनुः॥ ९॥

वृत्रपुत्रा वृत्रः पुत्रो यस्या मातुः सेयं माता वृत्रपुत्रा नीचावया न्यग्भावं प्राप्ता हताभवत्। पुत्रं प्रहाराद्रक्षितुं पुत्रदेहस्योपरि तिरश्ची पतितवतीत्यर्थः। तदानीमयमिंद्रोऽस्या मातुरवाधोभागे वृत्रस्योपरि वधो हननसाधनमायुधं जभार। प्रहृतवान्। तदानीं सूर्मातोत्तरोपरिस्थितासीत्। पुत्रस्त्वधोभागस्थित आसीत्। सा च दानुर्दानवी वृत्रमाता शये। मृता शयनं कृतवतीति तत्र दृष्टांतः। धेनुर्लोकप्रसिद्धा गौः सहवत्सा न। यथा वत्ससहिता शयनं करोति तद्वत्॥ नीचावयाः। वेति खादनीति वयो बाहुः। औणादिकोऽसिप्रत्ययः।

न्यंचौ वयसौ यस्याः सा नीचावयाः । न्यंच्शब्दादुत्तरस्या विभक्तेः सुपां सुपो भवंतीति तृतीयैकवचनादेशः । अच इत्यकारलोपे चाविति दीर्घत्वं । अंचेश्छंदस्यसर्वनामस्थानमिति तस्योदात्तत्वं । समासे लुगभावश्छांदसः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । यद्वा नीचौ निकृष्टौ वयसौ यस्याः सा । पूर्वपदस्य दीर्घश्छांदसः । वधः । हन्यतेऽनेनेति वधः । अमुनि हंतेर्वधादेशः । नित्त्वादाद्युदात्तत्वं । जभार । हृग्रहोर्भ इति भत्वं । सूः । षूङ् प्राणिगर्भविमोचने । सूते गर्भं विमुंचतीति सूर्माता । क्विप् चेति क्विप् । दानुः । दो अवखंडने । दाभाभ्यां नुः । उ॰ ३. ३२. । शये । लटि लोपस्त आत्मनेपदेषु । पा॰ ७. १. ४. १. । इति तलोपः । शीङः सार्वधातुक इति गुणेऽयादेशः ॥

दशमीमृचमाह ॥

अतिष्ठंतीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरं ।
वृत्रस्य निण्यं वि चरंत्यापो दीर्घं तम आशयदिंद्रशत्रुः ॥ १० ॥
अतिष्ठंतीनां । अनिऽवेशनानां । काष्ठानां । मध्ये । निऽहितं । शरीरं ।
वृत्रस्य । निण्यं । वि । चरंति । आपः । दीर्घं । तमः । आ । अशयत् । इंद्रऽशत्रुः ॥ १० ॥

वृत्रस्य शरीरमापो विचरंति । विशेषेणोपर्याक्रम्य प्रवहंति । कीदृशं शरीरं । निण्यं । निर्नामधेयं । अप्सु मग्नत्वेन गूढत्वात्तदीयं नाम न केनापि ज्ञायते । एतदेव स्पष्टीक्रियते । काष्ठानामपां मध्ये निहितं निक्षिप्तं । कीदृशानां काष्ठानां । अतिष्ठंतीनां । स्थितिरहितानां । अनिवेशनानां । उपवेशनरहितानां । प्रवहणस्वभावत्वादेतासां मनुष्यवन्न क्वापि स्थितिः संभवति । इंद्रशत्रुर्वृत्रो जलमध्ये शरीरे प्रक्षिप्ते सति दीर्घं तमो दीर्घं निद्रात्मकं मरणं यथा भवति तथाशयत् । सर्वतः पतितवान् ॥ अतिष्ठंतीनां । अव्ययपूर्वपदप्रकृतिस्वरत्वं । अनिवेशनानां । निविशंत्यस्मिन्निति निवेशनं स्थानं । करणाधिकरणयोश्चेत्यधिकरणे ल्युट् । तद्रहितानां । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । क्रांत्वा स्थिताः काष्ठाः । पृषोदरादि । निहितं । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । अत्र यास्कः । अतिष्ठंतीनामनिविशमानानामित्यस्थावराणां काष्ठानां मध्ये निहितं शरीरं मेघः । शरीरं शृणातेः शम्नातेर्वा । वृत्रस्य निण्यं निर्णामं विचरंति विजानंत्याप इति दीर्घं द्राघतेस्तमस्तनोतेराशयदाशेतेरिंद्रशत्रुरिंद्रोऽस्य शमयिता वा शात-

यिता वा तस्मादिंद्रशत्रुः । तत्को वृत्रो मेघ इति नैरुक्तास्त्वाष्ट्रोऽसुर इत्यैतिहासिका । नि० २. १६. । इति ॥

॥ इति प्रथमस्य द्वितीये सप्तत्रिंशो वर्गः ॥

एकादशीमृचमाह ॥

दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः ।
अपां बिलमपिहितं यदासीद्वृत्रं जघन्वाँ अप तद्ववार ॥ ११ ॥

दासऽपत्नीः । अहिऽगोपाः । अतिष्ठन् । निऽरुद्धाः । आपः । पणिनाऽइव । गावः ।
अपां । बिलं । अपिऽहितं । यत् । आसीत् । वृत्रं । जघन्वान् । अप । तत् । ववार ॥ ११ ॥

दासपत्नीः । दासो विश्वोपक्षपणहेतुर्वृत्रः पतिः स्वामी यासामपां ता दासपत्नीः । अत एवाहिगोपाः । अहिर्वृत्रो गोपा रक्षको यासां ताः । गोपनं नाम स्वच्छंदेन यथा न प्रवहंति तथा निरोधनं । एतदेव स्पष्टीक्रियते । आपो निरुद्धा अतिष्ठन्निति । तत्र दृष्टांतः । पणिनेव गावः । पणिनामकोऽसुरो गा अपहृत्य बिले स्थापयित्वा बिलद्वारमाच्छाद्य यथा निरुद्धवांस्तथेत्यर्थः । अपां यद्बिलं प्रवहणद्वारमपिहितं वृत्रेण निरुद्धमासीत् । तद्बिलं प्रवहणद्वारं वृत्रं जघन्वान्हतवानिंद्रोऽपववार । अपवृतमकरोत् । वृत्रकृतमपां निरोधं परिहृतवान् । अत्र यास्कः । दासपत्नीर्दासाधिपत्न्यो दासो दस्यतेरुपदासयति कर्माण्यहिगोपा अतिष्ठन्नहिना गुप्ताः । अहिरयनादेत्यंतरिक्षेऽयमपीतरोऽहिरेतस्मादेव निर्ह्रसितोपसर्ग आहंतीति । निरुद्धा आपः पणिनेव गावः । पणिर्वनिग्भवति पणिः पणनाद्वनिक् पण्यं नेनेक्ति । अपां बिलमपिहितं यदासीत् । बिलं भरं भवति बिभर्तेर्वृत्रं जघ्निवानपववार तद्वृत्रो वृणोतेर्वा वर्ततेर्वा वर्धतेर्वा यदवृणोत्तद्वृत्रस्य वृत्रत्वमिति विज्ञायते । यदवर्तत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते । यदवर्धत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते । नि० २. १७. । इति ॥ दासपत्नीः । दसु उपक्षये । दासयतीति दासो वृत्रः । पचाद्यच् । चित इत्यंतोदात्तत्वं । दासः पतिर्यासां विभाषा सपूर्वस्य । पा० ४. १. ३४. । इति ङीप् । तत्संनियोगेनेकारस्य नकारः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । यद्वा दासस्य पालयित्र्यः । पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वं । अहिगोपाः । गुपू रक्षणे । गोपायतीति गोपाः । आयादय आर्द्धधातुके वा । पा० ३. १. ३१. । इत्यायप्रत्ययः । ततः क्विप् । अतो

लोपः। वेरपृक्तलोपाद्वलि लोपो बलीयानिति पूर्वं यकारलोपः। न चाचः परस्मिन्नित्यतो लोपस्य स्थानिवत्त्वं। न पदांतद्विर्वचनेति प्रतिषेधात्। अहिर्गोपा यासां। पूर्ववत्स्वरः। निरुद्धाः। रुधिर् आवरणे। झषस्तथोर्धोऽधः। पा° ८. २. ४०.। इति निष्ठातकारस्य धकारः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। जघन्वान्। हंतेर्लिटः क्वसुः। अभ्यासाच्च। पा° ७. ३. ५५.। इत्यभ्यासादुत्तरस्य हकारस्य कुत्वं। क्रादिनियमप्राप्तस्येटो विभाषा गमहनेत्यादिना। पा° ७. २ ६८.। विकल्पविधानादभावः। संहितायां नकारस्य रुत्वानुनासिकावुक्तौ॥

द्वादशीमृचमाह॥

अश्व्यो वारो अभवस्तदिंद्र सृके यत्त्वा प्रत्यहन्देव एकः।
अजयो गा अजयः शूर सोममवासृजः सर्तवे सप्त सिंधून्॥ १२॥
अश्व्यः। वारः। अभवः। तत्। इंद्र। सृके। यत्। त्वा। प्रतिऽअहन्। देवः। एकः।
अजयः। गाः। अजयः। शूर। सोमं। अव। असृजः। सर्तवे। सप्त। सिंधून्॥ १२॥

सृके वज्रे। सृको वृक इति वज्रनामसु पठितत्वात्। देवो दीप्यमानः सर्वायुधकुशल एकोऽद्वितीयो वृत्रो यद्यदा त्वा त्वां प्रत्यहन्। प्रतिकूलत्वेन प्रहृतवान्। तत्तदानीं त्वमश्व्यो वारोऽश्वसंबंधी वालोऽभवः। यथाश्वस्य वालोऽनायासेन मक्षिकादीन्निवारयति तद्वद्वृत्रमगणयित्वा निराकृतवानित्यर्थः। किंच गाः पणिनापहृतास्त्वमजयः। जितवान्। हे शूर शौर्ययुक्तेंद्र सोममजयः। जितवान्। तथा च तैत्तिरीयाः। त्वष्टा हतपुत्र इत्यस्मिन्नुपाख्याने समामनंति। स यज्ञवेशसं कृत्वा प्रासहा सोममपिबदिति। सप्त सिंधून्। इमं मे गंग इत्यस्यामृच्याम्नाता गंगाद्याः सप्तसंख्याका नदीः सर्तवे सर्तुं प्रवाहरूपेण गंतुमवासृजः। त्यक्तवान्। वृत्रकृतं प्रवाहनिरोधं निराकृतवानित्यर्थः॥ अश्व्यः। अश्वे भवः। भवे छंदसीति यत्। यतोऽनाव इत्याद्युदात्तत्वं। वारयति दंशमशकानिति वारः। पचाद्यच्। कपिलकादित्वाल्लत्वविकल्पः। वृषादित्वादाद्युदात्तत्वं। प्रत्यहन्। यद्वृत्तान्नित्यमिति निघातप्रतिषेधः। तिङि चोदात्तवतीति गतेरनुदात्तत्वं। अजयः। गा इत्यस्य वाक्यांतरगतत्वात्तदपेक्षयास्य तिङ्ङतिङ इति निघातो न भवति। समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति वचनात्। सर्तवे। तुमर्थे सेसेनिति तवेन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं॥

त्रयोदशीमृचमाह ॥

नास्मै विद्युन्न तन्यतुः सिषेध न यां मिहमकिरद्ध्रादुनिं च ।
इंद्रश्च यद्युयुधाते अहिश्चोतापरीभ्यो मघवा वि जिग्ये ॥ १३ ॥

न । अस्मै । विऽद्युत् । न । तन्यतुः । सिसेध । न । यां । मिहं । अकिरत् । ह्रादुनिं । च ।
इंद्रः । च । यत् । युयुधाते इति । अहिः । च । उत । अपरीभ्यः । मघऽवा । वि ।
जिग्ये ॥ १३ ॥

इंद्रं निषेद्धुं वृत्रो यान्विद्युदादीन्मायया निर्मितवान् ते सर्वेऽप्येनं निषेद्धुमशक्ताः । सोऽयमर्थोऽनेन मंत्रेणोच्यते । अस्मै इंद्रार्थं निर्मिता विद्युन्न सिषेध । इंद्रं न प्राप्नोत् । तथा तन्यतुर्गर्जनं यां मिहं सेचनं यां वृष्टिमकिरत् । वृत्रो विक्षिप्तवान् । सापि वृष्टिर्न सिषेध । ह्रादुनिं चाशनिमपि यां वृत्रः प्रयुक्तवान् सापि न सिषेध । इंद्रश्चाहिश्चेंद्रवृत्रावुभावपि यद्यदा युयुधाते । युद्धं कृतवंतौ । तदानीं विद्युदादयो न प्राप्ता इति पूर्वत्रान्वयः । उत अपि च मघवा धनवानिंद्रोऽपरीभ्योऽपराभ्योऽन्यासामपि वृत्रनिर्मितानां मायानां सकाशाद्विजिग्ये । विशेषेण जितवान् ॥ सिषेध । षिधु गत्यां । मिहं । मिह सेचने । मेहति सिंचतीति मिट् वृष्टिः । क्विप् चेति क्विप् । अकिरत् । कॄ विक्षेपे । तुदादिभ्यः शः । ॠत इद्धातोरितीत्वं । अडागम उदात्तः । यद्वृत्तयोगादनिघातः । युयुधाते । युध संप्रहारे । लिटि प्रत्ययस्वरः । जिग्ये । सन्लिटोर्जेः । पा० ७. ३. ५७. । इत्यभ्यासादुत्तरस्य जकारस्य कुत्वं ॥

चतुर्दशीमृचमाह ॥

अहेर्यातारं कमपश्य इंद्र हृदि यत्ते जघ्नुषो भीरगच्छत् ।
नव च यन्नवतिं च स्रवंतीः श्येनो न भीतो अतरो रजांसि ॥ १४ ॥

अहेः । यातारं । कं । अपश्यः । इंद्र । हृदि । यत् । ते । जघ्नुषः । भीः । अगच्छत् ।
नव । च । यत् । नवतिं । च । स्रवंतीः । श्येनः । न । भीतः । अतरः । रजांसि ॥ १४ ॥

हे इंद्र जघ्नुषो वृत्रं हतवतस्तव हृदि चित्ते यद्यदि भीरगच्छत् । न हतवानस्मीति बुद्ध्या भयं प्राप्नुयात् । तर्ह्यहेर्वृत्रस्य यातारं हंतारं कमपश्यः । त्वत्तोऽन्यं

कं पुरुषं दृष्टवानसि । तादृशस्य पुरुषांतरस्याभावान्मा भूत्तव भयमित्यर्थः । यद्यस्मात्कारणात्त्वं नव च नवतिं च स्रवंतीरेकोनशतसंख्याकाः प्रवहंतीर्नदीः प्राप्य रजांसि तत्रत्यान्युदकान्यतरः । तीर्णवानसि । तत्र दृष्टांतः । श्येनो न । श्येननामको बलवान्पक्षीव दूरगमनात्तव भयमासीदिति गम्यते । तद्भयं मा भूदित्यभिप्रायः । तच्च दूरगमनं ब्राह्मणे समाम्नातं । इंद्रो वै वृत्रं हत्वा नास्तृषीति मन्यमानः पराः परावतोऽगच्छदिति । तैत्तिरीयाश्चामनंति । इंद्रो वृत्रं हत्वा परां परावतमवगच्छदपराधमिति स मन्यमान इति ॥ हृदि । पद्दन्नित्यादिना हृदयशब्दस्य हृदादेशः । ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । जघ्नुषः । हंतेर्लिटः क्वसुः । षष्ठ्येकवचने वसोः संप्रसारणमिति संप्रसारणपरपूर्वत्वे । शासिवसिघसीनां चेति षत्वं । न च षत्वतुकोरसिद्धः । पा॰ ६. १. ८६. । इत्येकादेशस्यासिद्धत्वात् षत्वं न प्राप्नुयादिति वाच्यं संप्रसारणङीट्सु प्रतिषेधो वक्तव्यः । पा॰ ६. १. ८६. ६. । इत्यसिद्धवद्भावस्य प्रतिषिद्धत्वात् । गमहनेत्यादिनोपधालोपः । न चासिद्धवदत्रा भादिति संप्रसारणस्यासिद्धवद्भावः । भिन्नाश्रयत्वात् । संप्रसारणं हि षष्ठ्येकवचने । उपधालोपस्तु वसाविति भिन्नाश्रयत्वं । स्रवंतीः । स्रु गतौ । शप्श्यनोर्नित्यं । पा॰ ७. १. ८१. । इति नुमागमः । शपः पित्त्वादनुदात्तत्वं । शतुश्च लसार्वधातुकस्वरेणाद्युदात्तत्वं । अतरः । यद्वृत्तयोगादनिघातः ॥

पंचदशीमृचमाह ॥

इंद्रो यातोऽवसितस्य राजा शमस्य च शृंगिणो वज्रबाहुः ।
सेदु राजा क्षयति चर्षणीनामरान्न नेमिः परि ता बभूव ॥ १५ ॥
इंद्रः । यातः । अवऽसितस्य । राजा । शमस्य । च । शृंगिणः । वज्रऽबाहुः ।
सः । इत् । ऊं इति । राजा । क्षयति । चर्षणीनां । अरान् । न । नेमिः । परि । ता ।
बभूव ॥ १५ ॥

वज्रबाहुरिंद्रः शत्रौ हते सति निःसपत्नो भूत्वा यातो गच्छतो जंगमस्यावसितस्यैकत्रैव स्थितस्य स्थावरस्य शमस्य शांतस्य शृंगराहित्येन प्रहरणादावप्रवृत्तस्याश्वगर्दभादेः शृंगिणः शृंगोपेतस्योग्रस्य महिषबलीवर्दादेश्च राजाभूत् । सेदु स एवेंद्रश्चर्षणीनां मनुष्याणां राजा भूत्वा क्षयति । निवसति । ता तानि पूर्वोक्तानि जंगमादीनि सर्वाणि परिबभूव । व्याप्तवान् । तत्र दृष्टांतः । अरान्न

नेमिः । यथा रथचक्रस्य परितो वर्तमाना नेमिरराब्राभी कीलितान्काष्ठविशेषान्व्याप्नोति तद्वत् ॥ यातः । या प्रापणे । याति गच्छतीति यात् । लटः शतृ । सावेकाच इति विभक्तेरुदात्तत्वं । सः । सोऽचि लोपे चेदिति संहितायां सोर्लोपः । ता । शेश्छंदसि बहुलमिति शेर्लोपः । बभूव । भवतेर्लिटो णलि भवतेरः । पा॰ ७. ४. ७३. । इत्यभ्यासस्यात्वं । कृताकृतप्रसंगितया वुगागमस्य नित्यत्वाद्वृद्धेः पूर्वं वुगागमः । यद्वा । इंधिभवतिभ्यां च । पा॰ १. २. ६. । इति लिटः कित्वाद्वृद्ध्यभावः । न चासिद्धवदत्रा भादिति तस्यासिद्धत्वादुवङादेशः शंकनीयः । वुग्युटावुवङ्यणोः सिद्धौ भवतः । पा॰ ६. ४. ८८. १. । इति तस्य सिद्धत्वात् । तिङ्ङतिङ इति निघातः ॥

॥ इति प्रथमस्य द्वितीयेऽष्टात्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमार्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके द्वितीयोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथ तृतीयाध्याय आरभ्यते । त्वमग्ने प्रथम इति सप्तमानुवाके पंच सूक्तानि । तत्रैतायामेति तृतीयं सूक्तं पंचदशर्चं । ऋषिश्चान्यस्मादिति परिभाषयांगिरसो हिरण्यस्तूप ऋषिः । अनुक्तत्वादिंद्रो देवता । त्रिष्टुप् छंदः ॥ एतेत्यनुक्रमणिका । गोसववीवधयोर्निष्केवल्य एतायामेति सूक्तं विनियुक्तं । तथा च सूचितं । अतिमूर्तिना यक्ष्यमाण इति खंडे गोसववीवधौ पशुकाम इंद्र सोममेतायामेति मध्यंदिने । आ॰ ९. ८. । इति ॥ तत्र प्रथमामृचमाह ॥

एतायामोप गव्यंत इंद्रमस्माकं सु प्रमतिं वावृधाति ।
अनामृणः कुविदादस्य रायो गवां केतं परमावर्जते नः ॥ १ ॥

आ । इत । अयाम । उप । गव्यंतः । इंद्रं । अस्माकं । सु । प्रऽमतिं । ववृधाति ।
अनामृणः । कुवित् । आत् । अस्य । रायः । गवां । केतं । परं । आऽवर्जते । नः ॥ १ ॥

देवाः परस्परमेवं कथयंति । हे देवा गव्यंतः पणिनामकेनासुरेणापहृता अस्मदीया गाः प्राप्तुमिच्छंतो यूयमेत । आगच्छत । युष्माभिः सहिता वयमिंद्रं गवानयनक्षममुपायाम । प्राप्नुवाम । स चेंद्रोऽनामृणो हिंसकरहितः सन्नस्माकं देवानां प्रमतिं गोलाभेन हर्षयित्वा प्रकृष्टां बुद्धिं सु वावृधाति । सुष्ठु वर्धयति । आत् अनंतरं स इंद्रोऽस्य रायो धनस्य गवां गोरूपस्य संबंधि परं केतमुत्कृष्टं ज्ञानं नोऽस्माकं कुविदावर्जते । अधिकं प्रापयति ॥ इत । इण् गतौ । अदादित्वाच्छपो लुक् । अयाम । एतेर्लोडुत्तमबहुवचन आडुत्तमस्य पिच्चेत्याडागमः । पिद्वद्भावात्सार्वधातुकलक्षणे गुणेऽयादेशः । न चेणो यण् । पा॰ ६.४.८१. । इति यणादेशः । मध्येऽपवादाः पूर्वान्विधीन्बाधंत इति वचनात्तस्येयङादेशापवादत्वात् । अतः परत्वाद्गुणेन यणादेशो बाध्यते । पिद्वद्भावात्प्रत्ययस्यानुदात्तत्वे धातुस्वरेणाद्युदात्तत्वं । गव्यंतः । गा आत्मन इच्छंतः । सुप आत्मनः क्यजिति गोशब्दात्कर्मणः क्यच् । वांतो यि प्रत्यय इत्यवादेशः । प्रत्ययांताद्धातोर्लटः शतृ । तस्यादुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । प्रमतिं । मन्यतेः क्तिन्यनुदात्तोपदेशेत्यादिनानुनासिकलोपः । तादौ चेति गतेः प्रकृतिस्वरत्वं । वावृधाति । वृधु वृद्धौ । लेटयाडागमः । बहुलं छंदसीति शपः श्लुः । संहितायामभ्यासस्य दीर्घश्छांदसः । अनामृणः । मृण हिंसायां । मृणंति हिंसंतीति मृणाः । इगुपधलक्षणः कः । न संत्यामृणा अस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । अस्य रायः । ऊडिदमित्युभयत्र विभक्तेरुदात्तत्वं । गवां । सावेकाच इति प्राप्तस्य विभक्त्युदात्तस्य न गोश्वन्साववर्णेति प्रतिषेधः । केतं । कित ज्ञाने । घञंत आद्युदात्तः । आवर्जते । वृजी वर्जने । अदादित्वाच्छपो लुकि प्राप्ते बहुलं छंदसीति तदभावः । शपः पित्त्वादनुदात्तत्वं । तिङश्च लसार्वधातुकत्वेन धातुस्वरः । तिङि चोदात्तवतीति गतेरनुदात्तत्वं । कुविद्योगान्निपातैर्यद्यदिहंतेत्यादिना निघातप्रतिषेधः ॥

द्वितीयामृचमाह ॥

उपेदहं धनदामप्रतीतं जुष्टां न श्येनो वसतिं पतामि ।

इंद्रं नमस्यन्नुपमेभिरर्कैर्यः स्तोतृभ्यो हव्यो अस्ति यामन् ॥ २ ॥

उप । इत् । अहं । धनऽदां । अप्रतिऽइतं । जुष्टां । न । श्येनः । वसतिं । पतामि ।

इंद्रं । नमस्यन् । उपऽमेभिः । अर्कैः । यः । स्तोतृऽभ्यः । हव्यः । अस्ति । यामन् ॥ २ ॥

य इंद्रः स्तोतृभ्यः स्तोतॄणामनुष्ठातॄणामनुग्रहार्थं यामन् तदीयशत्रुभिः सह प्रवृत्ते युद्धे हव्योऽस्ति । तैराह्वातव्यो भवति । तमिंद्रमहमनुष्ठातोपेत्पतामि । उपाप्नोम्येव । किं कुर्वन् । उपमेभिरुपमानस्थानीयैरुत्तमैरर्कैः स्तोत्रैः सह नमस्यन् । पूजयन् । कीदृशमिंद्रं । धनदां । धनप्रदं । अप्रतीतं । अप्रतिगतं । बलिभिरतिरस्कृतमित्यर्थः । इंद्रप्राप्तौ दृष्टांतः । जुष्टां पूर्वैः सेवितां वसतिं स्वकीयनीडरूपां निवासभूमिं श्येनो न । यथा श्येननामको वेगवान्पक्षी स्वकीयस्थानं प्रत्यादरेण धावति तद्वदहमिंद्रं त्वरया प्राप्नोमि ॥ धनदां । धनं ददातीति धनदाः । आतो मनिन्निति्यादिना विच् । अप्रतीतं । शत्रुभिर्न प्रतिगतं । अव्ययपूर्वपदप्रकृतिस्वरत्वं । जुष्टां । जुषी प्रीतिसेवनयोः । श्वीदितो निष्ठायामितीट्प्रतिषेधः । नित्यं मंत्र इत्याद्युदात्तत्वं । पतामि । लेट्याडागमः । नमस्यन् । नमस्शब्दात्पूजार्थे नमोवरिवः । पा॰ ३. १. १९. । इति क्यच् । प्रत्ययस्वरः । अदुपदेशाल्लसार्वधातुकानुदात्तस्यैकदेशस्वरेणोदात्तत्वं । उपमीयंत एभिरित्युपमाः । माङ् माने । घञर्थे कविधानमिति कः । बहुलं छंदसीति भिस ऐसादेशाभावः । कृदुत्तरपदप्रकृतिस्वरत्वं । हव्यः । ह्वेञो बहुलं छंदसीति संप्रसारणं । अचो यदिति यत् । गुणो धातोस्तन्निमित्तस्यैव । पा॰ ६. १. ८०. । इत्यवादेशः । यतोऽनाव इत्याद्युदात्तत्वं । यामन् । या प्रापणे । मनिनो नित्त्वादाद्युदात्तत्वं । सुपां सुलुगिति सप्तम्या लुक् ॥

तृतीयामृचमाह ॥

नि सर्वसेन इषुधीँरसक्त समर्यो गा अजति यस्य वष्टि ।

चोष्कूयमाण इंद्र भूरि वामं मा पणिर्भूरस्मदधि प्रवृद्ध ॥ ३ ॥

नि । सर्वऽसेनः । इषुऽधीन् । असक्त । सं । अर्यः । गाः । अजति । यस्य । वष्टि ।

चोष्कूयमाणः । इंद्र । भूरि । वामं । मा । पणिः । भूः । अस्मत् । अधि । प्रऽवृद्ध ॥ ३ ॥

सर्वसेनः कृत्स्नसेनायुक्त इषुधीन्बाणानामाधारभूतान्निषंगान्व्यषक्त । नितरां पृष्ठभागे संयोजितवान् । अर्यः स्वामिरूप इंद्रो यस्य देवस्य वष्टि । असुरैरपहृता गाः प्रदातुं कामयते तस्य देवस्य गृहे ता गाः समजति । सम्यक् प्रापयति । हे प्रवृद्ध प्रकृष्टवृद्धियुक्त इंद्र भूरि वामं प्रभूतं गोरूपं धनं चोष्कूयमाणोऽस्मभ्यं प्रयच्छन् अस्मदध्यस्मासु पणिर्मा भूः । व्यवहारी मा भूयाः । गवां मूल्यं मा याचस्वेत्यर्थः ॥ सर्वसेनः । इनेन सह वर्तत इति सेना । वोपसर्जनस्येति सभावः । सर्वा सरणशीला सेना यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । प्रत्ययलक्षणेनाप्ययं स्वर इष्यते । पा० ६. १. १९१. । इति वचनात्प्रत्ययलक्षणेन सर्वस्य सुपीति सर्वशब्द आद्युदात्तः । इषुधीन् । इषव एषु धीयंत इतीषुधयः । कर्मण्यधिकरणे च । पा० ३. ३. ९३. । इति किप्रत्ययः । संहितायां दीर्घादटीत्यादिना नकारस्य रुत्वं । अत्रानुनासिकः पूर्वस्य तु वेति पूर्वस्वरोऽनुनासिकः । असक्त । षच समवाये । बहुलं छंदसीति शपो लुक् । अर्यः । अर्यः स्वामिवैश्ययोः । पा० ३. १. १०३. । इति यत्प्रत्ययांतो निपातितः । अर्यस्य स्वाम्याख्या चेत् । फि० १. १८. । इत्यंतोदात्तत्वं । अजति । अज गतिक्षेपणयोः । वष्टि । वश कांतौ । अदादित्वाच्छपो लुक् । व्रश्चादिषत्वे ष्टुत्वं । चोष्कूयमाणः । स्कुञ् आप्रवणे । धातोरेकाच इति यङ् । अकृत्सार्वधातुकयोर्दीर्घः । द्विर्वचने शर्पूर्वाः खयः । पा० ७. ४. ६१. । इति ककारः शिष्यते । सकारो लुप्यते । कुहोश्चुरिति चुत्वे गुणो यङ्लुकोरिति गुणः । सुषामादित्वात् षत्वं । यङंताल्लटः शानच् । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । भूः । गातिस्थेति सिचो लुक् ॥

चतुर्थीमृचमाह ॥

वधीर्हि दस्युं धनिनं घनेनँ एकश्चरन्नुपशाकेभिरिंद्र ।

धनोरधि विषुणक्ते व्यायन्नयज्वानः सनकाः प्रेतिमीयुः ॥ ४ ॥

वधीः । हि । दस्युं । धनिनं । घनेन । एकः । चरन् । उपऽशाकेभिः । इंद्र ।

धनोः । अधि । विषुणक् । ते । वि । आयन् । अयज्वानः । सनकाः । प्रऽइतिं । ईयुः ॥ ४ ॥

हे इंद्र धनिनं बहुधनोपेतं दस्युं चोरं वृत्रं घनेन कठिनेन वज्रेण वधीर्हि । हतवान्खलु । धनित्वं वाजसनेयिनोऽपि स्पष्टमामनंति । वृत्रस्यांतः सर्वे देवाः सर्वाश्च विद्याः सर्वाणि हवींषि चासन्निति । उपशाकेभिः समीपवर्तिभिः शक्ति-

युक्तैर्मरुद्भिः सहितो भूत्वैकश्चरन्। प्रहर्तुं स्वयमेक एव गच्छन्। यद्यपि मरुतः समीपे वर्तंते तथापि ते प्रोत्साहयंत्येव न तु वृत्रं प्रहरंति। प्रहर्ता तु स्वयमेक एव। तथा च ब्राह्मणे समाम्नातं। मरुतो हैनं नाजहुः प्रहर भगवो वीरयस्वेत्येवैनमेतां वाचं वदंत उपातिष्ठंतेति। धनोरधि। इंद्रसंबंधिनो धनुष उपरि विषुणक् विविधं नाशमुद्दिश्य। यद्वा विष्वक् सर्वतस्ते वृत्रानुचरा व्ययन्। विविधमागच्छन्। आगत्य चायज्वानो यज्ञविरोधिनः संतः सनका एतन्नामका वृत्रानुचराः प्रेतिमीयुः। मरणं प्राप्ताः ॥ वधीः। हन हिंसागत्योः। लुङि च। पा॰ २. ४. ४३.। इति वधादेशः। स चादंतः। तस्यातो लोप इति लोपे सति स्थानिवद्भावादतो हलादेः। पा॰ ७. २. ७.। इति वृद्ध्यभावः। इट ईटि। पा॰ ८. २. २८.। इति सिचो लोपः। आगमानुदात्तत्वे धात्वकारस्योदात्तत्वं। घनेनँ एकः। ईषा अक्षादिषु छंदसि प्रकृतिभावमात्रं वक्तव्यं। पा॰ ६. १. १२७. २.। इति संहितायां प्रकृतिभावः। अनुनासिकश्छांदसः। उपशाकेभिः। उपशक्तं कुर्वंतीत्युपशाकाः। शक्तृ शक्तौ। अस्माद्देतुमण्यंतात्पचाद्यच्। याथादिस्वरेणोत्तरपदांतोदात्तत्वं। विषुणक्। विषुपूर्वान्नशेः संपदादिलक्षणः क्विप्। नशेर्वा। पा॰ ८. २. ६३.। इति कुत्वं। यद्वा विषुपूर्वस्यांचतेर्नुडागमः। सनका इत्यसुराणां नाम। षणु दाने। सन्वंति ददतीति सना दातारः। पचाद्यच्। सनान्कायंति शब्दयंतीति सनकाः। आतोऽनुपसर्गे कः। आतो लोप इटि चेत्याकारलोपः। कृदुत्तरपदप्रकृतिस्वरत्वं। प्रेतिं। तादौ च नितीति गतेः प्रकृतिस्वरत्वं। ईयुः। एतेर्लिट्युसिपरत्वादिणो यणिति यणादेशे द्विर्वचनेऽचीति स्थानिवद्भावादिकारस्य द्विर्वचनं। दीर्घ इणः कितीत्यभ्यासदीर्घत्वं ॥

पंचमीमृचमाह ॥

परा चिच्छीर्षा ववृजुस्त इंद्रायज्वानो यज्वभिः स्पर्धमानाः।
प्र यद्दिवो हरिवः स्थातरुग्र निरव्रताँ अधमो रोदस्योः ॥ ५ ॥

परा। चित्। शीर्षा। ववृजुः। ते। इंद्र। अयज्वानः। यज्वऽभिः। स्पर्धमानाः।
प्र। यत्। दिवः। हरिऽवः। स्थातः। उग्र। निः। अव्रतान्। अधमः। रोदस्योः ॥ ५ ॥

हे इंद्र ते वृत्रानुचराः शीर्षा स्वकीयानि शिरांसि परा चित् पराङ्मुखान्येव कृत्वा ववृजुः। गतवंतः। कीदृशास्ते। अयज्वानः। स्वयं यागरहिताः प्रत्युत

यज्वभिर्यागानुष्ठातृभिः सह स्पर्धमानाः। हे हरिवः। हरिनामकाश्वयुक्त। स्थातः। स्थितियुक्त। युद्धे पलायनरहित। उग्र। शौर्ययुक्तेंद्र। यद्यदा दिवोऽंतरिक्षाद्रोदस्योर्द्यावापृथिव्योः सकाशाच्चाव्रतान्व्रतरहितान्वृत्रानुचरान्निष्प्राधमः। निःशेषेण धमनं कृतवानसि। तदानीं त्वदीयमुखवायुना नुन्नाः संतो ववृजुरिति पूर्वत्रान्वयः॥ शीर्षा। शेश्छंदसि बहुलमिति शेर्लोपः। ववृजुः। वृजी वर्जने। असंयोगाल्लिट् कित्। पा० १. २. ५.। इति कित्वाद्गुणाभावः। अयज्वानः। यजतेः सुयजोर्ङ्वनिप्। पा० ३. २. १०३.। इति भूते ङ्वनिप्प्रत्ययस्य पित्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तत्वं। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं। दिवः। ऊडिदमिति विभक्तेरुदात्तत्वं। हरिवः। हरी अस्य स्त इति हरिवान्। छंदसीर इति मतुपो वत्वं। संबुद्धौ मतुवसोरिति रुत्वं। अव्रतान्। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। दीर्घादटीति संहितायां नकारस्य रुत्वं। आतोऽटि नित्यमिति सानुनासिक आकारः। अधमः। ध्मा शब्दाग्निसंयोगयोः। लङि सिपि शपि पाघ्रेत्यादिना धमादेशः॥

॥ इति प्रथमस्य तृतीये प्रथमो वर्गः॥

षष्ठीमृचमाह॥

अयुयुत्सन्ननवद्यस्य सेनामयातयंत क्षितयो नवग्वाः।

वृषायुधो न वध्रयो निरष्टाः प्रवद्भिरिंद्राच्चितयंत आयन्॥ ६॥

अयुयुत्सन्। अनवद्यस्य। सेनां। अयातयंत। क्षितयः। नवऽग्वाः।

वृषऽयुधः। न। वध्रयः। निःऽअष्टाः। प्रवत्ऽभिः। इंद्रात्। चितयंतः। आयन्॥ ६॥

अनवद्यस्य गर्हणीयदोषरहितस्येंद्रस्य सेनां प्रत्ययुयुत्सन्। वृत्रस्यानुचरा योद्धुमैच्छन्। तदानीं नवग्वाः। नवनीयगतयः स्तोतव्यचरित्राः। यद्वा। अंगिरसां सत्रमासीनानां मध्ये ये नवभिर्मासैरवाप्तफला उत्थितास्तेषां नवग्वा इति संज्ञा। नवग्वासः सुतसोमास इंद्रमित्यादिषु तथाभिहितत्वात्। क्षितयो मनुष्या अंगिरःप्रभृतयः। क्षितयः कृष्टय इति तन्नामसु पाठात्। अयातयंत। युद्धार्थमिंद्रं नानाविधैर्मंत्रैः प्रोत्साहितवंतः। इंद्रे योद्धुं गते सति निरष्टाः। तेनेंद्रेण निराकृता वृत्रानुचराश्चितयंतः स्वकीयामशक्तिं ज्ञापयंत इंद्रादिंद्रस्य सकाशात्प्रवद्भिः प्रवणैः पालयितुं सुशकैर्मार्गैरायन्। दूरे गतवंतः। तत्र दृष्टांतः। वृषा-

युधो वृषेण सेचनसमर्थेन पुंस्त्वयुक्तेन शूरेण सह युद्धं कुर्वंतो वध्रयो नपुंसका इव। निसर्गपंडो वध्रिश्चेत्यादिस्मृतिषु प्रयोगात्। ते यथा प्रबलेन दूरे निराकृता भवंति तद्वत् ॥ अयुयुत्सन्। युध संप्रहारे। सनि हलंताच्च। पा० १. २. १०। इति सनः किच्वाद्गुणाभावः। एकाच उपदेशेऽनुदात्तात्। पा० ७. २. १०। इतीट्-प्रतिषेधः। व्यत्ययेन परस्मैपदं। सेनां। इनेन सह वर्तत इति सेना। वोप-सर्जनस्येति सहशब्दस्य सभावः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। अयातयंत। यती प्रयत्ने। हेतुमति चेति णिच्। क्षितयः। क्षि निवासगत्योः। क्षियंति गच्छंतीति क्षितयो मनुष्याः। क्तिच्क्तौ च संज्ञायामिति क्तिच्। नवग्वाः। नवभिर्मासैर्गच्छंतीति नवग्वाः। गमेरौणादिको ड्वप्रत्ययः। यद्वा क्विप्। गमः क्वौ। पा० ६. ४. ४०। इत्यनुनासिकलोप ऊङ् च गमादीनामिति वक्तव्यं। पा० ६. ४. ४०. २। इत्यकारस्य ऊकारः। जस्योः सुपि। पा० ६. ४. ८३। इति यणा-देशः। दीर्घश्छांदसः। वृषायुधः। क्विप् चेति क्विप्। क्विप् चेत्यत्र सोपपदेभ्यो निरुपपदेभ्य इत्युक्तत्वाद्त्र सोपपदेभ्यः क्विप्। अन्येषामपि दृश्यत इति पूर्व-पदस्य संहितायां दीर्घः। निरष्टाः। अशू व्याप्तौ। भावे निष्ठा। यस्य विभाषे-तीट्प्रतिषेधः। व्रश्चादिना षत्वे ष्टुत्वं। निसा च बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। यद्वा निरस्ता इत्यत्र सकारस्य षत्वं छांदसं। तदानीमस्ता इत्येतत्कर्मणि निष्ठेति गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। प्रवद्भिः। वन षण संभक्तौ। अस्मात्प्र-पूर्वात् क्विप्। गमादीनामिति वक्तव्यं। पा० ६.४.४०.१। इत्यनुनासिकलोपः। ततस्तुक्। कृदुत्तरपदप्रकृतिस्वरत्वं। चितयंतः। चिती संज्ञाने। अस्माण्ण्यंताल्लटः शतृ। शप्। अनित्यमागमशासनमिति वचनाल्लघूपधगुणाभावः ॥

सप्तमीमृचमाह ॥

त्वमेतान्रुदतो जक्षतश्चायोधयो रजस इंद्र पारे।
अवादहो दिव आ दस्युमुच्चा प्र सुन्वतः स्तुवतः शंसमावः ॥ ७ ॥

त्वं। एतान्। रुदतः। जक्षतः। च। अयोधयः। रजसः। इंद्र। पारे।
अव। अदहः। दिवः। आ। दस्युं। उच्चा। प्र। सुन्वतः। स्तुवतः। शंसं। आवः ॥ ७ ॥

हे इंद्र त्वं रुदतो रोदनं कुर्वतो जक्षतो भक्षणं हसनं वा कुर्वतश्चैतान् द्विविधानपि वृत्रानुचरान्रजसः पारेऽतरिक्षस्य परभागे। रजःशब्दोऽतरिक्ष-

वाची लोका रजांस्युच्यंत इत्युक्तत्वात्। अयोधयः। युद्धमकरोः। युद्धेन मारितवानित्यर्थः। दस्युमुपक्षयितारं वृत्रं दिव आ द्युलोकादानीयोच्चोत्कर्षेणावादहः। दग्धवानसि। वृत्रं सपरिवारं विनश्य तत ऊर्ध्वं सुन्वतः सोमाभिषवं कुर्वतः स्तुवतः स्तोत्रं कुर्वतो यजमानस्य शंसं स्तुतिं प्रावः। प्रकर्षेण रक्षितवानसि॥ रुदतः। रुदिर् अश्रुविमोचने। लटः शतृ। अदादित्वाच्छपो लुक्। प्रत्ययस्वरेणांतोदात्तत्वं। शतुरनुम इति शस उदात्तत्वं। जक्षतः। जक्ष भक्षहसनयोः। पूर्ववच्छपो लुक्। जक्षित्यादयः षट्। पा॰ ६. १. ६.। इत्यभ्यस्तसंज्ञा। अतोऽभ्यस्तानामादिरित्याद्युदात्तत्वं। सुन्वतः। सुनोतेः शतरि स्वादिभ्यः श्नुः। हुश्नुवोरित्यादिना यणादेशः। शतुरनुम इति विभक्तेरुदात्तत्वं। स्तुवतः। ष्टुञ स्तुतौ। अदादित्वाच्छपो लुक्। उवङादेशः। पूर्ववत्स्वरः॥

अष्टमीमृचमाह॥

चक्राणासः परीणहं पृथिव्या हिरण्येन मणिना शुंभमानाः।
न हिन्वानासस्तितिरुस्त इंद्रं परि स्पशो अदधात्सूर्येण॥ ८॥

चक्राणासः। परिऽनहं। पृथिव्याः। हिरण्येन। मणिना। शुंभमानाः।
न। हिन्वानासः। तितिरुः। ते। इंद्रं। परि। स्पशः। अदधात्। सूर्येण॥ ८॥

ते वृत्रानुचराः पृथिव्या भूमेः परीणहमाच्छादनं सर्वतो व्याप्तिं चक्राणासः कुर्वाणा हिरण्येन हिरण्ययुक्तेन मणिना कंठबाह्वादिगतेन मण्याद्याभरणेन शुंभमानाः शोभमाना हिन्वानासो वर्धमानाः संतो वर्तंते। ते तथाविधा वृत्रानुचरा इंद्रं युद्धायोद्यंतं न तितिरुः। जेतुं न समर्था आसन्। तदानीं स इंद्रः स्पशो बाधकान्वृत्रानुचरान् सूर्येणादित्येन पर्यदधात्। परिहितान् व्यवहितानकरोत्। तथा च ब्राह्मणं। आदित्यो ह्येवोद्यन् पुरस्ताद्रक्षांस्यपहंतीति॥ चक्राणासः। करोतेश्छंदसि लिडिति वर्तमाने लिटः कानच्। ततोऽसुक्। चित इत्यंतोदात्तत्वं। परीणहं। परिणहनं परीणट्। परिपूर्वान्नह्यतेर्भावे क्विपि नहिवृतीत्यादिना। पा॰ ६. ३. ११६.। पूर्वपदस्य दीर्घः। पृथिव्याः। उदात्तयण इति विभक्तेरुदात्तत्वं। हिन्वानासः। हि गतौ वृद्धौ च। ताच्छीलिकश्चानश्। तितिरुः। तिरतिर्गत्यर्थः॥

नवमीमृचमाह ॥

परि यदिंद्र रोदसी उभे अबुभोजीर्महिना विश्वतः सीं ।

अमन्यमानाँ अभि मन्यमानैर्निर्ब्रह्मभिरधमो दस्युमिंद्र ॥ ९ ॥

परि । यत् । इंद्र । रोदसी इति । उभे इति । अबुभोजीः । महिना । विश्वतः । सीं ।

अमन्यमानान् । अभि । मन्यमानैः । निः । ब्रह्मऽभिः । अधमः । दस्युं । इंद्र ॥ ९ ॥

हे इंद्र यद्यदा रोदसी उभे द्युलोकभूलोकावुभौ महिना त्वदीयेन महिम्ना विश्वतः सीं सर्वतः परिगृह्य पर्यबुभोजीः । परितो भुक्तवानसि । तदानीं त्वममन्यमानान् मंत्रार्थमनुध्यातुमशक्तानपि केवलपाठकान्यजमानानभि मन्यमानैरस्मदीया एते यजमाना रक्षणीया इत्यभिमानं कुर्वद्भिर्ब्रह्मभिर्मंत्रैर्दस्युं चोरं वृत्रादिरूपमसुरं निरधमः । निःसारितवानसि । धमतिर्गतिकर्मेति यास्कः । अबुभोजीः । भुज पालनाभ्यवहारयोः । लङि सिपि बहुलं छंदसीति विकरणविशिष्टस्य श्लुः । छंदसि वहुलमितीडागमः । अद्युदात्तः । यद्वृत्तयोगादनिघातः । महिना । महिम्ना । महच्छब्दात्पृथ्वादिलक्षणो भावे इमनिच् । टेरिति टिलोपः । तृतीयैकवचनेऽल्लोपे मत्युदात्तनिवृत्तिस्वरेणोदात्तत्वं । मलोपश्छांदसः । अमन्यमानान् । मन्यंते जानंतीति मन्यमानाः । मन ज्ञाने । दिवादिभ्यः श्यन् । श्यनो नित्त्वादाद्युदात्तत्वं । समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं । संहितायां रुत्वानुनासिकावुक्तौ ॥

दशमीमृचमाह ॥

न ये दिवः पृथिव्या अंतमापुर्न मायाभिर्धनदां पर्यभूवन् ।

युजं वज्रं वृषभश्चक्र इंद्रो निर्ज्योतिषा तमसो गा अदुक्षत् ॥ १० ॥

न । ये । दिवः । पृथिव्याः । अंतं । आपुः । न । मायाभिः । धनऽदां । परिऽअभूवन् ।

युजं । वज्रं । वृषभः । चक्रे । इंद्रः । निः । ज्योतिषा । तमसः । गाः । अधुक्षत् ॥ १० ॥

ये जलविशेषा दिवो द्युलोकात्पृथिव्या अंतं भूमेः स्थानं नापुः । न प्राप्ताः । मेघरूपमापन्नेन वृत्रेण निरुद्धत्वात् । अत एव भूमिप्राप्त्यभावाद्धनदां धनप्रदां भूमिं मायाभिः सस्योपकारादिभिः कर्मभिर्न पर्यभूवन् । परितो न व्याप्ताः । जलपातसस्याभिवृद्ध्याद्युपकारं न चक्रुरित्यर्थः । तदानीमयमिंद्रो मेघभेदनाय

वज्रं युजं स्वहस्तयुक्तं चक्रे। ततो ज्योतिषा द्योतमानेन वज्रेण तमस अंधकारूपान्मेघान्ना गमनशीलान्युदकानि निरधुक्षत्। निःशेषेण दुग्धवान्। मेघं भित्त्वा जलं वृष्टवानित्यर्थः॥ दिवः। ऊडिदमिति पंचम्या उदात्तत्वं। आपुः। आपॢ व्याप्तौ। लिट्युसि रूपं। यद्वृत्तयोगादनिघातः। पर्यभूवन्। अत्रापि यच्छब्दस्यानुषंगान्निघाताभावः। युजं। युजिर् योगे। ऋत्विगित्यादिना क्विन्। अनित्यमागमशासनमिति वचनान्नुमभावः। अधुक्षत्। दुह प्रपूरणे। लुङि शल इगुपधादनिटः क्सः। पा॰ ३. १. ४५. इति च्लेः क्सादेशः। दादेर्धातोर्घः। पा॰ ८. २. ३२. इति घत्वं। एकाचो बश इत्यादिना। पा॰ ८. ३. ३७. भष्भावः। संहितायां भष्भावाभावश्छांदसः॥

॥ इति प्रथमस्य तृतीये द्वितीयो वर्गः॥

एकादशीमृचमाह॥

अनु स्वधामक्षरन्नापो अस्यावर्धत मध्य आ नाव्यानां।
सध्रीचीनेन मनसा तमिंद्र ओजिष्ठेन हन्मनाहन्नभि द्यून्॥११॥

अनु। स्वधां। अक्षरन्। आपः। अस्य। अवर्धत। मध्ये। आ। नाव्यानां।
सध्रीचीनेन। मनसा। तं। इंद्रः। ओजिष्ठेन। हन्मना। अहन्। अभि। द्यून्॥११॥

आपो जलान्यस्येंद्रस्य स्वधामन्नं व्रीह्यादिरूपमनुलक्ष्याक्षरन्। मेघाद्वृष्टा अभवन्। तदानीमयं वृत्रो नाव्यानां नावा तरणयोग्यानां वह्नीनामपां मध्ये आ समंतादवर्धत। वृद्धिं प्राप्तः। प्रभूतजले वर्तमानोऽपि न ममार किंत्वभिवृद्ध एव। तदानीमिंद्रः सध्रीचीनेन सहगच्छता मनसा युक्तं तं वृत्रमोजिष्ठेनातिबलयुक्तेन हन्मना हननसाधनेन वज्रेणाभि द्यून् कतिचिद्दिवसानभिलक्ष्याहन्। तेषु दिवसेषु हतवान्। जलमध्ये पतितस्यापि वृत्रस्य मनो यत्रेंद्रस्तिष्ठति तत्रैव सह गच्छति तादृशमभिज्ञाय स हतवानित्यर्थः॥ अक्षरन्। क्षर संचलने। नाव्यानां। नावा तार्याणां। नौवयोधर्मेत्यादिना। पा॰ ४. ४. ९१. यत्। वांतो यि प्रत्यये। पा॰ ६. १. ७९. इत्यावादेशः। अनाव इति पर्युदासात्। पा॰ ६. १. २१३. तित्स्वरितमिति प्रत्ययस्वरितत्वं। सध्रीचीनेन। सहांचतीति सध्र्यङ्। सहस्य सध्रिः। पा॰ ६. ३. ९५. इति सध्र्यादेशः। विभाषांचेरदिक्स्त्रियां। पा॰ ५. ४. ८. इति स्वार्थे खप्रत्ययः। तस्यायन्नित्यादिना ईनादेशः। अच

इत्यकारलोपे चाविति दीर्घत्वं। खादेशस्योपदेशिवद्वचनादीकार उदात्तः। ओजिष्ठेन। ओजोऽस्यास्तीत्योजस्वी। अस्मायामेधेति विनिः। तत आतिशायनिक इष्ठन्। विन्मतोर्लुगिति विनो लुक्। टेरिति टिलोपः। नित्त्वादाद्युदात्तत्वं। हन्मना। हन्यतेऽनेनेति हन्म। अन्येभ्योऽपि दृश्यंत इति दृशिग्रहणात्करणेऽपि मनिन्। नित्त्वादाद्युदात्तत्वं। तृतीयैकवचनेऽल्लोपे प्राप्ते न संयोगाद्वमंतात्। पा० ६. ४. १३७.। इति प्रतिषेधः॥

द्वादशीमृचमाह॥

न्यविध्यदिलीबिशस्य दृळ्हा वि शृंगिणमभिनच्छुष्णमिंद्रः।
यावत्तरो मघवन्यावदोजो वज्रेण शत्रुमवधीः पृतन्युं ॥ १२ ॥

नि। अविध्यत्। इलीबिशस्य। दृळ्हा। वि। शृंगिणं। अभिनत्। शुष्णं। इंद्रः। यावत्। तरः। मघऽवन्। यावत्। ओजः। वज्रेण। शत्रुं। अवधीः। पृतन्युं ॥ १२ ॥

इलीबिशस्य। इलाया भूमेर्बिले शयानस्य वृत्रस्य संबंधीनि। इलाबिलशयस्येति यास्कः। नि० ६. १९.। दृळ्हा दृंहितान्यसुरेण निरूढानि प्रभूतान्युदकानींद्रो न्यविध्यत्। नितरां विद्धवान्। यद्वा दृळ्हानि प्रबलानि सैन्यानि नितरां विद्धवान्। तत ऊर्ध्वं शृंगिणं गोमहिषादिशृंगसमानैरायुधैरुपेतं शुष्णं जगतः शोषकं वृत्रं व्यभिनत्। विविधं ताडितवान्। हे मघवन् धनयुक्तेंद्र तव यावत्तरो यावान्वेगोऽस्ति यावदोजो यावद्बलमस्ति तेन सर्वेण युक्तस्त्वं पृतन्युं पृतनां युद्धमिच्छंतं शत्रुं वृत्रं वज्रेणावधीः। हतवानसि॥ अविध्यत्। व्यध ताडने। श्यनि ग्रहिज्येत्यादिना संप्रसारणं। तिङ्ङतिङ इति निघात उदात्तस्वरितयोर्यण इति संहितायामाडागमस्य स्वरितत्वं। इलीबिशस्य। पृषोदरादित्वादभिमतरूपस्वरसिद्धिः। दृळ्हा। दृंहेर्निष्ठायां दृढः स्थूलबलयोः। पा० ७. २. २०.। इति निपात्यते। शेश्छंदसि बहुलमिति शेर्लोपः। अभिनत्। भिदिर् विदारणे। लङि रुधादिभ्यः श्नम्। इतश्चेतीकारलोपे हल्ङ्याब्भ्य इति तिलोपः। शुष्णं। शुष शोषणे। शोषयतीति शुष्णः। तृषिशुषिरसिभ्यः कित्चेति नप्रत्ययः। निदित्यनुवृत्तेराद्युदात्तत्वं। अवधीः। लुङि चेति हंतेर्वधादेशः। पृतन्युं। पृतनाशब्दात्क्यचि कव्यध्वरपृतनस्येत्यंत्यलोपः। क्याच्छंदसीत्युप्रत्ययः॥

त्रयोदशीमृचमाह ॥

अभि सिध्मो अजिगादस्य शत्रून्वि तिग्मेन वृषभेणा पुरोऽभेत् ।
सं वज्रेणासृजद्वृत्रमिंद्रः प्र स्वां मतिमतिरच्छाशदानः ॥ १३ ॥

अभि । सिध्मः । अजिगात् । अस्य । शत्रून् । वि । तिग्मेन । वृषभेण । पुरः । अभेत् ।
सं । वज्रेण । असृजत् । वृत्रं । इंद्रः । प्र । स्वां । मतिं । अतिरत् । शाशदानः ॥ १३ ॥

अस्येंद्रस्य सिध्मः साधको वज्रः शत्रूनभि । इंद्रवैरिणोऽभिलक्ष्याजिगात् । गतवान् । जिगातिर्गतिकर्मा । गाति जिगातीति गतिकर्मसु पाठात् । स चेंद्रस्तिग्मेन तीक्ष्णेन वृषभेण श्रेष्ठेनायुधेन वज्रेण पुरो वृत्रस्य पुराणि व्यभेत् । विविधं भिन्नवान् । ततः स इंद्रो वज्रेण स्वकीयेन वज्रेण वृत्रं समसृजत् । संयोजितवान् । संयोज्य च शाशदानो वृत्रं हिंसन् स्वां मतिं स्वकीयां हर्षापितां बुद्धिं प्रातिरत् । प्रकर्षेण वर्द्धितवान् ॥ सिध्मः । षिधु संराद्धौ । अस्मादौणादिको मक् । कित्त्वादगुणः । प्रत्ययस्वरः । अजिगात् । गा स्तुतौ । अत्र तु गत्यर्थः । जुहोत्यादित्वात् श्लुः । द्विर्भावे बहुलं छंदसीत्यभ्यासस्येत्वं । तिग्मेन । युजिरुचितिजां कुश्च । उ० १. १४४. । इति मक् । कुत्वं । वृषभेण । ऋषिवृषिभ्यां किदित्यनेनाभच् । अभेत् । भिदिर्विदारणे । अमि प्राप्ते व्यत्ययेन शप् । तस्य बहुलं छंदसीति लुक् । लघूपधगुणे हल्ङ्याब्भ्य इति लोपः । यद्वा लुङि च्लेर्लुक् । अतिरत् । प्रपूर्वस्तिरतिर्वर्धनार्थः । यद्वा तरतेर्व्यत्ययेन शः । ऋत इद्धातोरितीत्वं । शाशदानः । शद्लृ शातने । अस्माद्यङंताच्छानच् । तस्य छंदस्युभयथेत्यार्द्धधातुकत्वादलोपयलोपौ । सार्वधातुकत्वादभ्यस्तानामादिरित्याद्युदात्तत्वं ॥

चतुर्दशीमृचमाह ॥

आवः कुत्समिंद्र यस्मिंचाकन्प्रावो युध्यंतं वृषभं दशद्युं ।
शफच्युतो रेणुर्नक्षत द्यामुच्छ्वैत्रेयो नृषाह्याय तस्थौ ॥ १४ ॥

आवः । कुत्सं । इंद्र । यस्मिन् । चाकन् । प्र । आवः । युध्यंतं । वृषभं । दशऽद्युं ।
शफऽच्युतः । रेणुः । नक्षत । द्यां । उत् । श्वैत्रेयः । नृऽसह्याय । तस्थौ ॥ १४ ॥

हे इंद्र कुत्समेतन्नामकं गोत्रप्रवर्तकमृषिमावः । रक्षितवानसि । यस्मिन्कुत्से चाकन् । स्तुतिं कामयमानो वर्तसे तं कुत्समिति पूर्वेणान्वयः । तथा दशद्युमे-

तन्नामकं दशसु दिक्षु दीप्यमानमृषिं प्रावः। प्रकर्षेण रक्षितवानसि। कीदृशं। युध्यंतं। स्वकीयैः शत्रुभिः सह युद्धं कुर्वंतं। वृषभं। गुणैः श्रेष्ठं। शफच्युतस्त्वदीयाश्वस्य शफात्पतितो रेणुर्धूलिर्द्यां द्युलोकं नक्षत। प्राप्नोति। श्वैत्रेयः श्वित्राख्याया योषितः पुत्रः पुरा शत्रुभयाज्जले मग्नः सन् त्वदनुग्रहान्नृसह्याय नृभिः पुरुषैः सोढव्यायोत्तस्थौ। जलादुत्थितवान् ॥ चाकन्। चक तृप्तौ। अस्मात्स्यंताच्छंदतृ। छंदस्युभयथेत्यार्धधातुकत्वाण्णिलोपः शबभावश्च। प्रत्ययस्वरेणांतोदात्तत्वं। यद्वा। कमु कांताविव्यस्माद्यङ्लुगंताल्लङि सिपयभ्यासस्य नुमभावश्छांदसः। दीर्घोऽकित इति दीर्घत्वं। मिलोपे मो नो धातोः। पा० ८.२.६४.। इति मकारस्य नकारः। धातुस्वरः। यद्वृत्तयोगादनिघातः। युध्यंतं। व्यत्ययेन परस्मैपदं। दशद्युं। दीव्यतेः प्रकाशार्थात्संपदादिलक्षणः क्विप्। द्योः भूडिन्त्यूट्। दशसु दिक्षु द्युर्यस्यासौ दशद्युः। छांदसं हृस्वत्वं। यद्वा द्युशब्दोऽहर्नामसु पठितः। तेन प्रवृत्तिनिमित्तभूतः प्रकाशो लक्ष्यते। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। शफच्युतः। शफेन च्युतः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। नक्षत। नक्ष गतौ। व्यत्ययेनात्मनेपदं। श्वैत्रेयः। श्वित्राया अपत्यं। स्त्रीभ्यो ढक्। पा० ४.१.१२०.। नृसह्याय। शकिसहोश्च। पा० ३.१.९९.। इति कर्मणि यत्। यतोऽनाव इत्याद्युदात्तत्वं। समासे कृदुत्तरपदप्रकृतिस्वरत्वं। पूर्वपदादिति षत्वं। संहितायां दीर्घश्छांदसः॥

पंचदशीमृचमाह ॥

आवः शमं वृषभं तुग्र्यासु क्षेत्रजेषे मघवञ्छ्वित्र्यं गां।
ज्योक् चिदत्र तस्थिवांसो अक्रञ्छत्रूयतामधरा वेदनाकः ॥ १५ ॥
आवः। शमं। वृषभं। तुग्र्यासु। क्षेत्रऽजेषे। मघऽवन्। श्वित्र्यं। गां।
ज्योक्। चित्। अत्र। तस्थिऽवांसः। अक्रन्। शत्रुऽयतां। अधरा। वेदना।
अकरित्यकः ॥ १५ ॥

हे मघवन् धनवन्निंद्र श्वित्र्यं श्वित्रायाः पुत्रं पूर्वोक्तं पुरुषमावः। रक्षितवानसि। किमर्थं। क्षेत्रजेषे। शत्रुभिः सह युद्धवेलायां क्षेत्रप्राप्त्यर्थं। कीदृशं। शमं। त्वदीयपरिपालनेन चित्तव्याकुलतां परित्यज्य शांतं। वृषभं। गुणैः श्रेष्ठं। तुग्र्यासु गां। जलेषु गतं निमग्नमित्यर्थः। तुग्र्या बुर्बुरमित्युदकनामसु पठितत्वात्। अत्रास्माभिः सह युद्धे ज्योक् चित् चिरकालमपि तस्थिवांसोऽव-

स्थिताः संतोऽक्रन्। ये वैरिणः शत्रुत्वमकुर्वन्। शत्रूयतां शत्रूनात्मन इच्छतां तेषामधरा वेदना निकृष्टानि दुःखानि त्वमकः। कुरु॥ तुग्रशब्दोऽंतरिक्षवचनः। तत्र भवास्तुग्रियाः। तुग्रादृन्। पा॰ ४.४.११५.। इति घन्। तस्येयादेशः। इकारलोपश्छांदसः। नित्त्वादाद्युदात्तत्वं। क्षेत्रजेषे। जेषृ णेषृ एषृ प्रेषृ गतौ। अस्मात्संपदादिलक्षणः क्विप्। क्षेत्रस्य जेट् क्षेत्रजेट्। समासांतोदात्तत्वं। अंतोदात्तादुत्तरपदादित्यादिना। पा॰ ६.१.१६९.। विभक्तेरुदात्तत्वं। श्वित्र्यं। श्वित्रायां भवः। भवे छंदसीति यत्। यतोऽनाव इत्याद्युदात्तत्वं। तस्थिवांसः। तिष्ठतेः क्वसुः। वस्वेकाजाद्घसामितीडागमः। अक्रन्। करोतेर्लुङि मंत्रे घसेत्यादिना च्लेर्लुक्। शत्रूयतां। शत्रूनात्मन इच्छंतीति शत्रूयंतः। सुप आत्मन क्यजिति क्यच्। तदंताच्छतृ। तस्य लसार्वधातुकानुदात्तत्व एकादेशस्वरेणोदात्तत्वं। तस्य च पूर्वत्रासिद्धत्वं नेष्यते। पा॰ ८.२.६.१.। इत्युक्तत्वाच्छत्रंतमंतोदात्तत्वमिति शतुरनुमो नद्यजादी इति विभक्तेरुदात्तत्वं। अधरा वेदनेत्युभयत्र शेश्छंदसि बहुलमिति शेर्लोपः। अकः। करोतेर्लुङि मंत्रे घसेत्यादिना च्लेर्लुक्। गुणः॥

॥ इति प्रथमस्य तृतीये तृतीयो वर्गः॥

त्रिश्चिन्नो अद्येति चतुर्थं सूक्तं द्वादशर्चं। ऋषिश्चान्यस्माद्दषेरिति परिभाषयांगिरसो हिरण्यस्तूप ऋषिः। अश्विनौ देवता। त्र त्री चक्रेति नवमी आ नो अश्विनेति द्वादशी च त्रिष्टुभौ। शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः। त्रिश्चिद्द्वादशाश्विनं नवम्यंते त्रिष्टुभावित्यनुक्रमणिका। प्रातरनुवाक आश्विने क्रतौ जागते छंदसीदं सूक्तं। अथाश्विन इति खंडे सूत्रितं। त्रिश्चिन्नो अद्येळे द्यावापृथिवी इति जागतं। आ॰ ४.१५.। इति॥ आश्विने शस्त्रेऽप्येतत्सूक्तं प्रातरनुवाकन्यायेनेत्यतिदिष्टत्वात्॥ तत्र प्रथमामृचमाह॥

त्रिश्चि॑न्नो अ॒द्या भ॑वतं नवेदसा वि॒भुर्वां॒ याम॑ उ॒त रा॒तिर॑श्विना।
यु॒वोर्हि य॒न्त्रं हि॒म्येव॒ वास॑सोऽभ्याय॒ंसेन्या॑ भवतं मनी॒षिभिः॑॥ १॥
त्रिः। चि॒त्। नः॒। अ॒द्य। भ॒व॒त॒म्। न॒वे॒द॒सा॒। वि॒ऽभुः। वा॒म्। याम॑ः। उ॒त। रा॒तिः। अ॒श्वि॒ना॒।
यु॒वोः। हि। य॒न्त्रम्। हि॒म्याऽइ॑व। वास॑सः। अ॒भि॒ऽआ॒य॒ंसेन्या॑। भ॒व॒त॒म्। म॒नी॒षिऽभिः॑॥ १॥

हे नवेदसाश्विना। मेधाविनावश्विदेवौ। नवेदा इति मेधाविनाम। नवेदाः

कविः मनीषीति तन्नामसु पठितत्वात्। तादृशौ युवां त्रिश्चित् त्रिवारमप्यद्यास्मिन्कर्मणि नोऽस्मदर्थं भवतं। आगतौ भवतं। अत्र त्रिरिति वचनं सवनत्रयापेक्षं। आदरातिशयद्योतनार्थं वा। त्रिपथा हि देवा इति श्रुत्यंतरात्। वां युवयोर्यामो गमनसाधनभूतो रथो विभुर्व्याप्तः। उत अपि च रातिर्दानं विभुरिति शेषः। युवोर्युवयोरुभयोर्यंत्रं हि परस्परनियमरूपः संबंधविशेषोऽस्ति खलु। तत्र दृष्टांतः। वाससः सूर्यरश्म्याच्छादनयुक्तस्य वासरस्य हिम्येव। हिमयुक्तया रात्र्येव। यथा रात्र्या सह दिवसस्य संबंधः कदाचिदपि नापैति तद्वत्। युवामुभौ मनीषिभिर्मेधाविभिर्ऋत्विग्भिः। मनीषीति मेधाविनाम मनीषी मेधातेति तन्नामसु पठितत्वात्। अभ्यायंसेन्याभितो नियंतव्यौ। अनुग्रहवशात्तदधीनौ भवतं॥ अद्या। निपातस्य चेति संहितायां दीर्घः। नवेदसा। विपरीतं न वित्त इति नवेदसौ। विद ज्ञान इत्यस्मादौणादिकोऽसुन्। नञ्समासे नभ्राण्नपादित्यादिना नकारस्य प्रकृतिभावः। सुपां सुलुगित्याकारः। आमंत्रितनिघातः। यामः। यायते गम्यतेऽनेनेति यामो रथः। अर्तिस्तुस्वित्यादिना मन्। नित्त्वादाद्युदात्तत्वं। यद्वा यम उपरम इत्यस्मात्कर्मणि घञ्। वृषादिषु पाठादाद्युदात्तत्वं। रातिः। रा दान इत्यस्माद्भावे क्तिन्। मंत्रे वृषेत्यादिना तस्योदात्तत्वं। युवोः। सुपां सुपो भवंतीति षष्ठीद्विवचनस्य षष्ठीद्विवचनादेशः। अत आदेशविषयत्वाद्योऽचि। पा॰ ७.२.८९.। इति यत्वं न भवति। शेषे लोप इति टिलोप उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। अंत्यलोपपक्षे त्वेकादेशस्वरेण। हिम्या इव। हिमेति रात्रिनाम। ऊधः पयो हिमेति तन्नामसु पठितत्वात्। हनेर्हि च। उ॰ १.१४५.। इति मक्। हंति पद्मानीति हिमं। अर्शआद्यच्। हिमा रात्रिः। तत उत्तरस्य तृतीयैकवचनस्य सुपां सुलुगिति ड्यादेशः। ततष्टिलोप उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वं। वाससः। वस आच्छादने। वासयति प्रकाशेनाच्छादयतीत्यहर्वासः। अभ्यायंसेन्या। अभ्याङित्युपसर्गद्वयोपसृष्टाद्यम उपरम इत्यस्मादौणादिकः सेन्यप्रत्ययः। सुपां सुलुगित्याकारः॥

द्वितीयामृचमाह॥

त्रयः॑ प॒वयो॑ मधु॒वाह॑ने॒ रथे॒ सोम॑स्य वे॒नामनु॒ विश्व॒ इद्वि॑दुः।
त्रयः॑ स्क॒म्भास॑ः स्कभि॒तास॑ आ॒रभे॒ त्रिर्नक्तं॑ या॒थस्त्रिर्व॑श्विना॒ दिवा॑॥ २॥

त्रयः। पवयः। मधुऽवाहने। रथे। सोमस्य। वेनां। अनु। विश्वे। इत्। विदुः।
त्रयः। स्कंभासः। स्कभितासः। आऽरभे। त्रिः। नक्तं। याथः। त्रिः। ऊं इति।
अश्विना। दिवा ॥ २ ॥

मधुवाहने मधुवाहनद्रव्याणां नानाविधखाद्यादीनां वहनेन युक्तेऽश्विनोः संबंधिनि रथे पवयो वज्रसमाना दृढाश्चक्रविशेषास्त्रयस्त्रिसंख्याकाः संति। इत् इत्थं चक्रत्रयसद्भावप्रकारं विश्वे सर्वे देवाः सोमस्य चंद्रस्य वेनां कमनीयां भार्यामभिलक्ष्य यात्रायां विदुः। जानंति। यदा सोमस्य वेनया सह विवाहस्तदानीं नानाविधखाद्ययुक्तं चक्रत्रयोपेतं प्रौढं रथमारुह्याश्विनौ गच्छत इति सर्वे देवा जानंतीत्यर्थः। तस्य रथस्योपरि स्कंभासः स्तंभविशेषास्त्रयस्त्रिसंख्याकाः स्कभितासः। स्थापिताः। किमर्थं। आरभे। आरब्धुं। अवलंबितुं। यदा रथस्त्वरया याति तदानीं पतनभीतिनिवृत्त्यर्थं हस्तालंबनभूताः स्तंभा इत्यर्थः। हे अश्विनौ युवां तादृशेन रथेन नक्तं रात्रौ त्रिर्याथः। त्रिवारं गच्छथः। तथा दिवा दिवसेऽपि त्रिर्याथः। रात्रावहनि च रथमारुह्य पुनः पुनः क्रीडथ इत्यर्थः॥ मधुवाहने। मधु वाह्यतेऽनेनेति मधुवाहनः। करणे ल्युट्। विदुः। वेत्तेर्लटि विदो लटो वेति झेरुसादेशः। स्कंभासः। ष्टभि स्कभि गतिप्रतिबंधे। स्कंभंते प्रतिबद्धा भवंतीति स्कंभाः। पचाद्यच्। स्कभितासः। स्कंभुः सौत्रो धातुः। अस्मान्निष्ठायां यस्य विभाषेतीट्प्रतिषेधे प्राप्ते ग्रसितस्कभितेत्यादिनेडागमो निपातितः। आरभे। रभ राभस्ये। अस्मादाङ्पूर्वात्संपदादिलक्षणो भावे क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं॥

तृतीयामृचमाह॥

समाने अहन्त्रिरवद्यगोहना त्रिरद्य यज्ञं मधुना मिमिक्षतं।
त्रिर्वाजवतीरिषो अश्विना युवं दोषा अस्मभ्यमुषसश्च पिन्वतं ॥ ३ ॥
समाने। अहन्। त्रिः। अवद्यऽगोहना। त्रिः। अद्य। यज्ञं। मधुना। मिमिक्षतं।
त्रिः। वाजऽवतीः। इषः। अश्विना। युवं। दोषाः। अस्मभ्यं। उषसः। च। पिन्वतं ॥ ३॥

हे अश्विना अश्विनौ देवौ युवं युवामुभौ समानेऽहन्नेकस्मिन्ननुष्ठानदिने त्रिरवद्यगोहना त्रिवारमनुष्ठानगतानां दोषाणां संवरणकारिणौ भवतं। अद्यास्मिन्दिने यज्ञं यज्ञगतं हविर्मधुना मधुररसेन त्रिर्मिमिक्षतं। त्रिवारं सिंचतं।

किंच दोषा उषसश्च। रात्रीर्दिवसांश्च। रात्रिषु दिवसेषु नैरंतर्येण वाजवतीर्बलकारिणीरिषोऽन्नान्यस्मभ्यं पिन्वतं। सिंचतं। प्रयच्छतमित्यर्थः॥ अहन्। सुपां सुलुगिति सप्तम्या लुक्। अवद्यगोहना। गुहू संवरणे। अवद्यस्य गुहयितारौ। नंद्यादित्वाल्ल्युः। ऊदुपधाया गोहः। पा० ६. ४. ८९। इति प्राप्तस्य ऊत्वस्याभावश्छांदसः। मिमिक्षतं। मिह सेचने। सन्येकाच उपदेशेऽनुदात्तादितीट्प्रतिषेधः। हलंताच्चेति सनः किच्वाल्लघूपधगुणाभावः। द्विर्भावहलादिशेषौ। ढत्वकत्वषत्वानि। वाजवतीः। उगितश्चेति ङीप्। पिन्वतं। पिवि मिवि णिवि सेचने। इदित्वान्नुम्। कर्तरि शप्॥

चतुर्थीमृचमाह॥

त्रिर्वर्तिर्यातं त्रिरनुव्रते जने त्रिः सुप्राव्ये त्रेधेव शिक्षतं।
त्रिर्नांद्यं वहतमश्विना युवं त्रिः पृक्षो अस्मे अक्षरेव पिन्वतं॥४॥

त्रिः। वर्तिः। यातं। त्रिः। अनुऽव्रते। जने। त्रिः। सुप्रऽअव्ये। त्रेधाऽइव। शिक्षतं। त्रिः। नांद्यं। वहतं। अश्विना। युवं। त्रिः। पृक्षः। अस्मे इति। अक्षराःऽइव। पिन्वतं॥४॥

हे अश्विना युवं त्रिर्वर्तिर्यातं। अस्मदीयवर्तनसाधनं गृहं त्रिर्यातं। त्रिवारं प्राप्नुतं। तथानुव्रतेऽस्मदनुकूलव्यापारयुक्ते जने त्रिर्यातं। त्रिवारं तदनुग्रहाय गच्छतं। त्रिः सुप्राव्ये त्रिवारं सुष्ठु प्रकर्षेण भवद्भ्यां रक्षणीये प्रवर्तमानानस्मान् त्रेधेव त्रिभिरेव प्रकारैः शिक्षतं। पुनः पुनरनुष्ठानमुपदेष्टव्यमित्यर्थः। तथा नांद्यं नंदनीयं संतोषकरं फलं त्रिर्वहतं। प्रापयतं। अस्मेऽस्मासु पृक्षोऽन्नं त्रिः पिन्वतं। त्रिवारं प्रयच्छतं। तत्र दृष्टांतः। अक्षरेव। अक्षराण्युदकानि। अक्षरं स्रोतस्तृप्तिरिति तन्नामसु पाठात्। तानि पर्जन्यो यथा प्रयच्छति तद्वत्॥ वर्तिः। वर्ततेऽत्रेति वर्तिर्गृहं। हृपिषिरुहिवृतीत्यादिना इप्रत्ययः। सुपां सुलुगिति द्वितीयैकवचनस्य सु आदेशः। सुप्राव्ये। उपसर्गद्वयोपसृष्टादवतेः कर्मणि ण्यत्। संज्ञापूर्वको विधिरनित्य इति वृद्ध्यभावः। तित्स्वरितमिति स्वरितत्वं। शिक्षतं। शिक्ष विद्योपादाने। नांद्यं। ण्यदंतः। पृक्षः। पृची संपर्के। असुनि सुडागमः। अस्मे। सुपां सुलुगिति शे आदेशः। अक्षरा इव। अश्नुवते व्याप्नुवंतीत्यक्षराण्युदकानि। औणादिकः क्सरप्रत्ययः। शेर्लोपः॥

पंचमीमृचमाह ॥

त्रिर्नो रयिं वहतमश्विना युवं त्रिर्देवताता त्रिरुतावतं धियः ।
त्रिः सौभगत्वं त्रिरुत श्रवांसि नस्त्रिष्ठं वां सूरे दुहितारुहद्रथं ॥ ५ ॥

त्रिः । नः । रयिं । वहतं । अश्विना । युवं । त्रिः । देवऽताता । त्रिः । उत । अवतं । धियः ।
त्रिः । सौभगऽत्वं । त्रिः । उत । श्रवांसि । नः । त्रिऽस्थं । वां । सूरे । दुहिता । आ ।
रुहत् । रथं ॥ ५ ॥

हे अश्विना युवं नोऽस्मान्नयिं धनं त्रिर्वहतं । त्रिवारं प्रापयतं । देवताता देवतातौ देवैर्युक्ते कर्मणि त्रिस्त्रिवारमागच्छतमिति शेषः । उत अपि च धियोऽस्मद्बुद्धीस्त्रिवारं रक्षतं । सौभगत्वं सौभाग्यं त्रिर्वहतमिति शेषः । उत अपि च श्रवांस्यन्नानि नोऽस्मभ्यं त्रिर्वहतं । वां युवयोः संबंधिनं त्रिष्ठं चक्रत्रयेऽवस्थितं रथं सूरे सूर्यस्य दुहिता पुत्री । दुहिता दुर्हिता दूरे हिता । नि० ३. ४. । इति यास्कः । सारूढवती ॥ देवताता । सर्वदेवात्तातिल् । पा० ४. ४. १४२. । इति स्वार्थिकस्तातिल्प्रत्ययः । तेन देवतातिशब्देन देवसंबद्धो यज्ञो लक्ष्यते । देवताता मख इति तन्नामसु पठितत्वात् । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । सुपां सुलुगिति सप्तम्या डादेशः । त्रिष्ठं । त्रिषु चक्रेषु तिष्ठतीति त्रिष्ठः । सुपि स्थः । पा० ३. २. ४. । इति कः । अंबांबेत्यादिना । पा० ८. ३. ९७. । सकारस्य षत्वं । सूरे । षू प्रेरणे । सुसूधागृधिभ्यः क्रन् । उ० ४. २५. । इति क्रन् । नित्वादाद्युदात्तः । विभक्तिव्यत्ययः । आरुहत् । कृमृदृरुहिभ्यश्छंदसीति च्लेरङादेशः ॥

षष्ठीमृचमाह ॥

त्रिर्नो अश्विना दिव्यानि भेषजा त्रिः पार्थिवानि त्रिरु दत्तमद्भ्यः ।
ओमानं शंयोर्ममकाय सूनवे त्रिधातु शर्म वहतं शुभस्पती ॥ ६ ॥

त्रिः । नः । अश्विना । दिव्यानि । भेषजा । त्रिः । पार्थिवानि । त्रिः । ऊं इति । दत्तं । अत्ऽभ्यः ।
ओमानं । शंऽयोः । ममकाय । सूनवे । त्रिऽधातु । शर्म । वहतं । शुभः । पती इति ॥ ६ ॥

हे अश्विना अस्मभ्यं दिव्यानि द्युलोकवर्तीनि भेषजा ओषधानि त्रिर्दत्तं । तथा पार्थिवानि । पृथिव्यामुत्पन्नान्योषधानि त्रिर्दत्तं । अद्भ्य उ । अंतरिक्षस-

काशादप्योषधानि चिर्दत्तं । आप इत्यंतरिक्षनाम । आपः पृथिवी भूरिति तन्नामसु पाठात् । शंयोरेतन्नामकस्य बृहस्पतिपुत्रस्य । ते शंयुं बार्हस्पत्यमवृधन्निति ब्राह्मणांतरात् । तस्य संबंधिनमोमानं सुखविशेषं ममकाय सूनवे मदीयाय पुत्राय दत्तं । हे शुभस्पती । शोभनस्यौषधजातस्य पालकौ युवां त्रिधातु वातपित्तश्लेष्मधातुत्रयशमनविषयं सुखं वहतं । प्रापयतं ॥ दिव्यानि । दंडादित्वाद्यप्रत्ययः । पा० ५. १. ६६. । भेषजा । भिषज चिकित्सायां । पुंसि संज्ञायामिति घः । शंयोः । शमु उपशमे । क्विप् । शम् । यु अमिश्रणे । अस्माद्विच् । कृदुत्तरपदप्रकृतिस्वरः । त्रिधातु । सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन् । उ० १. ६९. । अह्नः । ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । ओमानं । अवतेरन्येभ्योऽपि दृश्यंत इति मनिन् । ज्वरत्वरेत्यादिनाकारवकारयोरूट् । सार्वधातुकार्धधातुकलक्षणो गुणः । यदि ज्वरत्वरेत्यत्रानुनासिके च । पा० ६. ४. १९. । इति नानुवर्तते तर्हि पूर्वेणैव सूत्रेण वकारस्य ऊडादेशो भविष्यति । शुभस्पती । शुभ दीप्तौ । संपदादिलक्षणः क्विप् । षष्ठ्याः पतिपुत्रेति संहितायां विसर्जनीयस्य सत्वं । सुबामंत्रित इति परांगवद्भावात् षष्ठ्यामंत्रितसमुदायस्याष्टमिकं सर्वानुदात्तत्वं ॥

॥ इति प्रथमस्य तृतीये चतुर्थो वर्गः ॥

सप्तमीमृचमाह ॥

त्रिर्नो अश्विना यजता दिवेदिवे परि त्रिधातु पृथिवीमशायतं ।
तिस्रो नासत्या रथ्या परावत आत्मेव वातः स्वसराणि गच्छतं ॥ ७ ॥

त्रिः । नः । अश्विना । यजता । दिवेऽदिवे । परि । त्रिऽधातु । पृथिवीं । अशायतं ।
तिस्रः । नासत्या । रथ्या । पराऽवतः । आत्माऽइव । वातः । स्वसराणि । गच्छतं ॥ ७ ॥

हे अश्विना दिवे दिवे प्रतिदिनं । दिवे दिवे द्यवि द्यवीत्यहर्नामसु पठितत्वात् । यजता । यष्टव्यौ । युवां नोऽस्मदीयां पृथिवीं वेदिरूपां भूमिं परि सर्वतः प्राप्य त्रिधातु कक्ष्यात्रययुक्तं आस्तीर्णं बर्हिष्याशायतं । शयनं कुरुतं । हे रथ्या रथस्वामिनौ तिस्रस्त्रिसंख्याका ऐष्टिकपाशुकसौमिकरूपा वेदीर्गच्छतं । तत्र दृष्टांतः । स्वसराणि शरीराण्यात्मेव वातः । यथा प्राणिनामात्मभूतः प्राणवायुस्तदीयानि शरीराणि गच्छति तद्वत् ॥ यजता । यजतेर्भृमृदृशीत्यादिना । उ० ३. ११०. । अतच् । चित इत्यंतोदात्तत्वं । त्रिधातु । त्रेधा धीयते निधीयत इति

त्रिधातु । सितनिगमीत्यादिना धाञस्तुन् । नित्त्वादाद्युदात्तत्वं । समासे कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते । सुपां सुलुगिति सप्तम्या लुक् । अशायतं । अदादित्वाच्छपो लुक् । अशयातामित्यस्य ह्रस्वदीर्घयोर्व्यत्यासः । नासत्या । सत्सु साधू सत्यौ । न सत्यावसत्यौ । न असत्यौ नासत्यौ । सत्यावेव नासत्यावित्यौर्णवाभ इति यास्कः । नि० ६. १३. । नभ्राण्नपादित्यादिना नञः प्रकृतिभावः । रथ्या । रथार्हौ स्वामिनावित्यर्थः । छंदसि च । पा० ५. १. ६७. । इति यप्रत्ययः । स्वसराणि । सरंति गच्छंतीति सरा इंद्रियाणि । स्वकीयाः सरा येषां शरीराणां । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

अष्टमीमृचमाह ॥

त्रिरश्विना सिंधुभिः सप्तमातृभिस्त्रयं आहावास्त्रेधा हविष्कृतं ।
तिस्रः पृथिवीरुपरि प्रवा दिवो नाकं रक्षेथे द्युभिरक्तुभिर्हितं ॥ ८ ॥

त्रिः । अश्विना । सिंधुऽभिः । सप्तमातृऽभिः । त्रयः । आऽहावाः । त्रेधा । हविः । कृतं । तिस्रः । पृथिवीः । उपरि । प्रवा । दिवः । नाकं । रक्षेथे इति । द्युऽभिः । अक्तुऽभिः । हितं ॥ ८ ॥

हे अश्विना सप्तमातृभिः । इमं मे गंग इत्यादिमंत्रोक्ताः सप्तसंख्याका गंगाद्या नद्यो मातर उत्पादिका येषां जलविशेषाणां ते सप्तमातरः । तैः सिंधुभिः स्यंदनस्वभावैर्जलैर्वसतीवरीनामभिस्त्रिः सोमाभिषवः कृत इति शेषः । तथा चान्यत्र ब्राह्मणे समाम्नातं । अष्टौ कृत्वोऽभिषुणोति एकादश कृत्वो द्वितीयं द्वादश कृत्वस्तृतीयमिति । आहावा यथोक्तजलयुक्तस्य सोमस्याधारभूताः कूपसदृशास्त्रयस्त्रिसंख्याका द्रोणकलशा धवनीयपूतभृदाख्या निष्पन्ना इति शेषः । तेषु त्रिषु पात्रविशेषेषु त्रेधा त्रिभिः प्रकारैः सवनत्रयगतैर्हविष्कृतं । सोमाख्यं हविः संपादितं द्रव्यं वर्तत इति शेषः । तिस्रः पृथिवीरुपरि । त्रिभ्यः पृथिव्यादिलोकेभ्य ऊर्ध्वं प्रवा प्रवंतौ गच्छंतौ युवां दिवो नाकं द्युलोकसंबंधिनमादित्यं रक्षेथे । कीदृशं नाकं । द्युभिरहोभिरक्तुभी रात्रिभिश्च हितं स्थापितं । अहनि सूर्य उदेति रात्रावस्तं गच्छतीत्येवमहोरात्राभ्यां सूर्यो व्यवस्थाप्यत इत्यर्थः ॥ सप्तमातृभिः । बहुव्रीहिस्वरः । आहावाः । निपानमाहावः । पा० ३. ३. ७४. । इत्याङ्पूर्वाद्ध्वयतेरप्प्रत्ययः संप्रसारणं वृद्धिश्च निपातनात् । याथादिनोत्तरपदां-

तोदात्तत्वं । प्रवा । च्युङ् प्रुङ् गतौ । प्रवेते गच्छत इति प्रवौ । पचाद्यच् । सुपां सुलुगित्याकारः । नाकं । नास्मिन्नकमस्तीति नाकः । नभ्राण्नपादित्यादिना नञः प्रकृतिभावः । द्युभिः । ऊडिदमित्यादिना प्राप्तस्य विभक्त्युदात्तस्य दिवो झल् । पा° ६. १. १८३. । इति प्रतिषेधः ॥

नवमीमृचमाह ॥

क्व१त्री चक्रा त्रिवृतो रथस्य क्व१त्रयो वंधुरो ये सनीळाः ।
कदा योगो वाजिनो रासभस्य येन यज्ञं नासत्योपयाथः ॥ ९ ॥

क्व । त्री । चक्रा । त्रिऽवृतः । रथस्य । क्व । त्रयः । वंधुरः । ये । सऽनीळाः ।
कदा । योगः । वाजिनः । रासभस्य । येन । यज्ञं । नासत्या । उपऽयाथः ॥ ९ ॥

हे नासत्यावश्विनौ त्रिवृतस्त्रिसंख्याकैरश्रिभिरुपेतस्य भवदीयस्य रथस्य । ईषाद्वयं पूर्वभागे संयुज्यते । सेयमेकाश्रिः । पृष्ठभागे वियुज्यते । तत्र कोणद्वयं संपद्यते । ईदृशस्य रथस्य संबंधीनि त्रीणि चक्राणि क्व । कुत्र स्थितानीत्यस्माभिर्न दृश्यते । ये काष्ठविशेषाः सनीळाः । नीळं गृहसदृशं रथस्योपर्युपवेशस्थानं तेन सह वर्तंत इति सनीळास्ते काष्ठविशेषा वंधुरो नीडवंधनाधारभूतास्त्रयः । अक्षेण सहिते द्वे ईषे इत्येवं त्रिसंख्याकाः क्व । कुत्र स्थिता इत्यस्माभिर्न ज्ञायते । वाजिनो बलवतो रासभस्य भवदीयाश्वस्थानीयस्य गर्दभस्य योगो रथे योजनं कदा । कस्मिन्काले निष्पन्नमित्यस्माभिर्न दृश्यते । येन चक्रत्रयनीडकाष्ठत्रयरासभयोजनसहितेन रथेन यज्ञमस्मदीयं यागस्थानमुपयाथः । युवां प्राप्नुथस्तादृशस्य रथस्येति पूर्वत्रान्वयः ॥ त्री चक्रा । उभयत्रापि शेश्छंदसि बहुलमिति शेर्लोपः । वंधुरः । बंधेरौणादिक उरन्प्रत्ययः । वत्वं छांदसं । सनीळाः । वोपसर्जनस्येति सभावः ॥

दशमीमृचमाह ॥

आ नासत्या गच्छतं हूयते हविर्मध्वः पिबतं मधुपेभिरासभिः ।
युवोर्हि पूर्वं सवितोषसो रथमृताय चित्रं घृतवंतमिष्यति ॥ १० ॥

आ । नासत्या । गच्छतं । हूयते । हविः । मध्वः । पिबतं । मधुऽपेभिः । आसऽभिः ।
युवोः । हि । पूर्वं । सविता । उषसः । रथं । ऋताय । चित्रं । घृतऽवंतं । इष्यति ॥ १० ॥

हे नासत्यावश्विनाविह कर्मण्यागच्छतं । अत्रास्माभिर्हविर्हूयते । युवां च मधुपेभिर्मधुरद्रव्यपानयुक्तैरासभिर्भवदीयैरास्यैर्मध्वो मधुरद्रव्याणि हवींषि पिबतं । सविता सूर्य उषसः पूर्वमुषःकालात्पुरा युवयोरश्विनोः संबंधिनं रथमृतायास्मद्यज्ञार्थमिष्यति हि । प्रेरयति खलु । कीदृशं । चित्रं । पूर्वोक्तैश्चक्रत्रयादिभिर्विचित्रं । घृतवंतं । अक्षांजनसाधनेन घृतेनोपेतं ॥ गच्छतं । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे शपः पित्त्वादनुदात्तत्वं । धातुस्वरः । अत्र गच्छतं पिबतं चेति चार्थप्रतीतेश्चादिलोपे विभाषेति प्रथमायास्तिङ्विभक्तेर्निघातप्रतिषेधः । हूयते । लसार्वधातुकानुदात्तत्वे यकः स्वरः । मध्वः । लिंगव्यत्ययः शसि यणादेशश्छांदसः । मधुपेभिः । मधु पिबंतीति मधुपानि । आतोऽनुपसर्गे क इति कप्रत्ययः । आसभिः । पद्दन्नित्यादिनास्यशब्दस्यासनादेशः । युवोः । युवोर्हि यंत्रमित्यत्रोक्तं । इष्यति । इष गतौ । श्यनो नित्त्वादाद्युदात्तत्वं । हि चेति निघातप्रतिषेधः ॥

एकादशीमृचमाह ॥

आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना ।

प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥ ११ ॥

आ । नासत्या । त्रिऽभिः । एकादशैः । इह । देवेभिः । यातं । मधुऽपेयं । अश्विना ।

प्र । आयुः । तारिष्टं । निः । रपांसि । मृक्षतं । सेधतं । द्वेषः । भवतं । सचाऽभुवा ॥ ११ ॥

हे *नासत्या* । असत्येनानृतेन रहितावश्विना । अश्विदेवौ । युवां त्रिभिरेकादशैः । ये देवासो दिव्येकादश स्थेत्यादिमंत्रप्रतिपादितैस्त्रिसंख्याकैरेकादशात्मकवर्गत्रयगतैर्देवैः सह मधुपेयं सोमात्मकं मधुरद्रव्यपानमभिलक्ष्येहास्मिन्देवयजनदेश आयातं । आगच्छतं । आयुरस्मदीयमायुष्यं प्रतारिष्टं । प्रवर्धयतं । रपांस्यस्मदीयानि पापानि निर्मृक्षतं । निःशेषेण शोधयतं । द्वेषो द्वेषकर्तॄन् सेधतं । प्रतिषेधतं । सचाभुवा । अस्माभिः सहावस्थितौ भवतं ॥ त्रिभिः । षट्त्रिचतुर्भ्य इति विभक्तेरुदात्तत्वं । एकादशैः । एकादशानां पूरणैः । तस्य पूरणे । पा० ५. २. ४८. । इति डट् । मधुपेयं । पा पाने । अचो यदिति कर्मणि यत् । ईद्यति । । पा० ६. ४. ६५. । इत्याकारस्य ईकारादेशः । यतोऽनाव इत्याद्युदात्तत्वं ॥ मधु च तत्पेयमिति समासे कृदुत्तरपदप्रकृतिस्वरत्वं । तारिष्टं । तॄ प्लवनतरणयोः । छांदसे प्रार्थनायां लुङि च्लेः सिच् । इडागमः । वृतो वा । पा० ७. २. ३८. । इति प्राप्त-

स्येटो दीर्घस्य सिचि च परस्मैपदेषु । पा० ७. २. ४०. । इति प्रतिषेधः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । अत्र तारिष्टं मृक्षतं चेति चशब्दार्थप्रतीतेश्चस्य चाप्रयोगाच्चादिलोपे विभाषेति निघातप्रतिषेधः । आदिः सिचोऽन्यतरस्यां । पा० ६. १. १८७. । इत्याद्युदात्तत्वं । मृक्षतं । मृश आमर्शने । छंदसि लुङ्लङ्लिट इति लोडर्थे लुङ् । शल इगुपधादनिटः क्स इति क्सादेशः । एकाच उपदेशेऽनुदात्तादितीट्प्रतिषेधः । षत्वकुत्वे । पूर्ववदडभावः । सेधतं । षिधु गत्यां । अत्र केवलोऽपि षिधिः प्रतिपूर्वस्यार्थे वर्त्तते । प्रार्थनायां लोट् । शपः पित्त्वादनुदात्तत्वं । तिङश्च लसार्वधातुकस्वरेण धातुस्वरः । पादादित्वात्तिङः परत्वाद्वा निघाताभावः । द्वेषः । अन्येभ्योऽपि दृश्यंत इति कर्तरि विच् । भवतं । द्वेष इत्यस्य वाक्यांतरगतत्वात्तदपेक्षयास्य निघातो न भवति । समानवाक्ये च निघातयुष्मदस्मदादेशा वक्तव्या इति वचनात् । सचाभुवा । सचेत्ययं निपातः सहशब्दसमानार्थः । तथा च यास्कः । सचा सहेत्यर्थ इति । सचा भवत इति सचाभुवौ । क्विप् । ओः सुपीति यणादेशस्य न भूसुधियोरिति प्रतिषेधः । सुपां सुलुगिति विभक्तेराकारः ॥

द्वादशीमृचमाह ॥

आ नो अश्विना त्रिवृता रथेनार्वाचं रयिं वहतं सुवीरं ।
शृण्वंता वामवसे जोहवीमि वृधे च नो भवतं वाजसातौ ॥ १२ ॥

आ । नः । अश्विना । त्रिऽवृता । रथेन । अर्वाचं । रयिं । वहतं । सुऽवीरं ।
शृण्वंता । वां । अवसे । जोहवीमि । वृधे । च । नः । भवतं । वाजऽसातौ ॥ १२ ॥

हे अश्विना त्रिवृता रथेन । अप्रतिहतगतित्वात् त्रिषु लोकेषु वर्त्तमानेन रथेन सह नोऽस्माकमर्वाचमभिमुखं सुवीरं शोभनैर्वीरैः पुत्रभृत्यादिभिरुपेतं रयिं धनमावहतं । आनीय प्रापयतं । शृण्वंतास्मदीयस्तुतिं शृण्वंतौ वां युवामवसेऽस्मद्रक्षणार्थं जोहवीमि । आह्वयामि । नोऽस्माकं वाजसातौ संग्रामे । वाजसातौ महाधन इति संग्रामनामसु पाठात् । वृधे वर्धनाय च भवतं ॥ सुवीरं । शोभना वीरा यस्येति बहुव्रीहौ वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं । शृण्वंता । श्रु श्रवणे । शतरि श्रुवः शृ चेति श्रुवः शृभावश्च । हुश्नुवोः सार्वधातुक इति यणादेशः । सुपां सुलुगित्याकारः । जोहवीमि । ह्वेञ् स्पर्द्धायां शब्दे च । यङ्लुक्यभ्यस्तस्य च । पा० ६. १. ३३. । इति कृतसंप्रसारणादस्माल्लडुत्तमैकवचने यङो

वा । पा० ७. ३. ९४.। इतीडागमः । वृधे । वृधु वृद्धावित्यस्मात्संपदादिलक्षणो भावे क्विप् । वाजसातौ । षणु दाने । क्तिनि तितुत्रेत्यादिना इट्प्रतिषेधः । जनसनेत्यादिना आत्वं । वाजानां सातिर्यस्मिन्निति पूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य तृतीये पंचमो वर्गः ॥

ह्वयाम्यग्निमित्येकादशर्चं पंचमं सूक्तं । हिरण्यस्तूप ऋषिः । आद्या नवमी च जगतीछंदस्के । शिष्टास्त्रिष्टुभः । कृत्स्नस्य सूक्तस्य सविता देवता । आद्याया ह्वयाम्यग्निमित्यस्या अग्निमित्रावरुणरात्रिसवित्राख्या लिंगोक्तदेवताः । तथा चानुक्रांतं । ह्वयाम्येकादश सावित्रं नवमी जगत्याद्या च । लिंगोक्तदेवताः पादास्त्वय इति । अभिप्लवषडहस्य चतुर्थेऽहनि वैश्वदेवशस्त्र इदं सूक्तं सावित्रं निविद्धानं । तृतीयस्य त्र्यर्यमेति खंडे सूत्रितं । ह्वयाम्यग्निमस्य मे द्यावापृथिवी इति तिस्रः । आ० ७. ७.। इति ॥ तत्र प्रथमामृचमाह ॥

ह्वयाम्यग्निं प्रथमं स्वस्तये ह्वयामि मित्रावरुणाविहावसे ।
ह्वयामि रात्रीं जगतो निवेशनीं ह्वयामि देवं सवितारमूतये ॥ १ ॥

ह्वयामि । अग्निं । प्रथमं । स्वस्तये । ह्वयामि । मित्रावरुणौ । इह । अवसे ।
ह्वयामि । रात्रीं । जगतः । निऽवेशनीं । ह्वयामि । देवं । सवितारं । ऊतये ॥ १ ॥

स्वस्तयेऽस्माकमविनाशाय । स्वस्तीत्यविनाशनामेति यास्कः । प्रथममादावग्निं ह्वयामि । इहास्मिन्कर्मण्यवसेऽस्मद्रक्षणाय मित्रावरुणौ ह्वयामि । जगतो जंगमस्य प्राणिजातस्य निवेशनीमुपवेशनहेतुभूतां रात्रीं रात्रिदेवतां ह्वयामि । जंगमाः सर्वे प्राणिनो दिवसे स्वस्वव्यापारान्कृत्वा स्वस्वगृहे रात्रावुपविशंतीति प्रसिद्धं । ऊतयेऽस्मद्रक्षणार्थं सवितारं देवं ह्वयामि ॥ मित्रावरुणौ । देवताद्वंद्वे चेति पूर्वपदस्यानङादेशः । देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं । रात्रीं । रात्रेश्चाजसौ । पा० ४. १. ३१.। इति ङीप् । निवेशनीं । निविशंत्यस्यामिति निवेशनी । करणाधिकरणयोश्चेति ल्युट् । टिड्ढाणञित्यादिना । पा० ४. १. १५.। ङीप् । ऊतये । अवतेः क्तिनि ज्वरत्वरेत्यादिना वकारस्योपधायाश्च ऊट् । ऊतियूतीत्यादिना क्तिन उदात्तत्वं ॥

द्वितीयामृचमाह ॥

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ २ ॥
आ । कृष्णेन । रजसा । वर्तमानः । निऽवेशयन् । अमृतं । मर्त्यं । च ।
हिरण्ययेन । सविता । रथेन । आ । देवः । याति । भुवनानि । पश्यन् ॥ २ ॥

सविता सूर्यः कृष्णेन रजसा कृष्णवर्णेन लोकेन । कृष्णं कृष्यतेर्निकृष्टो वर्ण इति यास्कः । लोका रजांस्युच्यंत इति च । अंतरिक्षलोको हि सूर्यागमनात्पुरा कृष्णवर्णो भवति । तेनांतरिक्षमार्गेणावर्तमानः पुनः पुनरागच्छन् अमृतं देवं मर्त्यं मनुष्यं च निवेशयन् स्वस्वस्थानेऽवस्थापयन् । यद्वा । अमृतं मरणरहितं प्राणं मर्त्यं मरणसहितं शरीरं च निवेशयन् । तथा चारण्यकांडे । अमर्त्यो मर्त्येन सयोनिरित्येतस्य मंत्रभागस्य व्याख्यानरूपे ब्राह्मणे यथोक्तोऽर्थोऽवगम्यते । मर्त्यानि हीमानि शरीराणि । अमृतैषा देवतेति । यथोक्तगुणोपेतः सविता देवो भुवनानि सर्वान् लोकान्पश्यन् अवेक्षमाणः । प्रकाशयन्नित्यर्थः । हिरण्ययेन सुवर्णनिर्मितेन रथेनायाति । अस्मत्समीपमागच्छति ॥ अमृतं । मृतं मरणं नास्त्यस्येति बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं । मर्त्यं । मर्ते भवं । भवे छंदसीति यत् । यतोऽनाव इत्याद्युदात्तत्वं । हिरण्ययेन । ऋत्व्यवास्त्व्येत्यादिना मयटो मकारलोपो निपातितः । यस्येति लोपे प्रत्ययस्वरः । भुवनानि । भू सत्तायां । भूसूधूभ्रस्जिभ्यश्छंदसीति क्युन्प्रत्ययः । योरनादेश उवङादेशः । नित्त्वादाद्युदात्तत्वं ॥

तृतीयामृचमाह ॥

याति देवः प्रवता यात्युद्वता याति शुभ्राभ्यां यजतो हरिभ्यां ।
आ देवो याति सविता परावतोऽप विश्वा दुरिता बाधमानः ॥ ३ ॥
याति । देवः । प्रऽवता । याति । उत्ऽवता । याति । शुभ्राभ्यां । यजतः । हरिऽभ्यां ।
आ । देवः । याति । सविता । पराऽवतः । अप । विश्वा । दुःऽइता । बाधमानः ॥ ३ ॥

देवो दीप्यमानः सविता प्रवता प्रवणवता मार्गेण याति । गच्छति । तथोद्वतोत्कृष्टेनोर्ध्वदेशयुक्तेन मार्गेण याति । उदयानंतरं आ मध्याह्नमूर्ध्वो मार्गः ।

तत उपरि आ सायं प्रवणो मार्ग इति विवेकः। तथा यजतो यष्टव्यः स देवः शुभ्राभ्यां श्वेताभ्यां हरिभ्यामश्वाभ्यां याति। देवयजनदेशे गच्छति। सविता देवो विश्वा दुरिता सर्वाणि पापान्यपबाधमानो विनाशयन् परावतो दूरदेशात्। परावत इति दूरनामसु पठितत्वात्। तादृशाद्युलोकादायाति। यागदेश आगच्छति ॥ प्रवता। वन षण संभक्तौ। अस्मात्प्रपूर्वात्क्विप्। गमादीनामिति वक्तव्यमित्यनुनासिकलोपः। ततस्तुक्। कृदुत्तरपदप्रकृतिस्वरत्वं। उद्वता। उत्पूर्वाद्वनतेः पूर्ववत्प्रक्रिया। यजतः। भृमृदृशीत्यादिना यजतेः कर्मण्यतच्प्रत्ययः। विश्वा दुरिता। उभयत्र शेश्छंदसि बहुलमिति शेर्लोपः ॥

चतुर्थीमृचमाह ॥

अभीवृतं कृशनैर्विश्वरूपं हिरण्यशम्यं यजतो बृहंतं।
आस्थाद्रथं सविता चित्रभानुः कृष्णा रजांसि तविषीं दधानः ॥ ४ ॥
अभिऽवृतं। कृशनैः। विश्वऽरूपं। हिरण्यऽशम्यं। यजतः। बृहंतं।
आ। अस्थात्। रथं। सविता। चित्रऽभानुः। कृष्णा। रजांसि। तविषीं। दधानः ॥ ४ ॥

सविता रथमास्थात्। आस्थितवान्। आरूढवानित्यर्थः। कीदृशं। अभीवृतं अभितो वर्तमानं। तथा कृशनैर्विश्वरूपं। सुवर्णेन नानारूपं। कृशनं लोहमिति सुवर्णनामसु पाठात्। क्वचित्सुवर्णनिर्मितगजपंक्तिः क्वचिदश्वपंक्तिः क्वचिन्मनुष्यपंक्तिरित्येवं बहुरूपत्वं। हिरण्यशम्यं। अश्वानां स्कंधेषु रथयोजनवेलायां नियंतुं प्रक्षेप्यमाणाः शंकवः शम्याः। ताः सुवर्णमय्यो रथे वर्तंते। बृहंतं। प्रौढं। कीदृशः सविता। यजतः। यष्टव्यः। चित्रभानुः। विविधरश्मियुक्तः। कृष्णा रजांस्यंधकारयुक्ततया कृष्णवर्णान् लोकानुद्दिश्य तमोनिवारणार्थं तविषीं बलं स्वकीयं प्रकाशरूपं दधानः ॥ अभीवृतं। अभितो वर्तत इत्यभीवृत्। वृतु वर्तने। क्विपि नहिवृतीत्यादिना। पा० ६. ३. ११६.। पूर्वपदस्य दीर्घत्वं। विश्वरूपं। विश्वानि रूपाणि यस्यासौ विश्वरूपः। बहुव्रीहौ विश्वं संज्ञायामिति व्यत्ययेनासंज्ञायामपि पूर्वपदांतोदात्तत्वं। हिरण्यशम्यं। हर्य गतिकांत्योः। हर्यतेः कन्यन् हिर च। उ० ५. ४४.। इति कन्यन्प्रत्ययो धातोर्हिरादेशश्च। नित्त्वादाद्युदात्तत्वं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्व। आस्थात्। तिष्ठतेर्लुङि गातिस्थेति सिचो लुक्। कृष्णा। कृषेर्वर्णे। उ० ३. ४.। इति नक्प्रत्ययः। शेश्छंदसि

बहुलमिति शेर्लोपः। तविषी। तवतिः सौत्रो धातुः। तवेर्णिद्वा। उ० १. ४८.। इति टिषच्। टित्त्वाट्टिड्ढाणञित्यादिना ङीप्। व्यत्ययेनाद्युदात्तत्वं वृषादित्वाद्वा। दृष्टव्यं। दधानः। शानच्यभ्यस्तानामादिरित्याद्युदात्तत्वं॥

पंचमीमृचमाह॥

वि जनाञ्छ्यावाः शितिपादो अख्यन्रथं हिरण्यप्रउगं वहंतः।
शश्वद्विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः॥५॥

वि। जनान्। श्यावाः। शितिऽपादः। अख्यन्। रथं। हिरण्यऽप्रउगं। वहंतः।
शश्वत्। विशः। सवितुः। दैव्यस्य। उपऽस्थे। विश्वा। भुवनानि। तस्थुः॥५॥

श्यावा एतन्नामका. सूर्यस्याश्वाः। श्यावाः सवितुरिति निघंटावुक्तत्वात्। ते च शितिपादः। श्वेतैः पादैरुपेताः। हिरण्यप्रउगं। रथस्य मुखमीषयोरग्रं युगबंधनस्थानं प्रउगमित्युच्यते। तच्चात्र सुवर्णमयं। तद्युक्तं रथं वहंतो जनान्प्राणिनो व्यख्यन्। विशेषेण प्रकाशितवंत इत्यर्थः। शश्वत् सर्वदा विशः प्रजा दैव्यस्येतरदेवसंबंधिनः सवितुः प्रेरकस्य सूर्यस्योपस्थे समीपस्थाने तस्थुः। स्थितवत्यः। न केवलं प्रजाः किं तर्हि विश्वा भुवनानि सर्वे च लोकाः प्रकाशाय सूर्यसमीपे तस्थुः॥ शितिपादः। शितयः श्वेतवर्णाः पादा येषां ते शितिपादः। सुपां सुलुगिति जसः सु आदेशः। यद्वा शितिः श्वेतवर्णः स्फाटिकादिः। स एव पादो येषां ते। पादस्य लोपोऽहस्त्यादिभ्यः। पा० ५.४.१३८.। इति समासांतपादशब्दस्यांत्यलोपः। उपमानादिति हि तत्रानुवर्तते। पादशब्दस्य वृषादित्वादाद्युदात्तत्वं। तस्य बहुव्रीहौ समासे शितेर्नित्याबह्वच् बहुव्रीहावभसत्। पा० ६.२. १३८.। इत्युत्तरपदप्रकृतिस्वरत्वं। अख्यन्। ख्यातेर्लुङ्यस्यतिवक्तीत्यादिना च्लेरङादेशः। हिरण्यप्रउगं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। वहंतः। शपः पित्त्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वरेण धातुस्वरः। दैव्यस्य। तस्येदमित्यर्थे देवाद्यञञौ। पा० ४.१.८५.३.। इति देवशब्दात्प्राग्दीव्यतीयो यञ्। तद्धितेष्वचामादेरित्यादिवृद्धिः। ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं। उपस्थे। आतश्चोपसर्ग इति कः। आतो लोप इटि चेत्याकारलोपः। मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं॥

षष्ठीमृचमाह ॥

तिस्रो द्यावः सवितुर्द्वा उपस्थाँ एका यमस्य भुवने विराषाट् ।
आणिं न रथ्यममृताधि तस्थुरिह ब्रवीतु य उ तच्चिकेतत् ॥ ६ ॥

तिस्रः । द्यावः । सवितुः । द्वौ । उपऽस्था । एका । यमस्य । भुवने । विराषाट् ।
आणिं । न । रथ्यं । अमृता । अधि । तस्थुः । इह । ब्रवीतु । यः । ऊं इति । तत् ।
चिकेतत् ॥ ६ ॥

द्यावः स्वर्गोपलक्षिताः प्रकाशमाना लोकास्तिस्रस्त्रिसंख्याकाः संति । तत्र द्वौ लोकौ सवितुः सूर्यस्योपस्था समीपस्थाने वर्तेते । द्युलोकभूलोकयोः सूर्येण प्रकाशितत्वात् । एका मध्यमा भूमिरंतरिक्षलोको यमस्य भुवने पितृपतेर्गृहे विराषाट् । विरान् गंतॄन्सहते । प्रेताः पुरुषा अंतरिक्षमार्गेण यमलोके गच्छंतीत्यर्थः । अमृतामृतानि चंद्रनक्षत्रादीनि ज्योतींषि जलानि वाधितस्थुः । सवितारमधिगम्य स्थितानि । तत्र दृष्टांतः । रथ्यमाणिं न । रथाद्बहिरक्षच्छिद्रे प्रक्षिप्तः कीलविशेष आणिरित्युच्यते । रथसंबंधिनमाणिमधिगम्य यथा रथस्तिष्ठति तद्वत् । यस्तु मानवस्तत्सवितृरूपं चिकेतत् । जानाति । स मानव इहास्मिन्विषये ब्रवीतु । कथयतु । केनापि वक्तुमशक्यः सवितुर्महिमेत्यर्थः ॥ तिस्रः । तिसृभ्यो जस इति विभक्तेरुदात्तत्वं । द्वा । संहितायामावादेशे लोपः शाकल्यस्येति वकारलोपः । उपस्था । आङयाजयारां चोपसंख्यानं । पा॰ ७.१.३९.४.। इति सप्तम्या आङादेशः । आङोऽनुनासिकश्छंदसि । पा॰ ६.१.१२६.। इति प्रकृतिभावः । विराषाट् । वृञ् वरणे । घञर्थे कविधानमिति कर्मणि कः । बहुलं छंदसि । पा॰ ७.१.१०३.। इतीत्वं । तथा सति वूर्यंत इति विरा इत्युक्तं भवति । तान्सहत इति विराषाट् । छंदसि सहः । पा॰ ३.२.६३.। इति सहेर्ण्विः । सहेः साडः सः । पा॰ ८.३.५६.। इति षत्वं । अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घः । रथ्यं । रथस्येदं रथ्यं । रथाद्यत् । पा॰ ४.३.१२१.। इति यत् । यतोऽनाव इत्याद्युदात्तत्वं । अमृता । शेश्छंदसि बहुलमिति शेर्लोपः । चिकेतत् । कित ज्ञाने । लेटद्युडागमः । इतश्च लोप इतीकारलोपः । जुहोत्यादित्वात् श्लुः । लघूपधगुणः । अनुदात्ते च । पा॰ ६.१.१९०.। इत्यभ्यस्तस्याद्युदात्तत्वं । यद्वृत्तयोगादनिघातः ॥

॥ इति प्रथमस्य तृतीये षष्ठो वर्गः ॥

सप्तमीमृचमाह ॥

वि सुपर्णो अंतरिक्षाण्यख्यद्गभीरवेपा असुरः सुनीथः ।
क्वे३दानीं सूर्यः कश्चिकेत कतमां द्यां रश्मिरस्या ततान ॥ ७ ॥

वि । सुऽपर्णः । अंतरिक्षाणि । अख्यत् । गभीरऽवेपाः । असुरः । सुऽनीथः ।
क्व । इदानीं । सूर्यः । कः । चिकेत । कतमां । द्यां । रश्मिः । अस्य । आ । ततान ॥ ७ ॥

सुपर्णः शोभनपतनः सूर्यस्य रश्मिः । सुपर्णा इति पंचदश रश्मिनामानीति तन्नामसु पठितत्वात् । अंतरिक्षाण्यंतरिक्षोपलक्षितानि लोकत्रयस्थानानि व्यख्यत् । विशेषेण ख्यापितवान् प्रकाशितवान् । कीदृशो रश्मिः । गभीरवेपाः । गंभीरकंपनः । रश्मेः प्रकंपनं चलनं केनापि द्रष्टुमशक्यमित्यर्थः । असुरः । सर्वेषां प्राणदः । तथा चान्यत्राम्नायते । सर्वेषां भूतानां प्राणानादायोदेतीति । सुनीथः । सुनयनः । शोभनप्रापणः । मार्गप्रकाशनेनाभीष्टदेशं प्रापयतीत्यर्थः । तादृशरश्मियुक्तः सूर्य इदानीं रात्रौ क्व कुत्र वर्तते । तदेतद्रहस्यं कश्चिकेत । को जानाति । न कोऽपीत्यर्थः । अस्य सूर्यस्य रश्मिः कतमां द्यामाततान । कं द्युलोकं रात्रौ व्याप्तवानेतदपि को जानाति ॥ सुपर्णः । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । गभीरवेपाः । टुवेपृ कंपने । असुन् । गभीरं वेपो यस्य । पूर्वपदप्रकृतिस्वरत्वं । असुरः । असु क्षेपणे । अस्यति शत्रूनित्यसुरः । असेरुरन् । उ॰ १.४२. । नित्त्वादाद्युदात्तत्वं । यद्वा । असून्प्राणान्राति ददातीत्यसुरः । आतोऽनुपसर्गे क इति कप्रत्ययः । सुनीथः । णीञ् प्रापणे । हनिकुषिनीरमिकाशिभ्यः क्थन्निति क्थन् । प्रादिसमासे थाथादिनोत्तरपदांतोदात्तत्वं । इदानीं । इदम्शब्दात्सप्तम्यर्थे दानीं च । पा॰ ५.३.१८. । इति दानीम्प्रत्ययः । इदम इशितीदम्शब्दस्येशादेशः । प्रत्ययाद्युदात्तत्वं । सूर्यः । षू प्रेरणे । सुवतीति सूर्यः । राजसूयसूर्येत्यादिना रुडागमसहितः क्यप्प्रत्ययांतो निपातितः । प्रत्ययस्यानुदात्तत्वे धातुस्वरेणाद्युदात्तत्वं । चिकेत । कित ज्ञाने । लिट् । कतमां । किंजातीयां । वा बहूनां जातिपरिप्रश्ने डतमच् । पा॰ ५. ३. ९३. । इति किंशब्दात् डतमच् । डित्त्वाट्टिलोपः । चित इत्यंतोदात्तत्वं ॥

अष्टमीमृचमाह ॥

अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिंधून् ।
हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि ॥ ८ ॥

अष्टौ । वि । अख्यत् । ककुभः । पृथिव्याः । त्री । धन्व । योजना । सप्त । सिंधून् ।
हिरण्यऽअक्षः । सविता । देवः । आ । अगात् । दधत् । रत्ना । दाशुषे । वार्याणि ॥ ८ ॥

पृथिव्याः संबंधिनीरष्टौ ककुभः प्राच्याद्याश्चतस्रो दिश आग्नेय्याद्याश्चतस्रो विदिश इत्येवमष्टौ दिशो व्यख्यत् । सविता प्रकाशितवान् । तथा योजना प्राणिनः स्वस्वभोगेन योजयितॄन्धन्व अंतरिक्षोपलक्षितान् त्री त्रिसंख्याकान्पृथिव्यादिलोकान् । सप्त सिंधून् गंगादिनदीः समुद्रान्वा सविता व्यख्यत् । हिरण्याक्षः । हितरमणीयचक्षुर्युक्तो हिरण्यमयाक्षो वा सविता देव आगात् । इहागच्छतु । किं कुर्वन् । दाशुषे हविर्दत्तवते यजमानाय वार्याणि वरणीयानि रत्नानि दधत् । प्रयच्छन् ॥ अख्यत् । ख्यातेर्लुङ्यस्यतिवक्तीत्यादिना च्लेरङादेशः । त्री । शेश्छंदसि बहुलमिति शेर्लोपः । धन्व । रिवि रवि धवि गत्यर्थाः । इदितो नुम् धातोरिति नुम् । अस्माकनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिव इति कनिन् । सुपां सुलुगिति विभक्तेर्लुक् । नलोपः । प्रत्ययस्य नित्त्वादाद्युदात्तत्वं । योजना । योजयंति प्राणिन उपभोगेनेति योजनानि । नंद्यादिलक्षणो ल्युः । णेरनिटीति णिलोपः । पूर्ववच्छेर्लोपः । हिरण्याक्षः । हिरण्यमयान्यक्षीणि यस्यासौ हिरण्याक्षः । बहुव्रीहौ सक्थ्यक्ष्णोः । पा० ५. ४. ११३. । इति समासांतः षच्प्रत्ययः । अगात् । एतेर्लुङीणो गा लुङि । पा० २. ४. ४५. । इति गादेशः । गातिस्थेति सिचो लुक् । दधत् । शतरि नाभ्यस्ताच्छतुरिति नुमागमप्रतिषेधः । श्नाभ्यस्तयोरात इत्याकारलोपः । अभ्यस्तानामादिरित्याद्युदात्तत्वं । दाशुषे । दाश्वान्साह्वानित्यादिना क्वसुप्रत्ययांतो निपातितः । चतुर्थ्येकवचने वसोः संप्रसारणमिति संप्रसारणं । परपूर्वत्वं । शासिवसिघसीनां चेति षत्वं । वार्याणि । वृङ् संभक्तौ । ऋहलोर्ण्यत् । ईडवंदेत्यादिनाद्युदात्तत्वं ॥

नवमीमृचमाह ॥

हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अंतरीयते ।
अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति ॥ ९ ॥

हिरण्यऽपाणिः। सविता। विऽचर्षणिः। उभे इति। द्यावापृथिवी इति। अंतः। ईयते।
अप। अमीवां। बाधते। वेति। सूर्यं। अभि। कृष्णेन। रजसा। द्यां। ऋणोति ॥ ९॥

हिरण्यपाणिः सुवर्णमयहस्तयुक्तः। यद्वा यजमानेभ्यो दातुं हिरण्यं हस्ते धृतवान्। विचर्षणिः। विविधदर्शनयुक्तः। विचर्षणिः पश्यदित्यर्थः। विचर्षणिर्विश्वचर्षणिरिति तन्नामसु पाठात्। सविता देव उभे द्यावापृथिवी अंतः। उभयोर्लोकयोर्मध्य ईयते। गच्छति। अमीवां रोगादिबाधामपबाधते। सम्यक् निराकरोति। तथा सूर्यं वेति। गच्छति। यद्यपि सवितृसूर्ययोरेकदेवतात्वं तथापि मूर्तिभेदेन गंतृगंतव्यभावः। कृष्णेन तमसः कर्षकेण निवर्तकेन रजसा तेजसा द्यामाकाशमभ्यृणोति। सर्वतो व्याप्नोति ॥ द्यावापृथिवी। दिवसश्च पृथिव्यां। पा० ६. ३. ३०.। इति चशब्दाद्दिवशब्दस्य द्यावादेशः। देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं। नोत्तरपदेऽनुदात्तादौ। पा० ६. २. १४२.। इति न निषेधः। अपृथिवीरुद्रपूषमंथिष्विति पर्युदस्तत्वात्। ईयते। ईङ् गतौ। तिङ्ङतिङः इति निघातः। बाधते वेति चेति समुच्चयार्थप्रतीतेश्चशब्दस्याप्रयोगाच्चादिलोपे विभाषेति निघातप्रतिषेधः। वेति। वी गतिप्रजननकांत्यशनखादनेषु। अदादित्वाच्छपो लुक्। तिपः पित्त्वादनुदात्तत्वे धातुस्वरः। यद्यप्येषा द्वितीया तथापि तिङः परत्वान्निघाताभावः। ऋणोति। ऋण गतौ। तनादित्वादुः। तनादिषु करोतेरेव गुणो नान्येषामित्यापिशलिमतेन गुणाभावः ॥

दशमीमृचमाह ॥

हिरण्यहस्तो असुरः सुनीथः सुमृळीकः स्ववाँ यात्वर्वाङ्।
अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः ॥ १० ॥
हिरण्यऽहस्तः। असुरः। सुऽनीथः। सुऽमृळीकः। स्वऽवान्। यातु। अर्वाङ्।
अपऽसेधन्। रक्षसः। यातुऽधानान्। अस्थात्। देवः। प्रतिऽदोषं। गृणानः ॥ १० ॥

हिरण्यहस्तोऽसुरः प्राणदाता सुनीथः सुष्ठु नेता प्रशस्य इत्यर्थः। सुनीथः पाक इति प्रशस्यनामसु पाठात्। सुमृळीकः। सुष्ठु सुखयिता। स्ववान् धनवान्। अर्वाङ् अभिमुखः कर्मदेशे गच्छतु। किंचायं देवः प्रतिदोषं प्रतिरात्रि गृणानः स्तूयमानोऽस्थात्। स्थितवान्। किं कुर्वन्। रक्षसो बाधकत्वेन रक्षण-

निमित्तभूतान्। रक्षो रक्षितव्यमस्मादिति यास्कः। नि० ४. १८.। यातुधानानसुरानपसेधन् निराकुर्वन् ॥ हिरण्यहस्तादयो गताः। सुमृळीकः। सुष्ठु मृळीकं सुखं यस्यासौ तथोक्तः। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। स्ववान्। स्वमस्यास्तीति स्ववान्। मादुपधाया इति वत्वं। संहितायां नकारस्य दीर्घादटि समानपाद इति रुत्वं। आतोऽटि नित्यमित्यनुनासिक आकारः। रोर्यत्वं। यलोपश्च। अपसेधन्। षिधु गत्यां। शपः पित्त्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वरेण कृदुत्तरपदप्रकृतिस्वरत्वं। रक्षसः। रक्ष पालन इत्यस्मादपादान औणादिकोऽसिप्रत्ययः। यद्वा रक्षंत्यनेनेति रक्षो बलं। करणेऽसुन्। तदेषामस्तीति रक्षस्विनः। मत्वर्थप्रत्ययलोपश्छांदसः। प्रत्ययस्वरः। यातुधानान्। यत निकारोपसंस्कारयोः। तस्माद्यंतादौणादिको भाव उप्रत्ययः। यातवो यातना एषु धीयंत इति यातुधानाः। अधिकरणे ल्युट्। लिटीति प्रत्ययात्पूर्वस्योदात्तत्वं। अस्थात्। गातिस्थेति सिचो लुक्। प्रतिदोषं। दोषां दोषां। प्रति वीप्सालक्षणे यथार्थे। अव्ययीभावः। गृणानः। गृ शब्दे। कर्मणि लटः शानच्। व्यत्ययेन श्ना। प्वादीनां ह्रस्व इति ह्रस्वत्वं। चित इत्यंतोदात्तत्वं ॥

एकादशीमृचमाह ॥

ये ते पंथाः सवितः पूर्व्यासोऽरेणवः सुकृता अंतरिक्षे।
तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव ॥ ११ ॥
ये। ते। पंथाः। सवितरिति। पूर्व्यासः। अरेणवः। सुऽकृताः। अंतरिक्षे।
तेभिः। नः। अद्य। पथिऽभिः। सुऽगेभिः। रक्ष। च। नः। अधि। च। ब्रूहि।
देव ॥ ११ ॥

हे सवितः ते तव पंथा मार्गाः पूर्व्यासः पूर्वसिद्धाः। अरेणवो धूलिरहिताः। अंतरिक्षे सुकृताः सुष्ठु संपादिताः। सुगेभिः सुष्ठु गंतुं शक्यैस्तेभिः पथिभिस्तैर्मार्गैरागत्याद्यास्मिन्दिने नोऽस्मान्रक्ष च। पालनमपि कुरु। तथा हे देव नोऽस्माननुष्ठातॄनधि ब्रूहि च। देवानामग्रेऽधिकत्वेन कथय च ॥ पंथाः। सुपां सुलुगिति जसः सुः। पथिमथोः सर्वनामस्थान इत्याद्युदात्तत्वं। पूर्व्यासः। पूर्वैः कृताः पूर्व्याः। पूर्वैः कृतमिनियौ च। पा० ४. ४. १३३.। इति यः। प्रत्ययस्वरः। असुगागमः। अरेणवः। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। सुकृताः।

कर्मणि क्तः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । सुगेभिः । सुष्ठु गच्छंत्येष्विति सुगाः । सुदुरोरधिकरण इति गमेर्डप्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वं । रक्षा । द्व्यचोऽतस्तिङ इति संहितायां दीर्घः ॥

॥ इति प्रथमस्य तृतीये सप्तमो वर्गः ॥

॥ इति प्रथमे मंडले सप्तमोऽनुवाकः ॥

अष्टमेऽनुवाकेऽष्टौ सूक्तानि । तत्र प्र वो यह्वमिति विंशत्यृचं प्रथमं सूक्तं । घोरपुत्रः कण्व ऋषिः । अयुजो बृहत्यः । तृतीयपादस्य द्वादशाक्षरत्वात् । युजः सतोबृहत्यः । प्रथमतृतीययोः पादयोर्द्वादशाक्षरत्वात् । अग्निर्देवता । ऊर्ध्व ऊ ष्वित्यादिके यूपदेवत्ये । तथा चानुक्रांतं । प्र वो विंशतिः कण्वो घौर आग्नेयं प्रगाथमूर्ध्व ऊ षु यौपाविति । नन्वूर्ध्व ऊ ष्वित्यादिकयोरप्यग्निर्देवतात्वेन भवितव्यमाग्नेये क्रतावनयोरनुद्धारात् । तथा हि सूत्रे एना वो अग्निं प्र वो यह्वं । आ॰ ४. १३. । इति प्रतीकमात्रस्यैवोपादानात्कृत्स्नसूक्तमाग्नेयमिति गम्यते । यद्येते अन्यदेवत्ये स्यातां वसिष्ठा हीति सूक्तयोरुत्तमामुद्धरेत् । आ॰ ४. १३. । इतिवदुद्धारं ब्रूयात् । न च ब्रूते । अतः कथं यौपाविति नैष दोषः । यूपाधिष्ठानस्याग्नेः स्तूयमानत्वादनयोरप्यग्निर्देवतेत्याग्नेये क्रतावुद्धारो न कृतः । अधिष्ठानप्राधान्यविवक्षया यौपावित्येतदपि न विरुध्यते । प्रातरनुवाक आग्नेये क्रतौ बार्हते छंदसि प्र वो यह्वमिति सूक्तं । अथैतस्या रात्रेर्विवासकाल इति खंडे सूत्रितं । एना वो अग्निं प्र वो यह्वमिति ॥ तत्र प्रथमामृचमाह ॥

प्र वो॑ य॒ह्वं पु॑रू॒णां वि॒शां दे॑वय॒तीना॑म् ।
अ॒ग्निं सू॒क्तेभि॒र्वचो॑भिरीमहे॒ यं सी॒मिद॒न्य ईळ॑ते ॥ १ ॥
प्र । वः॒ । य॒ह्वम् । पु॒रू॒णाम् । वि॒शाम् । दे॒व॒ऽय॒तीना॑म् ।
अ॒ग्निम् । सु॒ऽउ॒क्तेभिः॑ । वचः॑ऽभिः । ई॒म॒हे॒ । यम् । सी॒म् । इत् । अ॒न्ये । ईळ॑ते ॥ १ ॥

हे ऋत्विग्यजमानाः । देवयतीनां देवान्कामयमानानां पुरूणां बहूनां विशां प्रजारूपाणां वो युष्माकमनुग्रहाय यह्वं महांतं । यह्वो ववक्षिथ इति महन्नामसु पाठात् । अग्निं सूक्तेभिर्वचोभिः सूक्तरूपैर्वाक्यैः प्रमहे । प्रकर्षेण याचामहे । ईमहे यामीति याञ्चाकर्मसु पाठात् । अन्य इदन्येऽप्यृषयो यमग्निं सीं सर्वत ईळते । स्तुवंति । तमग्निमिति पूर्वत्रान्वयः ॥ पुरूणां । नामन्यतरस्यामिति

नाम उदात्तत्वं। विशां। सावेकाच इति विभक्तेरुदात्तत्वं। देवयतीनां। देवानात्मन इच्छंत्यो देवयंत्यः। सुप आत्मनः क्यच्। न छंदस्यपुत्रस्येतीत्वस्येव दीर्घस्यापि प्रतिषेधः। अश्वाघस्यादिति पुनरात्वविधानाज्ज्ञापकात्। क्यजंताल्लटः शतृ। कर्तरि शप्। शपः पित्त्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वरेण क्यचा सहैकादेश उदात्तेनोदात्त इति शतुरुदात्तत्वं। उगितश्चेति ङीप्। अनित्यमागमशासनमिति वचनान्नुमभावः। एकादेशस्वरस्य पूर्वत्रासिद्धत्वं नेष्यत इति वचनात्। पा॰ ८. २. ६. १.। शतुरुदात्तत्वं सिद्धमेवेति शतुरनुम इति नद्या उदात्तत्वं। सूक्तैभिः। वचेः क्तिच्क्तौ च संज्ञायामिति क्तः। थाथादिनोत्तरपदांतोदात्तत्वं। ईळते। ईड स्तुतौ। अदादित्वाच्छपो लुक्। अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वेन धातुस्वरः। यद्वृत्तयोगादनिघातः॥

द्वितीयामृचमाह॥

जनासो अग्निं दधिरे सहोवृधं हविष्मंतो विधेम ते।
स त्वं नो अद्य सुमना इहाविता भवा वाजेषु संत्य॥ २॥
जनासः। अग्निं। दधिरे। सहःऽवृधं। हविष्मंतः। विधेम। ते।
सः। त्वं। नः। अद्य। सुऽमनाः। इह। अविता। भव। वाजेषु। संत्य॥ २॥

जनासोऽनुष्ठातारो जनाः सहोवृधं बलस्य वर्धयितारमग्निं दधिरे। धृतवंतः। हविष्मंतो हविर्युक्ता वयं हे अग्ने ते त्वां विधेम। परिचरेम। विधतिः परिचरणकर्मा। विधेम सपर्यतीति परिचरणकर्मसु पठितत्वात्। वाजेष्वन्नेषु संत्य दानशील हे अग्ने स त्वमद्यास्मिन्दिन इह कर्मणि नोऽस्मान्प्रति सुमनाः शोभनमनस्कोऽविता रक्षिता भव॥ सहोवृधं। वृधु वृद्धौ। अस्मादंतर्भावितण्यर्थात्क्विप्। कृदुत्तरपदप्रकृतिस्वरः। हविष्मंतः। तसौ मत्वर्थ इति भत्वेन पदत्वाभावाद्रुत्वाद्यभावः। विधेम। विध विधाने। तुदादित्वाच्छः। सुमनाः। शोभनं मनो यस्यासौ सुमनाः। सोर्मनसी अलोमोषसी। पा॰ ६. २. ११७.। इत्युत्तरपदाद्युदात्तत्वं। भव। पादादित्वात्तिङ्ङतिङ इति निघाताभावः। द्व्यचोऽतस्तिङ इति संहितायां दीर्घः। संत्य। षणु दाने। क्तिचि तितुत्रेत्यादिना इट्प्रतिषेधः। न क्तिचि दीर्घश्च। पा॰ ६. ४. ३९.। इत्यनुनासिकलोपदीर्घयोर्निषेधः। संतिर्दाता। तत्र भवः संत्यः। भवे छंदसीति यत्॥

तृतीयामृचमाह ॥

प्र त्वा दूतं वृणीमहे होतारं विश्ववेदसं ।
महस्ते सतो वि चरंत्यर्चयो दिवि स्पृशंति भानवः ॥ ३ ॥
प्र । त्वा । दूतं । वृणीमहे । होतारं । विश्वऽवेदसं ।
महः । ते । सतः । वि । चरंति । अर्चयः । दिवि । स्पृशंति । भानवः ॥ ३ ॥

हे अग्ने होतारं होमनिष्पादकमाह्वातारं वा विश्ववेदसं सर्वज्ञं दूतं देवानां दूत्ये प्रवृत्तं । अग्निर्वै देवानां दूत आसीदिति श्रुत्यंतरात् । तादृशं त्वां प्रवृणीमहे । प्रकर्षेण वरणं कुर्मः । महो महतः सतो नित्यं वर्तमानस्य ते तवार्चयो दीप्तयो विचरंति । विविधं प्रचरंति । भानवस्त्वदीया रश्मयो दिवि द्युलोके स्पृशंति । तत्रत्यान्प्राणिनः प्रकाशयंतीत्यर्थः ॥ विश्ववेदसं । विश्वानि वेत्तीति विश्ववेदाः । असुन् । मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं । यद्वा वेद इति धननाम । विश्वं वेदो धनं यस्य । बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं । महः । मह पूजायां । क्विप् चेति क्विप् । सावेकाच इति ङस उदात्तत्वं । यद्वा । महच्छब्देऽछब्दलोपश्छांदसः । सतः । अस्तेः शतरि श्नसोरल्लोप इत्यकारलोपः । शतुरनुम इति विभक्तेरुदात्तत्वं । दिवि । ऊडिदमिति विभक्तेरुदात्तत्वं ॥

चतुर्थीमृचमाह ॥

देवासस्त्वा वरुणो मित्रो अर्यमा सं दूतं प्रत्नमिंधते ।
विश्वं सो अग्ने जयति त्वया धनं यस्ते ददाश मर्त्यः ॥ ४ ॥
देवासः । त्वा । वरुणः । मित्रः । अर्यमा । सं । दूतं । प्रत्नं । इंधते ।
विश्वं । सः । अग्ने । जयति । त्वया । धनं । यः । ते । ददाश । मर्त्यः ॥ ४ ॥

हे अग्ने वरुणादयस्त्रयो देवासो देवाः प्रत्नं पुरातनं दूतं त्वां समिंधते । सम्यक् दीपयंति । यो मर्त्यो मनुष्यो यजमानस्ते तुभ्यं ददाश । हविर्दत्तवान् । स यजमानस्त्वया सहायभूतेन विश्वं सर्वं धनं जयति ॥ अर्यमा । अर्यान्मिमीत इत्यर्यमा । श्वनुक्षन्नित्यादिना कनिन्प्रत्ययांतो निपातितः । इंधते । ञिइंधी दीप्तौ । अस्माल्लटि झस्यादादेशे श्नम् । श्नान्नलोपः । श्नसोरल्लोप इत्यकार-

लोपः। ददाश। दाशृ दाने। लिटि णलि लित्स्वरेण प्रत्ययात्पूर्वस्याकारस्योदात्तत्वं। यद्वृत्तयोगादनिघातः ॥

पंचमीमृचमाह ॥

मंद्रो होता गृहपतिरग्ने दूतो विशामसि।
त्वे विश्वा संगतानि व्रता ध्रुवा यानि देवा अकृण्वत ॥ ५ ॥
मंद्रः। होता। गृहऽपतिः। अग्ने। दूतः। विशां। असि।
त्वे इति। विश्वा। संऽगतानि। व्रता। ध्रुवा। यानि। देवाः। अकृण्वत ॥ ५ ॥

हे अग्ने त्वं मंद्रो हर्षहेतुर्होता देवानामाह्वाता विशां यजमानरूपाणां प्रजानां गृहपतिर्गृहस्य पालको दूतो देवदूतोऽसि। त्वे त्वयि विश्वा व्रता सर्वाणि कर्माणि संगतानि। व्रतं कर्वरमिति कर्मनामसु व्रतशब्दः पठितः। पृथिव्यादयो देवा ध्रुवा स्थिराणि यानि कर्माण्यकृण्वत। कृतवंतः। पृथिवीं धारयति पर्जन्यो वर्षति सूर्यः प्रकाशयति। तान्येतानि त्वयि संगतानीति पूर्वत्रान्वयः ॥ गृहपतिः। पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वं। त्वे। सुपां सुलुगिति सप्तम्येकवचनस्य शे आदेशः। त्वमावेकवचन इति मपर्यंतस्य त्वादेशः। शेषे लोप इति टिलोपपक्ष उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। अंत्यलोपपक्षे त्वेकादेशस्वरेण। संगतानि। गमेः कर्मणि निष्ठायामेकाचः। पा० ७. २. १०. इतीट्प्रतिषेधः। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। व्रता ध्रुवेत्युभयत्र शेर्लोपः। अकृण्वत। कृवि हिंसाकरणयोश्च। व्यत्ययेनात्मनेपदं। इदित्वान्नुम्। धिन्विकृण्व्योरच्चेत्युप्रत्ययः ॥

॥ इति प्रथमस्य तृतीयेऽष्टमो वर्गः ॥

षष्ठीमृचमाह ॥

त्वे इदग्ने सुभगे यविष्ठ्य विश्वमा हूयते हविः।
स त्वं नो अद्य सुमना उतापरं यक्षि देवान्त्सुवीर्या ॥ ६ ॥
त्वे इति। इत्। अग्ने। सुऽभगे। यविष्ठ्य। विश्वं। आ। हूयते। हविः।
सः। त्वं। नः। अद्य। सुऽमनाः। उत। अपरं। यक्षि। देवान्। सुऽवीर्या ॥ ६ ॥

हे यविष्ठ्य युवतमाग्ने सुभगे सौभाग्ययुक्ते त्वे इत् त्वय्येव विश्वं सर्वं हविराहूयते। सर्वतः प्रक्षिप्यते। स त्वं नोऽस्मान्प्रति सुमनाः शोभनमनस्को भूत्वाद्यास्मिन्दिन उत अपि चापरं श्वः। अपरं श्व इत्यादिकमुत्तरं कालं सर्वस्मिन्नपि काले नैरंतर्येण। सुवीर्या शोभनवीर्योपेतान्देवान्यक्षि। यज॥ सुभगे। शोभनो भगो यस्येति बहुव्रीहावाद्युदात्तत्वं। आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं। यविष्ठ्य। युवशब्दादिष्ठन्। स्थूलदूरेत्यादिना यणादेः परस्य लोपः पूर्वस्य च गुणः। छांदसो यकारोपजनः। यक्षि। बहुलं छंदसीति शपो लुक्। सुवीर्या। शोभनं वीर्यं येषां। वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं। सुपां सुलुगिति विभक्तेराकारः॥

अभिष्टवे सायंकालीन उत्तरस्मिन्पटले तं घेमित्था नमस्विन इत्येषा विनियुक्ता। अथोत्तरमिति खंडे सूचितं। प्रागाथी पूर्वाह्णे काण्वीमपराह्णे। आ॰ ४. ७.। इति। तामेतां सप्तमीमृचमाह॥

तं घेमित्था नमस्विन उप स्वराजमासते।

होत्राभिरग्निं मनुषः समिंधते तितिर्वांसो अति स्रिधः॥ ७॥

तं। घ। ईं। इत्था। नमस्विनः। उप। स्वऽराजं। आसते।

होत्राभिः। अग्निं। मनुषः। सं। इंधते। तितिर्वांसः। अति। स्रिधः॥ ७॥

हे अग्ने नमस्विनोऽन्नयुक्ता नमस्कारयुक्ता वा। नम आयुः सूनृतेत्यन्ननामसु पाठान्नमःशब्दस्यान्नवाचित्वं। तादृशा यजमानाः स्वराजं स्वतो दीप्यमानं तं घें तमेव पूर्वोक्तसर्वगुणविशिष्टं त्वामित्थानेन प्रकारेण हविःप्रदानादिरूपेणोपासते। मनुषो मनुष्या यजमानाः होत्राभिः सप्तभिर्वषट्कर्तृभिः। सप्त होत्राः प्राचीर्वषट्कुर्वंतीति श्रुत्यंतरात्। अग्निं त्वा समिंधते। सम्यक् दीपयंति। कीदृशा मनुष्याः। स्रिधः शत्रून् तितिर्वांसः। अतिशयेन तरंतः॥ नमस्विनः। अस्मायामेधेति मत्वर्थीयो विनिः। स्वराजं। स्वभासा राजत इति स्वराट्। सत्सूद्विषेति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं। आसते। आस उपवेशने। अदादित्वाच्छपो लुक्। तितिर्वांसः। तॄ प्लवनतरणयोः। छंदसि लिडिति वर्तमाने लिट्। तस्य क्वसुश्चेति क्वसुः। वस्वेकाजाद्घसामिति नियमादिडभावः। ऋत इद्धातोरितीत्वं। ऋच्छत्यृतां। पा॰ ७. ४. ११.। इति गुणो हलि च। पा॰ ८. २.

११.। इति दीर्घत्वं च न भवति। संज्ञापूर्वको विधिरनित्य इति तयोरनित्यत्वात् यद्वा तिरतिः प्रकृत्यंतरं द्रष्टव्यं। स्रिधः। स्रिधु शोषणे। क्विप् चेति क्विप् ॥

अष्टमीमृचमाह ॥

घ्नंतो॑ वृ॒त्रम॑तर॒न्रोद॑सी अ॒प उ॒रु क्षया॑य चक्रिरे।
भुव॒त्कण्वे॒ वृषा॑ द्यु॒म्न्याहु॑तः॒ क्रंद॒दश्वो॒ गवि॑ष्टिषु ॥ ८ ॥

घ्नंतः। वृ॒त्रं। अ॒त॒र॒न्। रोद॑सी॒ इति॑। अ॒पः। उ॒रु। क्षया॑य। च॒क्रि॒रे।
भुव॑त्। कण्वे॑। वृषा॑। द्यु॒म्नी। आऽहु॑तः। क्रंद॑त्। अश्वः॑। गोऽइ॑ष्टिषु ॥ ८ ॥

हे अग्ने घ्नंतस्त्वत्सहायेनेतरे देवाः प्रहरंतो वृत्रमतरन्। तीर्णवंतः। तदनंतरं रोदसी द्यावापृथिव्यावपोऽंतरिक्षं च क्षयाय प्राणिनां निवासार्थमुरु विस्तारो यथा भवति तथा चक्रिरे। अपशब्दोऽंतरिक्षवाची। आपः पृथिवीति तन्नामसु पठितत्वात्। भवांस्तु कण्वे कण्वनामके महर्षौ वृषा कामानां वर्षिता। द्युम्नी धनवान्। आहुतः सर्वतो होमयुक्तश्च भुवत्। भवतु। तत्र दृष्टांतः। गविष्टिषु गोविषयेच्छायुक्तेषु संग्रामेष्वश्वः क्रंदत् शब्दं कुर्वन्यथाभीष्टप्रापकस्तथेति शेषः ॥ घ्नंतः। हंतेः शतरि गमहनेत्यादिनोपधालोपः। हो हंतेर्ञ्णिन्नेषु। पा० ७. ३. ५४.। इति घत्वं। अपः। ऊडिदमिति शस उदात्तत्वं। क्षयाय। क्षि निवासगत्योः। क्षियंति निवसंत्यस्मिन्निति क्षयो निवासस्थानं। पुंसि संज्ञायां घः प्रायेणेति घः। क्षयो निवासे। पा० ६. १. २०१.। इत्याद्युदात्तत्वं। भुवत्। भवतेर्लेट्यडागमः। इतश्च लोप इतीकारलोपः। बहुलं छंदसीति शपो लुक्। भूसुवोस्तिङि। पा० ७. ३. ८८.। इति गुणप्रतिषेधः। अडागमस्यानुदात्तत्वे धातुस्वरः। गविष्टिषु। इषु इच्छायां। एषणमिष्टिः। गवामिष्टिर्येषु संग्रामेषु बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। आहुतः। आहूयत इत्याहुतः। हु दानादनयोः। कर्मणि क्तः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। क्रंदत्। कदि क्रदि क्लदि आह्वाने। शतरि नुमभावश्छांदसः। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः ॥

प्रवर्ग्ये महावीरे खरे संसाद्यमाने संसीदस्व महां असीत्येषा स्पृष्ट्वोदकमिति खंडे सूचितं। संसीदस्व महां असीति संसाद्यमाने। आ० ४. ६.। इति। तामेतां सूक्ते नवमीमृचमाह ॥

सं सीदस्व महाँ असि शोचस्व देववीतमः ।
वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतं ॥ ९ ॥
सं । सीदस्व । महान् । असि । शोचस्व । देवऽवीतमः ।
वि । धूमं । अग्ने । अरुषं । मियेध्य । सृज । प्रऽशस्त । दर्शतं ॥ ९ ॥

हे अग्ने संसीदस्व बर्हिषुपविश । महानसि । गुणाधिको भवसि । देववीतमः । अतिशयेन देवान्कामयमानः । शोचस्व । दीप्यस्व । हे मियेध्य मेधार्ह प्रशस्त उत्कृष्टाग्ने । अरुषं गमनशीलं दर्शतं दर्शनीयं धूमं विसृज । विशेषेण संपादय ॥ सीदस्व । षद्लृ विशरणगत्यवसादनेषु । व्यत्ययेनात्मनेपदं । प्रार्थनायां लोटि शपि पाघ्रेत्यादिना सीदादेशः । महान् । संहितायां नकाराकारयोः रुत्वानुनासिकावुक्तौ । शोचस्व । शुच दीप्तौ । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । तिङः परत्वान्निघाताभावः । देववीतमः । वी गतिव्याप्तिप्रजननकांत्यशनखादनेषु । देवान्वेति गच्छतीति देववीः । क्विप् चेति क्विप् । अतिशयेन देववीर्देववीतमः । तमपः पित्त्वादनुदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वं । अरुषं । अरोषणं । रिष रुष हिंसायां । घञर्थे कविधानमिति भावे कप्रत्ययः । नास्ति रुषोऽस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । मियेध्य । छंदसि चेत्यर्हार्थे यप्रत्ययः । मकारात्पर इयागमश्छांदसः । सृज । सृज विसर्गे । तुदादित्वाच्छः । विकरणस्वरः । पादादित्वादनिघातः । दर्शतं । भृमृदृशीत्यादिना दृशेः कर्मण्यतच्प्रत्ययः ॥

दशमीमृचमाह ॥

यं त्वा देवासो मनवे दधुरिह यजिष्ठं हव्यवाहन ।
यं कण्वो मेध्यातिथिर्धनस्पृतं यं वृषा यमुपस्तुतः ॥ १० ॥
यं । त्वा । देवासः । मनवे । दधुः । इह । यजिष्ठं । हव्यऽवाहन ।
यं । कण्वः । मेध्यऽअतिथिः । धनऽस्पृतं । यं । वृषा । यं । उपऽस्तुतः ॥ १० ॥

हे हव्यवाहन हविषो वाहकाग्ने मनवे मनोरनुग्रहाय देवासः सर्वे देवा यजिष्ठमतिशयेन पूज्यं यष्टृतमं वा यं त्वामिह यजनदेशे दधुः । धृतवंतः । मेध्यातिथिर्मेध्यैरतिथिभिर्युक्तः कण्व एतन्नामको महर्षिर्यं त्वां धनस्पृतं धनेन प्रीण-

पितारं कृत्वा दध इति शेषः। तथा वृषेंद्रो यं त्वां दधे। तथोपस्तुतोऽन्योऽपि स्तोता यजमानो यं त्वां दधे। स त्वं संसीदस्वेति पूर्वत्रान्वयः॥ दधुः। लिट्युसि किद्व आतो लोप इटि चेत्याकारलोपः। प्रत्ययस्वरः। यजिष्ठं। यष्टृशब्दात्तुश्छंदसि। पा० ५. ३. ५९.। इत्यगुणवचनादप्यातिशायनिक इष्ठन्। तुरिष्ठेमेयःसु। पा० ६. ४. १५४.। इति तृलोपः। नित्त्वादाद्युदात्तत्वं। हव्यवाहन। हव्यं वहतीति हव्यवाहनः। हव्येऽनंतःपादं। पा० ३. २. ६६.। इति वहतेर्ञ्युट्। मेध्यातिथिः। मेध्या अतिथयो यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। धनस्पृतं। धनैरस्मान्पृणोति प्रीणयतीति धनस्पृत्। स्पृ प्रीतिबलयोः। क्विप् चेति क्विप्। ततस्तुक्। कृदुत्तरपदप्रकृतिस्वरत्वं। उपस्तुतः। क्तिच्क्तौ च संज्ञायामिति कर्तरि क्तः। थाथादिनोत्तरपदांतोदात्तत्वं॥

॥ इति प्रथमस्य तृतीये नवमो वर्गः॥

एकादशीमृचमाह॥

यमग्निं मेध्यातिथिः कण्व ईध ऋतादधि।

तस्य प्रेषो दीदियुस्तमिमा ऋचस्तमग्निं वर्धयामसि॥ ११॥

यं। अग्निं। मेध्यऽअतिथिः। कण्वः। ईधे। ऋतात्। अधि।

तस्य। प्र। इषः। दीदियुः। तं। इमाः। ऋचः। तं। अग्निं। वर्धयामसि॥ ११॥

मेध्यातिथिर्यागयोग्या अतिथय ऋत्विग्रूपा यस्य तादृशः कण्व ऋषिर्ऋतादधि। आदित्यादध्याहृत्य यमग्निमीधे। दीप्तवान्। तस्याग्नेरिषो गमनस्वभावा रश्मयः प्रदीदियुः। प्रकर्षेण दीप्यंते। तथा तमग्निमिमा अस्माभिः प्रयुज्यमाना ऋचो वर्धयंतीति शेषः। वयमपि तमग्निं वर्धयामसि। स्तोत्रैर्वर्धयामः॥ ईधे। इंधिभवतिभ्यां च। पा० १.२.६.। इति लिटः किद्वादनिदितामिति नकारलोपः। द्विर्भावहलादिशेषयोः कृतयोः सवर्णदीर्घः। प्रत्ययस्वरः। यद्वृत्तयोगादनिघातः। इषः। इष गतौ। इष्यंति गच्छंतीतीषो रश्मयः। दीदियुः। दीदतिश्छांदसो धातुर्दीप्तिकर्मा। लिट्युसीयङादेशः। एरनेकाच इति यणादेशाभावश्छांदसः। वर्धयामसि। इदंतो मसिरिति मस इकारागमः॥

द्वादशीमृचमाह ॥

रायस्पूर्धि स्वधावोऽस्ति हि तेऽग्ने देवेष्वाप्यं ।

त्वं वाजस्य श्रुत्यस्य राजसि स नो मृळ महाँ असि ॥ १२ ॥

रायः । पूर्धि । स्वधाऽवः । अस्ति । हि । ते । अग्ने । देवेषु । आप्यं ।

त्वं । वाजस्य । श्रुत्यस्य । राजसि । सः । नः । मृळ । महान् । असि ॥ १२ ॥

हे स्वधावः । अन्नवन्नग्ने । स्वधा अर्क इति तन्नामसु पाठात् । अस्माकं रायो धनानि पूर्धि । पूरय देहि वा । पूर्धि पूरय देहीति यास्कः । हे अग्ने ते तव देवेष्वाप्यं प्रापणीयं सख्यमस्ति हि । विद्यते खलु । त्वं श्रुत्यस्य श्रवणीयस्य वाजस्यान्नस्य राजसि । ईश्वरो भवसि । स त्वं नोऽस्मान्मृळ । सुखय । महान् गुणैरधिकोऽसि ॥ रायः । ऊडिदमिति विभक्तेरुदात्तत्वं । पूर्धि । पॄ पालनपूरणयोः । श्रुशृणुपृकृवृभ्यश्छंदसीति हेर्धिरादेशः । बहुलं छंदसीति शपो लुक् । हेरपित्त्वेन ङित्त्वाद्गुणाभाव उदोष्ठ्यपूर्वस्येत्युत्वं । हलि चेति दीर्घः । स्वधावः । संबुद्धौ मतुवसोरिति रुत्वं । आप्यं । अदुपधत्वाभावेऽपि व्यत्ययेन पोरदुपधात् । पा॰ ३. १. ९८. । इति कर्मणि यत् । यतोऽनाव इत्याद्युदात्तत्वं । यद्वा ण्यति छांदसमाद्युदात्तत्वं । श्रुत्यस्य । श्रु श्रवणे । औणादिकः क्यप् । तुगागमः । यद्वा श्रुतिशब्दाद्भवे छंदसीति यत् । मृळ । मृड सुखने । शस्य ङित्त्वाल्लघूपधगुणाभावः ॥

यूपोच्छ्रयण ऊर्ध्व ऊ षु ण ऊतय इति द्वे पशाविष्टिरिति खंडे सूचितं । ऊर्ध्व ऊ षु ण ऊतय इति द्वे । आ॰ ३. १. । इति ॥ एते एवाभिष्टवेऽपि विनियुक्ते । अथोत्तरमिति खंडे सूचितं । सखे सखायमभ्यावृत्स्वोर्ध्व ऊ षु ण ऊतय इति द्वे । आ॰ ४. ७. । इति । तयोराद्यां सूक्ते त्रयोदशीमृचमाह ॥

ऊर्ध्व ऊ षु णं ऊतये तिष्ठां देवो न सविता ।

ऊर्ध्वो वाजस्य सनिता यदंजिभिर्वाघद्भिर्विह्वयामहे ॥ १३ ॥

ऊर्ध्वः । ऊं इति । सु । नः । ऊतये । तिष्ठ । देवः । नः । सविता ।

ऊर्ध्वः । वाजस्य । सनिता । यत् । अंजिऽभिः । वाघत्ऽभिः । विऽह्वयामहे ॥ १३ ॥

यविष्ठच। स्थूलदूरेत्यादिना यणादिपरस्य लोपः। पूर्वस्य च गुणः। यकारोपजनश्छांदसः ॥

॥ इति प्रथमस्य तृतीये दशमो वर्गः ॥

षोडशीमृचमाह ॥

घनेव विष्वग्वि जह्यराव्णस्तपुर्जंभ यो अस्मध्रुक्।
यो मर्त्यः शिशीते अत्यक्तुभिर्मा नः स रिपुरीशत ॥ १६ ॥

घनाऽइव। विष्वक्। वि। जहि। अराव्णः। तपुःऽजंभ। यः। अस्मऽध्रुक्।
यः। मर्त्यः। शिशीते। अति। अक्तुऽभिः। मा। नः। सः। रिपुः। ईशत ॥ १६ ॥

हे तपुर्जंभ तप्यमानरश्मियुक्ताग्ने। अराव्णोऽस्मभ्यं देयस्य धनस्यादातॄन्वैरिणो विष्वक् सर्वतो विजहि। विशेषेण मारय। तत्र दृष्टांतः। घनेव। यथा कठिनेन दंडपाषाणादिना भांडादिभंगं करोति तद्वत्। योऽन्योऽपि रिपुरस्मध्रुक्। अस्मद्विषयद्रोहकारी भर्त्सनादिना बाधते। यश्चान्यो मर्त्यो मनुष्यः शत्रुरक्तुभिरायुधैरति शिशीते। तनूकरोति। अस्मान्प्रहरतीत्यर्थः। स रिपुर्भर्त्सनप्रहारकारी द्विविधोऽपि शत्रुर्नोऽस्मान्प्रति मेशत। ईश्वरः शक्तो मा भूत् ॥ घनाऽइव। सुपां सुलुगिति तृतीयाया डादेशः। जहि। हंतेर्लोटि हौ हंतेर्जः। पा० ६. ४. ३६.। इति जादेशः। तस्यासिद्धत्वाड्हेर्लुगभावः। तपुर्जंभः। तप संतापे। औणादिकः करण उसिन्प्रत्ययांतस्तपुसशब्दो नित्त्वादाद्युदात्तः। जभि नाशने। जभ्यंते शत्रव एभिरिति जंभान्यायुधानि। करणे घञ्। तपूंष्येव जंभानि यस्यासौ तपुर्जंभः। आमंत्रिताद्युदात्तत्वं। अस्मध्रुक्। द्रुहि जिघांसायां। सत्सूद्विषेत्यादिना क्विप्। वा द्रुहमुहष्णुहष्णिहां। पा० ८. २. ३३.। इति हकारस्य घत्वं। भष्भावः। शिशीते। शो तनूकरणे। व्यत्ययेनात्मनेपदं। बहुलं छंदसीति विकरणस्य श्लुः। आदेच इत्यात्वं। ततो द्विर्वचने बहुलं छंदसि। पा० ७. ४. ७८.। इत्यभ्यासस्येत्वं। ई हल्यघोरितीत्वं। व्यत्ययेनाद्युदात्तत्वं। यद्वृत्तयोगादनिघातः। ईशत। लङि बहुलं छंदसीति शपो लुगभावः। न माङ्योग इत्यडागमाभावः ॥

सप्तदशीमृचमाह ॥

अग्निर्वव्ने सुवीर्यमग्निः कण्वाय सौभगं ।
अग्निः प्रावन्मित्रोत मेध्यातिथिमग्निः साता उपस्तुतं ॥ १७ ॥
अग्निः । वव्ने । सुऽवीर्यं । अग्निः । कण्वाय । सौभगं ।
अग्निः । प्र । आवत् । मित्रा । उत । मेध्यऽअतिथिं । अग्निः । सातौ ।
उपऽस्तुतं ॥ १७ ॥

अग्निर्देवः सुवीर्यं शोभनवीर्योपेतं धनमुद्दिश्य वव्ने । याचितः । सोऽग्निः कण्वाय महर्षये सौभगं शोभनधनादिरूपं भाग्यं प्रायच्छदिति शेषः । तथाग्निर्मित्रास्मन्मित्राणि प्रावत् । प्रकर्षेण रक्षितवान् । उत अपि च मेध्यातिथिं मेधयोग्यैरतिथिभिरुपेतमृषिं प्रावत् । तथोपस्तुतमन्यमपि स्तोतारं यजमानं सातौ धनादिदाननिमित्तं प्रावदिति शेषः ॥ वव्ने । वनु याचने । कर्मणि लिट् । न शसददवादिगुणानां । पा० ६. ४. १२६. । इत्येत्वाभ्यासलोपयोः प्रतिषेधः । उपधालोपश्छांदसः । सौभगं । सुभगान्मंत्र इत्युद्गात्रादिषु पाठात्तस्य भाव इत्येतस्मिन्नर्थेऽञ् । पा० ५. १. १२९. । ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं । मित्रा । शेश्छंदसि बहुलमिति शेर्लोपः । उपस्तुतं । क्तिच्क्तौ च संज्ञायामिति स्तौतेः कर्तरि क्तः । थाथादिनोत्तरपदांतोदात्तत्वं ॥

अष्टादशीमृचमाह ॥

अग्निना तुर्वशं यदुं परावत उग्रादेवं हवामहे ।
अग्निर्नयन्नववास्त्वं बृहद्रथं तुर्वीतिं दस्यवे सहः ॥ १८ ॥
अग्निना । तुर्वशं । यदुं । पराऽवतः । उग्रऽदेवं । हवामहे ।
अग्निः । नयत् । नवऽवास्त्वं । बृहत्ऽरथं । तुर्वीतिं । दस्यवे । सहः ॥ १८ ॥

अग्निना सहावस्थितान्तुर्वशनामकं यदुनामकमुग्रादेवनामकं च राजर्षीन्परावतो दूरदेशाद्धवामहे । आह्वयामः । स चाग्निर्नववास्त्वनामकं बृहद्रथनामकं तुर्वीतिनामकं च राजर्षीन्नयत् । इहानयतु । कीदृशोऽग्निः । दस्यवे सहः । अस्मदुपद्रवहेतोश्चोरस्याभिभविता ॥ नयत् । णीञ् प्रापणे । लेट्यडागमः । इतश्च लोप इतीकारलोपः । नववास्त्वं । नवं वास्तु यस्यासौ नववास्तुः ।

वा छंदसीत्यनुवृत्तेरमि पूर्वत्वाभावे यणादेशः। बृहद्रथं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

एकोनविंशीमृचमाह ॥

नि त्वाम॑ग्ने मनु॑र्दधे ज्योति॒र्जना॑य शश्व॑ते ।
दी॒देथ॒ कण्व॑ ऋ॒तजा॑त उक्षि॒तो यं न॑म॒स्यंति॑ कृ॒ष्टयः॑ ॥ १९ ॥

नि । त्वां । अ॒ग्ने॒ । मनुः॑ । द॒धे॒ । ज्योतिः॑ । जना॑य । शश्व॑ते ।
दी॒देथ॑ । कण्वे॑ । ऋ॒तऽजा॑तः । उ॒क्षि॒तः । यं । न॒म॒स्यंति॑ । कृ॒ष्टयः॑ ॥ १९ ॥

हे अग्ने ज्योतिः प्रकाशरूपं त्वां शश्वते बहुविधाय जनाय मनुः प्रजापतिर्निदधे। देवयजनदेशे स्थापितवान्। हे अग्ने त्वमृतजात ऋतेन यज्ञेन निमित्तभूतेनोत्पन्न उक्षितो हविर्भिस्तर्पितः सन् कण्व एतन्नामके महर्षौ दीदेथ। दीप्तवानसि। यमग्निं कृष्टयो मनुष्याः। कृष्टयश्चर्षणय इति मनुष्यनामसु पठितत्वात्। नमस्यंति। नमस्कुर्वंति। स त्वमिति पूर्वत्रान्वयः ॥ दीदेथ। दीदतिश्छांदसो दीप्तिकर्मा। थलि द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति द्विर्वचनाभावः। अनित्यमागमशासनमिति वचनादिडभावः। लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं। ऋतजातः। ऋतेन जन्यत इत्यृतजातः। श्वीदितो निष्ठायामितीट्प्रतिषेधः। जनसनेत्यादिनात्वं। तृतीयापूर्वपदप्रकृतिस्वरत्वं। नमस्यंति। नमोवरिव इति पूजार्थे क्यच्। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे क्यजंतधातुस्वरः। कृष्टयः। कृष विलेखने। क्तिच्क्तौ च संज्ञायामिति क्तिच् ॥

विंशीमृचमाह ॥

त्वे॒षासो॑ अ॒ग्नेरम॑वंतो अ॒र्चयो॑ भी॒मासो॒ न प्रती॑तये ।
र॒क्ष॒स्विनः॒ सद॒मिद्या॑तु॒माव॑तो॒ विश्वं॒ सम॒त्रिणं॑ दह ॥ २० ॥

त्वे॒षासः॑ । अ॒ग्नेः । अम॑ऽवंतः । अ॒र्चयः॑ । भी॒मासः॑ । न । प्रति॑ऽइतये ।
र॒क्ष॒स्विनः॑ । सदं॑ । इत् । या॒तु॒ऽमाव॑तः । विश्वं॑ । सं । अ॒त्रिणं॑ । द॒ह ॥ २० ॥

अग्नेरर्चयो ज्वालास्त्वेषासो दीप्ता अमवंतो बलवंतो भीमासो भयंकराः। अतः प्रतीतयेऽस्माभिः प्रत्येतुं न शक्या इति शेषः। हे अग्ने रक्षस्विनो बलवतो यातुमावतो यातुधानानसुरान् सदमित् सर्वदेव संदह। सम्यग्भस्मीकुरु।

तथा विश्वं सर्वमत्रिणं भक्षकमसद्बाधकं शत्रुं संदह ॥ त्वेषासः । त्विष दीप्तौ । पचाद्यच् । चित इत्यंतोदात्तत्वं । अमवंतः । अम रोगे । अमति शत्रूनुजतीत्यमो बलं । पचाद्यच् । वृषादित्वादाद्युदात्तत्वं । तदेषामस्तीत्यमवंतः । प्रतीतये । तादौ च निती ति गतेः प्रकृतिस्वरत्वं । रक्षस्विनः । रक्षंत्यनेनेति रक्षो बलं । करणेऽसुन् । अस्मायामेधेति मत्वर्थीयो विनिः । यातुमावतः । यातवो यातनाः । तान्मिमते निर्मिमत इति राक्षसव्यापारा यातुमाः । आतोऽनुपसर्गे क इति कः । तदेषामस्तीति मतुप् । मतौ बह्वचोऽनजिरादीनां । पा० ६. ३. ११९. । इति दीर्घत्वं । संज्ञायां । पा० ८. २. ११. । इति वत्वं । मतुपः पित्त्वादनुदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वं । अत्रिणं । अदेस्त्रिनिश्चेति कर्तरि त्रिनिप्रत्ययः ॥

॥ इति प्रथमस्य तृतीय एकादशो वर्गः ॥

क्रीळं व इति द्वितीयं सूक्तं पंचदशर्चं । अत्रेयमनुक्रमणिका । क्रीळं पंचोना मारुतं हि गायत्रं त्विति । ऋषिश्चान्यस्मादृषेरवाविशिष्ट इति परिभाषया घोरपुत्रः कण्व ऋषिः । इदमुत्तरं च गायत्रीछंदस्के । इदमादिसूक्तत्रयं मरुद्देवताकं । तुहिहवेति परिभाषितत्वात् ॥ व्यूळ्हे द्वितीये छंदोम आग्निमारुतशस्त्र एतत्सूक्तं निविद्धानीयं । द्वितीयस्याग्निं वो देव इति खंडे सूत्रितं । क्रीळं वः शर्धोऽग्ने मृळेत्याग्निमारुतं । आ० ८. १०. । इति ॥ ब्राह्मणं च क्रीळं वः शर्धो मारुतमिति मरुद्भ्यः क्रीडिभ्यः पुरोडाशं सप्तकपालमित्यस्यामिष्टौ क्रीळं व इत्येषा प्रधानस्यानुवाक्या । तथा तत इति खंडे सूत्रितं । क्रीळं वः शर्धो मारुतमत्यासो न ये मरुतः स्वंचः । आ० २. १८. । इति ॥ तामेतां सूक्ते प्रथमामृचमाह ॥

क्रीळं वः शर्धो मारुतमनर्वाणं रथेशुभं । कण्वा अभि प्र गायत ॥ १ ॥

क्रीळं । वः । शर्धः । मारुतं । अनर्वाणं । रथेऽशुभं । कण्वाः । अभि । प्र । गायत ॥ १ ॥

हे कण्वाः कण्वगोत्रोत्पन्ना महर्षयः । यद्वा मेधाविन ऋत्विजः । वो युष्मदर्थं मारुतं मरुत्समूहरूपं शर्धो बलमभिप्रगायत । अभितः प्रकर्षेण स्तुध्वं । कीदृशं शर्धः । क्रीळं । विहरणशीलं । अनर्वाणं । भ्रातृव्यरहितं । अत एव श्रुत्यंतरब्राह्मणेन मंत्रांतरमेव व्याख्यातं । अनर्वा प्रेहीत्याह । भ्रातृव्यो वा अर्वेति । रथेशुभं । स्वकीये रथेऽवस्थाय शोभमानं ॥ क्रीळं । क्रीडृ विहारे । पचाद्यच् । शर्धः । शृधु प्रसहने । शर्धयत्यनेन शत्रूनिति शर्धो बलं । असुन् । नित्त्वा-

दाद्युदात्तत्वं । मारुतं । मरुतां संबंधि । तस्येदमित्यण् । व्यत्ययेनाद्युदात्तत्वं । यद्वा समूहार्थेऽनुदात्तादेरञ् । पा० ४. २. ४४. । इत्यनुदात्तादिलक्षणोऽञ्प्रत्ययः । अनर्वाणं । व्यत्ययेन पुंलिंगता । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । रथेशुभं । शुभ दीप्तौ । रथे शोभत इति रथेशुप् । क्विप् चेति क्विप् । तत्पुरुषे कृति बहुलमित्यलुक् । कृदुत्तरपदप्रकृतिस्वरत्वं । गायत । कै गै शब्दे । तिङ्ङतिङ इति निघातः ॥

द्वितीयामृचमाह ॥

ये पृषतीभिर्ऋष्टिभिः साकं वाशीभिरंजिभिः । अजायंत स्वभानवः ॥ २ ॥

ये । पृषतीभिः । ऋष्टिऽभिः । साकं । वाशीभिः । अंजिऽभिः । अजायंत । स्वऽभानवः ॥ २ ॥

ये मरुतः पृषत्यादिभिः साकं स्वभानवः स्वकीयदीप्तियुक्ता अजायंत इति संपन्नाः । पृषत्यो विंदुयुक्ता मृग्यो मरुद्वाहनभूताः । पृषत्यो मरुतामिति निघंटावुक्तत्वात् । ऋष्टय आयुधानि । वाश्यः शब्दविशेषाः । परकीयसेनाभीतिहेतवः । वाशी वाणीति वाङ्नामसु पठितत्वात् । अंजयोऽलंकरणानि । तान् स्तुम इति शेषः ॥ अजायंत । जनी प्रादुर्भावे । श्यनि ज्ञाजनोर्जा । पा० ७. ३. ७९. । इति जादेशः । अडागम उदात्तः । स्वभानवः । स्वकीया भानवो येषां । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

तृतीयामृचमाह ॥

इहेव शृण्व एषां कशा हस्तेषु यद्वदान् । नि यामञ्चित्रमृंजते ॥ ३ ॥

इहऽइव । शृण्वे । एषां । कशाः । हस्तेषु । यत् । वदान् । नि । यामन् । चित्रं । ऋंजते ॥ ३ ॥

एषां मरुतां हस्तेषु स्थिताः कशाः स्वस्ववाहनताडनहेतवो यद्वदान् । यद्वदंति । यं ध्वनिं कुर्वंति तं ध्वनिमिहेवात्रैव स्थित्वा शृण्वे । शृणोमि । स ध्वनिविशेषो यामन् संग्रामे चित्रं विविधं शौर्यं न्यृंजते । नितरामलंकरोति ॥ ऋंजतिः प्रसाधनकर्मेति यास्कः । नि० ६. २१. । शृण्वे । श्रु श्रवणे । व्यत्ययेनात्मनेपदं । श्रुवः शृ चेति शृ । हुश्नुवोः सार्वधातुक इति यणादेशः । वदान् । वद व्यक्तायां वाचि । लेट्याडागमः । इतश्च लोप इतीकारलोपे संयोगांतलोपः । आगमानुदात्तत्वे

धातुस्वरः शिष्यते । यद्वृत्तयोगादनिघातः । यामन् । सुपां सुलुगिति सप्तम्या लुक् । न ङिसंबुद्ध्योः । पा० ८.२.८. । इति नलोपप्रतिषेधः । ऋंजते । ऋजि भृजी भर्जने । अत्र प्रसाधनार्थः ॥

चतुर्थीमृचमाह ॥

प्र वः शर्धाय घृष्वये त्वेषद्युम्नाय शुष्मिणे । देवत्तं ब्रह्म गायत ॥ ४ ॥

प्र । वः । शर्धाय । घृष्वये । त्वेषऽद्युम्नाय । शुष्मिणे । देवत्तं । ब्रह्म । गायत ॥ ४ ॥

हे ऋत्विजः । वो युष्माकं संबंधिने* शर्धाय प्रसहनशीलाय घृष्वये शत्रुघर्षणयुक्ताय त्वेषद्युम्नाय दीप्यमानयशसे । द्युम्नं द्योततेर्यशो वान्नं वेति यास्कः । नि० ५.५. । शुष्मिणे बलवते । शुष्मं शुष्णमिति बलनामसु पाठात् । एवंभूताय मरुद्गणाय ब्रह्म हविर्लक्षणमन्नमुद्दिश्य प्रगायत । स्तुध्वं । कीदृशं ब्रह्म । देवत्तं । देवैर्दत्तं । देवतानुग्रहाल्लब्धं ॥ शर्धाय । शृधु प्रसहने । शर्धयत्यभिभवतीति शर्धो बलं । पचाद्यच् । वृषादित्वादाद्युदात्तत्वं । घृष्वये । घृष संघर्षे । कृविघृष्वीत्यादिना । उ० ४. ५७. । क्विन्प्रत्ययांतो निपातितः । त्वेषद्युम्नाय । त्विष दीप्तौ । पचाद्यच् । त्वेषं दीप्तं द्युम्नं यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । देवत्तं । देवैर्दत्तं । छांदसो वर्णलोपः । उक्तं च । द्वौ चापरौ वर्णविकारनाशाविति । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं ॥

पंचमीमृचमाह ॥

प्र शंसा गोष्वघ्न्यं क्रीळं यच्छर्धो मारुतं । जंभे रसस्य वावृधे ॥ ५ ॥

प्र । शंस । गोषु । अघ्न्यं । क्रीळं । यत् । शर्धः । मारुतं । जंभे । रसस्य । ववृधे ॥ ५ ॥

गोषु मरुन्मातृभूतपृश्निप्रभृतिषु धेनुष्ववस्थितं । पृश्न्यै वै पयसो मरुतो जाता इति श्रुत्यंतरात् । अघ्न्यमहंतव्यं क्रीळं विहारोपेतं मारुतं मरुत्संबंधि शर्धः प्रसहनशीलं तेजो यदस्ति तत्प्रशंसा । हे ऋत्विक्समूह स्तुहि । रसस्य गोक्षीररूपस्य संबंधि तत्तेजो जंभे मुख उदरे वा वावृधे । वृद्धमभूत् ॥ शंस । शंसु स्तुतौ । द्व्यचोऽतस्तिङ इति संहितायां दीर्घः । गोषु । सावेकाच इति प्राप्तस्य विभक्त्युदात्तस्य न गोश्वन्साववर्णेति प्रतिषेधः । अघ्न्यं । हनो हननं । घञर्थे कविधानं । पा० ३. ३. ५८. ४. । इति कः । गमहनेत्यादिनोपधालोपः । हो हंतेः । पा० ७. ३. ५४. । इति घत्वं । तदर्हतीति घ्नं । छंदसि चेति यः । न घ्न्यमघ्न्यं ।

अव्ययपूर्वपदप्रकृतिस्वरत्वं । क्रीलादयो गताः । जंभे । जभि नाशने । जंभ्यते भक्ष्यतेऽनेनेति जंभमास्यं । करणे घञ् । वावृधे । वृधु वृद्धौ । लिट् । छांदसं संहितायामभ्यासदीर्घत्वं ॥

॥ इति प्रथमस्य तृतीये द्वादशो वर्गः ॥

षष्ठीमृचमाह ॥

को वो वर्षिष्ठ आ नरो दिवश्च ग्मश्च धूतयः । यत्सीमंतं न धूनुथ ॥ ६ ॥

कः । वः । वर्षिष्ठः । आ । नरः । दिवः । च । ग्मः । च । धूतयः । यत् । सीं । अंतं । न । धूनुथ ॥ ६ ॥

दिवश्च द्युलोकस्यापि ग्मश्च भूलोकस्यापि । गौः ग्मेति भूनामसु पठितत्वात् । धूतयः कंपनकारिणो हे नरो नेतारो मरुतः । वो युष्माकं मध्य आ समंताद्वर्षिष्ठो वृद्धतमः कः । यद्यस्मात्कारणात्सी सर्वतोऽतं न वृक्षाग्रमिव धूनुथ । चालयथ । तस्मात्कारणात्कंपयितॄणां युष्माकं मध्ये कः प्रबल इति प्रश्नः ॥ वर्षिष्ठः । वृद्धशब्दादिष्ठनि प्रियस्थिरेत्यादिना वर्षादेशः । नित्त्वादाद्युदात्तः । ग्मः । ग्माशब्दात् षष्ठ्येकवचन आतो धातोरित्यत्र । पा० ६. ४. १४०. । आत इति योगविभागः कर्तव्य इत्युक्तत्वादाकारलोपः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं । धूतयः । धूञ् कंपने । क्तिच्क्तौ च संज्ञायामिति क्तिच् । तितुत्रेत्यादिनेट्प्रतिषेधः । आमंत्रितस्य चेति सर्वानुदात्तत्वं । धूनुथ । स्वादिभ्यः श्नुः । सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वचनात्सति शिष्टोऽपि विकरणस्वरो लसार्वधातुकस्वरं न बाधते । अतस्तिङ एव स्वरः । यद्वृत्तयोगादनिघातः ॥

सप्तमीमृचमाह ॥

नि वो यामाय मानुषो दध्र उग्राय मन्यवे । जिहीत पर्वतो गिरिः ॥ ७ ॥

नि । वः । यामाय । मानुषः । दध्रे । उग्राय । मन्यवे । जिहीत । पर्वतः । गिरिः ॥ ७ ॥

हे मरुतः । वो युष्माकं यामाय गमनार्थं मानुषो गृहस्वामी कश्चिन्मनुजो निदध्रे । गृहदार्ढ्यार्थं दृढं स्तंभं निक्षिप्तवान् । भवदीयगमनेन चालितं गृहं पतिष्यतीति भीत्या तन्निवारणाय दृढस्तंभप्रक्षेपः । कीदृशाय यामाय । उग्राय । तीव्राय । मन्यवे । चालनार्थमभिमन्यमानाय । युज्यते हि भवद्गमनाद्भीतिः ।

यतो भवत्या चालितः पर्वतो बहुविधपर्वयुक्तो गिरिः शिखरी जिहीत । गच्छेत् ॥ मानुषः । मनोर्जातावञ्यतौ षुक् च । पा॰ ४. १. १६१. । इति मनुशब्दादपत्यार्थेऽञ् । षुगागमश्च । ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं । दध्रे । धृञ् अवस्थान इत्यस्य लिटि किञ्वाद्गुणाभावे सति यणादेशः । प्रत्ययस्वरः । पादादित्वान्न निघातः । जिहीत । ओहाङ् गतौ । लिङि जुहोत्यादित्वाच्छपः श्लुः । भृञामित् । पा॰ ७. ४. ७६. । इत्यभ्यासस्येत्वं । श्नाभ्यस्तयोरात इत्याकारलोपे प्राप्ते ई हल्यघोरितीत्वं । पर्ववान् पर्वतः । मत्वर्थीयस्तप्प्रत्ययः ॥

अष्टमीमृचमाह ॥

येषामज्मेषु पृथिवी जुजुर्वाँ इव विश्पतिः । भिया यामेषु रेजते ॥ ८ ॥

येषां । अज्मेषु । पृथिवी । जुजुर्वान्ऽइव । विश्पतिः । भिया । यामेषु । रेजते ॥ ८ ॥

हे मरुतः । येषां युष्माकं यामेषु गमनेष्वज्मेषु क्षेपकेषु सत्सु पृथिवी भूमिः रेजते । कंपते । तत्र दृष्टांतः । जुजुर्वा इव विश्पतिः । यथा वयोहानिरोगादिना जीर्णः प्रजापालको राजा वैरिभयात्कंपते तद्वत् ॥ अज्मेषु । अज गतिक्षेपणयोः । बहुलग्रहणादौणादिको मन् । अजेर्व्यघञपोः । पा॰ २. ४. ५६. । इति वीभावो न भवति । वलादावार्धधातुके विकल्पयिष्यते । पा॰ २. ४. ५६. २. । इति वचनात् । नित्त्वादाद्युदात्तत्वं । जुजुर्वान् । जृष् वयोहानौ । लिटः क्वसुः । बहुलं छंदसि । पा॰ ७. १. १०३. । इत्युत्वं । अभ्यासहलादिशेषौ । वस्वेकाजाद्घसामिति नियमादिडागमाभावः । ऋच्छत्यृतां । पा॰ ७. ४. ११. । इति गुणो हलि चेति दीर्घत्वं च संज्ञापूर्वको विधिरनित्य इति वचनान्न भवति । विशां पतिर्विश्पतिः । पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरे प्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । भिया । सावेकाच इति विभक्तेरुदात्तत्वं । यामेषु । यम उपरमे । भावे घञ् । कर्षात्वतो घञ इत्यंतोदात्तत्वे प्राप्ते वृषादिषु पाठादाद्युदात्तत्वं । रेजते । रेजृ कंपने । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । यद्वृत्तयोगादनिघातः ॥

नवमीमृचमाह ॥

स्थिरं हि जानमेषां वयो मातुर्निरेतवे । यत्सीमनु द्विता शवः ॥ ९ ॥

स्थिरं । हि । जानं । एषां । वयः । मातुः । निःऽएतवे । यत् । सीं । अनु । द्विता । शवः ॥ ९ ॥

एषां मरुतां जानं जन्मस्थानमाकाशं स्थिरं हि। चलनरहितं खलु। मातुर्मरुतां जननीस्थानीयादाकाशाद्वयः पक्षिणो निरेतवे निर्गंतुं समर्था भवंतीति शेषः। तादृशादाकाशाद्भवज्जन्मेति मरुतां स्तुतिः। यद्यस्मात्कारणाद्वो भवदीयं बलमनुक्रमेण सीं सर्वतो द्विता द्वित्वेन द्यावापृथिव्योर्विभज्य वर्तते। अतो भवदीयं जानं स्थिरं हीति पूर्वेणान्वयः॥ जानं। जन्यतेऽस्मिन्निति जानमंतरिक्षं। अधिकरणे घञ्। एषां। इदमोऽन्वादेश इत्यशादेशोऽनुदात्तः। विभक्तिश्च सुप्त्वादनुदात्तः। न चोडिदमित्यादिना विभक्त्युदात्तत्वं। अंतोदात्तादिदंशब्दात्तस्य विधानात्। निरेतवे। इण् गतौ। तुमर्थे सेसेन्निति तवेन्प्रत्ययः। तादौ चेति गतेः प्रकृतिस्वरत्वं॥

दशमीमृचमाह॥

उदु त्ये सूनवो गिरः काष्ठा अज्मेष्वत्नत। वाश्रा अभिज्ञु यातवे॥ १०॥

उत्। ऊं इति। त्ये। सूनवः। गिरः। काष्ठाः। अज्मेषु। अत्नत। वाश्राः। अभिऽज्ञु। यातवे॥ १०॥

त्ये पूर्वप्रकृता गिरः सूनवो वाच उत्पादका मरुतः। वायवो हि ताल्वोष्ठादिषु संचरंतो वाचमुत्पादयंति। अज्मेषु स्वकीयेषु गमनेषु सत्सु काष्ठा अपः। आपोऽपि काष्ठा उच्यंते क्रांत्वा स्थिता भवंति। नि॰ २. १५.। इति यास्कः। उदु उत्कर्षेणैवात्नत। अतनिषत। विस्तारितवंतः। उदकं विस्तार्य तत्पानार्थं वाश्रा हंभारवोपेता गा अभिज्ञु। जान्वाभिमुख्यं यथा भवति तथा यातवे गंतुं प्रेरितवंत इति शेषः॥ सूनवः। षू प्रेरणे। सुवः कित्। उ॰ ३. ३५.। इति नुप्रत्ययः। कित्त्वाद्गुणाभावः। अत्नत। तनु विस्तारे। झस्यादादेशे बहुलं छंदसीति विकरणस्य लुक्। तनिपत्योश्छंदसि। पा॰ ६. ४. ९९.। इत्युपधालोपः। अडागमः। अभिज्ञु। अभिगते जानुनी यस्य तदभिज्ञु। प्रसंभ्यां जानुनो ज्ञुः। पा॰ ५. ४. १२९.। इति व्यत्ययेनाभिपूर्वस्यापि जानुशब्दस्य ज्ञुशब्दादेशः समासांतः। यातवे। तुमर्थे सेसेन्निति तवेन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं॥

॥ इति प्रथमस्य तृतीये त्रयोदशो वर्गः॥

एकादशीमृचमाह ॥

त्यं चिद्घा दीर्घं पृथुं मिहो नपातममृध्रं । प्र च्यावयंति यामभिः ॥ ११ ॥

त्यं । चित् । घ । दीर्घं । पृथुं । मिहः । नपातं । अमृध्रं । प्र । च्यवयंति । यामऽभिः ॥ ११ ॥

त्यं चिद्घ प्रसिद्धो यो मेघस्तमपि मेघं यामभिः स्वकीयगमनैः प्रच्यावयंति । मरुतः प्रकर्षेण गमयंति । कीदृशं । दीर्घं । आयामोपेतं । पृथुं । तिर्यग्विस्तृतं । मिहो नपातं । सेचनीयस्य जलस्य न पातयितारं । वृष्टिमकुर्वंतमित्यर्थः । अमृध्रं । केनाप्यहिंस्यं ॥ घ । ऋचि तुनुघेत्यादिना दीर्घः । मिहः । मिह सेचने । मेहति सिंचतीति मिट् वृष्टिः । क्विप् चेति क्विप् । सावेकाच इति विभक्तेरुदात्तत्वं । नपातं । न पातयतीति नपात् । नभ्राण्नपादित्यादिना नञः प्रकृतिभावः । अव्ययपूर्वपदप्रकृतिस्वरत्वं । अमृध्रं । मृधु मृधु उंदने । मर्धत्युदकेनोनत्तीति मृध्रः । बहुलवचनादौणादिको रक्प्रत्ययः । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं । यद्वा संग्रामवाचिना मृधशब्देन हिंसा लक्ष्यते । मत्वर्थीयो रः । पूर्ववत्स्वरसमासौ । च्यावयंति । च्युङ् गतौ । णिचि वृद्ध्यावादेशौ । पदकाले ह्रस्वश्छांदसः ॥

द्वादशीमृचमाह ॥

मरुतो यद्ध वो बलं जनाँ अचुच्यवीतन । गिरीँरचुच्यवीतन ॥ १२ ॥

मरुतः । यत् । ह । वः । बलं । जनान् । अचुच्यवीतन । गिरीन् । अचुच्यवीतन ॥ १२ ॥

हे मरुतः । यद्ध यस्मादेव कारणाद्वो युष्माकं बलमस्ति । अस्मादेव कारणाज्जनान्प्राणिनोऽचुच्यवीतन । स्वस्वव्यापारेषु प्रेरयत । तथा गिरीन्मेघान् अचुच्यवीतन । प्रेरयत ॥ मरुतः । आमंत्रिताद्युदात्तत्वं । अचुच्यवीतन । च्यवतेर्लुङि व्यत्ययेन परस्मैपदं । तप्तनप्तनथनाश्चेति तस्य तनबादेशः । बहुलं छंदसीति शपः श्लुः । बहुलं छंदसि । पा० ७. ३. ९७. । इतीडागमः । गुणावादेशौ । तिङ्ङतिङ इति निघातः । गिरीन् । दीर्घादटि समानपाद इति संहितायां नकारस्य रुत्वं । अत्रानुनासिक इतीकारस्यानुनासिकः ॥

त्रयोदशीमृचमाह ॥

यद्ध यांति मरुतः सं ह ब्रुवतेऽध्वन्ना । शृणोति कश्चिदेषां ॥ १३ ॥

यत् । ह । यांति । मरुतः । सं । ह । ब्रुवते । अध्वन् । आ । शृणोति । कः । चित् । एषां ॥ १३ ॥

यद्ध यदा खलु मरुतो यांति । गच्छंति । तदानीमध्वन्ना मार्गे सर्वतः संब्रुवते ह । संभूय ध्वनिमवश्यं कुर्वंति । एषां मरुतां संबंधिनं शब्दं कश्चित् यः कोऽपि शृणोति ॥ यांति । या प्रापणे । अदादित्वाच्छपो लुक् । झोऽंत इत्यंतादेशस्योपदेशिवद्भावादंतीत्येतदाद्युदात्तत्वं । धातुना सहैकादेश एकादेशस्वरः । यद्वृत्तयोगादनिघातः । ब्रुवते । ब्रूञ् व्यक्तायां वाचि । झस्यादादेशे कृते परत्वात्प्राप्तस्य गुणस्य ङित्त्वेन बाधितत्वादुवङादेशः । अध्वन् । सुपां सुलुगिति सप्तम्या लुक् । शृणोति । तिपः पित्त्वादनुदात्तत्वे विकरणस्वरः ॥

चतुर्दशीमृचमाह ॥

प्र यात शीभमाशुभिः संति कण्वेषु वो दुवः । तत्रो षु मादयाध्वै ॥ १४ ॥

प्र । यात । शीभं । आशुऽभिः । संति । कण्वेषु । वः । दुवः । तत्रो इति । सु । मादयाध्वै ॥ १४ ॥

हे मरुतः । आशुभिर्वेगवद्भिः स्वकीयैर्वाहनैः शीभं शीघ्रं । शीभं तृषु तूयमिति क्षिप्रनामसु पाठात् । प्रयात । प्रकर्षेण कर्मभूमिं गच्छत । कण्वेषु मेधाविष्वनुष्ठातृषु वो युष्माकं दुवो दुवांसि परिचरणानि संति । तत्रो षु तेष्वेव परिचारकेषु कण्वेषु मादयाध्वै । तृप्ता भवत ॥ आशुभिः । अशू व्याप्तौ । कृवापाजीत्यादिना उण् । प्रत्ययस्वरः । संति । श्नसोरल्लोप इत्यकारलोपः । मादयाध्वै । मद तृप्तियोगे । चुरादिः । आकुस्मीय आत्मनेपदी । लेट्याडागमः । टेरेत्वं । वैतोऽन्यत्र । पा० ३. ४. ९६. । इत्यैकारस्यैकारादेशः ॥

पंचदशीमृचमाह ॥

अस्ति हि ष्मा मदाय वः स्मसि ष्मा वयमेषां । विश्वं चिदायुर्जीवसे ॥ १५ ॥

अस्ति । हि । स्म । मदाय । वः । स्मसि । स्म । वयं । एषां । विश्वं । चित् । आयुः । जीवसे ॥ १५ ॥

हे मरुतः। वो युष्माकं मदाय तृप्तयेऽस्ति हि ष्मा। अस्माभिः प्रयुज्यमानं हविर्वो विद्यते खलु। एषां युष्माकं भृत्यभूता वयं स्मसि ष्मा। विद्यामहे खलु। जीवसे जीवितुं विश्वं चिदायुः सर्वमप्यायुः प्रयच्छतेति शेषः॥ ष्मा। निपातस्य चेति संहितायां दीर्घः। स्मसि। इदंतो मसिः। जीवसे। तुमर्थे सेसेन्नित्यसेप्रत्ययः॥

॥ इति प्रथमस्य तृतीये चतुर्दशो वर्गः॥

कद्ध नूनमिति पंचदशर्चं तृतीयं सूक्तं। घोरपुत्रः कण्व ऋषिः। ऋषिश्चान्यस्मादिति परिभाषितत्वात्। पूर्वसूक्ते मारुतं हीत्युक्तत्वादिदमपि मरुद्देवताकं। गायत्रं त्वित्युक्तत्वादिदमपि गायत्रीछंदस्कं। कद्धेत्यनुक्रमणिका। विनियोगो लैंगिकः॥ तत्र प्रथमामृचमाह॥

कद्ध नूनं कधप्रियः पिता पुत्रं न हस्तयोः। दधिध्वे वृक्तबर्हिषः॥१॥

कत्। ह। नूनं। कधऽप्रियः। पिता। पुत्रं। न। हस्तयोः। दधिध्वे। वृक्तऽबर्हिषः॥१॥

हे मरुतः। कद्ध कदा खलु नूनमवश्यं हस्तयोर्दधिध्वे। यूयमस्मान्हस्ते धारयथ। तत्र दृष्टांतः। पिता पुत्रं न हस्तयोः। यथा लोके पिता हस्तयोः स्वकीयं पुत्रं धारयति तद्वत्। कीदृशा मरुतः। कधप्रियः। स्तुतिप्रीताः। वृक्तबर्हिषः। वृक्तं छिन्नं बर्हिर्दर्भा येषां मरुतां यजमानाय ते मरुतस्तथाविधाः॥ कत्। कदा। हौ चापरौ वर्णविकारनाशावित्युक्तत्वादाकारलोपः। कधप्रियः। कथा स्तुतिः। तया प्रीणंतीति कधप्रियः। प्रीञ् प्रीतौ। क्विप्। पूर्वपदस्य ङ्याप्योः संज्ञाछंदसोर्बहुलं। पा० ६.३.६३.। इति ह्रस्वत्वं। धकारश्छांदसः। आमंत्रितनिघातः। दधिध्वे। दधातेश्छंदसि लुङ्लङ्लिट इति वर्तमाने लिट्। क्रादिनियमादिट्। प्रत्ययस्वरः। वृक्तबर्हिषः। आमंत्रितनिघातः॥

द्वितीयामृचमाह॥

क्व नूनं कद्वो अर्थं गंता दिवो न पृथिव्याः। क्व वो गावो न रण्यंति॥२॥

क्व। नूनं। कत्। वः। अर्थं। गंत। दिवः। न। पृथिव्याः। क्व। वः। गावः। न। रण्यंति॥२॥

हे मरुतः। नूनमिदानीं क्व यूयं। कुत्र स्थिताः। कत् कदा वो युष्माकमर्थ-

मरणं देवयजनदेशे गमनं। विलंबं मा कुरुतेत्यर्थः। दिवो गंता। द्युलोकान्नगच्छत। पृथिव्या न गंता। भूलोकान्मा गच्छत। वो युष्मान् क्व रण्यंति। देवयजनरूपायाः पृथिव्या अन्यत्र कुत्र शब्दयंति। यजमानाः स्तुवंति। तत्र दृष्टांतः। गावो न। यथा गावो रणंति। शब्दयंति तद्वत् ॥ क्व। किंशब्दात्सप्तम्यंतात्किमोऽत् । पा० ५. ३. १२.। इत्यत्प्रत्ययः। क्वाति। पा० ७. २. १०५.। इति किमः क्वादेशः। तित्स्वरित इति स्वरितत्वं। अर्थ। ऋ गतौ। उषिकुषिगार्तिभ्यस्थन्निति भावे थन्। नित्त्वादाद्युदात्तत्वं। गंता। गमेर्लोटि बहुलं छंदसीति शपो लुक्। थादेशस्य तप्तनप्तनथनाश्चेति तबादेशः। अत एव ङित्त्वाभावादनुदात्तोपदेशेत्यादिनानुनासिकलोपो न भवति। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः। द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं। दिवः। ऊडिदमिति विभक्तेरुदात्तत्वं। पृथिव्याः। उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं। रण्यंति। रणतिः शब्दार्थः। व्यत्ययेन श्यन् ॥

तृतीयामृचमाह ॥

क्व वः सुम्ना नव्यांसि मरुतः क्व सुविता। क्वो३विश्वानि सौभगा ॥ ३ ॥

क्व। वः। सुम्ना। नव्यांसि। मरुतः। क्व। सुविता। क्वो३ इति। विश्वानि। सौभगा ॥ ३॥

हे मरुतः। वो युष्माकं संबंधीनि नव्यांसि नवतराणि सुम्ना प्रजापशुरूपाणि धनानि। प्रजा वै पशवः सुम्नमिति श्रुत्यंतरात्। क्व कुत्र वर्तते। तथा सुविता शोभनानि प्राप्यानि मणिमुक्तादीनि भवदीयानि क्व कुत्र वर्तंते। विश्वानि सर्वाणि सौभगा सौभाग्यरूपाणि गजाश्वादीनि क्वो कुत्र वर्तंते। भवदीयैः सुम्नादिभिः सर्वैः सहागंतव्यमित्यर्थः ॥ सुम्ना। शेश्छंदसि बहुलमिति शेर्लोपः। नव्यांसि। नवशब्दादीयसुनीकारलोपश्छांदसः। सुविता। सुष्ठु इतानि सुवितानि। तन्वादीनां छंदसि बहुलमुपसंख्यानं। पा० ६. ४. ७७. १.। इत्युवङादेशः। सौभगा। सुभगान्मंत्र इति तस्य भाव इत्यर्थेऽञ्। पूर्ववच्छेर्लोपः ॥

चतुर्थीमृचमाह ॥

यद्यूयं पृश्निमातरो मर्तासः स्यातन। स्तोता वो अमृतः स्यात् ॥ ४ ॥

यत्। यूयं। पृश्निऽमातरः। मर्तासः। स्यातन। स्तोता। वः। अमृतः। स्यात् ॥ ४॥

हे पृश्निनामकधेनुपुत्रा मरुतः। यूयं यद्यपि मर्तासो मनुष्याः स्यातन। भवेत।

तथापि वो युष्माकं स्तोता यजमानोऽमृतः स्यात्। देवो भवेत् ॥ पृश्निमातरः। पृश्निर्माता येषां ते। समासांतविधेरनित्यत्वान्नद्यृतश्च। पा० ५. ४. १५३.। इति कबभावः। मर्तासः। असिहसीत्यादिना म्रियतेस्तन्प्रत्ययः। आज्जसेरसुक्। स्यातन। अस्तेर्लिङि तस्य तप्तनप्तनथनाश्चेति तनादेशः। यासुट उदात्तत्वं। अमृतः। नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं ॥

पंचमीमृचमाह ॥

मा वो॑ मृ॒गो न यव॑से जरि॒ता भू॒दजो॑ष्यः। प॒था य॒मस्य॑ गा॒दुप॑ ॥ ५ ॥

मा। वः॒। मृ॒गः। न। यव॑से। ज॒रि॒ता। भू॒त्। अजो॑ष्यः। प॒था। य॒मस्य॑। गा॒त्। उप॑ ॥ ५ ॥

हे मरुतः। वो युष्माकं जरिता स्तोताजोष्योऽसेव्यो मा भूत्। तत्र दृष्टांतः। मृगो न यवसे। यथा तृणे भक्षणीये मृगः कदाचिदप्यसेव्यो न भवति किंतु सर्वदा तृणं भक्षयति तद्वत्। किंच स स्तोता यमस्य पथा यमलोकसंबंधिमार्गेण मोपगात्। मा गच्छतु। तस्य मरणं मा भूदित्यर्थः ॥ जरिता। जॄष् वयोहानौ। स्तुतिकर्मेति यास्कः। तृचीडागमः। चित्त्वादंतोदात्तत्वं। भूत्। लुङि गातिस्थेति सिचो लुक्। न माङ्योग इत्यडभावः। अजोष्यः। जुषी प्रीतिसेवनयोः। ऋहलोर्ण्यदिति कर्मणि ण्यत्। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं। पथा। तृतीयैकवचने भस्य टेर्लोपः। पा० ७. १. ८८.। इति टिलोपः। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। गात्। इणो गा लुङीति गादेशः। गातिस्थेति सिचो लुक्। पूर्ववदडभावः ॥

॥ इति प्रथमस्य तृतीये पंचदशो वर्गः ॥

षष्ठीमृचमाह ॥

मो षु णः॒ परा॑परा॒ निर्ऋ॑तिर्दु॒र्हणा॑ वधीत्। प॒दी॒ष्ट तृष्ण॑या स॒ह ॥ ६ ॥

मो इति॑। सु। नः॒। परा॑ऽपरा। निः॒ऽऋ॑तिः। दुः॒ऽहना॑। व॒धी॒त्। प॒दी॒ष्ट। तृष्ण॑या। स॒ह ॥ ६ ॥

हे मरुतः। नोऽस्मान् निर्ऋतिः रक्षोजातिदेवता मो षु वधीत्। सर्वथा वधं मा कार्षीत्। कीदृशी। परापरा। उत्कृष्टादप्युत्कृष्टा। अतिबलेत्यर्थः। अत एव दुर्हणा। केनापि हंतुं दुःशक्या। सा निर्ऋतिस्तृष्णया सह पदीष्ट। पततु।

अस्मदीया तृष्णा बाधिका निर्ऋतिश्च विनश्यत्वित्यर्थः ॥ मो षु णः । सुत्र इति षत्वं । नश्च धातुस्थोरुषुभ्य इति णत्वं । दुर्हणा । ईषद्दुःसुष्वित्यादिना हंतेः कर्मणि खल् । लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं । वधीत् । लुङि हंतेर्लुङि चेति वधादेशः । सिचीडागमः । वधादेशस्यादंतत्वादेकाच उपदेश इतीट्प्रतिषेधो न भवति । अतो लोपे सति तस्य स्थानिवत्त्वादतो हलादेरिति वृद्ध्यभावः । इट ईटि । पा० ८. २. २८. । इति सिचो लोपः । पदीष्ट । पद गतौ । आशीर्लिङि छंदस्युभयथेति सार्वधातुकत्वात्सलोपः । आर्द्धधातुकत्वात्सुडागमः । प्रत्ययस्वरः । तृष्णया । ञितृषा पिपासायां । तृषिशुषिरसिभ्यः किच्चेति नप्रत्ययः । निदित्यनुवृत्तेराद्युदात्तत्वं ॥

सप्तमीमृचमाह ॥

सत्यं त्वेषा अमवंतो धन्वंश्चिदा रुद्रियासः । मिहं कृण्वंत्यवातां ॥ ७ ॥

सत्यं । त्वेषाः । अमऽवंतः । धन्वन् । चित् । आ । रुद्रियासः । मिहं । कृण्वंति । अवातां ॥ ७ ॥

धन्वन् चित् मरुदेशेऽपि रुद्रियासो रुद्रेण पालितत्वात्तदीया मरुत आ सर्वतोऽवातां वायुरहितां मिहं वृष्टिं कुर्वंति । तदेतत्सत्यं । कीदृशा रुद्रियासः । त्वेषाः । दीप्ताः । अमवंतः । बलवंतः । मरुतां रुद्रपालनमाख्यानेषु प्रसिद्धं ॥ धन्वन् । रिवि रवि धवि गत्यर्थाः । इदित्त्वान्नुम् । कनिन्युवृषितक्षीत्यादिना कनिन् । नित्त्वादाद्युदात्तत्वं । सुपां सुलुगिति सप्तम्या लुक् । रुद्रियासः । रुद्रस्येमे रुद्रियाः । तस्येदमित्यर्थे घः । आज्जसेरसुक् । मिहं । मिह सेचने । क्विप् चेति क्विप् । कृण्वंति । कृवि हिंसाकरणयोश्च । धिन्विकृण्व्योरच्चेत्युप्रत्ययः । तत्संनियोगेन वकारस्य चाकारादेशः । अतो लोपेन लुप्तस्य स्थानिवद्भावाल्लघूपधगुणाभावः ॥

कारीर्यां मारुतं सप्तकपालमित्यस्य हविषो वाश्रेव विद्युदित्येषानुवाक्या । वर्षकामेष्टिरिति खंडे सूचितं । वाश्रेव विद्युन्मिमाति पर्वतश्चिन्महिवृद्धो बिभाय । आ० २. १३. । इति ॥ तामेतामष्टमीमृचमाह ॥

वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति । यदेषां वृष्टिरसर्जि ॥ ८ ॥

वाश्राऽइव । विऽद्युत् । मिमाति । वत्सं । न । माता । सिसक्ति । यत् । एषां । वृष्टिः । असर्जि ॥ ८ ॥

वाश्रेव शब्दयुक्ता प्रस्तुतस्तनवती धेनुरिव विद्युन्मेघस्था दृश्यमाना सती मिमाति। शब्दं करोति। विद्युद्वेलायां हि मेघगर्जनं प्रसिद्धं। माता धेनुर्वत्सं न वत्समिव सिषक्ति। इयं विद्युन्मरुतः सेवते। सिषक्तिः सेवनार्थः। सिषक्तु सचत इति सेवमानस्येति यास्कोक्तत्वात्। यद्यस्मात्कारणादेषां मरुतां संबंधिनी वृष्टिरसर्जि। गर्जनसहिते विद्युत्काले वृष्टा भवति। तस्माद्विद्युतो मरुत्सेवनमुपपन्नं ॥ वाश्रेव। वाशृ शब्दे। स्फायितंचीत्यादिना रक्। मिमाति। माङ् माने शब्दे च। व्यत्ययेन परस्मैपदं। जुहोत्यादित्वाच्छ्लुः। भृञामिदित्यभ्यासस्येत्वं। सिषक्ति। सच समवाये। लटि बहुलं छंदसीति शपः श्लुः। बहुलं छंदसीत्यभ्यासस्येत्वं। असर्जि। सृज विसर्गे। कर्मणि लुङ्। चिण् भावकर्मणोः। पा॰ ३. १. ६६.। इति चिण्। चिणो लुक्। पा॰ ६. ४. १०४.। इति तशब्दस्य लुक्। गुणः। अडागम उदात्तः। यद्वृत्तयोगादनिघातः ॥

नवमीमृचमाह ॥

दिवा चित्तमः कृण्वंति पर्जन्येनोदवाहेन। यत्पृथिवीं व्युंदंति ॥ ९ ॥

दिवा। चित्। तमः। कृण्वंति। पर्जन्येन। उदऽवाहेन। यत्। पृथिवीं। विऽउंदंति ॥ ९ ॥

हे मरुतः। उदवाहेनोदकधारिणा पर्जन्येन मेघेन सूर्यमाच्छाद्य दिवा चिदहन्यपि तमः कृण्वंति। अंधकारं कुर्वंति। यद्यदा पृथिवीं भूमिं व्युंदंति। विशेषेण क्लेदयंति। तदानीमेव वृष्टिकाले तमः कुर्वंतीति पूर्वत्रान्वयः ॥ उदवाहेन। उदकानि वहतीत्युदवाहः। कर्मण्यण्। मेघविशेषस्येयं संज्ञा। उदकस्योदः संज्ञायां। पा॰ ६. ३. ५७.। इत्युदकशब्दस्योदभावः। कृदुत्तरपदप्रकृतिस्वरत्वं। व्युंदंति। उंदी क्लेदने। रुधादित्वात् श्नम्। श्नान्नलोप इति नलोपः। यद्वृत्तयोगादनिघातः ॥

दशमीमृचमाह ॥

अध स्वनान्मरुतां विश्वमा सद्म पार्थिवं। अरेजंत प्र मानुषाः ॥ १० ॥

अध। स्वनात्। मरुतां। विश्वं। आ। सद्म। पार्थिवं। अरेजंत। प्र। मानुषाः ॥ १० ॥

मरुतां संबंधिनः स्वनादध ध्वनेर्गर्जनरूपादनंतरं पार्थिवं पृथिवीसंबंधि विश्वं सद्म सर्वं गृहमा समंतादरेजतेति शेषः। तथा मानुषा गृहवर्तिनो मनुष्या अपि

प्रारेजंत । प्रकर्षेण कंपितवंतः ॥ अध । छांदसं धत्वं । सद्म । षद्लृ विशरणगत्यवसादनेषु । अन्येभ्योऽपि दृश्यंत इति मनिन् । पार्थिवं । पृथिव्याः संबंधि । पृथिव्या ञाञौ । पा॰ ४. १. ८५. २. । इति प्राग्दीव्यतीयोऽञ्प्रत्ययः । जित्त्वादाद्युदात्तत्वं । अरेजंत । रेजृ कंपने ॥

॥ इति प्रथमस्य तृतीये षोडशो वर्गः ॥

एकादशीमृचमाह ॥

मरुतो वीळुपाणिभिश्चित्रा रोधस्वतीरनु । यातेमखिद्रयामभिः ॥ ११ ॥

मरुतः । वीळुपाणिऽभिः । चित्राः । रोधस्वतीः । अनु । यात । ईं । अखिद्रयामऽभिः ॥ ११ ॥

हे मरुतः । यूयं वीळुपाणिभिर्दृढहस्तैः सहिताः संतो रोधस्वतीरनु कूलयुक्ता नदीरनुलक्ष्याखिद्रयामभिरच्छिन्नगमनैर्यातं । गच्छतैव ॥ मरुतः । आमंत्रिताद्युदात्तत्वं । वीळुपाणिभिः । वीड्विति बलनाम । वीळु च्यौत्नमिति तन्नामसु पाठात् । तेन च तद्वांल्लक्ष्यते । वीळवश्च ते पाणयश्च । समासस्येत्यंतोदात्तत्वं । रोधस्वतीः । रुधिर् आवरणे । रुणद्धि स्रोत इति रोधः कूलं । कूलं निरुणद्धि स्रोत इत्युक्तत्वात् । असुनो नित्त्वादाद्युदात्तत्वं । तद्युक्ता रोधस्वत्यः । मादुपधाया इति मतुपो वत्वं । उगितश्चेति ङीप् । मतुप्ङीपोः पित्त्वादनुदात्तत्वेऽसुनः स्वर एव शिष्यते । यात । या प्रापणे । अदादित्वाच्छपो लुक् । ईं । चादयोऽनुदात्ता इत्यनुदात्तत्वं । गुण एकादेश उदात्तेनोदात्त इत्युदात्तत्वं । अखिद्रयामभिः । खिद दैन्ये । स्फायितंचीत्यादिना रक् । खिद्रं यांतीति खिद्रयामानः । न खिद्रयामानोऽखिद्रयामानः । तैरखिद्रयामभिः । अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥

द्वादशीमृचमाह ॥

स्थिरा वः संतु नेमयो रथा अश्वास एषां । सुसंस्कृता अभीशवः ॥ १२ ॥

स्थिराः । वः । संतु । नेमयः । रथाः । अश्वासः । एषां । सुऽसंस्कृताः । अभीशवः ॥ १२ ॥

हे मरुतः । एषां वो युष्माकं नेमयो रथचक्रवलयाः स्थिराः संतु । तथा रथा अश्वासोऽश्वाश्च स्थिराः संतु । अभीशवोऽंगुलयः । अभीशवो दीधितय इति तन्नामसु पाठात् । सुसंस्कृता अश्वबंधनरज्जुपरिग्रहणे स्वलंकृताः सावधानाः

संतु ॥ सुसंस्कृताः । संपूर्वात्करोतेः कर्मणि क्तः । संपर्युपेभ्यः । पा॰ ६. १. १३७. । इति सुट् । पुनः सुशब्देन प्रादिसमासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं । अभीशवः । अभिपूर्वादश्नोतेः कृवापाजीत्यादिनोण् । वर्णव्यत्ययेनाकारस्येकारः । उक्तं च । वर्णागमो वर्णविपर्ययश्चेति । अभीशवोऽभ्यश्नुवते कर्माणीति निरुक्तं । नि॰ ३. ९. ॥

त्रयोदशीमृचमाह ॥

अच्छा वदा तना गिरा जरायै ब्रह्मणस्पतिं । अग्निं मित्रं न दर्शतं ॥ १३ ॥

अच्छ । वद । तना । गिरा । जरायै । ब्रह्मणः । पतिं । अग्निं । मित्रं । न । दर्शतं ॥ १३ ॥

हे ऋत्विक्समूह तना तनया देवतास्वरूपं प्रकाशयंत्या गिरा वाचा ब्रह्मणस्पतिं मंत्रस्य हविर्लक्षणस्यान्नस्य वा पालकं मरुद्गणमग्निं दर्शतं दर्शनीयं मित्रं न मित्रमपि जरायै स्तोतुमच्छाभिमुख्येन वद । ब्रूहि ॥ अच्छा । निपातस्य चेति संहितायां दीर्घत्वं । वदा । द्व्यचोऽतस्तिङ इति संहितायां दीर्घः । तना । तनु विस्तारे । तनोति देवतामाहात्म्यं विस्तारयतीति तना । पचाद्यच् । वृषादित्वादाद्युदात्तत्वं । तृतीयाया डादेशः । गिरा । सावेकाच इति विभक्तेरुदात्तत्वं । ब्रह्मणः । षष्ठ्याः पतिपुत्रेति संहितायां सत्वं ॥

चतुर्दशीमृचमाह ॥

मिमीहि श्लोकमास्ये पर्जन्य इव ततनः । गाय गायत्रमुक्थ्यं ॥ १४ ॥

मिमीहि । श्लोकं । आस्ये । पर्जन्यःऽइव । ततनः । गाय । गायत्रं । उक्थ्यं ॥ १४ ॥

हे ऋत्विक्समूह । आस्ये स्वकीयमुखे श्लोकं स्तोत्रं मिमीहि । निर्मितं कुरु । तं च श्लोकं ततनः । विस्तारय । तत्र दृष्टांतः । पर्जन्य इव । यथा मेघो वृष्टिं विस्तारयति तद्वत् । उक्थ्यं शस्त्रयोग्यं गायत्रं गायत्रीछंदस्कं सूक्तं गाय । पठ ॥ मिमीहि । माङ् माने । जौहोत्यादिकः । व्यत्ययेन परस्मैपदं । भृञामिदित्यभ्यासस्येत्वं । आस्ये । असु क्षेपणे । अस्यते क्षिप्यतेऽस्मिन्नित्यास्यं । कृत्यल्युटो बहुलं । पा॰ ३. ३. ११३. । इत्यधिकरणे ण्यत् । तित्स्वरितमिति स्वरितत्वं । ततनः । तनु विस्तारे । लेटि सिपि बहुलं छंदसीति विकरणस्य श्लुः । लेटोऽडाटावित्यडागमः । इतश्च लोप इतीकारलोपः । गायत्रं । गायत्र्याः संबंधि तस्येदमित्यण् । यद्वा गायतस्त्रायत इति गायत्रं । आतोऽनुपसर्गे कः ॥

पंचदशीमृचमाह ॥

वंदस्व मारुतं गणं त्वेषं पनस्युमर्किणं। अस्मे वृद्धा असन्निह ॥ १५ ॥

वंदस्व। मारुतं। गणं। त्वेषं। पनस्युं। अर्किणं। अस्मे इति। वृद्धाः। असन्। इह ॥ १५ ॥

हे ऋत्विक्संघ मारुतं मरुत्संबंधिनं गणं समूहं वंदस्व। नमस्कुरु। स्तुहि वा। कीदृशं गणं। त्वेषं। दीप्तं। पनस्युं। स्तुतियोग्यं। अर्किणं। अर्चनोपेतं। अस्मेऽस्माकमिहास्मिन्कर्मणि वृद्धा असन्। मरुतः प्रवृद्धा भवंतु ॥ वंदस्व। वदि अभिवादनस्तुत्योः। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः। पनस्युं। पन चेति स्तुत्यर्थो धातुः। असुन्। पनः स्तोत्रमात्मन इच्छतीति पनस्युः। सुप आत्मनः क्यच्। क्याच्छंदसीत्युप्रत्ययः। अर्किणं। ऋच स्तुतौ। पुंसि संज्ञायामिति घः। अर्कोऽस्यास्तीत्यर्की। अत इनिठनौ। असन्। बहुलं छंदसीति शपो लुगभावः। इतश्च लोप इतीकारलोपः। तिङ्ङतिङ इति निघातः ॥

॥ इति प्रथमस्य तृतीये सप्तदशो वर्गः ॥

प्र यदित्थेति दशर्चं चतुर्थं सूक्तं। घोरपुत्रस्य कण्वस्यार्षं। मरुद्देवताकं। युजः सतोबृहत्यः। अयुजो बृहत्यः। प्र यद्दश प्रगाथं त्वित्यनुक्रमणिका। गतो विनियोगः ॥ तत्र प्रथमामृचमाह ॥

प्र यदित्था परावतः शोचिर्न मानमस्यथ।
कस्य क्रत्वा मरुतः कस्य वर्पसा कं याथ कं ह धूतयः ॥ १ ॥

प्र। यत्। इत्था। पराऽवतः। शोचिः। न। मानं। अस्यथ।
कस्य। क्रत्वा। मरुतः। कस्य। वर्पसा। कं। याथ। कं। ह। धूतयः ॥ १ ॥

हे धूतयः स्थावरादीनां कंपनकारिणो मरुतः। यद्यदा मानं मननीयं युष्मद्बलं परावतो दूरात्। आरे परावत इति दूरनामसु पाठात्। इत्थास्मादंतरिक्षात्प्रास्यथ। भूमौ प्रक्षिपथ। तत्र दृष्टांतः। शोचिर्न। तेज इव। यथा सूर्यस्य तेजोऽंतरिक्षाद्भूमौ प्रक्षिप्यते तद्वत्। तदानीं यूयं कस्य यजमानस्य क्रत्वा क्रतुना संगच्छध्व इति शेषः। तथा कस्य यजमानस्य वर्पसा स्तोत्रेण संगच्छध्वे। कं यजमानमुद्दिश्य याथ। देवयजनदेशं गच्छथ। कं ह कं खलु

यजमानमनुगृह्णीयेति शेषः ॥ इत्था। था हेतौ च छंदसि। पा० ५.३.२६.। इतीदंशब्दात्प्रकारवचने थाप्रत्ययः। यदि तत्रेदंशब्दस्य नानुवृत्तिस्तर्हि थमुप्रत्ययांतादिदंशब्दादुत्तरस्या विभक्तेर्व्यत्ययेन सुपां सुलुगिति डादेशः। प्रथमपक्षे प्रत्ययस्वरः। द्वितीयपक्षे तूदात्तनिवृत्तिस्वरः। अस्यथ। असु क्षेपणे। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे श्यनो नित्त्वादाद्युदात्तत्वं। यद्वृत्तयोगादनिघातः। क्रत्वा। जसादिषु छंदसि वावचनं। पा० ७.२.१०९.१.। इति नाभावस्य विकल्पितत्वादभावः। वर्पसा। वृङ् संभक्तौ। वृङ्शीङ्भ्यां रूपस्वांगयोः पुट् च। उ० ४.२०२.। इत्यसुन्। तत्संनियोगेन पुगागमश्च। नित्त्वादाद्युदात्तत्वं। अत्र रूपाभिधायिना वर्पस्शब्देन देवतास्वरूपप्रकाशकं स्तोत्रं लक्ष्यते क्रतुना साहचर्यात् ॥

द्वितीयामृचमाह ॥

स्थिरा वः संत्वायुधा पराणुदे वीळू उत प्रतिष्कभे।
युष्माकमस्तु तविषी पनीयसी मा मर्त्यस्य मायिनः ॥ २ ॥
स्थिरा। वः। संतु। आयुधा। पराऽनुदे। वीळु। उत। प्रतिऽस्कभे।
युष्माकं। अस्तु। तविषी। पनीयसी। मा। मर्त्यस्य। मायिनः ॥ २ ॥

हे मरुतः। व आयुधा युष्माकमायुधानि पराणुदे शत्रूणामपनोदनाय स्थिरा संतु। स्थिराणि भवंतु। उत अपि च प्रतिष्कभे शत्रूणां प्रतिबंधाय वीळू संतु। दृढानि संतु। युष्माकं तविषी बलं पनीयसी। अतिशयेन स्तोतव्यं भवतु। मायिनोऽस्मासु छद्मचारिणो मर्त्यस्य मनुष्यस्य शत्रोर्बलं मा भवतु ॥ स्थिरा। आयुधा। उभयत्र शेश्छंदसि बहुलमिति शेर्लोपः। पराणुदे। णुद प्रेरणे। संपदादिलक्षणः क्विप्। उपसर्गादसमासेऽपि। पा० ८.४.१४.। इति णत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं। वीळू। सुपां सुलुगिति विभक्तेर्लुक्। ईषाअक्षादित्वात्प्रकृतिभावः। प्रतिष्कभे। स्कंभु सौत्रो धातुः। संपदादिलक्षणो भावे क्विप्। अनिदितामिति नलोपः। पनीयसी। पनति स्तुत्यर्थः। अस्मादौणादिकः कर्मण्यसुन्। तत ईयसुनि टेरिति टिलोपः। उगितश्चेति ङीप्। ईयसुनो नित्त्वादाद्युदात्तत्वं। मायिनः। मायाशब्दस्य व्रीह्यादिषु पाठात् व्रीह्यादिभ्यश्चेति मत्वर्थीय इनिः ॥

तृतीयामृचमाह ॥

परा ह यत्स्थिरं हथ नरो वर्तयथा गुरु ।
वि याथन वनिनः पृथिव्या व्याशाः पर्वतानां ॥ ३ ॥
परा । ह । यत् । स्थिरं । हथ । नरः । वर्तयथ । गुरु ।
वि । याथन । वनिनः । पृथिव्याः । वि । आशाः । पर्वतानां ॥ ३ ॥

हे नरः । नेतारो मरुतः । यद्यदा स्थिरं वस्तु परा हथ । वृक्षादिकं पराहतं भग्नं कुरुथ । गुरु पाषाणादिकं गुरुत्वोपेतं वर्तयथ । प्रेरयथ । तदानीं पृथिव्याः संबंधिनो वनिनो वनवतो वृक्षान्वियाथन । वियुज्य मध्ये गच्छथ । अरण्यगतानां निविडानां वृक्षाणां मध्ये यस्य कस्यापि वृक्षस्य भग्नत्वादितरवृक्षाणां परस्परवियोगेन प्रौढो मार्गो भवति । तथा पर्वतानामाशाः पर्वतपार्श्वदिशो वियाथन । वियुज्य गच्छथ ॥ हथ । हन हिंसागत्योः । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः । यद्वृत्तयोगादनिघातः । नरः । पादादित्वादामंत्रितनिघाताभावः । वर्तयथा । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे णिचः स्वर एव शिष्यते । यच्छब्दानुषंगान्निघाताभावः । याथन । तप्तनप्तनथनाश्चेति थनादेशः ॥

चतुर्थीमृचमाह ॥

नहि वः शत्रुर्विविदे अधि द्यवि न भूम्यां रिशादसः ।
युष्माकमस्तु तविषी तना युजा रुद्रासो नू चिदाधृषे ॥ ४ ॥
नहि । वः । शत्रुः । विविदे । अधि । द्यवि । न । भूम्यां । रिशादसः ।
युष्माकं । अस्तु । तविषी । तना । युजा । रुद्रासः । नु । चित् । आऽधृषे ॥ ४ ॥

हे रिशादसः शत्रुहिंसका मरुतः । अधि द्यवि द्युलोकस्योपरि वो युष्माकं शत्रुर्नहि विविदे । न च बभूव । तथा भूम्यामपि शत्रुर्न बभूव । हे रुद्रासः । रुद्रपुत्रा मरुतः । युष्माकमेकोनपंचाशत्संख्यानां भवतां युजा योगेन परस्परैकमत्येनाधृषे वैरिणा सर्वतो धर्षणाय तविषी बलं नू चित् क्षिप्रमेव तनास्तु । विस्तृता भवतु ॥ विविदे । विद सत्तायां । लिटि प्रत्ययस्वरः । दिवि नहि विविदे भूम्यां च न विविद इति चशब्दार्थप्रतीतेश्चादिलोपे विभाषेति प्रथमा-

यास्तिङ्विभक्तेर्निघातप्रतिषेधः। प्राथम्यं चानुषक्तिक्रियापेक्षया। रिशादसः। रिश हिंसायां। रिशंति हिंसंतीति रिशाः। इगुपधलक्षणः कः। तानदंतीति रिशादसः। असुन्। आमंत्रितनिघातः। युजा। युजिर् योगे। ऋत्विगित्यादिना क्विन्। सावेकाच इति विभक्तेरुदात्तत्वं। रुद्रासः। रुद्रशब्देन तत्संबंधिनो मरुतो लक्ष्यंते। आज्जसेरसुक्। नू चित्। ऋचि तुनुघेत्यादिना दीर्घः। आधृषे। ञिधृषा प्रागल्भ्ये। संपदादिलक्षणो भावे क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं ॥

पंचमीमृचमाह ॥

प्र वेपयंति पर्वतान्वि विंचंति वनस्पतीन्।
प्रो आरत मरुतो दुर्मदा इव देवासः सर्वया विशा ॥ ५ ॥

प्र। वेपयंति। पर्वतान्। वि। विंचंति। वनस्पतीन्।
प्रो इति। आरत। मरुतः। दुर्मदाःऽइव। देवासः। सर्वया। विशा ॥ ५ ॥

पर्वतान् मेरुहिमवदादीन् प्रवेपयंति। मरुतः प्रकर्षेण कंपयंति। वनस्पतीन् वटाश्वत्थादीन्विविंचंति। परस्परवियुक्तान्कुर्वंति। हे मरुतो देवासो देवाः सर्वया विशा प्रजया सहिता यूयं प्रो आरत। प्रकर्षेणैव सर्वतो गच्छत। तत्र दृष्टांतः। दुर्मदा इव। यथा मदोन्मत्ताः स्वेच्छया सर्वतः क्रीडंति तद्वत् ॥ वेपयंति। टुवेपृ कंपने। वेपमानान्प्रयुंजते। हेतुमति णिच्। विंचंति। विचिर् पृथग्भावे। रुधादित्वात् श्नम्। श्नसोरल्लोप इत्यकारलोपः। वनस्पतीन्। वनानां पतयो वनस्पतयः। पारस्करादित्वात्सुट्। वनस्पतिशब्दावाद्युदात्तौ। उभे वनस्पत्यादिषु युगपदिति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं। आरत। ऋ गतौ। लङि मध्यमबहुवचने बहुलं छंदसीति शपो लुगभावः। यद्वा लुङ्। सर्तिशास्त्यर्तिभ्यश्च। पा॰ ३. १. ५६.। इत्यङ्। आडजादीनामित्याडागमः। आटश्च। । पा॰ ६. १. ९०.। इति वृद्धिः। देवासः। आमंत्रिताद्युदात्तत्वं। सर्वया। सर्वस्य सुपि। पा॰ ६. १. १९१.। इत्याद्युदात्तत्वं। विशा। सावेकाच इति विभक्तेरुदात्तत्वं ॥

॥ इति प्रथमस्य तृतीयेऽष्टादशो वर्गः ॥

षष्ठीमृचमाह ॥

उपो रथेषु पृषतीरयुग्ध्वं प्रष्टिर्वहति रोहितः ।
आ वो यामाय पृथिवी चिदश्रोदबीभयंत मानुषाः ॥ ६ ॥
उपो इति । रथेषु । पृषतीः । अयुग्ध्वं । प्रष्टिः । वहति । रोहितः ।
आ । वः । यामाय । पृथिवी । चित् । अश्रोत् । अबीभयंत । मानुषाः ॥ ६ ॥

हे मरुतः । रथेषु भवदीयेषु पृषतीर्विंदुयुक्ता मृगीरुपो सामीप्येनैवायुग्ध्वं । योजितवंतः । प्रष्टिरेतत्संज्ञको वाहनत्रयमध्यवर्ती युगविशेषः । रोहितो मृगावांतरजातिर्लोहितवर्णो वहति । रथं नयति । वो युष्माकं यामाय गमनाय पृथिवी चित् अंतरिक्षमप्याश्रोत् । आभिमुख्येनाशृणोत् । अनुजानातीत्यर्थः । पृथिवीत्यंतरिक्षनाम । पृथिवी भूः स्वयंभ्विति तन्नामसु पाठात् । मानुषा भूलोकवर्तिनः पुरुषा अबीभयंत । स्वयं भीताः संतोऽन्येषामपि भीतिमुत्पादितवंतः ॥ उपो इति निपातद्वयसमुदायात्मकमन्यन्निपातांतरं । ओत् । पा० १. १. १५. । इति प्रगृह्यत्वं । अयुग्ध्वं । लुङि झलो झलि । पा० ८. २. २६. । इति सकारस्य लोपः । चोः कुरिति कुत्वं । रोहितः । रुहे रश्च लो वा । उ० ३. ९३. । इतीतन्प्रत्ययांतः । नित्त्वादाद्युदात्तः । यामाय । यमेर्भावे घञ् : कर्षात्वत इत्यंतोदात्तत्वे प्राप्ते वृषादिषु पाठादाद्युदात्तत्वं । अश्रोत् । श्रु श्रवणे । बहुलं छंदसीति विकरणस्य लुक् । अबीभयंत । ञिभी भये । अस्माण्ण्यंताल्लुङि भीस्म्योर्हेतुभये । पा० १. ३. ६८. । इत्यात्मनेपदं । बिभेतेर्हेतुभये । पा० ६. १. ५६. । इत्यात्वस्य विकल्पितत्वात्पक्षे भियो हेतुभये षुक् । पा० ७. ३. ४०. । इति षुक् प्राप्नोति । तन्न क्रियते । आगमानुशासनस्यानित्यत्वात् । णौ चङ्युपधाह्रस्वत्वादि । पा० ७. ४. १. ॥

सप्तमीमृचमाह ॥

आ वो मक्षू तनाय कं रुद्रा अवो वृणीमहे ।
गंता नूनं नोऽवसा यथा पुरेत्था कण्वाय बिभ्युषे ॥ ७ ॥
आ । वः । मक्षु । तनाय । कं । रुद्राः । अवः । वृणीमहे ।
गंत । नूनं । नः । अवसा । यथा । पुरा । इत्था । कण्वाय । बिभ्युषे ॥ ७ ॥

हे रुद्राः। रुद्रपुत्रा मरुतः। तनाय कं। अस्मदीयपुत्रार्थं मक्षु शीघ्रं वो युष्मदीयमवो रक्षणमावृणीमहे। सर्वतः प्रार्थयामः। मक्ष्विति क्षिप्रनाम। मक्ष्विति तन्नामसु पठितत्वात्। पुरा पूर्वस्मिन्काले कर्मांतरेषु नोऽवसास्मदीयरक्षणेन निमित्तेन यूयं यथा प्राप्तवंतः। इत्थानेन प्रकारेण बिभ्युषे भीतियुक्ताय कण्वाय मेधाविने यजमानाय तदनुग्रहार्थं नूनं क्षिप्रं गंता। प्राप्नुत ॥ मक्षू। ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणामिति दीर्घः। तनाय। तनोतीति तनः। पचाद्यच्। वृषादित्वादाद्युदात्तत्वं। यद्वा तनयशब्देऽय् इत्यस्य लोपश्छांदसः। कमित्येतत्पादांते प्रयुज्यमानं पादपूरणं। शिशिरं जीवनाय कमितिवत्। उक्तं च। अथापि पादपूरणाः कमीमिद्विति। रुद्राः। रोदयंतीति रुद्राः। रोदेर्णिलुक् चेति रक्प्रत्ययः। आमंत्रिताद्युदात्तत्वं। पादादित्वान्निघाताभावः। गंता। लोटि बहुलं छंदसीति शपो लुक्। तप्तनबित्यादिना तबादेशः। अतः पित्त्वादनुनासिकलोपाभावः। बिभ्युषे। बिभेतेर्लिटः क्वसुः। वस्वेकाजाद्घसामिति नियमादिडभावः। चतुर्थ्येकवचने वसोः संप्रसारणमिति संप्रसारणं। परपूर्वत्वं। शासिवसिघसीनां चेति षत्वं ॥

अष्टमीमृचमाह ॥

युष्मेषितो मरुतो मर्त्येषित आ यो नो अभ्व ईषते।
वि तं युयोत शवसा व्योजसा वि युष्माकाभिरूतिभिः ॥ ८ ॥
युष्माऽइषितः। मरुतः। मर्त्यऽइषितः। आ। यः। नः। अभ्वः। ईषते।
वि। तं। युयोत। शवसा। वि। ओजसा। वि। युष्माकाभिः। ऊतिऽभिः ॥ ८ ॥

हे मरुतः। यो यः कश्चिदभ्वः शत्रुर्युष्मेषितो युष्माभिः प्रेषितो मर्त्येषितो मारकैरन्यैर्वा प्रेषितः सन् नोऽस्मान्प्रति आ ईषते। आभिमुख्येन प्राप्नोति। तं शत्रुं शवसान्नेन वियुयोत। विभक्तं कुरुत। तथौजसा बलेन वियुयोत। युष्माकाभिरूतिभिर्युष्मत्संबंधिभी रक्षणैश्च वियुयोत ॥ युष्मेषितः। युष्माभिरिषितः। सुबुकि प्रत्ययलक्षणेन युष्मदस्मदोरनादेश इत्यात्वं। न च न लुमतांगस्येति प्रतिषेधः। इकोऽचि विभक्तावित्यचाज्ग्रहणेन तस्य पाक्षिकत्वोक्तेः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। मर्त्येषितः। पूर्ववत्। अभ्वः। आभवतीत्यभ्वः शत्रुः। पृषोदरादित्वादभिमतरूपस्वरसिद्धिः। ईषते। ईष गतिहिंसा-

दर्शनेषु। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः। युयोत। यु मिश्रणामिश्रणयोः। लोण्मध्यमबहुवचने बहुलं छंदसीति शपः श्लुः। तप्तनप्तनथनाश्चेति तबादेशः। पित्त्वाद्गुणः। युष्माकाभिः। युष्मत्संबंधिनीभिः। तस्मिन्नणि च युष्माकास्माकौ। पा० ४. ३. २.। इति युष्मच्छब्दस्य युष्माकादेशः। ङीवृद्धी छांदसत्वान्न क्रियेते। ऊतिभिः। अवतेः क्तिनि ज्वरत्वरेत्यादिना ऊट्। ऊतियूतीत्यादिना क्तिन उदात्तत्वं॥

नवमीमृचमाह॥

असामि हि प्रयज्यवः कण्वं दद प्रचेतसः।
असामिभिर्मरुत आ न ऊतिभिर्गंता वृष्टिं न विद्युतः॥ ८॥
असामि। हि। प्रऽयज्यवः। कण्वं। दद। प्रऽचेतसः।
असामिऽभिः। मरुतः। आ। नः। ऊतिऽभिः। गंत। वृष्टिं। न। विऽद्युतः॥ ८॥

असामि हि संपूर्णमेव यथा भवति तथा प्रयज्यवः प्रकर्षेण यष्टव्याः। प्रचेतसः प्रकृष्टज्ञानयुक्ता हे मरुतः कण्वं मेधाविनं यजमानमेतन्नामकमृषिं वा दद। धारयत। हि यस्माद्यूयं कण्वनामकमृषिं धारितवंतस्तस्मात्कारणादसामिभिरूतिभिः संपूर्णै रक्षणैर्नोऽस्मान् प्रत्यागंता। आगच्छत। तत्र दृष्टांतः। वृष्टिं न विद्युतः। यथा विद्युतो वृष्टिं गच्छंति तद्वत्॥ असामि। साम्यर्द्धं। न सामि असामि। अव्ययपूर्वपदप्रकृतिस्वरत्वं। प्रयज्यवः। प्रकर्षेण यष्टव्याः। यजिमनिशुंधिदसिजनिभ्यो युः। उ० ३. २०.। इति कर्मणि युप्रत्ययः। आमंत्रितनिघातः। दद। डुदाञ् दाने। लोण्मध्यमबहुवचनस्य तिङां तिङो भवंतीति लङात्मनेपदप्रथमपुरुषबहुवचनादेशः। श्लौ द्विर्भावे सति श्नाभ्यस्तयोरात इत्याकारलोपः। लोपस्त आत्मनेपदेष्विति तलोपः। अतो गुण इति पररूपत्वं। छंदस्युभयथेत्यार्द्धधातुकत्वादभ्यस्तानामादिरित्याद्युदात्तत्वं न भवति किंतु प्रत्ययस्वर एव। हि चेति निघातप्रतिषेधः। प्रचेतसः। प्रकृष्टं चेतो येषां। आमंत्रितनिघातः। गंता। गमेर्लोण्मध्यमबहुवचनस्य तबादेशः। बहुलं छंदसीति शपो लुक्। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः। पादादित्वान्निघाताभावः। द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं। विद्युतः। विद्योतत इति विद्युत्। भ्राजभासेत्यादिना। पा० ३. २. १७७.। क्विप्॥

दशमीमृचमाह ॥

असाम्योजो बिभृथा सुदानवोऽसामि धूतयः शवः ।
ऋषिद्विषे मरुतः परिमन्यव इषुं न सृजत द्विषं ॥ १० ॥
असामि । ओजः । बिभृथ । सुऽदानवः । असामि । धूतयः । शवः ।
ऋषिऽद्विषे । मरुतः । परिऽमन्यवे । इषुं । न । सृजत । द्विषं ॥ १० ॥

हे सुदानवः शोभनदानोपेता मरुतः । असामि संपूर्णमोजो बलं बिभृथा । धारयथ । हे धूतयः कंपनकारिणो मरुतः । असामि संपूर्णं शवो बलं । परिमन्यवे कोपपरिवृताय ऋषिद्विषे ऋषीणां द्वेषं कुर्वते शत्रवे तद्विनाशार्थं द्विषं द्वेषकारिणं हंतारं सृजत । तत्र दृष्टांतः । इषुं न । यथा शत्रोरुपरि बाणं मुंचंति तद्वत् । अत्र निरुक्तं । असामि सामिप्रतिषिद्धं सामि स्यतेः । असाम्योजो बिभृथा सुदानवः । असुसमाप्तं बलं बिभृथ कल्याणदानाः । नि० ६. २३. । इति । बिभृथा । डुभृञ् धारणपोषणयोः । जुहोत्यादित्वात् श्लुः । भृञामिदित्यभ्यासस्येत्वं । ऋषिद्विषे । ऋषीन् द्वेष्टीति ऋषिद्विट् । सत्सूद्विषेत्यादिना क्विप् । परिमन्यवे । मन्युना परिवृतः परिमन्युः । प्रादिसमासे परेरभितोभाविमंडलं । पा० ६. २. १८२. । इत्युत्तरपदांतोदात्तत्वं । इषुं । इषु गतौ । इष्यति गच्छतीतीषुः । ईषेः किच्च । उ० १. १३. । इत्युप्रत्ययः । धान्ये नित्यनुवृत्तेर्नित्त्वादाद्युदात्तत्वं । सृजत । सृज विसर्गे । विकरणस्य ङित्त्वाद्गुणाभावः । द्विषं । क्विप् चेति क्विप् ॥

॥ इति प्रथमस्य तृतीय एकोनविंशो वर्गः ॥

उत्तिष्ठेत्यष्टर्चं पंचमं सूक्तं कण्वस्यार्षं बार्हतं । युजः सतोबृहत्यः । अयुजो बृहत्यः । ब्रह्मणस्पतिदेवताकं । अनुक्रम्यते च । उत्तिष्ठाष्टौ ब्राह्मणस्पत्यमिति । सूक्तविनियोगो लैंगिकः । चतुर्विंशेऽहनि मरुत्वतीये प्राकृताद्ब्राह्मणस्पत्यात्प्रगाथात्पूर्वमुत्तिष्ठ ब्रह्मणस्पत इत्ययं प्रगाथः । मरुत्वतीय इति खंडे सूचितं । प्रैतु ब्रह्मणस्पतिरुत्तिष्ठ ब्रह्मणस्पत इति ब्राह्मणस्पत्यावावपते पूर्वां नित्यात् । आ० ७. ३. । इति ॥ आद्या तु प्रवर्ग्येऽप्यभिष्टवे विनियुक्ता । उत्तिष्ठ ब्रह्मणस्पत इत्येतामुक्तावतिष्ठत इति सूचितत्वात् ॥

तत्र प्रथमामृचमाह ॥

उत्तिष्ठ ब्रह्मणस्पते देवयंतस्त्वेमहे ।
उप प्र यंतु मरुतः सुदानव इंद्र प्राशूर्भवा सचा ॥ १ ॥
उत् । तिष्ठ । ब्रह्मणः । पते । देवऽयंतः । त्वा । ईमहे ।
उप । प्र । यंतु । मरुतः । सुऽदानवः । इंद्र । प्राशूः । भव । सचा ॥ १ ॥

हे ब्रह्मणस्पते । एतन्नामक देव । उत्तिष्ठ । अस्मदनुग्रहाय त्वदीयनिवासादुत्थानं कुरु । देवयंतो देवान् कामयमाना वयं त्वा त्वामीमहे । याचामहे । सुदानवः शोभनदानयुक्ता मरुत उपप्रयंतु । समीपे प्रकर्षेण गच्छंतु । हे इंद्र त्वं सचा ब्रह्मणस्पतिना सह प्राशूः सोमस्य प्राशको भव । यद्वा वृत्रस्य हिंसको भव ॥ उत्तिष्ठ । ऊर्ध्वकर्मत्वादात्मनेपदाभावः । पा० १. ३. २४. । ब्रह्मणस्पते । सुबामंत्रित इति परांगवद्भावात् षष्ठ्यामंत्रितसमुदायस्याष्टमिकं सर्वानुदात्तत्वं । देवयंतः । देवानात्मन इच्छंतः । सुप आत्मनः क्यच् । न छंदस्यपुत्रस्येतीत्वस्येव दीर्घस्यापि निषेधः । अश्वाघस्यादिति पुनरात्वविधानसामर्थ्यात् । ईमह इत्यादयो गताः । प्राशूः । शॄ हिंसायां । प्रकर्षेण समंतात् शृणोति हिनस्तीति प्राशूः । बहुलं छंदसीत्युत्वं । वोरुपधाया दीर्घः । कृदुत्तरपदप्रकृतिस्वरत्वं । भवा । द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं ॥

द्वितीयामृचमाह ॥

त्वामिद्धि सहसस्पुत्र मर्त्य उपब्रूते धने हिते ।
सुवीर्यं मरुत आ स्वश्व्यं दधीत यो व आचके ॥ २ ॥
त्वां । इत् । हि । सहसः । पुत्र । मर्त्यः । उपऽब्रूते । धने । हिते ।
सुऽवीर्यं । मरुतः । आ । सुऽअश्व्यं । दधीत । यः । वः । आऽचके ॥ २ ॥

हे सहसस्पुत्र बलस्य बहुपालक ब्रह्मणस्पते । पुत्रः पुरु त्रायते निपरणाद्वेति निरुक्तं । नि० २. ११. । मर्त्यो मनुष्यो हिते शत्रुषु प्रक्षिप्ते धने निमित्तभूते सति त्वामित् त्वामेवोपब्रूते हि । समीपं प्राप्य स्तौति खलु । तद्धनसंपादनाय प्रार्थयत इत्यर्थः । हे मरुतः । यो धनार्थी मर्त्यो वो युष्मान् ब्राह्मणस्पतिसहि-

तानाचके। स्तौति । स मर्त्यः स्वश्व्यं शोभनाश्वयुक्तं सुवीर्यं शोभनवीर्ययुक्तं धनं दधीत। धारयेत् ॥ सहसस्पुत्र । ब्रह्मणस्पत इतिवत् षष्ठ्याः पतिपुत्रेति विसर्जनीयस्य सत्वं। उपब्रूते। हि चेति निघातप्रतिषेधः। तिङि चोदात्तवतीति गतेरनुदात्तत्वं । हिते । निष्ठायां दधातेर्हिरिति हिरादेशः । सुवीर्यं । शोभनं वीर्यं यस्येति बहुव्रीहौ वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं। स्वश्व्यं। अश्वानां समूहोऽश्वीयं। केशाश्वाभ्यां यञ्छावन्यतरस्यां । पा० ४. २. ४८.। इति समूहार्थे छप्रत्ययः। छस्य ईयादेशः । शोभनमश्वीयं यस्य तं स्वश्व्यं। ईकारलोपश्छांदसः। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। दधीत। सीयुटः सकारलोपे सत्यभ्यस्तानामादिरित्याद्युदात्तत्वं। पादादित्वान्निघाताभावः। आचके। कै शै रै शब्दे। आदेच इत्यात्वं। लिटि द्विर्वचनेऽभ्यासस्य हृस्वचुत्वे। आतो लोप इटि चेत्याकारलोपः। प्रत्ययस्वरः। यद्वृत्तयोगादनिघातः ॥

चतुर्विंशेऽहनि मरुत्वतीय उत्तिष्ठ ब्रह्मणस्पत इत्यस्मात्प्रगाथात्पूर्वं प्रैतु ब्रह्मणस्पतिरित्ययं प्रगाथो विनियुक्तः। सूत्रं तूत्तिष्ठ ब्रह्मणस्पत इत्यत्रैवोदाहृतं। महावीरमादाय शालां प्रतिगच्छत्सु प्रैतु ब्रह्मणस्पतिरित्येतां पठन् होतानुगच्छेत्। सूत्रं च। प्रैतु ब्रह्मणस्पतिरित्यनुव्रजेदिति ॥ एषैवाग्नीषोमीयप्रणयनेऽपि विनियुक्ता। सूचितं च। प्रैतु ब्रह्मणस्पतिर्होता देवो अमर्त्य इति ॥ तामेतां सूक्ते तृतीयामृचमाह ॥

प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता।
अच्छा वीरं नर्यं पंक्तिराधसं देवा यज्ञं नयंतु नः ॥ ३ ॥

प्र। एतु। ब्रह्मणः। पतिः। प्र। देवी। एतु। सूनृता।
अच्छ। वीरं। नर्यं। पंक्तिऽराधसं। देवाः। यज्ञं। नयंतु। नः ॥ ३ ॥

ब्रह्मणस्पतिर्देवः प्रैतु। अस्मान्प्राप्नोतु। सूनृता देवी प्रियसत्यरूपा वाग्देवता प्रैतु। अस्मान्प्राप्नोतु। देवा ब्रह्मणस्पत्यादयो देवता वीरं शत्रुं निःशेषेण दूरे प्रेरयंतु। तं नर्यं मनुष्येभ्यो हितं पंक्तिराधसं ब्राह्मणोक्तहविष्पंक्त्यादिभिः समृद्धं यज्ञं प्रति नोऽस्मान् अच्छाभिमुख्येन नयंतु ॥ प्रैतु। एङि पररूपं। पा० ६. १. ९४.। इति पररूपे प्राप्ते एत्येधत्यूठ्सु। पा० ६. १. ८९.। इति वृद्धिः। देव्येत्वित्यचोदात्तस्वरितयोर्यणः स्वरितेऽनुदात्तस्येति स्वरितत्वं। नर्यं। नरेभ्यो

हितं। प्राक्क्रीतीय उगवादिलक्षणो यत्प्रत्ययो द्रष्टव्यः। पा० ५. १. २.। पंक्तिराधसं। पंक्तिभी राध्नोति पंक्तिराधाः। गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेत्यसुन् पूर्वपदप्रकृतिस्वरत्वं च। यज्ञं। यजयाचेत्यादिना यजतेर्नङ् ॥

चतुर्थीमृचमाह ॥

यो वाघते ददाति सूनरं वसु स धत्ते अक्षिति श्रवः।
तस्मा इळां सुवीरामा यजामहे सुप्रतूर्तिमनेहसं ॥ ४ ॥
यः। वाघते। ददाति। सूनरं। वसु। सः। धत्ते। अक्षिति। श्रवः।
तस्मै। इळां। सुवीरां। आ। यजामहे। सुऽप्रतूर्तिं। अनेहसं ॥ ४ ॥

यो यजमानो वाघते ऋत्विजे सूनरं सुष्ठु नेतव्यं वसु धनं ददाति। स यजमानो ब्रह्मणस्पतेः प्रसादादक्षिति क्षयरहितं श्रवोऽन्नं धत्ते। धारयति। तस्मै तादृशयजमानायेळामेतन्नामधेयां मनोः पुत्रीं। इळा वै मानवी यज्ञानुकाशिन्यासीदिति श्रुत्यंतरात्। आयजामहे। वयमृत्विजः सर्वतो यजामः। कीदृशीमिळां। सुवीरां। शोभनैर्वीरैर्भटैर्युक्तां। सुप्रतूर्तिं। सुष्ठु प्रकर्षेण हिंसाकारिणीं। अनेहसं। केनाप्यहिंस्यां ॥ ददाति। अनुदात्ते चेत्यभ्यस्तस्याद्युदात्तत्वं। यद्वृत्तयोगादनिघातः। सूनरं। सुखेन नीयत इति सूनरं। ईषद्दुःसुष्विति खल्। निपातस्य चेत्युपसर्गस्य दीर्घत्वं। अक्षिति। क्षयो नास्त्यस्येत्यक्षिति। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। नञ्सुभ्यामिति तु सर्वे विधयश्छंदसि विकल्प्यंत इति वचनान्न प्रवर्तते। श्रवः। श्रूयत इति श्रवः। श्रु श्रवणे। असुनो नित्त्वादाद्युदात्तत्वं। सुवीरां। शोभना वीरा यस्याः सा सुवीरा। तां। वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं। सुप्रतूर्तिं। तुर्वी हिंसार्थः। प्रपूर्वादस्माद्भावे क्तिन्। शोभना प्रतूर्तिः शत्रूणां हिंसनं यस्याः सा। तां। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। क्रत्वादिर्वा द्रष्टव्यः। अनेहसं। न हन्यत इत्यनेहाः। नञि हन एह च। उ० ४. २२३.। इत्यसुन्प्रत्ययः। धातोरेहादेशश्च। नलोपो नञ इति नकारस्य लोपः। तस्मान्नुडचीति नुट् ॥

अग्निष्टोमे मरुत्वतीयशस्त्र इंद्रनिवहप्रगाथानंतरं प्र नूनमिति प्रगाथः। मरुत्वतीयेनेति खंडे सूचितं। प्र नूनं ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यः। आ० ७. ३.। इति ॥

प्रगाथे प्रथमां सूक्ते पंचमीमृचमाह ॥

प्र नूनं ब्रह्मणस्पतिर्मंत्रं वदत्युक्थ्यं ।

यस्मिन्निंद्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे ॥ ५ ॥

प्र । नूनं । ब्रह्मणः । पतिः । मंत्रं । वदति । उक्थ्यं ।

यस्मिन् । इंद्रः । वरुणः । मित्रः । अर्यमा । देवाः । ओकांसि । चक्रिरे ॥ ५ ॥

ब्रह्मणस्पतिर्देव उक्थ्यं शस्त्रयोग्यं मंत्रं नूनमवश्यं प्रवदति । होतृमुखे स्थितः सन् प्रब्रूते । यस्मिन्मंत्र इंद्रादयश्च सर्वे देवा ओकांसि स्थानानि चक्रिरे । तादृशं सर्वदेवप्रतिपादकं मंत्रमिति पूर्वत्रान्वयः ॥ मंत्रं । मंत्रि गुप्तभाषणे । पचाद्यच् । वृषादिषु पाठादाद्युदात्तत्वं । उक्थ्यं । उक्थार्हं । छंदसि चेत्यर्हार्थे यप्रत्ययः । यद्वा भवे छंदसीति यत् । सर्वे विधयश्छंदसि विकल्प्यंत इति वचनाद्यतोऽनाव इत्याद्युदात्तत्वाभावे व्यत्ययेन तित्स्वरितमिति स्वरितत्वं । ओकांसि । उच समवाये । समवयंत्यत्रेत्यधिकरण औणादिकोऽसुन् । बहुलग्रहणात् कुत्वं द्रष्टव्यमित्योकः । उचः क इत्यत्र वृत्तावत्युक्तं । चक्रिरे । इरेचश्चित्त्वादंतोदात्तत्वं । यद्वृत्तयोगादनिघातः ॥

॥ इति प्रथमस्य तृतीये विंशो वर्गः ॥

षष्ठीमृचमाह ॥

तमिद्वोचेम विदथेषु शंभुवं मंत्रं देवा अनेहसं ।

इमां च वाचं प्रतिहर्यथा नरो विश्वेद्वामा वो अश्नवत् ॥ ६ ॥

तं । इत् । वोचेम । विदथेषु । शंऽभुवं । मंत्रं । देवाः । अनेहसं ।

इमां । च । वाचं । प्रतिऽहर्यथ । नरः । विश्वा । इत् । वामा । वः । अश्नवत् ॥ ६ ॥

हे देवा ब्रह्मणस्पतिप्रभृतयः । तमित् तमेवेंद्रादिसर्वदेवताप्रतिपादकं मंत्रं विदथेषु यज्ञेषु वोचेम । वयमृत्विजो ब्रवाम । कीदृशं । शंभुवं । सुखस्य भावयितारं । अनेहसं । अहिंसनीयं दोषरहितं । हे नरो नेतारो देवा इमामस्माभिरुच्यमानां मंत्ररूपां वाचं प्रतिहर्यथ च । यूयं कामयध्वे चेत् । तर्हि विश्वेत् सर्वापि वामा वननीया वाक् वो युष्मानश्नवत् । व्याप्नुयात् ॥ वोचेम । वच परिभाषणे । आशीर्लिङि लिङ्याशिष्यङित्यङ् । वच उमित्युमागमः । छंदस्युभयथेति

सार्वधातुकत्वाल्लिङः सलोपोऽनंत्यस्येति यासुटः सकारस्य लोपः। अतो येय इतीयादेशः। आद्गुणः। तिङ्ङतिङ इति निघातः। विदथेषु। विद ज्ञाने। विद्यंते फलसाधनत्वेन ज्ञायत इति विदथो यज्ञः। रुदिविदिभ्यां ङित्। उ० ३. ११४.। इत्यथप्रत्ययः। शंभुवं। भवतेरंतर्भावितण्यर्थात् क्विप् चेति क्विप्। ओः सुपि। पा० ६. ४. ८३.। इति यणादेशस्य न भूसुधियोः। पा० ६. ४. ८५.। इति प्रतिषेधः। मंत्रादयो गताः। प्रतिहर्यथा। हर्य गतिकांत्योः। शपः पित्त्वादनुदात्तत्वं। तिङश्च लसार्वधातुकस्वरेण धातुस्वरेणाद्युदात्तत्वं। इमां चेत्यत्र चशब्दश्चेदर्थः। चणिति निपातांतरं न च समुच्चयार्थः। तेन निपातैर्यद्यदिहंतकुविन्नेच्चेच्चणिति निघातप्रतिषेधः। अश्नवत्। अशू व्याप्तौ। लेट्यडागमः। व्यत्ययेन परस्मैपदं। इतश्च लोप इतीकारलोपः। इयङ्वङ्भ्यां गुणवृद्धी भवतो विप्रतिषेधेन। पा० ६. ४. ७७. १.। इति गुणः॥

सप्तमीमृचमाह॥

को देवयंतमश्नवज्जनं को वृक्तबर्हिषं।

प्रप्र दाश्वान्पस्त्याभिरस्थितांतर्वावत्क्षयं दधे॥ ७॥

कः। देवऽयंतं। अश्नवत्। जनं। कः। वृक्तऽबर्हिषं।

प्रऽप्र। दाश्वान्। पस्त्याभिः। अस्थित। अंतःऽवावत्। क्षयं। दधे॥ ७॥

देवयंतं देवान्कामयमानं जनं कोऽश्नवत्। ब्रह्मणस्पतिव्यतिरिक्तः को नाम देवो व्याप्नुयात्। तथा वृक्तबर्हिषमनुष्ठानाय छिन्नबर्हिषं यजमानं को नामान्यो देवोऽश्नवत्। दाश्वान् हविर्दत्तवान्यजमानः पस्त्याभिर्मनुष्यैर्ऋत्विग्भिः सह प्र प्रास्थित। देवयजनदेशं प्रति प्रस्थितवान्। अंतर्वावत्। अंतःस्थितबहुधनोपेतं। यद्वा। अंतःस्थितपुत्रपौत्रादिप्रयुक्तबहुविधगुणोपेतं क्षयं निवासस्थानं गृहं दधे। धृतवान् भवति॥ देवयंतमित्यादयो गताः। प्रप्र। प्रसमुपोदः पादपूरणे। पा० ८. १. ६.। इति प्रशब्दस्य द्विर्भावः। अनुदात्तं चेत्याम्रेडितानुदात्तत्वं। अस्थित। ष्ठा गतिनिवृत्तौ। लुङि समवप्रविभ्यः स्थ इत्यात्मनेपदं। स्थाघ्वोरिच्च। पा० १. २. १७.। इति धातुसिचोरित्। किच्च ह्रस्वादंगात्। पा० ८. २. २७.। इति सलोपः। अंतर्वावत्। वा गतिगंधनयोः। अंतर्वाति गच्छतीत्यंतर्वाः पुत्रपश्वादयः। आतो मनिन्नित्यादिना विच्। तदस्यास्तीति मतुप्। मतुपः पित्त्वादनुदात्तत्वे कृदुत्तर-

पदप्रकृतिस्वरत्वं । यद्वा वावदीतेः क्विप् । क्षयं । क्षियंति निवसंत्यस्मिन्निति क्षयः । पुंसि संज्ञायामित्यधिकरणे घः । क्षयो निवास इत्याद्युदात्तत्वं ॥

अष्टमीमृचमाह ॥

उप॑ क्ष॒त्रं पृं॑चीत॒ हंति॒ राज॑भि॒र्भये॑ चित्सुक्षि॒तिं द॑धे ।
नास्य॑ व॒र्ता न त॑रु॒ता म॑हाध॒ने नार्भे॑ अस्ति व॒ज्रिणः॑ ॥ ८ ॥

उप॑ । क्ष॒त्रं । पृं॒चीत॒ । हंति॑ । राज॑ऽभिः । भ॒ये । चि॒त् । सु॒ऽक्षि॒तिं । द॒धे॒ ।
न । अ॒स्य॒ । व॒र्ता । न । त॒रु॒ता । म॒हा॒ऽध॒ने । न । अ॒र्भे । अ॒स्ति॒ । व॒ज्रिणः॑ ॥ ८ ॥

ब्रह्मणस्पतिर्देवः क्षत्रं बलमुपपृंचीत । स्वात्मनि संपृक्तं कुर्यात् । ततो राजभिर्वरुणादिभिः सह हंति । शत्रून्मारयति । भये चित् भीतिहेतौ युद्धेऽपि सुक्षितिं दधे । सुष्ठु निवासस्थैर्यं धारयति । न तु पलायते । वज्रिणो वज्रायुधवतोऽस्य ब्रह्मणस्पतेर्महाधने प्रभूतधननिमित्ते युद्धे वर्ता प्रवर्तयितान्यः कोऽपि नास्ति । स्वयमेव प्रवर्तत इत्यर्थः । महाधन इति संग्रामनाम । महाधने समीक इति तन्नामसु पाठात् । तथा तरुता तरणस्योल्लंघनस्य कर्तान्यः कोऽपि नास्ति । तथैवार्भे स्वल्पे युद्धेऽप्यन्यः प्रवर्तयिता नास्ति ॥ पृंचीत । पृची संपर्के । लिङि रुधादित्वात् श्नम् । श्नसोरल्लोप इत्यकारलोपः । प्रत्ययस्वरः । क्षत्रं । गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः । उ॰ ४.१६८. । क्षत्रं पृंचीत राजभिर्हंति चेति समुच्चयलक्षणस्य चार्थस्य दर्शनाच्चादिलोपे विभाषेति प्रथमायास्तिङ्विभक्तेर्निघातप्रतिषेधः । हंतीत्येषा द्वितीयापि तिङः परत्वान्न निहन्यते । सुक्षितिं । शोभना क्षितिः सुक्षितिः । मन्क्तिन्नित्यादिनोत्तरपदांतोदात्तत्वं । वर्ता । वर्ततेर्वृणोतेर्वा तृच्यागमानुशासनस्यानित्यत्वादिडभावः । तरुता । तॄ प्लवनतरणयोः । ग्रसितस्कभितेत्यादिना तृच्युडागमो निपातितः । चित इत्यंतोदात्तत्वं । महाधने । महच्च तद्धनं च महाधनं । आन्महतः । पा॰ ६. ३. ४६. । इत्यात्वं । तेन महाधनशब्देन तद्धेतुभूतः संग्रामो लक्ष्यते । अर्भे । ऋ गतौ । अर्तिगृभ्यां भन्निति भन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं ॥

॥ इति प्रथमस्य तृतीय एकविंशो वर्गः ॥

यं रक्षंतीति नवर्चं षष्ठं सूक्तं। तत्रानुक्रमणं। यं रक्षंति नव वरुणमित्रार्यम्णां मध्ये तृच आदित्येभ्यो गायत्रं हीति। घोरपुत्रः कण्व ऋषिः। इदमादित्रीणि सूक्तानि गायत्राणि। आद्यंतयोस्तृचयोर्वरुणमित्रार्यमणो देवताः। मध्यतृचस्य सुगः पंथा इत्यस्यादित्या देवताः। गतो विनियोगः॥

तत्र प्रथमामृचमाह॥

यं रक्षंति प्रचेतसो वरुणो मित्रो अर्यमा। नू चित्स दभ्यते जनः॥ १॥

यं। रक्षंति। प्रऽचेतसः। वरुणः। मित्रः। अर्यमा। नु। चित्। सः। दभ्यते। जनः॥ १॥

प्रचेतसः प्रकृष्टज्ञानयुक्ता वरुणादयो देवा यं यजमानं रक्षंति स जनो यजमानो नू चित् क्षिप्रमेव दभ्यते। दभ्नोति। शत्रून् हिनस्ति॥ प्रचेतसः। प्रकृष्टं चेतो येषां। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। नू चित्। ऋचि तुनुघेत्यादिना दीर्घः। दभ्यते। दंभु दंभे। व्यत्ययेन श्यन् आत्मनेपदं च॥

द्वितीयामृचमाह॥

यं बाहुतेव पिप्रति पांति मर्त्यं रिषः। अरिष्टः सर्व एधते॥ २॥

यं। बाहुताऽइव। पिप्रति। पांति। मर्त्यं। रिषः। अरिष्टः। सर्वः। एधते॥ २॥

यं यजमानं पिप्रति। वरुणादयो देवा धनैः पूरयंति। तत्र दृष्टांतः। बाहुतेव। स्वकीयो बाहुवर्गोऽपेक्षितं धनमानीय यथा पूरयति तद्वत्। तथा यं मर्त्यं मनुष्यं यजमानं रिषो हिंसकात् पांति। रक्षंति। स सर्वो यजमानोऽरिष्टः केनाप्यहिंसितः सन् एधते। वर्धते॥ बाहुता बाहुत्वं। भाववाचिनानेन शब्देन बाहवस्तदाश्रया लक्ष्यंते। यद्वा समूहार्थे तल्प्रत्ययो द्रष्टव्यः। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं। पिप्रति। पॄ पालनपूरणयोः। पृ इत्येके। जुहोत्यादित्वात् श्लुः। अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं। अभ्यस्तानामादिरित्याद्युदात्तत्वं। पांति। तिङः परत्वात्पादादित्वाद्वा निघाताभावः। रिषः। रिष हिंसायां। क्विप् चेति क्विप्। सावेकाच इति विभक्तेरुदात्तत्वं। अरिष्टः। रिष हिंसायां। एकाच इतीट्प्रतिषेधः। व्रश्चादिना षत्वं। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं॥

तृतीयामृचमाह ॥

वि दुर्गा वि द्विषः पुरो घ्नंति राजान एषां। नयंति दुरिता तिरः ॥ ३ ॥

वि। दुःऽगा। वि। द्विषः। पुरः। घ्नंति। राजानः। एषां। नयंति। दुःऽइता। तिरः ॥ ३ ॥

राजानो वरुणादय एषां स्वकीययजमानानां पुरः पुरस्तात् दुर्गा गंतुं दुःशकानि शत्रुनगराणि विघ्नंति। विशेषेण नाशयंति। तथा द्विषः शत्रूनपि विघ्नंति। तथा दुरिता यजमानसंबंधीनि दुरितानि तिरो नयंति। विनाशं प्रापयंति ॥ दुर्गा। दुःखेन गच्छंत्यत्रेति दुर्गाणि। सुदुरोरधिकरण इति गमेर्डप्रत्ययः। शेश्छंदसि बहुलमिति शेर्लोपः। पुरः। कालवाचिनः पूर्वशब्दात् सप्तम्यर्थे पूर्वाधरावराणामित्यसिप्रत्ययः। तत्संनियोगेन पूर्वशब्दस्य पुरादेशश्च। प्रत्ययस्वरः। घ्नंति। हंतेर्लट्यदादित्वाच्छपो लुक्। गमहनेत्यादिनोपधालोपः। हो हंतेः। पा॰ ७.३.५४.। इति घत्वं। अंतादेशस्योपदेशवचनादाद्युदात्तत्वं। पादादित्वादनिघातः ॥

चतुर्थीमृचमाह ॥

सुगः पंथा अनृक्षर आदित्यास ऋतं यते। नात्रावखादो अस्ति वः ॥ ४ ॥

सुऽगः। पंथाः। अनृक्षरः। आदित्यासः। ऋतं। यते। न। अत्र। अवऽखादः। अस्ति। वः ॥ ४ ॥

हे आदित्यासः। ऋतं यते। यज्ञं गच्छते भवत्समूहाय पंथा मार्गः सुगः सुष्ठु गंतुं शक्यः। अनृक्षरः कंटकरहितश्च। अत्रास्मिन्कर्मणि वो युष्माकमवखादोऽवमंतव्यः खादो जुगुप्सितहविर्विशेषो नास्ति। तस्मादिहागंतव्यमित्यर्थः ॥ सुगः। सुदुरोरधिकरण इति गमेर्डप्रत्ययः। पंथाः। पथिमथोः सर्वनामस्थान इत्याद्युदात्तत्वं। अनृक्षरः। ऋषी गतौ। ऋषंत्यंतर्गच्छंतीत्यृक्षराः कंटकाः। तन्यृषिभ्यां क्सरन्निति क्सरन्प्रत्ययः। कित्त्वाद्गुणाभावः। कत्वषत्वे। यास्कस्त्वाह। ऋक्षरः कंटक ऋच्छतेरिति। न विद्यंते ऋक्षरा अस्मिन्नित्यनृक्षरः। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। आदित्यासः। अदितेः पुत्रा आदित्याः। दित्यदित्यादिना ण्यप्रत्ययः। आज्जसेरसुक्। आमंत्रिताद्युदात्तत्वं। पादादित्वादाष्टमिकनिघाताभावः। यते। इण् गतौ। लटः शतृ। अदादित्वाच्छपो लुक्।

इणो यणिति यणादेशः । शतुरनुम इति विभक्तेरुदात्तत्वं । अवखादः । खादृ भक्षणे । भावे घञ् । अवमतः खादोऽवखादः । थाथादिनोत्तरपदांतोदात्तत्वं ॥

पंचमीमृचमाह ॥

यं यज्ञं नयथा नर आदित्या ऋजुना पथा । प्र वः स धीतये नशत् ॥ ५ ॥

यं । यज्ञं । नयथ । नरः । आदित्याः । ऋजुना । पथा । प्र । वः । सः । धीतये । नशत् ॥ ५ ॥

हे नरो नेतार आदित्याः । यं यज्ञमृजुना पथाविकलेन मार्गेण नयथ । पारं प्रापयथ । स यज्ञो वो धीतये युष्मत्पानायोपभोगाय प्रणशत् । प्राप्नोतु ॥ नयथ । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । यद्वृत्तयोगादनिघातः । अन्येषामपि दृश्यत इति संहितायां दीर्घत्वं । पथा । तृतीयैकवचने भस्य टेर्लोपः । पा॰ ७. १. ८८. । इति टिलोपः । अनुदात्तस्य च यत्रोदात्तलोप इति विभक्तेरुदात्तत्वं । धीतये । धेट् पाने । आदेच इत्यात्वं । क्तिचि घुमास्थेतीत्वं । नशत् । नशतिर्गत्यर्थः । लेट्यडागमः । इतश्च लोप इतीकारलोपः ॥

॥ इति प्रथमस्य तृतीये द्वाविंशो वर्गः ॥

षष्ठीमृचमाह ॥

स रत्नं मर्त्यो वसु विश्वं तोकमुत त्मना । अच्छा गच्छत्यस्तृतः ॥ ६ ॥

सः । रत्नं । मर्त्यः । वसु । विश्वं । तोकं । उत । त्मना । अच्छ । गच्छति । अस्तृतः ॥ ६ ॥

हे आदित्याः स तादृशो भवद्भिरनुगृहीतो मर्त्यो मनुष्यो यजमानोऽस्तृतः केनाप्यहिंसितः सन् रत्नं रमणीयं विश्वं वसु सर्वं धनमच्छाभिमुख्येन गच्छति । प्राप्नोति । उत अपि च त्मना आत्मना स्वेन सदृशं तोकमपत्यं गच्छति ॥ त्मना । मंत्रेष्वाङ्यादेरात्मन इत्याकारलोपः । अच्छा । निपातस्य चेति दीर्घत्वं । अस्तृतः । स्तृञ् हिंसायां । न स्तृतोऽस्तृतः । अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥

सप्तमीमृचमाह ॥

कथा राधाम सखाय स्तोमं मित्रस्यार्यम्णः । महि प्सरो वरुणस्य ॥ ७ ॥

कथा । राधाम । सखायः । स्तोमं । मित्रस्य । अर्यम्णः । महि । प्सरः । वरुणस्य ॥ ७ ॥

हे सखायः सखिभूता ऋत्विजः । मित्रादीनां त्रयाणां महि महत् प्सरो

रूपं। अतस्तदनुरूपं स्तोमं स्तोत्रं कथा केन प्रकारेण राधाम। साधयामः॥ कथा। था हेतौ च छंदसि। पा० ५. ३. २६.। इति किंशब्दात्प्रकारवचनेषु प्राग्दिशो विभक्तिरिति विभक्तिसंज्ञायां किमः क इति कादेशः। प्रत्ययस्वरः। राधाम। राध साध संसिद्धौ। लेटि बहुलं छंदसीति विकरणस्य लुक्। तिङ्ङतिङ इति निघातः। स्तोमं। ष्टुञ् स्तुतौ। अर्तिस्तुस्वित्यादिना भावे मन्। नित्त्वादाद्युदात्तत्वं। अर्यम्णः। षष्ठ्येकवचनेऽल्लोपोऽन इत्यकारलोपः। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। महि। मह पूजायां। औणादिक इन्प्रत्ययः। प्सरः। प्सा भक्षणे। प्साति भक्षयतीति प्सरो रूपं। औणादिको डरप्रत्ययः॥

अष्टमीमृचमाह॥

मा वो घ्नंतं मा शपंतं प्रति वोचे देवयंतं। सुम्नैरिद्व आ विवासे॥ ८॥

मा। वः। घ्नंतं। मा। शपंतं। प्रति। वोचे। देवऽयंतं। सुम्नैः। इत्। वः। आ। विवासे॥ ८॥

हे मित्रादयो देवाः। देवयंतं देवान्कामयमानं यजमानं यः शत्रुर्हंति घ्नंतं तादृशं शत्रुं वो युष्मभ्यं मा प्रतिवोचे। दुरुक्तकथनभीत्याहं न कथयामि। तथा यजमानं यः शत्रुः शपति तमपि शपंतं मा प्रतिवोचे। भवद्भिरेव विचार्य शिक्षणीय इत्यर्थः। अहं तु सुम्नैरित् धनैरेव वो युष्मानाविवासे। सर्वतः परिचरामि॥ घ्नंतं। हंतीति घ्नन्। गमहनेत्यादिनोपधालोपः। हो हंतेरिति कुत्वे प्रत्ययस्वरः। शपंतं। शप आक्रोशे। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः। वोचे। ब्रूञ् व्यक्तायां वाचि। माङि लुङीटि ब्रुवो वचिरिति वचिः। अस्यतिवक्तीत्यादिना च्लेरङादेशः। वच उमित्युमागमः। न माङ्योग इत्यडभावः। देवयंतं। सुप आत्मनः क्यच्। न छंदस्यपुत्रस्येतीत्वप्रतिषेधः। सुम्नैः। म्ना अभ्यासे। सुष्ठु म्नायतेऽभ्यस्यत इति सुम्नं। आतश्चोपसर्गे इति कप्रत्ययः। आतो लोप इटि चेत्याकारलोपः। विवासे। विवासतिः परिचरणकर्मा॥

नवमीमृचमाह॥

चतुरश्चिद्ददमानाद्बिभीयादा निधातोः। न दुरुक्ताय स्पृहयेत्॥ ९॥

चतुरः। चित्। ददमानात्। बिभीयात्। आ। निऽधातोः। न। दुःऽउक्ताय। स्पृहयेत्॥ ९॥

घ्नंतं शपंतं च मा प्रतिवोच इति यदुक्तं तत्रोपपत्तिरुच्यते । दुरुक्ताय न स्पृहयेत् । दुष्टं वाक्यं न कामयेत् किंतु दुरुक्ताद्बिभीयात् । तत्रावशिष्टो मंत्रभागः सर्वोऽपि दृष्टांतः । चिदित्युपमार्थे वर्तते । अक्षद्यूतं कुर्वतोरुभयोर्मध्ये यः पुमान् चतुरश्चतुःसंख्याकान्कपर्दकान्ददमानाद्ददतो हस्ते धारयतः पुरुषात् आ निधातोः कपर्दकनिपातपर्यंतं बिभीयात् अस्य जयो भविष्यति । न भविष्यतीत्यन्यो भीतिं प्राप्नुयात् । अत्र यथा भयं तथा दुरुक्ताद्भेतव्यमिति धर्मरहस्यं । तस्मादहं घ्नंतं शपंतं मा प्रतिवोच इत्यभिप्रायः । अत्र निरुक्तं । नि० ३. १६. । चतुरोऽक्षान्धारयत इति तद्यथा कितवाद्बिभीयादेवमेव दुरुक्ताद्बिभीयान्न दुरुक्ताय स्पृहयेदिति ॥ चतुरः । चतुरः शसीति विभक्तेः पूर्वस्योदात्तत्वं । ददमानात् । दद दाने । अत्र धारणार्थः । शपः पित्त्वादनुदात्तत्वं । अदुपदेशाल्लसार्वधातुकानुदात्तत्वेन शानजनुदात्तः । धातुस्वर एव शिष्यते । बिभीयात् । ञिभी भये । लिङि जुहोत्यादित्वाच्छपः श्लुः । यासुट उदात्तत्वं । पादादित्वान्निघाताभावः । निधातोः । निपूर्वाद्दधातेः सितनिगमीत्यादिना । उ० १. ६९. । भावे तुन्प्रत्ययः । व्यत्ययेनाद्युदात्तत्वं । तादौ चेति गतिस्वरो न भवति । अताविति पर्युदस्तत्वात् । दुरुक्ताय । स्पृहेरीप्सितः । पा० १. ४. ३६. । इति संप्रदानसंज्ञायां चतुर्थी संप्रदान इति चतुर्थी । स्पृहयेत् । स्पृह ईप्सायां । चुरादिरदंतः । अतो लोपस्य स्थानिवद्भावाल्लघूपधागुणाभावः ॥

॥ इति प्रथमस्य तृतीये त्रयोविंशो वर्गः ॥

सं पूषन्निति दशर्चं सप्तमं सूक्तं काण्वं गायत्रं पूषदेवताकं । सं पूषन्दश पौष्णमित्यनुक्रांतं । स्मार्ते महांतमध्वानमेष्यन्निदं सूक्तं जपेत् । सं पूषन्नध्वन इति महांतमध्वानमेष्यन् प्रतिभयं चेति सूचितत्वात् । तत्र जपेदित्यनुवर्तते ॥

तत्र प्रथमामृचमाह ॥

सं पूषन्नध्वनस्तिर व्यंहो विमुचो नपात् । सक्ष्वा देव प्र णस्पुरः ॥ १ ॥

सं । पूषन् । अध्वनः । तिर । वि । अंहः । विऽमुचः । नपात् । सक्ष्व । देव । प्र । नः । पुरः ॥ १ ॥

हे पूषन् जगत्पोषक पृथिव्यभिमानि देव । अध्वनो मार्गात्संतिर । अस्माभीष्टस्थानं सम्यक् प्रापय । अंहो विघ्नहेतुं पाप्मानं वितिर । विनाशय । पूषा

विशेष्यते। विमुचो नपात्। जलविमोचकहेतोर्मेघस्य पुत्र। नपादिति पुत्र-नाम। नपात्प्रजा इति तन्नामसु पाठात्। श्रुत्यंतरेऽद्भ्यः पृथिवीति जलाद्भू-म्युत्पत्तिः श्रूयते। तथान्यत्राप्युदकसारत्वं पृथिव्याः श्रूयते। तद्यदपां सार आ-सीत्तत्समहन्यत सा पृथिव्यभवदिति। मेघस्य जलधारित्वादुदकपुत्र एव मेघ-पुत्रो भवति। न च पृथिव्या मेघपुत्रत्वे पूष्णः किमायतमिति वाच्यं। पृथिव्या एव पूषत्वात्। तथा च श्रुत्यंतरे कस्यचिन्मंत्रस्य ब्राह्मणमेवमाम्नायते। पूषाध्वनः पात्वित्याहेयं वै पूषेति। तन्निर्वचनं चान्यत्रैवमाम्नायते। इयं वै पूषेयं हीदं सर्वं पुष्यति यदिदं किंचेति। हे देव पूषन् नः पुरः। अस्माकं पुरतः प्रसक्ष्वा। प्रसक्तो भव। पुरतो गच्छेत्यर्थः॥ विमुचो नपात्। उदकं विमुंचतीति विमुङ् मेघः। क्विप् चेति क्विप्। न पातयति कुलमिति नपात् पुत्रः। नञ्पूर्वात् पातयतेः क्विप्। नभ्राण्नपादित्यादिना नञः प्रकृतिभावः। सुबामंत्रित इति परांगवद्भावात् षष्ठ्यामंत्रितसमुदायस्याष्टमिकं सर्वानुदात्तत्वं। सक्ष्वा। षच सेवने। अनुदात्तेत्त्वादात्मनेपदं। लोटि बहुलं छंदसीति शपो लुक्। तास्यनु-दात्तेदिति लसार्वधातुकानुदात्तत्वे धातुस्वरः। प्र णः। उपसर्गाद्बहुलमिति नसो णत्वं। पुरः। उक्तं॥

द्वितीयामृचमाह॥

यो नः पूषन्नघो वृको दुःशेव आदिदेशति। अप स्म तं पथो जहि॥२॥

यः। नः। पूषन्। अघः। वृकः। दुःऽशेवः। आऽदिदेशति। अप। स्म। तं। पथः। जहि॥२॥

हे पूषन् यः प्रतिपक्षी नोऽस्मानादिदेशति। अनेन मार्गेण गंतव्यमित्ये-वमाज्ञापयति। कीदृशः। अघः। आहंता। वृकः। अस्मदीयधनस्यादाता। अपहर्तेत्यर्थः। दुःशेवः। सेवितुं दुःशकः। दुष्टसुखो वा। तं तादृशं प्रतिपक्षिणं पथो मार्गादपजहि स्म। अवश्यमपाकुरु॥ वृकः। वृक वृक आदाने। वर्कत इति वृकः। इगुपधलक्षणः कः। वृषादित्वादाद्युदात्तत्वं। दुःशेवः। दुष्टं शेवं यस्यासौ दुःशेवः। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। यद्वा दुःखेन सेव्यत इति दुःशेवः। वर्णव्यत्ययेन सकारस्य शकारः। ईषद्दुःसुष्विति खल्। लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं। आदिदेशति। दिश अति-सर्जने। लेट्यडागमः। बहुलं छंदसीति शपः श्लुः। बहुलं छंदसीति वक्तव्यं

। पा० ७. ३. ८७. २. । इति वचनान्नाभ्यस्तस्याचीति लघूपधगुणप्रतिषेधाभावः । पथः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं ॥

तृतीयामृचमाह ॥

अप त्यं परिपंथिनं मुषीवाणं हुरश्चितं । दूरमधि स्रुतेरज ॥ ३ ॥

अप । त्यं । परिऽपंथिनं । मुषीवाणं । हुरःऽचितं । दूरं । अधि । स्रुतेः । अज ॥ ३ ॥

त्यं तादृशं पूर्वोक्तगुणयुक्तं स्रुतेर्मार्गादधि दूरमत्यंतदूरदेशं प्रति अपाज । अपगमय । कीदृशं । परिपंथिनं । मार्गप्रतिबंधकं । मुषीवाणं । तस्कररूपं । मुषीवेति तस्करस्य नाम । मुषीवान् मलिम्लुच इति तन्नामसु पाठात् । हुरश्चितं । कौटिल्यानां संचेतारं ॥ परिपंथिनं । छंदसि परिपंथिपरिपरिणौ पर्यवस्थातरि । पा० ५. २. ८९. । इति शत्रावभिधेय इनिप्रत्ययांतो निपातितः । मुषीवाणं । मुष स्तेये । मोषणं मुषिः । औणादिको भावे किप्रत्ययः । मुषिं वनति संभजत इति मुषीवा । वन षण संभक्तौ । अन्येभ्योऽपि दृश्यंत इति विच्प्रत्ययः । सर्वनामस्थाने चासंबुद्धौ । पा० ६. ४. ८. । इति दीर्घः । अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घत्वं । हुरश्चिनोतीति हुरश्चित् । हुर्छा कौटिल्ये । संपदादिलक्षणः क्विप् । राल्लोप इति छकारलोपः । चिनोतेः क्विपि तुगागमः । तत्पुरुषे कृति बहुलमित्यलुक् । कृदुत्तरपदप्रकृतिस्वरत्वं । स्रुतेः । स्रु गतौ । क्तिच्क्तौ च संज्ञायामिति क्तिच् । चित इत्यंतोदात्तत्वं । अज । अज गतिक्षेपणयोः ॥

चतुर्थीमृचमाह ॥

त्वं तस्यं द्वयाविनोऽघशंसस्य कस्यं चित् । पदाभि तिष्ठ तपुषिं ॥ ४ ॥

त्वं । तस्यं । द्वयाविनः । अघऽशंसस्य । कस्यं । चित् । पदा । अभि । तिष्ठ । तपुषिं ॥ ४ ॥

हे पूषन् त्वं तस्य चोरस्य तपुषिं परसंतापकं देहं पदाभितिष्ठ । भवदीयेन पादेनाक्रम्य तिष्ठ । कीदृशस्य । द्वयाविनः । प्रत्यक्षापहारः परोक्षापहारश्चेति यद्द्वयं तद्युक्तस्य । अघशंसस्य । अस्मास्वनिष्टमघं शंसतः । अघशंस इति तस्करनाम । मलिम्लुचोऽघशंसो वृक इति तन्नामसु पाठात् । कस्यचिदनिर्दिष्टविशेषस्य कस्यापि ॥ द्वयाविनः । द्वयमस्यास्तीति द्वयावी । बहुलं छंदसीति मत्वर्थीयो विनिः । अन्येषामपि दृश्यत इति दीर्घत्वं । अघशंसस्य । अघे पापे शंसो मनस्यभिलाषो यस्य सोऽयमघशंसः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ।

तपुषिं । तापयत्यनेनान्यमिति तपुषिः । औणादिक उषिन्प्रत्ययः । बहुलवचनादिकारस्य नेत्संज्ञा । नित्त्वादाद्युदात्तत्वं ॥

पंचमीमृचमाह ॥

आ तत्ते दस्र मंतुमः पूषन्नवो वृणीमहे । येन पितॄनचोदयः ॥ ५ ॥

आ । तत् । ते । दस्र । मंतुऽमः । पूषन् । अवः । वृणीमहे । येन । पितॄन् । अचोदयः ॥ ५ ॥

हे मंतुमः । ज्ञानवन्दस्र दर्शनीय । यद्वा वैर्युपक्षयकारिन् पूषन् । ते त्वदीयं तदवस्ताहशं रक्षणमावृणीमहे । सर्वतः प्रार्थयामहे । येन रक्षणेन पितॄन् अंगिरःप्रभृतीन्पितृदेहानचोदयः । प्रेरितवानसि । तद्रक्षणमिति पूर्वेणान्वयः ॥ दस्र । दसि दंसनदर्शनयोः । स्फायितंचीत्यादिना रक् । आगमानुशासनस्यानित्यत्वान्नुमभावः । यद्वा दसु उपक्षय इत्यस्मादंतर्भावितण्यर्थात्पूर्ववद्रक् । मंतुमः । मन ज्ञाने । कमिमनिजनीत्यादिना भावे तुप्रत्ययः । मंतुर्ज्ञानमस्यास्तीति मंतुमान् । संबुद्धौ मतुवसो रुरिति रुत्वं । अचोदयः । चुद संचोदने । चौरादिकः ॥

॥ इति प्रथमस्य तृतीये चतुर्विंशो वर्गः ॥

षष्ठीमृचमाह ॥

अधा नो विश्वसौभग हिरण्यवाशीमत्तम । धनानि सुषणा कृधि ॥ ६ ॥

अध । नः । विश्वऽसौभग । हिरण्यवाशीमत्ऽतम । धनानि । सुऽसना । कृधि ॥ ६ ॥

हे विश्वसौभग । कृत्स्नधनयुक्त । यद्वा कृत्स्नसौभाग्ययुक्त । हिरण्यवाशीमत्तम । अतिशयेन सुवर्णमयायुधवन् पूषन् । अधा पूर्वोक्तास्मदीयप्रार्थनानंतरं नोऽस्माकं धनानि सुवर्णमणिमुक्तादीनि सुषणा सुष्ठु दानयुक्तानि कृधि । कुरु ॥ अधा । अथशब्दे धत्वं छांदसं । निपातस्य चेति संहितायां दीर्घत्वं । विश्वसौभग । सुभगान्मंत्रे । पा० ५. १. १२९. । इत्युद्गात्रादिषु पाठाद्भावेऽञ् । हृद्भगसिंध्वंते पूर्वपदस्य च । पा० ७. ३. १९. । इत्युत्तरपदवृद्धौ प्राप्तायां सत्यां सर्वविधीनां छंदसि विकल्पितत्वादुत्तरपदवृद्धिर्न भवतीति वृत्तावुक्तं । विश्वानि सौभगानि यस्यासौ विश्वसौभगः । आमंत्रितनिघातः । हिरण्यवाशीमत्तम । हिरण्यमयी वाशी । तदेषामस्तीति हिरण्यवाशीमंतः । अतिशयेन हिरण्यवाशीमान् हिरण्यवाशी-

मत्तमः। आमंत्रितनिघातः। सुषणा। वन षण संभक्तौ। सुखेन संभज्यंत इति सुषणानि। ईषद्दुःसुष्विति खल्। शेश्छंदसीति शेर्लोपः। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं। कृधि। डुकृञ् करणे। श्रुशृणुपृकृवृभ्यश्छंदसीति हेर्धिरादेशः। बहुलं छंदसीति विकरणस्य लुक् ॥

सप्तमीमृचमाह ॥

अति नः सश्चतो नय सुगा नः सुपथा कृणु। पूषन्निह क्रतुं विदः ॥ ७ ॥

अति। नः। सश्चतः। नय। सुऽगा। नः। सुऽपथा। कृणु। पूषन्। इह। क्रतुं। विदः ॥ ७ ॥

सश्चतोऽस्मद्बाधनाय प्राप्नुवतः शत्रूनोऽति। अस्मानतिक्रम्य नय। अन्यत्र प्रापय। नोऽस्मान् सुगा सुष्ठु गंतुं शक्येन सुपथा शोभनमार्गेण कृणु। गंतॄन्कुरु। हे पूषन् इहाध्वनि क्रतुं प्रज्ञानमस्मद्रक्षणरूपं विदः। जानीहि ॥ सश्चतः। ग्लुंचु षस्ज गतावित्यत्र सश्चिमप्येके पठंतीति धातुवृत्तावुक्तं। अस्माल्लटः शतृ। बहुलं छंदसीति शपो लुक्। प्रत्ययस्वरेण शतुरुदात्तत्वं। शतुरनुम इति विभक्त्युदात्ताभावश्छांदसः। सुगा। सुष्ठु गच्छंत्यत्रेति सुगः। सुदुरोरधिकरण इति गमेर्डप्रत्ययः। सुपां सुलुगिति तृतीयाया आकारः। सुपथा। शोभनेन पथा। न पूजनादिति समासांतप्रतिषेधः। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। क्त्वादयश्चेत्युत्तरपदाद्युदात्तत्वं न भवति। अबहुव्रीहित्वात्। तत्र हि बहुव्रीहाविति वर्तते। कृणु। कृवि हिंसाकरणयोः। धिन्विकृण्व्योरच्चेत्युप्रत्ययः। उतश्च प्रत्ययादिति हेर्लुक्। विदः। विद ज्ञाने। लेटोऽडागमः। इतश्च लोप इतीकारलोपः ॥

अष्टमीमृचमाह ॥

अभि सूयवसं नय न नवज्वारो अध्वने। पूषन्निह क्रतुं विदः ॥ ८ ॥

अभि। सुऽयवसं। नय। न। नवऽज्वारः। अध्वने। पूषन्। इह। क्रतुं। विदः ॥ ८ ॥

हे पूषन् सूयवसं शोभनतृणोपलक्षितं सर्वौषधियुक्तं देशमभि नय। अस्मानभितः प्रापय। अध्वने मार्गाय नवज्वारो नूतनः संतापो न भवत्विति शेषः। मार्गे गच्छतामस्माकमिदानींतनः क्लेशः कोऽपि मा भूदित्यर्थः। गतार्थमन्यत् ॥ सूयवसं। शोभनं यवसं यस्मिन्देशे स सूयवसो देशः। निपातस्य चेति पूर्वपदस्य

दीर्घत्वं । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । क्रत्वादिर्वा द्रष्टव्यः । नव-ज्वारः । ज्वर रोगे । भावे घञ् । नवश्चासौ ज्वारो नवज्वारः । थाथादिनोत्त-रपदांतोदात्तत्वं ॥

नवमीमृचमाह ॥

शग्धि पूर्धि प्र यंसि च शिशीहि प्रास्युदरं । पूषन्निह क्रतुं विदः ॥ ९ ॥

शग्धि । पूर्धि । प्र । यंसि । च । शिशीहि । प्रासि । उदरं । पूषन् । इह । क्रतुं । विदः ॥ ९ ॥

हे पूषन् शग्धि । अस्माननुग्रहीतुं शक्तो भव । पूर्धि । अस्मद्गृहं धनेन पूरय । किंच प्र यंसि । अन्यदप्यपेक्षितं वस्तु प्रयच्छ । शिशीहि । अस्मान्सर्वेषु मध्ये तीक्ष्णीकुरु । तेजस्विनः कुर्वित्यर्थः । उदरमस्मदीयं प्रासि मृष्टान्नेन सोम-रसेन वा पूरय । अन्यत्पूर्ववत् ॥ शग्धि । शक्लृ शक्तौ । लोटो हिः । बहुलं छंदसीति विकरणस्य लुक् । हुझल्भ्यो हेर्धिरिति धिरादेशः । हेरपित्त्वात्प्रत्यय-स्वरेणोदात्तत्वं । पूर्धि । पॄ पालनपूरणयोः । श्रुशृणुपॄकृवृभ्यश्छंदसीति हेर्धिरा-देशः । पूर्ववद्विकरणस्य लुक् । उदोष्ठ्यपूर्वस्येत्युत्वं । हलि चेति दीर्घः । तिङः परत्वान्निघाताभावः । यंसि । यम उपरमे । लोडर्थे लटि पूर्ववद्विकरणस्य लुक् । निघातः । शिशीहि । शो तनूकरणे । लोटि बहुलं छंदसीत्यभ्यासस्येत्वं । ई हल्यघोरितीत्वं । प्रत्ययस्वरः । प्रासि । प्रा पूरणे । अदादित्वाच्छपो लुक् । सिपः पित्त्वादनुदात्तत्वे धातुस्वरः ॥

दशमीमृचमाह ॥

न पूषणं मेथामसि सूक्तैरभि गृणीमसि । वसूनि दस्ममीमहे ॥ १० ॥

न । पूषणं । मेथामसि । सुऽउक्तैः । अभि । गृणीमसि । वसूनि । दस्मं । ईमहे ॥ १० ॥

पूषणं देवं न मेथामसि । वयं न तु निंदामः । किंतु सूक्तैर्वेदगतैरभिगृणीमसि । सर्वत्र स्तुमः । दस्मं दर्शनीयं पूषणं प्रति वसूनि धनानीमहे । याचामहे ॥ मेथा-मसि । मेथृ मेधाहिंसनयोः । लटीदंतो मसिरिति मस इकारागमः । सूक्तैः । सुष्ठु स्तुवते देवताः प्रकाशयंतीति सूक्तानि । क्तिच्क्तौ च संज्ञायामिति कर्तरि क्तः । वचिस्वपीत्यादिना संप्रसारणं । थाथादिस्वरः । यद्वा कर्मणि निष्ठा । सूपमानात् क्तः । पा॰ ६. २. १४५. । इत्युत्तरपदांतोदात्तत्वं । गृणीमसि । गॄ शब्दे ।

प्यादीनां ह्रस्व इति ह्रस्वत्वं। इदंतो मसिः। दस्मं। इषियुधीधिदसिश्याधूसूभ्यो मगिति मक्प्रत्ययः॥

॥ इति प्रथमस्य तृतीये पंचविंशो वर्गः॥

कद्रुद्रायेति नवर्चमष्टमं सूक्तं। अत्रानुक्रम्यते। कद्रुद्राय नव रौद्रं तृतीया मैत्रावरुणी चांत्यस्तृचः सौम्योऽत्यानुष्टुबिति। घोरपुत्रः कण्व ऋषिः। गायत्री छंदः। यास्ते प्रजा इत्यंत्यानुष्टुप्। रुद्रो देवता। यथा नो मित्र इत्येषा मित्रावरुणदेवताका च। अस्मे सोमेत्यादिरंत्यस्तृचस्तु सौम्य एव। सर्वेषु रुद्रदेवताकेषु कर्मस्वनेन सूक्तेन दिगुपस्थानं कर्तव्यं। तथा च सूत्रितं। कद्रुद्रायेमा रुद्राया ते पितरिमा रुद्राय स्थिरधन्वने गिर इति सर्वरुद्रयज्ञेषु दिशामुपस्थानमिति॥

तत्र प्रथमामृचमाह॥

कद्रुद्राय प्रचेतसे मीळ्हुष्टमाय तव्यसे। वोचेम शंतमं हृदे॥१॥

कत्। रुद्राय। प्रऽचेतसे। मीळ्हुःऽतमाय। तव्यसे। वोचेम। शंऽतमं। हृदे॥१॥

कत् कदा रुद्रायैतन्नामकाय देवाय शंतममतिशयेन सुखकरं स्तोत्रं वोचेम। पठेम। कीदृशाय। प्रचेतसे। प्रकृष्टज्ञानयुक्ताय। मीळ्हुष्टमाय। सेक्तृतमाय। अभीष्टकामवर्षायेत्यर्थः। तव्यसे। अतिशयेन प्रवृद्धाय। हृदे। अस्मदीयहृन्निष्ठाय॥ कत्। कदा। अंत्यलोपश्छांदसः। रुद्राय। रोदयति सर्वमंतकाल इति रुद्रः। रोदेर्णिलुक् चेति रक्प्रत्ययः। प्रचेतसे। चिती संज्ञाने। प्रकृष्टं चेततीति प्रचेताः। गतिकारकयोरिति पूर्वपदप्रकृतिस्वरत्वं चेत्यसुन् पूर्वपदप्रकृतिस्वरत्वं च। मीळ्हुष्टमाय। अतिशयेन मीढ्वान् मीळ्हुष्टमः। दाश्वान् साह्वान् मीढ्वांश्चेति क्वसुप्रत्ययांतो निपातितः। तमप्ययस्मयादित्वेन भत्वाद्वसोः संप्रसारणमिति संप्रसारणं। शासिवसिघसीनां चेति षत्वं। तव्यसे। तवतिर्वृद्ध्यर्थः। सौत्रो धातुः। अतिशयेन तविता तवीयान्। तुश्छंदसीतीयसुन्प्रत्ययः। तुरिष्ठेमेयःस्विति तृलोपः। ईयसुन ईकारलोपश्छांदसः। नित्त्वादाद्युदात्तत्वं। वोचेम। वच परिभाषणे। लिङ्याशिष्यङ्। वच उमित्युमागमः। यासुटः स्वरेणैकार उदात्तः। हृदे। पद्दन्नित्यादिना हृदयशब्दस्य हृदादेशः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं॥

द्वितीयामृचमाह ॥

यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे । यथा तोकाय रुद्रियं ॥ २ ॥

यथा । नः । अदितिः । करत् । पश्वे । नृऽभ्यः । यथा । गवे । यथा । तोकाय । रुद्रियं ॥ २ ॥

अदितिर्भूमिर्नोऽस्माकं रुद्रियं रुद्रसंबंधि भेषजं यथा येन प्रकारेण सिध्यति करत् । तथा करोतु । किंच यथा येन प्रकारेण पश्वेऽस्मदीयाश्वमहिष्यादिपशवे नृभ्योऽस्मदीयपुरुषेभ्यो विशेषेण गवे गोजातये हितं रुद्रियं सिध्यति तथा करोतु । किंच तोकायास्मदीयापत्याय रुद्रियं यथा सिध्यति तथा करोतु । भेषजस्य रुद्रसंबंधित्वं मंत्रांतरे समाम्नातं । या ते रुद्र शिवा तनूः शिवा विश्वा हा भेषजी शिवा रुद्रस्य भेषजीति । गवादिविषये भेषजं चान्यच स्पष्टमाम्नातं । भेषजं गवेऽश्वाय पुरुषाय भेषजमस्मभ्यं भेषजं सुभेषजमिति ॥ करत् । डुकृञ् करणे । लङि व्यत्ययेन शप् । यद्वा लेट्यडागमः । इतश्चलोप इतीकारलोपः । यद्वा लुङि कृमृदृरुहिभ्यश्छंदसीति च्लेरङादेशः । ऋदृशोऽङि गुण इति गुणः । आद्ययोः पक्षयोः प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । तृतीये तु व्यत्ययेन । यद्वृत्तयोगादनिघातः । पश्वे । संज्ञापूर्वकस्य विधेरनित्यत्वात् घेर्ङितीति गुणाभावः । यणादेशः । नृभ्यः । नृ चान्यतरस्यामिति विभक्त्युदात्तत्वाभावः । गवे । सावेकाच इति प्राप्तस्य विभक्त्युदात्तस्य न गोश्वन्साववर्णेति प्रतिषेधः । रुद्रियं । रुद्रशब्दात्तस्येदमित्यर्थे घप्रत्ययः ॥

तृतीयामृचमाह ॥

यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति । यथा विश्वे सजोषसः ॥ ३ ॥

यथा । नः । मित्रः । वरुणः । यथा । रुद्रः । चिकेतति । यथा । विश्वे । सऽजोषसः ॥ ३ ॥

मित्रो वरुणश्च नोऽस्मान्यथा येन प्रकारेण चिकेतति । अनुग्राह्यत्वेन जानाति । रुद्रोऽपि यथा चिकेतति । सजोषसः समानप्रीतयो विश्वे सर्वे देवा यथा चिकेतंति तथा भवत्विति शेषः । यद्वा यथाशब्दोपेतमंत्रद्वयस्य तथा कदा वोचेमेति पूर्वत्रान्वयः ॥ चिकेतति । कित ज्ञाने । लेट्यडागमः । नाभ्यस्तस्येति गुणनिषेधो न भवति । बहुलं छंदसीति वक्तव्यमिति वचनात् । सार्वधातुकत्वाच्चाभ्यस्तानामादिरित्याद्युदात्तत्वं । सजोषसः । जुषी प्रीतिसेवनयोः । समानं

जुषंतीति सजोषसः । समानस्य छंदसीति सभावः । असुनो नित्त्वादुत्तरपदस्याद्युदात्तत्वं । तदेव कृदुत्तरपदप्रकृतिस्वरत्वेन शिष्यते ॥

चतुर्थीमृचमाह ॥

गाथपतिं मेधपतिं रुद्रं जलाषभेषजं । तच्छंयोः सुम्नमीमहे ॥ ४ ॥

गाथऽपतिं । मेधऽपतिं । रुद्रं । जलाषऽभेषजं । तत् । शंऽयोः । सुम्नं । ईमहे ॥ ४ ॥

रुद्रमभिलक्ष्य वयं शंयोर्बृहस्पतिपुत्रस्य संबंधि तत्प्रसिद्धं सर्वप्रजाभ्यो हितं सुम्नं सुखमीमहे । याचामहे । कीदृशं रुद्रं । गाथपतिं । स्तुतिपालकं । मेधपतिं । यज्ञपालकं । जलाषभेषजं । सुखरूपौषधोपेतं । यद्वा । उदकरूपौषधोपेतं । उदकं हि रुद्रनामाभिमंत्रितं सदौषधं भवति ॥ गाथपतिं । गाथेति वाङ्नाम । गाथा गण इति तन्नामसु पठितत्वात् । वाग्रूपाया स्तुतेः पतिर्गाथपतिः । कै गै रै शब्दे । आदेच इत्यात्वं । उषिकुषिगार्तिभ्यस्थन्निति थन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं । ङ्यापोः संज्ञाछंदसोर्बहुलमिति पूर्वपदस्य ह्रस्वत्वं । पत्यावैश्वर्ये इति पूर्वपदप्रकृतिस्वरे प्राप्ते मरुद्वृधादीनां छंदस्युपसंख्यानमिति पूर्वपदांतोदात्तत्वं । मेधपतिं । पूर्ववत् । जलाषभेषजं । जनी प्रादुर्भावे । जायंत इति जाः । अन्येष्वपि दृश्यत इति दृशिग्रहणात्केवलादपि डप्रत्ययः । लष कांतौ । कांतिरभिलाषः । भावे घञ् । जानां लाषो यस्मिन्तज्जलाषं सुखं । जलाषरूपं भेषजं यस्मिन्रुद्रे स जलाषभेषजः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । शंयोः । कंशंभ्यां । पा॰ ५. २. १३८. । इति मत्वर्थीयो युसप्रत्ययः । सिति च । पा॰ १. ४. १६. । इति पदसंज्ञायामनुस्वारपरसवर्णौ । प्रत्ययस्वरः ॥

पंचमीमृचमाह ॥

यः शुक्र इव सूर्यो हिरण्यमिव रोचते । श्रेष्ठो देवानां वसुः ॥ ५ ॥

यः । शुक्रःऽइव । सूर्यः । हिरण्यंऽइव । रोचते । श्रेष्ठः । देवानां । वसुः ॥ ५ ॥

यो रुद्रः सूर्य इव शुक्रः सूर्यवद्दीप्तिमान् हिरण्यमिव रोचते । यथा सर्वेषां प्राणिनां हिरण्यं प्रीतिकरं भवति तथा रुद्रोऽपि । स च देवानां सर्वेषां मध्ये श्रेष्ठः । वसुर्निवासहेतुश्च ॥ रोचते । रुच दीप्तावभिप्रीत्यां च । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । श्रेष्ठः । प्रशस्यतरः । प्रशस्यशब्दादिष्ठनि प्रशस्यस्य श्र इति आदेशः । नित्त्वादाद्युदात्तत्वं । वसुः । वासयति सर्वमिति वसुः । वस

निवासे। अंतर्भावितण्यर्थात् भृस्वृस्निहीत्यादिनोप्रत्ययः। निदित्यनुवृत्तेराद्युदात्तत्वं ॥

॥ इति प्रथमस्य तृतीये षड्विंशो वर्गः ॥

आग्निमारुते शं नः करतीति धाय्या। अथ यथेतमिति खंडे सूचितं। वैश्वानराय पृथुपाजसे शं नः करत्यर्वते। आ० ५. २०.। इति ॥

तामेतां सूक्ते षष्ठीमृचमाह ॥

शं नः॑ कर॒त्यर्व॑ते सु॒गं मे॒षाय॑ मे॒ष्ये॑। नृभ्यो॒ नारि॑भ्यो॒ गवे॑ ॥ ६ ॥

शं। नः॒। क॒र॒ति॒। अर्व॑ते। सु॒ऽगं। मे॒षाय॑। मे॒ष्ये॑। नृऽभ्यः॑। नारि॑ऽभ्यः। गवे॑ ॥ ६ ॥

नोऽस्माकं संबंधिभ्योऽर्वदादिभ्यः सुगं सुष्ठु गम्यं शं सुखं करति। देवः करोति। अर्वतेऽश्वाय। अर्वच्छब्दोऽश्वनाम। अर्वा वाजीति तन्नामसु पाठात्। मेषाय मेषजातिपुरुषाय। मेष्ये तज्जातीयस्त्रियै। नृभ्यः पुरुषेभ्यः। नारिभ्यः स्त्रीभ्यः। गवे गोजातये ॥ करति। डुकृञ् करणे। व्यत्ययेन शप्। अर्वते। अर्ति गच्छतीत्यर्वा। अन्येभ्योऽपि दृश्यंत इति वनिप्। चतुर्थ्येकवचनेऽर्वणस्त्रसावनञ इति नकारस्य तृ आदेशः। वनिप्सुपौ पित्त्वादनुदात्तौ। धातुस्वरः। मेषाय। मिष स्पर्धायां। पचाद्यच् देवसेनमेषादयः पचादिषु द्रष्टव्या इति वचनात्। मेष्ये। जातेरस्त्रीविषयादयोपधात्। पा० ४. १. ६३.। इति ङीष्प्रत्ययः। प्रत्ययस्वरः। चतुर्थ्येकवचन आगमानुशासनस्यानित्यत्वादाडागमाभावः। उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्येति स्वरितत्वं। उदात्तयणो हल्पूर्वादिति तु न भवति सर्वे विधयश्छंदसि विकल्प्यंत इति वचनात्। नृभ्यः। सावेकाच इति प्राप्तस्य विभक्त्युदात्तत्वस्य नृ चान्यतरस्यामिति प्रतिषेधः। नारिभ्यः। नृनरयोर्वृद्धिश्च। पा० ४. १. ७३.। इति शार्ङ्गरवादिषु पाठात् ङीन्प्रत्ययः। नित्त्वादाद्युदात्तः। गवे। न गोश्वन्साववर्णेति विभक्त्युदात्तस्य प्रतिषेधः ॥

सप्तमीमृचमाह ॥

अ॒स्मे सो॑म॒ श्रिय॒मधि॒ नि धे॑हि श॒तस्य॑ नृ॒णां। महि॒ श्रव॑स्तुविनृ॒म्णं ॥ ७ ॥

अ॒स्मे इति॑। सो॒म॒। श्रिय॑ं। अधि॑। नि। धे॒हि॒। श॒तस्य॑। नृ॒णां। महि॑। श्रव॑ः।
तु॒वि॒ऽनृ॒म्णं ॥ ७ ॥

हे सोम देव नृणां पुरुषाणां शतस्य पर्याप्तां श्रियमस्मेऽस्मास्वधि निधेहि। आधिक्येन स्थापय। तथा महि महत् तुविनृम्णं प्रभूतबलयुक्तं श्रवोऽन्नमधि-निधेहि ॥ अस्मे। सुपां सुलुगिति सप्तम्याः शे आदेशः। नृणां। नृ च। पा० ६. ४. ६.। इति दीर्घप्रतिषेधः। नामन्यतरस्यामिति नाम उदात्तत्वं। महीत्यादयो गताः ॥

अष्टमीमृचमाह ॥

मा नः सोमपरिबाधो मारातयो जुहुरंत। आ न इंदो वाजे भज ॥ ८ ॥

मा। नः। सोमऽपरिबाधः। मा। अरातयः। जुहुरंत। आ। नः। इंदो इति। वाजे। भज ॥ ८ ॥

सोमपरिबाधः सोमस्य परितो बाधका यागरहिता नोऽस्मान् मा जुहुरंत। मा हिंसंतु। तथारातयः शत्रवो मा जुहुरंत। हे इंदो सोम वाजे बलविषयेऽन्नविषये वा नोऽस्मानाभज। सर्वतः सेवस्व ॥ सोमपरिबाधः। सोमं परिबाधंते ये ते तादृशाः। क्विप् चेति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं। अरातयः। रा दाने। कृत्यल्युटो बहुलमिति बहुलवचनात्कर्तरि क्तिन्। यद्वा क्तिचक्तौ च संज्ञायामिति क्तिच्। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं। जुहुरंत। ह्वृ प्रसह्यकरणे। व्यत्ययेनात्मनेपदं। लङि जुहोत्यादित्वात् श्लुः। बहुलं छंदसीति बहुलवचनादिकारस्याप्युत्वं। द्विर्भावहलादिशेषौ। सर्वे विधयश्छंदसि विकल्प्यंत इति वचनाददभ्यस्तात्। पा० ७. १. ४.। इत्यदादेशाभावे सति झोऽंत इत्यंतादेशः। न माङ्योग इत्यडभावः ॥

नवमीमृचमाह ॥

यास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य।
मूर्धा नाभा सोम वेन आभूषंतीः सोम वेदः ॥ ९ ॥

याः। ते। प्रऽजाः। अमृतस्य। परस्मिन्। धामन्। ऋतस्य।
मूर्धा। नाभा। सोम। वेनः। आऽभूषंतीः। सोम। वेदः ॥ ९ ॥

हे सोम ते तव संबंधिन्यो याः प्रजाः संति स्तोत्रं वा कुर्वंति ताः प्रजाः मूर्धा शिरःस्थानीयस्त्वं नाभा संनहनयुक्ते यज्ञगृहे वेनः। कामयस्व। कीदृशस्य

ते। अमृतस्य। मरणरहितस्य। परस्मिन्धामन्वृतस्य। उत्तमे स्थाने प्राप्तस्य। हे सोम आभूषंतीः सर्वतस्त्वामलंकुर्वतीः प्रजाः वेदः। जानीहि॥ धामन्। सुपां सुलुगिति सप्तम्या लुक्। नाभा। णह बंधने। नहो भश्च। उ० ४. १२७.। इति कर्मणीञ्प्रत्ययः। ञित्त्वादाद्युदात्तत्वं। सुपां सुलुगिति सप्तम्या डादेशः। वेनः। वेनतिः कांतिकर्मा। लेटि सिप्यडागमः। तिङ्ङतिङ इति निघातः। आभूषंतीः। भूष अलंकारे। भौवादिकः। शपः पित्त्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वरेण धातुस्वरेणाद्युदात्तत्वं। समासे कृदुत्तरपदप्रकृतिस्वरत्वं। वेदः। विद ज्ञाने। लेटि सिप्यडागमः॥

॥ इति प्रथमस्य तृतीये सप्तविंशो वर्गः॥

॥ इति ऋक्संहितायां प्रथमे मंडलेऽष्टमोऽनुवाकः॥

नवमेऽनुवाके सप्त सूक्तानि। तत्राग्ने विवस्वदिति चतुर्दशर्चं प्रथमं सूक्तं। तत्रानुक्रमणिका। अग्ने षळूना प्रस्कण्वः काण्व आग्नेयं तु प्रागाथं। आद्यो द्वृचोऽश्व्युषसां चेति। कण्वपुत्रः प्रस्कण्व ऋषिः। अत्र द्वितीयाचतुर्थ्याद्या युजः सतोबृहत्यः। प्रथमातृतीयाद्या अयुजो बृहत्यः। कृत्स्नं सूक्तमाग्नेयमुत्तरं च। आद्ये द्वे अश्विदेवताके उषोदेवताके च॥ प्रातरनुवाक आग्नेय क्रतौ बार्हते छंदस्याश्विने शस्त्रे चेदं सूक्तं। अथैतस्या रात्रेरिति खंडे सूचितं। अग्ने विवस्वत्सखायस्त्वा। आ० ४.१३.। इति॥ वाजपेय आग्निमारुत आद्यः प्रगाथोऽनुरूपः। वाजपेयेनेति खंडे सूचितं। चित्रवतीषु चेत् स्तुवीरन् त्वं नश्चित्र ऊत्याग्ने विवस्वदुषस इत्यग्निष्टोमसाम्नः स्तोत्रियानुरूपौ। आ० ९. ९.। इति॥ पर्यायव्युष्टावाश्विनशस्त्रस्यायमेव प्रगाथः स्तोत्रियः। यदि पर्यायानभिव्युच्छेदिति खंड आश्विनायैकस्तोत्रियोऽग्ने विवस्वदुषसः। आ० ६. ६.। इति सूचितं॥

तत्र प्रथमामृचमाह॥

अग्ने विवस्वदुषसश्चित्रं राधो अमर्त्य।

आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः॥ १॥

अग्ने। विवस्वत्। उषसः। चित्रं। राधः। अमर्त्य।

आ। दाशुषे। जातऽवेदः। वह। त्वं। अद्य। देवान्। उषःऽबुधः॥ १॥

हे अग्ने त्वमुषस उषोदेवतायाः सकाशाद्राधो धनं दाशुषे हविर्दत्तवते यजमानायावह । आनीय प्रापय । सोऽग्निर्विशेष्यते । अमर्त्य । मरणरहित । जातवेदः । जातानां वेदितः । तमेतं शब्दं यास्को व्याचष्टे । जातवेदाः कस्मात् । जातानि वेद जातानि वैनं विदुर्जाते जाते विद्यत इति वा जातवित्तो वा जातधनो वा जातविद्यो वा जातप्रज्ञो वा यत्तज्जातः पशूनविंदतेति तज्जातवेदसो जातवेदस्त्वमिति ब्राह्मणं । तस्मात्सर्वानृतून्पशवोऽग्निमभिसर्पंतीति च । नि॰ ७.१९. । इति । कीदृशं राधः । विवस्वत् । विशिष्टनिवासोपेतं । चित्रं । नानाविधं । किंच । अद्यास्मिन्दिन उषर्बुध उषःकाले प्रबुद्धान्देवानावह ॥ विवस्वत् । विवासनं विवः । तद्युक्तं । वस निवासने । विपूर्वादंतर्भावितण्यर्थात्संपदादिलक्षणो भावे क्विप् । तदस्यास्तीति मतुप् । मादुपधाया इति वत्वं । तसौ मत्वर्थ इति भत्वेन पदत्वाभावाद्रुत्वाद्यभावः । वृषादित्वादाद्युदात्तत्वं । राधः । राध साध संसिद्धौ । राध्नोत्यनेनेति राधो धनं । करणेऽसुन् । नित्त्वादाद्युदात्तत्वं । दाशुषे । दाशृ दाने । दाश्वान् साह्वानिति क्वसुप्रत्ययांतो निपातितः । चतुर्थ्येकवचने वसोः संप्रसारणमिति संप्रसारणं । शासिवसीति षत्वं । जातवेदः । जातानि वेत्तीति जातवेदाः । गतिकारकयोरिति पूर्वपदप्रकृतिस्वरत्वं चेत्यसुन् । यद्वा वेद इति धननाम । जातं धनं यस्य स तादृशः । आमंत्रितनिघातः । वहा । द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं । देवान् । दीर्घादटि समानपाद इति संहितायां नकारस्य रुत्वं । आतोऽटि नित्यमिति सानुनासिक आकारः । उषर्बुधः । उषसि बुध्यंत इत्युषर्बुधः । बुध अवगमने । क्विप् चेति क्विप् । रो रुत्वाभावश्छांदसः । कृदुत्तरपदप्रकृतिस्वरत्वं ॥

द्वितीयामृचमाह ॥

जुष्टो हि दूतो असि हव्यवाहनोऽग्ने रथीरध्वराणां ।
सजूरश्विभ्यामुषसा सुवीर्यमस्मे धेहि श्रवो बृहत् ॥ २ ॥
जुष्टः । हि । दूतः । असि । हव्यऽवाहनः । अग्ने । रथीः । अध्वराणां ।
सऽजूः । अश्विऽभ्यां । उषसा । सुऽवीर्यं । अस्मे इति । धेहि । श्रवः । बृहत् ॥ २ ॥

हे अग्ने त्वं जुष्टत्वादिविशेषगुणयुक्तोऽसि । जुष्टः सेवितो दूतो देवानां वार्ताहारः । हव्यवाहनः । हविषो वोढा । अध्वराणां क्रतूनां रथीः । रथस्थानीयः ।

तथा च मंत्रांतरं ब्राह्मणेनैव व्याख्यातं । रथीरध्वराणामित्याहैष हि देवरथ इति । ब्राह्मणांतरं च । रथीरध्वराणामित्याह । रथो ह वा एष भूतेभ्यो देवेभ्यो हव्यं वहतीति । तादृशस्त्वमश्विभ्यां देवताभ्यामुषसा देवतया च सजूः सहितो भूत्वा सुवीर्यं शोभनवीर्योपेतं बृहत् प्रभूतं श्रवोऽन्नमस्मे धेहि । अस्मासु प्रक्षिप ॥ जुष्टः । जुषी प्रीतिसेवनयोः । नित्यं मंत्र इत्याद्युदात्तत्वं । असि । सिपि तासस्त्योर्लोप इति सलोपः । हि चेति निघातप्रतिषेधः । हव्यवाहनः । हव्यं वहतीति हव्यवाहनः । हव्येऽनंतःपादं । पा० ३. २. ६६. । इति ञ्युट् । योरनादेशः । जिह्वादाद्युदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वं । अग्ने । पादादित्वादाष्टमिकनिघाताभावः । रथीः । रथशब्दात्स्वार्थिक ईकारप्रत्ययः । अध्वराणां । ध्वरो नास्त्येष्विति बहुव्रीहौ नञसुभ्यामित्युत्तरपदांतोदात्तत्वं । सुवीर्यं । वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं । अस्मे । सुपां सुलुगिति सप्तम्याः शे आदेशः ॥

तृतीयामृचमाह ॥

अद्या दूतं वृणीमहे वसुमग्निं पुरुप्रियं ।
धूमकेतुं भाऋजीकं व्युष्टिषु यज्ञानामध्वरश्रियं ॥ ३ ॥
अद्य । दूतं । वृणीमहे । वसुं । अग्निं । पुरुऽप्रियं ।
धूमऽकेतुं । भाःऽऋजीकं । विऽउष्टिषु । यज्ञानां । अध्वरऽश्रियं ॥ ३ ॥

अद्यास्मिन्दिनेऽग्निं वृणीमहे । प्रार्थयामहे । कीदृशं । दूतं । वार्ताहारं । वसुं । निवासहेतुं । पुरुप्रियं । बहूनां प्रियं । धूमकेतुं । धूमरूपध्वजयुक्तं । भाऋजीकं । प्रसिद्धभासालंकृतं । भाऋजीकः प्रसिद्धभाः । नि० ६. ४. । इति यास्कवचनं । व्युष्टिषूषःकालेषु यज्ञानां यजमानानामध्वरश्रियं । यागसेविनं ॥ अद्या । निपातस्य चेति दीर्घत्वं । पुरूणां प्रियः पुरुप्रियः । समासस्येत्यंतोदात्तत्वं । धूमकेतुं । इषुयुधीधीत्यादिना धूमशब्दो मक्प्रत्ययांतोऽंतोदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । भाऋजीकं । ऋज गतिस्थानार्जनोपार्जनेषु । ऋजेश्च । उ० ४. २२. । इतीकन्प्रत्ययः । कित्त्वस्यानुवर्तनाद्गुणाभावः । भासः प्रकाशस्य ऋजीकः प्रार्जयिता । आद्युदात्तप्रकरणे दिवोदासादीनां छंदस्युपसंख्यानमिति पूर्वपदाद्युदात्तत्वं । यद्वा भासोऽर्जनं यस्मिन् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । व्युष्टिषु । उछी विवासे । विवासो वर्जनं । विशेषेणोच्छ्यंते तमसा वर्ज्यंत इति व्युष्टय

उषःकालाः । कर्मणि क्तिन् । तितुत्रेत्यादिनेट्प्रतिषेधः । व्रश्चादिना षत्वे ष्टुत्वं । तादौ चेति पूर्वपदप्रकृतिस्वरत्वं । यणादेश उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं । अध्वरश्रियं । अध्वरं श्रयत इत्यध्वरश्रीः । क्विब्वचीत्यादिना । उ० २. ५८. । क्विप् प्रत्ययः । तत्संनियोगेन संप्रसारणाभावो दीर्घश्च । द्वितीयैकवचनेऽचि श्नुधात्वित्यादिनेयङादेशः ॥

चतुर्थीमृचमाह ॥

श्रेष्ठं यविष्ठमतिथिं स्वाहुतं जुष्टं जनाय दाशुषे ।
देवाँ अच्छा यातवे जातवेदसमग्निमीळे व्युष्टिषु ॥ ४ ॥
श्रेष्ठं । यविष्ठं । अतिथिं । सुऽआहुतं । जुष्टं । जनाय । दाशुषे ।
देवान् । अच्छ । यातवे । जातऽवेदसं । अग्निं । ईळे । विऽउष्टिषु ॥ ४ ॥

व्युष्टिषूषःकालेषु देवान् इतरान्देवानच्छाभिमुख्येन यातवे गंतुमग्निं देवमीळे । स्तौमि । कीदृशं । श्रेष्ठं । अतिशयेन प्रशस्तं । यविष्ठं । युवतमं । अतिथिं । सततगमनक्षमं । स्वाहुतं । सुष्ठु आ समंताद्धोमाधिकरणं । दाशुषे हविर्दत्तवते जनाय यजमानाय जुष्टं । प्रीतं । जातवेदसं । जातानां वेदितारं ॥ यविष्ठं । युवशब्दादिष्ठनि स्थूलदूरेत्यादिना यणादेः परस्य लोपः । पूर्वस्य च गुणः । अवादेशः । नित्त्वादाद्युदात्तत्वं । अतिथिं । अत सातत्यगमने । ऋतन्यंजीत्यादिना । उ० ४. २. । इथिन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं । स्वाहुतं । हु दानादनयोः । आहूयतेऽस्मिन्नित्याहुतः । सुः पूजायां । पा० १. ४. ९४. । इति सुशब्दस्य कर्मप्रवचनीयसंज्ञायां स्वती पूजायामिति समासः । अव्ययपूर्वपदप्रकृतिस्वरत्वं । न च गतिकारकोपपदात्कृदिति गतेः प्रकृतिस्वरत्वं । अस्य सुशब्दस्य गतिसंज्ञाया बाधितत्वात् ॥

पंचमीमृचमाह ॥

स्तविष्यामि त्वामहं विश्वस्यामृत भोजन ।
अग्ने त्रातारममृतं मियेध्य यजिष्ठं हव्यवाहन ॥ ५ ॥
स्तविष्यामि । त्वां । अहं । विश्वस्य । अमृत । भोजन ।
अग्ने । त्रातारं । अमृतं । मियेध्य । यजिष्ठं । हव्यऽवाहन ॥ ५ ॥

हे अमृत मरणरहित विश्वस्य भोजन कृत्स्नस्य जगतः पालक। हव्यवाहन हविषो वोढः। मियेध्य यज्ञार्ह। एवंविध हे अग्ने विश्वस्य त्रातारं सर्वस्य जगतो रक्षकममृतं मरणरहितं यजिष्ठमतिशयेन यष्टारं त्वामहमनुष्ठाता स्तविष्यामि। स्तुतिकरिष्यामि॥ स्तविष्यामि। ष्टुञ् स्तुतौ। व्यत्ययेनेडागमः। आगमानुदात्तत्वे प्रत्ययस्वरः। भोजन। कर्मफलं भोजयतीति भोजनः। नंद्यादिलक्षणो ल्युः। त्रातारं। त्रैङ् पालने। आदेच इत्यात्वं। तृच्येकाच उपदेश इतीट्प्रतिषेधः। अमृतं। नञोऽजरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं। मियेध्य। इयागमश्छांदसः। यजिष्ठं। यष्टृशब्दात्तुश्छंदसीतीष्ठन्प्रत्ययः। तुरिष्ठेमेयःस्विति तृलोपः॥

॥ इति प्रथमस्य तृतीयेऽष्टाविंशो वर्गः॥

षष्ठीमृचमाह॥

सुशंसो बोधि गृणते यविष्ठ्य मधुजिह्वः स्वाहुतः।

प्रस्कण्वस्य प्रतिरन्नायुर्जीवसे नमस्या दैव्यं जनं॥ ६॥

सुऽशंसः। बोधि। गृणते। यविष्ठ्य। मधुऽजिह्वः। सुऽआहुतः।

प्रस्कण्वस्य। प्रऽतिरन्। आयुः। जीवसे। नमस्य। दैव्यं। जनं॥ ६॥

हे यविष्ठ्य युवतमाग्ने त्वं गृणते स्तुवते यजमानार्थं सुशंसः सुष्ठु शंसनीयः। मधुजिह्वः। मादयितृज्वालः। स्वाहुतः सुष्ठु आभिमुख्येन हुतः सन् बोधि। अस्मदभिप्रायं बुध्यस्व। किंच प्रस्कण्वस्यैतन्नामकस्य कण्वपुत्रस्य महर्षेः। प्रस्कण्वः कण्वस्य पुत्रः कण्वप्रभवः। नि॰ ३. १७.। इति यास्कवचनात्। तस्य जीवसे जीवनार्थमायुः प्रतिरन् प्रकर्षेण वर्धयन्दैव्यं देवसंबंधिनं जनं नमस्या। पूजय॥ सुशंसः। शंसु स्तुतौ। भावे घञ्। शोभनः शंसो यस्यासौ सुशंसः। आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं। बोधि। बुध अवगमने। लोटो हिः। बहुलं छंदसीति विकरणस्य लुक्। हुझल्भ्यो हेर्धिरिति हेर्धिरादेशः। वा छंदसीत्यपित्त्वस्य विकल्पितत्वाल्लघूपधगुणः। धातोरंत्यलोपश्छांदसः। गृणते। गॄ शब्दे। लटः शतृ। क्र्यादिभ्यः श्ना। श्नाभ्यस्तयोरात इत्याकारलोपः। शतुरनुम इति विभक्तेरुदात्तत्वं। यविष्ठ्य। गतं। प्रस्कण्वस्य। प्रभूतिरुत्पत्तिः कण्वाद्यस्य स प्रस्कण्वः। प्रस्कण्वहरिश्चंद्रावृषी। पा॰ ६. १. १५३.। इति सुडागमो निपातितः।

बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । प्रतिरन् । प्रपूर्वस्तिरति वर्धनार्थः । नमस्या । नमोवरिवश्चित्रङः क्यजिति पूजार्थे क्यच् । प्रत्ययस्वरः । अन्येषामपि दृश्यत इति संहितायां दीर्घत्वं । दैव्यं । देवाद्यञनाविति तस्येदमित्यर्थे प्राग्दीव्यतीयो यञ्प्रत्ययः ॥

सप्तमीमृचमाह ॥

होतारं विश्ववेदसं सं हि त्वा विश इंधते ।
स आ वह पुरुहूत प्रचेतसोऽग्ने देवाँ इह द्रवत् ॥ ७ ॥
होतारं । विश्वऽवेदसं । सं । हि । त्वा । विशः । इंधते ।
सः । आ । वह । पुरुऽहूत । प्रऽचेतसः । अग्ने । देवान् । इह । द्रवत् ॥ ७ ॥

होतारं होमनिष्पादकं विश्ववेदसं सर्वज्ञं त्वामग्निं विशः प्रजाः समिंधते हि । सम्यक् दीपयंति खलु । हे पुरुहूत बहुभिराहूताग्ने स त्वं प्रचेतसः प्रकृष्टज्ञानयुक्तान्देवानिह कर्मणि द्रवत् क्षिप्रमावह । आभिमुख्येन प्रापय । द्रवदिति क्षिप्रनाम । द्रवत् ओषमिति तन्नामसु पाठात् । विश्ववेदसं । विश्वानि वेत्तीति विश्ववेदाः । असुन् । मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं । यद्वा वेद इति धननाम । विश्वानि वेदांसि यस्यासौ विश्ववेदाः । बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं । इंधते । ञिइंधी दीप्तौ । श्नसोरल्लोप इत्यकारलोपः । श्नान्नलोपः । पा० ६. ४. २३. । प्रत्ययस्वरः । हि चेति निघातप्रतिषेधः ॥

अष्टमीमृचमाह ॥

सवितारमुषसमश्विना भगमग्निं व्युष्टिषु क्षपः ।
कण्वासस्त्वा सुतसोमास इंधते हव्यवाहं स्वध्वर ॥ ८ ॥
सवितारं । उषसं । अश्विना । भगं । अग्निं । विऽउष्टिषु । क्षपः ।
कण्वासः । त्वा । सुतऽसोमासः । इंधते । हव्यऽवाहं । सुऽअध्वर ॥ ८ ॥

हे स्वध्वर शोभनयागयुक्ताग्ने व्युष्टिषूषःकालेषु क्षपो ऽन्नमाहुतिरूपमभिलक्ष्य सवितादीन्देवानावहेत्यनुवर्तते । स्वध्वरेत्याहवनीयाग्नेः संबोधनं । अग्निमिति हविष उद्देश्यं देवतांतरमुच्यते । सुतसोमासो ऽभिषुतसोमाः कण्वासो मेधाविन ऋत्विजो हव्यवाहं हविषः प्रापकमाहवनीयं त्वामिंधते । दीपयंति ॥

व्युष्टिषु। उछी विवासे। विवासो वर्जनं। व्युच्छ्यते तमसा वर्ज्यत इति व्युष्टिरुषःकालः। कर्मणि क्तिनि तादौ च नितीति गतेः प्रकृतिस्वरत्वं। संहितायामुदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं। क्षपः। क्षपेति रात्रिनाम। ङस्यातो धातोरित्यचात इति योगविभागादाकारलोपः। सुतसोमासः। सुतः सोमो यैः। निष्ठेति पूर्वनिपातः। पा० २. २. ३६.। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। हव्यवाहं। हव्यं वहतीति हव्यवाट्। वहश्चेति ण्विप्रत्ययः॥

नवमीमृचमाह॥

पतिर्ह्यध्वराणामग्ने दूतो विशामसि।

उषर्बुध आ वह सोमपीतये देवाँ अद्य स्वर्दृशः॥ ९॥

पतिः। हि। अध्वराणां। अग्ने। दूतः। विशां। असि।

उषःऽबुधः। आ। वह। सोमऽपीतये। देवान्। अद्य। स्वःऽदृशः॥ ९॥

हे अग्ने विशां प्रजानां संबंधिनो येऽध्वरा यागास्तेषां पतिः पालकस्त्वं दूतोऽसि हि। देवानां वार्ताहारो भवसि खलु। उषर्बुध उषःकाले प्रबुद्धान् स्वर्दृशः सूर्यदर्शिनो देवानद्यास्मिन्दिने सोमपीतये सोमपानार्थमावह। आभिमुख्येन प्रापय॥ असि। हि चेति निघातप्रतिषेधः। सोमपीतये। पा पाने। स्थागापापचो भाव इति भावे क्तिन्। घुमास्थेतीत्वं। सोमस्य पीतिः। दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं। स्वर्दृशः। सुष्ठु र्ति गच्छतीति स्वरादित्यः। अंतरन्येभ्योऽपि दृश्यंत इति विच्। तं पश्यंतीति स्वर्दृशः। क्विप् चेति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं॥

दशमीमृचमाह॥

अग्ने पूर्वा अनूषसो विभावसो दीदेथ विश्वदर्शतः।

असि ग्रामेष्वविता पुरोहितोऽसि यज्ञेषु मानुषः॥ १०॥

अग्ने। पूर्वाः। अनु। उषसः। विभावसो इति विभाऽवसो। दीदेथ। विश्वऽदर्शतः।

असि। ग्रामेषु। अविता। पुरःऽहितः। असि। यज्ञेषु। मानुषः॥ १०॥

हे विभावसो विशिष्टप्रकाशनरूप धनवन्नग्ने विश्वदर्शतः सर्वदर्शनीयस्त्वं पूर्वा उषसोऽनु। अतीतानुषःकालाननुलक्ष्य दीदेथ। दीप्तवानसि। ताद-

शस्त्वं ग्रामेषु जननिवासस्थानेष्ववितासि। रक्षको भवसि। यज्ञेष्वनुष्ठेयकर्मसु पुरोहितो वेदेः पूर्वस्यां दिश्यवस्थितो मानुषोऽसि। ऋत्विग्यजमानानां मनुष्याणां हितोऽसि ॥ दीदेथ। दीदेतिश्छांदसो दीप्तिकर्मा। आगमानुशासनस्यानित्यत्वादिडभावः। द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति वचनाद्विर्वचनाभावः। विश्वदर्शतः। विश्वैर्दर्शनीयः। भृमृदृशीत्यादिना दृशेरतच्। मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं। पुरोहितः। पूर्वाधरावराणामसि पुरधवश्चैषामित्यसिप्रत्ययांतः पुरस्शब्दः। तद्धितश्चासर्वविभक्तिरित्यव्ययत्वात् पुरोऽव्ययमिति गतिसंज्ञायां सत्यां गतिसमासे गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य तृतीय एकोनत्रिंशो वर्गः ॥

एकादशीमृचमाह ॥

नि त्वा यज्ञस्य साधनमग्ने होतारमृत्विजं।
मनुष्वद्देव धीमहि प्रचेतसं जीरं दूतममर्त्यं ॥ ११ ॥

नि। त्वा। यज्ञस्य। साधनं। अग्ने। होतारं। ऋत्विजं।
मनुष्वत्। देव। धीमहि। प्रऽचेतसं। जीरं। दूतं। अमर्त्यं ॥ ११ ॥

हे अग्ने देव मनुष्वत् यथा मनुर्यागदेशे निदधाति। तद्वद्वयं त्वां निधीमहि। अत्र स्थापयामः। कीदृशं। यज्ञस्य साधनं। यज्ञनिष्पादकं। होतारमृत्विजं। ऋतौ वसंतादिके यष्टारं। प्रचेतसं। प्रकृष्टज्ञानयुक्तं। जीरं। शत्रूणां वयोहानिकरं। दूतं। देवानां दूतस्थानीयं। अमर्त्यं। मरणरहितं ॥ मनुष्वत्। औणादिकोसिप्रत्ययांतो मनुस्शब्दः। तेन तुल्यं क्रिया चेद्वतिरिति वतिप्रत्ययः। अयस्मयादित्वेन भत्वाद्रुत्वाद्यभावः। धीमहि। डुधाञ् धारणपोषणयोः। लट्यभ्यासलोपश्छांदसः। जीरं। जु इति सौत्रो धातुः। जोरी च। उ॰ २. २४.। इति रक्प्रत्ययः। कात्यायनस्त्वाह रकि ज्यः संप्रसारणे जीर इति ॥

द्वादशीमृचमाह ॥

यद्देवानां मित्रमहः पुरोहितोऽन्तरो यासि दूत्यं।
सिंधोरिव प्रस्वनितास ऊर्मयोऽग्नेर्भ्राजंते अर्चयः ॥ १२ ॥

यत् । देवानां । मित्रऽमहः । पुरःऽहितः । अंतरः । यासि । दूत्यं ।
सिंधोःऽइव । प्रऽस्वनितासः । ऊर्मयः । अग्नेः । भ्राजंते । अर्चयः ॥ १२ ॥

हे मित्रमहः । मित्राणां पूजकाग्ने यद्यदा पुरोहितस्त्वं वेदेः पूर्वस्यां दिशि स्थापितोऽंतरो देवयजनमध्ये वर्तमानः सन् देवानां दूत्यं दूतकर्म यासि । प्राप्नोषि । तदानीमग्नेस्तवार्चयो दीप्तयो भ्राजंते । दीप्यंते । तत्र दृष्टांतः । सिंधोरिव । यथा समुद्रस्य प्रस्वनितासः प्रकृष्टध्वनियुक्ता ऊर्मयस्तरंगा भ्राजंते तद्वत् ॥ मित्रमहः । मह पूजायां । मित्रैर्ऋत्विग्भिर्मह्यते पूज्यत इति मित्रमहाः । औणादिकोऽसुन् । यासि । यद्वृत्तयोगादनिघातः । दूत्यं । दूतस्य कर्म दूत्यं । दूतस्य भागकर्मणी इति यत्प्रत्ययः । सर्वे विधयश्छंदसि विकल्प्यंत इति वचनाद्यतोऽनाव इत्याद्युदात्तत्वाभावे तित्स्वरितमिति स्वरितत्वं । प्रस्वनितासः । स्यमु स्वन ध्वन शब्दे । भावे निष्ठा । प्रकृष्टं स्वनितं येषां ते प्रस्वनिताः । असुगागमः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । ऊर्मयः । अर्तेरूच्चेति मिप्रत्ययः ॥

त्रयोदशीमृचमाह ॥

श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः ।
आ सीदंतु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरं ॥ १३ ॥
श्रुधि । श्रुत्ऽकर्ण । वह्निऽभिः । देवैः । अग्ने । सयावऽभिः ।
आ । सीदंतु । बर्हिषि । मित्रः । अर्यमा । प्रातःऽयावानः । अध्वरं ॥ १३ ॥

हे श्रुत्कर्ण श्रवणसमर्थाभ्यां कर्णाभ्यां युक्ताग्ने श्रुधि । अस्मदीयं वचनं शृणु । यो मित्रो देवो यश्चार्यमा ये चान्ये प्रातर्यावाणः प्रातःकाले देवयजनं गच्छंतो देवास्तैः सर्वैः सयावभिराहवनीयाग्निना त्वया समानगतिभिरन्यैर्वह्निभिर्देवैः सहाध्वरं क्रतुमुद्दिश्य बर्हिषि दर्भे आसीदंतु । उपविशंतु ॥ श्रुधि । श्रु श्रवणे । श्रुशृणुपृकृवृभ्यश्छंदसीति हेर्धिरादेशः । बहुलं छंदसीति विकरणस्य लुक् । श्रुत्कर्ण । शृणोतीति श्रुत् । क्विपि तुगागमः । श्रुतौ कर्णौ यस्यासौ श्रुत्कर्णः । वह्निभिः । वह प्रापणे । वहिश्रियुश्रुग्लाहात्वरिभ्यो निदिति निप्रत्ययः । नित्त्वादाद्युदात्तत्वं । सयावभिः । समानं यांतीति सयावानः । या प्रापणे । आतो मनिन्क्वनिब्वनिपश्चेति वनिप् ।

कृदुत्तरपदप्रकृतिस्वरत्वं । प्रातर्यावाणः । पूर्ववत् । प्रातिपदिकांतनुम्विभक्तिषु च । पा० ८. ४. ११. । इति णत्वं ॥

चतुर्दशीमृचमाह ॥

शृण्वंतु स्तोमं मरुतः सुदानवोऽग्निजिह्वा ऋतावृधः ।
पिबंतु सोमं वरुणो धृतव्रतोऽश्विभ्यामुषसा सजूः ॥ १४ ॥

शृण्वंतु । स्तोमं । मरुतः । सुऽदानवः । अग्निऽजिह्वाः । ऋतऽवृधः ।
पिबंतु । सोमं । वरुणः । धृतऽव्रतः । अश्विऽभ्यां । उषसा । सऽजूः ॥ १४ ॥

मरुतो देवाः स्तोममस्मदीयं स्तोत्रं शृण्वंतु । कीदृशाः । सुदानवः । सुष्ठु फलस्य दातारः । अग्निजिह्वाः । अग्निर्जिह्वास्थानीयो मुख्यो येषु मरुत्सु तादृशाः । ऋतावृधः । सत्यस्य यज्ञस्य वा वर्धकाः । तथा धृतव्रतो गृहीतकर्मा वरुणो देवोऽश्विभ्यां देवाभ्यामुषसा देवतया सजूः सह सोमं पिबतु ॥ सुदानवः । डुदाञ् दाने । दाभाभ्यां नुरिति भावे नुप्रत्ययः । दानुशब्द आद्युदात्तः । शोभनं दानु येषां । आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं । अग्निजिह्वाः । अग्नेर्जिह्वायामवस्थिता हविर्भाज इत्यर्थः । तात्स्थ्यात् ताच्छब्द्यं । अग्निर्जिह्वास्थानीयो येषां ते । छांदसमंतोदात्तत्वं । ऋतावृधः । ऋतस्य सत्यस्य यज्ञस्य वा वर्धयितारः । वृधेरंतर्भावितण्यर्थात् क्विप् चेति क्विप् । अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घत्वं ॥

॥ इति प्रथमस्य तृतीये त्रिंशो वर्गः ॥

त्वमग्ने वसूनिति दशर्चं द्वितीयं सूक्तं । अत्रानुक्रमणिका । त्वमग्ने दशानुष्टुभ मर्द्धर्चोऽंत्यो दैव इति । प्रस्कण्व ऋषिः । आनुष्टुभं छंदः । अग्निर्देवता । पूर्वत्राग्नेयं त्वित्युक्तत्वात् । अयं सोम इत्यर्द्धर्चो देवदेवत्यः । प्रातरनुवाक आग्नेये क्रतावाश्विनशस्त्रे चैतत्सूक्तं । अथैतस्या रात्रेरिति खंडे सूत्रितं । त्वमग्ने वसूंस्त्वं हि क्षैतवत् । आ० ४. १३. । इति ॥ तथा गर्गत्रिरात्रस्यांत्येऽहन्येतत्सूक्तमाज्यशस्त्रं । आंगिरसं स्वर्गकाम इति खंडे सूत्रितं । वारवंतीयमुत्तमे त्वमग्ने वसूँरिति चाज्यं । आ० १०. २. । इति ॥

तत्र प्रथमामृचमाह ॥

त्वम॑ग्ने॒ वसूँ॑रि॒ह रु॒द्राँ आ॑दि॒त्याँ उ॒त ।
यजा॑ स्वध्व॒रं जनं॒ मनु॑जातं घृत॒प्रुषं॑ ॥ १ ॥

त्वं । अ॒ग्ने॒ । वसू॑न् । इ॒ह । रु॒द्रान् । आ॒दि॒त्यान् । उ॒त ।
यज॑ । सु॒ऽअ॒ध्व॒रं । जनं॑ । मनु॑ऽजातं । घृ॒त॒ऽप्रुषं॑ ॥ १ ॥

हे अग्ने त्वमिह कर्मणि वस्वादीन्यज। उत अपि च जनमन्यमपि देवतारूपं प्राणिनं यज। कीदृशं। स्वध्वरं। शोभनयागयुक्तं। मनुजातं। मनुना प्रजापतिनोत्पादितं। घृतप्रुषं। उदकस्य सेक्तारं ॥ यज। द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं। स्वध्वरं। शोभनोऽध्वरो यस्यासौ स्वध्वरः। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। मनुजातं। जनेरंतर्भावितण्यर्थात्कर्मणि क्तः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। घृतप्रुषं। प्रुष प्लुष स्नेहनसेचनपूरणेषु। घृतेनोदकेन प्रुष्णाति पूरयतीति घृतप्रुट्। क्विप् चेति क्विप् ॥

द्वितीयामृचमाह ॥

श्रु॒ष्टी॒वानो॒ हि दा॒शुषे॑ दे॒वा अ॑ग्ने॒ विचे॑तसः ।
तान्रो॑हिदश्व गिर्वण॒स्त्रय॑स्त्रिंशत॒मा व॑ह ॥ २ ॥

श्रु॒ष्टी॒ऽवानः॑ । हि । दा॒शुषे॑ । दे॒वाः । अ॒ग्ने॒ । विऽचे॑तसः ।
तान् । रो॒हि॒त्ऽअ॒श्व॒ । गि॒र्व॒णः॒ । त्रयः॑ऽत्रिंशतं । आ । व॒ह ॥ २ ॥

हे अग्ने विचेतसो विशिष्टप्रज्ञाना देवा दाशुषे हविर्दत्तवते यजमानाय श्रुष्टीवानो हि। श्रुष्टिः फलस्य दानं तद्भाजः खलु। हे रोहिदश्व रोहिन्नामकैरश्वैरुपेत गिर्वणो गीर्भिः स्तुतिभिर्वननीयाग्ने। गिर्वणा देवो भवति गीर्भिरेनं वनयंतीति यास्कः। त्रयस्त्रिंशतं। अनया संख्यया संख्यातांस्तान्देवानावह। इहानय ॥ श्रुष्टीवानः। श्रुष्टिः प्रेरणार्थः। भावे क्तिच्। श्रुष्टिं वनंति संभजंत इति श्रुष्टीवानः। अन्येभ्योऽपि दृश्यंत इति विच्। छांदसं दीर्घत्वं। विचेतसः। विशिष्टं चेतो येषां ते। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। गिर्वणः। गीर्भिर्वननीयो गिर्वणाः। वनतेरसुन्। पूर्वपदस्य ह्रस्वत्वं छांदसं। त्रयश्च

त्रिंशच्च त्रयस्त्रिंशत् । त्रेस्त्रयः । पा० ६. ३. ४८. । इति त्रिशब्दस्य त्रयस् आदेशः । संख्येति पूर्वपदप्रकृतिस्वरत्वं ॥

तृतीयामृचमाह ॥

प्रियमेधवदत्रिवज्जातवेदो विरूपवत् ।
अंगिरस्वन्महिव्रत प्रस्कण्वस्य श्रुधी हवं ॥ ३ ॥
प्रियमेधऽवत् । अत्रिऽवत् । जातऽवेदः । विरूपऽवत् ।
अंगिरस्वत् । महिऽव्रत । प्रस्कण्वस्य । श्रुधि । हवं ॥ ३ ॥

हे महिव्रत प्रभूतकर्मन् जातवेदोऽग्ने प्रस्कण्वस्य कण्वपुत्रस्य महर्षेर्हवमाह्वानं श्रुधि । शृणु । तत्र चत्वारो दृष्टांताः । प्रियमेधात्रिविरूपांगिरोनामका एतेषामाह्वानं यथा शृणोषि तद्वत् । तत्र निरुक्तं । प्रियमेधः प्रिया अस्य मेधा यथैतेषामृषीणामेवं प्रस्कण्वस्य शृणु ह्वानं । प्रस्कण्वः कण्वस्य पुत्रः कण्वप्रभवो यथा प्राग्रमिति । विरूपो नानारूपो महिव्रतो महाव्रत इति च । नि० ३. १७. ॥ प्रियमेधवत् । प्रियमेधस्येव । तत्र तस्येवेति षष्ठ्यर्थे वतिः । एवमत्रिवदित्यादावपि । प्रस्कण्वादयो गताः ॥

चतुर्थीमृचमाह ॥

महिकेरव ऊतये प्रियमेधा अहूषत ।
राजंतमध्वराणामग्निं शुक्रेण शोचिषा ॥ ४ ॥
महिऽकेरवः । ऊतये । प्रियऽमेधाः । अहूषत ।
राजंतं । अध्वराणां । अग्निं । शुक्रेण । शोचिषा ॥ ४ ॥

महिकेरवः प्रौढकर्माणः प्रियमेधाः प्रियेण यज्ञेनोपेता ऋषय ऊतये रक्षार्थमग्निमहूषत । आहूतवंतः । कीदृशं । अध्वराणां यज्ञानां मध्ये शुक्रेण शोचिषा शुद्धेन प्रकाशेन राजंतं दीप्यमानं ॥ महिकेरवः । मह पूजायां । औणादिक इनप्रत्ययः । डुकृञ् करणे । कृवापाजीत्युण् । महयो महांतः कारवो येषां ते तथोक्ताः । आकारस्यैकारादेशश्छांदसः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । प्रियमेधाः । प्रियो मेधो येषां ते । अहूषत । ह्वेञ् स्पर्धायां शब्दे च । लुङि

सिचि बहुलं छंदसीति संप्रसारणं। परपूर्वत्वं। हल इति दीर्घत्वं। आदेशप्रत्ययोरिति षत्वं॥

पंचमीमृचमाह॥

घृताहवन संत्येमा उ षु श्रुधी गिरः।
याभिः कण्वस्य सूनवो हवंतेऽवसे त्वा॥५॥
घृतऽआहवन। संत्य। इमाः। ऊं इति। सु। श्रुधि। गिरः।
याभिः। कण्वस्य। सूनवः। हवंते। अवसे। त्वा॥५॥

हे घृताहवन घृतेनाहूयमान संत्य फलप्रदाग्ने। इमा उ गिरोऽस्माभिः प्रयुज्यमाना अपि स्तोत्ररूपा वाचः सु श्रुधि। सुष्ठु शृणु। कण्वस्य महर्षेः सूनवः पुत्रा याभिर्गीर्भिरवसे स्वरक्षार्थं त्वां हवंते। त्वामाह्वयंति॥ घृताहवन। घृतेनाहूयतेऽस्मिन्निति घृताहवनः। अधिकरणे ल्युट्। आमंत्रिताद्युदात्तत्वं। श्रुधि। श्रुशृणुपॄकृवृभ्यश्छंदसीति हेर्धिरादेशः। बहुलं छंदसीति विकरणस्य लुक्॥

॥ इति प्रथमस्य तृतीय एकत्रिंशो वर्गः॥

अश्वमेधे पौष्णयामिष्टौ स्विष्टकृतोऽनुवाक्या त्वां चित्रश्रवस्तमेत्येषा। सर्वान्कामानवाप्स्यन्निति खंडे सूत्रितं। त्वां चित्रश्रवस्तम यद्वाहिष्ठं तदग्नये। आ० १०. ६.। इति॥ तामेतां सूक्ते षष्ठीमृचमाह॥

त्वां चित्रश्रवस्तम हवंते विक्षु जंतवः।
शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळ्हवे॥६॥
त्वां। चित्रश्रवःऽतम। हवंते। विक्षु। जंतवः।
शोचिःऽकेशं। पुरुऽप्रिय। अग्ने। हव्याय। वोळ्हवे॥६॥

हे चित्रश्रवस्तम। अतिशयेन विविधहवीरूपान्नयुक्त पुरुप्रिय बहूनां यजमानानां प्रीतिकराग्ने त्वां हव्याय वोळ्हवे हविर्वोढुं विक्षु जंतवः प्रजासूत्पन्ना यजमाना हवंते। आह्वयंति। कीदृशं। शोचिष्केशं। दीप्तिरूपकेशोपेतं। तथा च वाजसनेयिन आमनंति। शोचंत इव ह्येतस्य समिद्धस्य रश्मयः केशा इति॥

चित्रश्रवस्तम । श्रव इत्यन्ननाम । चित्रं श्रवो यस्यासौ चित्रश्रवाः । अतिशयेन चित्रश्रवाश्चित्रश्रवस्तमः । आमंत्रितानुदात्तत्वं । शोचिष्केशं । शुच दीप्तौ । अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिरितीसिः । प्रत्ययस्वरः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । हव्याय । हवनक्रियया प्राप्यत्वात् क्रियाग्रहणं कर्तव्यमिति संप्रदानत्वाच्चतुर्थी । वोळ्हवे । वह प्रापणे । तुमर्थे सेसेनिति तवेन्प्रत्ययः । ढत्वधत्वष्टुत्वढलोपेषु कृतेषु सहिवहोरोदवर्णस्य । पा० ६. ३. ११२. । इत्यकारस्यौकारः । नित्त्वादाद्युदात्तत्वं ॥

सप्तमीमृचमाह ॥

नि त्वा होतारमृत्विजं दधिरे वसुवित्तमं ।

श्रुत्कर्णं सप्रथस्तमं विप्रा अग्ने दिविष्टिषु ॥ ७ ॥

नि । त्वा । होतारं । ऋत्विजं । दधिरे । वसुवित्ऽतमं ।

श्रुत्ऽकर्णं । सप्रथःऽतमं । विप्राः । अग्ने । दिविष्टिषु ॥ ७ ॥

हे अग्ने विप्रा मेधाविनो दिविष्टिषु यागेषु त्वां निदधिरे । स्थापितवंतः । कीदृशं । होतारं । आह्वातारं । ऋत्विजं । ऋतुषु यजनशीलं । वसुवित्तमं । अतिशयेन धनस्य लंभयितारं । श्रुत्कर्णं । श्रवणयोग्यकर्णोपेतं । सप्रथस्तमं । अतिशयेन प्रख्यातं ॥ दधिरे । इरेचश्चित्त्वादंतोदात्तत्वं । पादादित्वान्निघाताभावः । दिविष्टिषु । इष्टय एषणानि । दिवः स्वर्गस्यैषणानि येषु यागेषु ते दिविष्टयः । सर्वे विधयश्छंदसि विकल्प्यंत इति वचनाद्दिव उदित्युत्वं न क्रियते । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

अष्टमीमृचमाह ॥

आ त्वा विप्रा अचुच्यवुः सुतसोमा अभि प्रयः ।

बृहद्भा बिभ्रतो हविरग्ने मर्ताय दाशुषे ॥ ८ ॥

आ । त्वा । विप्राः । अचुच्यवुः । सुतऽसोमाः । अभि । प्रयः ।

बृहत् । भाः । बिभ्रतः । हविः । अग्ने । मर्ताय । दाशुषे ॥ ८ ॥

हे अग्ने सुतसोमा अभिषुतसोमयुक्ता विप्रा मेधाविन ऋत्विजः प्रयोऽभि हविर्लक्षणमन्नमभिलक्ष्य त्वा आचुच्यवुः । त्वामागमयंति । कीदृशं त्वां । बृहत् ।

महांतं । भाः । भासमानं । कीदृशा विप्राः । दाशुषे मर्ताय हविःप्रदस्य यजमानस्य संबंधि हविर्बिभ्रतो धारयंतः ॥ अचुच्यवुः । च्युङ् गतौ । अस्मादंतर्भावितण्यर्थात् लङि व्यत्ययेन परस्मैपदं । बहुलं छंदसीति शपः श्लुः । सिजभ्यस्तविदिभ्यश्चेति झेर्जुसादेशः । जुसि चेति गुणः । बृहत् । भाः । उभयत्र सुपां सुलुगिति विभक्तेर्लुक् । बिभ्रतः । डुभृञ् धारणपोषणयोः । शतरि नाभ्यस्ताच्छतुरिति नुमागमप्रतिषेधः । अभ्यस्तानामादिरित्याद्युदात्तत्वं । मर्ताय दाशुषे । उभयत्र षष्ठ्यर्थे चतुर्थी वक्तव्येति चतुर्थी ॥

नवमीमृचमाह ॥

प्रातर्याव्णः सहस्कृत सोमपेयाय संत्य ।
इहाद्य दैव्यं जनं बर्हिरा सादया वसो ॥ ९ ॥
प्रातःऽयाव्नः । सहःऽकृत । सोमऽपेयाय । संत्य ।
इह । अद्य । दैव्यं । जनं । बर्हिः । आ । सादय । वसो इति ॥ ९ ॥

हे सहस्कृत बलेन मथित संत्य फलदातर्वसो निवासहेतुभूताग्ने । इह देवयजनदेशेऽद्यास्मिन्दिने सोमपेयाय सोमपानार्थं प्रातर्याव्णः प्रातरागच्छतो देवान् दैव्यं जनमन्यमपि देवताजनं बर्हिरासादय । यज्ञं प्रापय ॥ प्रातर्याव्णः । शस्यल्लोपोऽन इत्यकारलोपः । सहस्कृत । सहतेऽभिभवत्यनेनेति सहो बलं । तेन क्रियत इति सहस्कृतः । ओजःसहोम्भस्तमसस्तृतीयायाः । पा॰ ६. ३. ३. । इत्यलुगभावश्छांदसः ॥

दशमीमृचमाह ॥

अर्वाचं दैव्यं जनमग्ने यक्ष्व सहूतिभिः ।
अयं सोमः सुदानवस्तं पात तिरोअह्न्यं ॥ १० ॥
अर्वांचं । दैव्यं । जनं । अग्ने । यक्ष्व । सहूतिऽभिः ।
अयं । सोमः । सुऽदानवः । तं । पात । तिरःऽअह्न्यं ॥ १० ॥

हे अग्ने । अर्वाचमभिमुखं दैव्यं जनं देवतारूपं प्राणिनं सहूतिभिः समानाह्वानैर्देवांतरैः सह यक्ष्व । यज । हे सुदानवः सुष्ठु फलदातारो देवाः । अयं सोमो युष्मदर्थं सोमः पुरतो वर्तते । तं सोमं पात । पिबत । कीदृशं । तिरो-

अहृयं। एतन्नामकं। पूर्वस्मिन्नहन्यभिषुतो यः सोम उत्तरेऽहनि हूयते तस्यै-तन्नामधेयं ॥ दैव्यं। देवाद्यञञाविति प्राग्दीव्यतीयो यञ्। यस्य। लोटि बहुलं छंदसीति शपो लुक्। प्रत्ययस्वराभावश्छांदसः। अग्न इत्यस्य पादादौ वर्तमा-नस्यामंत्रितं पूर्वमविद्यमानवदित्यविद्यमानवत्त्वात् तिङ्ङतिङ इति निघाता-भावः। सहूतिभिः। समानाहूतिराह्वानं येषां ते सहूतयः। समानस्य छंदसीति सभावः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। पात। पा पाने। बहुलं छंदसीति शपो लुक्। तिरोअह्न्यं। अहनि भवमह्न्यं। भवे छंदसीति यत्। नस्तद्धित इति टिलोपो न भवति अह्नष्टखोरेव। पा० ६. ४. १४५.। इति नियमात्। भसं-ज्ञायामल्लोपोऽन इत्यकारलोपः। ये चाभावकर्मणोः। पा० ६. ४. १६८.। इति प्रकृतिभावस्तु सर्वविधीनां छंदसि विकल्पितत्वान्न क्रियते। तिरोहितोऽह्न्यस्ति रोअह्न्यः। प्रकृत्यांतःपादमिति प्रकृतिभावः। अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य तृतीये द्वात्रिंशो वर्गः ॥

एषो उषा इति पंचदशर्चं तृतीयं सूक्तं प्रस्कण्वस्यार्षं। इदमुत्तरं चाश्विनं गायत्रीछंदस्कं। अत्रानुक्रमणिका। एषो पंचोनाश्विनं तु गायत्रमिति ॥ प्रातर-नुवाक आश्विने क्रतौ गायत्रीछंदस्याश्विनशस्त्रे चेदं सूक्तं। अथाश्विन एषो उषाः। आ० ४. १५.। इति सूचितं ॥

तत्र प्रथमामृचमाह ॥

एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः। स्तुषे वामश्विना बृहत् ॥ १ ॥

एषो इति। उषाः। अपूर्व्या। वि। उच्छति। प्रिया। दिवः। स्तुषे। वां। अश्विना। बृहत् ॥ १ ॥

एषो एषैवास्माभिः परिदृश्यमाना प्रिया सर्वेषां प्रीतिहेतुरपूर्व्या पूर्व्येषु मध्यरात्रादिकालेषु विद्यमाना न भवति किंत्विदानीमुषा उषोदेवता दिवो द्युलोकस्य सकाशादागत्य व्युच्छति। तमो वर्जयति। हे अश्विनौ वां युवां बृहत्प्र-भूतं यथा भवति तथा स्तुषे। स्तौमि ॥ स्तुषे। ष्टुञ् स्तुतौ। तिङां तिङो भवंतीत्युत्तमैकवचनस्य मध्यमैकवचनादेशः। यद्वा लेट्युत्तमैकवचने सिब्बहुलं लेटीति सिप् ॥

द्वितीयामृचमाह ॥

या द॒स्रा सिंधु॑मातरा मनो॒तरा॑ र॒यी॒णां । धि॒या दे॒वा व॑सु॒विदा॑ ॥ २ ॥

या । द॒स्रा । सिंधु॑ऽमातरा । म॒नो॒तरा॑ । र॒यी॒णां । धि॒या । दे॒वा । व॒सु॒ऽविदा॑ ॥ २ ॥

या देवा यावुभावश्विनौ वक्ष्यमाणगुणयुक्तौ तौ स्तुष इति पूर्वत्रान्वयः । कीदृशौ । दस्रा । दस्रौ दर्शनीयौ । सिंधुमातरा । समुद्रमातृकौ । यद्यपि सूर्यचंद्रमसावेव समुद्रजौ तथाप्यश्विनोः केषांचिन्मते तद्रूपत्वात्तथात्वं । रयीणां धनानां मनोतरा । मनसा तारयितारौ । धिया कर्मणा वसुविदा निवासस्थानस्य लंभयितारौ ॥ मनोतरा । मनसा तरत इति मनोतरौ । तरतेरंतर्भावितण्यर्थात् ऋदोरबित्यप् । पूर्वपदांतस्य सकारस्य रुत्वे सति छांदसमुत्वं । रयीणां । नामन्यतरस्यामिति नाम उदात्तत्वं । धिया । सावेकाच इति विभक्तेरुदात्तत्वं । वसुविदा । वसूनि निवासस्थानानि विंदत इति वसुविदौ । क्विप् चेति क्विप् ॥

तृतीयामृचमाह ॥

व॒च्यंते॑ वां ककु॒हासो॑ जू॒र्णाया॒मधि॑ वि॒ष्टपि॑ । यद्वां॒ रथो॒ विभि॒ष्पता॑त् ॥ ३ ॥

व॒च्यंते॑ । वां॒ । क॒कु॒हासः॑ । जू॒र्णाया॑ं । अधि॑ । वि॒ष्टपि॑ । यत् । वां॒ । रथः॑ । विऽभिः॑ ।
प॒ता॑त् ॥ ३ ॥

हे अश्विनौ वां युवयोः संबंधी रथो जूर्णायां नानाशास्त्रैः स्तुतायामधि विष्टपि स्वर्गलोके यद्यदा विभिरश्वैः पतात् । पतति गच्छति । तदानीं वां युवयोः ककुहासः स्तुतयो वच्यंते । अस्माभिरुच्यंते ॥ वच्यंते । ब्रवीतेर्यकि ब्रुवो वचिरिति वच्यादेशः । वचिस्वपीत्यादिना संप्रसारणं । संप्रसारणाच्चेत्यत्र वा छंदसीत्यनुवृत्तेः परपूर्वत्वस्य पाक्षिकत्वाद्यणादेशः । प्रत्ययस्वरः । ककुहासः । ककुभं शृंगे विदुः प्रधाने चेत्यभिधानात् प्राधान्याभिधायिना ककुभ्शब्देन तत्प्रतिपादिका स्तुतयो लक्ष्यंते । हत्वं छांदसं । आज्जसेरसुगित्यसुक् । जूर्णायां । जृष् वयोहानौ । अत्र स्तुत्यर्थो धातूनामनेकार्थत्वात् । निष्ठायां श्र्युकः कितीतीट्प्रतिषेधः । बहुलं छंदसीत्युत्वं । हलि चेति दीर्घः । रदाभ्यामिति निष्ठानत्वं । प्रत्ययस्वरः । विभिः । वी गत्यादौ । वियंति गच्छंतीति वयोऽश्वाः । औणादिको डिप्रत्ययः । पतात् । पतृ गतौ । लेट्याडागमः । इतश्च लोप इतीकारलोपः ॥

चतुर्थीमृचमाह ॥

हविषा जारो अपां पिपर्ति पपुरिर्नरा। पिता कुटस्य चर्षणिः ॥ ४ ॥

हविषा। जारः। अपां। पिपर्ति। पपुरिः। नरा। पिता। कुटस्य। चर्षणिः ॥ ४ ॥

हे अश्विनौ देवौ। अपां जारः स्वकीयतापेनोदकानां जरयिता सूर्यो हविषास्मद्दत्तेन पिपर्ति। देवान्पूरयति। उदिते सूर्ये हविःप्रदानात्सूर्यस्य पूरकत्वं द्रष्टव्यं। अतः सूर्योदयकाले युवाभ्यामागंतव्यमित्यर्थः। कीदृशो जारः। पपुरिः। उक्तक्रमेण पूरणस्वभावः। पिता। पालकः। कुटस्य चर्षणिः। कर्मणो द्रष्टा। अत्र निरुक्तं। हविषापां जरयिता पिपर्ति पपुरिरिति पृणातिनिगमौ वा प्रीणातिनिगमौ वा। पिता कृतस्य कर्मणश्चायितादित्यः। नि० ५. २४.। इति ॥ जारः। जरयतीति जार आदित्यः। दारजारौ कर्तरि णिलुक् चेति घञंतो निपातितः। कर्षात्वत इत्यंतोदात्तत्वं। अपां। ऊडिदमिति विभक्तेरुदात्तत्वं। पिपर्ति। पृ पालनपूरणयोः। तिपि जुहोत्यादित्वाच्छपः श्लुः। अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं। अनुदात्ते चेत्यभ्यस्तस्याद्युदात्तत्वं। पपुरिः। आदृगमहन इति किन्प्रत्ययः। लिड्वद्भावात्कित्त्वे सिद्धेऽपि पुनः कित्करणसामर्थ्यादृच्छत्यृतां। पा० ७. ४. ११.। इति गुणाभावः। उदोष्ठ्यपूर्वस्येत्युत्वं। नित्त्वादाद्युदात्तत्वं ॥

पंचमीमृचमाह ॥

आदारो वां मतीनां नासत्या मतवचसा। पातं सोमस्य धृष्णुया ॥ ५ ॥

आऽदारः। वां। मतीनां। नासत्या। मतऽवचसा। पातं। सोमस्य। धृष्णुऽया ॥ ५ ॥

हे मतवचसाभिमतस्तोत्रौ नासत्याश्विनौ वां युवयोर्मतीनां बुद्धीनामादारः प्रेरको यः सोमोऽस्ति सोमस्य तं सोमं पातं। युवां पिबतं। कीदृशं सोमं। धृष्णुया। धर्षणशीलं। मदकरत्वेन तीव्रमित्यर्थः ॥ आदारः। दृङ् आदरे। आदारयतीत्यादारः। दारजारौ कर्तरि णिलुक् चेति घञ्प्रत्ययः। थाथादिनोत्तरपदांतोदात्तत्वं। मतीनां। नामन्यतरस्यामिति नाम उदात्तत्वं। मतवचसा। मतमभिमतं स्तोत्ररूपं वचो ययोस्तौ। सुपां सुलुगिति विभक्तेराकारः। पातं। पा पाने। बहुलं छंदसीति शपो लुकि सति पाघ्रेत्यादिना पिबादेशो

न भवति। सोमस्य। क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी। धृष्णुया। सुपां सुलुगिति विभक्तेर्याजादेशः ॥

॥ इति प्रथमस्य तृतीये त्रयस्त्रिंशो वर्गः ॥

षष्ठीमृचमाह ॥

या नः पीपरदश्विना ज्योतिष्मती तमस्तिरः। तामस्मे रासाथामिषं ॥ ६ ॥

या। नः। पीपरत्। अश्विना। ज्योतिष्मती। तमः। तिरः। तां। अस्मे इति। रासाथां। इषं ॥ ६ ॥

हे अश्विना ज्योतिष्मती रसवीर्यादिरूपज्योतिर्युक्ता येडन्नं नोऽस्मान्पीपरत्। पारयेत्। तृप्तिं प्रापयेत्। किं कृत्वा। तमो दारिद्र्यरूपमंधकारं तिरः। अंतर्हितं विनष्टं कृत्वा। तामिषं तादृशमन्नमस्मे अस्मभ्यं रासाथां। युवां दत्तं ॥ पीपरत्। पॄ पालनपूरणयोः। ण्यंताल्लुङि चङि णिलोपः। उपधाह्रस्वत्वद्विर्भावहलादिशेषसन्वद्भावेत्वदीर्घाः। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। चङ्यन्यतरस्यां। पा॰ ६. १. २१८.। इत्युपोत्तमस्य धात्वकारस्योदात्तत्वे प्राप्ते व्यत्ययेनाभ्यासस्योदात्तत्वं। यद्वृत्तान्नित्यमिति निघातप्रतिषेधः। अस्मे। सुपां सुलुगिति चतुर्थीबहुवचनस्य शे आदेशः। रासाथां। रा दाने। छांदसे प्रार्थनायां लुङि व्यत्ययेनात्मनेपदं। च्लेः सिच्। एकाच इतीट्प्रतिषेधः। पूर्ववदडभावः। तिङ्ङतिङ इति निघातः ॥

सप्तमीमृचमाह ॥

आ नो नावा मतीनां यातं पाराय गंतवे। युंजाथामश्विना रथं ॥ ७ ॥

आ। नः। नावा। मतीनां। यातं। पाराय। गंतवे। युंजाथां। अश्विना। रथं ॥ ७ ॥

हे अश्विना मतीनां स्तुतीनां पाराय गंतवे पारं गंतुं नावा नौरूपेण गमनसाधनेन नोऽस्मान्प्रत्यायातं। समुद्रमध्यादागच्छतं। भूमावागंतुं रथं भवदीयं युंजाथां। साश्वं कुरुतं ॥ नावा। सावेकाच इति विभक्तेरुदात्तत्वं। गंतवे। तुमर्थे सेसेनिति तवेन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं। युंजाथां। युजिर् योगे। लोट्याथामि रुधादित्वाच्छ्नम्। श्नसोरल्लोप इत्यकारलोपः। प्रत्ययस्वरः ॥

अष्टमीमृचमाह ॥

अरित्रं वां दिवस्पृथु तीर्थे सिंधूनां रथः । धिया युयुज्र इंदवः ॥ ८ ॥

अरित्रं । वां । दिवः । पृथु । तीर्थे । सिंधूनां । रथः । धिया । युयुज्रे । इंदवः ॥ ८ ॥

हे अश्विनौ वां युवयोर्दिवस्पृथु द्युलोकादपि विस्तीर्णमरित्रं गमनसाधनं नौरूपं सिंधूनां समुद्राणां तीर्थेऽवतरणप्रदेशे विद्यत इति शेषः । रथश्च भूमौ गंतुं विद्यते । इंदवः सोमा धिया भवद्विषयेण कर्मणा युयुज्रे । युक्ता बभूवुः ॥ अरित्रं । ऋ गतौ । अर्तिलूधूसूखनसहचर इत्रः । पा० ३. २. १८४. । इति करण इत्रप्रत्ययः । प्रत्ययस्वरः । दिवः । ऊडिदमिति विभक्तेरुदात्तत्वं । तीर्थे । तॄ प्लवनतरणयोः । पातॄतुदिवचिरिरिचिसिचिभ्यस्थगिति थक् । ऋत इद्धातोरितीत्वं । हलि चेति दीर्घः । युयुज्रे । लिटीरयो रे इतीरेचो रे आदेशः ॥

नवमीमृचमाह ॥

दिवस्कण्वास इंदवो वसु सिंधूनां पदे । स्वं वव्रिं कुह धित्सथः ॥ ९ ॥

दिवः । कण्वासः । इंदवः । वसु । सिंधूनां । पदे । स्वं । वव्रिं । कुह । धित्सथः ॥ ९ ॥

हे कण्वासः कण्वपुत्राः । यद्वा मेधाविन ऋत्विजः । अश्विनावित्थं पृच्छतेति शेषः । कथमिति तदुच्यते । दिवो द्युलोकसकाशादिंदवः सूर्यरश्मयः प्रादुर्भूताः । सिंधूनामपां वृष्टिरूपाणां स्यंदनस्वभावानां पदे स्थानेऽतरिक्षे वसु अस्मदादिनिवासहेतुभूतमुषःकालीनं ज्योतिराविर्भूतमिति शेषः । अस्मिन्नवसरे युवां स्वं वव्रिं स्वकीयं रूपं कुह धित्सथः । कुत्र स्थापयितुमिच्छथः । अत्रागत्य प्रदर्शनीयमिति तात्पर्यार्थः ॥ कुह । वा ह च छंदसीति किंशब्दात्सप्तम्यर्थे हप्रत्ययः । कु तिहोरिति किमः कु । धित्सथः । डुधाञ् धारणपोषणयोः । सनि मीमाघुरभलभशकपतपदामच इस् । पा० ७. ४. ५४. । इत्यकारस्य इसादेशः । अत्र लोपोऽभ्यासस्य । पा० ७. ४. ५८. । इत्यभ्यासलोपः । सः स्यार्द्धधातुके । पा० ७. ४. ४९. । इति सकारस्य तकारः ॥

दशमीमृचमाह ॥

अभूदु भा उं अंशवे हिरण्यं प्रति सूर्यः । व्यख्यज्जिह्वयासितः ॥ १० ॥

अभूत् । ऊं इति । भाः । ऊं इति । अंशवे । हिरण्यं । प्रति । सूर्यः । वि । अख्यत् । जिह्वया । असितः ॥ १० ॥

भा उ सूर्यस्य दीप्तिस्त्वंशव उषःकालीनरश्मिसिद्ध्यर्थमभूदु । प्रादुर्भूतैव । सूर्यश्च हिरण्यं प्रति स्वकीयोदयेन हिरण्यसदृशोऽभूत् । अग्निश्चासितः स्वकीयदीप्तेः सूर्यप्रवेशेन स्वयं कृष्णो भूत्वा जिह्वया स्वकीयया ज्वालया व्यख्यत् । प्रकाशितवान् । तस्मादयमश्विनोर्युवयोरागमनकाल इत्यर्थः ॥ अभूत् । भूसुवोस्तिङीति गुणप्रतिषेधः । हिरण्यं प्रति । प्रतिः प्रतिनिधिप्रतिदानयोरिति प्रतेः कर्मप्रवचनीयत्वं । कर्मप्रवचनीययुक्ते द्वितीया । पा० २. ३. ८. । इति द्वितीया । अख्यत् । चक्षिङ् व्यक्तायां वाचि । लुङि चक्षिङः ख्याञिति ख्याञादेशः ॥

॥ इति प्रथमस्य तृतीये चतुस्त्रिंशो वर्गः ॥

एकादशीमृचमाह ॥

अभूदु पारमेतवे पंथा ऋतस्य साधुया । अदर्शि वि स्रुतिर्दिवः ॥ ११ ॥

अभूत् । ऊं इति । पारं । एतवे । पंथाः । ऋतस्य । साधुऽया । अदर्शि । वि । स्रुतिः । दिवः ॥ ११ ॥

ऋतस्य सूर्यस्य पारमेतवे रात्रेः पारभूतमुदयाद्रिं गंतुं पंथा मार्गः साधुया समीचीनोऽभूदु । निष्पन्न एव । दिवो द्योतनात्मकस्य सूर्यस्य स्रुतिः प्रसृता दीप्तिर्व्यदर्शि । विशेषेण दृष्टा । तस्मादश्विनौ युवाभ्यामागंतव्यं ॥ एतवे । इण् गतौ । तुमर्थे सेसेनिति तवेन्प्रत्ययः । साधुया । सुपां सुलुगिति विभक्तेर्याजादेशः । अदर्शि । कर्मणि लुङि च्लेश्चिणादेशः । चिणो लुगिति तशब्दस्य लुक् । स्रुतिः । स्रु गतौ । क्तिच्क्तौ च संज्ञायामिति क्तिच् ॥

द्वादशीमृचमाह ॥

तत्तदिदश्विनोरवो जरिता प्रति भूषति । मदे सोमस्य पिप्रतोः ॥ १२ ॥

तत्ऽतत् । इत् । अश्विनोः । अवः । जरिता । प्रति । भूषति । मदे । सोमस्य । पिप्रतोः ॥ १२ ॥

जरिता स्तोताश्विनोः संबंधि तत्तदित् पुनः पुनः कृतं सर्वमप्यवोऽस्मद्विषयं रक्षणं प्रति भूषति । प्रत्येकमलंकरोति । तदा तदा प्रशंसतीत्यर्थः । कीदृशयोरश्विनोः । मदे हर्षे निमित्तभूते सति सोमस्य पिप्रतोः । सोमं पूरयतोः ॥ भूषति । भूष अलंकारे । भौवादिकः । पिप्रतोः । पृ पालनपूरणयोः । पृ इत्येके । अस्माल्लटः शतृ । जुहोत्यादित्वाच्छपः श्लुः । द्विर्भावोरदत्वहलादिशेषाः । अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं । शतुर्ङित्वाद्गुणाभावे यणादेशः । अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥

त्रयोदशीमृचमाह ॥

वावसाना विवस्वति सोमस्य पीत्या गिरा । मनुष्वच्छंभू आ गतं ॥ १३ ॥

ववसाना । विवस्वति । सोमस्य । पीत्या । गिरा । मनुष्वत् । शंभू इति शंऽभू । आ । गतं ॥ १३ ॥

हे शंभू सुखस्य भावयितारावश्विनौ मनुष्वत् मनाविव विवस्वति परिचरणवति यजमाने वावसाना निवासशीलौ युवां सोमस्य पीत्या सोमस्य पाननिमित्तं गिरा स्तुतिनिमित्तं चागतं । आगच्छतं ॥ वावसाना । वस निवासे । ताच्छील्यवयोवचनेति ताच्छीलिकश्चानश् । बहुलं छंदसीति शपः श्लुः । अन्येषामपि दृश्यत इति संहितायामभ्यासस्य दीर्घत्वं । सुपां सुलुगिति विभक्तेराकारः । चित इत्यंतोदात्तत्वं । पीत्या । पा पाने । स्थागापापचो भाव इति भावे क्तिन् । घुमास्थेतीत्वं । व्यत्ययेनांतोदात्तत्वं । तृतीयैकवचने यणादेश उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं । मनुष्वत् । मन ज्ञाने । मन्यते जानातीति मनुः । बहुलवचनादौणादिक उसिप्रत्ययः । तत्र तस्येवेति सप्तम्यर्थे वतिः । प्रत्ययस्वरः । गतं । गमेर्लोटि बहुलं छंदसीति शपो लुक् । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः ॥

चतुर्दशीमृचमाह ॥

युवोरुषा अनु श्रियं परिज्मनोरुपाचरत् । ऋता वनथो अक्तुभिः ॥ १४ ॥

युवोः । उषाः । अनु । श्रियं । परिऽज्मनोः । उपऽआचरत् । ऋता । वनथः । अक्तुऽभिः ॥ १४ ॥

हे अश्विनौ परिज्मनोः परितो गंत्रोर्युवोर्युवयोरुभयोः श्रियमनु । आगमनरूपां शोभामनुसृत्योषा उपाचरत् । उषःकालदेवतेहागच्छतु । युवयोरागतयोः सतोः पश्चादागतेत्यर्थः । युवां चाक्तुभी रात्रिभिर्ऋता यज्ञगतानि हवींषि वनथः । कामयेथे । संभजेथे ॥ युवोः । युष्मच्छब्दात् षष्ठीद्विवचनस्य सुपां सुपो भवंतीति षष्ठीद्विवचनादेशः । अत आदेशविषयत्वाद्योऽचीति यत्वाभावः । शेषे लोपः । परिज्मनोः परितोऽजतो गच्छत इति परिज्मानौ । श्वन्नुक्षन्नित्यादिनाजतेर्मनिन्प्रत्ययांतो निपातितः । ऋता । शेश्छंदसीति शेर्लोपः । वनथः । वन षण संभक्तौ । तिङ्ङतिङ इति निघातः ॥

प्रवर्ग्ये पौर्वाह्णिके घर्मस्य हविषो द्वितीया याज्योभा पिबतमित्येषा । अथोत्तरमिति खंडे सूचितं । उभा पिबतमश्विनेतिचोभाभ्यामनवानं । आ॰ ४. ७. । इति ॥ आश्विनशस्त्रेऽप्येषा द्वितीया याज्या । सूचितं च । प्रवामंधांसि मद्यान्यस्थुरुभा पिबतमश्विनेति याज्ये इति ॥

तामेतां पंचदशीमृचमाह ॥

उभा पिबतमश्विनोभा नः शर्म यच्छतं । अविद्रियाभिरूतिभिः ॥ १५ ॥

उभा । पिबतं । अश्विना । उभा । नः । शर्म । यच्छतं । अविद्रियाभिः । ऊतिऽभिः ॥ १५ ॥

हे अश्विना । उभा युवामुभौ पिबतं । सोमपानं कुरुतं । तत ऊर्ध्वमुभा युवामुभावविद्रियाभिः प्रशस्ताभिरूतिभी रक्षाभिर्नोऽस्मभ्यं शर्म सुखं यच्छतं ॥ पिबतं । पा पाने । लोटि शपि पाघ्रेत्यादिना पिबादेशः । अंगवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति वचनाल्लघूपधगुणाभावः । यद्वा । आद्युदात्तोऽदंतः पिबादेशः । तिङ्ङतिङ इति निघातः । यच्छतं । दाण् दाने । लोटि शपि पाघ्रेत्यादिना यच्छादेशः । अविद्रियाभिः । द्रा कुत्सायां गतौ । विपूर्वादस्माद्भाव

औणादिकः किः । आतो लोप इटि चेत्याकारलोपः । विद्रिर्निंदा । तद्विरोधिन्यविद्रिः स्तुतिः । तां यांतीत्यविद्रियाः । अन्येभ्योऽपि दृश्यंत इति विच् । कृदुत्तरपदप्रकृतिस्वरत्वं । ऊतिभिः । अवतेः क्तिनि ज्वरत्वरेत्यादिनोट् । ऊतियूतीत्यादिना क्तिन उदात्तत्वं ॥

॥ इति प्रथमस्य तृतीये पंचत्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमार्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके तृतीयोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथ प्रथमाष्टके चतुर्थोऽध्याय आरभ्यते । अयं वामिति नवमानुवाकस्य चतुर्थं सूक्तं दशर्चं । अत्रानुक्रांतं । अयं दश प्रागाथं त्विति । ऋषिश्चान्यस्मादृषेरिति परिभाषितत्वात्कण्वपुत्रः प्रस्कण्व ऋषिः । तथा पूर्वंचाश्विनं त्वित्युक्तत्वात्तुह्यादिपरिभाषयेदमपि सूक्तमश्विदेवताकं । अनयैव परिभाषयेदमुत्तरं च प्रागाथं । अतः प्रथमातृतीयाद्या अयुजो बृहत्यः । द्वितीयाचतुर्थ्याद्या युजः सतोबृहत्यः ॥ प्रातरनुवाक आश्विने क्रतौ बार्हते छंदस्येतत्सूक्तं । अथाश्विन इति खंडे सूचितं । इमा उ वामयं वां । आ॰ ४. १५. । इति । आश्विनशस्त्रेऽप्येतत्सूक्तं प्रातरनुवाकन्यायेनेत्यतिदिष्टत्वात् ॥

तत्र प्रथमामृचमाह ॥

अयं वां मधुमत्तमः सुतः सोम ऋतावृधा ।
तमश्विना पिबतं तिरोअह्न्यं धत्तं रत्नानि दाशुषे ॥ १ ॥

अयं । वां । मधुमत्ऽतमः । सुतः । सोमः । ऋतऽवृधा ।
तं । अश्विना । पिबतं । तिरःऽअह्न्यं । धत्तं । रत्नानि । दाशुषे ॥ १ ॥

हे ऋतावृधा । ऋतस्य सत्यस्य यज्ञस्य वा वर्धयितारावश्विना । अश्विनौ वां युवयोरयं पुरोवर्ती सोमः सुतोऽभिषुतः । कीदृशः । मधुमत्तमः । अतिशयेन माधुर्यवान् । तिरोअह्न्यं तिरोभूते पूर्वस्मिन्दिनेऽभिषुतं तं सोमं पिबतं । दाशुषे हविर्दत्तवते यजमानाय रत्नानि रमणीयानि धनानि धत्तं । प्रयच्छतं ॥ वां । युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ । पा० ८. १. २०. । इति षष्ठीद्विवचनस्य वामादेशः । स चानुदात्तः । मधुमत्तमः । मन ज्ञाने । मन्यत इति मधु । फलिपाटिनमीत्यादिनोप्रत्ययः । निदित्यनुवृत्तेराद्युदात्तत्वं । धकारश्चांतादेशः । अतिशयेन मधुमान् मधुमत्तमः । मतुप्तमपोः पित्त्वादनुदात्तत्वे पदस्वर एव शिष्यते । ऋतावृधा । वृधेरंतर्भावितण्यर्थात् क्विप् चेति क्विप् । अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घत्वं । तिरोअह्न्यं । अहनि भवोऽह्न्यः । भवे छंदसीति यत् । अह्नष्टखोरेवेति नियमान्नस्तद्धित इति टिलोपाभावः । सर्वे विधयश्छंदसि विकल्प्यंत इति वचनाद्ये चाभावकर्मणोः । पा० ६. ४. १६८. । इति प्रकृतिभावाभावेऽल्लोपोऽन इत्यकारलोपः । तिरोहितोऽह्न्यस्तिरोअह्न्यः । तिरोऽंतर्धौ । पा० १. ४. ७१. । इति गतित्वेन निपातत्वादव्ययत्वे प्रादिसमासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं । दाशुषे । दाश्वान्साह्वानित्यादिना क्वसुप्रत्ययांतो निपातितः । चतुर्थ्येकवचने वसोः संप्रसारणमिति संप्रसारणं । शासिवसिघसीनां चेति षत्वं ॥

द्वितीयामृचमाह ॥

त्रिवंधुरेण त्रिवृता सुपेशसा रथेना यातमश्विना ।
कण्वासो वां ब्रह्म कृण्वंत्यध्वरे तेषां सु शृणुतं हवं ॥ २ ॥
त्रिऽवंधुरेण । त्रिऽवृता । सुऽपेशसा । रथेन । आ । यातं । अश्विना ।
कण्वासः । वां । ब्रह्म । कृण्वंति । अध्वरे । तेषां । सु । शृणुतं । हवं ॥ २ ॥

हे अश्विना त्रिवंधुरेणोन्नतानतरूपत्रिविधबंधनकाष्ठयुक्तेन त्रिवृताप्रतिहतगतितया लोकत्रये वर्तमानेन सुपेशसा शोभनसुवर्णयुक्तेन रथेनायातं । इहागच्छतं । कण्वासः कण्वपुत्रा मेधाविन ऋत्विजो वां युवयोरध्वरे यागे ब्रह्म

स्तोत्ररूपं मंत्रं हविर्लक्षणमन्नं वा कृण्वंति । कुर्वंति । तेषां कण्वानां हवमाह्वानं सु शृणुतं । सुष्ठ्वादरेण शृणुतं ॥ त्रिवंधुरेण । बध्नंतीति बंधुराः । बंधेरौणादिक उरन्प्रत्ययः । त्रयो बंधुरा यस्यासौ त्रिबंधुरः । त्रिचक्रादिषु पाठात् त्रिचक्रादीनां छंदस्युपसंख्यानमित्युत्तरपदांतोदात्तत्वं । त्रिवृता । त्रिषु लोकेषु वर्तत इति त्रिवृत् । क्विप् चेति क्विप् । सुपेशसा । पेश इति हिरण्यनाम । शोभनं पेशो यस्यासौ सुपेशाः । आद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं । शृणुतं । श्रु श्रवणे । श्रुवः शृ चेति श्नुः । तत्संनियोगेन धातोः शृभावश्च । हवं । ह्वयतेर्भावेऽनुपसर्गस्येत्यप् । संप्रसारणं च गुणावादेशौ । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः ॥

तृतीयामृचमाह ॥

अश्विना मधुमत्तमं पातं सोममृतावृधा ।
अथाद्य दस्रा वसु बिभ्रता रथे दाश्वांसमुप गच्छतं ॥ ३ ॥
अश्विना । मधुमत्ऽतमं । पातं । सोमं । ऋतऽवृधा ।
अथ । अद्य । दस्रा । वसु । बिभ्रता । रथे । दाश्वांसं । उप । गच्छतं ॥ ३ ॥

हे ऋतावृधा यज्ञस्य वर्धकावश्विनौ मधुमत्तमं सोमं पातं । पिबतं । हे दस्रा । अश्विनौ सोमपानार्थमथास्मदाह्वानानंतरमद्यास्मिन्दिने रथे स्वकीये वसु बिभ्रता । अस्मदुपयुक्तं धनं धारयंतौ दाश्वांसं हविःप्रदं यजमानमुपगच्छतं । समीपे प्राप्नुतं ॥ बिभ्रता । डुभृञ् धारणपोषणयोः । शतरि जुहोत्यादित्वाच्छपः श्लुः । भृञामिदित्यभ्यासस्येत्वं । शतुर्ङित्त्वाद्गुणाभावे यणादेशः । अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥

चतुर्थीमृचमाह ॥

त्रिषधस्थे बर्हिषि विश्ववेदसा मध्वा यज्ञं मिमिक्षतं ।
कण्वासो वां सुतसोमा अभिद्यवो युवां हवंते अश्विना ॥ ४ ॥
त्रिऽसधस्थे । बर्हिषि । विश्वऽवेदसा । मध्वा । यज्ञं । मिमिक्षतं ।
कण्वासः । वां । सुतऽसोमाः । अभिऽद्यवः । युवां । हवंते । अश्विना ॥ ४ ॥

हे विश्ववेदसा सर्वज्ञावश्विनौ त्रिषधस्थे कक्ष्यात्रयरूपेणास्तीर्णतया त्रिषु

स्थानेष्ववस्थिते बर्हिषि दर्भे स्थित्वा मध्वा मधुरेण रसेन यज्ञं मिमिक्षतं । सेक्तुमिच्छतं । हे अश्विना वां युष्मदर्थं सुतसोमा अभिषुतसोमयुक्ता अभिद्यवोऽभिगतदीप्तयः कण्वासो युवामुभौ हवंते । आह्वयंते ॥ त्रिषधस्थे । त्रिषु स्थानेषु सह तिष्ठतीति त्रिषधस्थं बर्हिः । सुपि स्थ इति कप्रत्ययः । आतो लोप इटि चेत्याकारलोपः । सधमादस्थयोश्छंदसीति सहशब्दस्य सधादेशः । मध्वा । आगमानुशासनस्यानित्यत्वान्नुमभावः । जसि चेत्यत्र जसादिषु छंदसि वावचनमिति वचनान्नाभावाभावश्च । मिमिक्षतं । मिह सेचने । सन्येकाच इतीट्प्रतिषेधः । हलंताच्चेति सनः कित्वाल्लघूपधगुणाभावः । अभ्यासहलादिशेषौ । ढत्वकुत्वषत्वानि । सुतसोमाः । सुतः सोमो यैः । बहुव्रीहिस्वरः । अभिद्यवः । द्युरित्यहर्नाम । तेन तत्संबंधी प्रकाशो लक्ष्यते । अभिगता द्युं । अत्यादयः क्रांताद्यर्थे द्वितीयायाः । पा° २. २. १८. ५. । इति समासः । अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥

पंचमीमृचमाह ॥

याभिः कण्वमभिष्टिभिः प्रावतं युवमश्विना ।
ताभिः ष्व१स्माँ अवतं शुभस्पती पातं सोममृतावृधा ॥ ५ ॥
याभिः । कण्वं । अभिष्टिऽभिः । प्र । आवतं । युवं । अश्विना ।
ताभिः । सु । अस्मान् । अवतं । शुभः । पती इति । पातं । सोमं । ऋतऽवृधा ॥ ५ ॥

हे अश्विना युवं युवामुभौ याभिरभिष्टिभिरपेक्षिताभी रक्षाभिः कण्वं महर्षिं प्रावतं । रक्षितवंतौ । हे शुभस्पती शोभनस्य कर्मणः पालकौ । ताभी रक्षाभिरस्माननुष्ठातॄन्स्ववतं । सुष्ठु रक्षतं । स्पष्टमन्यत् ॥ अभिष्टिभिः । आभिमुख्येनेष्यंत इत्यभिष्टयः फलानि । इषु इच्छायां । कर्मणि क्तिनि तितुत्रेत्यादिनेट्प्रतिषेधः । एमन्नादिषु छंदसि पररूपं वक्तव्यमिति पररूपत्वं । तादौ चेति गतेः प्रकृतिस्वरत्वं । उपसर्गाश्चाभिवर्जमित्यभिरंतोदात्तः । शुभस्पती । शुभ दीप्तौ । क्विप् चेति क्विप् । षष्ठ्याः पतिपुत्रेति विसर्जनीयस्य सत्वं । सुबामंत्रित इति षष्ठ्यंतस्य परांगवद्भावात् षष्ठ्यामंत्रितस्य समुदायस्याष्टमिकं सर्वानुदात्तत्वं ॥

॥ इति प्रथमस्य चतुर्थे प्रथमो वर्गः ॥

षष्ठीमृचमाह ॥

सुदासे दस्रा वसु बिभ्रता रथे पृक्षो वहतमश्विना ।
रयिं समुद्रादुत वा दिवस्पर्यस्मे धत्तं पुरुस्पृहं ॥ ६ ॥
सुऽदासे । दस्रा । वसु । बिभ्रता । रथे । पृक्षः । वहतं । अश्विना ।
रयिं । समुद्रात् । उत । वा । दिवः । परि । अस्मे इति । धत्तं । पुरुऽस्पृहं ॥ ६ ॥

हे दस्रा दर्शनीयावश्विनौ सुदासे शोभनदानयुक्ताय राज्ञे पिजवनपुत्राय रथे वसु बिभ्रता युवां पृक्षोऽन्नं वहतं । प्रापितवंतौ । समुद्रादंतरिक्षात् । समुद्रमित्यंतरिक्षनाम । समुद्रोऽध्वरमिति तन्नामसु पाठात् । उत वा दिवस्परि । अथवा स्वर्गात्पर्याहृत्य पुरुस्पृहं बहुभिः स्पृहणीयं रयिं धनमस्मे धत्तं । अस्मासु स्थापयतं ॥ सुष्ठु ददातीति सुदाः । असुनि कृदुत्तरपदप्रकृतिस्वरत्वं । दिवस्परि । पंचम्याः परावध्यर्थ इति विसर्जनीयस्य सत्वं । पुरुस्पृहं । स्पृह ईप्सायां । चुरादिरदंतः । पुरुभिः स्पृह्यत इति पुरुस्पृहः । कर्मणि घञ् । अतो लोपस्य स्थानिवत्त्वाल्लघूपधगुणाभावः । ञित्स्वरेणोत्तरपदस्याद्युदात्तत्वे कृदुत्तरपदप्रकृतिस्वरेण तदेव शिष्यते ॥

सप्तमीमृचमाह ॥

यन्नासत्या परावति यद्वा स्थो अधि तुर्वशे ।
अतो रथेन सुवृता न आ गतं साकं सूर्यस्य रश्मिभिः ॥ ७ ॥
यत् । नासत्या । पराऽवति । यत् । वा । स्थः । अधि । तुर्वशे ।
अतः । रथेन । सुऽवृता । नः । आ । गतं । साकं । सूर्यस्य । रश्मिऽभिः ॥ ७ ॥

हे नासत्या । असत्यरहितावश्विनौ यत् यदि युवां परावति दूरदेशे स्थः । वर्तेथे । यद्वा । अथवाधि तुर्वशेऽधिके समीपे स्थः । अतोऽस्माद्दूरात्समीपाद्वा सूर्यस्य रश्मिभिः साकं सूर्योदयकाले सुवृता शोभनवर्तनयुक्तेन रथेन नोऽस्मान् प्रत्यागतं । आगच्छतं ॥ नासत्या । सत्सु भवौ सत्यौ । न सत्यावसत्यौ । न असत्यौ नासत्यौ । नभ्राण्नपादित्यादिना नञः प्रकृतिभावः । स्थः । अस भुवि । श्नसोरल्लोप इत्यकारलोपः । यद्वृत्तयोगादनिघातः । गतं । गमेर्लोटि बहुलं छंदसीति शपो लुक् । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः ॥

अष्टमीमृचमाह ॥

अर्वाचा वां सप्तयोऽध्वरश्रियो वहंतु सवनेदुप ।
इषं पृंचंता सुकृते सुदानव आ बर्हिः सीदतं नरा ॥ ८ ॥
अर्वाचा । वां । सप्तयः । अध्वरऽश्रियः । वहंतु । सवना । इत् । उप ।
इषं । पृंचंता । सुऽकृते । सुऽदानवे । आ । बर्हिः । सीदतं । नरा ॥ ८ ॥

हे अश्विनौ । अध्वरश्रियो यागसेविनः सप्तयोऽश्वाः सवनेदुपास्मदनुष्ठेयानि त्रीणि सवनान्येवोपलक्ष्यार्वाचाभिमुखौ वां युवां वहंतु । प्रापयंतु । हे नरा । अश्विनौ सुकृते सुष्ठु कर्मकारिणे सुदानवे शोभनदानयुक्ताय यजमानायेषमन्नं पृंचंता संयोजयंतौ युवां बर्हिरासीदतं । दर्भं प्राप्नुतं ॥ अर्वाचा । सुपां सुलुगिति विभक्तेराकारः । अध्वरश्रियः । अध्वरं श्रयंतीत्यध्वरश्रियः । क्विब्वचिप्रच्छीत्यादिना क्विप् । दीर्घश्च । वहंतु । वह प्रापणे । शपः पित्त्वादनुदात्तत्वं । तिङश्च लसार्वधातुकस्वरेण धातुस्वरेणाद्युदात्तत्वं । पादादित्वान्निघाताभावः । सवना । षुञ् अभिषवे । अभिषूयते सोम एष्विति सवनानि । अधिकरणे ल्युट् । योरनादेशः । गुणावादेशौ । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । शेश्छंदसि बहुलमिति शेर्लोपः । पृंचंता । पृची संपर्के । शतरि रुधादित्वात् श्नम् । श्नसोरल्लोप इत्यकारलोपः । प्रत्ययस्वरः । सुकृते । सुकर्मपापेत्यादिना करोतेर्भूते काले क्विप् । ह्रस्वस्य पितीति तुक् । सुदानवे । शोभनं दानु दानं यस्यासौ सुदानुः । दानुशब्दो नुप्रत्ययांत आद्युदात्तः । आद्युदात्तं द्व्यच् छंदसीति बहुव्रीहावुत्तरपदाद्युदात्तत्वं । सीदतं । षद्लृ विशरणगत्यवसादनेषु ॥

नवमीमृचमाह ॥

तेन नासत्या गतं रथेन सूर्यत्वचा ।
येन शश्वदूहथुर्दाशुषे वसु मध्वः सोमस्य पीतये ॥ ९ ॥
तेन । नासत्या । आ । गतं । रथेन । सूर्यऽत्वचा ।
येन । शश्वत् । ऊहथुः । दाशुषे । वसु । मध्वः । सोमस्य । पीतये ॥ ९ ॥

हे नासत्या सूर्यत्वचा सूर्यसंवृतेन सूर्यरश्मिसदृशेन वा तेन प्रसिद्धेन रथेनागतं । आगच्छतं । दाशुषे हविर्दत्तवते यजमानाय वसु धनं शश्वत् सर्वदा

येन रथेनोहथुः । प्रापितवंतौ । तेन रथेनेति पूर्वेणान्वयः । किमर्थमागमनमिति तदुच्यते । मध्वो मधुरस्य सोमस्य पीतये सोमपानार्थं ॥ सूर्यत्वचा । त्वच संवरणे । त्वचति संवृणोतीति त्वग् रश्मिः । सूर्यस्य त्वगिव त्वग्यस्य । सप्तम्युपमानेत्यादिना बहुव्रीहिरुत्तरपदलोपश्च । सूर्यशब्दः षू प्रेरण इत्यस्मात् क्यपि राजसूयसूर्येत्यादिना रुडागमसहितो निपातितः । ततः प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तः । स एव बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण शिष्यते । ऊहथुः । वह प्रापणे । लिट्यसंयोगाल्लिट्किदिति लिटः कित्त्वे वचिस्वपीत्यादिना संप्रसारणं । अभ्यासहलादिशेषौ सवर्णदीर्घः । प्रत्ययस्वरः । यद्वृत्तयोगादनिघातः ॥

दशमीमृचमाह ॥

उक्थेभिरर्वागवसे पुरूवसू अर्कैश्च नि ह्वयामहे ।
शश्वत्कण्वानां सदसि प्रिये हि कं सोमं पपथुरश्विना ॥ १० ॥

उक्थेभिः । अर्वाक् । अवसे । पुरूवसू इति पुरुऽवसू । अर्कैः । च । नि । ह्वयामहे ।
शश्वत् । कण्वानां । सदसि । प्रिये । हि । कं । सोमं । पपथुः । अश्विना ॥ १० ॥

पुरूवसू प्रभूतधनावश्विनाववसेऽस्मद्रक्षणार्थमुक्थेभिरुक्थैः शस्त्रैरर्कैश्चार्चनसाधनैः स्तोत्रैश्चार्वागस्मदाभिमुख्येन निह्वयामहे । नितरामाह्वयामः । हे अश्विनौ कण्वानां कण्वपुत्राणां मेधाविनां वा प्रिये सदसि यज्ञस्थाने शश्वत्सर्वदा सोमं पपथुर्हि कं । युवां पीतवंतौ खलु ॥ उक्थेभिः । बहुलं छंदसीति भिस ऐसादेशाभावः । बहुवचने झल्येदित्येत्वं । अर्कैः । ऋच स्तुतौ । पुंसि संज्ञायां घः । प्रायेणेति करणे घः । चजोः कु घिण्यतोरिति कुत्वं । निह्वयामहे । निसमुपविभ्यो ह्व इत्यात्मनेपदं । सदसि । सीदंत्यस्मिन्निति सदः । असुनो नित्त्वादाद्युदात्तत्वं । पपथुः । पा पाने । लिट्यातो लोप इटि चेत्याकारलोपः । प्रत्ययस्वरः । हि चेति निघातप्रतिषेधः ॥

॥ इति प्रथमस्य चतुर्थे द्वितीयो वर्गः ॥

सह वामेनेति षोडशर्चं पंचमं सूक्तं । प्रस्कण्व ऋषिः । बार्हतत्वादयुजो बृहत्यः । युजः सतोबृहत्यः । उषा देवता । सह षोळशोषस्यं त्वित्यनुक्रमणिका ॥ प्रातरनुवाक उषस्ये क्रतौ बार्हते छंदसीदं सूक्तं । अथोषस्य इति खंडे सूचितं ।

प्रत्यु अदर्शि सह वामेनेति बार्हतं । आ० ४. १४. । इति ॥ तथाश्विनशस्त्रेऽप्ये-तत्सूक्तं । प्रातरनुवाकन्यायेनेत्यतिदिष्टत्वात् ॥

तत्र प्रथमामृचमाह ॥

सह वामेन न उषो व्युच्छा दुहितर्दिवः ।
सह द्युम्नेन बृहता विभावरि राया देवि दास्वती ॥ १ ॥
सह । वामेन । नः । उषः । वि । उच्छ । दुहितः । दिवः ।
सह । द्युम्नेन । बृहता । विभाऽवरि । राया । देवि । दास्वती ॥ १ ॥

हे दुहितर्दिवः । द्युदेवतायाः पुत्रि । उषः । उषःकालदेवते नोऽस्मदर्थं वामेन धनेन सह व्युच्छ । प्रभातं कुरु । हे विभावरि । उषोदेवते बृहता प्रभूतेन द्युम्नेनान्नेन सह व्युच्छ । हे देवि त्वं दास्वती दानयुक्ता सती राया पशुलक्षणेन धनेन सह व्युच्छ ॥ उच्छा । उछी विवासे । दुहितर्दिवः । सुबामंत्रिते परांगवत्स्वर इत्यत्र परमपि छंदसीति वचनात् दिव इत्यस्य पूर्वांगवद्भावे सत्यामंत्रितस्य चेति षष्ठ्यामंत्रितसमुदायस्याष्टमिकं सर्वानुदात्तत्वं । बृहता । बृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वं । विभावरि । भा दीप्तौ । आतो मनिन्निन्नित्यादिना वनिप् । वनो र चेति ङीप् । तत्संनियोगेन नकारस्य रेफादेशः । संबुद्धौ ह्रस्वत्वं । दास्वती । डुदाञ् दाने । भावेऽसुन्प्रत्ययः । दा दानमस्या अस्तीति दास्वती । मादुपधाया इति मतुपो वत्वं । उगितश्चेति ङीप् ॥

द्वितीयामृचमाह ॥

अश्वावतीर्गोमतीर्विश्वसुविदो भूरि च्यवंत वस्तवे ।
उदीरय प्रति मा सूनृता उषश्चोद राधो मघोनां ॥ २ ॥
अश्वऽवतीः । गोऽमतीः । विश्वऽसुविदः । भूरि । च्यवंत । वस्तवे ।
उत् । ईरय । प्रति । मा । सूनृताः । उषः । चोद । राधः । मघोनां ॥ २ ॥

अश्वावतीर्बह्वश्वोपेता गोमतीर्बहुभिर्गोभिर्युक्ता विश्वसुविदः कृत्स्नस्य धनस्य सुष्ठु लंभयित्र्य उषोदेवता वस्तवे प्रजानां निवासाय भूरि प्रभूतं यथा भवति तथा च्यवंत । प्राप्ताः । हे उषोदेवते मा प्रति मामुद्दिश्य सूनृताः प्रियहितवाच उदीरय । ब्रूहि । मघोनां धनवतां संबंधि राधो धनं चोद । अस्मदर्थं प्रेरय ॥

अश्वावतीः । मंत्रे सोमाश्वेंद्रियविश्वदेव्यस्य मताविति पूर्वपदस्य दीर्घत्वं । वा छंदसीति पूर्वसवर्णदीर्घनिषेधस्य पाक्षिकस्योक्तेः पूर्वसवर्णदीर्घत्वं । च्यवंत । च्युङ् गतौ । लङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । वस्तवे । वस निवासे । तुमर्थे सेसेनिति तवेन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं । ईरय । ईर गतौ कंपने च । हेतुमति णिच् । चोद । चुद संचोदने । चौरादिकः । लोटि छंदस्युभयथेति शप आर्द्धधातुकत्वात् णेरनितीति णिलोपः । शपः पित्त्वादनुदात्तत्वे धातुस्वरः । पादादित्वान्निघाताभावः । मघोनां । षष्ठीबहुवचने श्वयुवमघोनामतद्धित इति संप्रसारणं ॥

तृतीयामृचमाह ॥

उवासोषा उच्छाच्च नु देवी जीरा रथानां ।
ये अस्या आचरणेषु दध्रिरे समुद्रे न श्रवस्यवः ॥ ३ ॥

उवास । उषाः । उच्छात् । च । नु । देवी । जीरा । रथानां ।
ये । अस्याः । आऽचरणेषु । दध्रिरे । समुद्रे । न । श्रवस्यवः ॥ ३ ॥

उषा देव्युवास । पुरा निवासमकरोत् । प्रभातं कृतवतीत्यर्थः । च नु अद्यापुच्छात् । व्युच्छति । प्रभातं करोति । कीदृशी देवी । रथानां जीरा । प्रेरयित्री । उषःकाले हि रथाः प्रेर्यंते । अस्या उषस आचरणेष्वागमनेषु ये रथाः दध्रिरे । धृताः सज्जीकृता भवंति तेषां रथानामिति पूर्वत्रान्वयः । रथप्रेरणे दृष्टांतः । श्रवस्यवो धनकामाः समुद्रे न । यथा समुद्रमध्ये नावः सज्जीकृत्य प्रेरयंति तद्वत् ॥ उवास । वस निवासे । णलि लिट्यभ्यासस्योभयेषां । पा॰ ६. १. १७. । इत्यभ्यासस्य संप्रसारणं । लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं । उच्छात् । लेट्याडागमः । इतश्च लोप इतीकारलोपः । तुदादित्वाच्छप्रत्ययः । आगमानुदात्तत्वे प्रत्ययस्वरः । उषा इत्यस्य वाक्यांतरगतत्वात्तदपेक्षयास्य निघातो न भवति । समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति वचनात् । जीरा । जु इति गत्यर्थः । सौत्रो धातुः । जोरीच्चेति रक्प्रत्ययः । अस्याः । इदमोऽन्वादेश इत्यशादेशोऽनुदात्तः । विभक्तिरपि सुप्त्वादनुदात्तेति सर्वानुदात्तत्वं । आचरणेषु । चर गत्यर्थः । ल्युट् चेति भावे ल्युट् । लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं । कृदुत्तरपदप्रकृतिस्वरत्वं । दध्रिरे । धृङ् अवस्थाने । लिटः कित्त्वाद्गुणाभावे यणादेशः । चित्त्वादंतोदात्तत्वं । यच्छब्दयोगादनिघातः । श्रवस्यवः । श्रूयत इति श्रवो धनं ।

असुन्। तदात्मन इच्छंतीति अवस्यवः। सुप आत्मनः क्यच्। क्याच्छंदसी-त्युप्रत्ययः॥

चतुर्थीमृचमाह॥

उषो ये ते प्र यामेषु युंजते मनो दानाय सूरयः।
अत्राह तत्कण्व एषां कण्वतमो नाम गृणाति नृणां॥४॥
उषः। ये। ते। प्र। यामेषु। युंजते। मनः। दानाय। सूरयः।
अत्र। अह। तत्। कण्वः। एषां। कण्वऽतमः। नाम। गृणाति। नृणां॥४॥

हे उषस्ते तव यामेषु गमनेषु सत्सु ये सूरयो विद्वांसो दानाभिज्ञा दानाय धनादिदानार्थं मनः स्वकीयं प्रयुंजते। प्रेरयंति। दानशीला उदाराः प्रभवः प्रातःकाले दातुमिच्छंतीत्यर्थः। एषां दातुमिच्छतां नृणां तन्नाम दानविषये लोकप्रसिद्धं नाम कण्वतमोऽतिशयेन मेधावी कण्वो महर्षिरत्राह। अत्रैवोषः-काले गृणाति। उच्चारयति। यो दातुमिच्छति यश्च नामग्रहणेन दातारं प्रशं-सति तावुभावप्युषःकाल एव तथा कुरुत इत्युषसः स्तुतिः॥ गृणाति। गॄ शब्दे। क्र्यादिकः। प्वादीनां ह्रस्व इति ह्रस्वत्वं। नृणां। नामि नृ च। पा० ६.४.६.। इति दीर्घप्रतिषेधः। नृ चान्यतरस्यामिति विभक्तेरुदात्तत्वं॥

पंचमीमृचमाह॥

आ घा योषेव सूनर्युषा याति प्रभुंजती।
जरयंती वृजनं पद्वदीयत उत्पातयति पक्षिणः॥५॥
आ। घ। योषाऽइव। सूनरी। उषाः। याति। प्रऽभुंजती।
जरयंती। वृजनं। पत्ऽवत्। ईयते। उत्। पातयति। पक्षिणः॥५॥

उषा देवी प्रभुंजती प्रकर्षेण सर्वं पालयंत्यायाति घा। प्रतिदिनमागच्छति खलु। तत्र दृष्टांतः। सूनरी सुष्ठु गृहकृत्यस्य नेत्री योषेव। गृहिणीव। कीदृ-श्युषाः। वृजनं गमनशीलं जंगमं प्राणिजातं जरयंती। जरां प्रापयंती। अस-कृदुषस्यावृत्तायां वयोहान्या प्राणिनो जीर्णा भवंति। किंच। उषःकाले पद्वत् पादयुक्तं प्राणिजातमीयते। निद्रां परित्यज्य स्वस्वकृत्यार्थं गच्छति। किंच। इयमुषाः पक्षिण उत्पातयति। पक्षिणो ह्युषःकाले समुत्थाय तत्र तत्र व्रजंति॥

घा। ऋचि तुनुघेत्यादिना संहितायां दीर्घः। सुष्ठु नयतीति सूनरी। नॄ नये। अच इरितीप्रत्ययः। गतिसमासे कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति वचनात्कृदिकारादक्तिन इति ङीष्। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। निपातस्य चेति पूर्वपदस्य दीर्घः। प्रभुंजती। भुज पालनाभ्यवहारयोः। लटः शतृ। रुधादित्वाच्छ्नम्। श्नसोरल्लोप इत्यकारलोपः। उगितश्चेति ङीप्। शतुरनुम इति नद्या उदात्तत्वं। वृजनं। वृजी वर्जने। वर्ज्यत इति वृजनं प्राणिजातं। कृपॄवृजिमंदिनिधाञ्भ्यः क्युः। उ० २. ७९.। इति क्युप्रत्ययः। क्त्विाल्लघूपधगुणाभावः। योरनादेशे प्रत्ययस्वरः। पद्वत्। पत् पादः। तदस्यास्तीति पद्वत्। झय इति मतुपो वत्वं। व्यत्ययेन मतुप उदात्तत्वं। न च स्वरविधौ व्यंजनमविद्यमानवदिति व्यंजनस्याविद्यमानवत्त्वे सति हृस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वमिति वाच्यं। हृस्वादित्येव सिद्धे पुनर्नुड्ग्रहणसामर्थ्यादेषा परिभाषा नाश्रीयत इति वृत्तावुक्तं। इतरथा हि मरुत्वानित्यत्रापि मतुप उदात्तत्वं स्यात्॥

॥ इति प्रथमस्य चतुर्थे तृतीयो वर्गः ॥

षष्ठीमृचमाह ॥

वि या सृजति समनं व्य१र्थिनः पदं न वेत्योदती।
वयो नकिष्टे पप्तिवांस आसते व्युष्टौ वाजिनीवति ॥ ६ ॥

वि। या। सृजति। समनं। वि। अर्थिनः। पदं। न। वेति। ओदती।
वयः। नकिः। ते। पप्तिऽवांसः। आसते। विऽउष्टौ। वाजिनीऽवति ॥ ६ ॥

या देवता समनं समीचीनं चेष्टावंतं पुरुषं विसृजति। प्रेरयति। गृहारामादिचेष्टाकुशलान्पुरुषानुषःकालः शयनादुत्थाप्य स्वस्वव्यापारे प्रेरयतीति प्रसिद्धं। किंच। उषा अर्थिनो याचकान्विसृजति। तेऽपि ह्युषःकाले समुत्थाय स्वकीयदातृगृहे गच्छंति। ओदत्युषोदेवता पदं स्थानं न वेति। न कामयते। उषःकालः शीघ्रं गच्छतीत्यर्थः। हे वाजिनीवति। उषोदेवते ते व्युष्टौ त्वदीये प्रभातकाले पप्तिवांसः पतनयुक्ता वयः पक्षिणो नकिरासते। न तिष्ठंति। किंतु स्वस्वनीडाद्विनिर्गत्य गच्छंतीत्यर्थः॥ सृजति। सृज विसर्गे। तुदादित्वाच्छः। तस्य ङित्त्वाल्लघूपधगुणाभावः। प्रत्ययस्य पित्त्वादनुदात्तत्वे विकरणस्वरः। यद्वृत्तयोगादनिघातः। ओदती। उंदी क्लेदने। उनत्ति सर्वं नीहारेणेत्योदत्युषाः।

शतरि व्यत्ययेन शप्। व्यत्ययेनानुनासिकलोपे लघूपधगुणः। उगितश्चेति ङीप्। आगमानुशासनस्यानित्यत्वान्नुमभावः। शपः पित्त्वादनुदात्तत्वं। शतुरदुपदेशाल्ल-सार्वधातुकानुदात्तत्वे धातुस्वरेणाद्युदात्तत्वं। न च शतुरनुम इति नद्या उदात्तत्वं। अंतोदात्ताच्छतुः परस्यास्तद्विधानात्। नकिष्टे। युष्मत्ततत्क्षुःष्वंतःपादमिति षत्वं। पप्तिवांसः। पत्लृ गतौ। लिटः क्वसुः। क्रादिनियमात्प्राप्त इट् वस्वेका-जाद्घसामिति नियमान्न प्राप्नोति। तत्क्रियते सर्वविधीनां छंदसि विकल्पित-त्वात्। तनिपत्योश्छंदसीत्युपधालोपः। द्विर्वचनेऽचीति स्थानिवद्भावाद्द्विर्भावः। प्रत्ययस्वरः। वाजिनीवति। वाजोऽन्नमस्या अस्तीति वाजिनी क्रिया। मत्वर्थीय इनिः। ऋन्नेभ्य इति ङीप्। तादृशी क्रिया यस्याः सा। तदस्यास्तीति मतुप्। संज्ञायामिति मतुपो वत्वं॥

सप्तमीमृचमाह॥

एषायु॑क्त परा॒वतः॒ सूर्य॑स्योद॒यना॒दधि॑।
श॒तं रथे॑भिः सु॒भगो॒षा इ॒यं वि या॒त्यभि मानु॑षान्॥ ७॥

ए॒षा। अ॒यु॒क्त॒। प॒रा॒ऽवतः॑। सूर्य॑स्य। उ॒त्ऽअय॑नात्। अधि॑।
श॒तं। रथे॑भिः। सु॒ऽभगा॑। उ॒षाः। इ॒यं। वि। या॒ति॒। अ॒भि। मानु॑षान्॥ ७॥

एषोषोदेवी शतमयुक्त। स्वकीयानां रथानां शतं योजितवती सुभगा सौ-भाग्ययुक्तेयमुषाः परावतो दूरस्थानात् सूर्यस्योदयनादधि सूर्योदयस्थानादधि-काद्युलोकान्मानुषानभि मनुष्यानुद्दिश्य रथेभिः शतसंख्याकैर्युक्तै रथैर्वियाति। विशेषेण गच्छति॥ अयुक्त। लुङि झलो झलीति सिचो लोपः। उदयनात्। उदेत्यत्रेत्युदयनं। इण् गतौ। अधिकरणे ल्युट्। कृदुत्तरपदप्रकृतिस्वरत्वं। सुभगा। शोभनो भगो यस्याः सा। आद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं। मानुषान्। मनोः पुत्रा मानुषाः। मनोर्जातावञ्यतौ षुक् चेत्यञ् षुगागमश्च। ञ्नित्वा-दाद्युदात्तत्वं॥

अष्टमीमृचमाह॥

विश्व॑मस्या नानाम॒ चक्ष॑से॒ जग॒ज्ज्योति॑ष्कृणोति सू॒नरी॑।
अप॒ द्वेषो॑ म॒घोनी॑ दुहि॒ता दि॒व उ॒षा उ॑च्छ॒दप॒ स्रिधः॑॥ ८॥

विश्वं । अस्याः । ननाम । चक्षसे । जगत् । ज्योतिः । कृणोति । सूनरी ।
अप । द्वेषः । मघोनी । दुहिता । दिवः । उषाः । उच्छत् । अप । स्रिधः ॥ ८ ॥

विश्वं सर्वं जगत् जंगमं प्राणिजातमस्या उषसश्चक्षसे प्रकाशाय नानाम । प्रह्वीभवति । रात्रौ तमसि निमग्नाः सर्वे जनास्तन्निवारयित्रीमुषसमुपलभ्य नमस्कुर्वंतीत्यर्थः । कुतः । यस्मादेषा सूनरी । सुष्ठु नेत्री । अभिमतफलस्य प्रापयित्र्युषा ज्योतिष्कृणोति । सर्वं प्रकाशयति । किंच । मघोनी मघवती धनवती दिवो दुहिता द्युलोकसकाशादुत्पन्नोषा द्वेषो द्वेष्टॄनपोच्छत् । अपवर्जयति । तथा स्रिधः शोषयितॄनपोच्छत् । अपवर्जयति । तस्मादिष्टप्राप्त्यनिष्टपरिहारहेतुभूतामुषोदेवतां विश्वं जगन्नमस्करोतीत्यर्थः ॥ अस्याः । इदमोऽन्वादेश इत्यशादेशोऽनुदात्तः । विभक्तिश्च सुप्त्वादनुदात्तेति सर्वानुदात्तत्वं । नानाम । संहितायामन्येषामपि दृश्यत इत्यभ्यासस्य दीर्घत्वं । तुजादित्वे हि तूतुजान इत्यादाविव पदकालेऽपि दीर्घः श्रूयते । ज्योतिः । इणः ष इत्यनुवृत्ताविसुसोः सामर्थ्ये । पा० ८.३.४४. । इति विसर्जनीयस्य षत्वं । द्वेषः । द्विष अप्रीतौ । अन्येभ्योऽपि दृश्यंत इति विच् । लघूपधगुणः । मघोनी । मघं वनति संभजत इति मघोनी । श्वन्नुक्षन्नित्यादिना मघवन्शब्दः कनिन्प्रत्ययांतो निपातितः । स्त्रियामृन्नेभ्यो ङीबिति ङीप् । भसंज्ञायां श्वयुवमघोनामतद्धित इति संप्रसारणं । उच्छत् । उछी विवासे । विवासो वर्जनं । छंदसि लुङ्लङ्लिट इति वर्तमाने लङ् । बहुलं छंदस्यमाङ्योगेऽपीत्यडागमाभावः । स्रिधः । स्रिध शोषणे । क्विप् चेति क्विप् ॥

नवमीमृचमाह ॥

उष आ भाहि भानुना चंद्रेण दुहितर्दिवः ।
आवहंती भूर्यस्मभ्यं सौभगं व्युच्छंती दिविष्टिषु ॥ ९ ॥

उषः । आ । भाहि । भानुना । चंद्रेण । दुहितः । दिवः ।
आऽवहंती । भूरि । अस्मभ्यं । सौभगं । विऽउच्छंती । दिविष्टिषु ॥ ९ ॥

हे दिवो दुहितः । द्युलोकस्य पुत्रि । उषः । उषोदेवते चंद्रेण सर्वेषामाह्लादकेन भानुना प्रकाशेन आ समंताद्भाहि । प्रकाशस्व । किं कुर्वंती । दिविष्टिषु दिवसेषु भूरि प्रभूतं सौभगं सौभाग्यमस्मभ्यमावहंती । संपादयंती । तथा

व्युच्छंती। तमांसि वर्जयंती ॥ उषः। षाष्ठिकमामंत्रिताद्युदात्तत्वं। दुहितर्दिवः। परमपि छंदसीति दिव इत्यस्य परस्य षष्ठ्यंतस्य पूर्वामंत्रितांगवद्भावे सति षष्ठ्यामंत्रितसमुदायस्याष्टमिकं सर्वानुदात्तत्वं। आवहंती। ङीप्शपौ पित्त्वादनुदात्तौ। शतुश्चादुपदेशाल्लसार्वधातुकस्वरेणानुदात्तत्वं। अतो धातुस्वरः शिष्यते। समासे कृदुत्तरपदप्रकृतिस्वरत्वं। भूरि। प्रभवति न विनश्यतीति भूरि। अदिशदिभूशुभिभ्यः क्रिन्निति क्रिन्। नित्त्वादाद्युदात्तत्वं। सुभगस्य भावः सौभगं। सुभगान्मंत्र इत्युद्गात्रादिषु पाठादञ्प्रत्ययः। हृद्भगसिंध्वंते पूर्वपदस्य च। पा० ७. ३. १९.। इत्युभयपदवृद्धौ प्राप्तायां सर्वे विधयश्छंदसि विकल्प्यंत इति वचनादत्रोत्तरपदवृद्धिर्न भवतीति वृत्तावुक्तं। व्युच्छंती। उछी विवासे। विवासो वर्जनं। तौदादिकः। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः। दिविष्टिषु। दिव्शब्देन दिविष्ठ आदित्यो लक्ष्यते। तस्येष्टय एषणानि गमनानि येषु दिवसेषु ते दिविष्टयः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

दशमीमृचमाह ॥

विश्वस्य हि प्राणनं जीवनं त्वे वि यदुच्छसि सूनरि।
सा नो रथेन बृहता विभावरि श्रुधि चित्रामघे हवं ॥ १० ॥

विश्वस्य। हि। प्राणनं। जीवनं। त्वे इति। वि। यत्। उच्छसि। सूनरि।
सा। नः। रथेन। बृहता। विभाऽवरि। श्रुधि। चित्रऽमघे। हवं ॥ १० ॥

हे सूनरि। उषोदेवि विश्वस्य सर्वस्य प्राणिजातस्य प्राणनं चेष्टनं जीवनं प्राणधारणं च त्वे हि त्वय्येव वर्तते। यद्यस्मात्त्वं व्युच्छसि। तमो वर्जयसि। हे विभावरि विशिष्टप्रकाशयुक्ते सा तादृशी त्वं नोऽस्मान्प्रति बृहता प्रौढेन रथेनायाहीति शेषः। तथा हे चित्रामघे विचित्रधनयुक्त उषोदेवि नोऽस्मदीयं हवमाह्वानं श्रुधि। शृणु ॥ प्राणनं। अन चेष्टायां। ल्युट् चेति भावे ल्युट्। योरनादेशः। समासेऽनितेः। पा० ८. ४. १९.। इत्युपसर्गस्थाद्रकारान्निमित्तादुत्तरस्य नकारस्य णत्वं। नन्वनितेरितीटा निर्देशात्कथमन चेष्टायामित्यस्य णत्वं। तर्हि जीवनस्य पृथगुपादानात्तेनैव धातुना चेष्टा लक्ष्यते। समासे कृदुत्तरपदप्रकृतिस्वरत्वं। संहितायामेकादेशस्वरेणैकादेशस्योदात्तत्वं। त्वे। सुपां सुलुगिति सप्तम्याः शे आदेशः। उच्छसि। उछी विवासे। तौदादिकः। सिपः पित्त्वादनु-

टात्तत्वे विकरणस्वरः । निपातैर्यद्यदिहंतेति निघातप्रतिषेधः । सूनरि । सुष्ठु नयतीति सूनरी । नॄ नय इत्यस्मादच इरित्यौणादिक इप्रत्ययः । गतिसमासे कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् कृदिकारादक्तिन इति ङीष् । निपातस्य चेति पूर्वपदस्य दीर्घत्वं । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वे प्राप्ते आमंत्रितस्य चेत्याष्टमिको निघातः । विभावरि । विशिष्टा भा यस्याः सा । छंदसीवनिपौ । पा० ५. २. १०९. २. । इति मत्वर्थीयो वनिप् । वनो र चेति ङीप् तत्संनियोगेन नकारस्य रेफादेशश्च । श्रुधि । श्रुशृणुपॄकृवृभ्यश्छंदसीति हेर्धिरादेशः । बहुलं छंदसीति विकरणस्य लुक् । हेरपित्त्वेन प्रत्ययस्वरेणांतोदात्तत्वं । पादादित्वान्निघाताभावः । मघमिति धननाम । चित्रं मघं यस्याः सा चित्रमघा । अन्येषामपि दृश्यत इति संहितायां पूर्वपदस्य दीर्घत्वं । हवं । ह्वेञ् स्पर्धायां शब्दे च । भावेऽनुपसर्गस्येत्यप्प्रत्ययः । तत्संनियोगेन संप्रसारणं च ॥

॥ इति प्रथमस्य चतुर्थे चतुर्थो वर्गः ॥

एकादशीमृचमाह ॥

उषो वाजं हि वंस्व यश्चित्रो मानुषे जने ।
तेना वह सुकृतो अध्वराँ उप ये त्वा गृणंति वह्नयः ॥ ११ ॥
उषः । वाजं । हि । वंस्व । यः । चित्रः । मानुषे । जने ।
तेन । आ । वह । सुऽकृतः । अध्वरान् । उप । ये । त्वा । गृणंति । वह्नयः ॥ ११ ॥

हे उषः । वाजं हविर्लक्षणमन्नं हि श्रुतिषु प्रसिद्धं वंस्व । याचस्व । स्वीकुर्वित्यर्थः । यो वाजश्चित्रश्चायनीयो मानुषे मनुष्ये जने जाते यजमाने वर्तते तं वाजमिति पूर्वत्रान्वयः । तेन कारणेन सुकृतः सुष्ठु कृतवतो यजमानानध्वरान् हिंसारहितान् यागानुपावह । प्रापय । ये यजमाना वह्नयो यज्ञनिर्वाहकास्त्वा त्वां गृणंति स्तुवंति तान् सुकृत इति पूर्वेण संबंधः । एतदुक्तं भवति । यजमानैः प्रत्तं हविः स्वीकृत्य पुनरपि तेषां यज्ञं संपादयेति ॥ वाजं । वज व्रज गतौ । कर्मणि घञ् । अजिव्रज्योश्च । पा० ७. ३. ६०. । इत्यत्र चशब्दस्यानुक्तसमुच्चयार्थत्वाद्वाजो वाज्यमित्यत्रापि कुत्वाभाव इति वृत्तावुक्तत्वात्कुत्वाभावः । कर्षात्वत इत्यंतोदात्तत्वे प्राप्ते वृषादित्वादाद्युदात्तत्वं । वंस्व । वनु याचने । अत्र याचनवाचिना धातुना तदुत्तरभावी स्वीकारो लक्ष्यते । बहुलं छंदसीति विक-

रणस्य लुक् । अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । हि चेति निघातप्रतिषेधः । सुकृतः । सुकर्मपापेत्यादिना करोतेर्भूतार्थे क्विप् । तुगागमः । कृदुत्तरपदप्रकृतिस्वरत्वं । अध्वरान् । ध्वरो हिंसा नास्त्यस्मिन्निति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । अध्वरानित्यस्येप्सिततमत्वात्कर्तुरीप्सिततमं । पा० १.४.४९. । इति कर्मसंज्ञा । सुकृत इत्यस्य त्वकथितं च । पा० १.४.५१. । इति । नीवह्योर्हरतेश्चेति द्विकर्मकेषु वहतेः परिगणितत्वात् । अध्वरानित्यत्र नकारस्य संहितायां दीर्घादटीति रुत्वं । आतोऽटि नित्यमिति पूर्वस्याकारस्य सानुनासिकता । गृणंति । गॄ शब्दे । क्र्यादिभ्यः श्ना । प्वादीनां ह्रस्व इति ह्रस्वत्वं । श्नाभ्यस्तयोरात इत्याकारलोपः । प्रत्ययस्वरः । यद्वृत्तयोगादनिघातः ॥

द्वादशीमृचमाह ॥

विश्वाँ॑ दे॒वाँ आ व॑ह॒ सोम॑पीतये॒ऽन्तरि॑क्षादुष॒स्त्वं ।

सास्मासु॑ धा॒ गोम॒दश्वा॑वदु॒क्थ्य१॒॑मुषो॒ वाजं॑ सु॒वीर्यं॑ ॥ १२ ॥

विश्वा॑न् । दे॒वान् । आ । व॒ह॒ । सोम॑ऽपीतये । अं॒तरि॑क्षात् । उ॒षः॒ । त्वं ।

सा । अ॒स्मासु॑ । धाः॒ । गोऽम॑त् । अश्व॑ऽवत् । उ॒क्थ्यं॑ । उषः॑ । वाजं॑ । सु॒ऽवीर्यं॑ ॥ १२ ॥

हे उषः । त्वं सोमपीतये सोमपानार्थमंतरिक्षादंतरिक्षलोकाद्विश्वान्सर्वान्देवानावह । अस्मदीयं देवयजनदेशं प्रापय । हे उषः सा तादृशी त्वं गोमत् गोमंतं बहुभिर्गोभिर्युक्तमश्वावदश्वैरुपेतमुक्थ्यं प्रशस्यं सुवीर्यं शोभनवीर्योपेतं वाजमन्नमस्मासु धाः । निधेहि स्थापयेत्यर्थः ॥ धाः । दधातेश्छंदसि लुङ्लङ्लिट इति प्रार्थनायां लुङ् । गातिस्थेति सिचो लुक् । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । गोमत् । अश्वावत् । मंत्रे सोमाश्वेंद्रियेति मतुपि दीर्घत्वं । उभयत्र सुपां सुलुगिति विभक्तेर्लुक् । उक्थ्यं । उक्थं स्तोत्रं । तत्र भवमुक्थ्यं । भवे छंदसीति यत् । सर्वे विधयश्छंदसि विकल्प्यंत इति यतोऽनाव इत्याद्युदात्तत्वाभावे तित्स्वरितमिति स्वरितत्वं । उषः । आमंत्रिताद्युदात्तत्वं । पादादित्वान्निघाताभावः । सुवीर्यं । शोभनं वीर्यं यस्य । वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं ॥

त्रयोदशीमृचमाह ॥

यस्या॒ रुशं॑तो अ॒र्चयः॒ प्रति॑ भ॒द्रा अदृ॑क्षत ।

सा नो॑ र॒यिं वि॒श्ववा॑रं सु॒पेश॑समु॒षा द॑दातु॒ सुग्म्यं॑ ॥ १३ ॥

यस्याः । रुशंतः । अर्चयः । प्रति । भद्राः । अदृक्षत ।

सा । नः । रयिं । विश्वऽवारं । सुऽपेशसं । उषाः । ददातु । सुग्म्यं ॥ १३ ॥

यस्या उषसोऽर्चयः प्रकाशा रुशंतः शत्रून्हिंसंतो भद्राः कल्याणाः प्रत्यदृक्षत । प्रतिदृश्यंते । सा तथाभूतोषा नोऽस्मभ्यं रयिं ददातु । कीदृशं रयिं । विश्ववारं । विश्वस्य वारकं । यद्वा विश्वैर्वरणीयं । सुपेशसं । पेश इति रूपनाम । शोभनरूपोपेतं । सुग्म्यं । सुष्ठु गंतव्यं । यद्वा सुग्म्यमिति सुखनाम । तद्धेतुत्वात्ताच्छब्द्यं ॥ रुशंतः । रुश रिश हिंसायां । शतरि तुदादित्वाच्छः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे सति शिष्टत्वाद्विकरणस्वरे प्राप्ते व्यत्ययेनाद्युदात्तत्वं । अदृक्षत । दृशेः कर्मणि लुङि झस्यादादेशः । च्लेः सिच् । न दृशः । पा० ३. १. ४७. । इति क्सप्रतिषेधः । एकाच इतीट्प्रतिषेधः । लिङ्सिचावात्मनेपदेषु । पा० १. २. ११. । इति सिचः कित्त्वाल्लघूपधगुणाभावः । सृजिदृशोर्झल्यमकिति । पा० ६. १. ५८. । इत्यमागमाभावश्च कित्त्वादेव । षत्वकत्वषत्वानि । अडागम उदात्तः । यद्वृत्तयोगादनिघातः । विश्ववारं । विश्वं वृणोतीति विश्ववारः । वृञ् वरणे । कर्मण्यण् । यद्वा । विश्वैर्व्रियत इति विश्ववारः । कर्मणि घञ् । मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं । सुग्म्यं । सुष्ठु गंतव्यः सुग्मः । गमेर्घञर्थे कविधानमिति कप्रत्ययः । गमहनेत्यादिनोपधालोपः । तत्र भवं सुग्म्यं । भवे छंदसीति यत् । यतोऽनाव इत्याद्युदात्तत्वं ॥

चतुर्दशीमृचमाह ॥

ये चिद्धि त्वामृषयः पूर्वं ऊतये जुहूरेऽवसे महि ।

सा नः स्तोमाँ अभि गृणीहि राधसोषः शुक्रेण शोचिषा ॥ १४ ॥

ये । चित् । हि । त्वां । ऋषयः । पूर्वे । ऊतये । जुहूरे । अवसे । महि ।

सा । नः । स्तोमान् । अभि । गृणीहि । राधसा । उषः । शुक्रेण । शोचिषा ॥ १४ ॥

हे महि महिते पूजनीये वोषोदेवते त्वां ये चिद्धि ये खलु प्रसिद्धाः पूर्वे चिरंतना ऋषयो मंत्रद्रष्टार ऊतये रक्षणाय । अव इत्यन्ननाम । अवसेऽन्नाय च जुहूरे । जुह्विरे । आहूतवंतः । सूक्तरूपैर्मंत्रैः स्तुतवंत इत्यर्थः । हे उषः सा तादृशी त्वं राधसास्माभिर्दत्तेन हविर्लक्षणेन धनेन शुक्रेण शोचिषा दीप्तेन तमोनिवारयितुं समर्थेन तेजसा चोपलक्षिता सती तेषामृषीणामिव नोऽस्माकं

स्तोमानभि स्तुतीरभिलक्ष्य गृणीहि। सम्यक् स्तुतमिति शब्दय। अस्मदीयाभिः स्तुतिभिः संतुष्टा भवेत्यर्थः ॥ ऊतये। अवतेः क्तिनि ज्वरत्वरेत्यादिना वकारस्योपधायाश्चोट्। ऊतियूतीत्यादिना क्तिन्नुदात्तो निपातितः। जुहूरे। ह्वेञ् स्पर्धायां शब्दे च। लिट्यभ्यस्तस्य चेति द्विर्वचनात्पूर्वमेवाभ्यस्तकारणभूतस्य ह्वयतेः संप्रसारणं। अभ्यस्तस्य यो ह्वयतिः। कश्चाभ्यस्तस्य ह्वयतिः। यस्तस्य कारणमिति व्याख्यातत्वात्। परपूर्वत्वे हल इति दीर्घत्वं। द्विर्वचनादीनि। इरयो रे इतीरेचो रे आदेशः। चित इत्यंतोदात्तत्वं। यद्वृत्तयोगादनिघातः। तत्र हि पंचमीनिर्देशेऽपि व्यवहितेऽपि कार्यं भवतीत्युक्तं। महि। मह पूजायां। औणादिक इप्रत्ययः। कृदिकारादक्तिन इति ङीष्। संबुद्धावम्बार्थेति ह्रस्वत्वं। स्तोमान्। संहितायां नकारस्य रुत्वाद्युक्तं। नित्त्वादाद्युदात्तत्वं। गृणीहि। गॄ शब्दे। क्र्यादिकः। शिति प्वादीनां ह्रस्व इति ह्रस्वत्वं। राधसा। राध्नोत्यनेनेति राधः। असुनो नित्त्वादाद्युदात्तत्वं। उषः। पादादित्वादाष्टमिकनिघाताभावे षाष्ठिकमामंत्रिताद्युदात्तत्वं ॥

पंचदशीमृचमाह ॥

उषो यदद्य भानुना वि द्वारावृणवो दिवः।
प्र नो यच्छतादवृकं पृथु छर्दिः प्र देवि गोमतीरिषः ॥ १५ ॥
उषः। यत्। अद्य। भानुना। वि। द्वारौ। ऋणवः। दिवः।
प्र। नः। यच्छतात्। अवृकं। पृथु। छर्दिः। प्र। देवि। गोऽमतीः। इषः ॥ १५ ॥

हे उषः। त्वमद्यास्मिन्प्रभातसमये यद्यस्माद्भानुना प्रकाशेन दिवोऽंतरिक्षस्य द्वारौ द्वारभूतौ पूर्वापरदिग्भागावंधकारेणाच्छादितौ व्यृणवः। विश्लिष्य प्राप्नोषि। तस्मात्त्वं नोऽस्मभ्यं छर्दिस्तेजस्वि गृहं प्रयच्छतात्। देहि। कीदृशं छर्दिः। अवृकं। हिंसकरहितं। पृथु। विस्तीर्णं। अपि च हे देवि देवनशीले गोमतीर्बहुभिर्गोभिर्युक्ता इषोऽन्नानि। प्रेत्युपसर्गस्यावृत्तेर्यच्छतादित्यनुषज्यते। प्रयच्छतात्। देहि। त्वदागमनस्यास्मद्रक्षणार्थत्वादस्मदभीष्टं गृहादिकं प्रयच्छेत्यर्थः ॥ छर्दिरिति गृहनाम। छर्दिः छदिरिति तन्नामसु पाठात्। ऋणवः। ऋणु गतौ। छांदसे लङि सिपि तनादित्वादुप्रत्ययः। ततो व्यत्ययेन शपि गुणावादेशौ। शपः पित्त्वादनुदात्तत्व उप्रत्ययस्वरः शिष्यते। यद्वृत्तयोगादनिघातः। दिवः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। प्र नः। उपसर्गाद्बहुलमिति बहुलवचनान्नसो णत्वाभावः।

यच्छतात् । दाण् दाने । शपि पाघ्रेत्यादिना यच्छादेशः । अवृकं । नास्ति वृकोऽस्मिन्निति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । पृथु । प्रथ प्रख्याने । प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्चेति कुप्रत्ययः संप्रसारणं च । छर्दिरिति गृहनाम । उछृदिर् दीप्तिदेवनयोः । अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिरितीसिप्रत्ययः । लघूपधगुणः । प्रत्ययस्वरः ॥

षोडशीमृचमाह ॥

सं नो॑ रा॒या बृ॑ह॒ता वि॒श्वपे॑शसा मिमि॒क्ष्वा समिळा॑भि॒रा ।

सं द्यु॒म्नेन॑ विश्व॒तुरो॑षो महि॒ सं वाजै॑र्वाजिनीवति ॥ १६ ॥

सं । नः । रा॒या । बृ॒ह॒ता । वि॒श्वऽपे॑शसा । मि॒मि॒क्ष्व । सं । इळा॑भिः । आ ।

सं । द्यु॒म्नेन॑ । वि॒श्व॒ऽतुरा॑ । उ॒षः॒ । म॒हि॒ । सं । वाजैः॑ । वा॒जि॒नी॒ऽव॒ति॒ ॥ १६ ॥

हे उषः । नोऽस्मान्राया धनेन संमिमिक्ष्व । संसिंच । संयोजयेत्यर्थः । कीदृशेन धनेन । बृहता प्रभूतेन । विश्वपेशसा । पेश इति रूपनाम । बहुविधरूपयुक्तेन । तथेळाभिरा । गोभिश्चास्मान्संमिमिक्ष्व । इळेति गोनाम । इळा जगतीति तन्नामसु पाठात् । आकारः समुच्चये पादांते वर्तमानत्वात् । उक्तं च । एतस्मिन्नेवार्थे देवेभ्यश्च पितृभ्य आ इत्याकार इति । किंच हे महि महनीय उषोदेवते द्युम्नेन यशसा संमिमिक्ष्व । द्युम्नं द्योततेर्यशो वान्नं वेति यास्कः । नि० ५. ५. । कीदृशेन द्युम्नेन । विश्वतुरा । सर्वेषां शत्रूणां हिंसकेन । तथा हे वाजिनीवति । अन्नसाधनभूतक्रियायुक्ते वाजैरन्नैरस्मान्संमिमिक्ष्व । अन्नं वै वाज इति श्रुत्यंतरात् ॥ राया । ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । बृहता । बृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वं । विश्वपेशसा । विश्वानि पेशांसि यस्यासौ विश्वपेशाः । बहुव्रीहौ विश्वं संज्ञायामिति व्यत्ययेनासंज्ञायामपि पूर्वपदांतोदात्तत्वं । यद्वा मरुद्वृधादिर्द्रष्टव्यः । मिमिक्ष्वा । मिह सेचने । व्यत्ययेनात्मनेपदं । लोटि बहुलं छंदसीति शपः श्लुः । द्विर्भावहलादिशेषौ । ढत्वकत्वषत्वानि । प्रत्ययस्वरस्य सति शिष्टत्वात्स एव शिष्यते । पादादित्वादनिघातः । पूर्वपदस्यासमानवाक्यस्थत्वात्तिङ्ङतिङ इति निघातो न भवति । समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति वचनात् । विश्वतुरा । तूर्वतीति तूः । तुर्वी हिंसार्थः । क्विप् चेति क्विप् । राल्लोप इति वकारलोपः । विश्वेषां तूर्विश्वतूः । समासस्येत्यंतोदात्तत्वं ।

वाजिनीवति। वाजोऽन्नमस्या अस्तीति वाजिनी क्रिया। तादृशी क्रिया यस्याः सा तथोक्ता ॥

॥ इति प्रथमस्य चतुर्थे पंचमो वर्गः ॥

उषो भद्रेभिरिति चतुर्ऋचं षष्ठं सूक्तं। अत्रानुक्रम्यते। उषश्चतुष्कमानुष्टुभं त्विति। कण्वपुत्रः प्रस्कण्व ऋषिः। तुह्यादिपरिभाषयेदमुत्तरं चानुष्टुभं। पूर्वत्रोषस्यं त्वित्युक्तत्वादिदमपि सूक्तमुषस्यं ॥ प्रातरनुवाकस्योषस्ये क्रतावानुष्टुभे छंदस्येतत्सूक्तं। सूत्र्यते हि। उषो भद्रेभिरित्यानुष्टुभं। आ० ४. १४.। इति। आश्विनशस्त्रेऽप्येतत्सूक्तं। प्रातरनुवाकन्यायेनेत्यतिदिष्टत्वात् ॥

तत्र प्रथमामृचमाह ॥

उषो भद्रेभिरा गहि दिवश्चिद्रोचनादधि।

वहंत्वरुणप्सव उप त्वा सोमिनो गृहं ॥ १ ॥

उषः। भद्रेभिः। आ। गहि। दिवः। चित्। रोचनात्। अधि।

वहंतु। अरुणऽप्सवः। उप। त्वा। सोमिनः। गृहं ॥ १ ॥

हे उषः। उषोदेवते भद्रेभिर्भदनीयैः शोभनैर्मार्गैर्दिवोऽतरिक्षलोकात् रोचनाद्रोचमानाद्दीप्यमानात्। अधिरुपर्यर्थः। उपरिवर्तमानात्। चिदिति पूजार्थः। पूजितादेवंविधादंतरिक्षलोकादागहि। आगच्छ। हे उषः। अरुणप्सवोऽरुणवर्णा गावः सोमिनः सोमयुक्तस्य यजमानस्य गृहं देवयजनरूपं यज्ञगृहं त्वा त्वामुपवहंतु। प्रापयंतु ॥ गहि। गमेर्लोटि बहुलं छंदसीति शपो लुक्। हेरपित्त्वेन ङित्त्वेऽनुदात्तोपदेशेत्यादिनानुनासिकलोपः। अतो हेरिति लुक् न भवति। असिद्धवदत्रा भादित्यनुनासिकलोपस्यासिद्धत्वात्। रोचनात्। रुच दीप्तौ। अनुदात्तेतश्च हलादेरिति युच्। योरनादेशे चित इत्यंतोदात्तत्वं। अरुणप्सवः। प्सा भक्षणे। प्सांति भक्षयंति स्तनं पिबंतीति प्सवो वत्साः। औणादिकः कुप्रत्ययः। आतो लोप इटि चेत्याकारलोपः। अरुणाः प्सवो यासां तास्तथोक्ताः। अत्र वत्सानामारुण्यप्रतिपादनान्मातॄणामपि तथात्वं गम्यते। पैतृकमश्वा अनुहरंते मातृकं गावोऽनुहरंत इति गोनर्दीयः। तासां चोषोवाहनत्वं निघंटावुक्तं। अरुण्यो गाव उषसामिति। अरुणशब्दोऽर्तेश्चेत्युनन्प्रत्ययांतः।

तृणाख्यायां चित् । उ० ३. ५९. । इत्यतश्चिदित्यनुवृत्तेरंतोदात्तः । स एव बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन शिष्यते ॥

द्वितीयामृचमाह ॥

सुपेशसं सुखं रथं यमध्यस्था उषस्त्वं ।
तेना सुश्रवसं जनं प्रावाद्य दुहितर्दिवः ॥ २ ॥

सुऽपेशसं । सुऽखं । रथं । यं । अधिऽअस्थाः । उषः । त्वं ।
तेन । सुऽश्रवसं । जनं । प्र । अव । अद्य । दुहितः । दिवः ॥ २ ॥

हे उषः । त्वं यं रथमध्यस्थाः । अधितिष्ठसि । कीदृशं रथं । सुपेशसं । शोभनावयवं शोभनरूपयुक्तं वा । पेश इति रूपनामेति यास्कः । यद्वा शोभनहिरण्ययुक्तं । पेशः कृशनमिति तन्नामसु पाठात् । सुखं । शोभनेन खेनाकाशेन युक्तं । विस्तृतमित्यर्थः । यद्वा सुखहेतुभूतं । अथवा सुखमिति क्रियाविशेषणं । सुखं यथा भवति तथेत्यर्थः । हे दिवो दुहितः । द्युलोकसकाशादुत्पन्न उषोदेवते तेन रथेनाद्यास्मिन्काले सुश्रवसं शोभनहविर्युक्तं जनं यजमानं प्राव । प्रकर्षेण गच्छ ॥ सुपेशसं । पिश अवयवे । अस्मादसुनप्रत्ययः । नित्वादाद्युदात्तः पेशसशब्दः । शोभनं पेशो यस्यासौ सुपेशाः । आद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं । अध्यस्थाः । तिष्ठतेश्छंदसि लुङ्लङ्लिट इति वर्तमाने लुङि गातिस्थेति सिचो लुक् । अडागम उदात्तः । यद्वृत्तयोगादनिघातः । तिङि चोदात्तवतीति गतेरनुदात्तत्वं । तेना । अन्येषामपि दृश्यत इति संहितायां दीर्घः । सुश्रवसं । श्रव इत्यन्ननाम । श्रूयत इति सत इति यास्कः । सुपेशसमितिवदुत्तरपदाद्युदात्तत्वं । अव । अव रक्षणगतिप्रीतितृप्तीत्युक्तत्वादत्रावतिर्गत्यर्थः । दुहितर्दिवः । परमपि छंदसीति षष्ठ्यंतस्य पूर्वामंत्रितांगवद्भावे सति पदद्वयसमुदायस्याष्टमिकं सर्वानुदात्तत्वं ॥

तृतीयामृचमाह ॥

वयश्चित्ते पतत्रिणो द्विपच्चतुष्पदर्जुनि ।
उषः प्रारन्नृतूँरनु दिवोऽअंतेभ्यस्परि ॥ ३ ॥

वयः । चित् । ते । पतत्रिणः । द्विऽपत् । चतुःऽपत् । अर्जुनि ।
उषः । प्र । आरन् । ऋतून् । अनु । दिवः । अंतेभ्यः । परि ॥ ३ ॥

हे अर्जुनि शुभ्रवर्णे उषः। उषोदेवते ते तव ऋतूंरनु गमनान्यनुलक्ष्य द्विपत् द्विपात् मनुष्यादिकं चतुष्पत् गवादिकं तथा पतत्रिणः पतत्रवंतः पक्षोपेता वयश्चित् पक्षिणश्च दिवोऽंतेभ्य आकाशप्रांतेभ्यः पर्युपरि प्रारन्। प्रकर्षेण गच्छंति। रात्रावंधकारेणाभिभूताः सर्वे प्राणिनस्त्वदागमानंतरं चेष्टावंतो भवंतीत्यर्थः ॥ पतत्रिणः। पतॢ गतौ। पतत्यनेनेति पतत्रं। अमिनक्षीत्यादिनात्रन्प्रत्ययः। ततो मत्वर्थीय इनिः। द्विपत्। द्वौ पादावस्येति संख्यासुपूर्वस्य। पा० ५. ४. १४०.। इति पादशब्दस्यांत्यलोपः समासांतः। अयस्मयादित्वेन भत्वात् पादः पत्। पा० ६. ४. १३०.। इति पद्भावः। द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहौ। पा० ६. २. १९७.। इत्युत्तरपदांतोदात्तत्वं। चतुष्पत्। चत्वारः पादा अस्य। स्वरव्यतिरिक्तं पूर्ववत्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। इणः ष इत्यनुवृत्ताविदुदुपधस्य चाप्रत्ययस्य। पा० ८. ३. ४१.। इति विसर्जनीयस्य षत्वं। न च परत्वेनास्य विद्धत्वात् कुप्वोः ᳲकᳲपौ च। पा० ८. ३. ३७.। इत्युपध्मानीयादेशः शंकनीयः। येन नाप्राप्तिन्यायेन तस्यापवादत्वात्। अपवादस्तु परमपि पूर्वं बाधत एवेति वृत्तावुक्तं। आरन्। ऋ गतौ। छंदसि लुङ्लङ्लिट इति वर्तमाने लुङि सर्तिशास्त्यर्तिभ्यश्चेति च्लेरङादेशः। ऋदृशोऽङि गुण इति गुणः। आडागमः। ऋतून्। ऋ गतौ। अस्मादौणादिको भावे कुप्रत्ययः। अनु। अनुर्लक्षणे। पा० १. ४. ८४.। इत्यनोः कर्मप्रवचनीयत्वं। कर्मप्रवचनीययुक्ते। पा० २. ३. ८.। इति द्वितीया। संहितायां दीर्घादटि समानपाद इति नकारस्य रुत्वं। अत्रानुनासिकः पूर्वस्य तु वेति रोः पूर्वस्य वर्णस्य सानुनासिकत्वं। दिवः। ऊडिदमिति विभक्तिरुदात्ता। अंतेभ्यः। पंचम्याः परावध्यर्थ इति विसर्जनीयस्य सत्वं ॥

चतुर्थीमृचमाह ॥

व्युच्छंती हि रश्मिभिर्विश्वमाभासि रोचनं।
तां त्वामुषर्वसूयवो गीर्भिः कण्वा अहूषत ॥ ४ ॥

विऽउच्छंती। हि। रश्मिऽभिः। विश्वं। आऽभासि। रोचनं।
तां। त्वां। उषः। वसुऽयवः। गीःऽभिः। कण्वाः। अहूषत ॥ ४ ॥

हे उषः। व्युच्छंती तमो वर्जयंती त्वं रश्मिभिः स्वकीयैस्तेजोभिर्विश्वं सर्वं भूतजातं रोचनं रोचमानं प्रकाशयुक्तं यथा भवति तथाभासि। आ समंतात्

प्रकाशयसि । हि यस्मादेवं तस्मात्त्वां तादृशीं त्वां वसूयवो वसुकामाः कण्वा मेधाविन ऋत्विजः कण्वगोत्रोत्पन्ना वा महर्षयो गीर्भिः स्तुतिलक्षणैर्वचोभिरहूषत । स्तुतवंत इत्यर्थः ॥ कण्व इति मेधाविनाम । कण्व ऋभुरिति तन्नामसु पाठात् । आभासि । भा दीप्तौ । अदादित्वाच्छपो लुक् । सिपः पित्त्वादनुदात्तत्वे धातुस्वरः । हि चेति निघातप्रतिषेधः । तिङि चोदात्तवतीति गतेरनुदात्तत्वं । रोचनं । रुच दीप्तौ । अनुदात्तेतश्च हलादेरिति युच् । चित इत्यंतोदात्तत्वं । वसूयवः । वसु धनमात्मन इच्छंतः । सुप आत्मनः क्यच् । अकृत्सार्वधातुकयोरिति दीर्घः । क्याच्छंदसीत्युप्रत्ययः । गीर्भिः । सावेकाच इति विभक्तेरुदात्तत्वं । कण्वाः । कण शब्दार्थः । अशिप्रुषिलटिकणीत्यादिना क्वन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं । अहूषत । ह्वेञो लुङि ह्वः संप्रसारणमित्यनुवृत्तौ बहुलं छंदसीति संप्रसारणं । परपूर्वत्वे हल इति दीर्घत्वं । च्लेः सिच् । एकाच इतीट्प्रतिषेधः । संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावः ॥

॥ इति प्रथमस्य चतुर्थे षष्ठो वर्गः ॥

उदु त्यमिति त्रयोदशर्चं सप्तमं सूक्तं प्रस्कण्वस्यार्षं सूर्यदेवत्यं । आदौ नव गायत्र्यः शिष्टाश्चतस्रोऽनुष्टुभ इत्युक्तं । तथा चानुक्रांतं । उदु त्यं सप्तोना सौर्यं नवाद्या गायत्र्य इति ॥ आश्विनशस्त्रे सौर्ये क्रतावुदु त्यमित्यादयो नवर्चः शंसनीयाः । संस्थितेष्वाश्विनायेति खंडे सूचितं । सूर्यो नो दिव उदु त्यं जातवेदसमिति नव । आ० ६. ५. । इति ॥

तत्र प्रथमामृचमाह ॥

उदु त्यं जातवेदसं देवं वहंति केतवः । दृशे विश्वाय सूर्यं ॥ १ ॥

उत् । ऊं इति । त्यं । जातऽवेदसं । देवं । वहंति । केतवः । दृशे । विश्वाय । सूर्यं ॥ १ ॥

केतवः प्रज्ञापकाः सूर्याश्वाः । यद्वा सूर्यरश्मयः सूर्यं सर्वस्य प्रेरकमादित्यमुद्वहंति । ऊर्ध्वं वहंति । ऊं इति पादपूरणः । छांदसो मकारलोपः । उक्तं च । मिताक्षरेष्वनर्थकाः कमीमिद्विति । किमर्थं । विश्वाय विश्वस्मै भुवनाय दृशे द्रष्टुं । यथा सर्वे जनाः सूर्यं पश्यंति तथोर्ध्वं वहंतीत्यर्थः । कीदृशं सूर्यं । त्यं प्रसिद्धं जातवेदसं । जातानां प्राणिनां वेदितारं जातप्रज्ञं जातधनं वा । देवं । द्योतमानं । अत्र निरुक्तं । उद्वहंति तं जातवेदसं देवमश्वाः केतवो रश्मयो वा

सर्वेषां भूतानां संदर्शनाय सूर्यं । नि॰ १२. १५.। इति ॥ जातवेदसं । जातानि वेत्तीति जातवेदाः । गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेत्यसुन् पूर्वपदप्रकृतिस्वरत्वं च । दृशे । दृशे विख्ये चेति तुमर्थे निपातितः । सूर्यं । राजसूयसूर्येत्यादिना षू प्रेरण इत्यस्मात् क्यपि रुडागमसहितो निपातितः । अतः प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तत्वं ॥

द्वितीयामृचमाह ॥

अप त्ये तायवो यथा नक्षत्रा यंत्यक्तुभिः । सूराय विश्वचक्षसे ॥ २ ॥

अप । त्ये । तायवः । यथा । नक्षत्रा । यंति । अक्तुऽभिः । सूराय । विश्वऽचक्षसे ॥ २ ॥

त्ये तायवो यथा । प्रसिद्धास्तस्करा इव नक्षत्रा नक्षत्राणि देवगृहरूपाणि । देवगृहा वै नक्षत्राणीति श्रुत्यंतरात् । यद्वा । इह लोके कर्मानुष्ठाय ये स्वर्गं प्राप्नुवंति ते नक्षत्ररूपेण दृश्यंते । तथा च श्रूयते । यो वा इह यजतेऽमुं लोकं नक्षते तन्नक्षत्राणां नक्षत्रत्वमिति । यद्वा तेषां सुकृतिनां ज्योतींषि नक्षत्राण्युच्यंते । सुकृतां वा एतानि ज्योतींषि यन्नक्षत्राणीत्याम्नानात् । यास्कस्त्वाह । नक्षत्राणि नक्षतेर्गतिकर्मणो नेमानि क्षत्राणीति च ब्राह्मणं । नि॰ ३. २०.। इति । तथाविधानि नक्षत्राण्यक्तुभी रात्रिभिः सहापयंति । अपगच्छंति । विश्वचक्षसे । विश्वस्य सर्वस्य प्रकाशकस्य सूराय सूर्यस्यागमनं दृष्ट्वेति शेषः । तस्करा नक्षत्राणि च रात्रिभिः सह सूर्य आगमिष्यतीति भीत्या पलायंत इत्यर्थः ॥ तायुरिति स्तेननाम । तायुस्तस्कर इति तन्नामसु पाठात् । अक्तुरिति रात्रिनाम । शर्वर्यक्तुरिति तत्र पाठात् । यथा । यथेति पादांत इति सर्वानुदात्तत्वं । नक्षत्रा । नक्ष गतौ । अमिनक्षियजिबंधिपतिभ्योऽत्रन्नित्यत्रन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं । नभ्राण्नपादित्यत्र वृत्तौ त्वेवमुक्तं । न क्षरति न क्षीयत इति वा नक्षत्रं । क्षीयतेः क्षरतेर्वा नक्षत्रमिति निपात्यत इति । शेश्छंदसि बहुलमिति शेर्लोपः । यंति । इण् गतौ । इणो यणिति यणादेशः । सूराय विश्वचक्षसे । विश्वं चष्टे प्रकाशयतीति विश्वचक्षाः । चक्षेर्बहुलं शिच्चेत्यसुन्प्रत्ययः । शित्त्वेन सार्वधातुकत्वात् ख्याञादेशाभावः । उभयत्र षष्ठ्यर्थे चतुर्थी वक्तव्येति चतुर्थी ॥

तृतीयामृचमाह ॥

अदृश्रमस्य केतवो वि रश्मयो जनाँ अनु । भ्राजंतो अग्नयो यथा ॥ ३ ॥

अदृश्रं । अस्य । केतवः । वि । रश्मयः । जनान् । अनु । भ्राजंतः । अग्नयः । यथा ॥ ३ ॥

अस्य सूर्यस्य केतवः प्रज्ञापका रश्मयो दीप्तयो जनाननु व्यदृश्रं । जातान्सर्वाननुक्रमेण प्रेक्षंते । सर्वं जगत्प्रकाशयंतीत्यर्थः । तत्र दृष्टांतः । भ्राजंतो दीप्यमाना अग्नयो यथा । अग्नय इव ॥ अदृश्रं । दृशिर् प्रेक्षणे । वर्तमाने लुङ् । इरितो वेति च्लेरङादेशः । रुडित्यनुवृत्तौ बहुलं छंदसीति रुडागमः । अत एव बहुलवचनाद्दृशोऽङि गुण इति गुणाभाव इत्युक्तं । तिङां तिङो भवंतीति प्रथमपुरुषबहुवचनस्योत्तमपुरुषैकवचनादेशः । प्रथमपुरुषांत एव शाखांतरे श्रूयते । अदृश्रन्नस्य केतव इति । जनानित्यस्य नकारस्य संहितायां रुत्वयत्वादि पूर्ववत् । भ्राजंतः । शपः पित्त्वादनुदात्तत्वं । शतुश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते ॥

चातुर्मास्येषु शुनासीर्ये पर्वण्यस्ति सौर्य एककपालः । तस्य तरणिरित्येषानुवाक्या । तथा च सूचितं । तरणिर्विश्वदर्शतश्चित्रं देवानामुदगादनीकमिति याज्यानुवाक्याः । आ॰ २. २०. । इति ॥ तथातिमूर्तिनाम्न्येकाहे कृष्णपक्षे सौरीष्टिः कर्तव्या । तस्यामप्येषानुवाक्या । अतिमूर्तिनेति खंडे सूचितं । नवो नवो भवति जायमानस्तरणिर्विश्वदर्शतः । आ॰ ९. ८. । इति ॥

तामेतां सूक्ते चतुर्थीमृचमाह ॥

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमा भासि रोचनं ॥ ४ ॥

तरणिः । विश्वऽदर्शतः । ज्योतिःऽकृत् । असि । सूर्य । विश्वं । आ । भासि । रोचनं ॥ ४ ॥

हे सूर्य त्वं तरणिस्तरिता । अन्येन गंतुमशक्यस्य महतोऽध्वनो गंतासि । तथा च स्मर्यते । योजनानां सहस्रे द्वे द्वे शते द्वे च योजने । एकेन निमिषार्धेन क्रममाण नमोऽस्तु त इति । यद्वा । उपासकानां रोगात्तारयितासि । आरोग्यं भास्करादिच्छेदिति स्मरणात् । तथा विश्वदर्शतः । विश्वैः सर्वैः प्राणिभिर्दर्शनीयः । आदित्यदर्शनस्य चंडालादिदर्शनजनितपापनिर्हरणहेतुत्वात् । तथा चापस्तंबः । दर्शने ज्योतिषां दर्शनमिति । यद्वा विश्वं सकलं भूतजातं दर्शतं द्रष्टव्यं प्रकाश्यं येन स तथोक्तः । तथा ज्योतिष्कृत् । ज्योतिषः प्रकाशस्य कर्ता । सर्वस्य वस्तुनः

प्रकाशयितेत्यर्थः। यद्वा चंद्रादीनां रात्रौ प्रकाशयिता। रात्रौ ह्यब्मयेषु चंद्रादिबिंबेषु सूर्यकिरणाः प्रतिफलिताः संतोऽधकारं निवारयंति यथा द्वारस्थदर्पणोपरिनिपतिताः सूर्यरश्मयो गृहांतर्गतं तमो निवारयंति तद्वदित्यर्थः। यस्मादेवं तस्माद्विश्वं व्याप्तं रोचनं रोचमानमंतरिक्षमा समंताद्भासि। प्रकाशयसि। यद्वा हे सूर्य। अंतर्यामितया सर्वस्य प्रेरक परमात्मन् तरणिः संसाराब्धेस्तारकोऽसि। यस्मात्त्वं विश्वदर्शतः। विश्वैः सर्वैर्मुमुक्षुभिर्दर्शतो द्रष्टव्यः साक्षात्कर्तव्य इत्यर्थः। अधिष्ठानसाक्षात्कारे ह्यारोपितं निवर्तते। ज्योतिष्कृत्। ज्योतिषः सूर्यादेः कर्ता। तथा चाम्नायते। चंद्रमा मनसो जातश्चक्षोः सूर्यो अजायतेति। ईदृशस्त्वं चिद्रूपतया विश्वं सर्वं दृश्यजातं रोचनं रोचमानं दीप्यमानं यथा भवति तथाभासि। प्रकाशयसि। चैतन्यस्फुरणे हि सर्वं जगद्दृश्यते। तथा चाम्नायते। तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति। तरणिः। तॄ प्लवनतरणयोः। अस्मादंतर्भावितण्यर्थादर्तिसृधृधम्यम्यश्यवितॄभ्योऽनिरित्यनिप्रत्ययः। प्रत्ययाद्युदात्तत्वं। ज्योतिः करोतीति ज्योतिष्कृत्। क्विप् चेति क्विप्। नित्यं समासेऽनुत्तरपदस्थस्येति विसर्जनीयस्य षत्वं। भासि। भा दीप्तौ। अंतर्भावितण्यर्थाल्लट्यदादित्वाच्छपो लुक्॥

पंचमीमृचमाह॥

प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान्। प्रत्यङ्विश्वं स्वर्दृशे॥५॥

प्रत्यङ्। देवानां। विशः। प्रत्यङ्। उत्। एषि। मानुषान्। प्रत्यङ्। विश्वं। स्वः। दृशे॥५॥

हे सूर्य त्वं देवानां विशो मरुन्नामकान्देवान्। मरुतो वै देवानां विश इति श्रुत्यंतरात्। तान्मरुत्संज्ञकान्देवान् प्रत्यङ्ङुदेषि। तान्प्रतिगच्छन्नुदयं प्राप्नोषि। तेषामभिमुखं यथा भवति तथेत्यर्थः। तथा मानुषान्मनुष्यान् प्रत्यङ्ङुदेषि। तेऽपि यथास्मदभिमुखमेव सूर्य उदेतीति मन्यंते। तथा विश्वं व्याप्तं स्वः स्वर्लोकं दृशे द्रष्टुं प्रत्यङ्ङुदेषि। यथा स्वर्लोकवासिनो जनाः स्वस्वाभिमुख्येन पश्यंति तथोदेषीत्यर्थः। एतदुक्तं भवति। लोकत्रयवर्तिनो जनाः सर्वेऽपि स्वस्वाभिमुख्येन सूर्यं पश्यंतीति। तथा चाम्नायते। तस्मात्सर्व एव मन्यते मां प्रत्युदगादिति॥ प्रत्यङ्। प्रत्यंचतीति प्रत्यङ्। अंचु गतिपूजनयोः। ऋत्विगित्यादिना क्विन्। अनिदितामिति नलोपः। उगिदचामिति नुम्। हल्ङ्याादिसंयोगांतलोपौ। संयोगांतलोपस्यासिद्धत्वादुपधादीर्घनलोपयोरभावः। क्विन्प्रत्ययस्य

कुरिति कुत्वं । अनिगंतोऽंचतावित्यनिगंत इति पर्युदासात्पूर्वपदप्रकृतिस्वराभावे कृदुत्तरपदप्रकृतिस्वरत्वं । एषि । इण् गतौ । सिप्यदादित्वाच्छपो लुक् । आदेशप्रत्यययोरिति षत्वं । स्वः । सुपूर्वादर्तेर्विच् । गुणे यणादेशः । न्यङ्स्वरौ स्वरितौ चेति स्वरितत्वं । दृशे । दृशिर् प्रेक्षणे इत्यस्माद्दृशे विख्ये चेति तुमर्थे निपातितः ॥

॥ इति प्रथमस्य चतुर्थे सप्तमो वर्गः ॥

षष्ठीमृचमाह ॥

येना पावक चक्षसा भुरण्यंतं जनाँ अनु । त्वं वरुण पश्यसि ॥ ६ ॥

येन । पावक । चक्षसा । भुरण्यंतं । जनान् । अनु । त्वं । वरुण । पश्यसि ॥ ६ ॥

हे पावक सर्वस्य शोधक वरुण । अनिष्टनिवारक सूर्य त्वं जनान् जातान्प्राणिनो भुरण्यंतं धारयंतं पोषयंतं वेमं लोकं येन चक्षसा प्रकाशेनानुपश्यसि । अनुक्रमेण प्रकाशयसि तं प्रकाशं स्तुम इति शेषः । यद्वा । उत्तरस्यामृचि संबंधः । तेन चक्षसा व्येषीति । तथा च यास्केनोक्तं । तत्ते वयं स्तुम इति वाक्यशेषोऽपि वोत्तरस्यामन्वयस्तेन व्येषि । नि० १२.२२. । इति ॥ भुरण्यंतं । भुरण धारणपोषणयोः । कंड्वादित्वाद्यक् । ततः शतरि कर्तरि शप् । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे यक एव स्वरः शिष्यते । वरुण । वृञ् वरणे । अस्मादंतर्भावितण्यर्थात्कृवृदारिभ्य उनन्नित्युननप्रत्ययः । अत्र वरुणशब्देनादित्य एवोच्यते । तथा चान्यत्राम्नातं । तस्य मित्रश्च वरुणश्चाजायेतामिति । मित्रश्च वरुणश्च धाता चार्यमा चेति च ॥

सप्तमीमृचमाह ॥

वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः । पश्यन् जन्मानि सूर्य ॥ ७ ॥

वि । द्यां । एषि । रजः । पृथु । अहा । मिमानः । अक्तुऽभिः । पश्यन् । जन्मानि । सूर्य ॥ ७ ॥

हे सूर्य त्वं पृथु विस्तीर्णं रजो लोकं । लोका रजांस्युच्यंत इति यास्कः । कं लोकं । द्यां । अंतरिक्षलोकं । व्येषि । विशेषेण गच्छसि । किं कुर्वन् । अहाहान्यक्तुभी रात्रिभिः सह मिमानः । उत्पादयन् । आदित्यगत्यधीनत्वादहोरा-

चविभागस्य । तथा जन्मानि जननवंति भूतजातानि पश्यन् । प्रकाशयन् ॥ रजस्पृथिव्यच छंदसि वाम्राम्रेडितयोः । पा॰ ८.३.४९. । इति विसर्जनीयस्य सत्वं । अहा । शेश्छंदसि बहुलमिति शेर्लोपः । मिमानः । माङ् माने । जौहोत्यादिकः । शानचि श्लौ द्विर्भावे भृञामिदित्यभ्यासस्येत्वं । श्नाभ्यस्तयोरात इत्याकारलोपः । अभ्यस्तानामादिरित्यभ्यस्तस्याद्युदात्तत्वं । जन्मानि । जनी प्रादुर्भावे । अन्येभ्योऽपि दृश्यंत इति मनिन् । नित्त्वादाद्युदात्तत्वं ॥

अष्टमीमृचमाह ॥

सप्त त्वा हरितो रथे वहंति देव सूर्य । शोचिष्केशं विचक्षण ॥ ८ ॥

सप्त । त्वा । हरितः । रथे । वहंति । देव । सूर्य । शोचिःऽकेशं । विऽचक्षण ॥ ८ ॥

हे सूर्य देव द्योतमान विचक्षण सर्वस्य प्रकाशयितः । सप्त सप्तसंख्याका हरितोऽश्वा रसहरणशीला रश्मयो वा त्वा त्वां वहंति । प्रापयंति । कीदृशं । रथेऽवस्थितमिति शेषः । तथा शोचिष्केशं । शोचींषि तेजांस्येव यस्मिन्केशा इव दृश्यंते स तथोक्तः । तं ॥ हरित इत्यादित्याश्वानां संज्ञा हरित आदित्यस्येति निघंटावुक्तत्वात् । शोचिष्केशं । शुच दीप्तौ । अर्चिशुचिहुसृपीत्यादिनेसिप्रत्ययांतोऽंतोदात्तः । स एव बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन शिष्यते । नित्यं समासेऽनुत्तरपदस्थस्येति विसर्जनीयस्य षत्वं ॥

नवमीमृचमाह ॥

अयुक्त सप्त शुंध्युवः सूरो रथस्य नप्त्यः । ताभिर्याति स्वयुक्तिभिः ॥ ९ ॥

अयुक्त । सप्त । शुंध्युवः । सूरः । रथस्य । नप्त्यः । ताभिः । याति । स्वयुक्तिऽभिः ॥ ९ ॥

सूरः सर्वस्य प्रेरकः सूर्यः शुंध्युवः शोधिका अश्वस्त्रियः । तादृशीः सप्तसंख्याका अयुक्त । स्वरथे योजितवान् । कीदृश्यः । रथस्य नप्त्यः । न पातयित्र्यः । याभिर्युक्ताभी रथो याति । न पतति तादृशीभिरित्यर्थः । एवंभूताभिस्ताभिरश्वस्त्रीभिः स्वयुक्तिभिः स्वकीययोजनेन रथे संबद्धाभिर्याति । यज्ञगृहं प्रत्यागच्छति । अतस्तस्मै हविर्दातव्यमिति वाक्यशेषः ॥ अयुक्त । युजिर् योगे । स्वरितेत्त्वात्कर्त्रभिप्राय आत्मनेपदं । लुङि च्लेः सिच् । एकाच इतीट्प्रतिषेधः । लिङ्सिचावात्मनेपदेषु । पा॰ १.२.११. । इति सिचः कित्त्वाल्लघूपधगुणाभावः । झलो झलीति सिचः सकारलोपः । चोः कुरिति कुत्वं । शुंध्युवः । शुंध विशुद्धौ ।

यजिमनिशुंधिदसिजनिभ्यो युरिति युप्रत्ययः। शसि तन्वादीनां छंदसि बहुलमुपसंख्यानमित्युवङादेशः। सूरः। षू प्रेरणे। सुसूधागृधिभ्यः क्रन्निति क्रन्प्रत्ययः। निद्वादाद्युदात्तत्वं। नप्त्यः। न पातयतीत्यर्थे नप्तृनेष्टृ इत्यादिनोणादिषु नप्तृशब्दस्तृजंतो निपातितः। ऋन्नेभ्यो ङीबिति ङीप्। यणादेश उदात्तयणो हल्पूर्वादिति ङीप उदात्तत्वं। सुपां सुपो भवंतीति शसो जसादेशः। ततो यणादेश उदात्तस्वरितयोर्यण इति स्वरितत्वं। रेफलोपश्छांदसः। उक्तं च। द्वौ चापरौ वर्णविकारनाशाविति। शाखांतरे तु नप्त्य इत्येव पठ्यते। स्वयुक्तिभिः। स्वकीयाः सूर्यसंबंधिन्यो युक्तयो योजनानि यासां। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥

अवभृथेष्टौ होत्रका जलान्निष्क्रम्योद्वयं तमसस्परीति मंत्रं ब्रूयुः। तथा च पत्नीसंयाजैश्चरित्वेति खंडे सूचितं। उद्वयं तमसस्परीत्युदेत्य। आ॰ ६. १३.। इति॥

तामेतां सूक्ते दशमीमृचमाह॥

उद्वयं तमसस्परि ज्योतिष्पश्यंत उत्तरं।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमं॥ १०॥
उत्। वयं। तमसः। परि। ज्योतिः। पश्यंतः। उत्ऽतरं।
देवं। देवऽत्रा। सूर्यं। अगन्म। ज्योतिः। उत्ऽतमं॥ १०॥

वयमनुष्ठातारस्तमसस्परि तमस उपरि रात्रेरूर्ध्वं वर्तमानं तमसः पापात्पर्युपरि वर्तमानं वा। पापरहितमित्यर्थः। तथा चाम्नायते। उद्वयं तमसस्परीत्याह। पाप्मा वै तमः पाप्मानमेवास्मादपहंतीति। ज्योतिस्तेजस्विनमुत्तरमुद्गततरमुत्कृष्टतरं वा देवत्रा देवेषु मध्ये देवं दानादिगुणयुक्तं सूर्यं पश्यंतः स्तुतिभिर्हविर्भिश्चोपासीनाः संत उत्तममुत्कृष्टतमं ज्योतिः सूर्यरूपमगन्म। प्राप्नुवाम। तथा च श्रूयते। अगन्म ज्योतिरुत्तममित्याहासौ वा आदित्यो ज्योतिरुत्तममादित्यस्यैव सायुज्यं गच्छतीति। युक्तं चैतत्। तं यथा यथोपासते तदेव भवतीति श्रुत्यंतरात्॥ तमसस्परि। पंचम्याः परावध्यर्थ इति विसर्जनीयस्य सत्वं। ज्योतिष्पश्यंतः। इसुसोः सामर्थ्ये। पा॰ ८. ३. ४४.। इति विसर्जनीयस्य षत्वं। व्यपेक्षालक्षणं सामर्थ्यं तत्रांगीक्रियते। देवत्रा। देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलमिति सप्तम्यर्थे त्राप्रत्ययः। प्रत्ययस्वरः। अगन्म। छंदसि लुङ्लङ्लिट इति

प्रार्थनायां लङि बहुलं छंदसीति शपो लुक्। म्वोश्च। पा० ८. २. ६५। इति धातोर्मकारस्य नकारः। अडागम उदात्तः। पादादित्वान्निघाताभावः। उत्तमं। तमपः पित्त्वादनुदात्तत्वे प्राप्त उत्तमशश्वत्तमौ सर्वत्रेत्युञ्छादिषु पाठादंतोदात्तत्वं॥

उद्यन्नित्ययं तृचो रोगशांत्यर्थः। तथा चानुक्रमण्यामुक्तं। अंत्यस्तृचो रोगघ्न उपनिषदिति। युक्तं चैतत्। यस्मादनेन तृचेन त्वग्दोषशांतये प्रस्कण्वः सूर्यमस्तौत्। तेन तृचेन स्तुतः सूर्यस्तमृषिं रोगान्निरगमयत्। तस्मादिदानीमपि रोगशांतयेऽनेन तृचेन सूर्य उपासनीयः। तदुक्तं शौनकेन। उद्यन्नद्येति मंत्रोऽयं सौरः पापप्रणाशनः। रोगघ्नश्च विषघ्नश्च भुक्तिमुक्तिफलप्रद इति॥

तृचस्याद्यां सूक्त एकादशीमृचमाह॥

उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवं।
हृद्रोगं मम सूर्य हरिमाणं च नाशय॥ ११॥

उत्ऽयन्। अद्य। मित्रऽमहः। आऽरोहन्। उत्ऽतरां। दिवं।
हृत्ऽरोगं। मम। सूर्य। हरिमाणं। च। नाशय॥ ११॥

हे सूर्य सर्वस्य प्रेरक मित्रमहः सर्वेषामनुकूलदीप्तियुक्त। अद्यास्मिन्काल उद्यन्। उदयं गच्छन् उत्तरामुन्नततरां दिवमंतरिक्षमारोहन् आभिमुख्येन प्राप्नुवन्। यद्वा दिवमंतरिक्षमुत्तरामारोहन् उत्कर्षेण प्राप्नुवन्। एवंविधस्त्वं मम हृद्रोगं हृदयगतमांतरं रोगं हरिमाणं शरीरगतकांतिहरणशीलं बाह्यं रोगं। यद्वा शरीरगतं हरिद्वर्णं रोगप्राप्तं वैवर्ण्यमित्यर्थः। तदुभयमपि नाशय। मां स्तोतारमुभयविधाद्रोगान्मोचयेत्यर्थः॥ मित्रमहः। मित्रमनुकूलं महस्तेजो यस्यासौ। आमंत्रितनिघातः। उत्तरां। उदित्यनेनोपसर्गेण स्वसंसृष्टधात्वर्थो लक्ष्यते। तस्मादातिशायनिकस्तरप्प्रत्ययः। प्रथमपक्षेऽंतरिक्षविशेषणत्वेन द्रव्यप्रकर्षप्रतीतेराम् न भवति। द्वितीये त्वारोहणक्रियायाः प्रकर्षो गम्यत इति किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्ष इति आमुः। प्रथमपक्षे टाप्तरपोः पित्त्वादनुदात्तत्व उपसर्गस्वर एव शिष्यते। द्वितीये त्वाम्प्रत्ययस्य सति शिष्टत्वात्तस्यैव स्वरे प्राप्ते व्यत्ययेनाद्युदात्तत्वं। वृषादिर्वा द्रष्टव्यः। स ह्याकृतिगणः। हृद्रोगं। वा शोकष्यञ्रोगेषु। पा० ६. ३. ५१। इति हृदयशब्दस्य हृदादेशः। मम। युष्मदस्मदोर्ङसीत्याद्युदात्तत्वं। हरिमाणं। हृञ् हरणे। जनिहृभ्यामिमनिन्। उ० ४. १५०।

इत्यौणादिक इमनिन्प्रत्ययः । व्यत्ययेनांतोदात्तत्वं । यद्वा हरिच्छब्दस्य वर्णवाचित्वाद्वर्णदृढादिभ्यः ष्यञ् च । पा० ५. १. १२३. । इति चकारादिमनिन्प्रत्ययः । इष्ठेमेयःस्वित्यनुवृत्तौ टेरिति टिलोपः ॥

द्वादशीमृचमाह ॥

शुकेषु मे हरिमाणं रोपणाकासु दध्मसि ।
अथो हारिद्रवेषु मे हरिमाणं नि दध्मसि ॥ १२ ॥
शुकेषु । मे । हरिमाणं । रोपणाकासु । दध्मसि ।
अथो इति । हारिद्रवेषु । मे । हरिमाणं । नि । दध्मसि ॥ १२ ॥

मे मदीयं हरिमाणं शरीरगतं हरिद्वर्णस्य भावं शुकेषु तादृशं वर्णं कामयमानेषु पक्षिषु तथा रोपणाकासु शारिकासु पक्षिविशेषेषु दध्मसि । स्थापयामः । अथो अपि च हारिद्रवेषु हरितालद्रुमेषु तादृग्वर्णवत्सु मे मदीयं हरिमाणं निदध्मसि । निदधीमहि । स च हरिमा तत्रैव सुखेनास्तां । अस्मान्मा बाधिष्टेत्यर्थः ॥ दध्मसि । इदंतो मसिरिति मस इकारागमः ॥

त्रयोदशीमृचमाह ॥

उदगादयमादित्यो विश्वेन सहसा सह ।
द्विषंतं मह्यं रंधयन्मो अहं द्विषते रधं ॥ १३ ॥
उत् । अगात् । अयं । आदित्यः । विश्वेन । सहसा । सह ।
द्विषंतं । मह्यं । रंधयन् । मो इति । अहं । द्विषते । रधं ॥ १३ ॥

अयं पुरोवर्त्यादित्योऽदितेः पुत्रः सूर्यो विश्वेन सहसा सर्वेण बलेन सहोदगात् । उदयं प्राप्तवान् । किं कुर्वन् । मह्यं द्विषंतं रंधयन् । ममोपद्रवकारिणं हिंसन् । अपि च । अहं द्विषतेऽनिष्टकारिणे रोगाय मो रधं । नैव हिंसां करोमि । सूर्य एव अस्मदनिष्टकारिणं रोगं विनाशयत्वित्यर्थः ॥ अगात् । एतेर्लुङीणो गा लुङीति गादेशः । गातिस्थेति सिचो लुक् । आदित्यः । दित्यदित्यादित्येत्यपत्यार्थो प्राग्दीव्यतीयो ण्यप्रत्ययः । रंधयन् । रध हिंसासंराद्ध्योः । ण्यंताल्लटः शतृ । रधिजभोरचि । पा० ७. १. ६१. । इति णौ धातोर्नुमागमः । मो ।

मा उ निपातत्रयसमुदायो मैवेत्यस्यार्थे। ओदिति प्रगृह्यत्वे प्लुतप्रगृह्या अचीति प्रकृतिभावः। द्विषते। शतुरनुम इति विभक्तेरुदात्तत्वं। रधं। रधेर्लुङि पुषादित्वात् च्लेरङादेशः। रधिजभोरचि। पा० ७. १. ६१.। इति धातोर्नुम्। अनिदितामित्यनुषंगलोपः। न माङ्योग इत्यडभावः॥

॥ इति प्रथमस्य चतुर्थेऽष्टमो वर्गः॥

॥ इति प्रथमे मंडले नवमोऽनुवाकः॥

दशमेऽनुवाके सप्त सूक्तानि। तत्राभि त्यमिति पंचदशर्चं प्रथमं सूक्तं। अत्रेतिहासमाचक्षते। अंगिरा इंद्रसदृशं पुत्रमात्मनः कामयमानो देवता उपासां चक्रे। तस्य सव्याख्येन पुत्ररूपेणेंद्र एव स्वयं जज्ञे जगति मत्तुल्यः कश्चिन्मा भूदिति। स सव्य आंगिरसोऽस्य सूक्तस्य ऋषिः॥ चतुर्दशीपंचदश्यौ त्रिष्टुभौ। त्रिष्टुबंतस्य सूक्तस्य शिष्टा जगत्य इति परिभाषयावशिष्टास्त्रयोदशर्चो जगत्यः। इंद्रो देवता। तदेतत्सर्वमनुक्रमण्यामुक्तं। अभि त्यं पंचोना सव्यो द्वित्रिष्टुबंतमंगिरा इंद्रतुल्यं पुत्रमिच्छन्नभ्यध्यायत्सव्य इतींद्र एवास्य पुत्रोऽजायतेति॥ अतिरात्रे प्रथमे रात्रिपर्याये होतुः शस्त्र इदं सूक्तं शंसनीयं। अतिरात्रे पर्यायाणामिति खंडे सूत्रितं। अभि त्यं मेषमध्वर्यवो भरतेंद्राय सोममिति याज्या। आ० ६. ४.। इति॥ गवामयनस्य मध्यभूते विषुवत्संज्ञकेऽहन्यपि निष्केवल्य इदं सूक्तं शंसनीयं। तथा च सूत्रितं। यस्तिग्मशृंगोऽभि त्यं मेषमिंद्रस्य नु वीर्याणीत्येतस्मिन्नैंद्री निविदं शस्त्वा। आ० ८. ६.। इति॥

तत्र प्रथमामृचमाह॥

अभि त्यं मेषं पुरुहूतमृग्मियमिंद्रं गीर्भिर्मदता वस्वो अर्णवं।
यस्य द्यावो न विचरंति मानुषा भुजे मंहिष्ठमभि विप्रमर्चत॥१॥

अभि। त्यं। मेषं। पुरुऽहूतं। ऋग्मियं। इंद्रं। गीःऽभिः। मदत। वस्वः। अर्णवं। यस्य। द्यावः। न। विऽचरंति। मानुषा। भुजे। मंहिष्ठं। अभि। विप्रं। अर्चत॥१॥

त्यं प्रसिद्धं मेषं शत्रुभिः स्पर्धमानं। यद्वा कण्वपुत्रं मेधातिथिं यजमानमिंद्रो मेषरूपेणागत्य तदीयं सोमं पपौ। स ऋषिस्तं मेष इत्यवोचत्। अत इदानीमपि मेष इतींद्रोऽभिधीयते। मेधातिथेर्मेषेति सुब्रह्मण्यमंत्रैकदेशस्य व्याख्या-

नरूपं ब्राह्मणमेवमाम्नायते । मेधातिथिं हि काण्वायनिं मेषो भूत्वाजहारेति । आगत्य सोमममपहृतवानित्यर्थः । पुरुहूतं । पुरुभिर्यजमानैराहूतं । ऋग्मियं । ऋग्भिर्विक्रियमाणं । स्तूयमानमित्यर्थः । स्तुत्या हि देवता विक्रियते । यद्वा । ऋग्भिर्मीयते शब्द्यत इति ऋग्मीः । तं । वस्वो अर्णवं । धनानामावासभूमिं । एवंगुणविशिष्टमिंद्रं हे स्तोतारो गीर्भिः स्तुतिभिरभि मदत । आभिमुख्येन हर्षं प्रापयत । यस्येंद्रस्य कर्माणि मानुषा मनुष्याणां हितानि विचरंति । विशेषेण वर्तंते । तत्र दृष्टांतः । द्यावो न । यथा सूर्यरश्मयः सर्वेषां हितकराः । भुजे भोगाय मंहिष्ठमतिशयेन प्रवृद्धं विप्रं मेधाविनं । तथाविधमिंद्रमभ्यर्चत । अभिपूजयत ॥ मेषं । मिष स्पर्धायां । इगुपधलक्षणे के प्राप्ते देवसेनमेषादयः पचादिषु द्रष्टव्या इति वचनादच्प्रत्ययः । ऋग्मियं । तस्य विकार इत्यर्थ एकाचो नित्यं मयटमिच्छंति । पा० ४. ३. १४४. १. । इति मयट्प्रत्ययः । अकारस्यैकारश्छांदसः । प्रत्ययस्वरः । यद्वा माङ् माने शब्दे च । ऋग्भिर्मीयत इति ऋग्मीः । क्विपि वलि लोपात्पूर्वमेव परत्वात् घुमास्थेतीत्वं । अचि श्नुधात्वित्यादिनेयङादेशः । कृदुत्तरपदप्रकृतिस्वरत्वं । मदत । मदी हर्षे । हेतुमति णिच् । मदी हर्षग्लेपनयोरिति घटादिषु पाठात् हर्षार्थे वर्तमानस्य घटादयो मितः । पा० ६. ४. ९२. । इति मित्त्वे सति मितां ह्रस्व इति ह्रस्वत्वं । लोण्मध्यमपुरुषबहुवचने शपि छंदस्युभयथेत्यार्धधातुकत्वात् णेरनिटीति णिलोपः । तशब्दस्य सार्वधातुकमपिदिति ङित्त्वे ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणामिति दीर्घः । वस्वः । ङस्यागमानुशासनस्यानित्यत्वान्नुमभावः । जसादिषु छंदसि वावचनमिति वचनात् घेर्ङिति । पा० ७. ३. १११. । इति गुणाभावे यणादेशः । अर्णवं । अर्ण उदकमस्मिन्नस्तीत्यर्णवः समुद्रः । अर्णसो लोपश्च । पा० ५. २. १०९. २. । इति मत्वर्थीयो वप्रत्ययः सलोपश्च । तेन शब्देन जलाश्रयवाचिनाश्रयमात्रं लक्ष्यते । प्रत्ययस्वरः । विचरंति । चर गत्यर्थः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । तिङि चोदात्तवतीति गतिरनुदात्ता । यद्वृत्तयोगादनिघातः । मानुषा । शेश्छंदसि बहुलमिति शेर्लोपः । भुजे । भुज पालनाभ्यवहारयोः । संपदादिलक्षणो भावे क्विप् । सावेकाच इति विभक्तेरुदात्तत्वं । मंहिष्ठं । महि वृद्धौ । अतिशयेन मंहिता मंहिष्ठः । तुश्छंदसीतीष्ठन्प्रत्ययः । तुरिष्ठेमेयःस्विति तृलोपः । नित्त्वादाद्युदात्तत्वं । अर्चत । अर्च पूजायां । भौवादिकः ॥

द्वितीयामृचमाह ॥

अभीमवन्वन्त्स्वभिष्टिमूतयोऽंतरिक्षप्रां तविषीभिरावृतं ।
इंद्रं दक्षास ऋभवो मदच्युतं शतक्रतुं जवनी सूनृतारुहत् ॥ २ ॥

अभि । ईं । अवन्वन् । सुऽअभिष्टिं । ऊतयः । अंतरिक्षऽप्रां । तविषीभिः । आऽवृतं ।
इंद्रं । दक्षासः । ऋभवः । मदऽच्युतं । शतऽक्रतुं । जवनी । सूनृता । आ । अरुहत् ॥ २ ॥

ऊतयोऽवितारो रक्षितारो दक्षासो दक्षयितारः प्रवर्धयितार ऋभवः । उरु भांतीति नैरुक्तव्युत्पत्त्या ऋभवोऽत्र मरुत उच्यंते । एवंभूता मरुत इंद्रमभीमवन्वन् । आभिमुख्येन खल्वभजंत । वृत्रेण सह युध्यमानमिंद्रं सर्वे देवाः पर्यत्यजन् । मरुतस्तु तथा न पर्यत्याक्षुः । तथा चाम्नायते । विश्वे देवा अजहुर्ये सखायः । मरुद्भिरिंद्र सख्यं ते अस्त्विति । ब्राह्मणेऽप्याम्नातं । मरुतो हैनं नाजहुरिति । कीदृशमिंद्रं । स्वभिष्टिं । शोभनाभ्येषणवंतं । शोभनाभिगमनमित्यर्थः । अंतरिक्षप्रां । अंतरिक्षं द्युलोकं स्वतेजसा प्राति पूरयतीत्यंतरिक्षप्राः । द्वादशस्वादित्येष्विंद्रस्य विद्यमानत्वात् । शाखांतरेऽपि श्रूयते । तस्या इंद्रश्च विवस्वांश्चाजायेतामिति । इंद्रश्च विवस्वांश्चेत्येत इति च । तविषीभिरावृतं । तविषीति बलनाम । तविषी शुष्ममिति तन्नामसु पाठात् । बलैरावृतं । अतिबलिनमित्यर्थः । अत एव मदच्युतं । शत्रूणां मदस्य गर्वस्य च्यावयितारं । किंच शतक्रतुं । शतसंख्यानां क्रतूनामाहर्तारं । बहुविधकर्माणं वा । पूर्वोक्तं तमिंद्रं जवनी वृत्रवधं प्रति प्रेरयित्री सूनृता तैर्मरुद्भिः प्रयुक्ता प्रहर भगवो जहि वीरयस्वेति ब्राह्मणोक्तरूपा प्रियसत्यात्मिका वागप्यारुहत् । आरूढवती । वृत्रवधं प्रति सापि वागिंद्रस्योत्साहकारिण्यभूदित्यर्थः ॥ अवन्वन् । वन षण संभक्तौ । लङि शपि प्राप्ते व्यत्ययेनोप्रत्ययः । स्वभिष्टिं । इष गतौ । भावे क्तिन्प्रत्ययः । तितुत्रेत्यादिनेट्प्रतिषेधः । एमन्नादित्वात्पररूपत्वं । शोभना अभिष्टयो यस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । ऊतयः । अवतेः कृत्यल्युटो बहुलमिति कर्तरि क्तिन्प्रत्ययः । यद्वा क्तिच्क्तौ च संज्ञायामिति क्तिच् । ज्वरत्वरेत्यादिनोठ् । चित इत्यंतोदात्तत्वं । अंतरिक्षप्रां । प्रा पूरणे । अंतरिक्षं प्राति पूरयतीत्यंतरिक्षप्राः । आतो मनिन्निति विच् चशब्दाद्विच् । आवृतं । वृञ् वरणे । आव्रियत इत्यावृतः । कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृति-

स्वरत्वं। दक्षासः। दक्ष वृद्धौ। दक्षंत एभिरिति दक्षाः। करणे घञ्। जिह्वा- दाद्युदात्तत्वं। आज्जसेरसुक्। मदच्युतं। च्युङ् गतौ। अंतर्भावितण्यर्थात् क्विप् चेति क्विप्। ह्रस्वस्य पिति कृतीति तुक्। शतक्रतुं। शतं क्रतवो यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। जवनी। जु इति सौत्रो धातुः। करणे ल्युट्। टिड्ढाणञित्यादिना ङीप्। लित्स्वरेण जकारात्परस्योदात्तत्वं। अरुहत्। रुहेर्लुङि कृमृदृरुहिभ्यश्छंदसीति च्लेरङादेशः॥

तृतीयामृचमाह॥

त्वं गोत्रमंगिरोभ्योऽवृणोरपोतात्रये शतदुरेषु गातुवित्।
ससेन चिद्विमदायावहो वस्वाजावद्रिं वावसानस्य नर्तयन्॥ ३॥
त्वं। गोत्रं। अंगिरःऽभ्यः। अवृणोः। अप। उत। अत्रये। शतऽदुरेषु। गातुऽवित्।
ससेन। चित्। विऽमदाय। अवहः। वसु। आजौ। अद्रिं। ववसानस्य। नर्तयन्॥ ३॥

हे इंद्र त्वं गोत्रमव्यक्तशब्दवंतं वृष्ट्युदकस्यावरकं मेघमंगिरोभ्योऽंगिरसामृषीणामर्थायापावृणोः। अपवारणं कृतवानसि। वृष्टेरावरकं मेघं वज्रेणोद्घाट्य वर्षणं कृतवानसीत्यर्थः। यद्वा गोत्रं गोसमूहं पणिभिरपहृतं गुहासु निहितमंगिरोभ्य ऋषिभ्योऽपावृणोः। गुहाद्वारोद्घाटनेनाप्रकाशयः। उत अपि चात्रये महर्षये। कीदृशाय। शतदुरेषु शतद्वारेषु यंत्रेष्वसुरैः पीडार्थं प्रक्षिप्ताय। गातुवित्। मार्गस्य लंभयिताभूः। तथा विमदाय चित्। विमदनाम्ने महर्षयेऽपि ससेनान्नेन युक्तं वसु धनमवहः। प्रापितवान्। तथाजौ संग्रामे जयार्थं वावसानस्य निवसतो वर्तमानस्यान्यस्यापि स्तोतुरद्रिं वज्रं नर्तयन् रक्षणं कृतवानसीति शेषः। अतस्तव महिमा केन वर्णयितुं शक्यत इति भावः॥ गोत्रं। गुङ् अव्यक्ते शब्दे। औणादिकस्त्रन्प्रत्ययः। यद्वा। खलगोरथादित्यनुवृत्ताविनित्रकट्यचश्च। पा॰ ४. २. ५१.। इति समूहार्थे त्रप्रत्ययः। शतदुरेषु। शतं दुरा द्वाराण्येषां। दृ इत्येके। द्रियंते संव्रियंत इति दुराः। घञर्थे कविधानमिति कप्रत्ययः। छांदसं संप्रसारणं परपूर्वत्वं। तत्र यो ह्युभयोः स्थाने भवति स लभतेऽन्यतरेणापि व्यपदेशमित्युरण् रपरः। पा॰ १. १. ५१.। इति रपरं भवति। यद्वा द्वारशब्दस्यैव छांदसं संप्रसारणं द्रष्टव्यं। गातुवित्। गाङ् गतौ। अस्मात्कमिमनिजनिभागापायाहिभ्यश्च। उ॰ १. ७२.। इति तुप्रत्ययः। तं वेदयति लंभयतीति

गातुवित्। विद्लृ लाभे। अंतर्भावितण्यर्थात् क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं। ससेन। ससमित्यन्ननाम। ससं नम आयुरिति तन्नामसु पाठात्। आजिरिति संग्रामनाम। आहव आजाविति तत्र पाठात्। अद्रिं। अत्ति भक्षयति वैरिणमित्यद्रिर्वज्रः। अदिशदिभूशुभिभ्यः क्रिन्निति क्रिन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं। यास्कस्त्वेवमद्रिशब्दं व्याचख्यौ। अद्रिरादृणात्यनेनापि वात्तेः स्यात्। नि॰ ४.४। इति। वावसानस्य। वस निवासे। कर्तरि ताच्छीलिकश्चानश्। बहुलं छंदसीति शपः श्लुः। द्विर्भावहलादिशेषौ। चित्त्वादंतोदात्तत्वं॥

चतुर्थीमृचमाह॥

त्वमपामपिधानावृणोरपाधारयः पर्वते दानुमद्वसु।

वृत्रं यदिंद्र शवसावधीरहिमादित्सूर्यं दिव्यारोहयो दृशे॥ ४॥

त्वं। अपां। अपिऽधाना। अवृणोः। अप। अधारयः। पर्वते। दानुऽमत्। वसु।

वृत्रं। यत्। इंद्र। शवसा। अवधीः। अहिं। आत्। इत्। सूर्यं। दिवि। आ।

अरोहयः। दृशे॥ ४॥

हे इंद्र त्वमपामुदकानामपिधानापिधानान्याच्छादकान्मेघानपावृणोः। अपावरीष्ठाः। तथा पर्वते पर्ववति पूरयितव्यप्रदेशयुक्ते स्वकीयनिवासस्थाने दानुमत् दानुमतो हिंसायुक्तस्य। यद्वा दनुरसुरमाता सैव दानुः। तद्वतः। तादृशस्य वृत्रादेर्वसु धनमधारयः। शत्रूञ्जित्वा तदीयं धनमपहृत्य स्वगृहे न्यचिक्षिप इत्यर्थः। यद्वा दानुमदिति वसुविशेषणं। शोभनदानयुक्तमित्यर्थः। हे इंद्र त्वं यत् यदा शवसा बलेन वृत्रं त्रयाणां लोकानामावरीतारं। तथा च शाखांतरे समाम्नातं। यदिमान् लोकानवृणोत्तद्वृत्रस्य वृत्रत्वमिति। अहिं। आ समंताद्धंतारं। तथा च वाजसनेयिनः समामनंति। सोऽग्निषोमावभिसंबभूव सर्वां विद्यां सर्वं यशः सर्वमन्नाद्यं सर्वां श्रियं स यत्सर्वमेतत्समभवत्तस्मादहिरिति। एवंभूतमसुरमवधीः। वधं प्रापितः। आदित् अनंतरमेव दिवि द्युलोके दृशे द्रष्टुं सूर्यमारोहयः। वृत्रेणावृतं सूर्यं तस्माद्वृत्रादमूमुच इत्यर्थः॥ अपां। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। अपिधाना। अपिधीयत आच्छाद्यत एभिरित्यपिधानानि। करणे ल्युट्। लितीति प्रत्ययात्पूर्वस्य धात्वाकारस्योदात्तत्वं। तत एकादेशस्वरः। कृदुत्तरपदप्रकृतिस्वरत्वं। सुपां सुलुगिति विभक्तेः पूर्वसवर्ण-

दीर्घत्वं । अधारयः । पादादित्वान्निघाताभावः । पर्वते । पर्ववान् पर्वतः । पर्व पुनः पृणातेः प्रीणातेर्वेति यास्कः । दानुमत् । दो अवखंडन इत्यस्माद्वा दाण् दान इत्यस्माद्वा दाभाभ्यां नुरित्यौणादिको नुप्रत्ययः । असुरविशेषणत्वे सुपां सुलुगिति षष्ठ्या लुक् ॥

पंचमीमृचमाह ॥

त्वं मायाभिरप मायिनोऽधमः स्वधाभिर्ये अधि शुप्तावजुह्वत ।
त्वं पिप्रोर्नृमणः प्रारुजः पुरः प्र ऋजिश्वानं दस्युहत्येष्वाविथ ॥ ५ ॥
त्वं । मायाभिः । अप । मायिनः । अधमः । स्वधाभिः । ये । अधि । शुप्तौ । अजुह्वत ।
त्वं । पिप्रोः । नृऽमनः । प्र । अरुजः । पुरः । प्र । ऋजिश्वानं । दस्युऽहत्येषु । आविथ ॥ ५ ॥

हे इंद्र त्वं मायाभिर्जयोपायज्ञानैः । मायेति ज्ञाननाम । शची मायेति तन्नामसु पाठात् । यद्वा मायाभिर्लोकप्रसिद्धैः कपटैर्मायिन उक्तलक्षणमायोपेतान्वृत्रादीनसुरानपाधमः । अपाजीगमः । धमतिर्गतिकर्मेति यास्कः । येऽसुराः स्वधाभिर्हविर्लक्षणैरन्नैः शुप्तावधि शोभमाने स्वकीये मुख एवाजुह्वत । अहौषुः । नाग्नौ । तानसुरानिति पूर्वेण संबंधः । तथा च कौशितकिभिराम्नायते । असुरा वा आत्मन्नजुहवुरुद्गातेऽग्नौ ते पराभवन्निति । वाजसनेयिभिरप्याम्नातं । देवाश्च ह वा असुराश्चास्पर्धंत । ततो हासुरा अभिमानेन कस्मै च न जुहुम इति स्वेष्वेवास्येषु जुह्वतश्चेरुस्ते पराबभूवुरिति । तथा हे नृमणः । नृषु यजमानेषु रक्षितव्येष्वनुग्रहबुद्धियुक्त त्वं पिप्रोः पूरयितुरतन्नाम्नोऽसुरस्य पुरः पुराणि निवासस्थानानि प्रारुजः । प्राभांक्षीः । एवं कृत्वा तेनासुरेणोपद्रुतमृजिश्वानमृजुगमनमेतत्संज्ञकं स्तोतारं दस्युहत्येषु दस्यूनामुपक्षपयितॄणां हननेन युक्तेषु संग्रामेषु । यद्वा दस्यूनां हनने निमित्तभूतेषु प्राविथ । प्रकर्षेण ररक्षिथ ॥ मायिनः । मायाशब्दस्य व्रीह्यादिषु पाठात् व्रीह्यादिभ्यश्चेति मत्वर्थीय इनिः । शुप्तौ । शुभ दीप्तौ । कर्मणि क्तिन् । तितुत्रेत्यादिनेट्प्रतिषेधः । झषस्तथोरिति धत्वाभावश्छांदसः । खरि च । पा॰ ८. ४. ५५. । इति चर्त्वं । अजुह्वत । जुहोतेर्लङि व्यत्ययेनात्मनेपदं । अदभ्यस्तादिति झस्यादादेशः । हुश्नुवोः सार्वधातुक इति यणादेशः । पिप्रोः । पृ पालनपूरणयोः । पृभिदिव्यधीत्यादिना कुप्रत्ययः । उदोष्ठ्यपूर्वस्येत्यत्र बहुलं छंदसीत्युक्तत्वादुत्वाभावः । छांदसं द्विर्वचनं । अभ्यासस्योरदत्वहलादिशेषाः । अर्तिपिपर्त्योश्च बहुलं छंदसीत्यभ्यासस्येत्वं । यणादेशः । नृमणः । नृषु

मनो यस्य। छंदस्यृदवग्रहात्। पा० ८. ४. २६.। इति णत्वं। अरुजः। रुजो भंगे। शस्य ङित्त्वाद्गुणाभावः। ऋजिश्वानं। ऋजुत्वमुते प्राप्नोतीत्यृजिश्वा। पृषोदरादिः। दस्युहत्येषु। हन हिंसागत्योः। हनस्त चेति भावे क्यप्प्रत्ययस्तकारश्चांतादेशः। दस्यूनां हत्या येषु संग्रामेषु। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। तत्पुरुषपक्षे तु कृदुत्तरपदप्रकृतिस्वरत्वं। आविथ। अव रक्षणे॥

॥ इति प्रथमस्य चतुर्थे नवमो वर्गः ॥

षष्ठीमृचमाह ॥

त्वं कुत्सं॑ शुष्ण॒हत्ये॑ष्वावि॒थार॑न्धयोऽतिथि॒ग्वाय॒ शंब॑रं।
म॒हान्तं॑ चिदर्बु॒दं नि क्र॑मीः प॒दा स॒नादे॒व द॑स्यु॒हत्या॑य जज्ञिषे ॥ ६ ॥

त्वं। कुत्सं॑। शु॒ष्ण॒ऽहत्ये॑षु। आ॒वि॒थ। अर॑न्धयः। अ॒ति॒थि॒ऽग्वाय॑। शंब॑रं।
म॒हान्तं॑। चि॒त्। अ॒र्बु॒दं। नि। क्र॒मीः॒। प॒दा। स॒नात्। ए॒व। द॒स्यु॒ऽहत्या॑य। ज॒ज्ञि॒षे॒ ॥ ६ ॥

हे इंद्र त्वं कुत्सं कुत्ससंज्ञकमृषिं शुष्णहत्येषु। शुष्णः शोषयिता। एतन्नाम्नोऽसुरस्य हननयुक्तेषु संग्रामेष्वाविथ। ररक्षिथ। तथातिथिग्वायातिथिभिर्गंतव्याय दिवोदासाय शंबरमेतन्नामानमसुरमरंधयः। हिंसां प्रापितः। तथा महांतं चित्। अतिप्रवृद्धमप्यर्बुदमेतत्संज्ञकमसुरं पदा पादेन निक्रमीः। नितरामाक्रमिताभूः। यस्मादेवं तस्मात्सनादेव चिरकालादेवारभ्य दस्युहत्यायोपक्षपयितॄणां हननाय जज्ञिषे। सर्वदा त्वं दस्युहननशीलो भवसीत्यर्थः॥ अरंधयः। रंध हिंसासंराद्ध्योः। रधिजभोरचीति धातोर्नुम्। अतिथिग्वाय। गमेरौणादिको ड्वप्रत्ययः। क्रमीः। क्रमु पादविक्षेपे। ह्म्यंतक्षण। पा० ७. २. ५.। इति वृद्धिप्रतिषेधः। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। पदा। सावेकाच इति वोडिदंपदादीति वा विभक्तेरुदात्तत्वं। जज्ञिषे। जनी प्रादुर्भावे। लिटि गमहनेत्यादिनोपधालोपः॥

सप्तमीमृचमाह ॥

त्वे विश्वा॒ तवि॑षी स॒ध्र्य॑ग्घि॒ता तव॒ राधः॑ सोमपी॒थाय॑ हर्षते।
तव॒ वज्र॑श्चिकिते बा॒ह्वोर्हि॒तो वृ॒श्चा शत्रो॒रव॒ विश्वा॑नि॒ वृष्ण्या॑ ॥ ७ ॥

त्वे इति॑। विश्वा॑। तवि॑षी। स॒ध्र्य॑क्। हि॒ता। तव॑। राधः॑। सो॒म॒ऽपी॒थाय॑। ह॒र्ष॒ते॒।
तव॑। वज्रः॑। चि॒कि॒ते॒। बा॒ह्वोः। हि॒तः। वृ॒श्च। शत्रोः॑। अव॑। विश्वा॑नि। वृष्ण्या॑ ॥ ७ ॥

हे इंद्र त्वे त्वयि विश्वा तविषी सर्वं बलं सध्र्यक् सध्रीचीनं। अपराङ्मुखं यथा भवति तथा हिता निहितं। तथा तव राधो मनः सोमपीथाय सोमपानाय हर्षते। हृष्यति। किंच। तव बाह्वोर्हस्तयोर्हितोऽवस्थितो वज्रश्चिकिते। अस्माभिर्ज्ञायते। अतः शत्रोः शातयितुर्वैरिणो विश्वानि सर्वाणि वृष्ण्या वीर्याण्यववृश्चा। छेदनं कुरु॥ सहांचतीति सध्र्यक्। अंचतेर्ऋत्विगित्यादिना क्विन्। अनिदितामिति नलोपः। समासे सहस्य सध्रिरिति सहशब्दस्य सध्र्यादेशः। चोः कुरिति कुत्वं। कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्तेऽद्रिसध्र्योरंतोदात्तत्वनिपातनं कृत्स्वरनिवृत्त्यर्थं। पा० ६. ३. ९५. १.। इति वचनात्सध्र्यादेशोऽंतोदात्तः। तस्य यणादेश उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं। राधः। राध्नोति समृद्धो भवत्यनेन। राधोऽत्र मन उच्यते। असुनो नित्त्वादाद्युदात्तत्वं। सोमपीथाय। पा पाने। पातृतुदिवचीत्यादिना थक्प्रत्ययः। घुमास्थेतीत्वं। हर्षते। हृष तुष्टौ। श्यनि प्राप्ते व्यत्ययेन शप्। आत्मनेपदं च। चिकिते। कित ज्ञाने। छंदसि लुङ्लङ्लिट इति वर्तमाने कर्मणि लिट्। बाह्वोः। उदात्तयण इति विभक्तेरुदात्तत्वं। वृश्चा। ओव्रश्चू छेदने। तौदादिकः। ग्रहिज्यादिना संप्रसारणं। विकरणस्वरः। संहितायां द्व्यचोऽतस्तिङ इति दीर्घत्वं। वृष्ण्या। वृष सेचने। औणादिको नक्प्रत्ययः। तत्र भवानि वृष्ण्यानि। भवे छंदसीति यत्। यतोऽनाव इत्याद्युदात्तत्वं। शेश्छंदसीति शेर्लोपः॥

अष्टमीमृचमाह॥

वि जा॑नीह्यार्या॑न्ये च॒ दस्य॑वो ब॒र्हिष्म॑ते रंधया॒ शास॑दव्र॒तान्।
शाकी॑ भव॒ यज॑मानस्य चोदि॒ता विश्वेत्ता ते॑ सध॒मादे॑षु चाकन॥८॥

वि। जा॒नी॒हि॒। आर्या॑न्। ये। च॒। दस्य॑वः। ब॒र्हिष्म॑ते। रं॒ध॒य॒। शास॑त्। अ॒व्र॒तान्।
शाकी॑। भ॒व॒। यज॑मानस्य। चोदि॒ता। विश्वा॑। इत्। ता। ते॒। स॒ध॒ऽमादे॑षु। चा॒क॒न॥८॥

हे इंद्र त्वमार्यान्विदुषोऽनुष्ठातॄन्विजानीहि। विशेषेण बुध्यस्व। ये च दस्यवस्तेषामनुष्ठातॄणामुपक्षपयितारः शत्रवस्तानपि विजानीहीति शेषः। ज्ञात्वा च बर्हिष्मते बर्हिषा यज्ञेन युक्ताय यजमानायाव्रतान्। व्रतमिति कर्मनाम। कर्मविरोधिनस्तान्दस्यून् रंधय। हिंसां प्रापय। यद्वा यजमानस्य वशं गमय। रध्यतिर्वशगमने। नि० ६. ३२.। इति यास्कः। किं कुर्वन्। शासत्। दुष्टानामनुशासनं निग्रहं

कुर्वन्। अतः शाकी शक्तियुक्तस्त्वं यजमानस्य चोदिता प्रेरको भव। यज्ञविघातकानसुरांस्तिरस्कृत्य यज्ञान्यजमानैः सम्यगनुष्ठापयेति भावः। अहमपि स्तोता ते तव ता तानि पूर्वोक्तानि कर्माणि विश्वेत् सर्वाण्येव सधमादेषु सहमदनयुक्तेषु यज्ञेषु स्तोतुं चाकन। कामये॥ जानीहि। ज्ञा अवबोधने। क्र्यादिकः। ज्ञाजनोर्जेति जादेशः। अत्र प्री गतौ वृदिति वृत्करणं ल्वादिपरिसमाप्त्यर्थमेव न प्वादिपरिसमाप्त्यर्थमिति येषां दर्शनं तेषां प्वादीनां ह्रस्व इति ह्रस्वत्वेन भवितव्यं। नैवं। ज्ञाजनोर्जेति दीर्घोच्चारणसामर्थ्यात्। जनी प्रादुर्भाव इत्यस्य तु दीर्घोच्चारणमंतरेणाप्यतो दीर्घो यञीत्यनेनैव दीर्घः सिध्यति। तस्माद्दीर्घोच्चारणवैयर्थ्यप्रसंगादत्र ह्रस्वो न भवतीति सिद्धं। बर्हिष्मते। तसौ मत्वर्थ इति भत्वात् रुत्वजश्त्वयोरभावः। रंधय। रंध हिंसासंराद्ध्योः। शासत्। शासु अनुशिष्टौ। शतर्यदादित्वाच्छपो लुक्। जक्षित्यादयः षडित्यभ्यस्तसंज्ञायां नाभ्यस्ताच्छतुरिति नुम्प्रतिषेधः। अभ्यस्तानामादिरित्याद्युदात्तत्वं। शाकी। शकॢ शक्तौ। भावे घञ्। ततो मत्वर्थीय इनिः। व्यत्ययेनाद्युदात्तत्वं। यद्वा वृषादिर्द्रष्टव्यः। विश्वा ता। उभयत्र शेश्छंदसीति शेर्लोपः। सधमादेषु। सह माद्यंत्येष्विति सधमादा यज्ञाः। अधिकरणे घञ्प्रत्ययः। ननु मदोऽनुपसर्ग इत्यप्प्रत्ययेन भवितव्यं। नैवं। व्यधजपोरनुपसर्गे। पा० ३. ३. ६१। इत्यत्रैव मद इति वक्तव्ये यन्मदोऽनुपसर्ग इति पृथगुपादानं तद्घञपि पक्षे यथा स्यादिति न्यासकारेण प्रत्यपादीत्यस्माभिर्धातुवृत्तावुक्तं। सध मादस्थयोश्छंदसीति सहशब्दस्य सधादेशः। चाकन। कनी दीप्तिकांतिगतिषु। अत्र कांत्यर्थः। छंदसि लुङ्लङ्लिट इति वर्तमाने लिट्। णलुत्तमो वा। पा० ७. १. ९१। इति णित्त्वस्य विकल्पनाद्वृद्ध्यभावः। तुजादित्वादभ्यासस्य दीर्घत्वं॥

नवमीमृचमाह॥

अनुव्रताय रंधयन्नपव्रतानाभूभिरिंद्रः श्नथयन्ननाभुवः।
वृद्धस्य चिद्वर्धतो द्यामिनक्षतः स्तवानो वम्रो वि जघान संदिहः॥ ९॥

अनुऽव्रताय। रंधयन्। अपऽव्रतान्। आऽभूभिः। इंद्रः। श्नथयन्। अनाभुवः।
वृद्धस्य। चित्। वर्धतः। द्यां। इनक्षतः। स्तवानः। वम्रः। वि। जघान। संऽदिहः॥ ९॥

य इंद्रोऽनुव्रतायानुकूलकर्मणे यजमानायापव्रतानपगतकर्मणो यजमानान्

रंधयन्हिंसयन्वशीकुर्वन्वा । तथाभूभिः । आभिमुख्येन भवंतीत्याभुवः स्तोतारः । तैरनाभुवस्तद्विपरीतान् श्नथयन्हिंसयन्वर्तते । वृद्धस्य चिद्वर्धतः पूर्वं वृद्धस्यापि पुनर्वर्धमानस्य द्यामिनक्षतः स्वर्गं व्याप्नुवतस्तस्येंद्रस्य स्तवानः स्तुतिं कुर्वाणो वम्रः स्तुत्युद्गिरणशील एतत्संज्ञक ऋषिः संदिहः सम्यगुपचिता वल्मीकवपा विजघान । इंद्रेण परिहृतांतरायः सन्पृथिव्याः सारभूतं वल्मीकवपालक्षणं यज्ञसंभारमाहार्षीदित्यर्थः । तथा च शाखांतरे समाम्नातं । यद्वल्मीकवपासंभारो भवति ऊर्जमेव पृथिव्या अवरुंध इति ॥ अनुव्रताय । अनुकूलं व्रतं यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । श्नथयन् । श्नथ हिंसायां । णिचि घटादित्वान्मित्त्वे मितां ह्रस्व इति ह्रस्वत्वं । वर्धतः । व्यत्ययेन परस्मैपदं । इनक्षतः । नक्ष गतौ । इकारोपजनश्छांदसः । यद्वा । इनक्षतिर्गत्यर्थः । प्रकृत्यंतरमन्वेष्टव्यं । स्तवानः । सम्यानच् स्तुव इति स्तौतेर्बहुलवचनान्निरुपपदादप्यानच्प्रत्ययः । व्यत्ययेनाद्युदात्तत्वं । जघान । अभ्यासाच्चेत्यभ्यासादुत्तरस्य हंतेर्हकारस्य कुत्वं । संदिहः । दिह उपचये । कृत्यल्युटो बहुलमिति बहुलवचनात्कर्मणि क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वं ॥

दशमीमृचमाह ॥

तक्षद्यत्त उशना सहसा सहो वि रोदसी मज्मना बाधते शवः ।
आ त्वा वातस्य नृमणो मनोयुज आ पूर्यमाणमवहन्नभि श्रवः ॥ १० ॥

तक्षत् । यत् । ते । उशना । सहसा । सहः । वि । रोदसी इति । मज्मना । बाधते । शवः ।
आ । त्वा । वातस्य । नृऽमनः । मनःऽयुजः । आ । पूर्यमाणं । अवहन् । अभि । श्रवः ॥ १० ॥

हे इंद्र यद्यदोशना काव्यः सहसात्मीयेन बलेन ते सहस्त्वदीयं बलं तक्षत् । तनूकृतवान् । सम्यक् तीक्ष्णमकार्षीदित्यर्थः । तदा शवस्त्वदीयं बलं मज्मना सर्वस्य शोधकेन स्वतैक्ष्ण्येन रोदसी द्यावापृथिव्यौ विबाधते । ते बिभीत इत्यर्थः । तथा चान्यत्राम्नातं । यस्य शुष्माद्रोदसी अभ्यसेतामिति । यद्वा रोदसी यस्माद्वृत्रादेर्बिभीतस्तं बाधत इत्यर्थः । हे नृमणः । नृषु रक्षितव्येषु यजमानेष्वनुग्रहबुद्धियुक्तेंद्र । आपूर्यमाणं पूर्वोक्तेन बलेना समंतात्पूर्यमाणं त्वा त्वां मनोयुजो मनोव्यापारमात्रेण युक्ता वातस्य वायोः संबंधिनः । तद्वद्वेगेन गच्छंत इत्यर्थः ।

एवंभूता अश्वाः अवोऽभि हविर्लक्षणमन्नमभिलक्ष्यावहन्। आभिमुख्येन प्रापयंतु ॥ तक्षत्। तक्षू त्वक्षू तनूकरणे। लङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। शपः पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते। उशना। वश कांतौ। वशेः कनसिः। उ० ४. २३८.। इति कनस्। ग्रहिज्येत्यादिना संप्रसारणं। ऋदुशनस्पुरुदंशोऽनेहसां च। पा० ७. १. ९४.। इत्यनङादेशः। सर्वनामस्थाने च। पा० ६. ४. ८.। इत्युपधादीर्घत्वं। हल्ङ्यादिनलोपौ। मज्मना। टुमस्जो शुद्धौ। औणादिको मनिप्रत्ययः। नृमणः। छंदस्यृदवग्रहादिति णत्वं। अवहन्। छंदसि लुङ्लङ्लिट इति प्रार्थनायां लङ् ॥

॥ इति प्रथमस्य चतुर्थे दशमो वर्गः ॥

एकादशीमृचमाह ॥

मंदिष्ट यदुशने काव्ये सचाँ इंद्रो वंकू वंकुतराधि तिष्ठति ।

उग्रो ययिं निरपः स्रोतसासृजद्वि शुष्णस्य दृंहिता ऐरयत्पुरः ॥ ११ ॥

मंदिष्ट। यत्। उशने। काव्ये। सचा। इंद्रः। वंकू इति। वंकुऽतरा। अधि। तिष्ठति।

उग्रः। ययिं। निः। अपः। स्रोतसा। असृजत्। वि। शुष्णस्य। दृंहिताः। ऐरयत्।

पुरः ॥ ११ ॥

यत् यदेंद्र उशने कामयमाने काव्ये सचा सह मंदिष्ट। स्तुतोऽभूत्। तदानीं वंकू वंकुतरातिशयेन कुटिलं गच्छंतावश्वावधितिष्ठति। रथे संयोज्य तमारोहतीत्यर्थः। यद्वा वंकुतरातिशयेन वक्रं गच्छति रथे वंकू वक्रगमनशीलावश्वौ संयोज्येति योजनीयं। उग्र उद्गूर्णस्तादृश इंद्रो ययिं गमनयुक्तान्मेघात् स्रोतसा प्रवाहरूपेणापो निरसृजत्। जलानि निरगमयत्। तथा शुष्णस्य सर्वस्य शोषयितुरसुरस्य दृंहिताः प्रवृद्धाः पुरो नगराणि निवासस्थानानि व्यैरयत्। विविधं प्रेरितवान् ॥ मंदिष्ट। मदि स्तुतिमोदमदस्वप्नकांतिगतिषु। लुङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। उशने। वशेरौणादिकः क्युप्रत्ययः। ग्रहिज्यादिना संप्रसारणं। योरनादेशः। सचा। षच समवाये। संपदादिलक्षणो भावे क्विप्। आङ्याजयारां चोपसंख्यानमिति विभक्तेराङादेशः। संहितायां आङोऽनुनासिकश्छंदसीति तस्य सानुनासिकत्वं। वंकू। वंचु गतौ। औणादिक उप्रत्ययः। बहुलवचनात्कुत्वं। वंकुतरा। अतिशयेन वंकू वंकुतरा। सुपां सुलुगिति

विभक्तेराकारः । अत्र गतिसामान्यवाचिना गतिविशेषो लक्ष्यते । ययिं । या प्रापणे । आदृगमहनजन इति किप्रत्ययः । लिड्वद्भावात् द्विर्वचनहस्वत्वे । आतो लोप इटि चेत्याकारलोपः । प्रत्ययस्वरः । सुपां सुपो भवंतीति पंचम्या अमादेशः । दंहिताः । दृहि वृद्धौ । इदित्वान्नुम् । ऐरयत् । ईर प्रेरणे । चौरादिकः । लङ्याडागमः । आटश्चेति वृद्धिः ॥

द्वादशीमृचमाह ॥

आ स्मा रथं वृषपाणेषु तिष्ठसि शार्यातस्य प्रभृता येषु मंदसे ।
इंद्र यथा सुतसोमेषु चाकनोऽनर्वाणं श्लोकमा रोहसे दिवि ॥ १२ ॥

आ । स्म । रथं । वृषऽपानेषु । तिष्ठसि । शार्यातस्य । प्रऽभृताः । येषु । मंदसे ।
इंद्र । यथा । सुतऽसोमेषु । चाकनः । अनर्वाणं । श्लोकं । आ । रोहसे । दिवि ॥ १२ ॥

अत्र कौशितकिन इतिहासमाचक्षते । शार्यातनाम्नो राजर्षेर्यज्ञे भृगुगोत्रोत्पन्नश्च्यवनो महर्षिराश्विनं ग्रहमगृह्णात् । इंद्रस्तं दृष्ट्वा क्रुद्धोऽभूत् । तमिंद्रमनुनीय पुनः सोमं तस्मै प्रादादिति । अयमर्थोऽस्यां प्रतिपाद्यते ॥ हे इंद्र त्वं वृषपाणेषु । वृष्णः सेचनसमर्थस्य सोमस्य पानानि वृषपाणानि । तेषु निमित्तभूतेषु रथमातिष्ठसि स्म । स्वयमेव रथमारुह्य गच्छसि । न त्वन्यः कश्चित्प्रवर्तयितेति भावः । एवं च सति येषु सोमेषु त्वं मंदसे । हर्षं प्राप्नोषि । तादृशाः सोमाः शार्यातस्यैतन्नाम्नो राजर्षेः संबंधिनः प्रभृताः । प्रकर्षेण संपादिताः । अभिषवादिसंस्कारैः संस्कृता इत्यर्थः । अतः सुतसोमेष्वभिषुतसोमयुक्तेष्वन्यदीयेषु यज्ञेषु यथा चाकनः । यथा कामयसे । एवमस्यापि शार्यातस्य सोमान्कामयस्व । तथा सति दिवि द्युलोकेऽनर्वाणं गमनरहितं स्थिरं श्लोकं स्तोत्रलक्षणं वचो यशो वारोहसे । प्राप्नोषि । यद्वा । इमं यजमानं दिवि द्युलोक उक्तलक्षणं यशः प्रापयसि ॥ स्म । निपातस्य चेति दीर्घत्वं । वृषपाणेषु । पा पाने । भावे ल्युट् । वा भावकरणयोः । पा॰ ८. ४. १०. । इति पूर्वपदस्थान्निमित्तादुत्तरस्य पानशब्दनकारस्य णत्वं । प्रभृताः । भृञ् भरणे । कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । मंदसे । मदि स्तुतिमोदमदस्वप्नकांतिगतिषु । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । चाकनः । कनी दीप्तिकांतिगतिषु । अत्र कांत्यर्थः । कांतिश्चाभिलाषः । लेटि सिप्यडागमः । बहुलं छंदसीति शपः श्लुः । तुजादि-

त्वादभ्यासस्य दीर्घत्वं। सर्वे विधयश्छंदसि विकल्प्यंत इत्यभ्यस्तस्याद्युदात्तत्वाभावे धातोरिति धात्वंतस्योदात्तत्वं। अनर्वाणं। अर्तेरन्येभ्योऽपि दृश्यंत इति दृशिग्रहणाद्भावे वनिप्। नञो बहुव्रीहावम्यर्वणस्तसावनञ इति पर्युदासात्तृआदेशाभावे सर्वनामस्थाने चेत्युपधादीर्घत्वं। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। श्लोकं। श्लोकृ संघाते। श्लोक्यत इति श्लोकः। कर्मणि घञ्। जिह्वादाद्युदात्तत्वं। रोहसे। रुहेर्व्यत्ययेनात्मनेपदं॥

त्रयोदशीमृचमाह॥

अददा अर्भां महते वचस्यवे कक्षीवते वृचयामिंद्र सुन्वते।
मेनाभवो वृषणश्वस्य सुक्रतो विश्वेत्ता ते सवनेषु प्रवाच्या॥ १३॥
अददाः। अर्भां। महते। वचस्यवे। कक्षीवते। वृचयां। इंद्र। सुन्वते।
मेना। अभवः। वृषणश्वस्य। सुक्रतो इति सुऽक्रतो। विश्वा। इत्। ता। ते।
सवनेषु। प्रऽवाच्या॥ १३॥

अत्रेयमाख्यायिका। अंगराजः कस्मिंश्चिद्दिवसे स्वकीयाभिर्योषिद्भिः सह गंगायां जलक्रीडां चक्रे। तस्मिन्समये दीर्घतमा नाम ऋषिः स्वभार्यया पुत्रभृत्यादिभिश्च दुर्बलत्वात्किमपि कुर्वन्न शक्नोतीति द्वेषेण गंगामध्ये प्रचिक्षिपे। स च ऋषिः केनचित्प्लवेनांगराजस्य क्रीडादेशं प्रति समाजगाम। स च राजा सर्वज्ञं तमृषिमवगत्य प्रवादवतार्यैवमवोचत्। हे भगवन् मम पुत्रो नास्ति। एषा महिषी। अस्यां कंचित्पुत्रमुत्पादयेति। स च तथेत्यब्रवीत्। सा महिषी तु राजानं प्रति तथेत्युक्त्वायं वृद्धतरो जुगुप्सितो मम योग्यो न भवतीति बुद्ध्या स्वकीयामुशिक्संज्ञां दासीं प्राहैषीत्। तेन च सर्वज्ञेन ऋषिणा मंत्रपूतेन वारिणाभ्युक्षिता सती सैव ऋषिपत्नी बभूव। तस्यामुत्पन्नः कक्षीवान्नाम ऋषिः। स एव राज्ञः पुत्रोऽभूत्। स च बहुविधेन राजसूयादिनेजे। तस्मै राज्ञे तत्कृतैर्यज्ञैः परितुष्ट इंद्रो वृचयाख्यां तरुणां योषितं प्रादात्। अयमर्थः पूर्वार्द्धे प्रतिपाद्यते॥ हे इंद्र त्वं महते प्रवृद्धाय वचस्यवे त्वदीयस्तोत्रलक्षणं वच आत्मन इच्छते सुन्वते त्वद्देवताकेषु यज्ञेषु सोमाभिषवं कुर्वते कक्षीवत एतन्नाम्ने राज्ञे वृचयां वृचयाख्यामर्भामल्पां। युवतिमित्यर्थः। एवंभूतां स्त्रियमददाः। तथा सुक्रतो शोभनकर्मन् शोभनप्रज्ञ वा हे इंद्र त्वं वृषणश्वस्यैतदाख्यस्य राज्ञो

मेनाभवः। मेना नाम कन्यकाभूः। तथा च शाट्यायनिभिः सुब्रह्मण्यामंत्रैकदे-
शव्याख्यानरूपं ब्राह्मणमेवमाम्नायते। वृषणश्वस्य मेन इति वृषणश्वस्य मेना
भूत्वा मघवा कुल उवासेति। तां च प्राप्तयौवनां स्वयमेवेंद्रश्चकमे। तथा च
तांडिभिराम्नातं। वृषणश्वस्य मेना नाम दुहितास। तामिंद्रश्चकम इति। अत
उक्तरूपाणि यानि कर्माणि त्वया कृतानि ते त्वदीयानि ता तानि विश्वेत् सर्वा-
ण्येव सवनेषु यज्ञेषु प्रवाच्या। प्रकर्षेण वक्तव्यानि। स्तुतिभिः स्तोतव्यानीत्यर्थः॥
महते। बृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वं। वचस्यवे। सुप आत्मनः
क्यच्। क्याच्छंदसीत्युप्रत्ययः। कक्षीवते। अश्वबंधनहेतवो रज्जवः कक्ष्याः।
कक्षीवान् कक्ष्यावानिति यास्कः। आसंदीवदष्ठीवच्चक्रीवत्कक्षीवदिति संप्रसारणं
मतुपो वत्वं संज्ञायां निपात्यते। मेनेति स्त्रीनाम। मेना ग्ना इति पाठात्।
मन ज्ञाने। मन्यते गृहकृत्यं जानातीति मेना। पचाद्यच्। नशिमन्योरलिट्येत्वं
वक्तव्यं। पा० ६. ४. १२०. ५.। इत्येत्वं। वृषादित्वादाद्युदात्तः। मेना मानयंत्येना इति
यास्कः। नि० ३. २१.। सवनेषु। सवनमिति यज्ञनाम। सूयतेऽभिषूयत एष्विव-
त्यधिकरणे ल्युट्। प्रवाच्या। वच परिभाषणे। ण्यति यजयाचरुचप्रवचर्चश्च
। पा० ७. ३. ६६.। इति कुत्वाभावः। तित्स्वरिते प्राप्ते व्यत्ययेनाद्युदात्तत्वं। यद्वा
वाचयतेरचो यदिति यत्। यतोऽनाव इत्याद्युदात्तत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं॥

चतुर्दशीमृचमाह॥

इंद्रो॑ अश्रायि सु॒ध्यो॑ निरे॒के प॒ज्रेषु॒ स्तोमो॒ दुर्यो॒ न यूपः॑।
अ॒श्व॒युर्ग॒व्यू र॑थ॒युर्व॑सू॒युरिंद्र॒ इद्रा॒यः क्ष॑यति प्रयं॒ता॥ १४॥
इंद्रः॑। अ॒श्रा॒यि॒। सु॒ऽध्यः॑। नि॒रे॒के। प॒ज्रेषु॑। स्तोमः॑। दुर्यः॑। न। यूपः॑।
अ॒श्व॒ऽयुः। ग॒व्युः। र॒थ॒ऽयुः। व॒सु॒ऽयुः। इंद्रः॑। इत्। रा॒यः। क्ष॒य॒ति॒। प्र॒ऽयं॒ता॥ १४॥

इंद्रो देवः सुध्यः शोभनकर्मणो यजमानान् शोभनप्रज्ञान्वा निरेके नैर्धन्ये निमित्तभूते सति तान्रक्षितुमश्रायि। असेविष्ट। पज्रेषु। पज्रा इत्यंगिरसामाख्या। तथा च शाट्यायनिभिराम्नातं। पज्रा वा अंगिरसः पशुकामास्तपोऽतप्यंतेति। येषु यजमानेष्वंगिरःसु स्तोमः स्तोत्रं निश्चलं तिष्ठति। दुर्यो न यूपः। द्वारि निखाता स्थूणेव। तान्सुध्य इति पूर्वेणान्वयः। तस्मादिदानीमपि रायः प्रयंता धनस्य दातेंद्र इत्। इंद्र एव यजमानानां दातुमश्वयुरश्वानिच्छन् तथा गव्युर्गा

इच्छन् रथयू रथानिच्छन् वसूयुरेवमन्यदपि यद्धनमस्ति तदपीच्छन्क्षयति। वर्तते ॥ अश्रायि। श्रिञ् सेवायां। कर्तरि लुङि व्यत्ययेन च्लेश्चिणादेशः। सुध्यः। धीरिति कर्मनाम। शोभना धीर्येषां। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। शसि छंदस्युभयथा। पा० ६.४.८६.। इति यणादेशः। उदात्तस्वरितयोर्यण इति स्वरितत्वं। निरेके। नितरां रेचनं निरेकः। रिचिर् विरेचने। भावे घञ्। थाथादिनोत्तरपदांतोदात्तत्वं। दुर्यः। दुरे भवो दुर्यः। भवे छंदसीति यत्। यतोऽनाव इत्याद्युदात्तत्वं। यूपः। यु मिश्रणे। यूयते युज्यतेऽस्मिन्निति यूपः। कुयुभ्यां च। उ० ३.२७.। इति पप्रत्ययः। दीर्घ इत्यनुवृत्तेर्दीर्घत्वं। सुप्सृभ्यां निच्चेत्यनुवृत्तावाद्युदात्तत्वं। अश्वयुः। यजमानेभ्योऽश्वानिच्छन्। छंदसि परेच्छायामिति क्यच्। न छंदस्यपुत्रस्येतीत्वदीर्घयोर्निषेधः। अश्वाघस्यादित्यात्वं तु छांदसत्वान्न भवति। क्याच्छंदसीत्युप्रत्ययः। एवमुत्तरत्रापि। एतावांस्तु विशेषः। गव्युरित्यत्र वांतो यि प्रत्यय इत्यवादेशः। यास्कस्त्वेवं व्याचष्टे। इदंयुरिदं कामयमानोऽथापि तद्वदर्थे भाष्यते। वसूयुरिंद्रो वसुमानित्यर्थः। अश्वयुर्गव्यू रथयुर्वसूयुरित्यपि निगमो भवति। नि० ६.३१.। इति। क्षयति। क्षि क्षये। भौवादिकः। प्रयंता। यम उपरमे। तृच्येकाच इतीट्प्रतिषेधः। चित इत्यंतोदात्तत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं ॥

पंचदशीमृचमाह ॥

इदं नमो वृषभाय स्वराजे सत्यशुष्माय तवसेऽवाचि।
अस्मिन्निंद्र वृजने सर्ववीराः स्मत्सूरिभिस्तव शर्मन्त्स्याम ॥ १५ ॥
इदं। नमः। वृषभाय। स्वऽराजे। सत्यऽशुष्माय। तवसे। अवाचि।
अस्मिन्। इंद्र। वृजने। सर्वऽवीराः। स्मत्। सूरिऽभिः। तव। शर्मन्। स्याम ॥ १५ ॥

इदं पुरोवर्ति नमः स्तुतिलक्षणं वचो हे इंद्र तुभ्यमवाचि। अस्माभिः प्रायोजि। कीदृशाय। वृषभाय। वर्षणशीलाय। स्वराजे। स्वकीयेन तेजसा राजमानाय। सत्यशुष्माय। शुष्ममिति बलनाम शत्रूणां शोषकत्वात्। अवितथबलयुक्ताय। तवसे। अत्यंतं प्रवृद्धाय। यस्मादेवं तस्मादस्मिन्वृजने वर्जनवति संग्रामे सर्ववीराः। विशेषेणेरयंत्यमित्रानिति वीरा भटाः। तादृशैः सर्वैर्भटैरुपेता वयं। स्मदिति निपातः सुशब्दार्थः। तव स्मत् शर्मन् त्वया दत्ते शोभने गृहे सूरिभिर्विद्वद्भिः पुत्रादिभिः सह स्याम। भवेम। निवसेमेत्यर्थः। यद्वा त्वत्संबंधिनि

शोभने यज्ञगृहे सूरिभिर्विद्वद्भिर्ऋत्विग्भिः सह स्याम। शर्मेति गृहनाम। शर्म वर्मेति पठितत्वात् ॥ स्वराजे। राजृ दीप्तौ। सत्सूद्विषेति क्विप्। सत्यशुष्माय। सत्यं शुष्मं बलं यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। तवसे। तवतिः सौत्रो धातुः। अस्मादौणादिकोऽसिप्रत्ययः। वृजने। वृजी वर्जने। कृपृवृजिमंदिनिधाञ्भ्यः क्युः। उ० २. ७९.। इति क्युः प्रत्ययः। शर्मन्। सुपां सुलुगिति सप्तम्या लुक्। न ङिसंबुद्ध्योरिति नलोपप्रतिषेधः। स्याम। नश्चेति संहितायां सकारस्य धुडागमः। खरि चेति चर्त्वं। चयो द्वितीयाः शरि पौष्करसादेरिति तकारस्य थकारः ॥

॥ इति प्रथमस्य चतुर्थ एकादशो वर्गः ॥

त्यं सु मेषमिति पंचदशर्चं द्वितीयं सूक्तं सव्यस्यार्षमैंद्रं। त्रयोदशी पंचदशी त्रिष्टुभौ शिष्टा जगत्यः। तथा चानुक्रांतं। त्यं सु त्रयोदश्यंत्ये त्रिष्टुभाविति ॥ गवामयनस्य मध्यमेऽहनि विषुवत्संज्ञके मरुत्वतीयशस्त्र इदं सूक्तं। विषुवान्दिवा कीर्त्य इति खंडे सूत्रितं। त्यं सुमेषं कया शुभेति च मरुत्वतीयं। आ० ८. ६.। इति ॥

तत्र प्रथमामृचमाह ॥

त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभ्वः साकमीरते।
अत्यं न वाजं हवनस्यदं रथमेंद्रं ववृत्यामवसे सुवृक्तिभिः ॥ १ ॥
त्यं। सु। मेषं। महय। स्वःऽविदं। शतं। यस्य। सुऽभ्वः। साकं। ईरते।
अत्यं। न। वाजं। हवनऽस्यदं। रथं। आ। इंद्रं। ववृत्यां। अवसे। सुवृक्तिऽभिः ॥ १ ॥

त्यं तं प्रसिद्धं मेषं शत्रुभिः सह स्पर्धमानं स्वर्विदं। स्वरादित्यो द्यौर्वा। तस्य वेदितारं लब्धारं वा। यद्वा स्वः सुष्ठुरणीयं धनं। तस्य लंभयितारं। एवंगुणविशिष्टमिंद्रं हे अध्वर्यो सु महया। सम्यक् पूजय। यस्येंद्रस्य शतं शतसंख्याकाः सुभ्वः स्तोतारः साकं सहैव युगपदेवेरते। स्तुतौ प्रवर्तंते। यद्वा यस्येंद्रस्य रथं शतं सुभ्वः शतसंख्याका अश्वाः साकं सहेरते। गमयंति। तमिंद्रमवसेऽस्मद्रक्षणाय सुवृक्तिभिः सुष्ठ्वावर्जकैः स्तोत्रैः रथमाववृत्यां। रथं प्रत्यावर्तयामि। कीदृशं रथं। हवनस्यदं। हवनमाह्वानं यागं वा प्रति वेगेन गच्छंतं। वेगगमने दृष्टांतः। अत्यं न वाजं। गमनसाधनमश्वमिव ॥ महया। मह पूजायां। चुरादिरदंतः।

संहितायामन्येषामपि दृश्यत इति दीर्घत्वं। सुभ्वः। सुष्ठु भवंतीति सुभ्वः स्तोतारः। क्विप् चेति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं। जस्योः सुपीति यणादेशस्य न भूसुधियोरिति प्रतिषेधे प्राप्ते छंदस्युभयथेत्युभयथाभावाद्यणादेशः। उदात्तस्वरितयोर्यण इति परस्य जसोऽनुदात्तस्य स्वरितत्वं। ईरते। ईर गतौ कंपने च। अदादित्वाच्छपो लुक्। झस्यादादेशः। टेरेत्वं। अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः शिष्यते। यद्वृत्तयोगादनिघातः। तत्र हि पंचमीनिर्देशेऽपि व्यवहितेऽपि कार्यमिष्यत इत्युक्तं। अत्यं। अत्य इत्यश्वनाम। अत्यो हय इति पाठात्। वाजं। वाज्यते गम्यतेऽनेनेति वाजः। वज व्रज गतौ। करणे घञ्। अजिव्रज्योश्च। पा० ७. ३. ६०। इत्यत्र चशब्दस्यानुक्तसमुच्चयार्थत्वाद्वाजो वाज्यमित्यत्रापि कुत्वाभाव इत्युक्तं। हवनस्यदं। स्यंदू प्रस्रवणे। स्यदो जवे। पा० ६.४.२८.। इति वेगे गम्यमाने घञंतो निपातितः। अत एव नलोपो वृद्ध्यभावश्च। न च न धातुलोप आर्द्धधातुके। पा० १. १. ४.। इति वृद्धेः प्रतिषेधः। इग्लक्षणा हि वृद्धिस्तत्र प्रतिषिध्यते। न चेयमिग्लक्षणा। घञो ञित्त्वादुत्तरपदस्याद्युदात्तत्वं। कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते। ववृत्यां। वृतु वर्तने। लिङि व्यत्ययेन परस्मैपदं। बहुलं छंदसीति शपः श्लुः। द्विर्वचनादि। यासुटो ङित्त्वाल्लघूपधगुणाभावः। तिङ्ङतिङ इति निघातः॥

द्वितीयामृचमाह॥

स पर्वतो न धरुणेष्वच्युतः सहस्रमूतिस्तविषीषु वावृधे।
इंद्रो यद्वृत्रमवधीन्नदीवृतमुब्जन्नर्णांसि जर्हृषाणो अंधसा॥२॥
सः। पर्वतः। न। धरुणेषु। अच्युतः। सहस्रऽऊतिः। तविषीषु। ववृधे।
इंद्रः। यत्। वृत्रं। अवधीत्। नदीऽवृतं। उब्जन्। अर्णांसि। जर्हृषाणः। अंधसा॥२॥

अंधसा सोमलक्षणेनान्नेन जर्हृषाणोऽत्यर्थं हृष्यन्निंद्रो यद्यदा वृत्रं त्रयाणां लोकानामावरीतारमसुरमवधीत्। हतवान्। कीदृशं वृत्रं। नदीवृतं। नदनान्नद्य आपः। तासामावरीतारं। किं कुर्वन्निंद्रः। अर्णांसि जलान्युब्जन्। अधःपातयन्। तदानीं स इंद्रः पर्वतो न। पर्ववान् शिलोच्चय इव धरुणेषु सर्वस्य धारकेषूदकेषु मध्येऽच्युतश्चलनराहित्येन स्थितः सहस्रमूतिर्बहुविधरक्षणवान्तविषीषु बलेषु वावृधे। प्रवृद्धो बभूव॥ धरुणेषु। धारयतेर्णिलुक् चेत्युनप्रत्ययः।

प्रत्ययस्वरः । सहस्रमूतिः । सहस्रमूतयो यस्यासौ । लुगभावश्छांदसः । वावृधे । संहितायामभ्यासस्यान्येषामपि दृश्यत इति दीर्घत्वं । नदीवृतं । नदीं वृणोतीति नदीवृत् । क्विप् । तुगागमः । उब्जन् । उब्ज आर्जवे । विकरणस्वरः । अर्णांसि । उदके नुट् चेत्यर्तेरसुन्प्रत्ययः । तत्संनियोगेन नुडागमश्च । नित्त्वादाद्युदात्तत्वं । जर्हृषाणः । हृष तुष्टौ । यङ्लुगंताद्व्यत्ययेन शानच् । अभ्यस्तानामादिरित्याद्युदात्तत्वं । यद्वा । यङंतादेव शानचि बहुलं छंदसीति शपो लुक् । छंदस्युभयथेति शानच् । आर्द्धधातुकत्वादतोलोपयलोपौ । सार्वधातुकत्वाच्चाभ्यस्तस्याद्युदात्तत्वं । अंधसा । अद्यत इत्यंधः । अदेर्नुम् धश्चेत्यसुन् । धातोर्नुमागमो धकारांतादेशश्च । नित्त्वादाद्युदात्तत्वं ॥

तृतीयामृचमाह ॥

स हि द्वरो द्वरिषु वव्र ऊधनि चंद्रबुध्नो मदवृद्धो मनीषिभिः ।

इंद्रं तमह्वे स्वपस्यया धिया मंहिष्ठरातिं स हि पप्रिरंधसः ॥ ३ ॥

सः । हि । द्वरः । द्वरिषु । वव्रः । ऊधनि । चंद्रऽबुध्नः । मदऽवृद्धः । मनीषिऽभिः ।

इंद्रं । तं । अह्वे । सुऽअपस्यया । धिया । मंहिष्ठऽरातिं । सः । हि । पप्रिः । अंधसः ॥ ३ ॥

सः पूर्वोक्तगुणविशिष्ट इंद्रो द्वरिष्वावरीतृषु शत्रुषु द्वरो हि । अतिशयेनावरीता खलु । शत्रुजयशील इत्यर्थः । यस्मादूधन्युद्धृतजलवत्यंतरिक्षे वव्रः संभक्तो व्याप्य वर्तते । अत एव चंद्रबुध्नः । सर्वासां प्रजानामाह्लादकमूलः । अंतरिक्षस्य सर्वाह्लादकत्वात् । मदवृद्धः । माद्यंत्येभिरिति मदाः सोमाः । तैर्वर्धितः । एवंभूतो य इंद्रो मंहिष्ठरातिं प्रवृद्धधनं प्रवृद्धदानं वा तमिंद्रं मनीषिभिर्मनस ईषितृभिः प्राज्ञैर्ऋत्विग्भिः सह स्वपस्यया धिया शोभनकर्मयोग्यया बुद्ध्याह्वे । आह्वयामि । हि यस्मात्स इंद्रोऽधसोऽन्नस्यास्मदपेक्षितस्य पप्रिः पूरयिता ॥ द्वरः । द्वृ इत्येके । द्वरत्यावृणोतीति द्वरः । पचाद्यच् । चित्स्वरेणांतोदात्तत्वं । द्वरिषु । अच इरिति कर्तरीप्रत्ययः । वव्रः । वृङ् संभक्तौ । व्रियते संभज्यत इति वव्रः । घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थं । पा० ३. ३. ५८. ४. । इति परिगणनस्योपलक्षणार्थत्वात् कर्मणि कप्रत्ययः । द्विर्भावश्छांदसः । ऊधनि । उत् ऊर्ध्वं ध्रियतेऽस्मिन् जलमित्यूधः । सप्तम्येकवचनेऽस्थिदधिसक्थ्यक्ष्णामनङुदात्तश्छंदस्यपि दृश्यते । पा० ७. १. ७६. । इति दृशिग्रहणादूधस्शब्दस्याप्यनङादेशः । यद्वा । ऊधसोऽनङ् । पा० ५. ४. १३१. । इति समासे विधीयमानोऽनङादेशश्छांदसत्वात्केवलादपि

भवति। चंद्रबुध्नः। चदि आह्लादने दीप्तौ च। इदित्वान्नुम्। स्फायितंचीत्यादिना रक्प्रत्ययः। प्रत्ययस्वरेणांतोदात्तत्वं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन तदेव शिष्यते। मदवृद्धः। मदी हर्षे। मदोऽनुपसर्ग इति करणेऽप्। तस्य पित्त्वादनुदात्तत्वे धातुस्वरः। तृतीयाकर्मणीति पूर्वपदप्रकृतिस्वरत्वं। अह्वे। ह्वेञ् स्पर्धायां शब्दे च। छंदसि लुङ्लङ्लिट इति वर्तमाने लुङ्ख्यात्मनेपदेष्वन्यतरस्यामिति च्लेरङादेशः। आतो लोप इटि चेत्याकारलोपः। गुणः। स्वपस्यया। अप इति कर्मनाम। शोभनमपः स्वपः। तदर्हतीति स्वपस्यः। छंदसि चेति यप्रत्ययः। मंहिष्ठरातिं। महि वृद्धौ। अतिशयेन मंहित्री मंहिष्ठा। तुश्छंदसीतीष्ठन्प्रत्ययः। तुरिष्ठेमेयःस्विति तृलोपः। नित्त्वादाद्युदात्तत्वं। मंहिष्ठा रातिर्यस्य। स्त्रियाः पुंवत्। पा० ६. ३. ३४.। इति पुंवद्भावाद्ध्रस्वत्वं। बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वरत्वं। पप्रिः। पॄ पालनपूरणयोः। आदृगमहनजन इति किन्प्रत्ययः। उदोष्ठ्यपूर्वस्येत्युत्वस्य बहुलं छंदसीति वचनादभावे यणादेशः। लिड्वद्भावाद्द्विर्वचनेऽचीति स्थानिवद्भावे सति द्विर्भावोरदत्वहलादिशेषाः। नित्त्वादाद्युदात्तत्वं॥

चतुर्थीमृचमाह॥

आ यं पृणंति दिवि सद्मबर्हिषः समुद्रं न सुभ्व१ःस्वा अभिष्टयः।
तं वृत्रहत्ये अनु तस्थुरूतयः शुष्मा इंद्रमवाता अहुतप्सवः॥ २॥

आ। यं। पृणंति। दिवि। सद्मऽबर्हिषः। समुद्रं। न। सुऽभ्वः। स्वाः। अभिष्टयः।
तं। वृत्रऽहत्ये। अनु। तस्थुः। ऊतयः। शुष्माः। इंद्रं। अवाताः। अहुतऽप्सवः॥४॥

सद्म सदनं स्थानं बर्हिःशब्दोपलक्षितो यज्ञो येषां सोमानां ते सोमा दिवि स्वर्गलोकेऽवस्थितं यमिंद्रमापृणंति। आ समंतात्पूरयंति। तत्र दृष्टांतः। सुष्ठु भवंतीति सुभ्वो नद्यः समुद्रं न। यथा नद्यः समुद्रं पूरयंति तद्वदित्यर्थः। कीदृश्यो नद्यः। स्वाः। समुद्रस्य स्वभूताः। तथा चाम्नायते। समुद्राय वयुनाय सिंधूनां पतये नम इति। अभिष्टयः। आभिमुख्येन गमनवत्य ऊतयोऽवितारो मरुतो वृत्रहत्ये वृत्रहनने निमित्तभूते सति तमिंद्रमनुतस्थुः। अनुलक्ष्य स्थिता बभूवुः। कीदृशा मरुतः। शुष्माः। शत्रूणां शोषयितारः। अवाताः। वांति प्रातिकूल्येन गच्छंतीति वाताः शत्रवः। तद्रहिताः। अहुतप्सवः। अकुटिलरूपाः। शोभनावयवा इत्यर्थः॥ पृणंति। पॄ पालनपूरणयोः। क्र्यादिकः। प्वादीनां

ह्रस्व इति ह्रस्वत्वं । आभ्यस्तयोरात इत्याकारलोपः । प्रत्ययस्वरः । यद्वृत्तयोगादनिघातः । सद्मबर्हिषः । षद्लृ विशरणगत्यवसादनेषु । सीदंत्यस्मिन्निति सद्म । औणादिकोऽधिकरणे मनिन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन तदेव शिष्यते । सुभ्वः । भवतेः क्विप् चेति क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वं । जस्योः सुपीति यणादेशस्य न भूसुधियोरिति प्रतिषेधे प्राप्ते छंदस्युभयथेति यणादेशः । उदात्तस्वरितयोर्यण इत्यनुदात्तस्य जसः स्वरितत्वं । अभिष्टयः । इष्टय एषणानि । उपसर्गाश्चाभिवर्जमिति वचनादभिरंतोदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन स एव शिष्यते । एमन्नादित्वात्पररूपत्वं । वृत्रहत्ये । हनस्त चेति हंतेर्भावे क्यप् तकारांतादेशश्च । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते । अहुतप्सवः । ह्वृ कौटिल्ये । अस्मान्निष्ठायां ह्रु ह्वरेश्छंदसि । पा० ७. २. ३१. । इति ह्रु आदेशः । प्सा भक्षण इत्यस्मादौणादिको डुप्रत्ययः । न ह्रुतप्सवोऽह्रुतप्सवः । अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥

पंचमीमृचमाह ॥

अभि स्ववृष्टिं मदे अस्य युध्यतो रघ्वीरिव प्रवणे सस्रुरूतयः ।
इंद्रो यद्वज्री धृषमाणो अंधसा भिनद्वलस्य परिधींरिव त्रितः ॥ ५ ॥
अभि । स्वऽवृष्टिं । मदे । अस्य । युध्यतः । रघ्वीःऽइव । प्रवणे । सस्रुः । ऊतयः ।
इंद्रः । यत् । वज्री । धृषमाणः । अंधसा । भिनत् । वलस्य । परिधीन्ऽइव । त्रितः ॥ ५ ॥

ऊतयो मरुतो मदे सोमपानेन हर्षे सत्यस्येंद्रस्य युध्यतो वृत्रेण सह युध्यमानस्य पुरतः स्ववृष्टिं स्वभूतवृष्टिमंतं वृत्रमभि । आभिमुख्येन सस्रुः । जग्मुः । रघ्वीरिव प्रवणे । यथा गमनस्वभावा आपो निम्नदेशे गच्छंति । यत् यदांधसा सोमलक्षणेनान्नेन पीतेन धृषमाणः प्रगल्भः सन्वज्री वज्रवानिंद्रो वलस्य संवृण्वत एतत्संज्ञकमसुरं भिनत् । व्यदारयत् । अवधीदित्यर्थः । तत्र दृष्टांतः । त्रितः परिधीनिव । देवानां हविर्लेपनिर्घर्षणायाग्नेः सकाशादप्स्वेकतो द्वितस्त्रित इति त्रयः पुरुषा जज्ञिरे । तथा च तैत्तिरीयैः समाम्नातं । सोऽंगाराण्यभ्यपातयत् । तत एकतोऽजायत । स द्वितीयमभ्यपातयत् । ततो द्वितोऽजायत । स तृतीयमभ्यपातयत् । ततस्त्रितोऽजायतेति । तत्रोदकपानार्थं प्रवृत्तस्य कूपे पतितस्य प्रतिरोधायासुरैः परिधयः परिधायकाः कूपस्याच्छादका स्थापिताः । तान्यथा स

अभिनत् तद्वत् ॥ स्ववृष्टिं । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । युध्यतः । युध संप्रहारे । दैवादिकः । व्यत्ययेन शतृ । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे श्यनो नित्त्वादाद्युदात्तत्वं । रघ्वीः । रघि गत्यर्थः । रंघिबंह्योर्नलोपश्च । उ० १. २९. । इत्युप्रत्ययः । वोतो गुणवचनादिति ङीष् । जसि वा छंदसीति पूर्वसवर्णदीर्घत्वं । ङीष्स्वरः शिष्यते । धृषमाणः । ञिधृषा प्रागल्भ्ये । श्नुप्रत्यये प्राप्ते व्यत्ययेन श आत्मनेपदं च । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः शिष्यते । भिनत् । लङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । विकरणस्वरः । यद्वृत्तयोगादनिघातः । वलस्य । वल संवरणे । वलति संवृणोति सर्वमिति वलः । पचाद्यच् । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । परिधीन् । परिधीयंत इति परिधयः । उपसर्गे घोः किः । पा० ३. ३. ९२. । इति दधातेः कर्मणि किप्रत्ययः । आतो लोप इटि चेत्याकारलोपः । कृदुत्तरपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य चतुर्थे द्वादशो वर्गः ॥

षष्ठीमृचमाह ॥

परीं घृणा चरति तित्विषे शवोऽपो वृत्वी रजसो बुध्नमाशयत् ।
वृत्रस्य यत्प्रवणे दुर्गृभिश्वनो निजघंथ हन्वोरिंद्र तन्यतुं ॥ ६ ॥

परि । ईं । घृणा । चरति । तित्विषे । शवः । अपः । वृत्वी । रजसः । बुध्नं । आ । अशयत् ।
वृत्रस्य । यत् । प्रवणे । दुःऽगृभिश्वनः । निऽजघंथ । हन्वोः । इंद्र । तन्यतुं ॥ ६ ॥

यो वृत्रोऽपो वृत्वी । उदकान्यावृत्य रजसो बुध्नमंतरिक्षस्योपरिप्रदेशमाशयत् । आश्रित्याशेत । तस्य वृत्रस्य प्रवणे प्रकर्षेण वननीयेऽतरिक्षे वर्तमानस्य दुर्गृभिश्वनो दुर्ग्रहव्यापनस्य । तस्य हि व्यापनं न केनापि ग्रहीतुं शक्यते । स इमान् लोकानावृणोदिति श्रुतेः । एवंभूतस्य वृत्रस्य हन्वोर्मुखपार्श्वयोर्हे इंद्र यद्यदा तन्यतुं प्रहारं विस्तारयंतं यद्वा शब्दकारिणं वज्रं । तृतीयार्थे द्वितीया । तन्यतुना वज्रेण निजघंथ । नितरां प्रजहर्थ । तदानीमीमेनं त्वामिंद्रं घृणा शत्रुजयलक्षणा दीप्तिः परिचरति । परितो व्याप्नोति । त्वदीयं शवो बलं च तित्विषे । गदिदीपे ॥ तित्विषे । त्विष दीप्तौ । लिटि प्रत्ययस्वरः । तिङ्परत्वान्निघाताभावः । वृत्वी । वृञ् वरणे । स्नात्व्यादयश्च । पा० ७. १. ४९. । इत्यादिग्रहणात् क्त्वाप्रत्ययस्येकारः । रजसः । रंज रागे । रजंत्यस्मिन् गंधर्वादय इति रजोऽतरिक्षं । असुनि

रजकरजनरजःसूपसंख्यानं । पा॰ ६. ४. २६. १. । इति नलोपः । निघ्नादाद्यु-दात्तत्वं । अशयत् । शीङो व्यत्ययेन परस्मैपदं । बहुलं छंदसीति शपो लुगभावः । दुर्गृभिश्वनः । ग्रह उपादानेऽश्रू व्याप्तावित्यनयोर्दुःशब्द उपपदे पृषोदरादित्वा-दभिमतरूपस्वरसिद्धिः । निजघंथ । हन हिंसागत्योः । लिटि थलि क्रादिनि-यमात्प्राप्तस्येट उपदेशेऽत्वतः । पा॰ ७. २. ६२. । इति निषेधः । अभ्यासाच्चेत्यभ्या-सादुत्तरस्य हकारस्य घत्वं । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । तिङि चोदात्तवतीति गतेर्निघातः । यद्वृत्तयोगान्निघाताभावः । तन्यतुं । तनु विस्तारे । अस्माद्तन्यंजी-त्यादिना यतुच् । यद्वा स्तन शब्द इत्यस्माद्बहुलवचनाद्यतुच्प्रत्यये सकारलोपः ॥

सप्तमीमृचमाह ॥

ह्रदं न हि त्वा न्यृषंत्यूर्मयो ब्रह्माणींद्र तव यानि वर्धना ।
त्वष्टा चित्ते युज्यं वावृधे शवस्ततक्ष वज्रमभिभूत्योजसं ॥ ७ ॥

ह्रदं । न । हि । त्वा । नि ऽ ऋषंति । ऊर्मयः । ब्रह्माणि । इंद्र । तव । यानि । वर्धना ।
त्वष्टा । चित् । ते । युज्यं । ववृधे । शवः । ततक्ष । वज्रं । अभिभूति ऽ ओजसं ॥ ७ ॥

हे इंद्र यानि ब्रह्माणि स्तोत्रशस्त्ररूपाणि मंत्रजातानि तव वर्धना वर्धयितृणि तानि त्वा त्वां न्यृषंति हि । नितरां प्राप्नुवंत्येव । तत्र दृष्टांतः । ऊर्मयो जल-प्रवाहा ह्रदं न । यथा जलाशयं प्राप्नुवंति तद्वत् । त्वष्टा चित् स त्वष्टा देव एव ते तव युज्यं योग्यं शवो बलं वावृधे । प्रावर्धयत् । अपि च । अभिभूत्योजसं शत्रूणामभिभवितॄणामोजसा बलेन युक्तं वज्रं ततक्ष । तीक्ष्णीचकार ॥ न्यृषंति । ऋषी गतौ । तौदादिकः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः । हि चेति निघातप्रतिषेधः । ऊर्मयः । ऋ गतौ । ऋच्छंति गच्छंतीत्यूर्मयः । अर्ते-रूच्चेति मिप्रत्ययः । गुणे सत्यकारस्योकारादेशश्च । प्रत्ययस्वरः । वर्धना । वृधु वृद्धौ । वर्धत एभिरिति वर्धना । करणे ल्युट् । शेश्छंदसीति शेर्लोपः । ततक्ष । तक्षू त्वक्षू तनूकरणे । लिटि णलि लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं । पादादि-त्वान्निघाताभावः । अभिभूत्योजसं । अभिभूयतेऽनेनेत्यभिभूति । करणे क्तिन् । तादौ च नितीति गतेः प्रकृतिस्वरत्वं । अभिभूत्योजो यस्य । बहुव्रीहौ पूर्वपदप्र-कृतिस्वरत्वं ॥

अष्टमीमृचमाह ॥

जघन्वाँ उ हरिभिः संभृतक्रतविंद्र वृत्रं मनुषे गातुयन्नपः ।
अयच्छथा बाह्वोर्वज्रमायसमधारयो दिव्या सूर्यं दृशे ॥ ८ ॥

जघन्वान् । ऊं इति । हरिऽभिः । संभृतक्रतो इति संभृतऽक्रतो । इंद्र । वृत्रं । मनुषे । गातुऽयन् । अपः ।
अयच्छथाः । बाह्वोः । वज्रं । आयसं । अधारयः । दिवि । आ । सूर्यं । दृशे ॥ ८ ॥

हे संभृतक्रतो संपादितकर्मन् संपादितप्रज्ञ वेंद्र मनुषे जनाय गातुयन् गातुं मार्गमिच्छन् वृत्रं लोकानामावरकमसुरं हरिभिरश्वैर्युक्तस्त्वं जघन्वान् उ । हतवान् खलु । तदनंतरमपो वृष्ट्युदकानि प्रावर्तय इत्यध्याहारः । बाह्वोस्त्वदीययोर्हस्तयोरायसमयोमयं वज्रमयच्छथाः । अग्रहीः । आकारः समुच्चयार्थः । सूर्यं च दिवि द्युलोके दृशे द्रष्टुं सुर्वेषामस्माकं दर्शनायाधारयः । स्थापयां चकृषे ॥ जघन्वान् । हंतेर्लिटः क्वसुः । विभाषा गमहनविदविशामितीडागमस्य विकल्पोक्तेरभावः । गातुयन् । गातुमिच्छति । छंदसि परेच्छायामपीति क्यच् । न छंदस्यपुत्रस्येति दीर्घप्रतिषेधः । क्यजंताच्छतर्यदुपदेशाल्लसार्वधातुकानुदात्तत्वे क्यच एव स्वरः शिष्यते । बाह्वोः । उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं ॥

नवमीमृचमाह ॥

बृहत्स्वश्चंद्रममवद्यदुक्थ्य१मकृण्वत भियसा रोहणं दिवः ।
यन्मानुषप्रधना इंद्रमूतयः स्वर्नृषाचो मरुतोऽमदन्ननु ॥ ९ ॥

बृहत् । स्वऽचंद्रं । अमऽवत् । यत् । उक्थ्यं । अकृण्वत । भियसा । रोहणं । दिवः ।
यत् । मानुषऽप्रधनाः । इंद्रं । ऊतयः । स्वः । नृऽसाचः । मरुतः । अमदन् । अनु ॥ ९ ॥

बृहत् बृहत्साम स्तोतारो यजमाना भियसा वृत्रभयेन यद्यदोक्थ्यमुक्थार्हं स्तोत्रयोग्यमकृण्वत । अकुर्वन् । कीदृशं बृहत्साम । स्वश्चंद्रं । स्वकीयेन चंद्रेणाह्लादकेन तेजसा युक्तं । अमवत् । अमति शत्रून् रुजत्यनेनेत्यमो बलं । तद्युक्तं । दिवः स्वर्गस्य रोहणं । आरोहणहेतुभूतं । एवंविधेन स्तोत्रेण वृत्राद्भीता इंद्रमस्तोषतेत्यर्थः । यद्यदा मानुषप्रधनाः । प्रकीर्णान्यस्मिन्धनानि भवंतीति नैरुक्त-

व्युत्पत्त्या प्रधनमिति संग्रामनाम । मनुष्यहितसंग्रामा ऊतयः स्वर्द्युलोकस्य रक्षितारो मरुतो नृषाचः प्राणरूपेण नृन्सेवमाना भूत्वेंद्रमपि तेनैव रूपेणान्वमदन् । आनुपूर्व्येण हर्षं प्रापयन् । तदानीं स इंद्रो वृत्रवधं प्रत्युद्युक्तो बभूवेति शेषः ॥ स्वश्चंद्रं । स्वकीयं चंद्रं यस्य । हृस्वाच्चंद्रोत्तरपदे मंत्र इति सुट् । श्चुत्वेन शकारः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । भियसा । भीशब्दस्य तृतीयैकवचने छांदसोऽसुगागमः । तस्योदात्तत्वं च । नृषाचः । षच समवाये । अयं सेवनार्थ इति यास्कः । वहश्चेत्यत्र चशब्दस्यानुक्तसमुच्चयार्थत्वादस्मादपि ण्विप्रत्ययः । अमदन् । मदी हर्षे णिचि मदी हर्षग्लेपनयोरिति घटादिषु पाठान्मित्त्वे सति मितां हृस्व इति हृस्वत्वं । लङि छंदस्युभयथेति शप आर्द्धधातुकत्वात् णेरनिटीति णिलोपः ॥

दशमीमृचमाह ॥

द्यौश्चिदस्यामवाँ अहेः स्वनादयोयवीद्भियसा वज्र इंद्र ते ।
वृत्रस्य यद्बद्बधानस्य रोदसी मदे सुतस्य शवसाभिनच्छिरः ॥ १० ॥
द्यौः । चित् । अस्य । अमऽवान् । अहेः । स्वनात् । अयोयवीत् । भियसा । वज्रः । इंद्र । ते ।
वृत्रस्य । यत् । बद्बधानस्य । रोदसी इति । मदे । सुतस्य । शवसा । अभिनत् । शिरः ॥ १० ॥

अमवान्बलवान्द्यौश्चित् द्युलोकोऽप्यस्याहेर्वृत्रस्य स्वनाच्छब्दाद्भियसा भयेनायोयवीत् । अत्यर्थं पृथग्भूत आसीत् । अकंपतेत्यर्थः । हे इंद्र ते तव सुतस्याभिषवादिभिः संस्कृतस्य सोमस्य पानेन मदे हर्षे जाते सति त्वदीयो वज्रो रोदसी द्यावापृथिव्यौ बद्बधानस्य बाधनशीलस्य वृत्रस्य शिरो यद्यदा शवसा बलेनाभिनत् । अच्छिनत् । तदानीं द्युलोको भयराहित्येन निश्चलो बभूवेति शेषः ॥ अयोयवीत् । यु मिश्रणामिश्रणयोः । अस्माद्यङ्गंताल्लङि यङो वेत्यपृक्तप्रत्ययस्येडागमः । अडागम उदात्तः । बद्बधानस्य । बाधृ विलोडने । ताच्छीलिके चानशि बहुलं छंदसीति शपः श्लुः । हलादिशेषाभावो धातोर्हृस्वत्वं च छांदसत्वात् । चित इत्यंतोदात्तत्वं ॥

॥ इति प्रथमस्य चतुर्थे त्रयोदशो वर्गः ॥

एकादशीमृचमाह ॥

यदिन्न्विंद्र पृथिवी दशभुजिरहानि विश्वा ततनंत कृष्टयः ।
अत्राहं ते मघवन्विश्रुतं सहो द्यामनु शवसा बर्हणा भुवत् ॥ ११ ॥

यत् । इत् । नु । इंद्र । पृथिवी । दशऽभुजिः । अहानि । विश्वा । ततनंत । कृष्टयः ।
अत्र । अह । ते । मघऽवन् । विऽश्रुतं । सहः । द्यां । अनु । शवसा । बर्हणा । भुवत् ॥ ११ ॥

यदिन्नु यदा खलु पृथिवी दशभुजिर्दशगुणिता भवेत् । यदि वा कृष्टयः सर्वे मनुष्या विश्वा सर्वाण्यहानि ततनंत । विस्तारयेयुः । हे मघवन् । धनवन्निंद्र । अत्राह । अत्रैव पूर्वोक्तेष्वेव देशकालकर्तृकेषु ते त्वदीयं सहो वृत्रवधादिकारणं बलं विश्रुतं विख्यातं प्रसिद्धं । शवसा त्वदीयेन बलेन कृता बर्हणा वृत्रादेर्वधरूपा क्रिया द्यामनुभुवत् । अनुभवति । यथा द्यौर्महती तथा त्वत्कृतं वृत्रादेर्हिंसनमपि महदिति भावः ॥ ततनंत । तनु विस्तारे । स्वरितेत्त्वादात्मनेपदं । लिङर्थे लङ्प्रत्यये प्राप्ते व्यत्ययेन शप् । छांदसो द्विर्भावः । यद्वा बहुलं छंदसीत्युप्रत्ययस्य श्लौ सति पुनरपि व्यत्ययेन शप् । शपः पित्त्वादनुदात्तत्वं । तिङश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । यद्वृत्तयोगादनिघातः । विश्रुतं । श्रु श्रवणे । कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । बर्हणा । वर्ह वल्ह परिभाषणहिंसादानेषु । अस्मादौणादिकः क्युप्रत्ययः । बवयोरभेद इति वकारस्य बत्वं । प्रत्ययस्वरः । निबर्हयतीति वधकर्मसु पठितं च । भुवत् । भू सत्तायां । लेट्यडागमः । इतश्च लोप इतीकारलोपः । बहुलं छंदसीति शपो लुक् । भूसुवोस्तिङीति गुणप्रतिषेध उवङादेशः ॥

द्वादशीमृचमाह ॥

त्वमस्य पारे रजसो व्योमनः स्वभूत्योजा अवसे धृषन्मनः ।
चकृषे भूमिं प्रतिमानमोजसोऽपः स्वः परिभूरेष्या दिवं ॥ १२ ॥

त्वं । अस्य । पारे । रजसः । विऽओमनः । स्वभूतिऽओजाः । अवसे । धृषत्ऽमनः ।
चकृषे । भूमिं । प्रतिऽमानं । ओजसः । अपः । स्व१रिति स्वः । परिऽभूः । एषि ।
आ । दिवं ॥ १२ ॥

हे धृषन्मनः शत्रूणां धर्षकमनोयुक्तेंद्र। अस्यास्माभिः परिदृश्यमानस्य व्योमनो व्याप्तस्यांतरिक्षस्य रजसो लोकस्य पार उपरिप्रदेशे वर्तमानः स्वभूत्योजाः स्वभूतबलस्त्वमवसेऽस्मद्रक्षणार्थं भूमिं भूलोकं चकृषे। कृतवानसि। किंच। ओजसो बलवतां बलस्य प्रतिमानं प्रतिनिधिरभूः। तथा स्वः सुष्ठुरणीयं गंतव्यं। आप इत्यंतरिक्षनाम। अपोऽंतरिक्षलोकं। आ दिवं द्युलोकं च परिभूः परिग्रहीता। परिपूर्वो भवतिः परिग्रहणार्थः। एषि। प्राप्नोषि ॥ अस्य। ऊडिदमिति विभक्तेरुदात्तत्वं। व्योमनः। अवतिर्गत्यर्थः। अव रक्षणगतिकांतीत्यभिधानात्। विशेषेण गच्छति व्याप्नोतीति व्योम। यद्वा वृष्टिप्रदानेन विशेषेण प्राणिनोऽवति रक्षतीति व्योम। अन्येभ्योऽपि दृश्यंत इति मनिन्। ज्वरत्वरेत्यादिनोपधाया वकारस्य चोट्। गुणः। दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं। यद्वा भावे मनिन्। विविधमोम रक्षणं यस्मिन्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। यणादेश उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं। स्वः। सुपूर्वादर्तेरन्येभ्योऽपि दृश्यंत इति विच्। अव्ययादाप्सुपः। पा॰ २. ४. ८२.। इति सुपो लुक्। न्यङ्स्वरौ स्वरिताविति स्वरितत्वं ॥

भूनाम्न्येकाहे मरुत्वतीयशस्त्रे निविद्धानीयात्सूक्तात्पुरा त्वं भुवः प्रतिमानमित्येषा शंसनीया। तथैवासूत्रयत्। शस्यमुक्तं बृहस्पतिसवेन त्वं भुवः प्रतिमानं पृथिव्याः। आ॰ ९. ५.। इति ॥ तामेतां सूक्ते त्रयोदशीमृचमाह ॥

त्वं भुवः प्रतिमानं पृथिव्या ऋष्ववीरस्य बृहतः पतिर्भूः।
विश्वमाप्रा अंतरिक्षं महित्वा सत्यमद्धा नकिरन्यस्त्वावान् ॥ १३ ॥

त्वं। भुवः। प्रतिऽमानं। पृथिव्याः। ऋष्वऽवीरस्य। बृहतः। पतिः। भूः।
विश्वं। आ। अप्राः। अंतरिक्षं। महिऽत्वा। सत्यं। अद्धा। नकिः। अन्यः।
त्वाऽवान् ॥ १३ ॥

हे इंद्र त्वं पृथिव्याः प्रथिताया विस्तीर्णाया भूमेः प्रतिमानं भुवः। प्रतिनिधिर्भवसि। यथा भूर्लोको महानचिंत्यशक्तिः। एवं त्वमपीत्यर्थः। तथा ऋष्ववीरस्य। वीरयंति विक्रांता भवंतीति वीरा देवाः। ऋष्वा दर्शनीया वीरा यस्य स तथोक्तः। तस्य बृहतो बृंहितस्य प्रवृद्धस्य स्वर्गलोकस्य पतिर्भूः। पालयितासि। तथांतरिक्षमंतरिक्षांतं द्यावापृथिव्योर्मध्ये वर्तमानमाकाशं विश्वं

सर्वमपि महित्वा महत्त्वेन सत्यमाप्राः । निश्चयेन आ समंतादपूरयः । अतस्त्वावान् त्वत्सदृशोऽन्यः कश्चिन्नकिरस्ति । नास्तीति । यदेतत्तदद्धा सत्यमेव ॥ भुवः । भवतेर्लेटि सिप्यडागमः । उवङादेशः । पृथिव्या । उदात्तयणो हल्पूर्वादिति विभक्तिरुदात्ता । बृहतः । बृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वं । भूः । छांदसे वर्तमाने लुङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । अप्राः । प्रा पूरणे । आदादिकः । लङ्यडागमः । महित्वा । सुपां सुलुगिति तृतीयाया डादेशः । त्वावान् । वतुप्प्रकरणे युष्मदस्मद्भ्यां छंदसि सादृश्य उपसंख्यानमिति सादृश्यार्थे वतुप् । प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः । आ सर्वनाम्न इत्यात्वं । प्रत्ययस्य पित्त्वादनुदात्तत्वे प्रातिपदिकस्वर एव शिष्यते ॥

चतुर्दशीमृचमाह ॥

न यस्य॒ द्यावा॑पृथि॒वी अनु॒ व्यचो॒ न सिंध॑वो॒ रज॑सो॒ अंत॑मान॒शुः ।
नोत स्ववृ॑ष्टिं॒ मदे॒ अस्य॒ युध्य॑त॒ एको॑ अ॒न्यच्च॑कृ॒षे विश्व॑मानु॒षक् ॥ १४ ॥

न । यस्य॑ । द्यावा॑पृथि॒वी इति॑ । अनु॑ । व्यचः॑ । न । सिंध॑वः । रज॑सः । अंत॑म् । आ॒न॒शुः ।
न । उ॒त । स्वऽवृ॑ष्टिं । मदे॑ । अ॒स्य॒ । युध्य॑तः । एकः॑ । अ॒न्यत् । च॒कृ॒षे । विश्व॑म् ।
आ॒नु॒षक् ॥ १४ ॥

यस्येंद्रस्य व्यचो व्यापनं द्यावापृथिवी द्यावापृथिव्यौ नान्वानशाते । प्राप्तुमसमर्थे बभूवतुः । तथा रजसोऽतरिक्षलोकस्योपरि सिंधवः स्यंदनशीला आपो यस्येंद्रस्य तेजसोऽतमवसानं नानशुः । न प्रापुः । उत अपि च सोमपानेन मदे हर्षे सति स्ववृष्टिं स्वीकृतवृष्टिं वृत्रादिं युध्यतो युध्यमानस्यास्येंद्रस्य बलस्यांतं वृत्रादयो न प्रापुः । अतो हे इंद्र एकस्त्वमन्यत्स्वव्यतिरिक्तं विश्वं सर्वं भूतजातमानुषक् अनुषक्तं चकृषे । सकलमपि भूतजातं त्वदधीनमभूदिति भावः ॥ द्यावापृथिवी । द्यौश्च पृथिवी च दिवो द्यावेति द्यावादेश आद्युदात्तो निपातितः । पृथिवीशब्दः षिद्गौरादिभ्यश्चेति ङीषंतोऽतोदात्तः । देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं । अपृथिवीरुद्रपूषमंथिष्विति पर्युदासान्नोत्तरपदेऽनुदात्तादाविति निषेधाभावः । व्यचः । व्यचेः कुटादित्वमनसीति वचनात् ङित्त्वाभावे संप्रसारणाभावः । आनशुः । अश्नोतेर्व्यत्ययेन परस्मैपदं । अत आदेरित्यभ्या-

सस्यात्वं। अश्नोतेश्चेति नुडागमः। आनुषक्। अनुपूर्वात् षंज संग इत्यस्मात् क्विप्यनिदितामिति नलोपः। अनोरकारस्य दीर्घश्छांदसः ॥

पंचदशीमृचमाह ॥

आर्चन्नत्र मरुतः सस्मिन्नाजौ विश्वे देवासो अमदन्ननु त्वा।
वृत्रस्य यद्भृष्टिमता वधेन नि त्वमिंद्र प्रत्यानं जघंथ ॥ १५ ॥

आर्चन्। अत्र। मरुतः। सस्मिन्। आजौ। विश्वे। देवासः। अमदन्। अनु। त्वा।
वृत्रस्य। यत्। भृष्टिऽमता। वधेन। नि। त्वं। इंद्र। प्रति। आनं। जघंथ ॥ १५ ॥

हे इंद्र त्वां मरुतोऽत्रास्मिन्संग्राम आर्चन्। प्रहर भगवो जहि वीरयस्वेत्यनेन वचनेनापूजयन्। सस्मिन्तस्मिन् यद्वा सर्वस्मिन्नाजौ संग्रामे विश्वे देवासस्ते सर्वे दानादिगुणयुक्ता मरुतस्त्वा त्वामन्वमदन्। अनुक्रमेण हर्षं प्रापयन्। यद्वा त्वदीयमदानंतरं तेऽपि मदं प्राप्ताः। हे इंद्र त्वं यद्यदा भृष्टिमता। भ्रंशयति शत्रूनिति भृष्टिरश्रिः। तद्वता वधेन हननसाधनेन वज्रेण। अश्रिमत्वं च वज्रस्य ब्राह्मणे समाम्नातं। वज्रो वा एष यद्यूपः सोऽष्टाश्रिः कर्तव्योऽष्टाश्रिर्वै वज्र इति। तेन वज्रेण वृत्रस्यानं प्रति। आननं मुखं प्रति। यद्वा श्वासहेतुं प्राणं प्रति निजघंथ। नितरां प्राहार्षीः ॥ आर्चन्। अर्च पूजायां। भौवादिकः। आडागम उदात्तः। सस्मिन्। तदोः सः सौ। पा० ७.२.१०६.। इति विधीयमानं सत्वं व्यत्ययेन सप्तम्यामपि द्रष्टव्यं। यद्वा सर्वस्मिन्नित्यत्र वर्णलोपो द्रष्टव्यः। देवासः। आज्जसेरसुक्। आनं। आननं। वर्णलोपश्छांदसः। यद्वा अन प्राणने। अन्यतेऽनेनेत्यानं प्राणं। करणे घञ्। कर्षात्वत इत्यंतोदात्तत्वं। जघंथ। हन हिंसागत्योः। थल्युपदेशेऽत्वत इतीट्प्रतिषेधः। अभ्यासाच्चेत्यभ्यासादुत्तरस्य हकारस्य घत्वं। लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं ॥

॥ इति प्रथमस्य चतुर्थे चतुर्दशो वर्गः ॥

न्यू ष्वित्येकादशर्चं तृतीयं सूक्तं। दशम्येकादश्यौ त्रिष्टुभौ। शिष्टा नव जगत्यः। सव्य ऋषिः। इंद्रो देवता। तथा चानुक्रांतं। न्यू ष्वेकादशांत्ये त्रिष्टुभाविति ॥ अतिरात्रे प्रथमे पर्याये ब्राह्मणाच्छंसिनः शस्त्र एतत्सूक्तं। तथा चासूत्रयदाचार्यः। न्यू षु वाचमप्सु धूतस्य हरिवः पिबेहेति याज्या। आ० ६.४.। इति ॥

तत्र प्रथमामृचमाह ॥

न्यू३ षु वाचं प्र महे भरामहे गिर इंद्राय सदने विवस्वतः ।
नू चिद्धि रत्नं ससतामिवाविदन्न दुष्टुतिर्द्रविणोदेषु शस्यते ॥ १ ॥

नि । ऊं इति । सु । वाचं । प्र । महे । भरामहे । गिरः । इंद्राय । सदने । विवस्वतः ।
नु । चित् । हि । रत्नं । ससतांऽइव । अविदत् । न । दुःऽस्तुतिः । द्रविणःऽदेषु ।
शस्यते ॥ १ ॥

महे महत इंद्राय सु वाचं शोभनां स्तुतिं निप्रभरामहे । नितरां प्रयुंज्महे । ऊ इति पादपूरणः । यतो विवस्वतः परिचरतो यजमानस्य सदने यज्ञगृह इंद्राय गिरः स्तुतयः क्रियंते । हि यस्मात्स इंद्रो नू चित् क्षिप्रमेव रत्नं रमणीयमसुराणां धनमविदत् । विंदति । तत्र दृष्टांतः । ससतामिव । यथा स्वपतां पुरुषाणां धनं चोरः क्षिप्रं लभते तद्वत् । अतोऽस्मभ्यं धनं दातुं शक्त इति भावः । द्रविणोदेषु धनस्य दातृषु पुरुषेषु दुष्टुतिरसमीचीना स्तुतिर्न शस्यते । नाभिधीयते । अतः सुवाचं प्रभरामह इति पूर्वेण संबंधः ॥ न्यू षु इत्यस्योदात्तस्वरितयोर्यण इति स्वरितत्वं । तच्चोदात्तपरत्वात्संहितायां कंप्यते । इकः सुञीति दीर्घत्वं । सुञ इति षत्वं । महे । मह पूजायामित्यस्मात् क्विप् चेति क्विप् । सावेकाच इति विभक्तेरुदात्तत्वं । यद्वा महच्छब्दस्याच्छब्दलोपश्छांदसः । नू चित् । ऋचि तुनुघेत्यादिना दीर्घः । ससतामिव । षस स्वप्ने । अस्माच्छत्रंतादंतोदात्तात्परस्या विभक्तेः शतुरनुम इत्युदात्तत्वं । इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेति समासः । अविदत् । विद्लृ लाभे । छंदसि लुङ्लङ्लिट इति वर्तमाने लुङि पुषादिद्युताद्लृदित इति च्लेरङादेशः । अडागम उदात्तः । हि चेति निघातप्रतिषेधः । द्रविणोदेषु । द्रविणानि धनानि ददातीति द्रविणोदाः । द्रु गताविसस्मात् द्रुदक्षिभ्यामिनन्निितीननप्रत्ययांतो द्रविणशब्दः । तस्मिन्कर्मण्युपपद आतोऽनुपसर्गे क इति कः । पूर्वपदस्य सुगागमश्छांदसः । कृदुत्तरपदप्रकृतिस्वरत्वं । शस्यते । शंसु स्तुतौ । यक्यनिदितामिति नलोपः ॥

द्वितीयामृचमाह ॥

दुरो अश्वस्य दुर इंद्र गोरसि दुरो यवस्य वसुन इनस्पतिः ।
शिक्षानरः प्रदिवो अकामकर्शनः सखा सखिभ्यस्तमिदं गृणीमसि ॥ २ ॥

दुरः। अश्वस्य। दुरः। इंद्र। गोः। असि। दुरः। यवस्य। वसुनः। इनः। पतिः।
शिक्षाऽनरः। प्रऽदिवः। अकामऽकर्शनः। सखा। सखिऽभ्यः। तं। इदं।
गृणीमसि ॥ २ ॥

हे इंद्र त्वमश्वस्य दुरो दातासि। तथा गोः पश्वादेर्दुरो दातासि। तथा यवस्य यवादेर्धान्यजातस्य दुरो दातासि। वसुनो निवासहेतोर्धनस्येनः स्वामी पतिः सर्वेषां पालयिता। शिक्षानरः। शिक्षतिर्दानकर्मा। शिक्षाया दानस्य नेतासि। प्रदिवः पुराणः। प्रगता दिवो दिवसा यस्मिन्स तथोक्तः। अकामकर्शनः। कामान्कर्शयति नाशयतीति कामकर्शनः। न कामकर्शनोऽकामकर्शनः। अव्ययपूर्वपदप्रकृतिस्वरत्वं। हविर्दत्तवतां यजमानानां कामानभिमतफलप्रदानेन पूरयतीत्यर्थः। सखिभ्यः समानख्यानेभ्य ऋत्विग्भ्यः सखा सखिवदत्यंतं प्रियः। एवंभूतो य इंद्रस्तं प्रतीदं स्तोत्रलक्षणं वचो गृणीमसि। ब्रूमहे ॥ दुरः। डुदाञ् दाने। मंदिवाशिमथिचतिचंक्यंकिभ्य उरच्। उ॰ १. ३८.। इति विधीयमान उरच्प्रत्ययो बहुलवचनादस्मादपि भवति। अत एवाकारलोपः। शिक्षानरः। शिक्ष विद्योपादाने। गुरोश्च हलः। पा॰ ३.३.१०३.। इत्यकारप्रत्ययः। ततष्टाप्। षष्ठीसमासः। समासस्येत्यंतोदात्तत्वं। गृणीमसि। गॄ शब्दे। क्र्यादिकः। प्वादीनां ह्रस्व इति ह्रस्वत्वं। इदंतो मसिरिति मसेरिकारः ॥

तृतीयामृचमाह ॥

शचीव इंद्र पुरुकृद्द्युमत्तम तवेदिदमभितश्चेकिते वसु।
अतः संगृभ्याभिभूत आ भर मा त्वायतो जरितुः काममूनयीः ॥ ३ ॥
शचीऽवः। इंद्र। पुरुऽकृत्। द्युमत्ऽतम। तव। इत्। इदं। अभितः। चेकिते। वसु।
अतः। संऽगृभ्य। अभिऽभूते। आ। भर। मा। त्वाऽयतः। जरितुः। कामं। ऊनयीः ॥३॥

शचीवः। शचीति प्रज्ञानाम। हे इंद्र शचीवः प्रज्ञावन् पुरुकृत् प्रभूतस्य वृत्रवधादेः कर्तः। द्युमत्तम। अतिशयेन दीप्तिमन्। अभितः सर्वत्र वर्तमानं वसु धनं यदस्ति तदिदं तवेत्। तवैव स्वभूतमिति चेकिते। भृशमस्माभिर्ज्ञायते। अतः कारणाद्धनं संगृभ्य सम्यक् गृहीत्वाभिभूते शत्रूणामभिभवितः। आभर। अस्मभ्यमाहर। देहीत्यर्थः। त्वायतस्त्वामात्मन इच्छतो जरितुः स्तोतुः कामम-

भिलाषं मोनयीः । परिहीनं मा कार्षीः । पूरयेत्यर्थः ॥ शचीवः । मतुवसो रुरिति रुत्वं । षाष्ठिकमामंत्रिताद्युदात्तत्वं । इतरेष्वाष्टमिकं सर्वानुदात्तत्वं । न चामंत्रितं पूर्वमविद्यमानवदित्यविद्यमानवत्त्वं । नामंत्रिते समानाधिकरण इति निषेधात् । चेकिते । कित ज्ञाने । अस्माद्यङंताद्वर्तमाने लिट्यमंत्रे । पा० ३. १. ३५. । इति निषेधादाम्प्रत्ययाभावे सति लिट आर्द्धधातुकत्वादतोलोपयलोपौ । संगृभ्य आभरेत्युभयत्र हृग्रहोर्भश्छंदसीति भत्वं । त्वायतः । त्वामात्मन इच्छति । सुप आत्मनः क्यच् । प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः । छांदसमात्वं । क्यजंताल्लटः शतृ । तस्यादुपदेशाल्लसार्वधातुकस्वरेणानुदात्तस्यैकादेशस्वरेणोदात्तत्वं । एकादेशस्वरोऽंतरंगः सिद्धो भवतीति वक्तव्यं । पा० ८. २. ६. १. । इति वचनात्तस्य सिद्धत्वे सति शतुरनुम इत्यजादिविभक्तेरुदात्तत्वं । कामं । कमु कांतावित्यस्माद्भावे घञ् । कर्षात्वत इत्यंतोदात्तत्वे प्राप्ते वृषादिषु पाठादाद्युदात्तत्वं । ऊनयीः । ऊन परिहाणे । चुरादिः । लुङि णिश्रिद्रुस्रुभ्यः । पा० ३. १. ४८. । इति च्लेश्चङादेशस्य नोनयतिध्वनयतीत्यादिना । पा० ३. १. ५१. । प्रतिषेधः । ह्म्यंतक्षणेति सिचि वृद्धिप्रतिषेधः ॥

चतुर्थीमृचमाह ॥

एभिर्द्युभिः सुमना एभिरिंदुभिर्निरुंधानो अमतिं गोभिरश्विना ।
इंद्रेण दस्युं दरयंत इंदुभिर्युतद्वेषसः समिषा रभेमहि ॥ ४ ॥

एभिः । द्युऽभिः । सुऽमनाः । एभिः । इंदुऽभिः । निऽरुंधानः । अमतिं । गोभिः । अश्विना । इंद्रेण । दस्युं । दरयंतः । इंदुऽभिः । युतऽद्वेषसः । सं । इषा । रभेमहि ॥ ४ ॥

हे इंद्र । एभिरस्माभिर्दत्तैर्द्युभिर्दीप्तैश्चरुपुरोडाशादिभिः । एभिरिंदुभिः पुरोवर्तिभिस्तुभ्यं दत्तैः सोमैश्च प्रीतस्त्वमस्माकममतिं दारिद्र्यं गोभिस्त्वया दत्तैः पशुभिरश्विनाश्वयुक्तेन धनेन च निरुंधानो निवर्तयन्सुमनाः शोभनमना भव । वयमिंदुभिरस्माभिर्दत्तैः सोमैः प्रीतेनेंद्रेण दस्युमुपक्षपयितारं शत्रुं दरयंतो हिंसंतोऽत एव युतद्वेषसः पृथग्भूतशत्रुका भूत्वेषंद्रदत्तेनान्नेन संरभेमहि । संरब्धा भवेम । संगच्छेमहीत्यर्थः ॥ सुमनाः । शोभनं मनो यस्य । सौर्मनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वं । निरुंधानः । रुधिर् आवरणे । स्वरितेत्त्वादात्मनेपदं । श्नसोरल्लोप इत्यकारलोपः । चित इत्यंतोदात्तत्वं । कृदुत्तरपदप्रकृतिस्वरत्वं । अमतिं । मंतव्यमि-

त्यैश्वर्ये । न मतिरमतिः । अव्ययपूर्वपदप्रकृतिस्वरत्वं । न लोकाव्ययेति षष्ठीप्रतिषेधः । अश्विना । अश्वोऽस्यास्तीत्यश्वि धनं । मत्वर्थीय इनिः ॥

पंचमीमृचमाह ॥

समिंद्र राया समिषा रभेमहि सं वाजेभिः पुरुश्चंद्रैरभिद्युभिः ।
सं देव्या प्रमत्या वीरशुष्मया गोअग्रयाश्वावत्या रभेमहि ॥ ५ ॥

सं । इंद्र । राया । सं । इषा । रभेमहि । सं । वाजेभिः । पुरुऽचंद्रैः । अभिद्युऽभिः ।
सं । देव्या । प्रऽमत्या । वीरऽशुष्मया । गोऽअग्रया । अश्वऽवत्या । रभेमहि ॥ ५ ॥

हे इंद्र राया धनेन वयं संरभेमहि । संगच्छेमहि । तथेषान्नेन संरभेमहि । तथा वाजेभिर्बलैः संरभेमहि । कीदृशैर्वाजैः । पुरुश्चंद्रैः । पुरूणां बहूनामाह्लादकैः । अभिद्युभिः । अभितो दीप्यमानैः । किंच देव्या द्योतमानया प्रमत्या त्वदीयया प्रकृष्टबुद्ध्या संरभेमहि । कीदृश्या । वीरशुष्मया । वीरं विशेषेण शत्रूणां क्षेपणसमर्थं शुष्मं बलं यस्याः सा तथोक्ता । गोअग्रया । स्तोतृभ्यो दानार्थमग्रे प्रमुखत एव गावो यस्याः सा । अश्वावत्या । अश्वैरुपेतया ॥ राया । ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । पुरुश्चंद्रैः । ह्रस्वाच्चंद्रोत्तरपदे मंत्र इति सुट् । श्चुत्वेन शकारः । समासस्वरः । अभिद्युभिः । अभिगता द्यौर्दीप्तिर्येषां । अत्र दिवशब्दो दीप्तिं लक्षयति । अव्ययपूर्वपदप्रकृतिस्वरत्वं । देव्या । उदात्तयण इति विभक्तेरुदात्तत्वं । प्रमत्या । तादौ च नितीति गतेः प्रकृतिस्वरत्वं । उत्तरयोर्बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । सर्वत्र विभाषा गोः । पा० ६. १. १२२. । इति गोअग्रयेत्यत्र प्रकृतिभावः । अश्वावत्या । मंत्रे सोमाश्वेंद्रियेति मतुपि दीर्घत्वं ॥

॥ इति प्रथमस्य चतुर्थे पंचदशो वर्गः ॥

षष्ठीमृचमाह ॥

ते त्वा मदा अमदन्तानि वृष्ण्या ते सोमासो वृत्रहत्येषु सत्पते ।
यत्कारवे दश वृत्राण्यप्रति बर्हिष्मते नि सहस्राणि बर्हयः ॥ ६ ॥

ते । त्वा । मदाः । अमदन् । तानि । वृष्ण्या । ते । सोमासः । वृत्रऽहत्येषु । सत्ऽपते ।
यत् । कारवे । दश । वृत्राणि । अप्रति । बर्हिष्मते । नि । सहस्राणि । बर्हयः ॥ ६ ॥

हे सत्पते सतां पालयितरिंद्र वृत्रहत्येषु वृत्रहननेषु निमित्तभूतेषु सत्सु ते पूर्वोक्ता मदा मादका मरुतस्त्वा त्वाममदन्। अमदयन्। हर्षं प्रापयन्। तानि पूर्वोक्तानि वृष्ण्या वृष्णः सेचनसमर्थस्य तव संबंधीनि चरुपुरोडाशादीनि हवींषि त्वाममदन्। ते सोमासः प्रसिद्धाः सोमाश्च त्वाममदन्। यत् यदा कारवे स्तुतिकर्त्रे बर्हिष्मते यज्ञवते यजमानाय दश सहस्राण्यपरिमितानि वृत्राण्यावरकाण्युपद्रवजातान्यप्रति शत्रुभिरप्रतिगतस्त्वं निबर्हयः। अवधीः। तदानीमिति पूर्वेण संबंधः॥ वृष्ण्या। शेश्छंदसि बहुलमिति शेर्लोपः। बर्हयः। बर्हयतिर्हिंसाकर्मा। लङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। शपः पित्त्वादनुदात्तत्वे णिच एव स्वरः शिष्यते। यद्वृत्तयोगादनिघातः॥

सप्तमीमृचमाह॥

युधा युधमुप घेदेषि धृष्णुया पुरा पुरं समिदं हंस्योजसा।
नम्या यदिंद्र सख्या परावति निबर्हयो नमुचिं नाम मायिनं॥ ७॥

युधा। युधं। उप। घ। इत्। एषि। धृष्णुऽया। पुरा। पुरं। सं। इदं। हंसि। ओजसा।
नम्या। यत्। इंद्र। सख्या। पराऽवति। निऽबर्हयः। नमुचिं। नाम। मायिनं॥ ७॥

हे इंद्र धृष्णुया शत्रूणां धर्षकस्त्वं युधा युद्धेन संबद्धं युधं युद्धमुप घेदेषि। उपैव गच्छसि। सर्वदा युद्धशीलो भवसीत्यर्थः। घेति पादपूरणः। शत्रूणामसुराणां पुरा पुरेण नगरेण सहेदं पुरोवर्ति पुरं शत्रुनगरमोजसा बलेन संहंसि। सम्यग्विनाशयसि। शत्रूणां पुराण्यभांक्षीरित्यर्थः। हे इंद्र त्वं नम्या शत्रुषु नमनशीलेन सख्या सहायभूतेन वज्रेण परावति दूरदेशे नमुचिं नामानया संज्ञया प्रसिद्धं मायिनं मायाविनमसुरं यद्यस्मान्निबर्हयः। नितरामहिंसीः। अतस्त्वमेवं स्तूयस इत्यर्थः॥ युधा। युध संप्रहारे। संपदादिलक्षणो भावे क्विप्। सावेकाच इति विभक्तेरुदात्तत्वं। एषि। इण् गतौ। अदादित्वाच्छपो लुक्। धृष्णुया। ञिधृषा प्रागल्भ्ये। त्रसिगृधिधृषिक्षिपेः क्नुरिति क्नुप्रत्ययः। कित्त्वाद्गुणाभावः। सुपां सुलुगिति सोर्याजादेशः। चित इत्यंतोदात्तत्वं। पुरा। पॄ पालनपूरणयोः। पूरयति राज्ञामभिमतानीति। क्विप् चेति क्विप्। उदोष्ठ्यपूर्वस्येत्युत्वं। सावेकाच इति विभक्तिरुदात्ता। हंसि। हंतेर्लटि सिप्यदादित्वाच्छपो लुकि नश्चापदांतस्य झलीत्यनुस्वारः। नम्या। णम प्रह्वत्वे। औणादिक इन्प्रत्ययः।

सुपां सुलुगिति तृतीयाया आदेशः। टिलोपः। सख्या। शेषो घ्यसखि। पा॰ १.४.७.। इति घिसंज्ञाप्रतिषेधान्नाभावाभावे यणादेशः। नमुचिं। इंद्रेण सह युद्धं न मुंचतीति नमुचिः। औणादिकः किप्रत्ययः। नभ्राण्नपादित्यादिना नञः प्रकृतिभावः। नञ् न गतिर्न च कारकमिति कृदुत्तरपदप्रकृतिस्वरत्वाभावेऽव्ययपूर्वपदप्रकृतिस्वरत्वं। मायिनं। मायाशब्दस्य व्रीह्यादिषु पाठात् मत्वर्थीय इनिः॥

अष्टमीमृचमाह॥

त्वं करंजमुत पर्णयं वधीस्तेजिष्ठयातिथिग्वस्य वर्तनी।

त्वं शता वंगृदस्याभिनत्पुरोऽनानुदः परिषूता ऋजिश्वना॥ ८॥

त्वं। करंजं। उत। पर्णयं। वधीः। तेजिष्ठया। अतिथिऽग्वस्य। वर्तनी।

त्वं। शता। वंगृदस्य। अभिनत्। पुरः। अननुऽदः। परिऽसूताः। ऋजिश्वना॥ ८॥

हे इंद्र त्वं करंजमेतत्संज्ञकमसुरं। उत अपि च पर्णयमेतन्नामानमसुरं चातिथिग्वस्यैतत्संज्ञस्य राज्ञः प्रयोजनाय तेजिष्ठयातिशयेन तेजस्विन्या वर्तनी वर्तन्या शत्रुप्रेरणकुशलया शक्त्यावधीः। हतवानसि। तथानानुदः। अनु पश्चाद्द्यति खंडयतीत्यनुदोऽनुचरः। तादृशोऽनुचररहित एक एव त्वमृजिश्वनैतत्संज्ञकेन राज्ञा परिषूताः परितोऽवष्टब्धाः शता शतानि शतसंख्याका वंगृदस्यैतत्संज्ञकस्यासुरस्य पुरः पुराणि नगराण्यभिनत्। विभिदिषे॥ वधीः। हंतेर्लुङि सिपि लुङि चेति वधादेशः। तस्यादंतत्वाद्वृद्ध्यभावः। पा॰ ७. ३. ३५.। अत एवानेकाच्त्वादिट्प्रतिषेधाभावः। पा॰ ७.२.१०.। इट ईटीति सिचो लोपः। तेजिष्ठया। तेजस्शब्दादस्मायामेधेति मत्वर्थीयो विनिः। तस्मादातिशायनिक इष्ठनि विन्मतोर्लुगिति विनो लुक्। टेरिति टिलोपः। नित्त्वादाद्युदात्तत्वं। वर्तनी। वृत्यते प्रेर्यतेऽनयेति वर्तनी। करणे ल्युट्। टित्त्वात्। पा॰ ४.१.१५.। ङीप्। सुपां सुलुगिति विभक्तेः पूर्वसवर्णदीर्घत्वं। व्यत्ययेनांतोदात्तत्वं। अभिनत्। भिदिर् विदारणे। लङि सिपि रुधादित्वात् श्नम्। इतश्चेतीकारलोपः। हल्ङ्याब्भ्य इति सकारलोपः। अनानुदः। दो अवखंडने। आदेच इत्यात्वं। आतश्चोपसर्ग इति कप्रत्ययः। नास्त्यनुदोऽस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। संहितायां दीर्घश्छांदसः। परिषूताः। षू प्रेरणे। कर्मणि निष्ठा। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं॥

नवमीमृचमाह ॥

त्वमेताञ्जनराज्ञो द्विर्दशाबंधुना सुश्रवसोपजग्मुषः ।
षष्टिं सहस्रा नवतिं नव श्रुतो नि चक्रेण रथ्या दुष्पदावृणक् ॥ ९ ॥

त्वं । एतान् । जनऽराज्ञः । द्विः । दश । अबंधुना । सुऽश्रवसा । उपऽजग्मुषः ।
षष्टिं । सहस्रा । नवतिं । नव । श्रुतः । नि । चक्रेण । रथ्या । दुःऽपदा । अवृणक् ॥ ९ ॥

हे इंद्र श्रुतो विश्रुतः प्रख्यातस्त्वं द्विर्दश विंशतिसंख्याकानबंधुना सहायरहितेन सुश्रवसैतत्संज्ञकेन राज्ञा युद्धार्थमुपजग्मुष उपगतवत एतानेवंविधान् जनराज्ञो जनपदानामधिपतीन्। षष्टिमित्यादिना तेषां राज्ञामनुचरसंख्योच्यते। षष्टिं सहस्रा । सहस्राणां षष्टिं नवतिं नव नवसंख्योत्तरां नवतिं । तान्राज्ञ ईदृक्संख्याकाननुचरांश्च रथ्या रथसंबंधिना दुष्पदा दुष्प्रपदनेन । शत्रुभिः प्राप्तुमशक्येनेत्यर्थः । ईदृशेन चक्रेण न्यवृणक् । न्यवर्जयः । त्वां स्तुतवतः सुश्रवसो जयार्थं त्वमागत्य तदीयान् शत्रूनजैषीरित्यर्थः ॥ जनराज्ञः । समासांतविधेरनित्यत्वाट्टच्प्रत्ययाभावः । पा॰ ५. ४. ९१. । राजन्शब्दो राजृ दीप्तावित्यस्मात्कनिन्प्रत्ययांत आद्युदात्तः । कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । अबंधुना । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । सुश्रवसा । शोभनं श्रवोऽन्नं यस्य । आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं । उपजग्मुषः । गमेर्लिटः क्वसुः । शसि भसंज्ञायां वसोः संप्रसारणमिति संप्रसारणं । परपूर्वत्वं । गमहनेत्यादिनोपधालोपः । शासिवसिघसीनां चेति षत्वं । कृदुत्तरपदप्रकृतिस्वरत्वेन क्वसोरेव स्वरः शिष्यते । रथ्या । रथस्येदं रथ्यं । रथाद्यत् । पा॰ ४. ३. १२१. । इति यत् । यतोऽनाव इत्याद्युदात्तत्वं। सुपां सुलुगिति विभक्तेराकारः । दुष्पदा । पद गतौ । ईषद्दुःसुष्विति खल् । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । पूर्ववद्विभक्तेराकारः । अवृणक् । वृजी वर्जने । रौधादिकः । लङि मध्यमैकवचने हल्ङ्याब्भ्य इति सिपो लोपः । चोः कुरिति कुत्वं ॥

दशमीमृचमाह ॥

त्वमाविथ सुश्रवसं तवोतिभिस्तव त्रामभिरिंद्र तूर्वयाणं ।
त्वमस्मै कुत्समतिथिग्वमायुं महे राज्ञे यूने अरंधनायः ॥ १० ॥

त्वं। आविथ। सुऽश्रवसं। तव। ऊतिऽभिः। तव। त्रामऽभिः। इंद्र। तूर्वयाणं।
त्वं। अस्मै। कुत्सं। अतिथिऽग्वं। आयुं। महे। राज्ञे। यूने। अरंधनायः ॥१०॥

हे इंद्र त्वं तवोतिभिस्त्वदीयैः पालनैः सुश्रवसं पूर्वोक्तं राजानमाविथ। ररक्षिथ। तथा तूर्वयाणमेतन्नामानं राजानं तव त्रामभिस्त्वदीयैस्त्रायकैः पालकैर्बलैराविथेति शेषः। किंच त्वं महे महते यूने तरुणायास्मै सुश्रवसे कुत्सादींस्त्रीन्राज्ञोऽरंधनायः। वशमनयः। रध्यतिर्वशगमन इति यास्कः ॥ त्रामभिः। त्रैङ् पालने। आदेच इत्यात्वं। आतो मनिन्निति मनिन्। नित्त्वादाद्युदात्तत्वं। अरंधनायः। रंधनं वशीकरणं करोति रंधनयति। तत्करोतीति णिच्। इष्ठवण्णौ प्रातिपदिकस्येतीष्ठवद्भावाट्टिलोपः। लङि सिपि दीर्घश्छांदसः ॥

एकादशीमृचमाह ॥

य उदृचींद्र देवगोपाः सखायस्ते शिवतमा असाम।
त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः ॥११॥

ये। उत्ऽऋचि। इंद्र। देवऽगोपाः। सखायः। ते। शिवऽतमाः। असाम।
त्वां। स्तोषाम। त्वया। सुऽवीराः। द्राघीयः। आयुः। प्रऽतरं। दधानाः ॥११॥

हे इंद्र ये वयमुदृच्युदर्के यज्ञसमाप्तौ वर्तमाना देवगोपा देवैः पालितास्ते तव सखायः सखिवदत्यंतं प्रिया अत एव शिवतमा असाम। अतिशयेन कल्याणा अभूम। ते वयं यज्ञसमाप्त्युत्तरकालमपि त्वां स्तोषाम। स्तवाम। अस्माभिः स्तुतेन त्वया सुवीराः शोभनपुत्रवंतः संतो द्राघीयोऽतिशयेन दीर्घमायुर्जीवनं प्रतरं प्रकृष्टतरं यथा भवति तथा दधाना धारयंतो भूयास्म ॥ देवगोपाः। देवा गोपा येषां। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। असाम। अस भुवि। लुङर्थे लोट्याडुत्तमस्य पिच्चेति पिद्वद्भावात्पिच्च ङिन्नेति ङित्त्वाभावे श्नसोरल्लोप इत्यकारलोपाभावः। पित्त्वादेव तिङोऽनुदात्तत्वे धातुस्वरः शिष्यते। स्तोषाम। स्तौतेर्लोटि सिब्बहुलं लेटीति बहुलग्रहणात् लोट्यपि सिप्। तस्य पित्त्वाद्गुणः। सुवीराः। वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं। द्राघीयः। दीर्घशब्दादीयसुनि प्रियस्थिरेत्यादिना द्राघादेशः। नित्त्वादाद्युदात्तत्वं। प्रतरं। प्रशब्दात्त-

रथमु च छंदसि । पा॰ ५.४.१२. । इत्यद्रव्यप्रकर्षेऽमुप्रत्ययः । प्रत्ययस्वरेणांतोदात्तत्वं । दधानाः । दधातेः शानच्यभ्यस्तानामादिरित्याद्युदात्तत्वं ॥

॥ इति प्रथमस्य चतुर्थे षोडशो वर्गः ॥

मा न इत्येकादशर्चं चतुर्थं सूक्तं । षष्ठ्यष्टमीनवम्येकादश्यस्त्रिष्टुभः । शिष्टाः सप्त जगत्यः । सव्य ऋषिः । इंद्रो देवता । तथा चानुक्रांतं । मा नोऽंत्या त्रिष्टुप् षष्ठ्यष्टमी नवमी चेति ॥ अतिरात्रे प्रथमे पर्यायेऽच्छावाकशस्त्र इदं सूक्तं । तथा च सूचितं । मा नो अस्मिन्मघवन्निंद्र पिब तुभ्यं सुतो मदायेति याज्या । आ॰ ६.४. । इति ॥

तत्र प्रथमामृचमाह ॥

मा नो॑ अ॒स्मिन्म॑घवन्पृ॒त्स्वंह॑सि न॒हि ते॑ अं॒तः शव॑सः परी॒णशे॑ ।
अक्रं॑दयो न॒द्यो॒३॒॑ रोरु॑वद्व॒ना क॒था न क्षो॒णीर्भि॒यसा॒ समा॑रत ॥ १ ॥

मा । नः॒ । अ॒स्मिन् । म॒घ॒ऽव॒न् । पृ॒त्ऽसु । अंह॑सि । न॒हि । ते॒ । अं॒तः॑ । शव॑सः । परि॒ऽन॒शे॑ ।
अक्रं॑दयः । न॒द्यः॑ । रोरु॑वत् । वना॑ । क॒था । न । क्षो॒णीः॑ । भि॒यसा॑ । सं । आ॒र॒त॒ ॥ १ ॥

हे मघवन् धनवन्निंद्र । अस्मिन्परिदृश्यमानेऽंहसि पापे पृत्सु पृतनासु पापफलभूतेषु संग्रामेषु च नोऽस्मान्मा प्रक्षेप्सीरिति शेषः । यस्मात्ते तव शवसो बलस्यांतोऽवसानं परीणशे परितो व्याप्तुं नहि शक्यते । सर्वोऽपि जनस्त्वदीयं बलमतिक्रमितुं न शक्नोतीत्यर्थः । तस्मात्त्वमंतरिक्षे वर्तमानो रोरुवत् । अत्यर्थं शब्दं कुर्वन् नद्यो नदीर्वना तत्संबंधीन्युदकानि चाक्रंदयः । शब्दयसि । क्षोणीः क्षोण्यः । क्षोणीति पृथिवीनाम । तदुपलक्षितास्त्रयो लोका भियसा त्वद्भयेन कथा कथं न समारत । न संगच्छंते । त्वदीयं बलमवलोक्य त्रयोऽपि लोका बिभ्यतीति भावः ॥ पृत्सु । पदादिषु मांस्पृत्स्नूनामुपसंख्यानमिति पृतनाशब्दस्य पृद्भावः । परीणशे । नशतिर्व्याप्तिकर्मा । कृत्यार्थे तवेकेनिति केन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं । निपातस्य चेति पूर्वपदस्य दीर्घत्वं । नद्यः । द्वितीयार्थे प्रथमा । रोरुवत् । रु शब्दे । यङ्लुगंताल्लटः शतृ । अदादिवच्चेति वचनाच्छपो लुक् । शतुर्ङित्त्वाद्गुणाभाव उवङादेशः । नाभ्यस्ताच्छतुरिति नुम्प्रतिषेधः । अभ्यस्तानामादिरित्याद्युदात्तत्वं । कथा । था हेतौ च छंदसीति किंशब्दात्प्रकारवचने थाप्रत्ययः । तस्य विभक्तिसंज्ञायां किमः क इति कादेशः । आरत । ऋ गतौ । समो

गम्यृच्छीत्यात्मनेपदं । छांदसे वर्तमाने लङ्यदादित्वाच्छपो लुक् । ऋस्यादादेशः । आडागमो वृद्धिश्च ॥

द्वितीयामृचमाह ॥

अर्चा शक्राय शाकिने शचीवते शृण्वंतमिंद्रं महयन्नभि ष्टुहि ।
यो धृष्णुना शवसा रोदसी उभे वृषा वृषत्वा वृषभो न्यृंजते ॥ २ ॥

अर्च । शक्राय । शाकिने । शचीऽवते । शृण्वंतं । इंद्रं । महयन् । अभि । स्तुहि ।
यः । धृष्णुना । शवसा । रोदसी इति । उभे इति । वृषा । वृषऽत्वा । वृषभः ।
निऽऋंजते ॥ २ ॥

हे अध्वर्यो शाकिने शक्तियुक्ताय शचीवते प्रज्ञावते शक्रायेंद्रायार्चा । एवंविधमिंद्रं पूजय । किंच स्तुतीः शृण्वंतं समीचीनेयं स्तुतिरिति जानंतं तमिंद्रं महयन्पूजयन्नभिष्टुहि । आभिमुख्येन तस्य स्तोत्रं कुरु । य इंद्रो धृष्णुना शत्रूणां धर्षकेण शवसा बलेनोभे रोदसी द्यावापृथिव्यौ न्यृंजते । नितरां प्रसाधयति । ऋंजतिः प्रसाधनकर्मा । नि॰ ६.२१. । इति यास्कः । स इंद्रो वृषा सेचनसमर्थो वृषत्वा वृषत्वेनानेनैव सेचनसामर्थ्येन वृषभो वर्षिता कामानां यद्वा वृष्ट्युदकानां ॥ अर्चा । शपः पित्त्वादनुदात्तत्वे धातुस्वरः । द्व्यचोऽतस्तिङ इति दीर्घत्वं । शाकिने । शक्तिः शाकः । शक्लृ शक्तौ । भावे घञ् । मत्वर्थीय इनिः । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी । अभिष्टुहि । स्तौतेरदादित्वाच्छपो लुक् । उपसर्गात्सुनोतीति षत्वं । ष्टुना ष्टुरिति ष्टुत्वं । वृषत्वा । सुपां सुलुगिति विभक्तेराकारः । न्यृंजते । ऋजि भृजी भर्जने । इदित्त्वान्नुम् । शपि प्राप्ते व्यत्ययेन शः ॥

तृतीयामृचमाह ॥

अर्चा दिवे बृहते शूष्यं१ वचः स्वक्षत्रं यस्य धृषतो धृषन्मनः ।
बृहच्छ्रवा असुरो बर्हणा कृतः पुरो हरिभ्यां वृषभो रथो हि षः ॥ ३ ॥

अर्च । दिवे । बृहते । शूष्यं । वचः । स्वऽक्षत्रं । यस्य । धृषतः । धृषत् । मनः ।
बृहत्ऽश्रवाः । असुरः । बर्हणा । कृतः । पुरः । हरिऽभ्यां । वृषभः । रथः । हि । सः ॥ ३ ॥

हे स्तोतः । दिवे दीप्ताय बृहते महत इंद्राय शूष्यं । शूषमिति सुखनाम । तत्र साधु शूष्यं । तादृशं स्तुतिलक्षणं वचोऽर्चा । उच्चारय । यस्येंद्रस्य धृषतः

शत्रून्धर्षयतः स्वक्षत्रं स्वभूतबलवन्मनो धृषत् धृष्टं भवति। हि षः स हि स खल्विं-द्रो बृहच्छ्रवाः प्रभूतयशा असुरः शत्रूणां निरसिता। यद्वा। असुः प्राणो बलं वा तद्वान्। रो मत्वर्थीयः। अथवा। असवः प्राणाः। तेन चापो लक्ष्यंते। प्राणा वा आप इति श्रुतेः। तान्राति ददातीत्यसुरः। बर्हणा शत्रूणां निबर्हयिता। हरिभ्यामश्वाभ्यां पुरस्कृतः पूजितः। वृषभः कामानां वर्षिता। रथो रंहणशीलः॥ भूयं। तच साधुरिति यत्। सर्वे विधयश्छंदसि विकल्प्यंत इति यतोऽनाव इत्याद्युदात्तत्वाभावे तित्स्वरित इति स्वरितत्वं। धृषतः। ञिधृषा प्रागल्भ्ये। व्यत्ययेन शः। शतुरनुम इति विभक्तेरुदात्तत्वं। बृहच्छ्रवाः। बृहच्छ्रवो यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। असुरः। असु क्षेपणे। असेरुरन्नित्युरन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं। बर्हणा। सुपां सुलुगिति विभक्तेराकारः। पुरः। पूर्वाधरेत्या-दिनासिप्रत्ययांतोऽंतोदात्तः॥

चतुर्थीमृचमाह॥

त्वं दिवो बृहतः सानु कोपयोऽव त्मना धृषता शंबरं भिनत्।
यन्मायिनो व्रंदिनो मंदिना धृषच्छितां गभस्तिमशनिं पृतन्यसि॥ ४॥

त्वं। दिवः। बृहतः। सानु। कोपयः। अव। त्मना। धृषता। शंबरं। भिनत्।
यत्। मायिनः। व्रंदिनः। मंदिना। धृषत्। शितां। गभस्तिं। अशनिं। पृतन्यसि॥ ४॥

हे इंद्र त्वं बृहतो महतो दिवो द्युलोकस्य सानु समुच्छ्रितमुपरिप्रदेशं कोपयः। अकंपयः। धृषता शत्रूणां धर्षयित्रा त्मनात्मना स्वयमेव शंबरमेतत्संज्ञमसु-रमवाभिनत्। अवधीः। यत् यदा व्रंदिनः शत्रूंश्चैतुं मृदुभावं प्राप्तान्। यद्वा वृंदं समूहः। असुरसमूहवतो मायिनो मायाविनोऽसुरान्मंदिना हृष्टेन धृषत् धृषता प्रागल्भ्यं प्राप्नुवता मनसा युक्तस्त्वं शितां तीक्ष्णीकृतां गभस्तिं हस्तेन गृहीतां। यद्वा गभस्तिरिति रश्मिनाम। तद्वतीमशनिं वज्रं पृतन्यसि। तानसु-रांश्चैतुं पृतनारूपेणोच्छ्रसितान्प्रति प्रेरयसीत्यर्थः। तदानीं बृहतो दिवः सानु कोपय इति पूर्वेणान्वयः॥ कोपयः। कुप कोपे। णयंताल्लङि बहुलं छंदस्यमा-ङ्योगेऽपीत्यडभावः। त्मना। मंत्रेष्वाङ्यादेरात्मन इत्याकारलोपः। धृषत्। सुपां सुलुगिति तृतीयाया लुक्। शितां। शो तनूकरणे। निष्ठायां शाच्छोरन्यतरस्यां। पा° ७.४.४१। इतीकारादेशः। पृतन्यसि। पृतनाशब्दात्सुप आत्मनः क्यच्। कव्यध्वरपृतनस्येत्यंतलोपः। प्रत्ययस्वरः॥

पंचमीमृचमाह ॥

नि यद्वृणक्षि श्वसनस्य मूर्द्धनि शुष्णस्य चिद्व्रंदिनो रोरुवद्वना ।
प्राचीनेन मनसा बर्हणावता यदद्या चित्कृणवः कस्त्वा परि ॥ ५ ॥
नि । यत् । वृणक्षि । श्वसनस्य । मूर्द्धनि । शुष्णस्य । चित् । व्रंदिनः । रोरुवत् । वना ।
प्राचीनेन । मनसा । बर्हणाऽवता । यत् । अद्य । चित् । कृणवः । कः । त्वा । परि ॥ ५ ॥

हे इंद्र त्वं रोरुवत् मेघैरत्यर्थं शब्दयन् श्वसनस्य । अंतरिक्षे श्वसितीति श्वसनो वायुः । तस्य व्रंदिनः स्वकिरणैराम्रफलादीन्मृदुभावं प्रापयतः शुष्णस्य चित् रसानां शोषयितुरादित्यस्यापि मूर्द्धन्युपरिप्रदेशे वना वनान्युदकानि यद्यस्मान्निवृणक्षि । आवर्जयसि । प्रापयसीत्यर्थः । वायुना सूर्यकिरणैश्च वृष्टा आपः सूर्यस्योपरि पुनरवस्थाप्यंते । तदेवावस्थापनमिंद्रः करोतीत्युपचर्यते । प्राचीनेन प्रकर्षेण गंत्रा । अपराङ्मुखेनेत्यर्थः । बर्हणावता । निबर्हयतीति वधकर्मसु पाठाद्बर्हणा शत्रूणां हिंसा । तद्वता । एवंभूतेन मनसा युक्तस्त्वं यद्यस्मादद्या चिदद्यापि कृणवः । घर्मकाले सूर्यस्योपरि भौमान्रसानवस्थापयसि वर्षासु च वर्षयसीति । यस्मादेतत्कुरुषे तस्मात्कारणात्त्वा त्वां पर्युपरि को वर्तते । न कोऽपीत्यर्थः । अतस्त्वमेव सर्वाधिक इति भावः ॥ वृणक्षि । वृजी वर्जने । रौधादिकः । सिपः पित्त्वादनुदात्तत्वे विकरणस्वरः । यद्वृत्तयोगादनिघातः । प्राचीनेन । प्रपूर्वादंचतेर्ऋत्विगित्यादिना क्विन् । अनिदितामिति नलोपः । विभाषांचेरदिक्स्त्रियामिति स्वार्थे खः । खस्येनादेशः । अच उत्यकारलोपे चाविति दीर्घत्वं । खप्रत्ययस्य सति शिष्टत्वात्तदादेशस्योपदेशिवद्भावेनेकार उदात्तः । अद्या चित् । निपातस्य चेति दीर्घत्वं । कृणवः । कृवि हिंसाकरणयोश्च । इदित्त्वान्नुम् । लेटि सिप्यडागमः । धिन्विकृण्व्योरच्चेत्युप्रत्ययः । वकारस्याकारादेशश्च । तस्यातो लोपे सति स्थानिवद्भावाल्लघूपधगुणाभावः । गुणावादेशौ । आगमानुदात्तत्वे विकरणस्वरः । अत्र निरुक्तं । व्रंदी व्रंदतेर्मृदूभावकर्मणः । निवृणक्षि यच्छ्वसनस्य मूर्द्धनि शब्दकारिणः शुष्णस्यादित्यस्य च शोषयितृ रोरूयमाणो वनानीति वा धनानीति वा । नि० ५. १६. । इति । धनानीति पक्षे मेघस्य धनानीति व्याख्येयं ॥

॥ इति प्रथमस्य चतुर्थे सप्तदशो वर्गः ॥

षष्ठीमृचमाह ॥

त्वमाविथ नर्यं तुर्वशं यदुं त्वं तुर्वीतिं वय्यं शतक्रतो ।
त्वं रथमेतशं कृत्व्ये धने त्वं पुरो नवतिं दंभयो नव ॥ ६ ॥

त्वं । आविथ । नर्यं । तुर्वशं । यदुं । त्वं । तुर्वीतिं । वय्यं । शतक्रतो इति शतऽक्रतो ।
त्वं । रथं । एतशं । कृत्व्ये । धने । त्वं । पुरः । नवतिं । दंभयः । नव ॥ ६ ॥

हे इंद्र त्वं नर्यादींस्त्रीन्राज्ञ आविथ । ररक्षिथ । तथा हे शतक्रतो बहुविधकर्मन् बहुविधप्रज्ञ वा त्वं वय्यं वय्यकुलजं तुर्वीतिनामानं राजानमाविथेत्येव । अपि च त्वं रथं रंहणस्वभावमेतत्संज्ञमृषिमेतशमेतत्संज्ञकं धने धननिमित्ते संग्रामे कृत्व्ये कर्तव्ये सत्याविथेति शेषः । यद्वा पूर्वोक्तानां राज्ञां रथं । एतश इत्यश्वनाम । एतशमश्वं च ररक्षिथेति योज्यं । तथा त्वं शंबरस्य नवतिं नव नवोत्तरनवतिसंख्याकाः पुरः पुराणि दंभयः । व्यनीनशः ॥ एतशं । एति गच्छतीत्येतशः । इण् गतौ । इणस्तशन्तशसुनौ । उ॰ ३.१४७.। इति तशन्प्रत्ययः । गुणः । कृत्व्ये । कर्तव्य इत्यस्य शब्दस्य वर्णविकारः पृषोदरादित्वात् ॥

सप्तमीमृचमाह ॥

स घा राजा सत्पतिः शूशुवज्जनो रातहव्यः प्रति यः शासमिन्वति ।
उक्था वा यो अभिगृणाति राधसा दानुरस्मा उपरा पिन्वते दिवः ॥ ७ ॥

सः । घ । राजा । सत्ऽपतिः । शूशुवत् । जनः । रातऽहव्यः । प्रति । यः । शासं । इन्वति ।
उक्था । वा । यः । अभिऽगृणाति । राधसा । दानुः । अस्मै । उपरा । पिन्वते ।
दिवः ॥ ७ ॥

स घा स खलु जनो जातो राजा राजमानः सत्पतिः सतां पालयिता यजमानः शूशुवत् । आत्मानं वर्धयति । य इंद्रं प्रति रातहव्यो दत्तहविष्कः सन् शासमिंद्रकर्तृकमनुशासनं यद्वा तस्य स्तुतिमिन्वति । व्याप्नोति । उक्था वोक्थानि शस्त्राणि वा यः स्तोता राधसा हविर्लक्षणेनान्नेन सहाभिगृणाति । तस्याभिमुखीकरणाय शंसति । अस्मै स्तोत्रे दानुरभिमतफलप्रदातेंद्र उपरोपरान्मेघान् । उपर इति मेघनाम । तत्र यास्केनैवं निरुक्तं । उपर उपलो मेघो भवत्युपरमंतेऽस्मिन्नभ्राण्युपरता आप इति वा । नि॰ २.२१.। इति । तान्मे-

घान्दिवः सकाशात्पिन्वते। सेचयति दोग्धीति यावत् ॥ घा। ऋचि तुनुघेत्यादिना दीर्घः। सत्पतिः। सतां पतिः सत्पतिः। पत्यावैश्वर्ये इति पूर्वपदप्रकृतिस्वरत्वं। शूशुवत्। टुओश्वि गतिवृद्ध्योः। ण्यंताद्वर्तमाने लुङि चेश्चङादेशे संप्रसारणं। संप्रसारणाश्रयं च बलीय इत्यंतरंगमपि वृद्ध्यादिकं बाधित्वा णौ च संश्चङोः। पा० ६. १. ३१.। इति संप्रसारणं। संज्ञापूर्वकस्य विधेरनित्यत्वाद्वृद्ध्यभावे द्विर्वचनादि। उवङादेशः। रातहव्यः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। शासं। शासु अनुशिष्टावित्यस्माद्भावे घञि कर्षात्वत इत्यंतोदात्तत्वे प्राप्ते व्यत्ययेनाद्युदात्तत्वं। वृषादिर्वा द्रष्टव्यः। स ह्याकृतिगण इत्युक्तं। यद्वा शंसु स्तुतावित्यस्माद्घञि व्यत्ययेन नलोपः। इन्वति। इवि व्याप्तौ। शपः पित्त्वादनुदात्तत्वे धातुस्वरः। यद्वृत्तयोगादनिघातः। अभिगृणाति। गॄ शब्दे। क्र्यादिकः। प्वादीनां ह्रस्व इति ह्रस्वत्वं। तिपः पित्त्वादनुदात्तत्वे विकरणस्वरः। पूर्ववन्निघाताभावः। उपरा। सुपां सुलुगिति शसः पूर्वसवर्णदीर्घत्वं। पिन्वते। पिवि मिवि णिवि सेचने। व्यत्ययेनात्मनेपदं ॥

अष्टमीमृचमाह ॥

असमं क्षत्रमसमा मनीषा प्र सोमपा अपसा संतु नेमे।
ये त इंद्र ददुषो वर्धयंति महि क्षत्रं स्थविरं वृष्ण्यं च ॥ ८ ॥

असमं। क्षत्रं। असमा। मनीषा। प्र। सोमऽपाः। अपसा। संतु। नेमे।
ये। ते। इंद्र। ददुषः। वर्धयंति। महि। क्षत्रं। स्थविरं। वृष्ण्यं। च ॥ ८ ॥

इंद्रस्य क्षत्रं बलमसमं। न केनचित्समं। सर्वाधिकमित्यर्थः। तथा मनीषा बुद्धिश्चासमा। न कस्यापि बुद्ध्या समाना। सर्वं वस्तु विषयीकरोतीत्यर्थः। नेम इति सर्वनामशब्द एतच्छब्दसमानार्थः। नेम एते सोमपाः सोमस्य पातारो यजमाना अपसा कर्मणा प्र संतु। प्रवृद्धा भवंतु। हे इंद्र ते तव ददुषो हविर्दत्तवंतो ये त्वदीयं महि महत् क्षत्रं बलं स्थविरं स्थूलं प्रवृद्धं वृष्ण्यं वृषत्वं पुंस्त्वं च वर्धयंति। प्रवृद्धं कुर्वंति। यद्वा ददुषो यजमानेभ्यो यागफलं दत्तवतस्तवेति योजनीयं ॥ नेमे। सर्वनामत्वाज्जसः शीभावे गुणः। पा० ७. १. १७.। त्वसमसिमनेमेत्यनुच्चानि। फि० ४. १०.। इति सर्वानुदात्तत्वे प्राप्ते व्यत्ययेनाद्युदात्तत्वं। ददुषः। ददातेर्लिटः क्वसुः। जसो व्यत्ययेन शसादेशः। संप्रसारणं। संप्रसारणाश्रयं च बलीय इतीडागमात्पूर्वमेव संप्रसारणं। शासिवसिघसीनां

चेति षत्वं । प्रत्ययस्वरः । महि । महेरौणादिक इन्प्रत्ययः । स्थविरं । अजिरशिशिरेत्यादिना । उ० १. ५३. । तिष्ठतेः किरच्प्रत्ययांतो निपातितः ॥

नवमीमृचमाह ॥

तुभ्येदेते बहुला अद्रिदुग्धाश्चमूषदश्चमसा इंद्रपानाः ।

व्यश्नुहि तर्पया काममेषामथा मनो वसुदेयाय कृष्व ॥ ९ ॥

तुभ्यं । इत् । एते । बहुलाः । अद्रिऽदुग्धाः । चमूऽसदः । चमसाः । इंद्रऽपानाः ।

वि । अश्नुहि । तर्पय । कामं । एषां । अथ । मनः । वसुऽदेयाय । कृष्व ॥ ९ ॥

हे इंद्र तुभ्येत् तुभ्यमेव चमसाः । चम्यंते भक्ष्यंत इति चमसाः सोमाः । एते सोमास्त्वदर्थं संपादिताः । कीदृशा इत्याह । बहुलाः । प्रभूताः । अद्रिदुग्धाः । अद्रिभिर्ग्रावभिरभिषुताः । चमूषदः । चमूषु चमसेष्ववस्थिताः । इंद्रपानाः । इंद्रस्य पानेन सुखकराः । अतस्त्वं तान्व्यश्नुहि । व्याप्नुहि । व्याप्य चैषां त्वदीयानामिंद्रियाणां काममभिलाषं तैस्तर्पय । पूरयेति यावत् । अथानंतरं वसुदेयायास्मभ्यमभिमतधनप्रदानाय त्वदीयं मनः कृष्व । कुरुष्व ॥ तुभ्य । छांदसो मलोपः । अद्रिदुग्धाः । दुहेः कर्मणि निष्ठा । तृतीयाकर्मणीति पूर्वपदप्रकृतिस्वरत्वं । चमूषदः । चमु अदने । चमंत्यनेनेति चमूः । कृषिचमितनीत्यादिनौणादिक ऊप्रत्ययः । चमूषु सीदंतीति चमूषदः । सत्सूद्विषेति क्विप् । पूर्वपदादिति षत्वं । कृदुत्तरपदप्रकृतिस्वरत्वं । इंद्रपानाः । कर्मणि च येन संस्पर्शात् । पा० ३. ३. ११६. । इति पिबतेः कर्मणि ल्युट् । अश्नुहि । व्यत्ययेन परस्मैपदं । वसुदेयाय । डुदाञ् दाने । अस्मादचो यदिति भावे यत् । ईद्यतीतीकारादेशः । गुणः । यतोऽनाव इत्याद्युदात्तत्वं । कृदुत्तरपदप्रकृतिस्वरत्वं । कृष्व । डुकृञ् करणे । बहुलं छंदसीति विकरणस्य लुक् ॥

दशमीमृचमाह ॥

अपामतिष्ठद्धरुणह्वरं तमोऽन्तर्वृत्रस्य जठरेषु पर्वतः ।

अभीमिंद्रो नद्यो वव्रिणा हिता विश्वा अनुष्ठाः प्रवणेषु जिघ्नते ॥ १० ॥

अपां । अतिष्ठत् । धरुणऽह्वरं । तमः । अंतः । वृत्रस्य । जठरेषु । पर्वतः ।

अभि । ईं । इंद्रः । नद्यः । वव्रिणा । हिताः । विश्वाः । अनुऽस्थाः । प्रवणेषु । जिघ्नते ॥ १० ॥

अपां वृष्ट्युदकानां धरुणह्वरं। धरुणशब्दो धारावचनः। धारानिरोधकं तमोऽधकारमतिष्ठत्। अयमेवार्थः स्पष्टीक्रियते। वृत्रस्य लोकत्रयावरीतुरसुरस्य जठरेषूदरप्रदेशेष्वंतर्मध्ये पर्वतः पर्ववान्मेघोऽभूत्। अतस्तमोरूपेण वृत्रेण मेघस्यावृतत्वाद्वृष्ट्युदकमप्यावृतमित्युच्यते। ईमिमाः पूर्वोक्ता नद्यो नदीरपः। नदनान्नद्य इति व्युत्पत्त्या नदीशब्देनाप उच्यंते। वव्रिणावरकेण वृत्रेण हिताः पिहिता विश्वा व्यापनीरनुष्ठा अनुक्रमेण तिष्ठंतीः। एवंविधा अप इंद्रः प्रवणेषु निम्नेषु भूप्रदेशेष्वभिजिघ्नते। अभिगमयति॥ वव्रिणा। वृञ् वरण इत्यस्मादादृगमहनजन इति किप्रत्ययः। लिड्वद्भावाद्द्विर्भावादि। यणादेशः। प्रत्ययस्वरः। अनुष्ठाः। आतश्चोपसर्ग इति तिष्ठतेः कप्रत्ययः। उपसर्गात्सुनोतीति षत्वं। जिघ्नते। हंतेर्गत्यर्थाद्व्यत्ययेनात्मनेपदं। बहुलं छंदसीति शपः श्लुः। अर्तिपिपर्त्योश्च बहुलं छंदसीत्यभ्यासस्येत्वं॥

एकादशीमृचमाह॥

स शेवृधमधि धा द्युम्नमस्मे महि क्षत्रं जनाषाळिंद्र तव्यं।
रक्षा च नो मघोनः पाहि सूरीन्राये च नः स्वपत्या इषे धाः॥ ११॥
सः। शेऽवृधं। अधि। धाः। द्युम्नं। अस्मे इति। महि। क्षत्रं। जनाषाट्। इंद्र। तव्यं।
रक्ष। च। नः। मघोनः। पाहि। सूरीन्। राये। च। नः। सुऽअपत्यै। इषे। धाः॥ ११॥

हे इंद्र स त्वमस्मे अस्मासु द्युम्नं यशोऽधिधाः। अधिनिधेहि। कीदृशमित्याह। शेवृधं। संशमनं। रोगाणां शमने सति यद्वर्धते तादृशं। तथा महि महत् जनाषाट् शत्रुजनानामभिभवितृ तव्यं प्रवृद्धं क्षत्रं बलं चाधिधा इति शेषः। किंच हे इंद्र नोऽस्मान्मघोनो धनवतः कृत्वा रक्षा। पालय। सूरीन् विदुषोऽन्यानपि पाहि। पालय। तथा राये धनाय च स्वपत्यै शोभनपुत्रयुक्तायेषेऽन्नाय च नोऽस्मान्धाः। धेहि स्थापय॥ धाः। छंदसि लुङ्लङ्लिट इति प्रार्थनायां लुङि गातिस्थेति सिचो लुक्। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। अस्मे। सुपां सुलुगित्यस्मच्छब्दात्सप्तम्याः शे आदेशः। जनाषाट्। जनान् सहत इति जनाषाट्। छंदसि सहः। पा० ३. २. ६३.। इति ण्विः। अत उपधाया इति वृद्धिः। सहेः साडः स इति षत्वं। अन्येषामपि दृश्यत इति पूर्वपददीर्घः। तव्यं। तवतिर्वृद्ध्यर्थः। सौत्रो धातुः। अचो यदिति यत्। गुणे

धातोस्तन्निमित्तस्यैवेत्यवादेशः। यतोऽनाव इत्याद्युदात्तत्वं। रक्षा। रक्ष पालने। शपः पित्त्वादनुदात्तत्वे धातुस्वरः। द्व्यचोऽतस्तिङ इति दीर्घत्वं। मघोनः। श्वयुवमघोनामतद्धित इति शसि संप्रसारणं। पाहि। अदादित्वाच्छपो लुक्। हेरपित्त्वात्तस्यैव स्वरः शिष्यते। मघोन इत्यस्य वाक्यांतरगतत्वान्निघाताभावः। स्वपत्यै। शोभनान्यपत्यानि यस्याः सा तथोक्ता। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। जसादिषु छंदसि वावचनमिति याडापः। पा० ७. ३. ११३.। इति याडागमाभावे वृद्धिरेचि। पा० ६. १. ८८.। इति वृद्धिः॥

॥ इति प्रथमस्य चतुर्थेऽष्टादशो वर्गः॥

दिवश्चिदस्येत्यष्टर्चं पंचमं सूक्तं सव्यस्यार्षमैंद्रं जागतं। तथा चानुक्रांतं। दिवश्चिदष्टौ जागतं हीति। हीत्यभिधानात्तुह्यादिपरिभाषयोत्तरे द्वे च सूक्ते जागते॥ अतिरात्रे प्रथमे पर्याये मैत्रावरुणशस्त्र इदं सूक्तं। सूत्रितं च। दिवश्चिदस्येति पर्यासः स नो नव्येभिरिति च। आ० ६.४.। इति॥ विषुवति निष्केवल्येऽप्येतत्सूक्तं। सूत्रितं च। शंसेदेवोत्तराणि षट् दिवश्चिदस्य। आ० ८. ६.। इति॥ समूळ्हस्य दशरात्रस्य द्वितीये छंदोमेऽपि निष्केवल्य एतत्सूत्रितं। त्वं महां इंद्र यो ह दिवश्चिदस्य त्वं महां इंद्र तुभ्यमिति निष्केवल्यं। आ० ८. ७.। इति॥

तत्र प्रथमामृचमाह॥

दिवश्चिदस्य वरिमा वि पप्रथ इंद्रं न मह्ना पृथिवी चन प्रति।
भीमस्तुविष्मान् चर्षणिभ्य आतपः शिशीते वज्रं तेजसे न वंसगः॥१॥

दिवः। चित्। अस्य। वरिमा। वि। पप्रथे। इंद्रं। न। मह्ना। पृथिवी। चन। प्रति।
भीमः। तुविष्मान्। चर्षणिऽभ्यः। आऽतपः। शिशीते। वज्रं। तेजसे। न। वंसगः॥१॥

अस्येंद्रस्य वरिमोरुत्वं प्रभावं दिवश्चित् द्युलोकादपि विपप्रथे। विस्तीर्णं बभूव। पृथिवी चन पृथिव्यपि च मह्ना महिम्ना महत्त्वेनेंद्रं न प्रति भवति। भूमिरपींद्रस्य प्रतिनिधिर्न भवति। ततोऽपि स गरीयानित्यर्थः। भीमः शत्रूणां भयंकरस्तुविष्मान् प्रज्ञावान् बलवान्वा चर्षणिभ्यो मनुष्येभ्यः स्तोतृभ्यस्तेषामर्थाय शत्रूणामातपः। आ समंतात्तापकारी। एवंविधः स इंद्रो वज्रं वर्जनशीलमायुधं तेजसे तैक्ष्ण्याय शिशीते। तनूकरोति तीक्ष्णीकरोति। तत्र दृष्टांतः। वंसगो न। वननीयगतिमान्वृषभो यथा स्वशृंगे युद्धार्थं तीक्ष्णीकरोति

तद्वत् ॥ दिवः । ऊडिदमिति विभक्तेरुदात्तत्वं । वरिमा । उरुशब्दात् पृथ्वादिलक्षण इमनिच् । प्रियस्थिरेत्यादिनोरुशब्दस्य वरादेशः । पप्रथे । प्रथ प्रख्याने । मह्ना । महिम्ना । वर्णलोपश्छांदसः । यद्वा महेरौणादिकः कनिप्रत्ययः । प्रत्ययस्वरेणांतोदात्तः । तृतीयैकवचनेऽल्लोपोऽन इत्यकारलोपः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं । प्रति । प्रतिः प्रतिनिधिप्रतिदानयोरिति प्रतिनिधौ कर्मप्रवचनीयत्वं । कर्मप्रवचनीययुक्ते । पा॰ २. ३. ८. । इतींद्रशब्दाद्द्वितीया । प्रतिनिधिप्रतिदाने च यस्मात् । पा॰ २. ३. ११. । इति पंचमी तु छांदसत्वान्न भवति । भीमः । ञिभी भय इत्यस्माद्भियः षुग्वा । उ॰ १. १४६. । इति मक्प्रत्ययः । भीमो बिभ्यत्यस्मादिति यास्कः । नि॰ १. २०. । आतपः । तपतीति तपः । पचाद्यच् । थाथादिनोत्तरपदांतोदात्तत्वं । शिशीते । शो तनूकरणे । व्यत्ययेनात्मनेपदं । बहुलं छंदसीति विकरणस्य श्लुः । बहुलं छंदसीत्यभ्यासस्येत्वं । ई हल्यघोरितीत्वं । अनजादावपि लसार्वधातुके । पा॰ ६. १. १८९. । व्यत्ययेनाभ्यस्ताद्युदात्तत्वं । वंसगः । वन षण संभक्तावित्यस्मात्कर्मण्यौणादिकः सप्रत्ययः । वंसं वननीयं गच्छतीति वंसगः । डोऽन्यत्रापि दृश्यत इति गमेर्डप्रत्ययः । दिवोदासादित्वात्पूर्वपदाद्युदात्तत्वं ॥

द्वितीयामृचमाह ॥

सो अर्णवो न नद्यः समुद्रियः प्रति गृभ्णाति विश्रिता वरीमभिः ।
इंद्रः सोमस्य पीतये वृषायते सनात्स युध्म ओजसा पनस्यते ॥ २ ॥

सः । अर्णवः । न । नद्यः । समुद्रियः । प्रति । गृभ्णाति । विऽश्रिताः । वरीमऽभिः ।
इंद्रः । सोमस्य । पीतये । वृषऽयते । सनात् । सः । युध्मः । ओजसा । पनस्यते ॥ २ ॥

स इंद्रः समुद्रियः । समुद्द्रवंत्यस्मादाप इति समुद्रमंतरिक्षं । तत्र भवः समुद्रियः । एवंभूतः सन् वरीमभिः स्वकीयैः संवरणैर्यद्वोरुत्वैर्विश्रिता व्याप्ता नद्यो नदीः शब्दकारिणीर्वृत्रेणावृता अपोऽर्णवो न समुद्र इव प्रतिगृभ्णाति । स्वीकृत्य ववर्षेति भावः । स चेंद्रः सोमस्य पीतये पानाय वृषायते । वृष इवाचरति । हर्षयुक्तो वर्तत इत्यर्थः । तथा स इंद्रो युध्मो योद्धा सनाच्चिरादेव यद्वा सनातन ओजसा बलकृतेन वृत्रवधादिरूपेण कर्मणा पनस्यते । पनः स्तोत्रमिच्छति ॥ अर्णवः । अर्णसो लोपश्च । पा॰ ५. २. १०९. २. । इति मत्वर्थीयो वप्रत्ययः सलोपश्च । प्रत्ययस्वरः । नद्यः । नद अव्यक्ते शब्द इत्यस्मात्कर्तरि

पचाद्यच्। चित इत्यंतोदात्तत्वं। नदडिति टित्वेन पाठात् टिड्ढाणञिति ङीप्। यस्येति लोप उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वं। जसि यणादेश उदात्तस्वरितयोर्यण इति स्वरितत्वं। द्वितीयार्थे प्रथमा। अनया व्युत्पत्त्या नद्य इत्याप उच्यंते। तथा च श्रूयते। अहावनदता हते तस्मादा नद्यो नाम स्थ ता वो नामानि सिंधव इति। समुद्रियः। समुद्राभ्राद्घ इति भवार्थे घप्रत्ययः। घस्येयादेशः। तस्योपदेशिवद्वचनादाद्युदात्तत्वं। गृभ्णाति। हृग्रहोर्भ इति भत्वं। विश्रिताः। श्रिञ् सेवायां। कर्मणि निष्ठा। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। वरीमभिः। वृञ् वरण इत्यस्मादौणादिक ईमनिन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं। यद्वा उरुशब्दादिमनिचि दीर्घ आद्युदात्तत्वं च छांदसत्वात्। वृषायते। कर्तुः क्यङ् सलोपश्चेत्याचारार्थे क्यङ्। ङित्त्वादात्मनेपदं। अकृत्सार्वधातुकयोरिति दीर्घः। युध्मः। युध संप्रहार इत्यस्मादिषियुधींधिदसिश्याधूसूभ्यो मगिति मक्। पनस्यते। पन स्तुतौ। पननं पनः। तदिच्छति पनस्यति। व्यत्ययेनात्मनेपदं॥

तृतीयामृचमाह॥

त्वं तमिंद्र पर्वतं न भोजसे महो नृम्णस्य धर्मणामिरज्यसि।
प्र वीर्येण देवतातिं चेकिते विश्वस्मा उग्रः कर्मणे पुरोहितः॥३॥

त्वं। तं। इंद्र। पर्वतं। न। भोजसे। महः। नृम्णस्य। धर्मणां। इरज्यसि।
प्र। वीर्येण। देवता। अति। चेकिते। विश्वस्मै। उग्रः। कर्मणे। पुरःऽहितः॥३॥

हे इंद्र त्वं भोजसे भोजनाय पर्वतं पर्ववंतं मेघं नाकार्षीः। न हि हतो भुंक्ते। इंद्रो हि वर्षणार्थं मेघं वज्रेण हंति। तथा महो महतो नृम्णस्य धनस्य धर्मणां धारयितॄणां कुवेरादीनामिरज्यसि। ईशिषे। इरज्यतिरैश्वर्यकर्मा। स इंद्रो देवता वीर्येणात्यतिशयितः प्रचेकिते। प्रकर्षेणास्माभिर्ज्ञातो बभूव। स चोग्र उद्गूर्ण इंद्रो विश्वस्मै सर्वस्मै वृत्रवधादिरूपाय कर्मणे देवैः सर्वैः पुरोहितः। पुरस्तादवस्थापितः॥ धर्मणां। धृञ् धारणे। अन्येभ्योऽपि दृश्यंत इति कर्तरि मनिन्। नित्त्वादाद्युदात्तत्वं। इरज्यसि। इरज् ईर्ष्यायां। ऐश्वर्य इत्येके। कंड्वादित्वाद्यक्। वीर्येण। शूर वीर विक्रांतौ। चुरादिः। अचो यदिति यत्। णिलोपः। बहुव्रीहौ वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वविधानसामर्थ्याद्यतोऽनाव इत्याद्युदात्तत्वाभावे तित्स्वरित इति स्वरितत्वं। तस्मिन्हि सत्याद्युदात्तं द्व्यच्छंदसीत्यनेनैव

सिद्धत्वात् पुनर्वीर्यग्रहणमनर्थकं स्यादित्युक्तं । देवता । देव एव देवता । देवात्तल्लिति स्वार्थे तल्प्रत्ययः । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । चेकिते । कित ज्ञाने । अस्माद्यङंताच्चेकित्यतेः कर्मणि लिट्यतोलोपयलोपौ । पुरोहितः । पुरस्शब्दस्यासिप्रत्ययांतस्य तद्धितश्चासर्वविभक्तिरित्यव्ययत्वेन पुरोऽव्ययमिति गतिसंज्ञायां गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वं ॥

चतुर्थीमृचमाह ॥

स इद्वने नमस्युभिर्वचस्यते चारु जनेषु प्रब्रुवाण इंद्रियं ।

वृषा छंदुर्भवति हर्यतो वृषा क्षेमेण धेनां मघवा यदिन्वति ॥ ४ ॥

सः । इत् । वने । नमस्युऽभिः । वचस्यते । चारु । जनेषु । प्रऽब्रुवाणः । इंद्रियं ।

वृषा । छंदुः । भवति । हर्यतः । वृषा । क्षेमेण । धेनां । मघऽवा । यत् । इन्वति ॥ ४ ॥

स इत् स एवेंद्रो वनेऽरण्ये नमस्युभिर्नमसा स्तोत्रेण पूजयितृभिर्ऋषिभिर्वचस्यते । वच इच्छन् क्रियते । स्तूयत इत्यर्थः । यद्वा वचः स्तोत्रमात्मन इच्छति । स चेंद्र आत्मीयेषु जनेष्विंद्रियं स्ववीर्यं प्रब्रुवाणः प्रकटयन् चारु वर्तते । किंच स वृषा कामानां वर्षको हर्यतः प्रेप्सावतो यियक्षतश्छंदुरुपच्छंदयिता भवति । यियक्षतां पुरुषाणां यागे रुचिमुत्पादयतीति भावः । वृषा वर्षयिता । हविष्प्रदातेत्यर्थः । मघवा धनवान् । एवंभूतो यजमानः क्षेमेणेंद्रकृतेन रक्षणेन युक्तः सन् यत् यदा धेनां स्तुतिलक्षणां वाचमिन्वति प्रेरयति तदानीं छंदुर्भवतीति पूर्वेणान्वयः । यद्वा मघवा वृषेंद्रः क्षेमेण क्षेमकरेण मनसा धेनां यजमानैः कृतां स्तुतिं यद्यस्मादिन्वति व्याप्नोति । तस्मादिति योज्यं ॥ नमस्युभिः । नमोवरिव इति पूजार्थे क्यच् । क्याच्छंदसीत्युप्रत्ययः । वचस्यते । वच इच्छति वचस्यति । तं वचस्यंतं कुर्वंति मुनयो वचस्ययंति । वचस्ययतेः कर्मणि यक्यतोलोपयलोपौ । यद्वा वचस्यतेर्व्यत्ययेनात्मनेपदं । प्रब्रुवाणः । ब्रूञ् व्यक्तायां वाचि । लटः शानच् । अदादित्वाच्छपो लुक् । शानचो ङित्त्वाद्गुणाभाव उवङ् । चित्स्वरेणांतोदात्तः । इंद्रियं । इंद्रस्य लिंगमिंद्रियं । इंद्रियमिंद्रलिंगमिंद्रदृष्टमिंद्रसृष्टमिंद्रजुष्टमिंद्रदत्तमिति वा । पा० ५. २. ९३. । इति लिंगादिष्वर्थेष्विंद्रशब्दात् घच्प्रत्ययो निपात्यते । अतोऽंतोदात्तत्वं । इन्वति । इवि व्याप्तौ । शपः पित्त्वादनुदात्तत्वे धातुस्वरः । यद्वृत्तयोगादनिघातः ॥

पंचमीमृचमाह ॥

स इन्महानि समिथानि मज्मना कृणोति युध्म ओजसा जनेभ्यः ।
अधा चन श्रद्दधति त्विषीमत इंद्राय वज्रं निघनिघ्नते वधं ॥ ५ ॥

सः । इत् । महानि । सम्ऽइथानि । मज्मना । कृणोति । युध्मः । ओजसा । जनेभ्यः ।
अध । चन । श्रत् । दधति । त्विषिऽमते । इंद्राय । वज्रं । निऽघनिघ्नते । वधं ॥ ५ ॥

स इत् स एवेंद्रो युध्मो योद्धा महानि समिथानि महतः संग्रामान्मज्मना सर्वस्य शोधकेनौजसा बलेन कृणोति । करोति । किमर्थं । जनेभ्यः । स्तोतृजनार्थं । यदेंद्रो वधं हननसाधनं वज्रमायुधं मेघेषु निघनिघ्नते । निहंति । अधा चन अनंतरमेव त्विषीमते दीप्तिमत इंद्राय सर्वे जनाः श्रद्दधति । श्रदिति सत्यनाम । इंद्रो बलवानिति यदुच्यते तत्सत्यमेवेति सर्वे प्रतिपद्यंते ॥ महानि । महांतीत्यस्य तकारलोपश्छांदसः । यद्वा मह्यंते पूज्यंत इति महानि प्रवृद्धानि । घञर्थे कविधानमिति कः । प्रत्ययस्वरः । समिथानि । इण् गतौ । संयंति संगच्छंतेऽस्मिन्वीरा इति समिथानि संग्रामाः । समीणः । उ० २. ११. । इति थक्प्रत्ययः । कित्वाद्गुणाभावः । थाथादिनोत्तरपदांतोदात्तत्वं । मज्मना । टुमस्जो शुद्धौ । मनिः प्रत्ययः । झलां जश् झशि । पा० ८. ४. ५३. । इति सकारस्य जश्त्वं दकारः । ततश्चुत्वं जकारः । प्रत्ययस्वरः । अधा । छांदसं धत्वं । निपातस्य चेति सांहितिको दीर्घः । त्विषीमते । त्विष दीप्तौ । इन् सर्वधातुभ्य इतीन्प्रत्ययः । नित्वादाद्युदात्तत्वं । मतुपः पित्वादनुदात्तत्वे तदेव शिष्यते । अन्येषामपि दृश्यत इति सांहितिको दीर्घः । निघनिघ्नते । हंतेर्व्यत्ययेनात्मनेपदं बहुवचनं च । बहुलं छंदसीति शपः श्लुः । गमहनेत्यादिनोपधालोपः । अभ्यासस्य घत्वं । निगागमश्च । आगनीगंतीति च । पा० ७. ४. ६५. । इति चशब्दः प्रकारार्थ इत्युक्तत्वाद्दाधर्त्यादावेतद्द्रष्टव्यं ॥

॥ इति प्रथमस्य चतुर्थ एकोनविंशो वर्गः ॥

षष्ठीमृचमाह ॥

स हि श्रवस्युः सदनानि कृत्रिमा क्ष्मया वृधान ओजसा विनाशयन् ।
ज्योतींषि कृण्वन्नवृकाणि यज्यवेऽव सुक्रतुः सर्तवा अपः सृजत् ॥ ६ ॥

सः। हि। श्रवस्युः। सदनानि। कृत्रिमा। क्ष्मया। वृधानः। ओजसा। विऽनाशयन्।
ज्योतींषि। कृण्वन्। अवृकाणि। यज्यवे। अव। सुऽक्रतुः। सर्तवै। अपः। सृजत् ॥६॥

श्रवस्युरन्नं यशो वात्मन इच्छन् कृत्रिमा कृत्रिमाणि क्रियया निर्वृत्तानि सदनान्यसुरपुराण्योजसा बलेन विनाशयन् क्ष्मया भूम्या समानं वृधानो वर्धनशीलः। यद्वा क्ष्मयेत्योजोविशेषणं। शत्रूणामभिभवित्रा बलेनेत्यर्थः। ज्योतींषि सूर्यादीनि वृत्रेणावृतान्यवृकाणि वृकेणावरकेण तेन रहितानि कृण्वन्। कुर्वन्। सुक्रतुः शोभनकर्मसहित एवंविधः स खल्विंद्रो यज्यवे यष्ट्रे यजमानाय तदर्थं सर्तवै सरणायापो वृष्टिलक्षणान्युदकान्यवसृजत्। वृष्टिं कृतवानित्यर्थः॥ कृत्रिमा। डुकृञ् करणे। ड्वितः क्त्रिः। पा॰ ३. ३. ८८.। इति भावे क्त्रिप्रत्ययः। क्त्रेर्मम्नित्यं। पा॰ ४. ४. २०.। इति निर्वृत्तार्थे मप्। तस्य पित्त्वादनुदात्तत्वे क्त्रिप्रत्ययस्वर एव शिष्यते। शेश्छंदसि बहुलमिति शेर्लोपः। क्ष्मया। क्षमूष् सहने। क्षमते प्राणिजातकृतमुपद्रवमिति क्ष्मा। षिद्भिदादिभ्योऽङित्यङ्प्रत्ययः। ततष्टाप्। व्यत्ययेन धातोरुपधालोपः। छांदसं विभक्त्युदात्तत्वं। यद्वा। अयं धातुरभिभवार्थः। षह अभिभव इति सहनस्याभिभवार्थत्वात्। अस्मादौणादिको मनिन्। व्यत्ययेन स्त्रीलिंगता। मनः। पा॰ ४. १. ११.। इति ङीपो निषेधे डाबुभाभ्यामन्यतरस्यां। पा॰ ४. १. १३.। इति डाप्। टिलोपः। वृधानः। ताच्छीलिकश्चानश्। बहुलं छंदसीति शपो लुक्। चित इत्यंतोदात्तत्वं। अवृकाणि। वृञ् वरणे। सृवृभूशुषिमुषिभ्यः कक्। उ॰ ३. ४६.। इति कक्प्रत्ययः। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। यज्यवे। यजिमनिशुंधिदसिजनिभ्यो युरिति युप्रत्ययः। वृषादेराकृतिगणत्वादाद्युदात्तत्वं। सुक्रतुः। बहुव्रीहौ क्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वं। सर्तवै। सृ गतौ। कृत्यार्थे तवैकेनिति भावे तवैप्रत्ययः। गुणः। अंतश्च तवै युगपदित्याद्यंतयोर्युगपदुदात्तत्वं। अपः। ऊडिदमिति शस उदात्तत्वं। सृजत्। लङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः॥

सप्तमीमृचमाह ॥

दानाय मनः सोमपावन्नस्तु तेऽर्वाचा हरी वंदनश्रुदा कृधि।
यमिष्ठासः सारथयो य इंद्र ते न त्वा केता आ दभ्नुवंति भूर्णयः ॥७॥

दानाय। मनः। सोमऽपावन्। अस्तु। ते। अर्वाचा। हरी इति। वंदनऽश्रुत्। आ। कृधि।
यमिष्ठासः। सारथयः। ये। इंद्र। ते। न। त्वा। केताः। आ। दभ्नुवंति। भूर्णयः ॥७॥

हे सोमपावन् सोमस्य पातरिंद्र ते त्वदीयं मनो दानायास्मदभिमतफलप्रदानायास्तु। भवतु। हे वंदनश्रुत्। वंदनानां स्तुतीनां श्रोतः। हरी त्वदीयावश्वावर्वाचास्मद्यज्ञाभिमुखावाकृधि। आभिमुख्येन कुरु। हे इंद्र ते तव स्वभूता ये सारथयः संति ते यमिष्ठासोऽतिशयेन यंतारः। अश्वनियमनकुशला इत्यर्थः। यस्मादेवं तस्मात्केताः प्रातिकूल्यज्ञातारो भूर्णयः स्वकीयायुधादीनां भर्तारः। यद्वा भीतास्तीक्ष्णाः शत्रवस्त्वा त्वां नादभ्नुवंति। न हिंसंति ॥ सोमपावन्। आतो मनिन्निति वनिप्। असंबुद्धाविति पर्युदासाद्दीर्घाभावः। अर्वाचा। सुपां सुलुगिति विभक्तेराकारः। वंदनश्रुत्। वदि अभिवादनस्तुत्योः। इदित्वान्नुम्। भावे ल्युट्। तेषां श्रोता। श्रु श्रवणे। क्विपि तुगागमः। यमिष्ठासः। यंतुः शब्दात्तुश्छंदसीतीष्ठन्प्रत्ययः। तुरिष्ठेमेयःस्विति तृलोपः। नित्त्वादाद्युदात्तत्वं। आज्जसेरसुगित्यसुक्। सारथयः। सर्तेर्णिच्च। उ० ४. ८०.। इति घथिन्प्रत्ययो णिलोपश्च। नित्त्वादाद्युदात्तः। केताः। कित ज्ञाने। चिकेतति प्रतिकूलं जानंतीति केताः। पचाद्यच्। वृषादेराकृतिगणत्वादाद्युदात्तत्वं। यद्वा प्रतिकूलतया ज्ञायंत इति केताः। कर्मणि घञ्। ञित्त्वादाद्युदात्तत्वं। दभ्नुवंति। दंभु दंभे। स्वादित्वाच्छ्नुः। तस्य ङित्त्वादनिदितामिति नलोपः। संयोगपूर्वत्वेन हुश्नुवोरिति यणादेशाभावेऽचि श्नुधात्वित्यादिनोवङादेशः। भूर्णयः। भृञ् भरणे। घृणिपृश्निरित्यादावस्मान्निप्रत्ययांतो निपात्यते। ऋत उत्वं दीर्घश्च। यद्वा भृ भय इत्यस्मात्कृत्यल्युटो बहुलमिति कर्तरि क्तिन्युटोश्चपूर्वस्येत्युत्वं। हलि चेति दीर्घः। ऋकारल्वादिभ्यः क्तिन्निष्ठावद्भवति। पा० ८. २. ४४. १.। इति निष्ठावद्भावान्नत्वं। नित्त्वादाद्युदात्तत्वं ॥

अष्टमीमृचमाह ॥

अप्रक्षितं वसु बिभर्षि हस्तयोरषाळ्हं सहस्तन्वि श्रुतो दधे।
आवृतासोऽवतासो न कर्तृभिस्तनूषु ते क्रतव इंद्र भूरयः ॥८॥
अप्रऽक्षितं। वसु। बिभर्षि। हस्तयोः। अषाळ्हं। सहः। तन्वि। श्रुतः। दधे।
आऽवृतासः। अवतासः। न। कर्तृऽभिः। तनूषु। ते। क्रतवः। इंद्र। भूरयः ॥८॥

हे इंद्र त्वमप्रक्षितं प्रक्षयरहितं वसु धनं हस्तयोर्बिभर्षि । स्तोतृभ्यो दातुं धारयसि । तथा श्रुतः प्रख्यातो भवानत्व्यात्मीये शरीरेऽषाळ्हं शत्रुभिरनभिभूतं सहो बलं दधे । धारयति । त्वदीयास्तनवः कर्तृभिर्वृत्रादेरसुरस्य वधं कुर्वद्भिर्बलकृतैः कर्मभिरावृतास आवृताः । बलकृतानि सर्वाणि कर्माण्येतस्य शरीरमावृत्यावतिष्ठंते । तत्र दृष्टांतः । अवतासो न । अवत इति कूपनाम । यथा कूपा जलोद्धरणाय प्रवृत्तैः प्राणिभिराव्रियंते तद्वत् । यस्मादेवं तस्मात् हे इंद्र ते तव शरीरेषु क्रतवः कर्माणि भूरयो बहूनि विद्यंते ॥ अप्रक्षितं । क्षि क्षय इत्यस्माद्भावे निष्ठा । अण्यदर्थे इति पर्युदासाद्दीर्घाभावः । अत एव क्षियो दीर्घादिति निष्ठानत्वाभावः । प्रकृष्टं क्षितं यस्य तत्प्रक्षितं । न प्रक्षितमप्रक्षितं । अव्ययपूर्वपदप्रकृतिस्वरत्वं । बिभर्षि । डुभृञ् धारणपोषणयोः । ऊटि सिपि शपः श्लुः । भृञामिदित्यभ्यासस्येत्वं । अषाळ्हं । षह अभिभव इत्यस्मान्निष्ठायां तकारादौ प्रत्यये तीषसह । पा० ७. २. ४८. । इतीटो विकल्पितत्वात् यस्य विभाषेतीट्प्रतिषेधः । ढत्वधत्वष्टुत्वढलोपेषु सहिवहोरोदवर्णस्येत्योत्वे प्राप्ते साढ्यै साढ्वा साढेति निगमे । पा० ६. ३. ११३. । इति निपातनादात्वं । यदुक्तं साढेति तृजंतमेतदिति तदुपलक्षणार्थं द्रष्टव्यं । तन्वि । जसादिषु छंदसि वावचनमिति अच्च घेः । पा० ७. ३. ११९. । इत्यत्वौत्वयोरभावे यणादेशः । उदात्तस्वरितयोर्यण इति विभक्तेः स्वरितत्वं । उदात्तयणो हल्पूर्वादित्युदात्तत्वं तु छांदसत्वान्न प्रवर्तते ॥

॥ इति प्रथमस्य चतुर्थे विंशो वर्गः ॥

एष प्र पूर्वीरिति षडृचं षष्ठं सूक्तं सव्यस्यार्षमैंद्रं जागतमित्युक्तं । अनुक्रांतं च । एष प्र षडिति ॥ विषुवति निष्केवल्य एतत्सूक्तं शंसनीयं । विषुवान्दिवाकीर्त्य इति खंडे सूत्रितं । एष प्र पूर्वीर्वृषामदः प्र मंहिष्ठाय । आ० ८. ६. । इति ॥

तत्र प्रथमामृचमाह ॥

एष प्र पूर्वीरव तस्य चम्रिषोऽत्यो न योषामुदयंस्त भुर्वणिः ।
दक्षं महे पाययते हिरण्ययं रथमावृत्या हरियोगमृभ्वसं ॥ १ ॥
एषः । प्र । पूर्वीः । अव । तस्य । चम्रिषः । अत्यः । न । योषां । उत् । अयंस्त । भुर्वणिः ।
दक्षं । महे । पायय़ते । हिरण्ययं । रथं । आऽवृत्य । हरिऽयोगं । ऋभ्वसं ॥ १ ॥

भुर्वणिरत्रैष इंद्रस्तस्य यजमानस्य पूर्वीः प्रभूताश्चम्रिषश्चमूषु चमसेष्ववस्थिताः सोमलक्षणा इषः प्रावोदयंस्त । प्रकर्षेण पानार्थमुद्धरति । तत्र दृष्टांतः । अत्यो न योषां । यथाश्वो वडवां क्रीडार्थमुपयच्छति । स चेंद्रो हिरण्ययं सुवर्णमयं हरियोगं हरिभ्यां युक्तमृभ्वसमुरु भासमानं रथमावृत्यावस्थाप्य महे महते वृत्रवधादिरूपाय कर्मणे दक्षं प्रवृद्धमात्मानं सोमं पाययते । पानं कारयति ॥ पूर्वीः । पॄ पालनपूरणयोः । पॄभिदिव्यधीत्यादिना कुप्रत्ययः । उदोष्ठ्यपूर्वस्येत्युत्वं । पुरुशब्दाद्वोतो गुणवचनादिति ङीष् । यणादेशः । हलि चेति दीर्घत्वं । प्रत्ययस्वरः । चम्रिषः । चमु अदन इत्यस्मात्कृषिचमितनिधनीत्यादिनोप्रत्ययांतश्चमूशब्दः । तस्यां वर्तमाना इषश्चम्रिषः । वकारस्य रेफश्छांदसः । कृदुत्तरपदप्रकृतिस्वरत्वं । अयंस्त । छांदसे वर्तमाने लुङि व्यत्ययेनात्मनेपदं । एकाच इतीट्प्रतिषेधः । भुर्वणिः । भुर्वतिरत्तिकर्मेति यास्कः । धातुपाठे तु भर्व हिंसायामिति पठ्यते । अस्मादौणादिकोऽनिप्रत्ययः । अकारस्योकारश्छांदसः । पाययते । पा पाने । शाछासाह्वाव्यावेपां युगिति हेतुमति णिचि युगागमः । णिचश्चेत्यात्मनेपदं । हिरण्ययं । ऋत्व्यवास्त्व्येत्यादिना हिरण्यशब्दादुत्तरस्य मयटो मशब्दलोपो निपात्यते । हरियोगं । हर्योर्योगो योजनं यस्मिन् । हरिशब्द इन्प्रत्ययांत आद्युदात्तः । स एव बहुव्रीहिस्वरेण शिष्यते । ऋभ्वसं । उरुभासमित्यस्य पृषोदरादित्वादृभ्वसादेशः ॥

द्वितीयामृचमाह ॥

तं गूर्तयो नेमन्निषः परीणसः समुद्रं न संचरणे सनिष्यवः ।
पतिं दक्षस्य विदथस्य नू सहो गिरिं न वेना अधि रोह तेजसा ॥ २ ॥
तं । गूर्तयः । नेमन्ऽइषः । परीणसः । समुद्रं । न । संऽचरणे । सनिष्यवः ।
पतिं । दक्षस्य । विदथस्य । नु । सहः । गिरिं । न । वेनाः । अधि । रोह । तेजसा ॥ २ ॥

गूर्तयः स्तोतारो नेमन्निषो नमस्कारपूर्वं गच्छंतः । यद्वा नीतहविष्काः परीणसः परितो व्याप्नुवंतः । एवंगुणविशिष्टा यजमानास्तमिंद्रं स्तुतिभिरधिरोहंति । स्तुवंत इत्यर्थः । तत्र दृष्टांतः । सनिष्यवः सनिं धनमात्मन इच्छंतो वणिजो धनार्थं संचरणे संचारे निमित्तभूते सति समुद्रं न । यथा नावा समुद्रमधिरोहंति एवं स्तोतारोऽपि स्वाभिमतधनलाभायेंद्रं स्तुवंतीति भावः । हे स्तोतस्त्वं च

दक्षस्य प्रवृद्धस्य विदथस्य यज्ञस्य पतिं पालयितारं सहः सहस्वंतं बलवंतमिंद्रं तेजसा देवताप्रकाशकेन स्तोत्रेण नू क्षिप्रमधिरोह। स्तुहीति यावत्। तत्र दृष्टांतः। वेनाः कांताः स्त्रियो गिरिं न। यथा पर्वतं स्वाभिमतपुष्पोपचयार्थमधिरोहंति ॥ गूर्तयः। गॄ शब्दे। गृणंति स्तुवंतीति गूर्तयः। क्तिच्क्तौ चेति क्तिच्। बहुलं छंदसीत्युत्वं। हलि चेति दीर्घः। चित इत्यंतोदात्तत्वं। नेमन्निषः। णम प्रह्वत्व इत्यस्माच्छतरि व्यत्ययेनैत्वं। तकारस्य नकारादेशश्च। नमंत इष्यंतीदं प्राप्नुवंतीति नेमन्निषः। इषु गतावित्यस्मात् क्विप् चेति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं। यद्वा णीञ् प्रापण इत्यस्मादर्तिस्तुस्वित्यादिना मन्प्रत्ययः। बहुलवचनान्नकारस्येत्संज्ञाभावः। नीताः प्राप्ता इषो येषां। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। परीणसः। णस कौटिल्य इत्ययं धातुर्गत्यर्थो धातूनामनेकार्थत्वात्। परितो नसंति गच्छंतीति परिणसः। क्विप् चेति क्विप्। निपातस्य चेति पूर्वपदस्य दीर्घत्वं। उपसर्गादसमासेऽपीति णत्वं। व्यत्ययेनाद्युदात्तत्वं। यद्वा नशतिर्गतिकर्मा। अस्मात्पूर्ववत् क्विपि शकारस्य सकारः। सनिष्यवः। षणु दान इत्यस्मादिन् सर्वधातुभ्य इति कर्मणीन्प्रत्ययः। सनिमात्मन इच्छंतीति क्यच्। सर्वप्रातिपदिकेभ्यो लालसायामसुग्वक्तव्यः। सुगागमोऽपि वक्तव्यः। पा० ७. १. ५१. ३.। इति सुक्। क्याच्छंदसीत्युप्रत्ययः। नू। ऋचि तुनुघेति सांहितिको दीर्घः। सहः। अस्मादुत्तरस्य मतुपश्छांदसो लुक् ॥

तृतीयामृचमाह ॥

स तुर्वणिर्महाँ अरेणु पौंस्ये गिरेर्भृष्टिर्न भ्राजते तुजा शवः।
येन शुष्णं मायिनमायसो मदे दुध्र आभूषु रामयन्नि दामनि ॥ ३ ॥

सः। तुर्वणिः। महान्। अरेणु। पौंस्ये। गिरेः। भृष्टिः। न। भ्राजते। तुजा। शवः।
येन। शुष्णं। मायिनं। आयसः। मदे। दुध्रः। आभूषु। रमयत्। नि। दामनि ॥ ३ ॥

स इंद्रस्तुर्वणिः शत्रूणां हिंसिता क्षिप्रकारी वा। तुर्वणिस्तूर्णवनिरिति यास्कः। नि० ६. १४.। तूर्णसंभजन इति तस्यार्थः। महान्प्रवृद्धश्च भवति। तस्येंद्रस्य शवो बलं पौंस्ये वीरैः पुरुषैः कर्तव्ये संग्रामेऽरेणवनवद्यं तुजा शत्रूणां हिंसकं सत् भ्राजते। दीप्यते। तत्र दृष्टांतः। गिरेः पर्वतस्य भृष्टिर्न। शृंगमिव। तद्यथोन्नतं सद्दीप्यते तद्वत्। आयसोऽयोमयकवचयुक्तदेहो दुध्रो दुष्टानां शत्रूणां

धर्तावस्थापयिता। एवंभूत इंद्रो मदे सोमपानेन हर्षे सति येन बलेन शुष्णं सर्वस्य शोषकमसुरं मायिनं मायाविनमाभूषु कारागृहेषु दामनि बंधके निगडे निरामयत् न्यवासयत् तद्बलमिति पूर्वेणान्वयः॥ तुर्वणिः। तुर्वी हिंसार्थः। अस्मादौणादिकोऽनिप्रत्ययः। अरेणु। रेणुवदाच्छादकत्वाद्रेणुशब्देनावद्यमुच्यते। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। तुजा। तुज हिंसायां। इगुपधलक्षणः कः। सुपां सुलुगिति विभक्तेराकारः। दुध्रः। दुष्टान् ध्रियतेऽवस्थापयतीति दुध्रः। धृङ् अवस्थान इत्यस्मादंतर्भावितण्यर्थान्मूलविभुजादित्वात्कप्रत्ययः। पा॰ ३.२.५.२.। यणादेशः। रेफलोपश्छांदसः। रामयत्। अमंतत्वान्मित्त्वे मितां ह्रस्व इति ह्रस्वत्वं। छांदसः संहितायां दीर्घः॥

चतुर्थीमृचमाह॥

दे॒वी यदि॒ तवि॑षी॒ त्वावृ॑धो॒तय॒ इंद्रं॒ सिष॑क्त्यु॒षसं॒ न सूर्यः॑।
यो धृ॒ष्णुना॒ शव॑सा॒ बाध॑ते॒ तम॒ इय॑र्ति॒ रे॒णुं बृ॒हद॑र्हरि॒ष्वणिः॑॥ ४॥
दे॒वी। यदि॑। तवि॑षी। त्वाऽवृ॑धा। ऊ॒तये॑। इंद्रं॑। सिस॑क्ति। उ॒षसं॑। न। सूर्यः॑।
यः। धृ॒ष्णुना॑। शव॑सा। बाध॑ते। तमः॑। इय॑र्ति। रे॒णुं। बृ॒हत्। अ॒र्ह॒रि॒ऽस्वनिः॑॥ ४॥

य इंद्रो धृष्णुना धर्षकेण शवसा बलेन तमस्तमोरूपं वृत्रादिमसुरं बाधते। हिनस्ति। ऊतये रक्षणाय त्वावृधा त्वया स्तोत्रा वर्धितं तमिंद्रं देवी तविषी द्योतमानं बलं यदि यदा सिषक्ति। समवैति। सेवत इति यास्कः। सूर्य उषसं न यथोषोदेवतां सेवते। नित्यं तत्संबद्धो भवतीत्यर्थः। तदानीमर्हरिष्वणिः। गच्छंतो हरंतीत्यर्हरयः शत्रवः। तेषां व्यथोत्पादनेन स्वनयिता शब्दयितेंद्रो रेणुं रेषणं हिंसनं बृहत्प्रभूतमियर्ति। शत्रून् गमयति॥ त्वावृधा। त्वया वर्धत इति त्वावृत्। क्विप् चेति क्विप्। प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः। छांदसं दकारस्यात्वं। सुपां सुलुगिति द्वितीयाया आकारः। सिषक्ति। षच समवाये। बहुलं छंदसीति शपः श्लुः। बहुलं छंदसीत्यभ्यासस्येत्वं। इयर्ति। ऋ सृ गतौ। जौहोत्यादिकः। अस्मादंतर्भावितण्यर्थाल्लट्। शपः श्लुः। द्विर्भावोरदत्वहलादिशेषाः। अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं। अभ्यासस्यासवर्णे इतीयङादेशः। अनुदात्ते चेत्यभ्यासस्याद्युदात्तत्वं। पूर्वपदस्य वाक्यांतरगतत्वेन पदादपरत्वान्निघाताभावः। रेणुं। री गतिरेषणयोः। अस्मादौणादिको नुप्रत्ययः। अर्हरिष्वणिः। अर्तेरन्येभ्योऽपि दृश्यंत इति विच्। अरो गच्छंतश्चेमे हरयश्चेत्यर्हरयः। तेषां स्वनयिता।

स्यमु स्वन ध्वन शब्दे। अस्माण्ण्यंतादौणादिक इनप्रत्ययः। णेरनिटीति णिलोपः। घटादित्वान्मित्त्वे मितां ह्रस्व इति ह्रस्वत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं ॥

पंचमीमृचमाह ॥

वि यत्तिरो धरुणमच्युतं रजोऽतिष्ठिपो दिव आतासु बर्हणा।
स्वर्मीळ्हे यन्मद इंद्र हर्ष्याहन्वृत्रं निरपामौब्जो अर्णवं ॥ ५ ॥

वि। यत्। तिरः। धरुणं। अच्युतं। रजः। अतिस्थिपः। दिवः। आतासु। बर्हणा।
स्वःऽमीळ्हे। यत्। मदे। इंद्र। हर्ष्या। अहन्। वृत्रं। निः। अपां। औब्जः। अर्णवं ॥ ५ ॥

यद्यदा तिरो वृत्रेण तिरोहितं धरुणं सर्वस्य प्राणिजातस्य धारकमच्युतं विनाशरहितं रज उदकं दिवो द्युलोकादातासु। आता इति दिङ्नाम। आतासु विस्तृतासु दिक्षु हे इंद्र बर्हणा हंता त्वं व्यतिष्ठिपः। विविधं स्थापयां चकृषे। तथा यद्यदा स्वर्मीळ्हे। मीळ्हमिति धननाम। स्वः सुष्ठु गंतव्यं मीळ्हं धनं यस्मिन् तस्मिन्संग्रामे मदे तव सोमपानेन हर्षे सति हर्ष्या हृष्टया शक्त्या वृत्रमावरकमसुरमहन्। त्वमवधीः। तदानीमपां पूर्णमर्णवं मेघं निरौब्जः। वर्षणाभिमुखमधोमुखमकार्षीः। वृष्टेरावरकं वृत्रं हत्वा वृष्टिजलेन भूमिं न्यसक्षीरिति तात्पर्यार्थः ॥ अतिष्ठिपः। तिष्ठतेर्ण्यंताल्लुङि च्लेश्चङादेशः। णिलोपः। तिष्ठतेरित्। पा० ७.४.५.। इत्युपधाया इत्वं। चङीति द्विर्वचने शर्पूर्वाः खय इति थकारः शिष्यते। चर्त्वेन तकारः। अडागम उदात्तः। यद्वृत्तयोगादनिघातः। बर्हणा। सुपां सुलुगिति सोराकारः। स्वर्मीळ्हे। मिह सेचने। निष्ठा। हो ढ इति ढत्वं। झषस्तथोर्धोऽध इति तकारस्य धत्वं। तस्य ष्टुत्वे ढो ढे लोप इति ढलोपः। ढ्रलोपे पूर्वस्येति दीर्घत्वं। स्वरित्येतत् न्यङ्स्वरौ स्वरिताविति स्वर्यते। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन तदेव शिष्यते। अहन्। हंतेर्लङि मध्यमैकवचने हल्ङ्याब्भ्य इति सेर्लोपः। यद्वृत्तयोगादनिघातः। औब्जः। उब्ज आर्जवे। लङ्याडागमो वृद्धिश्च ॥

षष्ठीमृचमाह ॥

त्वं दिवो धरुणं धिष ओजसा पृथिव्या इंद्र सदनेषु माहिनः।
त्वं सुतस्य मदे अरिणा अपो वि वृत्रस्य समया पाष्यारुजः ॥ ६ ॥

त्वं । दिवः । धरुणं । धिषे । ओजसा । पृथिव्याः । इंद्र । सदनेषु । माहिनः ।
त्वं । सुतस्य । मदे । अरिणाः । अपः । वि । वृत्रस्य । समया । पाष्या । अरुजः ॥ ६ ॥

हे इंद्र माहिनः प्रवृद्धस्त्वं दिवो द्युलोकात्पृथिव्याः सदनेषु प्रदेशेष्वोजसा बलेन धरुणं सर्वस्य जगतो धारकं वृष्टिजलं धिषे । दधिषे । स्थापयसि । यस्मात्त्वं सुतस्य सोमस्य पानेन मदे हर्षे सत्यपो जलान्यरिणाः । मेघान्निरगमयः । वृत्रस्यावरकं वृत्रं च समया धृष्टया पाष्या शिलया यद्वा शक्त्या व्यरुजः । विशेषेणाभांक्षीः ॥ धिषे । दधातेश्छांदसो वर्तमाने लिट् । द्विर्वचनप्रकरणे छंदसि वेति वचनाद्द्विर्वचनाभावः । क्रादिनियमादिडागम आतो लोप इटि चेत्याकारलोपः । माहिनः । महेरिनण् च । उ० २. ५७. । इति मह पूजायामित्यस्मादौणादिक इनण्प्रत्ययः । अत उपधाया इति वृद्धिः । अरिणाः । री गतिरेषणयोः । क्र्यादिकः । लङि सिपि प्वादीनां ह्रस्व इति ह्रस्वत्वं । समया । षम ष्टम वैक्लव्ये । समतीति समा । पचाद्यच् । चित इत्यंतोदात्तत्वं । पाष्या । पिषॢ संचूर्णन इत्यस्मादौणादिक इन्प्रत्ययः । बहुलवचनादुपधाया आकारः । कृदिकारादक्तिन इति ङीष् । प्रत्ययस्वरेणांतोदात्तः । तृतीयैकवचने यणादेशे सत्युदात्तस्वरितयोर्यण इति स्वरितत्वं । अरुजः । रुजो भंगे । तौदादिकः । शस्य ङित्त्वाद्गुणाभावः ॥

॥ इति प्रथमस्य चतुर्थे एकविंशो वर्गः ॥

प्र मंहिष्ठायेति षडृचं सप्तमं सूक्तं सव्यस्यार्षमैंद्रं जागतं । तथा चानुक्रांतं । प्र मंहिष्ठायेति ॥ विषुवति निष्केवल्य इदं सूक्तं शंसनीयं । सूचितं च । प्र मंहिष्ठाय त्यमूष्वितीह तार्क्ष्यमंततः । आ० ८. ६. । इति ॥ उक्थसंस्थे क्रतौ तृतीयसवने ब्राह्मणाच्छंसिशस्त्रेऽप्येतत्सूक्तं । सूचितं च । सर्वाः ककुभः प्र मंहिष्ठायोद्प्रुतः । आ० ६. १. । इति ॥

तत्र प्रथमामृचमाह ॥

प्र मंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसे मतिं भरे ।
अपामिव प्रवणे यस्य दुर्धरं राधो विश्वायु शवसे अपावृतं ॥ १ ॥

प्र । मंहिष्ठाय । बृहते । बृहत्ऽरये । सत्यऽशुष्माय । तवसे । मतिं । भरे ।
अपांऽइव । प्रवणे । यस्य । दुःऽधरं । राधः । विश्वऽआयु । शवसे । अपऽवृतं ॥ १ ॥

मंहिष्ठाय। मंहतिर्दानकर्मेति यास्कः। दातृतमाय बृहते गुणैर्महते बृहद्रये महाधनाय सत्यशुष्मायावितथबलाय तवस आकारतः प्रवृद्धाय। एवंगुणविशिष्टायेंद्राय मतिं मननीयां स्तुतिं प्रभरे। प्रकर्षेण संपादयामि। यस्येंद्रस्य बलं दुर्धरं। अन्यैर्धर्तुमशक्यं। तत्र दृष्टांतः। प्रवणे निम्नप्रदेशेऽपामिव। यथा जलानां वेगः केनाप्यवस्थापयितुं न शक्यते तद्वत्। तथा राधो धनं विश्वायु सर्वेषु व्याप्तं शवसे स्तोतृणां बलाय येनेंद्रेणापावृतं। अपगतावरणं क्रियते तस्येंद्रस्येति पूर्वेण संबंधः॥ मंहिष्ठाय। अतिशयेन मंहिता मंहिष्ठः। तुश्छंदसीतीष्ठन्प्रत्ययः। तुरिष्ठेमेयःस्विति तृलोपः। बृहते। बृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वं। उत्तरयोर्बहुव्रीहिस्वरः। मतिं। मंत्रे वृषेत्यादिना क्तिन उदात्तत्वं। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः। दुर्धरं। धृञ् धारणे। ईषद्दुःसुष्विति कर्मणि खल्। विश्वायु। विश्वस्मिन्सर्वस्मिन्नायु गमनं यस्य तद्विश्वायु। एतेश्छंदसीण इत्युण्प्रत्ययः। बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं। अपावृतं। कर्मणि निष्ठा। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं॥

द्वितीयामृचमाह॥

अध ते विश्वमनु हासदिष्टय आपो निम्नेव सवना हविष्मतः।
यत्पर्वते न समशीत हर्यत इंद्रस्य वज्रः श्नथिता हिरण्ययः॥ २॥

अध। ते। विश्वं। अनु। ह। असत्। इष्टये। आपः। निम्नाऽइव। सवना। हविष्मतः।
यत्। पर्वते। न। संऽअशीत। हर्यतः। इंद्रस्य। वज्रः। श्नथिता। हिरण्ययः॥ २॥

अध हानंतरमेव हे इंद्र विश्वं सर्वमिदं जगत्ते तव संबंधिन इष्टये यागायान्वसत्। अन्वभवत्। यद्वा। इष्टये हविरादिभिस्तव प्राप्तय इति योज्यं। हविष्मतो यजमानस्य सवना सवनानि यज्ञजातानि निम्नेव निम्नानि भूस्थलान्याप इव त्वां संभजंत इति शेषः। हर्यतः शत्रुवधं प्रेप्सत इंद्रस्य। हर्यतिः प्रेप्साकर्मेति यास्कः। यद्वा हर्यतः शोभनः। हिरण्ययो हिरण्मयः श्नथिता शत्रूणां हिंसनशीलो वज्रः पर्वते पर्ववति शिलोच्चये वृत्रे वा यद्यदा समशीत संसुप्तो नाभवत् किंतु जागरितः सन्नवधीदित्यर्थः। यदेंद्रेण प्रेरितो वज्रोऽप्रतिहतः सन्वृत्रमवधीत्तदाप्रभृत्येव तं यष्टुं सर्वे यजमानाः प्रावर्तिषतेति भावः॥ अध। छांदसं धत्वं। असत्। अस्तेर्लङि बहुलं छंदसीति शपो लुगभावः।

इष्टये। यजतेर्भावे क्तिनि वचिस्वपीत्यादिना संप्रसारणं। व्रश्चादिना षत्वं। व्यत्ययेनांतोदात्तत्वं। यद्वा। इष गतावित्यस्माद्भावे क्तिनि मंत्रे वृषेषेति तस्योदात्तत्वं। निम्नेव सवना। शेश्छंदसीति शेर्लोपः। समशीत। शीङ् स्वप्ने। लङि संज्ञापूर्वकस्य विधेरनित्यत्वात् शीङः सार्वधातुके। पा० ७.४.२१.। इति गुणाभावः। हर्यतः। हर्य गतिकांत्योः। भृमृदृशीत्यादिनातच्प्रत्ययः। श्नथिता। श्नथ क्नथ क्रथ हिंसार्थाः। ताच्छीलिकस्तृन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं॥

तृतीयामृचमाह॥

अस्मै भीमाय नमसा समध्वर उषो न शुभ्र आ भरा पनीयसे।
यस्य धाम श्रवसे नामेंद्रियं ज्योतिरकारि हरितो नायसे॥ ३॥

अस्मै। भीमाय। नमसा। सं। अध्वरे। उषः। न। शुभ्रे। आ। भर। पनीयसे।
यस्य। धाम। श्रवसे। नाम। इंद्रियं। ज्योतिः। अकारि। हरितः। न। अयसे॥ ३॥

हे उषः। उषोदेवते शुभ्रे शोभने त्वं भीमाय शत्रूणां भयंकराय पनीयसेऽतिशयेन स्तोतव्यायास्मा इंद्रायाध्वरे हिंसारहितेऽस्मिन्यागे। नेति संप्रत्यर्थे। तथा च यास्कः। अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोग इहेव निधेहि। नि० ७.३१.। इति। संप्रतीदानीं नमसा नमो हविर्लक्षणमन्नं समाभर। सम्यक् संपादय। धाम सर्वस्य धारकं नाम स्तोतृषु नमनशीलं प्रसिद्धं वेंद्रियमिंद्रत्वस्य परमैश्वर्यस्य लिंगं यस्येंद्रस्यैवंविधं ज्योतिः श्रवसेऽन्नाय हविर्लक्षणान्नलाभार्थमयस इतस्ततो गमनायाकारि। क्रियते। हरितो न। यथाश्वान्सादिनः स्वाभिलषितदेशं गमयंति तद्वदिंद्रोऽपि स्वाभिमतहविर्लाभाय स्वकीयं तेजो गमयतीति भावः॥ उषः। पादादित्वान्निघाताभावः। शुभ्रे। शुभ दीप्तौ। स्फायितंचीत्यादिना रक्। भर। हृग्रहोर्भ इति भत्वं। द्व्यचोऽतस्तिङ इति दीर्घः। पनीयसे। पनतेः स्तुत्यर्थाद्बहुलवचनात्कर्मण्यसुन्। तस्मादातिशायनिक ईयसुनि टेरिति टिलोपः। अकारि। छंदसि लुङ्लङ्लिट इति वर्तमाने कर्मणि लुङ्। यद्वृत्तयोगादनिघातः। अडागम उदात्तः। अयसे। अय गतावित्यस्माद्भावेऽसुन्॥

चतुर्थीमृचमाह॥

इमे त इंद्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो।
नहि त्वदन्यो गिर्वणो गिरः सघत्क्षोणीरिव प्रति नो हर्य तद्वचः॥ ४॥

इमे। ते। इंद्र। ते। वयं। पुरुऽस्तुत। ये। त्वा। आऽरभ्यं। चरामसि। प्रभुवसो इति प्रभुऽवसो।
नहि। त्वत्। अन्यः। गिर्वणः। गिरः। सघत्। क्षोणीःऽइव। प्रति। नः। हर्य। तत्।
वचः ॥ ४ ॥

हे इंद्र प्रभूवसो प्रभूतधन। अत एव पुरुष्टुत पुरुभिर्बहुभिर्यजमानैः स्तुत। ये च वयं त्वा त्वामारभ्याश्रयतयावलंब्य चरामसि। चरामो यागे वर्तामहे। त इमे वयं ते तव स्वभूताः। हे गिर्वणः। गीर्भिर्वननीयेंद्र त्वदन्यस्त्वत्तोऽन्यः कश्चिदपि गिरः स्तुतीर्नहि सघत्। न हि प्राप्नोति। अतस्त्वं नोऽस्माकं तत्स्तुतिलक्षणं वचः प्रतिहर्य। कामयस्व। क्षोणीरिव। यथा क्षोणी पृथिवी स्वकीयानि भूतजातानि कामयते ॥ चरामसि। इदंतो मसिः। शपः पित्त्वादनुदात्तत्वे धातुस्वरः। यद्वृत्तयोगादनिघातः। सघत्। षघ हिंसायां। अत्र प्राप्त्यर्थो धातूनामनेकार्थत्वात्। लेट्यडागमः। बहुलं छंदसीति विकरणस्य लुक्। पादादित्वान्निघाताभावः। क्षोणीरिव। हल्ङ्याब्भ्य इति सुलोपाभावश्छांदसः ॥

पंचमीमृचमाह ॥

भूरिं त इंद्र वीर्यं१ तवं स्मस्यस्य स्तोतुर्मघवन्काममा पृण।
अनुं ते द्यौर्बृहती वीर्यं मम इयं चं ते पृथिवी नेम ओजसे ॥ ५ ॥

भूरिं। ते। इंद्र। वीर्यं। तवं। स्मसि। अस्य। स्तोतुः। मघऽवन्। कामं। आ। पृण।
अनुं। ते। द्यौः। बृहती। वीर्यं। ममे। इयं। च। ते। पृथिवी। नेमे। ओजसे ॥ ५ ॥

हे इंद्र ते तव वीर्यं सामर्थ्यं भूरि बहु न केनाप्यवच्छेत्तुं शक्यते। तादृशस्य तव वयं स्मसि। स्वभूता भवामः। हे मघवन् त्वमस्य स्तोतुः त्वां स्तुवतो यजमानस्य काममभिलाषमापृण। आपूरय। बृहती द्यौर्महान् द्युलोकोऽपि ते तव वीर्यमनुममे। अन्वमंस्त। इंद्रेण महावस्थानादियं चेयमपि पृथिवी ते तवौजसे बलाय नेमे। प्रह्वीबभूव। त्वद्बलाद्भीता सत्यध एव वर्तत इति भावः ॥ स्मसि। अस भुवि। लटि श्नसोरल्लोप इत्यकारलोपः। इदंतो मसिः। पृण। पृण प्रीणने। अत्र प्रीतिहेतुतया पूरणं लक्ष्यते। तुदादित्वाच्छप्रत्ययः। तस्य ङित्त्वाद्गुणाभावः। ममे। माङ् माने शब्दे च। ङित्त्वादात्मनेपदं। लिट्यातो लोप इटि चेत्याकारलोपः। नेमे। णम प्रह्वत्वे। लिट्यत एकहल्मध्य इत्येत्वाभ्यासलोपौ। तिङ्ङतिङ इति निघातः ॥

षष्ठीमृचमाह ॥

त्वं तमिंद्र पर्वतं महामुरुं वज्रेण वज्रिन्पर्वशश्चकर्तिथ ।
अवासृजो निवृताः सर्तवा अपः सत्रा विश्वं दधिषे केवलं सहः ॥ ६ ॥

त्वं । तं । इंद्र । पर्वतं । महां । उरुं । वज्रेण । वज्रिन् । पर्वऽशः । चकर्तिथ ।
अव । असृजः । निऽवृताः । सर्तवै । अपः । सत्रा । विश्वं । दधिषे । केवलं । सहः ॥ ६ ॥

हे वज्रिन्वज्रवन्निंद्र त्वं तं प्रसिद्धं महामायामतो महांतमुरुं विस्तीर्णं पर्वतं पर्ववंतं मेघं वृत्रासुरं वा वज्रेणायुधेन पर्वशः पर्वणि पर्वणि चकर्तिथ । शकलीचकृषे । तेन मेघेन निवृता आवृता अपः सर्तवै सरणाय गमनाय अवासृजः । अवाङ्मुखमस्राक्षीः । अतस्त्वमेव केवलं विश्वं व्याप्तं सहो बलं दधिषे । धारयसि । नान्यः कश्चिदिति । यदेतत्तत्सत्रा सत्यमेव । सत्रेति सत्यनाम । सत्रेत्येति तन्नामसु पाठात् ॥ महां । महांतं । नकारतकारयोर्लोपश्छांदसः । चकर्तिथ । कृती छेदने । लिटि थल्यभ्यासस्योरदत्वहलादिशेषचुत्वानि । सर्तवै । कृत्यार्थे तवैकेनिति भावे तवैप्रत्ययः । कृन्मेजंतः । पा॰ १. १. ३९. । इत्यव्ययत्वेऽव्ययादाप्सुप इति सुपो लुक् । अंतश्च तवै युगपदित्याद्यंतयोर्युगपदुदात्तत्वं । दधिषे । लिटि क्रादिनियमादिट् ॥

॥ इति प्रथमस्य चतुर्थे द्वाविंशो वर्गः ॥
॥ इति प्रथमे मंडले दशमोऽनुवाकः ॥

एकादशानुवाके सप्त सूक्तानि । तत्र नू चिदिति नवर्चं प्रथमं सूक्तं गौतमस्य नोधस आर्षमाग्नेयं । आद्याः पंच जगत्यः । शिष्टाश्चतस्रस्त्रिष्टुभः । तथा चानुक्रांतं । नू चिन्नव नोधा गौतम आग्नेयं हि चतुस्त्रिष्टुबंतमिति । हीति वचनादुत्तरे च द्वे सूक्ते अग्निदेवताके ॥ अभिप्लवषडहस्य पंचमेऽहन्याग्निमारुत इदं जातवेदस्यं निविद्धानं । तृतीयस्येति खंडे सूचितं । पृक्षस्य वृष्णो वृष्णे शर्धाय नू चित्सहोजा इत्याग्निमारुतं । आ॰ ७. ७. । इति ॥ प्रातरनुवाकस्याग्नेये क्रतावाश्विनशस्त्रे च जागते छंदस्यादितः पंचर्चः । सूचितं च । त्वमग्ने प्रथमो अंगिरा नू चित्सहोजा अमृतो नितुंदत इति पंच । आ॰ ४. १३. । इति ॥

तत्र प्रथमामृचमाह ॥

नू चित्सहोजा अमृतो नि तुंदते होता यद्दूतो अभवद्विवस्वतः ।
वि साधिष्ठेभिः पथिभी रजो मम आ देवताता हविषा विवासति ॥ १ ॥

नु । चित् । सहःऽजाः । अमृतः । नि । तुंदते । होता । यत् । दूतः । अभवत् । विवस्वतः ।
वि । साधिष्ठेभिः । पथिऽभिः । रजः । ममे । आ । देवऽताता । हविषा । विवासति ॥ १ ॥

सहोजाः सहसा बलेन जातः । अग्निर्हि बलेन मथ्यमानारण्योः सकाशाज्जायते । अमृतो मरणरहितः । एवंभूतोऽग्निर्नू चित् क्षिप्रमेव नितुंदते । नितरां व्यथयति । उत्पन्नमात्रस्याग्नेः स्प्रष्टुमशक्यत्वात् । यद्वा निर्गच्छति । तुंदतिर्गत्यर्थः सौत्रो धातुः । यद्यदा होता देवानामाह्वाता होमनिष्पादको वायमग्निर्विवस्वतः परिचरतो यजमानस्य देवान्प्रति हविर्वहनाय दूतोऽभवत् । हविर्वहने नियुक्तो भवति । तदानीं साधिष्ठेभिः समीचीनैः पथिभिर्मार्गैर्गच्छन् रजोऽंतरिक्षलोकं विममे । निर्ममे । पूर्वं विद्यमानमप्यंतरिक्षमसत्कल्पमभूत् । इदानीं तस्य तेजसा प्रकाशमानं सदुत्पन्नमिव दृश्यते । किंच देवताता । देवतातिरिति यज्ञनाम । देवताती यज्ञे हविषा चरुपुरोडाशादिलक्षणेन देवानाविवासति । परिचरति ॥ अमृतः । मृतं मरणमस्य नास्तीति बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं । तुंदते । तुद व्यथने । स्वरितेत्त्वादात्मनेपदं । नकारोपजनश्छांदसः । साधिष्ठेभिः । बाढशब्दादातिशायनिक इष्ठन्यंतिकबाढयोर्नेदसाधौ । पा० ५. ३. ६३. । इति साधादेशः । बहुलं छंदसीति भिस ऐसभावः । नित्त्वादाद्युदात्तत्वं । देवताता । सर्वदेवात्तातिलिति स्वार्थिकस्तातिल्प्रत्ययः । तेन तत्संबंधी यज्ञो लक्ष्यते । यद्वा । देवान्हविषाविवासतीति योज्यं । सुपां सुलुगिति विभक्तेर्डादेशः । लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं ॥

द्वितीयामृचमाह ॥

आ स्वमद्म युवमानो अजरस्तृष्वविष्यन्नतसेषु तिष्ठति ।
अत्यो न पृष्ठं प्रुषितस्य रोचते दिवो न सानु स्तनयन्नचिक्रदत् ॥ २ ॥

आ । स्वं । अद्म । युवमानः । अजरः । तृषु । अविष्यन् । अतसेषु । तिष्ठति ।
अत्यः । न । पृष्ठं । प्रुषितस्य । रोचते । दिवः । न । सानु । स्तनयन् । अचिक्रदत् ॥ २ ॥

अजरो जरारहितोऽयमग्निः स्वं स्वकीयमन्नमादनीयं तृणगुल्मादिकं युवमानः स्वकीयज्वालया संमिश्रयन् । तदनंतरं चाविथन् भक्षयंश्च । अविष्यन्नित्येतदत्तिकर्मसु पठितं । एवंभूतोऽग्निस्तृषु क्षिप्रमेवातसेषु प्रभूतेषु काष्ठेष्वातिष्ठति । आरोहति । अत्रातसशब्दः काष्ठवाची । अतसं न शुष्कमिति दर्शनात् । प्रुषितस्य दग्धुमितस्ततः प्रवृत्तस्याग्नेः पृष्ठमुपर्यवस्थितं ज्वालाजालमत्यो न रोचते । यथा सततगमनशीलोऽत्योऽश्व इतस्ततो गच्छन् शोभते । एवमग्नेर्ज्वालापि सर्वत्र गच्छंती शोभत इति भावः । तदानीं दिवो द्युलोकस्य संबंधि सानु समुच्छ्रितमभ्रं स्तनयन्न शब्दयन्निवाचिक्रदत् । गंभीरं शब्दमात्मानमचीकरत् ॥ युवमानः । यु मिश्रणे । व्यत्ययेनात्मनेपदं । शपि प्राप्ते व्यत्ययेन शः । तस्य बहुलं छंदसीति लुगभावः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वर एव शिष्यते । अजरः । बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं । अचिक्रदत् । कदि क्रदि क्लदि आह्वाने रोदने च । अस्माण्यंताल्लुङि चङ्यागमानुशासनस्यानित्यत्वान्नुमभावः । ह्रिभावहलादिशेषसन्वद्भावेत्वानि ॥

तृतीयामृचमाह ॥

क्राणा रुद्रेभिर्वसुभिः पुरोहितो होता निषत्तो रयिषाळमर्त्यः ।
रथो न विक्ष्वृंजसान आयुषु व्यानुषग्वार्या देव ऋण्वति ॥ ३ ॥

क्राणा । रुद्रेभिः । वसुऽभिः । पुरःऽहितः । होता । निऽसत्तः । रयिषाट् । अमर्त्यः ।
रथः । न । विक्षु । ऋंजसानः । आयुषु । वि । आनुषक् । वार्या । देवः । ऋण्वति ॥ ३ ॥

क्राणा हविर्वहनं कुर्वाणो रुद्रेभी रुद्रैर्वसुभिश्च पुरोहितः पुरस्कृतो होता देवानामाह्वाता निषत्तो हविःस्वीकरणाय देवयजने निषण्णो रयिषाट् रयीणां शत्रुधनानामभिभवितामर्त्यो मरणरहितः । एवंभूतो देवो द्योतमानोऽग्निर्विक्षु प्रजासु लौकिकजनेषु रथो न रथ इवायुषु यजमानलक्षणेषु मनुष्येष्वृंजसानः स्तूयमानो वार्या वार्याणि संभजनीयानि धनान्यानुषक् आनुषक्तं यथा भवति तथा व्यृण्वति । विशेषेण प्रापयति । यद्वा वार्याणि वरणीयानि हवींषि स्वयं प्राप्नोति ॥ क्राणा । करोतेः शानचि बहुलं छंदसीति विकरणस्य लुक् । शानचो ङित्त्वाद्गुणाभावे यणादेशः । चित इत्यंतोदात्तत्वं । सुपां सुलुगिति सोः पूर्वस-

वर्णदीर्घत्वं । निषत्तः । षद्लृ विशरणगत्यवसादनेषु । असमासकर्मणि निष्ठा । नसत्तनिषत्तेत्यादिना । पा० ८. २. ६१. । निष्ठानत्वाभावो निपातितः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । रयिषाट् । षह अभिभवे । छंदसि सहः । पा० ३. २. ६३. । इति ण्विः । सहेः साडः सः । पा० ८. ३. ५६. । इति षत्वं । ऋंजसानः । ऋंजति स्तुतिकर्मा । असानजित्यनुवृत्तावृंजिवृधिमंदिसहिभ्यः कित् । उ० २. ८४. । इति कर्मण्यसानच्प्रत्ययः । चित इत्यंतोदात्तत्वं । आयुषु । आयव इति मनुष्यनाम । इण् गतावित्यस्माच्छंदसीण इत्युण्प्रत्ययः । वृद्ध्यायादेशौ । वार्या । वृङ् संभक्तौ । ऋहलोर्ण्यत् । तित्स्वरिते प्राप्ते ईडवंदवृशंसदुहां ण्यत इत्याद्युदात्तत्वं । शेश्छंदसीति शेर्लोपः । ऋखति । रिवि गतौ । व्यत्ययेन संप्रसारणं । इदित्वान्नुम् । कर्तरि शप् ॥

चतुर्थीमृचमाह ॥

वि वातजूतो अतसेषु तिष्ठते वृथा जुहूभिः सृण्या तुविष्वणिः ।
तृषु यदग्ने वनिनो वृषायसे कृष्णं त एम रुशदूर्मे अजर ॥ ४ ॥
वि । वातऽजूतः । अतसेषु । तिष्ठते । वृथा । जुहूभिः । सृण्या । तुविऽस्वनिः ।
तृषु । यत् । अग्ने । वनिनः । वृषऽयसे । कृष्णं । ते । एम । रुशत्ऽऊर्मे । अजर ॥ ४ ॥

वातजूतो वायुना प्रेरितस्तुविष्वणिर्महास्वनः । एवंभूतोऽग्निर्जुहूभिः स्वकीयाभिर्जिह्वाभिः सृण्या सरणशीलेन तेजःसमूहेन च युक्तः सन् । वृथेत्यनायासवचनः । वृथानायासेनैवातसेषून्नतेषु वृक्षेषु वितिष्ठते । विशेषेण तिष्ठति । हे अग्ने यद्यदा वनिनो वनसंबंधान्वृक्षान्दग्धुं वृषायसे । वृषवदाचरसि । दहसीत्यर्थः । हे रुशदूर्मे दीप्तज्वाल । अजर जरारहिताग्ने ते तवैम गमनमार्गः कृष्णं कृष्णवर्णो भवति ॥ वातजूतः । जू इति सौत्रो धातुः । वातेन जूतो वातजूतः । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं । वितिष्ठते । समवप्रविभ्यः स्थ इत्यात्मनेपदं । जुहूभिः । हु दानादनयोः । हूयत आस्विति जुह्वः स्रुचः । ध्रुवञ्चेति क्विप् । चकाराद्दीर्घः । श्रुवद्भावाद्द्विर्भावादि । धातोरित्यंतोदात्तत्वं । सृण्या । सृ गतौ । सरतीति सृणिः । सृवृषिभ्यां किदिति निप्रत्ययः । एम । एत्यनेनेत्येम मार्गः । इण् गतावित्यस्मात्करण औणादिको मनिन् । नित्त्वादाद्युदात्तत्वं ॥

पंचमीमृचमाह ॥

तपुर्जंभो वन आ वातचोदितो यूथे न साह्वाँ अव वाति वंसगः ।
अभिव्रजन्नक्षितं पाजसा रजः स्थातुश्चरथं भयते पतत्रिणः ॥ ५ ॥

तपुःऽजंभः । वने । आ । वातऽचोदितः । यूथे । न । सह्वान् । अव । वाति । वंसगः ।
अभिऽव्रजन् । अक्षितं । पाजसा । रजः । स्थातुः । चरथं । भयते । पतत्रिणः ॥ ५ ॥

तपुर्जंभः । तपूंषि ज्वाला एव जंभा आयुधानि मुखानि वा यस्य स तथोक्तः । वातचोदितः । वायुना प्रेरितः । एवंभूतोऽग्निर्यूथे ज्वालासमूहे सत्यक्षितमक्षीणं रज आर्द्रवृक्षांतर्गतमुदकं पाजसा तेजोबलेनाभिव्रजन् आभिमुख्येन गच्छन्वनेऽरण्ये साह्वान् सर्वमभिभवन् आभिमुख्येनाववाति । व्याप्नोति । तत्र दृष्टांतः । वंसगो न । यथा वननीयगतिर्वृषो गोयूथे सर्वमभिभवन्वर्तते तद्वत् । यस्मादेवं तस्मात्पतत्रिणः पतनवतोऽग्नेः सकाशात्स्थातुः स्थावरं चरथं च जंगमं च भयते । बिभेति ॥ साह्वान् । दाश्वान् साह्वानिति क्वसुप्रत्ययांतो निपातितः । दीर्घादटि समानपाद इति संहितायां नकारस्य रुत्वं । आतोऽटि नित्यमिति सानुनासिक आकारः । यत्वलोपौ । ह्रस्वत्वं छांदसं । स्थातुः । कमिमनिजनीत्यादिना विहितस्तुप्रत्ययो बहुलवचनात्तिष्ठतेरपि भवति । यद्वा । स्थातुरनंतरं चरथं भयते । प्रथमं स्थातृ स्थावरं बिभेति पश्चाच्चरथमित्यर्थः । चरथं । चर गत्यर्थः । अस्मादौणादिकोऽथप्रत्ययः । भयते । ञिभी भये । व्यत्ययेनात्मनेपदं । बहुलं छंदसीति श्नोरभावः । गुणावादेशौ ॥

॥ इति प्रथमस्य चतुर्थे त्रयोविंशो वर्गः ॥

षष्ठीमृचमाह ॥

दधुष्ट्वा भृगवो मानुषेष्वा रयिं न चारुं सुहवं जनेभ्यः ।
होतारमग्ने अतिथिं वरेण्यं मित्रं न शेवं दिव्याय जन्मने ॥ ६ ॥

दधुः । त्वा । भृगवः । मानुषेषु । आ । रयिं । न । चारुं । सुऽहवं । जनेभ्यः ।
होतारं । अग्ने । अतिथिं । वरेण्यं । मित्रं । न । शेवं । दिव्याय । जन्मने ॥ ६ ॥

हे अग्ने त्वा त्वां मानुषेषु मनुष्येषु मध्ये भृगव एतत्संज्ञा महर्षयो दिव्याय

जन्मने देवत्वप्राप्तये चारुं रयिं न शोभनं धनमिवादधुः । आधानसंभारेषु मंत्रैः स्थापनेन समस्कुर्वन् । कीदृशं त्वां । जनेभ्यः सुहवं । यजमानार्थमाह्वातुं सुशकं । होतारं । देवानामाह्वातारं । अतिथिं । अतिथिवत्पूज्यं । यद्वा देवयजनदेशेषु सततं गंतारं । वरेण्यं वरणीयं मित्रं न शेवं । यथा सखा सुखकरो भवति तद्वत् सुखकरमित्यर्थः ॥ दधुः । लिट्युस्यातो लोप इटि चेत्याकारलोपः । युष्मत्तत्ततक्षुःष्वंतःपादमिति विसर्जनीयस्य षत्वं । सुहवं । ह्वयतेरीषद्दुःसुष्विति खल् । बहुलं छंदसीति संप्रसारणं । परपूर्वत्वं । गुणावादेशौ । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । कृदुत्तरपदप्रकृतिस्वरत्वं ॥

सप्तमीमृचमाह ॥

होतारं सप्त जुह्वो३ यजिष्ठं यं वाघतो वृणते अध्वरेषु ।
अग्निं विश्वेषामरतिं वसूनां सपर्यामि प्रयसा यामि रत्नं ॥ ७ ॥
होतारं । सप्त । जुह्वः । यजिष्ठं । यं । वाघतः । वृणते । अध्वरेषु ।
अग्निं । विश्वेषां । अरतिं । वसूनां । सपर्यामि । प्रयसा । यामि । रत्नं ॥ ७ ॥

सप्त सप्तसंख्याका जुह्वो होतारो वाघत ऋत्विजोऽध्वरेषु यागेषु यजिष्ठं यष्टृतमं होतारं देवानामाह्वातारं यमग्निं वृणते संभजंते विश्वेषां सर्वेषां वसूनामरतिं प्रापयितारं तमग्निं प्रयसा हविर्लक्षणेनान्नेन सपर्यामि । परिचरामि । रत्नं रमणीयं कर्मफलं च यामि । याचामि ॥ वृणते । वृङ् संभक्तौ । क्र्यादिकः । प्रत्ययस्वरः । अरतिं । ऋ गतिप्रापणयोः । अस्मादौणादिको वहिवस्यर्तिभ्यश्चित । उ० ४. ६१. । इत्यतिप्रत्ययः । चित्त्वादंतोदात्तत्वं । सपर्यामि । सपर्यतिः परिचरणकर्मा । सपर् पूजायामिति धातुः कंड्वादिः । अतो यक एव स्वरः शिष्यते । पादादित्वान्निघाताभावः । यामि । याचामीत्यस्य वर्णलोपश्छांदसः ॥

अष्टमीमृचमाह ॥

अच्छिद्रा सूनो सहसो नो अद्य स्तोतृभ्यो मित्रमहः शर्म यच्छ ।
अग्ने गृणंतमंहस उरुष्योर्जो नपात्पूर्भिरायसीभिः ॥ ८ ॥
अच्छिद्रा । सूनो इति । सहसः । नः । अद्य । स्तोतृऽभ्यः । मित्रऽमहः । शर्म । यच्छ ।
अग्ने । गृणंतं । अंहसः । उरुष्य । ऊर्जः । नपात् । पूःऽभिः । आयसीभिः ॥ ८ ॥

हे सहसः सूनो बलस्य पुत्र। बलेन हि मथ्यमानोऽग्निर्जायते। मित्रमहः। अनुकूलदीप्तिमन्नग्ने नोऽस्मभ्यं स्तोतृभ्योऽद्यास्मिन्कर्मण्यच्छिद्राच्छेद्यानि शर्म शर्माणि सुखानि यच्छ। देहि। किंच हे ऊर्जो नपात्। अन्नस्य पुत्र। भुक्तेनान्नेन जठराग्नेः प्रवर्धनादग्नेरन्नपुत्रत्वं। एवंविधाग्ने गृणंतं त्वां स्तुवंतमायसीभिर्व्याप्तैः। यद्वायोवद्दृढतरैः पूर्भिः पालनैरंहसः पापादुरुष्य। रक्ष। उरुष्यती रक्षाकर्मेति यास्कः॥ अच्छिद्रा। शेश्छंदसीति शेर्लोपः। सूनो सहसः। परमपि छंदसीति परस्य षष्ठ्यंतस्य पूर्वामंत्रितांगवद्भावे सति पदद्वयसमुदायस्याष्टमिकं सर्वानुदात्तत्वं। शर्म। सुपां सुलुगिति विभक्तेर्लुक्। ऊर्जो नपात्। न पातयतीति नपात्। नभ्राण्नपादिति नञः प्रकृतिभावः। सुबामंत्रित इति षष्ठ्यंतस्य परांगवद्भावे सति पादादित्वादाष्टमिकनिघाताभावे षाष्ठिकमामंत्रिताद्युदात्तत्वं। पूर्भिः। पॄ पालनपूरणयोरित्यस्मात्संपदादिलक्षणे भावे क्विप्। उत्वदीर्घौ। सावेकाच इति विभक्तेरुदात्तत्वं॥

नवमीमृचमाह॥

भवा वरूथं गृणते विभावो भवा मघवन्मघवद्भ्यः शर्म।
उरुष्याग्ने अंहसो गृणंतं प्रातर्मक्षू धियावसुर्जगम्यात्॥ ९॥
भव। वरूथं। गृणते। विभाऽवः। भव। मघऽवन्। मघवत्ऽभ्यः। शर्म।
उरुष्य। अग्ने। अंहसः। गृणंतं। प्रातः। मक्षु। धियाऽवसुः। जगम्यात्॥ ९॥

हे विभावो विशिष्टप्रकाशाग्ने गृणते त्वां स्तुवते यजमानाय। वरूथमिति गृहनाम। वरूथमनिष्टनिवारकं गृहं भव। हे मघवन् धनवन्नग्ने मघवद्भ्यो हविर्लक्षणधनयुक्तेभ्यो यजमानेभ्यः शर्म सुखं यथा भवति तथा भव। हे अग्ने गृणंतं स्तुवंतमंहसः पापकारिणः शत्रोरुरुष्य। रक्ष। धियावसुः कर्मणा बुद्ध्या वा प्राप्तधनोऽग्निः प्रातरिदानीमिव परेद्युरपि मक्षू शीघ्रं जगम्यात्। आगच्छतु॥ वरूथं। वृञ् वरणे। जॄवृभ्यामूथन्नित्यूथन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं। गृणते। शतुरनुम इति विभक्तेरुदात्तत्वं। विभावः। विशिष्टा भा विभाः। आतो मनिन्निति विच्। तदस्यास्तीति मतुप्। मादुपधाया इति मतुपो वत्वं। मतुवसो रुरिति नकारस्य रुत्वं। मघवद्भ्यः। मघवा बहुलं। पा॰ ६.४.१२८.। इति मघवन्शब्दस्य तृ आदेशः। स च नानुबंधकृतमनेकाल्त्वं। पा॰ १.१.५५.१.। इति वचनात्

अलोऽंत्यस्य । पा॰ १. १. ५२. । इत्यंत्यस्य भवति । मक्षू । ऋचि तुनुघमक्ष्विति दीर्घः । धियावसुः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । पूर्वपदस्य सावेकाच इति विभक्तिरुदात्ता । लुगभावश्छांदसः । जगम्यात् । गम्लृ सृप्लृ गतौ । लिङि बहुलं छंदसीति शपः श्लुः ॥

॥ इति प्रथमस्य चतुर्थे चतुर्विंशो वर्गः ॥

वया इदिति सप्तर्चं द्वितीयं सूक्तं नोधस आर्षं त्रैष्टुभं । वैश्वानरगुणकोऽग्निर्देवता । तथा चानुक्रांतं । वया इत्सप्त वैश्वानरीयमिति ॥ सूक्तविनियोगो लिंगादवगंतव्यः ॥

तत्र प्रथमामृचमाह ॥

वया इदग्ने अग्नयस्ते अन्ये त्वे विश्वे अमृता मादयंते ।
वैश्वानर नाभिरसि क्षितीनां स्थूणेव जनाँ उपमिद्ययंथ ॥ १ ॥

वयाः । इत् । अग्ने । अग्नयः । ते । अन्ये । त्वे इति । विश्वे । अमृताः । मादयंते ।
वैश्वानर । नाभिः । असि । क्षितीनां । स्थूणाऽइव । जनान् । उपऽमित् । ययंथ ॥ १ ॥

वयाः शाखा वेतेर्वातायना भवंतीति यास्कः । नि॰ १. ४. । हे अग्ने येऽन्येऽग्नयः *संति ते सर्वेऽपि ते तव वया इत् । शाखा एव । ततस्त्वत्तोऽन्ये न संतीति भावः । किंच त्वे त्वयि सति विश्वे सर्वेऽमृता अमरणधर्माणो देवा मादयंते । हृष्यंति । न हि त्वद्व्यतिरेकेण तैर्जीवितुं शक्यते । हे वैश्वानर विश्वेषां नराणां जठररूपेण संबंधिन्नग्ने क्षितीनां मनुष्याणां नाभिः संनद्धासि ।* अवस्थापको भवसि । अतस्त्वमुपमिदुपस्थापयिता सन् । यद्वा । उपमिदित्येतद्दृष्टांतविशेषणं । जनान्ययंथ । अधारयः । तत्र दृष्टांतः । उपमिदुपनिखाता स्थूणेव । वंशधारणार्थं निखातः स्तंभो यथा गृहोपरिस्थं वंशं धारयति तद्वत् ॥ वैश्वानर । विश्वे चेमे नरा विश्वानराः । नरे संज्ञायां । पा॰ ६. ३. १२९. । इति पूर्वपदस्य दीर्घः । तत्संबंधी वैश्वानरः । तस्येदमित्यण् । नाभिः । नहो भश्चेतीञ्प्रत्ययो भकारश्चांतादेशः । जित्त्वादाद्युदात्तत्वं । असि । तासस्त्योर्लोप इति सलोपः । क्षितीनां । क्षि निवासगत्योः । अस्मात् क्तिच्क्तौ च संज्ञायामिति क्तिच् । अंतोदात्तात्क्षितिशब्दादुत्तरस्य नामो नामन्यतरस्यामित्युदात्तत्वं । उपमित् । डुमिञ् प्रक्षेपणे । अस्मादुपपूर्वाद्बाहुलवचनात्कर्मणि क्विप् । तुगागमः ।

ययंथ। यम उपरमे। लिटि थलि आदिनियमादिटि प्राप्त उपदेशेऽत्वतः। पा॰ ७. २. ६२.। इति प्रतिषेधः ॥

विषुवत्संज्ञेऽहन्याग्निमारुते मूर्द्धा दिवो नाभिरग्निः पृथिव्या इति वैकल्पिकोऽनुरूपस्तृचः। विषुवान्दिवा कीर्त्य इति खंडे सूचितं। मूर्द्धानं दिवो अरतिं पृथिव्या मूर्द्धा दिवो नाभिरग्निः पृथिव्या इति वा। आ॰ ८. ६.। इति ॥

तत्र प्रथमां सूक्ते द्वितीयामृचमाह ॥

मूर्द्धा दिवो नाभिरग्निः पृथिव्या अथाभवदरती रोदस्योः।

तं त्वा देवासोऽजनयंत देवं वैश्वानर ज्योतिरिदार्याय ॥ २ ॥

मूर्द्धा। दिवः। नाभिः। अग्निः। पृथिव्याः। अथ। अभवत्। अरतिः। रोदस्योः।

तं। त्वा। देवासः। अजनयंत। देवं। वैश्वानर। ज्योतिः। इत्। आर्याय ॥ २ ॥

अयमग्निर्दिवो द्युलोकस्य मूर्द्धा शिरोवत्प्रधानभूतो भवति। पृथिव्या भूमेश्च नाभिः संनाहकः। रक्षक इत्यर्थः। अथानंतरं रोदस्योर्द्यावापृथिव्योरयमरतिरधिपतिरभवत्। हे वैश्वानर तं तादृशं देवं दानादिगुणयुक्तं त्वा त्वां देवासः सर्वे देवा आर्याय विदुषे मनवे यजमानाय वा ज्योतिरित् ज्योतीरूपमेवाजनयंत। उदपादयन्॥ मूर्तमस्मिन्धीयत इति मूर्द्धा। नि॰ ७. २७.। श्वन्नुक्षन्नित्यादौ निपातनाद्रूपसिद्धिः। पृथिव्याः। पृथिवीशब्दः षिद्गौरादिभ्यश्चेति ङीष्प्रत्ययांतोऽंतोदात्तः। अजनयंत। जनी जृष् क्नसु रंजोऽमंताश्चेति मित्त्वान्मितां ह्रस्व इति ह्रस्वत्वं ॥

तृतीयामृचमाह ॥

आ सूर्ये न रश्मयो ध्रुवासो वैश्वानरे दधिरेऽग्ना वसूनि।

या पर्वतेष्वोषधीष्वप्सु या मानुषेष्वसि तस्य राजा ॥ ३ ॥

आ। सूर्ये। न। रश्मयः। ध्रुवासः। वैश्वानरे। दधिरे। अग्ना। वसूनि।

या। पर्वतेषु। ओषधीषु। अप्ऽसु। या। मानुषेषु। असि। तस्य। राजा ॥ ३ ॥

अग्ना वैश्वानरेऽग्नौ वसूनि धनान्यादधिरे। आहितानि स्थापितानि बभूवुः। तत्र दृष्टांतः। ध्रुवासो निश्चला रश्मयः किरणाः सूर्ये न यथा सूर्य आधीयंते तद्वत्। अतस्त्वं पर्वतादिषु यानि धनानि विद्यंते तस्य धनजातस्य राजासि। अधिपतिर्भवसि ॥ अग्ना। सुपां सुलुगिति विभक्तेर्डादेशः। या।

शेश्छंदसि बहुलमिति शेर्लोपः । ओषधीषु । उष दाहे । ओषः पाकः । भावे घञ् । ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं । ओष आसु धीयत इत्योषधयः । कर्मण्यधिकरणे चेति किप्रत्ययः । दासीभारादिषु पठितत्वात्पूर्वपदप्रकृतिस्वरत्वं । सप्तमीबहुवचन ओषधेश्च विभक्तावप्रथमायां । पा॰ ६. ३. १३२. । इति दीर्घः । अप्सु । ऊडिदमिति विभक्तेरुदात्तत्वं ॥

चतुर्थीमृचमाह ॥

बृहती इव सूनवे रोदसी गिरो होता मनुष्यो३ न दक्षः ।
स्वर्वते सत्यशुष्माय पूर्वीर्वैश्वानराय नृतमाय यह्वीः ॥ ४ ॥

बृहती इवेति बृहतीऽइव । सूनवे । रोदसी इति । गिरः । होता । मनुष्यः । न । दक्षः ।
स्वःऽवते । सत्यऽशुष्माय । पूर्वीः । वैश्वानराय । नृऽतमाय । यह्वीः ॥ ४ ॥

रोदसी द्यावापृथिव्यौ सूनवे स्वपुत्राय वैश्वानराय बृहती इव प्रभूते इवाभूतां । वैश्वानरस्य द्यावापृथिव्योः पुत्रत्वं मंत्रांतरे स्पष्टमवगम्यते । उभा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसेति । महतो वैश्वानरस्यावस्थानाय द्यावापृथिव्यौ विस्तृते जाते इत्यर्थः । किंच । अयं होता दक्षः समर्थः पूर्वीर्बहुविधा यह्वीर्महतीर्गिरः स्तुतीर्वैश्वानरायाग्नये प्रायुंक्तेति शेषः । कीदृशाय । स्वर्वते । शोभनगमनयुक्ताय । सत्यशुष्माय । अवितथबलाय । नृतमाय । अतिशयेन सर्वेषां नेत्रे । तत्र दृष्टांतः । मनुष्यो न । यथा मनुष्यो लौकिको बंदी दातारं प्रभुं बहुविधया स्तुत्या स्तौति तद्वत् ॥ मनुष्यः । मनोर्जातावञ्यतौ षुक् चेति जातौ गम्यमानायां मनुशब्दाद्यत् षुगागमश्च । तित्स्वरित इति स्वरितत्वं । यतोऽनाव इत्याद्युदात्तत्वं न भवति । तत्र हि द्व्यजित्यनुवर्तते । स्वर्वते । सुपूर्वादर्तेर्भावे विच् । ततो मतुप् । मादुपधाया इति वत्वं ॥

पंचमीमृचमाह ॥

दिवश्चित्ते बृहतो जातवेदो वैश्वानर प्र रिरिचे महित्वं ।
राजा कृष्टीनामसि मानुषीणां युधा देवेभ्यो वरिवश्चकर्थ ॥ ५ ॥

दिवः । चित् । ते । बृहतः । जातऽवेदः । वैश्वानर । प्र । रिरिचे । महिऽत्वं ।
राजा । कृष्टीनां । असि । मानुषीणां । युधा । देवेभ्यः । वरिवः । चकर्थ ॥ ५ ॥

हे जातवेदो जातानां वेदितर्वैश्वानराग्ने ते तव महित्वं माहात्म्यं बृहतो महतो दिवश्चित् द्युलोकादपि प्ररिरिचे। प्रववृधे। किंच त्वं मानुषीणां मनोर्जातानां कृष्टीनां प्रजानां राजासि। अधिपतिर्भवसि। तथा वरिवोऽसुरैरपहृतं धनं युधा युद्धेन देवेभ्यश्चकर्थ। देवाधीनमकार्षीः॥ वैश्वानर। पादादित्वादाष्टमिकनिघाताभावः। रिरिचे। रिचिर् विरेचने। अत्रोपसर्गवशात्तद्विपरीत आधिक्ये वर्तते। कृष्टीनां। नामन्यतरस्यामिति नाम उदात्तत्वं। मानुषीणां। मानुषशब्दो मनोर्जातावित्यञ्प्रत्ययांतः। जातिलक्षणे ङीषि प्राप्ते तदपवादतया शार्ङ्गरवाद्यञ इति ङीन्। नित्त्वादाद्युदात्तत्वं। आम्छंदसि बहुलं। पा० ६.१.१७८.। इति बहुलवचनान्नाम उदात्तस्याभावः। युधा। युध संप्रहार इत्यस्मात्संपदादिलक्षणो भावे क्विप्। वरिव इति धननाम। नब्विषयस्येत्याद्युदात्तत्वं॥

षष्ठीमृचमाह॥

प्र नू महित्वं वृषभस्य वोचं यं पूरवो वृत्रहणं सचंते।
वैश्वानरो दस्युमग्निर्जघन्वाँ अधूनोत्काष्ठा अव शंबरं भेत्॥ ६॥
प्र। नु। महिऽत्वं। वृषभस्य। वोचं। यं। पूरवः। वृत्रऽहनं। सचंते।
वैश्वानरः। दस्युं। अग्निः। जघन्वान्। अधूनोत्। काष्ठाः। अव। शंबरं। भेत्॥ ६॥

अत्र वैश्वानरशब्देन मध्यमस्थानस्थो वैद्युतोऽग्निरभिधीयते। पूरव इति मनुष्यनाम। पूरवो मनुष्या वृत्रहणमावरकस्य मेघस्य हंतारं यं वैश्वानरं सचंते। वर्षार्थिनः सेवंते। तस्य वृषभस्यापां वर्षितुर्वैश्वानरस्य महित्वं माहात्म्यं नू क्षिप्रं प्रवोचं। प्रब्रवीमि। किं तदित्यत आह। अयं वैश्वानरोऽग्निर्दस्युं रसानां कर्मणां वोपक्षयितारं राक्षसादिकं जघन्वान् हतवान्। तथा काष्ठा अपो वृष्ट्युदकान्यधूनोत्। अधोमुखान्यपातयत्। शंबरं तं निरोधकारिणं मेघमवभेत्। अवाभिनत्॥ वोचं। छंदसि लुङ्लङ्लिट इति वर्तमाने लुङ्। अस्यतिवक्तीत्यादिना च्लेरङादेशः। वच उमित्युमागमः। गुणः। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। जघन्वान्। हंतेर्लिटः क्वसुः। अभ्यासाच्चेत्यभ्यासादुत्तरस्य हकारस्य घत्वं। विभाषा गमहनेति विकल्पनादिडभावः। भेत्। भिदिर् विदारणे। लङि बहुलं छंदसीति विकरणस्य लुक्। हल्ङ्याब्भ्य इति तकारस्य लोपः। पूर्ववदडभावः॥ अत्र निरुक्तं। प्र ब्रवीमि तन्महत्त्वं महाभाग्यं वृषभस्य वर्षितुरपां यं पूरवः पूरयितव्या मनुष्या

वृत्रहणं मेघहनं सचंते सेवंते वर्षकामा दस्युर्दस्यतेः क्षयार्थादुपदस्यंत्यस्मिन्नसा उपदासयति कर्माणि तमग्निर्वैश्वानरो घ्नन्नवाधूनोदपः काष्ठा अभिनच्छंबरं मेघं । नि० ७.२३.। इति ॥ अत्रेदं चिंतनीयं। कोऽसौ वैश्वानर इति। तत्र केचिदाहुः। मध्यमस्थानस्थो वायुरिंद्रो वा वैश्वानरः। तस्य हि वर्षकर्मणा संस्तव उपपद्यते। न त्वग्नेः पृथिवीस्थानत्वादिति। अन्ये त्वेवं मन्यंते। द्युस्थानः सूर्यो वैश्वानर इति। युक्तिं चाहुः। प्रातःसवनादीनि त्रीणि सवनानि लोकत्रयात्मकानि। तत्र तृतीयसवनं प्राप्तो यजमानः स्वर्गं प्राप्त इति पृथिव्याः प्रच्युतो भवेत्। तत्प्रच्युतिपरिहारायाग्निमारुतेऽतिमे शस्त्रे होता स्वर्गाद्भूमिं प्रत्यवरोहति। कथमिति तदुच्यते। इतरशस्त्रवत्। स्तोत्रियतृचेन प्रारंभमुक्त्वा द्युस्थानसंबंधिना वैश्वानरीयेण सूक्तेन शस्त्रं प्रारभते। ततो मध्यमस्थानसंबंधिनं रुद्रं मरुतश्च प्रति तद्देवत्यसूक्तपाठेनावरोहति। तत्र पृथिवीस्थानमग्निं। यद्यत्र वैश्वानरः सूर्यो न स्यात् तदानीमवरोहो नोपपद्यते। तदेतन्मतद्वयमप्यनुपपन्नं। अयमेवाग्निर्वैश्वानरः। कुतः। वैश्वानरशब्दनिर्वचनानुरोधात्। विश्वेषां नराणां लोकांतरं प्रति नेतृतया संबंधी वैश्वानरः। तथा चाम्नातं। वैश्वानर पुत्रः पित्रे लोककृज्जातवेदो वहेमं सुकृतां यत्र लोका इति। यद्वा विश्वे सर्वे नरा एनमग्निं यज्ञादौ प्रीणयंतीति तत्संबंधाद्वैश्वानरः। यद्वा सर्वान्प्राणिनः प्रत्यृतो गच्छत इति विश्वानरौ मध्यमोत्तमौ। ऋ गतावित्यस्मात्पचाद्यच्। लुगभावश्छांदसः। ताभ्यामुत्पन्नत्वादयमग्निर्वैश्वानरः। वैद्युतोऽग्निर्हि मध्यमसकाशाज्जायते। अशनिपतनानंतरमयमेव पार्थिवोऽग्निः संपद्यते। आदित्यसकाशादपि घर्मकाले सूर्यकांतादिमणिष्वग्नेरुत्पत्तिः प्रसिद्धा। तस्मान्नामनिर्वचनानुरोधेनायमेवाग्निर्वैश्वानर इत्येतदुपपन्नं। अस्यापि वर्षकर्मणा स्तुतिः संभवति। अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति स्मरणात्। प्रत्यवरोहोऽपि न कर्तव्यः। तृतीयसवनस्य भक्तस्वर्गत्वात्। एतत्सर्वं यास्केन वैश्वानरः कस्मादित्यादिना बहुधा प्रपंचितं। नि० ७.२१.। अत्र यदनुक्तं तत्सर्वं तत्रैवानुसंधेयं॥

सप्तमीमृचमाह ॥

वैश्वानरो महिम्ना विश्वकृष्टिर्भरद्वाजेषु यजतो विभावा।
शातवनेये शतिनीभिरग्निः पुरुणीथे जरते सूनृतावान् ॥ ७ ॥

वैश्वानरः। महिम्ना। विश्वऽकृष्टिः। भरत्ऽवाजेषु। यजतः। विभाऽवा।
शातऽवनेये। शतिनीभिः। अग्निः। पुरुऽनीथे। जरते। सूनृताऽवान् ॥ ७ ॥

वैश्वानरोऽग्निर्महिम्ना महत्त्वेन विश्वकृष्टिः। कृष्टिरिति मनुष्यनाम। विश्वे सर्वे मनुष्या यस्य स्वभूताः स तथोक्तः। भरद्वाजेषु पुष्टिकरहविर्लक्षणान्नवत्सु यागेषु। यद्वा। एतत्संज्ञेष्वृषिषु यजतो यष्टव्यः। विभावा विशेषेण प्रकाशयिता। सूनृतावान्। सूनृता प्रिया सत्या वाक्। तद्युक्तः। एवंभूतोऽग्निः शातवनेये। शतसंख्याकान् क्रतून्वनति संभजत इति शतवनिः। तस्य पुत्रः शातवनेयः। तस्मिन् पुरुणीथे बहूनां नेतर्येतत्संज्ञके राजनि च शतिनीभिर्बहुभिः स्तुतिभिर्जरते। स्तूयते ॥ भरद्वाजेषु। भरंति पोषयंति भोक्तृनिति भरंतः। तादृशा वाजा येषु। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे प्राप्ते मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं। यजतः। भृमृदृशियजिपर्विपच्यमितमिनमिहर्येभ्योऽतजिति यजतेरतच्प्रत्ययः। विभावा। भा दीप्तौ। आतो मनिन्निति वनिप्। तस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते। शातवनेये। इन् सर्वधातुभ्य इतीन्प्रत्ययः शतवनिशब्दः। इतश्चानिञः। पा० ४. १. १२२.। इति ढक्। कित इत्यंतोदात्तत्वं। शतिनीभिः। शतशब्दान्मत्वर्थीय इनिः। ऋन्नेभ्य इति ङीप्। पुरुणीथे। पूर्वपदात्संज्ञायामगः। पा० ८. ४. ३.। इति णत्वं। जरते। व्यत्ययेन कर्मणि कर्तृप्रत्ययः ॥

॥ इति प्रथमस्य चतुर्थे पंचविंशो वर्गः ॥

वह्निमिति पंचर्चं तृतीयं सूक्तं नोधस आर्षं त्रैष्टुभमाग्नेयं। अनुक्रांतं च। वह्निं पंचेति ॥ प्रातरनुवाकस्याग्नेये क्रतौ त्रैष्टुभे छंदसीदं सूक्तमाश्विने शस्त्रे च। तथा च सूचितं। वह्निं यशसमुप प्रजिन्वन्निति त्रीणि। आ० ४. १३.। इति ॥

तत्र प्रथमामृचमाह ॥

वह्निं यशसं विदथस्य केतुं सुप्राव्यं दूतं सद्योअर्थं।
द्विजन्मानं रयिमिव प्रशस्तं रातिं भरद्भृगवे मातरिश्वा ॥ १ ॥
वह्निं। यशसं। विदथस्य। केतुं। सुप्रऽअव्यं। दूतं। सद्यःऽअर्थं।
द्विऽजन्मानं। रयिंऽइव। प्रऽशस्तं। रातिं। भरत्। भृगवे। मातरिश्वा ॥ १ ॥

वह्निं हविषां वोढारं यशसं यशस्विनं विदथस्य केतुं यज्ञस्य प्रकाशयितारं

सुप्राव्यं सुष्ठु प्रकर्षेण रक्षितारं दूतं देवैर्हविर्वहनलक्षणे दूत्ये नियुक्तं। सद्योअर्थं। यदा हवींषि जुह्वति सद्यस्तदानीमेव हविर्भिः सह देवान्गंतारं। यद्वा सद्योऽर्थं-मरणं गमनं यस्य तं। द्विजन्मानं। द्वयोर्द्यावापृथिव्योररण्योर्वा जायमानं। रयिमिव। धनमिव प्रशस्तं प्रख्यातं। एवंभूतमग्निं मातरिश्वा वायुर्भृगव एतत्सं-ज्ञकाय महर्षये रातिं भरत्। मित्रमहरत्। अकरोदित्यर्थः। रातिना संभाषेत्यत्र रातिर्मित्रमिति कपर्दिनोक्तं। रातिः पुत्र इत्येके। एतदर्थप्रतिपादकं मंत्रांतरं च भवति। रातिं भृगूणामुशिजं कविक्रतुमिति ॥ वह्निं। वहिश्रियुश्रुग्लाहात्वरिभ्यो नित्विति वहतेर्निप्रत्ययः। नित्त्वादाद्युदात्तत्वं। यशसं। यशस्शब्दादुत्तरस्य विनो लुक्। व्यत्ययेनांतोदात्तत्वं। यद्वा। अर्शआदित्वादच्। स्वरः पूर्ववत्। सुप्राव्यं। सुष्ठु प्रकर्षेणावति रक्षतीति सुप्रावीः। उपसर्गद्वयोपसृष्टादवतेरवितृ-स्तृतंत्रिभ्य ईः। उ० ३. १५८.। इतीकारप्रत्ययः। वा छंदसीत्यमि पूर्व इत्यस्य विकल्पे सति यणादेशः। उदात्तस्वरितयोर्यण इति स्वरितत्वं। सद्योअर्थं। उषिकुषिगार्तिभ्यस्थन्नित्यर्तेः कर्तरि थन्प्रत्ययः। सद्य एवार्थो गंता सद्योअर्थः। अव्ययपूर्वपदप्रकृतिस्वरत्वं। यदि त्वव्यये नञ्कुनिपातनामिति वक्तव्यं। पा० ६. २. २. १.। इत्यव्ययग्रहणेन त्रितयं गृह्येत। तर्हि बहुव्रीहिस्वरो भविष्यति। मात-रिश्वा। सर्वनिर्माणहेतुत्वान्मातांतरिक्षं। श्वसितिरत्र गतिकर्मा। मातर्यंतरिक्षे श्वसिति गच्छतीति मातरिश्वा। श्वन्नुक्षन्नित्यादौ निपातनाद्रूपसिद्धिः। यद्वा मातर्यंतरिक्षे श्वाश्वमति गच्छतीति मातरिश्वा। अस गतिदीप्त्यादानेष्वित्यस्मा-दौणादिको डन्प्रत्ययः। एतच्च यास्केनोक्तं। नि० ७. २६.॥

द्वितीयामृचमाह ॥

अस्य शासुरुभयासः सचंते हविष्मंत उशिजो ये च मर्ताः।
दिवश्चित्पूर्वो न्यसादि होतापृच्छ्यो विश्पतिर्विक्षु वेधाः ॥ २ ॥

अस्य। शासुः। उभयासः। सचंते। हविष्मंतः। उशिजः। ये। च। मर्ताः।
दिवः। चित्। पूर्वः। नि। असादि। होता। आऽपृच्छ्यः। विश्पतिः। विक्षु।
वेधाः ॥ २ ॥

शासुः शासितुरस्याग्नेरुभयास उभयेऽपि देवा मनुष्याश्च। यद्वा। स्तुतिभिः स्तोतारो यज्ञैर्यजमानाश्चेममग्निं शासितारं सचंते। सेवंते। उशिजः कामयमाना

देवा हविष्मंतो हविषा युक्ता ये च मर्ता मरणधर्माणो यजमानाः । यद्वा । उशिज इति मेधाविनाम । उशिजो मेधाविनः स्तोतारो हविष्मंतो हविर्युक्ता मर्ता यजमानाः । किंच । अयं होता होमनिष्पादकोऽग्निर्दिवश्चित् आदित्यादपि पूर्व उषःसु वर्तमानो भूत्वाग्निहोत्रहोमार्थं विक्षु यजमानेषु न्यसादि । अध्वर्युणाग्न्यायतने न्यधायि । निस्थाप्यते । कीदृशो होता । आपृच्छ्यः । आप्रष्टव्यः पूज्य इत्यर्थः । विश्पतिः । विशां प्रजानां पालयिता । वेधाः । विधाताभिमतफलस्य कर्ता ॥ शामुः । शासु अनुशिष्टौ । तृन्तृचौ शंसिशसिशासिक्षदादिभ्यः संज्ञायां चानिटौ । उ॰ २. ९०. । इति तृन् । इडागमाभावश्च । षष्ठ्येकवचने तकारलोपश्छांदसः । नित्त्वादाद्युदात्तत्वं । उशिजः । वशः किदिति वष्टेरिजिप्रत्ययः । ग्रहिज्यादिना संप्रसारणं । मर्ताः । मृङ् प्राणत्यागे । असिहसिमृगृण्वामीत्यादिना तन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं । आपृच्छ्यः । प्रछ ज्ञीप्सायां । आङ्पूर्वादस्माच्छंदसि निष्टर्क्येत्यादौ क्यप्प्रत्ययो निपातितः । ग्रहिज्यादिना संप्रसारणं । क्यपः पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते । विश्पतिः । पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वे प्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदांतोदात्तत्वं ॥

तृतीयामृचमाह ॥

तं नव्यसी हृद आ जायमानमस्मत्सुकीर्तिर्मधुजिह्वमश्याः ।
यमृत्विजो वृजने मानुषासः प्रयस्वंत आयवो जीजनंत ॥ ३ ॥
तं । नव्यसी । हृदः । आ । जायमानं । अस्मत् । सुऽकीर्तिः । मधुऽजिह्वं । अश्याः ।
यं । ऋत्विजः । वृजने । मानुषासः । प्रयस्वंतः । आयवः । जीजनंत ॥ ३ ॥

नव्यसी नवतरा सुकीर्तिः सुष्ठु कीर्तयित्र्यस्मत् अस्माकं स्तुतिर्हृदो हृद्यवस्थितात्प्राणाज्जायमानमुत्पद्यमानं । अग्निर्हि वायोरुत्पद्यते वायुश्च प्राण एव । यः प्राणः स वायुरित्याम्नानात् । मधुजिह्वं मादयितृज्वालं । एवंभूतं तमग्निमाश्याः । आभिमुख्येन व्याप्नोतु । वृजने संग्रामे प्राप्ते सत्यायवो मनुष्या यमग्निं जीजनंत । यज्ञार्थमुदपादयन् । कीदृशा मनुष्याः । ऋत्विजः । ऋतौ काले यष्टारः । मानुषासः । मनोः पुत्राः । प्रयस्वंतः । हविर्लक्षणान्नोपेताः ॥ नव्यसी । नवीयसीत्यचेकारलोपश्छांदसः । हृदः । अत्र हृदयशब्देन तत्स्थः प्राणो लक्ष्यते । पद्दन्नित्यादिना हृदयशब्दस्य हृदादेशः । जायमानं । जनी प्रादुर्भावे । श्यनि

ज्ञाजनोर्जेति जादेशः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे श्यनो नित्त्वादाद्युदात्तत्वं । अस्मत् । सुपां सुलुगिति विभक्तेर्लुक् । अश्याः । अशू व्याप्तौ । लिङि बहुलं छंदसीति विकरणस्य लुक् । व्यत्ययेन परस्मैपदमध्यमौ । जीजनंत । जनी प्रादुर्भावे । णयंताल्लुङि च्लेश्चङादेशः । द्विर्भावहलादिशेषः । सन्वद्भावेत्वदीर्घाः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे चङ एव स्वरे प्राप्ते व्यत्ययेनाभ्यस्ताद्युदात्तत्वं ॥

चतुर्थीमृचमाह ॥

उशिक्पावको वसुर्मानुषेषु वरेण्यो होताधायि विक्षु ।
दमूना गृहपतिर्दम आँ अग्निर्भुवद्रयिपती रयीणां ॥ ४ ॥

उशिक् । पावकः । वसुः । मानुषेषु । वरेण्यः । होता । अधायि । विक्षु ।
दमूनाः । गृहऽपतिः । दमे । आ । अग्निः । भुवत् । रयिऽपतिः । रयीणां ॥ ४ ॥

उशिक् कामयमानः पावकः शोधको वसुर्निवासयिता वरेण्यो वरणशीलः । एवंभूतो होताग्निर्विक्षु यज्ञगृहं प्रविष्टेषु मानुषेषु यजमानेष्वधायि । स्थाप्यते । स चाग्निर्दमूना रक्षसां दमनकरेण मनसा युक्तो गृहपतिर्गृहाणां पालयिता च सन्दमे यज्ञगृहे रयिपतिर्धनाधिपतिराभुवत् । आ समंताद्भवति । न केवलमेकस्य रायोऽपि तु सर्वेषामित्याह रयीणामिति । यद्वा । रयीणां मध्य उत्कृष्टं यद्धनं तस्य पतिरित्यर्थः ॥ अधायि । छंदसि लुङ्लङ्लिट इति वर्तमाने कर्मणि लुङि च्लेश्चिणादेश आतो युक् चिण्कृतोरिति युगागमः । दमयति राक्षसादिकमिति दमूनाः । दम उपशमे । दमेरूनसिः । उ० ४.२३४. । इत्यौणादिक ऊनसिप्रत्ययः । यास्कस्त्वाह । दमूना दममना वा दानमना वा दांतमना वापि वा दम इति गृहनाम । तन्मना स्यात् । नि० ४.४. । इति । दम आँ अग्निः । आङोऽनुनासिकश्छंदसीत्याकारस्य सानुनासिकत्वं । प्रकृतिभावश्च । भुवत् । लेट्यडागमः । इतश्च लोप इतीकारलोपः । रयिपतिः । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । रयीणां । नामन्यतरस्यामिति नाम उदात्तत्वं ॥

पंचमीमृचमाह ॥

तं त्वा वयं पतिमग्ने रयीणां प्र शंसामो मतिभिर्गोतमासः ।
आशुं न वाजंभरं मर्जयंतः प्रातर्मक्षू धियावसुर्जगम्यात् ॥ ५ ॥

तं। त्वा। वयं। पतिं। अग्ने। रयीणां। प्र। शंसामः। मतिऽभिः। गोतमासः।
आशुं। न। वाजंऽभरं। मर्जयंतः। प्रातः। मक्षु। धियाऽवसुः। जगम्यात् ॥ ५ ॥

गोतमासो गोतमगोत्रोत्पन्ना वयं। नोधसः स्तोतुरेकत्वेऽप्यात्मनि पूजार्थे बहुवचनं। हे अग्ने रयीणां धनानां पतिं रक्षितारं तादृशं त्वां मतिभिर्मननीयैः स्तोत्रैः प्रशंसामः। प्रकर्षेण स्तुमः। किं कुर्वंतः। वाजंभरं वाजस्य हविर्लक्षणान्नस्य भर्तारं त्वां मर्जयंतो मार्जयंतः। तत्र दृष्टांतः। आशुं न। अश्वमिव। यथाश्वमारोहंतः पुरुषास्तस्य वहनप्रदेशं हस्तैर्निमृजंति। तद्वद्वयमप्यग्नेर्हविर्वहनप्रदेशं निमृजंत इत्यर्थः। तथा चाग्निसंमार्जनप्रकरणे वाजसनेयिभिराम्नातं। अथ मध्ये तूष्णीमेव त्रिः संमार्ष्टि। यथा युक्त्वा प्रेहि वहेति व्रजेदेवमेतदग्निं युक्त्वोपक्षिपति प्रेहि देवेभ्यो हव्यं वहेति। धियावसुः कर्मणा बुद्ध्या वा प्राप्तधनः सोऽग्निः प्रातः श्वोभूतस्याह्नः प्रातःकाले मक्षू शीघ्रं जगम्यात्। आगच्छतु ॥ मतिभिः। मन ज्ञान इत्यस्मात्कर्मणि क्तिन्। मंत्रे वृषेषेत्यादिना तस्योदात्तत्वं। वाजंभरं। अग्नेरेषा वैदिकी संज्ञा। संज्ञायां भृतॄवृजीति। पा॰ ३. २. ४६.। वाजशब्दे कर्मण्युपपदे खच्प्रत्ययः। अरुर्द्विषदजंतस्य मुम्। पा॰ ६. ३. ६७.। इति मुमागमः। चित इत्यंतोदात्तत्वं। मर्जयंतः। संज्ञापूर्वकस्य विधेरनित्यत्वात् मृजेर्वृद्धिः। पा॰ ७. २. ११४.। इति वृद्ध्यभावः। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे णिच एव स्वरः शिष्यते। जगम्यात्। लिङि बहुलं छंदसीति शपः श्लुः ॥

॥ इति प्रथमस्य चतुर्थे षड्विंशो वर्गः ॥

अस्मा इति षोडशर्चं चतुर्थं सूक्तं। नोधस आर्षमैंद्रं त्रैष्टुभं। अनुक्रांतं च। अस्मा इदु षोडशेति। अस्य सूक्तस्य नोधा द्रष्टेत्येतद्ब्राह्मणे समाम्नायते। अस्मा इदु प्र तवसे तुरायेति नोधास्त एते प्रातःसवन इति ॥ षळहस्तोत्रियावापवत्सु चतुर्विंशमहाव्रतादिष्वहःसु माध्यंदिने सवने ब्राह्मणाच्छंसिशस्त्रे ब्रह्मणा ते ब्रह्मयुजेत्यस्या आरंभणीयाया उर्ध्वमहीनसूक्तसंज्ञमेतच्छंसनीयं। तथा च सूत्रितं। अस्मा इदु प्र तवसे शासद्वह्निरितीतरावहीनसूक्ते। आ॰ ७. ४.। इति। ब्राह्मणं च भवति। त एते प्रातःसवने षळहस्तोत्रियाञ्छस्त्वा माध्यंदिनेऽहीनसूक्तानि शंसंतीति ॥

तत्र प्रथमामृचमाह ॥

अस्मा इदु प्र तवसे तुराय प्रयो न हर्मि स्तोमं माहिनाय ।
ऋचीषमायाध्रिगव ओहमिंद्राय ब्रह्माणि राततमा ॥ १ ॥
अस्मै । इत् । ऊं इति । प्र । तवसे । तुराय । प्रयः । न । हर्मि । स्तोमं । माहिनाय ।
ऋचीषमाय । अध्रिऽगवे । ओहं । इंद्राय । ब्रह्माणि । रातऽतमा ॥ १ ॥

इदु इति निपातद्वयं पादपूरणे । अथापि पादपूरणाः कमीमिद्विति यास्कः । यद्वा । अवधारणार्थे । तवसे प्रवृद्धाय तुराय त्वरमाणाय । यद्वा तुर्विणे शत्रूणां हिंसित्रे माहिनाय गुणैर्महते ऋचीषमाय ऋचा समाय । यादृशी स्तुतिः क्रियते तत्समायेत्यर्थः । अध्रिगवे । अधृतगमनाय । अप्रतिहतगमनायेत्यर्थः । तथा च यास्कः । अधृतगमनकर्मवन् । इंद्रोऽप्यध्रिगुरुच्यते । नि० ५. ११. । इति । एवंभूतायास्मा इंद्राय स्तोमं स्तोत्रं प्रहर्मि । प्रहरामि । करोमीत्यर्थः । तत्र दृष्टांतः । प्रयो न । प्रय इत्यन्ननाम । यथा बुभुक्षिताय पुरुषाय कश्चिदन्नं प्रहरति । कीदृशं स्तोमं । ओहं । वहनीयं । प्रापणीयं वा । अत्यंतोत्कृष्टमित्यर्थः । न केवलं स्तोमं किंतर्हि ब्रह्माणि हविर्लक्षणान्यन्नानि । कीदृशानि । राततमा । पूर्वैर्यजमानैरतिशयेन दत्तानि । इंद्रं स्तुत्या हविषा च परिचरेमेति भावः ॥ तुराय । तुर त्वरणे । इगुपधलक्षणः कः । यद्वा । तुर्वी हिंसार्थः । तुर्वतीति तुरः । पचाद्यचि छांदसो वलोपः । हर्मि । हृञ् हरणे । बहुलं छंदसीति शपो लुक् । माहिनाय । मह पूजायामित्यस्मान्महेरिनण् चेतीनण्प्रत्ययः । उपधावृद्धिश्च । ऋचीषमाय । ऋचीषम ऋचा समः । नि० ६. २३. । इति यास्कः । तृतीया तत्कृतेति समासः । पा० २. १. ३०. । तृतीयापूर्वपदप्रकृतिस्वरत्वं । पृषोदरादित्वादीकारोपजनः । सुषामादित्वात् षत्वं । केचिदाहुः । ऋच स्तुतावित्यस्मादिगुपधात्किदितीप्रत्ययः । कृदिकारादक्तिन इति ङीष् । ऋची स्तुतिः । तया समः । पूर्ववत् षत्वं । अस्मिन्पक्षे तृतीयापूर्वपदप्रकृतिस्वरत्वे सति ङीष उदात्तत्वेन भवितव्यं । तथा च न दृश्यते । तस्मात्स्वरश्चिंतनीयः । यद्वा दिवोदासादिवद्द्रष्टव्यः । अध्रिगवे । अधृतोऽन्येनानिवारितो गौर्गमनं यस्य स तथोक्तः । गोस्त्रियोरुपसर्जनस्य । पा० १. २. ४८. । इति ह्रस्वत्वं । पृषोदरादित्वादधृतशब्दस्याध्रिभावः । ओहं । वहतेः कर्मणि घञि छांदसं संप्रसारणं । यद्वा तुहिर् दुहिर् उहिर् अर्दन

इत्यस्मादोहतेः पूर्ववद्वन्। राततमा। रा दान इत्यस्मान्निष्ठांतादातिशायनिकस्तमप्। शेश्छंदसीति शेर्लोपः ॥

द्वितीयामृचमाह ॥

अस्मा इदु प्रयं इव प्र यंसि भराम्यांगूषं बाधे सुवृक्ति।
इंद्राय हृदा मनसा मनीषा प्रत्नाय पत्ये धियो मर्जयंत ॥ २ ॥

अस्मै। इत्। ऊं इति। प्रयःऽइव। प्र। यंसि। भरामि। आंगूषं। बाधे। सुऽवृक्ति।
इंद्राय। हृदा। मनसा। मनीषा। प्रत्नाय। पत्ये। धियः। मर्जयंत ॥ २ ॥

अस्मा इदु। अस्मा एवेंद्राय। प्रय इत्यन्ननाम। प्रय इवान्नमिव प्रयंसि। प्रयच्छामि। तदेव स्पष्टीक्रियते। बाधे शत्रूणां बाधनाय समर्थं सुवृक्ति सुष्ठुवर्जकमांगूषं स्तोत्ररूपमाघोषं भरामि। संपादयामि। अन्येऽपि स्तोतारः प्रत्नाय पुराणाय पत्ये स्वामिन इंद्राय हृदा हृदयेन मनसा तदंतर्वर्तिनांतःकरणेन मनीषा मनीषया तज्जन्येन ज्ञानेन च धियः स्तुतीः कर्माणि वा मर्जयंत। मार्जयंति संस्कुर्वंति ॥ प्रयंसि। यम उपरम इत्यस्माल्लटि पुरुषव्यत्ययः। बहुलं छंदसीति शपो लुक्। आंगूषं। आंगूष स्तोम आघोष इति यास्कः। आङ्पूर्वाद्घुषेर्घञि पृषोदरादित्वाद्घो इत्यस्य गू आदेशः। आङो ङकारस्य लोपाभावश्च। थाथादिनोत्तरपदांतोदात्तत्वं। बाधे। बाधृ विलोडन इत्यस्मात्कृत्यार्थे तवैकेनिति भावे केन्प्रत्ययः। एजंतत्वादव्ययत्वेन सुपो लुक्। मनीषा। सुपां सुलुगिति तृतीयाया डादेशः। पत्ये। पतिः समास एव। पा० १.४.८.। इति घिसंज्ञायाः समासविषयत्वात् घेर्ङितीति गुणाभावे यणादेशः ॥

तृतीयामृचमाह ॥

अस्मा इदु त्यमुपमं स्वर्षां भराम्यांगूषमास्येन।
मंहिष्ठमच्छोक्तिभिर्मतीनां सुवृक्तिभिः सूरिं वावृधध्यै ॥ ३ ॥

अस्मै। इत्। ऊं इति। त्यं। उपऽमं। स्वःऽसां। भरामि। आंगूषं। आस्येन।
मंहिष्ठं। अच्छोक्तिऽभिः। मतीनां। सुवृक्तिऽभिः। सूरिं। ववृधध्यै ॥ ३ ॥

अस्मा इदु। अस्मा एवेंद्राय त्यं तं प्रसिद्धमुपममुपमानहेतुभूतं स्वर्षां सुष्ठुरणीयस्य धनस्य दातारं सूरिं विपश्चितमिंद्रं वावृधध्यै वर्धयितुं सुवृक्तिभिः

सुष्ठावर्जकैः। समर्थैरित्यर्थः। मतीनां स्तुतीनां संबंधिभिरच्छोक्तिभिः स्वच्छैर्वचोभिर्महिष्ठमतिशयेन प्रवृद्धमेवंलक्षणमांगूषमाघोषमास्येन मुखेन भरामि। करोमीत्यर्थः ॥ उपमं। उपमीयतेऽनेनेत्युपमः। घञर्थे कविधानमिति करणे कप्रत्ययः। आतो लोप इटि चेत्याकारलोपः। स्वर्षा। सुपूर्वादर्तेर्विजंतः स्वर्शब्दः। षणु दाने। जनसनखनक्रमगमो विट्। विड्वनोरनुनासिकस्यादित्यात्वं। सनोतेरनः। पा० ८. ३. १०८.। इति षत्वं। भरामि। पादादित्वान्निघाताभावः। अच्छोक्तिभिः। अच्छा उक्तयो येषां। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। मतीनां। नामन्यतरस्यामिति नाम उदात्तत्वं। वावृधध्यै। वृधु वृद्धावित्यस्मादंतर्भावितण्यर्थात्तुमर्थे सेसेनिति कध्यैप्रत्ययः। कित्वाद्गुणाभावः। द्विर्भावश्छांदसः। यद्वा। यङ्लुगंतादस्मिन्प्रत्यय आगमानुशासनस्यानित्यत्वादीगाद्यभावः। अन्येषामपि दृश्यत इति सांहितिकमभ्यासस्य दीर्घत्वं। प्रत्ययाद्युदात्तत्वं ॥

चतुर्थीमृचमाह ॥

अस्मा इदु स्तोमं सं हिनोमि रथं न तष्टेव तत्सिनाय।
गिरश्च गिर्वाहसे सुवृक्तींद्राय विश्वमिन्वं मेधिराय ॥ ४ ॥

अस्मै। इत्। ऊं इति। स्तोमं। सं। हिनोमि। रथं। न। तष्टाऽइव। तत्ऽसिनाय।
गिरः। च। गिर्वाहसे। सुऽवृक्ति। इंद्राय। विश्वंऽइन्वं। मेधिराय ॥ ४ ॥

अस्मा एवेंद्राय स्तोमं शस्त्ररूपं स्तोत्रं संहिनोमि। प्रेरयामि। तत्र दृष्टांतः। तत्सिनाय। सिनमित्यन्ननाम। सिनमन्नं भवति सिनाति भूतानीति यास्कः। नि० ५. ५.। तेन रथेन सिनमन्नं यस्य स तथोक्तः। तस्मै रथस्वामिने तष्टेव। तष्टा तक्षको रथनिर्माता रथं न। यथा रथं प्रेरयति तद्वत्। इवेत्येतत्पदपूरणं। तथा गिर्वाहसे गीर्भिः स्तुतिभिरुह्यमानायेंद्राय गिरश्च शस्त्रसंबंधिनीः केवला ऋचश्च सुवृक्ति शोभनमावर्जनं यथा भवति तथा प्रेरयामि। तथा मेधिराय मेधाविन इंद्राय विश्वमिन्वं विश्वव्यापकं विश्वैर्व्याप्तं सर्वोत्कृष्टं हविश्च संहिनोमीत्यनुषंगः ॥ हिनोमि। हि गतौ वृद्धौ च। स्वादित्वात् श्नुः। तष्टेव। तक्षू तनूकरणे। ताच्छीलिकस्तृन्। ऊदित्वात्पक्ष इडभावः। स्कोः संयोगाद्योरंते चेति ककारलोपः। नित्त्वादाद्युदात्तत्वं। तत्सिनाय। सिनशब्दः षिञ् बंधन इत्यस्मादिणसिञ्दीङुष्यविभ्यो नक्। उ० ३. २.। इति नक्प्रत्ययांतः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं।

गिर्वाहसे। वाहिहाधाञ्भ्यश्छंदसीति वहतेः केवलाद्विहितोऽसुन्प्रत्ययो गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति वचनात्कारकपूर्वस्यापि भवति पूर्वपदप्रकृतिस्वरत्वं च। णिदित्यनुवृत्तेरुपधावृद्धिः। हलि चेति दीर्घाभावश्छांदसः। विश्वमिन्वं। इवि व्याप्तौ। विश्वमिन्वति व्याप्नोतीति विश्वमिन्वं। पचाद्यच्। लुगभावश्छांदसः। यद्वा खल्प्रत्ययो बहुलवचनादस्मादपि धातोर्द्रष्टव्यः। मेधिराय। मेधा अस्यास्तीति मेधिरः। मेधारथाभ्यामिरन्निरचौ वक्तव्यौ। पा॰ ५.२.१०९.३.। इति मत्वर्थीय इरन्। नित्त्वादाद्युदात्तत्वं॥

पंचमीमृचमाह॥

अस्मा इदु सप्तिमिव श्रवस्येंद्रायार्कं जुह्वा३ समंजे।
वीरं दानौकसं वंदध्यै पुरां गूर्तश्रवसं दर्माणं॥५॥

अस्मै। इत्। ऊं इति। सप्तिंऽइव। श्रवस्या। इंद्राय। अर्कं। जुह्वा। सं। अंजे।
वीरं। दानऽओकसं। वंदध्यै। पुरां। गूर्तऽश्रवसं। दर्माणं॥५॥

अस्मा एवेंद्रायार्कं स्तुतिरूपं मंत्रं श्रवस्या श्रवस्ययान्नेच्छया। अन्नलाभायेत्यर्थः। जुह्वाह्वानसाधनेन वागिंद्रियेण समंजे। समक्तं करोमि। एकीकरोमीत्यर्थः। तत्र दृष्टांतः। सप्तिमिव। यथान्नलाभाय गंतुकामः पुमान् अश्वं रथेनैकीकरोति तद्वत्। एकीकृत्य च वीरं शत्रुक्षेपणकुशलं दानौकसं दानात्मेकनिलयं गूर्तश्रवसं प्रशस्यान्नं पुरामसुरपुराणां दर्माणं विदारयितारं। एवंगुणविशिष्टमिंद्रं वंदध्यै वंदितुं स्तोतुं प्रवृत्तोऽस्मीति शेषः॥ सप्तिमिव। षप समवाये। समवैति रथेनैकीभवतीति सप्तिरश्वः। वसस्तिप्। उ॰ ४.१८१.। इति विधीयमानस्तिप्प्रत्ययो बहुलवचनादस्मादपि धातोर्भवति। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः। इवेन समास उक्तः। श्रवस्या। श्रवस्शब्दात्सुप आत्मनः क्यच्। क्यजंताद्धातोर्भावे अ प्रत्ययादित्यकारप्रत्ययः। ततष्टाप्। सुपां सुलुगिति तृतीयाया डादेशः। उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वं। अर्कं। ऋच स्तुतौ। ऋच्यते स्तूयतेऽनेनेत्यर्को मंत्रः। पुंसि संज्ञायां घः प्रायेणेति करणे घप्रत्ययः। चजोः कु घिण्यतोरिति कुत्वं। लघूपधगुणः। प्रत्ययस्वरः। जुह्वा। बहुलं छंदसीति कृतसंप्रसारणस्य ह्वेञो हुवः श्रुवच्चेति क्विप्। धातोर्दीर्घश्च। धातुस्वरेणांतोदात्तत्वं। तृतीयैकवचन उदात्तस्वरितयोर्यण इति स्वरितत्वं। उदात्त-

यणो हलपूर्वादित्यस्य विभक्त्युदात्तत्वस्य नोङ्धात्वोः । पा० ६. १. १७५. । इति प्रतिषेधः । अंजे । अंजू व्यक्तिम्रक्षणकांतिगतिषु । व्यत्ययेनात्मनेपदं । वंदध्यै । वदि अभिवादनस्तुत्योः । तुमर्थे सेसेनिति कध्यैप्रत्ययः । गूर्तश्रवसं । गृ शब्दे । निष्ठायां श्र्युकः क्कितीतीट्प्रतिषेधः । बहुलं छंदसीत्युत्वं । हलि चेति दीर्घः । नसत्तनिषत्तेत्यादौ निपातनान्निष्ठानत्वाभावः । गूर्तं श्रवो यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । दर्माणं । दॄ विदारणे । अन्येभ्योऽपि दृश्यंत इति मनिन् । नेड्वशि कृतीतीट्प्रतिषेधः । व्यत्ययेन प्रत्ययाद्युदात्तत्वं । यद्वा । औणादिको मनिप्रत्ययो द्रष्टव्यः ॥

॥ इति प्रथमस्य चतुर्थे सप्तविंशो वर्गः ॥

षष्ठीमृचमाह ॥

अस्मा इदु त्वष्टा तक्षद्वज्रं स्वपस्तमं स्वर्यं१ रणाय ।

वृत्रस्य चिद्विदद्येन मर्म तुजन्नीशानस्तुजता कियेधाः ॥ ६ ॥

अस्मै । इत् । ऊं इति । त्वष्टा । तक्षत् । वज्रं । स्वपःऽतमं । स्वर्यं । रणाय ।

वृत्रस्य । चित् । विदत् । येन । मर्म । तुजन् । ईशानः । तुजता । कियेधाः ॥ ६ ॥

त्वष्टा विश्वकर्मास्मा इदु । अस्मा एवेंद्राय वज्रं वर्जकमायुधं रणाय युद्धार्थं तक्षत् । तीक्ष्णमकरोत् । कीदृशं वज्रं । स्वपस्तमं । अतिशयेन शोभनकर्माणं । स्वर्यं । सुष्ठु शत्रुषु प्रेर्यं । यद्वा स्तुत्यं । तुजन् शत्रून्हिंसन् ईशान ऐश्वर्यवान् कियेधा बलवान् एवंगुणविशिष्ट इंद्रो वृत्रस्य चित् आवरकस्यासुरस्य मर्म मर्मस्थानं तुजता हिंसता येन वज्रेण विदत् । प्राहार्षीदित्यर्थः ॥ स्वपस्तमं । शोभनमपः कर्म यस्यासौ । अतिशयेन स्वपाः स्वपस्तमः । तमपः पित्त्वादनुदात्तत्वं । सोमनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वं । स्वर्यं । स्वर्यं ततक्षेत्यत्रोक्तं । विदत् । विद्लृ लाभे । लृदित्त्वात् च्लेरङादेशः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । यद्वृत्तयोगादनिघातः । तुजन् । तुज हिंसायां । शपि प्राप्ते व्यत्ययेन शः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः । ईशानः । ईश ऐश्वर्ये । शानच्यदादित्वाच्छपो लुक् । अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । तुजता । शतुरनुम इति विभक्तेरुदात्तत्वं । कियेधाः । अत्र निरुक्तं । कियेधाः कियद्धा इति वा क्रममाणधा इति वेति । नि० ६. २०. । अस्यायमभिप्रायः । कियत् किंपरि-

माणमस्य बलस्येत्यस्य बलस्येयत्तां यः कोऽपि न जानातीत्यर्थः। तादृशं बलं दधाति धारयतीति क्रियद्धाः। यद्वा क्रममाणमाक्रममाणं परेषां बलं धारयति निवारयतीति क्रममाणधाः। उभयत्रापि पृषोदरादित्वात्पूर्वपदस्य कियेभावः। दधातेर्विच् ॥

सप्तमीमृचमाह ॥

अस्येदु मातुः सवनेषु सद्यो महः पितुं पपिवाञ्चार्वन्ना।
मुषायद्विष्णुः पचतं सहीयान्विध्यद्वराहं तिरो अद्रिमस्ता ॥ ७ ॥

अस्य। इत्। ऊं इति। मातुः। सवनेषु। सद्यः। महः। पितुं। पपिऽवान्। चारु। अन्ना।
मुषायत्। विष्णुः। पचतं। सहीयान्। विध्यत्। वराहं। तिरः। अद्रिं। अस्ता ॥ ७ ॥

इदु इत्येतन्निपातद्वयं पादपूरणं। यद्वावधारणार्थं। मातुर्वृष्टिद्वारेण सकलस्य जगतो निर्मातुर्महो महतोऽस्य यज्ञस्य सवनेष्ववयवभूतेषु प्रातःसवनादिषु त्रिषु सवनेषु पितुं सोमलक्षणमन्नं सद्यः पपिवान्। यदाग्नौ हूयते तदानीमेव पानं कृतवानित्यर्थः। तथा चार्वन्ना चारूणि शोभनानि धानाकरंभादिहविर्लक्षणान्यन्नानि भक्षितवानिति शेषः। किंच विष्णुः सर्वस्य जगतो व्यापकः पचतं परिपक्वमसुराणां धनं यदस्ति तन्मुषायत् अपहरन्। सहीयान् अतिशयेन शत्रूणामभिभवितादिमस्ताद्रेर्वज्रस्य क्षेपकः। एवंभूत इंद्रस्तिरः। सत इति प्राप्तस्येति यास्कः। तिरः प्राप्तः सन् वराहं मेघं विध्यत्। अताडयत्। यद्वा। विष्णुः सुत्यदिवसात्मको यज्ञः। यज्ञो देवेभ्यो निलीय विष्णुरूपं कृत्वेत्याम्नानात्। स विष्णुः पचतं परिपक्वमसुरधनं यत्तन्मुषायत्। अचूचुरत्। तदनंतरं दीक्षोपसदात्मनां दुर्गरूपाणां सप्तानामह्नां परस्तादासीत। अद्रिमस्ता सहीयानिंद्रो दुर्गाण्यतीत्य तिरः प्राप्तः सन् वराहमुत्कृष्टदिवसरूपं तं यज्ञं विध्यत्। तथा च तैत्तिरीयकं। वराहोऽयं वाममोषः सप्तानां गिरीणां परस्ताद्वित्तं वेद्यमसुराणां बिभर्तीति। स दर्भपिंजूलमुद्वृत्य सप्त गिरीन्भित्त्वा तमहन्निति च ॥ महः। महतः। अच्छब्दलोपश्छांदसः। यद्वा। मह इत्येतत्पितुविशेषणं। महः प्रशस्तं पितुमित्यर्थः। पपिवान्। पिबतेर्लिटः क्वसुः। वस्वेकाजाद्घसामितीडागमः। आतो लोप इटि चेत्याकारलोपः। प्रत्ययस्वरः। चारु। सुपां सुलुगिति विभक्तेर्लुक्। मुषायत्। मुष स्तेये। घञर्थे कविधानमिति भावे कप्रत्ययः। मुषमात्मन इच्छति। सुप आत्मनः क्यच्। न छंदस्यपुत्रस्येतीत्व-

वद्दीर्घस्यापि प्रतिषेधे व्यत्ययेन दीर्घः । अस्मात्क्यजंताल्लटः शतृ । आगमानुशासनस्यानित्यत्वान्नुमभावः । द्वितीयपक्षे तु क्यजंताल्लङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । अत्र स्तेयेच्छया तदुत्तरभाविनी क्रिया लक्ष्यते । पचतं । भृमृदृशीत्यादिना पचतेरतच्प्रत्ययः । चित्त्वादंतोदात्तत्वं । विध्यत् । व्यध ताडने । लङि दिवादित्वात् श्यन् । तस्य ङित्त्वाद्ग्रहिज्यादिना संप्रसारणं । श्यनो नित्त्वादाद्युदात्तत्वं । पादादित्वान्निघाताभावः । वराहं । वरमुदकमाहारो यस्य । यद्वा वरमाहरतीति वराहारः सन् पृषोदरादित्वाद्वराह इत्युच्यते । अत्र निरुक्तं । वराहो मेघो भवति वराहारः । वरमाहारमाहार्षीरिति च ब्राह्मणमिति । नि॰ ५. ४. । *यज्ञपक्षे तु वरं च तदहो वराहः । राजाहःसखिभ्य इति समासांतष्टच्*प्रत्ययः । चित्त्वादंतोदात्तत्वं । अस्ता । असु क्षेपण इत्यस्मात्साधुकारिणि तृनीडभावश्छांदसः । न लोकाव्ययेति षष्ठीप्रतिषेधः ॥

अष्टमीमृचमाह ॥

अस्मा इदु ग्नाश्चिद्देवपत्नीरिंद्रायार्कमहिहत्य ऊवुः ।
परि द्यावापृथिवी जभ्र उर्वी नास्य ते महिमानं परि ष्टः ॥ ८ ॥

अस्मै । इत् । ऊं इति । ग्नाः । चित् । देवऽपत्नीः । इंद्राय । अर्कं । अहिऽहत्ये । ऊवुरित्यूवुः । परि । द्यावापृथिवी इति । जभ्रे । उर्वी इति । न । अस्य । ते इति । महिमानं । परि । स्त इति स्तः ॥ ८ ॥

अस्मा एवेंद्रायाहिहत्येऽहेर्वृत्रस्य हनने निमित्तभूते सति ग्नाश्चित् गमनस्वभावा अपि स्थिता देवपत्नीर्देवानां पालयित्र्यो गायत्र्याद्या देवता अर्कमर्चनसाधनं स्तोत्रमूवुः । समतन्वत । चक्रुरित्यर्थः । स चेंद्र उर्वी विस्तृते द्यावापृथिवी द्यावापृथिव्यौ परिजभ्रे । स्वतेजसा परिजहार । अतिचक्रामेत्यर्थः ॥ ऊवुः । वेञ् तंतुसंताने । लिटि वेञो वयिः । पा॰ २. ४. ४१. । लिटः कित्त्वाद्यजादित्वेन संप्रसारणे क्रियमाणे यकारस्य लिटि वयो यः । पा॰ ६. १. ३८. । इति प्रतिषेधाद्वकारस्य संप्रसारणं परपूर्वत्वं द्विर्वचनादि । वश्चास्यान्यतरस्यां किति । पा॰ ६. १. ३९. । इति यकारस्य वकारादेशः । जभ्रे । हृञ् हरणे । लिटि ञित्त्वात्कर्त्रभिप्राय आत्मनेपदं । हृग्रहोर्भ इति भत्वं । उर्वी । उरुशब्दाद्वोतो गुणवचनादिति ङीष् । वा छंदसीति पूर्वसवर्णदीर्घत्वं ॥

नवमीमृचमाह ॥

अस्येदेव प्र रिरिचे महित्वं दिवस्पृथिव्याः पर्यंतरिक्षात् ।
स्वराळिंद्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय ॥ ९ ॥

अस्य । इत् । एव । प्र । रिरिचे । महिऽत्वं । दिवः । पृथिव्याः । परि । अंतरिक्षात् ।
स्वऽराट् । इंद्रः । दमे । आ । विश्वऽगूर्तः । सुऽअरिः । अमत्रः । ववक्षे । रणाय ॥ ९ ॥

अस्येदेव । इदिति पादपूरणः । अस्यैवेंद्रस्य महित्वं माहात्म्यं प्ररिरिचे । अतिरिच्यते । अधिकं भवतीत्यर्थः । अत्रोपसर्गो धात्वर्थस्य निवृत्तिमाचष्टे । यथा प्रस्मरणं प्रस्थानमिति । कुतः सकाशात्प्ररिरिच इत्यत आह । दिवः । द्युलोकात् । पृथिव्याः । भूलोकात् । अंतरिक्षात् । द्यावापृथिव्योर्मध्ये वर्तमानादंतरिक्षलोकाच्च । पर्युपर्यर्थः । त्रीन्लोकानतीत्योपरि प्ररिरिच इत्यर्थः । दमे दमयितव्ये विषये स्वराट् स्वेनैव तेजसा राजमानो विश्वगूर्तो विश्वस्मिन्कार्य उद्गूर्णः समर्थः । यद्वा विश्वं सर्वमायुधं गूर्तमुद्यतं यस्य स तथोक्तः । स्वरिः । शोभनशत्रुकः । शोभने शत्रौ हंतव्ये सति हंता वीर्यवत्तम इति गम्यते । यथाकवारिं दिव्यं शासमिंद्रमिति । अकुत्सितारिमिति हि तस्यार्थः । अमत्रः । युद्धादिषु गमनकुशलः । मात्रेयत्तया रहितो वा । अमत्रोऽमात्रो महान्भवत्यभ्यमितो वेति यास्कः । नि० ६. २३. । एवंभूत इंद्रो रणाय रणं युद्धमाववक्षे । आवहति । मेघान्प्रापयति । मेघैः परस्परयुद्धं कारयित्वा वृष्टिं चकारेति भावः । यद्वा युद्धाय स्वकीयान्भटान् गमयति ॥ अस्य । ऊडिदमिति विभक्तेरुदात्तत्वं । रिरिचे । रिचिर् विरेचने । छंदसि लुङ्लङ्लिट इति वर्तमाने कर्मणि लिट् । पृथिव्याः । उदात्तयण इति विभक्तेरुदात्तत्वं । स्वराट् । राजृ दीप्तावित्यस्मात्सत्सूद्विषेति क्विप् । व्रश्चादिना षत्वे जश्त्वं । दमे । दम उपशम इत्यस्मात्कर्मणि घञि नोदात्तोपदेशस्य मांतस्यानाचमेः । पा० ७. ३. ३४. । इति वृद्धिप्रतिषेधः । घञो ञित्वादाद्युदात्तत्वं । विश्वगूर्तः । गॄ निगरणे । अस्मान्निष्ठायां श्र्युकः कितीतीट्प्रतिषेधः । बहुलं छंदसीत्युत्वं । हलि चेति दीर्घः । यद्वा गूरी उद्यमे । अस्मान्निष्ठा । नसत्तनिषत्तेत्यादौ निपातनान्निष्ठानत्वाभावः । तत्पुरुषपक्षे मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं । बहुव्रीहिपक्षे तु बहुव्रीहौ विश्वं संज्ञायामित्यसंज्ञायामपि पूर्वपदांतोदात्तत्वं । अमत्रः । अम गत्यादिषु । अमिनक्षियजिबंधीत्यादिनौणादि-

कोऽचन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं। ववक्षे। वहेर्लेटि सिब्बहुलं लेटीति सिप्। बहुलं छंदसीति शपः श्लुः। ढत्वषत्वकत्वानि। लोपस्त आत्मनेपदेष्विति तलोपः। रणाय। क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी। यद्वा। गत्यर्थकर्मणीति चतुर्थी ॥

दशमीमृचमाह ॥

अस्येदेव शवसा शुषंतं वि वृश्चद्वज्रेण वृत्रमिंद्रः।
गा न व्राणा अवनीरमुंचदभि श्रवो दावने सचेताः ॥ १० ॥

अस्य। इत्। एव। शवसा। शुषंतं। वि। वृश्चत्। वज्रेण। वृत्रं। इंद्रः।
गाः। न। व्राणाः। अवनीः। अमुंचत्। अभि। श्रवः। दावने। सऽचेताः ॥ १० ॥

अस्यैवेंद्रस्य शवसा बलेन शुषंतं शुष्यंतं वृत्रमिंद्रो वज्रेण विवृश्चत्। व्यवच्छिनत्। तथा गा न चोरैरपहृता गाव इव व्राणा वृत्रेणावृता अवनी रक्षणहेतुभूता अपोऽमुंचत्। अवर्षीत्। तथा दावने हविर्दात्रे यजमानाय सचेतास्तेन यजमानेन समानचित्तः सन् श्रवः कर्मफलभूतमन्नमभ्याभिमुख्येन ददातीति शेषः ॥ शुषंतं। शुष शोषणे। श्यनि प्राप्ते व्यत्ययेन शः। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वर एव शिष्यते। व्राणाः। वृञ् वरणे। कर्मणि लटः शानचि बहुलं छंदसीति यको लुक्। शानचो ङित्त्वाद्गुणाभावे यणादेशः। अवनीः। अवतेः करणेऽर्तिसृधृधमीत्यादिनानिप्रत्ययः। प्रत्ययाद्युदात्तत्वं। दावने। आतो मनिन्निति वनिप्। चतुर्थ्येकवचनेऽल्लोपाभावश्छांदसः ॥

॥ इति प्रथमस्य चतुर्थेऽष्टाविंशो वर्गः ॥

एकादशीमृचमाह ॥

अस्येदु त्वेषसा रंत सिंधवः परि यद्वज्रेण सीमयच्छत्।
ईशानकृद्दाशुषे दशस्यन्तुर्वीतये गाधं तुर्वणिः कः ॥ ११ ॥

अस्य। इत्। ऊं इति। त्वेषसा। रंत। सिंधवः। परि। यत्। वज्रेण। सीं। अयच्छत्।
ईशानऽकृत्। दाशुषे। दशस्यन्। तुर्वीतये। गाधं। तुर्वणिः। करिति कः ॥ ११ ॥

अस्यैवेंद्रस्य त्वेषसा दीप्तेन बलेन सिंधवः समुद्राः। यद्वा गंगाद्याः सप्त नद्यो रंत। स्वे स्वे स्थाने रमंते। यद्यस्मादयमिंद्रो वज्रेण सीमेनान्सिंधून्पर्ययच्छत्।

परितो नियमितवान्। अपि च। ईशानकृत् वृत्रादिशत्रुवधेनात्मानमैश्वर्यवंतं कुर्वन्निंद्रो दाशुषे हविर्दत्तवते यजमानाय फलं दशस्यन् प्रयच्छन् तुर्वणिस्तूर्ण-संभजनः। तुर्वणिस्तूर्णवनिरिति यास्कः। यद्वा तुर्विता शत्रूणां हिंसिता। एवंभूत इंद्रस्तुर्वीतय एतत्संज्ञायोदके निमग्नाय ऋषये गाधमवस्थानयोग्यं धिष्ण्यं प्रदेशं कः। अकार्षीत् ॥ रंत। रमु क्रीडायां। छांदसे लङि बहुवचने बहुलं छंदसीति शपो लुक्। धातोरंत्यलोपश्छांदसः। अयच्छत्। यम उपरमे। इषुगमियमां छ इति छत्वं। कः। करोतेर्लुङि मंत्रे घसह्वरणशेत्यादिना। पा० २.४.८०। च्लेर्लुक्। गुणः। हल्ङ्यादिना तलोपः। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः॥

द्वादशीमृचमाह ॥

अस्मा इदु प्र भरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः।
गोर्न पर्व वि रदा तिरश्चेष्यन्नर्णांस्यपां चरध्यै ॥ १२ ॥

अस्मै। इत्। ऊं इति। प्र। भर। तूतुजानः। वृत्राय। वज्रं। ईशानः। कियेधाः।
गोः। न। पर्व। वि। रद। तिरश्चा। इष्यन्। अर्णांसि। अपां। चरध्यै ॥ १२ ॥

तूतुजान इति क्षिप्रनाम। तूतुजानस्त्वरमाणः। यद्वा शत्रून्हिंसन्। ईशान ईश्वरः सर्वेषां कियेधाः कियतोऽनवधृतपरिमाणस्य बलस्य धाता। यद्वा क्रम-माणं शत्रुबलं दधात्यवस्थापयतीति कियेधाः। हे इंद्र। एवंभूतस्त्वमस्मै वृत्राय वज्रं प्रभर। इमं वृत्रं वज्रेण प्रहरेत्यर्थः। प्रहृत्य चार्णांसि वृष्टिजलानीष्यन् तस्माद्वृत्रान्निर्गमयंस्त्वमपां चरध्यै तासामपां चरणाय भूप्रदेशं प्रतिगमनाय तस्य वृत्रस्य मेघरूपस्य पर्व पर्वाण्यवयवसंधीन्तिरश्चा तिर्यगवस्थितेन वज्रेण विरदा। विलिख। छिंद्धीत्यर्थः। तत्र दृष्टांतः। गोर्न। यथा मांसस्य विकर्तारो लौकिकाः पुरुषाः पशोरवयवानितस्ततो विभजंति तद्वत्। अत्र निरुक्तं। अस्मै प्रहर तूर्णं त्वरमाणो वृत्राय वज्रमीशानः कियेधाः कियद्धा इति वा क्रममाणधा इति वा। गोरिव पर्वाणि विरद मेघस्येष्यन्नर्णांस्यपां चरणाय। नि० ६.२०। इति ॥ भरा। हृग्रहोर्भ इति भत्वं। द्व्यचोऽतस्तिङ इति सांहितिको दीर्घः। तूतु-जानः। तुज हिंसायां। कानचि तुजादीनां दीर्घोऽभ्यासस्येत्यभ्यासस्य दीर्घत्वं। छंदस्युभयथेति कानचः सार्वधातुकत्वे सत्यभ्यस्तानामादिरित्याद्युदात्तत्वं। कि-येधाः। तुजता कियेधा इत्यत्रोक्तं। रदा। रद विलेखने। तिङ्ङतिङ इति निघातः।

तिरश्चा । तिरोऽंचतीति तिर्यङ् । ऋत्विगित्यादिना क्विन् । अनिदितामिति नलोपः । तृतीयैकवचने भसंज्ञायामच इत्यकारलोपः । श्चुत्वेन सकारस्य शकारः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं । इष्यन् । इष गतावित्यस्मादंतर्भावितण्यर्थाच्छतरि दिवादिभ्यः श्यन् । तस्य नित्त्वादाद्युदात्तत्वं । चरध्यै । तुमर्थे सेसेनिति चरतेरध्यैप्रत्ययः ॥

त्रयोदशीमृचमाह ॥

अस्येदु प्र ब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्य उक्थैः ।
युधे यदिष्णान आयुधान्यृघायमाणो निरिणाति शत्रून् ॥ १३ ॥

अस्य । इत् । ऊं इति । प्र । ब्रूहि । पूर्व्याणि । तुरस्य । कर्माणि । नव्यः । उक्थैः ।
युधे । यत् । इष्णानः । आयुधानि । ऋघायमाणः । निऽरिणाति । शत्रून् ॥ १३ ॥

उक्थैः शस्त्रैर्नव्यः स्तुत्यो य इंद्र अस्येदु । अस्यैव तुरस्य युद्धार्थं त्वरमाणस्येंद्रस्य पूर्व्याणि पुराणानि कर्माण्येतत्कृतानि बलकर्माणि हे स्तोतः प्रब्रूहि । प्रशंस । यद्यदा युधे योधनायायुधानि वज्रादीनीष्णान आभीक्ष्ण्येन प्रेरयन् शत्रूनृघायमाणो हिंसंश्चेंद्रो निरिणाति । अभिमुखं गच्छति । तदानीं प्रब्रूहीति पूर्वेण संबंधः ॥ पूर्व्यमिति पुराणनाम । पूर्व्यमह्नायेति पुराणनामसु पाठात् । तुरस्य । तुर त्वरणे । इगुपधलक्षणः कः । नव्यः । णु स्तुतौ । अचो यदिति यत् । गुणः । धातोस्तन्निमित्तस्यैवेत्यवादेशः । इष्णानः । इष आभीक्ष्ण्ये । क्र्यादिकः । व्यत्ययेनात्मनेपदं । शानचश्चित्त्वादंतोदात्तत्वं । ऋघायमाणः । न हि त्वा रोदसी उभे ऋघायमाणमित्यत्र व्युत्पादितं । निरिणाति । री गतिरेषणयोः । क्र्यादिभ्यः श्ना । प्वादीनां ह्रस्व इति ह्रस्वत्वं । तिपः पित्त्वादनुदात्तत्वे विकरणस्वरः शिष्यते । तिङि चोदात्तवतीति गतेर्निघातः । यद्वृत्तयोगान्निङ्‌तिङ इति निघाताभावः ॥

चतुर्दशीमृचमाह ॥

अस्येदु भिया गिरयश्च दृळ्हा द्यावा च भूमा जनुषस्तुजेते ।
उपो वेनस्य जोगुवान ओणिं सद्यो भुवद्वीर्याय नोधाः ॥ १४ ॥

अस्य । इत् । ऊं इति । भिया । गिरयः । च । दृळ्हाः । द्यावा । च । भूम । जनुषः । तुजेते इति ।
उपो इति । वेनस्य । जोगुवानः । ओणिं । सद्यः । भुवत् । वीर्याय । नोधाः ॥ १४ ॥

अस्यैवेंद्रस्य भिया पक्षच्छेदभयेन गिरयः पर्वता अपि हळ्हा निश्चलाः स्वस्वदेशेऽवतिष्ठते। जनुषः प्रादुर्भूतादस्मादेवेंद्राद्भीत्या द्यावा भूमा च द्यावापृथिव्यावपि तुजेते। तुजिर्हिंसार्थोऽप्यत्र कंपने द्रष्टव्यः। कंपेते इत्यर्थः। किंच वेनस्य कांतस्यास्यौणिं दुःखस्यापनयकं रक्षणमुपो जोगुवानोऽनेकैः सूक्तैः पुनः पुनरुपशब्दयन्। उपश्लोकयन्नित्यर्थः। एवंभूतो नोधा ऋषिः सद्यस्तदानीमेव वीर्याय भुवत्। वीर्यवानभवत् ॥ द्यावा च भूमा। द्यावा भूमेत्यनयोर्मध्ये चशब्दस्य पाठश्छांदसः। दिवो द्यावेति दिवशब्दस्य द्यावादेशः। सुपां सुलुगिति विभक्तेर्डादेशः। छांदसमत्वं पदकारैः कृतं। देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं। पदद्वयप्रसिद्धिरपि सांप्रदायिकी। जनुषः। जनी प्रादुर्भावे। जनेरुसिरित्यौणादिक उसिप्रत्ययः। जोगुवानः। गुङ् अव्यक्ते शब्दे। अस्माद्यङ्लुगंताद्व्यत्ययेन शानच्। अदादिवच्चेति वचनाच्छपो लुक्। उवङादेशः। अभ्यस्तानामादिरित्याद्युदात्तत्वं। औणिं। ओणृ अपनयने। अस्मादौणादिक इप्रत्ययः। भुवत्। भवतेर्लेट्यडागमः। बहुलं छंदसीति शपो लुक्। भूसुवोस्तिङीति गुणप्रतिषेधः। नोधाः। नोधा ऋषिर्भवति नवनं दधातीति यास्कः। नि० ४.१६.। तस्माद्धाञोऽसुन् नवशब्दस्य नोभावश्च ॥

पंचदशीमृचमाह ॥

अस्मा इदु त्यदनु दाय्येषामेको यद्वव्ने भूरेरीशानः।
प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिंद्रः ॥ १५ ॥

अस्मै। इत्। ऊं इति। त्यत्। अनु। दायि। एषां। एकः। यत्। वव्ने। भूरेः। ईशानः।
प्र। एतशं। सूर्ये। पस्पृधानं। सौवश्व्ये। सुस्विं। आवत्। इंद्रः ॥ १५ ॥

एक एक एव शत्रूञ्जेतुं समर्थो भूरेर्बहुविधस्य धनस्येशानः स्वामी यत्स्तोत्रं वव्ने। ययाचे। एषां स्तोतृणां संबंधि। यद्वा विभक्तिव्यत्ययः। एतैस्त्यत् तत्प्रसिद्धं स्तोत्रमस्मा इंद्रायानुदायि। अकारीत्यर्थः। उत्तरार्धस्येयमाख्यायिका ॥ स्वश्वो नाम कश्चिद्राजा। स च पुत्रकामः सूर्यमुपासां चक्रे। तस्य च सूर्य एव पुत्रो बभूव। तेन सहैतशनाम्नो महर्षेर्युद्धं जातमिति तदेतदिहोच्यते। अयमिंद्रः सौवश्व्ये स्वश्वपुत्रे सूर्ये पस्पृधानं स्पर्धमानं सुष्विं सोमानामभिषोतारमेतत्संज्ञकमृषिं प्रावत्। प्रारक्षत् ॥ दायि। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। वव्ने।

वनु याचने। लिटि व्यत्ययेनोपधालोपः। पस्पृधानं। स्पर्ध संघर्षे। अस्माल्लिटः कानच्। द्विर्वचने शर्पूर्वाः खय इति पकारः शिष्यते। धात्वकारस्य लोपो रेफस्य संप्रसारणं च पृषोदरादित्वात्। चित्त्वादंतोदात्तत्वं। सौवश्व्ये। स्वश्व इति जनपदशब्दः क्षत्रिये संज्ञात्वेन वर्तते। वा नामधेयस्य वृद्धेत्कोसलाजादाञ्ञ्यङ्। पा० ४. १. १७१.। इत्यपत्यार्थे ञ्यङ्प्रत्ययः। न य्वाभ्यां पदांताभ्यां। पा० ७. ३. ३.। इति वृद्धिप्रतिषेधः। ऐजागमश्च। ञित्त्वादाद्युदात्तत्वं। सुष्विं। षुञ् अभिषवे। उत्सर्गश्छंदसि। पा० ३. २. १७१. २.। इत्यस्मात्किन्प्रत्ययः। लिड्वद्भावात् द्विर्भावः। यणादेशः। उवङादेशाभावश्छांदसः॥

षोडशीमृचमाह॥

एवा ते हरियोजना सुवृक्तींद्र ब्रह्माणि गोतमासो अक्रन्।
ऐषु विश्वपेशसं धियं धाः प्रातर्मक्षू धियावसुर्जगम्यात्॥ १६॥
एव। ते। हरिऽयोजन। सुऽवृक्ति। इंद्र। ब्रह्माणि। गोतमासः। अक्रन्।
आ। एषु। विश्वऽपेशसं। धियं। धाः। प्रातः। मक्षु। धियाऽवसुः। जगम्यात्॥ १६॥

हर्योरश्वयोर्योजनं यस्मिन्रथे स तथोक्तः। तस्य स्वामित्वेन संबंधी हरियोजनः। हे हरियोजनेंद्र गोतमासो गोतमगोत्रोत्पन्ना ऋषयः सुवृक्ति सुष्ठावर्जकान्यभिमुखीकरणकुशलानि ब्रह्माणि स्तुतिरूपाणि मंत्रजातानि ते तवैवाक्रन्। अकृषत। एषु स्तोतृषु विश्वपेशसं बहुविधरूपयुक्तं धियं धाः। धिया लभ्यत्वाद्धीर्धनमुच्यते। यद्वा। धीशब्दः कर्मवचनः। पश्वादिबहुविधरूपं धनमग्निष्टोमादिकं बहुविधरूपं कर्म वाधाः। धेहि। स्थापय। प्रातरिदानीमिव परेद्युरपि प्रातःकाले धियावसुर्बुद्ध्या कर्मणा वा प्राप्तधन इंद्रो मक्षू शीघ्रं जगम्यात्। अस्मद्रक्षणार्थमागच्छतु॥ एवा। निपातस्य चेति संहितायां दीर्घः। सुवृक्ति। सुपां सुलुगिति शसो लुक्। अक्रन्। करोतेर्लुङि मंत्रे घसह्वरेत्यादिना च्लेर्लुक्। अंतादेशः। तस्य ङित्त्वाद्गुणाभावे यणादेशः। इतश्चेतीकारलोपे संयोगांतलोपे चाडागमः। धाः। छंदसि लुङ्लङ्लिट इति लोडर्थे लुङि गातिस्थेति सिचो लुक्। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः॥

॥ इति प्रथमस्य चतुर्थ एकोनत्रिंशो वर्गः॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके चतुर्थोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथ पंचमाध्याय आरभ्यते। प्रथमे मंडल एकादशेऽनुवाके चत्वारि सूक्तानि गतानि। प्र मन्महे इत्येतत्त्रयोदशर्चं पंचमं सूक्तं। तत्रानुक्रम्यते। प्र सप्तोनेति। अनिरुक्ता संख्या विंशतिरित्युक्तत्वात्प्र सप्तोनेत्युक्ते त्रयोदशेत्युक्तं भवति। ऋषिश्चान्यस्मादिति परिभाषया नोधा ऋषिः। अनादेशपरिभाषया त्रिष्टुप् छंदः। इंद्रो देवता। गतः सामान्यविनियोगः। विशेषविनियोगस्तु लिंगादवगंतव्यः॥

तत्र प्रथमामृचमाह ॥

प्र मन्महे शवसानाय शूषमांगूषं गिर्वणसे अंगिरस्वत्।
सुवृक्तिभिः स्तुवत ऋग्मियायार्चामार्कं नरे विश्रुताय ॥ १ ॥
प्र। मन्महे। शवसानाय। शूषं। आंगूषं। गिर्वणसे। अंगिरस्वत्।
सुवृक्तिऽभिः। स्तुवते। ऋग्मियाय। अर्चाम। अर्कं। नरे। विऽश्रुताय ॥ १ ॥

शवसानाय। शव इति बलनाम। तदिवाचरते। यथा बलं शत्रून्हंति तथा शत्रूणां हंत्रेत्यर्थः। गिर्वणसे। गीर्भिः स्तुतिलक्षणैर्वचोभिः संभजनीयाय। गिर्वणा देवो भवति गीर्भिरेनं वनयंतीति यास्कः। एवं भूतायेंद्राय। शूषमिति सुखनाम। शूषं सुखहेतुभूतं। आंगूष स्तोम आघोष इति यास्कः। आंगूषं स्तोत्रमंगिरस्वत् अंगिरस इव प्रमन्महे। वयं स्तोतारः प्रकर्षेणावगच्छामः।

अवगत्य च सुवृक्तिभिः सुष्ठावर्जकैः स्तुत्याभिमुखीकरणसमर्थैः स्तोत्रैः स्तुवते स्तोत्रं कुर्वते ऋषये य इंद्र ऋग्मियोऽर्चनीयो भवति । यद्वा कर्मणि कर्तृप्रत्ययः । ऋषिणा स्तूयमानायेत्यर्थः ॥ नरे सर्वेषां नेत्रे । यद्वा नरे यजमाने विश्रुताय यष्टव्यतया विशेषेण प्रख्याताय । एवंभूताय तस्मा अर्कं मंत्ररूपं स्तोत्रं । अर्को मंत्रो भवति यदेनेनार्चंतीति यास्कः । अर्चाम । पूजयाम । उच्चारयामेत्यर्थः ॥ मन्महे । मनु अवबोधने । तनादित्वादुप्रत्ययः । लोपश्चास्यान्यतरस्यां म्वोः । पा० ६.४.१०७. । इति मकारादौ प्रत्यय उकारलोपः । शवसानाय । शव इवाचरति शवस्यते । अस्माल्लटः शानच् । बहुलं छंदसीति शपो लुक् । शानचश्छंदस्युभयथेत्यार्धधातुकत्वादतोलोपयलोपौ । चित इत्यंतोदात्तत्वं । ननु क्यङो ङित्त्वात्तास्यनुदात्तेदिति शानचोऽनुदात्तेन भवितव्यं । एवं । तर्हि ताच्छीलिकश्चानश् । तस्य सार्वधातुकत्वेऽपि लसार्वधातुकत्वाभावाच्चितः स्वर एव शिष्यते । गूषं । गूष प्रसवे । पचाद्यच् । आंगूषं । आङ्पूर्वाद्घुषेः पचाद्यचि घो इत्यस्य गू आदेशः पृषोदरादित्वात् । आङो ङकारस्येत्संज्ञाभावश्छांदसः । चित्स्वरेणोत्तरपदस्यांतोदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वं । घञि वा थाथादिनोत्तरपदांतोदात्तत्वं । गिर्वणसे । गॄ शब्दे । संपदादिलक्षणो भावे क्विप् । ऋत इद्धातोरितीत्वं । गीर्भिर्वन्यते संभज्यत इति गिर्वणाः । औणादिकः कर्मण्यसुन् । संज्ञापूर्वकस्य विधेरनित्यत्वाद्धलि चेति दीर्घाभावः । गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति वचनात्पूर्वपदप्रकृतिस्वरत्वं । अंगिरस्वत् । तेन तुल्यमिति वतिः । नभोऽगिरोमनुषां वत्युपसंख्यानमिति भसंज्ञायां रुत्वाद्यभावः । प्रत्ययस्वरः । सुवृक्तिभिः । वृजी वर्जने । भावे क्तिन् । तितुत्रेतीट्प्रतिषेधः । शोभनमावर्जनं येषां । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । ननु क्तिनंतस्योत्तरपदस्याद्युदात्तत्वादाद्युदात्तं द्व्यच् छंदसीति वचनादुत्तरपदाद्युदात्तत्वं प्राप्नोति । एवं । तर्हि तत्पुरुषोऽस्तु । शोभनमावर्जितो भवत्येभिरिति सुवृक्तयः स्तोत्राणि । करणे क्तिन् । तादौ च निति कृत्यतौ इति गतेः प्रकृतिस्वरत्वे प्राप्ते मन्क्तिन्नित्यादिना कारकादुत्तरस्य क्तिनो विहितमुत्तरपदांतोदात्तत्वमकारकादपि व्यत्ययेन भवति । स्तुवते । शतुरनुम इति विभक्तेरुदात्तत्वं । ऋग्मियाय । एकाचो नित्यं मयटमिच्छंतीति ऋक्शब्दाद्विकारार्थे मयट् । स्वादिष्वसर्वनामस्थान इति पदसंज्ञायां कुत्वजश्त्वे । व्यत्ययेनेत्वं । यद्वा । ऋच स्तुतावित्यस्माद्भावे मक् । बहुलवचनात्कुत्वं जश्त्वं च । ऋग्मं स्तुतिमर्हतीति ऋग्मियः । अर्हार्थे घच् । चित इत्यंतोदात्तत्वं । अर्चाम ।

अर्च पूजायां। भौवादिकः। शपः पित्त्वादनुदात्तत्वं। तिङश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। अर्कं। अर्च्यतेऽनेनेत्यर्कः। पुंसि संज्ञायां घः प्रायेणेति घप्रत्ययः। चजोः कु घिण्यतोरिति कुत्वं। नरे। नृशब्दाच्चतुर्थ्येकवचने गुणश्छांदसः। विश्रुताय। श्रु श्रवणे। कर्मणि निष्ठा। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं॥

द्वितीयामृचमाह॥

प्र वो॑ म॒हे महि॒ नमो॑ भरध्वमांगू॒ष्यं॑ शवसा॒नाय॒ साम॑।
येना॑ नः॒ पूर्वे॑ पि॒तरः॑ पद॒ज्ञा अर्चं॑तो॒ अंगि॑रसो॒ गा अविं॑दन्॥ २॥
प्र। वः॒। म॒हे। महि॑। नमः॑। भ॒र॒ध्वं॒। आं॒गू॒ष्यं॑। श॒व॒सा॒नाय॑। साम॑।
येन॑। नः॒। पूर्वे॑। पि॒तरः॑। प॒द॒ऽज्ञाः। अर्चं॑तः। अंगि॑रसः। गाः। अविं॑दन्॥ २॥

हे ऋत्विजः। वो यूयं महे महते शवसानाय बलमिवाचरते। अतिबलायेत्यर्थः। उत्तरवाक्ये यच्छब्दश्रुतेस्तच्छब्दाध्याहारः। एवंभूताय तस्मा इंद्राय महि महत्प्रौढं नमः स्तोत्रं प्रभरध्वं। प्रकर्षेण संपादयत। किं तत्स्तोत्रमित्याह। आंगूष्यं साम। आघोषयोग्यं रथंतरादि साम। तन्निष्पाद्यमित्यर्थः। अभि त्वा शूरेत्यादिष्वृक्षु यज्ञानं तस्य सामेत्याख्या। तथा चोक्तं। गीतिषु सामाख्येति। येनेंद्रेण नोऽस्माकं पितरः पितृविशेषाः पूर्वे पूर्वपुरुषा अंगिरसः पणिनाम्नासुरेणापहृतानां गवां पदज्ञाः संतः। अत एवार्चंतस्तं पूजयंतो गा अविंदन्। अलभंत॥ वः। प्रथमार्थे द्वितीया। पदज्ञाः। पदानि जानंतीति। आतोऽनुपसर्गे क इति कः। आतो लोप इटि चेत्याकारलोपः। अविंदन्। विद्लृ लाभे। शे मुचादीनामिति नुमागमः॥

तृतीयामृचमाह॥

इंद्र॒स्यांगि॑रसां चे॒ष्टौ वि॒दत्स॒रमा॒ तन॑याय धा॒सिं।
बृह॒स्पति॑र्भि॒नदद्रिं॑ वि॒दद्गाः समु॒स्रिया॑भिर्वावशंत॒ नरः॑॥ ३॥
इंद्र॑स्य। अंगि॑रसां। च॒। इ॒ष्टौ। वि॒दत्। स॒रमा॑। तन॑याय। धा॒सिं।
बृह॒स्पतिः॑। भि॒नत्। अद्रिं॑। वि॒दत्। गाः। सं। उ॒स्रिया॑भिः। वा॒व॒शं॒त॒। नरः॑॥ ३॥

अत्रेदमाख्यानं। सरमा नाम देवशुनी। पणिभिर्गोष्वपहृतासु तदन्वेषणाय

तां सरमामिंद्रः प्राहैषीत्। यथा लोके व्याधो वनांतर्गतमृगान्वेषणाय श्वानं विसृजति तद्वत्। सा च सरमैवमवोचत्। हे इंद्र अस्मदीयाय शिशवे तद्गो-संबंधि क्षीराद्यन्नं यदि प्रयच्छसि तर्हि गमिष्यामीति। स तथेत्यब्रवीत्। तथा च शाट्यायनकं। अन्नादिनी ते सरमे प्रजां करोमि या नो गा अन्वविंद इति। ततो गत्वा गवां स्थानमज्ञासीत्। ज्ञात्वा चास्मै न्यवेदयत्। तथा निवेदितासु गोषु तमसुरं हत्वा ता गाः स इंद्रोऽलभतेति। अयमर्थोऽस्यां प्रतिपाद्यते ॥ इंद्र-स्यांगिरसामृषीणां चेष्टौ प्रेषणे सति सरमा देवशुनी तनयाय स्वपुत्राय धासिमन्नं विदत्। अविंदत्। धासिरित्यन्ननाम। धासिरिति तन्नामसु पाठात्। तया गोषु निवेदितासु बृहस्पतिर्बृहतां देवानामधिपतिरिंद्रोऽद्रिमत्तारमसुरं भिनत्। अवधीत्। तेनापहृता गा विदत्। अलभत। ततो नरो नेतारो देवा उस्रि-याभिर्गोभिः सह। उस्रियेति गोनाम। संवावशंत। भृशं हर्षशब्दमकुर्वन्। यद्वा। गोभिः साधनभूताभिस्तदीयं क्षीरादिकमकामयंत। समगच्छंतेत्यर्थः ॥ इष्टौ। इष गतावित्यस्माद्भावे क्तिनि मंत्रे वृषेषेति क्तिन उदात्तत्वं। विदत्। विद्लृ लाभे। लुङि लृदित्त्वादङ्। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। अङ एव स्वरः शिष्यते। पादादित्वान्निघाताभावः। सरमा। सरमा सरणात्। नि० ११. २४.। इति यास्कः। सर्तेरौणादिकोऽमप्रत्ययः। धासिं। धेट् पाने। धीयते पीयत इति धासिः। औणा-दिकः सिप्रत्ययः। यद्वा। दधातेः पोषणार्थात् सिप्रत्ययः। बृहस्पतिः। तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च। पा० ६. १. १५७.। इति सुडागमस्तलोपश्च। बृहच्छब्दोऽंतोदात्तः। तस्य केचिदाद्युदात्तत्वं वर्णयंतीत्युक्तं। पतिशब्दो डतिप्र-त्ययांत आद्युदात्तः। अत उभे वनस्पत्यादिष्विति पूर्वोत्तरपदयोर्युगपत्प्रकृति-स्वरत्वं। उस्रियाभिः। निवसन्त्यस्यां क्षीरादिकमित्युस्रा गौः। वस निवास इत्यस्मात् स्फायितंचीत्यादिनाधिकरणे रक्। वचिस्वपीत्यादिना संप्रसारणं। उस्राशब्दात्स्वार्थे पृषोदरादित्वेन घप्रत्यय इति निघंटुकभाष्यं। घस्येयादेशः। प्रत्ययस्वरः। वावशंत। वाशृ शब्दे। अस्माद्यङंताल्लङि झस्यांतादेशे सति तस्य छंदस्युभयथेत्यार्द्धधातुकत्वादतोलोपयलोपौ। व्यत्ययेन धातोर्ह्रस्वत्वं। यद्वा। वश कांतावित्यस्माद्यङि न वशः। पा० ६. १. २०.। इति संप्रसारणे प्रतिषिद्धे पूर्ववत्प्रक्रिया ॥

चतुर्थीमृचमाह ॥

स सुष्टुभा स स्तुभा सप्त विप्रैः स्वरेणाद्रिं स्वर्यो३ नवग्वैः ।

सरण्युभिः फलिगमिंद्र शक्र वलं रवेण दरयो दशग्वैः ॥ ४ ॥

सः । सुऽस्तुभा । सः । स्तुभा । सप्त । विप्रैः । स्वरेण । अद्रिं । स्वर्यः । नवऽग्वैः ।

सरण्युऽभिः । फलिऽगं । इंद्र । शक्र । वलं । रवेण । दरयः । दशऽग्वैः ॥ ४ ॥

अंगिरसो द्विविधाः । सत्रयागमनुतिष्ठंतो ये नवभिर्मासैः समाप्य गतास्ते नवग्वाः । नवग्वा नवनीतगतय इति यास्को व्याचख्यौ । नि॰ ११.१९. । ये तु दशभिर्मासैः समाप्य जग्मुस्ते दशग्वाः । तादृशैरुभयविधैर्विप्रैर्मेधाविभिः सरण्युभिः सरणं शोभनां गतिमिच्छद्भिः सप्त सप्तसंख्याकैः । सप्त ह्यत्र मेधातिथिप्रभृतयोऽंगिरसो दृश्यंते । एवंभूतैरंगिरोभिः सुष्टुभा शोभनस्तोभयुक्तेन स्वरेणोदात्तादिश्रव्यस्वरोपेतेन । यद्वा । मंद्रमध्यमादिस्वरेण स्तुभा स्तोत्रेण स्वर्यः सुष्ठु प्राप्यः । यद्वा । शब्दनीयः स्तुत्य इत्यर्थः । हे शक्र शक्तिमन्निंद्र । एवंभूतः स त्वमद्रिमादरणीयं । वज्रेण छेत्तव्यमित्यर्थः । फलिगं । प्रतिफलं प्रतिबिंबं । तदस्मिन्नस्तीति फलि स्वच्छमुदकं । तद्गच्छत्याधारत्वेनेति फलिगः । यद्वा व्रीह्यादि फलं । तदस्मिन्सति भवतीति फलि वृष्टिजलं । तद्गच्छतीति फलिगः । एवभूतं वलं मेघं रवेणात्मीयेन शब्देन दरयः । अभाययः । त्वदीयशब्दश्रवणमात्रेण मेघो बिभेतीत्यर्थः । यद्वा । अद्रिः पर्वतः । अद्यतेऽस्मिन्पटलादिकमिति । फलिगो मेघः । फलिग उपर इति तन्नामसु पाठात् । वलोऽसुरः । देवा वै वले गाः पर्यपश्यन्नित्यादावसुरे प्रयुक्तत्वात् । एते त्रयोऽपि त्वदीयशब्दश्रवणमात्रेणाबिभयुरित्यर्थः ॥ स इत्येकः पादपूरणः । सुष्टुभा । स्तोभतिः स्तुतिकर्मा । संपदादिलक्षणो भावे क्विप् । शोभनः स्तुप् स्तोभो यस्य । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । उपसर्गात्सुनोतीति षत्वं । स्तुभा । करणभूतस्यापि स्तोत्रस्य स्वव्यापारे कर्तृत्वात् स्तोभति स्तौतीति क्विप् चेति कर्तरि क्विप् । सावेकाच इति विभक्तेरुदात्तत्वं । सप्त । सुपां सुलुगिति भिसो लुक् । स्वर्यः । स्वृ शब्दोपतापयोः । ऋहलोर्ण्यदिति ण्यत् । वृद्ध्यभावश्छांदसः । तित्स्वरित इति स्वरितत्वं । नवग्वैः । नवशब्द उपपदे गमेर्भावे क्विपि गमः क्वावित्यनुनासिकलोप ऊङ् च गमादीनामिति वक्तव्यमित्यूकारांतादेशः । नवभिर्गूर्गमनं येषां ते नवग्वाः । अकारोपजनश्छांदसः । यद्वा । गमेर्भावे ड्वप्रत्ययः । पूर्ववद्बहुव्रीहिः । बहुव्रीहौ पूर्वपदप्रकृति-

स्वरत्वं । सरण्युभिः । सरणमात्मन इच्छंतः सरण्यवः । क्यच्यंत्यलोपश्छांदसः । क्याच्छंदसीत्युः । फलिगं । फल्युदकं गच्छतीति फलिगः । डोऽन्यत्रापि दृश्यत इति गमेर्डः । वलं । वृणोतीति वलः । पचाद्यच् । कपिलकादित्वाल्लत्वं । दरयः । दॄ विदारणे । वृद्धौ कृतायां दॄ भय इति घटादिषु पाठान्मित्त्वे मितां ह्रस्व इति ह्रस्वत्वं ॥

पंचमीमृचमाह ॥

गृणानो अंगिरोभिर्दस्म वि वरुषसा सूर्येण गोभिरंधः ।
वि भूम्या अप्रथय इंद्र सानु दिवो रज उपरमस्तभायः ॥ ५ ॥

गृणानः । अंगिरःऽभिः । दस्म । वि । वः । उषसा । सूर्येण । गोभिः । अंधः ।
वि । भूम्याः । अप्रथयः । इंद्र । सानु । दिवः । रजः । उपरं । अस्तभायः ॥ ५ ॥

हे दस्म दर्शनीय शत्रूणामुपक्षयितर्वेंद्र त्वमंगिरोभिर्ऋषिभिर्गृणानः स्तूयमानः सन् उषसा सूर्येण च सह गोभिः किरणैरंधोऽधकारं विवः । व्यवृणोः । व्यनाशय इत्यर्थः । तथा हे इंद्र त्वं भूम्याः पृथिव्याः सानु समुच्छ्रितप्रदेशं व्यप्रथयः । विशेषेण विस्तीर्णमकरोः । विषमामिमां समीकृतवानित्यर्थः । तथा दिवोऽतरिक्षस्य रजो रजसो लोकस्योपरमुप्रं मूलप्रदेशमस्तभायः । अस्तभ्नाः । यथांतरिक्षस्य मूलं दृढं भवति तथाकार्षीरित्यर्थः ॥ गृणानः । कर्मणि लटः शानचि यकि प्राप्ते व्यत्ययेन श्ना । प्वादीनां ह्रस्व इति ह्रस्वत्वं । चित्स्वरेणांतोदात्तत्वं । दस्म । दसु उपक्षये । इषियुधींधिदसीत्यादिना मक् । वः । वृञ् वरणे । लुङि सिपि मंत्रे घसेत्यादिना च्लेर्लुक् । गुणे हल्ङ्याब्भ्य इति सलोपः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । अंधः । तमोऽप्यंध उच्यते । नास्मिन्ध्यानं भवति । नि० ५. १. । इति यास्कः । रजः । लोका रजांस्युच्यंत इत्युक्तत्वाद्रजःशब्दो लोकवचनः । सुपां सुलुगिति षष्ठ्या लुक् । अस्तभायः । लङि स्तंभुस्तुंभ्वित्यादिना । पा० ३. १. ८२. । श्नाप्रत्ययः । छंदसि शायजपि । पा० ३. १. ८४. । इत्यहावपि व्यत्ययेन श्नाप्रत्ययस्य शायजादेशः । अनिदितामिति नलोपः । अडागमः ॥

॥ इति प्रथमस्य पंचमे प्रथमो वर्गः ॥

प्रवर्ग्येऽभिष्टवे तदु प्रयक्षतममित्येषा । अथोत्तरमित्यत्र सूचितं । तदु प्रयक्षतममस्य कर्मात्मन्वन्नभो दुह्यते घृतं पयः । आ० ४. ७. । इति ॥

तामेतां सूक्ते षष्ठीमृचमाह ॥

तदु प्रयक्षतममस्य कर्म दस्मस्य चारुतममस्ति दंसः ।
उपह्वरे यदुपरा अपिन्वन्मध्वर्णसो नद्य१श्चतस्रः ॥ ६ ॥

तत् । ऊं इति । प्रयक्षऽतमं । अस्य । कर्म । दस्मस्य । चारुऽतमं । अस्ति । दंसः ।
उपऽह्वरे । यत् । उपराः । अपिन्वत् । मधुऽअर्णसः । नद्यः । चतस्रः ॥ ६ ॥

दस्मस्य दर्शनीयस्यास्येंद्रस्य तदु तदेव कर्म प्रयक्षतमं । अतिशयेन पूज्यं । दंस इति कर्मनाम । दंसस्तदेव कर्म चारुतमं । अतिशयेन शोभनं । किं तदित्यत आह । अयमिंद्र उपह्वर उपह्वर्तव्ये गंतव्ये पृथिव्याः संबंधिनि समीपदेश उपरा उप्ताः स्थापिता मध्वर्णसो मधुरोदकाश्चतस्रो नद्यः प्रधानभूता गंगादिनदीरपिन्वत । असिंचदिति । यदेतत्कर्म तदन्येन कर्तुमशक्यत्वात्पूज्यमित्यर्थः ॥ प्रयक्षतमं । यक्ष पूजायां । यक्ष्यत इति यक्षः । अतिशयेन यक्षो यक्षतमः । पुनः प्रादिसमासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं । दंसः । दसि दंसनदर्शनयोः । चुरादिरात्मनेपदी । दंस्यते कर्तव्यतया दृश्यत इति दंसः कर्म । औणादिकः कर्मण्यसुन् । उपह्वरे । ह्वृ कौटिल्ये । कौटिल्यलक्षणगतिवाचिनात्र गतिमात्रं लक्ष्यते । उपह्वरंति गच्छंत्यस्मिन्नद्य इत्युपह्वरो भूप्रदेशः । पुंसि संज्ञायां घः प्रायेणेत्यधिकरणे घप्रत्ययः । गुणः । कृदुत्तरपदप्रकृतिस्वरत्वं । अपिन्वत् । पिवि सेचने । भौवादिकः । चतस्रः । शस् । त्रिचतुरोः स्त्रियां तिसृचतसृ इति चतुरशब्दस्य चतसादेश आद्युदात्तो निपातितः । पूर्वसवर्णदीर्घे प्राप्तेऽचि र ऋत इति रेफादेशः । चतुरशब्दस्याद्युदात्तत्वात्स्थानिवद्भावेन चतसादेशस्याद्युदात्तत्वे सिद्धेऽपि पुनराद्युदात्तनिपातनसामर्थ्याद्यणादेशस्य वा पूर्वविधौ स्थानिवद्भावाच्चतुरः शसीत्यंतोदात्तत्वस्याभावः । न च न पदांतेति स्थानिवद्भावप्रतिषेधः । स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवत् अन्यत्तु स्थानिवदेव । पा० १. १. ५८. १. । इति नियमात् ॥

सप्तमीमृचमाह ॥

द्विता वि वव्रे सनजा सनीळे अयास्यः स्तवमानेभिरर्कैः ।
भगो न मेने परमे व्योमन्नधारयद्रोदसी सुदंसाः ॥ ७ ॥

द्विता। वि। वव्रे। सनऽजा। सनीळे इति सऽनीळे। अयास्यः। स्तवमानेभिः। अर्कैः।
भर्गः। न। मेने इति। परमे। विऽओमन्। अधारयत्। रोदसी इति। सुऽदंसाः ॥७॥

अयास्यः। यासः प्रयत्नः। तत्साध्यो यास्यः। न यास्योऽयास्यः। युद्धरूपैः प्रयत्नैः साधयितुमशक्य इत्यर्थः। कथं साध्यत इत्यत आह। स्तवमानेभिः स्तोत्रं कुर्वद्भिः पुरुषैः। अर्कैः स्तुतिरूपैर्मंत्रैः स्तूयमानः सन्निंद्रः सुसाध्यो भवति। यद्वा। अयास्यः पंचवृत्तिर्मुख्यप्राणः। स ह्यास्यान्मुखादयते गच्छति निष्क्रामति। तदुपासकोऽप्यंगिरा उपचारादयास्य उच्यते। तथा च छंदोगैराम्नातं। तं हायास्य उद्गीथमुपासां चक्रे। एतमु एवायास्यं मन्यंते। आस्याद्यदयते तेनेति। अथवा। अयमास्ये मुखे वर्तत इत्ययास्यः। तथा च वाजसनेयकं। ते होचुः क्व नु सोऽभूद्यो न इत्थमसक्तेत्ययमास्येंऽतरितीति। पूर्ववदुपासकोऽप्ययास्यः। तेन ऋषिणा स्तवमानेभिर्गुणिनिष्ठगुणाभिधानलक्षणां स्तुतिं कुर्वद्भिरर्कैर्मंत्रैः करणभूतैः स्तूयमानः सन् सनजा। सनेति निपातो नित्यार्थः। नित्यजाते सर्वदा विद्यमानस्वभावे इत्यर्थः। प्रथमभावविकारवाचिना जनिना द्वितीयो भावविकारः सत्ता लक्ष्यते। यथौत्पत्तिकस्तु शब्दस्यार्थेन संबंध इत्यौत्पत्तिकमिति नित्यं ब्रूम इति हि तद्भाष्यं। सनीळे समानं नीळमोको निवासस्थानं ययोस्ते। संलग्ने इत्यर्थः। एवंविधे द्यावापृथिव्यौ द्विता द्विधा विवव्रे। विवृते अकरोत्। भेदेनास्थापयदित्यर्थः। मेने मननीये परम उत्कृष्टे व्योमन् विविधरक्षणे नभसि वर्तमानो भगो न सूर्य इव सुदंसाः शोभनकर्मेंद्रो रोदसी द्यावापृथिव्यावधारयत्। अपोषयत्। यद्वा मेनेति स्त्रीनाम। तथा च यास्कः। नि० ३.२१.। मेना ग्ना इति स्त्रीणां मेना मानयंत्येना इति। स्त्रीरूपमापन्ने रोदसी इंद्रोऽपुष्यदित्यर्थः ॥ द्विता। द्विधेत्यस्य धकारस्य तकारश्छांदसः। सनजा। जनी प्रादुर्भावे। अस्माद्भावेऽन्येष्वपि दृश्यत इति दृशिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात् केवलादपि जनेर्डप्रत्ययः। सना नित्यं जो जननं ययोस्ते सनजे। पूर्वपदस्य ह्रस्वश्छांदसः। एवमादित्वादंतोदात्तत्वं। तदेव बहुव्रीहिस्वरेण शिष्यते। सुपां सुलुगिति विभक्तेराकारः। अयास्यः। यसु प्रयत्ने। यासः प्रयत्नः। तत्र भवो यास्यः। भवे छंदसीति यत्। न यास्योऽयास्यः। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। श्रुत्युक्तनिर्वचने तु पृषोदरादित्वादभिमतरूपस्वरसिद्धिः। मेने। सप्तम्येकवचनस्य सुपां सुलुगिति शे आदेशः। शे इति प्रगृह्यत्वं। यद्वा मन्यत इति मेना।

पंचाद्यच् । नशिमन्योरलिट्येत्वं वक्तव्यं । पा० ६. ४. १२०. ५. । इत्येत्वं । ततष्टाप् । द्विवचन ईदूदेद्विवचनं । पा० १. १. ११. । इति प्रगृह्यत्वं । सुदंसाः । दंस इति कर्मवाची । असुन्प्रत्ययांत आद्युदात्तः । बहुव्रीहावाद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं ॥

अष्टमीमृचमाह ॥

सनाद्दिवं परि भूमा विरूपे पुनर्भुवा युवती स्वेभिरेवैः ।
कृष्णेभिरक्तोषा रुशद्भिर्वपुर्भिरा चरतो अन्यान्या ॥ ८ ॥

सनात् । दिवं । परि । भूम । विरूपे इति विऽरूपे । पुनःऽभुवा । युवती इति । स्वेभिः । एवैः ।
कृष्णेभिः । अक्ता । उषाः । रुशत्ऽभिः । वपुःऽभिः । आ । चरतः । अन्याऽअन्या ॥ ८ ॥

विरूपे शुक्लकृष्णतया विषमरूपे पुनर्भुवा पुनः पुनः प्रतिदिवं संजायमाने युवती तरुण्यौ । रात्र्युषसोः सर्वदैकरूप्यादेवंभूते रात्र्युषसौ दिवं द्युलोकं भूमा भूमिं च सनाच्चिरकालादारभ्य स्वेभिरेवैः स्वकीयैर्गमनैः परिचरतः । पर्यावर्तेते । अयमेवार्थः स्पष्टीक्रियते । अक्ता रात्रिः कृष्णेभिरंधकाररूपैर्वर्णैरुपलक्षिता । उषाश्च रुशद्भिर्दीप्यमानैर्वपुर्भिः स्वशरीरभूतैस्तेजोभिरुपलक्षिता । अन्यान्या परस्परव्यतिहारेणाचरतः । आवर्तेते । हे इंद्र । एतत्सर्वं त्वयैव कार्यते त्वदधीनत्वात्सर्वासां देवतानामित्यर्थः ॥ भूमा । सुपां सुलुगिति द्वितीयाया डादेशः । छांदसो हृस्वः । एवैः । इण् गतौ । इणशीङ्भ्यां वन्निति भावे वन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं । अक्ता । नक्तेति रात्रिनाम । नलोपश्छांदसः । वपुर्भिः । अर्तिपृवपीत्यादिनोस् । नित्त्वादाद्युदात्तः । अन्यान्या । कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यं समासवच्च बहुलं । पा० ८. १. १२. ९. । इति द्विर्भावे तस्य परमाम्रेडितमित्याम्रेडितसंज्ञायामनुदात्तं चेत्याम्रेडितस्यानुदात्तत्वं ॥

नवमीमृचमाह ॥

सनेमि सख्यं स्वपस्यमानः सूनुर्दाधार शवसा सुदंसाः ।
आमासु चिद्दधिषे पक्वमंतः पयः कृष्णासु रुशद्रोहिणीषु ॥ ९ ॥

सनेमि । सख्यं । सुऽअपस्यमानः । सूनुः । दाधार । शवसा । सुऽदंसाः ।
आमासु । चित् । दधिषे । पक्वं । अंतरिति । पयः । कृष्णासु । रुशत् । रोहिणीषु ॥ ९ ॥

स्वपस्यमानः। स्वपः शोभनं कर्म। तदिवाचरन् शवसा शवसो बलस्य सूनुः पुत्रः। अतिबलवानित्यर्थः। सुदंसाः। शोभनयागादिकर्मयुक्तः। एवंभूत इंद्रः सख्यं यजमानानां सखित्वं सनेमि पुराणं दाधार। धारयति पोषयतीत्यर्थः। सनेमीति पुराणनाम। प्रवयाः सनेमीति पाठात्। किंच। आमासु चित्। आर्द्रास्वपरिपक्वासु गोषु चांतर्मध्ये पक्वं परिपक्वं पयो दधिषे। धारयसि। तथा कृष्णासु कृष्णवर्णासु रोहिणीषु लोहितवर्णासु च गोषु तद्विपरीतं रुशद्दीप्यमानं श्वेतवर्णं पयो दधिषे॥ सख्यं। सख्युर्य इति यः। प्रत्ययस्वरः। दाधार। धृञ् धारणे। तुजादित्वादभ्यासस्य दीर्घत्वं। पक्वं। पचो व इति निष्ठातकारस्य वत्वं। रोहिणीषु। रुह बीजजन्मनि प्रादुर्भावे। रुहे रश्च लो वेतीतन्प्रत्ययांतो रोहितशब्द आद्युदात्तो वर्णवाची। वर्णादनुदात्तात्तोपधात्तो नः। पा०४.१.३९.। इति ङीप्। तत्संनियोगेन तकारस्य नकारादेशश्च। ङीपः पित्त्वादनुदात्तत्वे प्रातिपदिकस्वर एव शिष्यते॥

दशमीमृचमाह॥

सनात्सनीळा अवनीरवाता व्रता रक्षंते अमृताः सहोभिः।

पुरू सहस्रा जनयो न पत्नीर्दुवस्यंति स्वसारो अह्रयाणं॥१०॥

सनात्। सऽनीळाः। अवनीः। अवाताः। व्रता। रक्षंते। अमृताः। सहःऽभिः।

पुरु। सहस्रा। जनयः। न। पत्नीः। दुवस्यंति। स्वसारः। अह्रयाणं॥१०॥

सनाच्चिरकालादारभ्य सनीळाः समाननिवासस्थाना अवाताः। वातं गमनं। तद्रहिताः। एकपाण्यवस्थानात्। अवनय इत्यंगुलिनाम। एवंभूता अवनीरंगुलयः पुरू पुरूणि बहूनि सहस्रासंख्यातानि व्रता व्रतानींद्रसंबंधीनि कर्माण्यमृताः पुनःपुनःकरणेऽप्यालस्यरहिताः सत्यः सहोभिरात्मीयैर्बलैः रक्षंते। पालयंति। अपि च स्वसारः। स्वयमेव सरंत्योऽंगुलयः पत्नीः पालयित्र्योऽह्रयाणं लज्जारहितं प्रगल्भमित्यर्थः। यद्वा। अह्रीतयानं प्रशस्तगमनमिंद्रं जनयो न। जनय इति देवानां पत्न्य उच्यंते। देवानां वै पत्नीर्जनय इति श्रुतेः। ता इव दुवस्यंति। परिचरंति। अंजलिबंधनेनेंद्रं प्रीणयंतीत्यर्थः॥ अवनीः। अवनयोऽंगुलयो भवंत्यवंति कर्माणीति यास्कः। सुपां सुलुगिति जसः पूर्वसवर्णदीर्घत्वं। अवाताः। वा गतिगंधनयोः। असिहसीत्यादिना भावे तन्प्रत्ययः। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। व्रता। शेश्छंदसि बहुल-

मिति शेर्लोपः । दुवस्यंति । दुवस्यतिः परिचरणकर्मा । कंड्वादिः । अतो यक एव स्वरः शिष्यते । पादादित्वान्निघाताभावः । अहृयाणं । ह्री लज्जायां । बहुलं छंदसीति श्लोरभावः । व्यत्ययेन शानच् । मुगभावश्छांदसः । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं । यद्वा । बहुलं छंदसीति शपो लुकि छंदस्युभयथेति शानच आर्धधातुकत्वेन ङित्त्वाभावे गुणायादेशौ । पूर्ववत्समासस्वरौ । यास्कस्त्वेवं व्याख्यत् । अहृयाणोऽह्रीतयान इति । नि॰ ५. २५. ॥

॥ इति प्रथमस्य पंचमे द्वितीयो वर्गः ॥

एकादशीमृचमाह ॥

सनायुवो नमसा नव्यो अर्केर्वसूयवो मतयो दस्म दद्रुः ।
पतिं न पत्नीरुशतीरुशंतं स्पृशंति त्वा शवसावन्मनीषाः ॥ ११ ॥

सनाऽयुवः । नमसा । नव्यः । अर्कैः । वसुऽयवः । मतयः । दस्म । दद्रुः ।
पतिं । न । पत्नीः । उशतीः । उशंतं । स्पृशंति । त्वा । शवसाऽवन् । मनीषाः ॥ ११ ॥

हे दस्म दर्शनीयेंद्र । अर्कैः शस्त्ररूपैर्मंत्रैर्नमसा नमस्कारेण यस्त्वं नव्यः स्तुत्यो भवसि । सनायुवः सनातनमग्निहोत्रादि नित्यं कर्मात्मन इच्छंतो वसूयवो वसु धनमात्मन इच्छंतो धनकामा वा मतयो मेधाविनस्त्वां दद्रुः । बहुना प्रयासेन जग्मुः । हे शवसावन् बलवन्निंद्र तैः प्रयुक्ता मनीषाः स्तुतयस्त्वा त्वां स्पृशंति । प्राप्नुवंति । तत्र दृष्टांतः । उशतीरुशत्यः कामयमानाः पत्नीः पत्न्य उशंतं कामयमानं पतिं न । यथा पतिं संभजंते तद्वत् ॥ सनायुवः । सनेत्येतदव्ययं नित्यत्वमाचष्टे । तेन च तद्वान् लक्ष्यते । सना सनातनं कर्मात्मन इच्छंतीति सनायुवः । क्याच्छंदसीत्युप्रत्ययः । जसि वर्णव्यत्ययेनोत्वं । मतयः । मन ज्ञाने । मन्यंत इति मतयः स्तोतारः । क्तिच्क्तौ च संज्ञायामिति क्तिच् । न क्तिचि दीर्घश्चेति निषेधे प्राप्ते बाहुलकादनुदात्तोपदेशेत्यादिनानुनासिकलोपः । चित्त्वादंतोदात्तत्वं । दद्रुः । द्रा कुत्सायां गतौ । लिट्युस्यातो लोप इटि चेत्याकारलोपः । उशतीः । वश कांतौ । लटः शतृ । अदादित्वाच्छपो लुक् । शतुर्ङित्त्वाद्ग्रहिज्यादिना संप्रसारणं । उगितश्चेति ङीप् । शतुरनुम इति नद्या उदात्तत्वं । वा छंदसीति पूर्वसवर्णदीर्घः । शवसावन् । मतुप्याकारोपजनश्छांदसः । यद्वा मत्वर्थीय आवनिप् ॥

द्वादशीमृचमाह ॥

सनादेव तव रायो गभस्तौ न क्षीयंते नोप दस्यंति दस्म ।
द्युमाँ असि क्रतुमाँ इंद्र धीरः शिक्षा शचीवस्तव नः शचीभिः ॥ १२ ॥

सनात् । एव । तव । रायः । गभस्तौ । न । क्षीयंते । न । उप । दस्यंति । दस्म ।
द्युऽमान् । असि । क्रतुऽमान् । इंद्र । धीरः । शिक्ष । शचीऽवः । तव । नः ।
शचीभिः ॥ १२ ॥

हे दस्म दर्शनीयेंद्र । गभस्तिरिति बाहुनाम । तव गभस्तौ हस्ते सनादेव चिरकालादारभ्य स्थितानि रायो धनानि न क्षीयंते । न नश्यंति । नोपदस्यंति च । स्तोतृभ्यो दत्तेऽपि त्वद्धस्तगतं धनमुपक्षयं न प्राप्नोति । अपि तु वर्धते । हे इंद्र धीरो बुद्धिमान् धृष्टो वा त्वं द्युमान् दीप्तिमानसि । तथा क्रतुमान् लोकरक्षणहेतुभूतकर्मयुक्तोऽसि । हे शचीवः कर्मवन्निंद्र तव शचीभिस्त्वदीयैः कर्मभिर्नोऽस्मभ्यं धनं शिक्षा । देहि । शिक्षतिर्दानकर्मा ॥ क्षीयंते । क्षीष हिंसायां । क्र्यादिः । अस्मात्कर्मकर्तरि कर्मवद्भावाद्यगात्मनेपदे । वत्करणं स्वाश्रयमपि यथा स्यादिति कर्तृवद्भावादचः कर्तृयकीत्याद्युदात्तत्वं । चादिलोपे विभाषेति निघातप्रतिषेधः । शचीवः । शच्यस्यास्तीति शचीवान् । छंदसीर इति मतुपो वत्वं । संबुद्धौ मतुवसो रुरिति नकारस्य रुत्वं ॥

त्रयोदशीमृचमाह ॥

सनायते गोतम इंद्र नव्यमतक्षद्ब्रह्म हरियोजनाय ।
सुनीथाय नः शवसान नोधाः प्रातर्मक्षू धियावसुर्जगम्यात् ॥ १३ ॥

सनाऽयते । गोतमः । इंद्र । नव्यं । अतक्षत् । ब्रह्म । हरिऽयोजनाय ।
सुऽनीथाय । नः । शवसान । नोधाः । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥ १३ ॥

स इंद्रः सनायते । नित्य इवाचरति । सर्वेषामाद्यो भवति । हे शवसान बलवन्निंद्र हरियोजनाय । हरी अश्वौ रथे योजयतीति हरियोजनः । सुनीथाय सुष्ठु नेत्रे । एवंभूताय तस्मै तुभ्यं गोतमो गोतमस्य ऋषेः पुत्रो नोधा ऋषिर्नव्यं नूतनं ब्रह्मैतत्सूक्तरूपं स्तोत्रं नोऽस्मदर्थमतक्षत् । अकरोत् । अतोऽस्माभिरनेन स्तोत्रेण स्तुतः सन्धिया बुद्ध्या कर्मणा वा प्राप्तवसुरिंद्रः प्रातःकाले

मश्नू शीघ्रं जगम्यात्। आगच्छतु ॥ सनायते। सनेति निपातो नित्यशब्दसमानार्थः। तस्मादाचारार्थे क्यङ्प्रत्ययः। सुनीथाय। णीञ् प्रापण इत्यस्मादौणादिकस्थक्प्रत्ययः। थाथादिस्वरः ॥

॥ इति प्रथमस्य पंचमे तृतीयो वर्गः ॥

त्वं महानिति नवर्चं षष्ठं सूक्तं। नोधस आर्षं त्रैष्टुभमैंद्रं। अनुक्रम्यते च। त्वं नवेति ॥ समूळ्हे दशरात्रे द्वितीये छंदोमे मरुत्वतीये शस्त्र एतत्सूक्तं। विश्वजितोऽग्निं नर इति खंडे सूचितं। तां सु ते कीर्तिं त्वं महां इंद्र यो ह। आ० ८.७.। इति ॥

तत्र प्रथमामृचमाह ॥

त्वं म॒हाँ इं॑द्र॒ यो ह॒ शुष्मै॒र्द्यावा॑ जज्ञा॒नः पृ॑थि॒वी अमे॑ धाः।
यद्ध॑ ते॒ विश्वा॑ गि॒रय॑श्चि॒दभ्वा॑ भि॒या दृ॒ळ्हासः॑ कि॒रणा॒ नैज॑न् ॥ १ ॥

त्वं। म॒हान्। इं॒द्र॒। यः। ह॒। शुष्मैः॑। द्यावा॑। ज॒ज्ञा॒नः। पृ॒थि॒वी इति॑। अमे॑। धाः॒।
यत्। ह॒। ते॒। विश्वा॑। गि॒रयः॑। चि॒त्। अभ्वा॑। भि॒या। दृ॒ळ्हासः॑। कि॒रणाः॑। न। ऐज॑न् ॥ १ ॥

हे इंद्र त्वं महान् गुणैः सर्वाधिको भवसि। यो ह यः खलु त्वममेऽसुरकृते भये सति जज्ञानस्तदानीमेव प्रादुर्भूतः सन् शुष्मैः शत्रूणां शोषकैरात्मीयैर्बलैर्द्यावापृथिवी द्यावापृथिव्यौ धाः। अधारयः। तादृशाद्भयादमूमुच इत्यर्थः। किंच। यद्ध ते यस्य खलु तव संबंधिन्या भिया भीत्या विश्वा विश्वानि व्याप्तानि यानि भूतजातानि गिरयश्चित् ये च शिलोच्चयाः। अभ्वा। महन्नामैतत्। अन्यान्यपि महांति यानि संति तेऽपि सर्वे दृळ्हासो दृढा अप्यैजन्। अकंपिषत। तत्र दृष्टांतः। किरणा न। यथा सूर्यरश्मय इतस्ततो नभसि कंपंते तद्वत् ॥ जज्ञानः। जनी प्रादुर्भावे। लिटः कानच्। गमहनेत्यादिनोपधालोपः। स्थानिवद्भावाद्विर्भावादि। चित इत्यंतोदात्तत्वं। द्यावापृथिवी इत्यस्य समस्तपदस्य मध्ये जज्ञान इत्यस्य पाठश्छांदसः। यत्। सुपां सुलुगिति षष्ठ्या लुक्। अभ्वा। आ समंताद्भवंति सद्भावं प्राप्नुवंतीत्यभ्वा महांतः। आङ्पूर्वाद्भवतेरौणादिको ड्वन्प्रत्ययः। उपसर्गस्य ह्रस्वत्वं च। यद्वा। नञ्पूर्वाद्भवतेः प्राप्त्यर्थान्नञि भुवो डिदिति क्वन्प्रत्ययः। महांतो हि प्राप्तुं न शक्यंते। शेश्छंदसि बहुलमिति

शेर्लोपः। किरणाः। कीर्यंते विक्षिप्यंत इति किरणाः। कॄ विक्षेपे। कॄपॄवृजिमंदिनिधाञ्भ्यः क्युरिति क्युप्रत्ययः। योरनादेशे प्रत्ययाद्युदात्तत्वं। ऋत इद्धातोरितीत्वं। एजन्। एजृ कंपने। लङ्याडागमः। स चोदात्तः। वृद्धिश्च॥

द्वितीयामृचमाह॥

आ यद्धरी इंद्र विव्रता वेरा ते वज्रं जरिता बाह्वोर्धात्।
येनाविहर्यतक्रतो अमित्रान्पुर इष्णासि पुरुहूत पूर्वीः॥२॥

आ। यत्। हरी इति। इंद्र। विऽव्रता। वेः। आ। ते। वज्रं। जरिता। बाह्वोः। धात्। येन। अविहर्यतक्रतो इत्यविहर्यतऽक्रतो। अमित्रान्। पुरः। इष्णासि। पुरुऽहूत। पूर्वीः॥२॥

हे इंद्र त्वं यद्यदा विव्रता विविधकर्माणौ हरी त्वदीयावश्वावावेः। रथ आगमयसि। रथे योजयसीत्यर्थः। तदानीं ते तव बाह्वोर्हस्तयोर्जरिता स्तोता वज्रमाधात्। स्तोत्रेण स्थापयति। स्तोत्रा स्तुतः प्रयत्नमंतरेण वज्रं त्वद्धस्ते न दृश्यत इत्यर्थः। हे अविहर्यतक्रतोऽप्रेप्सितकर्मन्निंद्र। अमित्रान् शत्रून्येन वज्रेणेष्णासि। अभिगच्छसि। हे पुरुहूत पुरुभिर्बहुभिर्यजमानैराहूत त्वं पूर्वीर्बह्वीः पुरोऽसुरपुराणि भेत्तुमभिगच्छसीत्यर्थः॥ विव्रता। व्रतमिति कर्मनाम। विविधं व्रतं ययोस्तौ। सुपां सुलुगिति पूर्वसवर्णदीर्घत्वं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। वेः। वी गतिप्रजननकांत्यशनखादनेषु। अंतर्भावितण्यर्थाच्छांदसे लङि सिप्यदादित्वाच्छपो लुक्। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। धात्। दधातेश्छांदसे लुङि गातिस्थेति सिचो लुक्। पूर्ववदडभावः। अविहर्यतक्रतो। हर्यतिः प्रेप्साकर्मेति यास्कः। हर्य गतिकांत्योः। कांतिरभिलाषः। विहर्यतोऽभिलषितः। अविहर्यतोऽनभिलषित इत्यर्थः। तादृशः क्रतुः कर्म यस्य स तथोक्तः। अमित्रान्। न संति मित्राण्येष्विति बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं। इष्णासि। इष आभीक्ष्ण्ये। अत्र गत्यर्थः। क्र्यादिभ्यः श्ना। सिपः पित्त्वादनुदात्तत्वे तस्यैव स्वरः शिष्यते। यद्वृत्तयोगादनिघातः॥

तृतीयामृचमाह॥

त्वं सत्य इंद्र धृष्णुरेतान्त्वमृभुक्षा नर्यस्त्वं षाट्।
त्वं शुष्णं वृजने पृक्ष आणौ यूने कुत्साय द्युमते सचाहन्॥३॥

त्वं । सत्यः । इंद्र । धृष्णुः । एतान् । त्वं । ऋभुक्षाः । नर्यः । त्वं । षाट् ।
त्वं । शुष्णं । वृजने । पृक्षे । आणौ । यूने । कुत्साय । द्युऽमते । सचा । अहन् ॥ ३ ॥

हे इंद्र त्वं सत्यः सत्सु भवः । सर्वोत्कृष्ट इत्यर्थः । एतान् शत्रूनभिगतः सन् धृष्णुस्तेषां धर्षयिता तिरस्कर्ता । किंच त्वमृभुक्षा ऋभूणामधिपतिः । तेषु कृतनिवासो वा । यद्वा महन्नामैतत् । महान्प्रवृद्धोऽसि । नर्यो नृभ्यो हितः । तथा त्वं षाट् शत्रूणामभिभविता । हंतेत्यर्थः । किंच वृजन इत्यादीनि त्रीणि संग्रामनामानि । अत्र पूर्वे विशेषणे । वृजने वर्जनयुक्ते संग्रामे हि वीराः पुरुषा वर्ज्यंते हिंस्यंते । पृक्षे संपर्चनीये वीर्यैर्योद्धुं प्राप्तव्ये । एवंविध आणौ संग्रामे द्युमते दीप्तिमते यूने तरुणाय कुत्साय सचा त्वं सहायो भूत्वा शुष्णं शोषयितारमेतत्संज्ञमसुरमहन् । अवधीः ॥ ऋभुक्षाः । ऋभुरिति मेधाविनाम । उरु विस्तीर्णं भाति । यद्वा । ऋतेन यज्ञेन भाति भवतीति वा ऋभुः । उरुशब्दे ऋतशब्दे वोपपदे भातेर्भवतेर्वा मृगय्वादयश्च । उ० १.३७. । इति कुप्रत्ययः पूर्वपदस्य ऋभावश्च निपात्यते । क्षयतिरैश्वर्यकर्मा । तेषामीष्ट इत्यृभुक्षाः । यद्वा क्षि निवासगत्योः । तेषु निवसतीति पतेस्थ इति विधीयमान इनिप्रत्ययो बहुलवचनादस्मादपि भवति । टिलोपश्च । सौ पथिमथ्यृभुक्षामादित्यात्वं । प्रत्ययस्वरः । षाट् । सह अभिभवे । छंदसि सह इति केवलादपि ण्विः । षत्वं छांदसं । द्युमते । द्यौर्दीप्तिरस्मिन्नस्तीति द्युमान् । स्वादिष्वसर्वनामस्थान इति पदसंज्ञायां दिव उदित्युत्वं । ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं ॥

चतुर्थीमृचमाह ॥

त्वं ह त्यदिंद्र चोदीः सखा वृत्रं यद्वज्रिन्वृषकर्मन्नुभ्नाः ।
यद्ध शूर वृषमणः पराचैर्वि दस्यूँर्योनावकृतो वृथाषाट् ॥ ४ ॥

त्वं । ह । त्यत् । इंद्र । चोदीः । सखा । वृत्रं । यत् । वज्रिन् । वृषऽकर्मन् । उभ्नाः ।
यत् । ह । शूर । वृषऽमनः । पराचैः । वि । दस्यून् । योनौ । अकृतः । वृथाषाट् ॥ ४ ॥

हे इंद्र त्वं ह त्वं खलु सखा कुत्सस्य सहायः सन् त्यत्तत्प्रसिद्धं धनं जयलक्षणं यशो वा चोदीः । प्रेरितवान् । अकार्षीरित्यर्थः । हे वृषकर्मन् वृष्ट्युदकसेचनरूपकर्मोपेत वज्रिन् वज्रवन्निंद्र वृत्रं सर्वस्य धनस्यावरीतारं कुत्सस्य शत्रुं यत् यदोभ्नाः ।

अतुभ्नाः। अहिंसीः। अपि च हे शूर शत्रूणां प्रेरक वृषमणः कामाभिवर्षकमनस्कंद्र वृषाषाट् अनायासेन शत्रूणामभिभविता त्वं यद्व यदा खलु योनौ वीरैर्मिश्रणीये संग्रामे दस्यूंकुत्सस्योपक्षयितॄनन्यान् शत्रून्पराचैः परागमनैर्व्यकृतः। पराङ्मुखा यथा भवंति तथा व्यच्छिनः। तदानीं कुत्सः सर्वं यशः प्राप्नोदित्यर्थः॥ चोदीः। चुद प्रेरणे। लुङि नेटीति सिचि वृद्धिप्रतिषेधः। उभ्नाः। णभ तुभ हिंसायां। क्र्यादिकः। लङि सिपि तलोपश्छांदसः। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। पराचैरित्येतदव्ययं। नीचैरुच्चैरितिवदिति भट्टभास्करमिश्रः। पराचैः परांचनैरिति निरुक्तं। नि० ११. २५.। दस्यून्। दीर्घादटि समानपाद इति नकारस्य रुत्वं। अत्रानुनासिकः पूर्वस्य तु वेत्यूकारस्य सानुनासिकता। अकृतः। कृती छेदने। लङि सिपि तुदादित्वाच्छप्रत्ययः। आगमानुशासनस्यानित्यत्वात् शे मुचादीनामिति नुमागमस्याभावः॥

पंचमीमृचमाह॥

त्वं ह त्यदिंद्रारिषण्यन्दृळ्हस्य चिन्मर्तानामजुष्टौ।
व्य१स्मदा काष्ठा अर्वते वर्घनेव वज्रिञ्छ्नथिह्यमित्रान्॥५॥

त्वं। ह। त्यत्। इंद्र। अरिषण्यन्। दृळ्हस्य। चित्। मर्तानां। अजुष्टौ।
वि। अस्मत्। आ। काष्ठाः। अर्वते। वः। घनाऽइव। वज्रिन्। श्नथिहि।
अमित्रान्॥५॥

हे इंद्र त्वं ह त्वं खलु त्यत् तस्य दृळ्हस्य चित् दृढस्य कस्यचिदप्यरिषण्यन् रेषणमनिच्छन् एवंस्वभावो भवसि। देवतात्वेनानुग्रहीतृत्वात्। तथापि मर्तानां स्तोतॄणामस्माकं शत्रुभिरजुष्टावप्रीतौ सत्यामस्मदर्वतेऽस्मदीयाश्वाय गंतुं काष्ठा दिश आ समंतात् विवः। विवृताः कुरु। यथा सर्वासु दिक्ष्वस्मदीया अश्वाः प्रतिरोधमंतरेण गच्छंति तथा कुर्वित्यर्थः। किंच तत्रत्यानमित्रान् हे वज्रिन्वज्रवन्निंद्र घनेव घनेन कठिनेन पर्वतेनेव वज्रेण श्नथिहि। श्नथय। जहीत्यर्थः। यद्वा मर्तानां मनुष्याणां मध्ये यस्मिन्कस्मिंश्चित्तवाप्रीतौ सत्यां तस्य शत्रोर्दृढस्याप्यरिषण्यन् रेषणं हिंसनमनिच्छन्वर्तसे। यस्मिंस्तु कुत्सादौ प्रीतिरस्ति तस्य शत्रुवधं चकृषे। अतस्तव प्रियाणामस्माकमर्वत इत्यादि पूर्ववत्॥ त्यत्। सुपां सुलुगिति षष्ठ्या लुक्। अरिषण्यन्। रिष्टशब्दात् क्वचि दुरस्युर्द्रविणस्युर्वृषण्यति

रिषण्यति । पा० ७. ४. ३६. । इति रिषण्भावो निपात्यते । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं । अस्मत् । पूर्ववत् षष्ठ्या लुक् । अर्वते । अर्वणस्त्रसावनञ इति नकारस्य तकारादेशः । वनिप्सुपौ पित्त्वादनुदात्तौ । परिशेषाद्धातुस्वरः । घनेव । मूर्तौ घन इति काठिन्ये गम्यमाने हंतेरप्प्रत्ययांतो निपात्यते । श्नथिहि । श्नथ हिंसार्थः । ण्यंताल्लोटि बहुलं छंदसीति शपो लुक् ॥

॥ इति प्रथमस्य पंचमे चतुर्थो वर्गः ॥

षष्ठीमृचमाह ॥

त्वां ह त्यदिंद्रार्णसातौ स्वर्मीळ्हे नर आजा हवंते ।
तव स्वधाव इयमा समर्य ऊतिर्वाजेष्वतसाय्या भूत् ॥ ६ ॥

त्वां । ह । त्यत् । इंद्र । अर्णऽसातौ । स्वःऽमीळ्हे । नरः । आजा । हवंते ।
तव । स्वधाऽवः । इयं । आ । सऽमर्ये । ऊतिः । वाजेषु । अतसाय्या । भूत् ॥ ६ ॥

हे इंद्र । अर्णसातावर्णानां गंतॄणां युद्धे प्रवृत्तानां पुरुषाणां सातिर्लाभो यस्मिन् । स्वर्मीळ्हे । मीळ्हमिति धननाम । सुष्ठु रणीयं धनं यस्मिन् । एवंभूत आजा आजौ संग्रामे त्यत्तं प्रसिद्धं त्वामेव नरो योद्धुकामाः पुरुषाः सहायार्थं हवंते । आह्वयंति । यद्वा । अर्णस उदकस्य सातिर्लाभो यस्मिन्वृत्रादियुद्धे तस्मिन्नित्यर्थः । वृष्टिनिरोधकेन वृत्रेण सह वर्षणार्थं तव यद्युद्धं तत्र स्तोतारस्त्वां प्रोत्साहयंतीति भावः । यस्मादेवं तस्मात् हे स्वधावः । हे अन्नवन् बलवन्वेंद्र समर्ये संग्रामे तव संबंधिनीयमूतिस्त्वदीयमिदं रक्षणं आ अस्मदाभिमुख्येन भूत् । भवतु । वाजेषु संग्रामेषु येषोतिरतसाय्या योद्धृभिः प्रार्थ्या भवति ॥ त्यत् । सुपां सुलुगिति द्वितीयाया लुक् । अर्णसातौ । ऋ गतौ । बहुलवचनादौणादिको नन्प्रत्ययः । षणु दान इत्यस्माद्भावे क्तिनि जनसनखनामित्यनुनासिकस्यात्वं । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । यद्वा । उदके नुट् चेत्यर्तेरसुन्प्रत्ययो नुडागमश्च । पीवोपवसनादीनां छंदसि लोपो वक्तव्यः । पा० ६. ३. १०९. ९. । इति सलोपः । नित्त्वादाद्युदात्तत्वं । पूर्ववद्बहुव्रीहिस्वरः । स्वर्मीळ्हे । स्वर्शब्दो न्यङ्स्वरौ स्वरिताविति स्वरितः । बहुव्रीहिस्वरेण स एव शिष्यते । आजा । सुपां सुलुगिति सप्तम्या डादेशः । स्वधावः । मतुवसो रुरिति मतुपो रुत्वं । अतसाय्या । अत सातत्यगमने । औणादिकः साय्यप्रत्ययः । तस्याडागमश्च । आगमानुदात्तत्वे

प्रत्ययाद्युदात्तत्वं । भूत् । छंदसि लुङ्लङ्लिट इति प्रार्थनायां लुङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः ॥

सप्तमीमृचमाह ॥

त्वं ह त्यदिंद्र सप्त युध्यन्पुरो वज्रिन्पुरुकुत्साय दर्दः ।
बर्हिर्न यत्सुदासे वृथा वर्गंहो राजन्वरिवः पूरवे कः ॥ ७ ॥

त्वं । ह । त्यत् । इंद्र । सप्त । युध्यन् । पुरः । वज्रिन् । पुरुऽकुत्साय । दर्दरिति दर्दः ।
बर्हिः । न । यत् । सुऽदासे । वृथा । वर्क् । अंहोः । राजन् । वरिवः । पूरवे ।
करिति कः ॥ ७ ॥

हे वज्रिन् वज्रवन्निंद्र पुरुकुत्सायैतत्संज्ञाय ऋषये युध्यन् तदीयशत्रुभिः सह युद्धं कुर्वाणस्त्वमेव त्यत् ताः सप्त पुरः तदीयानि सप्तसंख्यानि नगराणि दर्दः । व्यदारयः । अभैत्सीरित्यर्थः । अपि च सुदास एतत्संज्ञाय राज्ञेऽंहोरेतत्संज्ञस्यासुरस्य संबंधि यद्धनमस्ति तद्वृथानायासेन बर्हिर्न बर्हिरिव वर्क् । अवृणक् । अच्छिन इत्यर्थः । तदनंतरं पूरवे त्वां हविषा पूरयते तस्मै सुदासे हे राजन् स्वामिन्निंद्र वरिवो धनं कः । अकार्षीः ॥ त्यत् । सुपां सुलुगिति विभक्तेर्लुक् । दर्दः । दॄ विदारणे । अस्माद्यङ्लुगंताल्लङि सिपदादिवचेति वचनाच्छपो लुक् । बाहुलकाद्धलादिशेषाभावः । हल्ङ्याब्भ्य इति सलोपः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । सुदासे । शोभनं ददातीति सुदाः । असुन् । सुदाः कल्याणदान इति यास्कः । वर्क् । वृजी वर्जने । लङि सिपि बहुलं छंदसीति विकरणस्य लुक् । लघूपधागुणे पूर्ववत्सलोपः । अडभावश्च । चोः कुरिति कुत्वं । कः । डुकृञ् करणे । लुङि सिपि मंत्रे घसेति च्लेर्लुक् । पूर्ववत्सलोपाडभावौ ॥

अष्टमीमृचमाह ॥

त्वं त्यां न इंद्र देव चित्रामिषमापो न पीपयः परिज्मन् ।
यया शूर प्रत्यस्मभ्यं यंसि त्मनमूर्जं न विश्वध क्षरध्यै ॥ ८ ॥

त्वं । त्यां । नः । इंद्र । देव । चित्रां । इषं । आपः । न । पीपयः । परिऽज्मन् ।
यया । शूर । प्रति । अस्मभ्यं । यंसि । त्मनं । ऊर्जं । न । विश्वध । क्षरध्यै ॥ ८ ॥

हे देव द्योतमानेंद्र त्वं नोऽस्माकं चित्रां चायनीयां त्यां तामिषमन्नं परिज्मन्

परितो व्याप्तायां भूमौ पीपयः। प्रवर्धयः। यथा सर्वा भूमिरन्नेन पूर्णा भवति तथा कुर्वित्यर्थः। तत्र दृष्टांतः। आपो न। यथापो वृष्ट्युदकानि भूम्यां वर्षणेन प्रवर्धयंति तद्वत्। यद्वा। भूमौ वर्तमानानस्मान्यथापः पाययसि तद्वच्चित्रामिषमपि पाययेति भावः। हे शूरेंद्र ययेषा त्मनमात्मानमस्माकं जीवमस्मभ्यं प्रतियंसि। प्रयच्छसि। तत्र दृष्टांतः। विश्वध विश्वतः सर्वतः क्षरध्यै क्षरितुमूर्जं न। उदकमिव। यथास्मभ्यं बहुलमुदकं प्रयच्छसि तद्वत्प्राणधारणरूपं जीवनमपि प्रयच्छसीति भावः॥ आपः। शसि प्राप्ते व्यत्ययेन जस्। अप्तृन्नित्यादिना दीर्घः। पीपयः। स्फायी ओप्यायी वृद्धौ। णयंताच्छांदसे लुङि प्यायः पी। पा० ६.१.२८.। इति व्यत्ययेन पीभावः। णिश्रिद्रुस्रुभ्य इति चेश्चङादेशः। णिलोपादीनि। यद्वा पीङ् पान इत्यस्माल्लुङि चङि पूर्ववत्। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। परिज्मन्। जमतिर्गतिकर्मा। अज गतिक्षेपणयोः। आभ्यां परिपूर्वाभ्यां श्वन्नुक्षन्नित्यादौ कनिन्प्रत्ययांतो निपातितः। सुपां सुलुगिति सप्तम्या लुक्। यंसि। यम उपरमे। बहुलं छंदसीति शपो लुक्। त्मनं। आङोऽन्यत्रापि छंदसि दृश्यते। पा० ६.४.१४१.१.। इत्यात्मन आकारलोपः। संज्ञापूर्वकस्य विधेरनित्यत्वादुपधादीर्घाभावः। विश्वध। विश्वशब्दात्तसिलः सकारलोपो धत्वं च पृषोदरादित्वात्। क्षरध्यै। क्षर संचलने। तुमर्थे सेसेनित्यध्यैन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं॥

नवमीमृचमाह॥

अकारि त इंद्र गोतमेभिर्ब्रह्माण्योक्ता नमसा हरिभ्यां।
सुपेशसं वाजमा भरा नः प्रातर्मक्षू धियावसुर्जगम्यात्॥९॥

अकारि। ते। इंद्र। गोतमेभिः। ब्रह्माणि। आऽउक्ता। नमसा। हरिऽभ्यां।
सुऽपेशसं। वाजं। आ। भर। नः। प्रातः। मक्षु। धियाऽवसुः। जगम्यात्॥९॥

हे इंद्र ते तव गोतमेभिर्गोतमैरेतत्संज्ञैर्ऋषिभिरकारि। स्तोत्रं कृतमित्यर्थः। एतदेव स्पष्टीकरोति। ब्रह्माणि मंत्रजातानि नमसा हविर्लक्षणेनान्नेन सह हरिभ्यामश्वाभ्यां युक्ताय तुभ्यमोक्ता। आभिमुख्येनोक्तानि। यद्वा मर्यादायामाकारः। यथाशास्त्रं प्रयुक्तानि। स त्वं सुपेशसं। पेश इति रूपनाम। बहुविधरूपयुक्तं वाजमन्नं नोऽस्मभ्यमाभर। आहर। देहीति यावत्। धिया बुद्ध्या कर्मणा वा प्राप्तधन इंद्रः प्रातःकालेऽस्मद्रक्षणार्थं जगम्यात्। आगच्छतु॥ ओक्ता।

शेश्छंदसि बहुलमिति शेर्लोपः। सुपेशसं। पिश अवयवे। असुन्। बहुव्रीहावाद्युदात्तं ग्रच् छंदसीत्युत्तरपदाद्युदात्तत्वं। भरा। हृग्रहोर्भ इति भत्वं। द्व्यचोऽतस्तिङ इति संहितायां दीर्घः ॥

॥ इति प्रथमस्य पंचमे पंचमो वर्गः ॥

वृष्णे शर्धायेति पंचदशर्चं सप्तमं सूक्तं। नोधस आर्षं मारुतं। अंत्या त्रिष्टुप्। शिष्टाश्चतुर्दश जगत्यः। तथा चानुक्रांतं। वृष्णे पंचोना मारुतं त्रिष्टुबंतमिति ॥ चातुर्विंशकेऽहन्याग्निमारुत इदं मारुतं निविद्धानीयं। सूत्रितं च। पृक्षस्य वृष्णो वृष्णे शर्धाय यज्ञेन वर्धतेत्याग्निमारुतं। आ॰ ७. ४.। इति ॥ आभिप्लविके पंचमेऽहन्यप्येतदाग्निमारुते मारुतं निविद्धानीयं। सूत्रितं च। पृक्षस्य वृष्णो वृष्णे शर्धाय नू चित्सहोजा इत्याग्निमारुतं। आ॰ ७. ७.। इति ॥

तत्र प्रथमामृचमाह ॥

वृष्णे॒ शर्धा॑य सु॒मखा॑य वे॒धसे॒ नोधः॑ सुवृ॒क्तिं प्र भ॑रा म॒रुद्भ्यः॑।
अ॒पो न धीरो॒ मन॑सा सु॒हस्त्यो॒ गिरः॒ सम॑ंजे वि॒दथे॑ष्वा॒भुवः॑ ॥ १ ॥
वृष्णे॑। शर्धा॑य। सु॒ऽमखा॑य। वे॒धसे॑। नोधः॑। सु॒ऽवृ॒क्तिं। प्र। भ॒र। म॒रुत्ऽभ्यः॑।
अ॒पः। न। धीरः॑। मन॑सा। सु॒ऽहस्त्यः॑। गिरः॑। सं। अं॒जे। वि॒दथे॑षु। आ॒ऽभुवः॑ ॥ १ ॥

अत्र पूर्वार्धेन स्तुतौ नोधाः प्रेर्यते। हे नोधः। वृष्णे कामानां वर्षित्रे सुमखाय शोभनयज्ञाय वेधसे पुष्पफलादीनां कर्त्रे। वायौ सति हि पुष्पाणि फलानि चोत्पद्यंते। एवंविधाय मरुद्भ्यः। विभक्तिव्यत्ययः। मरुतां मितराविणां शर्धाय समूहाय सुवृक्तिं सुष्ठ्वावर्जकं सुष्ठु प्रवृत्तं वा स्तोत्रं प्रभरा। प्रेरय। स्तुहीति यावत्। स्तुतौ प्रेरितो नोधा आह। धीरो धीमान् सुहस्त्यः शोभनांगुलियुक्तः। कृतांजलिरित्यर्थः। एवंभूतोऽहं मनसा गिरः स्तुतिलक्षणा वाचः समंजे। सम्यग्व्यक्ताः करोमि। या गिरो विदथेषु यज्ञेष्वाभुवः। आङ् मर्यादायां। यथाशास्त्रं प्रयुक्ता भवंतीत्याभुवः। देवताभिमुखीकरणाय समर्थाः। यज्ञयोग्यैः स्तोत्रैर्मनःपूर्वकं मरुद्गणं स्तौमीति भावः। तत्र दृष्टांतः। अपो न। यथा पर्जन्यो युगपदेव बहुषु प्रदेशेषु बहुशो जलानि वर्षति तद्वत् ॥ वृष्णे। वृषु सेचने। कनिन्युवृषितक्षीत्यादिना कनिन्प्रत्ययः। कित्त्वाद्गुणाभावो नित्त्वादाद्युदात्तत्वं।

चतुर्थ्येकवचनेऽल्लोपोऽन इत्यकारलोपः। शर्धाय। शृधु प्रसहने। शर्ध्यते प्रसह्यतेऽनेन पर्वतादिकमिति शर्धो मरुत्संघः। करणे घञ्। जिह्वादाद्युदात्तत्वं। सुमखाय। शोभनो मखो यस्य। नञ्सुभ्यामिति प्राप्ते व्यत्ययेन पूर्वपदप्रकृतिस्वरत्वं। नोधः। पादादित्वात् षाष्ठिकमामंत्रितायुदात्तत्वं। सुहस्त्यः। हस्ते भवो हस्त्यः। भवे छंदसीति यत्। यतोऽनाव इत्याद्युदात्तत्वं। ततः सुशब्देन बहुव्रीहावाद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं॥

द्वितीयामृचमाह॥

ते जज्ञिरे दिव ऋष्वास उक्षणो रुद्रस्य मर्या असुरा अरेपसः।
पावकासः शुचयः सूर्या इव सत्वानो न द्रप्सिनो घोरवर्पसः॥ २॥
ते। जज्ञिरे। दिवः। ऋष्वासः। उक्षणः। रुद्रस्य। मर्याः। असुराः। अरेपसः।
पावकासः। शुचयः। सूर्याःऽइव। सत्वानः। न। द्रप्सिनः। घोरऽवर्पसः॥ २॥

ते मरुतो दिवोऽतरिक्षाज्जज्ञिरे। प्रादुर्बभूवुः। कीदृशाः। ऋष्वासः। दर्शनीयाः। उक्षणः। सेक्तारः। पुमान इत्यर्थः। रुद्रस्य मर्याः। मर्यशब्दो मनुष्यवाचीह मरुतां मर्त्यत्वासंभवात्पुत्रा इत्यस्मिन्नर्थे पर्यवस्यति। मरुतां रुद्रपुत्रत्वं च मंत्रांतरे स्पष्टं। आ ते पितर्मरुतां सुम्नमेत्विति। असुराः। शत्रूणां निरसितारः। अरेपसः। रेप इति पापनाम। पापरहिताः। पावकासः। सर्वेषां शोधकाः। सूर्या इव शुचयो दीप्ताः। सत्वानो न। यथा परमेश्वरस्य भूतगणा अतिशयेन बलपराक्रमाः। तत्सदृशा इत्यर्थः। सत्वान इति भूतगणा उच्यंते। अथो ये अस्य सत्वान इत्यादौ तथा दर्शनात्। द्रप्सिनः। वृष्ट्युदकबिंदुभिर्युक्ताः। मरुतः सृष्टां वृष्टिं नयंतीति श्रुतेः। घोरवर्पसः। वर्प इति रूपनाम। घोररूपाः। यथा भूतगणा भयंकररूपाः। शत्रूणां भयंकररूपा इत्यर्थः। यद्वा सत्वानो न घोरवर्पसः। यथा भूतगणा भयंकररूपास्तद्वदेतेऽपीत्यर्थः॥ ऋष्वासः। ऋषी गतौ। गत्यर्था बुद्ध्यर्था इत्यत्र ज्ञानार्थः। सर्वनिघृष्वेत्यादौ। उ० १. १५२.। वप्रत्ययांतो निपातितः। आज्जसेरसुक्। उक्षणः। वा षपूर्वस्य निगम इत्युपधादीर्घाभावः। अरेपसः। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। सत्वानः। षद्लृ विशरणगत्यवसादनेषु। प्र ईरसद्योस्तुट् च। उ० ४. ११८.। इति विधीयमानः क्वनिप्प्रत्ययो बहुलवचनात्केवलादपि भवति। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते।

घोरवर्पसः। हंतेरच् घुर च। उ॰ ५. ६४.। इति हंतेर्घुरादेशः। अच्। वृङ्धातोर्वृङ्शीङ्भ्यामित्यसुन्। पुडागमः। बहुव्रीहिस्वरः॥

तृतीयामृचमाह॥

युवा॑नो रु॒द्रा अ॒जरा॑ अभो॒ग्घनो॑ ववक्षुरध्रि॑गावः॒ पर्व॑ता इव।
दृ॒ळ्हा चि॒द्विश्वा॒ भुव॑नानि॒ पार्थि॑वा॒ प्र च्या॑वयंति दि॒व्यानि॑ म॒ज्मना॑॥३॥

युवा॑नः। रु॒द्राः। अ॒जराः॑। अ॒भोक्ऽहनः॑। व॒व॒क्षुः॒। अध्रि॑ऽगावः। पर्व॑ताःऽइव।
दृ॒ळ्हा। चि॒त्। विश्वा॑। भुव॑नानि। पार्थि॑वा। प्र। च्य॒व॒यं॒ति॒। दि॒व्यानि॑। म॒ज्मना॑॥३॥

युवानस्तरुणा रुद्रा रुद्रपुत्रा अजरा जरारहिता अभोग्घनो ये देवान्हविर्भिर्न भोजयंति तेषां हंतारः। अध्रिगावोऽधृतगमनाः परैरनिवारितगतयः। पर्वता इव दृढांगाः। एवंभूता मरुतो ववक्षुः। स्तोतॄणामभिमतं प्रापयितुमिच्छंति। अपि च विश्वा सर्वाणि भुवनानि सद्भावं प्राप्तानि पार्थिवा पृथिव्यां भवानि दिव्यानि दिवि भवानि च वसूनि दृळ्हा चित् दृढान्यपि मज्मना। मज्मनेति बलनाम। मज्मना शोधकेन बलेन प्रच्यावयंति। प्रचालयंति॥ अभोग्घनः। भोजयंतीति भोजः। न भोजोऽभोजः। तेषां हंतारः। बहुलं छंदसीति हंतेः क्विप्। ऋयो होऽन्यतरस्यामिति हकारस्य घत्वं। इन्हन्पूषार्यम्णां शौ। पा॰ ६. ४. १२.। इति नियमाद्दीर्घाभावः। ववक्षुः। वह प्रापणे। अस्मादिच्छासन्येकाच इतीट्प्रतिषेधः। द्विर्भावः। ढत्वकत्वषत्वानि। सन्यत इतीत्वाभावश्छांदसः। लिच्युस्यमंत्रे। पा॰ ३. १. ३५.। इति निषेधादाम्प्रत्ययाभावेऽतो लोप इत्यकारलोपः। प्रत्ययस्वरः। पादादित्वान्निघाताभावः॥

चतुर्थीमृचमाह॥

चि॒त्रैर॒ञ्जिभि॒र्वपु॑षे॒ व्यं॑जते॒ वक्षः॑सु रु॒क्माँ अधि॑ येतिरे शु॒भे।
अंसे॑ष्वेषां॒ नि मि॑मृक्षुरृ॒ष्टयः॒ सा॒कं ज॑ज्ञिरे स्व॒धया॑ दि॒वो नरः॑॥४॥

चि॒त्रैः। अ॒ञ्जिऽभिः॑। वपु॑षे। वि। अं॒ज॒ते॒। वक्षः॑ऽसु। रु॒क्मान्। अधि॑। ये॒ति॒रे॒। शु॒भे।
अंसे॑षु। ए॒षा॒म्। नि। मि॒मृ॒क्षुः॒। ऋ॒ष्टयः॑। सा॒कं। ज॒ज्ञि॒रे॒। स्व॒धया॑। दि॒वः। नरः॑॥४॥

वपुरिति रूपनाम। वपुषे रूपाय शोभार्थं मरुतश्चित्रैर्नानाविधैरंजिभी रूपाभिव्यंजनसमर्थैराभरणैः स्वशरीराणि व्यंजते। व्यक्तं कुर्वंति। अलंकुर्वंतीत्यर्थः।

वक्षःसु भुजांतरेषु रुक्मान् रोचमानान्हारानधियेतिरे। उपरि चक्रिरे। किमर्थं। शुभे। शोभार्थं। अपि च। एषां मरुतामंसेष्वृष्टय आयुधानि निमिमृक्षुः। निमृष्टाः स्थिता बभूवुः। तैरायुधैः सहिता नरो नेतारो मरुतो दिवोऽतरिक्षात्स्वधया स्वकीयेन बलेन साकं सह जज्ञिरे। प्रादुर्बभूवुः॥ येतिरे। यती प्रयत्ने। लिट्यत एकहल्मध्य इत्येत्वाभ्यासलोपौ। शुभे। शुभ दीप्तौ। संपदादिलक्षणो भावे क्विप्। सावेकाच इति चतुर्थ्या उदात्तत्वं। मिमृक्षुः। मृजूष् शुद्धौ। सन्यूदित्त्वादिडभावः। हलंताच्चेति सनः कित्त्वाद्गुणाभावः। द्विर्वचनादि। सन्यत इतीत्वं। लिट्युस्यतो लोप इत्यकारलोपः। जज्ञिरे। जनी प्रादुर्भावे। लिटि गमहनेत्यादिनोपधालोपः॥

पंचमीमृचमाह॥

ईशानकृतो धुनयो रिशादसो वातान्विद्युतस्तविषीभिरक्रत।
दुहंत्यूधर्दिव्यानि धूतयो भूमिं पिन्वंति पयसा परिज्रयः॥५॥
ईशानऽकृतः। धुनयः। रिशादसः। वातान्। विऽद्युतः। तविषीभिः। अक्रत।
दुहंति। ऊधः। दिव्यानि। धूतयः। भूमिं। पिन्वंति। पयसा। परिऽज्रयः॥५॥

ईशानकृतः स्तोतारमीशानं धनाधिपतिं कुर्वाणा धुनयो मेघादीनां कंपयितारो रिशादसो रिशानां हिंसकानामत्तारः। यद्वा रिशतां हिंसतामसितारो निरसितारः। एवंभूता मरुतस्तविषीभिरात्मीयैर्बलैर्वातान् पुरो वातादीन् विद्युतो विद्योतमानास्तडितश्चाक्रत। कुर्वंति। कृत्वा च परिज्रयः परितो गंतारो धूतयः कंपयितारो मरुतो दिव्यानि दिविभवान्यूधरूधःस्थानीयान्यभ्राणि दुहंति। रिक्तीकुर्वंति। जलरहितानि कुर्वंतीत्यर्थः। तदनंतरं भूमिं पयसा मेघान्निर्गतेनोदकेन जलेन पिन्वंति। सिंचंति॥ रिशादसः। रिशि हिंसायां। इगुपधज्ञाप्रीकिरः कः। रिशंति हिंसंतीति रिशाः शत्रवः। तानदंतीति रिशादसः। असुन्। नित्त्वादाद्युदात्तत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं। यद्वा रिशच्छब्दाच्छतंतादसु क्षेपण इत्येतस्मात् क्विप्। व्यत्ययेन पूर्वपदस्योपधादीर्घः। अंतोदात्तत्वं च। अक्रत। करोतेश्छांदसो वर्तमाने लुङ्। मंत्रे घसेति च्लेर्लुक्। ऊधः। सुपां सुलुगिति विभक्तेर्लुक्॥

॥ इति प्रथमस्य पंचमे षष्ठो वर्गः॥

मरुत्वीयशस्त्रे पिन्वंत्यप इत्येषा धाय्या । सूत्रितं च । अग्निर्नेता त्वं सोम क्रतुभिः पिन्वंत्यप इति धाय्याः । आ० ५. १४. । इति ॥

तामेतां सूक्ते षष्ठीमृचमाह ॥

पिन्वंत्यपो मरुतः सुदानवः पयो घृतवद्विदथेष्वाभुवः ।
अत्यं न मिहे वि नयंति वाजिनमुत्सं दुहंति स्तनयंतमक्षितं ॥ ६ ॥
पिन्वंति । अपः । मरुतः । सुऽदानवः । पयः । घृतऽवत् । विदथेषु । आऽभुवः ।
अत्यं । न । मिहे । वि । नयंति । वाजिनं । उत्सं । दुहंति । स्तनयंतं । अक्षितं ॥ ६ ॥

सुदानवः शोभनदाना मरुतः पयः क्षीरवत् सारवतीरपः पिन्वंति । सिंचंति । आभुवः । आभवंतीत्याभुव ऋत्विजः । ते विदथेषु यज्ञेषु घृतवत् यथा घृतं सिंचंत्येवं मरुतोऽपि वृष्टिं कुर्वंतीति भावः । तत्र हेतुमाह । अत्यं न । यथाश्वं सादिनो विनयंति युद्धार्थं शिक्षंत्येवं मरुतो वाजिनं वेगवंतं मेघं मिहे वर्षणाय विनयंति । स्वाधीनं कुर्वंतीति भावः । विनीय च स्तनयंतं गर्जंतमक्षितमक्षीणमुत्सं । उत्सवंत्यस्मादाप इत्युत्सो मेघः । तं दुहंति । रिक्तीकुर्वंति ॥ सुदानवः । नुप्रत्ययांतो दानुशब्द आद्युदात्तः । बहुव्रीहावाद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं । मिहे । मिह सेचने । संपदादिलक्षणो भावे क्विप् । सावेकाच इति विभक्तिरुदात्ता । स्तनयंतं । स्तन शब्दे । चुरादिरदंतः । अतो लोपस्य स्थानिवद्भावाद्वृद्ध्याद्यभावः ॥

सप्तमीमृचमाह ॥

महिषासो मायिनश्चित्रभानवो गिरयो न स्वतवसो रघुष्यदः ।
मृगा इव हस्तिनः खादथा वना यदारुणीषु तविषीरयुग्ध्वं ॥ ७ ॥
महिषासः । मायिनः । चित्रऽभानवः । गिरयः । न । स्वऽतवसः । रघुऽस्यदः ।
मृगाःऽइव । हस्तिनः । खादथ । वना । यत् । आरुणीषु । तविषीः । अयुग्ध्वं ॥ ७ ॥

महिष इति महन्नाम । महिषासो महांतः । मायेति ज्ञाननाम । मायिनः प्राज्ञाश्चित्रभानवः शोभनदीप्तयः । गिरयो न स्वतवसः । पर्वता इव स्वकीयेन बलेन युक्ताः । रघुष्यदः । शीघ्रगमनाः । हे मरुतः । एवंभूतगुणविशिष्टा यूयं हस्तिनो हस्तवंतो मृगा इव गजा इव वना वनानि वृक्षजातानि खादथ ।

भक्षयथ। प्रभंक्ष्येति यावत्। यद्यस्मादारुणीष्वरुणवर्णासु वडवासु तविषीर्बलान्ययुग्ध्वं। संयोजितवंतः। तस्माद्भवतामिव वाहनस्यापि प्रबलत्वात्तत्संयुक्ता भवंतः सर्वं भंजंतीत्यर्थः ॥ रघुष्यदः। स्यंदू प्रस्रवणे। रघु शीघ्रं स्यंदंते गच्छंतीति रघुष्यदः। क्विप् चेति क्विप्। अनिदितामिति नलोपः। वालमूललघुलमिति लत्वविकल्पः। पा० ८.२.१८.२। कृदुत्तरपदप्रकृतिस्वरत्वं। खादथा। खादृ भक्षणे। अयुग्ध्वं। युजिर् योगे। लुङि च्लेः सिच्। एकाच इतीट्प्रतिषेधः। धि च। पा० ८.२.२५। इति सकारलोपः। चोः कुरिति कुत्वं। अडागम उदात्तः। यद्वृत्तयोगादनिघातः ॥

अष्टमीमृचमाह ॥

सिंहा इव नानदति प्रचेतसः पिशा इव सुपिशो विश्ववेदसः।
क्षपो जिन्वंतः पृषतीभिर्ऋष्टिभिः समित्सबाधः शवसाहिमन्यवः ॥ ८ ॥

सिंहाःऽइव। नानदति। प्रऽचेतसः। पिशाःऽइव। सुऽपिशः। विश्वऽवेदसः।
क्षपः। जिन्वंतः। पृषतीभिः। ऋष्टिऽभिः। सं। इत्। सऽबाधः। शवसा।
अहिऽमन्यवः ॥ ८ ॥

प्रचेतसः प्रकृष्टज्ञाना मरुतः सिंहा इव नानदति। भृशं शब्दं कुर्वंति। यथा सिंहा गिरिगह्वरेषु गंभीरं शब्दं कुर्वंति। एवं मरुत्स्वप्यागतेषु गंभीरः शब्द उत्पद्यत इति भावः। तथा सुपिशः शोभनावयवाः शोभनालंकारा वा। तत्र दृष्टांतः। पिशा इव। पिश इति रुरुनाम। यथा रुरवः स्वशरीरगतैः श्वेतविंदुभिरलंकृतास्तद्वत्। विश्ववेदसः सर्वज्ञाः। क्षपः शत्रूणां क्षपयितारः। जिन्वंतः स्तोतॄन्प्रीणयंतः। शवसा बलेनाहिमन्यव आहननशीलमन्युयुक्ताः। यद्विषयः कोपो जायते तस्य हनने समर्था इत्यर्थः। यद्वा मननं ज्ञानं मन्युः। अहीनज्ञाना उत्कृष्टबुद्धय इत्यर्थः। एवंभूता मरुतः पृषतीभिः। पृषत्य इति मरुतां वाहनस्याख्या। पृषत्यः श्वेतविंद्वंकिता मृग्य इत्यैतिहासिकाः। नानावर्णा मेघमाला इति नैरुक्ताः। ताभिर्ऋष्टिभिरायुधैश्च सहिताः संतः सबाधः शत्रुभिर्बाधितान्यजमानान् समित् समानमेव युगपदेव रक्षितुमागच्छंतीति शेषः ॥ नानदति। नद अव्यक्ते शब्दे। अस्माद्यङ्लुगंताल्लट्। पिशा इव। पिश अवयवे। इगुपधलक्षणः कः। सुपिशः। सुपूर्वात्पिश अवयव इत्यस्मात् क्विप् चेति क्विप्। पृषतीभिः। पृषु

सेचने। वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च। पा॰ ४. १. ६. १.। इति शतृवद्भावाद्उगितश्चेति ङीप्। अत एव शतुरनुम इति नद्या उदात्तत्वे प्राप्ते बृहन्महतोरुपसंख्यानमिति नियमात्तस्याभावः ॥

नवमीमृचमाह ॥

रोदसी आ वदता गणश्रियो नृषाचः शूराः शवसाहिमन्यवः ।
आ वंधुरेष्वमतिर्न दर्शता विद्युन्न तस्थौ मरुतो रथेषु वः ॥ ९ ॥

रोदसी इति। आ। वदत। गणऽश्रियः। नृऽसाचः। शूराः। शवसा। अहिऽमन्यवः।
आ। वंधुरेषु। अमतिः। न। दर्शता। विऽद्युत्। न। तस्थौ। मरुतः। रथेषु। वः ॥ ९ ॥

हे गणश्रियः। गणशः श्रयमाणाः सप्तगणरूपेणावस्थिताः। नृषाचः। नॄन् यजमानान्हविःस्वीकरणाय सेवमानाः। शूराः शौर्योपेताः। एवंभूता हे मरुतः शवसा बलेनाहिमन्यवः। आहननस्वभावकोपयुक्ताः संतो रोदसी द्यावापृथिव्यावावदत। आ समंताच्छब्दयत। युष्मदागमने सति भवदीयशब्देन द्यावापृथिव्यौ पूर्णे कुरुतेति भावः। किंच हे मरुतः। वो युष्माकं तेजो वंधुरेषु। बंधककाष्ठानिर्मितं सारथेः स्थानं वंधुरमित्युच्यते। तद्युक्तेषु रथेष्वातस्थौ। आतिष्ठति। अवस्थितं सत्सर्वैर्दृश्यते। तत्र दृष्टांतद्वयमुच्यते। अमतिर्न। अमतिरिति रूपनाम। यथा निर्मलं रूपं सर्वैर्दृश्यते। दर्शता विद्युन्न। यथा वा दर्शनीया विद्युन्मेघस्था सर्वैर्दृश्यते। एवं रथे स्थितानां युष्माकं ज्योतिरपि सर्वैर्दृश्यत इत्यर्थः ॥ वदता। ऋचि तुनुघेत्यादिना दीर्घः। नृषाचः। पादादित्वादामंत्रिताद्युदात्तत्वं। अमतिः। अम गत्यादिषु। अमेरतिरित्यौणादिकोऽतिप्रत्ययः। प्रत्ययाद्युदात्तत्वं। दर्शता। भृमृदृशीत्यादिनातच्प्रत्ययः। चित्त्वादंतोदात्तत्वं ॥

दशमीमृचमाह ॥

विश्ववेदसो रयिभिः समोकसः संमिश्लासस्तविषीभिर्विरप्शिनः ।
अस्तार इषुं दधिरे गभस्त्योरनंतशुष्मा वृषखादयो नरः ॥ १० ॥

विश्वऽवेदसः। रयिऽभिः। संऽओकसः। संऽमिश्लासः। तविषीभिः। विऽरप्शिनः।
अस्तारः। इषुं। दधिरे। गभस्त्योः। अनंतऽशुष्माः। वृषऽखादयः। नरः ॥ १० ॥

विश्ववेदसः सर्वज्ञा रयिभिर्धनैः समोकसः समाननिवासाः समवेता वा । धनाधिपतय इत्यर्थः । तविषीभिर्बलैः संमिश्लासः संमिश्राः । संयुक्ता इत्यर्थः । विरप्शिनः । महन्नामैतत् । महांतः । अस्तारः शत्रूणां निरसितारः । अनंतशुष्मा अनवच्छिन्नबलाः । वृषखादयः । वृषेंद्रः खादिरायुधस्थानीयो येषां ते तथोक्ताः । यद्वा वृषा सोमः खादिः खाद्यः पेयो येषां ते । नरो नेतारः । एवंभूता मरुतः । गभस्तिरिति बाहुनाम । गभस्त्योर्बाह्वोरिषुं दधिरे । शत्रूणां निरसनाय धनुर्बाणादिकमायुधं धारयंति ॥ समोकसः । उच समवाये । असुनि बहुलवचनात्कुत्वमित्योक उचः के । पा० ७.३.६४.। इत्यत्रोक्तं । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । संमिश्लासः । कपिलकादित्वाल्लत्वं । विरप्शिनः । रप लप व्यक्तायां वाचि । विपूर्वादस्माद्बहुलवचनात् शक्प्रत्ययः । विविधं शब्दं रपंतीति विरप्शाः स्तोतारः । त एषां संतीति विरप्शिनः । यद्वा विविधं रपणं विरप्शं । तदेषामस्तीति । मरुतो हि विविधं शब्दं कुर्वंति । इनिप्रत्ययस्वरः । अस्तारः । ताच्छीलिकस्तृन् । इडभावश्छांदसः । नित्त्वादाद्युदात्तत्वं । अनंतशुष्माः । नास्त्यंतोऽस्येत्यनंतः । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । अनंतः शुष्मो बलं येषां । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । वृषखादयः । खाद भक्षणे । औणादिक इन्प्रत्ययः । वृषन्शब्दः कनिन्प्रत्ययांत आद्युदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य पंचमे सप्तमो वर्गः ॥

एकादशीमृचमाह ॥

हिरण्ययेभिः पविभिः पयोवृध उज्जिघ्नंत आपथ्यो३ न पर्वतान् ।
मखा अयासः स्वसृतो ध्रुवच्युतो दुध्रकृतो मरुतो भ्राजदृष्टयः ॥ ११ ॥
हिरण्ययेभिः । पविऽभिः । पयःऽवृधः । उत् । जिघ्नंते । आऽपथ्यः । न । पर्वतान् ।
मखाः । अयासः । स्वऽसृतः । ध्रुवऽच्युतः । दुध्रऽकृतः । मरुतः । भ्राजत्ऽऋष्टयः ॥ ११ ॥

मरुतो हिरण्ययेभिः सुवर्णमयैः । यद्वा हितरमणीयैः पविभिः रथानां चक्रैः पर्वतान्पर्ववतो मेघान् यद्वा शिलोच्चयानुज्जिघ्नंते । ऊर्ध्वं गमयंति । स्थानात्प्रच्यावयंतीत्यर्थः । तत्र दृष्टांतः । आपथ्यो न । यथा पथि गच्छन्रथो मार्गं आस्थितं तृणवृक्षादिकं चूर्णीकृत्योर्ध्वं नयति गमयति । यद्वा यथा संयुक्ता गजा मार्गस्थितं वृक्षादिकं भग्नं कुर्वंति । कीदृशा मरुतः । पयोवृधः । पयसो वृष्ट्युदकस्य वर्धयितारः ।

यद्वा पृश्नेः पयसा वर्धमानाः । पृश्न्यै वै पयसो मरुतो जाता इति श्रूयते । मखाः । मख इति यज्ञनाम । तद्वंतः । अयासः । देवयजनदेशं प्रति गंतारः । स्वसृतः । शत्रून्प्रति स्वयमेव सरंतो गच्छंतः । ध्रुवच्युतः । ध्रुवाणां निश्चलानां पर्वतादीनामपि च्यावयितारः । दुध्रकृतः । दुध्रं दुष्टानां धारयितारमात्मानं कुर्वाणाः । यद्वा दुर्धरमन्यैर्धर्तुमशक्यमात्मानं कुर्वाणाः । भ्राजदृष्टयः । दीप्यमानायुधाः ॥ उज्जिघ्नंते । हंतेर्व्यत्ययेनात्मनेपदं । बहुलं छंदसीति शपः श्लुः । बहुलं छंदसीत्यभ्यासस्येत्वं । गमहनेत्यादिनोपधालोपः । हो हंतेरिति घत्वं । व्यत्ययेनांतादेशः । पथ्यः । पथि भवः । भवे छंदसीति यत् । नस्तद्धित इति टिलोपः । व्यत्ययेन स्वरितत्वं । यद्वा छंदसीवनिपाविति मत्वर्थीय ईकारः । उदात्तस्वरितयोर्यण इति विभक्तेः स्वरितत्वं । अयासः । अय पय गतौ । अयंत इत्ययाः । पचाद्यच् । आज्जसेरसुक् । दुध्रकृतः । अत्र दुःशब्देन दुष्टा लक्ष्यंते । धृञ् धारणे । दुष्टान् धारयतीति दुध्रः । मूलविभुजादित्वात् । पा० ३. २. ५. २. । कप्रत्ययः । यद्वा । ईषद्दुःसुष्विति दुःशब्द उपपदे कर्मणि खल् । गुणाभावश्छांदसः । तं कुर्वंतीति दुध्रकृतः । करोतेः क्विप् चेति क्विप् । रेफलोपश्छांदसः ॥

द्वादशीमृचमाह ॥

घृषुं पावकं वनिनं विचर्षणिं रुद्रस्य सूनुं हवसा गृणीमसि ।
रजस्तुरं तवसं मारुतं गणमृजीषिणं वृषणं सश्चत श्रिये ॥ १२ ॥
घृषुं । पावकं । वनिनं । विऽचर्षणिं । रुद्रस्य । सूनुं । हवसा । गृणीमसि ।
रजःऽतुरं । तवसं । मारुतं । गणं । ऋजीषिणं । वृषणं । सश्चत । श्रिये ॥ १२ ॥

घृषुं शत्रूणां बलस्य घर्षकं विनाशयितारं पावकं सर्वेषां शोधकं वनिनं । वनमित्युदकनाम । उदकवंतं वृष्टिप्रदमित्यर्थः । विचर्षणिं विशेषेण सर्वस्य द्रष्टारं । रुद्रस्य महादेवस्य सूनुं पुत्रभूतं । एवंविधं मरुतां समूहं हवसाह्वानसाधनेन स्तोत्रेण गृणीमसि । शब्दयामः । स्तुम इत्यर्थः । हे ऋत्विग्यजमानाः । यूयमपि श्रिय ऐश्वर्याय धनार्थं मारुतं गणं मरुतां संघं सश्चत । प्राप्नुत । कीदृशं । रजस्तुरं । पार्थिवस्य पांसोस्त्वरयितारं प्रेरकमित्यर्थः । तवसं । प्रवृद्धं । ऋजीषिणं । तृतीयसवने हि मरुतः स्तूयंते । तत्र च ऋजीषमभिषुण्वंतीति ऋजीषसंबंधः श्रुतः । अतस्तद्वंतं वृषणं कामानां वर्षितारं ॥ हवसा । ह्वेञोऽसिप्रत्यये बहुलं छंदसीति

संप्रसारणं। गृणीमसि। गृ शब्दे। इदंतो मसिः। प्वादीनां ह्रस्व इति ह्रस्वत्वं। रजस्तुरं। रजांसि तुतोर्तीति रजस्तूः। तुर त्वरणे। क्विप् चेति क्विप्। वृषणं। वा षपूर्वस्य निगम इति दीर्घाभावः। सश्चत। ग्लुंच षस्ज गतावित्यत्र सश्चिमप्येक इति धातुवृत्तावुक्तं। गतिकर्मसु च सश्चतीति पठितं। श्रिये। सावेकाच इति विभक्तेरुदात्तत्वं॥

त्रयोदशीमृचमाह॥

प्र नू स मर्तः शवसा जनाँ अति तस्थौ व ऊती मरुतो यमावत।
अर्वद्भिर्वाजं भरते धना नृभिरापृच्छ्यं क्रतुमा क्षेति पुष्यति॥१३॥

प्र। नु। सः। मर्तः। शवसा। जनान्। अति। तस्थौ। वः। ऊती। मरुतः। यं। आवत। अर्वत्ऽभिः। वाजं। भरते। धना। नृऽभिः। आऽपृच्छ्यं। क्रतुं। आ। क्षेति। पुष्यति॥१३॥

स मर्तो मनुष्यः शवसा बलेन जनान् जातानन्यान्पुरुषानति। अतीत्य। नु क्षिप्रं तस्थौ। प्रतिष्ठितो भवति। हे मरुतो वो युष्माकमूती ऊत्या रक्षणेन यं पुरुषमावत। अरक्षत। अपि च स पुरुषोऽर्वद्भिरश्वैः साधनभूतैर्वाजमन्नं नृभिः स्वकीयैर्मनुष्यैर्धनानि च भरते। संपादयति। तथापृच्छ्यमाप्रष्टव्यं शोभनं क्रतुमग्निष्टोमादिकर्माक्षेति। आप्नोति। पुष्यति। प्रजया पशुभिः पुष्टो भवति च॥ ऊती। तृतीयायाः पूर्वसवर्णदीर्घत्वं। नृभिः। नृ चान्यतरस्यामिति विभक्त्युदात्तत्वप्रतिषेधः। आपृच्छ्यं। छंदसि निष्टर्क्येत्यादावाङ्पूर्वात्पृच्छतेः क्यप्प्रत्ययांतो निपात्यते। ग्रहिज्यादिना संप्रसारणं। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते। कृदुत्तरपदप्रकृतिस्वरत्वं। क्षेति। क्षि निवासगत्योः। बहुलं छंदसीति विकरणस्य लुक्। पुष्यति। पुष पुष्टौ। दिवादित्वात् श्यन्। नित्त्वादाद्युदात्तत्वं। तिङः परत्वान्निघाताभावः॥

चतुर्दशीमृचमाह॥

चर्कृत्यं मरुतः पृत्सु दुष्टरं द्युमंतं शुष्मं मघवत्सु धत्तन।
धनस्पृतमुक्थ्यं विश्वचर्षणिं तोकं पुष्येम तनयं शतं हिमाः॥१४॥

चर्कृत्यं। मरुतः। पृत्ऽसु। दुस्तरं। द्युऽमंतं। शुष्मं। मघवत्ऽसु। धत्तन। धनऽस्पृतं। उक्थ्यं। विश्वऽचर्षणिं। तोकं। पुष्येम। तनयं। शतं। हिमाः॥१४॥

हे मरुतः। मघवत्सु हविर्लक्षणधनयुक्तेषु यजमानेषु पुत्रं धत्तन। स्थापयतेति यावत्। कीदृशं पुत्रं। चर्कृत्यं। कार्येषु पुनः पुनः पुरस्कर्तव्यं। सर्वकर्मकुशलमित्यर्थः। पृत्सु संग्रामेषु दुष्टरं। दुःखेन तरितव्यं। अजेयमित्यर्थः। द्युमंतं। दीप्तिमंतं। शुष्मं। शत्रूणां शोषकं बलवंतं। धनस्पृतं। धनानां स्प्रष्टारं धनैः प्रीतं वा। उक्थ्यं। उक्थं स्तोत्रं तदर्हं प्रशस्यमित्यर्थः। विश्वचर्षणिं। विशेषेण द्रष्टारं सर्वज्ञं। एवंविधं तोकं पुत्रं तनयं पौत्रं च शतं हिमा हेमंततूपलक्षितान् शतं संवत्सरान् जीवंतः संतः पुष्येम। पोषयेम। अत्र हिमशब्देन तद्युक्ता हेमंतर्तवोऽभिधीयंते। तथा च ब्राह्मणमेवमाम्नायते। शतं हिमा इत्याह शतं त्वा हेमंतानि धिषीयेति वावैतदाहेति॥ चर्कृत्यं। प्रकृतिग्रहणे यङ्गंतस्यापि ग्रहणमिति न्यायेन करोतेर्यङ्गंताद्विभाषा कृवृषोरिति क्यप्। तुगागमः। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते। पृत्सु। पदादिषु मांस्पृत्स्नूनामुपसंख्यानमिति पृतनाशब्दस्य पृदादेशः। दुष्टरं। तॄ प्लवनतरणयोः। ईषद्दुःसुष्विति खल्। सुषामादेराकृतिगणत्वात् षत्वं। लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं। धत्तन। तप्तनप्तनथनाश्चेति तस्य तनादेशः। हिमाः। हंतेर्हि चेति मक्प्रत्ययः। अर्शआद्यच्। वृषादित्वादाद्युदात्तत्वं॥

ऐकादशिनस्य मारुतस्य पशोर्वपायागस्य नू ष्ठिरमित्येषा याज्या। सूचितं च। शुची वो हव्या मरुतः शुचीनां नू ष्ठिरं मरुतो वीरवंतं। आ॰३.७। इति॥

तामेतां सूक्ते पंचदशीमृचमाह॥

नू ष्ठिरं मरुतो वीरवंतमृतीषाहं रयिमस्मासु धत्त।
सहस्रिणं शतिनं शूशुवांसं प्रातर्मक्षू धियावसुर्जगम्यात्॥१५॥

नु। स्थिरं। मरुतः। वीरऽवंतं। ऋतिऽसहं। रयिं। अस्मासु। धत्त।
सहस्रिणं। शतिनं। शूशुऽवांसं। प्रातः। मक्षु। धियाऽवसुः। जगम्यात्॥१५॥

हे मरुतः स्थिरं स्थास्नुं वीरवंतं वीरैः पुत्रैर्वर्धतं तद्वंतं। यद्वा वीर्योपेतमृतीषाहं गंतॄणां शत्रूणामभिभवितारं। एवंविधं रयिं पुत्रलक्षणं धनमस्मासु धत्त। स्थापयत। सहस्रिणं शतिनमेतत्संख्याकधनवंतं। अत एव शूशुवांसं प्रवृद्धं। अपि चास्माकं रक्षणाय धिया बुद्ध्या कर्मणा वा प्राप्तधनो मरुद्गणः प्रातःकाले जगम्यात्। आगच्छतु॥ नू ष्ठिरं। ऋचि तुनुघेति दीर्घः। पूर्वपदादिति षत्वं।

ऋतीषाहं। ऋ गतौ। कर्तरि क्विप्। षह अभिभवे। छंदसि सह इति ण्विप्रत्ययः। अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घत्वं। सुषामादित्वात् षत्वं। शूशुवांसं। टुओश्वि गतिवृद्ध्योः। लिटः क्वसुः। विभाषा श्वेः। पा० ६.१.३०.। इति संप्रसारणं। द्विर्वचने तुजादित्वादभ्यासस्य दीर्घत्वं। वस्वेकाजाद्घसामिति नियमादिडभावः। प्रत्ययस्वरः॥

॥ इति प्रथमस्य पंचमेऽष्टमो वर्गः॥

॥ इति प्रथमे मंडल एकादशोऽनुवाकः॥

द्वादशेऽनुवाके नव सूक्तानि। तत्र पश्वेत्यादीनि षट् सूक्तानि द्वैपदानि। तेष्वध्ययनसमये द्विपदे द्वे द्वे ऋचौ चतुःपदामेकैकामृचं कृत्वा समाम्नायते। अयुक्संख्यासु तु यांत्यातिरिच्यते सा तथैवाम्नायते। प्रायेणार्थोऽपि द्वयोर्द्विपदयोरेक एव। प्रयोगे तु ताः पृथक् पृथक् शंसनीयाः। सूच्यते हि पश्वा न तायुमिति द्वैपदं। आ० ८.१२.। इति॥ तत्र पश्वेति दशर्चं प्रथमं सूक्तं। अत्रानुक्रम्यते। पश्वा दश पराशरः शाक्त्यो द्वैपदं तदिति। शक्तिपुत्रः पराशर ऋषिः। तत्पुत्रत्वं च स्मर्यते। वसिष्ठस्य सुतः शक्तिः शक्तेः पुत्रः पराशर इति। द्विपदा विराट् छंदः। विंशतिका द्विपदा विराज इति हि तल्लक्षणं। अग्निर्देवता। परमाग्नेयमैंद्रादिति परिभाषितं। पश्वा न तायुमित्यारभ्येत्था हीत्यतः प्राक् यत्सूक्तजातं तत्सर्वमाग्नेयमिति तस्यार्थः। द्वैपदं तदित्युक्तत्वादिदमादीनि षट् सूक्तानि तुह्यादिपरिभाषया द्वैपदानि॥ दशमेऽहनि वैश्वदेवशस्त्रे वैश्वदेवसूक्तात्पूर्वमेतद्द्वैपदं सूक्तं शंसनीयं। सूत्रमुदाहृतं॥

तत्र प्रथमामृचमाह॥

पश्वा न तायुं गुहा चतंतं नमो युजानं नमो वहंतं।
सजोषा धीराः पदैरनु ग्मन्नुप त्वा सीदन्विश्वे यजत्राः॥ १॥
पश्वा। न। तायुं। गुहा। चतंतं। नमः। युजानं। नमः। वहंतं।
सऽजोषाः। धीराः। पदैः। अनु। ग्मन्। उप। त्वा। सीदन्। विश्वे। यजत्राः॥ १॥

धीरा मेधाविनो देवाः सजोषाः समानप्रीतयः संतो हे अग्ने त्वां पदैर्मार्गे पादकृतैर्लांछनैरनुग्मन्। अन्वगमन्। कीदृशं। पश्वापहृतेन पशुना सह वर्तमानं तायुं न। तायुरिति स्तेननाम। यथा स्तेनः परकीयं पश्वादिधनमपहृत्य

दुःप्रवेशे गिरिगह्वरे वर्तते तद्वद्गुहा चरंतं। अप्रूपायां गुहायां गच्छंतं वर्तमानं। चरतिर्गतिकर्मा। तथा च तैत्तिरीयैरग्नेरप्सु प्रवेशः समाम्नायते। स निलायत सोऽपः प्राविशदिति। यद्वा। अश्वत्थगुहायां गच्छंतं वर्तमानं। श्रूयते च। अग्निर्देवेभ्यो निलायत। अश्वो रूपं कृत्वा सोऽश्वत्थे संवत्सरमतिष्ठदिति। तथा नमो युजानं। हविर्लक्षणमन्नमात्मना संयुजानं। नमो वहंतं। देवेभ्यः प्रत्त हविर्वहंतं। यजत्रा यजनीया विश्वे सर्वे देवा हे अग्ने त्वा त्वामुपसीदन्। समीपं प्राप्नुवन्। ददृशुरित्यर्थः॥ पश्वा। तृतीयैकवचनस्य जसादिषु छंदसि वावचनमिति नाभावाभावः। उदात्तयण इति विभक्तेरुदात्तत्वं। गुहा। भिदादिषु पाठादङ्प्रत्ययांतः। वृषादिषु पाठादाद्युदात्तत्वं। सुपां सुलुगिति सप्तम्या लुक्। युजानं। शानचि बहुलं छंदसीति विकरणस्य लुक्। सजोषाः। जुषी प्रीतिसेवनयोः। समानं जुषंत इति सजोषसः। समानस्य छंदसीति सभावः। कृदुत्तरपदप्रकृतिस्वरत्वं। सुपां सुलुगिति जसः सुः। ग्मन्। गमेर्लुङि मंत्रे घसेति च्लेर्लुक्। गमहनेत्यादिनोपधालोपः। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। यजत्राः। अमिनक्षीत्यादिनात्रन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं॥

द्वितीयामृचमाह॥

ऋतस्य देवा अनु व्रता गुर्भुवत्परिष्टिर्द्यौर्न भूम।
वर्धंतीमापः पन्वा सुशिश्विमृतस्य योना गर्भे सुजातं॥ २॥

ऋतस्य। देवाः। अनु। व्रता। गुः। भुवत्। परिष्टिः। द्यौः। न। भूम।
वर्धंति। ईं। आपः। पन्वा। सुऽशिश्विं। ऋतस्य। योना। गर्भे। सुऽजातं॥ २॥

उक्त एवार्थः स्पष्टीक्रियते। देवा ऋतस्य गतस्य पलायितस्याग्नेर्व्रता व्रतानि कर्माणि गमनावस्थानशयनादिरूपाण्यनुगुः। अन्वेष्टुमगमन्। तदनंतरं परिष्टिः परितः सर्वतोऽन्वेषणं भुवत्। अभवत्। भूम भूमिरप्यग्नेरन्वेष्टृभिर्देवैर्द्यौर्न स्वर्ग इवाभूत्। इंद्रादयः सर्वे देवा अग्नेर्गवेषणाय भूलोकं प्राप्ता इत्यर्थः। आपोऽब्देवता ईमेनमुदके प्रविष्टमग्निं वर्धंति। प्रवर्धयंति। यथा देवा न पश्यंति तथा-रक्षन्नित्यर्थः। कीदृशं। पन्वा स्तोत्रेण सुशिश्विं सुष्ठु प्रवर्धितं। ऋतस्य योना। योनिरित्युदकनाम। ऋतस्य यज्ञस्यान्नस्य वा कारणभूते जले गर्भे गर्भस्थाने मध्ये सुजातं सुष्ठु प्रादुर्भूतं। एवमप्सु वर्तमानमग्निं देवेभ्यो मत्स्यः प्रावोचत्।

तदनंतरं देवास्तमज्ञासिषुरिति भावः। तथा च तैत्तिरीयकं। स निलायत सोऽपः प्राविशत्तं देवाः प्रैषमैच्छन्। तं मत्स्यः प्राब्रवीदिति ॥ ग्मन्। शेश्छंदसि बहुलमिति शेर्लोपः। गुः। इण् गतौ। इणो गा लुङीति गादेशः। गातिस्थेति सिचो लुक्। आत इति झेर्जुस्। उस्यपदांतादिति पररूपत्वं। परिष्टिः। इषु इच्छायां। क्तिनि तितुत्रेतीट्प्रतिषेधः। शकंध्वादित्वात्पररूपत्वं। पा० ६.१.९४.२। तादौ च नितीति गतेः प्रकृतिस्वरत्वं। भूम। सुपां सुलुगिति सोर्डादेश। ह्रस्वश्छांदसः। वर्धति। छंदस्युभयथेति शप आर्धधातुकत्वाणेरनिटीति णिलोपः। शपः पित्त्वादनुदात्तत्वं। तिङश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। पन्वा। पन स्तुतौ। औणादिको भाव उप्रत्ययः। सुशिश्विं। टुओश्वि गतिवृद्ध्योः। आदृगमहनजन इत्यचोत्सर्गश्छंदसीति वचनात्किप्रत्ययः। वचिस्वपीत्यादिना संप्रसारणं। लिड्वद्भावाद्द्विर्भावे बहुलं छंदसीत्युकारस्येत्वं। छांदसो यणादेशः। सुः पूजायामिति सोः कर्मप्रवचनीयत्वं। स्वती पूजायामिति प्रादिसमासः। अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥

तृतीयामृचमाह ॥

पुष्टिर्न रण्वा क्षितिर्न पृथ्वी गिरिर्न भुज्म क्षोदो न शंभु।
अत्यो नाज्मन्त्सर्गप्रतक्तः सिंधुर्न क्षोदः क ईं वराते ॥ ३ ॥

पुष्टिः। न। रण्वा। क्षितिः। न। पृथ्वी। गिरिः। न। भुज्म। क्षोदः। न। शंऽभु।
अत्यः। न। अज्मन्। सर्गऽप्रतक्तः। सिंधुः। न। क्षोदः। कः। ईं। वराते ॥ ३ ॥

रण्वा रमणीया सर्वेषां हृद्या पुष्टिर्न। अभिमतफलानामभिवृद्धिरिवाग्निः सर्वेषां रमणीयः। ऐहिकामुष्मिकसकलव्यवहारस्याग्न्यधीनत्वात्। यद्वा पुष्टिरिव रण्वा गंतव्यः। शब्दनीयः स्तुत्यो वा। यथा पुष्टिः प्राप्यते तद्वदग्निर्यज्ञे हविर्भिः प्राप्यत इति भावः। पृथ्वी विस्तीर्णा क्षितिर्न भूमिरिवाग्निरपि विस्तीर्णः सर्वेषु भूतेषु जाठररूपेणावस्थानात्। गिरिर्न पर्वत इव भुज्म सर्वेषां भोजयिता। यथा गिरौ विद्यमानं फलमूलादिकमाहृत्य सर्वे भुंजते तद्वदग्नावपि पचंतः सर्वे भुंजते। यद्वा। अग्नावाहुतिं हुत्वा यजमानाः स्वर्गफलं भुंजते। अथवा गिरिर्यथा दुर्भिक्षे सर्वान्प्राणिनो भुनक्ति स्वकीयफलमूलादिदानेन पालयति। तद्वदयमपि पापादनुष्ठातॄन्प्रमुंचति। तथा चाम्नायते। अग्निर्मा तस्मादेनसः प्रमुंचत्विति। शंभु सुखकरं क्षोदो न। उदकमिव। यथोदकं सुखं करोति तद्व-

दग्निः सर्वेषां सुखकारीत्यर्थः । अज्मन् । संग्रामनामैतत् । अज्मनि संग्रामेऽत्यो न सततगमनशीलो जात्यश्व इव सर्गप्रतक्तः सर्गेण विसर्जनेन प्रगमितः । यथा सादिना प्रेषितो जात्यश्वो हंतव्यसमीपमाशु गच्छति तद्वदग्निरपि स्तोतृभिः प्रेषितः सन् शत्रून्हंतुं शीघ्रं गच्छतीति भावः । अपि च सिंधुर्न क्षोदः । स्यंदनशीलमुदकमिवायमपि शीघ्रगामी । यथा निम्नप्रदेशाभिमुखो जलप्रवाहो दुर्निवारः । तद्वद्दग्धव्याभिमुखोऽग्निरपीत्यर्थः । अतो यस्मादेवं तस्मादीमेनमग्निं को वराते । को वारयेत् । न कोऽपि वारयितुं शक्नोतीत्यर्थः ॥ रथा । रविर्गत्यर्थः । रथ्यते प्राप्यत इति रथः । कृत्यल्युटो बहुलमिति बहुलवचनात्कर्मणि पचाद्यच् । भुज्म । भुज पालनाभ्यवहारयोः । इषुयुधींधीति विधीयमानो मक् बहुलवचनादस्मादपि भवति । सुपां सुलुगिति सोर्लुक् । अज्मन् । अज गतिक्षेपणयोः । मनिनि वलादावार्धधातुके विकल्पयिष्यत इति वचनाद्वीभावाभावः । सुपां सुलुगिति सप्तम्या लुक् । सर्गप्रतक्तः । सृज विसर्ग इत्यस्माद्घञंतः सर्गशब्द आद्युदात्तः । तंचु गतौ । अस्मादंतर्भावितण्यर्थान्निष्ठायां यस्य विभाषेतीट्प्रतिषेधः । अनिदितामिति नलोपः । सर्गेण प्रतक्तः । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं । वराते । वृञ् वरणे । अंतर्भावितण्यर्थाल्लेटि लेटोऽडाटावित्याडागमः । व्यत्ययेन शप् । वैतोऽन्यत्रेत्येत्वस्य विकल्पितत्वादभावः ॥

चतुर्थीमृचमाह ॥

जामिर्सिंधूनां भ्रातेव स्वस्रामिभ्यान्न राजा वनान्यत्ति ।
यद्वातजूतो वना व्यस्थादग्निर्ह दाति रोमा पृथिव्याः ॥ ४ ॥
जामिः । सिंधूनां । भ्राताऽइव । स्वस्रां । इभ्यान् । न । राजा । वनानि । अत्ति ।
यत् । वातऽजूतः । वना । वि । अस्थात् । अग्निः । ह । दाति । रोम । पृथिव्याः ॥ ४ ॥

सिंधूनां स्यंदनशीलानामपामयमग्निर्जामिर्बंधुः । तासामुत्पादकत्वात् । तथा चाम्नातं । अग्नेराप इति । यद्वा देवेभ्यः पलायितोऽप्सु वर्तमानः सन्तासामपां बंधुर्बभूवेत्यर्थः । तत्र दृष्टांतः । स्वस्रां स्वसृणां भ्रातेव । यथा भ्रातातिशयेन हितकरो भवति तद्वत् । तादृशोऽग्निर्वनानि महांत्यरण्यान्यत्ति । भक्षयति । दहतीत्यर्थः । तत्र निदर्शनं । राजेभ्यान्न । भियं यंतीति नैरुक्तव्युत्पत्त्येभ्याः शत्रवः । तान्यथा समूलं हिनस्ति तद्वत् । यद्वा । इभ्या धनिनः । तान्यथा धनम-

पहरन्राजा हिनस्ति तद्वदित्यर्थः। अपि च। यद्यदा वातजूतो वातेन प्रेरितः सन्वना वनान्यरण्यानि व्यस्थात्। उक्तप्रकारेण विविधमातिष्ठति। दग्धुं प्रवर्तते। तदानीमग्निर्ह। असावग्निरेव पृथिव्या भूमेः संबंधीनि रोमौषधिरूपाणि रोमाणि दाति। छिनत्ति। भूम्यामोषधिवनस्पतिजातं यदस्ति तत्सर्वं दहतीति भावः॥ स्वस्रां। आमो नुडभावश्छांदसः। अस्थात्। लुङि गातिस्थेति सिचो लुक्। दाति। दाप् लवने। अदादित्वाच्छपो लुक्॥

पंचमीमृचमाह॥

श्वसित्यप्सु हंसो न सीदन् क्रत्वा चेतिष्ठो विशामुषर्भुत्।
सोमो न वेधा ऋतप्रजातः पशुर्न शिश्वा विभुर्दूरेभाः॥५॥
श्वसिति। अप्ऽसु। हंसः। न। सीदन्। क्रत्वा। चेतिष्ठः। विशां। उषःऽभुत्।
सोमः। न। वेधाः। ऋतऽप्रजातः। पशुः। न। शिश्वा। विऽभुः। दूरेऽभाः॥५॥

अयमग्निर्देवेभ्यः पलायितः सन्नप्सूदकेषु श्वसिति। प्राणिति। विगूढो वर्तत इत्यर्थः। तत्र दृष्टांतः। हंसो न सीदन्। उदकमध्य उपविशन्हंस इव। कीदृशोऽग्निः। क्रत्वा क्रतुना ज्ञानहेतुनात्मीयेन प्रकाशेन विशां प्रजानां चेतिष्ठः। अतिशयेन चेतयिता ज्ञापयिता। रात्रौ हि सर्वे जना अंधकारावृतं सर्वमग्नेः प्रकाशाज्जानंति। उषर्भुत्। उषस्युषःकालेऽग्निहोत्रादौ प्रबुद्धः। सोमो न वेधाः। सोम इव विधाता स्रष्टा। सोमो यथा सकलमोषधिरूपं भोग्यजातं सृजति। सोमो वा ओषधीनां राजेति श्रुतेः। तथा सकलं भोक्तृजातं सृजति। अग्नेरेव भोक्तृरूपेणावस्थानात्। तथा च तैत्तिरीयकं। अग्निरन्नादोऽन्नपतिरिति। वाजसनेयकेऽपि भोक्तृभोग्ययोरग्नीषोमात्मकत्वमाम्नातं। एतावद्वा इदमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नाद इति। ऋतप्रजातः। ऋतमित्युदकनाम। ऋतादुदकात्प्रादुर्भूतः पशुर्न शिश्वा। उदकमध्ये वर्तमानोऽग्निः शयानः पशुरिव तनूकृतः संकुचितगात्रोऽभूत्। ततः प्रादुर्भूतः सन्विभुः प्रभूतः संपन्नः। यद्वा शिश्वा शिशुना गर्भस्थेन वत्सेन सहिता गौरिव विभुः प्रभूतावयवो जात इत्यर्थः। दूरेभाः। दूरे विप्रकृष्टदेशेऽपि भाः प्रकाशो यस्य स तथोक्तः। एवंभूतोऽग्निरप्सु श्वसितीति पूर्वेण संबंधः॥ श्वसिति। श्वस प्राणने। अदादित्वाच्छपो लुक्। रुदादिभ्यः सार्वधातुके। पा० ७. २. ७६.। इतीडागमः। तिपः पित्त्वादनुदात्तत्वे

धातुस्वरः शिष्यते । क्त्वा । जसादिषु छंदसि वावचनमिति नाभावाभावः । उषसि बुध्यत इत्युषर्भुत् । बुध अवगमने । क्विप् चेति क्विप् । एकाचो बश इति भष्भावः । अहरादीनां पत्यादिषूपसंख्यानं । पा॰ ८. २. ७१. २. । इति मकारस्य रेफादेशः । शिश्वा । शो तनूकरणे । आदेच इत्यात्वं । शः कित्सन्वच्च । उ॰ १. २०. । इत्युप्रत्ययः । सन्वद्भावाद्द्विर्भावेत्वे । अत एव नित्त्वादाद्युदात्तत्वं । किद्भावादातो लोप इटि चेत्याकारलोपः । प्रथमपक्षे सुपां सुलुगिति सोराकारः । द्वितीये तु पूर्ववन्नाभावाभावः । दूरेभाः । तत्पुरुषे कृति बहुलमिति बहुव्रीहावपि बहुलवचनादलुक् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य पंचमे नवमो वर्गः ॥

रयिरिति दशर्चं द्वैपदमध्ययनतः पंचर्चं द्वितीयं सूक्तं पराशरस्यार्षमाग्नेयं । अनुक्रांतं च । रयिरिति । विनियोगो लैंगिकः ॥

तत्र प्रथमामृचमाह ॥

रयिर्न चित्रा सूरो न संदृगायुर्न प्राणो नित्यो न सूनुः ।
तक्वा न भूर्णिर्वना सिषक्ति पयो न धेनुः शुचिर्विभावा ॥ १ ॥
रयिः । न । चित्रा । सूरः । न । संऽदृक् । आयुः । न । प्राणः । नित्यः । न । सूनुः ।
तक्वा । न । भूर्णिः । वना । सिसक्ति । पयः । न । धेनुः । शुचिः । विभाऽवा ॥ १ ॥

अयमग्नी रयिर्न धनमिव चित्रा चायनीयो विचित्ररूपो वा । सूरो न सूर्य इव संदृक् संद्रष्टा सर्वेषां वस्तूनां दर्शयिता । आयुर्न प्राणः । आयुर्मुखे संचरन् प्राणः प्रश्वसन्वायुरिव प्रियतमः । यद्वा यथा प्राणवायुरायुर्जीवनमवस्थापयति । तथा चाम्नायते । यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुरिति । एवमग्निरपि जाठररूपेणायुषोऽवस्थापयिता । नित्यो न सूनुः । नित्यो ध्रुवः पुत्र इव प्रियकारी । यथौरसः पुत्रः पितुर्हितमेवाचरति तद्वदयमपि हितस्य स्वर्गस्य प्रापयिता । तथा चाम्नायते । पुत्रः पित्रे लोककृज्जातवेद इति । तक्वा न गतिमानश्व इव भूर्णिर्भर्ता । यथाश्व उपर्यारूढं पुरुषं बिभर्ति धारयति पोषयतीति वा तद्वदयमपीत्यर्थः । पयो न धेनुः । पय इव प्रीणयिता । शुचिर्दीप्तः । विभावा विशिष्टप्रकाशयुक्तः । एवंगुणविशिष्टोऽग्निर्वना वनान्यरण्यानि सिषक्ति । दग्धुं समवैति । सेवते वा ॥ चित्रा । सुपां सुलुगिति सोः पूर्वसवर्ण-

दीर्घत्वं। नित्यः। नेर्ध्रुवे। पा० ४.२.१०४.३.। इति त्यप्। प्रत्ययस्य पित्त्वादनुदात्तत्व उपसर्गस्वर एव शिष्यते। तक्वा। तक हसने। गतिकर्मसु पठितत्वादत्र गत्यर्थः। तकति गच्छतीति तक्वा। अन्येभ्योऽपि दृश्यंत इति वनिप्। भूर्णिः। घृणिपृश्निरित्यादौ भरतेर्निप्रत्ययांतो निपातितः॥

द्वितीयामृचमाह॥

दाधार क्षेममोको न रण्वो यवो न पक्वो जेता जनानां।

ऋषिर्न स्तुभ्वा विक्षु प्रशस्तो वाजी न प्रीतो वयो दधाति॥२॥

दाधार। क्षेमं। ओकः। न। रण्वः। यवः। न। पक्वः। जेता। जनानां।

ऋषिः। न। स्तुभ्वा। विक्षु। प्रऽशस्तः। वाजी। न। प्रीतः। वयः। दधाति॥२॥

अयमग्निः क्षेमं लब्धस्य धनस्य रक्षणं दाधार। धारयति। स्तोतृभ्यो दत्तस्य धनस्य रक्षणं कर्तुं शक्नोतीति भावः। ओको न। निवासस्थानं गृहमिव रण्वो रमणीयः। यद्वा गंतव्यः। गृहवत्सर्वैः प्राप्यत इत्यर्थः। यवो न यव इव पक्वः। यथा पक्वो यव उपभोगयोग्यो भवति तद्वदग्निरपि पाकादिकार्यहेतुतयोपभोग्य इत्यर्थः। जनानां जेता। शत्रुजनानां मध्येऽभिभविता। ऋषिर्न मंत्रद्रष्टा ऋषिरिव स्तुभ्वा देवानां स्तोता। विक्षु यजमानलक्षणेषु मनुष्येषु प्रशस्तः प्रख्यातः। वाजी न। अश्व इव प्रीतो हर्षयुक्तः। यथाश्वो हर्षयुक्तो युद्धाभिमुखं गच्छति तद्वदयमपि देवानां हविर्वहने हर्षयुक्तो भवतीत्यर्थः। एवंभूतोऽग्निर्वयोऽन्नं दधाति। दधातु। अस्मभ्यं ददात्वित्यर्थः। वय इत्यन्ननाम। वयः क्षद्मेति तन्नामसु पाठात्॥ दाधार। तुजादीनामित्यभ्यासस्य दीर्घत्वं। क्षेमं। क्षियति निवसत्यनेनेति क्षेमः। अर्तिस्तुस्वित्यादिना मन्। नित्त्वादाद्युदात्तत्वं। रण्वः। रवि धवि गत्यर्थाः। अस्मात्कर्मणि कप्रत्ययः। इदित्वान्नुम्। जेता। तृनंत आद्युदात्तः। जनानां। यतश्च निर्धारणं। पा० २.३.४१.। इति निर्धारणे षष्ठी। नेयं कर्मणि षष्ठी। न लोकाव्ययनिष्ठेति षष्ठीप्रतिषेधात्। स्तुभ्वा। स्तोभतिः स्तुतिकर्मा। अन्येभ्योऽपि दृश्यंत इति क्वनिप्॥

तृतीयामृचमाह॥

दुरोकशोचिः क्रतुर्न नित्यो जायेव योनावरं विश्वस्मै।

चित्रो यदभ्राट् श्वेतो न विक्षु रथो न रुक्मी त्वेषः समत्सु॥३॥

दुरोकऽशोचिः। क्रतुः। न। नित्यः। जायाऽइव। योनौ। अरं। विश्वस्मै।
चित्रः। यत्। अभ्राट्। श्वेतः। न। विक्षु। रथः। न। रुक्मी। त्वेषः। समत्ऽसु ॥ ३ ॥

दुरोकशोचिर्दुःप्रापतेजाः क्रतुर्न नित्यः। क्रतुः कर्मणां कर्ता। स इव ध्रुवः। यथा स कर्मसु ध्रुवोऽप्रमत्तः सन् जागर्ति तद्वदयमप्यग्निः कर्मसु रक्षसां दहने ध्रुवो जागर्तीत्यर्थः। योनौ गृहे वर्तमाना जायेव। योषिदिव। अग्निहोत्रादिगृहे वर्तमानो वह्निर्विश्वस्मै सर्वस्मै यष्टृजनायारमलं भूषणं भवति। यथा जायया गृहमलंकृतं भवति तद्वदग्निना यज्ञगृहमप्यलंकृतं सदृश्यत इत्यर्थः। चित्रश्चायनीयो विचित्रदीप्तिर्वा यद्यदायमग्निरभ्राट्। भ्राजते। तदानीं श्वेतो न शुभ्रवर्ण आदित्य इव भवति। रात्रौ ह्यहनि सूर्य इवाग्निः प्रकाशको भवति। विक्षु प्रजासु रथो न रथ इव रुक्मी सुवर्णवद्रोचमानदीप्तियुक्तः समत्सु संग्रामेषु त्वेषो दीप्तः। एवंभूतोऽग्निर्यदभ्राडिति पूर्वेणान्वयः ॥ दुरोकशोचिः। उच समवाये। ईषदुःसुष्विति कृच्छ्रार्थे खल्। बहुलवचनात्कुत्वं। लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं। दुरोकं शोचिस्तेजो यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। अरं। वालमूलेत्यादिना लकारस्य रेफादेशः। अभ्राट्। भ्राजृ दीप्तौ। लङि व्यत्ययेन परस्मैपदं। बहुलं छंदसीति शपो लुक्। व्रश्चादिषत्वे जश्त्वं। अडागम उदात्तः। यद्वृत्तयोगादनिघातः। समत्सु। समानं माद्यंत्येष्विति समदः संग्रामाः। औणादिकोऽधिकरणे क्विप्। समानस्य छंदसीति सभावः। यद्वा सम्यगत्ति भक्षयति वीराननिति समत्। संपूर्वादत्तेः क्विप् चेति क्विप् ॥

चतुर्थीमृचमाह ॥

सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत्त्वेषप्रतीका।
यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनां ॥ ४ ॥
सेनाऽइव। सृष्टा। अमं। दधाति। अस्तुः। न। दिद्युत्। त्वेषऽप्रतीका।
यमः। ह। जातः। यमः। जनिऽत्वं। जारः। कनीनां। पतिः। जनीनां ॥ ४ ॥

सृष्टा प्रेरिता सेनेव स्वामिना सह वर्तमाना भटसंहतिरिवायमग्निरमं शत्रूणां भयं दधाति। विदधाति। करोतीत्यर्थः। यद्वा सृष्टा सेनेवामं बलं दधाति। सा यथा बलवती तद्वदग्निरपि बलवानित्यर्थः। निदर्शनांतरमुच्यते। दिद्युदिति वज्रनाम। तेन चात्रेषुर्लक्ष्यते। त्वेषप्रतीका दीप्तमुखास्तुर्न दिद्युत्। क्षेप्तुः

संबंधिनीषुरिव । सा यथा भीषयते तद्वदग्निरपि राक्षसादीन् भीषयत इत्यर्थः । अत्र निरुक्तं । सेनेव सृष्टा भयं वा बलं वा दधात्यस्तुरिव दिद्युत्त्वेषप्रतीकेत्यादि । नि॰ १०. २१. । यच्छति ददाति स्तोतृभ्यः कामानिति यमोऽग्निरुच्यते । यद्वा । इंद्राग्न्योर्युगपदुत्पन्नत्वादग्नेर्यमत्वं । अस्मिन्नर्थे यास्केन मंत्रब्राह्मणे दर्शिते । यमो ह जात इंद्रेण सह संगतः । यमाविहेह मातरेत्यपि निगमो भवति । यो जात उत्पन्नो भूतसंघो यच्च जनित्वं जनयितव्यमुत्पत्स्यमानं भूतजातं तदुभयमपि यमो ह । अग्निरेव । सर्वेषां भावानामाहुतिद्वाराग्न्यधीनत्वात् । कनीनां कन्यकानां जारो जरयिता । यतो विवाहसमय अग्नौ लाजादिद्रव्येण होमे सति तासां कन्यात्वं निवर्तते । अतो जरयितेत्युच्यते । तथा जनीनां जायानां कृतविवाहानां पतिर्भर्ता । तथा चाख्यायते । अनुपजातपुरुषसंभोगेच्छावस्थां स्त्रियं सोमो लेभे । स च सोम ईषदुपजातभोगेच्छां तां विश्वावसवे गंधर्वाय प्रादात् । स च गंधर्वो विवाहसमयेऽग्नये प्रददौ । अग्निश्च मनुजाय भर्त्रे धनपुत्रैः सहितामिमां प्रायच्छदिति । इममर्थं काचिदृक् स्पष्टं ब्रूते । सोमो ददद्गंधर्वाय गंधर्वो ददद्ग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमामिति । यास्कस्त्वाह । तृतीयो अग्निष्टे पतिरित्यपि निगमो भवति । नि॰ १०. २१. । इति । यद्वा जनीनां पालयिता यतोऽयमनुष्ठितैर्यागैः फलं प्रयच्छति ॥ सेनेव । इनेन सह वर्तत इति सेना । वोपसर्जनस्येति सभावः । बहुव्रीहिस्वरः । जनित्वं । जनी प्रादुर्भावे । कृत्यार्थे तवैकेनिति कर्मणि त्वन्प्रत्ययः । इडागमः । नित्त्वादाद्युदात्तत्वं । जारः । जरयतीति जारः । दारजारौ कर्तरि णिलुक् चेति निपात्यते । कनीनां । कन्याशब्दात् षष्ठ्येकवचने बहुलं छंदसीति बहुलग्रहणात्संप्रसारणं । परपूर्वत्वं । जनीनां । जन्यंत आस्विति जनयः स्त्रियः । इन् सर्वधातुभ्य इतीन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं ॥

पंचमीमृचमाह ॥

तं वश्चराथा वयं वसत्यास्तं न गावो नक्षंत इद्धं ।
सिंधुर्न क्षोदः प्र नीचीरैनोन्नवंत गावः स्व१र्दृशीके ॥ ५ ॥

तं । वः । चराथा । वयं । वसत्या । अस्तं । न । गावः । नक्षंते । इद्धं ।
सिंधुः । न । क्षोदः । प्र । नीचीः । ऐनोत् । नवंत । गावः । स्वः । दृशीके ॥ ५ ॥

व इति व्यत्ययेन बहुवचनं । हे अग्ने तं त्वां चराथा । चरतीति चरथः

पशुः। तत्प्रभवैर्हृदयादिभिः साध्याहुतिरपि चरथेत्युच्यते। उपचारात्कार्ये कारणशब्दः। चराथा चरथया पशुप्रभवहृदयादिसाधनयाहुत्या। वसत्या। वसति निवसतीति स्थावरो व्रीह्यादिर्वसतिः। पूर्ववत्तत्साध्याहुतिर्लक्ष्यते। वसत्या पुरोडाशाद्याहुत्या च वयमिद्धं प्रदीप्तमग्निं नक्षंते। व्याप्नुयाम। पुरुषव्यत्ययः। तत्र दृष्टांतः। अस्तं न गावः। अस्तमिति गृहनाम। यथा गावो गृहं व्याप्नुवंति तद्वत्। अत्र यास्कः। तं वश्चराथा चरंत्या पश्वाहुत्या वसत्या च निवसंत्यौषधाहुत्यास्तं यथा गाव आप्नुवंति तथाप्नुयाम। नि० १०. २१.। इति। अयमग्निः सिंधुर्न क्षोदः स्यंदनशीलमुदकमिव नीचीर्नितरामंचतीरितस्ततो नितरामुद्गच्छंतीर्ज्वालाः प्रैनोत्। प्रेरयति। यथा जलप्रवाहो निम्नदेशे शीघ्रं गच्छति तद्वदग्नेर्ज्वाला दग्धव्यं प्रति गच्छंतीति भावः। स्वर्नभसि वर्तमाने दृशीके दर्शनीये तस्मिन्नग्नौ गावो गमनस्वभावा रश्मयो नवंत। संगच्छंते। नवतिर्गतिकर्मा॥ चराथा। चरेरौणादिकोऽथक्प्रत्ययः। दीर्घश्छांदसः। सुपां सुलुगिति विभक्तेराकारः। वसत्या। वहिवस्यर्तिभ्यश्चित्। उ० ४. ६१.। इत्यतिप्रत्ययः। उदात्तयण इति विभक्तेरुदात्तत्वं। अस्तं। अस्यतेऽस्मिन्सर्वमित्यस्तं गृहं। असिहसीत्यादिना तन्। तितुत्रेतीट्प्रतिषेधः। नित्त्वादाद्युदात्तत्वं। नक्षंते। नक्षतिर्व्याप्तिकर्मा। नक्ष गतौ। व्यत्ययेनात्मनेपदं। चादिलोपे विभाषेति निघाताभावः। नीचीः। निपूर्वादंचतेश्चोपसंख्यानमिति ङीप्। अच इत्यकारलोपे चाविति दीर्घत्वं। न्यधी च। पा० ६. २. ५३.। इति गतेः प्रकृतिस्वरत्वं। ऐनोत्। इण् गतौ। अंतर्भावितण्यर्थाच्छंदसि लुङ्लङ्लिट इति वर्तमाने लङि व्यत्ययेन श्नुः। आडागमो वृद्धिश्च। दृशीके। दृशिर् प्रेक्षणे। अनिदृशिभ्यां चेति कीकन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं॥

॥ इति प्रथमस्य पंचमे दशमो वर्गः॥

वनेष्विति द्वैपदं दशर्चमध्ययनतः पंचर्चं तृतीयं सूक्तं पराशरस्यार्षमाग्नेयं। वनेष्वित्यनुक्रांतं। विनियोगो लैंगिकः॥

तत्र प्रथमामृचमाह॥

वनेषु जायुर्मर्तेषु मित्रो वृणीते श्रुष्टिं राजेवाजुर्यं।

क्षेमो न साधुः क्रतुर्न भद्रो भुवत्स्वाधीर्होता हव्यवाट्॥ १॥

वनेषु। जायुः। मर्तेषु। मित्रः। वृणीते। श्रुष्टिं। राजाऽइव। अजुर्यं।
क्षेमः। न। साधुः। क्रतुः। न। भद्रः। भुवत्। सुऽआधीः। होता। हव्यऽवाट् ॥ १ ॥

वनेषु जायुररण्येषु जायमानो मर्तेषु मनुष्येषु मित्रः सखा सोऽयमग्निः श्रुष्टिं। श्वाश्वश्नुते कर्माणि व्याप्नोतीति श्रुष्टिर्यजमानः। क्षिप्रेण कर्मणामनुष्ठातेत्यर्थः। तथा च यास्कः। श्रुष्टीति क्षिप्रनामाशु अष्टीति। नि० ६.१२.। एवंभूतं यजमानं वृणीते। संभजते। अनेन प्रत्तं हविः स्वीकृत्य रक्षतीति भावः। तत्र दृष्टांतः। राजेवाजुर्यं। अजुर्यं जरारहितं दृढांगं सर्वकार्येषु शक्तमित्यर्थः। एवंभूतं पुरुषं यथा राजा वृणीते तद्वत्। क्षेमो न रक्षक इव साधुः साधयिता। क्रतुर्न। क्रतुः कर्मणां कर्ता। स इव भद्रो भजनीयः कल्याणो वा। होता देवानामाह्वाता हव्यवाट् हव्यवाहनो नाम देवानामग्निः। तथा चाम्नायते। त्रयो वा अग्नयो हव्यवाहनो देवानां कव्यवाहनः पितॄणां सहरक्षा असुराणामिति। एवंभूतोऽग्निः स्वाधीः शोभनकर्मा शोभनध्यानो वा भुवत्। भवतु ॥ जायुः। जि जये। कृवापाजीत्युण्। अजुर्यं। जूष् वयोहानौ। भावे ण्यत्। वृद्धौ कृतायामाकारस्य व्यत्ययेनोकारः। जुर्यं जरा नास्त्यस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। भुवत्। भवतेर्लेट्यडागमः। बहुलं छंदसीति विकरणस्य लुक्। भूसुवोस्तिङीति गुणप्रतिषेधः ॥

द्वितीयामृचमाह ॥

हस्ते दधानो नृम्णा विश्वान्यमे देवान्धाद्गुहा निषीदन्।
विदंतीमत्र नरो धियंधा हृदा यत्तष्टान्मंत्राँ अशंसन् ॥ २ ॥

हस्ते। दधानः। नृम्णा। विश्वानि। अमे। देवान्। धात्। गुहा। निऽसीदन्।
विदंति। ईं। अत्र। नरः। धियंऽधाः। हृदा। यत्। तष्टान्। मंत्रान्। अशंसन् ॥ २ ॥

विश्वानि सर्वाणि नृम्णा नृम्णानि हविर्लक्षणानि धनानि हस्ते स्वकीये बाहौ दधानो धारयन्नयमग्निर्गुहा गुहायामप्सु मध्येऽश्वत्थादौ वा संवृतप्रदेशे निषीदन् निगूढो वर्तमानः सन्नमे भये देवान्धात्। अस्थापयत्। अग्नौ हविर्भिः सह पलायिते सति सर्वे देवा अभैषुरित्यर्थः। नरो नेतारो धियंधाः कर्मणां बुद्धीनां वा धारयितारो देवा अत्रास्मिन्काल ईमेनमग्निं विदंति। जानंति। यद्यदा हृदा हृदयावस्थितया बुद्ध्या तष्टान्निर्मितानग्निस्तुतिपरान्मंत्रानशंसन्।

अस्तुवन्। अवोचन्नित्यर्थः ॥ निषीदन्। सदेरप्रतेरिति षत्वं। विदंति। विद ज्ञाने। अदादित्वाच्छपो लुक्। प्रत्ययस्वरः। धियंधाः। आतोऽनुपसर्गे क इति कः। तत्पुरुषे कृते बहुलमिति बहुलवचनाद्द्वितीयाया अप्यलुक्। तष्टान्। तक्षु त्वक्षु तनूकरणे। निष्ठा। यस्य विभाषेतीट्प्रतिषेधः। स्कोः संयोगाद्योरिति कलोपः ॥

तृतीयामृचमाह ॥

अजो न क्षां दाधार पृथिवीं तस्तंभ द्यां मंत्रेभिः सत्यैः।
प्रिया पदानि पश्वो नि पाहि विश्वायुरग्ने गुहा गुहं गाः ॥ ३ ॥

अजः। न। क्षां। दाधार। पृथिवीं। तस्तंभ। द्यां। मंत्रेभिः। सत्यैः।
प्रिया। पदानि। पश्वः। नि। पाहि। विश्वऽआयुः। अग्ने। गुहा। गुहं। गाः ॥ ३ ॥

अजो न। अजति गच्छतीत्यजः सूर्यः। यद्वा न जायत इत्यजः। जन्मरहित इत्यर्थः। स इव क्षां। क्षेति पृथिवीनाम। क्षां भूमिं दाधार। अयमग्निः प्रकाशकत्वेन धारयति। पृथिवीत्यंतरिक्षनाम। पृथिवीमंतरिक्षं च धारयतीत्येव। द्यां द्युलोकं सत्यैरवितथार्थैर्मंत्रेभिर्मंत्रैस्तस्तंभ। स्तभ्नाति। यथाधो न पतति। उपर्येव तिष्ठति तथा करोतीत्यर्थः। मंत्रैर्दिवो धारणं तैत्तिरीये समाम्नातं। देवा वा आदित्यस्य स्वर्गलोकस्य पराचोऽतिपाताद्बिभयुः। तं छंदोभिरदृहन्धृत्या इति। यद्वा सत्यैर्मंत्रैः स्तूयमानोऽग्निर्द्यां तस्तंभेति। हे अग्ने विश्वायुः। विश्वं सर्वमायुरन्नं यस्य स त्वं पश्वः पशोः प्रिया प्रियाणि पदानि शोभनतृणोदकोपेतानि स्थानानि निपाहि। नितरां पालय। मा धाक्षीरित्यर्थः। तर्हि कुत्र निवसामीति चेत् तत्राह। गुहा गुहाया अपि गुहं गुहां गवां संचारायोग्यस्थानं गाः। गच्छ। तत्रैव निवसेत्यर्थः ॥ पश्वः। जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणाभावे यणादेशः। उदात्तयण इति विभक्तेरुदात्तत्वं। गुहा। सुपां सुलुगिति पंचम्या आजादेशः। चित्त्वादंतोदात्तत्वं। गुहं। व्यत्ययेन ह्रस्वत्वं। गाः। छांदसो लुङ्। इणो गा लुङीति गादेशः ॥

चतुर्थीमृचमाह ॥

य ईं चिकेत गुहा भवंतमा यः ससाद धारामृतस्य।
वि ये चृतंत्यृता सपंत आदिद्वसूनि प्र ववाचास्मै ॥ ४ ॥

यः । ई॒म् । चि॒केत॑ । गुहा॑ । भव॑न्तम् । आ । यः । स॒साद॑ । धारा॑म् । ऋ॒तस्य॑ ।
वि । ये । चृ॒तन्ति॑ । ऋ॒ता । सप॑न्तः । आत् । इत् । वसू॑नि । प्र । व॒वा॒च॒ । अ॒स्मै॒ ॥ ४ ॥

यः पुमान् ईमेनं गुहा भवंतं गुहायां संतमग्निं चिकेत । जानाति । यश्च ऋतस्य सत्यस्य यज्ञस्य वा धारयितारमेनमग्निमाससाद । आसीदति । उपास्त इत्यर्थः । ये च ऋता ऋतानि सत्यानि यज्ञान्वा सपंतः समवयंतः स्पृशंतो वा पुरुषा एतमग्निं विचृतंति । अग्निमुद्दिश्य स्तुतीर्ग्रंथंति । कुर्वंतीत्यर्थः । आदित् स्तुत्यनंतरमेवास्मै सर्वस्मै स्तोतृजनाय वसूनि धनानि प्रववाच । प्रकथयति ॥ चिकेत । कित ज्ञाने । लिटि णलि लित्स्वरः । चृतंति । चृती हिंसाग्रथनयोः । तौदादिकः । लसार्वधातुकानुदात्तत्वे विकरणस्वरः शिष्यते । ववाच । लिटि ब्रुवो वचिः । लिट्यभ्यासस्योभयेषामित्यभ्यासस्य संप्रसारणं । संप्रसारणाच्चेति परपूर्वत्वस्य वा छंदसि । पा० ६. १. १०८. १. । इति विकल्पनाद्यणादेशः ॥

पंचमीमृचमाह ॥

वि यो वी॒रुत्सु॒ रोध॑न्महि॒त्वोत प्र॒जा उ॒त प्र॒सूष्व॒न्तः ।
चित्ति॑र॒पां दमे॑ वि॒श्वायुः॒ सद्मे॑व॒ धीराः॑ सं॒माय॑ चक्रुः ॥ ५ ॥
वि । यः । वी॒रुत्ऽसु॑ । रोध॑त् । म॒हि॒ऽत्वा । उ॒त । प्र॒ऽजाः । उ॒त । प्र॒ऽसूषु॑ । अ॒न्तरिति॑ ।
चित्तिः॑ । अ॒पाम् । दमे॑ । वि॒श्वऽआ॑युः । सद्म॑ऽइव । धीराः॑ । स॒म्ऽमाय॑ । च॒क्रुः॒ ॥ ५ ॥

योऽग्निर्वीरुत्स्वोषधीषु महित्वा यानि महत्त्वानि संति तानि विरोधत् । विरुणद्धि । विशेषेणावृणोति । नावशेषयति । उत अपि च प्रजाः प्रकर्षेणोत्पन्नाः पुष्पफलादिलक्षणाः प्रसूषूत्पादयित्रीषु मातृस्थानीयास्वोषधीष्वंतर्मध्ये विरुणद्धीत्येव । द्वितीय उतशब्दः पादपूरणः । तथा चित्तिश्चेतयिता ज्ञापयितापां दमे जलानां मध्यभूते गृहे विश्वायुः सर्वान्नो योऽग्निर्वर्तत इति शेषः । तमग्निं धीरा मेधाविनः संमाय संमाननं पूजनं कृत्वा । स्तुतिभिः स्तुत्वेत्यर्थः । चक्रुः । कर्माणि कुर्वंति । तत्र दृष्टांतः । सद्मेव । यथा सदनं गृहं प्रथमतः संपूज्य पश्चात्तत्र कर्माण्याचरंति तद्वत् ॥ वीरुत्सु । विपूर्वाद्रोहतेः क्विप् । न्यंक्वादिषु वीरुध् इति पठितत्वादुपसर्गस्य दीर्घो धकारश्चांतादेशः । उक्तं च । वीरुध ओषधयो भवंति । रोधत् । रुधिर् आवरणे । लेट्यडागमः । इतश्च लोप इतीकार-

लोपः। संमाय। माङ् माने शब्दे च। समासेऽनञ्पूर्वे क्त्वो ल्यप्। पा० ७. १. ३७. । न ल्यपि। पा० ६. ४. ६९. । इतीत्वप्रतिषेधः ॥

॥ इति प्रथमस्य पंचम एकादशो वर्गः ॥

श्रीणन्निति द्विपदं दशर्चं चतुर्थं सूक्तं। तत्राध्ययनतः पंचर्चं। ऋष्याद्याः पूर्ववत्। विनियोगो लैंगिकः ॥

तत्र प्रथमामृचमाह ॥

श्रीणन्नुप स्थाद्दिवं भुरण्युः स्थातुश्चरथमक्तून्व्यूर्णोत्।
परि यदेषामेको विश्वेषां भुवद्देवो देवानां महित्वा ॥ १ ॥

श्रीणन्। उप। स्थात्। दिवं। भुरण्युः। स्थातुः। चरथं। अक्तून्। वि। ऊर्णोत्।
परि। यत्। एषां। एकः। विश्वेषां। भुवत्। देवः। देवानां। महिऽत्वा ॥ १ ॥

भुरण्युर्हविषां भर्ता धारयिता पयःप्रभृतिना श्रयणद्रव्येण सोममिव तैर्हविर्भिः श्रीणन् मिश्रयन्दिवमुपस्थात्। उपतिष्ठति। प्राप्नोतीत्यर्थः। स्थातुः स्थावरं चरथं जंगमं तदुभयात्मकं जगदक्तून् सर्वा रात्रीश्च व्यूर्णोत्। स्वतेजसा विशेषेणाच्छादयति। हविर्वहनं कुर्वन्सर्वमपि जगत्स्वभासा प्रकाशयति स्मेति भावः। विश्वेषां सर्वेषां देवानां दानादिगुणयुक्तानामिंद्रादीनां मध्ये देवो द्योतमानः। एक एवायमग्निरेषां पूर्वोक्तानां स्थावरादीनां महित्वा महत्त्वानि माहात्म्यानि यद्यस्मात्परिभुवत्। परिभवति। परिगृह्णाति। परितो व्याप्य वर्तते। परिपूर्वो भवतिः परिग्रहार्थः। यद्वा। एषां विश्वेषां स्थावरादीनां मध्ये वर्तमानोऽयं देवोऽग्निर्देवानां महत्त्वानि यद्यदा परिभुवत्। परितो व्याप्नोति। तदानीमिति पूर्वत्रान्वयः ॥ ऊर्णोत्। ऊर्णुञ् आच्छादने। ऊर्णोतेर्विभाषा। पा० ७. २. ६. । इति वृद्धेर्विकल्पः ॥

द्वितीयामृचमाह ॥

आदित्ते विश्वे क्रतुं जुषंत शुष्काद्यद्देव जीवो जनिष्ठाः।
भजंत विश्वे देवत्वं नाम ऋतं सपंतो अमृतमेवैः ॥ २ ॥

आत्। इत्। ते। विश्वे। क्रतुं। जुषंत। शुष्कात्। यत्। देव। जीवः। जनिष्ठाः।
भजंत। विश्वे। देवऽत्वं। नाम। ऋतं। सपंतः। अमृतं। एवैः ॥ २ ॥

हे देव द्योतमानाग्ने जीवो जीवन्प्रज्वलन् शुष्कान्नीरसादरणिरूपात्काष्ठाद्यद्यदा जनिष्ठाः। प्रादुर्भवसि। मथनेनोत्पद्यसे। आदित् अनंतरमेव विश्वे सर्वे यजमानास्ते तुभ्यं क्रतुं कर्म जुषंत। सेवंते। अनुतिष्ठंति। तथानुष्ठाय च विश्वे ते सर्वे नाम नामकममृतमवितथं देवत्वं देवतात्वं भजंत। भजंते प्राप्नुवंति। किं कुर्वंतः। अमृतममरणं त्वामेवैस्त्वां गंतृभिः स्तोत्रैः सपंतः समवयंतः प्राप्नुवंत इत्यर्थः॥ जुषंतेत्यादीनि त्रीण्याख्यातानि छंदसि लुङ्लङ्लिट इति वर्तमानार्थानि। एवैः। यंति स्तोतव्याभिमुख्येन गच्छंतीत्येवानि स्तोत्राणि। इणशीङ्भ्यां वन्॥

तृतीयामृचमाह॥

ऋतस्य प्रेषा ऋतस्य धीतिर्विश्वायुर्विश्वे अपांसि चक्रुः।
यस्तुभ्यं दाशाद्यो वा ते शिक्षात्तस्मै चिकित्वान्रयिं दयस्व॥ ३॥

ऋतस्य। प्रेषाः। ऋतस्य। धीतिः। विश्वऽआयुः। विश्वे। अपांसि। चक्रुः।
यः। तुभ्यं। दाशात्। यः। वा। ते। शिक्षात्। तस्मै। चिकित्वान्। रयिं। दयस्व॥ ३॥

ऋतस्य गतस्य देवयजनं प्राप्तस्याग्नेः प्रेषाः प्रकर्षेणेष्यमाणाः स्तुतयः क्रियंते। धीतिः। धीयते सोमः पीयतेऽस्मिन्निति धीतिर्यागः। सोऽपि ऋतस्य देवयजनदेशं प्राप्तस्याग्नेरेव क्रियते। अतः सोऽग्निर्विश्वायुः। विश्वं सर्वमायुरन्नं यस्य स तथाविधो भवति। अपि चास्मै विश्वे सर्वे यजमाना अपांसि दर्शपूर्णमासादीनि कर्माणि चक्रुः। कुर्वंति। हे अग्ने तुभ्यं यो दाशात्। चरुपुरोडाशादीनि हवींषि ददाति। यो वान्योऽपि यो यजमानस्ते शिक्षात्। त्वदीयं कर्म कर्तुं शक्तो भूयासमितीच्छति। उभयविधाय तस्मै यजमानाय चिकित्वान् तत्कृतमनुष्ठानं जानंस्त्वं रयिं दयस्व। धनं देहि॥ दाशात्। दाशृ दाने। लेट्याडागमः। शिक्षात्। शक्लृ शक्तौ। इच्छार्थे सन्। सनि मीमाघुरभलभशकेत्यकारस्येसादेशः। अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः। स्कोः संयोगाद्योरितीसः सलोपः। पूर्ववल्लेट्याडागमः। चिकित्वान्। कित ज्ञाने। लिटः क्वसुः। दयस्व। दय दानगतिरक्षणहिंसादानेषु॥

चतुर्थीमृचमाह॥

होता निषत्तो मनोरपत्ये स चिन्न्वासां पती रयीणां।
इच्छंत रेतो मिथस्तनूषु सं जानत स्वैर्दक्षैरमूराः॥ ४॥

होता। निऽसत्तः। मनोः। अपत्ये। सः। चित्। नु। आसां। पतिः। रयीणां।
इच्छंत। रेतः। मिथः। तनूषु। सं। जानत। स्वैः। दक्षैः। अमूराः ॥ ४ ॥

हे अग्ने त्वं मनोरपत्ये यजमानस्वरूपायां प्रजायां होता देवानामाह्वाता सन् निषत्तो निषण्णः। मानव्यो हि प्रजा इति हि ब्राह्मणं। स चिन्नु स एव त्वमासां प्रजानां रयीणां गवादीनां धनानामपि पतिः स्वामी। अतस्ताः प्रजास्तनूष्वात्मीयेषु शरीरेषु मिथः संसृष्टमेकीभूतं पुत्ररूपेण परिणतं रेतो वीर्यमिच्छंत। ऐच्छन्। त्वदनुग्रहेण पुत्रमलभंतेति यावत्। लब्धपुत्राश्च ताः प्रजा अमूरा अमूढाः सत्यः स्वैः स्वकीयैर्दक्षैः समर्थैः पुत्रैः सह संजानत। सम्यक् अवगच्छंति। चिरकालं जीवंतीत्यर्थः। यद्वा दक्षशब्दः प्राणवाची। प्राणो वै दक्षोऽपानः क्रतुरिति श्रुतेः। स्वैर्दक्षैः स्वकीयैः प्राणैरमूराः संगतास्त्वय्येव सर्वं जानंति ॥ इच्छंत। व्यत्ययेनात्मनेपदं। जानत। छांदसो लङ्। ज्ञस्यादादेशे श्नाभ्यस्तयोरात इत्याकारलोपः। अमूरा। मूरा अमूरेत्यत्र यास्क एवं व्याचख्यौ। मूढा वयं स्मोऽमूढस्त्वमसि। नि० ६. ८.। इति। अतोऽत्राप्यमूरशब्देनामूढत्वमुच्यते। वर्णव्यापत्त्या ढकारस्य रेफः। यद्वा मुर्छा मोहसमुच्छ्राययोः। अस्मात्संपदादिलक्षणो भावे क्विप्। राल्लोप इति छलोपः। रो मत्वर्थीयः। न मूरा अमूराः। अथवा। अम गत्यादिषु। अस्मादौणादिक ऊरन्प्रत्ययः ॥

पंचमीमृचमाह ॥

पितुर्न पुत्राः क्रतुं जुषंत श्रोषन्ये अस्य शासं तुरासः।
वि राय और्णोद्दुरः पुरुक्षुः पिपेश नाकं स्तृभिर्दमूनाः ॥ ५ ॥

पितुः। न। पुत्राः। क्रतुं। जुषंत। श्रोषन्। ये। अस्य। शासं। तुरासः।
वि। रायः। और्णोत्। दुरः। पुरुऽक्षुः। पिपेश। नाकं। स्तृभिः। दमूनाः ॥ ५ ॥

अस्याग्नेः शासं शासनं तुरासस्त्वरमाणाः संतो ये यजमानाः श्रोषन्। शृण्वंति। ते सर्वे तेनानुशिष्टं क्रतुं कर्म जुषंत। सेवंते। तत्र दृष्टांतः। पितुर्न पुत्राः। यथा पुत्राः पुरु बहुलं त्रायकाः पुन्नाम्नो नरकाद्वा रक्षकास्तनयाः पितुराज्ञां कुर्वंति तद्वत्। पुत्रः पुरु त्रायते निपरणाद्वा पुं नरकं ततस्त्रायत इति वा। नि० २. ११.। इति यास्कः। पुरुक्षुः। क्षु इत्यन्ननाम। बह्वन्नः सोऽग्निरेषां यजमानानां दुरो द्वाराणि यज्ञस्य द्वारभूतानि रायो धनानि व्यौर्णोत्। विवृणोति

प्रकाशयति ददातीति यावत्। अपि च दमूना दमे यज्ञगृहे मनो यस्य सोऽग्निः। नास्मिन्नकं दुःखमस्तीति नाको द्युलोकः। तं। स्तृभिरिति नक्षत्रनाम। स्तृभिर्नक्षत्रैः पिपेश। अवयवीचकार। नक्षत्रैर्युक्तमकरोदित्यर्थः॥ श्रोषन्। श्रु श्रवणे। लेट्यडागमः। सिब्बहुलं लेटीति सिप्। बहुलं छंदसीति विकरणस्य लुक्। इतश्च लोप इतीकारलोपः। संयोगांतस्य लोपः। पिपेश। पिश अवयवे॥

॥ इति प्रथमस्य पंचमे द्वादशो वर्गः॥

शुक्र इति द्वैपदं दशर्चमध्ययनतः पंचर्चं पंचमं सूक्तं पराशरस्यार्षमाग्नेयं। शुक्र इत्यनुक्रांतं। विनियोगो लैंगिकः॥

तत्र प्रथमामृचमाह॥

शुक्रः शुशुक्वाँ उषो न जारः पप्रा समीची दिवो न ज्योतिः।
परि प्रजातः क्रत्वा बभूथ भुवो देवानां पिता पुत्रः सन्॥ १॥

शुक्रः। शुशुक्वान्। उषः। न। जारः। पप्रा। समीची इति संऽईची। दिवः। न। ज्योतिः।
परि। प्रऽजातः। क्रत्वा। बभूथ। भुवः। देवानां। पिता। पुत्रः। सन्॥ १॥

शुक्रः शुभ्रवर्णोऽयमग्निरुषो न जारः। उषसो जरयिता सूर्य इव शुशुक्वान् शोचयिता सर्वस्य प्रकाशयिता भवति। तथा समीची संगते द्यावापृथिव्यौ दिवो न ज्योतिर्द्योतमानस्य सूर्यस्य ज्योतिरिव पप्रा। स्वतेजसा पूरयिता। हे अग्ने। अतस्त्वं प्रजातः प्रादुर्भूतः सन् क्रत्वा कर्मणा यद्वा ज्ञानहेतुना प्रकाशेनोक्तप्रकारेण सर्वं जगत्परिबभूथ। परितो व्याप्नोषि। दीव्यंतीति देवा ऋत्विजः। तेषां पुत्रः सन् पुन्नाम्नो नरकात्त्रायकः सन् पिता भुवः। पालयिता भवसि। यद्वा देवानामिंद्रादीनामेव पुत्रः सन् पुत्र इव दूतो भूत्वा पिता हविर्भिः पालयिता भवसि॥ शुशुक्वान्। शुच दीप्तौ। लिटः क्वसुः। व्यत्ययेन कुत्वं। पप्रा। पॄ पालनपूरणयोरित्यस्माद्दृगमहनजन इति किप्रत्ययः। सुपां सुलुगिति सोडादेशः। समीची। संपूर्वादंचतेर्ऋत्विगित्यादिना क्विन्। समः समि। पा० ६. ३. ९३.। इति सम्यादेशः। अंचतेश्चेति वक्तव्यमिति ङीप्। अच इत्यकारलोपे चाविति दीर्घत्वं। उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वं। वा छंदसीति पूर्वसवर्णदीर्घत्वं। यदि तु संऽईची इति पदविभागः क्रियते। तर्ह्युद ईत्। पा० ६. ४. १३९.।

इति विधीयमानमीत्वं सम उत्तरस्यापि द्रष्टव्यं। बभूथ। बभूथाततंथ। पा० ७.२.६४.। इति निपातनादिडभावः ॥

द्वितीयामृचमाह ॥

वेधा अदृप्तो अग्निर्विजानन्नूधर्न गोनां स्वाद्मा पितूनां।
जने न शेवं आहूर्यः सन्मध्ये निषत्तो रण्वो दुरोणे ॥ २ ॥

वेधाः। अदृप्तः। अग्निः। विऽजानन्। ऊधः। न। गोनां। स्वाद्म। पितूनां।
जने। न। शेवः। आऽहूर्यः। सन्। मध्ये। निऽसत्तः। रण्वः। दुरोणे ॥ २ ॥

वेधाः। मेधाविनामैतत्। मेधावी यद्वा विधाता सर्वस्य कर्तादृप्तो दर्परहितो विजानन् कर्तव्याकर्तव्यविभागं जानन्नग्निर्गोनां गवामूधर्न गोसंबंधिपयस आश्रयभूतं स्थानमिव पितूनामन्नानां स्वाद्म स्वादयिता रसयिता। यथा गोरूधः पयःप्रदानेन सर्वाण्यन्नानि स्वादूनि करोति तद्वदग्निरपि सम्यक्पाकेन सर्वाण्यन्नानि स्वादूनि करोतीत्यर्थः। अपि च। एवंभूतोऽग्निर्जने न शेवः। जनपदे लोकसुखकरः पुरुष इव मध्ये यज्ञेषु मध्य आहूर्य आह्वातव्यः सन् दुरोणे यज्ञगृहे निषत्तो निषण्णो रण्वो रमयिता स्तुत्यो वा भवति ॥ गोनां। गोः पादांते। पा० ७.१.५७.। इत्यपादांतेऽपि नुट्। स्वाद्मा। स्वद आस्वादने। अंतर्भावितण्यर्थादन्येभ्योऽपि दृश्यंत इति मनिन्। सुपां सुलुगिति सोर्लुक्। पितूनां। नामन्यतरस्यामिति नाम उदात्तत्वं। आहूर्यः। आङ्पूर्वात् ह्वयतेरचो यदिति यत्। बहुलं छंदसीति संप्रसारणं। हल इति दीर्घः। रेफोपजनश्छांदसः। यतोऽनाव इत्याद्युदात्तत्वं ॥

तृतीयामृचमाह ॥

पुत्रो न जातो रण्वो दुरोणे वाजी न प्रीतो विशो वि तारीत्।
विशो यदह्वे नृभिः सनीळा अग्निर्देवत्वा विश्वान्यश्याः ॥ ३ ॥

पुत्रः। न। जातः। रण्वः। दुरोणे। वाजी। न। प्रीतः। विशः। वि। तारीत्।
विशः। यत्। अह्वे। नृऽभिः। सऽनीळाः। अग्निः। देवऽत्वा। विश्वानि। अश्याः ॥ ३ ॥

पुत्रो न पुत्र इव जातः प्रादुर्भूतोऽग्निर्दुरोणे गृहे रण्वो रमयिता भवति। वाजीव। अश्व इव प्रीतो हर्षयुक्तः सन्विशः संग्रामे वर्तमानाः शत्रुभूताः प्रजा वितारीत्। विशेषेण तरति। अतिक्रामति। अपि च नृभिर्ऋत्विग्लक्षणैर्मनुष्यैः

सहितोऽहं सनीळाः समाननिवासस्थाना विशो दैवीः प्रजा यद्यदाह्वे। आह्वयामि। तदानीमयमग्निर्विश्वानि सर्वाणि देवत्वा देवत्वान्यश्याः। अश्नुते प्राप्नोति। स्वयमेव तत्तद्देवतारूपो भवतीत्यर्थः। तथा च मंत्रांतरमाम्नास्यते। त्वमग्ने वरुणो जायसे यत्त्वं मित्रो भवसि यत्समिद्ध इत्यादि॥ अश्याः। अशू व्याप्तौ। लिङि व्यत्ययेन परस्मैपदमध्यमौ। बहुलं छंदसीति विकरणस्य लुक्॥

चतुर्थीमृचमाह॥

नकिष्ट एता व्रता मिनंति नृभ्यो यदेभ्यः श्रुष्टिं चकर्थ।
तत्तु ते दंसो यदहन्त्समानैर्नृभिर्यद्युक्तो विवे रपांसि॥४॥

नकिः। ते। एता। व्रता। मिनंति। नृऽभ्यः। यत्। एभ्यः। श्रुष्टिं। चकर्थ।
तत्। तु। ते। दंसः। यत्। अहन्। समानैः। नृऽभिः। यत्। युक्तः। विवेः। रपांसि॥४॥

हे अग्ने ते तव संबंधीन्येता व्रता। एतानि परिदृश्यमानानि दर्शपूर्णमासादीनि कर्माणि नकिर्मिनंति। राक्षसादयो बाधका न हिंसंति। यद्यस्मात्त्वमेभ्यः कर्मसु वर्तमानेभ्यो नृभ्यो यज्ञस्य नेतृभ्यो यजमानेभ्यः श्रुष्टिं। श्वाश्वश्नुते व्याप्नोतीति श्रुष्टिर्यज्ञफलरूपं सुखं। तच्चकर्थ। कृतवानसि। सति हि तव व्रतानां बाधक एतन्नोपपद्यते। अतोऽवगम्यते तव व्रतानां हिंसका न संतीति। हे अग्ने ते त्वदीयं तत्तु दंसस्तदेव कर्म यद्यदि राक्षसादिरहन्। हंति नाशयति। तदानीं समानैः सप्तगणरूपेण सदृशैर्नृभिर्नेतृभिर्मरुद्भिः युक्तस्त्वं रपांसि बाधकानि राक्षसादीनि यद्यस्मात्त्वं विवेः। गमयसि पलायनं प्रापयसि। तत्तस्मात्तव व्रतानि न हिंसंतीति योज्यं॥ मिनंति। मीञ् हिंसायां। क्र्यादिकः। प्वादीनां ह्रस्व इति ह्रस्वत्वं। विवेः। छंदसि लुङ्लङ्लिट इति वर्तमाने लङ्। वी गत्यादिषु। सिप्यदादित्वाच्छपो लुकि प्राप्ते बहुलं छंदसीति शपः श्लुः॥

पंचमीमृचमाह॥

उषो न जारो विभावोस्रः संज्ञातरूपश्चिकेतदस्मै।
त्मना वहंतो दुरो व्यृण्वन्नवंत विश्वे स्व१र्दृशीके॥५॥

उषः। न। जारः। विभाऽवा। उस्रः। संज्ञातऽरूपः। चिकेतत्। अस्मै।
त्मना। वहंतः। दुरः। वि। ऋण्वन्। नवंत। विश्वे। स्वः। दृशीके॥५॥

उषो न जारः। उषसो जरयितादित्य इव विभावा विशिष्टप्रकाशयुक्त उस्रो निवासयिता संज्ञातरूपः सर्वैः प्राणिभिरवगतस्वरूपः। देवतांतरवदप्रत्यक्षो न भवतीत्यर्थः। एवंभूतोऽग्निरस्मै यजमानाय चिकेतत्। जानातु। अभिमतफलं ददात्वित्यर्थः। यद्वा विभक्तिव्यत्ययः। अस्मा इदं सूक्तरूपं स्तोत्रं चिकेतत्। जानातु। तथास्य रश्मयस्त्मनात्मनैव स्वयमेव वहंतो हविर्वहनं कुर्वंतो दुरो यज्ञगृहद्वाराणि व्यृण्वन्। विशेषेण गच्छंति। व्याप्नुवंतीत्यर्थः। तदनंतरं दृशीके दर्शनीये स्वर्नभसि विश्वे सर्वे ते रश्मयो नवंत। गच्छंति। नवतिर्गतिकर्मा। देवान्प्राप्नुवंतीत्यर्थः॥ उस्रः। वस निवासे। स्फायितंचीत्यादिना रक्। यजादित्वात्संप्रसारणं। चिकेतत्। कित ज्ञाने। जौहोत्यादिकः। लेट्यडागमः। बहुलं छंदसीति वक्तव्यं। पा॰ ७.३.८७.२.। इति वचनान्नाभ्यस्तस्याचि पितीति लघूपधगुणप्रतिषेधाभावः। अभ्यस्तानामादिरित्याद्युदात्तत्वं। ऋण्वन्। इवि रिवि धिवि गत्यर्थाः। इदित्वान्नुम्। छांदसो लङ्। व्यत्ययेन रेफस्य संप्रसारणं। यद्वा ऋणु गतौ। तनोत्यादिः॥

॥ इति प्रथमस्य पंचमे त्रयोदशो वर्गः॥

वनेमेति द्विपदमेकादशर्चमध्ययनतः षड्चं षष्ठं सूक्तं। ऋष्याद्याः पूर्ववत्। अनुक्रांतं च। वनेमैकादशेति। विनियोगो लैंगिकः॥

तत्र प्रथमामृचमाह॥

वनेम पूर्वीरर्यो मनीषा अग्निः सुशोको विश्वान्यश्याः।
आ दैव्यानि व्रता चिकित्वाना मानुषस्य जनस्य जन्म॥ १॥
वनेम। पूर्वीः। अर्यः। मनीषा। अग्निः। सुऽशोकः। विश्वानि। अश्याः।
आ। दैव्यानि। व्रता। चिकित्वान्। आ। मानुषस्य। जनस्य। जन्म॥ १॥

पूर्वीः प्रभूता इषोऽन्नानि वनेम। संभजेमहि। अग्निस्तादृशान्यन्नानि ददात्वित्यर्थः। मनीषा। मनीषया बुद्ध्यार्यो गंतव्यः प्राप्तव्यः। यद्वा मनीषयार्यः स्वामी। सुशोकः शोभनदीप्तिः। एवंभूतोऽग्निर्विश्वानि सर्वाणि कर्माण्यश्याः। अश्नुते व्याप्नोति। किं कुर्वन्। दैव्यानि देवेषु भवानि व्रता व्रतानि कर्माणि चिकित्वान् आ। समंताज्जानन्। तथा मानुषस्य जनस्य मनुष्यजातस्य जन्मोत्पत्तिरूपं कर्म चिकित्वान्। आभिमुख्येन जानन्। द्यावापृथिव्योः संबंधीनि यानि

कर्माणि तानि सर्वाण्यवगच्छन् अवगत्य व्याप्नोतीत्यर्थः ॥ वनेम । वन षण संभक्तौ। शपि प्राप्ते व्यत्ययेन शः। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः शिष्यते। पूर्वीः। पुरुशब्दाद्वोतो गुणवचनादिति ङीष्। हलि चेति दीर्घः। मनीषा। ईषा अक्षादित्वात्प्रकृतिभावः। सुशोकः। शुच दीप्तौ। भावे घञ्। चजोः कु घिण्यतोरिति कुत्वं। शोभनः शोको यस्य। आद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं। अश्याः। देवत्ता विश्वान्यश्या इतिवत्। चिकित्वान्। कित ज्ञाने। लिटः क्वसुः ॥

द्वितीयामृचमाह ॥

गर्भो यो अपां गर्भो वनानां गर्भश्च स्थातां गर्भश्चरथां।
अद्रौ चिदस्मा अंतर्दुरोणे विशां न विश्वो अमृतः स्वाधीः ॥ २॥

गर्भः। यः। अपां। गर्भः। वनानां। गर्भः। च। स्थातां। गर्भः। चरथां।
अद्रौ। चित्। अस्मै। अंतः। दुरोणे। विशां। न। विश्वः। अमृतः। सुऽआधीः ॥ २॥

योऽग्निरपां गर्भो गर्भवदंतर्वर्ती। अपांनपात्संज्ञः। यश्च वनानामरण्यानां गर्भो दावाग्निरूपेण तन्मध्ये वर्तते। यश्च स्थातां स्थावराणां काष्ठादीनां गर्भोऽतरवस्थाता। चरथां चरणवतां जंगमानां गर्भो जठररूपेण देहमध्येऽवतिष्ठते। एवंभूतायास्मा अग्नये दुरोणे दुस्तर्यगृहेऽद्रौ चित् पर्वतेऽप्यंतर्मध्ये हविः प्रयच्छंतीति शेषः। सोऽयममृतोऽमरणधर्मोऽग्निः स्वाधीः शोभनकर्मयुक्तः शोभनध्यानो वा। अस्माकं भवतीति शेषः। तत्र दृष्टांतः। विश्वो निवेशयिता सुखेनावस्थापयिता राजा विशां न। प्रजानां यथा रक्षणरूपशोभनकर्मयुक्तो भवति तद्वत् ॥ स्थातां। तिष्ठतेः क्विपि छांदसस्तुक्। यद्वा। औणादिकस्तृप्रत्ययः। आम्यंत्यलोपश्छांदसः। चरथां। शीङ्शपिरुगमि। उ॰ ३.११२.। इति विधीयमानोऽथप्रत्ययो बहुलवचनाच्चेरपि द्रष्टव्यः। आगमानुशासनस्यानित्यत्वादामो नुडभावे सवर्णदीर्घः। विश्वः। विश प्रवेशने। अस्मादंतर्भावितण्यर्थादशिप्रुषीत्यादिना क्वन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं ॥

तृतीयामृचमाह ॥

स हि क्षपावाँ अग्नी रयीणां दाशद्यो अस्मा अरं सूक्तैः।
एता चिकित्वो भूमा नि पाहि देवानां जन्म मर्तांश्च विद्वान् ॥ ३॥

सः। हि। क्षपाऽवान्। अग्निः। रयीणां। दाशत्। यः। अस्मै। अरं। सुऽउक्तैः।
एता। चिकित्वः। भूम। नि। पाहि। देवानां। जन्म। मर्तान्। च। विद्वान् ॥ ३ ॥

स ह्यग्निः क्षपावान्। क्षपेति रात्रिनाम। रात्रिमान्। आग्नेयी वै रात्रिरिति श्रुतेः। रात्रेरग्निसंबंधोऽप्यग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति हूयमानत्वात्। यद्वा। राक्षसादीनां क्षपणेन नाशेन युक्तः। एवंभूतोऽग्निः स्तोत्रे यजमानाय रयीणां धनानि दाशत्। दाशति प्रयच्छति। यो यजमानोऽस्मा अग्नये सूक्तैः सुष्टूक्तैर्यथाशास्त्रं प्रयुक्तैर्मंत्रैररमलं पर्याप्तं स्तोत्रं करोति तस्मा इत्यर्थः। हे चिकित्वः। चिकित्वांश्चेतनावानिति यास्कः। हे चेतनावन् सर्वज्ञाग्ने त्वं देवानामिंद्रादीनां जन्म जन्मानि मर्तान्मनुष्यांश्च विद्वान् जानन्नेतानि भूमा भूम्युपलक्षितानि भूतजातानि निपाहि। नितरां पालय। यतस्त्वं देवमनुष्यादीन्सर्वान् जानासि। अत एवमुच्यत इत्यर्थः ॥ रयीणां। क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी। दाशत्। दाशृ दाने। लेट्यडागमः। अरं। वालमूलेत्यादिना लत्वविकल्पः। सूक्तैः। सूपमानात् क्त इत्युत्तरपदांतोदात्तत्वं। चिकित्वः। मतुवसो रुरिति नकारस्य रुत्वं। भूमा। सुपां सुलुगिति भूमिशब्दादुत्तरस्या द्वितीयाया डादेशः। पदकाले ह्रस्वश्छांदसः ॥

चतुर्थीमृचमाह ॥

वर्धान्यं पूर्वीः क्षपो विरूपाः स्थातुश्च रथमृतप्रवीतं।
अराधि होता स्व१र्निषत्तः कृण्वन्विश्वान्यपांसि सत्या ॥ ४ ॥
वर्धान्। यं। पूर्वीः। क्षपः। विऽरूपाः। स्थातुः। च। रथं। ऋतऽप्रवीतं।
अराधि। होता। स्वः। निऽसत्तः। कृण्वन्। विश्वानि। अपांसि। सत्या ॥ ४ ॥

पूर्वीर्बह्व्य उषसः क्षपो निशाश्च विरूपाः शुक्लकृष्णतया विविधरूपाः सत्यो यमग्निं वर्धान्। वर्धयंति। तथा स्थातुः स्थावरं वृक्षादिकं रथं रममाणं जंगमं मनुष्यादिकं च ऋतप्रवीतभूतेनोदकेन सत्येन यज्ञेन वा प्रकर्षेण वेष्टितं यमग्निं वर्धति। सोऽग्निः स्वः सुष्ठु अरणीये देवयजने निषत्तो निषण्ण उपविष्टः सन् होता देवानामाह्वातारांधि। संसिद्धोऽभूत्। यद्वा ऋत्विग्भिरराधि। आराधित इत्यर्थः। किं कुर्वन्। विश्वानि सर्वाणि सत्या सत्सु यजमानेषु भवानि यद्वा

सत्यफलान्यपांसि कर्माणि कृण्वन् कुर्वन् ॥ वर्धान् । वृधेर्ण्यंताल्लेट्याडागमः । छंदस्युभयथेति शप आर्द्धधातुकत्वात् णिलोपः । इतश्च लोप इतीकारलोपे संयोगांतलोपः । ऋतप्रवीतं । व्येञ् संवरणे । अस्मात्कर्मणि निष्ठा । वचिस्वपीत्यादिना संप्रसारणं । कृद्ग्रहणे गतिकारकपूर्वस्य ग्रहणात्तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं । अराधि । राध साध संसिद्धौ । कर्तरि लुङि व्यत्ययेन च्लेश्चिण् ॥

पंचमीमृचमाह ॥

गोषु प्रशस्तिं वनेषु धिषे भरंत विश्वे बलिं स्वर्णः ।

वि त्वा नरः पुरुत्रा सपर्यन्पितुर्न जिव्रेर्वि वेदो भरंत ॥ ५ ॥

गोषु । प्रऽशस्तिं । वनेषु । धिषे । भरंत । विश्वे । बलिं । स्वः । नः ।

वि । त्वा । नरः । पुरुऽत्रा । सपर्यन् । पितुः । न । जिव्रेः । वि । वेदः । भरंत ॥ ५ ॥

हे अग्ने त्वं वनेषु वननीयेषु संभजनीयेषु गोष्वस्मदीयेषु पशुषु प्रशस्तिं प्रशंसां धिषे । दधिषे स्थापयसि । अस्माकं प्रशस्ता गवादिपशवो भवंत्वित्यर्थः । विश्वे सर्वे जना नोऽस्मभ्यं स्वः सुष्ठ्वरणीयं बलिमुपायनरूपं धनं भरंत । आहरंतु । हे अग्ने त्वा त्वां नरो मनुष्याः पुरुत्रा बहुषु देवयजनदेशेषु विसपर्यन् । विविधं पूजयंति । पूजयित्वा च वेदो धनं विभरंत । त्वत्तो विशेषेण हरंति । गृह्णंतीत्यर्थः । तत्र दृष्टांतः । जिव्रेर्जीर्णाद्वृद्धात्पितुर्न । पितुरिव । यथा पुत्रा वृद्धात्पितुः सकाशाद्धनं हरंति तद्वत् ॥ धिषे । छांदसो वर्तमाने लिट् । द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति द्विर्वचनाभावः । भरंत । हृञ् हरणे । केवलोऽपि सोपसर्गार्थो द्रष्टव्यः । छांदसो लङ् । हृग्रहोर्भ इति भत्वं । पुरुत्रा । देवमनुष्यपुरुषपुरुमर्त्येत्यादिना सप्तम्यर्थे त्राप्रत्ययः । जिव्रेः । जॄष् वयोहानौ । जॄशॄस्तॄजागृभ्यः क्विन् । ऋत इद्धातोरितीत्वं । उणादयो व्युत्पन्नानि प्रातिपदिकानीति जिव्रिकिर्योर्गिर्योरित्येवमादिषु दीर्घो न भवति । पा० ८. २. ७८. २. । इत्युक्तत्वात् हलि चेति दीर्घस्याभावः । रेफवकारयोर्विपर्ययः । उक्तं च । वर्णागमो वर्णविपर्ययश्च । पा० ६. ३. १०९. ९. । इति । नित्त्वादाद्युदात्तत्वं । वेद इति धननाम । विद्यते लभ्यत इति वेदः । विद्लृ लाभे । कर्मण्यसुन् ॥

द्विपदास्वयुक्संख्यासु यात्यातिरिच्यते सा तथैव पठितव्येत्युक्तं । उत्तरा तादृशी द्विपदा ॥ तामेतां षष्ठीमृचमाह ॥

साधुर्न गृध्नुरस्तेव शूरो यातेव भीमस्त्वेषः समत्सु ॥ ६ ॥

साधुः । न । गृध्नुः । अस्ताऽइव । शूरः । याताऽइव । भीमः । त्वेषः । समत्ऽसु ॥ ६ ॥

अयमग्निः साधुर्न साधक इव गृध्नुर्गृहीता । यथा साधकः साध्यफलमाशु गृह्णाति तद्वदग्निरपि सर्वं स्वीकरोतीत्यर्थः । तथायमग्निरस्तेव शूरः । यथेषूणां क्षेप्ता धानुष्कः शत्रून्प्रेरयति तद्वदग्निरपि दहन् सर्वं प्राणिजातं प्रेरयति । तथा यातेव भीमः । याता यातयिता हिंसको भीमः सर्वेषां भयंकरो भवति । तद्वदग्निरपि दृष्टमात्रेण सर्वेषां भयमुत्पादयति । अत एवंविधोऽग्निः समत्सु संग्रामेषु त्वेषो दीप्तः सन् अस्माकं सहायो भवत्वित्यर्थः ॥ गृध्नुः । गृधु अभिकांक्षायां । त्रसिगृधिधृषिक्षिपेः क्नुः । शूरः । शु गतौ । अंतर्भावितण्यर्थादस्मात् शुषिचिमीनां दीर्घश्चेति क्रन् ॥

॥ इति प्रथमस्य पंचमे चतुर्दशो वर्गः ॥

उप प्रेति दशर्चं सप्तमं सूक्तं । अत्रानुक्रम्यते । उप प्र दशेति । ऋषिश्चान्यस्मादिति परिभाषया शक्तिपुत्रः पराशर ऋषिः । अनादेशपरिभाषया त्रिष्टुप् । परमाग्नेयमैंद्रादिति परिभाषितत्वादग्निर्देवता ॥ प्रातरनुवाकस्याग्नेये क्रतौ त्रैष्टुभे छंदसीदमादीनि त्रीणि सूक्तानि । अथैतस्या इति खंडे तथैव सूचितं । उप प्र जिन्वन्निति त्रीणि का त उपेतिरिति सूक्ते । आ० ४. १३. । इति । आश्विनशस्त्रेऽपि प्रातरनुवाकातिदेशादिदमादीनि त्रीणि सूक्तानि । तथैव सूत्र्यते । एतयाग्नेयं गायत्रमुपसंतनुयात् प्रातरनुवाकन्यायेनेति ॥

तत्र प्रथमामृचमाह ॥

उप प्र जिन्वन्नुशतीरुशंतं पतिं न नित्यं जनयः सनीळाः ।
स्वसारः श्यावीमरुषीमजुष्रञ्चित्रमुच्छंतीमुषसं न गावः ॥ १ ॥

उप । प्र । जिन्वन् । उशतीः । उशंतं । पतिं । न । नित्यं । जनयः । सऽनीळाः ।
स्वसारः । श्यावीं । अरुषीं । अजुष्रन् । चित्रं । उच्छंतीं । उषसं । न । गावः ॥ १ ॥

उशतीरुशत्यः कामयमानाः सनीळाः । नीळो निवासस्थानं । समाननिवासस्थानाः । एकपाण्यवस्थानात् । स्वसार इत्यंगुलिनाम । एवंभूता अंगुलय उशंतं कामयमानमग्निं जनयो जाया नित्यमसाधारणं पतिं न भर्तारमिवोपप्र-

जिन्वन्। उपेत्य हविःप्रदानादिकर्मणा प्रीणयंति। प्रीणयित्वा च चित्रं चायनीयं पूजनीयं तमग्निमंजलिबंधनेनाजुष्रन्। असेवत। तत्र दृष्टांतः। श्यावीं श्याववर्णां रात्रिसंबंधात्कृष्णां। तत उच्छंती सूर्यकिरणसंबंधात्तमो वर्जयंती। अत एवारुषीमारोचमानां। यद्वा शुभ्ररूपयुक्तामुषसं न। उषोदेवतां गावो रश्मयो यथा सेवंते तद्वत्। यथा रश्मय उषसा नित्यसंबद्धाः। एवं सर्वेषु यज्ञेष्वग्निपरिचरणेनांगुलयो नित्यसंबद्धा इति तात्पर्यार्थः॥ जिन्वन्। जिवि प्रीणनार्थः। इदित्वान्नुम्। लेट्यडागमः। उशतीः। वा छंदसीति पूर्वसवर्णदीर्घत्वं। शतुरनुम इति नद्या उदात्तत्वं। स्वसारः। असु क्षेपण इत्यस्मात्सुञ्यसेर्ऋन्। उ॰ २.९२.। इति ऋन्। न षट्स्वस्रादिभ्यः। पा॰ ४.१.१०.। इति ङीप्प्रतिषेधः। नित्त्वादाद्युदात्तत्वं। श्यावीं। शु गतौ। इणशीङ्भ्यामिति बाहुलकाद्वन्। शार्ङ्गरवादित्वान्ङीन्। अरुषीं। अरुषमिति रूपनाम। ऋ गतौ। ऋहनिभ्यामुषन्। छंदसीवनिपाविति मत्वर्थीय ईकारः। व्यत्ययेनाद्युदात्तत्वं। अजुष्रन्। जुषी प्रीतिसेवनयोः। तौदादिकः। लङि व्यत्ययेन परस्मैपदं। रुडित्यनुवृत्तौ बहुलं छंदसीत्यंतादेशस्य रुडागमः॥

द्वितीयामृचमाह ॥

वीळु चिद्दृळ्हा पितरो न उक्थैरद्रिं रुजन्नंगिरसो रवेण।
चक्रुर्दिवो बृहतो गातुमस्मे अहः स्वर्विविदुः केतुमुस्राः ॥ २ ॥
वीळु। चित्। दृळ्हा। पितरः। नः। उक्थैः। अद्रिं। रुजन्। अंगिरसः। रवेण।
चक्रुः। दिवः। बृहतः। गातुं। अस्मे इति। अहरिति। स्वः। विविदुः। केतुं। उस्राः ॥ २ ॥

नोऽस्माकं पितरोऽंगिरस एतत्संज्ञा ऋषय उक्थैः शस्त्रैरग्निं स्तुत्वा वीळु चिद्दृळ्हा। वीळ्विति बलनाम। बलवंतं दृढांगमप्यद्रिमत्तारं पणिनामानमसुरं रवेण स्तुतिशब्दमात्रेणैव रुजन्। अभंजन्। तैः स्तुतोऽग्निस्तमसुरं हतवानित्यर्थः। किंच बृहतो महतो दिवो द्युलोकस्य गातुं मार्गमस्मे अस्माकं चक्रुः। कृतवंतः। आवरकस्यासुरस्याग्निना हतत्वात्। मार्गं कृत्वा च स्वः सुष्ठु रणीयमसुराहित्येन सुखेन प्राप्यमहर्दिवसं विविदुः। अजानन् लब्धवंतो वा। तथा केतुमह्नां केतयितारं ज्ञापयितारमादित्यमुस्राः पणिनापहृता गाश्च विविदुरित्यनुषंगः॥ वीळु। सुपां सुलुगिति विभक्तेर्लुक्। दृळ्हा। दृढः स्थूलबलयोरिति

निपातितः । सुपां सुलुगिति डादेशः । रुजन् । रुजो भंगे । तौदादिकः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । विविदुः । विद ज्ञाने विदॢ लाभ इति वा लिट्युसि रूपं ॥

तृतीयामृचमाह ॥

दधन्नृतं धनयन्नस्य धीतिमादिदर्यो दिधिष्वो३ विभृत्राः ।

अतृष्यंतीरपसो यंत्यच्छा देवाञ्जन्म प्रयसा वर्धयंतीः ॥ ३ ॥

दधन् । ऋतं । धनयन् । अस्य । धीतिं । आत् । इत् । अर्यः । दिधिष्वः । विऽभृत्राः ।

अतृष्यंतीः । अपसः । यंति । अच्छ । देवान् । जन्म । प्रयसा । वर्धयंतीः ॥ ३ ॥

ऋतं देवयजनदेशं प्राप्तमग्निमंगिरसो महर्षयो दधन् । गार्हपत्यादिरूपेणाधारयन् । धारयित्वा चास्याग्नेर्धीतिं कर्माग्निहोत्रादिलक्षणं धनयन् । धनमकुर्वन् । यथा पुरुषा धनं संपादयंति तद्वदग्निदेवत्यं कर्मान्वतिष्ठन्नित्यर्थः । आदित् अंगिरसामनुष्ठानानंतरमेवार्योऽर्या धनस्य स्वामिन्यो दिधिष्वस्तेन धनेन दिधिष्वोऽग्नीनां धारणं कुर्वंत्यः । कृताग्न्याधाना इत्यर्थः । विभृत्रा आहितानग्नीनग्निहोत्रादिकर्मणि विहरंत्योऽतृष्यंतीर्विषयांतरतृष्णारहिताः । अत एवापसोऽपसा कर्मणा युक्ताः । एवंभूता यजमानलक्षणाः प्रजाः प्रयसा हविर्लक्षणेनान्नेन देवानिंद्रादीञ्जन्म जातान्मनुष्यांश्च वर्धयंतीर्वर्धयंत्यः सत्य एनमग्निमच्छाभिमुख्येन यंति । प्राप्नुवंति । परिचरंतीति यावत् ॥ दधन् । दध धारणे । लङि व्यत्ययेन परस्मैपदं । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । धनयन् । धनशब्दात्तत्करोतीति णिच् । इष्ठवणौ प्रातिपदिकस्येतीष्ठवद्भावाट्टिलोपः । लङि पूर्ववत् । अर्यः । अर्यः स्वामिवैश्ययोरिति निपातितः । लिंगवचनव्यत्ययौ । अर्यः स्वाम्याख्या चेदित्यंतोदात्तत्वं । दिधिष्वः । डुधाञ् धारणपोषणयोः षो अंतकर्मणीत्याभ्यामंदॄहंभूजंवुकफलूकर्कधूदिधिषूः । उ० १.९३. । इति कूप्रत्ययांतो निपातितः । प्रत्ययस्वरः । उदात्तस्वरितयोर्यण इति जसः स्वरितत्वं । विभृत्राः । हृञ् हरणे । विपूर्वादस्मादौणादिकः क्त्रप्रत्ययः । हृग्रहोर्भ इति भत्वं । अतृष्यंतीः । ञितृषा पिपासायां । जसि वा छंदसीति पूर्वसवर्णदीर्घस्य विकल्पितत्वात्पूर्वसवर्णदीर्घः । अव्ययपूर्वपदप्रकृतिस्वरत्वं । अपसः । अपसशब्दादुत्पन्नस्य मत्वर्थीयस्य विनो बहुलं छंदसीति बहुलवचनाल्लुक् । पा० ५.२.१२२. । विनं-

तस्य चिलिंगत्वेन नञ्विषयत्वाभावात्प्रातिपदिकस्वरेणांतोदात्तत्वं। जन्म। जायंत इति जन्मानो मनुष्याः। अन्येभ्योऽपि दृश्यंत इति मनिन्। सुपां सुलुगिति शसो लुक्॥

चतुर्थीमृचमाह॥

मथीद्यदीं विभृतो मातरिश्वा गृहेगृहे श्येतो जेन्यो भूत्।
आदीं राज्ञे न सहीयसे सचा सन्ना दूत्यं१ भृगवाणो विवाय॥४॥

मथीत्। यत्। ईं। विऽभृतः। मातरिश्वा। गृहेऽगृहे। श्येतः। जेन्यः। भूत्।
आत्। ईं। राज्ञे। न। सहीयसे। सचा। सन्। आ। दूत्यं। भृगवाणः। विवाय॥४॥

मातरिश्वा व्यानवृत्तिरूपेणावस्थितो मुख्यप्राण ईमेनमग्निं यद्यदा मथीत्। अमथ्नात्। अग्नेर्मंथनस्य व्यानवायुसाध्यत्वमथ यः प्राणापानयोः संधिः स व्यान इत्युपक्रम्य छंदोगैराम्नातं। अतो यान्यन्यानि वीर्यवंति कर्माणि यथाग्नेर्मंथनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्ननपानंस्तानि करोतीति। मंत्रांतरं च भवति। आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेरिति। कीदृशो मातरिश्वा। विभृतः। प्राणिषु प्राणापानादिपंचवृत्तिरूपेण विहृतो विभज्य स्थितः। तदपि प्राणसंवादे तैरेवाम्नातं। तानरिष्टः प्राण उवाच। मा मोहमापद्यथाहमेवैतत् पंचधात्मानं प्रविभज्यैतत् वाणमवष्टभ्य विधारयामीति। मंथनेनोत्पन्नोऽयमग्निः श्येतः शुभ्रवर्णो भूत्वा गृहे गृहे सर्वस्मिन्यज्ञगृहे यदा जेन्यः प्रादुर्भूतो भूत्। यद्वा रक्षसां जेन्यो जेताभिभविता भूत्। तथा च तैत्तिरीयकं। देवासुराः संयत्ता आसन्। ते देवा बिभ्यतोऽग्निं प्राविशन्। तस्मादाहुरग्निः सर्वा देवता इति। तेऽग्निमेव वरूथं कृत्वासुरानभ्यभवन्निति। ऐतरेयिणोऽप्यामनंति। ते देवाः प्रतिबुध्याग्निं पुरस्तात्प्रातःसवने पर्याहंस्तेऽग्निनैव पुरस्तात्प्रातःसवनेऽसुररक्षांस्यपाघ्नतेति। आत् यज्ञगृहे प्रादुर्भावानंतरमीमेनमग्निं भृगवाणः। भृगुर्ऋषिः। स इवाचरन्यजमानो दूत्यं दूतस्य कर्माविवाय। शास्त्रमर्यादया प्रापयामास। तत्र दृष्टांतः। सचा सन्। सखा भवन्नन्यो राजा सहीयसेऽभिभवित्रे प्रबलाय राज्ञे न। यथा राज्ञे स्वपुरुषं दूतकर्म प्रापयति तद्वत्॥ मथीत्। मथे विलोडने। लुङि ह्म्यंतक्षणेति वृद्धिप्रतिषेधः। जेन्यः। जनी प्रादुर्भावे। अस्मादौणादिक एन्यप्रत्ययष्टिलोपश्चेति भट्टभास्करमिश्रः। यद्वा जि जय इत्यस्मात्कृत्यल्युटो बहुलमिति बहुलवचनात्कर्तर्यचो यदिति यत्। तस्य

नुडागमश्च। यतोऽनाव इत्याद्युदात्तत्वं। दूत्यं। दूतस्य कर्म दूत्यं। दूतस्य भागकर्मणी इति यत्। तित्स्वरित इति स्वरितत्वं। यतोऽनाव इत्याद्युदात्तत्वं त्वनित्यमिति वीरवीर्यौ चेत्यत्र ज्ञापितं। भृगवाणः। भृगुरिवाचरन्। सर्वप्रातिपदिकेभ्यः क्विब्वक्तव्य इति वचनात् क्विप्। तदंताल्लटो व्यत्ययेन शानच्। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे प्रत्ययांतधातोरंतोदात्तत्वे प्राप्ते वृषादेराकृतिगणत्वादाद्युदात्तत्वं। विवाय। वी गत्यादिषु। अस्मादंतर्भावितण्यर्थाल्लिट् ॥

पंचमीमृचमाह ॥

महे यत्पित्र ईं रसं दिवे करव त्सरत्पृशन्यश्चिकित्वान्।
सृजदस्ता धृषता दिद्युमस्मै स्वायां देवो दुहितरि त्विषिं धात् ॥ ५ ॥

महे। यत्। पित्रे। ईं। रसं। दिवे। कः। अव। त्सरत्। पृशन्यः। चिकित्वान्।
सृजत्। अस्ता। धृषता। दिद्युं। अस्मै। स्वायां। देवः। दुहितरि। त्विषिं। धात् ॥ ५ ॥

महे महते पित्रे पालयित्रे दिवे द्योतमानाय देवगणायेमिमं रसं पृथिव्याः सारभूतं हविर्यद्यदा यजमानः कः। करोति। तदानीं पृशन्यः स्पर्शनकुशलो राक्षसादिश्चिकित्वान् हवींषि वहंतं हे अग्ने त्वां जानन् अवत्सरत्। त्वद्भयात्पलायते। अस्तेषुक्षेपणशीलोऽग्निर्धृषता धर्षकेण धनुषास्मै पलायमानाय राक्षसादये दिद्युं दीप्यमानं बाणं सृजत्। विसृजति। देवो दीप्यमान उषःकालं प्राप्तोऽग्निः स्वायां स्वकीयायां दुहितरि दुहितृवत्समनंतरभाविन्यामुषसि त्विषिं स्वकीयां दीप्तिं धात्। स्थापयति। उषःकाले हि सूर्यकिरणाः प्रादुर्भवंति। तैः स्वकीयं प्रकाशमेकीकरोति। तथा च तैत्तिरीयकं। उद्यंतं वावादित्यमग्निरनुसमारोहति तस्माद्धूम एवाग्नेर्दिवा ददृश इति। अत उषसि दीप्तिं निदधातीत्युच्यते ॥ कः। करोतेर्लुङि मंत्रे घसेत्यादिना च्लेर्लुक्। त्सरत्। त्सर छद्मगतौ। लेट्यडागमः। इतश्चेतीकारलोपः। पृशन्यः। स्पृश संस्पर्शने। कृपृवृजीति विधीयमानः क्युप्रत्ययो बहुलवचनादस्मादपि भवति। स्पृशनं स्पशः। तत्र साधुरिति यत्। सलोपश्छांदसः। तित्स्वरितमिति स्वरितत्वं। दिद्युं। दिद्युदिति वज्रनाम। अंत्यलोपश्छांदसः। धात्। छांदसो वर्तमाने लुङ् ॥

॥ इति प्रथमस्य पंचमे पंचदशो वर्गः ॥

षष्ठीमृचमाह ॥

स्व आ यस्तुभ्यं दम आ विभाति नमो वा दाशादुशतो अनु द्यून्।
वर्धो अग्ने वयो अस्य द्विबर्हा यासद्राया सरथं यं जुनासि ॥ ६ ॥

स्वे। आ। यः। तुभ्यं। दमे। आ। विऽभाति। नमः। वा। दाशात्। उशतः। अनु। द्यून्।
वर्धो इति। अग्ने। वयः। अस्य। द्विऽबर्हाः। यासत्। राया। सऽरथं। यं। जुनासि ॥ ६ ॥

हे अग्ने तुभ्यं त्वां स्वे दमे स्वकीये यज्ञगृहे यो यजमानः। एक आकारो मर्यादायां। यथाशास्त्रमाविभाति। आ समंतात्समिदादिभिः काष्ठैः प्रज्वलयति। अनु द्यून् अनुदिवसमुशतः कामयमानाय तुभ्यं नमो वा दाशात्। हविर्लक्षणमन्नं वा दद्यात्। अस्य यजमानस्य हे अग्ने द्विबर्हा द्वयोर्मध्यमोत्तमस्थानयोर्वृहितो वर्धितस्त्वं वयोऽन्नं वर्धो। वर्धयैव। सरथं रथेन सहितं युयुत्सुं यं पुरुषं जुनासि। युद्धे प्रेरयसि स पुरुषो राया धनेन यासत्। संगच्छते ॥ तुभ्यं। क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी। दाशात्। दाशृ दाने। लेट्याडागमः। उशतः। शतुरनुम इति विभक्तेरुदात्तत्वं। चतुर्थ्यर्थे बहुलं छंदसीति षष्ठी। अनु द्यून्। द्युरित्यहर्नाम। लक्षणेऽनोः कर्मप्रवचनीयत्वं। कर्मप्रवचनीययुक्त इति द्वितीया। वर्धो। वर्ध उ। वृधेर्ण्यंताल्लोटि छंदस्युभयथेति शप आर्धधातुकत्वाणेरनिटीति णिलोपः। शपः पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते। उञा सहैकादेश उञः। पा० १. १. १८.। इति प्रगृह्यत्वं। यासत्। या प्रापणे। सिब्बहुलं लेटीति सिप्। लेटोऽडाटावित्यडागमः। जुनासि। जु इति गत्यर्थः सौत्रो धातुः। शपि प्राप्ते व्यत्ययेन श्ना ॥

सप्तमीमृचमाह ॥

अग्निं विश्वा अभि पृक्षः सचंते समुद्रं न स्रवतः सप्त यह्वीः।
न जामिभिर्वि चिकिते वयो नो विदा देवेषु प्रमतिं चिकित्वान् ॥ ७ ॥

अग्निं। विश्वाः। अभि। पृक्षः। सचंते। समुद्रं। न। स्रवतः। सप्त। यह्वीः।
न। जामिऽभिः। वि। चिकिते। वयः। नः। विदाः। देवेषु। प्रऽमतिं। चिकित्वान् ॥ ७ ॥

विश्वाः पृक्षश्चरुपुरोडाशादीनि सर्वाण्यन्नान्यग्निमंगनादिगुणयुक्तमेनमभिसचंते। आभिमुख्येन समवयंति। प्राप्नुवंति। तत्र दृष्टांतः। स्रवतः समुद्रं न।

यथा स्रवंत्यो नद्यः समुद्रमभिगच्छंति तद्वत् । कीदृश्यो नद्यः । सप्त । सप्तसंख्याकाः । इमं मे गंग इत्यस्यामृचि सप्त हि नद्यः प्राधान्येन श्रूयंते । यह्वीः । महन्नामैतत् । महत्यः । जमंत्येकस्मिन्पात्रे सह भुंजत इति जामयो ज्ञातयः । तैर्नोऽस्मदीयं वयोऽन्नं न चिकिते । न ज्ञायते । तेभ्यो दातुमस्माकमन्नं प्रभूतं नास्तीति भावः । अतो हे अग्ने त्वं देवेषु । दीव्यंतीति देवा धनपतयः । तेषु प्रमतिं प्रकर्षेण मननीयं धनं चिकित्वानवगच्छन्विदाः । अस्मभ्यं लंभय । यद्वा प्रमतिं प्रकृष्टं स्तोत्रं देवेषु विदाः । वेदय ज्ञापय ॥ पृक्षः । अन्ननामैतत् । पृची संपर्क इत्यस्मादौणादिकः कर्मणि क्विप् धातोः षुगागमश्च । यद्वा । असुनि सुपां सुलुगिति जसो लुक् । स्रवतः । स्रु गतौ । स्रवणं स्रवः । तत्कुर्वंति । सर्वप्रातिपदिकेभ्यः क्विब्वक्तव्य इति क्विप् । एतदंताद्धातोः क्विप् चेति क्विप् । ह्रस्वस्य पितीति तुक् । क्विबंताद्धातोः सति शिष्टत्वाद्धातुस्वरेणांतोदात्तत्वं । यह्वीः । पिप्पल्यादिभ्यश्चेति गौरादिषु पठितत्वात्तस्य चाकृतिगणत्वाद्वापि ङीष् । वा छंदसीति पूर्वसवर्णदीर्घत्वं । चिकिते । छांदसो वर्तमाने कर्मणि लिट् । विदाः । विदॢ लाभे । अंतर्भावितण्यर्थाल्लेट्याडागमः । तुदादित्वाच्छः । आगमानुशासनस्यानित्यत्वान्नुमभावः । विकरणस्वरः शिष्यते । यद्वा विदेर्ज्ञानार्थस्य लेटि व्यत्ययेन शः ॥

अष्टमीमृचमाह ॥

आ यदिषे नृपतिं तेज आनट् शुचि रेतो निषिक्तं द्यौरभीके ।
अग्निः शर्धमनवद्यं युवानं स्वाध्यं जनयत्सूदयच्च ॥ ८ ॥

आ । यत् । इषे । नृऽपतिं । तेजः । आनट् । शुचि । रेतः । निऽसिक्तं । द्यौः । अभीके ।
अग्निः । शर्धं । अनवद्यं । युवानं । सुऽआध्यं । जनयत् । सूदयत् । च ॥ ८ ॥

अग्नेर्यत्तेजो नृपतिं नृणामृत्विजां पालकं यजमानमानट् । जाठररूपेण आ समंताद्व्याप्नोत् । किमर्थं । इषे । अन्नाय । कीदृशं । शुचि शुद्धं । द्यौर्दीप्तं । तेन तेजसा परिपक्वमन्नं रसरूपं रेतो वीर्यमभीकेऽभ्यक्तेऽभिगतेऽभिप्राप्ते गर्भस्थाने निषिक्तं नितरां सिक्तमग्निर्वक्ष्यमाणगुणविशिष्टपुत्ररूपेण जनयत् । जनयतु । शर्धं बलवंतमनवद्यमवद्यरहितं युवानं तरुणं । जरारहितमित्यर्थः । स्वाध्यं शोभनकर्माणं शोभनप्रज्ञं वोत्पन्नं पुत्रं सूदयच्च । यागादिकर्मसु प्रेरयतु च । यद्वा रेत इत्युदकनाम । निषिक्तं मेघेन वृष्टमुदकमिषेऽन्नाय सस्यादिनिष्पत्त-

येऽग्नेर्यत्तेज आनट् । व्याप्नोत् । वृष्ट्युदकेन भौमाग्नेः संयोगे सति हि सस्यान्युत्पद्यंते । कीदृशं तेजः । नृपतिं । नृणां रक्षकं । शुचि दीप्तं । तादृशेन तेजसा युक्तो द्यौर्दीप्तोऽग्निरभीक आसन्नकाल एव शर्धादिगुणविशिष्टं पुत्रं जनयतु तं च प्रेरयतु यज्ञादौ ॥ इषे । सावेकाच इति विभक्तेरुदात्तत्वं । नृपतिं । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । आनट् । अशू व्याप्तौ । लङि व्यत्ययेन परस्मैपदग्नमौ । आडागमः । व्रश्चादिषत्वे ष्टुत्वं । निषिक्तं । षिचिर् क्षरणे । कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । उपसर्गात्सुनोतीति षत्वं । अभीके । अभिपूर्वादंचतेः पचाद्यचि पृषोदरादित्वाद्रूपसद्धिः । यद्वा । इण् गतावित्यस्मादौणादिकः कक्प्रत्ययः । उभयथापि दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं । स्वाध्यं । एरनेकाच इति यणादेशः । उदात्तस्वरितयोर्यण इति स्वरितत्वं । जनयत् । जनेर्ण्यंताल्लेट्यडागमः । सूदयत् । षूद क्षरणे । पूर्ववल्लेट्यडागमः ॥

नवमीमृचमाह ॥

मनो न योऽध्वनः सद्य एत्येकः सत्रा सूरो वस्व ईशे ।
राजाना मित्रावरुणा सुपाणी गोषु प्रियममृतं रक्षमाणा ॥ ९ ॥
मनः । न । यः । अध्वनः । सद्यः । एति । एकः । सत्रा । सूरः । वस्वः । ईशे ।
राजाना । मित्रावरुणा । सुपाणी इति सुऽपाणी । गोषु । प्रियं । अमृतं ।
रक्षमाणा ॥ ९ ॥

यः सूरः सूर्य एक एकाक्यसहायः सन्नध्वनो दिव्यान्मार्गान्सद्य एति । आप्नु गच्छति । असहायत्वं च श्रूयते । सूर्य एकाकी चरतीत्याह । असौ वा आदित्य एकाकी चरतीति । शीघ्रगमनं च स्मर्यते । योजनानां सहस्रे द्वे द्वे शते द्वे च योजने । एकेन निमिषार्धेन क्रममाण नमोऽस्तु त इति । शीघ्रगमने दृष्टांतः । मनो न । यथा मनः शीघ्रं गच्छति तद्वत् । स च सूरो वस्वो धनस्य सत्रा सहैव युगपदेवेशे । ईष्टे । यो हि शीघ्रं गच्छति स बहुदेशेष्ववस्थितानि धनानि प्राप्नोति । तथा राजाना राजमानौ सुपाणी शोभनबाहू मित्रावरुणा मित्रावरुणावस्मदीयासु गोषु प्रियं सर्वेषां प्रीतिकरममृतममृतवत्स्वादुभूतं पयो रक्षमाणा रक्षंतौ वर्तेते । हे अग्ने तत्तद्रूपेण त्वमेवैवं वर्तस इति भावः ॥ वस्वः । लिंगव्यत्ययः । जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणाभावे यणादेशः ।

ईशे। ईश ऐश्वर्ये। लोपस्त आत्मनेपदेष्विति तलोपः। मित्रावरुणा। देवताद्वंद्वे चेति पूर्वपदस्यानङादेशः। देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं॥

दशमीमृचमाह॥

मा नो॑ अग्ने स॒ख्या पित्र्या॑णि॒ प्र म॑र्षिष्ठा अ॒भि वि॒दुष्क॒विः सन्।
नभो॒ न रू॒पं ज॑रि॒मा मि॑नाति पु॒रा तस्या॑ अ॒भिश॑स्ते॒रधी॑हि॥ १०॥
मा। नः॒। अ॒ग्ने॒। स॒ख्या। पित्र्या॑णि। प्र। म॒र्षि॒ष्ठाः॒। अ॒भि। वि॒दुः॑। क॒विः। सन्।
नभः॑। न। रू॒पं। ज॒रि॒मा। मि॒ना॒ति॒। पु॒रा। तस्याः॑। अ॒भिऽश॑स्तेः। अधि॑। इ॒हि॒॥ १०॥

हे अग्ने पित्र्याणि पितरं वसिष्ठमुपक्रम्यागतानि सख्या सखित्वानि मा प्रमर्षिष्ठाः। मा विनाशय। अत्र मृष्यतेरुपसर्गवशादर्थांतरे वृत्तिः। यतस्त्वं कविः क्रांतदर्शी सन् अभ्याभिमुख्येन विदुः सर्वविद्वान्। नभो न रूपं। यथांतरिक्षं रूपवंतः सूर्यरश्मय आच्छादयंति तद्वदाच्छादयति जरिमा जरा मिनाति। मां सूक्तद्रष्टारं हिनस्ति। अभिशस्तेर्हिंसाहेतोस्तस्या जराया पुराधीहि। मां बुध्यस्व। सा यथा न प्राप्नोति तथा कुरु। अमृतत्वं प्रयच्छेति यावत्॥ सख्या। सख्युर्भावः सख्यं। सख्युर्य इति यः। पित्र्याणि। पितृभ्य आगतानि। पितुर्यच्च। पा० ४. ३. ७९.। इति यत्प्रत्ययः। रीङृतः। पा० ७. ४. २७.। इति रीङादेशः। यस्येति चेतीकारलोपः। यतोऽनाव इत्याद्युदात्तत्वं। मर्षिष्ठाः। मृष तितिक्षायां। प्रार्थनायां छांदसो लुङ्। न माङ्योग इत्यडभावः। विदुः। विद ज्ञाने। बहुलमन्यत्रापीत्युसिप्रत्ययः। अत एव बहुलवचनाद्गुणाभावः। छंदसि वाप्राम्रेडितयोरिति विसर्जनीयस्य षत्वं। नभः। नहेर्दिवि भश्च। उ० ४. २१०.। इत्यसुन्। जरिमा। जॄष् वयोहानौ। औणादिको भाव इमनिच्प्रत्ययः। मिनाति। मीञ् हिंसायां। प्वादीनां ह्रस्व इति ह्रस्वत्वं। अभिशस्तेः। अभिशस्यते हिंस्यतेऽनयेत्यभिशस्तिः। करणे क्तिन्। तादौ चेति गतेः प्रकृतिस्वरत्वं। अधीहि। इक् स्मरणे। लोड्वदादित्वाच्छपो लुक्। हेरपित्त्वेन ङित्त्वाद्गुणाभावः॥

॥ इति प्रथमस्य पंचमे षोडशो वर्गः॥

नि काव्येति दशर्चमष्टमं सूक्तं त्रैष्टुभमाग्नेयं पराशरस्यार्षं। अनुक्रांतं च। नि काव्येति। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥

तत्र प्रथमामृचमाह ॥

नि काव्या वेधसः शश्वतस्कर्हस्ते दधानो नर्या पुरूणि ।
अग्निर्भुवद्रयिपती रयीणां सत्रा चक्राणो अमृतानि विश्वा ॥ १ ॥

नि । काव्या । वेधसः । शश्वतः । करः । हस्ते । दधानः । नर्या । पुरूणि ।
अग्निः । भुवत् । रयिऽपतिः । रयीणां । सत्रा । चक्राणः । अमृतानि । विश्वा ॥ १ ॥

शश्वतः शाश्वतस्य नित्यस्य वेधसो विधातुर्ब्रह्मणः संबंधीनि काव्या काव्यानि मंत्ररूपाणि स्तोत्राण्ययमग्निर्निकः । नियमेन स्वात्माभिमुखं करोति । किं कुर्वन् । नर्या नृभ्यो हितानि नृषु साधूनि वा पुरूणि बहूनि धनानि हस्ते दधानः । हस्ते धारयन् । ईदृग्भूतमग्निमवलोक्य सर्वे जनाः स्तुवंतीति भावः । स्तोतृभ्यो धनेषु दत्तेष्वप्यग्नेर्धनं न क्षीयत इत्याह । अग्निरिति । अयमग्नी रयीणां रयिपतिर्भुवत् । धनानां मध्ये यानि धनान्युत्कृष्टानि तेषां स्वामी भवति । किं कुर्वन् । विश्वा विश्वानि सर्वाण्यमृतानि । हिरण्यनामैतत् । अमृतं वै हिरण्यमिति श्रुतेः । सर्वाणि हिरण्यानि स्तोतृभ्यः सत्रा सहैव चक्राणः कुर्वन् । युगपत्प्रयच्छन्नित्यर्थः ॥ करः । करोतेश्छांदसो लुङ् । मंत्रे घसेति च्लेर्लुक् । हल्ङ्याब्भ्य इति तकारलोपः । नर्या । नरशब्दाद्धितार्थे गवादिलक्षणो यत्प्रत्ययो द्रष्टव्यः । यद्वा तत्र साधुरिति यत् । चक्राणः । करोतेर्लटः शानच् । बहुलं छंदसीति विकरणस्य श्लुः । नन्वेवं सत्यभ्यस्तानामादिरित्याद्युदात्तत्वं प्राप्नोति । एवं । तर्हि लिटः कानजस्तु । तस्यार्द्धधातुकत्वेनाभ्यस्ताद्युदात्तत्वाभावे चित्स्वर एव शिष्यते ॥

द्वितीयामृचमाह ॥

अस्मे वत्सं परि षंतं न विंदन्निच्छंतो विश्वे अमृता अमूराः ।
श्रमयुवः पदव्यो धियंधास्तस्थुः पदे परमे चार्वग्नेः ॥ २ ॥

अस्मे इति । वत्सं । परि । संतं । न । विंदन् । इच्छंतः । विश्वे । अमृताः । अमूराः ।
श्रमऽयुवः । पदऽव्यः । धियंऽधाः । तस्थुः । पदे । परमे । चारु । अग्नेः ॥ २ ॥

अस्मे अस्माकं वत्सं वत्सवदत्यंतं प्रियं । यद्वा वत्सः पुत्रः पश्चादुत्पन्नत्वात् । तद्वदग्निरप्यस्माकं पुत्रः । तथा चाम्नायते । ममैव सन्वह हव्यान्यग्ने पुत्रः पित्रे लोककृज्जातवेद इति । परिषंतं परितः सर्वत्र वर्तमानं । देवेभ्यो निर्गत्याश्वत्थ-

वेरणादिषु निलीनं संतमित्यर्थः । एवंविधमग्निमिच्छंतो विश्वेऽमृताः सर्वेऽमरणधर्माणो देवा अमूरा अमूढा मरुतश्च न विंदन् । तमग्निं नालभंत । अलभमानाश्च ते श्रमयुवो हव्यवाहनस्याभावेन हविषामभावात्तज्जन्येन श्रमेण क्लेशेनैकीभूताः । तस्याग्नेरन्वेषणाय पदव्यः पादैर्गच्छंतः । धियंधा धियामग्नेः शयनासनस्थानादिलक्षणानां कर्मणां धारयितारः । एवंविधाः संतश्चारु चारुणि शोभनेऽग्नेः परम उत्तमेऽंत्ये पदे । यत्र ह्यग्निर्निलीनो वर्तते तत्रेत्यर्थः । तस्मिन्पदे तस्थुः । स्थितवंतः । बहुविधेन प्रयासेनाग्निं ददृशुरित्यर्थः ॥ परिषंतं । उपसर्गप्रादुर्भ्यामस्तिर्यच्परः । पा० ८.३.८७. । इति षत्वं । श्रमयुवः । यु मिश्रणे । श्रमेण यूयंत इति श्रमयुवः । क्विब्वचिप्रच्छीत्यादिना विधीयमानौ क्विब्दीर्घावस्मादपि धातोर्भवतः । तन्वादित्वादुवङ् । पदव्यः । वी गत्यादिषु । पादेन वियंति गच्छंतीति पदव्यः । क्विप् चेति क्विप् । धियंधाः । आतोऽनुपसर्गे क इति कः । तत्पुरुषे कृति बहुलमिति बहुलवचनाद्द्वितीयाया अपलुक् । तस्थुः । पादादित्वान्निघाताभावः । चारु । सुपां सुलुगिति सप्तम्या लुक् ॥

तृतीयामृचमाह ॥

तिस्रो यदग्ने शरदस्त्वामिच्छुचिं घृतेन शुचयः सपर्यान् ।
नामानि चिद्दधिरे यज्ञियान्यसूदयंत तन्वः१ सुजाताः ॥ ३ ॥

तिस्रः । यत् । अग्ने । शरदः । त्वां । इत् । शुचिं । घृतेन । शुचयः । सपर्यान् ।
नामानि । चित् । दधिरे । यज्ञियानि । असूदयंत । तन्वः । सुऽजाताः ॥ ३ ॥

शुचयः शोधयितारो दीप्ता वा मरुतो हे अग्ने शुचिं शुद्धं दीप्यमानं वा त्वामिद्देवेभ्यो निर्गतं त्वामेवोद्दिश्य तिस्रः शरदस्त्रीन् संवत्सरान्घृतेनाज्येन यद्यदा सपर्यान् । पूजां कुर्युः । तदानीं त्वमाविरभूः । तदनंतरं ते मरुतस्त्वयानुगृहीताः संतो यज्ञियानि यज्ञार्हाणि यज्ञे प्रयोक्तुं योग्यानि नामानि चित् नामान्यपि दधिरे । अधारयन् । नामानि च तैत्तिरीयके समाम्नायंते । ईदृङ् चान्यादृङ् च तादृङ् च प्रतिदृङ् च मितश्च संमितश्च सभरा इत्यादीनि । एतैश्चाग्निचयने मारुताः सप्तकपाला हूयंते । नामानि धारयित्वा च सुजाताः पूर्वं रूपं परित्यज्य शोभनममृतत्वं प्राप्ताः संतस्तन्वः स्वकीयानि शरीराण्यसूदयंत । स्वर्गं प्रापितवंतः ॥ तिस्रः । शसि त्रिचतुरोः स्त्रियां तिसृचतसृ इति पूर्वसवर्णदीर्घत्वे प्राप्तेऽचि

र ऋत इति रेफादेशः। त्रिशब्दः फिष् इत्यंतोदात्तः। तिस्रादेशस्यापि स्थानिवद्भावेनांतोदात्तत्व उदात्तयणो हल्पूर्वादिति शस उदात्तत्वं। शरदः। शॄ हिंसायां। शीर्यंतेऽस्यामोषधय इति शरत्संवत्सरः। शॄदृभसोऽदिः। उ० १. १२९.। इत्यदिप्रत्ययः। उभयत्र कालाध्वनोरत्यंतसंयोगे। पा० २.३.५.। इति द्वितीया। सपर्यान्। सपर पूजायां। कंड्वादिः। लेट्याडागमः। इतश्च लोप इतीकारलोपः। यज्ञियानि। यज्ञर्त्विग्भ्यां घखञाविर्त्यहार्थे घप्रत्ययः॥

चतुर्थीमृचमाह॥

आ रोदसी बृहती वेविदानाः प्र रुद्रिया जभ्रिरे यज्ञियासः।

विदन्मर्तो नेमधिता चिकित्वानग्निं पदे परमे तस्थिवांसं॥४॥

आ। रोदसी इति। बृहती इति। वेविदानाः। प्र। रुद्रिया। जभ्रिरे। यज्ञियासः।

विदत्। मर्तः। नेमऽधिता। चिकित्वान्। अग्निं। पदे। परमे। तस्थिऽवांसं॥४॥

बृहती महत्यौ रोदसी द्यावापृथिव्यावावेविदाना अत्यर्थं ज्ञापयंतः। कुत्राग्निर्वर्तत इति परस्परं वदंतो द्यावापृथिव्योर्मध्ये वर्तमाना इत्यर्थः। यद्वा महत्योर्द्यावापृथिव्योर्मध्य आवेविदाना अग्निमुपलभमानाः। एवंभूता यज्ञियासो यज्ञार्हा देवा रुद्रियाः। रुद्रोऽग्निः। देवानामसुरैः सह युद्धसमये तैर्देवैः स्थापितं धनमपहृत्य गतवंतमग्निं देवा आगत्याग्नेः सकाशाद्बलेन तद्धनमगृह्णन्। तदानीं सोऽग्निररोदीत्। तस्माद्रुद्र इत्याख्यायते। तथा च तैत्तिरीयकं। तदग्निर्न्यकामयत। तेनापाक्रामत्। तद्देवा विजित्यावरुरुत्समाना अन्वायन्। तदस्य सहसादित्संत। सोऽरोदीत्। यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति। तस्य रुद्रस्यार्हाणि स्तोत्राणि प्रजभ्रिरे। प्रजह्रिरे। चक्रुरित्यर्थः। नेमधिता। नेमशब्दोऽर्धवचनः। तथा च यास्कः। त्वो नेम इत्यर्धस्य। नि० ३. २०.। इति। सर्वेषां देवानामर्धभागेन धीयते धार्यत इति नेमधित इंद्रः। सर्वे देवा एकोऽर्धः। इंद्र एक एवापरोऽर्ध इति यावत्। तथा च तैत्तिरीयकं। यत्सर्वेषामर्धमिंद्रः प्रति तस्मादिंद्रो देवानां भूयिष्ठभाक्तम इति। तेनेंद्रेण सहितो मर्तो मरुद्गणः परम उत्तमेऽंत्ये पदे स्थानेऽश्वत्थातौ तस्थिवांसं स्थितवंतमग्निं चिकित्वाञ्ज्ञानन्विदत्। अलभत॥ वेविदानाः। विदेर्ज्ञानार्थाल्लाभार्थाद्वा यङंताल्लटः शानच्। बहुलं छंदसीति शपो लुक्। छंदस्युभयथेति शानच आर्धधातुकत्वादतोलोपयलोपौ।

अभ्यस्तानामादिरित्याद्युदात्तत्वं । विदत् । विद्लृ लाभे । लुङि लृदित्वात् च्लेरङा-देशः । नेमधिता । दधातेः कर्मणि निष्ठा । सुधित वसुधित नेमधित । पा० ७. ४. ४५. । इति धिभाव निपात्यते । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं । सुपां सुलुगिति तृतीयाया आकारः । तस्थिवांसं । तिष्ठतेर्लिटः क्वसुः । वस्वेका-जाद्घसामितीडागमः ॥

घर्माभिष्टवे संजानाना इत्येषा । अथोत्तरमिति खंडे सूचितं । संजानाना उप *सीदन्नभिज्ञ्वा दशभिर्विवस्वतः* । आ० ४. ७. । इति ॥

तामेतां सूक्ते पंचमीमृचमाह ॥

संजानाना उप सीदन्नभिज्ञु पत्नीवंतो नमस्यं नमस्यन् ।
रिरिक्वांसस्तन्वः कृण्वत स्वाः सखा सख्युर्निमिषि रक्षमाणाः ॥ ५ ॥

सम्ऽजानानाः । उप । सीदन् । अभिऽज्ञु । पत्नीऽवंतः । नमस्यं । नमस्यन्निति नमस्यन् ।
रिरिक्वांसः । तन्वः । कृण्वत । स्वाः । सखा । सख्युः । निऽमिषि । रक्षमाणाः ॥ ५ ॥

हे अग्ने त्वां संजानानाः सम्यक् जानंतो देवा उपसीदन् । उपसीदंति प्राप्नु-वंति । उपसत्तिं कृत्वा च पत्नीवंतः सपत्नीकाः संतो नमस्यं नमस्कारार्हमभिज्ञु आभिमुख्येनावस्थितजानुयुक्तं त्वां नमस्यन् । अपूजयन् । पूजयित्वा च सख्युर्मि-त्रस्य तव निमिषि दर्शने निमित्तभूते सति रक्षमाणास्त्वया परिरक्ष्यमाणाः सखा सखायो देवाः स्वास्तन्वः स्वकीयानि शरीराणि रिरिक्वांसः । अनशनादिरूपेण दीक्षानियमेन रिक्तीकुर्वंतः शेषयंतः कृण्वत । यागानकुर्वन् । देवा वै यज्ञम-तन्वतेति श्रुतेः ॥ नमस्यन् । नमोवरिवश्चित्रङ इति पूजार्थे क्यच् । लङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । रिरिक्वांसः । रिचिर् विरेचने । लिटः क्वसुः । निमिषि । मिष स्पर्धायां । अत्रोपसर्गवशाद्दर्शनार्थः । संपदादिलक्षणो भावे क्विप् । रक्षमाणाः । कर्मणि लटः शानच् । यकि प्राप्ते व्यत्ययेन शप् ॥

॥ इति प्रथमस्य पंचमे सप्तदशो वर्गः ॥

षष्ठीमृचमाह ॥

त्रिः सप्त यद्गुह्यानि त्वे इत्पदाविदन्निहिता यज्ञियासः ।
तेभी रक्षंते अमृतं सजोषाः पशूञ्च स्थातॄञ्चरथं च पाहि ॥ ६ ॥

त्रिः। सप्त। यत्। गुह्यानि। त्वे इति। इत्। पदा। अविदन्। निऽहिता। यज्ञियासः।
तेभिः। रक्षंते। अमृतं। सऽजोषाः। पशून्। च। स्थातॄन्। चरथं। च। पाहि ॥ ६॥

त्रिः सप्त। एकविंशतिसंख्याकानि गुह्यानि रहस्यानि वेदैकसमधिगम्यानि यद्यानि पदा पदानि। पद्यते गम्यते स्वर्ग एभिरिति व्युत्पत्त्या पदशब्देनात्र यज्ञा उच्यंते। ते चैकविंशतिसंख्याकाः। औपासनहोमवैश्वदेवादयः सप्त पाकयज्ञाः। अग्न्याधेयदर्शपूर्णमासादयः सप्त हविर्यज्ञाः। अग्निष्टोमात्यग्निष्टोमादयः सप्त सोमयज्ञाः। एवमेकविंशतिसंख्याकानि यज्ञलक्षणानि पदानि हे अग्ने त्वे इत् त्वय्येव निहिता स्थापितानि। तेषां सर्वेषां त्वत्प्रधानत्वात्। न ह्यग्निमंतरेण यागा अनुष्ठातुं शक्यंते। यज्ञियासो यज्ञार्हा अर्थित्वसामर्थ्यविदुष्यादिभिरधिकारहेतुभिर्युक्ताः। तथा चोक्तं। अर्थी समर्थो विद्वान् शास्त्रेणापर्युदस्तः कर्मण्यधिकारीति। एवंविधलक्षणोपेता यजमानास्तानि पदान्यविदन्। अलभंत। लब्ध्वा च तेभिर्यज्ञलक्षणैः पदैरमृतममरणधर्माणं त्वां रक्षंते। पालयंति। यजंतीत्यर्थः। सजोषास्तैर्यजमानैः समानप्रीतिस्त्वं पशून् गवाश्वादिपशूंश्च स्थातॄन् व्रीह्यादिस्थावराणि चरथं पशुव्यतिरिक्तमन्यद्यत्प्राणिजातमस्ति तच्च पाहि। रक्ष। तेषु हि रक्षितेषु त्वदीया यागाः कर्तुं शक्यंते नान्यथा। अतस्त्वमेवमुच्यस इत्यर्थः ॥ यत्। सुपां सुलुगिति विभक्तेर्लुक्। गुह्यानि। गुहायां भवानि। भवे छंदसीति यत्। यतोऽनाव इत्याद्युदात्तत्वं। त्वे। सुपां सुलुगिति सप्तम्याः शे आदेशः। अविदन्। विद्लृ लाभे। लुङि लृदित्त्वादङ्। पशून् स्थातॄन्। उभयथर्क्ष्वित्युभयथाभावान्नकारस्य रुत्वाभावः ॥

सप्तमीमृचमाह ॥

विद्वाँ अग्ने वयुनानि क्षितीनां व्यानुषक् शुरुधो जीवसे धाः।
अंतर्विद्वाँ अध्वनो देवयानानतंद्रो दूतो अभवो हविर्वाट् ॥ ७॥

विद्वान्। अग्ने। वयुनानि। क्षितीनां। वि। आनुषक्। शुरुधः। जीवसे। धाः।
अंतःऽविद्वान्। अध्वनः। देवऽयानान्। अतंद्रः। दूतः। अभवः। हविःऽवाट् ॥ ७॥

हे अग्ने वयुनानि। ज्ञाननामैतत् इह तु ज्ञातव्ये वर्तते। सर्वाणि ज्ञातव्यानि विद्वान् जानंस्त्वं क्षितीनां यजमानलक्षणानां प्रजानां जीवसे जीवितुं शुरुधः क्षुद्रूपस्य शोकस्य रोधयित्रीरिषोऽन्नान्यानुषक् अनुषक्तं सततं यथा भवति तथा

विधाः । विधेहि । कुर्वित्यर्थः । एवं यजमानानन्नसमृद्धान्कृत्वानंतरं हविर्वाट् तेदेवेभ्यः प्रत्तं हविर्वहन्दूतोऽभवः। देवानां दूतो भवसि। कीदृशस्त्वं। अंतर्विद्वान्। द्यावापृथिव्योर्मध्ये जानन्। किं जानन्। अध्वनः। मार्गान्। कीदृशान्। देवयानान्। देवा यैर्मार्गैर्यंति गच्छंति ताञ्जानन्नित्यर्थः। अतंद्रः। पुनर्हविर्वहनेऽप्यनलसः ॥ वयुनानि । अज गतिक्षेपणयोः । अजियमिशीङ्भ्यश्च । उ० ३. ६१. । इति कर्मण्युनप्रत्ययः । अजेर्व्यघञपोरिति वीभावः । क्षितीनां । क्षियंति निवसंतीति क्षितयो मनुष्याः । क्तिच्क्तौ च संज्ञायामिति कर्तरि क्तिच् । अंतोदात्ताद्ध्रस्वांतात्क्षितिशब्दादुत्तरस्य नामो नामन्यतरस्यामित्युदात्तत्वं । शुरुधः । शुचं रुंधंतीति शुरुधः । क्विप् चेति क्विप् । पूर्वपदस्यांत्यलोपः पृषोदरादित्वात् ॥

अष्टमीमृचमाह ॥

स्वाध्यो॑ दि॒व आ स॒प्त य॒ह्वी रा॒यो दुरो॒ व्यृ॑त॒ज्ञा अ॑जानन् ।
वि॒दद्गव्यं॑ स॒रमा॑ दृ॒ळ्हमू॒र्वं येना॒ नु कं॒ मानु॑षी॒ भोज॑ते॒ विट् ॥ ८ ॥

सु॒ऽआ॒ध्यः॑। दि॒वः। आ। स॒प्त। य॒ह्वीः। रा॒यः। दुरः॑। वि। ऋ॒त॒ऽज्ञाः। अ॒जा॒न॒न्।
वि॒दत्। गव्यं॑। स॒रमा॑। दृ॒ळ्हं। ऊ॒र्वं। येन॑। नु। कं॒। मानु॑षी। भोज॑ते। विट् ॥ ८ ॥

स्वाध्यः शोभनकर्मयुक्ता यह्वीर्यह्व्यो महत्यः सप्त गंगाद्याः सप्त नद्यो दिवो द्युलोकादागत्य भूम्यां प्रवहंतीति शेषः। हे अग्ने। ईदृग्विधा नद्यस्त्वया स्थापिताः। अग्नौ होमे सति हि तेन तृप्तः सूर्यो वृष्टिं करोति। तस्मिन्नर्थे स्मृतिः पूर्वमुदाहृता। अतो वृष्टिद्वाराग्निरेव नदीः करोतीत्युच्यते। तथा ऋतज्ञा ऋतं यज्ञं जानंतोऽंगिरसो रायो वलनाम्नासुरेणापहृतस्य गोरूपस्य धनस्य दुरो द्वाराणि गमनमार्गानजानन्। त्वया ज्ञातवंतः। त्वत्साध्येन यागेन प्रीत इंद्रो गवामन्वेषणाय सरमां नाम देवशुनीं प्रेषितवान्। सा च सरमा गवां स्थानमवगत्येंद्रस्य न्यवेदयत्। इंद्रश्च तानंगिरसो गाः प्रापयत्। अत एतत्सर्वं त्वमेव कृतवान्। अंगिरोभ्यः सकाशाद्गव्यं गवि भवं दृळ्हं स्थूलं। बहुलमित्यर्थः। एवंविधं पयोलक्षणमूर्वमन्नं सरमा देवशुनी विदत्। अलभत। कमित्येतत्पादपूरणं। येन नु येन हि गव्येन मानुषी विट् मनोः संबंधिनी प्रजा भोजते। इदानीं भुंक्ते। तद्गव्यमपि परंपरयाग्निरेव करोति ॥ स्वाध्यः। सुआङ्पूर्वाद्धीशब्दाज्जस्येरनेकाच इति यणादेशः। यह्वीः। वा छंदसीति पूर्वसवर्णदीर्घत्वं। गव्यं।

सर्वत्र गोरजादिप्रत्ययप्रसंगे यद्वक्तव्यमिति भावार्थे यत्। ऊर्वं। उर्वी हिंसार्थः। ऊर्वति क्षुधं हिनस्तीत्यूर्वमन्नं। पचाद्यच्। भोजते। भुज पालनाभ्यवहारयोः। श्नमि प्राप्ते व्यत्ययेन शप्॥

नवमीमृचमाह॥

आ ये विश्वा स्वपत्यानि तस्थुः कृण्वानासो अमृतत्वाय गातुं।
मह्ना महद्भिः पृथिवी वि तस्थे माता पुत्रैरदितिर्धायसे वेः॥९॥

आ। ये। विश्वा। सुऽअपत्यानि। तस्थुः। कृण्वानासः। अमृतऽत्वाय। गातुं।
मह्ना। महत्ऽभिः। पृथिवी। वि। तस्थे। माता। पुत्रैः। अदितिः। धायसे।
वेरिति वेः॥९॥

य आदित्या अमृतत्वायामरणत्वसिद्धये गातुं मार्गमुपायं कृण्वानासः कुर्वाणाः संतो विश्वा विश्वानि सर्वाणि स्वपत्यानि शोभनान्यपतनहेतुभूतानि चतुर्दशरात्रषट्त्रिंशद्रात्रादित्यानामयनादीनि कर्माण्यातस्थुः। आस्थितवंतः। कृतवंत इत्यर्थः। तथा च तैत्तिरीयकं। आदित्या अकामयंत सुवर्गं लोकमियामेतीति। त एतं षट्त्रिंशद्रात्रमपश्यन्। तमाहरंत तेनायजंतेति च। महद्भिरनुष्ठानेन महानुभावैस्तैः पुत्रैः सहिता माता जनयित्र्यदितिरदीना पृथिवी धायसे सर्वस्य जगतो धारणाय मह्ना स्वकीयेन महत्त्वेन वितस्थे। विशेषेण तिष्ठति। हे अग्ने यतस्त्वं वेः। आदित्यैरनुष्ठितेषु यागेषु चरुपुरोडाशादीनि हवींष्यभक्षयः। अत एतत्सर्वं जातमित्यर्थः॥ कृण्वानासः। कृवि हिंसाकरणयोश्च। व्यत्ययेनात्मनेपदं। धिन्विकृण्व्योरच्चेत्युप्रत्ययः। तत्संनियोगेनाकारांतादेशश्च। तस्यातो लोपे सति स्थानिवद्भावाद्गुणाभावः। शानचश्चित्त्वादंतोदात्तत्वं। आज्जसेरसुक्। मह्ना। महिम्नेत्यस्य वर्णलोपश्छांदसः। धायसे। वहिहाधाञ्भ्यश्छंदसीति दधातेर्भावेऽसुन्। णिदित्यनुवृत्तेरातो युक् चिण्कृतोरिति युक्। वेः। वी गतिप्रजनकांत्यसनखादनेषु। लङि सिप्यदादित्वाच्छपो लुक्। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। धायस इत्यस्य वाक्यांतरगतत्वादस्य निघाताभावः॥

दशमीमृचमाह॥

अधि श्रियं नि दधुश्चारुमस्मिन्दिवो यदक्षी अमृता अकृण्वन्।
अध क्षरंति सिंधवो न सृष्टाः प्र नीचीरग्ने अरुषीरजानन्॥१०॥

अधि। श्रियं। नि। दधुः। चारुं। अस्मिन्। दिवः। यत्। अक्षी इति। अमृताः। अकृण्वन्।
अध। क्षरंति। सिंधवः। न। सृष्टाः। प्र। नीचीः। अग्ने। अरुषीः। अजानन् ॥ १० ॥

अस्मिन्नग्नौ चारुं शोभनां श्रियं परिस्तरणपरिषेचनादिरूपां यज्ञसंपदमधिनिदधुः। यजमानाः स्थापितवंतः। निधाय च यद्यदाक्षी यज्ञस्याज्यभागलक्षणे चक्षुषी अकृण्वन्। कुर्वंति। चक्षुषी वा एते यज्ञस्य यदाज्यभागाविति श्रुतेः। तदानीं दिवो द्युलोकादमृता अमरणधर्माणो देवा यागसमयो जात इत्यवगम्यागच्छंतीति शेषः। अधाज्यभागानंतरं सृष्टा अग्नेरुत्पन्नाः सिंधवो न शीघ्रं गच्छंत्यो नद्य इव नीचीर्नितरां सर्वासु दिक्षु गच्छंतीररुषीरारोचमानाः। यद्वा निर्मलरूपाः। हे अग्ने। एवंभूतास्त्वदीया ज्वालाः क्षरंति। संचलंति। सर्वासु दिक्षु गच्छंतीत्यर्थः। आगता देवाश्च प्राजानन्। अस्माकं होमायेहश्यो ज्वाला उत्पन्ना इति दृष्टाः संतः प्रकर्षेण जानंति ॥ अक्षी। परत्वान्नुमं बाधित्वा ई च द्विवचने। पा° ७. १. ७७.। इत्यक्षिशब्दस्यैकारांतादेशः। स चोदात्तः। ईत्वे कृते सकृद्गतपरिभाषया पुनर्नुम् न भवति। सवर्णदीर्घः। नीचीः। निपूर्वादंचतेर्ऋत्विगित्यादिना क्विन्। अनिदितामिति नलोपः। अंचतेश्चोपसंख्यानमिति ङीप्। अच इत्यकारलोपे चाविति दीर्घत्वं। न्यधी चेति गतेः प्रकृतिस्वरत्वं। अरुषीः। अरुषमिति रूपनाम। ऋहनिभ्यामुषच् इत्यर्तेरुषच्। छंदसीवनिपाविति मत्वर्थीय ईकारः ॥

॥ इति प्रथमस्य पंचमेऽष्टादशो वर्गः ॥

रयिर्नेति दशर्चं नवमं सूक्तं पराशरस्यार्षं त्रैष्टुभमाग्नेयं। अनुक्रांतं च। रयिर्नेति। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

तत्र प्रथमामृचमाह ॥

रयिर्न यः पितृवित्तो वयोधाः सुप्रणीतिश्चिकितुषो न शासुः।
स्योनशीरतिथिर्न प्रीणानो होतेव सद्म विधतो वि तारीत् ॥ १ ॥

रयिः। न। यः। पितृऽवित्तः। वयःऽधाः। सुऽप्रनीतिः। चिकितुषः। न। शासुः।
स्योनऽशीः। अतिथिः। न। प्रीणानः। होताऽइव। सद्म। विधतः। वि। तारीत् ॥ १ ॥

पितृवित्तः पितुः सकाशाल्लब्धो रयिर्धनमिव योऽग्निर्वयोधा अन्नस्य दाता।

यथा पैतृकं धनं विश्रंभेण व्यवह्रियमाणं सदन्नप्रदं भवति तद्वदग्निरपि सर्वेषु यज्ञेषु विश्रंभेण व्यवहृतः सन् अन्नप्रदो भवतीत्यर्थः। चिकितुषो विदुषो धर्मशास्त्राभिज्ञस्य शासुः शासनमिव सुप्रणीतिः सुखेन प्रणेतव्यः। यथा विद्वच्छासनं सर्वेष्वनुष्ठेयेषु तत्तत्संशयनिर्णयाय नीयते। तद्वदग्निरपि सर्वेषु यज्ञेषु प्रणीयते। यश्च स्योनशीः सुखप्रदे गार्हपत्यायतनादौ शयानोऽतिथिर्न सुखासन उपवेशितोऽर्घपाद्यादिभिः सत्कृतोऽतिथिरिव प्रीणानो हविर्भिस्तर्पणीयः सोऽग्निर्विधतः परिचरतो यजमानस्य सद्म गृहं वितारीत्। प्रवर्धयति ददाति वा। तत्र दृष्टांतः। होतेव। होता होमकर्ताध्वर्युस्तत्तत्कर्मकरणेन फलैर्यजमानस्य गृहं यथा वर्धयति तद्वत्॥ पितृवित्तः। विद्लृ लाभे। कर्मणि निष्ठा। यस्य विभाषेतीट्प्रतिषेधः। विभाषा गमहनविद्विशामिति क्वसावस्य धातोरिटो विकल्पितत्वात् तत्रापि विशिसाहचर्यात्तौदादिक एव विदिर्गृह्यत इत्युक्तं। वित्तो भोगप्रत्यययोः। पा० ८.२.५८.। इति निष्ठानत्वाभावो निपातितः। वयोधाः। डुधाञ् धारणपोषणयोः। आतो मनिन्निति विच्। सुप्रणीतिः। प्रणीयत इति प्रणीतिः। कर्मणि क्तिन्। तादौ चेति गतेः प्रकृतिस्वरत्वं। पुनः सुशब्देन समासे कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात्कृदुत्तरपदप्रकृतिस्वरत्वं। चिकितुषः। लिटः क्वसुः। षष्ठ्येकवचने वसोः संप्रसारणमिति संप्रसारणं। शासिवसिघसीनां चेति षत्वं। शासुः। शासु अनुशिष्टौ। भृमृशीङ्तॄचरित्सरितनिधनिमिमस्जिभ्य उरिति विधीयमान उप्रत्ययो बहुलवचनादस्मादपि द्रष्टव्यः। तत्र निदित्यनुवृत्तेराद्युदात्तत्वं। स्योनशीः। स्योनमिति सुखनाम। स्योने सुखकरे गार्हपत्यादिस्थाने शेत इति स्योनशीः। क्विप् चेति क्विप्। प्रीणानः। प्रीञ् तर्पणे। कर्मणि शानचि व्यत्ययेन श्ना। विधतः। विध विधाने। विधतिः परिचरणकर्मेति नैरुक्ताः। तुदादित्वाच्छप्रत्ययः। शतुरनुम इति विभक्तेरुदात्तत्वं॥

द्वितीयामृचमाह॥

देवो न यः सविता सत्यमन्मा क्रत्वा निपाति वृजनानि विश्वा।
पुरुप्रशस्तो अमतिर्न सत्य आत्मेव शेवो दिधिषाय्यो भूत्॥ २॥
देवः। न। यः। सविता। सत्यऽमन्मा। क्रत्वा। निऽपाति। वृजनानि। विश्वा।
पुरुऽप्रशस्तः। अमतिः। न। सत्यः। आत्माऽइव। शेवः। दिधिषाय्यः। भूत्॥ २॥

देवो न सविता द्योतमानः सर्वस्य प्रेरकः सूर्य इव योऽग्निः सत्यमन्मा सत्यज्ञानो यथार्थदर्शी सोऽग्निः ऋत्वात्मीयेन कर्मणा विश्वा वृजनानि। विभक्तिव्यत्ययः। सर्वेभ्यः संग्रामेभ्यो निपाति। नितरां पालयति। वर्ज्यंते हिंस्यंतेऽस्मिन्निति वृजनं संग्रामः। अपि च पुरुप्रशस्तः पुरुभिर्यजमानैः स्तुतोऽग्निरमतिर्न। रूपनामैतत्। रूपमिव सत्यो वाधरहितः। रूप्यत इति रूपं स्वरूपं। यथा पृथिव्यादेः स्वरूपमागमापायिषु विशेषेषु सत्स्वपि स्वयमेकरूपेण नित्यं भवति। तद्वदग्निरप्युच्चावचेषु सर्वेषु कर्मसु स्वयमेक एव व्याप्य वर्तते। सोऽग्निः शेवः सुखकरः। तत्र दृष्टांतः। आत्मेव। परमप्रेमास्पदतया निरतिशयानंदस्वरूप आत्मा यथा सर्वान्सुखयति। एतस्यैवानंदस्यान्यानि भूतानि मात्रमुपजीवंति। एष ह्येवानंदयतीति च श्रवणात्। तद्वदग्निरपि स्वर्गादिफलहेतुतया सुखयति। *एवंभूतोऽग्निर्दिधिषाय्यो भूत्। सर्वैर्यजमानैर्धारणीयो भवति। परित्यागे हि वीरहत्यालक्षणो दोषो भवति। तथा च तैत्तिरीयकं। वीरहा वा एष देवानां* योऽग्निमुद्वासयत इति॥ सत्यमन्मा। मननं मन्म। मन ज्ञाने। अन्येभ्योऽपि दृश्यंत इति मनिन्। सत्यमवितथं मन्म यस्य। वहुव्रीहिस्वरः। वृजनानि। वृजी वर्जने। कृपॄवृजीत्यादिना क्युप्रत्ययः। पुरुप्रशस्तः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वे प्राप्ते प्रवृद्धादीनां च। पा० ६. २. १४७.। इत्युत्तरपदांतोदात्तत्वं। स ह्याकृतिगण इत्युक्तं। अमतिः। अम गत्यादिषु। अमेरतिः। दिधिषाय्यः। दधातेर्दिधिषाय्यः। उ० ३. ९६.। इति साय्यप्रत्ययांतो निपात्यते॥

तृतीयामृचमाह॥

देवो न यः पृथिवीं विश्वधाया उपक्षेति हितमित्रो न राजा।
पुरःसदः शर्मसदो न वीरा अनवद्या पतिजुष्टेव नारी॥ ३॥

देवः। न। यः। पृथिवीं। विश्वऽधायाः। उपऽक्षेति। हितऽमित्रः। न। राजा।
पुरःऽसदः। शर्मऽसदः। न। वीराः। अनवद्या। पतिजुष्टाऽइव। नारी॥ ३॥

देवो न द्योतमानः सूर्य इव योऽग्निर्विश्वधायाः सर्वस्य जगतो धर्ता। यथा सूर्यो वृष्ट्यादिप्रदानेन सर्वं जगद्धत्ते। एवमग्निरपि यज्ञादिसाधनेन कृत्स्नस्य जगतो धारयिता। सोऽग्निः पृथिवीं पृथिव्यामुपक्षेति। सर्वेषां प्रियः सन्यज्ञगृहादौ निवसति। तत्र दृष्टांतः। हितमित्रो न राजा। हितान्यनुकूलानि मि-

चाणि यस्य तादृशो राजा यथा सुखेन निवसति तद्वत्। यथा सर्वजनमित्रो राजा। एवमग्निरपि सर्वजनमित्र इत्यर्थः। न ह्यग्निं कश्चन द्विष्टे। यस्याग्नेः पुरःसदः पुरस्तात्सीदंत उपविशंतः पुरुषाः शर्मसदो न वीराः पितृगृहे वर्तमानाः पुत्रा इव वर्तंते। पिता पुत्रानिवाग्निः स्वस्य परिचारकान्रक्षतीति भावः। सोऽयमग्निरतिशयेन शुद्धः कर्मयोग्यो भवति। तत्र दृष्टांतः। अनवद्यानिंदिता पतिजुष्टेव नारी स्वपतिना सेविता स्वीकृता योषिदिव। सा यथा पातिव्रत्येन शुद्धा सती सर्वकर्मयोग्या भवति। एवमग्निरपि॥ विश्वधायाः। गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति वचनात्कारकपूर्वादपि दधातेर्वहिहाधाञ्भ्यश्छंदसीत्यसुन्। णिदित्यनुवृत्तेरातो युक् चिण्कृतोरिति युक्। मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं। उपक्षेति। क्षि निवासगत्योः। बहुलं छंदसीति विकरणस्य लुक्। अनवद्या। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। पतिजुष्टेव। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। नारी। नृनरयोर्वृद्धिश्चेति शार्ङ्गरवादिषु पाठात् ङीनंत आद्युदात्तः॥

चतुर्थीमृचमाह॥

तं त्वा नरो दम आ नित्यमिद्धमग्ने सचंत क्षितिषु ध्रुवासु।
अधि द्युम्नं नि दधुर्भूर्यस्मिन्भवा विश्वायुर्धरुणो रयीणां॥४॥

तं। त्वा। नरः। दमे। आ। नित्यं। इद्धं। अग्ने। सचंत। क्षितिषु। ध्रुवासु।
अधि। द्युम्नं। नि। दधुः। भूरि। अस्मिन्। भव। विश्वऽआयुः। धरुणः। रयीणां॥४॥

हे अग्ने तं त्वा पूर्वोक्तगुणविशिष्टं त्वां नरो यज्ञस्य नेतारो यजमाना ध्रुवासु क्षितिषु निश्चलासु चलनरहितासु भूमिषु। निरुपद्रवेषु ग्रामेष्वित्यर्थः। दमे स्वकीये यज्ञगृहे नित्यमिद्धमनवरतं समिद्भिः प्रज्वलितं कृत्वासचंत। आभिमुख्येन सेवंते। किंच। अस्मिन्नग्नौ द्युम्नं हविर्लक्षणमन्नं भूरि चरुपुरोडाशादिरूपेण बहुविधमधिनिदधुः। स्थापितवंतः। एवंगुणविशिष्टो योऽग्निः स त्वं विश्वायुरुक्तप्रकारेण सर्वान्नो भूत्वा रयीणां धनानां धरुणो धारयिता भव। अस्मभ्यं दातुं धनानि धारयेत्यर्थः॥ सचंत। षच समवाये। छांदसो वर्तमाने लङ्। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। भवा। द्व्यचोऽतस्तिङ इति संहितायां दीर्घः। धरुणः। धारेर्णिलुक्चेत्युनप्रत्ययः॥

पंचमीमृचमाह ॥

वि पृक्षो॑ अग्ने म॒घवा॑नो अश्युर्वि सू॒रयो॑ दद॑तो॒ विश्व॒मायुः॑ ।
स॒नेम॒ वाजं॑ समि॒थेष्व॒र्यो भा॒गं दे॒वेषु॒ श्रव॑से॒ दधा॑नाः ॥ ५ ॥

वि । पृक्षः॑ । अ॒ग्ने॒ । म॒घऽवा॑नः । अ॒श्यु॒रिति॑ । वि । सू॒रयः॑ । दद॑तः । विश्व॑म् । आयुः॑ ।
स॒नेम॑ । वाज॑म् । स॒मऽइ॒थेषु॑ । अ॒र्यः । भा॒गम् । दे॒वेषु॑ । श्रव॑से । दधा॑नाः ॥ ५ ॥

हे अग्ने मघवानो हविर्लक्षणेन धनेन युक्ता यजमानाः पृक्षोऽन्नानि व्यश्युः । व्याप्नुवंतु । त्वयानुगृहीताः सर्वाण्यन्नानि लभंतां । ये च सूरयो विद्वांसस्त्वां स्तुवंति ददतश्च ये तुभ्यं हवींषि ददतः प्रयच्छंतो वर्तंते ते सर्वे विश्वमायुः सर्वं जीवितं व्यश्युः । व्याप्नुवंतु । वयं च समिथेषु संग्रामेष्वर्योऽरेः शत्रोः संबंधिनं वाजमन्नं सनेम । त्वदनुग्रहात्संभजेमहि । तदनंतरं देवेषु त्वत्प्रमुखेष्विंद्रादिषु श्रवसे यशसे तदर्थं भागं हविर्भागं दधानाः स्थापयंतो भूयास्मेति शेषः ॥ अश्युः । अशू व्याप्तौ । व्यत्ययेन परस्मैपदं । बहुलं छंदसीति विकरणस्य लुक् । ददतः । नाभ्यस्ताच्छतुरिति नुमागमप्रतिषेधः । अभ्यस्तानामादिरित्याद्युदात्तत्वं । सनेम । वन षण संभक्तौ । व्यत्ययेन शः । अर्यः । अरिशब्दात्षष्ठ्येकवचने जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणाभावे यणादेशः । अरिशब्द अच इरितीप्रत्ययांतोऽंतोदात्तः । उदात्तयण इति विभक्तेरुदात्तत्वं । भागं । कर्षात्वत इत्यंतोदात्तत्वं ॥

॥ इति प्रथमस्य पंचम एकोनविंशो वर्गः ॥

षष्ठीमृचमाह ॥

ऋ॒तस्य॒ हि धे॒नवो॑ वावशा॒नाः स्मदू॑ध्नीः पी॒पयं॑त॒ द्युभ॑क्ताः ।
प॒रा॒वतः॑ सुम॒तिं भिक्ष॑माणा॒ वि सिंध॑वः स॒मया॑ सस्रु॒रद्रिं॑ ॥ ६ ॥

ऋ॒तस्य॑ । हि । धे॒नवः॑ । वा॒व॒शा॒नाः । स्मत्ऽऊ॑ध्नीः । पी॒पयं॑त । द्युऽभ॑क्ताः ।
प॒रा॒ऽवतः॑ । सु॒ऽम॒तिम् । भिक्ष॑माणाः । वि । सिंध॑वः । स॒मया॑ । स॒स्रुः॒ । अद्रि॑म् ॥ ६ ॥

ऋतस्य हि ऋतं देवयजनदेशं प्राप्तमग्निमेव धेनवोऽग्निहोत्रादिहविषां दोग्ध्यो गावः पीपयंत । क्षीरादिलक्षणं गव्यमपाययन् । कीदृश्यो गावः । वावशानाः । अग्निं पुनः पुनः कामयमानाः । स्मदूध्नीः । स्मच्छब्दो नित्यशब्द-समानार्थः । नित्यमूधसा युक्ताः । सर्वदा पयसः प्रदात्र्य इत्यर्थः । द्युभक्ताः ।

दिवा प्रकाशेन संभक्ताः संश्लिष्टाः । तेजस्विन्य इत्यर्थः । अपि च सिंधवः स्यंदनशीला नद्यः सुमतिमस्याग्नेः शोभनामनुग्रहात्मिकां बुद्धिं भिक्षमाणा याचमानाः सत्योऽद्रिं समयाद्रेः पर्वतस्य समीपे परावतो दूरदेशाद्विसस्रुः । विशेषेण गच्छंति प्रवहंति । अग्नये दातव्यानां हविषां निष्पत्तये प्रवहंतीत्यर्थः ॥ ऋतस्य । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । वावशानाः । वश कांतौ । यङंताच्छानच् । न वश इति संप्रसारणप्रतिषेधः । बहुलं छंदसीति शपो लुक् । छंदस्युभयथेति शानच आर्धधातुकत्वादतोलोपयलोपौ । अत एव लसार्वधातुकानुदात्तत्वाभावे चित्स्वर एव शिष्यते । स्मदूध्नीः । स्मत् नित्यान्यूधांसि यासां । ऊधसोऽनङ् । पा० ५. ४. १३१. । इत्यनङादेशः समासांतः । संख्याव्ययादेर्ङीप् । पा० ४. १. २६. । इति ङीप् । भसंज्ञायामल्लोपोऽन इत्यलोपः । ङीपः पित्त्वादनुदात्तत्वे बहुव्रीहिस्वर एव शिष्यते । पीपयंत । पा पाने । अस्माद्धेतुमण्णिचि शाच्छासाह्वेति युक् । ण्यंताल्लुङि च्लेश्चङादेशादि । चङ्यन्यतरस्यामिति चङः पूर्वस्योदात्तत्वं । हि चेति निघातप्रतिषेधः । परावतः । परागतात् । दूरं हि परागतं भवति । अस्मिन्धात्वर्थे गम्यमान उपसर्गाच्छंदसि धात्वर्थे । पा० ५. १. ११८. । इति वतिः ॥

सप्तमीमृचमाह ॥

त्वे अ॒ग्ने सु॑म॒तिं भिक्ष॑माणा दि॒वि श्रवो॑ दधिरे य॒ज्ञिया॑सः ।
नक्ता॑ च च॒क्रुरु॒षसा॒ विरू॑पे कृ॒ष्णं च॒ वर्ण॑मरु॒णं च॒ सं धुः॑ ॥ ७ ॥

त्वे इति॑ । अ॒ग्ने॒ । सु॒ऽम॒तिं । भिक्ष॑माणाः । दि॒वि । श्रवः॑ । द॒धि॒रे॒ । य॒ज्ञिया॑सः ।
नक्ता॑ । च॒ । च॒क्रुः । उ॒षसा॑ । विरू॑पे॒ इति॒ विऽरू॑पे । कृ॒ष्णं । च॒ । वर्ण॑ । अ॒रु॒णं ।
च॒ । सं । धु॒रिति॑ धुः ॥ ७ ॥

हे अग्ने सुमतिं शोभनामनुग्रहात्मिकां बुद्धिं भिक्षमाणा याचमाना यज्ञियासो यज्ञार्हाः सर्वे देवा दिवि द्योतमाने त्वे त्वयि श्रवो हविर्लक्षणमन्नं दधिरे । अस्थापयन् । अग्निर्देवानामन्नाद इति श्रुतेः । तदनंतरं तादृशे हविर्युक्तायानुष्ठानाय विरूपे विविधरूपे उषसोषःकालोपलक्षितमहर्नक्ता च नक्तं रात्रिं च चक्रुः । अकुर्वन् । एतदेव स्पष्टयति । कृष्णं च वर्णं रात्र्यां श्यामलवर्णमंधकारमह्न्यरुणमारोचनं श्वेतवर्णं तेजश्च संधुः । सम्यक् स्थापितवंतः ॥ त्वे । सुपां सुलुगिति सप्तम्याः शे आदेशः । नक्ता । तेनैव द्वितीयाया डादेशः । उषसा ।

तेनैव विभक्तेराकारः । धुः । डुधाञ् धारणपोषणयोः । लुङि गातिस्थेति सिचो लुक् । आत इति झेर्जुसादेशः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः ॥

अष्टमीमृचमाह ॥

यान्राये मर्तान्त्सुषूदो अग्ने ते स्याम मघवानो वयं च ।
छायेव विश्वं भुवनं सिसक्ष्यापप्रिवान्रोदसी अंतरिक्षं ॥ ८ ॥

यान् । राये । मर्तान् । सुसूदः । अग्ने । ते । स्याम । मघऽवानः । वयं । च ।
छायाऽइव । विश्वं । भुवनं । सिसक्षि । आपप्रिऽवान् । रोदसी इति । अंतरिक्षं ॥ ८ ॥

यान्मर्तान्मनुष्यानस्मान्राये धनाय सुषूदः । अग्निहोत्रादिकर्मसु प्रेरयसि । ते तादृशा वयं च मघवानो धनिनः स्याम । भवेम । रोदसी द्यावापृथिव्यावंतरिक्षं चापप्रिवान् स्वतेजसा वृष्ट्युदकेन वापूरितवांस्त्वं च विश्वं भुवनं सर्वं जगत् सिसक्षि । सेवसे । अनुगृह्य सर्वं रक्षसीत्यर्थः । तत्र दृष्टांतः । छायेव । यथा छत्रादेश्छायातपादिजनितं क्लेशं निवार्य रक्षति तद्वत् ॥ राये । ऊडिदमिति विभक्तेरुदात्तत्वं । सुषूदः । षूद प्रेरणे । लेट्यडागमः । बहुलं छंदसीति शपः श्लुः । अभ्यस्तानामादिरित्याद्युदात्तत्वं । यद्वृत्तान्नित्यमिति निघातप्रतिषेधः । सिसक्षि । षच समवाये । बहुलं छंदसीति शपः श्लु । इदित्यनुवृत्तौ वहुलं छंदसीत्यभ्यासस्येत्वं । आपप्रिवान् । प्रा पूरणे । लिटः क्वसुः । वस्वेकाजाद्घसामितीडागमः । आतो लोप इटि चेत्याकारलोपः । द्विर्वचनेऽचीति स्थानिवद्भावात् द्विर्भावादि ॥

नवमीमृचमाह ॥

अर्वद्भिरग्ने अर्वतो नृभिर्नॄन्वीरैर्वीरान्वनुयामा त्वोताः ।
ईशानासः पितृवित्तस्य रायो वि सूरयः शतहिमा नो अश्युः ॥ ९ ॥

अर्वत्ऽभिः । अग्ने । अर्वतः । नृऽभिः । नॄन् । वीरैः । वीरान् । वनुयाम । त्वाऽऊताः ।
ईशानासः । पितृऽवित्तस्य । रायः । वि । सूरयः । शतऽहिमाः । नः । अश्युः ॥ ९ ॥

हे अग्ने त्वोतास्त्वया रक्षिताः संतो वयमर्वद्भिरस्मदीयैरश्वैरर्वतः शत्रुसंबंधिनोऽश्वान्नृभिरस्मदीयैर्भटैर्नॄन् शत्रोर्भटान् । वीर्याज्जायंत इति वीराः पुत्राः । तैर्वीरान् शत्रुपुत्रांश्च वनुयाम । हन्याम । वनुष्यतिर्हंतिकर्मानवगतसंस्कारो भवति । नि० ५. २. । इति यास्कः । पितृवित्तस्य पित्रादिपरंपरया लब्धस्य रायो धनस्येशानासः

स्वामिनः सूरयो विद्वांसो नोऽस्माकं पुत्राः शतहिमाः शतं संवत्सरान् जीवंतः संतो व्यश्युः। विशेषेण भुंजतां। अस्मदीयानां पुत्राणामारोग्यं दीर्घमायुश्च भवत्वित्यर्थः ॥ त्वोताः। त्वयोताः। प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः। व्यत्ययेनात्वं। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। शतहिमाः। अत्र हिम-शब्देन तद्वान्हेमंतो लक्ष्यते। ब्राह्मणं च भवति। शतं हिमा इत्याह। शतं त्वा हेमंतानि धिषीयेति वावैतदाहेति। शतं हिमाः शतं हेमंतर्तवो येषां ते शतसंवत्स-रजीविन इत्यर्थः। अश्युः। अश भोजने। बहुलं छंदसीति विकरणस्य लुक् ॥

दशमीमृचमाह ॥

एता ते॑ अग्न उ॒चथा॑नि वेधो॒ जुष्टा॑नि सन्तु॒ मन॑से हृ॒दे च॑।

शके॑म रा॒यः सु॒धुरो॑ य॒मं तेऽधि॒ श्रवो॑ दे॒वभ॑क्तं॒ दधा॑नाः ॥ १० ॥

एता। ते। अग्ने। उचथानि। वेधः। जुष्टानि। संतु। मनसे। हृदे। च।

शकेम। रायः। सुऽधुरः। यमं। ते। अधि। श्रवः। देवऽभक्तं। दधानाः ॥ १० ॥

हे वेधः। मेधाविनामैतत्। मेधाविन्नग्ने। एतोचथान्येतानीदानीमस्माभिः प्रयुक्तानि स्तोत्राणि ते तव मनसे मनोवृत्तये हृदे तद्वृत्तिमतेऽन्तःकरणाय च जुष्टानि संतु। प्रियाणि भवंतु। ते तव संबंधिनः सुधुरः सुष्ठु निर्वाहकस्य। यद्वा शोभनं धूर्वति दारिद्र्यं हिनस्तीति सुधूः। तादृशस्य रायो धनस्य यमं नियमनं कर्तुं शकेम। शक्ता भूयास्म। किं कुर्वंतः। देवभक्तं देवैः संभजनीयं श्रवो हविर्लक्षणमन्नमधिदधानाः। अग्नेरुपरि धारयंतः। अग्नौ हविर्भिर्होमं कुर्वंत इत्यर्थः ॥ उचथानि। वच परिभाषणे। रुदिविदिभ्यां किदिति विधीयमानोऽथ-प्रत्ययः कित्त्वं च बहुलवचनादस्मादपि भवति। वच्यादिना संप्रसारणं। जुष्टानि। जुष्टार्पिते च छंदसि नित्यं मंत्रे। पा० ६. १. २०९. २१०.। इत्याद्युदात्तत्वं। हृदे। पद्दन्नित्यादिना हृदयशब्दस्य हृदादेशः। शकेम। शक्लृ शक्तौ। लिङ्याशिष्यङ्। सुधुरः। धुर्वी हिंसार्थः। क्विप् चेति क्विप्। राल्लोप इति वकारलोपः। न पूजनादिति समासांतप्रतिषेधः। देवभक्तं देवभक्तं। तृतीया कर्मणीति पूर्वपद-प्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य पंचमे विंशो वर्गः ॥

॥ इति प्रथमे मंडले द्वादशोऽनुवाकः ॥

त्रयोदशानुवाक एकादश सूक्तानि। तत्रोपप्रयंत इति नवर्चं प्रथमं सूक्तं। तत्रानुक्रम्यते। उपप्रयंतो नव गोतमो राहूगणो गायत्रं त्विति। अस्यायमर्थः। रहूगणनामा कश्चिदृषिः। तस्य पुत्रो गोतमोऽस्य सूक्तस्य ऋषिः। गायत्रं त्वित्युक्तत्वादिदमुत्तरं च गायत्रीछंदस्कं। परमाग्नेयमैंद्रादिति परिभाषितत्वादग्निर्देवता॥ प्रातरनुवाकस्याग्नेये क्रतौ गायत्रे छंदस्येतदादिके द्वे सूक्ते। सूचितं च। आपो रेवतीः क्षयथा हि वस्व उपप्रयंत इति सूक्ते। आ० ४.१३.। इति। आश्विनशस्त्रेऽप्येते सूक्ते प्रातरनुवाकन्यायेनेत्यतिदेशात्॥ पृष्ठ्यषडहस्य प्रथमेऽहन्येतदेव सूक्तमाज्यशस्त्रं। सूचितं च। उपप्रयंत इति तु प्रथमेऽहन्याज्यं। आ० ७.१०.। इति॥

तत्र प्रथमामृचमाह॥

उपप्रयंतो अध्वरं मंत्रं वोचेमाग्नये। आरे अस्मे च शृण्वते॥१॥

उपऽप्रयंतः। अध्वरं। मंत्रं। वोचेम। अग्नये। आरे। अस्मे इति। च। शृण्वते॥१॥

अध्वरं हिंसाप्रत्यवायरहितमग्निष्टोमादियज्ञमुपप्रयंत उपेत्य प्रकर्षेण यंतो गच्छंतः। प्राप्तविच्छेदेन सम्यगनुतिष्ठंत इत्यर्थः। तादृशा वयमग्नयेऽंगनादिगुणयुक्ताय देवाय मंत्रं मननसाधनमेतत्सूक्तरूपं स्तोत्रं वोचेम। वक्तारो भूयास्मेत्याशास्यते। कीदृशायाग्नये। आरेऽस्मे च शृण्वते। चशब्दोऽप्यर्थ आरेशब्दात्परो द्रष्टव्यः। आरे च दूरेऽपि स्थित्वास्माकं स्तुतीः शृण्वते। अस्मासु प्रीत्यतिशयेन सर्वत्र प्रवर्तमानोऽग्निरस्मदीयमेव स्तोत्रं शृणोतीति भावः॥ वोचेम। ब्रुवो वचिः। लिङ्याशिष्यङ्। वच उमित्युमागमः। शृण्वते। शतुरनुम इति विभक्तेरुदात्तत्वं॥

द्वितीयामृचमाह॥

यः स्नीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु। अरक्षद्दाशुषे गयं॥२॥

यः। स्नीहितीषु। पूर्व्यः। संऽजग्मानासु। कृष्टिषु। अरक्षत्। दाशुषे। गयं॥२॥

पूर्व्यश्चिरंतनो योऽग्निः स्नीहितीषु वधकारिणीषु कृष्टिषु शत्रुभूतासु प्रजासु संजग्मानासु संगतासु सतीषु दाशुषे हवींषि दत्तवते यजमानाय गयं धनमरक्षत्। रक्षति। तस्मै मंत्रं वोचेमेति पूर्वेण संबंधः॥ स्नीहितीषु। ष्णिह स्नेहने। चुरादिः। स्नेहयतीति वधकर्मसु पठितः। स्नेह्यंते हिंस्यंते प्रजा आभिरिति स्नेहितयः। करणे क्तिन्। तितुत्रेष्वग्रहादीनामिति वक्तव्यमिति वचनान्निगृ-

हीतिर्निपठितिरितिवदिडागमः । व्यत्ययेनैकारस्यैकारादेशः । क्तिनो दीर्घश्च । निह्वादाद्युदात्तत्वं । संजग्मानाम् । समो गम्यृच्छीत्यात्मनेपदे लिटः कानच् । गमहनेत्यादिनोपधालोपः । अरक्षत् । छंदसि लुङ्लङ्लिट इति वर्तमाने लङ् ॥

अग्निमंथने जातायानुब्रूहीत्युक्त उत ब्रुवंत्वित्येषानुवचनीया । प्रातर्वैश्वदेव्यामिति खंडे सूचितं । शिष्टेनोत्तरामुत ब्रुवंतु जंतवः । आ॰ २. १६. । इति ॥ तथा साकमेधेषु मरुद्भ्यः क्रीडिभ्यः पुरोडाशमित्यस्यामिष्टावेषैव प्रथमाज्यभागानुवाक्या । सूचितं च । मरुद्भ्यः क्रीळिभ्य उत्तरोत ब्रुवंतु जंतव इति ॥

तामेतां सूक्ते तृतीयामृचमाह ॥

उत ब्रुवंतु जंतव उदग्निर्वृत्रहाजनि । धनंजयो रणेरणे ॥ ३ ॥

उत । ब्रुवंतु । जंतवः । उत् । अग्निः । वृत्रऽहा । अजनि । धनंऽजयः । रणेऽरणे ॥ ३ ॥

अग्निरुदजनि । अरण्योः सकाशादुत्पन्नः । उतानंतरं जंतवो जाताः सर्वे ऋत्विजो ब्रुवंतु । तमग्निं स्तुवंतु । कीदृशोऽग्निः । वृत्रहा । वृत्राणामावरकाणां शत्रूणां हंता रणे रणे सर्वेषु संग्रामेषु धनंजयः शत्रुधनानां जेता ॥ धनंजयः । संज्ञायां भृतॄवृजीति । पा॰ ३. २. ४६. । खच् । अरुर्द्विषदजंतस्य । पा॰ ६. ३. ६७. । इति मुम् । चित्स्वरेणांतोदात्तत्वं । रणे रणे । रण शब्दार्थः । रणंति दुंदुभयोऽस्मिन्निति रणः संग्रामः । वशिरण्योरुपसंख्यानं । पा॰ ३. ३. ५८. ३. । इत्यप् । नित्यवीप्सयोरिति द्विर्वचनं । आम्रेडितानुदात्तत्वं ॥

चतुर्थीमृचमाह ॥

यस्य दूतो असि क्षये वेषि हव्यानि वीतये । दस्मत्कृणोष्यध्वरं ॥ ४ ॥

यस्य । दूतः । असि । क्षये । वेषि । हव्यानि । वीतये । दस्मत् । कृणोषि । अध्वरं ॥ ४ ॥

हे अग्ने यस्य यजमानस्य क्षये देवयजनलक्षणे गृहे देवानां दूतस्त्वमसि । भवसि । यस्य च हव्यानि चरुपुरोडाशादीनि हवींषि वीतये देवानां भक्षणाय वेषि । गमयसि । यस्य चाध्वरं यज्ञं दस्मत् सर्वदर्शनीयं कृणोषि । करोषि तमित्सुहव्यमित्युत्तरया संबंधः ॥ वेषि । वी गत्यादिषु । अंतर्भावितण्यर्थाल्लट् । अदादित्वाच्छपो लुक् । पादादित्वान्निघाताभावः । दस्मत् । दसि दंसनदर्शनयोः । इषियुधींधीत्यादिना मक् । दस्ममित्यत्र मकारस्य वर्णव्यत्ययेन तकारः । कृणोषि । कृवि हिंसाकरणयोश्च । धिन्विकृण्व्योरच्चेत्युप्रत्ययः । तत्संनियोगेन वकारस्याकारः ।

तस्यातो लोपे सति स्थानिवद्भावाल्लघूपधगुणाभावः । यस्येत्यनुषंगाभिघाताभावः ॥

पंचमीमृचमाह ॥

तमित्सुहव्यमंगिरः सुदेवं सहसो यहो । जना आहुः सुबर्हिषं ॥ ५ ॥

तं । इत् । सुऽहव्यं । अंगिरः । सुऽदेवं । सहसः । यहो इति । जनाः । आहुः । सुऽबर्हिषं ॥ ५ ॥

हे सहसो यहो । बलस्य पुत्र । अंगिरः । अंगनादिगुणयुक्ताग्ने । यो यजमानः पूर्वमुक्तस्तमित् तमेव यजमानं सुहव्यं शोभनहविष्कं सुदेवं शोभनदेवतं सुबर्हिषं । बर्हिरिति यज्ञनाम । शोभनयज्ञं च जनाः सर्वे मनुष्या आहुः । कथयंति ॥ सुहव्यमित्यादिषु नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । सहसो यहो । सुबामंत्रित इति परांगवद्भावात्षष्ठ्यामंत्रितसमुदायस्याष्टमिकमामंत्रितानुदात्तत्वं ॥

॥ इति प्रथमस्य पंचम एकविंशो वर्गः ॥

षष्ठीमृचमाह ॥

आ च वहासि ताँ इह देवाँ उप प्रशस्तये । हव्या सुश्चंद्र वीतये ॥ ६ ॥

आ । च । वहासि । तान् । इह । देवान् । उप । प्रऽशस्तये । हव्या । सुऽचंद्र । वीतये ॥ ६ ॥

हे सुश्चंद्र शोभनाह्लादनाग्ने तान्देवानिहास्मिन्कर्मण्युपास्मत्समीपं प्रशस्तये स्तुतय आवहासि च । आवह प्रापय च । आगतेभ्यस्तेभ्यो हव्या हव्यानि चरुपुरोडाशादीनि हवींषि वीतये भक्षणाय प्रापयेत्यर्थः ॥ वहासि । वह प्रापणे । लेट्याडागमः । प्रशस्तये । शंसु स्तुतौ । भावे क्तिन् । नितुचेतीट्प्रतिषेधः । अनिदितामिति नलोपः । तादौ चेति गतेः प्रकृतिस्वरत्वं । सुश्चंद्र । ह्रस्वाच्चंद्रोत्तरपदे मंत्र इति सुट् ॥

सप्तमीमृचमाह ॥

न योरुपब्दिरश्व्यः शृण्वे रथस्य कच्चन । यदग्ने यासि दूत्यं ॥ ७ ॥

न । योः । उपब्दिः । अश्व्यः । शृण्वे । रथस्य । कत् । चन । यत् । अग्ने । यासि । दूत्यं ॥ ७ ॥

हे अग्ने यद्यदा दूत्यं देवानां दूतत्वं यासि । प्राप्नोषि । कच्चन कदाचन तदानीं सर्वदापि योर्गच्छतस्तव रथस्याश्व्योऽश्वैरुत्पादित उपब्दिः श्रवणार्हः शब्दो न

शृण्वे। न श्रूयते। रथस्य शीघ्रगमनेनास्माभिः शब्दो नोपलभ्यत इत्यर्थः ॥ योः। या प्रापण इत्यस्मात् यो द्वे च। उ० १. २१.। इत्यौणादिकः कुप्रत्ययः। बहुलवचनाद्विर्भावाभावः। उपब्दिरित्येतत् श्रोतुमर्हस्य शब्दस्याख्या। तथा च तैत्तिरीयाणां प्रातिशाख्यं सशब्दमुपब्दिमत्। तै० प्रा० २. ११.। इति। शृण्वे। श्रु श्रवणे। कर्मणि लटि श्रुवः शृ चेति व्यत्ययेन श्रुः शृभावश्च। लोपस्त आत्मनेपदेष्विति तलोपः। हुश्नुवोः सार्वधातुक इति यणादेशः ॥

अष्टमीमृचमाह ॥

त्वोतो वाज्यह्रयोऽभि पूर्वस्मादपरः। प्र दाश्वाँ अग्ने अस्थात् ॥ ८ ॥

त्वाऽऊतः। वाजी। अह्रयः। अभि। पूर्वस्मात्। अपरः। प्र। दाश्वान्। अग्ने। अस्थात् ॥ ८ ॥

यः पुरुषः पूर्वस्मात् स्वस्मादधिकारादपरो निकृष्टो भवति। हे अग्ने स इदानीं दाश्वान् तुभ्यं हवींषि दाता सन् त्वोतस्त्वयोतो रक्षितो वाज्यन्नवान् अह्रयो लज्जारहितः। एवंभूतः सन् अभि प्रास्थात्। ऐश्वर्यमभिप्राप्य प्रतितिष्ठति। सर्वोत्कृष्टो भवतीत्यर्थः ॥ अह्रयः। ह्री लज्जायां। जिह्रेतीति ह्रयः। न ह्रयोऽह्रयः। अव्ययपूर्वपदप्रकृतिस्वरत्वं। दाश्वान्। दाशृ दाने। दाश्वान् साह्वानिति क्वसुप्रत्ययांतो निपातितः ॥

नवमीमृचमाह ॥

उत द्युमत्सुवीर्यं बृहदग्ने विवाससि। देवेभ्यो देव दाशुषे ॥ ९ ॥

उत। द्युऽमत्। सुऽवीर्यं। बृहत्। अग्ने। विवाससि। देवेभ्यः। देव। दाशुषे ॥ ९ ॥

उत अपि च हे देव द्योतमानाग्ने देवेभ्यो दाशुषे चरुपुरोडाशादीनि हवींषि दत्तवते तस्मै यजमानाय बृहत्प्रौढं धनं विवाससि। गमयितुमिच्छसि। प्रापयसीति यावत्। कीदृशं। द्युमत्। अतिशयेन दीप्तं। सुवीर्यं। शोभनवीर्योपेतं ॥ सुवीर्यं। वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं। विवाससि। वा गतिगंधनयोः। सनि द्विर्भावे सन्यत इतीत्वं। दाशुषे। चतुर्थ्येकवचने वसोः संप्रसारणमिति संप्रसारणं। शासिवसिघसीनां चेति षत्वं ॥

॥ इति प्रथमस्य पंचमे द्वाविंशो वर्गः ॥

जुषस्वेति पंचर्चं द्वितीयं सूक्तं। अनुक्रांतं च। जुषस्व पंचेति। ऋष्याद्याः

पूर्ववत् ॥ प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तः सूक्तविनियोगः । पशौ स्तोकानुवचन आद्या विनियुक्ता । सूत्रितं च । प्रेषितः स्तोकेभ्योऽन्वाह जुषस्व सप्रथस्तमं । आ० ३. ४. । इति ॥ तामेतां सूक्ते प्रथमामृचमाह ॥

जुषस्व सप्रथस्तमं वचो देवप्सरस्तमं । हव्या जुह्वान आसनि ॥ १ ॥

जुषस्व । सप्रथःऽतमं । वचः । देवप्सरःऽतमं । हव्या । जुह्वानः । आसनि ॥ १ ॥

हे अग्ने सप्रथस्तममतिशयेन विस्तीर्णं वचः स्तोत्रलक्षणमस्मदीयं वचनं जुषस्व । सेवस्व । कीदृशं । देवप्सरस्तमं । देवानां प्रीणयितृतमं । किं कुर्वन् । आसनि तवास्ये हव्या हव्यानि स्तोकलक्षणानि हवींषि जुह्वानः प्रक्षिपन् । इमानि स्तोकलक्षणानि हवींषि वृथा मा भुवन् तत्सर्वं त्वदीयेन मुखेन स्वीकुर्वित्यर्थः ॥ देवप्सरस्तमं । स्पृ प्रीतिबलनयोः । देवान् स्पृणोति प्रीणयतीति देवप्सराः । गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेत्यसुन् पूर्वपदप्रकृतिस्वरत्वं च । सकारपकारयोः स्थानविपर्ययः । अतिशयेन देवप्सरा देवप्सरस्तमः । जुह्वानः । जुहोतेर्व्यत्ययेन शानच् । अभ्यस्तानामादिरित्याद्युदात्तत्वं । आसनि । पद्दन्नित्यादिनास्यशब्दस्यासन् आदेशः ॥

द्वितीयामृचमाह ॥

अथा ते अंगिरस्तमाग्ने वेधस्तम प्रियं । वोचेम ब्रह्म सानसि ॥ २ ॥

अथ । ते । अंगिरःऽतम । अग्ने । वेधःऽतम । प्रियं । वोचेम । ब्रह्म । सानसि ॥ २ ॥

हे अंगिरस्तम । अतिशयेनांगनादिगुणयुक्त । यद्वा । अंगिरसां वरिष्ठ । वेधस्तम । वेधा इति मेधाविनाम । अतिशयेन मेधाविन्नग्ने । अथानंतरं ते तुभ्यं सानसि संभजनीयं प्रियं प्रीतिकरं ब्रह्म स्तोत्रं वोचेम । वक्तारो भूयास्म ॥ वोचेम । लिङ्याशिष्यङ् । वच उमित्युमागमः । सानसि । वन षण संभक्तौ । सानसिवर्णसीत्यादावसिच्प्रत्ययांतो निपात्यते ॥

तृतीयामृचमाह ॥

कस्ते जामिर्जनानामग्ने को दाश्वध्वरः । को ह कस्मिन्नसि श्रितः ॥ ३ ॥

कः । ते । जामिः । जनानां । अग्ने । कः । दाशुऽअध्वरः । कः । ह । कस्मिन् । असि । श्रितः ॥ ३ ॥

हे अग्ने जनानां मनुष्याणां मध्ये ते तव को जामिः। को बंधुः। त्वं सर्वैर्गुणैरधिकोऽसि। तवानुरूपो बंधुर्नास्तीति भावः। को दाश्वध्वरः। दाशुर्दत्तोऽध्वरो यज्ञो येन स तथोक्तः। त्वां यष्टुमपि समर्थः कोऽपि नास्तीत्यर्थः। को ह त्वं। कथंभूतस्त्वमीदृग्रूप इति सर्वैर्न ज्ञायस इत्यर्थः। कस्मिन् स्थाने श्रित आश्रितोऽसि वर्तसे तत्स्थानमपि न केनचित् ज्ञायते। अतस्त्वमस्माभिर्मांसदृष्टिभिः कथमुपलब्धव्य इत्यग्निः प्रशस्यते॥ दाश्वध्वरः। दाशृ दाने। उणादयो बहुलमिति बहुलवचनात्कर्मण्युण्प्रत्ययः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। यणादेश उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्येति स्वरितत्वं॥

चतुर्थीमृचमाह॥

त्वं जामिर्जनानामग्ने मित्रो असि प्रियः। सखा सखिभ्य ईड्यः॥४॥

त्वं। जामिः। जनानां। अग्ने। मित्रः। असि। प्रियः। सखा। सखिऽभ्यः। ईड्यः॥४॥

हे अग्ने त्वमुक्तप्रकारेणाचिंत्यरूपोऽप्यनुग्रहीतृतया सर्वेषां जनानां जामिर्बंधुरसि। तथा प्रियः प्रीणयिता त्वं यजमानानां मित्रः प्रमीतेस्त्रायकोऽसि। ईड्यः स्तुतिभिः स्तुत्यस्त्वं सखिभ्यः समानख्यानेभ्य ऋत्विग्भ्यः सखा सखिवदत्यंतं प्रियोऽसि॥ जामिः। जमु अदने। जमंति सहैकस्मिन्पात्रेऽदंतीति जामयो बंधवः। जनिघसिभ्यामिण्। उ० ४.१३१.। इति विधीयमान इण् बहुलवचनादस्मादपि द्रष्टव्यः। ईड्यः। ईड स्तुतौ। ईडवंदवृशंसदुहां ण्यत इत्याद्युदात्तत्वं॥

पंचमीमृचमाह॥

यजा नो मित्रावरुणा यजा देवाँ ऋतं बृहत्। अग्ने यक्षि स्वं दमं॥५॥

यज। नः। मित्रावरुणा। यज। देवान्। ऋतं। बृहत्। अग्ने। यक्षि। स्वं। दमं॥५॥

हे अग्ने नोऽस्मदर्थं मित्रावरुणा। एतत्संज्ञौ देवौ यज। हविषा पूजय। तथा देवानिंद्रादीन्यज। पूजय। ऋतं सत्यं यथार्थफलं यज्ञं च यजेत्येतदर्थं बृहत् प्रौढं स्वकीयं दमं यज्ञगृहं यक्षि। यज संगच्छस्व। त्वय्यंतर्विद्यमाने सति हि यज्ञगृहं पूज्यते॥ यजा। द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं। देवान्। दीर्घादटि समानपाद इति संहितायां नकारस्य रुत्वं। आतोऽटि नित्यमित्यनुनासिक आकारः। यत्वलोपौ। यक्षि। यजेर्बहुलं छंदसीति शपो लुक्॥

॥ इति प्रथमस्य पंचमे त्रयोविंशो वर्गः॥

का त इति पंचर्चं तृतीयं सूक्तं । का त इत्यनुक्रांतं । राहूगणो गोतम ऋषिः । त्रिष्टुप् छंदः । अग्निर्देवता ॥ प्रातरनुवाकस्याग्नेये क्रतौ त्रैष्टुभे छंदसीदमादिके द्वे सूक्ते ॥ सूचितं च । उप प्रजिन्वन्निति त्रीणि का त उपेतिरिति सूक्ते । आ० ४. १३. । इति ॥ आश्विनशस्त्रेऽप्येते प्रातरनुवाकातिदेशात् ॥

तत्र प्रथमामृचमाह ॥

का त उपेतिर्मनसो वराय भुवदग्ने शंतमा का मनीषा ।
को वा यज्ञैः परि दक्षं त आप केन वा ते मनसा दाशेम ॥ १ ॥
का । ते । उपऽइतिः । मनसः । वराय । भुवत् । अग्ने । शंऽतमा । का । मनीषा ।
कः । वा । यज्ञैः । परि । दक्षं । ते । आप । केन । वा । ते । मनसा । दाशेम ॥ १ ॥

हे अग्ने ते तव मनसो वराय निवारणायास्मास्ववस्थापनाय कोपेतिर्भुवत् । कीदृशमुपगमनं भवेत् । न काप्यस्ति । तवोचितमुपगमनं वयं कर्तुं न शक्नुम इति भावः । मनीषा स्तुतिः शंतमा तवातिशयेन सुखकरा का कीदृशी भवेत् । तवोचिता स्तुतिरपि नास्तीत्यर्थः । को वा यजमानो यज्ञैस्तव संबंधिभिर्यागैर्दक्षं वृद्धिं बलं वा पर्याप । पर्याप्नोत । न कोऽपीत्यर्थः । तवोचितान्यागाननुष्ठाय तैः फलं प्राप्यत इत्येतदपि दुर्घटमेवेति भावः । उपगमनादिकं तावदास्तां । तस्य सर्वस्य साधनभूतं मन एवास्माकं दुर्लभमित्याह । केनेति । हे अग्ने ते तुभ्यं केन मनसा कीदृश्या बुद्ध्या दाशेम । हवींषि प्रयच्छाम । तवोपगमनाद्यनुरूपं मनोऽस्माकं नोत्पद्यत इत्यर्थः ॥ उपेतिः । तादौ चेति गतेः प्रकृतिस्वरत्वं । वराय । वृञ् वरणे । अस्मादंतर्भावितण्यर्थात्ग्रहवृदनिश्चिगमश्चेत्यप् । तस्य पित्त्वादनुदात्तत्वे धातुस्वरः । भुवत् । लेट्यडागमः । बहुलं छंदसीति शपो लुक् । भूसुवोस्तिङीति गुणप्रतिषेधः । दक्षं । दक्ष वृद्धौ । भावे करणे वा घञ् । ञित्त्वादाद्युदात्तत्वं ॥

द्वितीयामृचमाह ॥

एह्यग्न इह होता नि षीदादब्धः सु पुरएता भवा नः ।
अवतां त्वा रोदसी विश्वमिन्वे यजा महे सौमनसाय देवान् ॥ २ ॥

आ। इहि। अग्ने। इह। होता। नि। सीद। अदब्धः। सु। पुरःऽएता। भव। नः।
अवतां। त्वा। रोदसी इति। विश्वमिन्वे इति विश्वंऽइन्वे। यज। महे। सौमनसाय।
देवान् ॥ २ ॥

हे अग्ने। एहि। आगच्छ। इहास्मिन्यज्ञे होता देवानामाह्वाता सन्निषीद। उपविश। नोऽस्माकं पुरएता पुरतो गंता सु भव। सुष्ठु भव। यस्मात्त्वमदब्धः। राक्षसादिभिरहिंस्योऽसि। तादृशं त्वां विश्वमिन्वे सर्वं व्याप्नुवत्यौ रोदसी द्यावापृथिव्यौ त्वा त्वामवतां। रक्षतां। आगत्योपविश्य च द्यावापृथिवीभ्यां रक्षितश्च सन् महे महते सौमनसाय सौमनस्याय देवान्दानादिगुणयुक्तानिंद्रादीन्यज। हविर्भिः पूजय॥ निषीद। सदेरप्रतेरिति षत्वं। सौमनसाय। सुमनसो भावः सौमनसं। तस्येदमिति संबंधसामान्य इत्यणप्रत्ययः। स चात्र भावलक्षणे संबंधविशेषे पर्यवस्यति। यद्वा हायनांतयुवादिभ्योऽण्। पा॰ ५. १. १३०.। इति भावेऽण्। युवादिष्वस्य पाठो द्रष्टव्यः॥

तृतीयामृचमाह॥

प्र सु विश्वान्रक्षसो धक्ष्यग्ने भवा यज्ञानामभिशस्तिपावा।
अथा वह सोमपतिं हरिभ्यामातिथ्यमस्मै चकृमा सुदाव्ने ॥ ३ ॥
प्र। सु। विश्वान्। रक्षसः। धक्षि। अग्ने। भव। यज्ञानां। अभिशस्तिऽपावा।
अथ। आ। वह। सोमऽपतिं। हरिऽभ्यां। आतिथ्यं। अस्मै। चकृम। सुऽदाव्ने ॥ ३ ॥

हे अग्ने विश्वान्सर्वान्रक्षसो राक्षसान्प्र सु धक्षि। प्रकर्षेण दह। दग्ध्वा च यज्ञानामस्माभिरनुष्ठेयानां यागानामभिशस्तिपावाभिशस्तेर्हिंसायाः पाता रक्षिता भव। अथानंतरं सोमपतिं सर्वेषां सोमानां पालकमिंद्रं हरिभ्यां तदीयाश्वाभ्यामावह। अस्मद्यज्ञं प्रापय। आगतायास्मै सुदाव्ने शोभनस्य फलस्य दात्र इंद्रायातिथ्यमतिथ्यर्हं सत्कारं चकृम। कुर्मः॥ धक्षि। दह भस्मीकरणे। बहुलं छंदसीति शपो लुक्। ढत्वभष्भावकत्वषत्वानि। अभिशस्तिपावा। शसु हिंसायां। अस्मादभिपूर्वाद्भावे क्तिन्। अभिशस्तेः पातीत्यभिशस्तिपावा। पा रक्षणे। आतो मनिन्निति वनिप्। सोमपतिं। पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वं। सुदाव्ने। पूर्ववद्ददातेर्वनिप्। अल्लोपोऽन इत्यकारलोपः॥

चतुर्थीमृचमाह ॥

प्रजावता वचसा वह्निरासा च हुवे नि च सत्सीह देवैः ।
वेषि होत्रमुत पोत्रं यजत्र बोधि प्रयंतर्जनितर्वसूनां ॥ ४ ॥

प्रजाऽवता । वचसा । वह्निः । आसा । आ । च । हुवे । नि । च । सत्सि । इह । देवैः ।
वेषि । होत्रं । उत । पोत्रं । यजत्र । बोधि । प्रऽयंतः । जनितः । वसूनां ॥ ४ ॥

प्रजावता यजमानेभ्यो दातव्यापत्यादिफलोपेतेन वचसा स्तोत्रेण स्तुतः सन् योऽग्निरासास्यस्थानीयया ज्वालया वह्निर्देवेभ्यो हविषां वोढा तमग्निमा च हुवे । आह्वयामि । आहूतः सन् त्वमिहास्मिन्कर्मणि देवैरन्यैः सह निसत्सि च । निषीद च । निषद्य च हे यजत्र यजनीयाग्ने होत्रं होत्रा क्रियमाणं कर्म उत अपि च पोत्रं पोत्रा कृतं कर्म च वेषि । कामयस्व । वसूनां धनानां प्रयंतः । प्रकर्षेण नियंतः । वसून्यस्मदायत्तानि कुर्वन् । जनितः । आहुतिद्वारा सर्वस्य जनयितरग्ने बोधि । अस्मान्बोधय ॥ आसा । पद्दन्नित्यादिनास्यशब्दस्यासन्नादेशः । सुपां सुलुगिति तृतीयाया डादेशः । टिलोप उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं । हुवे । ह्वेञो लटि बहुलं छंदसीति संप्रसारणं । बहुलं छंदसीति शपो लुक् । चवायोगे प्रथमेति निघातप्रतिषेधः । बोधि । बुध अवगमने । अस्मात्प्रयंताच्छंदस्युभयथेति हेरार्धधातुकत्वाण्णेरनिटीति णिलोपः । हुझल्भ्यो हेर्धिः । धातोरंत्यलोपश्छांदसः । हेरपित्त्वात्तस्यैव स्वरः शिष्यते ॥

एकादशिनस्याग्नेयस्य पशोर्यथा विप्रस्येत्येषा पशुपुरोडाशस्य याज्या । सूचितं च प्रदानानामिति खंडे । यथा विप्रस्य मनुषो हविर्भिः प्र कारवो मनना वच्यमानाः । आ॰ ३. ७. । इति ॥ तामेतां सूक्ते पंचमीमृचमाह ॥

यथा विप्रस्य मनुषो हविर्भिर्देवाँ अयजः कविभिः कविः सन् ।
एवा होतः सत्यतर त्वमद्याग्ने मंद्रया जुह्वा यजस्व ॥ ५ ॥

यथा । विप्रस्य । मनुषः । हविःऽभिः । देवान् । अयजः । कविऽभिः । कविः । सन् ।
एव । होतरिति । सत्यऽतर । त्वं । अद्य । अग्ने । मंद्रया । जुह्वा । यजस्व ॥ ५ ॥

कविः क्रांतदर्शी सन्कविभिर्मेधाविभिर्ऋत्विग्भिः सह विप्रस्य मेधाविनो मनुषो मनोर्यज्ञे हविर्भिश्चरुपुरोडाशादिभिर्हे अग्ने यथा देवानयजः । एवमेव

होतर्होमनिष्पादक सत्यतरातिशयेन सत्सु साधो अग्ने त्वमद्यास्मिन्यज्ञे मंद्रया हर्षयित्र्या जुह्वा होमसाधनभूतया स्रुचा यजस्व। देवान्हविर्भिः पूजय॥ मनुषः। मन ज्ञाने। बहुलमन्यत्रापीति मनेरुसिन्प्रत्ययः॥

॥ इति प्रथमस्य पंचमे चतुर्विंशो वर्गः॥

कथेति पंचर्चं चतुर्थं सूक्तं त्रैष्टुभं गोतमस्यार्षमाग्नेयं। अनुक्रांतं च। कथेति॥ प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तः सूक्तविनियोगः॥

तत्र प्रथमामृचमाह॥

कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः।
यो मर्त्येष्वमृत ऋतावा होता यजिष्ठ इत्कृणोति देवान्॥१॥

कथा। दाशेम। अग्नये। का। अस्मै। देवऽजुष्टा। उच्यते। भामिने। गीः।
यः। मर्त्येषु। अमृतः। ऋतऽवा। होता। यजिष्ठः। इत्। कृणोति। देवान्॥१॥

अस्मा अग्नये कथा दाशेम। कथं हवींषि दद्याम। अग्नेरनुरूपं यज्ञं कर्तुमशक्ता वयमित्यर्थः। अथवास्मै भामिने तेजस्विनेऽग्नये देवजुष्टा सर्वैर्देवैः सेवितव्या वाक् स्तुतिरपि का कीदृश्युच्यते। तादृशीं स्तुतिमपि कर्तुं न शक्ता इत्यर्थः। अमृतो मरणरहित ऋतावा ऋतवान् सत्यवान्यज्ञवान् होता देवानामाह्वाता होमनिष्पादको वा यजिष्ठोऽतिशयेन यष्टा। एवंभूतो योऽग्निर्मर्त्येषु मरणधर्मस्वस्मासु वर्तमानः सन्देवानित्कृणोति। हविर्भिर्युक्तान्करोत्येव तादृशायाग्नये कथा दाशेमेति पूर्वेणान्वयः॥ कथा। था हेतौ च छंदसीति थाप्रत्ययः। भामिने। भा दीप्तौ। अर्तिस्तुस्वित्यादिना मन्प्रत्ययः। ततो मत्वर्थीय इनिः। ऋतावा। छंदसीवनिपाविति मत्वर्थीयो वनिप्। अन्येषामपि दृश्यत इति दीर्घत्वं॥

द्वितीयामृचमाह॥

यो अध्वरेषु शंतम ऋतावा होता तमू नमोभिरा कृणुध्वं।
अग्निर्यद्वेर्मर्ताय देवान्त्स चा बोधाति मनसा यजाति॥२॥

यः। अध्वरेषु। शंऽतमः। ऋतऽवा। होता। तं। ऊं इति। नमःऽभिः। आ। कृणुध्वं।
अग्निः। यत्। वेः। मर्ताय। देवान्। सः। च। बोधाति। मनसा। यजाति॥२॥

योऽग्निरध्वरेषु यागेषु शंतमोऽतिशयेन सुखकारी ऋतावा सत्यवान्। यथार्थदर्शीत्यर्थः। होता देवानामाह्वाता भवति। हे ऋत्विग्यजमानाः। यूयं तमू तमेवाग्निं नमोभिः स्तोत्रैराकृणुध्वं। अभिमुखीकुरुत। यद्यदायमग्निर्मर्ताय मनुष्याय यजमानार्थं देवान्वेः। वेति गच्छति। तदानीं सोऽग्निर्यष्टव्यान्सर्वान्देवान्बोधाति च। जानाति च। ज्ञात्वा च मनसा नमसा तान्यजाति। हविर्भिः पूजयति। अतस्तमेवाग्निमाकृणुध्वमिति योज्यं॥ वेः। वी गत्यादिषु। छंदसि लुङ्लङ्लिट इति वर्तमाने लङ्। तिङां तिङो भवंतीति प्रथमपुरुषैकवचनस्य मध्यमपुरुषैकवचनादेशः। बोधाति। बुध अवगमने। लेट्याडागमः। शपः पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते। चवायोगे प्रथमेति निघातप्रतिषेधः। मनसा। मकारनकारयोः स्थानविपर्ययः॥

तृतीयामृचमाह॥

स हि क्रतुः स मर्यः स साधुर्मित्रो न भूदद्भुतस्य रथीः।

तं मेधेषु प्रथमं देवयंतीर्विश उप ब्रुवते दस्ममारीः॥ ३॥

सः। हि। क्रतुः। सः। मर्यः। सः। साधुः। मित्रः। न। भूत्। अद्भुतस्य। रथीः।

तं। मेधेषु। प्रथमं। देवऽयंतीः। विशः। उप। ब्रुवते। दस्मं। आरीः॥ ३॥

स ह्यग्निः क्रतुः कर्मणां कर्ता। स एव मर्यो मारयिता विश्वस्योपसंहर्ता साधुः साधयितोत्पादयितापि स एवाद्भुतस्याभूतस्यालब्धस्य धनस्य रथी रंहयिता प्रापयिता भूत्। भवति। तत्र दृष्टांतः। मित्रो न। यथा सखा धनानि प्रापयति तद्वत्। एवंभूतो योऽग्निस्तमेव मेधेषु यज्ञेषु देवयंतीर्देवयंत्यो देवानात्मन इच्छंत्यो विशः प्रजाः प्रथममुपब्रुवते। स्तुतिभिरुपेत्य प्रधानभूत इति कथयंति। कीदृश्यो विशः। दस्मं दर्शनीयं तमग्निमारीर्गच्छंत्यः। भजंत्य इत्यर्थः॥ मर्यः। मृङ् प्राणत्यागे। अस्मादंतर्भावितण्यर्थाच्छंदसि निष्टर्क्येत्यादौ निपातनाद्यत्। कृत्यल्युटो बहुलमिति बहुलवचनात्कर्तरि द्रष्टव्यः। यतोऽनाव इत्याद्युदात्तत्वं। देवयंतीः। वा छंदसीति पूर्वसवर्णदीर्घत्वं। आरीः। ऋ गतौ। जनिघसिभ्यामिण् इति बहुलग्रहणादस्मादपीण्प्रत्ययः। कृदिकारादक्तिन इति ङीष्। वा छंदसीति पूर्वसवर्णदीर्घत्वं। व्यत्ययेनाद्युदात्तत्वं॥

चतुर्थीमृचमाह ॥

स नो नृणां नृतमो रिशादा अग्निर्गिरोऽवसा वेतु धीतिं ।
तना च ये मघवानः शविष्ठा वाजप्रसूता इषयंत मन्म ॥ ४ ॥

सः । नः । नृणां । नृऽतमः । रिशादाः । अग्निः । गिरः । अवसा । वेतु । धीतिं ।
तना । च । ये । मघऽवानः । शविष्ठाः । वाजऽप्रसूताः । इषयंत । मन्म ॥ ४ ॥

नृणां यज्ञस्य नेतृणां मध्ये नृतमोऽतिशयेन नेता रिशादा रिशानां शत्रूणामत्ता भक्षयिता । यद्वा रिशतां हिंसतामसिता निरसिता । एवंविधः सोऽग्निर्नोऽस्माकं गिरः स्तुतीरवसा हविर्लक्षणेनान्नेन युक्तां धीतिं कर्म च वेतु । कामयतां । अपि च ये यजमानास्तना । धननामैतत् । विस्तृतेन धनेन मघवानो धनवंतः शविष्ठा अतिशयेन बलिनश्च संतो वाजप्रसूताः प्रसूतं प्रेरितं वाजो हविर्लक्षणमन्नं यैस्तादृशा भूत्वा मन्माग्नेर्मननरूपं स्तोत्रमिषयंत । एषयंति । ऋत्विग्भिः कारयितुमिच्छंति । तेषामपि स्तुतिमग्निः कामयतामिति भावः ॥ नृणां । नृ चेत्युभयथाभावाद्दीर्घाभावः । नामन्यतरस्यामिति नाम उदात्तत्वं । तना । तनु विस्तारे । पचाद्यच् । तृतीयैकवचनस्य सुपां सुलुगित्याकारः । पृषादेराकृतिगणत्वादाद्युदात्तत्वं । शविष्ठाः । शव इति बलनाम । अस्मायामेधेति मत्वर्थीयो विनिः । तत आतिशायनिक इष्ठन् । विन्मतोर्लुगिति विनो लुक् । टेरिति टिलोपः । इष्ठनो नित्त्वादाद्युदात्तत्वं । इषयंत । इषु इच्छायां । अस्माण्ण्यंताच्छांदसो लङ् । संज्ञापूर्वकस्य विधेरनित्यत्वाण्णौ लघूपधगुणाभावः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे णिच एव स्वरः शिष्यते ॥

पंचमीमृचमाह ॥

एवाग्निर्गोतमेभिर्ऋतावा विप्रेभिरस्तोष्ट जातवेदाः ।
स एषु द्युम्नं पीपयत्स वाजं स पुष्टिं याति जोषमा चिकित्वान् ॥ ५ ॥

एव । अग्निः । गोतमेभिः । ऋतऽवा । विप्रेभिः । अस्तोष्ट । जातऽवेदाः ।
सः । एषु । द्युम्नं । पीपयत् । सः । वाजं । सः । पुष्टिं । याति । जोषं । आ । चिकित्वान् ॥ ५ ॥

ऋतावा ऋतवान्यज्ञवान् जातवेदा जातधनो जातप्रज्ञो वायमग्निर्विप्रेभिर्मेधाविभिर्गोतमेभिर्गोतमैर्ऋषिभिरेवमुक्तेन प्रकारेणास्तोष्ट । स्तुतोऽभूत् ।

स्तुतश्च सोऽग्निरेषु गोतमेषु द्युम्नं द्योतमानं सोमं पीपयत्। अपिबत्। यद्वा। तानृषीनपाययत्। तथा सोऽग्निर्वाजं हविर्लक्षणमन्नं पीपयदित्येव। एवं सोमलक्षणं चरुपुरोडाशादिलक्षणं हविश्च स्वीकृत्य सोऽग्निर्जोषमस्माभिः कृतं सेवनमाचिकित्वान्। आ समंताज्जानन् पुष्टिं याति। पोषं प्राप्नोति। यद्वा। अस्माकं धनानि पोषं प्रापयतु॥ गोतमेभिः। ऋष्यंधकवृष्णिकुरुभ्यश्चेति विहितस्याणोऽत्रिभृगुकुत्सवसिष्ठगोतमांगिरोभ्यश्च। पा॰ २.४.६५.। इति बहुषु लुक्। अस्तोष्ट। स्तौतेः कर्मणि लुङि चिणभावश्छांदसः। पीपयत्। पा पाने। एयंताल्लुङि चेलश्चङादि। जोषं। जुषी प्रीतिसेवनयोः। भावे घञ्। ञित्वादाद्युदात्तत्वं॥

॥ इति प्रथमस्य पंचमे पंचविंशो वर्गः॥

अभि त्वेति पंचर्चं पंचमं सूक्तं गोतमस्यार्षमाग्नेयं गायत्रं। तथा चानुक्रांतं। अभि त्वा गायत्रं त्विति। विनियोगो लैंगिकः॥

तत्र प्रथमामृचमाह॥

अभि त्वा गोतमा गिरा जातवेदो विचर्षणे। द्युम्नैरभि प्र णोनुमः॥ १॥

अभि। त्वा। गोतमाः। गिरा। जातऽवेदः। विऽचर्षणे। द्युम्नैः। अभि। प्र। नोनुमः॥ १॥

हे जातवेदो जातानां वेदितर्विचर्षणे विशेषेण सर्वस्य द्रष्टः। एवंभूताग्ने त्वा त्वां गोतमा अस्य सूक्तस्य द्रष्टा गोतम ऋषिः। ऋषेरेकत्वेऽपि पूजार्थं बहुवचनं। गिरा स्तोत्रलक्षणया वाचाभ्याभिमुख्येनास्तौदिति शेषः। तद्वयमपि त्वां द्युम्नैस्त्वदीयगुणप्रकाशकैर्मंत्रैरभि प्रणोनुमः। आभिमुख्येन पुनः पुनः स्तुमः॥ नोनुमः। णु स्तुतौ। अस्माद्यङ्लुगंताल्लट्। उपसर्गादसमासेऽपीति णत्वं॥

द्वितीयामृचमाह॥

तमु त्वा गोतमो गिरा रायस्कामो दुवस्यति। द्युम्नैरभि प्र णोनुमः॥ २॥

तं। ऊं इति। त्वा। गोतमः। गिरा। रायःऽकामः। दुवस्यति। द्युम्नैः। अभि। प्र। नोनुमः॥ २॥

रायस्कामो धनकामो गोतमो यमग्निं गिरा स्तुत्या दुवस्यति। परिचरति। तमु तमेव त्वां द्युम्नैर्द्योतमानैः स्तोत्रैराभिमुख्येन पुनः पुनः स्तुमः॥ रायस्कामः।

रायो धनानि कामयत इति रायस्कामः। कर्मण्यण्। तत्पुरुषे कृति बहुलमिति बहुलवचनादलुक्। ऊडिदमित्यादिना पूर्वपदस्य विभक्तेरुदात्तत्वं। दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं। अतः कृकमिकंसकुंभेति विसर्जनीयस्य सत्वं। दुवस्यति। दुवस उपतापे परिचरणे च। कंड्वादिः ॥

तृतीयामृचमाह ॥

तमु त्वा वाजसातममंगिरस्वद्धवामहे। द्युम्नैरभि प्र णोनुमः ॥ ३ ॥

तं। ऊं इति। त्वा। वाजऽसातमं। अंगिरस्वत्। हवामहे। द्युम्नैः। अभि। प्र। नोनुमः ॥ ३ ॥

हे अग्ने वाजसातमं वाजानामतिशयेन सनितारं दातारं तमेव त्वा त्वामंगिरस्वत्। अंगिरस इव हवामहे। आह्वयामः। शिष्टं गतं ॥ वाजसातमं। षणु दाने। जनसनखनक्रमगमो विट्। विड्वनोरनुनासिकस्यादित्यात्वं। अतिशयेन वाजसा वाजसातमः। तमपः पित्त्वादनुदात्तत्वे कृदुत्तरपदप्रकृतिस्वर एव शिष्यते। अंगिरस्वत्। तेन तुल्यमिति वतिः। नभोऽंगिरोमनुषां वत्युपसंख्यानमिति भत्वेन पदत्वाभावाद्रुत्वाद्यभावः ॥

चतुर्थीमृचमाह ॥

तमु त्वा वृत्रहंतमं यो दस्यूँरवधूनुषे। द्युम्नैरभि प्र णोनुमः ॥ ४ ॥

तं। ऊं इति। त्वा। वृत्रहन्ऽतमं। यः। दस्यून्। अवऽधूनुषे। द्युम्नैः। अभि। प्र। नोनुमः ॥ ४ ॥

हे अग्ने दस्यून् उपक्षपयितॄन् राक्षसादीन्यस्त्वमवधूनुषे। अवचालयसि स्थानात्प्रच्यावयसि वृत्रहंतमं वृत्राणां पाप्मानामतिशयेन हंतारं तमु त्वा तमेव त्वां द्युम्नैरित्यादि पूर्ववत् ॥ वृत्रहंतमं। अतिशयेन वृत्रहा वृत्रहंतमः। पदसंज्ञायां नलोपे नाङ्गस्य। पा० ८. २. १७. इति तमपो नुट्। दस्यून्। दीर्घादटि समानपाद इति नकारस्य रुत्वं। अत्रानुनासिकः पूर्वस्य तु वेत्यूकारः सानुनासिकः ॥

पंचमीमृचमाह ॥

अवोचाम रहूगणा अग्नये मधुमद्वचः। द्युम्नैरभि प्र णोनुमः ॥ ५ ॥

अवोचाम। रहूगणाः। अग्नये। मधुऽमत्। वचः। द्युम्नैः। अभि। प्र। नोनुमः ॥ ५ ॥

ऋषिः कृतं स्तोत्रमनयोपसंहरति । रहूगणा रहूगणस्य पुत्रा वयं गोतमा अग्नये अंगनादिगुणयुक्ताय देवाय मधुमद्वचो माधुर्योपेतं वचनमवोचाम । प्रावादिष्म । तद्वचनरूपैर्द्युम्नैर्द्योतमानैः स्तोत्रैः पुनः पुनरग्निं वयमभिप्रणोनुमः । आभिमुख्येन प्रकर्षेण स्तुमः ॥

॥ इति प्रथमस्य पंचमे षड्विंशो वर्गः ॥

हिरण्यकेश इति द्वादशर्चं षष्ठं सूक्तं । रहूगणपुत्रस्य गोतमस्यार्षं । अत्रानुक्रम्यते । हिरण्यकेशो द्वादशाद्यौ तृचौ त्रैष्टुभौष्णिहौ । पूर्वोऽग्नये वा मध्यमायेति । पूर्वत्र गायत्रं त्वित्युक्तत्वादिदमपि गायत्रं सूक्तं । एतावांस्तु विशेषः । आद्यस्तृचस्त्रैष्टुभः । द्वितीयस्त्वौष्णिहः । प्रथमतृचस्य मध्यमस्थानो वैद्युतोऽग्निः शुद्धाग्निर्वा देवता । शिष्टा नवर्चः केवलाग्निदेवताकाः ॥ प्रातरनुवाकस्याग्नेय क्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्रे चाद्यस्तृचः । सूचितं च । हिरण्यकेश इति तिस्रोऽपश्यमस्य महत इति सूक्ते । आ० ४.१३. । इति ॥ कारीर्यामग्नेर्धाम छदो हिरण्यकेश इति द्वे ऋचौ याज्यानुवाक्ये । सूचितं च । हिरण्यकेशो रजसो विसार इति द्वे त्वं त्या चिदच्युता धाम ते विश्वं भुवनमधिश्रितं । आ० २.१३. । इति ॥

तत्र प्रथमामृचमाह ॥

हिरण्यकेशो रजसो विसारेऽहिर्धुनिर्वात इव ध्रजीमान् ।

शुचिभ्राजा उषसो नवेदा यशस्वतीरपस्युवो न सत्याः ॥ १ ॥

हिरण्यऽकेशः । रजसः । विऽसारे । अहिः । धुनिः । वातःऽइव । ध्रजीमान् ।

शुचिऽभ्राजाः । उषसः । नवेदाः । यशस्वतीः । अपस्युवः । न । सत्याः ॥ १ ॥

हिरण्यकेशो हितरमणीयाः केशस्थानीया ज्वाला यस्य स तथोक्तः । सुवर्णवद्रोचमानज्वालो वा । अहिरागत्य हंता मेघानां धुनिस्तेषां कंपयिता वात इव वायुरिव ध्रजीमान् शीघ्रगतियुक्तः । एवंभूतो वैद्युतोऽग्नी रजस उदकस्य विसारे विसरणे मेघान्निर्गमने निमित्तभूते सति शुचिभ्राजाः शोभनदीप्तिः सन् मेघाज्जलानि निर्गमयितुं जानाति । उषस उषोदेवता नवेदाः । न विदंति इति नवेदाः । मेघादुदकस्य निःसारणमग्निरेव जानाति उषसस्तु न जानंतीत्यर्थः । अज्ञाने दृष्टांतः । यशस्वतीरन्नयुक्ता अन्नवत्योऽपस्युवोऽपः कर्मात्मन इच्छंत्यः सत्या अवितथारंभा न । एवंभूताः प्रजा इव । अत्रोषसामज्ञानेनाग्निः

प्रशस्यंते न तु ता निंद्यंते। न हि निंदा निंद्यं निंदितुं अपि तु स्तुत्यं स्तोतुमिति न्यायात् ॥ ध्रजीमान्। ध्रज गतौ। इन् सर्वधातुभ्य इति भाव इन्प्रत्ययः। ततो मतुप्। तस्य पित्त्वादनुदात्तत्व इनो नित्त्वात्प्रातिपदिकस्याद्युदात्तत्वं। नवेदाः। नञ्पूर्वाद्वेत्तेः पचाद्यच्। नभ्राण्नपादित्यादिना नञः प्रकृतिभावः। अपस्युवः। अपसशब्दात्सुप आत्मनः क्यच्। क्याच्छंदसीत्युप्रत्ययः। तन्वादीनां छंदसि बहुलमुपसंख्यानमित्युवङ् ॥

द्वितीयामृचमाह ॥

आ ते सुपर्णा अमिनंतँ एवैः कृष्णो नोनाव वृषभो यदीदं।
शिवाभिर्न स्मयमानाभिरागात्पतंति मिहः स्तनयंत्यभ्रा ॥ २ ॥

आ। ते। सुऽपर्णाः। अमिनंत। एवैः। कृष्णः। नोनाव। वृषभः। यदि। इदं।
शिवाभिः। न। स्मयमानाभिः। आ। अगात्। पतंति। मिहः। स्तनयंति। अभ्रा ॥ २ ॥

हे अग्ने ते तव सुपर्णाः शोभनपतना रश्मय एवैर्गंतृभिर्मरुद्भिः सहामिनंत। आ समंतान्मेघं हिंसंति। वर्षणार्थं ताडयंति। प्रहतश्च कृष्णः कृष्णवर्णो वृषभो वर्षिता मेघो नोनाव। भृशं शब्दमकरोत्। यदि यदेदमीदृशं कर्म तदानीं शिवाभिर्न सुखकारिणीभिः स्मयमानाभिर्हसनवतीभिः कांतिभिरिव शुभ्रवर्णाभिः फलयुक्ताभिरद्भिर्विद्युद्भिर्वा सहागात्। वैद्युताग्निप्रेरितः पर्जन्य आगच्छति। तदनंतरं मिह आपः पतंति। दिवः सकाशात्प्रवृष्टा भवंति। अभ्राभ्राण्यद्भिः पूर्णा मेघाः स्तनयंति। इतस्ततः शब्दं कुर्वंति ॥ अमिनंत। मीञ् हिंसायां। क्र्यादिकः। व्यत्ययेनांतादेशः। ईषा अक्षादित्वात्प्रकृतिभावः। अणोऽप्रगृह्यस्य। पा० ८. ४. ५७। इति वैकल्पिकमवसाने विधीयमानमनुनासिकत्वं व्यत्ययेनात्र संहितायामपि द्रष्टव्यं। नोनाव। नौतेर्यङ्लुगंताल्लिट्यमंत्र इति निषेधादाम्प्रत्ययाभावः। स्मयमानाभिः। ष्मिङ् ईषद्धसने। शपः पित्त्वादनुदात्तत्वं। शानचो लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। स्तनयंति। स्तन शब्दे। चुरादिरदंतः। पतंति स्तनयंतीत्यनयोः पादादित्वाद्वाक्यादित्वाच्च निघाताभावः ॥

तृतीयामृचमाह ॥

यदीमृतस्य पयसा पियानो नयन्नृतस्य पथिभी रजिष्ठैः।
अर्यमा मित्रो वरुणः परिज्मा त्वचं पृंचंत्युपरस्य योनौ ॥ ३ ॥

यत्। ईं। ऋतस्य॑। पय॑सा। पिया॑नः। नय॑न्। ऋतस्य॑। पथिऽभिः॑। रजि॑ष्ठैः।

अ॒र्य॒मा। मि॒त्रः। वरु॑णः। परि॑ऽज्मा। त्वचं॑। पृं॒चं॒ति॒। उप॑रस्य। योनौ॑ ॥ ३ ॥

यदी यदायमग्निर्ऋतस्योदकस्य पयसा पयोवत्सारभूतेन रसेन पियानो जगदाप्यायनं कुर्वन्। आप्यायितं च जगदृतस्योदकस्य संबंधिभी रजिष्ठैर्ऋजुतमैः पथिभिर्मार्गैः स्नानपानादिभिर्नयन् प्रापयन्वर्तते। तदानीमर्यमा मित्रो वरुणश्च परिज्मा परितो गंता मरुद्गणश्चोपरस्य मेघस्य योनौ वृष्ट्युदकोत्पत्तिस्थाने त्वचं पृंचंति। वृष्ट्युदकस्याच्छादकं प्रदेशं स्वकीयैरायुधैः संयोजयंति। उद्घाटयंतीति यावत् ॥ पियानः। स्फायी ओप्यायी वृद्धौ। बहुलं छंदसीति शपो लुक्। धातोर्व्यत्ययेन पीभावः। अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः शिष्यते। रजिष्ठैः। ऋजुशब्दादिष्ठनि विभाषर्जोश्छंदसि। पा० ६. ४. १६२.। इत्यृकारस्य रत्वं। टेरिति टिलोपः। पृंचंति। पृची संपर्के। रौधादिकः ॥

प्रातरनुवाकस्याग्नेये क्रतावौष्णिहे छंदस्याश्विनशस्त्रे चाग्ने वाजस्येत्याद्यास्तिस्र ऋचः। सूत्रितं च। अग्ने वाजस्येति तिस्रः पुरु त्वा त्वामग्ने। आ० ४. १३.। इति ॥

तृचे प्रथमां सूक्ते चतुर्थीमृचमाह ॥

अग्ने॒ वाज॑स्य॒ गोम॑त॒ ईशा॑नः सहसो यहो।

अ॒स्मे धे॑हि जातवेदो॒ महि॒ श्रवः॑ ॥ ४ ॥

अग्ने॑। वाज॑स्य। गोऽम॑तः। ईशा॑नः। स॒ह॒सः॒। य॒हो॒ इति॑।

अ॒स्मे इति॑। धे॒हि॒। जा॒त॒ऽवे॒दः॒। महि॑। श्रवः॑ ॥ ४ ॥

हे सहसो यहो बलस्य पुत्राग्ने गोमतो बहुभिर्गोभिर्युक्तस्य वाजस्यान्नस्येशान ईश्वरस्त्वमसि। अतोऽस्मे अस्मासु हे जातवेदो जातधन जातानां वेदितर्वाग्ने महि प्रभूतं श्रवोऽन्नं धेहि। स्थापय ॥ सहसो यहो। परांगवद्भावादामंत्रितस्य चेति षष्ठ्यामंत्रितसमुदायो निहन्यते। अस्मे। सुपां सुलुगिति सप्तम्याः शे आदेशः ॥

पंचमीमृचमाह ॥

स इ॑धा॒नो वसु॑ष्क॒विर॒ग्निरी॒ळेन्यो॑ गि॒रा।

रे॒वद॒स्मभ्यं॑ पुर्वणीक दीदिहि ॥ ५ ॥

सः । इधानः । वसुः । कविः । अग्निः । ईळेन्यः । गिरा ।

रेवत् । अस्मभ्यं । पुरुऽअनीक । दीदिहि ॥ ५ ॥

सोऽग्निरिधानो दीपनशीलो वसुर्निवासयिता सर्वेषां कविः क्रांतदर्शनो मेधावी वा गिरा स्तोत्ररूपया वाचेळेन्यः स्तोतव्यो भवति । हे पुर्वणीक । अनीकं मुखं । पुरुभिर्बह्वीभिरनीकस्थानीयाभिर्ज्वालाभिर्युक्ताग्ने । अस्मभ्यं रेवद्धनयुक्तमन्नं यथा भवति तथा दीदिहि । दीप्यस्व ॥ इधानः । ञि इंधी दीप्तौ । ताच्छीलिकश्चानश् । बहुलं छंदसीति शपो लुक् । ईळेन्यः । ईड स्तुतौ । औणादिक एन्यप्रत्ययः । रेवत् । रयेर्मतौ बहुलमिति संप्रसारणं । छंदसीर इति मतुपो वत्वं । रेशब्दाच्च मतुप उदात्तत्वं वक्तव्यं । पा० ६. १. १७६. १. । इति मतुप उदात्तत्वं । दीदिहि । दीदेतिश्छांदसो दीप्तिकर्मा ॥

षष्ठीमृचमाह ॥

क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः ।

स तिग्मजंभ रक्षसो दह प्रति ॥ ६ ॥

क्षपः । राजन् । उत । त्मना । अग्ने । वस्तोः । उत । उषसः ।

सः । तिग्मऽजंभ । रक्षसः । दह । प्रति ॥ ६ ॥

हे राजन् राजनशीलाग्ने क्षपः । क्षपय । राक्षसादीन् स्वकीयैः पुरुषैर्बाधस्व । उत अपि च त्मना न केवलमन्यैरेवात्मना च तान्बाधस्व । कदेति चेत् उच्यते । वस्तोः । सर्वाण्यहानि । उत अपि चोषसः । उषःकालोपलक्षिता रात्रीः । अत्यंतसंयोगे द्वितीया । सर्वेष्वहःसु सर्वासु रात्रिषु चेत्यर्थः । हे तिग्मजंभ तीक्ष्णमुखाग्ने रक्षसो राक्षसानुक्तप्रकारेण क्षपयित्वा स एव त्वं प्रतिदह । प्रत्येकं दह । न किंचिद्दग्धव्यमित्युदास्वेत्यर्थः ॥ क्षपः । क्षपि क्षांत्यां । लोडर्थे छांदसो लङ् । छंदस्युभयथेति शप आर्धधातुकत्वाण्णेरनिटीति णिलोपः । उदात्तनिवृत्तिस्वरेण शप उदात्तत्वं । त्मना । मंत्रेष्वाङ्यादेरात्मन इत्याकारलोपः । रक्षसः । रक्ष पालने । रक्षितव्यमस्मादिति रक्षः । भीमादित्वात् । पा० ३. ४. ७४. । अपादानेऽसिप्रत्ययः । क्षरतेर्वा ण्यंतादसिप्रत्यये णिलोपो वर्णविपर्ययश्च । अस्य च रक्षःशब्दस्यासिप्रत्ययांतत्वात्प्रत्ययस्वर एव शिष्यते ॥

॥ इति प्रथमस्य पंचमे सप्तविंशो वर्गः ॥

प्रातरनुवाकस्याग्नेये क्रतौ गायत्रे छंदस्यवा नो अग्न इत्याद्याः षडृचः । सूचितं च । अवा नो अग्न इति षळग्निमीळेऽग्निं दूतं । आ० ४. १३. । इति ॥ आश्विनशस्त्रे चैताः शंसनीयाः प्रातरनुवाकातिदेशात् ॥

षट्सु प्रथमे सूक्ते सप्तमीमृचमाह ॥

अवा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि । विश्वासु धीषु वंद्य ॥ ७ ॥

अव । नः । अग्ने । ऊतिऽभिः । गायत्रस्य । प्रऽभर्मणि । विश्वासु । धीषु । वंद्य ॥ ७ ॥

विश्वासु धीषु सर्वेषु कर्मसु वंद्य स्तुत्य हे अग्ने गायत्रस्य गायत्रसाम्नो गायत्रीछंदस्कस्य सूक्तस्य वा प्रभर्मणि प्रभरणे संपादने निमित्तभूते सति नोऽस्मानूतिभिस्त्वदीयैः पालनैरव । रक्ष ॥ अवा । द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं ॥

अष्टमीमृचमाह ॥

आ नो अग्ने रयिं भर सत्रासाहं वरेण्यं । विश्वासु पृत्सु दुष्टरं ॥ ८ ॥

आ । नः । अग्ने । रयिं । भर । सत्राऽसहं । वरेण्यं । विश्वासु । पृत्ऽसु । दुस्तरं ॥ ८ ॥

हे अग्ने रयिं धनं नोऽस्मभ्यमाभर । प्रयच्छ । कीदृशं । सत्रासाहं । सत्रा सह युगपदेव दारिद्र्यस्य नाशकं । वरेण्यं । सर्वैर्वरणीयं । विश्वासु पृत्सु सर्वेषु संग्रामेषु दुष्टरं । शत्रुभिस्तरीतुमशक्यं ॥ सत्रासाहं । छंदसि सह इति ण्विः । वरेण्यं । वृङ एण्यः । पृत्सु । पदादिषु मांस्पृत्स्नूनामुपसंख्यानमिति पृतनाशब्दस्य पृद्भावः । सावेकाच इति विभक्तेरुदात्तत्वं ॥

आयुष्कामेष्ट्यां प्रथमस्याज्यभागस्यानुवाक्या आ नो अग्न इति । सूचितं च । आयुष्कामेष्ट्यां जीवातुमंतावा नो अग्ने सुचेतुना । आ० २. १०. । इति ॥ महापितृयज्ञेऽप्येषैव प्रथमाज्यभागानुवाक्या । सूचितं च । जीवातुमंतौ सव्योत्तर्युपस्याः । आ० २. १९. । इति ॥ तामेतां सूक्ते नवमीमृचमाह ॥

आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसं । मार्डीकं धेहि जीवसे ॥ ९ ॥

आ । नः । अग्ने । सुऽचेतुना । रयिं । विश्वायुऽपोषसं । मार्डीकं । धेहि । जीवसे ॥ ९ ॥

हे अग्ने नोऽस्माकं जीवसे जीवनाय सुचेतुना शोभनेन ज्ञानेन युक्तं रयिं धनमाधेहि । आस्थापय । कीदृशं । मार्डीकं । मृडीकं सुखं तद्धेतुभूतं । विश्वायु-

पोषसं। सर्वस्मिन्नायुषि देहादेः पोषकं। यावज्जीवमस्मदुपभोगपर्याप्तमित्यर्थः ॥ सुचेतुना । चिती संज्ञाने । औणादिक उप्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वं । विश्वायुपोषसं। विश्वमायुर्यस्मिन् शरीरादौ तद्विश्वायु। बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं । तत्पुष्णातीति विश्वायुपोषाः । गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेत्यसुन् पूर्वपदप्रकृतिस्वरत्वं च । सकारलोपश्छांदसः । दीर्घायुत्वाय वर्चस इति यथा ॥

दशमीमृचमाह ॥

प्र पूतास्तिग्मशोचिषे वाचो गोतमाग्नये । भरस्व सुम्नयुर्गिरः ॥ १० ॥

प्र। पूताः। तिग्मऽशोचिषे। वाचः। गोतम। अग्नये। भरस्व। सुम्नऽयुः। गिरः ॥ १० ॥

हे गोतम सूक्तद्रष्टः सुम्नयुः सुम्नं धनमात्मन इच्छंस्त्वं तिग्मशोचिषे तीक्ष्णज्वालायाग्नये पूताः शुद्धा वाचोऽग्नेर्गुणान् सम्यगभिदधतीर्गिरः स्तुतीः प्रभरस्व । प्रकर्षेण संपादय ॥ तिग्मशोचिषे । तिज निशाने । युजिरुचितिजां कुत्वं चेति मक् । तिग्मानि शोचींषि यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । सुम्नयुः । सुम्नशब्दात्क्यचि न छंदस्यपुत्रस्येतीत्वदीर्घयोः प्रतिषेधः । क्याच्छंदसीत्युप्रत्ययः ॥

एकादशीमृचमाह ॥

यो नो अग्नेऽभिदासत्यंति दूरे पदीष्ट सः । अस्माकमिद्वृधे भव ॥ ११ ॥

यः। नः। अग्ने। अभिऽदासति। अंति। दूरे। पदीष्ट। सः। अस्माकं। इत्। वृधे। भव ॥ ११ ॥

हे अग्ने नोऽस्मान् अंत्यंतिके समीपे दूरे विप्रकृष्टदेशेऽवस्थितः सन् यः शत्रुरभिदासति । उपक्षपयति । स शत्रुः पदीष्ट । पततु नश्यतु । त्वं चास्माकमित् अस्माकमेव वृधे वर्धनाय भव ॥ अभिदासति । दसु उपक्षये। अस्मात्ण्यंताल्लटि छंदस्युभयथेति शप आर्धधातुकत्वाण्णेरनिटीति णिलोपः। अंतिकादिलोपो बहुलमिति वक्तव्यमित्यंतिकशब्दस्य ककारलोपः । वृधे । वृधु वृद्धौ । संपदादिलक्षणो भावे क्विप् । सावेकाच इति विभक्तेरुदात्तत्वं ॥

द्वादशीमृचमाह ॥

सहस्राक्षो विचर्षणिरग्नी रक्षांसि सेधति । होता गृणीत उक्थ्यः ॥ १२ ॥

सहस्रऽअक्षः। विऽचर्षणिः। अग्निः। रक्षांसि। सेधति। होता। गृणीते। उक्थ्यः ॥ १२ ॥

सहस्राक्षोऽसंख्यातज्वालः । विचर्षणिर्विशेषेण सर्वस्य द्रष्टायमग्नी रक्षांसि सेधति । प्रतिषेधति । यज्ञान्निर्गमयति । स चाग्निरुक्थ्य उक्थैः शस्त्रैरस्माभिः स्तूयमानः सन् होता देवानामाह्वाता भूत्वा गृणीते । तान्स्तौति ॥ सहस्राक्षः । बहुव्रीहौ सक्थ्यक्ष्णोरिति षच् समासांतः । सति शिष्टत्वात्तस्यैव स्वरः शिष्यते । सेधति । षिधु गत्यां । अत्र केवलोऽपि सोपसर्गार्थो द्रष्टव्यः । गृणीते । गॄ शब्दे । प्वादीनां ह्रस्व इति ह्रस्वत्वं ॥

॥ इति प्रथमस्य पंचमेऽष्टाविंशो वर्गः ॥

इत्थेति षोडशर्चं सप्तमं सूक्तं गोतमस्यार्षमैंद्रं पंक्तिछंदस्कं । अनुक्रांतं च । इत्था षोळशैंद्रं पांक्तं हि । हिशब्दप्रयोगात्तुह्यादिपरिभाषयेदमुत्तरे च द्वे पंक्तिछंदस्के ॥ पृष्ठ्यषडहस्य पंचमेऽहनि मरुत्वतीय इदं सूक्तं । सूचितं च । अविता- सीत्था हींद्र पिब तुभ्यमिति मरुत्वतीयं । आ० ७.१२. । इति ॥ चतुर्विंशेऽह- न्यच्छावाकस्याद्यस्तृचो वैकल्पिकोऽनुरूपः । होत्रकाणामिति खंडे सूचितं । इत्था हि सोम इन्मद उभे यदिंद्र रोदसी इति ॥ महाव्रते निष्केवल्यस्य दक्षिणपक्ष इत्था हीत्येका । तथैव पंचमारण्यके सूचितं । इत्था हि सोम इन्मद इति पंक्ति- रिति ॥ तामेतां सूक्ते प्रथमामृचमाह ॥

इत्था हि सोम इन्मदे ब्रह्मा चकार वर्धनं ।
शविष्ठ वज्रिन्नोजसा पृथिव्या निः शशा अहिमर्चन्ननु स्वराज्यं ॥ १ ॥
इत्था । हि । सोमे । इत् । मदे । ब्रह्मा । चकार । वर्धनं ।
शविष्ठ । वज्रिन् । ओजसा । पृथिव्याः । निः । शशाः । अहिं । अर्चन् । अनु ।
स्वऽराज्यं ॥ १ ॥

हे शविष्ठ । अतिशयेन बलवन् वज्रिन्वज्रवन्निंद्र । इत्था हि । इत्थमेव । अनेन शास्त्रोक्तप्रकारेणैव मदे मदकरे हर्षकरे सोमे त्वया पीते सति ब्रह्मा ब्राह्मणः स्तोता वर्धनं तव वृद्धिकरं स्तोत्रं चकार । अनेन सूक्तेन कृतवान् । इदित्येतत्पादपूरणं । अतस्त्वमोजसा बलेन पृथिव्याः सकाशादहिमागत्य हंतारं वृत्रं निःशशाः । निःशेषेणाशाः । मा बाधस्वेति शासनं कृत्वा पृथिव्याः सकाशान्निरगमय इत्यर्थः । किं कुर्वन् । स्वराज्यं स्वस्य राज्यं राजत्वमन्वनुलक्ष्यार्चन् पूजयन् । स्वस्य स्वा- मित्वं प्रकटयन्नित्यर्थः ॥ शशाः । शासु अनुशिष्टौ । लङि लुकि प्राप्ते बहुलं

छंदसीति शपः श्लुः । स्वराज्यं । राज्ञो भावः कर्म वा राज्यं । पत्यंतपुरोहितादिभ्यो यक् इति यक् । तत्र हि राजास इति पठ्यते । स्वस्य राज्यं स्वराज्यं । अकर्मधारये राज्यं । पा० ६. २. १३०. । इत्युत्तरपदाद्युदात्तत्वं ॥

द्वितीयामृचमाह ॥

स त्वामदद्वृषा मदः सोमः श्येनाभृतः सुतः ।
येना वृत्रं निरद्भ्यो जघंथ वज्रिन्नोजसार्चन्ननु स्वराज्यं ॥ २ ॥

सः । त्वा । अमदत् । वृषा । मदः । सोमः । श्येनऽआभृतः । सुतः ।
येन । वृत्रं । निः । अतऽभ्यः । जघंथ । वज्रिन् । ओजसा । अर्चन् । अनु । स्वऽराज्यं ॥ २ ॥

हे इंद्र त्वा त्वां स सोमोऽमदत् । अमदयत् । हर्षं प्रापयत् । कीदृशः सोमः । वृषा । सेचनस्वभावः । मदः । मदकरो हर्षकारी । श्येनाभृतः । श्येनरूपमापन्नया पक्ष्याकारया गायत्र्या दिवः सकाशादाहृतः । सुतः । अभिषुतः । हे वज्रिन् वज्रवन्निंद्र येन पीतेन सोमेनौजसा बलकरेणाद्भ्योऽंतरिक्षसकाशाद्वृत्रं निर्जघंथ । हतवानसि । अन्यत्पूर्ववत् ॥ अमदत् । मदी हर्षे । अस्माण्णिचि मदी हर्षग्लपनयोरिति घटादिषु पाठात् मित्त्वे सति मितां ह्रस्व इति ह्रस्वत्वं । लङि छंदस्युभयथेति शप आर्द्धधातुकत्वाण्णेरनिटीति णिलोपः । अद्भ्यः । आप इत्यंतरिक्षनाम । अपो भि । पा० ७. ४. ४८. । इति पकारस्य तत्वं । जघंथ । क्रादिनियमप्राप्तस्येट उपदेशेऽत्वत इति प्रतिषेधः । अभ्यासाच्चेति हकारस्य घत्वं । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । यद्वृत्तयोगादनिघातः ॥

तृतीयामृचमाह ॥

प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यंसते ।
इंद्र नृम्णं हि ते शवो हनो वृत्रं जया अपोऽर्चन्ननु स्वराज्यं ॥ ३ ॥

प्र । इहि । अभि । इहि । धृष्णुहि । न । ते । वज्रः । नि । यंसते ।
इंद्र । नृम्णं । हि । ते । शवः । हनः । वृत्रं । जयाः । अपः । अर्चन् । अनु । स्वऽराज्यं ॥ ३ ॥

हे इंद्र प्रेहि । प्रकर्षेण गच्छ । अभीहि । हंतव्यान् शत्रूनाभिमुख्येन प्राप्नुहि । प्राप्य च धृष्णुहि । तान् शत्रूनभिभव । ते तव वज्रो न नियंसते । शत्रुभिर्न नियम्यते । अप्रतिहतगतिरित्यर्थः । तथा ते शवस्त्वदीयं बलं नृम्णं नृणां

पुरुषाणां नामकमभिभावकं। हि यस्मादेवं तस्माद्वृत्रमसुरं मेघं वा हनः। जहि। ततोऽनंतरं तेन निरुद्धा अप उदकानि जयाः। वृत्रं हत्वा तेनावृतमुदकं लभस्वेत्यर्थः। अन्यत्समानं॥ यंसते। यमेः कर्मणि लेटि सिब्बहुलमिति सिप्। लेटोऽडाटावित्यडागमः। हनः। लोडर्थे छांदसो लङ्। बहुलं छंदसीति शपो लुगभावः। शपः पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते। पूर्वपदस्यासमानवाक्यस्थत्वान्निघाताभावः। जयाः। जयतेर्लेट्याडागमः। पूर्ववत्स्वरः॥

चतुर्थीमृचमाह॥

निरिंद्र भूम्या अधि वृत्रं जघंथ निर्दिवः।

सृजा मरुत्वतीरव जीवधन्या इमा अपोऽर्चन्ननु स्वराज्यं॥४॥

निः। इंद्र। भूम्याः। अधि। वृत्रं। जघंथ। निः। दिवः।

सृज। मरुत्वतीः। अव। जीवऽधन्याः। इमाः। अपः। अर्चन्। अनु। स्वऽराज्यं॥४॥

हे इंद्र भूम्या अधि भूलोकस्योपरि वृत्रं निर्जघंथ। निःशेषेण हतवानसि। तथा दिवो द्युलोकान्निर्जघंथ। हत्वा चेमा अपो वृष्ट्युदकान्यवसृज। अधः पातय। कीदृशीरपः। मरुत्वतीः। मरुद्भिः संयुक्ताः। जीवधन्याः। जीवाः प्राणिनो धन्यास्तृप्ता याभिस्ताः। अन्यत्समानं॥

पंचमीमृचमाह॥

इंद्रो वृत्रस्य दोधतः सानुं वज्रेण हीळितः।

अभिक्रम्याव जिघ्नतेऽपः समीय चोदयन्नर्चन्ननु स्वराज्यं॥५॥

इंद्रः। वृत्रस्य। दोधतः। सानुं। वज्रेण। हीळितः।

अभिऽक्रम्य। अव। जिघ्नते। अपः। समीय। चोदयन्। अर्चन्। अनु। स्वऽराज्यं॥५॥

हीळितः क्रुद्ध इंद्रोऽभिक्रम्याभिमुख्येन गत्वा दोधतो भृशं कंपमानस्य वृत्रस्य सानुं समुच्छ्रितं हनुप्रदेशं वज्रेणावजिघ्नते। प्रहरति। किं कुर्वन्। अपो वृष्ट्युदकानि समीय सरणाय निर्गमनाय चोदयन्। प्रेरयन्॥ दोधतः। धूञ् कंपने। अस्माद्यङ्लुगंताच्छतर्यत्यलोपश्छांदसः। अभ्यस्तानामादिरित्याद्युदात्तत्वं। हीळितः। हेडृ होडृ अनादरे। हेळत इत्येतत् क्रुध्यतिकर्मसु पठितं। अस्मान्निष्ठायां वर्णव्यापत्त्येकारः। जिघ्नते। हंतेर्लटि व्यत्ययेनात्मनेपदं बहुवचनं च। बहुलं

छंदसीति शपः श्लुः । इदित्यनुवृत्तौ बहुलं छंदसीत्यभ्यासस्येत्वं । गमहनेत्यादिनोपधालोपः । समीय । सृ गतौ । अर्तिस्तुस्वित्यादिना भावे मन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं ॥

॥ इति प्रथमस्य पंचम एकोनत्रिंशो वर्गः ॥

षष्ठीमृचमाह ॥

अधि सानौ नि जिघ्नते वज्रेण शतपर्वणा ।

मंदान इंद्रो अंधसः सखिभ्यो गातुमिच्छत्यर्चन्ननु स्वराज्यं ॥ ६ ॥

अधि । सानौ । नि । जिघ्नते । वज्रेण । शतऽपर्वणा ।

मंदानः । इंद्रः । अंधसः । सखिऽभ्यः । गातुं । इच्छति । अर्चन् । अनु । स्वऽराज्यं ॥ ६ ॥

इंद्रः शतपर्वणा शतसंख्याकधाराभिर्युक्तेन वज्रेण सानावधि निजिघ्नते । अधिः सप्तम्यर्थानुवादी । समुच्छ्रिते वृत्रस्य कपोलादौ स्थाने नितरां हिनस्ति । स चेंद्रो मंदानो मंदमानः स्तूयमानः सन् सखिभ्यः समानख्यानेभ्यः स्तोतृभ्योऽंधसोऽन्नस्य गातुं मार्गमुपायमिच्छति । अन्यत्पूर्ववत् ॥ मंदानः । मदि स्तुतौ । कर्मणि शानचि यक् । छंदस्युभयथेति शानच आर्द्धधातुकत्वादतोलोपयलोपौ । अनुदात्तेतः परत्वात् शानचो लसार्वधातुकानुदात्तत्वे सति यक एवोदात्तत्वं । अनुदात्ते शानचि तस्य यको लोपे सत्युदात्तनिवृत्तिस्वरेण शानच उदात्तत्वं प्राप्नोति । एवं तर्हि शानच आर्द्धधातुकत्वादेव लसार्वधातुकानुदात्तत्वाभावे चित्स्वर एव शिष्यते ॥

सप्तमीमृचमाह ॥

इंद्र तुभ्यमिदद्रिवोऽनुत्तं वज्रिन्वीर्यं ।

यद्ध त्यं मायिनं मृगं तमु त्वं माययावधीरर्चन्ननु स्वराज्यं ॥ ७ ॥

इंद्र । तुभ्यं । इत् । अद्रिऽवः । अनुत्तं । वज्रिन् । वीर्यं ।

यत् । ह । त्यं । मायिनं । मृगं । तं । ऊं इति । त्वं । मायया । अवधीः । अर्चन् । अनु ।
स्वऽराज्यं ॥ ७ ॥

अद्रिरिति मेघनाम । हे अद्रिवो वाहनरूपमेघयुक्त वज्रिन् वज्रवन्निंद्र तुभ्यमित् । षष्ठ्यर्थे चतुर्थी । तवैव वीर्यं सामर्थ्यमनुत्तं शत्रुभिरतिरस्कृतं । यद्ध

यस्मात् येन वीर्येण खलु मायिनं मायाविनं त्यं तं प्रसिद्धं वंचयितारं। लोकोपद्रवकारिणमित्यर्थः। मृगं मृगरूपमापन्नं तं वृत्रं त्वमपि माययैवावधीः। हतवानसि ॥ अनुत्तं। नसत्तनिषत्तेति निपातनान्निष्ठानत्वाभावः। अवधीः। हंतेर्लुङि चेति वधादेशः। स चादंतः। तस्यातो लोपे सति स्थानिवद्भावात्सिचि वृद्ध्यभावः ॥

अष्टमीमृचमाह ॥

वि ते वज्रासो अस्थिरन्नवतिं नाव्या३ अनु।
महत्त इंद्र वीर्यं बाह्वोस्ते बलं हितमर्चन्ननु स्वराज्यं ॥ ८ ॥
वि। ते। वज्रासः। अस्थिरन्। नवतिं। नाव्याः। अनु।
महत्। ते। इंद्र। वीर्यं। बाह्वोः। ते। बलं। हितं। अर्चन्। अनु। स्वऽराज्यं ॥ ८ ॥

हे इंद्र ते तव वज्रासो वज्रास्त्वत्सकाशान्निर्गतान्यायुधानि नाव्या नावा तार्या नवतिं नवतिसंख्याका वृत्रेण निरुद्धा नदीरनूपलक्ष्य व्यवस्थिरन्। विविधमस्थिषत। सर्वत्र व्याप्य वर्तमानं वृत्रं हंतुं तव वज्र एकोऽप्यनेक इवासीदित्यर्थः। किंच। इंद्र ते तव वीर्यं महत् प्रभूतं। अन्यैरजेयमित्यर्थः। तथा ते बाह्वोस्त्वदीययोर्हस्तयोर्बलं हितं निहितं। त्वदीयौ बाहू अत्यतिशयेन बलिनावित्यर्थः। अन्यत्पूर्ववत् ॥ अस्थिरन्। तिष्ठतेर्लुङि समवप्रविभ्यःस्थ इत्यात्मनेपदं। मंत्रे घसेति च्लेर्लुक्। स्थाघ्वोरिच्चेतीत्वं। व्यत्ययेन झस्य रन्नादेशः। नाव्याः। नौवयोधर्मेत्यादिना यत्। यतोऽनाव इति पर्युदासान्तिस्वरित इति स्वरितत्वं। बाह्वोः। उदात्तयण इति विभक्त्युदात्तत्वं ॥

नवमीमृचमाह ॥

सहस्रं साकमर्चत परि ष्टोभत विंशतिः।
शतैनमन्वनोनवुरिंद्राय ब्रह्मोद्यतमर्चन्ननु स्वराज्यं ॥ ९ ॥
सहस्रं। साकं। अर्चत। परि। स्तोभत। विंशतिः।
शता। एनं। अनु। अनोनवुः। इंद्राय। ब्रह्म। उत्ऽयतं। अर्चन्। अनु। स्वऽराज्यं ॥ ९ ॥

सहस्रं सहस्रसंख्याका मनुष्याः साकमर्चत। एनमिंद्रं युगपदेवापूजयन्। तथा विंशतिः षोडशर्त्विजो यजमानः पत्नी च सदस्यः शमिता चेति विंशति-

संख्याकाः। तेषां या विंशतिसंख्या सा परिष्टोभत। परितः सर्वतोऽस्तौत्। तथा च शता शतसंख्याका ऋषय एनमिंद्रमन्वनोनवुः। पुनः पुनरस्तुवन्। अस्मा एवेंद्राय ब्रह्म हविर्लक्षणमन्नमुद्यतं। दातुमूर्ध्वं धृतं। अत एवंविध इंद्रो वृत्रमहन्नित्यर्थः। अन्यत्पूर्ववत्॥ परिष्टोभत। स्तोभतिः स्तुतिकर्मा। उपसर्गात्सुनोतीति षत्वं। अनोनवुः। णु स्तुतौ। अस्माद्यङ्लुगंताल्लुङि सिजभ्यस्तविदिभ्यश्चेति झेर्जुसादेशः। उद्यतं। यम उपरमे। उत्पूर्वादस्मात्कर्मणि निष्ठा। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं॥

दशमीमृचमाह॥

इंद्रो वृत्रस्य तविषीं निरहन्त्सहसा सहः।
महत्तदस्य पौंस्यं वृत्रं जघन्वाँ असृजदर्चन्ननु स्वराज्यं॥ १०॥
इंद्रः। वृत्रस्य। तविषीं। निः। अहन्। सहसा। सहः।
महत्। तत्। अस्य। पौंस्यं। वृत्रं। जघन्वान्। असृजत्। अर्चन्। अनु। स्वऽराज्यं॥ १०॥

इंद्रो वृत्रस्यासुरस्य तविषीं बलं स्वकीयेन बलेन निरहन्। हतवान्। सहसा सहनेनाभिभवसाधनेनायुधेन सहोऽभिभवसाधनं वृत्रायुधं निरहन्। अस्येंद्रस्य तत्पौंस्यं बलं महत् अतिप्रौढं। यस्मादयं वृत्रं जघन्वान्हतवान्। हत्वा च तन्निरुद्धा अपोऽसृजत्। तस्माद्वृत्रान्निरगमयत्। अन्यत्पूर्ववत्॥ पौंस्यं। पुंस अभिवर्धने। चुरादिः। अचो यदिति यत्। यतोऽनाव इत्याद्युदात्तत्वं। जघन्वान्। हंतेर्लिटः क्वसुः। विभाषा गमहनविदेतीटो विकल्पादभावः। अभ्यासाच्चेत्यभ्यासादुत्तरस्य हंतेर्हकारस्य घत्वं॥

॥ इति प्रथमस्य पंचमे त्रिंशो वर्गः॥

एकादशीमृचमाह॥

इमे चित्तव मन्यवे वेपेते भियसा मही।
यदिंद्र वज्रिन्नोजसा वृत्रं मरुत्वाँ अवधीरर्चन्ननु स्वराज्यं॥ ११॥
इमे इति। चित्। तव। मन्यवे। वेपेते इति। भियसा। मही इति।
यत्। इंद्र। वज्रिन्। ओजसा। वृत्रं। मरुत्वान्। अवधीः। अर्चन्। अनु। स्वऽराज्यं॥ ११॥

मही महत्याविमे द्यावापृथिव्यावपि हे इंद्र तव मन्यवे त्वदीयकोपाद्भियसा भीत्या वेपेते। कंपेते। हे वज्रिन्वज्रवन्निंद्र मरुत्वान्मरुद्भिर्युक्तस्त्वमोजसा बलेन यद्यदा वृत्रमवधीः। तदानीं द्यावापृथिव्यावपि भयेनाकंपिषातामित्यर्थः॥ वेपेते। टुवेपृ कंपने। भियसा। ञिभी भये। औणादिकः कसिप्रत्ययः॥

द्वादशीमृचमाह॥

न वेपसा न तन्यतेंद्रं वृत्रो वि बीभयत्।

अभ्येनं वज्र आयसः सहस्रभृष्टिरायतार्चन्ननु स्वराज्यं॥ १२॥

न। वेपसा। न। तन्यता। इंद्रं। वृत्रः। वि। बीभयत्।

अभि। एनं। वज्रः। आयसः। सहस्रऽभृष्टिः। आयत। अर्चन्। अनु। स्वऽराज्यं॥ १२॥

वृत्र इंद्रं वेपसा स्वकीयेन वेपनेन कंपनेन न विबीभयत्। भीतं नाकरोत्। तथा तन्यता स्वकीयेन घोरेण गर्जनशब्देन न विबीभयत्। अपि च। इंद्रेण विसृष्ट आयसोऽयोमयः सहस्रभृष्टिरनेकाभिर्धाराभिर्युक्तो वज्र एनं वृत्रमभ्यायत। हंतुमाभिमुख्येनागच्छत्। अन्यत्पूर्ववत्॥ तन्यता। स्तन शब्दे। ऋतन्यंजीत्यादिना तनोतेर्विधीयमानो यतुच् बहुलवचनादस्मादपि भवति। अत एव सलोपश्च। सुपां सुलुगिति तृतीयाया डादेशः। उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वं। बीभयत्। ञिभी भये। हेतुमति णिच्। अत्र वेपस्तन्यतुभ्यां भयं न हेतोर्वृत्रादिति हेतुभयाभावाद्भियतेर्हेतुभये। पा० ६. १. ५६.। इत्यात्वाभावः। णयंतात्लुङि च्लेश्चङादि। आयत। अय पय गतौ। भौवादिरात्मनेपदी॥

त्रयोदशीमृचमाह॥

यद्वृत्रं तव चाशनिं वज्रेण समयोधयः।

अहिमिंद्र जिघांसतो दिवि ते बद्बधे शवोऽर्चन्ननु स्वराज्यं॥ १३॥

यत्। वृत्रं। तव। च। अशनिं। वज्रेण। संऽअयोधयः।

अहिं। इंद्र। जिघांसतः। दिवि। ते। बद्बधे। शवः। अर्चन्। अनु। स्वऽराज्यं॥ १३॥

हे इंद्र यद्यदा वृत्रं तव हननार्थं तेन सृष्टामशनिं च त्वं वज्रेण समयोधयः। सम्यक् प्राहार्षीः। तदानीमहिमागत्य हंतारं वृत्रं जिघांसतो हंतुमिच्छतस्ते तव शवो बलं दिवि बद्बधे। बद्धमनुस्यूतं व्याप्तमासीत्। शिष्टं पूर्ववत्॥ जिघांसतः।

हंतेरिच्छार्थे सन्यज्झनगमां सनीत्युपधादीर्घत्वं । बद्बधे । बध बंधने । कर्मणि लिटि व्यत्ययेन हलादिशेषाभावः ॥

चतुर्दशीमृचमाह ॥

अभिष्टने ते अद्रिवो यत्स्था जगच्च रेजते ।

त्वष्टा चित्तव मन्यव इंद्र वेविज्यते भियार्चन्ननु स्वराज्यं ॥ १४ ॥

अभिऽस्तने । ते । अद्रिऽवः । यत् । स्थाः । जगत् । च । रेजते ।

त्वष्टा । चित् । तव । मन्यवे । इंद्र । वेविज्यते । भिया । अर्चन् । अनु । स्वऽराज्यं ॥ १४ ॥

हे अद्रिवो वज्रवन्निंद्र ते तवाभिष्टने सिंहनादे सति स्थाः स्थावरं जगज्जंगमं च यदस्ति तदुभयं रेजते । कंपते । त्वष्टा चित् वज्रनिर्माता त्वष्टा च तव मन्यवे त्वदीयाय कोपाय भिया भीत्या वेविज्यते । भृशं कंपते । अन्यत्समानं ॥ स्थाः । तिष्ठतेः क्विप् चेति क्विप् । वेविज्यते । ओविजी भयचलनयोः । अस्मात्क्रियासमभिहारे यङ् । सन्यङोरिति द्विर्भावः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे यङ एव स्वरः शिष्यते । इंद्रेत्यस्य पादादौ वर्तमानस्यामंत्रितं पूर्वमविद्यमानवदित्यविद्यमानवत्त्वे सत्यस्य पादादित्वादपादादाविति पर्युदासान्निघाताभावः ॥

पंचदशीमृचमाह ॥

नहि नु यादधीमसींद्र को वीर्या परः ।

तस्मिंनृम्णमुत क्रतुं देवा ओजांसि सं दधुरर्चन्ननु स्वराज्यं ॥ १५ ॥

नहि । नु । यात् । अधिऽइमसि । इंद्र । कः । वीर्या । परः ।

तस्मिन् । नृम्णं । उत । क्रतुं । देवाः । ओजांसि । सं । दधुः । अर्चन् । अनु ।
स्वऽराज्यं ॥ १५ ॥

यात् यांतं सर्वत्र व्याप्य वर्तमानमिंद्रं नहि न्वधीमसि । वयं न ह्यवगच्छामः । यतो वयमल्पाः । पर इत्येतत्सकारांतमव्ययं वैदूर्यमाचष्टे । परो दिवा पर एनेति यथा । परः परस्तादतिदूरे मनुष्यैरनवगाह्ये स्थाने वीर्या वीर्येण सामर्थ्येन वर्तमानमिंद्रं को मनुष्यो जानीयात् । न कोऽपीत्यर्थः । कस्मादिति चेत् । अत्राह । तस्मिन्निति । यस्मात्तस्मिन्निंद्रे देवा नृम्णं धनं । उत अपि च क्रतुं वीर्यकर्माोजांसि बलानि च संदधुः । स्थापयां चक्रुः । तस्मादित्यर्थः ॥

यात् । या प्रापणे । अस्माल्लटः शतृ । सुपां सुलुगिति द्वितीयाया लुक् । अधीमसि । इण् गतौ । इदंतो मसिः । वीर्या । सुपां सुलुगिति तृतीयाया आकारः ॥

षोडशीमृचमाह ॥

यामथर्वा मनुष्पिता दध्यङ् धियमत्नत ।
तस्मिन्ब्रह्माणि पूर्वथेंद्र उक्था समग्मतार्चन्ननु स्वराज्यं ॥ १६ ॥
यां । अथर्वा । मनुः । पिता । दध्यङ् । धियं । अत्नत ।
तस्मिन् । ब्रह्माणि । पूर्वऽथा । इंद्रे । उक्था । सं । अग्मत । अर्चन् । अनु ।
स्वऽराज्यं ॥ १६ ॥

अथर्वेतत्संज्ञक ऋषिः पिता सर्वासां प्रजानां पितृभूतो मनुश्च दध्यङ् अथर्वणः पुत्र एतत्संज्ञक ऋषिश्च यां धियमत्नत । यत्कर्मातन्वत । अकुर्वन् । तस्मिन्कर्मणि यानि ब्रह्माणि हविर्लक्षणान्यन्नान्युक्था शस्त्ररूपाणि स्तोत्राणि च यानि संति तानि सर्वाणि तस्मिन्निंद्रे समग्मत । समगच्छंत । तत्र दृष्टांतः । पूर्वथा पूर्वेषामन्येषां वसिष्ठादीनां यज्ञेषु यथा हवींषि स्तोत्राणि चेंद्रेण संगच्छंते तद्वत् । य इंद्रः स्वराज्यं स्वस्य राज्यत्वमन्वर्चन् अनुपूजयन् वृत्रवधादिरूपेण कर्मणा स्वकीयमधिपतित्वं प्रकटयन्नित्यर्थः ॥ अत्नत । तनु विस्तारे । बहुलं छंदसीति विकरणस्य लुक् । तनिपत्योश्छंदसीत्युपधालोपः । पूर्वथा । प्रत्नपूर्वविश्वेमात्थाल् छंदसीतीवार्थे पूर्वशब्दात्थाल्प्रत्ययः । लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं । उक्था । शेश्छंदसि बहुलमिति शेर्लोपः । समग्मत । समो गम्यृच्छिभ्यामित्यात्मनेपदं । लुङि मंत्रे घसेति च्लेर्लुक् । गमहनेत्यादिनोपधाया लोपः ॥

॥ इति प्रथमस्य पंचम एकत्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके पंचमोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
दशतय्याः पंचमोऽयमध्यायो व्याकृतः पुरा ।
धीमता सायणार्येण षष्ठोऽध्यायोऽथ वर्ण्यते ॥

प्रथमे मंडले त्रयोदशानुवाके सप्त सूक्तानि व्याकृतानि । इंद्रो मदायेति नवर्चमष्टमं सूक्तं । अत्रानुक्रम्यते । इंद्रो नवेति । ऋषेश्चान्यस्माहर्षिरिति परिभाषया रहूगणपुत्रस्य गोतमस्यानुवृत्तरस्य सूक्तस्य स ऋषिः । पूर्वसूक्ते पांक्तं हीत्युक्तत्वात्तुह्यादिपरिभाषयेदमुत्तरं च सूक्तं पांक्तं । अनादेशपरिभाषयेंद्रो देवता । पृष्ठ्यस्य पंचमेऽहनि निष्केवल्यशस्त्र इदं सूक्तं । सूचितं च । प्रेदं ब्रह्मेंद्रो मदाय सत्रा मदास इति निष्केवल्यं । आ॰ ७.१२.। इति ॥ आरंभणीये चातुर्विंशकेऽहनि माध्यंदिने सवने ब्राह्मणाच्छंसिनः शस्त्र इंद्रो मदायेत्याद्यस्तृचो वैकल्पिकः स्तोत्रियः । होत्रकाणामिति खंडे सूचितं । इंद्रो मदाय वावृधे मदे मदे हि नो ददिः । आ॰ ७.४.। इति ॥ महाव्रते निष्केवल्य उत्तरपक्ष इंद्रो मदायेत्येका शंसनीया । तथैव पंचमारण्यके सूचितं । इंद्रो मदाय वावृध इति पंक्तिः सूददोहाः ॥

तामेतां सूक्ते प्रथमामृचमाह ॥

इंद्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
तमिन्महत्स्वाजिषूतेमर्भे हवामहे स वाजेषु प्र नोऽविषत् ॥ १ ॥
इंद्रः । मदाय । ववृधे । शवसे । वृत्रऽहा । नृऽभिः ।
तं । इत् । महत्ऽसु । आजिषु । उत । ईं । अर्भे । हवामहे । स । वाजेषु । प्र । नः । अविषत् ॥ १ ॥

वृत्रहा वृत्रस्यावरकस्य वृष्टिनिरोधकस्य मेघस्यासुरस्य वा हंता । यद्वा । आवरकाणां शत्रूणां हंतेंद्रो मदाय हर्षार्थं शवसे । बलनामैतत् । बलार्थं च नृभिर्यज्ञस्य नेतृभिर्ऋत्विग्भिर्वावृधे । स्तोत्रशस्त्ररूपाभिः स्तुतिभिः प्रवर्धितो

बभूव। स्तुत्या हि देवता प्राप्तबला सती प्रवर्धते। तमित्तमेवेंद्रं महत्सु प्रभूतेष्वाजिषु संग्रामेषु हवामहे। अस्माकं रक्षणायाह्वयामहे। उत अपि चेमेनमर्भेऽल्पे संग्रामे हवामहे। अस्माभिराहूतः स चेंद्रो वाजेषु संग्रामेषु नोऽस्मान् प्राविषत्। प्रावतु। प्रकर्षेण रक्षतु॥ वावृधे। वृधः कर्मणि लिट्। संहितायामभ्यासस्यान्येषामपि दृश्यत इति दीर्घत्वं। तुजादित्वे हि तूतुजान इतिवत्पदकाले दीर्घः श्रूयते। नृभिः। सावेकाच इति प्राप्तस्य विभक्त्युदात्तत्वस्य नृ चान्यतरस्यामिति प्रतिषेधः। हवामहे। ह्वयतेर्लटि ह्व इत्यनुवृत्तौ बहुलं छंदसीति संप्रसारणं। शपि गुणावादेशौ। अविषत्। अव रक्षणे। लेट्यडागमः। इतश्च लोप इतीकारलोपः। सिब्बहुलं लेटीति सिप्। तस्यार्धधातुकत्वाद्वलादिलक्षण इट्॥

द्वितीयामृचमाह॥

असि हि वीर सेन्योऽसि भूरि पराददिः।

असि दभ्रस्य चिद्वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु॥२॥

असि। हि। वीर। सेन्यः। असि। भूरि। पराऽददिः।

असि। दभ्रस्य। चित्। वृधः। यजमानाय। शिक्षसि। सुन्वते। भूरि। ते। वसु॥२॥

हे वीर शत्रुक्षपणकुशलेंद्र त्वं सेन्योऽसि। सेनार्हो भवसि। त्वमेकोऽपि सेनासदृशो भवसीत्यर्थः। हि यस्मादेवं तस्माद्भूरि प्रभूतं शत्रूणां धनं पराददिः। परादाता। शत्रूणां पराङ्मुखं यथा भवति तथा दातासि। भवसि। दभ्रस्य चित्। अल्पनामैतत्। अल्पस्यापि तव स्तोतुर्वृधो वर्धयितासि। तथा यजमानाय यागं कुर्वते सुन्वते सोमाभिषवं कुर्वते पुरुषाय शिक्षसि। अपेक्षितं धनं ददासि। शिक्षतिर्दानकर्मा। यस्मात्ते तव वसु धनं भूरि बहुलमक्षयं धनं विद्यते तस्माद्दासीति भावः॥ पराददिः। डुदाञ् दाने। आदृगमहनजन इति किप्रत्ययः। लिड्वद्भावाद्द्विर्वचने ह्रस्वत्वं। आतो लोप इटि चेत्याकारलोपः। वृधः। वृधेरंतर्भावितण्यर्थादिगुपधलक्षणः कः। सुन्वते। शतुरनुम इति विभक्तेरुदात्तत्वं॥

तृतीयामृचमाह॥

यदुदीरत आजयो धृष्णवे धीयते धना।

युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधोऽस्माँ इंद्र वसौ दधः॥३॥

यत्। उत्ऽईरते। आजयः। धृष्णवे। धीयते। धना।
युक्ष्व। मदऽच्युता। हरी इति। कं। हनः। कं। वसौ। दधः। अस्मान्। इंद्र।
वसौ। दधः ॥ ३ ॥

अत्रेदमाख्यानं। रहूगणपुत्रो गोतमः कुरुसृंजयानां राज्ञां पुरोहित आसीत्। तेषां राज्ञां परैः सह युद्धे सति स ऋषिरनेन सूक्तेनेंद्रं स्तुत्वा स्वकीयानां जयं प्रार्थयामासेति। तस्य च तत्पुरोहितत्वं वाजसनेयिभिराम्नातं। गोतमो ह वै राहूगण उभयेषां कुरुसृंजयानां पुरोहित आसीदिति ॥ यद्यदाजयः संग्रामा उदीरते। उद्गच्छंति। उत्पद्यंते। तदानीं धना धनं धृष्णवे। यो धृष्णुर्धर्षयिता शत्रूणां जेता भवति तस्मै धीयते। निधीयते। जयतो धनं भवतीत्यर्थः। हे इंद्र त्वं तादृशेषु युद्धेषु प्रवृत्तेषु मदच्युता शत्रूणां मदस्य गर्वस्य च्यावयितारौ हरी त्वदीयावश्वौ युक्ष्व। रथे योजय। योजयित्वा च कं कंचिद्राजानं तव परिचरणमकुर्वंतं हनः। हन्याः। कं च न। त्वां परिचरंतं वसौ वसुनि धने दधः। स्थापयसि। अतो जयपराजययोस्त्वमेव कारयितासि। तस्मात् हे इंद्रास्मानस्मदीयान्राज्ञो वसौ धने दधः। स्थापय ॥ उदीरते। ईर गतौ। आदादिकः। अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वर एव शिष्यते। यद्वृत्तयोगादनिघातः। धना। सुपां सुलुगिति डादेशः। युक्ष्वा। युजिर् योगे। अंतर्भावितण्यर्थाल्लोटि बहुलं छंदसीति विकरणस्य लुक्। द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं। हनः। हंतेर्लेटि सिप्यडागमः। हनश्च दधश्चेति चार्थप्रतीतेश्चादिलोपे विभाषेति प्रथमायास्तिङ्विभक्तेर्निघातप्रतिषेधः। वसौ। लिंगव्यत्ययः। दधः। दध धारणे। लेटि व्यत्ययेन परस्मैपदं ॥

चतुर्थीमृचमाह ॥

क्रत्वा महाँ अनुष्वधं भीम आ वावृधे शवः।
श्रिय ऋष्व उपाकयोर्नि शिप्री हरिवान्दधे हस्तयोर्वज्रमायसं ॥ ४ ॥
क्रत्वा। महान्। अनुऽस्वधं। भीमः। आ। ववृधे। शवः।
श्रिये। ऋष्वः। उपाकयोः। नि। शिप्री। हरिऽवान्। दधे। हस्तयोः। वज्रं। आयसं ॥ ४ ॥

क्रत्वा कर्मणा प्रज्ञया वा महान् सर्वाधिको भीमः शत्रूणां भयंकर इंद्रोऽनुष्वधं। स्वधेत्यन्ननाम। स्वधायां। विभक्त्यर्थेऽव्ययीभावः। सोमलक्षणस्यान्नस्य

पाने सतीत्यर्थः । शव आत्मीयं बलमाववृधे । आभिमुख्येन प्रावर्धयत । तदनंतरमृष्वो दर्शनीयः शिप्री । शिप्रे हनू नासिके वा । तद्युक्तः हरिवान् हरिनामकाश्वोपेत इंद्र उपाकयोः । अंतिकनामैतत् । समीपवर्तिनोर्हस्तयोर्बाह्वोरायसमयोमयं वज्रं श्रिये संपदर्थं निदधे । निदधाति । स्थापयति । सोमपानेन हृष्टः प्रबल इंद्रः शत्रूणां हननाय हस्ते वज्रं गृह्णातीति तात्पर्यार्थः ॥ क्त्वा । जसादिषु छंदसि वावचनमिति नाभावस्य विकल्पितत्वाद्भावः । आयसं । तस्य विकार इत्यण्प्रत्ययः ॥

पंचमीमृचमाह ॥

आ पप्रौ पार्थिवं रजो बद्बधे रोचना दिवि ।

न त्वावाँ इंद्र कश्चन न जातो न जनिष्यतेऽति विश्वं ववक्षिथ ॥ ५ ॥

आ । पप्रौ । पार्थिवं । रजः । बद्बधे । रोचना । दिवि ।

न । त्वाऽवान् । इंद्र । कः । चन । न । जातः । न । जनिष्यते । अति । विश्वं । ववक्षिथ ॥ ५ ॥

इंद्रः स्वतेजसा पार्थिवं पृथिव्याः संबंधि वस्तुजातं रजोऽंतरिक्षलोकं चापप्रौ । आपूरयति । तथा दिवि द्युलोके रोचना रोचमानानि दीप्तानि नक्षत्राणि बद्बधे । बबंध । स्थापितवान् । अतो हे इंद्र त्वावान् त्वत्सदृशः कश्चन न जातो नोत्पन्नोऽस्ति । न च जनिष्यते । उत्पत्स्यमानोऽपि नास्ति । तादृशस्त्वं विश्वं सर्वं रक्षितव्यं जगदतिववक्षिथ । अतिशयेन वोढुमिच्छसि । सर्वस्य जगतो निर्वाहको भवसीत्यर्थः ॥ पप्रौ । प्रा पूरणे । लिटचात औ णलः । पा० ७. १. ३४. । इत्यौकारादेशः । पार्थिवं । पृथिव्या ञाञावित्यञ्प्रत्ययः । ञित्त्वादाद्युदात्तत्वं । रजः । रजंत्यस्मिन् गंधर्वादय इति रजोऽंतरिक्षं । रंज रागे । असुनि रजकरजनरजःसूपसंख्यानमिति नलोपः । बद्बधे । बध बंधने । लिटि व्यत्ययेन हलादिशेषाभावः । एकहल्मध्यगतत्वाभावादेत्वाभ्यासलोपावपि न स्तः । पादादित्वान्निघाताभावः । त्वावान् । वतुप्प्रकरणे युष्मदस्मद्भ्यां छंदसि सादृश्य उपसंख्यानमिति वतुप् । आ सर्वनाम्न इत्यात्वं । ववक्षिथ । वह प्रापणे । अस्मादिच्छासनि सन्यत इतीत्वस्य सर्वे विधयश्छंदसि विकल्प्यंत इत्यभावः । सनंताल्लिट्यमंत्र इति निषेधादाम्प्रत्ययाभावः ॥

॥ इति प्रथमस्य षष्ठे प्रथमो वर्गः ॥

षष्ठीमृचमाह ॥

यो अर्यो मर्तभोजनं परादर्दाति दाशुषे।
इंद्रो अस्मभ्यं शिक्षतु वि भंजा भूरिं ते वसुं भक्षीय तव राधसः ॥ ६ ॥
यः। अर्यः। मर्तऽभोजनं। पराऽददाति। दाशुषे।
इंद्रः। अस्मभ्यं। शिक्षतु। वि। भज। भूरिं। ते। वसुं। भक्षीय। तवं। राधसः ॥ ६ ॥

अर्यः स्वामी पालयिता य इंद्रो मर्तभोजनं सर्वैर्मनुष्यैरुपभोज्यमन्नं दाशुषे चरुपुरोडाशादीनि दत्तवते यजमानाय परादर्दाति। प्रयच्छति। स इंद्रोऽस्मभ्यं शिक्षतु। तादृशमन्नं ददातु। अवशिष्टपादद्वयं प्रत्यक्षकृतं। हे इंद्र अस्मभ्यं दातुं धनं विभज। विभक्तं कुरु। यतस्ते तव वसु धनं भूरि बहुलमसंख्यातं। अतस्तव राधसो धनस्यैकदेशं भक्षीय। भजेय। प्राप्नुयां ॥ परादर्दाति। अभ्यस्तानामादिरित्याद्युदात्तत्वं। तिङि चोदात्तवतीति गतेरनुदात्तत्वं। दाशुषे। दाशृ दाने। दाश्वान् साह्वानिति क्वसुप्रत्ययांतो निपात्यते। चतुर्थ्येकवचने वसोः संप्रसारणमिति संप्रसारणं। शासिवसिघसीनां चेति षत्वं। भक्षीय। भज सेवायां। प्रार्थनायां लिङि तस्य छंदस्युभयथेत्यार्द्धधातुकत्वाच्छबभावः सलोपाभावश्च। एकाच इतीट्प्रतिषेधः। आगमानुदात्तत्वे प्रत्ययस्वर एव शिष्यते। पूर्वपदस्यासमानवाक्यगतत्वान्निघाताभावः। समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति वचनात् ॥

चातुर्विंशकेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिनो मदे मदे हि नो ददिरिति विकल्पिकोऽनुरूपस्तृचः। होत्रकाणामिति खंडे सूचितं। मदे मदे हि नो ददिः सुरूपकृत्नुमूतये। आ० ७.४.। इति ॥ तृचे प्रथमां सूक्ते सप्तमीमृचमाह ॥

मदेमदे हि नो ददिर्यूथा गवामृजुक्रतुः।
सं गृभाय पुरू शतोभयाहस्त्या वसुं शिशीहि राय आ भर ॥ ७ ॥
मदेऽमदे। हि। नः। ददिः। यूथा। गवां। ऋजुऽक्रतुः।
सं। गृभाय। पुरु। शता। उभयाहस्त्या। वसुं। शिशीहि। रायः। आ। भर ॥ ७ ॥

मदे मदे सोमपानेन हर्षे हर्षे सति ऋजुक्रतुर्ऋजुकर्मा स इंद्रो नोऽस्मभ्यं गवां यूथा यूथानि ददिर्हि। गोयूथानां दाता खलु। हे इंद्र स त्वं पुरू पुरूणि

प्रभूतानि शता शतसंख्याकानि । अपरिमितानीत्यर्थः । वसु वसूनि धनान्युभयाहस्त्योभाभ्यां हस्ताभ्यां संगृभाय । अस्मभ्यं दातुं सम्यक् गृहाण । शिशीहि । अस्मांस्तीक्ष्णीकुरु । निशितबुद्धियुक्तान् कुर्वित्यर्थः । रायो धनानि हस्तयोः स्थितान्याभर । आहर प्रयच्छ ॥ ददिः । डुदाञ् दाने । आदृगमहनजन इति किप्रत्ययः । यूथा । शेश्छंदसि बहुलमिति शेर्लोपः । गवां । सावेकाच इति प्राप्तस्य न गोश्वन्सावर्णेति प्रतिषेधः । गृभाय । ग्रह उपादाने । लोटि ह्नौ छंदसि शायजपीति श्नाप्रत्ययस्य शायजादेशः । हृग्रहोर्भ इति भत्वं । उभयाहस्त्या । उभयहस्तशब्दादुत्तरस्य तृतीयाद्विवचनस्य सुपां सुलुगिति ड्यादेशः । अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घत्वं । समासांतोदात्तत्व उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं । वसु । सुपां सुलुगिति विभक्तेर्लुक् । शिशीहि । शो तनूकरणे । बहुलं छंदसीति विकरणस्य श्लुः । आदेच इत्यात्वं । इदित्यनुवृत्तौ बहुलं छंदसीत्यभ्यासस्येत्वं । ई हल्यघोरिति धातोरीत्वं । पादादित्वान्निघाताभावः । रायः । ऊडिदमिति विभक्तेरुदात्तत्वं ॥

अष्टमीमृचमाह ॥

मादयस्व सुते सचा शवसे शूर राधसे ।
विद्मा हि त्वा पुरूवसुमुप कामान्त्ससृज्महेऽथा नोऽविता भव ॥ ८ ॥
मादयस्व । सुते । सचा । शवसे । शूर । राधसे ।
विद्म । हि । त्वा । पुरुऽवसुं । उप । कामान् । ससृज्महे । अथ । नः । अविता । भव ॥ ८ ॥

हे शूर शौर्यवन्निंद्र सुते सोमेऽभिषुते सत्यागत्य सचास्माकं सखा सन् मादयस्व । तेन सोमेन तृप्तो भव । किमर्थं । शवसे बलार्थं राधसेऽस्माकं धनार्थं च । त्वा त्वां पुरूवसुं बहुधनं विद्म हि । वयं जानीमः खलु । अतोऽस्मदीयान् कामान् माता गवा वत्सानिव त्वयोपससृज्महे हि । त्वया खल्वेकीकुर्मः । अथानंतरं नोऽस्माकमविताभिलषितफलप्रदानेन रक्षिता भव ॥ मादयस्व । मद तृप्तियोगे । चुरादिरात्मनेपदी । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे णिच एव स्वरः शिष्यते । ससृज्महे । सृज विसर्गे । बहुलं छंदसीति विकरणस्य श्लुः । प्रत्ययाद्युदात्तत्वं । अथापिशब्दानुषंगाच्छंदस्यनेकमपि साकांक्षं । पा॰ ८. १. ३५. । इति निघातप्रतिषेधः ॥

नवमीमृचमाह ॥

एते त इंद्र जंतवो विश्वं पुष्यंति वार्यं ।

अंतर्हि ख्यो जनानामर्यो वेदो अदाशुषां तेषां नो वेद आ भर ॥ ९ ॥

एते । ते । इंद्र । जंतवः । विश्वं । पुष्यंति । वार्यं ।

अंतः । हि । ख्यः । जनानां । अर्यः । वेदः । अदाशुषां । तेषां । नः । वेदः । आ । भर ॥ ९ ॥

हे इंद्र ते तव स्वभूता एते जंतवो यजमानलक्षणा जना विश्वं सर्वं वार्यं सर्वैः संभजनीयं हविः पुष्यंति । वर्धयंति । अदाशुषां हविषामदातॄणां जनानामंतर्मध्ये विद्यमानं वेदो धनमर्यः सर्वेषां स्वामी त्वं ख्यो हि । पश्यसि हि । जानामीत्यर्थः । तेषामयजमानानां वेदो धनं नोऽस्मभ्यमाभर । आहर । प्रयच्छेति यावत् । अयजमानेषु विद्यमानं धनं यागानुपयुक्तत्वाद्व्यर्थमेव भवेत् । अतस्तस्य धनस्य सार्थकत्वाय तदीयं धनमपहृत्य यजमानेभ्यः प्रयच्छेति तात्पर्यार्थः ॥ ख्यः । ख्या प्रकथने । अयं दर्शनार्थोऽपि वर्तमाने छांदसो लुङ् । अस्यतिवक्तीत्यादिना च्लेरङादेशः । आतो लोप इटि चेत्याकारलोपः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । हि चेति निघातप्रतिषेधः ॥

॥ इति प्रथमस्य षष्ठे द्वितीयो वर्गः ॥

उपो ष्विति षडृचं नवमं सूक्तं गोतमस्यार्षमैंद्रं । अंत्या जगती । आद्याः पंक्तयः । अनुक्रांतं च । उपो षु षड् जगत्यंतमिति । सूक्तविनियोगो लैंगिकः । षोडशिशस्त्र आद्या सुसंदृशमित्यादिके द्वे ऋचौ च विनियुज्यंते । अथ षोडशीति खंडे सूत्रितं । उपो षु शृणुही गिरः सुसंदृशं त्वा वयं मघवन्नित्येका द्वे च पंक्ती । आ० ६. २. । इति ॥

तत्र प्रथमामृचमाह ॥

उपो षु शृणुही गिरो मघवन्मातथा इव ।

यदा नः सूनृतावतः कर आदर्थयास इद्योजा न्विंद्र ते हरी ॥ १ ॥

उपो इति । सु । शृणुहि । गिरः । मघऽवन् । मा । अतथाःऽइव ।

यदा । नः । सूनृताऽवतः । करः । आत् । अर्थयासे । इत् । योज । नु । इंद्र । ते ।

हरी इति ॥ १ ॥

हे मघवन् धनवन्निंद्र गिरोऽस्मदीयाः स्तुतीरुपो उपैव सु शृणुहि। उपगत्य सम्यक् शृणु। अतथा इव। पूर्वं यथाविधस्त्वं तद्विपरीतो मा भूः। अस्मासु पूर्वं यथानुग्रहबुद्धियुक्तस्तथाविध एव भवेत्यर्थः। अपि च नोऽस्मान्सूनृतावतः। प्रियसत्यात्मिका वाक् सूनृता। तया स्तुतिरूपया वाचा युक्तान्यदा करः। करोषि। आत् अनंतरं त्वमपर्थयास इत्। अर्थयस एव। याच्यस एव। न तदास्से। अस्माभिः प्रयुक्ताः स्तुतीस्त्वमपि स्वीकरोषीत्यर्थः। अतो हे इंद्र ते हरी त्वदीयावश्वौ नु क्षिप्रं योज। रथे योजय ॥ शृणुहि। उतश्च प्रत्ययाच्छंदसि वावचनमिति वचनादुतश्च प्रत्ययादिति हेर्लुगभावः। अतथा इव। तथेवाचरति तथाति। सर्वप्रातिपदिकेभ्य इत्येक इति क्विप्। तथातेरप्रत्ययः। न तथा इव अतथा इव। अव्ययपूर्वपदप्रकृतिस्वरत्वं। करः। डुकृञ् करणे। लङि कृमृहरुहिभ्यश्छंदसीति च्लेरङादेशः। नन्वङः सति शिष्टत्वात् चित्स्वरेणांतोदात्तेन भवितव्यं। तर्हि लङि व्यत्ययेन शप्। ननु डुकृञ् करण इति भूवादौ पठ्यते। अतो व्यत्ययः कस्मात् क्रियत इति चेत् नैवं। यस्मादस्य धातोस्तत्र पाठोऽनर्थः। तथा हि। कः करत्करतीत्यत्र यदाहतुर्न्यामकारहरदत्तौ व्यत्ययेन शबिति तस्मादस्य धातोर्भूवादौ पाठो नास्तीति गम्यते। किंच यद्ययं पठ्येत करदित्येवमादिरूपसिद्ध्यर्थं कृमृहरुहिभ्यश्छंदसीति करोतेरङ्विधानमनर्थकं स्यात्। अस्माल्लङि शपस्य रूपसिद्धेः। लुङ्लङोरर्थभेदाल्लुङ्यतद्रूपसिद्धये कर्तव्यमङ्विधानमिति चेत् न। छंदसि लुङ्लङ्लिट इति लुङादीनामेकत्र विधानेनार्थभेदाभावादित्यनेन प्रकारेणास्माभिर्धातुवृत्तावयं धातुर्निराकृतः। अतो व्यत्ययेनेति सिद्धं। अर्थयासे। अर्थ याच्ञायां। चुरादिरात्मनेपदी। लेट्याडागमः। योजा। युजिर् योगे। ण्यंताल्लोटि छंदस्युभयथेति शप आर्द्धधातुकत्वाण्णेरनिटीति णिलोपः। द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं ॥

द्वितीयामृचमाह ॥

अक्षन्नमीमदंत ह्यव प्रिया अधूषत।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विंद्र ते हरी ॥ २ ॥

अक्षन्। अमीमदंत। हि। अव। प्रियाः। अधूषत।
अस्तोषत। स्वऽभानवः। विप्राः। नविष्ठया। मती। योज। नु। इंद्र। ते। हरी इति ॥ २ ॥

हे इंद्र त्वया दत्तान्यन्नान्यक्षन्। यजमाना भुक्तवंतः। भुक्त्वा चामीमदंत हि। तृप्ताश्चासन्। प्रियाः स्वकीयास्तनूरवाधूषत। अकंपयन्। अतिशयितरसास्वादनेन वक्तुमशक्नुवंतः शरीराण्यकंपयन्। तदनंतरं स्वभानवः स्वायत्तदीप्तयो विप्रा मेधाविनस्ते नविष्ठया नवितृतमया मती मत्या स्तुत्यास्तोषत। अस्तुवन्। अन्यत्पूर्ववद्योज्यं ॥ अक्षन्। अदेर्लुङि लुङ्सनोर्घस्लृ। पा० २. ४. ३७.। इति घस्लादेशः। मंत्रे घसेत्यादिना च्लेर्लुक्। गमहनेत्यादिनोपधालोपः। खरि चेति चर्त्वं। शासिवसिघसीनां चेति षत्वं। अडागम उदात्तः। अमीमदंत। मद तृप्तियोगे। चुरादिरात्मनेपदी। लुङि च्लेश्चङि णिलोपोपधाह्रस्वत्वद्विर्भावसन्वद्भावेत्वदीर्घाः। अधूषत। धूञ् कंपने। लुङि सिचि व्यत्ययेन गुणाभावः। यद्वा छंदस्युभयथेति सिचः सार्वधातुकत्वेन ङित्त्वात् क्ङिति चेति प्रतिषेधः। अथवा धू विधूनने। तौदादिकः। कुटादिः। अस्मात्कर्मणि लुङि गाङ्कुटादिभ्य इति सिचो ङित्त्वाद्गुणाभावः। नविष्ठया। णु स्तुतौ। करणभूताया अपि स्तुतेः स्वव्यापारकर्तृत्वात्तृच्। तदंतात् तुश्छंदसीतीष्ठन्प्रत्ययः। तुरिष्ठेमेयःस्विति तृलोपः। मती। सुपां सुलुगिति तृतीयायाः पूर्वसवर्णदीर्घत्वं। मंत्रे वृषेषपचमनेति क्तिन उदात्तत्वं ॥

महापितृयज्ञे सुसंदृशमित्येषाहवनीयोपस्थाने विनियुक्ता। सूचितं च। आहवनीयं सुसंदृशं त्वेति पंक्त्या। आ० २. १९.। इति ॥ तामेतां सूक्ते तृतीयामृचमाह ॥

सुसंदृशं त्वा वयं मघवन्वंदिषीमहि।

प्र नूनं पूर्णवंधुरः स्तुतो याहि वशाँ अनु योजा न्विंद्र ते हरी ॥ ३ ॥

सुऽसंदृशं। त्वा। वयं। मघऽवन्। वंदिषीमहि।

प्र। नूनं। पूर्णऽवंधुरः। स्तुतः। याहि। वशान्। अनु। योज। नु। इंद्र। ते। हरी इति ॥ ३ ॥

हे मघवन्निंद्र सुसंदृशं सुष्ठ्वनुग्रहदृष्ट्या सर्वस्य द्रष्टारं त्वा त्वां वयं वंदिषीमहि। स्तवामहि। स्तुतिकर्तारो भूयास्मेत्याशास्यते। अस्माभिर्वंदिभिः स्तुतस्त्वं पूर्णवंधुरः स्तोतृभ्यो देयैर्धनैः पूरितेन रथेन युक्तः सन् वशान् कामयमानानन्यान्यजमानान्प्रति नूनं प्रयाहि। अवश्यं प्रतिष्ठस्व। योजेत्यादि पूर्ववत् ॥ वंदिषीमहि। वदि अभिवादनस्तुत्योः। आशीर्लिङ्। लिङाशिषि। पा० ३. ४. ११६.।

इति तस्यार्धधातुकत्वेन लसार्वधातुकस्वराभावे प्रत्ययाद्युदात्तत्वं । मघवन्नित्यस्यामंत्रितं पूर्वमविद्यमानवदित्यविद्यमानवत्त्वे सति पादादित्वान्निघाताभावः ॥

चतुर्थीमृचमाह ॥

स घा तं वृषणं रथमधि तिष्ठाति गोविदं ।
यः पात्रं हारियोजनं पूर्णमिंद्र चिकेतति योजा न्विंद्र ते हरी ॥ ४ ॥

सः । घ । तं । वृषणं । रथं । अधि । तिष्ठाति । गोऽविदं ।
यः । पात्रं । हारिऽयोजनं । पूर्णं । इंद्र । चिकेतति । योज । नु । इंद्र । ते । हरी इति ॥ ४ ॥

स घ स खल्विंद्रो वृषणं कामाभिवर्षकं गोविदं गवां लंभयितारं तं रथमधितिष्ठाति । ईदृशे रथेऽधितिष्ठतु । आरूढो भवतु । हे इंद्र यो रथो हारियोजनमेतत्संज्ञकं धानामिश्रितं पूर्णं सोमेन पूर्णं पात्रं चिकेतति ज्ञापयति तं रथमधितिष्ठेति पूर्वेणान्वयः । अधिष्ठाय च त्वदीयावश्वौ क्षिप्रं योजय ॥ घा । ऋचि तुनुघेति दीर्घः । रथं । अधिशीङ्स्थासां कर्म । पा० १. ४. ४६. । इत्यधिकरणस्य कर्मसंज्ञा । तिष्ठाति । तिष्ठतेर्लेट्याडागमः । चिकेतति । कित ज्ञाने । लेट्याडागमः । जुहोत्यादित्वाच्छपः श्लुः । बहुलं छंदसीति वक्तव्यमिति वचनान्नाभ्यस्तस्याचि पितीति लघूपधगुणप्रतिषेधो न भवति ॥

पंचमीमृचमाह ॥

युक्तस्ते अस्तु दक्षिण उत सव्यः शतक्रतो ।
तेन जायामुप प्रियां मंदानो याह्यंधसो योजा न्विंद्र ते हरी ॥ ५ ॥

युक्तः । ते । अस्तु । दक्षिणः । उत । सव्यः । शतक्रतो इति शतऽक्रतो ।
तेन । जायां । उप । प्रियां । मंदानः । याहि । अंधसः । योज । नु । इंद्र । ते । हरी इति ॥ ५ ॥

हे शतक्रतो बहुकर्मन्निंद्र ते त्वदीये रथे दक्षिणो दक्षिणपार्श्वस्थाश्वो युक्तोऽस्तु । उत अपि च सव्यो वामपार्श्वस्थोऽपि युक्तोऽस्तु । तेन रथेनांधसः सोमलक्षणस्यान्नस्य पानेन मंदानो मत्तस्त्वं प्रियां प्रीणयित्री जायामुपयाहि । सा यत्र वर्तते तत्र गच्छेत्यर्थः । तदर्थं हे इंद्र त्वदीयावश्वौ रथे क्षिप्रं योजय । अनयोत्तरया च पीतसोमस्येंद्रस्य स्वगृहं प्रति प्रस्थानं प्रतिपाद्यते ॥ मंदानः । मदि स्तुतिमोदमदस्वप्नकांतिगतिषु । लिटः कानच् । द्विर्वचनप्रकरणे छंदसि

वेति वक्तव्यमिति द्विर्वचनाभावः । अंधसः । अद भक्षणे । अदेर्नुम् धश्चेत्यसुन् धातोर्नुमागमो धकारांतादेशश्च ॥

अंत्येष्वहःसु हारियोजनस्य युनज्मीत्येषा याज्या । सूचितं च । युनज्मि ते ब्रह्मणा केशिना हरी इति याज्यानुवाक्ये अंत्येष्वहःस्विति ॥

तामेतां षष्ठीमृचमाह ॥

युनज्मि ते ब्रह्मणा केशिना हरी उप प्र याहि दधिषे गभस्त्योः ।
उत्त्वा सुतासो रभसा अमंदिषुः पूषण्वान्वज्रिन्त्समु पत्न्यामदः ॥ ६ ॥

युनज्मि । ते । ब्रह्मणा । केशिना । हरी इति । उप । प्र । याहि । दधिषे । गभस्त्योः ।
उत् । त्वा । सुतासः । रभसाः । अमंदिषुः । पूषण्ऽवान् । वज्रिन् । सं । ऊं इति ।
पत्न्या । अमदः ॥ ६ ॥

हे इंद्र केशिना केशयुक्तौ शिखावंतौ ते हरी त्वदीयावश्वौ ब्रह्मणा स्तोत्ररूपेण मंत्रेण युनज्मि । रथे संयोजयामि । तेन रथेनोप प्रयाहि । त्वद्गृहमुपगच्छ । गभस्त्योः । बाहुनामैतत् । बाह्वोरश्वबंधकान् रश्मीन्दधिषे । धारयस्व । त्वा त्वां सुतासो यज्ञेऽभिषुताः सोमा रभसा वेगवंतः । तीव्राः क्षिप्रं मदकारिण इत्यर्थः । उदमंदिषुः । उत्कृष्टमदयुक्तमकार्षुः । हे वज्रिन् अतस्त्वं स्वगृहं गत्वा पूषण्वान् । अत्र पूषन्शब्दः पुष्टौ वर्तते । पुष्टिर्वै पूषा । पुष्टिमेवावरुंध इति श्रुतेः । सोमपानजनितया पुष्ट्या युक्तः सन् पत्न्या स्वभार्यया सह समु अमदः । सम्यगेव तृप्तो भव ॥ केशिना । केशशब्दान्मत्वर्थीय इनिः । सुपां सुलुगिति विभक्तेराकारः । रभसाः । अर्शआदित्वादच् । अमंदिषुः । व्यत्ययेन परस्मैपदं । पूषण्वान् । पुष पुष्टौ । श्वनुक्षन्नित्यादौ पूषन्निति निपात्यते । तच्चात्र भावसाधनं द्रष्टव्यं । पूषास्यास्तीति पूषण्वान् । मादुपधाया इति मतुपो वत्वं । नलोपेऽनो नुट् । पा॰ ८.२.१६. । इति नुट् । ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं । अमदः । मदी हर्षे । छंदसि लुङ्लङ्लिट इति प्रार्थनायां लङ् । श्यनि प्राप्ते व्यत्ययेन शप् ॥

॥ इति प्रथमस्य षष्ठे तृतीयो वर्गः ॥

अश्वावतीति षडृचं दशमं सूक्तं गोतमस्यार्षमैंद्रं जागतं । तथा चानुक्रांतं । अश्वावति जागतमिति । अतिरात्रे तृतीये पर्याये ब्राह्मणाच्छंसिशस्त्र इदं सूक्तं । सूचितं च । अश्वावति प्रोग्रां पीतिं वृष्ण इयर्मि सत्यामिति याज्ये । आ॰ ६.४. । इति ॥

तत्र प्रथमामृचमाह ॥

अश्वावति प्रथमो गोषु गच्छति सुप्रावीरिंद्र मर्त्यस्तवोतिभिः ।
तमित्पृणक्षि वसुना भवीयसा सिंधुमापो यथाभितो विचेतसः ॥ १ ॥

अश्वऽवति । प्रथमः । गोषु । गच्छति । सुप्रऽअवीः । इंद्र । मर्त्यः । तव । ऊतिऽभिः ।
तं । इत् । पृणक्षि । वसुना । भवीयसा । सिंधुं । आपः । यथा । अभितः ।
विऽचेतसः ॥ १ ॥

हे इंद्र यो मर्त्यो मनुष्यस्तवोतिभिस्त्वदीयै रक्षणैः सुप्रावीः सुष्ठु प्ररक्षितो भवति स मर्त्योऽश्वावति बहुभिरश्वैर्युक्ते गृहे वर्तमानो गोषु प्राप्तव्येषु प्रथमो गच्छति । सर्वेभ्यो यजमानेभ्यः पूर्वमेव गोमान् भवतीत्यर्थः । त्वं तमित् तमेव पुरुषं भवीयसा बहुतरेण भवितृतमेन वा शतसहस्रादिसंख्यायुक्तेन वसुना धनेन पृणक्षि । संपृक्तं संपूर्णं करोषि । तत्र दृष्टांतः । विचेतसो विशिष्टज्ञानहेतुभूता आपो यथाभितः सर्वासु दिक्षु सिंधुं समुद्रं पूरयंति तद्वत् ॥ अश्वावति । मंत्रे सोमाश्वेति मतौ दीर्घत्वं । सुप्रावीः । अवितृस्तृतंत्रिभ्य ईरित्यवतेरीकारप्रत्ययः । ऊतिभिः । ऊतियूतीत्यादिना क्तिन उदात्तत्वं । पृणक्षि । पृची संपर्के । रौधादिकः । भवीयसा । बहुशब्दादीयसुनि बहोर्लोपो भू च बहोरिति बहुशब्दस्य भूभावः । ईयसुन ईकारलोपश्च । अत्र तु छांदसत्वादीकारलोपो न क्रियते । भूभावश्च क्रियते । अथवा भवितृशब्दात्तुश्छंदसीतीयसुन् । तुरिष्ठेमेयःस्विति तृलोपः ॥

अपोनप्त्रीये होतृचमसेऽद्भिः पूर्यमाण आपो न देवीरित्येषानुवक्तव्या । सूत्रितं च । आपो न देवीरुप यंति होत्रियमिति समाप्य । आ० ५. १. । इति । ब्राह्मणं च भवति । आपो न देवीरुप यंति होत्रियमिति होतृचमसेऽवनीयमानास्वन्वाहेति ॥ तामेतां द्वितीयामृचमाह ॥

आपो न देवीरुप यंति होत्रियमवः पश्यंति विततं यथा रजः ।
प्राचैर्देवासः प्र णयंति देवयुं ब्रह्मप्रियं जोषयंते वरा इव ॥ २ ॥

आपः । न । देवीः । उप । यंति । होत्रियं । अवः । पश्यंति । विऽततं । यथा । रजः ।
प्राचैः । देवासः । प्र । नयंति । देवऽयुं । ब्रह्मऽप्रियं । जोषयंते । वराःऽइव ॥ २ ॥

होत्रियं होतुः स्वभूतं चमसं देवीर्देव्यो द्योतमाना आपो न यथाप उपयंति। उपगच्छंति। तद्वदुपरि वर्तमाना देवा एतमेव चमसमवोऽवस्तात्पश्यंति। होतृचमसेऽस्माकं सोमाभिषवायापः पूरिता इति तेषां दृष्टिरयस्मिन् संलग्नाभूत्। तत्र दृष्टांतः। विततं विस्तीर्णं रजो ज्योतिः सूर्यसंबंधि यथा निरंतरमवस्तात्पतति तद्वत्। देवयुं देवान् कामयमानमेतं चमसं प्राचैः प्राचीनं यद्वा प्रांचनैः प्रगमनैरुत्तरवेद्यभिमुखं होमकाले प्रणयंति। होमार्थं प्रणीतं ब्रह्मप्रियं ब्रह्मणा सोमलक्षणेनान्नेन प्रीतं। संतृप्तं पूरितमित्यर्थः। जोषयंते। सर्वे देवास्तं चमसं सेवंते। वरा इव कन्यकां। यथा वरा ममेयं भविष्यति ममेयं भविष्यतीति कन्यकां सेवंते। एवं देवा अपि ममायं सोमो ममायं सोम इत्यस्य पार्श्वे वर्तंत इत्यर्थः। एवमग्नीषोमीयविनियोगानुसारेण योजितं मंत्रस्यानुष्ठेयार्थप्रकाशकत्वात्॥ यदा तु रात्रिपर्यायेऽस्या विनियोगस्तदा त्वेवं व्याख्येयं। हे इंद्र देव्य आपो यथा निम्नदेशमुपगच्छंति। एवं देवास्त्वदीयं स्तोत्रं शुश्रूषमाणा होत्रियं होतृसंबंधि विस्तारस्थानमुपगच्छंति। उपगत्य चावस्तात्पश्यंति विततं ज्योतिरिव। देवयुं देवानात्मन इच्छंतमेतं शंसितारमागताः सर्वे देवाः प्राचीनं प्रणयंति। अग्रतो धारयंति। ब्रह्मप्रियं स्तोत्रप्रियं त्वां शंसंतं वराः कन्यका इव सेवंते॥ होत्रियं। होतृशब्दात्तस्येदमर्थे घप्रत्ययः। अवः। पूर्वाधरावराणामसि पुरधवश्चैषामित्यसिप्रत्ययांतोदात्तः। प्राचैः। उच्चैर्नीचैरितिवदव्ययं। यद्वा। प्रपूर्वादंचतेर्घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थमिति परिगणनस्योपलक्षणार्थत्वाद्भावे कप्रत्ययः। अनिदितामिति नलोपः। जोषयंते। जुषी प्रीतिसेवनयोः। स्वात्मनः प्रयोज्यत्वाद्धेतुमति णिच्॥

प्रवर्ग्याभिष्टवेऽधि द्वयोरित्येषा। स्पृष्ट्वोदकमिति खंडे सूचितं। अधि द्वयोरदधा उक्थ्यं वचः शुक्रं ते अन्यद्यजतं ते अन्यत्। आ॰ ४. ६.। इति॥ हविर्धानप्रवर्तनेऽप्येषा। सूचितं च। यमे इव यतमाने यदैतमधि द्वयोरदधा उक्थ्यं वच इत्यर्धर्च आरमेत्। आ॰ ४. ९.। इति॥ तामेतां सूक्ते तृतीयामृचमाह॥

अधि॒ द्वयो॑रदधा उ॒क्थ्यं१॒॑ वचो॑ य॒तस्रु॑चा मिथु॒ना या स॑प॒र्यतः॑।

अ॒सं॒य॒त्तो व्र॒ते ते॑ क्षेति॒ पुष्य॑ति भ॒द्रा श॒क्तिर्यज॑मानाय सुन्व॒ते॥३॥

अधि॑। द्वयोः॑। अ॒द॒धाः॒। उ॒क्थ्य॑म्। वचः॑। य॒तऽस्रु॑चा। मि॒थु॒ना। या। स॒प॒र्यतः॑।

अस॑म्ऽयतः। व्र॒ते। ते॒। क्षे॒ति॒। पुष्य॑ति। भ॒द्रा। श॒क्तिः। यज॑मानाय। सु॒न्व॒ते॥३॥

हे इंद्र द्वयोर्हविर्धानयोरुक्थ्यं। उक्थं शस्त्रं। तद्योग्यं वचो युजे वामित्यादिमंत्ररूपं वचनमध्यदधाः। निहितवानसि। ननु हविर्धानयोर्द्वयोः कथमेकमेव वचोऽधिनिधीयत इत्याशंक्य ब्राह्मणेनैवं व्याख्यातं। अधि द्वयोरदधा उक्थ्यं वच इति द्वयोर्ह्येतत्तृतीयं छदिरधिनिधीयत उक्थ्यं वच इति यदाह यज्ञियं वै कर्मोक्थ्यं वचो यज्ञमेवैतेन समर्द्धयतीति। तत्र यथा हविर्धानद्वय एकमेव तृतीयं छदिरधिनिधीयते। एवं स्तोत्रमप्युभयोरेकं युक्तं। उक्थं नाम यज्ञसंबंधि शस्त्रं तद्योग्यं वचनमपि यज्ञियं कर्म। तस्य यज्ञरूपयोर्हविर्धानयोर्यज्ञत्वसंपादनायाधिनिधानाद्यज्ञोऽपि समृद्धो भवति। कीदृशयोर्हविर्धानयोः। यतस्रुचा। यताः संबद्धाः स्रुचो ग्रहचमसादिलक्षणानि पात्राणि ययोस्ते। मिथुना युगलरूपेण वर्तमाने या ये हविर्धाने त्वां सपर्यतः पूजयतस्तयोरित्यर्थः। किंच। ईदृग्रूपहविर्धानयुक्तो यजमानोऽसंयतः शत्रुभिः सह युद्धार्थमनभिगतः सन् ते व्रते त्वदीये कर्मणि क्षेति। निवसति। पुष्यति च। प्रजया पशुभिश्च पुष्टो भवति च। सुन्वते त्वद्देवत्ये यागे सोमाभिषवं कुर्वतो यजमानस्य भद्रा कल्याणी शक्तिरुत्कृष्टं बलं भवति। एतत्सर्वं हविर्धानयोरुक्थ्यस्य वचसोऽधिनिधानेन त्वया कृतमित्यर्थः॥ यतस्रुचा। यम उपरमे। निष्ठायामनुदात्तोपदेशेत्यादिनानुनासिकलोपः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। इदमादिषु त्रिषु पदेषु सुपां सुलुगिति विभक्तेराकारः। सपर्यतः। सपर पूजायां। कंड्वादिभ्यो यक्। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे तस्यैव स्वरः शिष्यते। क्षेति। क्षि निवासगत्योः। बहुलं छंदसीति विकरणस्य लुक्। सुन्वते। षष्ठ्यर्थे चतुर्थी वक्तव्येति चतुर्थी। शतुरनुम इति विभक्तेरुदात्तत्वं॥

चतुर्थीमृचमाह॥

आदंगि॑राः प्रथ॒मं द॑धिरे॒ वय॑ इ॒द्धाग्न॑यः॒ शम्या॒ ये सु॑कृ॒त्यया॑।
सर्वं॑ प॒णेः सम॑विंदंत॒ भोज॑न॒मश्वा॑वंतं॒ गोमं॑तमा प॒शुं नरः॑॥४॥

आत्। अंगि॑राः। प्र॒थ॒मं। द॒धि॒रे॒। वयः॑। इ॒द्धऽअ॑ग्नयः। शम्या॑। ये। सु॒ऽकृ॒त्यया॑।
सर्वं॑। प॒णेः। सं। अ॒विं॒दं॒त॒। भोज॑नं। अश्व॑ऽवंतं। गोऽमं॑तं। आ। प॒शुं। नरः॑॥४॥

यदा पणिभिर्गावोऽपहृतास्तदानीमंगिरा अंगिरसः प्रथमं पूर्वमयतो वयो हविर्लक्षणमन्नं दधिरे। इंद्रार्थं संपादितवंतः। आत् अनंतरं तादृशा येऽगिरस इद्धाग्नयः प्रज्वलिताग्नियुक्ताः संतः सुकृत्यया शोभनकरणोपेतया शम्या कर्मणा

शोभनेन यागेनेंद्रमयजन्निति शेषः। ते नरो यज्ञस्य नेतारोऽंगिरसः पणेरेतन्नाम्नोऽसुरस्य संबंधि सर्वं भोजनं धनं समविंदंत। समलभंत। कीदृशं। अश्वावंतं। अश्वैर्युक्तं। गोमंतं। गोभिर्युक्तं। आकारः समुच्चये। गवाश्वव्यतिरिक्तमन्यत्पशुजातं च समविंदंत॥ अंगिराः। सुपां सुलुगिति जसः सुः। शम्या। शमीति कर्मनाम। शाम्यत्यनया क्रियया दोषजातमिति शमी। करणे घञ्। नोदात्तोपदेशस्य मांतस्यानाचमेरिति वृद्धिप्रतिषेधः। गौरादित्वात् ङीष्। व्यत्ययेनाद्युदात्तत्वं। सुकृत्यया। शोभनं कृत्यं करणं यस्यां सा तथोक्ता। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं॥

पंचमीमृचमाह॥

यज्ञैरथर्वा प्रथमः पथस्तते ततः सूर्यो व्रतपा वेन आजनि।
आ गा आजदुशना काव्यः सचा यमस्य जातममृतं यजामहे॥५॥

यज्ञैः। अथर्वा। प्रथमः। पथः। तते। ततः। सूर्यः। व्रतऽपाः। वेनः। आ। अजनि।
आ। गाः। आजत्। उशना। काव्यः। सचा। यमस्य। जातं। अमृतं। यजामहे॥५॥

पणिभिरपहृतासु गोष्वथर्वतत्संज्ञ ऋषिर्यज्ञैरिंद्रदेवत्यैरनुष्ठितैर्यागैः पथो गोसंबंधिनो मार्गान् प्रथमस्तते। तनुते। सर्वेभ्य ऋषिभ्यः पूर्वमेव कृतवानित्यर्थः। ततस्तदनंतरं व्रतपा व्रतानां कर्मणां पालयिता वेनः कांतः सूर्यः सूर्यरूप इंद्र आजनि। गवां प्रदर्शनायाविरभूत्। ततोऽथर्वा ता गा आजत्। आभिमुख्येन प्राप्नोत्। तादृशस्येंद्रस्य काव्यः कवेः पुत्र उशना भृगुः सचासुरनिरसनाय सहायोऽभूत्। यमस्यासुराणां नियमनार्थं जातं प्रादुर्भूतममृतं मरणरहितं तमिंद्रं यजामहे। हविर्भिः पूजयामः॥ पथः। शसि भस्य टेर्लोप इति टिलोपः। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। तते। तनु विस्तारे। बहुलं छंदसीति विकरणस्य लुक्। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः। अजनि। जनी प्रादुर्भावे। दीपजनबुधेत्यादिना। पा० ३.१.६१.। कर्तरि लुङि च्लेश्चिण्। आजत्। अज गतिक्षेपणयोः॥

षष्ठीमृचमाह॥

बर्हिर्वा यत्स्वपत्याय वृज्यतेऽर्को वा श्लोकमाघोषते दिवि।
ग्रावा यत्र वदति कारुरुक्थ्य१स्तस्येदिंद्रो अभिपित्वेषु रण्यति॥६॥

बर्हिः। वा। यत्। सुऽअपत्याय। वृज्यते। अर्कः। वा। श्लोकं। आऽघोषते। दिवि। ग्रावा। यत्र। वदति। कारुः। उक्थ्यः। तस्य। इत्। इंद्रः। अभिऽपित्वेषु। रण्यति ॥ ६ ॥

स्वपत्याय शोभनापतनहेतुभूताय कर्मणे बर्हिर्वा यद्यदा वृज्यते। छिद्यते। अध्वर्युणा यागार्थमाह्रियते। अर्को वा स्तोत्रनिष्पादको होता वा श्लोकं स्तुतिरूपां वाचं दिवि द्योतमाने यज्ञे यदाघोषते। उच्चारयति। यत्र यस्मिन्काले ग्रावाभिषवार्थं प्रवृत्त उपलो वदति शब्दं करोति। तत्र दृष्टांतः। कारुरुक्थ्यः। लुप्तोपममेतत्। उक्थ्यस्य शस्त्रस्य शंसिता कारुः स्तोता यथाभिमतशब्दं करोति तद्वत्। तस्य पूर्वोक्तस्य सर्वस्याभिपित्वेष्वभिप्राप्तिष्विंद्रो रण्यति। रमते। यद्वा पूर्वोक्तानां बर्हिरादीनामभिप्राप्तिषु सतीष्विंद्रो रण्यति। अस्मदीयो यागो भविष्यतीति हर्षशब्दं करोति॥ वृज्यते। वृजी वर्जने। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे यक एव स्वरः शिष्यते। निपातैर्यद्यदिहंतेति निघातप्रतिषेधः। आघोषते। घुषिर् विशब्दने। भौवादिकः। अत्रापि यदित्यस्य निपातस्यानुषंगान्निघाताभावः। रण्यति। रमु क्रीडायां। व्यत्ययेन श्यन् परस्मैपदं च। अंत्यविकारश्छांदसः। यद्वा रण शब्दार्थः। व्यत्ययेन श्यन्॥

॥ इति प्रथमस्य षष्ठे चतुर्थो वर्गः ॥

असावीति विंशत्यृचमेकादशं सूक्तं। अत्रानुक्रम्यते। असावि विंशतिः षळनुष्टुभ औष्णिहपांक्तगायत्रत्रैष्टुभास्तृचाः प्रगाथ इति। आदितः षडनुष्टुभः सप्तम्याद्यास्तिस्र उष्णिहः। दशम्याद्यास्तिस्रः पंक्तयः। त्रयोदश्याद्यास्तिस्रो गायत्र्यः। षोडश्याद्यास्तिस्रस्त्रिष्टुभः। एकोनविंशी बृहती विंशी सतोबृहती। अनुवर्तनाद्गोतम ऋषिः। अनादेशपरिभाषयेंद्रो देवता॥ सूक्तविनियोगो लिंगादवगंतव्यः॥ अविहृतषोडशिशस्त्र आद्यौ तृचौ स्तोत्रियानुरूपौ। सूत्रितं च। अथ षोडश्यसावि सोम इंद्र त इति स्तोत्रियानुरूपौ। आ० ६. २.। इति॥ आभिप्लविकेषूक्थ्येषु तृतीयसवनेऽच्छावाकस्येमावेव तृचौ वैकल्पिकौ स्तोत्रियानुरूपौ। एह्यू ष्विति खंडे सूत्रितं। असावि सोम इंद्र त इममिंद्र सुतं पिब। आ० ७. ८.। इति॥

तत्र प्रथमामृचमाह ॥

असावि सोम इंद्र ते शविष्ठ धृष्णवा गहि ।
आ त्वा पृणक्त्विंद्रियं रजः सूर्यो न रश्मिभिः ॥ १ ॥
असावि । सोमः । इंद्र । ते । शविष्ठ । धृष्णो इति । आ । गहि ।
आ । त्वा । पृणक्तु । इंद्रियं । रजः । सूर्यः । न । रश्मिऽभिः ॥ १ ॥

हे इंद्र ते त्वदर्थं सोम असावि । अभिषुतोऽभूत् । हे शविष्ठ । अतिशयेन बलवन् । अत एव धृष्णो शत्रूणां धर्षयितरिंद्र आगहि । देवयजनदेशमागच्छ । आगतं त्वामिंद्रियं सोमपानेनोत्पन्नं प्रभूतं सामर्थ्यमापृणक्तु । आपूरयतु । रजोऽंतरिक्षं रश्मिभिः किरणैः सूर्यो न । यथा सूर्यः पूरयति तद्वत् ॥ शविष्ठ । शवस्विन्शब्दादिष्ठनि विन्मतोर्लुक् । टेरिति टिलोपः । पादादित्वान्निघाताभावः । गहि । गमेर्लोटि बहुलं छंदसीति शपो लुक् । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः । तस्यासिद्धवदत्रा भादित्यसिद्धवत्त्वाद्धेर्लुगभावः ॥

द्वितीयामृचमाह ॥

इंद्रमिद्धरी वहतोऽप्रतिधृष्टशवसं ।
ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणां ॥ २ ॥
इंद्रं । इत् । हरी इति । वहतः । अप्रतिधृष्टऽशवसं ।
ऋषीणां । च । स्तुतीः । उप । यज्ञं । च । मानुषाणां ॥ २ ॥

अप्रतिधृष्टशवसं केनाप्यप्रतिधर्षितबलं । अहिंसितबलमित्यर्थः । इंद्रमित्तमिंद्रमेव ऋषीणां वसिष्ठादीनां मानुषाणामन्येषां मनुष्याणां च स्तुतीर्यज्ञं च हरी अश्वावुपवहतः । समीपं प्रापयतः । यत्र यत्र स्तुवंति यत्र यत्र यजंते तत्र सर्वत्रेंद्रमश्वौ प्रापयत इत्यर्थः ॥ मानुषाणां । मनोर्जाताविति मनुशब्दादञ् षुगागमश्च ॥

तृतीयामृचमाह ॥

आ तिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी ।
अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ॥ ३ ॥

आ । तिष्ठ । वृत्रऽहन् । रथं । युक्ता । ते । ब्रह्मणा । हरी इति ।
अर्वाचीनं । सु । ते । मनः । ग्रावा । कृणोतु । वग्नुना ॥ ३ ॥

हे वृत्रहन् शत्रूणां हंतरिंद्र रथमातिष्ठ । आरोह । यस्मात्ते हरी त्वदीयावश्वौ ब्रह्मणा स्तोत्रलक्षणेन मंत्रेण युक्ता । रथेऽस्माभिर्योजितौ । तस्मात्त्वं रथमातिष्ठ । ते मनस्त्वदीयं मनश्च ग्रावाभिषवार्थं प्रवृत्तः पाषाणो वग्नुना वचनीयेनाभिषवशब्देनार्वाचीनमस्मदभिमुखं सु कृणोतु । सुष्ठु करोतु ॥ युक्ता । सुपां सुलुगित्याकारः । वग्नुना । वचेर्गश्च । उ० ३.३३. । इति नुप्रत्ययो गकारश्चांतादेशः ॥

चतुर्थीमृचमाह ॥

इममिंद्र सुतं पिब ज्येष्ठममर्त्यं मदं ।
शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥ ४ ॥
इमं । इंद्र । सुतं । पिब । ज्येष्ठं । अमर्त्यं । मदं ।
शुक्रस्य । त्वा । अभि । अक्षरन् । धाराः । ऋतस्य । सदने ॥ ४ ॥

हे इंद्र सुतमभिषुतमिमं सोमं पिब । कीदृशं । ज्येष्ठं । अतिशयेन प्रशस्यं । मदं । मदकरं । अमर्त्यं । अमारकं । सोमपानजन्यो मदो मदांतरवन्मारको न भवतीत्यर्थः । तथा ऋतस्य यज्ञस्य संबंधिनि सदने गृहे वर्तमानाः शुक्रस्य दीप्तस्यास्य सोमस्य धारास्त्वामभ्यक्षरन् । आभिमुख्येन संचलंति । त्वां प्राप्नुवंति । स्वयमेवागच्छंतीत्यर्थः ॥ ज्येष्ठं । प्रशस्यशब्दादिष्ठनि ज्य चेति ज्यादेशः । अक्षरन् । क्षर संचलने । छांदसो लङ् ॥

पंचमीमृचमाह ॥

इंद्राय नूनमर्चतोक्थानि च ब्रवीतन ।
सुता अमत्सुरिंदवो ज्येष्ठं नमस्यता सहः ॥ ५ ॥
इंद्राय । नूनं । अर्चत । उक्थानि । च । ब्रवीतन ।
सुताः । अमत्सुः । इंदवः । ज्येष्ठं । नमस्यत । सहः ॥ ५ ॥

हे ऋत्विजः । इंद्राय नूनं क्षिप्रमर्चत । पूजनं कुरुत । एतदेव स्पष्टीक्रियते । उक्थान्यप्रगीतमंत्रसाध्यानि स्तोत्राणि च ब्रवीतन । ब्रूत । सुता

अभिषुता इंदवः सोमाश्चामत्सुः। आगतमेव तमिंद्रं मत्तं कुर्वंतु। अनंतरं ज्येष्ठं प्रशस्यतमं सहः सहस्विनं बलवंतं तमिंद्रं नमस्यत। नमस्कुरुत॥ ब्रवीतन। ब्रवीतेर्लोटि तप्तनप्तनथनाश्चेति तनबादेशः। अमत्सुः। मदी हर्षे। छांदसः प्रार्थनायां लुङ्। आगमानुशासनस्यानित्यत्वादिड्भावः। नमस्यत। नमोवरिवश्चित्रङ इति क्यच्। सहः। लुगकारेकाररेफाश्च वक्तव्याः। पा० ४.४.१२८.२। इति मत्वर्थीयस्य लुक्॥

॥ इति प्रथमस्य षष्ठे पंचमो वर्गः॥

षष्ठीमृचमाह॥

नकिष्ट्वद्रथीतरो हरी यदिंद्र यच्छसे।
नकिष्ट्वानु मज्मना नकिः स्वश्व आनशे॥ ६॥
नकिः। त्वत्। रथिऽतरः। हरी इति। यत्। इंद्र। यच्छसे।
नकिः। त्वा। अनु। मज्मना। नकिः। सुऽअश्वः। आनशे॥ ६॥

हे इंद्र यद्यस्मात्त्वं हरी एतत्संज्ञावश्वौ यच्छसे रथे योजयसि। तस्मात्त्वत्तोऽन्यः कश्चिद्रथीतरोऽतिशयेन रथवान् नकिः। नास्ति। अन्येषामीदृगश्वयुक्तरथाभावात्। त्वा त्वामनुलक्ष्य मज्मना। बलनामैतत्। बलेन सदृशोऽपि नकिः। न ह्यस्ति। स्वश्वः शोभनाश्वोऽन्यश्च त्वां नकिरानशे। न प्राप। इंद्रस्य बलाश्वयोरसाधारणत्वादिंद्रसदृशो बलवानश्ववान् लोके कश्चिदपि नास्तीत्यर्थः॥ नकिष्ट्वत्। युष्मत्तत्ततक्षुःष्वंतःपादमिति षत्वं। रथीतरः। अतिशयेन रथी। तरपीत् रथिन इतीकारांतदेशः। अवग्रहसमये छांदसं ह्रस्वत्वं। यच्छसे। यमेर्व्यत्ययेनात्मनेपदं। स्वश्वः। बहुव्रीहावाद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं। आनशे। अश्नोतेश्चेत्यभ्यासादुत्तरस्य नुट्॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिनो य एक इद्विदयत इति वैकल्पिकः स्तोत्रियस्तृचः। एह्यू ष्विति खंडे सूचितं। सखाय आशिषामहि य एक इद्विदयते। आ० ७.८.। इति॥ महाव्रतेऽपि निष्केवल्य औष्णिहतृचाशीतावयं तृचो विनियुक्तः। तथैव पंचमारण्यके सूत्र्यते। य एक इद्विदयत आ याह्यद्रिभिः सुतमिति॥ तृचे प्रथमां सूक्ते सप्तमीमृचमाह॥

य एक इद्विदयते वसु मर्ताय दाशुषे ।
ईशानो अप्रतिष्कुत इंद्रो अंग ॥ ७ ॥
यः । एकः । इत् । विऽदयते । वसु । मर्ताय । दाशुषे ।
ईशानः । अप्रतिऽस्कुतः । इंद्रः । अंग ॥ ७ ॥

य इंद्र एक इत् एक एव दाशुषे हविर्दत्तवते मर्ताय मनुष्याय यजमानाय वसु धनं विदयते । विशेषेण ददाति । अंगेति क्षिप्रनाम । अप्रतिष्कुतः परैरप्रतिशब्दितः । प्रतिकूलशब्दरहित इत्यर्थः । एवंभूतः स इंद्रः क्षिप्रमीशानः सर्वस्य जगतः स्वामी भवति ॥ विदयते । दय दानगतिरक्षणहिंसादानेषु । *शपः पित्वादनुदात्तत्वं । तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते । यद्वृत्तयोगादनिघातः । अप्रतिष्कुतः । कु शब्दे । प्रतिकूलं कूयते शब्द्यत इति प्रतिस्कुतः । पारस्करादेराकृतिगणत्वात्सुट् । सुषामादित्वात्षत्वं । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं ॥*

अष्टमीमृचमाह ॥

कदा मर्तमराधसं पदा क्षुंपमिव स्फुरत् ।
कदा नः शुश्रवद्गिर इंद्रो अंग ॥ ८ ॥
कदा । मर्तं । अराधसं । पदा । क्षुंपंऽइव । स्फुरत् ।
कदा । नः । शुश्रवत् । गिरः । इंद्रः । अंग ॥ ८ ॥

अराधसं हविर्लक्षणेन राधसा धनेन रहितं । अयष्टारमित्यर्थः । एवंविधं मर्तं मनुष्यमिंद्रः पदा पादेन क्षुंपमिवाहिच्छत्रकमिव कदा स्फुरत् । स्फुरिष्यति । बाधिष्यति । यथाहिच्छत्रं मंडलाकारेण शयानं कश्चिदनायासेन हंति । एवमिंद्रोऽपि कदास्मच्छत्रून् हनिष्यतीत्यर्थः । स्फुरत् । स्फुरतिर्वधकर्मा । स्फुरति स्फुलतीति वधकर्मसु पठितत्वात् । नोऽस्माकं यष्टॄणां गिरः स्तुतिलक्षणा वाच इंद्रः कदा कस्मिन्कालेऽंग क्षिप्रं शुश्रवत् । श्रोष्यतीति वितर्क्यते । अत्र निरुक्तं । क्षुंपमहिच्छत्रकं भवति यत् क्षुभ्यते । कदा मर्तमनाराधयंतं पादेन क्षुंपमिवावस्फुरिष्यति । कदा नः श्रोष्यति गिर इंद्रोऽंग । अंगेति क्षिप्रनाम । नि० ५. १७. । इति ॥ पदा । पादशब्दस्य पद्दन्नित्यादिना पदादेशः । ऊडिदमिति विभक्तेरु-

दात्तत्वं । क्षुंपमिव । क्षुभ संचलने । अस्मात्कर्मणि घञि बहुलवचनाद्धातोर्नुमागमः । वर्णव्यापत्त्या भकारस्य पकारः । स्फुरत् । स्फुर संचलने । छंदसि लुङ्लङ्लिट इति लुडर्थे लङ् । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । शुश्रवत् । श्रु श्रवणे । लेट्यडागमः । बहुलं छंदसीति शपः श्लुः ॥

नवमीमृचमाह ॥

यश्चिद्धि त्वा बहुभ्य आ सुतावाँ आविवासति ।
उग्रं तत्पत्यते शव इंद्रो अंग ॥ ९ ॥
यः । चित् । हि । त्वा । बहुऽभ्यः । आ । सुतऽवान् । आऽविवासति ।
उग्रं । तत् । पत्यते । शवः । इंद्रः । अंग ॥ ९ ॥

बहुभ्यो मनुष्येभ्यः सकाशाद्यश्चिद्धि य एव खलु यजमानः सुतावान् अभिषुतसोमयुक्तः सन् हे इंद्र त्वा त्वामाविवासति । परिचरति । विवासतिः परिचरणकर्मा । तत्तस्मै यजमानाय यदुग्रमुद्गूर्णं शवो बलमिंद्रोऽंग क्षिप्रं पत्यते । पातयति । प्रापयति ॥ तत् । सुपां सुलुगिति चतुर्थ्या लुक् । पत्यते । पत्लृ गतौ । अस्मादंतर्भावितण्यर्थाद्व्यत्ययेन श्यन् ॥

चातुर्विंशकेऽहनि माध्यंदिने सवनेऽच्छावाकस्य स्वादोरित्था विषूवत इति वैकल्पिकः स्तोत्रियस्तृचः । होत्रकाणामिति खंडे सूचितं । यः सत्राहा विचर्षणिः स्वादोरित्था विषूवतः । आ० ७. ४. । इति ॥ पृष्ठ्यस्य पंचमेऽहनि निष्केवल्येऽप्ययं तृचोऽनुरूपः । स्तोमे वर्धमान इति खंडे सूचितं । स्वादोरित्था विषूवत उप नो हरिभिः सुतं । आ० ७. १२. । इति ॥

तृचे प्रथमां सूक्ते दशमीमृचमाह ॥

स्वादोरित्था विषूवतो मध्वः पिबंति गौर्यः ।
या इंद्रेण सयावरीर्वृष्णा मदंति शोभसे वस्वीरनु स्वराज्यं ॥ १० ॥
स्वादोः । इत्था । विषुऽवतः । मध्वः । पिबंति । गौर्यः ।
याः । इंद्रेण । सऽयावरीः । वृष्णा । मदंति । शोभसे । वस्वीः । अनु । स्वऽराज्यं ॥ १० ॥

स्वादोः स्वादुभूतस्य रसयुक्तस्येत्था विषूवत इत्थमनेन प्रकारेण सर्वयज्ञेषु व्याप्तियुक्तस्य मध्वो मधुररसस्य सोमस्य । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्र-

दानत्वाच्चतुर्थ्यर्थे षष्ठी। एवंविधं सोमं गौर्यो गौरवर्णा गावः पिबंति। या गावः शोभसे शोभार्थं वृष्णा कामाभिवर्षकेणेंद्रेण सयावरीः सह यांत्यो गच्छंत्यः सत्यो मदंति। हृष्टा भवंति। ता इंद्रपीतस्य सोमस्य शेषं पिबंतीत्यर्थः। वस्वीः पयःप्रदानेन निवासकारिण्यस्ता गावः स्वराज्यं स्वस्य स्वकीयस्येंद्रस्य यद्राज्यं राजत्वं तदनुलक्ष्यावस्थिता इति शेषः॥ विषूवतः। विष्लृ व्याप्तौ। अस्मादौणादिकः कुप्रत्ययः। ततो मतुप्। ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं। अन्येषामपि दृश्यत इति संहितायां दीर्घः। व्यत्ययेन मतोर्वत्वं। मध्वः। जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणाभावे यणादेशः। गौर्यः। षिद्गौरादिभ्यश्चेति ङीष्। जसि यणादेश उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं। सयावरीः। या प्रापणे। अतो मनिन्निति वनिप्। वनो र चेति ङीब्रेफौ। मदंति। मदी हर्षे। श्यनि प्राप्ते व्यत्ययेन शप्। वस्वीः। वस निवासे। शृस्वृस्निहीत्यादिना वसेरुप्रत्ययः। धान्ये निदित्यनुवृत्तेराद्युदात्तत्वं। वोतो गुणवचनादित्यच गुणवचनान्ङीबाद्युदात्तार्थं। पा० ४. १. ४४. १. इति वचनाद्वसुशब्दान्ङीपि यणादेशः। जसि वा छंदसीति पूर्वसवर्णदीर्घत्वं। स्वराज्यं। अकर्मधारये राज्यमित्युत्तरपदाद्युदात्तत्वं॥

॥ इति प्रथमस्य षष्ठे षष्ठो वर्गः॥

एकादशीमृचमाह॥

ता अस्य पृशनायुवः सोमं श्रीणंति पृश्नयः।
प्रिया इंद्रस्य धेनवो वज्रं हिन्वंति सायकं वस्वीरनु स्वराज्यं॥ ११॥
ताः। अस्य। पृशनऽयुवः। सोमं। श्रीणंति। पृश्नयः।
प्रियाः। इंद्रस्य। धेनवः। वज्रं। हिन्वंति। सायकं। वस्वीः। अनु। स्वऽराज्यं॥ ११॥

ताः पूर्वोक्ता अस्येंद्रस्य पृशनायुवः स्पर्शनकामाः पृश्नयो नानावर्णा गाव इंद्रेण पातव्यं सोमं पयसा श्रीणंति। मिश्रीकुर्वंति। इंद्रस्य प्रियाः प्रीतिहेतुभूतास्ता धेनवः सायकं शत्रूणामंतकारकं वज्रमायुधं हिन्वंति। शत्रुषु प्रेरयंति। इंद्रो यथा शत्रुषु वज्रं प्रेरयति तथेंद्रस्य मदमुत्पादयंतीत्यर्थः। अन्यत्पूर्ववत्॥ हिन्वंति। हिविः प्रीणनार्थः। इदित्वान्नुम्। सायकं। षो अंतकर्मणि। ण्वुल्यात्वे युगागमः॥

द्वादशीमृचमाह ॥

ता अस्य नमसा सहः सपर्यंति प्रचेतसः ।
व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यं ॥ १२ ॥
ताः । अस्य । नमसा । सहः । सपर्यंति । प्रऽचेतसः ।
व्रतानि । अस्य । सश्चिरे । पुरूणि । पूर्वऽचित्तये । वस्वीः । अनु । स्वऽराज्यं ॥ १२ ॥

प्रचेतसः प्रकृष्टज्ञानास्ता गावोऽस्येंद्रस्य सहो बलं नमसा स्वकीयेन पयोरूपेणान्नेन सपर्यंति । परिचरंति । पुरूणि बहून्यस्येंद्रस्य व्रतानि शत्रुवधादिरूपाणि वीर्यकर्माणि सश्चिरे । सेविरे । ज्ञापयंत इत्यर्थः । किमर्थं । पूर्वचित्तये । युयुत्सूनां शत्रूणां पूर्वमेव प्रज्ञापनाय । अनेन युध्यमाना वृत्रादयः सर्वे मरणं प्राप्ताः किमर्थं भवद्भिः प्राणास्त्यज्यंत इति तेषां बोधनायेत्यर्थः । अन्यत् पूर्ववत् ॥ सश्चिरे । सश्च गतौ । व्यत्ययेनात्मनेपदं । पूर्वचित्तये । चिती संज्ञाने । भावे क्तिन् । मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं ॥

चातुर्विंशकेऽहनि प्रातःसवने ब्राह्मणाच्छंसिनः शस्त्र इंद्रो दधीच इति षडहस्तोत्रियसंज्ञकस्तृचः । सूचितं च । आदह स्वधामन्वित्येका इ चेंद्रो दधीचो अस्थभिः । आ॰ ७. २. । इति ॥ तृचे प्रथमां सूक्ते त्रयोदशीमृचमाह ॥

इंद्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः । जघान नवतीर्नव ॥ १३ ॥
इंद्रः । दधीचः । अस्थऽभिः । वृत्राणि । अप्रतिऽस्कुतः । जघान । नवतीः । नव ॥ १३ ॥

अत्र शाट्यायनिन इतिहासमाचक्षते । आथर्वणस्य दधीचो जीवतो दर्शनेनासुराः पराबभूवुः । अथ तस्मिन् स्वर्गतेऽसुरैः पूर्णा पृथिव्यभवत् । अथेंद्रस्तैरसुरैः सह योद्धुमशक्नुवंस्तमृषिमन्विच्छन् स्वर्गं गत इति शुश्राव । अथ पप्रच्छ तत्रत्यान् नेह किमस्य किंचित्परिशिष्टमंगमस्तीति । तस्मा अवोचन् अस्त्येतदाश्वं शीर्षं येन शिरसाश्विभ्यां मधुविद्यां प्राब्रवीत् । तत्तु न विद्म यत्राभवदिति । पुनरिंद्रोऽब्रवीत् तदन्विच्छतेति । तद्धान्वैषिषुः । तच्छर्यणावत्यनुविद्याजहुः । शर्यणावद्ध वै नाम कुरुक्षेत्रस्य जघनार्धे सरः स्यंदते । तस्य शिरसोऽस्थिभिरिंद्रोऽसुराञ्जघानेति ॥ अप्रतिष्कुतः परैरप्रतिशब्दितः । प्रतिकूलशब्दरहित इंद्र आथर्वणस्य दधीच एतत्संज्ञकस्य ऋषेरस्थिभिरश्वशिरःसंबं-

धिभिरस्थिभिर्नवतीर्नव नवसंख्याका नवतीर्दशोत्तराष्टशतसंख्याकाः । तथा हि । लोकत्रयवर्तिनो देवाञ्जेतुमादावासुरी माया त्रिधा संपद्यते । त्रिविधातीतानागतवर्तमानकालभेदेन तत्कालवर्तिनो देवाञ्जेतुं पुनरपि प्रत्येकं त्रिगुणिता भवति । एवं नव संपद्यते । पुनरप्युत्साहादिशक्तित्रयरूपेण त्रैगुण्ये सति सप्तविंशतिः संपद्यते । पुनः सात्विकादिगुणत्रयभेदेन त्रैगुण्ये सत्येकोत्तराशीतिः संपद्यते । एवं चतुर्भिस्त्रिकैर्गुणिताया मायाया दशसु दिक्षु प्रत्येकमवस्थाने सति नव नवतयः संपद्यंते । एवंविधमायारूपाणि वृत्राण्यावरकाण्यसुरजातानि जघान । हतवान् ॥ दधीचः । दध्यंचतीति दध्यङ् । अंचतेर्ऋत्विगित्यादिना क्विन् । अनिदितामिति नलोपः । षष्ठ्येकवचनेऽच इत्यकारलोपे चाविति दीर्घत्वं । उदात्तनिवृत्तिस्वरेण विभक्त्युदात्तत्वे प्राप्ते तदपवादतया चाविति पूर्वपदस्यांतोदात्तत्वं प्राप्तं । अंचेश्छंदस्यसर्वनामस्थानं । पा० ६.१ १७०. । इति पुनर्विभक्त्युदात्तत्वविधानेन तद्बाध्यते । अस्थभिः । छंदस्यपि दृश्यत इत्यनजादावप्यस्थिशब्दस्यानङादेशः । स चोदात्तः ॥

चतुर्दशीमृचमाह ॥

इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितं । तद्विदच्छर्यणावति ॥ १४ ॥

इच्छन् । अश्वस्य । यत् । शिरः । पर्वतेषु । अपऽश्रितं । तत् । विदत् । शर्यणाऽवति ॥ १४ ॥

पर्वतेषु पर्ववत्सु गिरिष्वपश्रितमपगत्य स्थितमश्वस्याश्वसंबंधि दधीचो यच्छिर इच्छन्निंद्रो वर्तते । शर्यणावत्येतत्संज्ञे सरसि तच्छिरो विदत् । अज्ञासीत् । ज्ञात्वा तदाहृत्य तदीयैरस्थिभिर्वृत्राणि जघानेति पूर्वस्यामृचि संबंधः ॥ इच्छन् । इषु इच्छायां । तुदादित्वाच्छप्रत्ययः । विदत् । वेत्तेर्लुङि व्यत्ययेन च्लेरङादेशः । शर्यणावति । शर्यणा नाम देशः । तेषामदूरभवं सरः शर्यणावत् । मध्वादिषु शर्यणशब्दस्य पाठान्मध्वादिभ्यश्च । पा० ४. २. ८६. । इति चातुर्थिको मतुप् । संज्ञायामिति मतुपो वत्वं । मतौ बह्वचोऽनजिरादीनामिति दीर्घः ॥

अतिमूर्तिनाम्न्येकाहे कर्तव्ये पूर्वमेवैकं मासं सौर्यचांद्रमसीभ्यामिष्टिभ्यां यष्टव्यं । तत्र पूर्वपक्षे चांद्रमसीष्टिः । अत्राह गोरिति तस्यां प्रधानस्यानुवाक्या । अतिमूर्तिनेति खंडे सूत्रितं । अत्राह गोरमन्वत नवो नवो भवति जायमानः । आ० ९. ८. । इति ॥ तामेतां सूक्ते पंचदशीमृचमाह ॥

अत्राह् गोरमन्वत नाम त्वष्टुरपीच्यं। इत्था चंद्रमसो गृहे ॥ १५ ॥
अत्र। अह। गोः। अमन्वत। नाम। त्वष्टुः। अपीच्यं। इत्था। चंद्रमसः। गृहे ॥ १५ ॥

अत्राहास्मिन्नेव गोर्गंतुश्चंद्रमसो गृहे मंडले त्वष्टुर्दीप्तस्यादित्यस्य संबंध्यपीच्यं रात्रावंतर्हितं स्वकीयं यन्नाम तेजस्तदादित्यस्य रश्मय इत्थेत्थमनेन प्रकारेणामन्वत। अजानन्। उदकमये स्वच्छे चंद्रबिंबे सूर्यकिरणाः प्रतिफलंति। तत्र प्रतिफलिताः किरणाः सूर्ये यादृशीं संज्ञां लभंते तादृशीं चंद्रेऽपि वर्तमाना लभंत इत्यर्थः। एतदुक्तं भवति। यद्रात्रावंतर्हितं सौरं तेजस्तच्चंद्रमंडलं प्रविश्याहनीव नैशं तमो निवार्य सर्वं प्रकाशयति। ईदृग्भूततेजसा युक्तः सूर्यश्चंद्र एव द्वादशादित्येष्विंद्रस्यापि परिगणितत्वात्। अतोऽहोरात्रयोः प्रकाशक इंद्र एवेतीद्रस्तुतेः प्रतीयमानत्वादिंद्रो देवतेत्येतदुपपन्नं भवति। ईदृग्भूतस्य तेजस आश्रयत्वेन चंद्रमसः प्राधान्यविवक्षया चांद्रमस्यामिष्टौ विनियोगोऽप्युपपद्यते ॥ अत्र निरुक्तं। अथाप्यस्यैको रश्मिश्चंद्रमसं प्रतिदीप्यते तदेतेनोपेक्षितव्यमादित्यतोऽस्य दीप्तिर्भवतीति। सुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्व इत्यपि निगमो भवति। सोऽपि गौरुच्यते। अत्राह गोरमन्वतेति। नि॰ २. ६.। अत्राह गोः सममंसतादित्यरश्मयः स्वं नामापीच्यमपचितमपगतमपिहितमंतर्हितं वा। नि॰ ४. २५.। इति ॥ अमन्वत। मनु अवबोधने। अपीच्यं। अपपूर्वाच्चिनोतेरघ्याटयश्च। उ॰ ४. ११३.। इति निपातनाद्यत्। अत एवाभिमतरूपसिद्धिः। यद्वा। अपिपूर्वादंचतेर्ऋत्विगित्यादिना क्विन्। अनिदितामिति नलोपः। अपिगते निगते भवमपीच्यं। भवे छंदसीति यत्। अत्र इत्यकारलोपे चाविति दीर्घत्वं। तित्स्वरितः। अपीच्योऽप्रकाश इति भट्टभास्करमिश्रः। इत्था। इदम्शब्दात्था हेतौ च छंदसीति प्रकारवचने थाप्रत्ययः। यदि तत्रेदंशब्दो नानुवर्तते तदानीमिदमस्थमुः। पा॰ ५. ३. २४.। इति थमुप्रत्ययः। अव्ययादाप्सुपः। पा॰ २. ४. ८२.। इति सुब्लुकं बाधित्वा सुपां सुलुगिति डादेशः। चंद्रमसः। चंद्रमाह्लादनं मिमीते निर्मिमीत इति चंद्रमाः। चंद्रे मो डित्। उ॰ ४. २२७.। इत्यसिप्रत्ययः। दासीभारादिषु पठितत्वात्पूर्वपदप्रकृतिस्वरत्वं। पूर्वपदं च स्फायितंचीत्यादिना रक्प्रत्ययांतमंतोदात्तं ॥

॥ इति प्रथमस्य षष्ठे सप्तमो वर्गः ॥

सर्वपृष्ठायामिष्टौ कायस्य हविषः को अद्येति द्वे ऋचौ याज्यानुवाक्ये । सूचितं च । कायं दशमं को अद्य युंक्ते धुरि गा ऋतस्येति द्वे इति ॥

तत्र प्रथमां सूक्ते षोडशीमृचमाह ॥

को अद्य युंक्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
आसन्निषून्हृत्स्वसो मयोभून्य एषां भृत्यामृणधत्स जीवात् ॥ १६ ॥

कः । अद्य । युंक्ते । धुरि । गाः । ऋतस्य । शिमीऽवतः । भामिनः । दुःऽहृणायून् । आसन्ऽइषून् । हृत्सुऽअसः । मयःऽभून् । यः । एषां । भृत्यां । ऋणधत् । सः । जीवात् ॥ १६ ॥

अद्यास्मिन्कर्मणि ऋतस्य गच्छत इंद्रसंबंधिनो रथस्य धुर्यश्ववहनप्रदेशे गा गतिमतोऽश्वान् को युंक्ते । को नाम नियोक्तुं शक्नोति । न कोऽपीत्यर्थः । कीदृशानश्वान् । शिमीवतः । वीर्यकर्मोपेतान् । भामिनः । तेजसा युक्तान् । दुर्हृणायून् । परैर्दुःसहेन क्रोधेन युक्तान् । हृणीयतिः क्रुध्यतिकर्मा । आसन्निषून् । येषामासन्यास्ये मुखप्रदेशे शत्रूणां प्रहरणार्थमिषवो बाणा बद्धास्तान् । हृत्स्वसः । हृत्सु शत्रूणां हृदयेष्वस्यंति स्वकीयं पादं क्षिपंतीति हृत्स्वसः । मयोभून् । मयसः सुखस्य भावयितॄन् । स्वकीयानां सुखप्रदानित्यर्थः । यो यजमान एषामीदृशानामश्वानां भृत्यां भरणक्रियां रथवाहनक्रियामृणधत् समर्धयति । स्तौतीति यावत् । स यजमानो जीवात् । जीवनवान्भवेत् ॥ यद्वा क इति प्रजापतिरुच्यते । को ह वै नाम प्रजापतिरिति श्रुतेः । ऋतस्य यज्ञस्य धुरि निर्वाहे गा वेदरूपान्वाग्विशेषानद्येदानीं युंक्ते । संयोजयति । कीदृशान् । शिमीवतः । प्रतिपाद्यैः कर्मभिर्युक्तान् । भामिनः । उज्ज्वलान् । दुर्हृणायून् । हृणीयतिर्हानिकर्मा । हातुमशक्यान् वेदाध्ययनस्य नित्यत्वात् । आसन्निषून् । आसन्यास्य इषुरेषणं गमनमुच्चारणं येषां तान् । हृत्स्वसः । हृत्सु हृदयेषु दीप्यमानान् प्रकाशमानानित्यर्थः । मयोभून् । मयसोऽध्ययनप्रभवस्य सुखसाधनस्यादृष्टस्य भावयितॄन् । यो यजमान एषां वचसां भृत्यां भरणक्रियामृणधत् । ऋद्धिमतीं करोति । स जीवात् । स एव जीवति । अन्ये जीवन्मृता इत्यर्थः ॥ दुर्हृणायून् । हृणीङ् लज्जायां । कंड्वादित्वाद्यक् । बहुलवचनादस्मादुणप्रत्ययः । अतो लोपे सति

वर्णव्यापत्त्याकारः। मृगयुरादिर्वा द्रष्टव्यः। आसन्निषून्। पद्दन्नित्यादिनास्यशब्द-स्यासन्नादेशः। इष गतावित्यस्मादिषेः किच्चेत्युप्रत्ययः। बहुव्रीहौ पूर्वपदप्रकृति-स्वरत्वं। हृत्स्वसः। असु क्षेपणे। असु गतिदीप्त्यादानेषु। क्विप् चेति क्विप्। तत्पुरुषे कृति बहुलमित्यलुक्। कृदुत्तरपदप्रकृतिस्वरत्वं। मयोभून्। व्यत्ययेन हृस्वत्वं। यद्वा मितद्र्वादिभ्य उपसंख्यानं। पा० ३. २. १८०. १.। इति डुप्रत्ययः। भृत्यां। भृञ् भरणे। संज्ञायां समजनिषद। पा० ३. ३. ९९.। इति क्यप्। उदात्त इत्यनुवृत्तेः प्रत्ययस्योदात्तत्वं। ऋणधत्। ऋधु वृद्धौ। लेटि व्यत्ययेन श्नम्। लेटोऽडाटावित्यडागमः। इतश्च लोप इतीकारलोपः। जीवात्। जीव प्राण-धारणे। पूर्ववल्लेट्याडागमः॥

सप्तदशीमृचमाह॥

क ईषते तुज्यते को बिभाय को मंसते संतमिंद्रं को अंति।

कस्तोकाय क इभायोत रायेऽधि ब्रवत्तन्वे३ को जनाय॥ १७॥

कः। ईषते। तुज्यते। कः। बिभाय। कः। मंसते। संतं। इंद्रं। कः। अंति।

कः। तोकाय। कः। इभाय। उत। राये। अधि। ब्रवत्। तन्वे। कः। जनाय॥ १७॥

अनुग्रहीतरींद्र आगते सति क ईषते। शत्रोर्भीतः सन् को निर्गच्छति। न कोऽपीत्यर्थः। कस्तुज्यते। को हिंस्यते। शत्रुभिर्हिंस्योऽपि कश्चिन्नास्तीत्यर्थः। को यजमानो बिभाय। बिभेति। इंद्रे रक्षके सति भयमपि नोत्पद्यते। दूरे तस्य शत्रुकृता हिंसा। अंत्यंतिके समीपे संतमस्माकं रक्षकत्वेन वर्तमानमिंद्रं कः पुरुषो मंसते। जानाति। वयमेव जानीमो नान्य इत्यर्थः। एकः कः पूरकः। युद्धे सहायार्थमिंद्र आगते सति को यजमानस्तोकाय पुत्रायाधिब्रवत्। हे इंद्रास्मदीयं पुत्रं रक्षेत्येवंरूपमधिवचनं पक्षपातेन वचनं ब्राह्मणायाधिब्रूयादिति यथा। एवंरूपमधिवचनं को यजमानः कुर्यात्। स्वयमेवेंद्रो रक्षतीति भावः। इभाय गजाय कोऽधिब्रवत्। उत अपि च राये शत्रुभिरपह्रियमाणाय धनाय कोऽधि-ब्रवत्। अपह्रियमाणमस्मदीयं धनं रक्षेत्यधिवचनमपि को यजमानः कुर्यात्। न कोऽपीत्यर्थः। अपि च तन्वे स्वकीयाय शरीराय जनाय परिजनाय च कोऽधिब्रवत्। स्वशरीररक्षार्थं परिजनरक्षार्थं चेंद्रस्याधिवचनं नापेक्षितं। स्तुत्या प्रीत इंद्रः स्वयमेव रक्षतीत्यर्थः॥ यदा तु कशब्दाभिधेयस्य प्रजापतेः

संबंधिनि कर्मणि विनियोगः। तदानीं परमैश्वर्ययोगादिंद्रशब्देन प्रजापतिरेवाभिधीयते। यथैंद्या गार्हपत्यमुपतिष्ठत इति विनियोगानुसारेण कदा चनेत्यस्यामृचि विद्यमान इंद्रो गार्हपत्यपरतया नीयते तद्वत् ॥ ईषते। ईष गतिहिंसादर्शनेषु। भौवादिक आत्मनेपदी। तुज्यते। तुज हिंसायां। कर्मणि यक्। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे यक एव स्वरः शिष्यते। अतिङ इति पर्युदासान्निघाताभावः। मंसते। लेट्यडागमः। सिब्बहुलं लेटीति सिप्। अंति। अंतिकस्य कादिलोपो बहुलमिति कलोपः। ब्रवत्। ब्रवीतेर्लेट्यडागमः। तन्वे। तनुशब्दाच्चतुर्थ्येकवचने जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणाभावे यणादेशः। उदात्तस्वरितयोर्यण इति विभक्तेः स्वरितत्वं ॥

अष्टादशीमृचमाह ॥

को अग्निमीट्टे हविषा घृतेन स्रुचा यजाता ऋतुभिर्ध्रुवेभिः।
कस्मै देवा आ वहानाशु होम को मंसते वीतिहोत्रः सुदेवः ॥ १८ ॥

कः। अग्निं। ईट्टे। हविषा। घृतेन। स्रुचा। यजातै। ऋतुऽभिः। ध्रुवेभिः।
कस्मै। देवाः। आ। वहान्। आशु। होम। कः। मंसते। वीतिऽहोत्रः। सुऽदेवः ॥ १८ ॥

को यजमानोऽग्निमीट्टे। इंद्रार्थं हविर्निरुप्याग्निं स्तौति। इंद्राय हविर्निर्वापोऽपि सम्यक्कर्तुं न शक्यते। इंद्रस्य दुर्विज्ञानत्वात्। को वेंद्रयागार्थमग्निं स्रुचा जुह्वा ध्रुवेभिर्ध्रुवैर्नित्यैर्ऋतुभिर्वसंतादिकालैरुपलक्षितेन घृतेन हविषा यजातै। यजेत्। यद्वा ऋतवः प्रयाजदेवताः। ऋतवो वै प्रयाजा इति श्रुतेः। ताभिर्ध्रुवैः प्रकृतौ विकृतौ चानुष्ठेयतया निश्चलैर्ऋतुभिः सहाग्निमाज्यभागदेवतां घृतेन हविषा को यजेत्। न कोऽपीत्यर्थः। कस्मै यजमानाय होम ह्वातव्यं प्रशस्यं धनमाशु शीघ्रं देवा आवहान्। आवहंति। प्रयच्छंति। न कस्मा अपीत्यर्थः। इंद्र एव धनस्य दाता नान्ये देवा इतींद्रः स्तूयते। वीतिहोत्रः प्राप्तयज्ञः सुदेवः शोभनदेवताकः को यजमानो मंसते। इंद्रं सम्यक् जानाति। न कोऽपीत्यर्थः। बहुविधेन स्तोत्रेण चिरकालोपासनेन चेंद्रः प्रत्यक्षो भवति नान्येन प्रकारेणेति तात्पर्यार्थः ॥ ईट्टे। ईड स्तुतौ। अदादित्वाच्छपो लुक्। स्रुचा। सावेकाच इति विभक्तेरुदात्तत्वं। यजातै। यजतेर्लेट्याडागमः। वैतोऽन्यत्रेत्यैकारः। वहान्। वहतेर्लेट्याडागमः। इतश्च लोप इतीकारलोपः। संयोगांतस्येति तकारलोपः।

होम। हूयतेः कृतात्वस्यातो मनिन्निति मनिन्। हु इत्यनुवृत्तौ बहुलं छंदसीति संप्रसारणं। यद्वा। नामन् सीमन्नित्यादौ। उ० ४. १५२.। होमन्शब्दो मनिन्प्रत्ययांतो निपात्यते। मंसते। मन ज्ञाने। लेट्यडागमः। सिब्बहुलं लेटीति सिप्। वीतिहोत्रः। वी गत्यादिषु। अस्मात्कर्मणि मंत्रे वृषेत्यादिना क्तिन् स चोदात्तः। होत्रं होमः। हुयामाश्रुभसिभ्यस्त्रन्निति त्रन्प्रत्ययः। वीतिः प्राप्तो होमो येन। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। सुदेवः। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं॥

एकोनविंशीमृचमाह॥

त्वमंग प्र शंसिषो देवः शविष्ठ मर्त्यं।

न त्वदन्यो मघवन्नस्ति मर्डितेंद्र ब्रवीमि ते वचः॥१९॥

त्वं। अंग। प्र। शंसिषः। देवः। शविष्ठ। मर्त्यं।

न। त्वत्। अन्यः। मघऽवन्। अस्ति। मर्डिता। इंद्र। ब्रवीमि। ते। वचः॥१९॥

अंगेत्यभिमुखीकरणे। अंग शविष्ठ हे बलवत्तमेंद्र देवो द्योतमानस्त्वं मर्त्यं मरणधर्माणं त्वां स्तुवंतं पुरुषं प्रशंसिषः। सम्यगनेन स्तुतमिति प्रशंस। हे मघवन् धनवन्निंद्र त्वदन्यस्त्वत्तोऽन्यः कश्चिन्मर्डिता सुखयिता नास्ति। अतः कारणात्ते तुभ्यमिदं स्तुतिलक्षणं वचो ब्रवीमि। उच्चारयामि॥ शंसिषः। शंस स्तुतौ। लेटि सिप्यडागमः। सिब्बहुलं लेटीति विकरणश्च सिप्। तस्यार्द्धधातुकत्वादिडागमः। शविष्ठ। अतिशयेन शवस्वी शविष्ठः। इष्ठनि विन्मतोर्लुक्। टेरिति टिलोपः। मर्डिता। मृड सुखने। तृच इडागमः॥

विंशीमृचमाह॥

मा ते राधांसि मा त ऊतयो वसोऽस्मान्कदा चना दभन्।

विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ॥२०॥

मा। ते। राधांसि। मा। ते। ऊतयः। वसो इति। अस्मान्। कदा। चन। दभन्।

विश्वा। च। नः। उपऽमिमीहि। मानुष। वसूनि। चर्षणिऽभ्यः। आ॥२०॥

हे वसो निवासयितरिंद्र ते तव संबंधीनि राध्नोत्येभिरिति राधांसि भूतान्यस्मान्कदाचन कदाचिदपि मा दभन्। मा विनाशयंतु। तथोतयो गंतारः। यद्वा

धूतय इत्यत्र वर्णलोपः। धूतयः कंपयितारस्ते त्वदीया मरुतश्च मा दभन्। हे मानुष मनुष्यहितेंद्र चर्षणिभ्यो मंत्रद्रष्टृभ्यो नोऽस्मभ्यं विश्वा विश्वानि सर्वाणि वसूनि धनानि च आ उपमिमीहि। सर्वत आहृत्यास्मत्समीपे कुरु। सर्वत्र वर्तमानं धनमस्मभ्यं प्रयच्छेत्यर्थः॥ कदा। किंशब्दात्सर्वैकान्यकिंयत्तदः काले देति दाप्रत्ययः। किमः क इति कादेशः। व्यत्ययेनाद्युदात्तत्वं। दभन्। दंभु दंभे। लोडर्थे छांदसे लङि बहुलं छंदसीति विकरणस्य लुक्। न माङ्योग इत्यडभावः। मिमीहि। माङ् माने शब्दे च। व्यत्ययेन परस्मैपदं। जुहोत्यादित्वाच्छ्लुः। भृञामिदित्यभ्यासस्येत्वं। हेर्ङित्त्वात् घुमास्थेतीत्वं॥

॥ इति प्रथमस्य षष्ठेऽष्टमो वर्गः॥

॥ इति प्रथमे मंडले त्रयोदशोऽनुवाकः॥

चतुर्दशेऽनुवाके नव सूक्तानि। तत्र प्र य इति द्वादशर्चं प्रथमं सूक्तं गोतमस्यार्षं। पंचमीद्वादश्यौ त्रिष्टुभौ। शिष्टा जगत्यः। मरुतो देवता। तथा चानुक्रांतं। प्र ये द्वादश मारुतं ह पंचम्यंते त्रिष्टुभाविति। हशब्दप्रयोगादिदमादीनि चत्वारि सूक्तानि मरुद्देवत्यानि॥ अभिप्लवषडहस्य चतुर्थेऽहन्याग्निमारुत एतत्सूक्तं मारुतनिविद्धानीयं। सूत्रितं च। प्र ये शुंभंते जनस्य गोपा इत्याग्निमारुतं। आ॰ ७. ७.। इति॥

तत्र प्रथमामृचमाह॥

प्र ये शुंभंते जनयो न सप्तयो यामन्रुद्रस्य सूनवः सुदंससः।
रोदसी हि मरुतश्चक्रिरे वृधे मदंति वीरा विदथेषु घृष्वयः॥१॥

प्र। ये। शुंभंते। जनयः। न। सप्तयः। यामन्। रुद्रस्य। सूनवः। सुऽदंससः।
रोदसी इति। हि। मरुतः। चक्रिरे। वृधे। मदंति। वीराः। विदथेषु। घृष्वयः॥१॥

ये मरुतो यामन् यामनि गमने निमित्तभूते सति प्रशुंभंते। प्रकर्षेण स्वकीयान्यंगान्यलंकुर्वंति। जनयो न। जाया इव। यथा योषितः स्वकीयान्यंगान्यलंकुर्वंति तद्वत्। कीदृशा मरुतः। सप्तयः। सर्पणशीलाः। रुद्रस्य सूनवः। रोदयति सर्वमंतकाल इति रुद्रः परमेश्वरः। तस्य पुत्राः। सुदंससः। शोभनकर्माणः। एतदेवोपपादयति। हि यस्मान्मरुतो रोदसी द्यावापृथिव्यौ वृधे वृष्टि-

प्रदानादिना वर्धनाय चक्रिरे कृतवंतः । अतः सुदंसस इत्यर्थः । वीरा विशेषेण शत्रुक्षेपणशीलाः । घृष्वयः । घर्षणशीलाः । महीरुहशिलोच्चयादेर्भंजका इत्यर्थः । एवंभूतास्ते मरुतो विदथेषु । विदंत्येषु यष्टव्यतया देवानिति विदथा यज्ञाः । तेषु मदंति । सोमपानेन हृष्यंति ॥ शुंभंते । शुभ शुंभ दीप्तौ । भौवादिकः । जनयः । जायंत आस्वपत्यानीति जनयो जायाः । इन् सर्वधातुभ्य इतीन्प्रत्ययः । यामन् । या प्रापणे । कृत्यल्युटो बहुलमिति बहुलवचनादातो मनिन्निति भावे मनिन् । सुपां सुलुगिति सप्तम्या लुक् । सुदंससः । दंस इति कर्मनाम । शोभनं दंसो येषां । सोर्मनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वं । चक्रिरे । हि चेति निघातप्रतिषेधः । वृधे । वृधु वृद्धौ । संपदादिलक्षणो भावे क्विप् । सावेकाच इति विभक्तेरुदात्तत्वं । मदंति । मदी हर्षे । श्यनि प्राप्ते व्यत्ययेन शप् । पादादित्वान्निघाताभावः । विदथेषु । विद ज्ञाने । रुदिविदिभ्यां किदित्यथप्रत्ययः । घृष्वयः । घृषु संहर्षे । कृविघृष्वीत्यादिना विनप्रत्ययांतो निपात्यते ॥

द्वितीयामृचमाह ॥

त उ॒क्षि॒तासो॑ महि॒मान॑माशत दि॒वि रु॒द्रासो॒ अधि॑ चक्रिरे॒ सदः॑ ।
अर्च॑न्तो अ॒र्कं ज॒नय॑न्त इन्द्रि॒यमधि॒ श्रियो॑ दधिरे॒ पृश्नि॑मातरः ॥ २ ॥

ते । उ॒क्षि॒तासः॑ । म॒हि॒मान॑म् । आ॒श॒त॒ । दि॒वि । रु॒द्रासः॑ । अधि॑ । च॒क्रि॒रे॒ । सदः॑ ।
अर्च॑न्तः । अ॒र्कम् । ज॒नय॑न्तः । इ॒न्द्रि॒यम् । अधि॑ । श्रियः॑ । द॒धि॒रे॒ । पृश्नि॑ऽमातरः ॥ २ ॥

ये पूर्वोक्तगुणविशिष्टास्ते मरुत उक्षितासो देवैरभिषिक्ताः संतो महिमानं महत्त्वमाशत । आप्नुवन् । रुद्रासो रुद्रस्य पुत्राः । उपचाराज्जन्ये जनकशब्दः । ते रुद्रपुत्रा मरुतो दिवि द्योतमाने नभसि सदः सदनं स्थानमधिचक्रिरे । अधिकं सर्वोत्कृष्टं कृतवंतः । अर्कमर्चनीयमिंद्रमर्चंतः पूजयंत इंद्रियमिंद्रस्य लिंगं वीर्यं जनयंतः । प्रहर भगवो जहि वीरयस्वेत्येवंरूपेण वाक्येनोत्पादयंतः । पृश्निमातरः पृश्नेर्नानारूपाया भूमेः पुत्रा मरुतः श्रिय ऐश्वर्याण्यधिदधिरे । आधिक्येनाधारयन् ॥ उक्षितासः । उक्ष सेचने । कर्मणि निष्ठा । आज्जसेरसुक् । महिमानं । महच्छब्दात् पृथ्वादिलक्षण इमनिच् । टेरिति टिलोपः । आशत । अशू व्याप्तौ । लङि बहुलं छंदसीति विकरणस्य लुक् । इंद्रियं । इंद्रियमिंद्रलिंगमिंद्रदृष्टमिति घच्प्रत्ययांतो निपात्यते । पृश्निमातरः । प्राश्नुते सर्वाणि

रूपाणीति पृश्निर्भूमिः। श्रूयते च। इयं वै पृश्निः। घृणिपृश्निरित्यादौ निपातनादभिमतरूपसिद्धिः। पृश्निर्माता येषां ते तथोक्ताः। ऋतश्छंदसि। पा० ५. ४. १५८.। इति समासांतस्य कपः प्रतिषेधः॥

तृतीयामृचमाह॥

गोमातरो यच्छुभयंते अंजिभिस्तनूषु शुभ्रा दधिरे विरुक्मतः।
बाधंते विश्वमभिमातिनमप वर्त्मान्येषामनु रीयते घृतं॥३॥

गोऽमातरः। यत्। शुभयंते। अंजिऽभिः। तनूषु। शुभ्राः। दधिरे। विरुक्मतः।
बाधंते। विश्वं। अभिऽमातिनं। अप। वर्त्मानि। एषां। अनु। रीयते। घृतं॥३॥

गोमातरः। गोरूपा भूमिर्माता येषां ते मरुत अंजिभी रूपाभिव्यंजकैराभरणैर्यद्यदा शुभयंते। स्वकीयान्यंगानि शोभायुक्तानि कुर्वंति। तदानीं शुभ्रा दीप्ता मरुतस्तनूषु स्वकीयेषु शरीरेषु विरुक्मतो विशेषेण रोचमानानलंकारान्दधिरे। धारयंति। अपि च विश्वं सर्वमभिमातिनं शत्रुमपबाधंते। हिंसंति। एषां मरुतां वर्त्मानि मार्गाननुसृत्य घृतं क्षरणशीलमुदकं रीयते। स्रवति। यत्र मरुतो गच्छंति वृष्ट्युदकमपि तदनुसारेण तत्र गच्छतीत्यर्थः॥ शुभयंते। संज्ञापूर्वकस्य विधेरनित्यत्वाल्लघूपधगुणाभावः। अंजिभिः। अंजू व्यक्तिम्रक्षणकांतिगतिषु। खनिकष्यंज्यसिवसिवनिसनिध्वनिग्रंथिचरिभ्यश्चेतीप्रत्ययः। शुभ्राः। शुभ दीप्तौ। स्फायितंचीत्यादिना रक्। विरुक्मतः। विशिष्टा रुक् विरुक्। तद्वंतो विरुक्मतः। मतुप्ययस्मयादित्वेन पदत्वात्कुत्वं। भत्वात् जश्त्वाभावः। रीयते। रीङ् स्रवणे। दैवादिकः॥

चतुर्थीमृचमाह॥

वि ये भ्राजंते सुमखास ऋष्टिभिः प्रच्यावयंतो अच्युता चिदोजसा।
मनोजुवो यन्मरुतो रथेष्वा वृषव्रातासः पृषतीरयुग्ध्वं॥४॥

वि। ये। भ्राजंते। सुऽमखासः। ऋष्टिऽभिः। प्रऽच्यवयंतः। अच्युता। चित्। ओजसा।
मनःऽजुवः। यत्। मरुतः। रथेषु। आ। वृषऽव्रातासः। पृषतीः। अयुग्ध्वं॥४॥

सुमखासः शोभनयज्ञा ये मरुत ऋष्टिभिरायुधैर्विभ्राजंते विशेषेण दीप्यंते। ते मरुतोऽच्युता चित् च्यावयितुमशक्यानि दृढानि पर्वतादीन्यप्योजसा स्वकीयेन

बलेन प्रच्यावयंतः प्रकर्षेण च्यावयितारः प्रेरयितारो भवंति । उत्तरार्द्धः प्रत्यक्षकृतः । हे मरुतः । मनोजुवो मनोवद्वेगगतयो वृषव्रातासो वृष्ट्युदकसेचनसमर्थसप्तसंघात्मका यूयं रथेष्वात्मीयेषु पृषतीः । पृषत्य इति मरुद्वाहनानां संज्ञा पृषत्यो मरुतामित्युक्तत्वात् । पृषद्भिः श्वेतविंदुभिर्युक्ता मृगीर्यद्यदायुग्ध्वं । आभिमुख्येन नियुक्ता अकृद्वं । तदानीं पर्वतादिकं प्रच्यवत इत्यर्थः ॥ सुमखासः । सर्वे विधयश्छंदसि विकल्प्यंत इति नञ्सुभ्यामित्यस्य प्रवृत्त्यभावे बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । अच्युता । शेश्छंदसि बहुलमिति शेर्लोपः । मनोजुवः । जु इति सौत्रो धातुर्गत्यर्थः । क्विब्वचीत्यादिना क्विब्दीर्घौ । अयुग्ध्वं । युजिर् योगे । लुङि धि चेति सकारलोपः ॥

पंचमीमृचमाह ॥

प्र यद्रथेषु पृषतीरयुग्ध्वं वाजे अद्रिं मरुतो रंहयंतः ।

उतारुषस्य वि ष्यंति धाराश्चर्मेवोदभिर्व्युंदंति भूम ॥ ५ ॥

प्र । यत् । रथेषु । पृषतीः । अयुग्ध्वं । वाजे । अद्रिं । मरुतः । रंहयंतः ।

उत । अरुषस्य । वि । स्यंति । धाराः । चर्मऽइव । उदऽभिः । वि । उंदंति । भूम ॥ ५ ॥

हे मरुतः पृषतीर्यद्यथा रथेषु प्रायुग्ध्वं । प्रायुयूजत । किं कुर्वंतः । वाजेऽन्ने निमित्तभूते सत्यद्रिं मेघं रंहयंतः । वर्षणार्थं प्रेरयंतः । उत तदानीमरुषस्यारोचमानस्य सूर्यस्य वैद्युताग्नेर्वा सकाशाद्वृष्ट्युदकधारा भवंतो विष्यंति । विमुंचंति । विमुक्तास्ताश्च धारा उदभिरुदकैश्चर्मेव परिमितमल्पं चर्म यथाप्रयत्नेन क्लेद्यते । एवं भूम सर्वां भूमिं व्युंदंति । विशेषेणार्द्रां कुर्वंति ॥ रंहयंतः । रहि गतौ । विष्यंति । षो अंतकर्मणि । दैवादिकः । ओतः श्यनि । पा॰ ७. ३. ७१. । इत्योकारलोपः । उपसर्गात्सुनोतीति षत्वं । उदभिः । पद्दन्नित्यादिनोदकशब्दस्योदन्नादेशः । व्युंदंति । उंदी क्लेदने । भूम । सुपां सुलुगिति भूमिशब्दादुत्तरस्यामो डादेशः । छांदसं ह्रस्वत्वं ॥

तृतीयसवन आ वो वहंत्विति पोतुः प्रस्थितयाज्या । सूत्रितं च । आ वो वहंतु सप्तयो रघुष्यदोऽभेव नः सुहवा आ हि गंतन । आ॰ ५. ५. । इति ॥ तामेतां सूक्ते षष्ठीमृचमाह ॥

आ वो वहंतु सप्तयो रघुष्यदो रघुपत्वानः प्र जिगात बाहुभिः ।
सीदता बर्हिरुरु वः सदस्कृतं मादयध्वं मरुतो मध्वो अंधसः ॥ ६ ॥

आ। वः। वहंतु। सप्तयः। रघुऽस्यदः। रघुऽपत्वानः। प्र। जिगात। बाहुऽभिः।
सीदत। आ। बर्हिः। उरु। वः। सदः। कृतं। मादयध्वं। मरुतः। मध्वः। अंधसः ॥ ६ ॥

हे मरुतो वो युष्मान् सप्तयः सर्पणशीला अश्वा आवहंतु। अस्मद्यज्ञं प्रापयंतु। कीदृशाः सप्तयः। रघुष्यदः। लघु शीघ्रं स्यंदमानाः। वेगेन गच्छंत इत्यर्थः। रघुपत्वानो लघु शीघ्रं पतंतो गच्छंतो यूयं बाहुभिः स्वकीयैर्हस्तैरस्मभ्यं दातव्यं धनमाहृत्य प्रजिगात। प्रकर्षेण गच्छत। हे मरुतो वो युष्माकं सदः सदनं वेदिलक्षणं स्थानमुरु विस्तीर्णं कृतं। तत्र यदास्तीर्णं बर्हिस्तदासीदत। तस्मिन्बर्हिष्युपविशत। उपविश्य च मध्वो मधुरस्यांधसः सोमलक्षणस्यान्नस्य पानेन मादयध्वं। तृप्ता भवत॥ रघुष्यदः। रघु स्यंदंत इति रघुष्यदः। ष्यंदू प्रस्रवणे। क्विप् चेति क्विप्। अनिदितामिति नलोपः। कृदुत्तरपदप्रकृतिस्वरत्वं। रघुपत्वानः। पत्लृ गतौ। अन्येभ्योऽपि दृश्यंत इति वनिप्। जिगात। गा स्तुतौ। जौहोत्यादिकः। जिगातीति गतिकर्मसु पाठादत्र गत्यर्थः। लोण्मध्यमबहुवचनस्य तप्तनप्तनथनाश्चेति तबादेशः। तस्य पित्त्वेन ङित्त्वाभावादी हल्यघोरितीत्वाभावः। सदः। अतः कृकमीति विसर्जनीयस्य सत्वं। मादयध्वं। मद तृप्तियोगे। चुरादिरात्मनेपदी॥

॥ इति प्रथमस्य षष्ठे नवमो वर्गः ॥

सप्तमीमृचमाह ॥

तेऽवर्धंत स्वतवसो महित्वना नाकं तस्थुरुरु चक्रिरे सदः ।
विष्णुर्यद्धावदृषणं मदच्युतं वयो न सीदन्नधि बर्हिषि प्रिये ॥ ७ ॥

ते। अवर्धंत। स्वऽतवसः। महिऽत्वना। आ। नाकं। तस्थुः। उरु। चक्रिरे। सदः।
विष्णुः। यत्। ह। आवत्। वृषणं। मदऽच्युतं। वयः। न। सीदन्। अधि।
बर्हिषि। प्रिये ॥ ७ ॥

ते मरुतोऽवर्धंत। वृद्धिं गताः। कीदृशाः। स्वतवसः। स्वाश्रयबलाः। नान्यस्य कस्यचिद्बलमपेक्षंते। वृद्धिं प्राप्य च महित्वना महिम्ना महत्त्वेन नाकं

स्वर्गमातस्थुः । आस्थितवंतः । सदः सदनं नभोलक्षणं स्थानं च स्वकीयनिवासायोरु विस्तीर्णं चक्रिरे । यत् येभ्यो मरुद्भ्यः । यदर्थं वृषणं कामाभिवर्षकं मदच्युतं मदस्य हर्षस्यासेक्तारं यज्ञं विष्णुर्हावत् । विष्णुरेवागत्य रक्षति । ते मरुतो वयो न पक्षिणो यथा शीघ्रमागच्छंति । एवं शीघ्रमागत्य बर्हिष्यध्यस्मदीये यज्ञे प्रिये प्रीतिकरे सीदन् । सीदंतु । उपविशंतु ॥ तेऽवर्धंत । स्वरितो वानुदात्ते पदादौ । पा० ८. २. ६. । इत्येकादेशस्य स्वरितत्वं । महित्वना । भावप्रत्ययादुत्तरस्याङो व्यत्ययेन नाभाव उदात्तत्वं च । यद्वा सुपां सुलुगित्याजादेशो नकारोपजनश्च । तस्थुः । नाकमातस्थुश्च सदश्च विस्तीर्णं चक्रिर इति चार्थप्रतीतेश्चादिलोपे विभाषेति प्रथमायास्तिङ्विभक्तेर्निघातप्रतिषेधः । यत् । सुपां सुलुगिति चतुर्थ्या लुक् । आवत् । छांदसो वर्तमाने लङ् । वृषणं । वा षपूर्वस्य निगम इत्युपधादीर्घाभावः । मदच्युतं । मदं च्योततीति मदच्युत् । च्युतिर् आसेचने । क्विप् चेति क्विप् । सीदन् । लिङर्थे लेट्यडागमः ॥

अष्टमीमृचमाह ॥

शूरा॑ इ॒वेद्युयु॑धयो॒ न जग्म॑यः श्रव॒स्यवो॒ न पृत॑नासु येतिरे ।
भय॑न्ते॒ विश्वा॒ भुव॑ना म॒रुद्भ्यो॒ राजा॑न इव त्वे॒षसं॑दृशो॒ नरः॑ ॥ ८ ॥
शूराः॑ऽइव । इत् । युयु॑धयः । न । जग्म॑यः । श्रव॒स्यवः॑ । न । पृत॑नासु । ये॒ति॒रे॒ ।
भय॑न्ते । विश्वा॑ । भुव॑ना । म॒रुत्ऽभ्यः॑ । राजा॑नःऽइव । त्वे॒षऽसं॑दृशः । नरः॑ ॥ ८ ॥

इदित्येतत्समुच्चये । शूरा इवेत् शौर्योपेता युयुत्सवः पुरुषा इव च युयुधयः शत्रुभिर्युध्यमानाः पुरुषा इव च जग्मयः शीघ्रं गच्छंतो मरुतः श्रवस्यवो न श्रवोऽन्नमात्मन इच्छंतः पुरुषा इव पृतनासु संग्रामेषु येतिरे । प्रयतंते वृत्रादिभिर्युद्धे व्याप्रियंते । तादृशेभ्यो मरुद्भ्यो विश्वा भुवना सर्वाणि भूतजातानि भयंते । बिभ्यति । ये नरो वृष्ट्यादेर्नेतारो मरुतो राजान इव राजमाना नृपतय इव त्वेषसंदृशो दीप्तसंदर्शना उग्ररूपतया द्रष्टुमशक्या भवंति । तेभ्य इत्यर्थः ॥ युयुधयः । युध संप्रहारे । आदृगमहनजन इत्यत्रोत्सर्गश्छंदसीति वचनात्किन्प्रत्ययः । लिङ्वद्भावाद्द्विर्भावादि । कित्त्वाद्गुणाभावः । नित्त्वादाद्युदात्तत्वं । जग्मयः । तेनैव सूत्रेण किन्प्रत्ययः । गमहनेत्यादिनोपधालोपः । स्थानिवद्भावाद्द्विर्भावादि । श्रवस्यवः । श्रव इच्छति श्रवस्यति । क्याच्छंदसीत्युप्रत्ययः । येतिरे । यती प्रयत्ने । छंदसि

लुङ्लङ्लिट इति वर्तमाने लिट्। भयंते। ञिभी भये। बहुलं छंदसीति शपः श्लोरभावः। त्वेषसंदृशः। त्विष दीप्तौ। पचाद्यच्। दृशिर् प्रेक्षणे। संपूर्वादस्मात्संपदादिलक्षणो भावे क्विप्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥

नवमीमृचमाह॥

त्वष्टा यद्वज्रं सुकृतं हिरण्ययं सहस्रभृष्टिं स्वपा अवर्तयत्।
धत्त इंद्रो नर्यपांसि कर्तवेऽहन्वृत्रं निरपामौब्जदर्णवं॥ ९॥

त्वष्टा। यत्। वज्रं। सुऽकृतं। हिरण्ययं। सहस्रऽभृष्टिं। सुऽअपाः। अवर्तयत्।
धत्ते। इंद्रः। नरि। अपांसि। कर्तवे। अहन्। वृत्रं। निः। अपां। औब्जत्। अर्णवं॥ ९॥

स्वपाः शोभनकर्मा त्वष्टा विश्वनिर्माता यद्वज्रमवर्तयत्। इंद्रं प्रत्यगमयत्। दत्तवानित्यर्थः। कीदृशं। सुकृतं। सम्यक् निष्पादितं। हिरण्ययं। सुवर्णमयं। सहस्रभृष्टिं। अनेकाभिर्धाराभिर्युक्तं। तद्वज्रमिंद्रो धत्ते। धारयति। किमर्थं। नरि। अत्र नृसंबंधान्नृशब्देन संग्रामोऽभिधीयते। संग्रामेऽपांसि शत्रुहननादिलक्षणानि कर्माणि कर्तवे कर्तुं। एवं वज्रं धृत्वा तेन वज्रेन वृत्रं वृष्ट्युदकस्यावरकमर्णवमर्णसोदकेन युक्तं मेघमहन्। अवधीत्। अपां तेन निरुद्धा अपश्च स निरौब्जत्। निःशेषेणाधोमुखमपातयत्। प्रवृष्टा अकरोदित्यर्थः॥ सुकृतं। सुपूर्वात्करोतेः कर्मणि निष्ठा। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। हिरण्ययं। हिरण्यशब्दादुत्तरस्य मयटो मकारस्य लोप ऋत्व्यवास्त्व्यवास्त्वेत्यादौ निपात्यते। स्वपाः। सोमनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वं। कर्तवे। तुमर्थे सेसेनिति करोतेस्तवेन्प्रत्ययः। अपां। क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी। ऊडिदमिति विभक्तेरुदात्तत्वं। औब्जत्। उब्ज आर्जवे। अर्णवं। अर्णसो लोपश्चेति मत्वर्थीयो वः सलोपश्च॥

दशमीमृचमाह॥

ऊर्ध्वं नुनुद्रेऽवतं त ओजसा दादृहाणं चिद्बिभिदुर्वि पर्वतं।
धमंतो वाणं मरुतः सुदानवो मदे सोमस्य रण्यानि चक्रिरे॥ १०॥

ऊर्ध्वं। नुनुद्रे। अवतं। ते। ओजसा। दादृहाणं। चित्। बिभिदुः। वि। पर्वतं।
धमंतः। वाणं। मरुतः। सुऽदानवः। मदे। सोमस्य। रण्यानि। चक्रिरे॥ १०॥

अत्रेयमाख्यायिका। गोतम ऋषिः पिपासया पीडितः सन् मरुत उदकं ययाचे। तदनंतरं मरुतोऽदूरस्थं कूपमुद्धृत्य यत्र स गोतम ऋषिस्तिष्ठति तां दिशं नीत्वा ऋषिसमीपे कूपमवस्थाप्य तत्पार्श्वे आहावं च कृत्वा तस्मिन्नाहावे कूपमुत्सिच्य तमृषिं तेनोदकेन तर्पयांचक्रुः। अयमर्थोऽनयोत्तरया च प्रतिपाद्यते ॥ ते मरुतोऽवतं। अवस्तात्तलो भवतीत्यवतः कूपः। कूपनामसु चावतोऽवट इति पठितं। तमूर्ध्वमुपरि यथा भवति तथौजसा स्वकीयेन बलेन नुनुद्रे। प्रेरितवंतः। उत्खातवंत इत्यर्थः। एवं कूपमुत्खाय ऋषेराश्रमं प्रति नयंतो मरुतो मार्गमध्ये दादृहाणं प्रवृद्धं गतिनिरोधकं पर्वतं चित् पर्ववंतं शिलोच्चयमपि विबिभिदुः। विशेषेण बभंजुः। सुदानवः शोभनदानास्ते मरुतो वाणं शतसंख्याभिस्तंत्रीभिर्युक्तं वीणाविशेषं धमंतो वादयंतः सोमस्य मदे सोमपानेन हर्षे सति रण्यानि स्तुत्यानि रमणीयानि धनानि चक्रिरे। स्तोतृभ्यः कुर्वंति ॥ नुनुद्रे। णुद प्रेरणे। लिटीरयो र इति रे आदेशः। दादृहाणं। दृह दृहि वृद्धौ। लिटः कानच्। धमंतः। ध्मा शब्दाग्निसंयोगयोः। पाघ्रेत्यादिना धमादेशः। वाणं। अण रण वण शब्दार्थाः। कर्मणि घञ्। कर्णोवत इत्यंतोदात्तत्वं। रण्यानि। रणतेर्भावे वशिरण्योरुपसंख्यानं। पा॰ ३. ३. ५८. ३.। इत्यप्। ततो भावे छंदसीति यत्। यतोऽनाव इत्याद्युदात्तत्वं ॥

एकादशीमृचमाह ॥

जिह्मं नुनुद्रेऽवतं तया दिशासिंचन्नुत्सं गोतमाय तृष्णजे।
आ गच्छंतीमवसा चित्रभानवः कामं विप्रस्य तर्पयंत धामभिः ॥ ११ ॥
जिह्मं। नुनुद्रे। अवतं। तया। दिशा। असिंचन्। उत्सं। गोतमाय। तृष्णऽजे।
आ। गच्छंति। ईं। अवसा। चित्रऽभानवः। कामं। विप्रस्य। तर्पयंत। धामऽभिः ॥ ११ ॥

मरुतोऽवतमुद्धृतं कूपं यस्यां दिशि ऋषिर्वसति तया दिशा जिह्मं वक्रं तिर्यंचं नुनुद्रे। प्रेरितवंतः। एवं कूपं नीत्वा ऋष्याश्रमेऽवस्थाप्य तृष्णजे तृषिताय गोतमाय ऋषये तदर्थमुत्सं जलप्रवाहं कूपादुद्धृत्यासिंचन्। आहावेऽवानयन्। एवं कृत्वेमेनं स्तोतारमृषिं चित्रभानवो विचित्रदीप्तयस्ते मरुतोऽवसेदृशेन रक्षणेन सहागच्छंति। तत्समीपं प्राप्नुवंति। प्राप्य च विप्रस्य मेधाविनो गोतमस्य काममभिलाषं धामभिरायुषो धारकैरुदकैस्तर्पयंत। अतर्पयन् ॥

तया। न गोश्वन्साववर्णेति सावेकाच इति प्राप्तस्य विभक्त्युदात्तस्य प्रतिषेधः। दिशा। सावेकाच इति विभक्तेरुदात्तत्वं। तृष्णजे। ञितृष पिपासायां। स्वपितृषोर्नजिङ्। पा० ३. २. १७२.। प्रत्ययाद्युदात्तत्वं। पदकारस्य शाकल्यस्य त्वयमभिप्रायः। अन्येष्वपि दृश्यत इति दृशिग्रहणात्केवलादपि जनेर्डप्रत्ययः। तृष्णा जाता यस्य स तथोक्तः। ङ्यापोः संज्ञाछंदसोर्बहुलमिति ह्रस्वत्वं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। धामभिः। दधातेरातो मनिन्निति मनिन्॥

मारुते पशौ या वः शर्मेति हविषो याज्या। प्रदानानामिति खंडे सूचितं। अरा इवेदचरमा अहेव या वः शर्म शशमानाय संति। आ० ३. ७.। इति॥

तामेतां सूक्ते द्वादशीमृचमाह॥

या वः॒ शर्म॑ शशमा॒नाय॒ संति॑ त्रि॒धातू॑नि दा॒शुषे॑ यच्छ॒ताधि॑।
अ॒स्मभ्यं॒ तानि॑ मरुतो॒ वि यं॑त र॒यिं नो॑ धत्त वृषणः सु॒वीरं॑॥ १२॥

या। वः॒। शर्म॑। श॒श॒मा॒नाय॑। संति॑। त्रि॒ऽधातू॑नि। दा॒शुषे॑। य॒च्छ॒त॒। अधि॑।
अ॒स्मभ्यं॑। तानि॑। म॒रु॒तः॒। वि। यं॒त॒। र॒यिं। नः॒। ध॒त्त॒। वृ॒ष॒णः॒। सु॒ऽवीरं॑॥ १२॥

हे मरुतो वो युष्माकं संबंधीनि यानि शर्म शर्माणि सुखानि गृहाणि वा। कीदृशानि। त्रिधातूनि। पृथिव्यादिषु त्रिषु स्थानेष्ववस्थितानि। शशमानाय युष्मान् स्तुतिभिर्भजमानाय दातुं संपादितानि। पूर्वोक्तलक्षणानि शर्माणि यानि संति यानि च दाशुषे हविर्दत्तवते यजमानायाधियच्छत। अधिकं प्रयच्छथ। हे मरुतस्तानि सर्वाणि शर्माण्यस्मभ्यं वियंत। विशेषेण प्रयच्छत। किंच हे वृषणः कामानां वर्षितारो मरुतो नोऽस्मभ्यं सुवीरं शोभनैर्वीरैः पुत्रादिभिर्युक्तं रयिं धनं धत्त। दत्त॥ या। शेश्छंदसि बहुलमिति शेर्लोपः। शर्म। सुपां सुलुगिति जसो लुक्। शशमानाय। शश प्लुतगतौ। ताच्छील्यवयोवचनशक्तिषु चानश। यच्छत। छांदसे लङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। यंत। यमेर्लोटि बहुलं छंदसीति शपो लुक्। तप्तनप्तनथनाश्चेति तबादेशः। अतस्तस्य पित्त्वेन ङित्त्वाभावादनुदात्तोपदेशेत्यादिनानुनासिकलोपो न भवति। वृषणः। वा षपूर्वस्य निगम इत्युपधादीर्घाभावः। सुवीरं। बहुव्रीहौ वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं॥

॥ इति प्रथमस्य षष्ठे दशमो वर्गः॥

मरुतो यस्येति दशर्चं द्वितीयं सूक्तं गोतमस्यार्षं गायत्रं मरुद्देवताकं। अनुक्रम्यते च। मरुतो दश गायत्रमिति॥ व्यूळ्हे तृतीये छंदोम आग्निमारुते शस्त्र एतत्सूक्तं। तृतीयस्यागन्महेति खंडे सूचितं। मरुतो यस्य हि प्राग्नये वाचमित्याग्निमारुतं। आ॰ ८. ११.। इति॥ ऐंद्रामारुत्यां प्रधानस्य हविषो मरुतो यस्येत्येषानुवाक्या। सूचितं च। ऐंद्रामारुतीं भेदकामा मरुतो यस्य हि क्षये। आ॰ २. १५.। इति॥ एषैव वरुणप्रघासेषु मारुत्या आमिक्षाया अनुवाक्या। सूचितं च। मरुतो यस्य हि क्षयेऽरा इवेदचरमा अहेव। आ॰ २. १७.। इति॥ तथा प्रातःसवने पोतुरेषा प्रस्थितयाज्या। सूचितं च। मरुतो यस्य हि क्षयेऽग्ने पत्नीरिहावह। आ॰ ५. ५.। इति॥ तामेतां सूक्ते प्रथमामृचमाह॥

मरु॑तो॒ यस्य॒ हि क्षये॑ पा॒था दि॒वो वि॑महसः। स सु॑गो॒पात॑मो॒ जनः॑ ॥१॥

मरु॑तः। यस्य॑। हि। क्षये॑। पा॒थ। दि॒वः। वि॒ऽम॒ह॒सः॒। सः। सु॒ऽगो॒पात॑मः। जनः॑ ॥१॥

हे विमहसो विशिष्टप्रकाशा मरुतः। दिवोऽंतरिक्षलोकादागत्य यस्य हि यस्य खलु यजमानस्य क्षये यज्ञगृहे पाथ। सोमं पिबथ। स जनो जातो यजमानः सुगोपातमः शोभनैः पालकैरत्यंतं युक्तो भवति॥ पाथ। पा पाने। लेटि बहुलं छंदसीति शपो लुक्। यद्वृत्तयोगादनिघातः। विमहसः। विशिष्टं महस्तेजो येषां ते तथोक्ताः। सुगोपातमः। शोभनो गोपा रक्षको यस्य स सुगोपाः। अतिशयेन सुगोपाः सुगोपातमः। तमपः पित्त्वादनुदात्तत्वे सति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वमेव शिष्यते॥

द्वितीयामृचमाह॥

य॒ज्ञैर्वा॑ यज्ञवाहसो॒ विप्र॑स्य वा मती॒नां। मरु॑तः शृणु॒ता हवं॑ ॥२॥

य॒ज्ञैः। वा॒। य॒ज्ञ॒ऽवा॒ह॒सः॒। विप्र॑स्य। वा॒। म॒ती॒नां। मरु॑तः। शृ॒णु॒त। हवं॑ ॥२॥

हे यज्ञवाहसो यज्ञस्य वोढारो मरुतो यूयं यज्ञैर्वा। वाशब्दः समुच्चये। यज्ञैश्च यजमानस्य मतीनां स्तुतीनां संबंधिनो विप्रस्य वायजमानस्य मेधाविनश्च हवमाह्वानं शृणुत। यज्ञवतो यजमानस्य यागरहितस्य स्तोतुश्चाह्वानं भवद्भिः श्रोतव्यं यतो भवंतो यज्ञस्य वोढारः स्तुतिप्रियाश्चेति भावः॥ यज्ञवाहसः। गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति वचनाद्वहिहाधाञ्भ्यश्छंदसीति कार-

कपूर्वाद्धहतेरसुन्। णिदित्यनुवृत्तेरुपधावृद्धिः। मतीनां। मन ज्ञाने। अस्मात्करणे क्तिन्। नामन्यतरस्यामिति नाम उदात्तत्वं। शृणुता। श्रुवः शृ चेति श्नुः। सति शिष्टस्य स्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वचनात्तिङ एव स्वरः शिष्यते। मरुत इत्यस्यामंत्रितस्यामंत्रितं पूर्वमविद्यमानवदित्यविद्यमानवत्त्वेन पदादपरत्वाभिघाताभावः। हवं। भावेऽनुपसर्गस्येति ह्वयतेरप् संप्रसारणं च ॥

तृतीयामृचमाह ॥

उत वा यस्यं वाजिनोऽनु विप्रमतंक्षत। स गंता गोमंति व्रजे ॥ ३ ॥

उत। वा। यस्यं। वाजिनंः। अनुं। विप्रं। अतंक्षत। सः। गंतां। गोऽमंति। व्रजे ॥ ३ ॥

उत वा अपि च यस्य यजमानस्य वाजिनो हविर्लक्षणान्नोपेता ऋत्विजो विप्रं मेधाविनं मरुद्गणमन्वतक्षत। हविःप्रदानादिना तीक्ष्णीकुर्वंति। स यजमानो गोमति बहुभिर्गोभिर्युक्ते व्रजे गोष्ठे गंता गमनशीलो भवति ॥ अतक्षत। तक्षू त्वक्षू तनूकरणे। छांदसो लङ्। व्यत्ययेन मध्यमः। गंता। गमेस्ताच्छीलिकस्तृन् ॥

चतुर्थीमृचमाह ॥

अस्य वीरस्यं बर्हिषिं सुतः सोमो दिविंष्टिषु। उक्थं मदंश्च शस्यते ॥ ४ ॥

अस्य। वीरस्यं। बर्हिषिं। सुतः। सोमंः। दिविंष्टिषु। उक्थं। मदंः। च। शस्यते ॥ ४ ॥

दिविष्टिषु यजनीयदिवसेषु बर्हिषि यज्ञे वीरस्य शत्रुक्षेपणकुशलस्यास्य मरुद्गणस्य यागाय सोमः सुतः। ऋत्विग्भिरभिषुतो भवति। उक्थं मरुद्देवताकं शस्त्रं मदश्च। मदिधातुना युक्ता मरुतो देवाः सोमस्य मत्सन्नित्यादिका मारुती निविच्चास्य मरुद्गणस्य हर्षाय शस्यते। होत्रा पठ्यते ॥ अस्य। ऊडिदमिति विभक्तेरुदात्तत्वं। दिविष्टिषु। इष्टय एषणानि गमनानि दिवो द्योतमानस्य सूर्यस्य येषु दिवसेषु ते तथोक्ताः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। व्यत्ययेनोत्वाभावः ॥

पंचमीमृचमाह ॥

अस्य श्रोषंत्वा भुवो विश्वा यश्चर्षणीरभि। सूरं चित्सस्रुषीरिषः ॥ ५ ॥

अस्य। श्रोषंतु। आ। भुवंः। विश्वाः। यः। चर्षणीः। अभि। सूरं। चित्। सस्रुषीः। इषः ॥ ५ ॥

अस्य यजमानस्य स्तुतिं मरुत आ आभिमुख्येन श्रोषंतु। शृखंतु। यो मरुद्गणो विश्वाश्चर्षणीः सर्वान् शत्रुभूतान्मनुष्यानभिभुवः। अभिभवति। तादृग्गणाकारा मरुतः शृखंत्वित्यर्थः। सूरं चित् स्तुतेः प्रेरयितारं यजमानमपीषो मरुद्भिः प्रत्तान्यन्नानि ससुषीः प्राप्तानि भवंतु॥ श्रोषंतु। श्रु श्रवणे। लोटि सिब्बहुलं लेटीति बहुलवचनात्सिप्। भुवः। भवतेर्लेटि तिपस्तिङां तिङो भवंतीति सिप्। लेटोऽडाटावित्यडागमः। बहुलं छंदसीति शपो लुक्। भूसुवोस्तिङीति गुणप्रतिषेधः। सूरं। षू प्रेरणे। सुसूधागृधिभ्यः क्रनिति क्रन्प्रत्ययः। ससुषीः। सृ गतौ। अस्माल्लटः क्वसुः। उगितश्चेति ङीप्। भसंज्ञायां वसोः संप्रसारणमिति संप्रसारणं। शासिवसिघसीनां चेति षत्वं। जसि वा छंदसीति पूर्वसवर्णदीर्घत्वं॥

॥ इति प्रथमस्य षष्ठ एकादशो वर्गः॥

षष्ठीमृचमाह॥

पूर्वीभिर्हि ददाशिम शरद्भिर्मरुतो वयं। अवोभिश्चर्षणीनां॥ ६॥

पूर्वीभिः। हि। ददाशिम। शरत्ऽभिः। मरुतः। वयं। अवःऽभिः। चर्षणीनां॥ ६॥

हे मरुतः पूर्वीभिर्बह्वीभिः शरद्भिः संवत्सरैश्चर्षणीनां सर्वस्य द्रष्टॄणां सर्वज्ञानां भवतां संबंधिभिरवोभी रक्षणैर्युक्ताः संतो वयं ददाशिम। युष्मभ्यं हवींषि दत्तवंतः। हि यस्मादर्थे। यस्मादेवं तस्मादिदानीमप्यस्मदीयहविःस्वीकरणायागच्छतेत्यर्थः॥ पूर्वीभिः। पुरुशब्दाद्वोतो गुणवचनादिति ङीष्। यणादेशे हलि चेति दीर्घत्वं। ददाशिम। दाशृ दाने। लिटीडागमः। हि चेति निघातप्रतिषेधः। चर्षणीनां। नामन्यतरस्यामिति नाम उदात्तत्वं॥

सप्तमीमृचमाह॥

सुभगः स प्रयज्यवो मरुतो अस्तु मर्त्यः। यस्य प्रयांसि पर्षथ॥ ७॥

सुऽभगः। सः। प्रऽयज्यवः। मरुतः। अस्तु। मर्त्यः। यस्य। प्रयांसि। पर्षथ॥ ७॥

हे प्रयज्यवः प्रकर्षेण यष्टव्या मरुतः स मर्त्यो मनुष्यो यजमानः सुभगोऽस्तु। शोभनधनो भवतु। यस्य यजमानस्य प्रयांसि हविर्लक्षणान्यन्नानि पर्षथ। आत्मनि सिंचथ। स्वीकुरुथेत्यर्थः॥ सुभगः। भग इति धननाम। शोभनो भगो यस्य।

क्त्वादयश्चेत्युत्तरपदाद्युदात्तत्वं । पर्षथ । पृषु वृषु मृषु सेचने । भौवादिकः । यद्वृत्तान्नित्यमिति निघातप्रतिषेधः ॥

अष्टमीमृचमाह ॥

शशमानस्य वा नरः स्वेदस्य सत्यशवसः । विदा कामस्य वेनतः ॥ ८ ॥

शशमानस्य । वा । नरः । स्वेदस्य । सत्यऽशवसः । विद । कामस्य । वेनतः ॥ ८ ॥

हे सत्यशवसोऽवितथबला नरो नेतारो मरुतः शशमानस्य युष्मान्स्तुतिभिः संभजमानस्य स्वेदस्य स्तावकमंत्रोच्चारणजनितेन श्रमेण स्विद्यमानगात्रस्य वेनतो । वेनतिः कांतिकर्मा । कामयमानस्य । वाशब्दः समुच्चये । एवंभूतस्य स्तोतुश्च कामस्य काममभिलाषं विद । लंभयत प्रयच्छतेत्यर्थः ॥ शशमानस्य । शश प्लुतगतौ । ताच्छीलिकश्चानश् । स्वेदस्य । ञिष्विदा गात्रप्रक्षरणे । अंतर्भावितण्यर्थात्कर्मणि घञ् । ञित्वादाद्युदात्तत्वं । विदा । विद्लृ लाभे । लोटि मध्यमपुरुषबहुवचनस्य व्यत्ययेन झादेशः । बहुलं छंदसीति विकरणस्य लुक् । झस्यादादेशः । लोपस्त आत्मनेपदेष्विति तलोपः । प्रत्ययाद्युदात्तत्वं । पादादित्वान्निघाताभावः । द्व्यचोऽतस्तिङ इति संहितायां दीर्घः । कामस्य । वृषादिषु पाठादाद्युदात्तत्वं । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी ॥

नवमीमृचमाह ॥

यूयं तत्सत्यशवस आविष्कर्त महित्वना । विध्यता विद्युता रक्षः ॥ ९ ॥

यूयं । तत् । सत्यऽशवसः । आविः । कर्त । महिऽत्वना । विध्यत । विऽद्युता । रक्षः ॥ ९ ॥

हे सत्यशवसः सत्यबला अन्यैरप्रधृष्यबला मरुतो यूयं तद्वृत्रवधादिषु प्रसिद्धं युष्मदीयं माहात्म्यमाविष्कर्त । आविष्कुरुत । प्रकाशयत । विद्युता विद्योतमानेन महित्वना तेन महत्त्वेन माहात्म्येन रक्षोऽस्माकमुपद्रवकारिणं राक्षसादिकं विध्यत । ताडयत । नाशयतेत्यर्थः ॥ कर्त । करोतेर्लोटि बहुलं छंदसीति विकरणस्य लुक् । तप्तनप्तनथनाश्चेति तबादेशः । गुणः । इदुदुपधस्य चाप्रत्ययस्य चेत्याविःशब्दे विसर्जनीयस्य षत्वं । महित्वना । भावप्रत्ययादुत्तरस्याङो व्यत्ययेन नाभाव उदात्तत्वं च । यद्वा सुपां सुलुगिति तृतीयाया आजादेशो । नकारोपजनश्च । विध्यता । व्यध ताडने । श्यनि ग्रहिज्यादिना संप्रसारणं । तशब्दस्य सार्वधातुकमपिदिति ङित्त्वे सति ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणामिति संहितायां दीर्घः ॥

दशमीमृचमाह ॥

गूहता गुह्यं तमो वि यात विश्वमत्रिणं । ज्योतिष्कर्ता यदुश्मसि ॥ १० ॥

गूहत । गुह्यं । तमः । वि । यात । विश्वं । अत्रिणं । ज्योतिः । कर्त । यत् । उश्मसि ॥ १० ॥

हे मरुतो गुह्यं गुहायां स्थितं सर्वत्र व्याप्य वर्तमानं तमोऽधकारं गूहत । संवृतं कुरुत । यथास्माभिर्न दृश्यते तथादर्शनं प्रापयत । विनाशयतेत्यर्थः । विश्वं सर्वमत्रिणमत्तारं राक्षसादिकं वियात । विविधं यापयत । अस्मत्सकाशान्निर्गमयत । यज्ज्योतिः सूर्यादिकं वयमुश्मसि । कामयामहे । तत्कर्त । कुरुत । यद्वा गुह्यं गुहायां शरीरांतर्गतगुहारूपे हृदये भवं तमो भावरूपाज्ञानं तद्गूहत । विनाशयत । अत्रिणं पुरुषार्थस्यात्तारं कामक्रोधादिकं सर्वं विनिर्गमयत । यत्तज्ज्योतिः परतत्त्वसाक्षात्काररूपं ज्ञानं कामयामहे प्राणापानादिपंचवृत्तिरूपा हे मरुतस्तत्कर्त । कुरुत ॥ गूहता । गुहू संवरणे । शपि लघूपधगुण ऊदुपधाया गोहः । पा॰ ६. ४. ८९. । इत्युपधाया ऊकारः । यात । या प्रापणे । अस्मादंतर्भावितण्यर्थाल्लोट् । अत्रिणं । अदेस्त्रिनिश्चेति त्रिनिप्रत्ययः । उश्मसि । वश कांतौ । इदंतो मसिः । अदादित्वाच्छपो लुक् । ग्रहिज्यादिना संप्रसारणं ॥

॥ इति प्रथमस्य षष्ठे द्वादशो वर्गः ॥

प्रत्वक्षस इति षड्र्चं तृतीयं सूक्तं गोतमस्यार्षं जागतं मारुतं । तथा चानुक्रांतं । प्रत्वक्षसः षट् जागतमिति ॥ अग्निष्टोम आग्निमारुतशस्त्र इदं सूक्तं मारुतनिविद्धानं । अथ यथेतमिति खंडे सूत्रितं । प्रत्वक्षसः प्रतवसो यज्ञा यज्ञा वो अग्नये । आ॰ ५. २०. । इति ॥

तत्र प्रथमामृचमाह ॥

प्रत्वक्षसः प्रतवसो विरप्शिनोऽनानता अविथुरा ऋजीषिणः ।

जुष्टतमासो नृतमासो अंजिभिर्व्यानज्रे के चिदुस्रा इव स्तृभिः ॥ १ ॥

प्रऽत्वक्षसः । प्रऽतवसः । विऽरप्शिनः । अनानताः । अविथुराः । ऋजीषिणः ।

जुष्टऽतमासः । नृऽतमासः । अंजिऽभिः । वि । आनज्रे । के । चित् । उस्राःऽइव ।

स्तृऽभिः ॥ १ ॥

प्रत्वक्षसः शत्रूणां प्रकर्षेण तनूकर्तारः । शत्रुघातिन इत्यर्थः । यतः प्रतवसः

प्रकृष्टबलोपेता अत एव विरप्शिनो विविधेन जयघोषेणोपेताः। यद्वा बहुना-मैतत्। महांतो हि विविधैः शब्दैः प्रशस्यंते। अत एवानानता आनतिरहिताः। सर्वोत्कृष्टा इत्यर्थः। अविथुरा अवियुक्ताः। सप्तगणरूपेण संघीभूता इत्यर्थः। ऋजीषिणः। तृतीयसवने ऋजीषस्याभिषवात् तत्र च मरुतः स्तूयंत इति तेषामृजीषित्वं। यद्वा ऋजीषिणः प्रार्जयितारो रसानां। जुष्टतमासोऽतिशयेन यष्टृभिः सेविताः। नृतमासोऽतिशयेन मेघादेर्नेतारः। एवंभूता मरुतः स्तृभिः स्वशरीरस्याच्छादकैरंजिभी रूपाभिव्यंजकैराभरणैर्व्यानजे। नभसि व्यक्ता दृश्यंते। तत्र दृष्टांतः। केचिदुस्रा इव। ये के चन सूर्यरश्मयो यथा नभसि दीप्यंते तद्वत्॥ प्रत्वक्षसः। प्रकर्षेण त्वक्षंते तनूकुर्वंतीति प्रत्वक्षसः। तक्षू त्वक्षू तनूकरणे। गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेत्यसुन् पूर्वपदप्रकृतिस्वरत्वं च। प्रतवसः। तव इति बलनाम। प्रकृष्टं तवो येषां। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। विरप्शिनः। रप लप जल्प व्यक्तायां वाचि। विरपणं विरप्शः। औणादिकः शक्प्रत्ययः। तद्वंतो विरप्शिनः। अनानताः। आनता अवनताः प्रह्वीभूताः। न आनता अनानताः। अव्ययपूर्वपदप्रकृतिस्वरत्वं। अविथुराः। व्यथ भयचलनयोः। व्यथेः संप्रसारणं धः किच्च। उ॰ १. ३९.। इत्युरच्प्रत्ययः। अत्र तु बहुलवचनाद्धत्वं न क्रियते। पूर्ववत्समासस्वरौ। जुष्टतमासः। नित्यं मंत्र इति जुष्टशब्द आद्युदात्तः। तत आतिशायनिकस्य तमपः पित्त्वादनुदात्तत्वे स एव स्वरः शिष्यते। आनजे। अंजू व्यक्तिम्रक्षणकांतिगतिषु। कर्मणि छंदसि लुङ्लङ्लिट इति वर्तमाने लिट्। अत आदेरित्यभ्यासस्यात्वं। तस्मान्नुट् द्विहलः। पा॰ ७. ४. ७१.। इति नुट्। व्यत्ययेनोपधादेर्लोपः। इरयो रे। स्तृभिः। स्तृञ् आच्छादने। क्विप्। आगमानुशासनस्यानित्यत्वात्तुगभावः॥

द्वितीयामृचमाह॥

उपह्वरेषु यदचिध्वं ययिं वय इव मरुतः केन चित्पथा।
श्चोतंति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्णमर्चते॥ २॥

उपऽह्वरेषु। यत्। अचिध्वं। ययिं। वयःऽइव। मरुतः। केन। चित्। पथा।
श्चोतंति। कोशाः। उप। वः। रथेषु। आ। घृतं। उक्षत। मधुऽवर्णं। अर्चते॥ २॥

हे मरुतः। उपह्वरेषूपह्वर्तव्येषु गंतव्येष्वस्माकं संनिकृष्टेषु नभसः प्रदेशेषु

यद्यदा ययिं गतिमंतं मेघमचिध्वं। वर्षणसामर्थ्येनोपचितं कुरुथ। किं कुर्वंतः। वय इव। पक्षिण इव केन चित्पथा केनचिदाकाशमार्गेण शीघ्रं गच्छंतः। नभसि शीघ्रं वर्षणार्थं प्रवर्तमानैर्मरुद्भिर्मेघा उपचीयंत इत्यर्थः। तदानीं कोशाः। मेघनामैतत्। वो युष्माकं रथेष्वासक्ता मेघाः श्चोतंति। जलं मुंचंति। यस्मादेवं तस्मात् हे मरुतो यूयमर्चते युष्मान् हविर्भिः पूजयते मह्यं यजमानाय मधुवर्णं मधुसदृशरूपं स्वच्छं घृतं वृष्ट्युदकमा समंतादुक्षत। सिंचत। अस्मदभिलषितां वृष्टिं कुरुतेत्यर्थः॥ उपह्वरेषु। ह्वृ कौटिल्ये। उपह्वरंति कौटिल्येन तिर्यग्गच्छंत्येष्वित्युपह्वरा नभःप्रदेशाः। पुंसि संज्ञायां घः प्रायेणेत्यधिकरणे घः। अचिध्वं। चिनोतेर्वर्तमाने लङ्। बहुलं छंदसीति विकरणस्य लुक्। ययिं। या प्रापणे। आदृगमहनजन इति किप्रत्ययः। पथा। आङि भस्य टेर्लोप इति टिलोपः। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। श्चोतंति। श्चुतिर् क्षरणे। छांदसो यलोपः। उक्षता। उक्ष सेचने। लोटि तशब्दस्य ङित्त्वे सति ऋचि तुनुघेत्यादिना सांहितिको दीर्घः॥

तृतीयामृचमाह॥

प्रैषामज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युंजते शुभे।
ते क्रीळयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयंत धूतयः॥३॥

प्र। एषां। अज्मेषु। विथुराऽइव। रेजते। भूमिः। यामेषु। यत्। ह। युंजते। शुभे।
ते। क्रीळयः। धुनयः। भ्राजत्ऽऋष्टयः। स्वयं। महिऽत्वं। पनयंत। धूतयः॥३॥

यद्ध यदा खल्वेते मरुतः शुभे शोभनाय वृष्ट्युदकाय युंजते। मेघान् सज्जीकुर्वंति। तदानीमज्मेषु मेघानामुत्क्षेपकेष्वेषां मरुतां संबंधिषु यामेषु मेघानां नियमनेषु सत्सु भूमिः पृथिवी प्ररेजते। प्रकर्षेण कंपते। यद्वा। यदा खलु मरुतः स्वकीयान्रथान्युंजते। अश्वैर्योजयंति। तदानीमेषां रथानां संबंधिषु पर्वतादेरुत्क्षेपकेषु यामेषु गमनेषु भूमिर्भीत्या कंपते। तत्र दृष्टांतः। विथुरेव। यथा भर्त्रा वियुक्ता जाया राजोपद्रवादिषु सत्सु निरालंबा सती कंपते तद्वत्। ते तादृशाः क्रीळयो विहारशीला धुनयश्चलनस्वभावा भ्राजदृष्टय दीप्यमानायुधा एवंभूता मरुतो धूतयः पर्वतादीन्धुन्वंतः संतो महित्वं स्वकीयं महिमानं स्वयमेव पनयंत। व्यवहरंति। प्रकटयंतीत्यर्थः॥ अज्मेषु। अज गतिक्षेपणयोः। अर्तिस्तुस्वित्यादिना विधीयमानो मन् बहुलवचनादस्मादपि द्रष्टव्यः। वलादावार्ध-

धातुके विकल्प इष्यत इति वचनादजेर्व्यघञपोरिति वीभावाभावः। निघ्नादाद्युदात्तत्वं। रेजते। रेजृ कंपने। भ्यसते रेजत इति भयवेपनयोरिति यास्कः। नि० ३. २१.। यामेषु। यम उपरमे। भावे घञ्। कर्षात्वत इत्यंतोदात्तत्वे प्राप्ते वृषादिषु पाठादाद्युदात्तत्वं। यद्वा या प्रापण इत्यस्मादर्तिस्तुस्वित्यादिना मन्प्रत्ययः। शुभे। शुभ दीप्तौ। संपदादिलक्षणः कर्मणि क्विप्। सावेकाच इति विभक्तेरुदात्तत्वं। पनयंत। पन व्यवहारे। गुपूधूपविच्छीत्यायः। पा० ३. १. २८.। अस्माच्छांदसो लङ्। व्यत्ययेन ह्रस्वत्वं॥

चतुर्थीमृचमाह॥

स हि स्वसृत्पृषदश्वो युवा गणो३या ईशानस्तविषीभिरावृतः।
असि सत्य ऋणयावाऽनेद्योऽस्या धियः प्राविताथा वृषा गणः॥ ४॥

सः। हि। स्वऽसृत्। पृषत्ऽअश्वः। युवा। गणः। अया। ईशानः। तविषीभिः। आऽवृतः।
असि। सत्यः। ऋणऽयावा। अनेद्यः। अस्याः। धियः। प्रऽअविता। अथ। वृषा।
गणः॥ ४॥

स हि स खलु मरुद्गणोऽया अस्य सर्वस्य जगत ईशान ईश्वरशीलो भवति। कीदृशः। स्वसृत्। स्वयमेव सरन्। न ह्यन्यः कश्चिदस्य मरुद्गणस्य प्रेरकोऽस्ति। पृषदश्वः। पृषत्यः श्वेतविंद्वंकिता मृग्योऽश्वस्थानीया यस्य स तथोक्तः। युवा। नित्यतरुणः। तविषीभिरन्येषामसाधारणैर्बलैरावृतः परिवेष्टितः। सत्यः। सत्कर्मार्हः। ऋणयावा। स्तोतॄणामृणस्यापगमयिता। बहुलस्य धनस्य दातेत्यर्थः। अनेद्यः। प्रशस्यनामैतत्। सर्वैरनिंदितः। वृषा। जलानां वर्षिता। एवंभूतो मरुद्गणोऽस्या धियोऽस्मदीयस्यास्य कर्मणोऽथानंतरं प्रावितासि। प्रकर्षेण रक्षिता भवति॥ अया। सुपां सुलुगिति षष्ठ्या याजादेशः। हलि लोपः। पा० ७. २. ११३.। इतीदम इद्रूपस्य लोपः। ईशानः। ईश ऐश्वर्ये इत्यस्मात्ताच्छीलिकश्चानश्। तस्य लसार्वधातुकत्वाभावेन चित्स्वरेणांतोदात्तत्वं। अया ईशान इत्यत्रैषा अक्षादित्वात्प्रकृतिभावः। असि। पुरुषव्यत्ययः। ऋणयावा। या प्रापण इत्यस्मादंतर्भावितण्यर्थादातो मनिन्निति वनिप्। अनेद्यः। णिदि कुत्सायां। ऋहलोर्ण्यदिति ण्यत्। आगमानुशासनस्यानित्यत्वान्नुमभावे लघूपधगुणः। नञ्समासे पूर्वपदप्रकृतिस्वरत्वं॥

पंचमीमृचमाह ॥

पितुः प्रत्नस्य जन्मना वदामसि सोमस्य जिह्वा प्र जिगाति चक्षसा ।
यदीमिंद्रं शम्यृक्वाण आशतादिन्नामानि यज्ञियानि दधिरे ॥ ५ ॥

पितुः । प्रत्नस्य । जन्मना । वदामसि । सोमस्य । जिह्वा । प्र । जिगाति । चक्षसा ।
यत् । ईं । इंद्रं । शमि । ऋक्वाणः । आशत । आत् । इत् । नामानि । यज्ञियानि । दधिरे ॥ ५ ॥

प्रत्नस्य चिरंतनस्य पितुरस्माकं जनकस्य रहूगणस्य सकाशाद्यज्जन्म तेन वयं वदामसि । ब्रूमः । वक्ष्यमाणमस्माकं वृत्तांतं पितोपदिष्टवान् । अतो वयं ब्रूम इत्यर्थः । कोऽसौ वृत्तांत इति चेत् । उच्यते । सोमस्य यज्ञेष्वभिषुतस्य सोमद्रव्यस्य चक्षसा प्रकाशमानयाहुत्या सहिता जिह्वा स्तुतिरूपा वाक् प्रजिगाति । मरुद्गणं प्रकर्षेण गच्छति । यज्ञेषु सोमाहुतिः स्तुतिश्च मरुद्भ्यः क्रियते । यस्मादीमेनमिंद्रं शमि वृत्रवधादिरूपे कर्मणि ऋक्वाणः प्रहर भगवो जहि वीरयस्वेत्येवंरूपया स्तुत्या युक्ताः संत आशत । प्राप्नुवन् । न पर्यत्याक्षुः । आदित् एवमिंद्रप्राप्त्यनंतरमेव यज्ञियानि यज्ञार्हाणीदृङ् चान्यादृङ् चेत्येवमादीनि नामानींद्रसकाशाल्लब्ध्वा दधिरे । धृतवंतः । तस्मादेषां यज्ञे सोमाहुतिः स्तुतिश्च क्रियते ॥ शमि । शमीति कर्मनाम । सप्तम्येकवचने छांदस ईकारलोपः । ऋक्वाणः । ऋच स्तुतौ । संपदादिलक्षणो भावे क्विप् । छंदसीवनिपाविति मत्वर्थीयो वनिप् । अंत्यविकारश्छांदसः । यद्वा । अयस्मयादिषु क्वचिदुभयं भवति । पा॰ १.४.२०.१. इत्युक्तत्वात् स सुष्टुभा स ऋक्कतेत्यादाविव पदत्वात्कुत्वं भत्वाज्जश्त्वाभावः । आशत । लङि बहुलं छंदसीति विकरणस्य लुक् । यज्ञियानि । यज्ञर्त्विग्भ्यां घखञावित्यर्हार्थे घः ॥

षष्ठीमृचमाह ॥

श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः ।
ते वाशीमंत इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः ॥ ६ ॥

श्रियसे । कं । भानुऽभिः । सं । मिमिक्षिरे । ते । रश्मिऽभिः । ते । ऋक्वऽभिः । सुऽखादयः ।
ते । वाशीऽमंतः । इष्मिणः । अभीरवः । विद्रे । प्रियस्य । मारुतस्य । धाम्नः ॥ ६ ॥

ते पूर्वोक्ता मरुतो भानुभिर्भानुशीलैर्दीप्यमानैः सूर्यरश्मिभिः सह कं वृष्ट्युदकं

श्रियसे श्रयितुं प्राणिभिः सेवितुं संमिमिक्षिरे । सम्यक् मेढुमिच्छंति । पृथिवीं वृष्ट्युदकेन सम्यक् सेक्तुमिच्छंति । एवं वृष्टिमुत्पाद्य ते मरुत ऋक्वभिः स्तुतिमद्भिर्ऋत्विग्भिः सह सुखादयः शोभनस्य हविषो भक्षयितारो भवंति । वाशीमंतः । वाशीति वाङ्नाम । शोभनया स्तुतिलक्षणया वाचोपेताः । इष्मिणो गतिमंतः । अभीरवो भयरहितास्ते मरुतः प्रियस्य सर्वाभिमतस्य मारुतस्य मरुत्संबंधिनो धाम्नः स्थानस्य सर्वाभिमतं मरुत्संबद्धं विशिष्टं स्थानं विद्रे । लब्धवंतः ॥ श्रियसे । तुमर्थे सेसेनिति कसेन्प्रत्ययः । मिमिक्षिरे । मिह सेचने । अस्मादिच्छासनंताल्लिट्यमंत्र इति निषेधादामभावः । व्यत्ययेनात्मनेपदं । सुखादयः । खादृ भक्षणे । औणादिक इप्रत्ययः । शोभना खादिर्भक्षणं येषां । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । इष्मिणः । इष गतौ । इषियुधींधीत्यादिना मक् । ततो मत्वर्थीय इनिः । विद्रे । विदॢ लाभे । लिटि द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति द्विर्वचनाभावः । इरयो रे इतीरयो रेभावः ॥

॥ इति प्रथमस्य षष्ठे त्रयोदशो वर्गः ॥

आ विद्युन्मद्भिरिति षडृचं चतुर्थं सूक्तं । अत्रानुक्रम्यते । आ विद्युन्मद्भिराद्यांत्ये प्रस्तारपंक्ती पंचमी विराड्रूपेति । पूर्ववदृषिदेवते । आद्या षष्ठी च द्वे प्रस्तारपंक्ती । आद्यौ पादौ जागतौ तृतीयचतुर्थौ गायत्रौ यस्याः सा प्रस्तारपंक्तिः । सूचितं च । प्रस्तारपंक्तिः पुरत इति । अस्यायमर्थः । जागतौ गायत्रौ चेत्यनुवर्तते । यदि पुरतः पुरस्ताद्द्वौ जागतौ पादौ स्यातामंत्यौ गायत्रौ सा प्रस्तारपंक्तिरिति । एतस्यादित्येषा पंचमी विराड्रूपा । आदितस्त्रयः पादा एकादशका अंत्योऽष्टकः सा विराड्रूपेत्युच्यते ॥ विनियोगो लैंगिकः ॥

तत्र प्रथमामृचमाह ॥

आ विद्युन्मद्भिर्मरुतः स्वर्कै रथेभिर्यात ऋष्टिमद्भिरश्वपर्णैः ।
आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः ॥ १ ॥
आ । विद्युन्मत्ऽभिः । मरुतः । सुऽअर्कैः । रथेभिः । यात । ऋष्टिमत्ऽभिः । अश्वऽपर्णैः ।
आ । वर्षिष्ठया । नः । इषा । वयः । न । पप्तत । सुऽमायाः ॥ १ ॥

हे मरुतः । मितं निर्मितमंतरिक्षं प्राप्य रुवंति शब्दं कुर्वंतीति मरुतः । यद्वा । अमितं भृशं शब्दकारिणः । अथवा मितं स्वैर्निर्मितं मेघं प्राप्य विद्यु-

दात्मना रोचमानाः। अथवा महत्यंतरिक्षे द्रवंतीति मरुतः। ये मध्यमस्थाने देवगणाः समाम्नातास्ते सर्वे मरुत आख्यायंते। तथा चाहुः। सर्वा स्त्री मध्यमस्थाना पुमान् वायुश्च सर्वगः। गणाश्च सर्वे मरुत इति वृद्धानुशासनमिति। पौराणिकास्त्वाचक्षते। मारीचात्कश्यपात्सप्तगणात्मका एकोनपंचाशन्संख्याका मरुतो जज्ञिर इति। एवंभूता हे मरुतो रथेभिरात्मीयै रथैरायात। अस्मदीयं यज्ञमगाच्छत। कीदृशै रथैः। विद्युन्मद्भिः। विद्योतनं विद्युत्। विशिष्टदीप्तियुक्तैः। स्वर्कैः। स्वर्चनैः शोभनगमनयुक्तैः। यद्वा शोभनमर्कोऽर्चनं स्तुतिर्येषामस्ति तादृशैः। अथवा शोभनदीप्तियुक्तैः। ऋष्टिमद्भिः। ऋष्टयः शक्तिरूपाण्यायुधानि। स्थूणा इत्यन्ये। तद्वद्भिः। अश्वपर्णैः। अश्वानां पतनं गमनं येषामस्ति तादृशैः। यद्वा रंहणशीला मेघा रथाः। तैः सहांतरिक्षे वर्षणार्थमागच्छत। कीदृशैः। विद्युन्मद्भिः। विद्युत् तडित्। तद्वद्भिः। स्वर्कैः। शोभनगमनैः। ऋष्टिमद्भिः। अर्षणं गमनं। तत्स्वभावनीरयुक्तैः। अश्वपर्णैः। अश्वं व्याप्तं पर्णं पतनं गमनं येषां। अंतरिक्षं व्याप्य वर्तमानैरित्यर्थः। हे सुमायाः। मायेति कर्मणो ज्ञानस्य च नामधेयं। शोभनकर्माणः शोभनप्रज्ञा वा मरुतः। वर्षिष्ठया प्रवृद्धतरयेषास्मभ्यं दातव्येनान्नेन सह नोऽस्मान्प्रति वयो न पक्षिण इव शीघ्रमापप्तत। आपतत। आगच्छतेत्यर्थः। अत्र निरुक्तं। अथातो मध्यस्थाना देवगणास्तेषां मरुतः प्रथमा गामिनो भवंति। मरुतो मितराविणो वा मितरोचिनो वा महद्रवंतीति वेति। विद्युन्मद्भिर्मरुतः स्वर्कैः स्वंचनैरिति वा स्वर्चनैरिति वा स्वर्चिभिरिति वा रथैरायात ऋष्टिमद्भिरश्वपर्णैरश्वपतनैर्वर्षिष्ठेन च नोऽन्नेन वय इवापतत सुमायाः कल्याणकर्माणो वा कल्याणप्रज्ञा वा। नि० ११. १३.। इति॥ विद्युन्मद्भिः। यवादेराकृतिगणत्वेन विद्युच्छब्दस्य यवाद्यंतर्भावादयवादिभ्य इत्यत्रानुवृत्तेर्मयः। पा० ८. २. १०.। इति मतुपो वत्वं न प्रवर्तते। ऋष्टिमद्भिः। ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं। अश्वपर्णैः। अशू व्याप्तौ। अशिप्रुषीत्यादिना क्वन्प्रत्ययः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। वर्षिष्ठया। वृद्धशब्दादातिशायनिक इष्ठनि प्रियस्थिरेत्यादिना वर्षादेशः। पप्तत। पत्लृ गतौ। लुङि लृदित्त्वात् च्लेरङादेशः। पतः पुम्। पा० ७. ४. १९.। इति पुमागमः॥

द्वितीयामृचमाह ॥

तेंऽरुणेभिर्वरमा पिशंगैः शुभे कं यांति रथतूर्भिरश्वैः ।
रुक्मो न चित्रः स्वधितीवान्पव्या रथस्य जंघनंत भूम ॥ २ ॥
ते । अरुणेभिः । वरं । आ । पिशंगैः । शुभे । कं । यांति । रथतूःऽभिः । अश्वैः ।
रुक्मः । न । चित्रः । स्वधितिऽवान् । पव्या । रथस्य । जंघनंत । भूम ॥ २ ॥

ते पूर्वोक्ता मरुतोऽरुणेभिररुणवर्णैः पिशंगैः पिंगलवर्णैरुभयवर्णोपेतै रथतूर्भी रथस्य प्रेरयितृभिरश्वैर्वरं देवानां वरीतारं कं शब्दयितारं स्तुवंतं यजमानमायांति । आगच्छंति । किमर्थं । शुभे । तस्य शोभां कर्तुं । अथवा शुभ उदकाय । वृष्ट्यर्थमित्यर्थः । तेषां मरुतां गणो रुक्मो न रोचमानं सुवर्णमिव चित्रोऽतिशयेन दर्शनीयः स्वधितीवान् । स्वधितिरिति वज्रनाम । शत्रूणां खंडकेनायुधेनोपेतः । एवंविधगणरूपास्ते मरुतो रथस्य पव्या चक्रधारया भूम भूमिं जंघनंत । अत्यर्थं घ्नंति । स्तोतृरक्षणार्थमागतानां तेषां मरुतां भारमसहमाना भूमिरतिपीडिता बभूवेत्यर्थः ॥ वरं । व्रियंते देवा अनेनेति वरः । ग्रहवृदनिश्चीति करणेऽप् । कं । कै गै शब्दे । कायतीति कः । बहुलवचनात्कप्रत्ययः । रथतूर्भिः । तुर त्वरणे । रथं तुतुरति त्वरायुक्तं कुर्वंतीति रथतुरः । क्विप् चेति क्विप् । भिसि हलि चेति दीर्घत्वं । पव्या । पवी रथनेमिर्भवतीति यास्कः । नि॰ ५.५. । पूङ् पवने । अस्मादच इतीप्रत्ययः । उदात्तयण इति विभक्तेरुदात्तत्वं । जंघनंत । हंतेर्यङंताद्वर्तमाने छांदसो लङ् । छंदस्युभयथेत्यार्धधातुकत्वादतोलोपयलोपौ । भूम । भूमिशब्दादुत्तरस्यामः सुपां सुलुगिति डादेशः । छांदसं ह्रस्वत्वं ॥

तृतीयामृचमाह ॥

श्रिये कं वो अधि तनूषु वाशीर्मेधा वना न कृणवंत ऊर्ध्वा ।
युष्मभ्यं कं मरुतः सुजातास्तुविद्युम्नासो धनयंते अद्रिं ॥ ३ ॥
श्रिये । कं । वः । अधि । तनूषु । वाशीः । मेधा । वना । न । कृणवंते । ऊर्ध्वा ।
युष्मभ्यं । कं । मरुतः । सुऽजाताः । तुविऽद्युम्नासः । धनयंते । अद्रिं ॥ ३ ॥

हे मरुतो वो युष्माकं तनूषु शरीरेष्वंसप्रदेशेषु वाशीः शत्रूणामाक्रोशकमा-

राख्यमायुधं श्रिये कं। ऐश्वर्यार्थं वर्तत इति शेषः। कमित्येतत्पादपूरणं। तदुक्तं। अथापि पादपूरणाः कमीमिद्विति तीति। तादृशा मरुतो वना न। उच्छ्रितान्वृक्षसमूहानिव मेधा मेधान्यज्ञानूर्ध्वा ऊर्ध्वान् एकाहाहीनसत्ररूपेणोच्छ्रितान्कृणवंते। यजमानैः कारयंति। हे सुजाताः शोभनजननयुक्ता मरुतः। युष्मभ्यं युष्मदर्थं कं सुखकरमद्रिं सोमाभिषवे प्रवृत्तं ग्रावाणं तुविद्युम्नासः प्रभूतधना यजमाना धनयंते। धनं कुर्वंति। युष्माकं यागाय ग्रावभिरभिषुण्वंतीत्यर्थः॥ वाशीः। शत्रूणां भयोत्पादनेनाक्रोशशब्दकरणं वाशः। ततश्छंदसीवनिपाविति मत्वर्थीय ईकारः। व्यत्ययेनाद्युदात्तत्वं। मेधा। सुपां सुलुगिति शसो डादेशः। वना। शेश्छंदसि बहुलमिति शेर्लोपः। कृणवंते। कृवि हिंसाकरणयोश्च। लटि व्यत्ययेनात्मनेपदं। धिन्विकृण्व्योरचेत्युप्रत्ययः। पुनरपि व्यत्ययेनांतादेशः। छंदस्युभयथेत्यार्धधातुकत्वेन ङस्याङित्त्वाद्गुणेऽवादेशः। ऊर्ध्वा। पूर्ववड्डादेशः। धनयंते। धनशब्दात्तत्करोतीति णिच्॥

चतुर्थीमृचमाह॥

अहा॑नि॒ गृध्राः॒ पर्या॑ व॒ आगु॑रि॒मां धियं॑ वार्का॒र्यां॑ च दे॒वीं।
ब्रह्म॑ कृ॒ण्वंतो॒ गोत॑मासो अ॒र्कैरू॒र्ध्वं नु॑नुद्र उत्स॒धिं पिब॑ध्यै॥ ४॥
अहा॑नि। गृध्राः॑। परि॑। आ। वः॒। आ। अ॒गुः॒। इ॒मां। धियं॑। वा॒र्का॒र्यां॑। च॒। दे॒वीं।
ब्रह्म॑। कृ॒ण्वंतः॑। गोत॑मासः। अ॒र्कैः। ऊ॒र्ध्वं। नु॒नु॒द्रे॒। उ॒त्स॒ऽधिं। पिब॑ध्यै॥ ४॥

तृषितैर्गोतमैः स्तुता मरुतस्तेभ्यो गोतमेभ्यो देशांतरे वर्तमानं कूपमुत्खायानीय ददुः। एतदृष्ट्वा कश्चिदृषिर्ब्रूते। हे गोतमा गृध्रा जलाभिकांक्षायुक्तान्वो युष्मानहानि शोभनोदकोपेतानि दिनानि पर्यागुः। पर्यागतानि। परित आभिमुख्येन प्राप्तानि। प्राप्य च वार्कार्यां वार्भिरुदकैर्निष्पाद्यां धियं ज्योतिष्टोमादिलक्षणं कर्म च देवीं द्योतमानमकुर्वन्। येष्वहस्सु ब्रह्म हविर्लक्षणमन्नमर्कैर्मंत्रसाध्यैः स्तोत्रैः सह कृण्वंतो मरुद्भ्यः कुर्वंतो गोतमासो गोतमा ऋषय उत्सधिं। उत्सो जलप्रवाहोऽस्मिन्धीयत इत्युत्सधिः कूपः। तं पिबध्यै स्वकीयपानायोर्ध्वं नुनुद्रे। नुनुदिरे। देशांतरे वर्तमानं कूपमुत्खातवंतः। एतदीयस्तोत्रैः स्तुता मरुतः कूपमुत्खातवंत इति यत्तदेव तदीयस्तोत्रकारितमित्येतेषूपचर्यते॥ गृध्राः। गृधु अभिकांक्षायां। सुसूधागृधिभ्यः क्रन्निति क्रन्प्रत्ययः। सुपां सुपो भवंतीति

शसो जस्। नित्त्वादाद्युदात्तत्वं। अगुः। एतेर्लुङीणो गा लुङीति गादेशः। आत इति झेर्जुस्। वार्कार्या। डुकृञ् करणे। ऋहलोर्ण्यत्। वार्भिः कार्या वार्कार्या। चित्तक्रादित्वादुत्तरपदांतोदात्तत्वं। नुनुद्रे। णुद प्रेरणे। इरयो रे इति रे आदेशः। उत्सधिं। कर्मण्यधिकरणे चेति दधातेरधिकरणे किप्रत्ययः। पिबध्यै। पा पाने। तुमर्थे सेसेनिति शध्यैन्प्रत्ययः। पाघ्रेत्यादिना पिबादेशः॥

पंचमीमृचमाह ॥

एतत्त्यन्न योजनमचेति सस्वर्ह यन्मरुतो गोतमो वः।
पश्यन्हिरण्यचक्रानयोदंष्ट्रान्विधावतो वराहून् ॥ ५ ॥

एतत्। त्यत्। न। योजनं। अचेति। सस्वः। ह। यत्। मरुतः। गोतमः। वः।
पश्यन्। हिरण्यऽचक्रान्। अयःऽदंष्ट्रान्। विऽधावतः। वराहून् ॥ ५ ॥

हे मरुतः। एतद्योजनं। युज्यतेऽनेन देवतेति योजनमेतत्सूक्तसाध्यं स्तोत्रं। त्यन्न त्यत् प्रसिद्धमन्यदुत्कृष्टं स्तोत्रमिवाचेति। सर्वैर्ज्ञायते। वो युष्मदर्थं यत् यदेतत्सूक्तरूपं स्तोत्रं गोतम ऋषिः सस्वर्ह। उच्चारितवान् खलु। किं कुर्वन्। हिरण्यचक्रान् हिरण्मयचक्ररथारूढान् हितरमणीयकर्मयुक्तान्वायोदंष्ट्रान्। दशतीति दंष्ट्रा चक्रधारा। अयोमयीभिश्चक्रधाराभिर्युक्तान्। यद्वा दंशनसाधना ऋष्टयो दंष्ट्राः। अयोमया ऋष्टयो येषां। तान्विधावतो विविधमितस्ततः प्रवर्तमानान्वराहून् वरस्योत्कृष्टस्य शत्रोर्हर्तॄन्। यद्वा। उत्कृष्टस्य वृष्ट्युदकस्याहर्तॄन्। अथवा। उत्कृष्टानां देवतानामाह्वातॄन् वरस्य हविषो भक्षयितॄन्वा। एवंभूतान्मरुतः पश्यन् सम्यक् जानन् गोतमो यत्स्तोत्रं कृतवान् तदेतत्सर्वोत्कृष्टं सदस्माभिः सर्वैरुपलभ्यत इत्यर्थः। अत्र निरुक्तं। अथाप्येते माध्यमिका देवगणा वराहव उच्यंते। पश्यन्हिरण्यचक्रान्। नि० ५. ४.। इति ॥ अचेति। चिती संज्ञाने। छांदसो वर्तमाने कर्मणि लुङ्। सस्वः। स्वृ शब्दोपतापयोः। लङि तिपि बहुलं छंदसीति शपः श्लुः। गुणे हल्ङ्याब्भ्य इति तलोपः। धातुस्वरेणांतोदात्तत्वं। वराहून्। वरशब्दोपपदादाङ्पूर्वाद्धंतेर्वा हरतेर्वा ह्वयतेर्वा जुहोतेरदनार्थाद्वा। हु इत्येतस्य निष्पत्तिरिति स्कंदस्वामी। अस्य पृषोदरादित्वादभिमतसिद्धिः॥

षष्ठीमृचमाह ॥

एषा स्या वो मरुतोऽनुभर्त्री प्रति ष्टोभति वाघतो न वाणी ।
अस्तोभयद्वृथासामनु स्वधां गभस्त्योः ॥ ६ ॥

एषा । स्या । वः । मरुतः । अनुऽभर्त्री । प्रति । स्तोभति । वाघतः । न । वाणी ।
अस्तोभयत् । वृथा । आसां । अनु । स्वधां । गभस्त्योः ॥ ६ ॥

हे मरुतः स्या सैषास्मदीया स्तुतिर्वो युष्माकमनुभर्त्री युष्माननुहरंती युष्मद्गुणसदृशी प्रतिष्टोभति । प्रत्येकं स्तौति । स्तोभतिः स्तुतिकर्मा । तथा वाघतो न वाणी । नशब्दः संप्रत्यर्थे । तदुक्तं यास्केन । अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोगः । नि० ७. ३१. । इति । इदानीमृत्विक्संबंधिनी वागपि वृथानायासेनासामाभिर्ऋग्भिरस्तोभयत् । अस्तौत् । इदानीमित्युक्ते कदेत्याह । गभस्त्योरस्मदीययोर्बाह्वोः स्वधां । अन्ननामैतत् । यदा बहुविधमन्नं मरुतः स्थापयंति । तामनुलक्ष्येत्यर्थः ॥ अनुभर्त्री । हृञ् हरणे । तृच् । ऋन्नेभ्य इति ङीप् । उदात्तयणो हल्पूर्वादिति नद्या उदात्तत्वं ॥

॥ इति प्रथमस्य षष्ठे चतुर्दशो वर्गः ॥

आ नो भद्रा इति दशर्चं पंचमं सूक्तं । गोतमस्यार्षं वैश्वदेवं । आदितः पंचर्चः सप्तमी च जगत्यः षष्ठी स्वस्ति न इंद्रेत्येषा विराट्स्थाना । नवकौ वैराजस्त्रैष्टुभश्चेत्युक्तलक्षणयोगात् । अष्टम्याद्यास्तिस्रस्त्रिष्टुभः । तथा चानुक्रांतं । आ नो दश वैश्वदेवं तु पंचाद्याः सप्तमी च जगत्यः षष्ठी विराट्स्थानेति ॥ अग्निष्टोमे वैश्वदेवशस्त्र उत्तमावर्जमेतत्सूक्तं वैश्वदेवनिविद्धानीयं । सा तु प्रकृतौ विकृतौ च वैश्वदेवशस्त्रस्य परिधानीया । तथा च सूचितं । आ नो भद्राः क्रतवो यंतु विश्वत इति नव वैश्वदेवं । आ० ५. १८. । इति ॥ अदितिर्द्यौरदितिरंतरिक्षमिति परिदध्यात्सर्वत्र वैश्वदेवे । आ० ५. १८. । इति च । ब्राह्मणं च भवति । सदैव पंचजनीयया परिदध्यादिति ॥ महाव्रते निष्केवल्य एतत्सूक्तं । तथा च पंचमारण्यके सूत्र्यते । आनोभद्रीयं च तस्य स्थान इति ॥

तत्र प्रथमामृचमाह ॥

आ नो भद्राः क्रतवो यंतु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ॥ १ ॥

आ। नः। भद्राः। क्रतवः। यंतु। विश्वतः। अदब्धासः। अपरिऽइतासः। उत्ऽभिदः।
देवाः। नः। यथा। सदं। इत्। वृधे। असन्। अप्रऽआयुवः। रक्षितारः। दिवेऽदिवे ॥ १ ॥

नोऽस्मान् क्रतवोऽग्निष्टोमादयो महायज्ञा विश्वतः सर्वस्मादपि दिग्भागादायंतु । आगच्छंतु । कीदृशाः क्रतवः । भद्राः । समीचीनफलसाधनत्वेन कल्याणा भजनीया वा । अदब्धासः । असुरैरहिंसिताः । अपरीतासः । शत्रुभिरपरिगताः । अप्रतिरुद्धा इत्यर्थः । उद्भिदः । शत्रूणामुद्भेत्तारः । ईदृशाः क्रतवोऽस्मांस्तथागच्छंतु । अप्रायुवोऽप्रगच्छंतः स्वकीयं रक्षितव्यमपरित्यजंतः । अत एव दिवे दिवे प्रतिदिवसं रक्षितारो रक्षां कुर्वंतः । एवंगुणविशिष्टाः सर्वे देवा नोऽस्माकं सदमित् सदैव वृधे वर्धनायासन् । भवंतु ॥ अदब्धासः । दंभु दंभे । दंभो हिंसा । निष्ठायां यस्य विभाषेतीट्प्रतिषेधः । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं । अपरीतासः । इण् गतौ । पूर्ववत्कर्मणि निष्ठा । उभयत्राज्जसेरसुक् । वृधे । वृधु वृद्धौ । संपदादिलक्षणो भावे क्विप् । सावेकाच इति विभक्तेरुदात्तत्वं । असन् । अस भुवि । लेट्यडागमः । बहुलं छंदसीति शपो लुगभावः । तस्याङित्त्वात् श्नसोरल्लोप इत्यकारलोपाभावः । अप्रायुवः । इण् गतौ । अस्मात्प्रपूर्वाच्छंदसीण इत्युण्प्रत्ययः । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं । जसि जसादिषु छंदसि वावचनमिति गुणस्य विकल्पितत्वादभावे तन्वादित्वादुवङ् ॥

द्वितीयामृचमाह ॥

देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो नि वर्तताम् ।
देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्र तिरंतु जीवसे ॥ २ ॥

देवानां। भद्रा। सुऽमतिः। ऋजुऽयतां। देवानां। रातिः। अभि। नः। नि। वर्ततां।
देवानां। सख्यं। उप। सेदिम। वयं। देवाः। नः। आयुः। प्र। तिरंतु। जीवसे ॥ २ ॥

भद्रा सुखयित्री भजनीया वा देवानां सुमतिः शोभना मतिरनुग्रहात्मिका बुद्धिरस्माकमस्त्विति शेषः। कीदृशानां। ऋजूयतां। ऋजुमार्जवयुक्तं सम्यगनुष्ठातारं यजमानमात्मन इच्छतां। तथा देवानां रातिर्दानं नोऽस्मानाभिमुख्येन नितरां वर्ततां। तदभिमतफलप्रदानमप्यस्माकं भवत्वित्यर्थः। वयं च तेषां देवानां सख्यं सखित्वं सख्युः कर्म वोपसेदिम। प्राप्नुवाम। तादृशा देवा नोऽस्माकमायुर्जीवसे जीवितुं प्रतिरंतु। वर्धयंतु॥ भद्रा। भदि कल्याणे सुखे च। ऋज्रेंद्राग्रेत्यादौ रक्प्रत्ययांतो निपातितः। ऋजूयतां। ऋजुमात्मन इच्छति ऋजूयति। सुप आत्मनः क्यच्। तदंताल्लटः शतृ। शतुरनुम इत्यजादिविभक्तेरुदात्तत्वं। रातिः। रा दाने। मंत्रे वृषेति क्तिन उदात्तत्वं। सख्यं। सख्युर्य इति भावे कर्मणि वा यप्रत्ययः। सेदिमा। षद्लृ विशरणगत्यवसादनेषु। छंदसि लुङ्लङ्लिट इति वर्तमाने प्रार्थनायां लिट्। सत्वस्यानैमित्तिकत्वेन लिटि परत आदेशादित्वाभावादत एकहल्मध्य इत्येत्वाभ्यासलोपौ। अन्येषामपि दृश्यत इति संहितायां दीर्घत्वं। प्रतिरंतु। प्रपूर्वस्तिरतिर्वर्धनार्थः। तथा च यास्को व्याचख्यौ। देवानां सख्यमुपसीदेम वयं देवा न आयुः प्रवर्धयंतु चिरं जीवनाय। नि० १२. ३९.। इति॥

तृतीयामृचमाह॥

तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधं।
अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत्॥ ३॥
तान्। पूर्वया। निऽविदा। हूमहे। वयं। भगं। मित्रं। अदितिं। दक्षं। अस्रिधं।
अर्यमणं। वरुणं। सोमं। अश्विना। सरस्वती। नः। सुऽभगा। मयः। करत्॥ ३॥

तान्विश्वान्देवान्पूर्वया पूर्वकालीनया नित्यया निविदा वेदात्मिकया वाचा। निविदिति वाङ्नाम। यद्वा निविदा विश्वे देवाः सोमस्य मत्सन्नित्यादिकया वैश्वदेव्या निविदा वयं हूमहे। आह्वयामः। देवानिति यत्सामान्येनोक्तं तदेव विव्रियते। भगं भजनीयं द्वादशानामादित्यानामन्यतमं। मित्रं प्रमीतेस्त्रायकं। अहरभिमानिनं देवं। मैत्रं वा अहरिति श्रुतेः। अदितिमखंडनीयामदीनां वा देवमातरं। दक्षं सर्वस्य जगतो निर्माणे समर्थं प्रजापतिं। यद्वा प्राणरूपेण सर्वेषु प्राणिषु व्याप्य वर्तमानं हिरण्यगर्भं। प्राणो वै दक्ष इति श्रुतेः। अस्रिधं शोषणरहितं। सर्वदैकरूपेण वर्तमानं मरुद्गणं। अर्यमणं। अरीन् मंदेहादीन-

सुरान्यच्छति नियच्छतीत्यर्यमा सूर्यः। असौ वा आदित्योऽर्यमेति श्रुतेः। तं। वरुणं। वृणोति पापकृतः स्वकीयैः पाशैरावृणोतीति राज्यभिमानिदेवो वरुणः। श्रूयते च। वारुणी रात्रिरिति। सोमं। द्वेधात्मानं विभज्य पृथिव्यां लतारूपेण दिवि च चंद्रात्मना देवतारूपेण वर्तमानं। अश्विना। अश्ववंतौ। यद्वा सर्वं व्याप्नुवंतौ। तथा च यास्कः। अश्विनौ यद्व्यश्नुवाते सर्वं रसेनान्यो ज्योतिषान्योऽश्वैरश्विनावित्यौर्णवाभस्तत्कावश्विनौ द्यावापृथिव्यावित्येकेऽहोरात्रावित्येके सूर्याचंद्रमसावित्येके राजानौ पुण्यकृतावित्यैतिहासिकाः। नि० १२. १.। इति। एवंभूतान् सर्वान्देवानस्मद्रक्षणार्थमाह्वयाम इति पूर्वत्र संबंधः। अस्माभिराहूता सुभगा शोभनधनोपेता सरस्वती नोऽस्मभ्यं मयः सुखं करत्। करोतु॥ हूमहे। ह्वेञो लटि ह्व इत्यनुवृत्तौ बहुलं छंदसीति संप्रसारणं। परपूर्वत्वे हल इति दीर्घत्वं। बहुलं छंदसीति शपो लुक्। अस्रिधं। स्रिधु शोषणे। संपदादिलक्षणो भावे क्विप्। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। मयस्करत्। करोतेर्लेट्यडागमः। बहुलं छंदसीति विकरणस्य लुक्। अतः कृकमीति विसर्जनीयस्य सत्वं॥

चतुर्थीमृचमाह॥

तन्नो॒ वातो॑ मयो॒भु वा॑तु भेष॒जं तन्मा॒ता पृ॑थि॒वी तत्पि॒ता द्यौः।

तद्ग्रावा॑णः सोम॒सुतो॑ मयो॒भुव॒स्तद॑श्विना शृणुतं धिष्ण्या यु॒वं॥४॥

तत्। नः॒। वातः॑। म॒यः॒ऽभु। वा॒तु॒। भे॒ष॒जं। तत्। मा॒ता। पृ॒थि॒वी। तत्। पि॒ता। द्यौः।

तत्। ग्रावा॑णः। सो॒म॒ऽसुतः॑। म॒यः॒ऽभुवः॑। तत्। अ॒श्वि॒ना॒। शृ॒णु॒त॒म्। धि॒ष्ण्या॒। यु॒वं॥४॥

वातो वायुस्तद्भेषजमौषधं नोऽस्मान्वातु। प्रापयतु। यद्भेषजं मयोभु मयसः सुखस्य भावयितृ। माता सर्वेषां जननी पृथिवी भूमिरपि तद्भेषजमस्मान्प्रापयतु। पिता वृष्टिप्रदानेन सर्वेषां रक्षिता द्यौर्द्युलोकोऽपि तद्भेषजमस्मान्प्रापयतु। सोमसुतः सोमाभिषवं कृतवंतो मयोभुवो मयसो यागफलभूतस्य सुखस्य भावयितारो ग्रावाणोऽभिषवसाधनाः पाषाणाश्च तद्भेषजमस्मान्प्रापयंतु। हे धिष्ण्या। धिषणा बुद्धिः। तदर्हावश्विनौ युवं युवां तद्भेषजं शृणुतं। आकर्णयतं। यद्भेषजमस्माभिर्वाय्वादिषु प्रार्थ्यते। तद्भेषजं देवानां भिषजौ युवामस्माकमनुकूलं यथा भवति तथा जानीतमित्यर्थः॥ मयोभु। ह्रस्वो नपुंसके प्रातिपदिकस्य। पा० १. २. ४७.। इति ह्रस्वत्वं। वातु। वा गतिगंधनयोः। अंतर्भावि-

तद्यथार्थात्प्रार्थनायां लोट् । सोमसुतः । सोमे सुञः । पा० ३. २. ९०. । इति भूते क्विप् । धिष्ण्या । धिषणाशब्दादर्हार्थे छंदसि चेति यः । वर्णलोपश्छांदसः । सुपां सुलुगित्याकारः ॥

पंचमीमृचमाह ॥

तमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयं ।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ५ ॥
तं । ईशानं । जगतः । तस्थुषः । पतिं । धियंऽजिन्वं । अवसे । हूमहे । वयं ।
पूषा । नः । यथा । वेदसां । असत् । वृधे । रक्षिता । पायुः । अदब्धः । स्वस्तये ॥ ५ ॥

पूर्वाह्णेनेंद्रः स्तूयते । अपराह्णेन पूषा । ईशानमैश्वर्यवंतं । अत एव जगतो जंगमस्य प्राणिजातस्य तस्थुषः स्थावरस्य च पतिं स्वामिनं धियंजिन्वं धीभिः कर्मभिः प्रीणयितव्यं । एवंभूतं तमिंद्रमवसे रक्षणाय वयं हूमहे । आह्वयामः । पूषा नोऽस्माकं वेदसां धनानां वृधे वर्धनाय रक्षिता यथासत् । येन प्रकारेण भवति । तेनैव प्रकारेणादब्धः केनाप्यहिंसितः पूषा स्वस्तयेऽस्माकमविनाशाय पायुः रक्षिता भवतु ॥ तस्थुषः । तिष्ठतेर्लिटः क्वसुः । षष्ठ्येकवचने वसोः संप्रसारणमिति संप्रसारणं । शासिवसिघसीनां चेति षत्वं । षष्ठ्याः पतिपुत्रेति विसर्जनीयस्य सत्वं । धियंजिन्वं । जिविः प्रीणनार्थः । कृत्यल्युटो बहुलमिति बहुलवचनात्खच् । इच एकाचोऽम् प्रत्ययवच्च । पा० ६. ३. ६८. । इत्यमागमः । असत् । अस् भुवि । लेट्यडागमः । बहुलं छंदसीति शपो लुगभावः । पायुः । पा रक्षणे । कृवापाजीत्युण् । स्वस्तये । सुपूर्वादस्तेर्भावे क्तिन् । छंदस्युभयथेति तस्य सार्वधातुकत्वादस्तेर्भूः । पा० २. ४. ५२. । इति भूभावाभाव इति वृत्तावुक्तं ॥

॥ इति प्रथमस्य षष्ठे पंचदशो वर्गः ॥

षष्ठीमृचमाह ॥

स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ ६ ॥
स्वस्ति । नः । इंद्रः । वृद्धऽश्रवाः । स्वस्ति । नः । पूषा । विश्वऽवेदाः ।
स्वस्ति । नः । तार्क्ष्यः । अरिष्टऽनेमिः । स्वस्ति । नः । बृहस्पतिः । दधातु ॥ ६ ॥

वृद्धश्रवाः। वृद्धं प्रभूतं श्रवणं स्तोत्रं हविर्लक्षणमन्नं वा यस्य तादृश इंद्रो नोऽस्माकं। स्वस्तीत्यविनाशनाम। स्वस्त्यविनाशं दधातु। विदधातु करोतु। विश्ववेदाः। विश्वानि वेत्तीति विश्ववेदाः। यद्वा विश्वानि सर्वाणि वेदांसि ज्ञानानि धनानि वा यस्य तादृशः पूषा पोषको देवो नोऽस्माकं स्वस्ति विदधातु। अरिष्टनेमिः। नेमिरित्यायुधनाम। अरिष्टोऽहिंसितो नेमिर्यस्य। यद्वा। रथचक्रस्य धारा नेमिः। यत्संबंधिनो रथस्य नेमिर्न हिंस्यते सोऽरिष्टनेमिः। एवंभूतस्तार्क्ष्यः। तृक्षस्य पुत्रो गरुत्मान् नोऽस्माकं स्वस्त्यविनाशं विदधातु। तथा बृहस्पतिर्बृहतां देवानां पालयिता नोऽस्माकं स्वस्त्यविनाशं विदधातु॥ वृद्धश्रवाः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। विश्ववेदाः। विद ज्ञाने। विदॢ लाभे। आभ्यामसुन्प्रत्ययांतो वेदसशब्दः। बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं। तार्क्ष्यः। तृक्षस्यापत्यं। गर्गादिभ्यो यञ्। पा० ४.१.१०५.। ञित्वादाद्युदात्तत्वं। अरिष्टनेमिः। न रिष्टोऽरिष्टः। अव्ययपूर्वपदप्रकृतिस्वरत्वं। अरिष्टा नेमिर्यस्य स तथोक्तः। बृहस्पतिः। तद्बृहतोः करपत्योरिति सुट्तलोपौ। उभे वनस्पत्यादिष्विति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं॥

सप्तमीमृचमाह॥

पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह॥ ७॥

पृषत्ऽअश्वाः। मरुतः। पृश्निऽमातरः। शुभंऽयावानः। विदथेषु। जग्मयः।
अग्निऽजिह्वाः। मनवः। सूरऽचक्षसः। विश्वे। नः। देवाः। अवसा। आ।
गमन्। इह॥ ७॥

पृषदश्वाः। पृषद्भिः श्वेतविंदुभिर्युक्ता अश्वा येषां ते तथोक्ताः। पृश्निमातरः। पृश्निर्नानावर्णा गौर्माता येषां। शुभंयावानः। शुभं शोभनं यांति गच्छंतीति शुभंयावानः। शोभनगतय इत्यर्थः। विदथेषु यज्ञेषु जग्मयो गंतारः। अग्निजिह्वाः। अग्नेर्जिह्वायां वर्तमानाः। सर्वे हि देवा हविःस्वीकरणायाग्नेर्जिह्वायां वर्तंते। तात्स्थ्यात्ताच्छब्द्यं। मनवः सर्वस्य मंतारः। सूरचक्षसः। सूर्यप्रकाश इव चक्षः प्रकाशो येषां त एवंभूता मरुतो मरुत्संज्ञका विश्वे देवा सर्वे देवा नोऽस्मानिहास्मिन्काले ऽवसा रक्षणेन सहागमन्। आगच्छंतु॥ शुभंयावानः। या

प्रापणे। आतो मनिन्निति वनिप्। तत्पुरुषे कृति बहुलमिति बहुलवचनाद्द्वितीयाया अप्यलुक्। गमन्। गमेः प्रार्थनायां लेट्यडागमः। इतश्च लोप इतीकारलोपः। बहुलं छंदसीति शपो लुक्।

अस्ति सौम्यचरुस्तृतीयसवने। तेन चरुणा देवता इष्ट्वा शेषे तस्मिन्बहु घृतमवनीय तस्मिन्वषट्कर्त्रा स्वकीया छाया द्रष्टव्या। सा यदि न दृश्येत तदानीं भद्रमित्येका पठितव्या। त्वं सोमेति खंडे तथैव सूत्र्यते। राज्ञा सोमेन तद्वयमस्मासु धारयामसि भद्रं कर्णेभिः शृणुयाम देवा इति च। आ० ५. १९.। इति॥ महानाम्नीव्रतेऽप्येषा भूमिस्पर्शने जप्या। सूचितं चैतद्विदमिति खंडे। भद्रं कर्णेभिः शृणुयाम देवाः शं न इंद्राग्नी भवतामवोभिः। आ० ८. १४.। इति॥

तामेतां सूक्तेऽष्टमीमृचमाह॥

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः॥ ८॥

भद्रं। कर्णेभिः। शृणुयाम। देवाः। भद्रं। पश्येम। अक्षऽभिः। यजत्राः।
स्थिरैः। अंगैः। तुस्तुऽवांसः। तनूभिः। वि। अशेम। देवऽहितं। यत्। आयुः॥ ८॥

हे देवा दानगुणयुक्ताः सर्वे देवाः कर्णेभिरस्मदीयैः श्रोत्रैर्भद्रं भजनीयं कल्याणं वचनं शृणुयाम। युष्मत्प्रसादाच्छ्रोतुं समर्थाः स्याम। अस्माकं बाधिर्यं कदाचिदपि मा भूत्। हे यजत्रा यागेषु चरुपुरोडाशादिभिर्यष्टव्या देवा अक्षभिरक्षिभिरात्मीयैश्चक्षुर्भिर्भद्रं शोभनं पश्येम। द्रष्टुं समर्थाः स्याम। अस्माकं दृष्टिप्रतिघातोऽपि मा भूत्। स्थिरैर्दृढैरंगैर्हस्तपादादिभिरवयवैस्तनूभिः शरीरैश्च युक्ता वयं तुष्टुवांसो युष्मान् स्तुवंतो यदायुः षोडशाधिकशतप्रमाणं विंशत्यधिकशतप्रमाणं वा देवहितं देवेन प्रजापतिना स्थापितं तद्व्यशेम। प्राप्नुयाम॥ कर्णेभिः। बहुलं छंदसीति भिस ऐसभावः। अक्षभिः। छंदस्यपि दृश्यत इत्यनङ् स चोदात्तः। यजत्राः। अमिनक्षीत्यादिना यजेरत्रन्प्रत्ययः। तुष्टुवांसः। ष्टुञ् स्तुतौ। लिटः क्वसुः। शर्पूर्वाः खय इति तकारः शिष्यते। अशेम। अशू व्याप्तौ। लिङ्याशिष्यङ्। यदि तु तत्र परिगणनमन्यव्यावृत्त्यर्थं तदानीं लिङि व्यत्ययेन शप्। देवहितं। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं॥

नवमीमृचमाह ॥

शतमिन्नु शरदो अंति देवा यत्रा नश्चक्रा जरसं तनूनां ।

पुत्रासो यत्र पितरो भवंति मा नो मध्या रीरिषतायुर्गंतोः ॥ ९ ॥

शतं । इत् । नु । शरदः । अंति । देवाः । यत्र । नः । चक्र । जरसं । तनूनां ।

पुत्रासः । यत्र । पितरः । भवंति । मा । नः । मध्या । रिरिषत । आयुः । गंतोः ॥ ९ ॥

हे देवाः । अंत्यंतिके मनुष्याणां समीप आयुष्ट्वेन भवद्भिः कल्पिताः शरदः संवत्सराः शतमिन्नु शतं खलु । यस्मात्सृष्टिकाले मनुष्याणां शतं संवत्सरा आयुरिति युष्माभिः परिकल्पितं तस्मान्नोऽस्माकमायुर्गंतोः कृत्स्नस्यायुषो गमनात्पूर्वं मध्या मध्ये मा रीरिषत । मा हिंसिष्ट । कीदृशान् । नोऽस्माकं तनूनां शरीराणां जरसं जरां यत्र यस्यामवस्थायां चक्र कृतवंतो यूयं । यत्र च पुत्रासः पुत्राः पितरोऽस्माकं रक्षितारो भवंति । ईदृग्दशापन्नानित्यर्थः ॥ अंति । अंतिकशब्दस्य कादिलोपे बहुलमिति वक्तव्यमिति कलोपः । यत्रा । ऋचि तुनुघमक्षुतङ्कुत्रेति संहितायां दीर्घः । चक्रा । लिटि मध्यमबहुवचनस्य कित्त्वाद्गुणाभावे यणादेशः । द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं । जरसं । जराया जरसन्यतरस्यां । पा० ७. २. १०१. । इति जरसादेशः । मध्या । सुपां सुलुगिति सप्तम्या डादेशः । रीरिषत । रिष रुष हिंसायां । अस्माण्ण्यंतात् माङि लुङि मध्यमबहुवचने च्लेश्चङि णिलोपोपधाह्रस्वद्विर्वचनहलादिशेषसन्वद्भावेत्वदीर्घाः । छांदसः पदकालीनो ह्रस्वः । गंतोः । भावलक्षणे स्थेण् । पा० ३. ४. १६. । इति गमेस्तोसुन्प्रत्ययः ॥

अदितिर्द्यौरदितिरित्येषादितिदेवताके पशौ हविषो याज्या । सूत्रितं च । अदितिर्द्यौरदितिरंतरिक्षं न ते विष्णो जायमानो न जातः । आ० ३. ८. । इति ॥

तामेतां सूक्ते दशमीमृचमाह ॥

अदितिर्द्यौरदितिरंतरिक्षमदितिर्माता स पिता स पुत्रः ।

विश्वे देवा अदितिः पंच जना अदितिर्जातमदितिर्जनित्वं ॥ १० ॥

अदितिः । द्यौः । अदितिः । अंतरिक्षं । अदितिः । माता । सः । पिता । सः । पुत्रः ।

विश्वे । देवाः । अदितिः । पंच । जनाः । अदितिः । जातं । अदितिः । जनिऽत्वं ॥ १० ॥

अदितिरदीनाखंडनीया वा पृथिवी देवमाता वा सैव द्यौर्द्योतनशीलो नाकः। ततश्च सैवांतरिक्षमंतरा द्यावापृथिव्योर्मध्य ईक्ष्यमाणं व्योम। सैव माता निर्मात्री जगतो जननी। सैव पितोत्पादकः। ततश्च स पुत्रः। मातापित्रोर्जातः पुत्रोऽपि सैव। विश्वे देवाः सर्वेऽपि देवा अदितिरेव। पंच जना निषादपंचमाश्चत्वारो वर्णाः। यद्वा गंधर्वाः पितरो देवा असुरा रक्षांसि। तदुक्तं यास्केन। गंधर्वाः पितरो देवा असुरा रक्षांसीत्येके चत्वारो वर्णा निषादः पंचम इत्यौपमन्यवः। नि० ३. ७.। इति। ब्राह्मणे त्वेवमाम्नातं। सर्वेषां वा एतत्पंचजनानामुक्थं देवमनुष्याणां गंधर्वाप्सरसां सर्पाणां च पितृणां चेति। तत्र गंधर्वाप्सरसामैक्यात्पंचजनत्वं। एवंविधाः पंच जना अप्यदितिरेव। जातं जननं प्रजानामुत्पत्तिः। साप्यदितिरेव। जनित्वं जन्माधिकरणं तदप्यदितिरेव। एवं सकलजगदात्मनादितिः स्तूयते। उक्तं च यास्केन। इत्यदितेर्विभूतिमाचष्टे। नि० ४. २३.। इति॥ अदितिः। दो अवखंडने। अस्मात्कर्मणि क्तिनि द्यतिस्यतिमास्थामि ति कितीतीत्वं। यास्कपक्षे तु दीङ् क्षय इत्यस्मात् क्तिनि व्यत्ययेन ह्रस्वत्वं। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं। स पिता। निर्दिश्यमानप्रतिनिर्दिश्यमानयोरेकतामापादयंति सर्वनामानि पर्यायेण तल्लिंगतामुपददत इत्युद्देश्यलिंगतया पुंलिंगत्वं। जनित्वं। जनेरौणादिकस्त्वन्प्रत्ययः॥

॥ इति प्रथमस्य षष्ठे षोडशो वर्गः॥

ऋजुनीतीति नवर्चं षष्ठं सूक्तं गोतमस्यार्षं। अत्रानुक्रम्यते। ऋजुनीती नव गायत्रमंत्यानुष्टुबिति। पूर्वत्र वैश्वदेवं त्वित्युक्तत्वात्तुह्यादिपरिभाषयेदमपि सूक्तं बहुदेवताकं। सूक्तविनियोगो लैंगिकः। चातुर्विंशकेऽहनि प्रातःसवने मैत्रावरुणस्य ऋजुनीती न इत्येषारंभणीया। चतुर्विंश इति खंडे सूत्रितं। ऋजुनीती नो वरुण इंद्रं वो विश्वतस्परि। आ० ७. २.। इति॥ अहर्गणेषु द्वितीयादिष्वहःस्वप्येषारंभणीया शंसनीया। सूत्रितं च। आरंभणीयाः पर्यासान्कद्वतोऽहरहः शस्यानीति होत्रका द्वितीयादिष्वेव। आ० ७. १.। इति॥

तामेतां सूक्ते प्रथमामृचमाह॥

ऋजुनीती नो वरुणो मित्रो नयतु विद्वान्। अर्यमा देवैः सजोषाः॥ १॥

ऋजुऽनीती। नः। वरुणः। मित्रः। नयतु। विद्वान्। अर्यमा। देवैः। सऽजोषाः॥ १॥

अहरभिमानी देवो मित्रो वरुणो राज्यभिमानी । मित्रश्च वरुणश्च विद्वान् नेतव्यमुत्तमं स्थानं जानन् नोऽस्मान् ऋजुनीती ऋजुनीत्या ऋजुनयनेन कौटिल्यरहितेन गमनेन नयतु । अभिमतं फलं प्रापयतु । तथा देवैरन्यैरिंद्रादिभिः सजोषाः समानप्रीतिरर्यमाहोरात्रविभागस्य कर्ता सूर्यश्चास्मानृजुगमनेनाभिमतं स्थानं प्रापयतु ॥ ऋजुनीती । सुपां सुलुगिति तृतीयायाः पूर्वसवर्णदीर्घत्वं ॥

द्वितीयामृचमाह ॥

ते हि वस्वो वसवानास्ते अप्रमूरा महोभिः । व्रता रक्षंते विश्वाहा ॥ २ ॥

ते । हि । वस्वः । वसवानाः । ते । अप्रऽमूराः । महःऽभिः । व्रता । रक्षंते । विश्वाहा ॥ २ ॥

ते हि पूर्वोक्ता मित्रादयो वस्वो वसुनो धनस्य वसवाना वासका आच्छादयितारः । सर्वं जगद्धनेनाच्छादयंतीत्यर्थः । अतस्ते मित्रादयोऽप्रमूरा अप्रमूर्च्छिता अमूढाः प्राज्ञाः संतो महोभिरात्मीयैस्तेजोभिर्विश्वाहा सर्वाण्यहानि । अत्यंतसंयोगाद्द्वितीया । सर्वेष्वप्यहस्सु व्रतानि जगन्निर्वाहरूपाणि स्वकीयानि कर्माणि रक्षंते । पालयंति ॥ वस्वः । आगमानुशासनस्यानित्यत्वान्नुमभावे जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणस्य विकल्पनादभावे यणादेशः । वसवानाः । वस आच्छादने । अस्मादंतर्भावितण्यर्थाल्लटः शानच् । बहुलं छंदसीति शपो लुगभावः । वर्णव्यापत्त्या मकारस्य वकारः । अप्रमूराः । मुर्छा मोहसमुच्छ्राययोः । अस्मात्संपदादिलक्षणो भावे क्विप् । राल्लोप इति छकारलोपः । प्रकृष्टा मूः प्रमूः । ततो मत्वर्थीयो रः । रो रीति रेफलोपः । न प्रमूरा अप्रमूराः । अव्ययपूर्वपदप्रकृतिस्वरत्वं । रक्षंते । रक्ष पालने । व्यत्ययेन तङ् ॥

तृतीयामृचमाह ॥

ते अस्मभ्यं शर्म यंसन्नमृता मर्त्येभ्यः । बाधमाना अप द्विषः ॥ ३ ॥

ते । अस्मभ्यं । शर्म । यंसन् । अमृताः । मर्त्येभ्यः । बाधमानाः । अप । द्विषः ॥ ३ ॥

अमृता अमरणधर्माणस्ते विश्वे देवा मर्त्येभ्यो मरणधर्मभ्योऽस्मभ्यमनुष्ठातृभ्यः शर्मामृतलक्षणं सुखं यंसन् । यच्छंतु प्रयच्छंतु । किं कुर्वंतः । द्विषोऽस्मदीयान्पापलक्षणान् शत्रूनपबाधमानाः । विनाशं प्रापयंतः ॥ यंसन् । यम उपरमे । लेट्यडागमः । सिब्बहुलं लेटीति सिप् । अमृताः । मृतं मरणं येषां नास्तीत्यमृताः । नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं ॥

चतुर्थीमृचमाह ॥

वि नः पथः सुविताय चियंत्विंद्रो मरुतः । पूषा भगो वंद्यासः ॥ ४ ॥

वि । नः । पथः । सुविताय । चियंतु । इंद्रः । मरुतः । पूषा । भगः । वंद्यासः ॥ ४ ॥

वंद्यासः सर्वैर्वंदनीयाः स्तोतव्या नमस्कर्तव्या वेंद्रादयो देवा नोऽस्माकं पथो मार्गान्विचियंतु । विचिन्वंतु । अशोभनेभ्यो मार्गेभ्यः सकाशात्पृथक्कुर्वंतु । किमर्थं । सुविताय । सुष्ठु प्राप्तव्याय स्वर्गादिफलाय ॥ पथः । शसि भस्य टेर्लोप इति टिलोपः । उदात्तनिवृत्तिस्वरेण शस उदात्तत्वं । सुविताय । इण् गतावित्यस्मात्कर्मणि निष्ठा । तन्वादीनां छंदसि बहुलमुपसंख्यानमित्युवङ् । गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वे प्राप्ते सूपमानात् क्त इत्युत्तरपदांतोदात्तत्वं । चियंतु । चिञ् चयने । बहुलं छंदसीति विकरणस्य लुक् । इयङ् । पादादित्वान्निघाताभावः । वंद्यासः । वदि अभिवादनस्तुत्योः । ऋहलोर्ण्यत् । ईडवंदवृशंसदुहां ण्यत इत्याद्युदात्तत्वं । आज्जसेरसुक् ॥

अप्तोर्यामे संति चत्वार्यतिरिक्तोक्थानि । तत्र चतुर्थेऽच्छावाकातिरिक्तोक्थ उत नो धिय इत्येषानुरूपतृचस्य वैकल्पिकी तृतीया । सूत्रितं च । उत नो धियो गोअग्रा इति वानुरूपस्योत्तमा । आ० ९. ११. । इति ॥

तामेतां सूक्ते पंचमीमृचमाह ॥

उत नो धियो गोअग्राः पूषन्विष्णवेवयावः । कर्ता नः स्वस्तिमतः ॥ ५ ॥

उत । नः । धियः । गोऽअग्राः । पूषन् । विष्णो इति । एवऽयावः । कर्त । नः ।
स्वस्तिऽमतः ॥ ५ ॥

हे पूषन् पोषक देव हे विष्णो व्यापनशील देव हे एवयावः । एवैर्गंतृभिरश्वैर्याति गच्छतीत्येवयावा मरुद्गणः । हे मरुद्गण ते सर्वे यूयं नोऽस्माकं धियोऽप्तोर्यामलक्षणानि कर्माणि गोअग्राः पश्वग्राणि पशुमुखान्यस्मत्सकाशाद्भृष्टैः पशुभिर्युक्तानि कर्त । कुरुत । अप्तोर्यामकर्मणश्च पशुप्राप्तिहेतुत्वमाम्नायते । यस्मात्पशवः पत्रेव भ्रंशेरन् स एतेन यजत इति । उत अपि च नोऽस्मान्स्वस्तिमतोऽविनाशिनः कुरुत ॥ एवयावः । इण् गतौ । इणशीङ्भ्यां

वन्निति वन्प्रत्ययः। अस्मिन्नुपपदे या प्रापण इत्यस्मादातो मनिन्निति वनिप्। संबुद्धौ वन उपसंख्यानं। पा० ८. ३. १. १.। इति वकारस्य रुत्वं ॥

॥ इति प्रथमस्य षष्ठे सप्तदशो वर्गः ॥

ऋत्विगाद्यर्थमाहृतं मधुपर्कं मधु वाता इति तृचेन ऋत्विगादिः प्रतिग्रहीतावेक्षेत। तथा च सूत्र्यते। मधु वाता इति तृचेनावेक्ष्य। आ० गृ० १. २४.। इति ॥

तृचे प्रथमां सूक्ते षष्ठीमृचमाह ॥

मधु वाता ऋतायते मधु क्षरंति सिंधवः। माध्वीर्नः संत्वोषधीः ॥ ६ ॥

मधु। वाताः। ऋतऽयते। मधु। क्षरंति। सिंधवः। माध्वीः। नः। संतु। ओषधीः ॥ ६ ॥

ऋतायते ऋतं यज्ञमात्मन इच्छते यजमानाय वाता वायवो मधु माधुर्योपेतं कर्म फलं क्षरंति। वर्षंति। प्रयच्छंतीत्यर्थः। तथा सिंधवः स्यंदनशीला नद्यः समुद्रा वा मधु माधुर्योपेतं स्वकीयं रसं क्षरंति। एवं नोऽस्मभ्यमोषधीः फलपाकांता ओषधयस्ताश्च माध्वीर्माधुर्योपेताः संतु। भवंतु ॥ मधु। अस्मादुत्तरस्य मत्वर्थीयस्य लुगकारेकाररेफाश्च वक्तव्या इति लुक्। ऋतायते। ऋतमात्मन इच्छति। सुप आत्मनः क्यच्। न छंदस्यपुत्रस्येतीत्वदीर्घयोर्निषेधः। अन्येषामपि संहितायां दीर्घत्वं। क्यजंताल्लटः शतृ। शतुरनुम इति विभक्तेरुदात्तत्वं। माध्वीः। मधोरञ् च। पा० ४. ४. १२९.। इति मत्वर्थीयोऽञ्प्रत्ययः। ऋत्व्यवास्त्व्येत्यादावञि यणादेशो निपात्यते। वा छंदसीति पूर्वसवर्णदीर्घत्वं। ओषधीः। ओषः पाक आसु धीयत इत्योषधयः। कर्मण्यधिकरणे चेति किप्रत्ययः। कृदिकारादक्तिन इति ङीप्। जसि पूर्ववत्पूर्वसवर्णदीर्घः। दासीभारादिषु पठितत्वात्पूर्वपदप्रकृतिस्वरत्वं। तच्च घञंतमाद्युदात्तं ॥

सप्तमीमृचमाह ॥

मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता ॥ ७ ॥

मधु। नक्तं। उत। उषसः। मधुऽमत्। पार्थिवं। रजः। मधु। द्यौः। अस्तु। नः। पिता ॥ ७ ॥

नक्तं रात्रिर्नोऽस्माकं मधुमती माधुर्योपेतफलप्रदा भवतु। उत अपि चोषस उषःकालोपलक्षितान्यहानि च मधुमंति भवंतु। पार्थिवं रजः पृथिव्याः संबंधी

लोकोऽस्माकं मधुमत् माधुर्यविशिष्टफलयुक्तो भवतु । पिता वृष्टिप्रदानेन सर्वेषां पालयिता द्यौर्द्युलोकोऽपि मधु मधुयुक्तो भवतु ॥ पार्थिवं । पृथिव्या ञाञाविति प्राग्दीव्यतीयोऽञ्प्रत्ययः । रजः । रजःशब्दो लोकवाची । लोका रजांस्युच्यंते । नि॰ ४. १९. । इति यास्कः । रजंत्यस्मिञ्जना इति रजः । असुनि रजकरजनरजःसूपसंख्यानमिति रंजेर्नलोपः ॥

अष्टमीमृचमाह ॥

मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः । माध्वीर्गावो भवंतु नः ॥ ८ ॥

मधुऽमान् । नः । वनस्पतिः । मधुऽमान् । अस्तु । सूर्यः । माध्वीः । गावः । भवंतु । नः ॥ ८ ॥

नोऽस्माकं वनस्पतिर्वनानां पालयिता यूपाभिमानी देवो मधुमान् माधुर्योपेतफलवानस्तु । तादृशं फलमस्मभ्यं प्रयच्छत्वित्यर्थः । सूर्यः सर्वस्य प्रेरकः सविता च मधुमानस्तु । गावोऽग्निहोत्राद्यर्था धेनवश्च नोऽस्माकं माध्वीर्माधुर्योपेतेन पयसा युक्ता भवंतु ॥ वनस्पतिः । वनानां पतिर्वनस्पतिः । पारस्करादित्वात्सुट् । वनपतिशब्दावाद्युदात्तौ । उभे वनस्पत्यादिषु युगपदिति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं ॥

नवमीमृचमाह ॥

शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा ।
शं न इंद्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥ ९ ॥

शं । नः । मित्रः । शं । वरुणः । शं । नः । भवतु । अर्यमा ।
शं । नः । इंद्रः । बृहस्पतिः । शं । नः । विष्णुः । उरुऽक्रमः ॥ ९ ॥

अहरभिमानी मित्रो देवो नोऽस्माकं शं सुखकरो भवतु । यद्वा । अस्मदीयानामुपद्रवाणां शमयिता भवतु । रात्र्यभिमानी वरुणश्च शं सुखकरो भवतु । अर्यमाहोरात्रयोः ख्यापयिता सूर्यश्च नोऽस्माकं शं सुखकरो भवतु । बृहस्पतिर्बृहतां देवानां पालयितेंद्रश्च नोऽस्माकं शं सुखकरो भवतु । उरुक्रमः । उरु विस्तीर्णं क्रामति पादौ विक्षिपतीत्युरुक्रमः । विष्णुर्हि वामनावतारे पृथिव्यादीन् लोकान्पदत्रयरूपेणाक्रांतवान् । अत उरुक्रमो विष्णुश्च नोऽस्माकं शं

सुखकर उपद्रवाणां शमयिता वा भवतु ॥ उरुक्रमः । क्रमु पादविक्षेपे । पचाद्यच् । यद्वा । उरून् क्रामतीत्युरुक्रमः । कर्मण्यण् । नोदात्तोपदेशस्य मांतस्येति वृद्धिप्रतिषेधः ॥

॥ इति प्रथमस्य षष्ठेऽष्टादशो वर्गः ॥

त्वं सोमेति त्रयोविंशत्यृचं सप्तमं सूक्तं गोतमस्यार्षं सोमदेवताकं। पंचम्याद्याः षोडश्यंता द्वादशर्चो गायत्र्यः। सप्तदश्युष्णिक्। शिष्टा दश त्रिष्टुभः। तथा चानुक्रांतं। त्वं सोम त्र्यधिका सौम्यं पंचम्यादि गायत्र्यो द्वादशोष्णिक् चेति। सूक्तविनियोगो लैंगिकः॥ एकादशिनस्य सौम्यस्य पशोर्वपापुरोडाशयोस्त्वं सोमेति द्वे ऋचावनुवाक्ये। सूचितं च। त्वं सोम प्र चिकितो मनीषेति द्वे। आ० ३. ७.। इति॥ महापितृयज्ञ एकैकस्य हविषो द्वे द्वे अनुवाक्ये। तत्र सोमस्य पितृमतस्त्वं सोमेत्येषा प्रथमानुवाक्या। दक्षिणाग्नेरग्निमिति खंडे सूचितं। त्वं सोम प्र चिकितो मनीषा सोमो धेनुं। आ० २. १९.। इति॥ एषैव प्रायणीयेष्टौ सौम्यस्यानुवाक्या। तदहः प्रायणीयेष्टिरित्यत्र सूचितं। त्वं सोम प्र चिकितो मनीषा या ते धामानि दिवि या पृथिव्यां। आ० ४. ३.। इति॥

तत्र प्रथमामृचमाह॥

त्वं सो॑म॒ प्र चि॑कितो मनी॒षा त्वं रजि॑ष्ठ॒मनु॒ नेषि॒ पंथां॑।
तव॒ प्रणी॑ती पि॒तरो॑ न इंदो दे॒वेषु॒ रत्न॑मभजंत॒ धीराः॑॥ १॥

त्वं। सो॒म॒। प्र। चि॒कि॒तः॒। म॒नी॒षा। त्वं। रजि॑ष्ठं। अनु॑। नेषि॒। पंथां॑।
तव॑। प्रऽनी॑ती। पि॒तरः॑। नः॒। इं॒दो॒ इति॑। दे॒वेषु॑। रत्न॑। अ॒भ॒जं॒त॒। धीराः॑॥ १॥

हे सोम त्वं मनीषा मनीषयास्मदीयया बुद्ध्या प्रचिकितः। प्रकर्षेण ज्ञातोऽसि। वयं त्वां स्तुतिभिरज्ञासिष्मेत्यर्थः। अतस्त्वं रजिष्ठमृजुतममकुटिलं पंथां पंथानं कर्मफलावाप्तिहेतुभूतं मार्गमनुनेषि। अस्माननुक्रमेण प्रापयसि। किंच हे इंदो। उंदनशील सर्वं जगदमृतेन क्लेदयितः सोम तव प्रणीती प्रणीत्या त्वत्कर्तृकेन प्रकृष्टनयनेन धीरा धीमंतः कर्मवंतः प्रज्ञावंतो नोऽस्माकं पितरो देवेष्विंद्रादिषु रत्नं रमणीयं धनमभजंत। असेवंत प्राप्नुवन्। अतोऽस्मानपि तादृशं धनं प्रापयेत्यर्थः॥ प्रचिकितः। कित ज्ञाने। अस्मात्कर्मणि निष्ठा। छांदसं द्विर्वचनं। यद्वा यङ्लुगंतान्निष्ठा। संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणो

यङ्लुकोरित्यभ्यासस्य गुणाभावः । यद्वा । छंदस्युभयथेति निष्ठायाः सार्वधातुकसंज्ञायां शप् । जुहोत्यादित्वात्तस्य श्लुः । श्लाविति द्विर्वचनं । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । मनीषा । सुपां सुलुगिति तृतीयाया डादेशः । रजिष्ठं । ऋजुशब्दादिष्ठनि विभाषर्जोश्छंदसीति रत्वं । टेरिति टिलोपः । नेषि । नयतेर्लेटि बहुलं छंदसीति शपो लुक् । पंथां । पथिमथ्यृभुक्षामात् । पा॰ ७.१.८५. । इत्यसावपि व्यत्ययेनात्वं । पथिमथोः सर्वनामस्थान इत्याद्युदात्तत्वं । प्रणीती । तादौ चेति गतेः प्रकृतिस्वरत्वं । सुपां सुलुगिति तृतीयायाः पूर्वसवर्णदीर्घत्वं ॥

अग्निष्टोमे मरुत्वतीये त्वं सोम क्रतुभिरित्येषा धाय्या । सूचितं च । अग्निर्नेता त्वं सोम क्रतुभिः पिन्वंत्यप इति धाय्याः । आ॰ ५.४. । इति ॥

तामेतां सूक्ते द्वितीयामृचमाह ॥

त्वं सोम क्रतुभिः सुक्रतुर्भूस्त्वं दक्षैः सुदक्षो विश्ववेदाः ।
त्वं वृषा वृषत्वेभिर्महित्वा द्युम्नेभिर्द्युम्न्यभवो नृचक्षाः ॥ २ ॥
त्वं । सोम । क्रतुऽभिः । सुऽक्रतुः । भूः । त्वं । दक्षैः । सुऽदक्षः । विश्वऽवेदाः ।
त्वं । वृषा । वृषऽत्वेभिः । महिऽत्वा । द्युम्नेभिः । द्युम्नी । अभवः । नृऽचक्षाः ॥ २ ॥

हे सोम त्वं क्रतुभिस्त्वत्संबंधिभिरग्निष्टोमादिकर्मभिरात्मीयैर्ज्ञानैर्वा सुक्रतुः शोभनकर्मा शोभनप्रज्ञो वा भूः । भवसि । तथा विश्ववेदाः सर्वधनस्त्वं दक्षैरात्मीयैर्बलैः सुदक्षः शोभनबलो भवसि । तथा त्वं वृषत्वेभिर्वृषत्वैः कामाभिवर्षणैर्महित्वा महत्त्वेन माहात्म्येन च वृषा कामानां वर्षिता महांश्च भवसि । तथा त्वं नृचक्षा नृणां यज्ञस्य नेतॄणां यजमानानामभिमतफलस्य दर्शयिता सन् द्युम्नेभिर्द्युम्नैस्त्वर्दत्तैर्हविर्लक्षणैरन्नैर्द्युम्न्यभवः । प्रभूतान्नो भवसि ॥ सुक्रतुः । बहुव्रीहौ क्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वं । सुदक्षः । दक्ष वृद्धौ । दक्ष्यतेऽनेनेति दक्षो बलं । करणे घञ् । जिह्वादाद्युदात्तत्वं । सुशब्देन बहुव्रीहावाद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं । विश्ववेदाः । विश्वानि वेदांसि यस्यासौ । बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं । वृषत्वेभिः । वृष्णो भावो वृषत्वं । बहुलं छंदसीति भिस ऐसभावः । महित्वा । महेरौणादिक इन्प्रत्ययः । भावप्रत्ययांतात्सुपां सुलुगिति विभक्तेराकारः ॥

तृतीयामृचमाह ॥

राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम ।
शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥ ३ ॥
राज्ञः । नु । ते । वरुणस्य । व्रतानि । बृहत् । गभीरं । तव । सोम । धाम ।
शुचिः । त्वं । असि । प्रियः । न । मित्रः । दक्षाय्यः । अर्यमाऽइव । असि । सोम ॥ ३ ॥

हे सोम राज्ञो ब्राह्मणानां स्वामिनः । सोमोऽस्माकं ब्राह्मणानां राजेति श्रुतेः । वरुणस्य यागार्थमाहृतः क्रीतो वस्त्रेणावृतः सोमो वरुणः । वरुणोऽसि धृतव्रत इति मंत्रलिंगात् । क्रीतस्य ते नु तव संबंधीनि हि व्रतानि सर्वाण्यग्निष्टोमादीनि कर्माणि । अतः सर्वेषु यागेषु त्वमेव करणभूतो भवसीत्यर्थः । अतस्तव धाम त्वदीयं तेजो बृहन्महद्विस्तीर्णं गभीरं गांभीर्योपेतं च । यद्वा नु इत्येतदुपमार्थे । तदुक्तं यास्केन । अत्राप्युपमार्थे भवति वृक्षस्य नु ते पुरुहूत वयाः । नि० १.४. । इति । राज्ञो राजमानस्य वरुणस्य नु वरुणस्येव हे सोम ते तव व्रतानि कर्माणि लोकहितकारीणि । शिष्टं समानं । हे सोम त्वं शुचिः सर्वेषां शोधकोऽसि । तत्र दृष्टांतः । प्रियो न मित्रः । यथा सर्वेषामनुकूलोऽहरभिमानी मित्रो देवः शोधयिता भवति तद्वत् । तथा त्वमर्यमेवास्माभिर्दृश्यमानः सूर्य इव दक्षाय्योऽसि । सर्वेषां वर्धको भवसि । यथाहनि सूर्यः प्रकाशेन सर्वं वर्धयति । एवं निश्यमृतमयैः सोमकिरणैराप्यायमानं सत्स्थावरजंगमात्मकं सर्वं जगद्वर्धते ॥ शुचिष्ट्वं । युष्मत्तत्ततक्षुःष्वंतःपादमिति विसर्जनीयस्य षत्वं । दक्षाय्यः । दक्ष वृद्धौ । श्रुदक्षिस्पृहिगृहिभ्य आय्य इत्याय्यप्रत्ययः ॥

आग्रयणेष्टौ सौम्यस्य हविषो या ते धामानीति याज्या । आग्रयणं व्रीहिश्यामाकयवानामिति खंडे सूत्रितं । सोम यास्ते मयोभुवो या ते धामानि दिवि या पृथिव्यां । आ० २.९. । इति ॥ एषैवैकादशिनस्य सौम्यस्य पशोर्वपायां याज्या । सूत्रितं च । या ते धामानि दिवि या पृथिव्यामषाळ्हं युत्सु पृतनासु पप्रिं । आ० ३.७. । इति ॥ प्रायणीयेष्टावप्येषैव सौम्यस्य याज्या । सूत्रितं च । त्वं सोम प्र चिकितो मनीषा या ते धामानि दिवि या पृथिव्यां । आ० ४.३. । इति ॥ तामेतां सूक्ते चतुर्थीमृचमाह ॥

या ते धामा॑नि दि॒वि या पृ॑थि॒व्यां या पर्व॑ते॒ष्वोष॑धीष्व॒प्सु ।
तेभि॑र्नो॒ विश्वैः॑ सु॒मना॒ अहे॑ळ॒न्राज॒न्त्सोम॒ प्रति॑ ह॒व्या गृ॑भाय ॥ ४ ॥
या । ते । धामा॑नि । दि॒वि । या । पृ॒थि॒व्यां । या । पर्व॑तेषु । ओष॑धीषु । अ॒प्ऽसु ।
तेभिः॑ । नः॒ । विश्वैः॑ । सु॒ऽमनाः॑ । अहे॑ळन् । राज॑न् । सोम॑ । प्रति॑ । ह॒व्या । गृ॒भा॒य॒ ॥ ४ ॥

हे सोम ते तव दिवि द्युलोके या यानि धामानि तेजांसि वर्तंते । तथा पृथिव्यां भूमौ यानि वर्तंते । तथा पर्वतेषु पर्ववत्सु शिलोच्चयेषु यानि वर्तंते । तथा व्रीह्याद्योषधीष्वप्सु च यानि वर्तंते तेभिर्विश्वैस्तैः सर्वैस्तेजोभिर्युक्तः सुमनाः शोभनमना अहेळन्नक्रुध्यन् हे राजन् सोम राजमान सोम । एवंभूतस्त्वं हव्यास्माभिः प्रत्तानि हवींषि प्रतिगृभाय । प्रतिगृहाण ॥ या । शेश्छंदसि बहुलमिति शेर्लोपः । पृथिव्यां । उदात्तयणा इति विभक्तेरुदात्तत्वं । ओषधीषु । ओषधेश्च विभक्तावप्रथमायामिति दीर्घः । अप्सु । ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । सुमनाः । सोर्मनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वं । गृभाय । ग्रह उपादाने । छंदसि शायजपीति हौ श्नाप्रत्ययस्य शायजादेशः ॥

पौर्णमासेष्टौ सौम्यस्याज्यभागस्य त्वं सोमेत्येषानुवाक्या । सूत्रितं च । अग्निर्वृत्राणि जंघनदिति पूर्वस्याज्यभागस्यानुवाक्या त्वं सोमासि सत्पतिरित्युत्तरस्य । आ॰ १. ५. । इति । एवं यत्र यत्र वार्त्रघ्नावाज्यभागौ तत्र सर्वत्रास्या विनियोगः ॥ प्रातःकालीनायामुपसदि प्रधानस्य सौम्यस्यैषैवानुवाक्या । अपराह्णिक्यामुपसदि सैव याज्या । सूत्रितं च । त्वं सोमासि सत्पतिर्गयस्फानो अमीवहा । आ॰ ४. ८. । इति । विपर्यासो याज्यानुवाक्यानां । आ॰ ४. ८. । इति च ॥

तामेतां सूक्ते पंचमीमृचमाह ॥

त्वं सो॑मासि॒ सत्प॑ति॒स्त्वं राजो॒त वृ॑त्र॒हा । त्वं भ॒द्रो अ॑सि॒ क्रतुः॑ ॥ ५ ॥
त्वं । सो॒म॒ । अ॒सि॒ । सत्ऽप॑तिः । त्वं । राजा॑ । उ॒त । वृ॒त्र॒ऽहा । त्वं । भ॒द्रः । अ॒सि॒ । क्रतुः॑ ॥ ५ ॥

हे सोम त्वं सत्पतिरसि । सतां कर्मसु वर्तमानानां ब्राह्मणानामधिपतिर्भवसि । तस्मात्सोमराजानो ब्राह्मणा इति श्रुतेः । यद्वा संतः स्वानादयः पतयः पालका यस्य सोमस्य तादृशो भवसि । तथा चाम्नायते । स्वानभ्राजेत्याहैते वा अमुष्मिन् लोके सोममरक्षन्निति । उत अपि च राजा राजमानस्त्वं वृत्रहा

वृत्रस्यासुरस्य शत्रोर्वा हंतासि। भद्रः शोभनः क्रतुर्योऽयमग्निष्टोमादियागस्त्वमेव तद्रूपो भवसि। त्वत्साध्यत्वाद्यागानां ॥ सत्पतिः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। तत्पुरुषपक्षे तु पत्यावैश्वर्ये इति पूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य षष्ठ एकोनविंशो वर्गः ॥

साग्निचित्ये क्रतावग्नीषोमीयस्य पशुपुरोडाशमन्वष्टौ देवसुवां हवींषि निरुप्यंते। तत्र सोमस्य वनस्पतेर्हविषस्त्वं च सोमेत्येषानुवाक्या। अथाग्नीषोमीयेणेति खंडे सूचितं। त्वं च सोम नो वशो ब्रह्मा देवानां पदवीः कवीनां। आ० ४. ११.। इति ॥ तामेतां षष्ठीमृचमाह ॥

त्वं च॑ सोम नो॒ वशो॑ जी॒वातुं॒ न म॑रामहे। प्रि॒यस्तो॑त्रो॒ वन॒स्पतिः॑ ॥ ६ ॥

त्वं। च। सोम। नः। वशः॑। जी॒वातु॑म्। न। म॒रा॒म॒हे॒। प्रि॒यऽस्तो॑त्रः। वन॒स्पतिः॑ ॥ ६ ॥

हे सोम नोऽस्माकं स्तोतॄणां जीवातुं जीवनौषधं त्वं च त्वं चेद्वशः कामयेथाः। तदानीं वयं न मरामहे। न म्रियामहे। कीदृशस्त्वं। प्रियस्तोत्रः। प्रियाणि स्तोत्राणि यस्य स तथोक्तः। बहुभिः स्तोतव्य इत्यर्थः। वनस्पतिः। वनानामोषधिवनस्पतिरूपाणां पतिः पालयितासि। सोमो वा ओषधीनां राजेति श्रुतेः ॥ वशः। वश कांतौ। लेटि सिप्यडागमः। आगमानुदात्तत्वे धातुस्वरः शिष्यते। त्वं चेति चशब्दश्चणिति निपातांतरं चेदर्थे। तद्योगान्निपातैर्यद्यदिहंतेति निघातप्रतिषेधः। जीवातुं। जीव प्राणधारणे। जीवेरातुः। मरामहे। मृङ् प्राणत्यागे। व्यत्ययेन शप् ॥

आयुःकामेष्ट्यां द्वितीयस्याज्यभागस्य त्वं सोम महे भगमित्येषानुवाक्या। अथ काम्या इति खंडे सूचितं। आ नो अग्ने सुचेतुना त्वं सोम महे भगं। आ० २. १०.। इति ॥ तामेतां सूक्ते सप्तमीमृचमाह ॥

त्वं सो॑म म॒हे भगं॒ त्वं यून॑ ऋताय॒ते। दक्षं॑ दधासि जी॒वसे॑ ॥ ७ ॥

त्वं। सो॒म॒। म॒हे। भग॑म्। त्वम्। यूने॑। ऋ॒त॒ऽय॒ते। दक्ष॑म्। द॒धा॒सि॒। जी॒वसे॑ ॥ ७ ॥

हे सोम त्वं महे महते वृद्धाय ऋतायते ऋतं यज्ञमात्मन इच्छते पुरुषाय जीवसे जीवितुं दक्षमुपभोगसमर्थं भगं धनं दधासि। विदधासि करोषि। तथा त्वं यूने तरुणाय च ऋतायते जीवितुं धनं करोषि ॥ महे। महते। अच्छब्द-

लोपश्छांदसः । वृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वं । यूने । श्वयुवमघोनामतद्धित इति संप्रसारणं । ऋतायते । ऋतमात्मन इच्छति । सुप आत्मनः क्यच् । छंदस्यपुत्रस्येतीत्वदीर्घयोर्निषेधः । अन्येषामपि दृश्यत इति सांहितिको दीर्घः । क्यजंताल्लटः शतृ । शतुरनुमो नद्यजादी इति विभक्तेरुदात्तत्वं । जीवसे । जीव प्राणधारणे । तुमर्थे सेसेनित्यसेप्रत्ययः ॥

स्वस्त्ययन्यां द्वितीयस्याज्यभागस्य त्वं नः सोमेत्येषानुवाक्या । सूत्रितं च । स्वस्त्ययन्यां रक्षितवंतावग्ने रक्षा णो अंहसस्त्वं नः सोम विश्वतः । आ० २. १०. । इति ॥ तामेतां सूक्तेऽष्टमीमृचमाह ॥

त्वं नः सोम विश्वतो रक्षा राजन्नघायतः । न रिष्येत्त्वावतः सखा ॥ ८ ॥

त्वं । नः । सोम । विश्वतः । रक्ष । राजन् । अघऽयतः । न । रिष्येत् । त्वाऽवतः । सखा ॥ ८ ॥

हे सोम राजन् राजनशील त्वमघायतः । अघं पापं । तद्धेतुकं दुःखमस्माकं कर्तुमिच्छतो विश्वतः सर्वस्मादपि पुरुषान्नोऽस्मान्रक्ष । पालय । त्वावतस्त्वत्सदृशस्य सखा सख्यं प्राप्तः पुरुषो न रिष्येत् । नहि विनश्येत् किमु वक्तव्यं त्वत्सखा विनश्यतीति ॥ अघायतः । अघं पापं परेषामिच्छतीत्यघायन् । छंदसि परेच्छायामपीति क्यच् । अश्वाघस्यादित्यात्वं । रिष्येत् । रुष रिष हिंसायां । त्वावतः । वतुप्प्रकरणे युष्मदस्मद्भ्यां छंदसि सादृश्य उपसंख्यानमिति वतुप् । प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः । आ सर्वनाम्न इत्यात्वं ॥

सोमप्रवहणे सोम यास्त इति तृचोऽनुवक्तव्यः । सूत्रितं च । सोम यास्ते मयोभुव इति तिस्रः । आ० ४. ४. ॥ आग्रयणे सौम्यस्य सोम यास्त इत्येषानुवाक्या । सूत्रितं च । सोम यास्ते मयोभुवो या ते धामानि दिवि या पृथिव्यां । आ० २. ९. । इति ॥ अश्वमेधेऽपि पौष्ण्यामिष्टौ द्वितीयस्याज्यभागस्येषानुवाक्या । सूत्रितं च । त्वमग्ने सप्रथा असि सोम यास्ते मयोभुव इति सन्नंतौ । आ० १०. ६. । इति ॥ तामेतां सूक्ते नवमीमृचमाह ॥

सोम यास्ते मयोभुव ऊतयः संति दाशुषे । ताभिर्नोऽविता भव ॥ ९ ॥

सोम । याः । ते । मयःऽभुवः । ऊतयः । संति । दाशुषे । ताभिः । नः । अविता । भव ॥ ९ ॥

हे सोम ते तव संबंधिन्यो दाशुषे चरुपुरोडाशादीनि दत्तवते यजमानाय मयोभुवो मयसः सुखस्य भावयित्र्यो या ऊतयो रक्षाः संति विद्यंते । ताभी रक्षा-

भिर्नोऽस्माकमविता रक्षिता भव ॥ मयोभुवः । अस्योतिविशेषणत्वेन स्त्रीलिंगत्वे भुवश्च । पा० ४. १. ४७. । इति ङीष् प्राप्नोति । तद्वोतो गुणवचनादित्यस्मादुत इति तपरकरणस्यानुवर्तनान्न भवति ॥

दशमीमृचमाह ॥

इमं यज्ञमिदं वचो जुजुषाण उपागहि । सोम त्वं नो वृधे भव ॥ १० ॥

इमं । यज्ञं । इदं । वचः । जुजुषाणः । उपऽआगहि । सोम । त्वं । नः । वृधे । भव ॥ १० ॥

हे सोम त्वमिममस्माभिः क्रियमाणं यज्ञमिदं वच इदानीं क्रियमाणं स्तुतिलक्षणं वचनं जुजुषाणः सेवमानः सन् उपागहि । उपागच्छ । प्राचीनवंशलक्षणं गृहं प्राप्नुहि । प्राप्य च नोऽस्माकं वृधे यज्ञस्य वर्धनाय भव ॥ जुजुषाणः । जुषी प्रीतिसेवनयोः । छंदसि लिट् । लिटः कानच् । चित इत्यंतोदात्तत्वं । उपागहि । गमेर्लोटि बहुलं छंदसीति शपो लुक् । अनुदात्तोपदेशेत्यादिना मकारलोपः । असिद्धवदत्रा भादित्यस्यासिद्धत्वाद्धेर्लुगभावः । गतिर्गतौ । पा० ८. १. ७०. । इति पूर्वस्य गतेर्निघातः ॥

॥ इति प्रथमस्य षष्ठे विंशो वर्गः ॥

दर्शयागे सौम्यस्याज्यभागस्य सोम गीर्भिरित्येषानुवाक्या । सूचितं च । अग्निः प्रत्नेन मन्मना सोम गीर्भिष्ट्वा वयं । आ० १. ५. । इति । अन्यत्रापि यत्र वृधन्वंतावाज्यभागौ तत्रैषा द्वितीयाज्यभागानुवाक्या ॥

तामेतां सूक्त एकादशीमृचमाह ॥

सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः । सुमृळीको न आ विश ॥ ११ ॥

सोम । गीःऽभिः । त्वा । वयं । वर्धयामः । वचःऽविदः । सुऽमृळीकः । नः । आ । विश ॥ ११ ॥

हे सोम त्वा त्वां वचोविदः स्तुतिलक्षणानां वचसां वेदितारो वयमनुष्ठातारो गीर्भिः स्तुतिलक्षणैर्वचोभिर्वर्धयामः । प्रवृद्धं कुर्मः । तादृशस्त्वं च नोऽस्माकं सुमृळीकः शोभनं सुखं कुर्वन् सन् आविश । आगच्छ ॥ सुमृळीकः । मृड सुखने । मृडेः कीकन्कंकनौ । उ० ४. २४. । इति भावे कीकन्प्रत्ययः । शोभनं मृडीकं यस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं ॥

संति पवमानेष्टयस्तिस्रः। तत्र तृतीयस्यामिष्टावुत्तरस्याज्यभागस्य गयस्फान इत्येषानुवाक्या। सूचितं च। पुष्टिमंतावग्निना रयिमश्नवद्गयस्फानो अमीवहा। आ० २. १.। इति ॥ एषैव प्रातःकालीनोपसदि सौम्ययागस्य याज्या सायंकालीनायां त्वनुवाक्या। सूचितं चाथोपसदिति खंडे। त्वं सोमासि सत्पतिर्गयस्फानो अमीवहा। आ० ४. ८.। इति ॥ तामेतां द्वादशीमृचमाह ॥

गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः। सुमित्रः सोम नो भव ॥ १२ ॥

गयऽस्फानः। अमीवऽहा। वसुऽवित्। पुष्टिऽवर्धनः। सुऽमित्रः। सोम। नः। भव ॥ १२ ॥

गयस्फानः। गय इति धननाम। धनस्य वर्धयिता। अमीवहा। अमीवानां रोगाणां हंता। वसुवित्। स्तोतॄणां धनस्य लंभयिता प्रापयिता। पुष्टिवर्धनः। पुष्टेः संपदो वर्धयिता। सुमित्रः। शोभनानि मित्राणि सखायो यस्य स तथोक्तः। हे सोम त्वं नोऽस्माकमेवंगुणविशिष्टो भव ॥ गयस्फानः। स्फायी वृद्धौ। अंतर्भावितण्यर्थात् ल्युटि व्यत्ययेन यलोपः। इदमादिषु चतुर्षु पदेषु कृदुत्तरपदप्रकृतिस्वरत्वं। सुमित्रः। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं ॥

त्रयोदशीमृचमाह ॥

सोम रारंधि नो हृदि गावो न यवसेष्वा। मर्य इव स्व ओक्ये ॥ १३ ॥

सोम। ररंधि। नः। हृदि। गावः। न। यवसेषु। आ। मर्यःऽइव। स्वे। ओक्ये ॥ १३ ॥

हे सोम त्वं नोऽस्माकं हृदि हृदये रारंधि। रमस्व। तत्र निदर्शनद्वयमुच्यते। गावो न। यथा गावो यवसेषु शोभनतृणेष्वाभिमुख्येन रमंते। मर्य इव। यथा वा मर्यो मरणधर्मा मनुष्यः स्व ओक्ये स्वकीय ओकसि गृहे पुत्रादिभिः सह रमते तद्वदस्माभिर्दत्तेन हविषा तृप्तः सन् अस्मास्वेवावतिष्ठस्व। नान्यत्र गच्छेति निदर्शनद्वयस्य तात्पर्यार्थः ॥ रारंधि। रमु क्रीडायां। व्यत्ययेन परस्मैपदं। बहुलं छंदसीति शपः श्लुः। छंदस्युभयथेति हेरार्धधातुकत्वेन ङित्त्वाभावादङितश्चेति हेर्धिः। अत एवाङित्त्वादनुनासिकलोपाभावः। सेर्ह्यपिच्चेति हेरपित्त्वात्तस्यैव स्वरः शिष्यते। छांदसमभ्यासदीर्घत्वं। आमंत्रितं पूर्वमविद्यमानवदिति पूर्वस्यामंत्रितस्याविद्यमानवत्त्वात्पदादपरत्वेन निघाताभावः। मर्य इव। छंदसि निष्टर्क्येत्यादौ मर्यशब्दो यत्प्रत्ययांतो निपात्यते। यतोऽनाव

इत्याद्युदात्तत्वं। ओक्ये। उच समवाये। उच्यते समवेयते प्राप्यत इत्योक्यं गृहं। ऋहलोर्ण्यत्। चजोः कु घिण्यतोरिति कुत्वं। तित्स्वरितः ॥

चतुर्दशीमृचमाह ॥

यः सोम सख्ये तव रारणद्देव मर्त्यः। तं दक्षः सचते कविः ॥ १४ ॥

यः। सोम। सख्ये। तव। ररणत्। देव। मर्त्यः। तं। दक्षः। सचते। कविः ॥ १४ ॥

हे देव द्योतमान सोम तव सख्ये त्वदीये सखित्वे निमित्तभूते सति यो मर्त्यो मरणधर्मा यजमानो रारणत्। रणति। एतत्सूक्तरूपेण स्तोत्रेण त्वां स्तौति। तं यजमानं कविः क्रांतदर्शी दक्षः सर्वकार्यसमर्थस्त्वं सचते। सेवसे। अनुगृह्णासीत्यर्थः ॥ रारणत्। रण शब्दार्थः। लेट्यडागमः। बहुलं छंदसीति शपः श्लुः। इतश्च लोप इतीकारलोपः। छंदस्युभयथेत्यार्धधातुकत्वादच्यनिटीति सार्वधातुके विधीयमानस्याभ्यस्ताद्युदात्तत्वस्याभावे धातुस्वरः शिष्यते। सचते। षच समवाये। पुरुषव्यत्ययः ॥

पंचदशीमृचमाह ॥

उरुष्या णो अभिशस्तेः सोम नि पाह्यंहसः। सखा सुशेव एधि नः ॥ १५ ॥

उरुष्य। नः। अभिऽशस्तेः। सोम। नि। पाहि। अंहसः। सखा। सुऽशेवः। एधि। नः ॥ १५ ॥

हे सोम त्वं नोऽस्मानभिशस्तेरभिशंसनादभिशापरूपान्निंदनादुरुष्य। रक्ष। उरुष्यती रक्षाकर्मेति यास्कः। तथांहसोऽस्मत्कृतात्पापाच्च निपाहि। नितरां पालय। एवमस्मदीयं पापं परिहृत्य सुशेवोऽस्मभ्यं दातव्येन शोभनेन सुखेन युक्तः सन्सखेधि। हितकारी भव ॥ अभिशस्तेः। शंसु स्तुतौ। अस्माद्भावे क्तिन्। तादौ चेति गतेः प्रकृतिस्वरत्वं। एधि। अस् भुवि। लोटि सेर्हिः। तस्य ङित्वात् श्नसोरल्लोप इत्यकारलोपः। घ्वसोरेद्धावभ्यासलोपश्चेति सकारस्यैत्वं। तथासिद्धवदत्रा भादित्यसिद्धत्वात् हुझल्भ्यो हेर्धिरिति हेर्धिरादेशः ॥

॥ इति प्रथमस्य षष्ठ एकविंशो वर्गः ॥

यावस्तोत्र आप्यायस्व समेतु त इति तृचो विनियुक्तः। सूत्रितं च। आप्यायस्व समेतु त इति तिस्रो मृजंति त्वा दश क्षिपः। आ० ५. १२.। इति ॥

पत्नीसंयाजेषु सौम्यस्याप्यायस्वेत्येषानुवाक्या। सूचितं च। आप्यायस्व समेतु ते सं ते पयांसि समु यंतु वाजाः। आ० १. १०.। इति ॥ चमसाप्यायनेऽप्येषा विनियुक्ता। सूचितं च। आप्यायस्व समेतु ते सं ते पयांसि समु यंतु वाजा इति चमसानाद्योपाद्यान्। आ० ५. ६.। इति ॥ तामेतां सूक्ते षोडशीमृचमाह ॥

आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं। भवा वाजस्य संगथे ॥१६॥

आ। प्यायस्व। सं। एतु। ते। विश्वतः। सोम। वृष्ण्यं। भव। वाजस्य। संऽगथे ॥१६॥

हे सोम त्वमाप्यायस्व। वर्धयस्व। ते तव वृष्ण्यं वृषत्वं वीर्यं सामर्थ्यं विश्वतः सर्वतः समेतु। संगच्छतां। त्वया संयुक्तं भवतु। एवंभूतस्त्वं वाजस्यान्नस्य संगथे संगमने भव। अस्माकमन्नप्रदो भवेत्यर्थः ॥ वृष्ण्यं। वृष सेचने। कनिन्युवृषीत्यादिना कनिन्। वृष्णि भवं वृष्ण्यं। भवे छंदसीति यत्। अल्लोपोऽन इत्यकारलोपः। ये चाभावकर्मणोरिति प्रकृतिभावस्तु व्यत्ययेन न प्रवर्तते। यतोऽनाव इत्याद्युदात्तत्वं। भवा। द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं। संगथे। पातृतुदिवचीत्यादिना विधीयमानस्थक्प्रत्ययो बहुलवचनाद्गमेरपि भवति। थाथादिनोत्तरपदांतोदात्तत्वं ॥

सप्तदशीमृचमाह ॥

आ प्यायस्व मदिंतम सोम विश्वेभिरंशुभिः। भवा नः सुश्रवस्तमः सखा वृधे ॥१७॥

आ। प्यायस्व। मदिन्ऽतम। सोम। विश्वेभिः। अंशुऽभिः। भव। नः। सुश्रवःऽतमः। सखा। वृधे ॥१७॥

हे मदिंतम। अतिशयेन मदवन् सोम विश्वेभिः सर्वैरंशुभिर्लतावयवैराप्यायस्व। आ समंताद्वृद्धो भव। स त्वं सुश्रवस्तमोऽतिशयेन शोभनान्नयुक्तः सन् नोऽस्माकं वृधे वर्धनाय सखा भव। मित्रीभव ॥ मदिंतम। मदो हर्षः। तद्वान् मदी। अतिशयेन मदी मदिंतमः। नाद्धस्येति तमपो नुट्। सुश्रवस्तमः। श्रव इत्यन्ननाम। श्रूयत इति सत इति यास्कः। शोभनं श्रवो यस्य स तथोक्तः। अतिशयेन सुश्रवाः सुश्रवस्तमः। तमपः पित्त्वादनुदात्तत्वे सोर्मनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वमेव शिष्यते ॥

पत्नीसंयाजेषु सौम्यस्य सं ते पयांसीति याज्या। सूचितं च। सं ते पयांसि समु यंतु वाजा इह त्वष्टारमग्रियं। आ० १. १०.। इति ॥ चमसाप्यायनेऽप्येषा।

सूचितं च। सं ते पयांसि समु यंतु वाजा इति चमसानाद्योपाद्यान्। आ० ५. ६.। इति ॥ तामेतां सूक्तेऽष्टादशीमृचमाह ॥

सं ते पयांसि समु यंतु वाजाः सं वृष्ण्यान्यभिमातिषाहः।
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व ॥ १८ ॥
सं। ते। पयांसि। सं। ऊं इति। यंतु। वाजाः। सं। वृष्ण्यानि। अभिमातिऽसहः।
आऽप्यायमानः। अमृताय। सोम। दिवि। श्रवांसि। उत्ऽतमानि। धिष्व ॥ १८ ॥

हे सोम। अभिमातिषाहोऽभिमातीनां शत्रूणां हंतुस्ते तव। एवंभूतं त्वां पयांसि अपणार्थानि क्षीराणि संयंतु। संगच्छंतां। तथा वाजा उ हविर्लक्षणान्यन्नानि च त्वां संगच्छंतां। वृष्ण्यानि वीर्याणि च संगच्छंतां। हे सोम त्वममृतायास्माकममृतत्वायामरणत्वायाप्यायमान आ समंताद्वर्धमानः सन्दिवि नभसि स्वर्गे उत्तमान्युन्नततमान्युत्कृष्टानि श्रवांस्यन्नान्यस्माभिर्भोक्तव्यानि हविर्लक्षणानि वा धिष्व। धारय ॥ ते। क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी। अभिमातिषाहः। षह अभिभवे। छंदसि सह इति ण्विप्रत्ययः। सुषामादित्वात् षत्वं। अमृताय। नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं। उत्तमानि। उच्छब्दात्साधनक्रियावचनादातिशायनिकस्तमप्। उत्तमशश्वत्तमौ सर्वत्रेत्युञ्छादिषु पाठादंतोदात्तत्वं। धिष्व। सुधित वसुधित नेमधित धिष्व धिषीय चेति धिभावो निपात्यते ॥

सोमप्रवहणे या ते धामानीत्येषा। सूचितं च। या ते धामानि हविषा यजंतीमां धियं शिक्षमाणस्य देवेति निहिते परिदध्यात्। आ० ४. ४.। इति ॥ एकादशिनस्य सौम्यस्य पशोर्हविष एषैव याज्या। प्रदानानामिति खंडे सूचितं। अषाळ्हं युत्सु पृतनासु पप्रिं या ते धामानि हविषा यजंति। आ० ३. ७.। इति ॥ तामेतां सूक्त एकोनविंशीमृचमाह ॥

या ते धामानि हविषा यजंति ता ते विश्वा परिभूरस्तु यज्ञं।
गयस्फानः प्रतरणः सुवीरोऽवीरहा प्र चरा सोम दुर्यान् ॥ १९ ॥
या। ते। धामानि। हविषा। यजंति। ता। ते। विश्वा। परिऽभूः। अस्तु। यज्ञं।
गयऽस्फानः। प्रऽतरणः। सुऽवीरः। अवीरऽहा। प्र। चर। सोम। दुर्यान् ॥ १९ ॥

हे सोम ते त्वदीयानि या यानि धामानि द्युप्रभृतिष्ववस्थितानि तेजांसि हविषा चरुपुरोडाशादिना यजंति । यजमानाः पूजयंति । ता ते विश्वा त्वदीयानि तानि सर्वाणि धामानि यज्ञमस्मदीयमध्वरं परिभूरस्तु । परितो भावयितॄणि परितः प्राप्तानि संतु । यद्वा त्वदीयानां तेषां सर्वेषां धाम्नामस्मदीयो यजमानः परिभूर्यज्ञं प्रति परिग्रहीता यागेन स्वीकर्तास्तु । भवतु । परिपूर्वो भवतिः परिग्रहार्थः । तादृशैर्धामभिरुपेतस्त्वं दुर्यान् प्राचीनवंशादिलक्षणानस्मदीयान् गृहान् । गृहा वै दुर्या इति श्रुतेः । प्रचर । प्रकर्षेण गच्छ । कीदृशस्त्वं । गयस्फानः । गयस्य गृहस्य धनस्य वा वर्धयिता । प्रतरणः प्रकर्षेण दुरितात्तारयिता । सुवीरः । शोभनैर्वीरैः पुरुषैरुपेतः । अवीरहा । वीर्याज्जायंत इति वीराः पुत्राः । तेषामहंता ॥ परिभूः । भू प्राप्तौ । अस्मात्क्विप् चेति क्विप् । व्यत्ययो बहुलं । पा० ३. १. ८५. । इति लिंगवचनव्यत्ययौ । अस्तु । व्यत्ययेनैकवचनं । गयस्फानः । गय इति गृहस्य धनस्य च नामधेयं । तेषां स्फायिता वर्धयिता । कृत्यल्युटो बहुलमिति कर्तरि ल्युटि छांदसो यलोपः । अवीरहा । वीराणां हंता वीरहा । न वीरहा अवीरहा ॥

महापितृयज्ञे सोमस्य पितृमतो यागे सोमो धेनुमित्येषा द्वितीयानुवाक्या । तत्र ह्येकैकस्य हविषो द्वे द्वे अनुवाक्ये समुच्चयेन विहिते । तथैव दक्षिणाग्नेरिति खंडे सूत्रितं । सोमो धेनुं सोमो अर्वंतमाशुं त्वं सोम पितृभिः संविदानः । आ० २. १९. । इति ॥ तामेतां सूक्ते विंशीमृचमाह ॥

सोमो॑ धे॒नुं सोमो॒ अर्वं॑तमा॒शुं सोमो॑ वी॒रं क॑र्म॒ण्यं॑ ददाति ।
सा॒द॒न्यं॑ वि॒द॒थ्यं॑ स॒भेयं॑ पितृ॒श्रव॑णं॒ यो ददा॑शदस्मै ॥ २० ॥
सोमः॑ । धे॒नुं । सोमः॑ । अर्वं॑तं । आ॒शुं । सोमः॑ । वी॒रं । क॒र्म॒ण्यं॑ । द॒दा॒ति॒ ।
स॒द॒न्यं॑ । वि॒द॒थ्यं॑ । स॒भेयं॑ । पि॒तृ॒ऽश्रव॑णं । यः । ददा॑शत् । अ॒स्मै॒ ॥ २० ॥

यो यजमानो ददाशत् । सोमाय हविर्लक्षणान्यन्नानि दद्यात् । तस्मै यजमानाय सोमो धेनुं सवत्सां दोग्ध्रीं गां ददाति । तथाशुं शीघ्रगामिनमर्वंतमश्वं ददाति । प्रयच्छति । तथा वीरं पुत्रमस्मै यजमानाय ददाति । कीदृशं पुत्रं । कर्मण्यं । लौकिककर्मसु कुशलं । सादन्यं । सदनं गृहं । तदर्हं । गृहकार्यकुशलमित्यर्थः । विदथ्यं । विदंत्येषु देवानिति विदथा यज्ञाः । तदर्हं । दर्शपूर्णमासा-

दियागानुष्ठानपरमित्यर्थः। सभेयं। सभायां साधुं सकलशास्त्राभिज्ञमित्यर्थः। पितृश्रवणं। पिता श्रूयते प्रख्यायते येन पुत्रेण तादृशं॥ कर्मण्यं। कर्मसु साधुः कर्मण्यः। तत्र साधुरिति यत्। ये चाभावकर्मणोरिति प्रकृतिभावः। तित्स्वरित एव स्वरितत्वं। एवमुत्तरत्रापि यत्प्रत्ययः। सभेयं। ढश्छंदसि। पा० ४. ४. १०६.। इति तत्र साधुरित्यर्थे ढप्रत्ययः। ददाशत्। दाशृ दाने। लेट्यडागमः। बहुलं छंदसीति शपः श्लुः॥

॥ इति प्रथमस्य षष्ठे द्वाविंशो वर्गः॥

एकादशिनस्य सौम्यस्य पशोः पुरोडाशस्याषाळ्हं युत्स्वित्येषा याज्या। प्रदानानामिति खंडे सूचितं। अषाळ्हं युत्सु पृतनासु पप्रिं या ते धामानि हविषा यजंति। आ० ३. ७.। इति॥ तामेतामेकविंशीमृचमाह॥

अषा॑ळ्हं यु॒त्सु पृत॑नासु॒ पप्रिं॑ स्व॒र्षाम॒प्सां वृ॒जन॑स्य गो॒पां।
भ॒रे॒षु॒जां सु॑क्षि॒तिं सु॒श्रव॑सं॒ जय॑न्तं॒ त्वामनु॑ मदेम सोम॥ २१॥

अषा॑ळ्हं। यु॒त्ऽसु। पृत॑नासु। पप्रिं॑। स्वः॒ऽसां। अ॒प्सां। वृ॒जन॑स्य। गो॒पां।
भ॒रे॒षु॒ऽजां। सु॒ऽक्षि॒तिं। सु॒ऽश्रव॑सं। जय॑न्तं। त्वां। अनु॑। म॒दे॒म। सोम॥ २१॥

युत्सु युद्धेष्वषाळ्हं शत्रुभिरनभिभवनीयं। तथा पृतनासु सेनासु पप्रिं जयस्य पूरयितारं स्वर्षां स्वर्गस्य सनितारं दातारं। अप्सामपां वृष्टिलक्षणानामुदकानां दातारं। यद्वा। अप्सां। अनत्तृकं भक्षकरहितं। सर्वेषामनुग्राहकमित्यर्थः। वृजनस्य गोपां। वृज्यतेऽनेनेति वृजनं बलं। तस्य गोपां गोपयितारं रक्षितारं। भरेषुजां। भ्रियंत एषु हवींषीति भरा यागाः। तेषु प्रादुर्भवंतं। सुक्षितिं शोभननिवासस्थानं। सुश्रवसं शोभनयशस्कं। जयंतं शत्रूनभिभवंतं। हे सोम। ईदृग्भूतं त्वामनुलक्ष्य मदेम। हर्षयुक्ता भवेम॥ अषाळ्हं। षह अभिभवे। साढ्यै साढ्वा साढेति निगम इति निपातनात् सहिवहोरोदवर्णस्येत्योत्वाभावः। सहेः साडः स इति षत्वं। पप्रिं। पॄ पालनपूरणयोः। आदृगमहनजन इति किन्प्रत्ययः। स्वर्षां। स्वः स्वर्गं सनोतीति स्वर्षाः। षणु दाने। जनसनखनेति विट्। विड्वनोरनुनासिकस्यादित्यात्वं। अप्सां। अप्शब्दोपपदात्सनोतेः पूर्ववद्विट्। यद्वा प्सा भक्षणे। प्साति भक्षयतीति प्साः। क्विप् चेति

क्विप्। न विद्यते प्मा अस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। भरेषुजां। जनी प्रादुर्भावे। पूर्ववड्विट् आत्वं च। मदेम। मदी हर्षे। व्यत्ययेन शप् ॥

द्वाविंशीमृचमाह ॥

त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः।
त्वमा ततंथोर्व१ंतरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥ २२ ॥

त्वं। इमाः। ओषधीः। सोम। विश्वाः। त्वं। अपः। अजनयः। त्वं। गाः।
त्वं। आ। ततंथ। उरु। अंतरिक्षं। त्वं। ज्योतिषा। वि। तमः। ववर्थ ॥ २२ ॥

हे सोम त्वमिमा भूम्यां वर्तमाना विश्वाः सर्वा ओषधीरजनयः। उत्पादितवानसि। तथा त्वमपस्तासामोषधीनां कारणभूतानि वृष्ट्युदकान्यजनयः। तथा त्वं गाः सर्वान्पशूनुदपादयः। उरु विस्तीर्णमंतरिक्षं त्वमाततंथ। विस्तारितवानसि। तस्मिन्नंतरिक्षे यत्तमोऽस्मद्दृष्टिनिरोधकमंधकारं तदपि त्वं ज्योतिषात्मीयेन प्रकाशेन विववर्थ। विवृतं विश्लिष्टं विनष्टं कृतवानसि ॥ ततंथ। तनु विस्तारे। ववर्थ। वृञ् वरणे। उभयत्र लिटस्थलि बभूथाततंथ जगृभ्म ववर्थेति निगम इति निपात्यते ॥

त्रयोविंशीमृचमाह ॥

देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य।
मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ ॥ १३ ॥

देवेन। नः। मनसा। देव। सोम। रायः। भागं। सहसाऽवन्। अभि। युध्य।
मा। त्वा। आ। तनत्। ईशिषे। वीर्यस्य। उभयेभ्यः। प्र। चिकित्स। गोऽइष्टौ ॥ १३ ॥

हे देव द्योतमान सहसावन् बलवन् सोम देवेन मनसा द्योतमानया त्वदीयया बुद्ध्या रायो भागं धनस्यांशं नोऽस्मानभिलक्ष्य युध्य। प्रेरय। यद्वा नोऽस्माकं रायो धनस्य भागं भक्तारमपहर्तारं शत्रुमभियुध्य। आभिमुख्येन सम्यक् प्रहर। त्वा तादृशं त्वां कश्चिदपि शत्रुर्मातनत्। क्लेशेनाततं मा कार्षीत्। मा हिंसीदित्यर्थः। उभयेभ्य उभयेषां युध्यमानानां संबंधिनो वीर्यस्य बलस्य त्वमीशिषे। ईश्वरो भवसि। स त्वं गविष्टौ संग्रामे प्रचिकित्स। अस्मदीयमुपद्रवं परिहर ॥ रायः। ऊडिदमिति विभक्तेरुदात्तत्वं। भागं। भजतेः कर्मणि घञ्।

कृत्यल्युटो बहुलमिति बहुलवचनात्कर्तरि वा। कर्षात्वत इत्यंतोदात्तत्वं। सह-
सावन्। सहःशब्दान्मतुपि छांदस आकारोपजनः। युध्य। युध संप्रहारे। व्यत्ययेन
परस्मैपदं। तनत्। तनु विस्तारे। व्यत्ययेन शप्। न माङ्योग इत्यडभावः।
ईशिषे। ईशः से। पा० ७.२.७७.। इतीडागमः। चिकित्सा। कित ज्ञाने। गुप्तिज्-
किद्भ्यः सन्। पा० ३.१.५.। गविष्टौ। गवां वाणानामिष्टय एषणानि गमनानि
येष्विति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥

॥ इति प्रथमस्य षष्ठे त्रयोविंशो वर्गः ॥

एता उ त्या इत्यष्टादशर्चमष्टमं सूक्तं गोतमस्यार्षं। आदितश्चतस्रो जगत्यः।
त्रयोदश्याद्याः षडृच उष्णिहः। शिष्टा अष्टौ त्रिष्टुभः। उषा देवता। अश्विना
वर्तिरित्यंत्यस्तृचोऽश्विदेवताकः। तथा चानुक्रांतं। एता उ त्या ह्यूनोषस्यं चतुर्ज-
गत्यादि षळुष्णिगंतं तृचोऽंत्य आश्विन इति। सूक्तविनियोगो लैंगिकः॥
प्रातरनुवाक उषस्ये क्रतौ जागते छंदस्याश्विनशस्त्रे चैता उ त्या इति चतस्रो
विनियुक्ताः। सूचितं च। एता उ त्या इति चतस्रो जागतं। आ० ४.१४.। इति॥

तत्र प्रथमामृचमाह॥

एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमंजते।
निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यंति मातरः॥ १॥

एताः। ऊं इति। त्याः। उषसः। केतुं। अक्रत। पूर्वे। अर्धे। रजसः। भानुं। अंजते।
निःऽकृण्वानाः। आयुधानिऽइव। धृष्णवः। प्रति। गावः। अरुषीः। यंति। मातरः॥ १॥

उ इत्येतत्पादपूरणं। त्यास्ता एता उषसः प्रभातकालाभिमानिन्यो देवताः
केतुमंधकारावृतस्य सर्वस्य जगतः प्रज्ञापकं प्रकाशमक्रत। अकृषत। कृतवत्यः।
यस्मादेवं तस्मादुषसो रजसोऽंतरिक्षलोकस्य पूर्वेऽर्धे प्राचीनदिग्भागे भानुं
प्रकाशमंजते। व्यक्तीकुर्वंति। धृष्णवो धर्षणशीला योद्धार आयुधानीव। यथा-
सिप्रभृतीन्यायुधानि संस्कुर्वंति। एवं निष्कृण्वानाः। स्वभासा जगत्संस्कुर्वाणाः।
गावो गमनस्वभावा अरुषीरारोचमाना मातरः सूर्यप्रकाशस्य निर्मात्र्यो जगज्ज-
नन्यो वोषसः प्रतियंति। प्रतिदिवसं गच्छंति। एवंविधा उषसोऽस्मान्रक्षंत्वि-
त्यर्थः॥ अत्र निरुक्तं। एतास्ता उषसः केतुमकृषत प्रज्ञानमेकस्या एव पूजार्थे
बहुवचनं स्यात् पूर्वेऽर्धेऽंतरिक्षलोकस्य समंजते भानुना निष्कृण्वाना आयु-

धानीव धृष्णवः। निरित्येष समित्येतस्य स्थाने। एमीदेषां निष्कृतं जारिणी-वेत्यपि निगमो भवति। प्रति यंति गावो गमनादरुषीरारोचनान्मातरो भासो निर्मात्र्यः। नि॰ १२. ७.। इति ॥ अक्रत। करोतेर्लुङि मंत्रे घसेति च्लेर्लुक्। निष्कृण्वानाः। कृवि हिंसाकरणयोश्च। अस्मात्ताच्छीलिकश्चानश्। धिन्विकृ-ण्व्योरच्चेत्युप्रत्ययः। इदुदुपधस्य चाप्रत्ययस्येति विसर्जनीयस्य सत्वं। कृदुत्तरप-दप्रकृतिस्वरत्वं ॥

द्वितीयामृचमाह ॥

उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत।
अक्रन्नुषासो वयुनानि पूर्वथा रुशंतं भानुमरुषीरशिश्रयुः ॥ २ ॥

उत्। अपप्तन्। अरुणाः। भानवः। वृथा। सुऽआयुजः। अरुषीः। गाः। अयुक्षत।
अक्रन्। उषसः। वयुनानि। पूर्वऽथा। रुशंतं। भानुं। अरुषीः। अशिश्रयुः ॥ २ ॥

अरुणा आरोचमाना भानव औषस्यो दीप्तयो वृथानायासेन स्वयमेवोद-पप्तन्। उदगमन्। तदनंतरमुषसश्च स्वायुजः सुखेन रथ आयोक्तुं शक्या अरुषीः शुभ्रवर्णा गाः पूर्वमुत्थितान् रश्मीन् ईदृशीः स्ववाहनभूताश्चतुष्पदीर्गा एव वायुक्षत। स्वरथेऽयोजयन्। उक्तं च। अरुण्यो गाव उषसामिति। एवं गो-भिर्युक्तं रथमारुह्योषसः पूर्वथा पूर्वेष्वतीतेष्वहःस्विव वयुनानि सर्वेषां प्राणिनां ज्ञानान्यक्रन्। अकार्षुः। उषःकाले जाते हि सर्वे प्राणिनो ज्ञानयुक्ता भवंति। तदनंतरमरुषीरारोचमानास्ता उषसो रुशंतं। रुशदिति वर्णनाम रोचतेर्ज्वल-तिकर्मणः। नि॰ २. २०.। इति यास्कः। शुभ्रवर्णं भानुं सूर्यमशिश्रयुः। असेवंत। तेन महैकीभवंतीत्यर्थः ॥ अपप्तन्। पत्लृ गतौ। लुङि लृदित्वात् च्लेरङादेशः। पतः पुमिति धातोः पुमागमः। अक्रन्। मंत्रे घसेत्यादिना च्लेर्लुक्। पूर्वथा। प्रत्नपूर्वविश्वेमात्थाल् छंदसि। पा॰ ५. ३. १११.। इतीवार्थे थाल्प्रत्ययः। अशि-श्रयुः। श्रिञ् सेवायां। बहुलं छंदसीति शपः श्लुः। सिजभ्यस्तविदिभ्यश्चेति झेर्जुस्। जुसि च। पा॰ ७. ३. ८३.। इति गुणः ॥

तृतीयामृचमाह ॥

अर्चंति नारीरपसो न विष्टिभिः समानेन योजनेना परावतः।
इषं वहंतीः सुकृते सुदानवे विश्वेदह यजमानाय सुन्वते ॥ ३ ॥

अर्चंति। नारीः। अपसः। न। विष्टिऽभिः। समानेन। योजनेन। आ। पराऽवतः।
इषं। वहंतीः। सुऽकृते। सुऽदानवे। विश्वा। इत्। अह। यजमानाय। सुन्वते ॥ ३ ॥

नारीर्नेत्र्य उषसो विष्टिभिर्निवेशकैः स्वकीयैस्तेजोभिः समानेन योजनेनैकेनैव योजनेनोद्योगेन आ परावत आ दूरदेशात् आ पश्चिमदिग्भागादर्चंति। नभःप्रदेशं पूजयंति। कृत्स्नं जगद्युगपदेव व्याप्नुवंतीत्यर्थः। तत्र दृष्टांतः। अपसो न। युद्धकर्मणोपेताः पुरुषा यथा स्वकीयैरायुधैर्धाटीमुखेन सर्वं देशं व्याप्नुवंति तद्वत्। किं कुर्वत्यः। सुकृते शोभनस्य कर्मणः कर्त्रे सुन्वते सोमाभिषवं कुर्वते सुदानवे कल्याणीर्दक्षिणा ऋत्विग्भ्यो ददते यजमानाय विश्वेदह सर्वमेवेषमन्नं वहंतीरावहंत्यः। प्रयच्छंत्य इत्यर्थः॥ नारीः। नॄ नये। ऋदोरप्। नृनयोर्वृद्धिश्चेति शार्ङ्गरवादिषु पाठात् ङीन्। जसि वा छंदसीति पूर्वसवर्णदीर्घत्वं। अपसः। अपसशब्दादर्शआदिभ्योऽजित्यच्। सुपां सुलुगिति जसः सुः। व्यत्ययेन प्रत्ययात्पूर्वस्योदात्तत्वं। विष्टिभिः। विश प्रवेशने। विशंति प्रविशंतीति विष्टयः किरणाः। क्तिच्क्तौ च संज्ञायामिति क्तिच्। विश्वा। सुपां सुलुगित्यमो डादेशः॥

चतुर्थीमृचमाह॥

अधि पेशांसि वपते नृतूरिवापोर्णुते वक्ष उस्रेव बर्जहं।
ज्योतिर्विश्वस्मै भुवनाय कृण्वती गावो न व्रजं व्यु१षा आवर्तमः ॥ ४ ॥

अधि। पेशांसि। वपते। नृतूःऽइव। अप। ऊर्णुते। वक्षः। उस्राऽइव। बर्जहं।
ज्योतिः। विश्वस्मै। भुवनाय। कृण्वती। गावः। न। व्रजं। वि। उषाः। आवरित्यांवः। तमः॥ ४ ॥

उषाः पेशांसि जगत्स्वाश्लिष्टानि कृष्णवर्णानि तमांस्यध्याधिक्येन वपते। छिनत्ति। तत्र दृष्टांतः। नृतूरिव। नृंस्तूर्वति केशेन रिक्तीकरोतीति नृतूर्नापितः। स यथा केशान्निःशेषेण छिनत्ति। एवमुषा अप्यंधकारं समूलं हिनस्तीत्यर्थः। यद्वा नृतूरिव। नृत्यंती योषिदिव। पेशांसि। रूपनामैतत्। सर्वदर्शनीयानि रूपाण्युषा अधिवपते। स्वात्मन्यधिकं धारयति। एवं प्रथमतोऽधकारं स्वकिरणैर्निरस्य वक्षः स्वकीयमुरःप्रदेशमपोर्णुते। तमसानाच्छादितं करोति। स्वयमाविर्भवतीत्यर्थः। बर्जहं पयस उत्पत्तिस्थानं दोहनसमय उस्रा गौर्यथाविःकरोति तद्वत्। किं कुर्वती। गावो न व्रजं यथा गावः स्वकीयं गोष्ठं स्वयमेव

शीघ्रं व्याप्नुवंति । एवं स्वयमेव प्राचीं दिशं प्राप्य विश्वस्मै लोकाय ज्योतिष्कृण्वती । प्रकाशं कुर्वती । एवमुक्तेन प्रकारेणोषास्तमोऽधकारं व्यावः । विवृतमपश्लिष्टमकरोत् ॥ नृतूरिव । तुर्वी हिंसार्थः । क्विप् चेति क्विप् । राल्लोप इति वलोपः । र्वोरुपधाया इति दीर्घत्वं । यद्वा नृती गात्रविनामे । नृतिशृध्योः कूः । उ० १. ९१. । इति कूप्रत्ययः । वर्जहं । वृङ् संभक्तौ । वृणीते संभजंत गामिति वः पयः । विच् । तज्जहातीति वर्जहः । ओहाङ् त्यागे । खश्प्रकरणे वातशुनीतिलशर्धेष्वजधेट्तुदजहातिभ्य उपसंख्यानं । पा० ३. २. २८. १. । इत्यशर्धशब्दोपपदादपि कृत्यल्युटो बहुलमिति बहुलवचनात् खश् । तस्य सार्वधातुकत्वेन कर्तरि शपि जुहोत्यादित्वात् श्लुः । द्विर्वचनादि । बवयोरभेद इति बत्वं । दिवोदासादित्वात्पूर्वपदाद्युदात्तत्वं । आवः । वृञ् वरणे । लुङि मंत्रे घसेति च्लेर्लुक् । गुणे हल्ङ्याब्भ्य इति लोपः । छंदस्यपि दृश्यते । पा० ६. ४. ७३. । इत्याडागमः ॥

प्रातरनुवाकस्योषस्ये क्रतौ प्रत्यर्चिरित्यष्टावनुवक्तव्याः । आश्विनशस्त्रे च । तथा च सूचितं । प्रत्यर्चिरित्यष्टौ व्युषा आ वो दिविजा इति षळिति त्रैष्टुभं । आ० ४. १४. । इति ॥ अष्टसु प्रथमां सूक्ते पंचमीमृचमाह ॥

प्रत्यर्ची रुशदस्या अदर्शि वि तिष्ठते बाधते कृष्णमभ्वं ।
स्वरुं न पेशो विदथेष्वंजञ्चित्रं दिवो दुहिता भानुमश्रेत् ॥ ५ ॥
प्रति । अर्चिः । रुशत् । अस्याः । अदर्शि । वि । तिष्ठते । बाधते । कृष्णं । अभ्वं ।
स्वरुं । न । पेशः । विदथेषु । अंजन् । चित्रं । दिवः । दुहिता । भानुं । अश्रेत् ॥ ५ ॥

अस्या उषसो रुशद्दीप्यमानमर्चिस्तेजः प्रत्यदर्शि । सर्वैः पूर्वस्यां दिशि प्रथमतो दृश्यते । वितिष्ठते । सर्वासु दिक्षु विविधमवतिष्ठते । व्याप्नोतीत्यर्थः । सर्वा दिशो व्याप्य चाभ्वं । महन्नामैतत् । अतिशयेन विपुलं कृष्णं कृष्णवर्णमंधकारं बाधते । अपसारयति । विदथेषु यज्ञेषु स्वरुं न स्वरुनाम्ना शकलेन युक्तं यूपं यथाज्येनाध्वर्यवोऽजन् । अंजंति । तद्वन्नभसि स्वकीयं पेशो रूपमुषा अनक्ति । संश्लिष्टं करोति । तदनंतरं चित्रं चायनीयं भानुं सूर्यं दिवो दुहिता द्युलोकादुत्पन्नोषा अश्रेत् । असेवत ॥ वितिष्ठते । समवप्रविभ्य इत्यात्मनेपदं । अश्रेत् । श्रिञ् सेवायां । लङि बहुलं छंदसीति शपो लुक् ॥

॥ इति प्रथमस्य षष्ठे चतुर्विंशो वर्गः ॥

षष्ठीमृचमाह ॥

अतारिष्म तमसस्पारमस्योषा उच्छंती वयुना कृणोति ।
श्रिये छंदो न स्मयते विभाती सुप्रतीका सौमनसायाजीगः ॥ ६ ॥

अतारिष्म । तमसः । पारं । अस्य । उषाः । उच्छंती । वयुना । कृणोति ।
श्रिये । छंदः । न । स्मयते । विऽभाती । सुऽप्रतीका । सौमनसाय । अजीगरिति ॥ ६ ॥

अस्य नैशस्य तमसोऽंधकारस्य पारं समाप्तिप्रदेशमतारिष्म । उत्तीर्णा अभूम । अनंतरमुच्छंती नैशं तमो वर्जयंत्युषा वयुना वयुनानि सर्वेषां प्राणिनां ज्ञानानि कृणोति । निर्मिमीते । श्रिये संपदर्थं छंदो न स्मयते । यथोपच्छंदयिता वशीकरणे समर्थः पुरुष आढ्यसमीपं प्राप्य तत्प्रीत्यर्थं स्मयते । हसति । एवं विभाती विशिष्टप्रकाशं कुर्वत्युषाः स्वकीयया निर्मलदीप्त्या हसंतीव दृश्यते । एवं सुप्रतीका विशिष्टप्रकाशरूपत्वेन शोभनांगी सती सौमनसाय सर्वेषां सौमनस्यायाजीगः । अंधकारं भक्षितवती ॥ अतारिष्म । तॄ प्लवनतरणयोः । लुङि सिचि वृद्धिः । तमसः । षष्ठ्याः पतिपुत्रेति विसर्जनीयस्य संहितायां सत्वं । स्मयते । ष्मिङ् ईषद्धसने । भौवादिकः । अजीगः । गॄ निगरणे । लङि बहुलं छंदसीति शपः श्लुः । बहुलं छंदसीत्यभ्यासस्येत्वं । तुजादित्वाद्दीर्घः ॥

सप्तमीमृचमाह ॥

भास्वती नेत्री सूनृतानां दिव स्तवे दुहिता गोतमेभिः ।
प्रजावतो नृवतो अश्वबुध्यानुषो गोअग्राँ उप मासि वाजान् ॥ ७ ॥

भास्वती । नेत्री । सूनृतानां । दिवः । स्तवे । दुहिता । गोतमेभिः ।
प्रजाऽवतः । नृऽवतः । अश्वऽबुध्यान् । उषः । गोऽअग्रान् । उप । मासि ।
वाजान् ॥ ७ ॥

भास्वती तेजस्विनी । सूनृतेति वाङ्नाम । सूनृतानां प्रियसत्यात्मिकानां नेत्री प्रणेत्री कारयित्री । उषसि हि जातायां मनुष्यप्रमुखाः प्राणिनः स्वस्वव्यापारायेतस्ततः शब्दं कुर्वंति । एवंभूता दिवो दुहिता द्युलोकसकाशादुत्पन्नोषा गोतमेभिर्ऋषिभिरस्माभिः स्तवे । स्तूयते । हे उषः । अस्माभिः स्तुता त्वं वाजानन्नान्युपमासि । प्रयच्छ । कीदृशान्वाजान् । प्रजावतः । प्रजाभिः पुत्रपौत्रा-

दिभिर्युक्तान्। नृवतः। दासलक्षणैर्नृभिरुपेतान्। अश्वबुध्यान्। अश्वा बुध्या विद्यमानत्वेन बोद्धव्या येषु वाजेषु तान्। यद्वा। अश्वबुध्नान्। वर्णव्यापत्त्या यकारः। अश्वमूलान्। अश्वैर्हि राजानो धनान्यन्नानि च लभंते। अतोऽन्नानां तन्मूलत्वं। गोअग्रान्। गावोऽग्रे प्रमुखे येषां तादृशान्॥ भास्वती। भा दीप्तौ। असुन्। ततो मतुप्। मादुपधाया इति मतुपो वत्वं। उगितश्चेति ङीप्। नेत्री। ऋन्नेभ्यो ङीप्। उदात्तयणो हल्पूर्वादिति ङीप उदात्तत्वं। स्तवे। ष्टुञ् स्तुतौ। कर्मणि लङि बहुलं छंदसीति बहुलग्रहणाद्यकोऽपि लुक्। लोपस्त आत्मनेपदेष्विति तलोपः। छंदस्युभयथेत्येकारस्यार्द्धधातुकत्वेन ङित्त्वाभावाद्गुणावादेशौ। नृवतः। व्यत्ययेन मतोर्वत्वं। ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं। मासि। मा माने। आदादिकः॥

अष्टमीमृचमाह॥

उष॒स्तम॑श्यां य॒शसं॑ सु॒वीरं॑ दा॒सप्र॑वर्गं र॒यिमश्व॑बुध्यं।
सु॒दंस॑सा॒ श्रव॑सा॒ या वि॒भासि॒ वाज॑प्रसूता सुभगे बृ॒हंतं॑ ॥ ८॥

उषः। तं। अ॒श्या॒ं। य॒शसं॑। सु॒ऽवीरं॑। दा॒सऽप्र॑वर्गं। र॒यिं। अश्व॑ऽबुध्यं।
सु॒ऽदंस॑सा। श्रव॑सा। या। वि॒ऽभासि॑। वाज॑ऽप्रसूता। सु॒ऽभ॒गे॒। बृ॒हंतं॑ ॥ ८॥

हे उषः। उषोदेवते तं रयिं धनमश्यां। प्राप्नुयां। कीदृशं। यशसं। यशसा कीर्त्या युक्तं। सर्वैः प्रशस्यमित्यर्थः। सुवीरं। शोभनैर्वीरैः पुत्रादिभिर्युक्तं। दासप्रवर्गं। प्रकृष्टो वर्गः संघः प्रवर्गः। दासानां कर्मकराणां प्रवर्गो यस्मिन् तं। अनेकैर्भृत्यैरुपेतमित्यर्थः। अश्वबुध्यं। अश्वा बुध्या बोद्धव्या येन धनेन तादृशं। हे सुभगे शोभनधन उषः। सुदंससा शोभनेन कर्मणा युक्तेन श्रवसा श्रवणीयेन स्तोत्रेण प्रीता त्वं वाजप्रसूतास्मभ्यं दत्तान्ना सती बृहंतं प्रौढं या यं रयिं विभासि। विशेषेण प्रकाशयसि तमश्यामिति पूर्वेण संबंधः॥ अश्यां। अशू व्याप्तौ। व्यत्ययेन परस्मैपदं। बहुलं छंदसीति विकरणस्य लुक्। यशसं। अर्शआदित्वान्मत्वर्थीयोऽच्। व्यत्ययेन प्रत्ययात्पूर्वस्योदात्तत्वं। दासप्रवर्गं। दासयत्युपक्षपयति शत्रूनिति दासो भृत्यः। दसु उपक्षये। अस्माण्यंतात्पचाद्यच्। चित्त्वादंतोदात्तत्वं। तदेव बहुव्रीहिस्वरेण शिष्यते। सुदंससा। सोमनसी अलोमोषसी इति बहुव्रीहावुत्तरपदाद्युदात्तत्वं। या। सुपां सुलुगित्यमो डादेशः॥

नवमीमृचमाह ॥

विश्वानि देवी भुवनाभिचक्ष्या प्रतीची चक्षुरुर्विया वि भाति ।
विश्वं जीवं चरसे बोधयंती विश्वस्य वाचमविदन्मनायोः ॥ ९ ॥

विश्वानि । देवी । भुवना । अभिऽचक्ष्य । प्रतीची । चक्षुः । उर्विया । वि । भाति ।
विश्वं । जीवं । चरसे । बोधयंती । विश्वस्य । वाचं । अविदत् । मनायोः ॥ ९ ॥

देवी द्योतमानोषा विश्वानि सर्वाणि भुवना भुवनानि भूतजातान्यभिचक्ष्याभिप्रकाश्य प्रकाशवंति कृत्वानंतरं प्रतीची प्रत्यङ्मुखी सती चक्षुः प्रकाशकेन तेजसोर्वियोर्वी विस्तीर्णा सती विभाति । प्रकाशते । अपि च विश्वं जीवं सर्वं प्राणिजातं चरसे चरणाय स्वस्वव्यापारेषु प्रवर्तनाय बोधयंती निद्रातः सकाशादुद्बोधयंत्युषा विश्वस्य सर्वस्य मनायोः मनसा युक्तस्य वाग्व्यवहारसमर्थस्य प्राणिजातस्य या वागस्ति तां वाचमविदत् । अलभत । अत एवोषसः सूनृतावतीति संज्ञोपपन्ना भवति ॥ अभिचक्ष्या । चक्षिङ् व्यक्तायां वाचि । अयं प्रकाशनार्थोऽपि । समासेऽनञ्पूर्वे इति क्त्वाप्रत्ययस्य ल्यबादेशः । प्रतीची । प्रतिपूर्वादंचतेर्ऋत्विगित्यादिना क्विन् । अनिदितामिति नलोपः । अंचतेश्चोपसंख्यानमिति ङीप् । अच इत्यकारलोपे चाविति दीर्घत्वं । उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वं । उर्विया । उर्वीशब्दादुत्तरस्य सोरियाडियाजीकाराणां चोपसंख्यानं । पा० ७. १. ३९. ३. । इति डियाजादेशः । आदेशसामर्थ्यात्तस्य लोपो न भवति । मनायोः । मन आत्मन इच्छति मनस्यति । सुप आत्मनः क्यच् । क्याच्छंदसीत्युः । वर्णव्यापत्त्या सकार आकारः । यद्वा कर्तुः क्यङ् सलोपश्चेति क्यङ् सकारलोपश्च । अकृत्सार्वधातुकयोरिति दीर्घः ॥

दशमीमृचमाह ॥

पुनःपुनर्जायमाना पुराणी समानं वर्णमभि शुंभमाना ।
श्वघ्नीव कृत्नुर्विज आमिनाना मर्तस्य देवी जरयंत्यायुः ॥ १० ॥

पुनःऽपुनः । जायमाना । पुराणी । समानं । वर्णं । अभि । शुंभमाना ।
श्वघ्नीऽइव । कृत्नुः । विजः । आऽमिनाना । मर्तस्य । देवी । जरयंती । आयुः ॥ १० ॥

पुनःपुनर्जायमाना प्रतिदिवसं सूर्योदयात्पूर्वं प्रादुर्भवंती चिरंतनी पुराणी । नित्येत्यर्थः । यस्मात्समानं वर्णमेकमेव रूपमभि प्राप्य शुंभमाना शोभमाना । विभिन्नेष्वपि दिवसेष्वस्या ऐकरूप्येणावस्थानान्नित्यत्वमित्यर्थः । एवंगुणविशिष्टा देवी देवनशीलोषा मर्त्यस्य मरणधर्मणः सर्वस्य प्राणिजातस्यायुर्जीवनं जरयंत्यूनयंती वर्तते । बह्वीषूषःस्वतितासु हि सर्वेषामायुर्हीयते । उषाश्च पुनःपुनर्जायमानेत्युक्तं । अतः सैवायुर्जरयति । तत्र दृष्टांतः । कृत्नुः कर्तनशीला श्वघ्नीव व्याधस्त्रीव । सा यथा विजश्चलतः पक्षिण आमिनाना पक्षादिच्छेदनेन हिंसंती तेषामायुर्जरयति तद्वत् ॥ पुराणी । पुरेत्यस्मादव्ययात् सायंचिरंप्राह्णे इत्यादिना । पा० ४. ३. २३. । भवार्थे ट्युप्रत्ययः । पुराणप्रोक्तेषु ब्राह्मणकल्पेषु । पा० ४. ३. १०५. । इति निपातनात्तुडभावः । योरनादेशः । टित्त्वाङ्डीप् । व्यत्ययेनांतोदात्तत्वं । शुंभमाना । शुंभ दीप्तौ । शपः पित्त्वादनुदात्तत्वं । शानचो लसार्वधातुकस्वरेण धातुस्वरः शिष्यते । श्वघ्नी । शुना मृगान् हतवान् श्वहा । बहुलं छंदसि । पा० ३. २ ८८. । इति वचनाद्ब्रह्मादिव्यतिरिक्तेऽप्युपपदे हंतेः क्विप् । ऋन्नेभ्यो ङीबिति ङीप् । अल्लोपोऽन इत्यकारलोपः । हो हंतेरिति घत्वं । उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वं । कृत्नुः । कृती छेदने । औणादिकः क्नुप्रत्ययः । विजः । ओविजी भयचलनयोः । विजंति चलंतीति विजः पक्षिणः । आमिनाना । मीञ् हिंसायां । क्र्यादिकः । प्वादीनां ह्रस्व इति ह्रस्वत्वं । शानचश्चित्त्वादंतोदात्तत्वं ॥

॥ इति प्रथमस्य षष्ठे पंचविंशो वर्गः ॥

एकादशीमृचमाह ॥

व्यूर्ण्वती दिवो अंताँ अबोध्यप स्वसारं सनुतर्युयोति ।
प्रमिनती मनुष्या युगानि योषा जारस्य चक्षसा वि भाति ॥ ११ ॥
विऽऊर्ण्वती । दिवः । अंतान् । अबोधि । अप । स्वसारं । सनुतः । युयोति ।
प्रऽमिनती । मनुष्या । युगानि । योषा । जारस्य । चक्षसा । वि । भाति ॥ ११ ॥

दिवो नभसोऽंतान् प्रांतान्व्यूर्ण्वती विवृतान्तमसा वियुक्तान् कुर्वत्युषा अबोधि । सर्वैः प्राणिभिरज्ञायि । ज्ञाताभूत् । तदनंतरं स्वसारमुषसः प्रादुर्भावे सति स्वयमेव सरंती निशां सनुतः । अंतर्हितनामैतत् । अंतर्हितप्रदेशेऽपयु-

योति। अपगमय्य पृथक्करोति। मनुष्या मनुष्याणां संबंधीनि युगानि कृतत्रे-तादीनि प्रमिनती स्वगमनागमनाभ्यां प्रकर्षेण हिंसती जारस्य रात्रेर्जरयितुः सूर्यस्य योषा जायोषाश्चक्षसात्मीयेन प्रकाशेन विभाति। विशेषेण प्रकाशते॥ व्यूर्णवती। ऊर्णुञ् आच्छादने। विपूर्वादस्माल्लटः शतृ। उगितश्चेति ङीप्। शतुरनुम इति नद्या उदात्तत्वं। सनुतः। एतदंतोदात्तं स्वरादिषु निपातितं। अतोऽव्ययसंज्ञायामव्ययादाप्सुप इति सप्तम्या लुक्। युयोति। यु मिश्रणामि-श्रयोः। बहुलं छंदसीति शपः श्लुः। मनुष्या। सुपां सुलुगिति षष्ठ्या डादेशः। युगानि। युजेः करणे कर्मणि वा घञ्। चजोः कु घिण्यतोरिति कुत्वं। उञ्छादिषु कालविशेषे रथाद्युपकरणे च युगशब्दपाठात् लघूपधगुणाभावः। उञ्छादीनां चेत्यंतोदात्तत्वं। जारस्य। दारजारौ कर्तरि णिलुक् चेति घञंतो निपात्यते॥

द्वादशीमृचमाह॥

पशून्न चित्रा सुभगा प्रथाना सिंधुर्न क्षोद उर्विया व्यश्वैत्।
अमिनती दैव्यानि व्रतानि सूर्यस्य चेति रश्मिभिर्दृशाना॥ १२॥

पशून्। न। चित्रा। सुऽभगा। प्रथाना। सिंधुः। न। क्षोदः। उर्विया। वि। अश्वैत्।
अमिनती। दैव्यानि। व्रतानि। सूर्यस्य। चेति। रश्मिऽभिः। दृशाना॥ १२॥

सुभगा शोभनधना चित्रा चायनीया पूजनीयोषाः पशून्न यथा पशून् गो-पालकोऽरण्ये विस्तारयति तथा प्रथाना तेजांसि विस्तारयंत्युर्वियोर्वी महती। एवंभूता सा व्यश्वैत्। सर्वं जगद्व्याप्नोत्। तत्र दृष्टांतः। सिंधुर्न क्षोदः। यथा स्यंदनशीलमुदकं निम्नदेशेऽचिरादेव व्याप्नोति तद्वत्। सैवोषाः सूर्यस्य रश्मिभिः किरणैः सह दृशाना दृश्यमाना सती चेति। प्रज्ञातासीत्। किं कुर्वती। दैव्यानि देवसंबंधीनि व्रतानि दर्शपूर्णमासादीनि कर्माण्यमिनती। अहिंसती। अनुष्ठाने यजमानान्प्रवर्तयंतीत्यर्थः। उषसः प्रादुर्भावानंतरं ह्यग्निहोत्रादीनि सर्वाणि कर्माण्यनुष्ठीयंते। न रात्रौ न सायमस्ति देवया अजुष्टमिति श्रुतेः॥ प्रथाना। प्रथ प्रख्याने। अस्मादंतर्भावितण्यर्थात्ताच्छीलिकश्चानश्। बहुलं छंदसीति शपो लुक्। सिंधुः। स्यंदू प्रस्रवणे। स्यंदेः संप्रसारणं धश्चेत्युप्रत्ययः। निदित्य-नुवृत्तेराद्युदात्तत्वं। अश्वैत्। टुओश्वि गतिवृद्ध्योः। लुङ्ङ्चङोर्विकल्पितत्वात्। पा॰ ३. १. ४९. ५८.। च्लेः सिच्। आगमानुशासनस्यानित्यत्वादिडभावः। सिचि

वृद्धिः । पा० ७. २. १. । अनिडादित्वात् ह्म्यंतक्षणेति वृद्धिप्रतिषेधाभावः । बहुलं छंदसि । पा० ७. ३. ९७. । इतीडागमाभावः । स्कोः संयोगाद्योरिति सलोपः । चेति । चिती संज्ञाने । कर्मणि लुङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । दृशाना । दृशेः कर्मणि लटः शानच् । बहुलं छंदसीति विकरणस्य लुक् ॥

प्रातरनुवाकस्योषस्ये क्रतावौष्णिहे छंदस्युषस्तच्चित्रमिति तृचो विनियुक्तः । आश्विनशस्त्रे च । अथोषस्य इति खंडे सूचितं । उषस्तच्चित्रमाभरेति तिस्र औष्णिहं । आ० ४. १४. । इति ॥

तत्र प्रथमां सूक्ते त्रयोदशीमृचमाह ॥

उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति ।

येन तोकं च तनयं च धामहे ॥ १३ ॥

उषः । तत् । चित्रं । आ । भर । अस्मभ्यं । वाजिनीऽवति ।

येन । तोकं । च । तनयं । च । धामहे ॥ १३ ॥

हे वाजिनीवति । वाजो हविर्लक्षणमन्नं । तद्युक्ता क्रिया वाजिनी । तया क्रियया युक्त उष उषोदेवतेऽस्मभ्यं चित्रं चायनीयं तद्धनमाभर । आहर प्रयच्छ । येन धनेन तोकं पुत्रं तनयं तत्पुत्रं च धामहे । दध्महे धारयामः । अत्र निरुक्तं । उषस्तच्चित्रं चायनीयं धनमाहरास्मभ्यमन्नवति येन पुत्रांश्च पौत्रांश्च दधीमहि । नि० १२. ६. । इति ॥ धामहे । दधातेर्लटि बहुलं छंदसीति शपो लुक् । व्यत्ययेनाद्युदात्तत्वं । यद्वा लोट्याडुत्तमस्य पिच्चेत्याडागमः । प्रत्ययस्य पिद्वद्भावश्च । अतः प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते । अस्मिन्पक्ष एत ऐ । पा० ३. ४. ९३. । इत्यैत्वाभावो व्यत्ययेन द्रष्टव्यः । यद्वृत्तयोगादनिघातः ॥

अथ चतुर्दशीमृचमाह ॥

उषो अद्येह गोमत्यश्वावति विभावरि ।

रेवदस्मे व्युच्छ सूनृतावति ॥ १४ ॥

उषः । अद्य । इह । गोऽमति । अश्वऽवति । विभाऽवरि ।

रेवत् । अस्मे इति । वि । उच्छ । सूनृताऽवति ॥ १४ ॥

हे गोमति । अस्मभ्यं दातव्यैर्गोभिर्युक्ते । तथाश्वावति । अश्वैर्युक्ते । विभावरि

विशिष्टप्रकाशोपेते। सूनृतावति। प्रियसत्यात्मिका वाक् सूनृता। तादृश्या वाचा युक्ते। एवंभूते हे उष उषोदेवतेऽद्येदानीं प्रभातसमय इहास्मिन्देशेऽस्मे अस्माकं रेवत् धनयुक्तं कर्म यथा भवति तथा व्युच्छ। नैशं तमो निवारय ॥ अश्वावति। मंत्रे सोमाश्वेंद्रियेति मतौ दीर्घत्वं। पादादित्वादामंत्रितस्याष्टमिकनिघाताभावः। रेवत्। रयेर्मतौ बहुलमिति संप्रसारणं। छंदसीर इति मतुपो वत्वं। रेशब्दाच्च मतुप उदात्तत्वं वक्तव्यमिति मतुप उदात्तत्वं। उच्छ। उच्छी विवासे। विवासो विसर्जनं ॥

पंचदशीमृचमाह ॥

युक्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः।
अथा नो विश्वा सौभगान्या वह ॥ १५ ॥

युक्ष्व। हि। वाजिनीऽवति। अश्वान्। अद्य। अरुणान्। उषः।
अथ। नः। विश्वा। सौभगानि। आ। वह ॥ १५ ॥

हे वाजिनीवति हविर्लक्षणान्नवत्युष उषोदेवते। अरुणानरुणवर्णानश्वानश्वस्थानीयान् गोविशेषानद्यास्मिन्काले युक्ष्वा हि। योजयैव। हिरवधारणे। अथानंतरं रथमारुह्य विश्वा सौभगानि सर्वाणि सौभाग्यानि नोऽस्मभ्यमावह। आनय ॥ अश्वान्। दीर्घादटि समानपाद इति संहितायां नकारस्य रुत्वं। आतोऽटि नित्यमिति सानुनासिक आकारः। सौभगानि। सुभगान्मंत्र इत्युद्गात्रादिषु पाठाद्भावकर्मणोरर्थयोः प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञित्यञ्प्रत्ययः। हृद्भगसिंध्वंते पूर्वपदस्य चेत्युभयपदवृद्धौ प्राप्तायां सर्वविधीनां छंदसि विकल्पितत्वादचोत्तरपदवृद्धिर्न भवतीत्युक्तं ॥

॥ इति प्रथमस्य षष्ठे षड्विंशो वर्गः ॥

प्रातरनुवाकस्याश्विने क्रतावौष्णिहे छंदस्यश्विना वर्तिरित्ययं तृचः। आश्विनशस्त्रे च। तथा च सूत्रितं। अश्विना वर्तिरस्मदाश्विनावेह गच्छतमिति तृचौ। आ० ४. १५.। इति ॥ तृचे प्रथमां सूक्ते षोडशीमृचमाह ॥

अश्विना वर्तिरस्मदा गोमद्दस्रा हिरण्यवत्।
अर्वाग्रथं समनसा नि यच्छतं ॥ १६ ॥

अश्विना । वर्तिः । अस्मत् । आ । गोऽमत् । दस्रा । हिरण्यऽवत् ।
अर्वाक् । रथं । सऽमनसा । नि । यच्छतं ॥ १६ ॥

उषःसाहचर्यादुद्धिस्थावश्विनाविदमादिकेन तृचेन स्तूयेते । हे अश्विना । अश्ववंतौ व्यापनशीलौ वा देवौ । दस्रा शत्रूणामुपक्षपयितारौ । अस्मदस्माकं वर्तिर्वर्तनहेतुभूतं गृहमा समंताद्गोमद्बहुभिर्गोभिर्युक्तं हिरण्यवद्धितरमणीयधनयुक्तं च यथा भवति तथा समनसा समानमनस्कौ संतौ युवां युष्मदीयं रथमर्वाक् अर्वाचीनमस्मदीयगृहमभिमुखं नियच्छतं । आवर्तयतं ॥ अश्विना । सुपां सुलुगित्याकारः । वर्तिः । वर्ततेऽस्मिन्निति वर्तिर्गृहं । औणादिक इसिप्रत्ययः । अस्मत् । सुपां सुलुगिति षष्ठ्या लुक् । समनसा । समानं मनो ययोस्तौ । समानस्य छंदसीति सभावः ॥

सप्तदशीमृचमाह ॥

यावित्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः ।
आ न ऊर्जं वहतमश्विना युवं ॥ १७ ॥
यौ । इत्था । श्लोकं । आ । दिवः । ज्योतिः । जनाय । चक्रथुः ।
आ । नः । ऊर्जं । वहतं । अश्विना । युवं ॥ १७ ॥

हे अश्विनौ यौ युवां दिवो द्युलोकात् श्लोकमुपश्लोकनीयं प्रशंसनीयं ज्योतिस्तेज इत्थेत्थमस्माभिरनुभूयमानेन प्रकारेण चक्रथुः । कृतवंतौ । केषांचिन्मतेन सूर्याचंद्रमसावश्विनावुच्येते । तदुक्तं यास्केन । तत्कावश्विनौ द्यावापृथिव्यावित्येके सूर्याचंद्रमसावित्येक इति । तथा च प्रकाशकत्वं तयोरुपपन्नं । तौ युवं युवां नोऽस्मभ्यमूर्जं बलप्रदमन्नमावहतं । आनयतं प्रयच्छतं ॥ श्लोकं । श्लोकृ संघाते । अयं स्तुत्यर्थोऽपि । कर्मणि घञ् । ञित्वादाद्युदात्तत्वं ॥

अष्टादशीमृचमाह ॥

एह देवा मयोभुवा दस्रा हिरण्यवर्तनी ।
उषर्बुधो वहंतु सोमपीतये ॥ १८ ॥
आ । इह । देवा । मयःऽभुवा । दस्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी ।
उषःऽबुधः । वहंतु । सोमऽपीतये ॥ १८ ॥

उषर्बुध उषसि प्रबुद्धा अश्वा इहास्मिन्यागे सोमपीतये सोमपानाय दस्रा शत्रूणामुपक्षपयितारावश्विनावावहंतु । आनयंतु । कीदृशौ । देवा । देवनशीलौ दानादिगुणयुक्तौ वा । मयोभुवा । मयस आरोग्यप्रदस्य सुखस्य भावयितारौ । अश्विनौ वै देवानां भिषजाविति श्रुतेः । हिरण्यवर्तनी । वर्ततेऽनेनेति व्युत्पत्त्या वर्तनिशब्देन रथ उच्यते । सुवर्णमयो वर्तनिर्ययोस्तौ ॥ देवेत्यादिषु त्रिषु सुपां सुलुगित्याकारः । सोमपीतये । पा पाने । भावे क्तिनि घुमास्थेतीत्वं । सोमस्य पीतिः सोमपीतिः । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य षष्ठे सप्तविंशो वर्गः ॥

अग्नीषोमाविति द्वादशर्चं नवमं सूक्तं गोतमस्यार्षं । आदितस्तिस्रोऽनुष्टुभः । नवम्याद्यास्तिस्रो गायत्र्यः । अष्टमी जगती त्रिष्टुब्वा । शिष्टाः पंच त्रिष्टुभः । अग्नीषोमौ देवता । तथा चानुक्रांतं । अग्नीषोमौ द्वादशाग्नीषोमीयमाद्यास्तिस्रोऽनुष्टुभ उपांत्यास्तिस्रो गायत्र्योऽष्टमी जगती वेति ॥ अग्नीषोमीयस्य पशोर्वपापुरोडाशहविषामादितस्तिस्र ऋचः क्रमेणानुवाक्याः । सूत्रितं च । अग्नीषोमाविमं सु मे युवमेतानि दिवि रोचनानीति तृचौ । आ० ३. ८. । इति ॥

तत्र प्रथमामृचमाह ॥

अग्नीषोमाविमं सु मे शृणुतं वृषणा हवं ।
प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः ॥ १ ॥
अग्नीषोमौ । इमं । सु । मे । शृणुतं । वृषणा । हवं ।
प्रति । सुऽउक्तानि । हर्यतं । भवतं । दाशुषे । मयः ॥ १ ॥

वृषणा वृषणौ कामानां वर्षितारौ हे अग्नीषोमौ । इममिदानीं प्रयुज्यमानं मे मदीयं हवमाह्वानं सु शृणुतं । सम्यगवगच्छतं । सूक्तानि शोभनानि स्तुतिलक्षणान्यस्माभिः कृतानि वचांसि प्रतिहर्यतं । प्रत्येकं कामयेथां । तदनंतरं दाशुषे चरुपुरोडाशादीनि दत्तवते यजमानाय मयो मयसः सुखस्य दातारौ भवतं ॥ अग्नीषोमौ । अग्निश्च सोमश्च । द्वंद्व ईदग्नेः सोमवरुणयोः । पा० ६. ३. २७. । इतीत्वं । अग्नेः स्तुत्स्तोमसोमाः । पा० ८. ३. ८२. । इति षत्वं । देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरे प्राप्त आमंत्रितस्य चेत्याद्युदात्तत्वं । वृषणा । सुपां सुलुगित्याकारः । वा षपूर्वस्येति विकल्पनादुपधाया दीर्घाभावः । हवं । भावेऽनुपसर्गस्येति

ह्वयतेरप् संप्रसारणं च। सूक्तानि। सुपूर्वाद्वक्तेः कर्मणि निष्ठा। सूपमानात् क्त इत्युत्तरपदांतोदात्तत्वं। हर्यतं। हर्य गतिकांत्योः। भौवादिकः॥

यदा पौर्णमास्यामग्नीषोमावुपांशुयाजस्य देवता तदानीमग्नीषोमा यो अद्येति तस्यानुवाक्या। सूचितं चोक्ता देवता इति खंडे। अग्नीषोमा यो अद्य वामान्यं दिवो मातरिश्वा जभार। आ॰ १. ६.। इति॥ तामेतां द्वितीयामृचमाह॥

अग्नीषोमा यो अद्य वामिदं वचः सपर्यति।
तस्मै धत्तं सुवीर्यं गवां पोषं स्वश्व्यं॥२॥
अग्नीषोमा। यः। अद्य। वां। इदं। वचः। सपर्यति।
तस्मै। धत्तं। सुऽवीर्यं। गवां। पोषं। सुऽअश्व्यं॥२॥

हे अग्नीषोमौ यो यजमानोऽद्यास्मिन्कर्मणि वां युवाभ्यां युष्मदर्थमिदं स्तुतिलक्षणं वचो वाक्यं सपर्यति। पूजितं करोति। तस्मै यजमानाय गवां पशूनां पोषमभिवृद्धिं धत्तं। प्रयच्छतं। कीदृशं पोषं। सुवीर्यं। शोभनेन वीर्येण सामर्थ्येनोपेतं। स्वश्व्यं। शोभनैरश्वैर्युक्तं॥ गवां। सावेकाच इति प्राप्तस्य विभक्त्युदात्तत्वस्य न गोश्वन् साववर्णेति प्रतिषेधः॥

तृतीयामृचमाह॥

अग्नीषोमा य आहुतिं यो वां दाशाद्धविष्कृतिं।
स प्रजया सुवीर्यं विश्वमायुर्व्यश्नवत्॥३॥
अग्नीषोमा। यः। आऽहुतिं। यः। वां। दाशात्। हविःऽकृतिं।
सः। प्रऽजया। सुऽवीर्यं। विश्वं। आयुः। वि। अश्नवत्॥३॥

हे अग्नीषोमौ यो यजमान आहुतिमाज्याहुतिं वां युवाभ्यां दाशात्। दद्यात्। अथवा हविष्कृतिं हविषा चरुपुरोडाशादिना कृतामाहुतिं यो यजमानो दद्यात्। स यजमानः प्रजया पुत्रपौत्रादिना युक्तं सुवीर्यं शोभनवीर्ययुक्तं विश्वं सर्वमायुर्जीवनं व्यश्नवत्। व्याप्नोत॥ आहुतिं। जुहोतेः क्तिनि तादौ चेति गतेः प्रकृतिस्वरत्वं। दाशात्। दाशृ दाने। लेट्याडागमः। यद्वृत्तयोगादनिघातः। हविष्कृतिं। हविषः कृतिः करणं यस्यामाहुतौ। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं।

नित्यं समासेऽनुत्तरपदस्थस्येति विसर्जनीयस्य षत्वं। अश्नवत्। अश्नोतेर्व्यत्ययेन परस्मैपदं। लेट्यडागमः ॥

चतुर्थीमृचमाह ॥

अग्नीषोमा चेति तद्वीर्यं वां यदमुष्णीतमवसं पणिं गाः।

अवातिरतं बृसयस्य शेषोऽविंदतं ज्योतिरेकं बहुभ्यः ॥ ४ ॥

अग्नीषोमा। चेति। तत्। वीर्यं। वां। यत्। अमुष्णीतं। अवसं। पणिं। गाः।

अव। अतिरतं। बृसयस्य। शेषः। अविंदतं। ज्योतिः। एकं। बहुऽभ्यः ॥ ४ ॥

हे अग्नीषोमौ वां युवयोस्तद्वक्ष्यमाणं वीर्यं सामर्थ्यं चेति। अस्माभिर्ज्ञातमभूत्। यद्येन वीर्येण गा अवसं गोरूपमन्नं पणिं पणेः। विभक्तिव्यत्ययः। एतन्नाम्नोऽसुरादमुष्णीत। अपाहार्ष्टं। तथा बृसयस्य। बृसिर्वेष्टनार्थः। बृसयति सर्वं वेष्टयतीति बृसयोऽसुरस्त्वष्टा। तस्यासुरस्य शेषोऽपत्यं। शेष इत्यपत्यनाम शिष्यते प्रयत इति यास्कः। नि॰ ३. २.। त्वष्टृसकाशादुत्पन्नं वृत्रमवातिरतं। अवाधिष्टं। अवतिरतिर्वधकर्मा। प्राणापानरूपयोर्युवयोर्वृत्रेऽनवस्थानात्स मरणं प्राप्तः। तथा चाम्नायते। तस्माज्जंजभ्यमानादग्नीषोमौ निरक्रामतां प्राणापानौ वा एनं तदजहितामिति। ततो वृत्रवधानंतरं ज्योतिर्द्योतमानं सूर्यमेकं नभसि गच्छंतं बहुभ्यो जनेभ्यो बहूनामर्थायाविंदतं। अलभ्याथां। एतत्सर्वं येन वीर्येण क्रियते तदस्माभिर्ज्ञातमित्यर्थः ॥ चेति। चिती संज्ञाने। लुङि चिण् भावकर्मणोरिति च्लेश्चिणादेशः। चिणो लुगिति तशब्दस्य लुक्। अमुष्णीतं। मुष स्तेये। क्र्यादिकः। अवसं। अवतेरौणादिकोऽसच्। शेषः। सुपां सुलुगिति द्वितीयायाः सुः। एकं। इण् गतौ। इणभीकापाशल्यतिमर्चिभ्यः कन्निति कन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं ॥

अग्नीषोमीयस्य पशोर्वपापुरोडाशहविषां युवमेतानीत्याद्यास्तिस्र ऋचः क्रमेण याज्याः। सूत्रं तु पूर्वमेवोदाहृतं। आ॰ ३. ८. ॥ पौर्णमासयागेऽग्नीषोमीयस्य पुरोडाशस्य युवमेतानीत्येषा याज्या। उक्ता देवता इति खंडे सूचितं। युवमेतानि दिवि रोचनानीद्राग्नी अवसागतं। आ॰ १. ८.। इति ॥ तामेतां सूक्ते पंचमीमृचमाह ॥

युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तं।

युवं सिंधूँरभिशस्तेरवद्यादग्नीषोमावमुंचतं गृभीतान् ॥ ५ ॥

युवं। एतानि। दिवि। रोचनानि। अग्निः। च। सोम। सक्रतू इति सऽक्रतू। अधत्तं।
युवं। सिंधून्। अभिऽशस्तेः। अवद्यात्। अग्नीषोमौ। अमुंचतं। गृभीतान् ॥ ५ ॥

हे सोम त्वमग्निश्च सक्रतू समानकर्माणौ संतौ युवं युवां रोचनानि रोचमानानि दीप्यमानान्येतान्यस्माभिर्निशि दृश्यमानानि ताराग्रहादीनि ज्योतींषि दिवि द्युलोकेऽधत्तं। अधारयतं। उत्तरार्द्धस्येयमाख्यायिका। इंद्रो वृत्रं हत्वा ब्रह्महत्याया भीतः सन् पृथिव्यां वृक्षेषु स्त्रीष्वप्सु च तां ब्रह्महत्यां न्यमार्क्षीत् तामामपां शुद्धिरग्नीषोमाभ्यां जातेति। ब्रह्महत्यांशेन पापेन गृभीतान् गृहीतानाक्रांतान् सिंधून् नदीविशेषान् हे अग्नीषोमौ युवामभिशस्तेरभिशस्यमानादभितः प्रकटितादवद्यात्तस्मात्पापादमुंचतं। मुक्तवंतौ। यद्वा वृत्र इंद्रेण हतः सन् नदीषु पपात। ततो मृतेन वृत्रशरीरेण नद्यः सर्वा दुष्टा बभूवुः। तथा च तैत्तिरीयकं। इंद्रो वृत्रमहन् सोऽपोऽभ्यम्रियत। तासां यन्मेध्यं यज्ञियं सदेवमासीत्तदपोदक्रामदिति। तेन दोषेण गृहीता नदीस्तस्माद्दोषादग्नीषोमौ मुक्तवंतौ ॥ रोचनानि। रुच दीप्तौ। अनुदात्तेतश्च हलादेरिति युच्। सिंधून्। दीर्घादटि समानपाद इति नकारस्य रुत्वं। आतोऽटि नित्यमित्यनुनासिकः। गृभीतान्। हृग्रहोर्भ इति भत्वं ॥

अग्नीषोमीयस्योपांशुयाजस्यान्यं दिव इत्येषा याज्या। अग्नीषोमा यो अद्य वामित्यत्र सूत्रमुदाहृतं। आ० १. ६. ॥ तामेतां षष्ठीमृचमाह ॥

आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेः।
अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकं ॥ ६ ॥

आ। अन्यं। दिवः। मातरिश्वा। जभार। अमथ्नात्। अन्यं। परि। श्येनः। अद्रेः।
अग्नीषोमा। ब्रह्मणा। ववृधाना। उरुं। यज्ञाय। चक्रथुः। ऊं इति। लोकं ॥ ६ ॥

हे अग्नीषोमौ युवयोर्मध्येऽन्यमेकमग्निं मातरिश्वा वायुर्दिवो द्युलोकादाजभार। भृगवे यजमानायाजहार। तथा च मंत्रांतरं। द्विजन्मानं रयिमिव प्रशस्तं रातिं भर भृगवे मातरिश्वेति। श्येनः शंसनीयगतिमान्पक्षी पक्ष्याकारा गायत्र्यन्यं सोममद्रेः परि मेरोरुपर्यवस्थितात्स्वर्गादमथ्नात्। बलादाहृतवती। एवं महानुभावौ युवां ब्रह्मणा स्तुत्या मंत्ररूपेण स्तोत्रेण हविर्लक्षणेनान्नेन वा वावृधाना

वर्धमानौ युवां यज्ञायान्येषां देवानां यागायोरुं विस्तीर्णं लोकं स्थानं चक्रथुः । कृतवंतौ । उ इत्येतत्पादपूरणं । आज्यभागदेवतयोरग्नीषोमयोरुत्तरार्धदक्षिणार्ध-योर्हूयते । तन्मध्येऽन्यदेवत्यानि सर्वाणि हवींषि हूयंते । तन्मध्यमं स्थानमग्नीषो-मकृतं । तथा च तैत्तिरीयकं । राजानौ वा एतौ देवानां यदग्नीषोमावंतरा देवता इज्येते देवतानां विधृत्या इति ॥ वावृधाना । वृधेर्लिटि कानच् । छांद-समभ्यासस्य दीर्घत्वं । सुपां सुलुगित्याकारः ॥

॥ इति प्रथमस्य षष्ठेऽष्टाविंशो वर्गः ॥

सप्तमीमृचमाह ॥

अग्नीषोमा हविषः प्रस्थितस्य वीतं हर्यतं वृषणा जुषेथां ।
सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शं योः ॥ ७ ॥

अग्नीषोमा । हविषः । प्रऽस्थितस्य । वीतं । हर्यतं । वृषणा । जुषेथां ।
सुऽशर्माणा । सुऽअवसा । हि । भूतं । अथ । धत्तं । यजमानाय । शं । योः ॥ ७ ॥

हे अग्नीषोमौ प्रस्थितस्य होमार्थमाहवनीयसमीपं प्राप्तं हविष इदं हविर्वीतं भक्षयतं । तदनंतरं च हर्यतं । अस्मान्कामयेथां । हे वृषणा कामानां वर्षितारौ जुषेथां । अस्मदीयं परिचरणं सेवेथां । तदनंतरं सुशर्माणा शोभनसुखौ स्ववसा हि शोभनरक्षणौ च भूतं । अस्माकं भवतं । अथानंतरं हविर्दत्तवते यजमानाय शं शमनीयानां रोगाणां शमनं योः पृथक्कर्तव्यानां भयानां यावनं पृथक्करणं च धत्तं । विधत्तं । कुरुतं । उक्तं च यास्केन । शमनं च रोगाणां यावनं च भयानां । नि० ४. २१. । इति ॥ हविषः । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्च-तुर्थ्यर्थे षष्ठी । वीतं । वी गतिप्रजननकांत्यसनखादनेषु । यसस्तं । अदादि-त्वाच्छपो लुक् । वीतं च हर्यतं चेति चार्थप्रतीतेश्चादिलोपे विभाषेति प्रथमा-यास्तिङ्विभक्तेर्निघातप्रतिषेधः । हर्यतं । पादादित्वान्निघाताभावः । जुषेथां । वृषणेत्यामंत्रितस्यामंत्रितं पूर्वमित्यविद्यमानवत्त्वे सति तिङः परत्वान्निघाता-भावः । सुशर्माणा । स्ववसा । उभयत्र बहुव्रीहौ सोर्मनसी अलोमोषसी इत्युत्त-रपदाद्युदात्तत्वं । भूतं । लोटि बहुलं छंदसीति शपो लुक् ॥

अष्टमीमृचमाह ॥

यो अग्नीषोमा हविषा सपर्याद्देवद्रीचा मनसा यो घृतेन ।

तस्य व्रतं रक्षतं पातमंहसो विशे जनाय महि शर्म यच्छतं ॥ ८ ॥

यः । अग्नीषोमा । हविषा । सपर्यात् । देवद्रीचा । मनसा । यः । घृतेन ।

तस्य । व्रतं । रक्षतं । पातं । अंहसः । विशे । जनाय । महि । शर्म । यच्छतं ॥ ८ ॥

यो यजमानोऽग्नीषोमौ देवद्रीचा देवानंचता देवतापरायणेन श्रद्धायुक्तेन मनसांतःकरणेन युक्तः सन् हविषा चरुपुरोडाशादिना सपर्यात् । सपर्यति परिचरति । यश्च यजमानो घृतेनाज्येनाग्नीषोमौ परिचरति । तस्य यजमानस्य व्रतं कर्म रक्षतं । अंहसः पापात्तं च यजमानं पातं । रक्षतं । विशे यागेषु प्रविशते तस्मै जनाय यजमानाय महि महत्प्रभूतं शर्म सुखं यच्छतं । दत्तं ॥ अग्नीषोमा । देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं । सपर्यात् । सपर पूजायां । कंड्वादिः । लेट्यडागमः । देवद्रीचा । देवानंचतीति देवद्र्यङ् । अंचतेर्ऋत्विगित्यादिना क्विन् । अनिदितामिति नलोपः । विष्वग्देवयोश्च टेरद्र्यंचतौ वप्रत्यये । पा० ६. ३. ९२. । इति देवशब्दस्य टेरद्र्यादेशः । तृतीयैकवचनेऽच इत्यकारलोपे चाविति दीर्घत्वं । कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्तेऽद्रिसध्र्योरंतोदात्तनिपातनं कृत्स्वरनिवृत्त्यर्थमिति वचनादद्र्यादेशोऽंतोदात्तः । विशे । सावेकाच इति विभक्तेरुदात्तत्वं ॥

पौर्णमासयागेऽग्नीषोमीयस्य यागस्याग्नीषोमेत्येषानुवाक्या । तथा च सूचितमुक्ता देवता इति खंडे । अग्नीषोमा सवेदसा युवमेतानि दिवि रोचनानि । आ० १.६. । इति ॥ तामेतां सूक्ते नवमीमृचमाह ॥

अग्नीषोमा सवेदसा सहूती वनतं गिरः । सं देवत्रा बभूवथुः ॥ ९ ॥

अग्नीषोमा । सऽवेदसा । सहूती इति सऽहूती । वनतं । गिरः । सं । देवऽत्रा । बभूवथुः ॥ ९ ॥

हे अग्नीषोमौ युवां सवेदसा समानेनैकेन वेदसा हविर्लक्षणेन धनेन युक्तौ सहूती समानह्वानौ च संतौ गिरोऽस्मदीयाः स्तुतीर्वनतं । संभजेथां । देवत्रा देवेषु सर्वेषु यौ युवां संबभूवथुः । संभूतौ संभावितौ प्रशस्तौ स्थः । राजानौ वा एतौ देवानां यदग्नीषोमाविति श्रुतेः ॥ सवेदसा । समानं वेदो ययोः ।

समानस्य छंदसीति सभावः। वनतं। वन षण संभक्तौ। देवत्रा। देवमनुष्य-पुरुषपुरुमर्त्येत्यादिना सप्तम्यर्थे त्राप्रत्ययः ॥

दशमीमृचमाह ॥

अग्नीषोमावनेन वां यो वां घृतेन दाशति। तस्मै दीदयतं बृहत् ॥१०॥

अग्नीषोमौ। अनेन। वां। यः। वां। घृतेन। दाशति। तस्मै। दीदयतं। बृहत् ॥१०॥

हे अग्नीषोमौ वां युवयोः संबंधी यो यजमानोऽनेन घृतेनोत्पवनादिभिः संस्कृतेनाज्येन युक्तं हविर्वां युवाभ्यां दाशति प्रयच्छति। तस्मै यजमानाय बृहत्प्रभूतं धनं दीदयतं। प्रकाशयतं। प्रयच्छतमित्यर्थः ॥ दाशति। दाशृ दाने। शप्तिपोः पित्त्वादनुदात्तत्वे धातुस्वरः। यद्वृत्तयोगादनिघातः। दीदयतं। दीदयतिर्दीप्तिकर्मा ॥

एकादशीमृचमाह ॥

अग्नीषोमाविमानि नो युवं हव्या जुजोषतं। आ यातमुप नः सचा ॥११॥

अग्नीषोमौ। इमानि। नः। युवं। हव्या। जुजोषतं। आ। यातं। उप। नः। सचा ॥११॥

हे अग्नीषोमौ युवं युवां नोऽस्मदीयानीमानि हव्या हवींषि जुजोषतं। सेवेथां। तदर्थं नोऽस्मान् सचा सह युवामुपायातं। उपागच्छतं ॥ जुजोषतं। जुषी प्रीतिसेवनयोः। लोटि व्यत्ययेन शप्। छांदसं द्विर्वचनं। यद्वा विकरणस्य बहुलं छंदसीति श्लुः। ततो व्यत्ययेन शप्। बहुलं छंदसीति वक्तव्यमिति वचनात्त्राभ्यस्तस्याचि पितीति लघूपधगुणप्रतिषेधाभावः ॥

द्वादशीमृचमाह ॥

अग्नीषोमा पिपृतमर्वतो न आ प्यायंतामुस्रिया हव्यसूदः।
अस्मे बलानि मघवत्सु धत्तं कृणुतं नो अध्वरं श्रुष्टिमंतं ॥१२॥

अग्नीषोमा। पिपृतं। अर्वतः। नः। आ। प्यायंतां। उस्रियाः। हव्यऽसूदः।
अस्मे इति। बलानि। मघवत्ऽसु। धत्तं। कृणुतं। नः। अध्वरं। श्रुष्टिऽमंतं ॥१२॥

हे अग्नीषोमौ नोऽस्माकमर्वतोऽश्वान्पिपृतं। पालयतं। हव्यसूदः क्षीरादि-हविष उत्पादयित्र्य उस्रिया अस्मदीया गावश्चाप्यायंतां। आप्यायिताः प्रवृद्धाः

संतु। मघवत्सु हविर्लक्षणधनयुक्तेष्वस्मे अस्मासु बलानि धत्तं। स्थापयतं। तथा नोऽस्माकमध्वरं यागं श्रुष्टिमंतं धनयुक्तं कृणुतं। कुरुतं॥ पिपृतं। पृ पालनपूरणयोः। पृ इत्येके। जुहोत्यादित्वाच्छपः श्लुः। अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं। हव्यसूदः। हव्यं सूदंते क्षरंतीति हव्यसूदः। षूद क्षरणे। क्विप् चेति क्विप्। अस्मे। सुपां सुलुगिति सप्तम्याः शे आदेशः। श्रुष्टिमंतं। श्रुष्टीति धननाम। श्रु आश्वश्यते व्याप्यत इति श्रुष्टिः। पृषोदरादिः। ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं॥

॥ इति प्रथमस्य षष्ठ एकोनत्रिंशो वर्गः॥

॥ इति प्रथमे मंडले चतुर्दशोऽनुवाकः॥

पंचदशेऽनुवाके द्वादश सूक्तानि। तत्रेमं स्तोममिति षोडशर्चं प्रथमं सूक्तं। आंगिरसस्य कुत्सस्यार्षं। पंचदशीषोडश्यौ त्रिष्टुभौ शिष्टा जगत्यः। अग्निर्देवता। पूर्वो देवा भवतु सुन्वतो रथ इति त्रयः पादा देवदेवत्याः। तन्नो मित्रो वरुण इत्यर्धर्चो लिंगोक्तमित्रावरुणादिषड्देवत्यः। अथवा तस्याप्यग्निरेव देवता मित्रावरुणादयस्तु निपातभाक्त्वेनाप्रधानाः। एतत्सर्वमनुक्रांतं। इमं षोळश कुत्स आग्नेयं तद्धित्रिष्टुबंतं पूर्वो देवास्त्रयः पादा दैवास्तन्नो मित्रोऽर्धर्चो लिंगोक्तदेवतो यद्देवत्यं वा सूक्तमिति॥ प्रातरनुवाकस्याग्नेये क्रतौ जागते छंदस्येतत्सूक्तं। आश्विनशस्त्रे च। तथा च सूत्रितं। इमं स्तोममर्हते सं जागृवद्भिः। आ॰ ४.१३.। इति॥ आभिप्लविके षष्ठेऽहन्याग्निमारुतेऽप्येतत्सूक्तं जातवेदस्यनिविद्धानं। सूत्रितं च। प्रयज्यव इमं स्तोममित्याग्निमारुतं। आ॰ ७.७.। इति॥ तृतीयसवन इमं स्तोममित्येषाग्नीध्रः प्रस्थितयाज्या। सूत्रितं च। इमं स्तोममर्हते जातवेदस इति तार्तीयसवनिक्यः। आ॰ ५.५.। इति॥

तामेतां सूक्ते प्रथमामृचमाह॥

इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव॥१॥
इमं। स्तोमं। अर्हते। जातऽवेदसे। रथंऽइव। सं। महेम। मनीषया।
भद्रा। हि। नः। प्रऽमतिः। अस्य। संऽसदि। अग्ने। सख्ये। मा। रिषाम। वयं। तव॥१॥

अर्हते पूज्याय जातवेदसे जातानामुत्पन्नानां वेदित्रे जातप्रज्ञाय जातधनाय वाग्नये मनीषया निशितया बुद्ध्येममेतत्सूक्तरूपं स्तोमं स्तोत्रं रथमिव यथा

तक्षा रथं संस्करोति तथा संमहेम । सम्यक् पूजितं कुर्मः । अस्याग्नेः संसदि संभजने नोऽस्माकं प्रमतिः प्रकृष्टा बुद्धिर्भद्रा हि । कल्याणी समर्था खलु । अतस्तया बुद्ध्या स्तुम इत्यर्थः । हे अग्ने तव सख्येऽस्माकं त्वया सह सखित्वे सति वयं मा रिषाम । हिंसिता न भवाम । अस्मान्रक्षेत्यर्थः ॥ अर्हते । अर्ह पूजायां । अर्हः प्रशंसायां । पा० ३. २. १३३. । इति लटः शत्रादेशः । शपः पित्त्वा-दनुदात्तत्वं । शतुश्चादुपदेशाल्लसार्वधातुकस्वरेण धातुस्वरः शिष्यते । महेमा । मह पूजायां । रिषामा । रिष हिंसायां । व्यत्ययेन शः । तव । युष्मदस्मदोर्ङ-सीत्याद्युदात्तत्वं ॥

द्वितीयामृचमाह ॥

यस्मै त्वमायजसे स साधत्यनर्वा क्षेति दधते सुवीर्यं ।
स तूताव नैनमश्नोत्यंहतिरग्ने सख्ये मा रिषामा वयं तव ॥ २ ॥

यस्मै । त्वं । आऽयजसे । सः । साधति । अनर्वा । क्षेति । दधते । सुऽवीर्यं ।
सः । तूताव । न । एनं । अश्नोति । अंहतिः । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ २ ॥

यस्मै यजमानाय हे अग्ने त्वमायजसे देवानाभिमुख्येन यजसि स यजमानः साधति । स्वाभिलषितं साधयति । प्राप्नोतीत्यर्थः । किंच स यजमानोऽनर्वा शत्रुभिरप्रत्यृतः सन् क्षेति । निवसति । तथा सुवीर्यं शोभनवीर्योपेतं धनं दधते । धारयति । प्राप्नोतीत्यर्थः । धृत्वा च स यजमानस्तूताव । वर्धते । एनं यजमा-नमंहतिरार्तिर्दारिद्र्यं नाश्नोति । न प्राप्नोतीत्यर्थः । अन्यत्पूर्ववत् ॥ साधति । षिधु संराद्धौ । णिचि सिध्यतेरपारलौकिके । पा० ६. १. ४९. । इत्यात्वं । छंदस्यु-भयथेति शप आर्द्धधातुकत्वाण्णेरनिटीति णिलोपः । क्षेति । क्षि निवास-गत्योः । बहुलं छंदसीति विकरणस्य लुक् । दधते । दध धारणे । भौवादिकः । तूताव । तु इति वृद्ध्यर्थः सौत्रो धातुः । अस्माच्छांदसो लिट् । तुजादि-त्वादभ्यासस्य दीर्घत्वं । अश्नोति । व्यत्ययेन परस्मैपदं । अंहतिः । हंतेरंह च । उ० ४. ६३. । इत्यतिप्रत्ययः । चिदित्यनुवृत्तेरंतोदात्तत्वं ॥

तृतीयामृचमाह ॥

शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदंत्याहुतं ।
त्वमादित्याँ आ वह तान्ह्यु१श्मस्यग्ने सख्ये मा रिषामा वयं तव ॥ ३ ॥

शकेम। त्वा। सम्ऽइधं। साधय। धियः। त्वे इति। देवाः। हविः। अदंति। आऽहुतं।
त्वं। आदित्यान्। आ। वह। तान्। हि। उश्मसि। अग्ने। सख्ये। मा। रिषाम।
वयं। तव ॥ ३ ॥

हे अग्ने त्वा त्वां समिधं सम्यगिद्धं कर्तुं शकेम। शक्ता भूयास्म। त्वं च धियोऽस्मदीयानि दर्शपूर्णमासादीनि कर्माणि साधय। निष्पादय। त्वया हि सर्वे यागा निष्पाद्यंते। यस्मात्त्वे त्वय्यग्नावाहुतं ऋत्विग्भिः प्रक्षिप्तं चरुपुरोडाशादिकं हविर्देवा अदंति। भक्षयंति। तस्मात्त्वं साधयेत्यर्थः। अपि च त्वमादित्यानदितेः पुत्रान् सर्वान्देवानावह। अस्मद्यज्ञार्थमानय। तान्हीदानीमेव वयमुश्मसि। कामयामहे। अन्यत्पूर्ववत् ॥ शकेम। शक्लृ शक्तौ। लिङ्याशिष्यङ्। अदुपदेशाल्लसार्वधातुकानुदात्तत्वेऽङ एव स्वरः शिष्यते। समिधं। ञिइंधी दीप्तौ। अस्मात्संपदादिलक्षणः कर्मणि क्विप्। त्वे। सुपां सुलुगिति सप्तम्येकवचनस्य शे आदेशः। उश्मसि। वश कांतौ। इदंतो मसिः। अदादित्वाच्छपो लुक्। ग्रहिज्येत्यादिना संप्रसारणं ॥

चतुर्थीमृचमाह ॥

भरामेध्मं कृणवामा हवींषि ते चितयंतः पर्वणापर्वणा वयं।
जीवातवे प्रतरं साधया धियोऽग्ने सख्ये मा रिषामा वयं तव ॥ ४ ॥
भराम। इध्मं। कृणवाम। हवींषि। ते। चितयंतः। पर्वणाऽपर्वणा। वयं।
जीवातवे। प्रऽतरं। साधय। धियः। अग्ने। सख्ये। मा। रिषाम। वयं। तव ॥ ४ ॥

हे अग्ने त्वद्यागार्थमिध्ममिंधनसाधनमेकविंशतिदार्वात्मकं समित्समूहं भराम। संपादयाम। तदनंतरं ते तुभ्यं हवींषि चरुपुरोडाशादीन्यन्नानि वयं कृणवाम। करवाम। किं कुर्वंतः। पर्वणा पर्वणा प्रतिपक्षमावृत्ताभ्यां दर्शपूर्णमासाभ्यां चितयंतः। त्वां प्रज्ञापयंतः। स त्वं जीवातवेऽस्माकं जीवनौषधाय चिरकालावस्थानाय धियः कर्माण्यग्निहोत्रादीनि प्रतरं प्रकृष्टतरं साधय। निष्पादय। अन्यत्समानं ॥ चितयंतः। चिती संज्ञाने। संज्ञापूर्वकस्य विधेरनित्यत्वाल्लघूपधगुणाभावः। पर्वणा पर्वणा। नित्यवीप्सयोरिति वीप्सायां द्विर्भावः। तस्य परमाम्रेडितमिति परस्याम्रेडितसंज्ञायामनुदात्तं चेत्यनुदात्तत्वं। प्रतरं। तरबंतात्प्रशब्दात्क्रियाप्रकर्षे वर्तमानादमु च छंदसीत्यमुप्रत्ययः ॥

पंचमीमृचमाह ॥

विशां गोपा अस्य चरंति जंतवो द्विपच्च यदुत चतुष्पदक्तुभिः ।
चित्रः प्रकेत उषसो महाँ अस्यग्ने सख्ये मा रिषामा वयं तव ॥ ५ ॥

विशां । गोपाः । अस्य । चरंति । जंतवः । द्विऽपत् । च । यत् । उत । चतुःऽपत् । अक्तुऽभिः ।
चित्रः । प्रऽकेतः । उषसः । महान् । असि । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ ५ ॥

अस्याग्नेर्जंतवो जाता रश्मयो विशां सर्वेषां प्राणिनां गोपा गोपयितारो रक्षकाः संतश्चरंति । उद्गच्छंति । तदनंतरं यच्च द्विपत् द्विपात् मनुष्यादिकमस्ति । उत अपि च चतुष्पत् चतुष्पात् गवादिकं यदस्ति तदुभयमक्तुभिरंजकैरस्य रश्मिभिरक्तमाश्लिष्टमभूत् । हे अग्ने चित्रो विचित्रदीप्तियुक्तः प्रकेतो रात्रावंधकारावृतानां सर्वेषां प्रज्ञापयिता प्रदर्शयितोषस उषोदेवताया अपि महान् गुणैरधिकोऽसि । भवसि । उषास्तु रात्रेश्चरमभागे प्रकाशयति । अग्निस्तु सर्वस्यां रात्रौ प्रकाशयतीति तस्य गुणाधिक्यं ॥ गोपाः । गुपू रक्षणे । गुपूधूपविच्छीत्यायप्रत्ययः । अस्मात्क्विप् । अतो लोपः । वेरपृक्तलोपाद्वलि लोपो बलीयानिति पूर्वं वलि लोपः । न चातो लोपस्य स्थानिवत्त्वं । न पदांतेत्यादिना यलोपं प्रति तन्निषेधात् । द्विपत् । द्वौ पादावस्येति बहुव्रीहौ संख्यासुपूर्वस्येति पादशब्दस्यांत्यलोपः समासांतः । अयस्मयादित्वेन भत्वे पादः पदिति पद्भावः । एकादेशविकृतस्यानन्यवत्त्वाद्द्वित्रिभ्यां पाद्दन्मूर्धस्वित्युत्तरपदांतोदात्तत्वं । चतुष्पात् । पूर्ववत्समासांतः पद्भावश्च । इदुदुपधस्य चाप्रत्ययस्येति विसर्जनीयस्य षत्वं । त्रः संख्यायाः । फि० २. ५. । इति चतुरशब्द आद्युदात्तः । स एव बहुव्रीहिस्वरेण शिष्यते ॥

॥ इति प्रथमस्य षष्ठे त्रिंशो वर्गः ॥

षष्ठीमृचमाह ॥

त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः ।
विश्वा विद्वाँ आर्त्विज्या धीर पुष्यस्यग्ने सख्ये मा रिषामा वयं तव ॥ ६ ॥

त्वं । अध्वर्युः । उत । होता । असि । पूर्व्यः । प्रऽशास्ता । पोता । जनुषा । पुरःऽहितः ।
विश्वा । विद्वान् । आर्त्विज्या । धीर । पुष्यसि । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ ६ ॥

हे अग्ने त्वमध्वर्युरध्वरस्य यागस्य नेता देवान्प्रति प्रेरयिता यद्वा याग आध्वर्यवस्य कर्ता भवसि। अध्वर्यौ मनुष्ये जाठररूपेण वागिंद्रियाधिष्ठातृत्वेन वावस्थाय यागनिष्पादकोऽसि। उत अपि च पूर्व्यो मुख्यो होता देवानामाह्वाता पूर्ववद्धोतर्यवस्थाय हौत्रस्य कर्मणः कर्ता वासि। भवसि। मानुषो होतामुख्यः। तदपेक्षयास्य मुख्यत्वं। तथा प्रशास्ता प्रकर्षेण शास्ता सर्वेषां शिक्षकोऽसि। यद्वा होतर्यज पोतर्यजेत्यादिना प्रैषेण शास्तीति मैत्रावरुणः प्रशास्ता। पूर्ववत्तस्मिन्नवस्थाय यागनिष्पादकोऽसि। पोता यज्ञस्य पावयिता शोधयितासि। यद्वा पोतृनामकस्यर्त्विजः पूर्ववदधिष्ठाय यागनिष्पादकोऽसि। तथा जनुषा जन्मना स्वाभाव्येन पुरोहितः पुरस्तादागामिनि स्वर्गादौ हितोऽनुकूलाचरणोऽसि। यद्वा सर्वेषु कर्मसु पूर्वस्यां दिश्याहवनीये स्थापितोऽसि। अथवा पुरोहितो ब्रह्मा देवपुरोहितस्य बृहस्पतेः प्रतिनिधित्वात्। तथा च मंत्रांतरं। बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणामिति। अतस्तस्मिन्ब्रह्मणि पूर्ववदवस्थाय तद्रूपः सन्विश्वा सर्वाण्यार्त्विज्या ऋत्विजः कर्माण्याध्वर्यवादीनि विद्वान् जानंस्त्वं हे धीर प्राज्ञाग्ने पुष्यसि। न्यूनाधिकभावराहित्येन संपूर्णानि करोषि। अन्यत्समानं॥ जनुषा। जनेरुसिः। पुरोहितः। दधातेः कर्मणि निष्ठा। पूर्वाधरेत्यादिनासिप्रत्ययांतः पुरस्शब्दोऽंतोदात्तः। तद्धितश्चासर्वविभक्तिरित्यव्ययसंज्ञायां पुरोऽव्ययमिति गतित्वाद्गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वं। आर्त्विज्या। ब्राह्मणादित्वात् ष्यञ्। ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं।

सप्तमीमृचमाह॥

यो विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित्सन्तळिदिवाति रोचसे।
राव्याश्चिदंधो अति देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव॥ ७॥

यः। विश्वतः। सुऽप्रतीकः। सऽदृङ्। असि। दूरे। चित्। सन्। तळित्ऽइव। अति। रोचसे। राव्याः। चित्। अंधः। अति। देव। पश्यसि। अग्ने। सख्ये। मा। रिषाम। वयं। तव॥ ७॥

हे अग्ने यस्त्वं सुप्रतीकः शोभनांगः सन् विश्वतः सर्वस्मादपि सदृङ्ङसि। अन्यूनः सदृशो भवसि। स त्वं दूरे चित्सन् दूरेऽपि वर्तमानः सन् तळिदिव। अंतिकनामैतत्। अंतिके वर्तमान इवातिरोचसे। अतिशयेन दीप्यसे। तदुक्तं यास्केन। दूरेऽपि सन्नंतिक इव सन्दृश्यसे। नि० ३.११.। इति। राव्याश्चित् रात्रेः संबंधिनमंधो बहुलमंधकारमपि हे देव द्योतमानाग्नेऽतिपश्यसि। अतीत्य

प्रकाशयसि। अन्यत्पूर्ववत् ॥ सुप्रतीकः। शोभनं प्रतीकोऽगं यस्य। ऋत्वादयश्चेत्युत्तरपदाद्युदात्तत्वं। सदृङ्। समानान्ययोश्चेति वक्तव्यं। पा॰ ३. २. ६०. १.। इति समानोपपदाद्दृशेः क्विन्। दृग्दृशवतुष्विति समानस्य सभावः। दृक्स्ववःस्वतवसां छंदसि। पा॰ ७. १. ८३.। इति नुम्। संयोगांतलोपः। क्विन्प्रत्ययस्य कुरिति कुत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं। राव्याः। रात्रेश्चाजसौ। पा॰ ४. १. ३१.। इति ङीप् ॥

अष्टमीमृचमाह ॥

पूर्वो देवा भवतु सुन्वतो रथोऽस्माकं शंसो अभ्यस्तु दूढ्यः।
तदा जानीतोत पुष्यता वचोऽग्ने सख्ये मा रिषामा वयं तव ॥ ८ ॥
पूर्वः। देवाः। भवतु। सुन्वतः। रथः। अस्माकं। शंसः। अभि। अस्तु। दुःऽध्यः।
तत्। आ। जानीत। उत। पुष्यत। वचः। अग्ने। सख्ये। मा। रिषाम। वयं। तव ॥ ८ ॥

हे देवा अग्न्यवयवभूताः सर्वे देवाः सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य रथः पूर्व अन्येषामयजमानानां रथेभ्यो मुख्यो भवतु। अपि चास्माकं शंसः शंसनीयमभिशापरूपं पापं दूढ्यो दुर्धियः पापबुद्धीनस्मदनिष्टाचरणपराञ्छत्रूनभ्यस्तु। अभिभवतु। तान्बाधतां। तदिदं मद्वाक्यं हे देवा आजानीत। आभिमुख्येनावगच्छत। उत अपि च तद्वचोऽस्मदीयं वचनं तदर्थाचरणेन पुष्यत। प्रवर्धयत। हे सर्वदेवात्मकाग्ने सख्य इत्यादि पूर्ववत् ॥ सुन्वतः। शतुरनुम इति विभक्तेरुदात्तत्वं। शंसः। शंस्यते कीर्त्यत इति शंसोऽभिशापः। कर्मणि घञ्। ञित्वादाद्युदात्तत्वं। दूढ्यः। दुष्टं ध्यायंतीति दुर्धियः। ध्यै चिंतायामित्यस्मात् क्विप् चेति क्विप्। दृशिग्रहणानुवृत्तेस्तस्य च विध्यंतरोपसंग्रहार्थत्वात्संप्रसारणं। पृषोदरादिषु ध्यै चेति पाठाद्दुरो रेफस्योत्वं। उत्तरपदादेष्टुत्वं च ॥

नवमीमृचमाह ॥

वधैर्दुःशंसाँ अप दूढ्यो जहि दूरे वा ये अंति वा के चिदत्रिणः।
अथा यज्ञाय गृणते सुगं कृध्यग्ने सख्ये मा रिषामा वयं तव ॥ ९ ॥
वधैः। दुःऽशंसान्। अप। दुःऽध्यः। जहि। दूरे। वा। ये। अंति। वा। के। चित्। अत्रिणः।
अथ। यज्ञाय। गृणते। सुऽगं। कृधि। अग्ने। सख्ये। मा। रिषाम। वयं। तव ॥ ९ ॥

हे अग्ने त्वं वधैर्हननसाधनैरायुधैर्दुःशंसान्दुःखेन कीर्तनीयान्दूढ्यो दुर्धियः पापबुद्धीनपजहि। वधं प्रापय। ये केचित् ये केचन दूरे विप्रकृष्टदेशे वांतिके समीपदेशे वा वर्तमाना अत्रिणोऽत्तारो राक्षसादयो विद्यंते तान्दुर्धियोऽपजहीत्यर्थः। अथानंतरं यज्ञाय यज्ञपतये गृणते त्वां स्तुवते यजमानाय सुगं शोभनं मार्गं कृधि। कुरु। अन्यत्पूर्ववत् ॥ वधैः। हनश्च वध इति हंतेः करणेऽप् वधादेशश्च। स चादंतोऽंतोदात्तः। तस्यातो लोपे सत्युदात्तनिवृत्तिस्वरेण प्रत्ययस्योदात्तत्वं। दुःशंसान्। ईषद्दुःसुष्विति कर्मणि खल्। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं। जहि। लोटि हिः। हंतेर्ज इति जादेशः। तस्यासिद्धवदत्रा भादित्यसिद्धत्वाद्धेर्लुगभावः। अंति। अंतिकस्य कादिलोपो बहुलमिति कलोपः। अत्रिणः। अदेस्त्रिनि चेति त्रिनिप्रत्ययः। इकारो नकारपरित्राणार्थः। गृणते। शतुरनुम इति विभक्तेरुदात्तत्वं। सुगं। सुदुरोरधिकरण इति गमेर्डः। कृधि। श्रुशृणुपृकृवृभ्यश्छंदसीति हेर्धिः। बहुलं छंदसीति विकरणस्य लुक् ॥

दशमीमृचमाह ॥

यदयुक्था अरुषा रोहिता रथे वातजूता वृषभस्येव ते रवः।
आदिन्वसि वनिनो धूमकेतुनाग्ने सख्ये मा रिषामा वयं तव ॥ १० ॥

यत्। अयुक्थाः। अरुषा। रोहिता। रथे। वातऽजूता। वृषभस्यऽइव। ते। रवः।
आत्। इन्वसि। वनिनः। धूमऽकेतुना। अग्ने। सख्ये। मा। रिषाम। वयं। तव ॥ १० ॥

हे अग्ने। अरुषा रोचमानौ रोहिता लोहितवर्णौ। रोहित इत्यग्नेरश्वस्याख्या। रोहितोऽग्नेरिति दर्शनात्। रोहितेन त्वाग्निर्देवतानागमयत्विति मंत्रवर्णाच्च। एते वै देवाश्वा इति हि तत्र व्याख्यातं। वातजूतौ। वातस्य वायोर्जूतं जवो वेग इव ययोस्तौ। ईदृशावश्वौ रथे यद्यदायुक्थाः। अयोजयः। तदानीं वनानि दहतस्तव रवः शब्दो वृषभस्येव दृप्तस्य महोक्षस्य शब्द इव गंभीरो भवति। आदनंतरं वनिनो वनसंबद्धान्वृक्षान्धूमकेतुना। धूमः केतुः प्रज्ञापको यस्य तादृशेन रश्मिनेन्वसि। व्याप्नोषि। अन्यत्पूर्ववत् ॥ अयुक्थाः। युजिर् योगे। लुङि झलो झलीति सकारस्य लोपः। अरुषेत्यादिद्विवचनेषु सुपां सुलुगित्याकारः। रवः। रु शब्दे। ऋदोरबिति भावेऽप्। इन्वसि। इवि व्याप्तौ। भौवादिकः। इदित्त्वान्नुम् ॥

॥ इति प्रथमस्य षष्ठ एकत्रिंशो वर्गः ॥

एकादशीमृचमाह ॥

अध स्वनादुत बिभ्युः पतत्रिणो द्रप्सा यत्ते यवसादो व्यस्थिरन् ।
सुगं तत्ते तावकेभ्यो रथेभ्योऽग्ने सख्ये मा रिषामा वयं तव ॥ ११ ॥

अध । स्वनात् । उत । बिभ्युः । पतत्रिणः । द्रप्साः । यत् । ते । यवसऽअदः । वि । अस्थिरन् ।
सुऽगं । तत् । ते । तावकेभ्यः । रथेभ्यः । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ ११ ॥

हे अग्ने । अध दग्धुं वनप्रवेशानंतरं स्वनात्त्वदीयात्पूर्वोक्तगंभीरशब्दात् । उतशब्दोऽप्यर्थः । पतत्रिणः पक्षिणोऽपि बिभ्युः । बिभ्यति भयं प्राप्नुवंति । उत्पतनेन देशांतरं गंतुं समर्थाः पक्षिणोऽपि यदा भयं प्राप्नुवंति किमु वक्तव्यमन्येषां तत्रत्यानां वृकादीनां भीतिर्जायत इति । अतस्त्वयि वनं प्रविशति सर्वे प्राणिनो भयं प्राप्नुवंतीत्यर्थः । तादृशस्य ते तव द्रप्सा ज्वालैकदेशा यवसादो यवसानामरण्ये वर्तमानानां तृणानामत्तारः संतो यद्यदा व्यस्थिरन् । विविधमवतिष्ठंते । तत्तदा ते तव सर्वमरण्यं सुगं सुखेन गंतुं शक्यं । अतस्तावकेभ्यस्त्वदीयेभ्यो रथेभ्यश्च तदरण्यं सुगं भवति । पूर्वं प्रवृत्तैर्ज्वालाग्रैस्तृणादिषु दग्धेषु सत्सु त्वदीया रथाः प्रतिबंधमंतरेण पश्चाद्गच्छंतीति भावः । अन्यत्समानं ॥ बिभ्युः । ञिभी भये । छांदसो लिट् । एरनेकाच इति यण् । व्यस्थिरन् । समवप्रविभ्य इति तिष्ठतेरात्मनेपदं । लुङि व्यत्ययेन झस्य रन् । स्थघ्वोरिच्चेतीत्वं । ह्रस्वादंगादिति सलोपः । तावकेभ्यः । तवकममकावेकवचन इति युष्मदस्तवकादेशः ॥

द्वादशीमृचमाह ॥

अयं मित्रस्य वरुणस्य धायसेऽवयातां मरुतां हेळो अद्भुतः ।
मृळा सु नो भूत्वेषां मनः पुनरग्ने सख्ये मा रिषामा वयं तव ॥ १२ ॥

अयं । मित्रस्य । वरुणस्य । धायसे । अवऽयातां । मरुतां । हेळः । अद्भुतः ।
मृळ । सु । नः । भूतु । एषां । मनः । पुनः । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ १२ ॥

अयमग्नेः स्तोता मित्रस्याहरभिमानिनो देवस्य वरुणस्य राज्यभिमानिनश्च संबंधिने धायसे धारणायावस्थापनाय भवतु । मित्रावरुणाविममग्नेः स्तोतारं धारयतामित्यर्थः । अवयातामवस्ताद्गच्छतां स्वर्गलोकस्याधस्तादंतरिक्षे

वर्तमानानां मरुतामेतत्संज्ञानां देवानां हेळः क्रोधोऽद्भुतो महान्भवति। अद्भुत इत्येतन्महन्नाम। तस्मात्क्रोधादिममग्नेः स्तोतारं मित्रावरुणौ रक्षतामिति शेषः। अपि च नोऽस्मान् हे अग्ने सु मृळ। सुष्ठु मृडय। सुखय। एषां मरुतां मनश्च पुनर्भूतु। पुनरपि प्रसन्नं भवतु। अन्यत्समानं॥ धायसे। वहिहाधाञ्भ्यश्छंदसीति भावेऽसुन्। णिदित्यनुवृत्तेरातो युक् चिण्कृतोरिति युक्। अवयातां। या प्रापणे। अस्मादवपूर्वाल्लटः शतृ। शतुरनुम इति विभक्तेरुदात्तत्वं। मृळा। मृड सुखने। छंदस्युभयथेति शप आर्द्धधातुकत्वाण्णेरनिटीति णिलोपः। द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं। भूतु। बहुलं छंदसीति शपो लुक्॥

त्रयोदशीमृचमाह॥

देवो देवानामसि मित्रो अद्भुतो वसुर्वसूनामसि चारुरध्वरे।
शर्मन्त्स्याम तव सप्रथस्तमेऽग्ने सख्ये मा रिषामा वयं तव॥ १३॥

देवः। देवानां। असि। मित्रः। अद्भुतः। वसुः। वसूनां। असि। चारुः। अध्वरे।
शर्मन्। स्याम। तव। सप्रथःऽतमे। अग्ने। सख्ये। मा। रिषाम। वयं। तव॥ १३॥

हे अग्ने देवो द्योतमानस्त्वं देवानां सर्वेषामद्भुतो महान्मित्रोऽसि। प्रौढः सखा भवसि। तथा चारुः शोभनस्त्वमध्वरे यज्ञे वसूनां सर्वेषां धनानां वसुरसि। निवासयिता भवसि। अतोऽस्माकं वसूनि देहीत्यर्थः। किंच संप्रथस्तमे सर्वतः पृथुतमेऽतिशयेन विस्तीर्णे तव त्वत्संबंधिनि शर्मणि यज्ञगृहे स्याम। प्रवर्तमाना भवेम। अन्यत्पूर्ववत्॥ शर्मन्। सुपां सुलुगिति सप्तम्या लुक्॥

चतुर्दशीमृचमाह॥

तत्ते भद्रं यत्समिद्धः स्वे दमे सोमाहुतो जरसे मृळयत्तमः।
दधासि रत्नं द्रविणं च दाशुषेऽग्ने सख्ये मा रिषामा वयं तव॥ १४॥

तत्। ते। भद्रं। यत्। संऽइद्धः। स्वे। दमे। सोमऽआहुतः। जरसे। मृळयत्ऽतमः।
दधासि। रत्नं। द्रविणं। च। दाशुषे। अग्ने। सख्ये। मा। रिषाम। वयं। तव॥ १४॥

हे अग्ने ते त्वत्संबंधि तत्खलु भद्रं भजनीयं। प्रशस्तमित्यर्थः। किं पुनस्तत्। स्वे दमे स्वकीय उत्तरवेदिलक्षणे निवासस्थाने। तस्यैष स्वो लोको यदुत्तर-

वेदीनाभिरिति श्रुतेः। तस्यामुत्तरवेद्यां समिद्धः सम्यक् इद्धः प्रज्वलितः सोमाहुतो हुतेन सोमरसेन संतर्पितः सन् जरसे। ऋत्विग्भिः स्तूयस इति यदस्ति तद्भद्रमित्यर्थः। एवं प्रशस्तस्त्वं मृळयत्तमोऽतिशयेनास्माकं सुखयिता भूत्वा रत्नं रमणीयं कर्म फलं वा द्रविणं धनं च दाशुषे हविर्दत्तवते यजमानाय दधासि। प्रयच्छसि। अन्यत्समानं॥ समिद्धः। ञिइंधी दीप्तौ। कर्मणि निष्ठा। श्वीदितो निष्ठायामितीट्प्रतिषेधः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। सोमाहुतः। सोमेनाहुतः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। जरसे। जरतिः स्तुतिकर्मा। व्यत्ययेन कर्मणि कर्तृप्रत्ययः। यद्वृत्तयोगादनिघातः। दधासि। अनुदात्ते चेत्यभ्यस्तस्याद्युदात्तत्वं॥

पंचदशीमृचमाह॥

यस्मै त्वं सुद्रविणो ददाशोऽनागास्त्वमदिते सर्वताता।
यं भद्रेण शवसा चोदयासि प्रजावता राधसा ते स्याम॥ १५॥

यस्मै। त्वं। सुऽद्रविणः। ददाशः। अनागाःऽत्वं। अदिते। सर्वऽताता।
यं। भद्रेण। शवसा। चोदयासि। प्रजाऽवता। राधसा। ते। स्याम॥ १५॥

हे सुद्रविणः शोभनधनादितेऽखंडनीयाग्ने सर्वताता सर्वासु कर्मततिषु। यद्वा सर्वेषु यज्ञेषु वर्तमानाय यस्मै यजमानायानागास्त्वमपापत्वं पापराहित्येन कर्माहंतां त्वं ददाशः। प्रयच्छसि। स यजमानः समृद्धो भवति। यं च यजमानं भद्रेण भजनीयेन कल्याणेन शवसा बलेन चोदयासि। संयोजयसि। सोऽपि समृद्धो भवति। वयं च स्तोतारः प्रजावता प्रजाभिः पुत्रपौत्रैर्युक्तेन ते राधसा त्वया दत्तेन धनेन युक्ताः स्याम। भवेम॥ सुद्रविणः। शोभनानि द्रविणानि धनानि यस्य। द्रु गतौ। द्रुदक्षिभ्यामिनन्। द्रविणशब्दस्यांते सकारोपजनश्छांदसः। ददाशः। दाशृ दाने। लेट्यडागमः। बहुलं छंदसीति शपः श्लुः। अभ्यस्तानामादिरित्याद्युदात्तत्वं। सर्वताता। सर्वदेवात्तातिलिति स्वार्थे तातिल्प्रत्ययः। यास्कपक्षे तु सर्वा स्तुतयो येषु यागेष्विति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। वर्णव्यापत्त्यात्वं। उभयत्रापि सुपां सुलुगिति सप्तम्या डादेशः। चोदयासि। चुद प्रेरणे। लेट्याडागमः॥

षोडशीमृचमाह ॥

स त्वमग्ने सौभगत्वस्य विद्वानस्माकमायुः प्र तिरेह देव ।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ १६ ॥
सः । त्वं । अग्ने । सौभगऽत्वस्य । विद्वान् । अस्माकं । आयुः । प्र । तिर । इह । देव ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ १६ ॥

हे देव दानादिगुणयुक्ताग्ने स पूर्वोक्तगुणविशिष्टस्त्वं सौभगत्वस्य सुभगत्वं सौभाग्यं विद्वान् जानन् इहास्मिन्कर्मण्यस्माकमायुः प्रतिर । प्रवर्धय । प्रपूर्वस्तिरतिर्वर्धनार्थः । त्वया प्रवर्धितं नोऽस्माकं तदायुर्मित्रादयः षट् देवता मामहंतां । पूजयंतां । रक्षंत्वित्यर्थः । मित्रः प्रमीतेस्त्राता । वरुणोऽवशिष्टानां निवारयिता । अदितिरदीनाखंडनीया वा देवमाता । सिंधुः स्यंदनशीलोदकात्मा देवता । पृथिवी प्रथिता भूदेवता । उतेति समुच्चये । द्यौः प्रकाशमाना द्युलोकात्मा देवता । एताश्च सर्वा अग्निना प्रवर्धितमायुर्मामहंतामिति पूर्वत्रान्वयः ॥ सौभगत्वस्य । सुभगस्य भावः सौभगं । सुभगान्मंत्र इत्युद्गात्रादिषु पाठाद्भावेऽञ् । पुनरपि भावप्रत्ययोत्पत्तिश्छांदसी । मामहंतां । मह पूजायां । भौवादिकः । लोटि बहुलं छंदसीति शपः श्लुः । तुजादित्वादभ्यासस्य दीर्घत्वं ॥

॥ इति प्रथमस्य षष्ठे द्वात्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके षष्ठोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

प्रथमे मंडले पंचदशेऽनुवाके प्रथमं सूक्तं व्याख्यातं। द्वे विरूपे इत्येकादशर्चं द्वितीयं सूक्तं। अत्रानुक्रम्यते। द्वे एकादशौषसाय वाग्नय इति। ऋषिश्चान्यस्मादिति परिभाषया कुत्सस्यानुवृत्तेरांगिरसः कुत्स ऋषिः। अनादेशपरिभाषया त्रिष्टुप् छंदः। उषसि प्रातःकाले हविर्भाग्योऽग्निरस्ति स देवता। यद्वाग्नेयं तदिति पूर्वोक्तत्वात्तुह्यादिपरिभाषयेदमादीनि पंच सूक्तानि केवलाग्निदेवत्यानि। अतोऽस्य सूक्तस्यौषसगुणविशिष्टोऽग्निः शुद्धोऽग्निर्वा देवतेति वाशब्दार्थः॥ प्रातरनुवाकस्याग्नेये क्रतौ त्रैष्टुभे छंदसीदमादिके द्वे सूक्ते। तथा च सूचितमथैतस्या इति खंडे। द्वे विरूपे इति सूक्ते। आ० ४. १३.। इति॥ आश्विनशस्त्रे चैते प्रातरनुवाकन्यायेन तस्यैव समाम्नायस्येत्यतिदिष्टत्वात्॥

तत्र प्रथमामृचमाह॥

द्वे विरू॑पे चरतः॒ स्वर्थे॑ अ॒न्यान्या॑ व॒त्समुप॑ धापयेते।
हरि॑र॒न्यस्यां॒ भव॑ति स्व॒धावा॑ञ्छु॒क्रो अ॒न्यस्यां॑ ददृशे सु॒वर्चाः॑॥ १॥

द्वे इति॑। विरू॑पे॒ इति॒ विऽरू॑पे। च॒र॒तः॒। स्वर्थे॒ इति॑ सु॒ऽअर्थे॑। अ॒न्याऽअ॑न्या।
व॒त्सं। उप॑। धा॒प॒ये॒ते॒ इति॑।
हरिः॑। अ॒न्यस्यां॑। भव॑ति। स्व॒धाऽवा॑न्। शु॒क्रः। अ॒न्यस्यां॑। द॒दृ॒शे॒। सु॒ऽवर्चाः॑॥ १॥

स्वर्थे स्वरणे शोभनगमनागमने। यद्वा। अर्थः प्रयोजनं। शोभनप्रयोजनोपेते विरूपे विषमरूपे शुक्लकृष्णतया नानारूपे द्वे अहोरात्रे चरतः। पुनःपुनः पर्यावर्तेते। ते चाहोरात्रे अग्नेः सूर्यस्य च जनन्यौ। तत्र रात्रेः पुत्रः सूर्यः। स हि गर्भवद्रात्रावंतर्हितः सन् तस्याश्चरमभागादुत्पद्यते। अह्नः पुत्रोऽग्निः। स हि तत्र विद्यमानोऽपि प्रकाशराहित्येनासत्कल्पः सन् तस्मादह्नः सकाशान्निर्मुक्तः प्रकाशमानं स्वात्मानं लभते। अनयोरेतयोः पुत्रत्वं च तैत्तिरीयैराम्नायते। तयोरेतौ वत्सावग्निश्चादित्यश्च। रात्रेर्वत्सः श्वेत आदित्यः। अह्नोऽग्निस्ताम्रोऽरुण

इति । ते चाहोरात्रे वत्सं स्वं स्वं पुत्रमन्यान्या परस्परव्यतिहारेणोपधापयेते । स्वकीयं रसं पाययतः । यद्रात्र्या कर्तव्यं स्वपुत्रस्यादित्यस्य रसस्य पायनं तदहः करोति । यदह्ना कर्तव्यं स्वपुत्रस्याग्ने रसस्य पायनं तद्रात्रिः करोति । एतच्च सायंप्रातःकालीनाहुत्यभिप्रायं । श्रूयते च । तस्मा अग्नये सायं हूयते सूर्याय प्रातरिति । यस्मादेवं तस्मादन्यस्यां स्वजनन्या अन्यस्यामहरात्मिकायामग्नेर्जनन्यां हरी रसहरणशील आदित्यः स्वधावान् हविर्लक्षणान्नवान्भवति । शुक्रो निर्मलदीप्तिरग्निः स्वजनन्या अन्यस्यां रात्र्यामादित्यस्य जनन्यां सुवर्चाः शोभनदीप्तियुक्तः सन्ददृशे । दृश्यते ॥ स्वर्थे । ऋ गतौ । उषिकुषिगार्तिभ्यस्थन्निति भावे कर्मणि वा थन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं । शोभनोऽर्थो ययोस्ते । आद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं । अन्यान्या । कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यं । समासवच्च बहुलमिति द्विर्भावः । बहुलग्रहणात्समासवद्भावाभावे तस्य परमाम्रेडितमिति परस्याम्रेडितसंज्ञायामनुदात्तं चेत्याम्रेडितानुदात्तत्वं । धापयेते । धेट् पाने । आदेच इत्यात्वं । ततो हेतुमति णिच् । अर्तिह्रीत्यादिना धातोः पुगागमः । तत्र हि लक्षणप्रतिपदोक्तपरिभाषा नास्तीति ज्ञापितं शाछासाह्वाव्येति कृतात्वानां निर्देशेन । स हि युक्प्राप्तिख्यापनार्थः । यदि तत्र लक्षणप्रतिपदोक्तपरिभाषया पुक् न प्राप्नोति सोऽनर्थकः स्यात् । तस्मादध्यापयतीत्यादाविव धापयेते इत्यत्रापि पुगागमः सिद्धः । निगरणचलनार्थेभ्यश्च । पा॰ १. ३. ८७. । इति प्राप्तस्य परस्मैपदस्य पादिषु धेट उपसंख्यानं । पा॰ १. ३. ८९. १. । इति प्रतिषेधादात्मनेपदं । हरिः । हृञ् हरणे । औणादिक इन्प्रत्ययः । ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं । भवति । एकान्याभ्यां समर्थाभ्यां । पा॰ ८. १. ६५. । इति प्रथमायास्तिङ्विभक्तेर्निघातप्रतिषेधः । ददृशे । दृशेश्छंदसि लुङ्लङ्लिट इति वर्तमाने लिट् । सुवर्चाः । शोभनं वर्चस्तेजो यस्य । सोर्मनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वं ॥

द्वितीयामृचमाह ॥

दशेमं त्वष्टुर्जनयंत गर्भमतंद्रासो युवतयो विभृत्रं ।
तिग्मानीकं स्वयशसं जनेषु विरोचमानं परि षीं नयंति ॥ २ ॥

दश । इमं । त्वष्टुः । जनयंत । गर्भं । अतंद्रासः । युवतयः । विऽभृत्रं ।
तिग्मऽअनीकं । स्वऽयशसं । जनेषु । विऽरोचमानं । परि । सीं । नयंति ॥ २ ॥

अतंद्रासः स्वकार्ये जगतः पोषणेऽनलसाः । आलस्यरहिता जागरूका इत्यर्थः । युवतयो नित्यतरुण्यः । जरामरणरहिता इत्यर्थः । एवंभूता दश प्राच्याद्या दशसंख्याका दिशो गर्भं मेघेषु गर्भरूपेणांतर्वर्तमानं त्वष्टुर्दीप्तान्मध्यमाद्वायोः सकाशाज्जनयंत । वैद्युतमग्निमुत्पादयंति । यद्वा दशसंख्याका अंगुलयस्त्वष्टुर्दीप्तस्य वायोर्गर्भं स्वकारणभूते वायौ गर्भरूपेण वर्तमानं । अग्नेर्हि वायुः कारणं वायोरग्निरिति श्रुतेः । एवंभूतमिममग्निमरण्योः सकाशाज्जनयंत । उत्पादयंति । कीदृश्योऽंगुलयः । अतंद्रासः पुनःपुनः कर्मकरण आलस्यरहिताः । युवतयः । अपृथक्कृत्य वर्तमानाः । एकस्मिन्पाणौ संहत्यावस्थिता इत्यर्थः । कीदृशमग्निं । विभृत्रं । सर्वेषु भूतेषु विहृतं । जाठररूपेण विभज्य वर्तमानमित्यर्थः । तिग्मानीकं । तीक्ष्णमुखं तीक्ष्णतेजसं । अत एव हि वैद्युताग्निदर्शने दृष्टिः प्रतिहन्यते । स्वयशसं । स्वायत्तयशस्कं । अतिशयेन यशस्विनमित्यर्थः । जनेषु जनपदेषु सर्वदेशेषु विरोचमानं विशेषेण दीप्यमानं । बहूनामुपकारकमित्यर्थः । एवंभूतं सीमेनमग्निं परि परितः सर्वतो नयंति । स्वस्वोपकाराय सर्वे जनाः स्वकीयं देशं प्रापयंति ॥ त्वष्टुः । त्विष दीप्तौ । नप्तृनेष्टृत्वष्टृ इत्यादिना । उ० २.९१. । उणादिषु तृनंतो निपातितः । अतो नित्त्वादाद्युदात्तत्वं । विभृत्रं । हृञ् हरणे । अस्मात्कर्मणि निष्ठा । छांदसो रेफोपजनः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । हृग्रहोर्भ इति भत्वं । यद्वा । औणादिकः क्रप्रत्ययः । तिग्मानीकं । तिज निशाने । युजिरुचितिजां कुत्वं च । उ० १.१४४. । इति मक् । अन प्राणने । अनिहृशिभ्यां चेतीकन् । तिग्मं तीक्ष्णमनीकं यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । परि षीं । पूर्वपदादिति षत्वं ॥

तृतीयामृचमाह ॥

त्रीणि जाना परि भूषंत्यस्य समुद्र एकं दिव्येकमप्सु ।

पूर्वामनु प्र दिशं पार्थिवानामृतून्प्रशासद्वि दधावनुष्ठु ॥ ३ ॥

त्रीणि । जाना । परि । भूषंति । अस्य । समुद्रे । एकं । दिवि । एकं । अप्ऽसु ।

पूर्वां । अनु । प्र । दिशं । पार्थिवानां । ऋतून् । प्रऽशासत् । वि । दधौ । अनुष्ठु ॥ ३ ॥

अस्याग्नेस्त्रीणि त्रिसंख्याकानि जाना जननानि जन्मानि परि भूषंति । परितः सर्वतोऽलंकुर्वंति । यद्वा परीत्येष समित्येतस्य स्थाने । अस्याग्नेस्त्रीणि जन्मानि संभवंति । समुद्रेऽब्धौ वडवानलरूपेणैकं जन्म । दिवि द्युलोक आदि-

त्यात्मनैकं। अप्सु। आप इत्यंतरिक्षनाम। अंतरिक्षे वैद्युताग्निरूपेणैकं। एवमग्निस्त्रेधात्मानं विभज्य त्रिषु स्थानेषु वर्तत इत्यर्थः। तत्रादित्यात्मना वर्तमानः सोऽग्निर्ऋतून्वसंताद्यान् षड़ृतून्प्रशासत् प्रकर्षेण विभक्ततया ज्ञापयन्पार्थिवानां पृथिव्याः संबंधिनां सर्वेषां प्राणिनां पूर्वां प्राचीं प्रदिशं प्रकृष्टां ककुभं। अनुष्ठ्वित्येतदव्ययं सम्यक्शब्दसमानार्थं सुष्ठ्विति यथा। सम्यगनुक्रमेण विदधौ। कृतवान्। स्वतो भेदरहितयोरखंडयोर्दिक्कालयोः प्राच्यादिभेदो वसंतादिभेदश्च सूर्यगत्या निष्पाद्यते। अतः सूर्य एव तयोः कर्तेत्यर्थः॥ जाना। जनी प्रादुर्भावे। घञ्। कर्षात्वत इत्यंतोदात्तत्वे प्राप्ते वृषादेराकृतिगणत्वादाद्युदात्तत्वं। शेश्छंदसि बहुलमिति शेर्लोपः। भूषंति। भूष अलंकारे। भौवादिकः। यद्वा भवतेर्लेटि सिब्बहुलं लेटीति सिप्। आगमानुशासनस्यानित्यत्वादिडभावः संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावश्च। दिवि। अप्सु। उभयत्रोडिदमिति विभक्तेरुदात्तत्वं। पार्थिवानां। पृथिव्या ञाञाविति प्राग्दीव्यतीयोऽञ्प्रत्ययः। प्रशासत्। शासु अनुशिष्टौ। अस्माल्लटः शतृ। जक्षित्यादयः षडित्यभ्यस्तसंज्ञायां नाभ्यस्ताच्छतुरिति नुम्प्रतिषेधः। कृदुत्तरपदप्रकृतिस्वरत्वं। अनुष्ठु। अपदुःसुषु स्थः। उ० १.२५.। इति विधीयमानः कुप्रत्ययो बहुलवचनात्तिष्ठतेरनुपूर्वादपि भवति॥

चतुर्थीमृचमाह॥

क इ॒मं वो॑ नि॒ण्यमा चि॑केत व॒त्सो मा॒तॄर्ज॑नयत स्व॒धाभिः॑।

ब॒ह्वी॒नां गर्भो॑ अ॒पसा॑मु॒पस्था॑न्म॒हान्क॒विर्निश्च॑रति स्व॒धावा॑न्॥ ४॥

कः। इ॒मं। वः॒। नि॒ण्यं। आ। चि॒के॒त॒। व॒त्सः। मा॒तॄः। ज॒न॒य॒त॒। स्व॒धाभिः॑।

ब॒ह्वी॒नां। गर्भः॑। अ॒पसा॑। उ॒पऽस्था॑त्। म॒हान्। क॒विः। निः। च॒र॒ति॒। स्व॒धाऽवा॑न्॥ ४॥

हे ऋत्विग्यजमाना निण्यं। निर्णीतांतर्हितनामैतत्। अब्बादिषु गर्भरूपेणांतर्हितं। तथा च मंत्रांतरं। गर्भो यो अपां गर्भो वनानां गर्भश्च स्थातां गर्भश्चरथामिति। एवंभूतमिममग्निं वो युष्माकं मध्ये क आचिकेत। को जानाति। न कोऽपीत्यर्थः। सोऽयमग्निर्वत्सो मेघस्थानामपां वैद्युताग्निरूपेण पुत्रस्थानीयः सन् मातॄस्तस्य मातृस्थानीयानि वृष्ट्युदकानि स्वधाभिर्हविर्लक्षणैरन्नैर्जनयत। उत्पादयति। तथा च स्मर्यते। अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति। अपि च बह्वीनां मेघस्था-

नामपां गर्भो वैद्युतरूपेण गर्भस्थानीयः सोऽग्निरपसामुपस्थात् समुद्रान्निश्चरति। औषसाग्निरूपेणादित्यः सन्निर्गच्छति। कीदृशः। महान्। तेजसा प्रौढः। कविः। क्रांतदर्शी। स्वधावान्। हविर्लक्षणान्नवान्। एक एवाग्निर्होमनिष्पादकलक्षणेन पार्थिवरूपेण वैद्युतात्मनौषसरूपेणादित्यात्मना च विभज्य वर्तत इत्यर्थः॥ चिकेत। कित ज्ञाने। छांदसो लिट्। जनयत। जनी जृष क्नसु रंजोऽमंताश्चेति मित्त्वान्मितां ह्रस्व इति ह्रस्वत्वं। पूर्ववच्छांदसो लङ्। बह्वीनां। नित्यं छंदसि। पा॰ ४. १. ४६.। इति बहुशब्दान्ङीष्। आग्छंदसि बहुलमिति नाम उदात्तत्वं। अपसां। आप्लृ व्याप्तौ। आपः कर्माख्यायां ह्रस्वश्च नुट् चेति बहुलवचनादकर्माख्यायामप्याप्नोतेरसिप्रत्ययो ह्रस्वश्च। उपस्थात्। उपतिष्ठंत्यापोऽत्रेत्युपस्थः। आतश्चोपसर्ग इति कृत्यल्युटो बहुलमिति बहुलवचनादधिकरणे कप्रत्ययः। मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं॥

पंचमीमृचमाह॥

आविष्ट्यो वर्धते चारुरासु जिह्मानामूर्ध्वः स्वयशा उपस्थे।
उभे त्वष्टुर्बिभ्यतुर्जायमानात्प्रतीची सिंहं प्रति जोषयेते॥५॥
आविःऽत्यः। वर्धते। चारुः। आसु। जिह्मानां। ऊर्ध्वः। स्वऽयशाः। उपऽस्थे।
उभे इति। त्वष्टुः। बिभ्यतुः। जायमानात्। प्रतीची इति। सिंहं। प्रति। जोषयेते
इति॥५॥

आसु मेघस्थास्वप्सु वैद्युतात्मना वर्तमानोऽग्निश्चारुः शोभनदीप्तिः सन् आविष्ट्यो वर्धते। आविर्भूतः प्रकाशमानो वृद्धिं प्राप्नोति। किं कुर्वन्। जिह्मानां कुटिलानां मेघेषु तिर्यगवस्थितानां तासामपामुपस्थ उत्संगे स्वयशाः स्वायत्तयशस्कोऽग्निरूर्ध्व ऊर्ध्वज्वलनः सन्। स्वकारणभूतास्वप्सु तिर्यगवस्थितास्वपि स्वयमूर्ध्वं ज्वलन्नित्यर्थः। तदुक्तं वैशेषिकैः। अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनं। अणुमनसोराद्यं कर्मेतान्यदृष्टकारितानीति। अपि च। उभे द्यावापृथिव्यौ त्वष्टुर्दीप्ताज्जायमानादुत्पद्यमानात्तस्मादग्नेर्बिभ्यतुः। भयं प्रापतुः। तदनंतरमुत्पन्नं सिंहं सहनशीलमभिभवनशीलं तमग्निं प्रतीची प्रत्यंचंत्यौ प्रतिगच्छंत्यावाभिमुख्येन प्राप्नुवंत्यौ जोषयेते। सेवेते। यास्कस्त्वाह। आविरावेदनात्तत्यो वर्धते चारुरासु चारु चरतेर्जिह्मं जिहीतेरूर्ध्व उच्छ्रितो भवति स्वयशा आत्मयशा उपस्थ उपस्थान

उभे त्वष्टुर्बिभ्यतुर्जायमानात्प्रतीची सिंहं प्रतिजोषयेते द्यावापृथिव्याविति वाहोरात्रे इति वारणी इति वापि चैते प्रत्यक्ते सिंहं सहनं प्रत्यासेवेते। नि० ८.१५.। इति ॥ आविष्ट्यः। आविःशब्दाच्छंदसि। पा० ४.२.१०४.९.। इति शैषिकस्त्यप्। ह्रस्वात्तादौ तद्धिते। पा० ८.३.१०१.। इति षत्वं। आम्। इदमोऽन्वादेश इत्यशादेशोऽनुदात्तः। विभक्तिश्च सुप्त्वादनुदात्तेति सर्वानुदात्तत्वं। न चोडिदमिति विभक्तेरुदात्तत्वं शंकनीयं। अंतोदात्तादिदंशब्दाड्डि तद्विधीयते। प्रतीची। प्रतिपूर्वादंचतेर्ऋत्विगित्यादिना क्विन्। अनिदितामिति नलोपः। अंचतेश्चोपसंख्यानमिति ङीप्। अच इत्याकारलोपे चाविति दीर्घत्वं। उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वं। वा छंदसीति पूर्वसवर्णदीर्घः। जोषयेते। जुषी प्रीतिसेवनयोः। स्वार्थे णिच् ॥

॥ इति प्रथमस्य सप्तमे प्रथमो वर्गः ॥

षष्ठीमृचमाह ॥

उभे भद्रे जोषयेते न मेने गावो न वाश्रा उप तस्थुरेवैः।
स दक्षाणां दक्षपतिर्बभूवांजंति यं दक्षिणतो हविर्भिः ॥ ६ ॥

उभे इति। भद्रे इति। जोषयेते इति। न। मेने इति। गावः। न। वाश्राः। उप। तस्थुः। एवैः।
सः। दक्षाणां। दक्षऽपतिः। बभूव। अंजंति। यं। दक्षिणतः। हविःऽभिः ॥ ६ ॥

उभे अहश्च रात्रिश्च। यद्वा। उभे द्यावापृथिव्यौ। अरणी वा। भद्रे भजनीये शोभनांग्यौ मेने स्त्रियौ जोषयेते न। सेवेते इव। यथा शोभने स्त्रियौ चामरहस्ते राजानमुभयतः सेवेते। एवं द्यावापृथिव्यावेनमग्निमुभयतः सेवेते इत्यर्थः। अपि च वाश्रा हंभारवं कुर्वत्यो गावो न गावो यथैवैः स्वकीयैश्चरित्रैरादरातिशयेन स्वकीयान्वत्सानुपतस्थुः। संगच्छंते। तथेममग्निं द्यावापृथिव्यावुपस्थिते भवतः। पूर्वं सेवनमात्रमुक्तं। इदानीं पुनर्गोनिदर्शनेन तत्रैवादरातिशयो द्योत्यते। अतः सोऽग्निर्दक्षाणां सर्वेषां बलानां दक्षपतिर्बलाधिपतिर्बभूव। आसीत्। बलानां मध्ये यदतिशयितं बलं तस्याधिपतिर्बभूवेत्यर्थः। यमग्निं दक्षिणत आहवनीयस्य दक्षिणभागेऽवस्थिता ऋत्विजो हविर्भिश्चरुपुरोडाशादिभिरंजंति। आर्द्रीकुर्वंति तर्पयंति। सोऽग्निरिति पूर्वेणान्वयः ॥ वाश्राः। वाशृ शब्दे। स्फायितंचीत्यादिना रक्। एवैः। इण् गतौ। इणशीङ्भ्यां वन्निति भावे वन्प्रत्ययः ॥

सप्तमीमृचमाह ॥

उद्यंयमीति सवितेव बाहू उभे सिचौ यतते भीम ऋंजन् ।
उच्छुक्रमत्कमजते सिमस्मान्नवा मातृभ्यो वसना जहाति ॥ ७ ॥
उत् । यंयमीति । सविताऽइव । बाहू इति । उभे इति । सिचौ । यतते । भीम । ऋंजन् ।
उत् । शुक्रं । अत्कं । अजते । सिमस्मात् । नवा । मातृऽभ्यः । वसना । जहाति ॥ ७ ॥

सवितेव सर्वस्य प्रेरक आदित्यो यथा बाहू बाहुस्थानीयान्रश्मीनुन्नमयति । तथायमौषसोऽग्निः स्वकीयानि तेजांस्युद्यंयमीति । भृशमुद्यतान्यूर्ध्वाभिमुखानि करोति । तदनंतरं भीमः सर्वेषां भयंकरोऽग्निरुभे सिचावुभे द्यावापृथिव्यौ ऋंजन् प्रसाधयन् स्वतेजसालंकुर्वन्यतते स्वव्यापारे प्रयतते । तदनंतरं सिमस्मात्सर्वस्माद्भूतजाताच्छुक्रं दीप्तमत्कं सारभूतं रसमुदजते । ऊर्ध्वं रश्मिभिरादत्ते । अपि च मातृभ्यः स्वमातृस्थानीयेभ्यो वृक्ष्युदकेभ्यः सकाशान्नवा नवानि प्रत्यग्राणि वसना सर्वस्य जगत आच्छादकानि तेजांसि जहाति । उन्नमयति ॥ यंयमीति । यम उपरमे । अस्माद्यङ्लुकि नुगतोऽनुनासिकांतस्य । पा° ७. ४. ८५. । इत्यभ्यासस्य नुगागमः । एतच्चानुस्वारेण लक्षणार्थं । सिचौ । षिच क्षरणे । सिंचतः फलेन संयोजयत इति सिचौ द्यावापृथिव्यौ । क्विप् चेति क्विप् । यतते । यती प्रयत्ने । अत्कं । अत सातत्यगमने । इणभीकापाशल्यतिमर्चिभ्यः कन्निति कन् । नित्त्वादाद्युदात्तत्वं । सिमस्मात् । सिमशब्दः सर्वशब्दपर्यायः । नवा वसना । उभयत्र शेश्छंदसि बहुलमिति शेर्लोपः । जहाति । ओहाक् त्यागे । जौहोत्यादिकः ॥

अष्टमीमृचमाह ॥

त्वेषं रूपं कृणुत उत्तरं यत्संपृंचानः सदने गोभिरद्भिः ।
कविर्बुध्नं परि मर्मृज्यते धीः सा देवताता समितिर्बभूव ॥ ८ ॥
त्वेषं । रूपं । कृणुते । उत्ऽतरं । यत् । संऽपृंचानः । सदने । गोभिः । अत्ऽभिः ।
कविः । बुध्नं । परि । मर्मृज्यते । धीः । सा । देवऽताता । संऽइतिः । बभूव ॥ ८ ॥

सदनेऽंतरिक्षे गोभिर्गंत्रीभिरद्भिर्मेघस्थाभिः सह संपृंचानो वैद्युतरूपेण संयुक्तः सन् त्वेषं दीप्तं सर्वैर्द्रष्टुमशक्यमुत्तरमुत्कृष्टतरं रूपं वैद्युतं प्रकाशं यद्यदा कृणुते

करोति। तदानीं कविः क्रांतदर्शी धीः सर्वेषां धारकः सोऽग्निर्बुध्नं सर्वस्योदकस्य मूलं मूलभूतमंतरिक्षं परि मर्मृज्यते। परितो मार्ष्टि स्वतेजसाच्छादयति। तस्याग्नेः सा देवताता। देवेन देवनशीलेनाग्निना तता विस्तारिता दीप्तिरस्माभिः स्तुता सती समितिर्बभूव। तेजसां संहतिर्भवति ॥ संपृंचानः। पृची संपर्के। रौधादिकः। अस्माल्लटः शानच्। श्नसोरल्लोप इत्यकारलोपः। सीदंत्यस्मिन् गंधर्वादय इति सदनमंतरिक्षं। अधिकरणे ल्युट्। मर्मृज्यते। मृजूष् शुद्धौ। अस्माद्यङि मर्मृज्यते मर्मृज्यमानास इति चोपसंख्यानं। पा० ७.४.९१.१। इति निपातनादभ्यासस्य रुगागमः। देवताता। देवेन तता देवताता। तनोतेः कर्मणि निष्ठा। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः। व्यत्ययेनात्वं। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं ॥

नवमीमृचमाह ॥

उरु ते ज्रयः पर्येति बुध्नं विरोचमानं महिषस्य धाम।
विश्वेभिरग्ने स्वयशोभिरिद्धोऽदब्धेभिः पायुभिः पाह्यस्मान् ॥ ९ ॥

उरु। ते। ज्रयः। परि। एति। बुध्नं। विऽरोचमानं। महिषस्य। धाम।
विश्वेभिः। अग्ने। स्वयशःऽभिः। इद्धः। अदब्धेभिः। पायुऽभिः। पाहि। अस्मान् ॥ ९ ॥

महिषस्य महतस्ते तव ज्रयो राक्षसादीनामभिभावुकं विरोचमानं विशेषेण दीप्यमानमुरु विस्तीर्णं धाम तेजो बुध्नमपां मूलभूतमंतरिक्षं पर्येति। परितो व्याप्नोति। हे अग्ने। इद्धोऽस्माभिः प्रज्वलितः सन् विश्वेभिः सर्वैः स्वयशोभिः स्वकीयैरात्मीयैस्तेजोभिरस्मान्पाहि। रक्ष। कीदृशैः। अदब्धेभिः। राक्षसादिभिरहिंसितैः। पायुभिः। पालनशक्तैः ॥ ज्रयः। जि ज्रि अभिभवे। असुन्। अदब्धेभिः। दंभु दंभे। निष्ठायां यस्य विभाषेतीट्प्रतिषेधः। अनिदितामिति नलोपः। झषस्तथोर्धोऽध इति धत्वं। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं। बहुलं छंदसीति भिस ऐसभावः ॥

दशमीमृचमाह ॥

धन्वन्स्रोतः कृणुते गातुमूर्मिं शुक्रैरूर्मिभिरभि नक्षति क्षां।
विश्वा सनानि जठरेषु धत्तेऽंतर्नवासु चरति प्रसूषु ॥ १० ॥

धन्वन्। स्रोतः। कृणुते। गातुं। ऊर्मिं। शुक्रैः। ऊर्मिऽभिः। अभि। नक्षति। क्षां।
विश्वा। सनानि। जठरेषु। धत्ते। अंतः। नवासु। चरति। प्रऽसूषु ॥ १० ॥

धन्वन् नभसि गातुं गमनशीलमूर्मिमुदकसंघमयमग्निः स्रोतः कृणुते। स्रोतसा प्रवाहरूपेण युक्तं करोति। शुक्रैर्निर्मलैरूर्मिभिस्तैर्जलसंघैः क्षां भूमिमभिनक्षति। अभिव्याप्नोति। स्वतेजोभिरंतरिक्षे जलसंघमुत्पाद्य तेन सर्वां भूमिमभिवर्षतीत्यर्थः। पश्चाद्विश्वा सर्वाणि सनानि। अन्ननामैतत्। सर्वाण्यन्नानि जठरेषु धत्ते। अवस्थापयति। तदर्थं नवासु वृष्ट्यनंतरमुत्पन्नासु प्रसूषु सर्वेषामन्नानां प्रसविचीष्वोषधीषु पाकार्थमंतश्चरति। मध्ये वर्तते। अंतरवस्थितेन भौमाग्निना सर्वा ओषधयः पच्यंते ॥ धन्वन्। रिवि रवि धवि गत्यर्थाः। इदित्त्वान्नुम्। कनिन्युवृषीत्यादिना कनिन्। सुपां सुलुगिति सप्तम्या लुक्। धन्वांतरिक्षं धन्वंत्यस्मादाप इति यास्कः। नि० ५.५.। नित्त्वादाद्युदात्तत्वं। गातुं। गाङ् गतौ। कमिमनिजनीत्यादिना तुप्रत्ययः। ऊर्मिं। अर्तेरूच्चेति मिप्रत्ययः। नक्षति। नक्ष गतौ ॥

एकादशीमृचमाह ॥

एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ ११ ॥
एव। नः। अग्ने। सम्ऽइधा। वृधानः। रेवत्। पावक। श्रवसे। वि। भाहि।
तत्। नः। मित्रः। वरुणः। ममहंतां। अदितिः। सिंधुः। पृथिवी। उत। द्यौः ॥ ११ ॥

हे पावक शोधकाग्ने समिधास्माभिर्दत्तेन समिदादिद्रव्येण। एवैवमुक्तप्रकारेण वृधानो वर्धमानः सन् रेवत् रयिमते धनयुक्ताय नोऽस्माकं श्रवसेऽन्नाय विभाहि। विशेषेण दीप्यस्व। अस्माकं तादृशमन्नं प्रयच्छेत्यर्थः। नोऽस्माकं तदन्नं मित्रादयो ममहंतां। पूजयंतां। रक्षंत्वित्यर्थः। उतशब्दः समुच्चये। पृथिवी च द्यौश्चेत्यर्थः ॥ एवा। निपातस्य चेति संहितायां दीर्घः। वृधानः। वृधेरंतर्भावितण्यर्थात्ताच्छीलिकश्चानश्। बहुलं छंदसीति शपो लुक्। चानशः सार्वधातुकत्वेन ङित्त्वाल्लघूपधगुणाभावः। लसार्वधातुकत्वाभावेनानुदात्तत्वाभावे चित्स्वर एव शिष्यते। रेवत्। रयिशब्दान्मतुप्। रयेर्मतौ बहुल-

मिति संप्रसारणं। छंदसीर इति मतुपो वत्वं। रेशब्दाच्चेति मतुप उदात्तत्वं। सुपां सुलुगिति चतुर्थ्या लुक्॥

॥ इति प्रथमस्य सप्तमे द्वितीयो वर्गः ॥

स प्रत्नथेति नवर्चं तृतीयं सूक्तं कुत्सस्यार्षं त्रैष्टुभं। द्रविणोदस्त्वगुणविशिष्टोऽग्निः शुद्धाग्निर्वा देवता। तथा चानुक्रांतं। स प्रत्नथा नव द्रविणोदस इति॥ प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तः सूक्तविनियोगः। व्यूढस्य दशरात्रस्य षष्ठेऽहन्याग्निमारुत इदं सूक्तं जातवेदस्यनिविद्धानं। व्यूळ्हश्चेदिति खंडे सूचितं। स प्रत्नथेत्याग्निमारुतं। आ० ८.८.। इति। स प्रत्नथा सहसा जायमान इति जातवेदस्यं समानोदर्कमित्यादि ब्राह्मणं॥ महापितृयज्ञे स्विष्टकृत्स्थानीयस्य कव्यवाहनस्य स प्रत्नथेत्येषा याज्या। दक्षिणाग्निरिति खंडे सूचितं। स प्रत्नथा सहसा जायमान इत्यग्निः स्विष्टकृत्कव्यवाहनः। आ० २.१९.। इति॥

तामेतां सूक्ते प्रथमामृचमाह॥

स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा।
आपश्च मित्रं धिषणा च साधन्देवा अग्निं धारयन्द्रविणोदां॥ १॥

सः। प्रत्नऽथा। सहसा। जायमानः। सद्यः। काव्यानि। बट्। अधत्त। विश्वा।
आपः। च। मित्रं। धिषणा। च। साधन्। देवाः। अग्निं। धारयन्। द्रविणःऽदां॥ १॥

सहसा बलेन जायमानो निर्मथनेनोत्पद्यमानः सोऽग्निः सद्यस्तदानीमुत्पत्त्यनंतरमेव प्रत्नथा प्रत्न इव चिरंतन इव विश्वा विश्वानि सर्वाणि काव्यानि कवेः क्रांतदर्शिनः प्रगल्भस्य कर्माणि बट् सत्यमधत्त। अधारयत्। पूर्वं विद्यमान इवाग्निरुत्पत्तिसमकालमेव स्वकीयं हविर्वहनादिकं सर्वं कार्यमकरोदित्यर्थः। इममग्निं वैद्युतरूपेण वर्तमानं मेघेष्ववस्थिता आपश्च धिषणा च या माध्यमिका वाक् सा च मित्रं सखिभूतं साधन्। साधयंति। कुर्वंति। तमिमं द्रविणोदां द्रविणस्य धनस्य दातारमग्निं देवा ऋत्विजो धारयन्। गार्हपत्यादिरूपेण धारयंति। यद्वा देवा एवेंद्राग्न्य इममग्निं द्रविणोदां हविर्लक्षणस्य धनस्य दातारं कृत्वा दूत्ये धारयन्। धारयंति॥ प्रत्नथा। प्रत्नपूर्वविश्वेमात्थाल् छंदसीतीवार्थे थाल्प्रत्ययः। काव्यानि। कवेः कर्म काव्यं। गुणवचनब्राह्मणादिभ्य

इति ष्यञ् । ञित्वादाद्युदात्तत्वं । साधन् । षिधु संराद्धौ । णौ सिध्यतेरपारलौकिक इत्यात्वं । लेट्यडागमः । इतश्च लोप इतीकारलोपः । छंदस्युभयथेति शप आर्द्धधातुकत्वाण्णेरनिटीति णिलोपः । द्रविणोदां । द्रविणानि ददातीति द्रविणोदाः । द्रु गतौ । द्रुदक्षिभ्यामिनन् । छांदसः पूर्वपदस्य सुक् । अन्येभ्योऽपि दृश्यंत इति ददातेर्विच् । सकारांतं त्वसुनि कृते निष्पद्यते ॥

द्वितीयामृचमाह ॥

स पूर्वया निविदा कव्यतायोरिमाः प्रजा अजनयन्मनूनां ।
विवस्वता चक्षसा द्यामपश्च देवा अग्निं धारयन्द्रविणोदां ॥ २ ॥

सः । पूर्वया । निऽविदा । कव्यता । आयोः । इमाः । प्रऽजाः । अजनयत् । मनूनां ।
विवस्वता । चक्षसा । द्यां । अपः । च । देवाः । अग्निं । धारयन् । द्रविणःऽदां ॥ २ ॥

सोऽग्निः पूर्वया प्रथमयाग्निर्देवेद्ध इत्यादिकया निविदा कव्यता गुणिनिष्ठगुणाभिधानलक्षणां स्तुतिं कुर्वतायोर्मनोः संबंधिनोक्थेन च स्तूयमानः सोऽग्निर्मनूनां संबंधिनीरिमाः प्रजा अजनयत् । उदपादयत् । मनुना स्तुतः सन् मानवीः सर्वाः प्रजा अजनयदित्यर्थः । तथा विवस्वता विवासनवता विशेषेणाच्छादयता चक्षसात्मीयेन तेजसा द्यां द्युलोकमपश्चांतरिक्षं च व्याप्नोतीति शेषः । अन्यत्समानं ॥ कव्यता । कु शब्दे । अचो यदिति भावे यत् । कव्यं कवनं स्तुतिं करोति । तत्करोतीति णिच् । तदंतात् क्विप् । बहुलमन्यत्रापि संज्ञाच्छंदसोरिति णिलुक् । तत्तस्तुक् । धातुस्वरेणांतोदात्तत्वं । आयोः । इण गतौ । छंदसीण इत्युण्प्रत्ययः ॥

तृतीयामृचमाह ॥

तमीळत प्रथमं यज्ञसाधं विश आरीराहुतमृंजसानं ।
ऊर्जः पुत्रं भरतं सृप्रदानुं देवा अग्निं धारयन्द्रविणोदां ॥ ३ ॥

तं । ईळत । प्रथमं । यज्ञऽसाधं । विशः । आरीः । आऽहुतं । ऋंजसानं ।
ऊर्जः । पुत्रं । भरतं । सृप्रऽदानुं । देवाः । अग्निं । धारयन् । द्रविणःऽदां ॥ ३ ॥

हे विशः सर्वे मनुष्याः । आरीरग्निं स्वामिनं गच्छंत्यो यूयं तमग्निमीळत । स्तुध्वं । कीदृशं । प्रथमं । सर्वेषु देवेषु मुख्यं । यज्ञसाधं । यज्ञस्य दर्शपूर्णमासादेः

साधकं निष्पादकं । आहुतं । हविर्भिस्तर्पितं । ऋंजसानं । स्तोत्रैः प्रसाध्यमानं । ऊर्जोऽन्नस्य पुत्रं । भुक्तेनान्नेन जाठराग्नेर्वर्धनादग्नेरन्नपुत्रत्वं । भरतं । हविषां भर्तारं । यद्वा प्राणरूपेण सर्वासां प्रजानां भर्तारं । श्रूयते च । एष प्राणो भूत्वा प्रजा बिभर्ति तस्मादेष भरत इति । सृप्रदानुं । सर्पणशीलदानयुक्तं । अविच्छेदेन धनानि प्रयच्छंतमित्यर्थः । देवा इत्यादि गतं ॥ ईळत । ईड स्तुतौ । लोटि व्यत्ययेन परस्मैपदं । बहुलं छंदसीति शपो लुगभावः । यज्ञसाधं । यज्ञं साधयतीति यज्ञसात् । साधयतेः क्विप् । णेरनिटीति णिलोपः । आरीः । ऋ गतौ । सृचिसूचीत्यादिना । पा॰ ३. १. २२. १. । यङ् । यङोऽचि चेति चशब्देन बहुलग्रहणानुकर्षणादनैमित्तिको लुक् । प्रत्ययलक्षणेन द्विर्भावः । उरदत्वह-लादिशेषौ । रुग्रिकौ च लुकीति रुक् । यङ्लुगंतादौणादिकः क्विप्रत्ययः । यणादेशे रो रीति रेफलोपः । ढ्रलोपे पूर्वस्येति दीर्घत्वं । कृदिकारादक्तिन इति ङीष् । जसि वा छंदसीति पूर्वसवर्णदीर्घत्वं । व्यत्ययेनाद्युदात्तत्वं । ऋंजसानं । ऋंजतिः प्रसाधनकर्मा । ऋंजिवृधिमंदिसहिभ्यः किदिति कर्मण्यसानच् । भरतं । भृञ् भरणे । भृमृदृशीत्यादिनातच् । सृप्रदानुं । सृपॢ गतौ । स्फायितंचीत्यादिना रक् । सृप्रो दानुर्दानं यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

चतुर्थीमृचमाह ॥

स मा॑त॒रिश्वा॑ पुरु॒वार॑पुष्टिर्वि॒दद्गा॒तुं तन॑याय स्व॒र्वित् ।
वि॒शां गो॒पा ज॑नि॒ता रोद॑स्यो॑र्दे॒वा अ॒ग्निं धा॑रयन्द्रविणो॒दां ॥ ४ ॥
सः । मा॒त॒रिश्वा॑ । पु॒रु॒वार॑ऽपुष्टिः । वि॒दत् । गा॒तुम् । तन॑याय । स्वः॒ऽवित् ।
वि॒शाम् । गो॒पाः । ज॒नि॒ता । रोद॑स्योः । दे॒वाः । अ॒ग्निम् । धा॒र॒य॒न् । द्र॒वि॒णः॒ऽदाम् ॥ ४ ॥

सोऽग्निस्तनयायास्मदीयाय पुत्राय गातुमनुष्ठानमार्गं विदत् । लंभयतु । कीदृशः । मातरिश्वा । मातरि सर्वस्य जगतो निर्मातर्यंतरिक्षे श्वसन्वर्तमानः । पुरुवारपुष्टिः । पुरुभिर्बहुभिर्वारा वरणीया पुष्टिरभिवृद्धिर्यस्य स तथोक्तः । स्वर्वित् । स्वः स्वर्गस्य यागद्वारेण लंभयिता । विशां सर्वासां प्रजानां गोपा गोपायिता रक्षिता । रोदस्योर्द्यावापृथिव्योर्जनिता जनयितोत्पादयिता । देवा इत्यादि गतं ॥ मातरिश्वा । श्वन्नुक्षन्नित्यादौ मातृशब्दोपपदात् श्वस प्राणन इत्यस्मात् कनिन्प्र-त्ययांतो निपात्यते । विदत् । विदॢ लाभे । अस्मादंतर्भावितण्यर्थाच्छांदसो लुङ् ।

ऌदित्त्वात् च्लेरङादेशः। पादादित्वान्निघाताभावः। जनिता। जनिता मंत्रे। पा० ६. ४. ५३.। इति तृचि णिलोपो निपात्यते ॥

पंचमीमृचमाह ॥

नक्तोषासा वर्णमामेम्याने धापयेते शिशुमेकं समीची।

द्यावाक्षामा रुक्मो अंतर्वि भाति देवा अग्निं धारयन्द्रविणोदां ॥ ५ ॥

नक्तोषसा। वर्णं। आमेम्याने इत्याऽमेम्याने। धापयेते इति। शिशुं। एकं। समीची इति संऽईची।

द्यावाक्षामा। रुक्मः। अंतः। वि। भाति। देवाः। अग्निं। धारयन्। द्रविणःऽदां ॥ ५ ॥

नक्तोषासा रात्रिरहश्च वर्णं स्वकीयं स्वरूपमामेम्याने परस्परं पुनःपुनर्हिंसंत्यौ समीची संगते संश्लिष्टे। एवंभूते अहस्त्रियामे एकं शिशुमहः पुत्रमग्निं धापयेते। हवींषि पाययेते। रुक्मो रोचमानः सोऽग्निर्द्यावाक्षामा द्यावापृथिव्योरंतर्मध्ये विभाति। विशेषेण प्रकाशते। अन्यत्पूर्ववत् ॥ नक्तोषासा। नक्तेति रात्रिनाम। नक्तोषाश्च नक्तोषसा। सुपां सुलुगिति विभक्तेराकारः। अन्येषामपीति सांहितिकमुपधादीर्घत्वं। देवताद्वंद्वे चेति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं। आमेम्याने। मीङ् हिंसायां। अस्माद्यङ्लुगंताद्व्यत्ययेन शानच्। अदादिवच्चेति वचनाच्छपो लुक्। एरनेकाच इति यण्। अभ्यस्तानामादिरित्याद्युदात्तत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं। धापयेते। धेट् पाने। अस्माण्ण्यंतान्निगरणचलनेति प्राप्तस्य परस्मैपदस्य पादिषु धेट उपसंख्यानमिति वचनात् न पादम्याङ्यम। पा० १. ३. ८९.। इति प्रतिषेधः। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे णिच एव स्वरः शिष्यते। पादादित्वान्निघाताभावः। समीची। संपूर्वादंचतेर्ऋत्विगित्यादिना क्विन्। अनिदितामिति नलोपः। समः समीति सम्यादेशः। अंचतेश्चोपसंख्यानमिति ङीप्। अच इत्यकारलोपे चाविति दीर्घत्वं। उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वं। पदकारस्य त्वयमभिप्रायः। उद ईदिति विधीयमानमीत्वं सम उत्तरस्याप्यंचतेर्व्यत्ययेन भवतीति। वा छंदसीति पूर्वसवर्णदीर्घत्वं। द्यावाक्षामा। दिवो द्यावेति द्यावादेशः। देवताद्वंद्वे चेति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य सप्तमे तृतीयो वर्गः ॥

षष्ठीमृचमाह ॥

रायो बुध्नः संगमनो वसूनां यज्ञस्य केतुर्मन्मसाधनो वेः ।
अमृतत्वं रक्षमाणास एनं देवा अग्निं धारयन्द्रविणोदां ॥ ६ ॥

रायः । बुध्नः । संऽगमनः । वसूनां । यज्ञस्य । केतुः । मन्मऽसाधनः । वेरिति वेः ।
अमृतऽत्वं । रक्षमाणासः । एनं । देवाः । अग्निं । धारयन् । द्रविणःऽदां ॥ ६ ॥

योऽग्नी रायो धनस्य बुध्नो मूलभूतः । आहुतिद्वारा सर्वेषां धनानां कारणत्वात् । वसूनां निवासहेतूनां धनानां संगमनः संगमयिता । स्तोतॄणां प्रापयिता । यज्ञस्य दर्शपूर्णमासादेः केतुः केतयिता ज्ञापयिता । वेरात्मानमभिगच्छतः पुरुषस्य मन्मसाधनो मननीयस्याभिलषितस्य साधयिता । अमृतत्वं स्वकीयामरणत्वं रक्षमाणासः पालयंतो देवा एनं धनस्य दातारमग्निं धारयंति ॥ रायः । ऊडिदमिति विभक्तेरुदात्तत्वं । संगमनः । नंद्यादिलक्षणो ल्युः । वेः । वी गत्यादिषु । अस्मादौणादिक इप्रत्ययः । टिलोपश्च ॥

सप्तमीमृचमाह ॥

नू च पुरा च सदनं रयीणां जातस्य च जायमानस्य च क्षां ।
सतश्च गोपां भवतश्च भूरेर्देवा अग्निं धारयन्द्रविणोदां ॥ ७ ॥

नु । च । पुरा । च । सदनं । रयीणां । जातस्य । च । जायमानस्य । च । क्षां ।
सतः । च । गोपां । भवतः । च । भूरेः । देवाः । अग्निं । धारयन् । द्रविणःऽदां ॥ ७ ॥

नू चेति निपातसमुदाय अद्येत्यस्यार्थे । नू चिदिति निपातः पुराणनवयोर्नू च । नि॰ ४. १७. । इति यास्कः । नू चाद्यास्मिन्काले पुरा च रयीणां सर्वेषां धनानां सदनमावासस्थानं जातस्योत्पन्नस्य कार्यजातस्य जायमानस्योत्पद्यमानस्य च क्षां निवासयितारं । सतश्च सर्वत्र विद्यमानस्वभावस्य नित्यस्य चाकाशादेर्भवतश्च सद्भावं प्राप्नुवतो भूरेरसंख्यातस्यान्यस्य च भूतजातस्य गोपां गोपायितारं रक्षितारं द्रविणोदां धनप्रदं । एवंगुणविशिष्टमग्निं देवा धारयन् । हविर्वोढृत्वेन धारयंति ॥ नू च । ऋचि तुनुघेति दीर्घः । रयीणां । नामन्यतरस्यामिति नाम उदात्तत्वं । क्षां । क्षि निवासगत्योः । अस्मात्क्विच् । वृद्धाया-

देशौ। ण्यंतात्क्विप्। णेरनिटीति णिलोपः। वेरपृक्तलोपाद्वलि लोपो बलीयानिति पूर्वं लोपो व्योर्वलीति यलोपः। न च णिलोपस्य स्थानिवत्त्वं। न पदांतद्विर्वचनवरेयलोपेति प्रतिषेधात्। यद्वा क्षि जि स्वि क्षये। अस्मात्क्विप्। आदेच इत्यात्वं। सतः। अस्तेः शतर्यदादित्वाच्छपो लुक्। श्नसोरल्लोप इत्यकारलोपः। शतुरनुम इति विभक्तेरुदात्तत्वं॥

अष्टमीमृचमाह॥

द्रविणोदा द्रविणसस्तुरस्य द्रविणोदाः सनरस्य प्र यंसत्।
द्रविणोदा वीरवतीमिषं नो द्रविणोदा रासते दीर्घमायुः॥ ८॥
द्रविणःऽदाः। द्रविणसः। तुरस्य। द्रविणःऽदाः। सनरस्य। प्र। यंसत्।
द्रविणःऽदाः। वीरऽवतीं। इषं। नः। द्रविणःऽदाः। रासते। दीर्घं। आयुः॥ ८॥

द्रविणोदा द्रविणस्य धनस्य बलस्य वा दाताग्निस्तुरस्य त्वरमाणस्य चलतो जंगमस्य द्रविणसो बलस्य धनस्य वैकदेशं प्रयंसत्। अस्मभ्यं प्रयच्छतु। तथा द्रविणोदाः सनरस्य सननीयस्य संभजनीयस्य स्थावररूपस्य धनस्यैकदेशं प्रयच्छतु। अपि च द्रविणोदा वीरवतीं वीरैः पुत्रादिभिर्युक्तामिषमन्नं नोऽस्मभ्यं प्रयच्छतु। तथा द्रविणोदा दीर्घमायुरस्मभ्यं रासते। प्रयच्छतु॥ तुरस्य। तुर त्वरणे। इगुपधलक्षणः कः। सनरस्य। वन षण संभक्तौ। कृदरादयश्च। उ० ५.४१.। इत्यरन्प्रत्ययः। यंसत्। यम उपरमे। लेटाडागमः। सिब्बहुलं लेटीति सिप्। रासते। रा दाने। पूर्ववल्लेटि सिप्। व्यत्ययेनात्मनेपदं॥

नवमीमृचमाह॥

एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः॥ ९॥
एव। नः। अग्ने। संऽइधा। वृधानः। रेवत्। पावक। श्रवसे। वि। भाहि।
तत्। नः। मित्रः। वरुणः। ममहंतां। अदितिः। सिंधुः। पृथिवी। उत। द्यौः॥ ९॥

व्याख्यातेयं पूर्वसूक्ते। अक्षरार्थस्तु हे शोधकाग्ने। एवमस्माभिर्दत्तेन समिदादिद्रव्येण वृधानो वर्धमानः सन् नोऽस्माकं धनयुक्तायान्नाय विशेषेण प्रकाशस्व।

अस्माकं तदन्नं मित्रादयो मामहंतां। पूजयंतां। रक्षंत्वित्यर्थः। तथा सिंधुरब्देवता द्यावापृथिव्यौ च मामहंतां॥

॥ इति प्रथमस्य सप्तमे चतुर्थो वर्गः॥

अप न इत्यष्टर्चं चतुर्थं सूक्तं कुत्सस्यार्षं गायत्रं। शुचिगुणकोऽग्निः शुद्धोऽग्निर्वा देवता। तथा चानुक्रांतं। अप नोऽष्टौ शुचये गायत्रमिति। विनियोगो लैंगिकः॥ अत्रेदमाख्यानं। दीर्घजिह्वी नाम राक्षसी सर्वान्यज्ञान्ववाधे। तां हंतुमिंद्रोऽशक्तः सन् सर्वस्य मित्रभूतं कुत्समब्रवीदेषा त्वया हंतव्येति। स चावधीत्। तं वागभ्यवदत् अनुचितमिदं त्वया चरितं यत्त्वं सर्वेषां मित्रभूतः सन् क्रूरमकार्षीरिति। तमृषिं शोकः प्राप्नोत्। स ऋषिरनेन सूक्तेनाग्निं स्तुत्वा शोकमपागमयत्। तथा च तांडकं। दीर्घजिह्वी नाम राक्षसी यज्ञानवलिहंत्यचरत्। तामिंद्रः कया च मायया हंतुं नाशंसत्। अथ ह सुमित्रः कुत्सः कल्याण आस। तमब्रवीदित्यादि। तस्मादेतत्सूक्तं शुगपनयनाय विनियोज्यं। अत एव हि सूत्रकारेण भारद्वाजेन दशमेऽहनि कर्तव्ये शांतिकर्मणि यजुर्वेदे पठितमेतत्सूक्तं विनियुज्यते। नव च सुचाहुतीरप नः शोशुचदघमिति॥

तत्र प्रथमामृचमाह॥

अप॑ नः॒ शोशु॑चद॒घमग्ने॑ शुशु॒ग्ध्या र॒यिं। अप॑ नः॒ शोशु॑चद॒घं॥१॥

अप॑। नः॒। शोशु॑चत्। अ॒घं। अग्ने॑। शु॒शु॒ग्धि। आ। र॒यिं। अप॑। नः॒। शोशु॑चत्। अ॒घं॥१॥

हे अग्ने नोऽस्माकमघं पापमपशोशुचत्। अस्मत्तो निर्गत्यास्मदीयं शत्रुं शोचयतु। यद्वा। अस्मदीयं पापं शोशुचत्। शोकयस्तं सद्विनश्यतु। अपि चास्माकं रयिं धनमा समंताच्छुशुग्धि। प्रकाशय। उक्तार्थमपि वाक्यमादरातिशयद्योतनाय पुनः पठ्यते। अवश्यमस्माकमघं विनश्यत्विति॥ शोशुचत्। शुच शोके। अस्माद्यङ्लुगंताल्लेट्यडागमः। अदादिवच्चेति वचनाच्छपो लुक्। अभ्यस्तानामादिरित्याद्युदात्तत्वं। अघं शोशुचद्रयिं शुशुग्धि चेति चार्थप्रतीतेश्चादिलोपे विभाषेति निघातप्रतिषेधः। शुशुग्धि। शुच दीप्तौ। लोटि बहुलं छंदसीति शपः श्लुः। हुझल्भ्यो हेर्धिः। चोः कुरिति कुत्वं॥

द्वितीयामृचमाह ॥

सुक्षेत्रिया सुगातुया वसूया च यजामहे। अप नः शोशुचदघं ॥ २ ॥

सुऽक्षेत्रिया। सुगातुऽया। वसुऽया। च। यजामहे। अप। नः। शोशुचत्। अघं ॥ २ ॥

सुक्षेत्रिया शोभनक्षेत्रेच्छया सुगातुया शोभनमार्गेच्छया वसूया च धनेच्छया निमित्तभूतया च यजामहे। अग्निं हविर्भिः पूजयामहे। यद्वा। सुक्षेत्रिया देवयजनलक्षणशोभनदेशसंबंधिना हविषाग्निं यजामहे। नोऽस्माकमघमपशोशुचत्। विनश्यतु ॥ सुक्षेत्रिया। शोभनं क्षेत्रं सुक्षेत्रं। तद्विषयेच्छा सुक्षेत्रिया। सुप आत्मनः क्यच्। न छंदस्यपुत्रस्येतीत्वदीर्घयोर्निषेधः। व्यत्ययेनेत्वं। क्यजंतात् अ प्रत्ययादिति भावेऽकारप्रत्ययः। ततष्टाप्। सुपां सुलुगिति तृतीयाया लुक्। एवमुत्तरत्रापि। यद्वा शोभनं क्षेत्रमस्यास्तीति सुक्षेत्रं। इयाडियाजीकाराणामुपसंख्यानमिति तृतीयाया डियाजादेशः ॥

तृतीयामृचमाह ॥

प्र यद्भंदिष्ठ एषां प्रास्माकासश्च सूरयः। अप नः शोशुचदघं ॥ ३ ॥

प्र। यत्। भंदिष्ठः। एषां। प्र। अस्माकासः। च। सूरयः। अप। नः। शोशुचत्। अघं ॥ ३ ॥

यद्यथैषां स्तोतॄणां मध्येऽयं कुत्सः प्रभंदिष्ठः प्रकर्षेण स्तोतृतमः। एवमस्माकासोऽस्माकीनाः सूरयः स्तोतारश्च प्रकर्षेण स्तोतृतमा भवंति। अन्यत्समानं ॥ भंदिष्ठः। भंदतिः स्तुतिकर्मा। भदि कल्याणे सुखे चेति तु धातुः। अस्मात्तृजंतात्तुश्छंदसीतीष्ठन्। तुरिष्ठेमेयःस्विति तृलोपः। अस्माकासः। अस्माकं संबंधिनोऽस्माकाः। तस्मिन्नणि च युष्माकास्माकावित्यस्माकादेशः। छांदसोऽणप्रत्ययस्य लोपः। संज्ञापूर्वकस्य विधेरनित्यत्वाद्वृद्ध्यभावः। आज्जसेरसुक्। स्थानिवदादेशेऽपि मकारात्परस्याकारस्योदात्तत्वं। यद्वा षष्ठीबहुवचनेऽस्माकंशब्दस्य मध्योदात्तस्य दृष्टत्वात्स एवाचार्येणातिदिश्यते ॥

चतुर्थीमृचमाह ॥

प्र यत्ते अग्ने सूरयो जायेमहि प्र ते वयं। अप नः शोशुचदघं ॥ ४ ॥

प्र। यत्। ते। अग्ने। सूरयः। जायेमहि। प्र। ते। वयं। अप। नः। शोशुचत्। अघं ॥ ४ ॥

हे अग्ने यद्यस्मात्ते तव सूरयः स्तोतारः प्रजायंते। पुत्रपौत्रादिरूपेण बहुविधा भवंति। ततो वयं च ते तव स्तोतारः संतः प्रजायेमहि। पुत्रपौत्रादिभिरुपेता भवेम॥ जायेमहि। प्रार्थनायां लिङ्। श्यनि ज्ञाजनोर्जेति जादेशः। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे श्यनो नित्त्वादाद्युदात्तत्वं॥

पंचमीमृचमाह॥

प्र यदग्नेः सहस्वतो विश्वतो यंति भानवः। अप नः शोशुचदघं॥५॥

प्र। यत्। अग्नेः। सहस्वतः। विश्वतः। यंति। भानवः। अप। नः। शोशुचत्। अघं॥५॥

सहस्वतः सहनवतः शत्रूनभिभवतोऽग्नेर्भानवो दीप्तयो विश्वतः सर्वतः सर्वस्मादपि प्रदेशात्प्रयंति। प्रकर्षेणोद्गच्छंति। यद्यस्मादेवं तस्मात्तेनाग्नितेजसास्मदीयमघं नश्यतु॥ यंति। इणो यण्। पा॰ ६.४.८१। इति यणादेशः॥

षष्ठीमृचमाह॥

त्वं हि विश्वतोमुख विश्वतः परिभूरसि। अप नः शोशुचदघं॥६॥

त्वं। हि। विश्वतःऽमुख। विश्वतः। परिऽभूः। असि। अप। नः। शोशुचत्। अघं॥६॥

हे अग्ने त्वं हि त्वं खलु विश्वतोमुखः सर्वतोज्वालः। तव मुखस्थानीयानां ज्वालानां न कुत्रापि प्रतिहतिरस्ति। अतो हे विश्वतोमुखाग्ने विश्वतः सर्वतः सर्वस्मादप्युपद्रवजातात्परिभूरसि। अस्माकं परिग्रहीता भव। रक्षको भवेत्यर्थः। अन्यत्समानं॥

सप्तमीमृचमाह॥

द्विषो नो विश्वतोमुखाति नावेव पारय। अप नः शोशुचदघं॥७॥

द्विषः। नः। विश्वतःऽमुख। अति। नावाऽइव। पारय। अप। नः। शोशुचत्। अघं॥७॥

हे विश्वतोमुख सर्वतोमुखाग्ने नावेव नावा नदीमिव द्विषः शत्रून्नोऽस्माननतिपारय। अतिक्रमय्य शत्रुरहितं प्रदेशं प्रापय॥ नावाऽइव। सावेकाच इति विभक्तेरुदात्तत्वं। पारय। पार तीर कर्मसमाप्तौ॥

अष्टमीमृचमाह ॥

स नः सिंधुमिव नावयाति पर्षा स्वस्तये। अप नः शोशुचदघं ॥ ८ ॥

सः। नः। सिंधुंऽइव। नावया। अति। पर्ष। स्वस्तये। अप। नः। शोशुचत्। अघं ॥ ८ ॥

पूर्वोक्त एवार्थः पुनरपि दार्ढ्याय प्रार्थ्यते। हे अग्ने स त्वं नोऽस्मान्नावया नावा सिंधुमिव नदीमिव स्वस्तये क्षेमार्थमतिपर्ष। शत्रूनतिक्रमय्य पालय। शत्रुरहितं प्रदेशमस्मान्प्रापयेत्यर्थः। त्वत्प्रसादान्नोऽस्माकमघं पापं चापशोशुचत्। अस्मत्तोऽपक्रम्यास्मच्छत्रुः शोकयुक्तो भवतु ॥ नावया। आङ्याजयारामुपसंख्यानमिति तृतीयाया अयारादेशः। उपोत्तमं रिति। पा० ६.१.२१७.। इत्यकारस्योदात्तत्वं। पर्षा। पॄ पालनपूरणयोः। लोटि बहुलं छंदसीति शपः श्लोरभावः। सिब्बहुलं लेटीति बहुलवचनात्सिप्। गुणः। द्व्यचोऽतस्तिङ इति दीर्घत्वं ॥

॥ इति प्रथमस्य सप्तमे पंचमो वर्गः ॥

वैश्वानरस्येति तृचं पंचमं सूक्तं कुत्सस्यार्षं त्रैष्टुभं। वैश्वानरगुणकोऽग्निः शुद्धाग्निर्वा देवता। तथा चानुक्रांतं। वैश्वानरस्य तृचं वैश्वानरीयमिति। व्यूढस्य चतुर्थेऽहन्याग्निमारुत इदं सूक्तं वैश्वानरीयनिविद्धानं। व्यूळ्हश्चेदिति खंडे सूचितं। वैश्वानरस्य सुमतौ क ईं व्यक्ताः। आ० ८.८.। इति ॥

तत्र प्रथमामृचमाह ॥

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः।
इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण ॥ १ ॥

वैश्वानरस्य। सुऽमतौ। स्याम। राजा। हि। कं। भुवनानां। अभिऽश्रीः।
इतः। जातः। विश्वं। इदं। वि। चष्टे। वैश्वानरः। यतते। सूर्येण ॥ १ ॥

वैश्वानरस्य विश्वेषां नराणां लोकांतरनेतृत्वेन स्वामित्वेन वा संबंधिनोऽग्नेः सुमतौ शोभनायामनुग्रहात्मिकायां बुद्धौ स्याम। अनुग्राह्यत्वेन वर्तमाना भवेम। हि कमित्येतद्धिशब्दार्थे। स हि वैश्वानरोऽभिश्रीरभिश्रयणीय आभिमुख्येन सेवितव्यः सन्भुवनानां सर्वेषां भूतजातानां राजा स्वामी भवति। यो वैश्वानरोऽग्निरितोऽस्मादरणिद्वयाज्जातमात्र एवेदं सर्वं जगद्विचष्टे। विशेषेण

पश्यति। प्रातरुद्यता सूर्येण च यतते। संयतते संगच्छते। उद्यंतं वावादित्यमग्निरनुसमारोहतीति तैत्तिरीयकं। यद्वा पार्थिवस्याग्नेस्तेजांस्यूर्ध्वं गच्छंति। सूर्यकिरणाश्चाधोमुखं प्रसरंति। तयोः संगमनं दृष्ट्वा वैश्वानरो यतते सूर्येणेत्यृषिर्ब्रूते। तथा च यास्कः। अमुतोऽमुष्य रश्मयः प्रादुर्भवंतीतोऽस्यार्चिषः। तयोर्भासोः संसंगं दृष्ट्वैवमवक्ष्यत्। नि॰ ७.२३.। इति। एवंभूतस्य महानुभावस्य वैश्वानरस्य सुमतौ स्यामेति संबंधः॥ वैश्वानरस्य। विश्वेषां नराणां संबंधी। नरे संज्ञायामिति पूर्वपदस्य दीर्घत्वं। तस्येदमित्यण्। सुमतौ। शोभना मतिः सुमतिः। तादौ चेति गतेः प्रकृतिस्वरे प्राप्ते मन्क्तिन्नित्यादिनोत्तरपदांतोदात्तत्वं। ननु तत्र कारकादित्यनुवृत्तेर्गतेरुत्तरस्य क्तिनो न प्राप्नोति। एवं। तर्हि मतिर्मननं। भावे क्तिन्। शोभनं मननं यस्यां बुद्धौ सा सुमतिः। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। चष्टे। चक्षिङ् व्यक्तायां वाचि। अयं पश्यतिकर्मा च। अदादित्वाच्छपो लुक्। स्कोः संयोगाद्योरिति कलोपः। यतते। यती प्रयत्ने॥

चातुर्मास्यान्वारंभणीया वैश्वानरपार्जन्या। तस्यां वैश्वानरस्य हविषः पृष्टो दिवीति याज्या। चातुर्मास्यानीति खंडे सूचितं। पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पर्जन्याय प्रगायत। आ॰ २.१५.। इति॥ तामेतां द्वितीयामृचमाह॥

पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश।
वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तं॥२॥

पृष्टः। दिवि। पृष्टः। अग्निः। पृथिव्यां। पृष्टः। विश्वाः। ओषधीः। आ। विवेश।
वैश्वानरः। सहसा। पृष्टः। अग्निः। सः। नः। दिवा। सः। रिषः। पातु। नक्तं॥२॥

अयं वैश्वानरोऽग्निर्दिवि द्युलोक आदित्यात्मना पृष्टः संस्पृष्टः। यद्वा निषिक्तो निहितो वर्तते। तथा पृथिव्यां भूमौ गार्हपत्यादिरूपेण पृष्टः संस्पृष्टो निहितो वा। तथा विश्वाः सर्वा ओषधीः पृष्टः संस्पृष्टः सोऽग्निराविवेश। पाकार्थमंतःप्रविष्टवान्। अंतःप्रविष्टेन पार्थिवेनाग्निना हि सर्वा ओषधयः पच्यंते। सहसा परेषामसाधारणेन बलेन पृष्टः संस्पृष्टो वैश्वानरो नोऽस्मान्दिवाह्नि रिषो हिंसतः शत्रोः पातु। रक्षतु। तथा स वैश्वानरो नक्तं रात्रावप्यस्मान्हिंसकात्पातु॥ पृष्टः। स्पृश संस्पर्शने। छांदसः सकारलोपः। यद्वा पृषु सेचने। निष्ठायां यस्य विभाषेतीट्प्रतिषेधः। दिवि। ऊडिदमिति विभक्तेरुदात्तत्वं। पृथिव्यां। उदात्तयण

इति विभक्तिरुदात्ता । रिषः । रिष हिंसायां । क्विप् चेति क्विप् । सावेकाच इति पंचम्या उदात्तत्वं ॥

तृतीयामृचमाह ॥

वैश्वानर तव तत्सत्यमस्त्वस्मान्रायो मघवानः सचंतां ।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ ३ ॥

वैश्वानर । तव । तत् । सत्यं । अस्तु । अस्मान् । रायः । मघऽवानः । सचंतां ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ ३ ॥

हे वैश्वानर तव तत्त्वदीयं तदस्माभिः क्रियमाणं कर्म सत्यमस्तु । अवितथफलं भवतु । ततोऽस्मान्मघवानो मघवंतो धनवंतो रायो धनवदतिप्रियाः पुत्राः सचंतां । सेवंतां । एवं यदस्माभिः प्रार्थितं नोऽस्मदीयं तत् मित्रोऽहरभिमानी देवो वरुणो रात्र्यभिमानी । अदितिरदीना देवमाता सिंधुः स्यंदनशीलोदकाभिमानी देवः । उतशब्दः समुच्चये । एते सर्वे मित्रादयो मामहंतां । पूजयंतां । पालयंतामित्यर्थः ॥

॥ इति प्रथमस्य सप्तमे षष्ठो वर्गः ॥

जातवेदस इत्येकर्चं षष्ठं सूक्तं मरीचिपुत्रस्य कश्यपस्यार्षं त्रैष्टुभं । जातवेदोगुणकोऽग्निः शुद्धाग्निर्वा देवता । तथा चानुक्रांतं । जातवेदस एका जातवेदस्यमेतदादीन्येकभूयांसि सूक्तसहस्रमेतत्तु कश्यपार्षमिति ॥ अहर्गणेषु द्वितीयादिष्वहःस्वाग्निमारुते जातवेदस्यनिविद्धानात्पूर्वमेषा शंसनीया । सूचितं च । जातवेदसे सुनवाम सोममित्याग्निमारुते जातवेदस्यानां । आ॰ ७. १. । इति ॥

तामेतां प्रथमामृचमाह ॥

जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः ॥ १ ॥

जातऽवेदसे । सुनवाम । सोमं । अरातिऽयतः । नि । दहाति । वेदः ।
सः । नः । पर्षत् । अति । दुःऽगानि । विश्वा । नावाऽइव । सिंधुं । दुःऽइता । अति ।
अग्निः ॥ १ ॥

जातवेदसे जातानामुत्पत्तिमतां सर्वेषां वेदित्रे। यद्वा जातैः सर्वैः प्राणिभिर्ज्ञायमानाय जातधनाय जातप्रज्ञाय वाग्नये लताक्ष्पं सोमं सुनवाम। अभिषुणुयाम। जातवेदोगुणकमग्निं यष्टुं सोमाभिषवं करवामेत्यर्थः। सोऽग्निररातीयतोऽरातिं शत्रुमिवास्मानाचरतः शत्रोर्वेदो धनं निदहाति। नितरां दहतु भस्मीकरोतु। अपि च सोऽग्निर्नोऽस्मान्विश्वा विश्वानि सर्वाणि दुर्गाणि दुर्गमनानि भोक्तुमशक्यानि दुःखान्यतिपर्षत्। अतिपारयतु। अतिक्रमय्य दुःखरहितं सुखं प्रापयतु। तत्र दृष्टांतः। नावेव सिंधुं। यथा कश्चित्कर्णधारो ग्राहादिभिर्दुष्टसत्वैराकुलितां नदीं नावा तारयति। तद्वत्। तथा दुरिता दुरितानि दुःखहेतुभूतानि पापान्यस्मानग्निरतिपारयतु। दुःखनिमित्तात्पापादस्मानुत्तारयत्वित्यर्थः। अत्र निरुक्तं। जातवेदाः कस्मात् जातानि वेद जातानि वैनं विदुर्जाते जाते विद्यत इति वा जातवित्तो वा जातधनो जातविद्यो वा जातप्रज्ञानो यत्तज्जातः पशूनविंदतेति तज्जातवेदसो जातवेदस्त्वमिति हि ब्राह्मणमित्यादि। नि० ७.१९.॥ जातवेदसे। जातानि वेत्तीति जातवेदाः। गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति वचनात्कारकपूर्वाद्वेत्तेरसुन् पूर्वपदप्रकृतिस्वरत्वं च। अरातीयतः। न विद्यते रातिर्दानं यस्येत्यरातिः शत्रुः। तमिवास्मानाचरति। उपमानादाचारे। पा० ३.१.१०.। उपमानभूतात्कर्मणः क्यच्। क्यजंताल्लटः शतृ। शतुरनुम इति ङस उदात्तत्वं। दहाति। दह भस्मीकरणे। लेट्याडागमः। विद्यते लभ्यत इति वेदो धनं। विदॢ लाभे। औणादिकः कर्मण्यसुन्। पर्षत्। पृ पालनपूरणयोः। अस्मादंतर्भावितण्यर्थाल्लेट्याडागमः। सिब्बहुलं लेटीति सिप्। दुर्गाणि। दुःखेन गम्यत एष्विति सुदुरोरधिकरण इति गमेर्डः॥

॥ इति प्रथमस्य सप्तमे सप्तमो वर्गः॥

स यो वृषेत्येकोनविंशत्यृचं सप्तमं सूक्तं। अत्रानुक्रम्यते। स यो वृषैकोना वार्षागिरा ऋज्राश्वांबरीषसहदेवभयमानसुराधस इति। वृषागिरो महाराजस्य पुत्रभूता ऋज्राश्वादयः पंच राजर्षयः सहेदं सूक्तं ददृशुः। अतस्तेऽस्य सूक्तस्य ऋषयः। उक्तं ह्यार्षानुक्रमण्यां। सूक्तं स यो वृषेत्येतत्पंच वार्षागिरा विदुः। नियुक्ता नामधेयैः स्वैरपि चैतत्स्यदित्यृचीति। अनादेशपरिभाषया त्रिष्टुप्। इंद्रो देवता॥ दशरात्रस्य षष्ठेऽहनि मरुत्वतीय इदं सूक्तं। तथा च सूचितं। यं त्वं रथमिंद्र स यो वृषेंद्र मरुत्व इति तिस्र इति मरुत्वतीयं। आ० ८.१.। इति॥

तत्र प्रथमामृचमाह ॥

स यो वृषा वृष्ण्येभिः समोका महो दिवः पृथिव्याश्च सम्राट् ।
सतीनसत्वा हव्यो भरेषु मरुत्वान्नो भवत्विंद्र ऊती ॥ १ ॥
सः । यः । वृषा । वृष्ण्येभिः । संऽओकाः । महः । दिवः । पृथिव्याः । च । संऽराट् ।
सतीनऽसत्वा । हव्यः । भरेषु । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ १ ॥

य इंद्रो वृषा कामानां वर्षिता वृष्ण्येभिर्वृष्णि भवैर्वीर्यैः समोकाः सम्यक् समवेतः संगतः । महो महतो दिवो द्युलोकस्य पृथिव्याः प्रथिताया भूमेश्च सम्राडीश्वरः । सतीनसत्वा । सतीनमित्युदकनाम । उदकस्य सत्वा सादयिता गमयिता । भरेषु संग्रामेषु हव्यः सर्वैः स्तोतृभिराह्वातव्यः । एवंभूतो मरुत्वान्मरुद्भिर्युक्तः स इंद्रो नोऽस्माकमूती ऊतये रक्षणाय भवतु ॥ वृष्ण्येभिः । वृषन्शब्दाद्भवे छंदसीति यत् । अल्लोपोऽन इत्यकारलोपः । ये चाभावकर्मणोरिति प्रकृतिभावस्तु व्यत्ययेन न भवति । महः । मह पूजायां । क्विप् । यद्वा महच्छब्देऽच्छब्दलोपः । सावेकाच इति विभक्तेरुदात्तत्वं । सम्राट् । मो राजि समः क्वाविति राजतौ क्विबंत उत्तरपदे समो मकारस्य मकारादेशः । मकारस्य च मकारवचनमनुस्वारबाधनार्थं । सतीनसत्वा । षद्लृ विशरणगत्यवसादनेषु । मेघेषु निषीदतीति सतीनं वृष्ट्युदकं । औणादिक ईनप्रत्ययस्तकारांतादेशश्च । यद्वा सती माध्यमिका वाक् । सा इना ईश्वरा यस्य तत्सतीनं । व्यत्ययेन पुंवद्भावाभावः । तत्सत्वा । सदेरंतर्भावितण्यर्थात्म्र ईरसद्योस्तुट् चेत्यौणादिको वनिप् तुडागमश्च । मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं । मरुत्वान् । झय इति मतुपो वत्वं । ऊती । ऊतियूतीत्यादिना क्तिन उदात्तत्वं । सुपां सुलुगिति चतुर्थ्याः पूर्वसवर्णदीर्घः ॥

द्वितीयामृचमाह ॥

यस्यानाप्तः सूर्यस्येव यामो भरेभरे वृत्रहा शुष्मो अस्ति ।
वृषंतमः सखिभिः स्वेभिरेवैर्मरुत्वान्नो भवत्विंद्र ऊती ॥ २ ॥
यस्य । अनाप्तः । सूर्यस्यऽइव । यामः । भरेऽभरे । वृत्रऽहा । शुष्मः । अस्ति ।
वृषन्ऽतमः । सखिऽभिः । स्वेभिः । एवैः । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ २ ॥

यस्येंद्रस्य यामो गतिरनाप्नः परैरप्राप्ना सूर्यस्येव। यथा सूर्यस्य गतिरन्यैर्न प्राप्तुं शक्यते तद्वत्। स्वेभिरात्मीयैरेवैर्गमनशीलैः सखिभिर्मित्रभूतैर्मरुद्भिः सह वृषंतमोऽतिशयेन कामानां वर्षिता। भरे भरे सर्वेषु संग्रामेषु वृत्रहा शत्रूणां हंता शुष्मः सर्वेषामसुराणां शोषकः। एवंभूतो य इंद्रोऽस्ति विद्यते स मरुत्वानिंद्रो नोऽस्माकं रक्षणाय भवतु॥ यामः। या प्रापणे। अर्तिस्तुस्वित्यादिना भावे मन्प्रत्ययः। निद्वादाद्युदात्तत्वं। शुष्मः। शुष शोषणे। अविसिविसिशुषिभ्यः किदिति मन्प्रत्ययः। निद्वादाद्युदात्तत्वं। अस्ति। यद्वृत्तयोगादनिघातः। वृषंतमः। वृषन्शब्दादुत्तरस्य तमपो नाद्वस्येति नुट्। एवैः। इण् गतौ। इणशीङ्भ्यां वन्॥

तृतीयामृचमाह॥

दि॒वो न यस्य॒ रेत॑सो॒ दुघा॑नाः॒ पंथा॑सो यंति शव॒साप॑रीताः।
तर॒द्द्वे॑षाः सा॒स॒हिः पौंस्ये॑भिर्म॒रुत्वा॑न्नो भवत्विंद्र॑ ऊ॒ती॥ ३॥

दि॒वः। न। यस्य॑। रेत॑सः। दुघा॑नाः। पंथा॑सः। यंति॑। शव॑सा। अप॑रिऽइताः।
तर॒त्ऽद्वे॑षाः। स॒स॒हिः। पौंस्ये॑भिः। म॒रुत्वा॑न्। नः॒। भ॒व॒तु॒। इंद्रः॑। ऊ॒ती॥ ३॥

यस्येंद्रस्य पंथासो रश्मयो रेतसो वृष्ट्युदकानि दुघाना दुहंतः प्रवर्षंतो यंति। निर्गच्छंति। द्युलोकादितस्ततः प्रसरंति। तत्र दृष्टांतः। दिवो न। यथा द्योतमानस्य सूर्यस्य किरणा वृष्टिं कुर्वंतो नभःस्थलान्निर्गच्छंति तद्वत्। कीदृशा रश्मयः। शवसा बलेन सहिताः। अपरीताः। परैरनभिगताः। दुःप्रापा इत्यर्थः। सोऽयमिंद्रस्तरद्द्वेषा द्वेषांसि शत्रूंस्तरन्। जितशत्रुक इत्यर्थः। पौंस्येभिर्बलैः सासहिः शत्रूणामभिभविता। एवंभूतो मरुत्वानिंद्रो नोऽस्माकं रक्षणाय भवतु॥ रेतसः। रेत इत्युदकनाम। रीयते गच्छतीति रेतः। री गतिरेषणयोः। स्रुरीभ्यां तुट् चेत्यसुन् तुडागमश्च। शसो व्यत्ययेन ङसादेशः। दुघानाः। दुह प्रपूरणे। कर्तरि लटः शानच्। अदादित्वाच्छपो लुक्। व्यत्ययेन घत्वं। वृषादेराकृतिगणत्वादाद्युदात्तत्वं। पंथासः। पतंतीति पंथानो रश्मयः। पतेस्थ चेतीनिप्रत्ययः। थकारांतादेशश्च। जसि पथिमथ्यृभुक्षामादिति व्यत्ययेनात्वं। आज्जसेरसुक्। यद्वा पंथान इत्यत्र वर्णव्यापत्त्या नकारस्य सकारः। पथिमथोः सर्वनामस्थान इत्याद्युदात्तत्वं। सासहिः। षह अभिभवे। उत्सर्गश्छंदसीति वचनादादृगमहन इति किप्रत्ययः। लिड्वद्भावाद्द्विर्वचनं॥

चतुर्थीमृचमाह ॥

सो अंगिरोभिरंगिरस्तमो भूद्वृषा वृषभिः सखिभिः सखा सन्।

ऋग्मिभिर्ऋग्मी गातुभिर्ज्येष्ठो मरुत्वान्नो भवत्विंद्र ऊती ॥ ४ ॥

सः। अंगिरःऽभिः। अंगिरःऽतमः। भूत्। वृषा। वृषऽभिः। सखिऽभिः। सखा। सन्।

ऋग्मिऽभिः। ऋग्मी। गातुऽभिः। ज्येष्ठः। मरुत्वान्। नः। भवतु। इंद्रः। ऊती ॥ ४ ॥

स इंद्रोऽंगिरोभिः। अंगंति गच्छंतीत्यंगिरसो गंतारः। तेभ्योऽप्यंगिरस्तमोऽभूत्। अतिशयेन गंता भवति। वृषभिर्वृषा वर्षितृभ्योऽप्यतिशयेन वर्षिता। सखिभिः समानख्यानेभ्यो मित्रभूतेभ्योऽपि सखातिशयेन हितकारी। एवंभूतः सन् ऋग्मिभिरर्चनीयेभ्योऽपि ऋग्म्यर्चनीयो भवति। गातुभिर्गातव्येभ्यः स्तोतव्येभ्योऽपि ज्येष्ठोऽतिशयेन स्तोतव्यः। एवंगुणविशिष्टो मरुत्वानिंद्रो रक्षणाय भवतु ॥ अंगिरोभिः। अगि रगि लगि गत्यर्थाः। अंगिरा अप्सराः। उ॰ ४. २३५. २३६.। इत्यौणादिकोऽसुन्प्रत्ययो निपात्यते। इदमादिषु सर्वत्र पंचम्यर्थे तृतीया। ऋग्मिभिः। ऋच स्तुतौ। संपदादिलक्षणो भावे क्विप्। मत्वर्थीयो मिनिः। पदत्वात्कुत्वं जश्त्वं च। गातुभिः। गा स्तुतौ। कमिमनिजनीत्यादिना कर्मणि तुप्रत्ययः ॥

पंचमीमृचमाह ॥

स सूनुभिर्न रुद्रेभिर्ऋभ्वा नृषाह्ये सासह्वाँ अमित्रान्।

सनीळेभिः श्रवस्यानि तूर्वन्मरुत्वान्नो भवत्विंद्र ऊती ॥ ५ ॥

सः। सूनुऽभिः। न। रुद्रेभिः। ऋभ्वा। नृऽसह्ये। ससह्वान्। अमित्रान्।

सऽनीळेभिः। श्रवस्यानि। तूर्वन्। मरुत्वान्। नः। भवतु। इंद्रः। ऊती ॥ ५ ॥

सूनुभिर्न पुत्रैरिव रुद्रेभी रुद्रपुत्रैर्मरुद्भिर्युक्त ऋभ्वा महान्। एवंभूतः स इंद्रो नृषाह्ये नृभिः पुरुषैः सोढव्ये संग्रामेऽमित्रान् शत्रून् सासह्वानभिभूतवान्। अपि च सनीळेभिः समाननिलयैर्मरुद्भिः सह श्रवस्यानि। श्रव इत्यन्ननाम। तद्धेतुभूतान्युदकानि तूर्वन् मेघात्प्रच्यावयन् मरुत्वानिंद्रोऽस्माकं रक्षणाय भवतु ॥ नृषाह्ये। षह मर्षणे। शकिसहोश्चेति कर्मणि यत्। अन्येषामपि दृश्यत इति संहितायां धात्वकारस्य दीर्घत्वं। यतोऽनाव इत्याद्युदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वं।

सासह्वान्। षह अभिभवे। लिटः क्वसुः। अभ्यासदीर्घत्वं छांदसं। अमित्रान्। मित्राण्येषु न संतीत्यमित्राः। नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं। सनीळेभिः। समानं नीळं येषां ते सनीळाः। समानस्य छंदसीति सभावः॥

॥ इति प्रथमस्य सप्तमेऽष्टमो वर्गः॥

षष्ठीमृचमाह॥

स मन्युमीः समदनस्य कर्तास्माकेभिर्नृभिः सूर्यं सनत्।
अस्मिन्नहन्सत्पतिः पुरुहूतो मरुत्वान्नो भवत्विंद्र ऊती॥ ६॥

सः। मन्युऽमीः। सऽमदनस्य। कर्ता। अस्माकेभिः। नृऽभिः। सूर्यं। सनत्।
अस्मिन्। अहन्। सत्ऽपतिः। पुरुऽहूतः। मरुत्वान्। नः। भवतु। इंद्रः। ऊती॥ ६॥

शत्रुभिरपहृतासु गोषु तैः सह युद्धार्थं विनिर्गता ऋज्राश्वादयोऽनेन सूक्तेनेंद्रमस्तुवन्। स इंद्रो मन्युमीः। मन्योः कोपस्य निर्माता। यद्वा। अभिमन्यमानस्य शत्रोर्हिंसकः। अपि च। समदनस्य संग्रामस्य कर्ता। सत्पतिः सतां पालयिता। पुरुहूतो बहुभिर्यजमानैराहूतः। एवंगुणविशिष्टः स अस्मिन्नहन् अस्मिन्दिवसेऽस्माकेभिरस्माकैरस्मदीयैर्नृभिः पुरुषैः सूर्यं सूर्यप्रकाशं सनत्। संभक्तं करोतु। शत्रुपुरुषैस्तु दृष्टिनिरोधकमंधकारं संयोजयतु। स च मरुत्वानिंद्रोऽस्माकं रक्षणाय भवतु॥ मन्युमीः। मन्युं मिनातीति मन्युमीः। मीञ् हिंसायां। क्विप्। समदनस्य। सह माद्यंत्यस्मिन्निति समदनः संग्रामः। मदी हर्षे। अधिकरणे ल्युट्। सहस्य सः संज्ञायां। पा० ६.३.७८.। इति सभावः। अस्माकेभिः। तस्मिन्निणि च युष्माकास्माकावित्यणयस्मच्छब्दस्यास्माकादेशः। संज्ञापूर्वकस्य विधेरनित्यत्वाद्वृद्ध्यभावः। बहुलं छंदसीति भिस ऐसभावः। स्वरस्तु प्रास्माकासश्च सूरयः। ऋ० १.९७.३.। इत्यत्रोक्तः। सनत्। वन षण संभक्तौ। लेट्यडागमः। अहन्। सुपां सुलुगिति सप्तम्या लुक्। सत्पतिः। पत्यावैश्वर्ये इति पूर्वपदप्रकृतिस्वरत्वं॥

सप्तमीमृचमाह॥

तमूतयो रणयञ्छूरसातौ तं क्षेमस्य क्षितयः कृण्वत त्रां।
स विश्वस्य करुणस्येश एको मरुत्वान्नो भवत्विंद्र ऊती॥ ७॥

तं। ऊतयः। रणयन्। शूरऽसातौ। तं। क्षेमस्य। क्षितयः। कृण्वत। त्रां।
सः। विश्वस्य। करुणस्य। ईशे। एकः। मरुत्वान्। नः। भवतु। इंद्रः। ऊती ॥ ७ ॥

तमिंद्रं शूरसातौ शूरैर्वीरपुरुषैः संभजनीये संग्राम ऊतयो गंतारो मरुतो रणयन्। रमयंति। यद्वा प्रहर भगवो जहि वीरयस्वेत्येवंरूपं शब्दमिंद्रमुद्दिश्य कुर्वंति। अपि च क्षितयो मनुष्यास्तमिंद्रं क्षेमस्य रक्षणीयस्य सर्वस्य धनस्य त्रां त्रातारं कृण्वत। कुर्वंति। देवतांतरादस्य कोऽतिशय इति चेत् उच्यते। स इंद्रो विश्वस्य सर्वस्य करुणस्याभिमतफलनिष्पादनरूपस्य कर्मण एकोऽसहाय एवेशे। ईष्टे। अन्यत्पूर्ववत् ॥ ऊतयः। अवतेर्गत्यर्थात् कृत्यल्युटो बहुलमिति कर्तरि क्तिन्। तितुत्रेतीट्प्रतिषेधः। ज्वरत्वरेत्यादिना वकारस्योपधायाश्च ऊट्। ऊतियूतीत्यादिना क्तिन उदात्तत्वं। यद्वा कर्तरि क्तिच्। रणयन्। रमतेर्हेतुमण्णि-जंताद्वर्तमाने छांदसो लङ्। अंत्यविकारश्छांदसः। यद्वा। रण शब्दार्थः। अस्माण्णिजंतात्पूर्ववल्लङ्। त्रां। त्रैङ् पालने। त्रायत इति त्राः। क्विप् चेति चशब्देन दृशिग्रहणानुकर्षणान्निरुपपदादपि क्विप्। करुणस्य। डुकृञ् करणे। कृवृदारिभ्य उनन्निति भाव उनन्। व्यत्ययेन प्रत्ययाद्युदात्तत्वं। ईशे। ईश ऐश्वर्ये। लोपस्त आत्मनेपदेष्विति तलोपः ॥

अष्टमीमृचमाह ॥

तमप्संत शवस उत्सवेषु नरो नरमवसे तं धनाय।
सो अंधे चित्तमसि ज्योतिर्विदन्मरुत्वान्नो भवत्विंद्र ऊती ॥ ८ ॥

तं। अप्संत। शवसः। उत्ऽसवेषु। नरः। नरं। अवसे। तं। धनाय।
सः। अंधे। चित्। तमसि। ज्योतिः। विदत्। मरुत्वान्। नः। भवतु। इंद्रः। ऊती ॥ ८ ॥

नरो नेतारः स्तोतारः शवसो बलस्य संबंधिषूत्सवेषु संग्रामेषु नरं जयस्य नेतारं तमिंद्रमप्संत। आप्नुवंति। किमर्थं। अवसे। अन्नार्थं रक्षणार्थं वा। तथा धनाय। धनार्थं च तमिंद्रं प्राप्नुवंति। यस्मात्स इंद्रस्तमसि दृष्टिप्रतिबंधकेऽधे चित् आध्यानरहिते चित्तव्यामोहकरेऽपि संग्रामे ज्योतिर्विजयलक्षणं प्रकाशं विदत्। लंभयति। तस्मात्तमेव प्राप्नुवंतीत्यर्थः। अन्यत्समानं ॥ अप्संत। आप्लृ व्याप्तौ। लङि व्यत्ययेनात्मनेपदं। व्यत्ययेन क्सप्रत्ययः। व्यत्ययेन धातोर्ह्रस्वत्वं।

विदत् । विद्लृ लाभे । छंदसि लुङ्लङ्लिट इति वर्तमाने छांदसो लुङ् । लृदित्वाच्चेरङादेशः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः ॥

नवमीमृचमाह ॥

स सव्येन यमति व्राधतश्चित्स दक्षिणे संगृभीता कृतानि ।
स कीरिणा चित्सनिता धनानि मरुत्वान्नो भवत्विंद्र ऊती ॥ ९ ॥

सः । सव्येन । यमति । व्राधतः । चित् । सः । दक्षिणे । संऽगृभीता । कृतानि ।
सः । कीरिणा । चित् । सनिता । धनानि । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ ९ ॥

स इंद्रः सव्येन वामहस्तेनैकहस्तेन व्राधतश्चित् हिंसतो महतः शत्रूनपि यमति । नियमयति । तथा स इंद्रो दक्षिणे दक्षिणपार्श्वस्थेन हस्तेनैकेन यजमानैः कृतानि हवींषि संगृभीता । संगृह्णाति । अपि च स इंद्रः कीरिणा चित् कीर्तयित्रा स्तोत्रा च स्तुतः सन्धनानि सनिता प्रदानशीलो भवति । हविःप्रदातॄणामिव स्तोतॄणामपि धनं प्रयच्छतीत्यर्थः । शिष्टं स्पष्टं ॥ यमति । यम उपरमे । णिच्यमंतत्वान्मित्त्वे मितां ह्रस्व इति ह्रस्वत्वं । छंदस्युभयथेति शप आर्द्धधातुकत्वाणेरनिटीति णिलोपः । व्राधतः । वृधु वृद्धौ । अस्मादतिप्रत्यय औणादिक आमागमश्च । वृषादित्वादाद्युदात्तत्वं । संगृभीता । ग्रह उपादाने । लिङि बहुलं छंदसीति विकरणस्य लुक् । लिङः सलोप इति सलोपः । ग्रहिज्यादिना संप्रसारणं । हृग्रहोर्भ इति भत्वं । अचोऽतस्तिङ इति दीर्घः । सनिता । षणु दाने । ताच्छीलिकस्तृन् । धनानि । न लोकाव्ययेति षष्ठीप्रतिषेधः ॥

दशमीमृचमाह ॥

स ग्रामेभिः सनिता स रथेभिर्विदे विश्वाभिः कृष्टिभिर्न्व१द्य ।
स पौंस्येभिरभिभूरशस्तीर्मरुत्वान्नो भवत्विंद्र ऊती ॥ १० ॥

सः । ग्रामेभिः । सनिता । सः । रथेभिः । विदे । विश्वाभिः । कृष्टिऽभिः । नु । अद्य ।
सः । पौंस्येभिः । अभिऽभूः । अशस्तीः । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ १० ॥

स इंद्रो ग्रामेभिर्मरुत्संघैः सह सनिता फलानां प्रदाता भवति । स चाद्यास्मिन्नहनि नु क्षिप्रं विश्वाभिः कृष्टिभिः सर्वैर्मनुष्यै रथेभिरिंद्रसंबंधिभी रथैः कारणभूतैर्विदे । विज्ञायते । अपि च स इंद्रः पौंस्येभिः स्वकीयैर्बलैरशस्तीरशंस-

नीयान् शत्रूनभिभूः । अभिभवन्वर्तते । मरुत्वान्स इंद्रो नोऽस्माकं रक्षणाय भवतु ॥ यामेभिः । बहुलं छंदसीति भिस ऐसभावः । यामादीनां च । फि० २.१५. । इत्याद्युदात्तत्वं । विदे । विद ज्ञाने । कर्मणि लट् । बहुलं छंदसीति विकरणस्य लुक् । लोपस्त आत्मनेपदेष्विति तलोपः ॥

॥ इति प्रथमस्य सप्तमे नवमो वर्गः ॥

एकादशीमृचमाह ॥

स जामिभिर्यत्समजाति मीळ्हेऽजामिभिर्वा पुरुहूत एवैः ।
अपां तोकस्य तनयस्य जेषे मरुत्वान्नो भवत्विंद्र ऊती ॥ ११ ॥

सः । जामिऽभिः । यत् । संऽअजाति । मीळ्हे । अजामिऽभिः । वा । पुरुऽहूतः । एवैः ।
अपां । तोकस्य । तनयस्य । जेषे । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ ११ ॥

पुरुहूतो बहुभिर्यजमानैराहूतः स इंद्रो मीळ्हे संग्रामे । मीळ्हमिति धननाम । तद्धेतुत्वात्संग्रामोऽपि मीळ्हशब्देनोच्यते । जामिभिर्बंधुभिरजामिभिर्वा बांधवरहितैर्वैवैर्युद्धार्थं मरुद्भिः सह यद्यदा समजाति संगच्छते । तेषामुभयविधानामपामिंद्रं प्राप्नुवतां पुरुषाणां तोकस्य पुत्रस्य तनयस्य तत्पुत्रस्य च जेषे जयप्राप्तये स इंद्रो भवति । किमु वक्तव्यमस्माकं स्तोतृतमानां जयो भवतीति । अन्यत्समानं ॥ समजाति । अज गतिक्षेपणयोः । लेट्याडागमः । जेषे । जि जये । औणादिकः सप्रत्ययः । चतुर्थ्यर्थे सप्तमी । यद्वा । जेषृ णेषृ प्रेषृ गतौ । क्विप् चेति क्विप् । सावेकाच इति विभक्तेरुदात्तत्वं ॥

द्वादशीमृचमाह ॥

स वज्रभृद्दस्युहा भीम उग्रः सहस्रचेताः शतनीथ ऋभ्वा ।
चम्रीषो न शवसा पांचजन्यो मरुत्वान्नो भवत्विंद्र ऊती ॥ १२ ॥

सः । वज्रऽभृत् । दस्युऽहा । भीमः । उग्रः । सहस्रऽचेताः । शतऽनीथः । ऋभ्वा ।
चम्रीषः । न । शवसा । पांचऽजन्यः । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ १२ ॥

स इंद्रो वज्रभृत् अन्यैर्भर्तुमशक्यस्य वज्रस्य भर्ता । दस्युहा दस्यूनामुपक्षपयितॄणामसुराणां हंता । भीमः सर्वेषां भयहेतुः । उग्र उद्गूर्णतेजाः । सहस्रचेता

बहुविधज्ञानः। सर्वज्ञ इत्यर्थः। शतनीथ। बहुस्तुतिर्बहुविधप्रापणो वा। ऋभ्वा। उरु भासमानो महान्वा। चम्रीषो न चम्वां चमसे रसात्मनावस्थितः सोम इव शवसा बलेन पांचजन्यः। गंधर्वा अप्सरसो देवा असुरा रक्षांसि पंच जनाः। निषादपंचमाश्चत्वारो वर्णा वा। तेषु रक्षकत्वेन भवः। एवंभूतः स मरुत्वानिंद्रो नोऽस्माकं रक्षणाय भवतु ॥ दस्युहा। बहुलं छंदसीति हंतेः क्विप्। भीमः। ञिभी भये। भीमादयोऽपादान इत्यपादाने भियः षुग्वेति मक्। शतनीथः। णीञ् प्रापणे। हनिकुषिनीरमिकाशिभ्यः क्थन्निति क्थन्प्रत्ययः। चम्रीषः। इष गतौ। चम्वामिषति गच्छतीति चम्रीषः। इगुपधलक्षणः कप्रत्ययः। वर्णव्यापत्त्या रेफो दीर्घश्च। यद्वा चमेरौणादिक ईषन्प्रत्ययः। पूर्ववद्रेफः। पांचजन्यः। भवार्थे वहिर्देवपंचजनेभ्यश्चेति वक्तव्यं। पा० ४. ३. ५८. ३.। इति ञ्यप्रत्ययः। ञित्वादाद्युदात्तत्वं ॥

त्रयोदशीमृचमाह ॥

तस्य वज्रः क्रंदति स्मत्स्वर्षा दिवो न त्वेषो रवथः शिमीवान्।
तं सचंते सनयस्तं धनानि मरुत्वान्नो भवत्विंद्र ऊती ॥ १३ ॥

तस्य। वज्रः। क्रंदति। स्मत्। स्वःऽसाः। दिवः। न। त्वेषः। रवथः। शिमीऽवान्।
तं। सचंते। सनयः। तं। धनानि। मरुत्वान्। नः। भवतु। इंद्रः। ऊती ॥ १३ ॥

तस्येंद्रस्य वज्रः कुलिशः स्मत् भृशं क्रंदति। शत्रूनाक्रंदयति। रोदयतीत्यर्थः। य इंद्रः स्वर्षाः शोभनस्योदकस्य दाता। दिवो न दिवः संबंधी सूर्य इव त्वेषो दीप्तः। रवथः शब्दस्य गर्जनलक्षणस्य कर्ता। शिमीवान्। शिमीति कर्मनाम। लोकानुग्राहकेन कर्मणा युक्तः। तमिंद्रं सनयो धनस्य दानानि सचंते। सेवंते। तथा तं धनानि च सेवंते। स मरुत्वानिंद्रो नोऽस्माकं रक्षणाय भवतु ॥ क्रंदति। कदि क्रदि क्लदि आह्वाने रोदने च। छंदस्युभयथेति शप आर्धधातुकत्वाण्णेरनिटीति णिलोपः। स्वर्षाः। सुपूर्वादर्तेर्विच्। सुष्ठु ऋतिं गच्छतीति स्वरुदकं। तत्सनोतीति स्वर्षाः। षणु दाने। जनसनखनक्रमगमो विट्। विड्वनोरनुनासिकस्यादित्यात्वं। सनोतेरन इति षत्वं। त्वेषः। त्विष दीप्तौ। पचाद्यच्। रवथः। रु शब्दे। शीङ्शपिरुगमिवंचिजीविप्राणिभ्योऽथ इत्यथप्रत्ययः। गुणावादेशौ। सनयः। सनोतेर्भाव औणादिक इप्रत्ययः ॥

चतुर्दशीमृचमाह ॥

यस्याजस्रं शवसा मानमुक्थं परिभुजद्रोदसी विश्वतः सीं ।
स पारिषत्क्रतुभिर्मंदसानो मरुत्वान्नो भवत्विंद्र ऊती ॥ १४ ॥
यस्य । अजस्रं । शवसा । मानं । उक्थं । परिऽभुजत् । रोदसी इति । विश्वतः । सीं ।
सः । पारिषत् । क्रतुऽभिः । मंदसानः । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ १४ ॥

यस्येंद्रस्योक्थं प्रशस्यं शवसा मानं बलेन सर्वस्य परिच्छेदकं सर्वेषां बलस्योपमानभूतं वा रोदसी द्यावापृथिव्यौ विश्वतः सीमजस्रमनवरतं परिभुजत् परितः सर्वतो भुनक्ति पालयति । स इंद्रः क्रतुभिरस्माभिः कृतैर्यागैर्मंदसानो मोदमानः सन्पारिषत् । अस्मान्दुरितात्पारयतु ॥ उक्थं । वच परिभाषणे । पातृतुदिवचीत्यादिना कर्मणि थक् । वचिस्वपीत्यादिना संप्रसारणं । परिभुजत् । भुज पालनाभ्यवहारयोः । लेट्यडागमः । व्यत्ययेन शः । पारिषत् । पार तीर कर्मसमाप्तौ । लेट्यडागमः । सिब्बहुलं लेटीति सिप् । तस्यार्धधातुकत्वादिट् । व्यत्ययेन णिलोपः । मंदसानः । मदि स्तुतिमोदमदस्वप्नकांतिगतिषु । ऋंजिवृधिमंदिसहिभ्यः किदित्यसानच्प्रत्ययः ॥

पंचदशीमृचमाह ॥

न यस्य देवा देवता न मर्ता आपश्चन शवसो अंतमापुः ।
स प्ररिक्वा त्वक्षसा क्ष्मो दिवश्च मरुत्वान्नो भवत्विंद्र ऊती ॥ १५ ॥
न । यस्य । देवाः । देवता । न । मर्ताः । आपः । चन । शवसः । अंतं । आपुः ।
सः । प्रऽरिक्वा । त्वक्षसा । क्ष्मः । दिवः । च । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ १५ ॥

देवता देवस्य दानादिगुणयुक्तस्य यस्येंद्रस्य शवसो बलस्यांतमवसानं देवा वस्वाद्या देवगणा नापुः । नानशिरे । तथा मर्ता मनुष्या आपश्चनापोऽपि न प्रापुः । स तादृश इंद्रस्त्वक्षसा शत्रूणां तनूकर्त्रात्मीयेन बलेन क्ष्मः पृथिव्या दिवश्च स्वर्गस्य च प्ररिक्वा प्रकर्षेण रेचको भवति । लोकद्वयादप्यस्य बलमतिरिच्यत इत्यर्थः । मरुद्भिर्युक्तः स इंद्रो नोऽस्माकमूती ऊतये रक्षणाय भवतु ॥ देवता । देव एव देवता । देवात्तलिति स्वार्थे तल् । सुपां सुलुगिति षष्ठ्या लुक् । मर्ताः । मृङ् प्राणत्यागे । असिहसीत्यादिना तन्प्रत्ययः । निप्वादायु-

दात्तत्वं । प्ररिक्वा । रिचिर् विरेचने । अन्येभ्योऽपि दृश्यंत इति क्वनिप् । अंत्यविकारश्छांदसः । त्वक्षसा । तक्षू त्वक्षू तनूकरणे । असुन् । नित्त्वादाद्युदात्तत्वं । क्ष्मः । क्ष्मेति पृथिवीनाम । आतो धातोरित्यत्रात इति योगविभागादिष्टसिद्धिरित्यभिधानात् ङसि भसंज्ञायामाकारलोपः । यद्वा क्ष्मायी विधूनने । अस्मात्क्विप् चेति क्विप् । वेरपृक्तलोपात्पूर्वं वलि लोपः । अन्यत्समानं । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं ॥

॥ इति प्रथमस्य सप्तमे दशमो वर्गः ॥

षोडशीमृचमाह ॥

रोहिच्छ्यावा सुमदंशुर्ललामीर्द्युक्षा राय ऋज्राश्वस्य ।
वृषण्वंतं बिभ्रती धूर्षु रथं मंद्रा चिकेत नाहुषीषु विक्षु ॥ १६ ॥

रोहित् । श्यावा । सुमत्ऽअंशुः । ललामीः । द्युक्षा । राये । ऋज्रऽअश्वस्य ।
वृषण्ऽवंतं । बिभ्रती । धूःऽसु । रथं । मंद्रा । चिकेत । नाहुषीषु । विक्षु ॥ १६ ॥

रोहित् रोहितवर्णा श्यावा श्यामवर्णा । उभयोः पार्श्वयोरुभयविधवर्णयुक्तेत्यर्थः । सुमदंशुः । सुमत् स्वतः प्रांशुः । उक्तं च यास्केन । सुमत् स्वयमित्यर्थः । नि° ६. २२. । इति । अतिदीर्घावयवा । ललामीः पुंड्रवती । अश्वभूषणयुक्ता वा । द्युक्षा दिवि द्युलोके कृतनिवासा ऋज्राश्वस्यैतत्संज्ञस्य राजर्षे राये धनार्थं वृषण्वंतं वृष्णा सेक्त्रेंद्रेण युक्तं रथं धूर्षु युगसंबंधिषु वहनप्रदेशेषु बिभ्रती वहंती मंद्रा सर्वेषामाह्लादकयश्वपंक्तिर्नाहुषीषु । नहुषा मनुष्याः । तत्संबंधिनीषु सेनालक्षणासु प्रजासु चिकेत । ज्ञायते । ईदृश्याश्वपंक्त्या युक्त इंद्रः संग्रामेष्वनुग्राहकतया प्रादुर्भवतीत्यर्थः ॥ ललामीः । ललामशब्दाच्छंदसीवनिपाविति मत्वर्थीय इकारः । अङ्गंतत्वात्सुलोपाभावः । द्युक्षा । क्षि निवासगत्योः । औणादिको डप्रत्ययः । ततष्टाप् । ऋज्राश्वस्य । ऋज गतिस्थानार्जनोपार्जनेषु । ऋज्रेंद्रेत्यादिना रक्प्रत्ययांतो निपातितः । ऋज्रा गतिमंतोऽश्वा यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । वृषण्वंतं । अनो नुडिति मतुपो नुट् । चिकेत । कित ज्ञाने । छंदसि लुङ्लङ्लिट इति वर्तमाने कर्मणि लिट् । व्यत्ययेन तिप् ॥

सप्तदशीमृचमाह ॥

एतत्त्यत्त इंद्र वृष्ण उक्थं वार्षागिरा अभि गृणंति राधः ।
ऋज्राश्वः प्रष्टिभिरंबरीषः सहदेवो भयमानः सुराधाः ॥ १७ ॥
एतत् । त्यत् । ते । इंद्र । वृष्णे । उक्थं । वार्षागिराः । अभि । गृणंति । राधः ।
ऋज्रऽअश्वः । प्रष्टिऽभिः । अंबरीषः । सहऽदेवः । भयमानः । सुऽराधाः ॥ १७ ॥

हे इंद्र वृष्णः कामानां वर्षितुस्ते तव त्यत्तदेतदुक्थं स्तोत्रं राधः संराधकं त्वत्प्रीतिहेतुं वार्षागिरा वृषागिरो राज्ञः पुत्रा ऋज्राश्वादयोऽभिगृणंति । आभिमुख्येन वदंति । वार्षागिरा इत्येतद्विवृणोति । ऋज्राश्व एतत्संज्ञो राजर्षिः प्रष्टिभिः पार्श्वस्थैरन्यैर्ऋषिभिः सहेंद्रमस्तौत् । के ते पार्श्वस्थाः । अंबरीषादयश्चत्वारो राजर्षयः ॥ वार्षागिराः । तस्यापत्यमित्यण्प्रत्ययः । गृणंति । गॄ शब्दे । प्वादीनां ह्रस्व इति ह्रस्वत्वं । राधः । राध साध संसिद्धौ । राध्नोति समृद्धो भवत्यनेनेति राधः । करणेऽसुन् । ऋज्राश्वः । ऋज्रा गतिमंतोऽश्वा यस्य स तथोक्तः । अंबरीषः । अबि शब्दे । औणादिको ऽरीषन्प्रत्ययः । उ० ४.२९. । सहदेवः । देवैः सह वर्तत इति सहदेवः । वोपसर्जनस्येति विकल्पनात्सभावाभावः । भयमानः । ञिभी भये । अस्मादंतर्भावितण्यर्थाद्व्यत्ययेन शानच् । बहुलं छंदसीति शपः श्लोरभावः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वर एव शिष्यते । सुराधाः । राध इति धननाम । शोभनं राधो यस्य । सोर्मनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वं ॥

अष्टदशीमृचमाह ॥

दस्यूञ्छिम्यूँश्च पुरुहूत एवैर्हत्वा पृथिव्यां शर्वा नि बर्हीत् ।
सनत्क्षेत्रं सखिभिः श्वित्न्येभिः सनत्सूर्यं सनदपः सुवज्रः ॥ १८ ॥
दस्यून् । शिम्यून् । च । पुरुऽहूतः । एवैः । हत्वा । पृथिव्यां । शर्वा । नि । बर्हीत् ।
सनत् । क्षेत्रं । सखिऽभिः । श्वित्न्येभिः । सनत् । सूर्यं । सनत् । अपः । सुऽवज्रः ॥ १८ ॥

पुरुहूतो बहुभिर्यजमानैराहूत इंद्र एवैर्गमनशीलैर्मरुद्भिर्युक्तः सन् पृथिव्यां भूमौ वर्तमानान्दस्यूनुपक्षपयितॄञ्छत्रून् शिम्यूंश्च शमयितॄन्वधकारिणो राक्षसादींश्च हत्वा प्रहृत्य तदनंतरं शर्वा हिंसकेन वज्रेण निबर्हीत् । अवधीत् । निबर्हयति

वधकर्मा। एवं शत्रून्निरस्य श्वित्न्येभिः श्वेतवर्णैरलंकारेण दीप्तांगैः सखिभिर्मित्रभूतैर्मरुद्भिः सह क्षेत्रं शत्रूणां स्वभूतां भूमिं सनत्। समभाक्षीत्। तथा वृत्रेण तिरोहितं सूर्यं तस्य वृत्रस्य हननेन सनत्। अभजत। प्राप्तवानित्यर्थः। तथा सुवज्रः शोभनवज्रयुक्त इंद्रो वृत्रेण निरुद्धा अपो वृष्ट्युदकानि सनत्। समभजत ॥ दस्यून्। दसु उपक्षये। यजिमनिशुंधिदसिजनिभ्यो युः। वृषादित्वादाद्युदात्तत्वं। शिम्यून्। शमु उपशमे। शमयति सर्वं तिरस्करोतीति राक्षसादिः शिम्युः। औणादिको युन्प्रत्ययः। वर्णव्यापत्त्याकारस्येत्वं। शर्वा। शॄ हिंसायां। अन्येभ्योऽपि दृश्यंत इति वनिप्। सुपां सुलुगिति तृतीयाया डादेशः। सनत्। वन षण संभक्तौ। लङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। श्वित्न्येभिः। श्विता वर्णे। औणादिको नक्प्रत्ययः। श्वित्नं शुक्लवर्णमर्हंतीति श्वित्न्याः। छंदसि चेति यः। सुवज्रः। आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं ॥

एकोनविंशीमृचमाह ॥

विश्वाहेंद्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजं।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ १९ ॥
विश्वाहा। इंद्रः। अधिऽवक्ता। नः। अस्तु। अपरिऽह्वृताः। सनुयाम। वाजं।
तत्। नः। मित्रः। वरुणः। ममहंतां। अदितिः। सिंधुः। पृथिवी। उत। द्यौः ॥ १९ ॥

विश्वाहा सर्वकालीनोऽस्माकमिंद्रोऽधिवक्तास्तु। अधिवचनं पक्षपातेन वचनं। यथोक्तं ब्राह्मणायाधिब्रूयादिति। सर्वदास्माकमिंद्रः पक्षपातवचनयुक्तो भवतु। वयं चापरिह्वृता अकुटिलगतयः संतो वाजं हविर्लक्षणमन्नं सनुयाम। संभजामहे। यदनेन सूक्तेनास्माभिः प्रार्थितं तन्मित्रादयो मामहंतां। पूजितं कुर्वंतु ॥ विश्वाहा। विश्वान्यहानि विश्वाहानि। अत्यंतसंयोगे द्वितीया। शेश्छंदसि बहुलमिति शेर्लोपः। उपधादीर्घत्वं नलोपः। मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं। अपरिह्वृताः। ह्वृ कौटिल्ये। निष्ठायामपरिह्वृताश्च। पा० ७. २. ३२. इति निपातनात् ह्वृभावाभावः। अव्ययपूर्वपदप्रकृतिस्वरत्वं। सनुयाम। षणु दाने। लिङि तनादित्वादुप्रत्ययः। वन षण संभक्तावित्यस्माद्वा व्यत्ययेनोप्रत्ययः ॥

॥ इति प्रथमस्य सप्तम एकादशो वर्गः ॥

प्र मंदिन इत्येकादशर्चमष्टमं सूक्तमांगिरसस्य कुत्सस्यार्षं । अष्टम्याद्यास्तस्र- स्त्रिष्टुभः शिष्टाः सप्त जगत्यः । इंद्रो देवता । तथा चानुक्रांतं । प्र मंदिन एकादश कुत्सस्त्वतुस्त्रिष्टुबंतमाद्या गर्भस्राविण्युपनिषत् ॥ दशरात्रस्य नवमेऽहनि मरुत्वतीय एतत्सूक्तं । विश्वजित इति खंडे सूचितं । प्र मंदिन इमा उ त्वेति मरुत्वतीयं । आ० ८.७. । इति ॥

तत्र प्रथमामृचमाह ॥

प्र मंदिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना ।
अवस्यवो वृषणं वज्रदक्षिणं मरुत्वंतं सख्याय हवामहे ॥ १ ॥

प्र । मंदिने । पितुऽमत् । अर्चत । वचः । यः । कृष्णऽगर्भाः । निःऽअहन् । ऋजिश्वना ।
अवस्यवः । वृषणं । वज्रऽदक्षिणं । मरुत्वंतं । सख्याय । हवामहे ॥ १ ॥

हे ऋत्विजः । मंदिने स्तुतिमते स्तोतव्यायेंद्राय पितुमद्वचो हविर्लक्षणेनान्न- नोपेतं स्तुतिलक्षणं वचनं प्रार्चत । प्रकर्षेणोच्चारयत । य इंद्र ऋजिश्वनेतत्सं- ज्ञकेन राज्ञा सख्या सहितः सन् कृष्णगर्भाः । कृष्णो नाम कश्चिदसुरः । तेन निषिक्तगर्भास्तदीया भार्या निरहन् । अवधीत् । कृष्णमसुरं हत्वा पुत्राणामप्य- नुत्पत्त्यर्थं गर्भिणीस्तस्य भार्या अप्यवधीदित्यर्थः । अवस्यवो रक्षणेच्छवो वयं वृषणं कामानां वर्षितारं वज्रदक्षिणं वज्रयुक्तेन दक्षिणहस्तेनोपेतं तं मरुत्वं- तमिंद्रं सख्याय सख्युः कर्मणे हवामहे । आह्वयामहे ॥ मंदिने । मदि स्तुति मोदमदस्वप्नकांतिगतिषु । औणादिक इनिप्रत्ययः । तदुक्तं यास्केन । मंदी मंद- यतेः स्तुतिकर्मण इति । पितुमत् । ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं । कृष्णगर्भाः । कृष्णेन निषिक्ता गर्भा यासु तास्तथोक्ताः । परादिश्छंदसि बहुल- मित्युत्तरपदाद्युदात्तत्वं । अवस्यवः । अवेरौणादिको भावेऽसुन् । अव इच्छत्य- वस्यति । सुप आत्मनः क्यच् । क्याच्छंदसीत्युप्रत्ययः । वृषणं । वा षपूर्वस्य निगम इति विकल्पनादुपधादीर्घाभावः । सख्याय । सख्युः कर्म सख्यं । सख्युर्य इति यप्रत्ययः । हवामहे । ह्वेञो लटि बहुलं छंदसीति संप्रसारणं ॥

द्वितीयामृचमाह ॥

यो व्यंसं जाहृषाणेन मन्युना यः शंबरं यो अहन्पिप्रुमव्रतं ।
इंद्रो यः शुष्णमशुषं न्यावृणङ्मरुत्वंतं सख्याय हवामहे ॥ २ ॥

यः । विऽअंसं । जहृषाणेन । मन्युना । यः । शंबरं । यः । अहन् । पिप्रुं । अव्रतं ।
इंद्रः । यः । शुष्णं । अशुषं । नि । अवृणक् । मरुत्वंतं । सख्याय । हवामहे ॥ २ ॥

य इंद्रो जहृषाणेन प्रवृद्धेन मन्युना क्रोधेन व्यंसं विगतभुजं वृत्रमहन् । अवधीत् । अपि च य इंद्रः शंबरमेतत्संज्ञमसुरं चावधीत् । तथाव्रतं व्रतस्य यागादेः कर्मणो विरोधिनं पिप्रुमेतत्संज्ञमसुरं च य इंद्रोऽवधीत् । किंच य इंद्रोऽशुषं शोषणरहितं शुष्णं सर्वस्य जगतः शोषकमेतत्संज्ञमसुरं न्यवृणक् । न्यवर्जयत् । समूलं हतवानित्यर्थः । तं मरुत्वंतमिंद्रं सख्यायाह्वयामहे ॥ व्यंसं । विगतोऽंसो यस्मात् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । यण उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं । जाहृषाणेन । हृष तुष्टौ । अत्र वृद्ध्यर्थः । छंदसि लिट् । लिटः कानज्वेति तस्य कानजादेशः । अन्येषामपि दृश्यत इति संहितायामभ्यासस्य दीर्घत्वं । चित्त्वादंतोदात्तत्वं । अशुषं । शुष शोषणे । इगुपधलक्षणः कः । शुषाः शोषका न संत्यस्येत्यशुषः । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । अवृणक् । वृजी वर्जने । रौधादिकः ॥

तृतीयामृचमाह ॥

यस्य द्यावापृथिवी पौंस्यं महद्यस्य व्रते वरुणो यस्य सूर्यः ।
यस्येंद्रस्य सिंधवः सश्चति व्रतं मरुत्वंतं सख्याय हवामहे ॥ ३ ॥
यस्य । द्यावापृथिवी इति । पौंस्यं । महत् । यस्य । व्रते । वरुणः । यस्य । सूर्यः ।
यस्य । इंद्रस्य । सिंधवः । सश्चति । व्रतं । मरुत्वंतं । सख्याय । हवामहे ॥ ३ ॥

यस्येंद्रस्य महद्विपुलं पौंस्यं बलं द्यावापृथिवी द्यावापृथिव्यावनुवर्तते । यस्य चेंद्रस्य व्रते नियमनरूपे कर्मणि वरुणो वर्तते । वरुणोऽपींद्रस्य नियमनं नातिक्रामतीत्यर्थः । अपि च । सूर्योऽपि यस्येंद्रस्य व्रते वर्तते । तथा यस्येंद्रस्य व्रतं कर्म सिंधवो नद्यः सश्चति । वचनव्यत्ययः । गच्छंति । सश्चतिर्गच्छतिकर्मा । इंद्रेणानुशिष्टाः प्रवहंतीत्यर्थः । तं मरुत्वंतमिंद्रं सख्यायाह्वयामहे ॥ द्यावापृथिवी । द्यौश्च पृथिवी च द्यावापृथिव्यौ । दिवो द्यावेति द्यावादेशः । स चाद्युदात्तो निपातितः । पृथिवीशब्दो ङीष्प्रत्ययांतोऽंतोदात्तः । देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं । वा छंदसीति पूर्वसवर्णदीर्घः ॥

चतुर्थीमृचमाह ॥

यो अश्वानां यो गवां गोपतिर्वशी य आरितः कर्मणिकर्मणि स्थिरः ।
वीळोश्चिदिंद्रो यो असुन्वतो वधो मरुत्वंतं सख्याय हवामहे ॥ ४ ॥
यः । अश्वानां । यः । गवां । गोऽपतिः । वशी । यः । आरितः । कर्मणिऽकर्मणि । स्थिरः ।
वीळोः । चित् । इंद्रः । यः । असुन्वतः । वधः । मरुत्वंतं । सख्याय । हवामहे ॥ ४ ॥

य इंद्रोऽश्वानां पतिरधिपतिः । तथा य इंद्रो गोपतिः । न केवलमेकस्या गोः किंतु सर्वासामित्याह गवामिति । सर्वासां गवामधिपतिर्भवति । वशी । अपराधीनः । स्वतंत्र इत्यर्थः । अपि च य इंद्रः कर्मणि कर्मणि सर्वेषु कर्मसु स्थिरो नैश्चल्येनावतिष्ठमान आरितः स्तुतिभिः प्रत्यृतः प्राप्तो भवति । आरितः प्रत्यृतः स्तोमानिति निरुक्तं । नि० ५. १५. । यश्चेंद्रोऽसुन्वतः सुन्वतां यागानुष्ठातॄणां विरोधिनो विळोश्चित् दृढस्यापि शत्रोर्वधो हंता तं मरुत्वंतमिंद्रं सख्यायाह्वयामहे ॥ गवां । न गोश्वन्साववर्णेति विभक्तेरुदात्तत्वस्य प्रतिषेधः । गोपतिः । पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वं । आरितः । ऋ गतौ । अस्मात्क्रयंतान्निष्ठा । आगमानुशासनस्यानित्यत्वात्पुगागमाभावः । यद्वा । मूचिसूचिमूत्र्यट्यर्त्यश्यूर्णोतीनामिति विहितस्य यङो यङोऽचि चेत्यत्र चशब्देन बहुलग्रहणानुकर्षणादनैमित्तिके लुकि प्रत्ययलक्षणेन सन्यङोरिति ऋ इत्येतस्य द्विर्वचन उरदत्वहलादिशेषयोः सतो रुग्रिकौ च लुकीति रुक् । ततो निष्ठायां छांदस इडागमः । ऋकारस्य यणादेशः । रो रीत्यभ्यासरेफलोपः । ढ्रलोपे पूर्वस्य दीर्घोऽण इति दीर्घत्वं । वधः । कृत्यल्युटो बहुलमिति बहुलवचनात् हनश्च वध इति कर्तर्यप् वधादेशश्च । स चादंतः । अतो लोप उदात्तनिवृत्तिस्वरेण प्रत्ययस्योदात्तत्वं ॥

पंचमीमृचमाह ॥

यो विश्वस्य जगतः प्राणतस्पतिर्यो ब्रह्मणे प्रथमो गा अविंदत् ।
इंद्रो यो दस्यूँरधराँ अवातिरन्मरुत्वंतं सख्याय हवामहे ॥ ५ ॥
यः । विश्वस्य । जगतः । प्राणतः । पतिः । यः । ब्रह्मणे । प्रथमः । गाः । अविंदत् ।
इंद्रः । यः । दस्यून् । अधरान् । अवऽअतिरत् । मरुत्वंतं । सख्याय । हवामहे ॥ ५ ॥

य इंद्रो विश्वस्य जगतो गच्छतः प्राणतः प्रश्वसतः प्राणिजातस्य पतिः स्वामी यश्च ब्रह्मणे ब्राह्मणजातिभ्योऽंगिरोभ्यः प्रथमोऽन्येभ्यो देवेभ्यः पूर्वभावी सन् पणिभिरपहृता गा अविंदत्। अलभत। अन्येभ्यो देवेभ्यः पूर्वमेव तैरसुरैर्युद्ध्वा गाः स्वयमलभतेत्यर्थः। अपि च। इंद्रो दस्यूनुपक्षपयितॄनसुरानधरान्निकृष्टान्कृत्वावातिरत्। अवधीत्। अवतिरतिर्वधकर्मा। तं मरुत्वंतमिंद्रं सख्यायाह्वयामहे॥ जगतः। गम्लृ सृप्लृ गतौ। वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्चेत्यतिप्रत्ययांतो निपातितो जगच्छब्द आद्युदात्तः। प्राणतः। श्वस प्राणने। अन च। अस्माल्लटः शतृ। अदादित्वाच्छपो लुक्। शतुरनुम इति विभक्तेरुदात्तत्वं। षष्ठ्याः पतिपुत्रेति विसर्जनीयस्य सत्वं॥

षष्ठीमृचमाह॥

यः शूरे॑भि॒र्हव्यो॒ यश्च॑ भी॒रुभि॒र्यो धाव॑द्भि॒र्हूयते॒ यश्च॒ जिग्यु॑भिः।
इंद्रं॒ यं विश्वा॒ भुव॑नाभि सं॒दधु॑र्म॒रुत्वं॑तं स॒ख्याय॑ हवामहे॥ ६॥
यः। शूरे॑ऽभिः। हव्यः॑। यः। च। भी॒रुऽभिः॑। यः। धाव॑त्ऽभिः। हू॒यते॑। यः। च॒। जिग्यु॑ऽभिः।
इंद्रं॑। यं। विश्वा॑। भुव॑ना। अ॒भि। सं॒ऽद॒धुः। म॒रुत्वं॑तं। स॒ख्याय॑। ह॒वा॒म॒हे॒॥ ६॥

य इंद्रः शूरेभिः शौर्योपेतैः पुरुषैर्हव्यो योद्धुमाह्वातव्यः। यश्च भीरुभिर्भयशीलैः कातरैः पुरुषैः सहायार्थमाह्वातव्यः। अपि च। य इंद्रो धावद्भिः पराजयेन पलायमानैर्हूयते रक्षार्थमाहूयते। यश्च जिग्युभिः प्राप्तजयैराहूयते। यं चेंद्रं विश्वा भुवना सर्वाणि भूतजातानि स्वेषु स्वेषु कार्येष्वभिसंदधुः। आभिमुख्येन स्थापयंति। तं मरुत्वंतमिंद्रं सख्यायाह्वयामहे॥ शूरेभिः। बहुलं छंदसीति भिस ऐसभावः। हव्यः। ह्वयतेरचो यदिति ह्व इत्यनुवृत्तौ बहुलं छंदसीति संप्रसारणं। गुणे धातोस्तन्निमित्तस्यैवेत्यवादेशः। भीरुभिः। भियः क्रुक्लुकनौ। उ० २.३२। इति क्रुप्रत्ययः। धावद्भिः। सृ गतौ। सर्तेर्वेगितायां शपि पाघ्रेत्यादिना धावादेशः। शपः पित्त्वादनुदात्तत्वं। शतुश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। जिग्युभिः। जि जये। लिटः क्वसुः। द्विर्वचने सन्लिटोर्जेरित्यभ्यासादुत्तरस्य जकारस्य कुत्वं। भिस्ययस्मयादित्वेन भत्वाद्वसोः संप्रसारणमिति संप्रसारणं। छांदसोऽंत्यलोपः॥

॥ इति प्रथमस्य सप्तमे द्वादशो वर्गः॥

सप्तमीमृचमाह ॥

रुद्राणामेति प्रदिशा विचक्षणो रुद्रेभिर्योषा तनुते पृथु ज्रयः ।
इंद्रं मनीषा अभ्यर्चति श्रुतं मरुत्वंतं सख्याय हवामहे ॥ ७ ॥
रुद्राणां । एति । प्रऽदिशा । विऽचक्षणः । रुद्रेभिः । योषा । तनुते । पृथु । ज्रयः ।
इंद्रं । मनीषा । अभि । अर्चति । श्रुतं । मरुत्वंतं । सख्याय । हवामहे ॥ ७ ॥

विचक्षणः सूर्यात्मना प्रकाशमान इंद्रो रुद्राणां रुद्रपुत्राणामध्यात्मं प्राणरूपेण वर्तमानानां मरुतां । यद्वा रोदयितॄणां प्राणानां । प्राणा हि शरीरान्निर्गताः संतो बंधुजनान्रोदयंति । प्रदिशा प्रदेशनेन मनुष्येभ्यः प्रदानेन सहेति । अंतरिक्षे गच्छति । तथा चाम्नायते । योऽसौ तपन्नुदेति स सर्वेषां भूतानां प्राणानादायोदेतीति । अपि च रुद्रेभिरधिभूतं वर्तमानै रुद्रपुत्रैर्मरुद्भिर्योषा माध्यमिका वाक् पृथु विस्तीर्णं ज्रयो वेगं तनुते । विस्तारयति । प्रसंगाच्च मरुतां स्तुतिः । मरुद्भिः सह वर्तमानं श्रुतं प्रख्यातं सूर्यात्मानमिंद्रं मनीषा स्तुतिलक्षणा वाक् अभ्यर्चति । आभिमुख्येन स्तौति । तं मरुत्वंतमिंद्रं सख्यायाह्वयामहे ॥ प्रदिशा । दिश अतिसर्जने । संपदादिलक्षणो भावे क्विप् । ज्रयः । जि ज्रि अभिभवे । ज्रीयतेऽभिभूयतेऽनेनेति ज्रयो वेगः । करणेऽसुन् । मनीषा । ईषा अक्षादित्वात्प्रकृतिभावः ॥

अष्टमीमृचमाह ॥

यद्वा मरुत्वः परमे सधस्थे यद्वावमे वृजने मादयासे ।
अत आ याह्यध्वरं नो अच्छा त्वाया हविश्चकृमा सत्यराधः ॥ ८ ॥
यत् । वा । मरुत्वः । परमे । सधऽस्थे । यत् । वा । अवमे । वृजने । मादयासे ।
अतः । आ । याहि । अध्वरं । नः । अच्छ । त्वाऽया । हविः । चकृम । सत्यऽराधः ॥ ८ ॥

हे मरुत्वः । मरुद्भिर्युक्तेंद्र परम उत्कृष्टे सधस्थे सहस्थाने गृहे यद्वा यदि वा मादयासे तृप्तो वर्तसे । यद्वा यदि वावमेऽर्वाचीने वृजने । वृज्यते रिक्तीक्रियतेऽस्मिन्धनमिति वृजनं गृहं । तस्मिन्मादयासे । अतोऽस्मादुभयविधात्स्थानान्नोऽस्माकमध्वरं यज्ञमच्छाभिमुख्येनायाहि । आगच्छ । हे सत्यराधः सत्यधन त्वाया त्वत्कामनया वयं हविश्चकृम । कृतवंतः ॥ मरुत्वः । मतुवसो रुरिति

संबुद्धौ नकारस्य रुत्वं। सधस्थे। सुपि स्थ इति कप्रत्ययः। सध मादस्थयोश्छं-दसीति सहस्य सधादेशः। मादयासे। मद तृप्तियोगे। चुरादिरात्मनेपदी। लेट्याडागमः। त्वाया। त्वामात्मन इच्छति। सुप आत्मनः क्यच्। प्रत्ययोत्तर-पदयोश्चेति मपर्यंतस्य त्वादेशः। व्यत्ययेन दकारस्यात्वं। अ प्रत्ययादित्यकार-प्रत्ययः। सुपां सुलुगिति तृतीयाया लुक्॥

नवमीमृचमाह ॥

त्वायेंद्र सोमं सुषुमा सुदक्ष त्वाया हविश्चकृमा ब्रह्मवाहः।
अधा नियुत्वः सगणो मरुद्भिरस्मिन्यज्ञे बर्हिषि मादयस्व ॥ ९ ॥
त्वाऽया। इंद्र। सोमं। सुसुम। सुऽदक्ष। त्वाऽया। हविः। चकृम। ब्रह्मऽवाहः।
अध। नियुत्वः। सऽगणः। मरुत्ऽभिः। अस्मिन्। यज्ञे। बर्हिषि। मादयस्व ॥ ९ ॥

हे सुदक्ष शोभनबलेंद्र त्वाया त्वत्कामनया सोमं सुषुम। अभिषुतवंतो वयं। हे ब्रह्मवाहः। ब्रह्मणा मंत्ररूपेण स्तोत्रेणोह्यमान प्राप्यमाणेंद्र त्वाया त्वत्कामनया-हवनीये पुरोडाशलक्षणं हविश्चकृम। कृतवंतः। हे नियुत्वः। नियुतोऽश्वाः। तद्वन्निंद्र। अधानंतरं मरुद्भिः सप्तगणरूपैरेतत्संज्ञैर्देवैः सगणो गणसहितः सन्न-स्मिन्वर्तमाने यज्ञे बर्हिष्यास्तीर्णे दर्भे उपविश्य मादयस्व। तृप्तो भव ॥ सुषुमा। षुञ् अभिषवे। लिटि क्रादिनियमप्राप्तस्येटोऽनित्यमागमशासनमिति वचना-दभावः ॥

दशमीमृचमाह ॥

मादयस्व हरिभिर्ये त इंद्र वि ष्यस्व शिप्रे वि सृजस्व धेने।
आ त्वा सुशिप्र हरयो वहंतूशन्हव्यानि प्रति नो जुषस्व ॥ १० ॥
मादयस्व। हरिऽभिः। ये। ते। इंद्र। वि। स्यस्व। शिप्रे इति। वि। सृजस्व। धेने इति।
आ। त्वा। सुऽशिप्र। हरयः। वहंतु। उशन्। हव्यानि। प्रति। नः। जुषस्व ॥ १० ॥

हे इंद्र हरिभिरश्वैः सह मादयस्व। तृप्तो भव। ये ते तव स्वभूताः। तदर्थं शिप्रे हनू संहते विष्यस्व। सोमपानार्थं विवृते कुरु। तथा धेने पानसाधनभूते जिह्वोपजिह्विके विसृजस्व। सोमपानार्थं विश्लिष्टे कुरु। हे सुशिप्र। शिप्रे हनू नासिके वा। शोभनशिप्रेंद्र त्वा त्वां हरयोऽश्वा आवहंतु। अस्मदीयं यज्ञं प्रापयंतु।

त्वं चोशन् अस्मान्कामयमानो नोऽस्माकं हव्यानि हवींषि प्रतिजुषस्व । प्रत्येकं सेवस्व । मोदासिष्ठाः ॥ विषस्व । षो अंतकर्मणि । व्यत्ययेनात्मनेपदं । दिवादित्वात् श्यन् । ओतः श्यनीत्योकारलोपः । उपसर्गात्सुनोतीति षत्वं ॥

एकादशीमृचमाह ॥

मरुत्स्तोत्रस्य वृजनस्य गोपा वयमिंद्रेण सनुयाम वाजं ।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ ११ ॥
मरुत्ऽस्तोत्रस्य । वृजनस्य । गोपाः । वयं । इंद्रेण । सनुयाम । वाजं ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ ११ ॥

मरुत्स्तोत्रस्य मरुद्भिः सह स्तोत्रं यस्य स मरुत्स्तोत्रः । तस्य वृजनस्य शत्रूणां क्षेप्तुरिंद्रस्य संबंधिनो गोपा गोपायनीया रक्षणीया वयं तेनेंद्रेण वाजमन्नं सनुयाम । लभेमहि । यदेतदस्माभिः प्रार्थितं नोऽस्मदीयं तन्मित्रादयो द्यावापृथिव्यौ च मामहंतां । पूजितं कुर्वंतु ॥ वृजनस्य । वृजी वर्जने । कृपृवृजिमंदिनिधाञ्भ्यः क्युरिति क्युप्रत्ययः ॥

॥ इति प्रथमस्य सप्तमे त्रयोदशो वर्गः ॥

इमां त इत्येकादशर्चं नवमं सूक्तं कुत्सस्यार्षमैंद्रं । अंत्या त्रिष्टुप् शिष्टा दश जगत्यः । तथा चानुक्रांतं । इमां तेऽंत्या त्रिष्टुबिति । विनियोगो लैंगिकः ॥

तत्र प्रथमामृचमाह ॥

इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे ।
तमुत्सवे च प्रसवे च सासहिमिंद्रं देवासः शवसामदन्ननु ॥ १ ॥
इमां । ते । धियं । प्र । भरे । महः । महीं । अस्य । स्तोत्रे । धिषणा । यत् । ते । आनजे ।
तं । उत्ऽसवे । च । प्रऽसवे । च । ससहिं । इंद्रं । देवासः । शवसा । अमदन् । अनु ॥ १ ॥

हे इंद्र महो महतस्ते तवेमामिदानीं क्रियमाणां महीं महतीं अत्यंतोत्कृष्टां धियं स्तुतिं प्रभरे । प्रकर्षेण संपादयामि । ते तव धिषणा त्वदीया बुद्धिरस्य मम स्तोत्रे स्तुतौ यद्यस्मादानजे । अक्ता संश्लिष्टासीत् । तस्मात्तव प्रियां स्तुतिं करोमीत्यर्थः । उत्तरोऽर्धर्चः परोक्षकृतः । सासहिं शत्रूणामभिभवितारं पूर्वोक्तं

तमिंद्रं देवासः कर्मसु दीव्यंत ऋत्विजः शवसा स्तुतिभिः कीर्तनबलेनान्वमदन्। अनुक्रमेण हर्षं प्रापयन्। किमर्थं। उत्सवे च। उत्सवार्थमभिवृद्ध्यर्थं। प्रसवे च। धनानां वृष्ट्युदकानां वोत्पत्त्यर्थं च ॥ आनजे। अंजू व्यक्तिम्रक्षणकांतिगतिषु। अस्मात्कर्मणि लिट्। द्विर्वचनहलादिशेषौ। अत आदेरित्यभ्यासस्यात्वं। तस्मान्नुट् द्विहल इति नुट्। व्यत्ययेनोपधानकारलोपः। उत्सवे। प्रसवे। षू प्रेरणे। ऋदोरबिति भावेऽप्। निमित्तात्कर्मसंयोगे। पा० २. ३. ३६. ६.। इति सप्तमी। थाथादिनोत्तरपदांतोदात्तत्वं। सासहिं। षह अभिभवे। आदृगमहन इत्यत्रोत्सर्गश्छंदसीति वचनात्किप्रत्ययः। लिड्वद्भावाद्द्विर्वचनं। अन्येषामपि दृश्यत इति संहितायामभ्यासस्य दीर्घत्वं। अमदन्। मदी हर्षे। हेतुमति णिच्। मदी हर्षग्लपनयोरिति घटादिषु पाठान्मितां ह्रस्व इति ह्रस्वत्वं। छंदस्युभयथेत्यार्धधातुकत्वाण्णेरनिटीति णिलोपः ॥

द्वितीयामृचमाह ॥

अस्य श्रवो॑ न॒द्यः॑ स॒प्त बि॑भ्रति॒ द्यावा॒क्षामा॑ पृथि॒वी द॑र्श॒तं वपुः॑।
अ॒स्मे सू॑र्याचं॒द्रम॑साभि॒चक्षे॑ श्र॒द्धे कमिं॑द्र चरतो वितर्तु॒रं ॥ २ ॥
अ॒स्य। श्रवः॑। न॒द्यः॑। स॒प्त। बि॒भ्र॒ति॒। द्यावा॒क्षामा॑। पृ॒थि॒वी। द॒र्श॒तं। वपुः॑।
अ॒स्मे इति॑। सू॒र्या॒चं॒द्र॒म॑सा। अ॒भि॒ऽचक्षे॑। श्र॒द्धे। कं। इं॒द्र॒। च॒र॒तः॒। वि॒ऽत॒र्तु॒रं ॥ २ ॥

अस्येंद्रस्य श्रवो यशः कीर्तिः सप्त इमं मे गंग इत्यस्यामृचि प्राधान्येन प्रतिपादिता गंगाद्याः सप्तसंख्याका नद्यो बिभ्रति। धारयंति। वृत्रहननेनेंद्रस्य यद्वृष्टेः प्रदातृत्वं तत्प्रभूतजलोपेता नद्यः प्रकटयंतीत्यर्थः। अपि च द्यावाक्षामा द्यावापृथिव्यौ। पृथिवीत्यंतरिक्षनाम। अंतरिक्षं चास्य सूर्यात्मना वर्तमानस्येंद्रस्य दर्शतं सर्वैः प्राणिभिर्दर्शनीयं वपुः। रूपनामैतत्। प्रकाशात्मकं रूपं धारयंति। किंच हे इंद्र। अस्मे अस्माकमभिचक्षे द्रष्टव्यानां पदार्थानामाभिमुख्येन प्रकाशनार्थं श्रद्धे कं श्रद्धार्थं। चक्षुषा दृष्टे हि वस्तुनीदं सत्यमिति श्रद्धोत्पद्यते। कमित्येतत्पादपूरणं। तदुभयार्थं सूर्याचंद्रमसौ वितर्तुरं परस्परव्यतिहारेण तरणं पुनःपुनर्गमनं यथा भवति तथा चरतः। वर्तेते। त्वमेव तद्रूपः सन्वर्तस इत्यर्थः ॥ अस्य। ऊडिदमिति विभक्तेरुदात्तत्वं। द्यावाक्षामा। द्यौश्च क्षामा च। दिवो द्यावेति द्यावादेशः। सुपां सुलुगिति विभक्तेर्डादेशः। देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं। दर्शतं। भृमृदृशीत्यादिनातच्। सूर्याचंद्रमसा।

सूर्यश्च चंद्रमाश्च। देवताद्वंद्वे चेति पूर्वपदस्यानङादेशः। सुपां सुलुगिति विभक्तेराकारः। चंद्रमसशब्दो दासीभारादित्वात्पूर्वपदप्रकृतिस्वरेण मध्योदात्तः। अतो देवताद्वंद्वे चेति प्राप्तस्योभयपदप्रकृतिस्वरस्य नोत्तरपदेऽनुदात्तादावपृथिवीति प्रतिषेधः। अभिचक्षे। चक्षेः प्रकाशनार्थत्वात्संपदादिलक्षणो भावे क्विप्। तादर्थ्ये चतुर्थी। श्रद्धे। दृशिग्रहणाद्धातेर्भावे विच्। चतुर्थ्येकवचन आतो धातोरित्याकारलोपः। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। वितर्तुरं। तरतेर्यङ्लुगंतादौणादिकोऽच्। बहुलं छंदसीत्युत्वं॥

तृतीयामृचमाह॥

तं स्मा रथं मघवन्प्राव सातये जैत्रं यं ते अनुमदाम संगमे।
आजा न इंद्र मनसा पुरुष्टुत त्वायद्भ्यो मघवञ्छर्म यच्छ नः॥३॥

तं। स्म। रथं। मघऽवन्। प्र। अव। सातये। जैत्रं। यं। ते। अनुऽमदाम। संऽगमे।
आजा। नः। इंद्र। मनसा। पुरुऽस्तुत। त्वायत्ऽभ्यः। मघऽवन्। शर्म। यच्छ। नः॥३॥

हे मघवन् धनवन्निंद्र सातयेऽस्माकं धनलाभाय तं स्म तमेव रथं प्राव। प्रेरय वर्तय। नोऽस्माकं मनसा बुद्ध्या पुरुष्टुत बहुशः स्तुतेंद्र ते तव स्वभूतं जैत्रं जयशीलं यं रथं संगमे शत्रुभिः सह संगमन आजा युद्धे सत्यनुमदाम। वयमनुक्रमेण स्तुमः। अपि च हे मघवन् त्वायद्भ्यस्त्वां कामयमानेभ्यो नोऽस्मभ्यं शर्म सुखं यच्छ। देहि॥ अव। अव रक्षणगतिकांतीत्युक्तत्वादवतिरत्र गत्यर्थः। संगमे। ग्रहवृदृनिश्चिगमश्चेति कर्मण्यप्। थाथादिनोत्तरपदांतोदात्तत्वं। आजा। सुपां सुलुगिति सप्तम्या डादेशः। त्वायद्भ्यः। सुप आत्मनः क्यच्। प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः। व्यत्ययेन दकारस्यात्वं। क्यजंताल्लटः शतृ। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे सति क्यचा सहैकादेश एकादेश उदात्तेनेति तस्योदात्तत्वं॥

चतुर्थीमृचमाह॥

वयं जयेम त्वया युजा वृतमस्माकमंशमुदवा भरेभरे।
अस्मभ्यमिंद्र वरिवः सुगं कृधि प्र शत्रूणां मघवन्वृष्ण्या रुज॥४॥

वयं। जयेम। त्वया। युजा। वृतं। अस्माकं। अंशं। उत्। अव। भरेऽभरे।
अस्मभ्यं। इंद्र। वरिवः। सुऽगं। कृधि। प्र। शत्रूणां। मघऽवन्। वृष्ण्या। रुज॥४॥

हे इंद्र युजास्माभिर्युक्तेन सहायभूतेन त्वया वृतमावृण्वंतं शत्रुं वयं स्तोतारो जयेम। अभिभवेम। अपि च भरे भरे संग्रामे संग्रामेऽस्माकमंशमस्मदीयं भागमुद्व। शत्रुकृतपीडापरिहारेणोत्कृष्टं रक्ष। तथा हे इंद्र वरिवो धनमस्मभ्यं सुगं सुगमं सुप्रापं कृधि। कुरु। तथा हे मघवन् शत्रूणामस्मदुपद्रवकारिणां वृष्ण्या वृष्ण्यानि वीर्याणि प्ररुज। प्रभंग्धि। बाधस्वेत्यर्थः॥ वृतं। वृञ् वरणे। क्विप् चेति क्विप्। तुगागमः। सुगं। सुदुरोरधिकरण इति गमेर्डप्रत्ययः। कृधि। श्रुशृणुपृकृवृभ्य इति हेर्धिः। रुज। रुजो भंगे। तौदादिकः॥

पंचमीमृचमाह॥

नाना॒ हि त्वा॒ हव॑माना॒ जना॑ इ॒मे धना॑नां धर्त॒रव॑सा विप॒न्यव॑ः।
अ॒स्माकं॑ स्मा॒ रथ॒मा ति॑ष्ठ सा॒तये॒ जैत्रं॒ ही॑न्द्र॒ निभृ॑तं॒ मन॒स्तव॑॥५॥

नाना॑। हि। त्वा॒। हव॑मानाः। जना॑ः। इ॒मे। धना॑नां। धर्त॒रिति॑। अव॑सा। वि॒प॒न्यव॑ः।
अ॒स्माकं॑। स्म॒। रथं॑। आ। ति॒ष्ठ॒। सा॒तये॑। जैत्रं॑। हि। इ॒न्द्र॒। निऽभृ॑तं। मन॑ः। तव॑॥५॥

हे धनानां धर्तः। गोहिरण्यादिरूपाणां द्रव्याणां धारयितरिंद्र। विपन्यवः। स्तोतृनामैतत्। स्तोतार इमे जना अवसा रक्षणेन हेतुना त्वा हवमानास्त्वामाह्वयंतो नाना हि। विभिन्नाः खलु। तेषां मध्येऽस्माकं स्मास्माकमेव सातये धनदानाय रथमातिष्ठ। आरोह। हे इंद्र निभृतमव्याकुलं तव मनश्चित्तं जैत्रं हि। जयशीलं खलु। शत्रूञ्जित्वास्मभ्यं धनं दातुं समर्थमित्यर्थः॥ सातये। षणु दाने। क्तिनि जनसनखनां सञ्झलोरित्यात्वं॥

॥ इति प्रथमस्य सप्तमे चतुर्दशो वर्गः॥

षष्ठीमृचमाह॥

गो॒जिता॑ बा॒हू अमि॑तक्रतुः सि॒मः कर्म॑न्कर्मञ्छ॒तमू॑तिः खजंक॒रः।
अ॒क॒ल्प इन्द्र॑ः प्रति॒मान॒मोज॒साथा॒ जना॒ वि ह्व॑यन्ते सिषा॒सव॑ः॥६॥

गोऽजिता॑। बा॒हू इति॑। अमि॑तऽक्रतुः। सि॒मः। कर्म॑न्ऽकर्मन्। श॒तम्ऽऊ॑तिः। ख॒जं॒ऽक॒रः।
अ॒क॒ल्पः। इन्द्र॑ः। प्र॒ति॒ऽमान॑। ओज॑सा। अथ॑। जना॑ः। वि। ह्व॒य॒न्ते॒। सि॒सा॒सव॑ः॥६॥

हे इंद्र तव बाहू हस्तौ गोजिता जयेन गवां लंभयितारौ। त्वं चामितक्रतुः। अपरिच्छिन्नज्ञानः। सिमः। श्रेष्ठः। तथा च शाट्यायनकं। सिम इति वै

श्रेष्ठमाचक्षत इति । यद्वा सिमः शत्रूणां बंधकः । कर्मन्कर्मन् स्तोतॄणां कर्मणि कर्मण्युपस्थिते शतमूतिः । बहुविधरक्षणोपेतः । खजंकरः । खजति मथ्नाति पुरुषानिति खजः संग्रामः । तस्य कर्ता । अकल्पः । कल्पेनान्येन रहितः । स्वतंत्र इत्यर्थः । ओजसा सर्वेषां प्राणिनां यदोजो बलमस्ति तेन सर्वेण प्रतिमानं प्रतिनिधित्वेन मीयमानः । यस्मादेवंगुणविशिष्ट इंद्रोऽयातः कारणात्सिषासवो धनं लब्धुकामा जना विह्वयंते । विविधमाह्वयंति ॥ गोजिता । गा जयत इति गोजितौ । सुपां सुलुगिति विभक्तेराकारः । सिमः । षिञ् बंधने । अस्मादौणादिको मक् । खजंकरः । खज मंथने । पचाद्यच् । क्षेमप्रियमद्रेऽण् च । पा० ३. २. ४४. । इति चशब्दस्यानुक्तसमुच्चयार्थत्वात् खजशब्दोपपदादपि करोतेः खच् । अरुर्द्विषदजंतस्येति मुम् । कृदुत्तरपदप्रकृतिस्वरत्वं । अकल्पः । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । सिषासवः । वन षण संभक्तौ । सनि सनीवंतर्धेति विकल्पनादिडभावः । जनसनखनां सञ्झलोरित्यात्वं । द्विर्वचनादि । सनाशंसभिक्ष उरित्युप्रत्ययः । सति शिष्टत्वात्तस्यैव स्वरः शिष्यते ॥

सप्तमीमृचमाह ॥

उत ते शतान्मघवन्नुच्च भूयस उत्सहस्राद्रिरिचे कृष्टिषु श्रवः ।
अमात्रं त्वा धिषणा तित्विषे मह्यधा वृत्राणि जिघ्नसे पुरंदर ॥ ७ ॥

उत । ते । शतात् । मघऽवन् । उत् । च । भूयसः । उत् । सहस्रात् । रिरिचे । कृष्टिषु । श्रवः ।
अमात्रं । त्वा । धिषणा । तित्विषे । मही । अध । वृत्राणि । जिघ्नसे । पुरंऽदर ॥ ७ ॥

हे मघवन् धनवन्निंद्र कृष्टिषु मनुष्येषु त्वया दीयमानं श्रवो यदन्नमस्ति तच्छतात् शतसंख्याकाद्धनादुद्रिरिचे । उद्रिक्तमधिकं भवति । अपि च भूयसः शतसंख्याकादपि बहुतराद्धनादुद्रिरिचे । अधिकं भवति । किं बहुना । सहस्रात्सहस्रसंख्याकादप्युद्रिरिचे । त्वया दत्तं तदन्नमक्षयमित्यर्थः । अपि च । अमात्रं मात्रयेयत्तया रहितं । परिगणितुमशक्यैः सर्वैर्गुणैरधिकं त्वां मही महती धिषणास्मदीया स्तुतिलक्षणा वाक् तित्विषे । दीपयति । त्वत्संबंधिनो गुणान्प्रकाशयति । हे पुरंदर शत्रूणां पुरां दारयितरिंद्र । अध स्तुत्यनंतरं वृत्राण्यावरकान् शत्रूञ्जिघ्नसे । हंसि विनाशयसि ॥ रिरिचे । रिचिर् विरेचने । कर्मणि लिट् । तित्विषे । त्विष दीप्तौ । जिघ्नसे । हंतेर्लेटि व्यत्ययेनात्मनेपदं । लेटोऽडाटावित्य-

डागमः । बहुलं छंदसीति शपः श्लुः । गमहनेत्यादिनोपधालोपः । स्थानिवद्भावाद्द्विर्वचनादि । बहुलं छंदसीत्यभ्यासस्येत्वं । पुरंदर । पूःसर्वयोर्दारिसहोः । पा० ३. २. ४१. । इति खच् । खचि ह्रस्वः । पा० ६. ४. ९४. । इति ह्रस्वत्वं । वाचंयमपुरंदरौ च । पा० ६. ३. ६९. । इति निपातनादम् ॥

अष्टमीमृचमाह ॥

त्रिविष्टिधातु प्रतिमानमोजसस्तिस्रो भूमीर्नृपते त्रीणि रोचना ।
अतीदं विश्वं भुवनं ववक्षिथाशत्रुरिंद्र जनुषा सनादसि ॥ ८ ॥
त्रिविष्टिऽधातु । प्रतिऽमानं । ओजसः । तिस्रः । भूमीः । नृऽपते । त्रीणि । रोचना ।
अति । इदं । विश्वं । भुवनं । ववक्षिथ । अशत्रुः । इंद्र । जनुषा । सनात् । असि ॥ ८ ॥

हे नृपते नृणां पालयितरिंद्र त्वमोजसः सर्वेषां प्राणिनां बलस्य प्रतिमानं प्रतिनिधिरसि । कीदृशं प्रतिमानं । त्रिविष्टिधातु । धातुशब्दो रज्जुभागवचनः । यथा त्रिधातु पंचधातु वा शुल्वं करोतीति । यथा त्रिविष्टिस्त्रिगुणिता रज्जुर्द्रढीयसी । एवमिंद्रोऽपि दृढ इत्यर्थः । किंच त्वं तिस्रो भूमीस्त्रीन् लोकान् त्रीणि रोचना त्रीणि तेजांसि । दिव्यादित्याख्यमंतरिक्षे वैद्युतरूपमग्निं पृथिव्यामाहवनीयादिरूपेण वर्तमानं पार्थिवमग्निं । एवं त्रीन् लोकान् त्रीणि तेजांसि चातिववक्षिथ । अतिशयेन ववक्षिथ । अतिशयेन वोढुमिच्छसि । अपि च । इदं विश्वं सर्वं भुवनं भूतजातं चातिवोढुमिच्छसि । सर्वस्य जगतः पालनेन त्वमेव सर्वेषां निर्वाहको भवसीत्यर्थः । यस्माद्धे इंद्र त्वं सनाच्चिरकालादारभ्य जनुषा जन्मना जन्मप्रभृत्यशत्रुः सपत्नरहितोऽसि ॥ त्रिविष्टिधातु । त्रिधा त्रिप्रकारेण विष्ट्या प्रवेशनेन विधीयते क्रियत इति त्रिविष्टिधातुस्त्रिगुणिता रज्जुः । विशेर्भावे क्तिन् । धातुः । सितनिगमिमसीत्यादिना कर्मणि तुन्प्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वं । अत्र दृढरज्जुवाचकः शब्दस्तद्गतं दार्ढ्यं लक्षयित्वा तद्वति प्रतिमाने वर्तते । यथा माणवकेऽग्निशब्दः । तिस्रः । शसि त्रिचतुरोः स्त्रियामिति तिस्रादेशोऽंतोदात्तः । अचि र ऋत इति रेफादेश उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं । ववक्षिथ । वह प्रापण इत्यस्मादिच्छासनि ढत्वकत्वषत्वानि । सन्यत इतीत्वाभावश्छांदसः । छांदसे लिट्यमंत्र इति निषेधादाम्प्रत्ययाभावः । जनुषा । जनेरुसिः ॥

नवमीमृचमाह ॥

त्वां देवेषु प्रथमं हवामहे त्वं बभूथ पृतनासु सासहिः ।
सेमं नः कारुमुपमन्युमुद्भिदमिंद्रः कृणोतु प्रसवे रथं पुरः ॥ ९ ॥
त्वां । देवेषु । प्रथमं । हवामहे । त्वं । बभूथ । पृतनासु । ससहिः ।
सः । इमं । नः । कारुं । उपऽमन्युं । उत्ऽभिदं । इंद्रः । कृणोतु । प्रऽसवे । रथं । पुरः ॥ ९ ॥

हे इंद्र देवेषु प्रथमं श्रेष्ठं त्वां हवामहे । यागार्थमाह्वयामहे । तथा त्वं पृतनासु संग्रामेषु सासहिर्बभूथ । शत्रूणामभिभवितासि । उत्तरार्द्धः परोक्षकृतः । स इंद्रो नोऽस्माकं कारुं स्तुतीनां कर्तारमुपमन्युमुपमंतारं सर्वज्ञमुद्भिदं शत्रूणामुद्भेत्तारमिममेवंगुणविशिष्टं पुत्रं कृणोतु । करोतु । अपि च प्रसवे युद्धोत्पत्तावस्मदीयं रथं पुरोऽन्येभ्यो रथेभ्यः पुरतो वर्तमानं करोतु । यद्वा कारुमित्यादीनि रथविशेषणानि । कारुं युद्धस्य कर्तारमुपमन्युमुपगतेन प्राप्तेन मन्युना क्रोधेन युक्तमुद्भिदं मार्गेऽवस्थितानां वृक्षादीनामुद्भेत्तारमतिशयेन भंक्तारं ॥ बभूथ । बभूथाततंथ जगृभ्म ववर्थेति निगम इति निपातनादिडभावः । स इमं । सोऽचि लोपे चेत्पादपूरणमिति सुलोपः । प्रसवे । षूङ् प्राणिप्रसवे । ऋदोरप् । थाथादिनोत्तरपदांतोदात्तत्वं ॥

दशमीमृचमाह ॥

त्वं जिगेथ न धना रुरोधिथार्भेष्वाजा मघवन्महत्सु च ।
त्वामुग्रमवसे सं शिशीमस्यथा न इंद्र हवनेषु चोदय ॥ १० ॥
त्वं । जिगेथ । न । धना । रुरोधिथ । अर्भेषु । आजा । मघऽवन् । महत्ऽसु । च ।
त्वां । उग्रं । अवसे । सं । शिशीमसि । अथ । नः । इंद्र । हवनेषु । चोदय ॥ १० ॥

हे इंद्र त्वं जिगेथ । शत्रूञ्जयसि । तथा धना शत्रुभ्योऽपहृतानि धनानि न रुरोधिथ । नावरुणत्सि । स्तोतृभ्यः प्रयच्छसीत्यर्थः । हे मघवन् धनविन्इंद्र । अर्भेष्वल्पेष्वाजा आजिषु संग्रामेषु महत्सु च प्रौढेषु संग्रामेषु चावसेऽस्माकं रक्षणार्थमुग्रमुद्गूर्णमधिकबलं त्वां संशिशीमसि । स्तोत्रैस्तीक्ष्णीकुर्मः । अथानंतरं हे इंद्र त्वं हवनेषु युद्धार्थमाह्वानेषु सत्स्वागत्य नोऽस्माञ्चोदय । संग्रामेषु प्रेरय । जयं प्रापयेत्यर्थः ॥ जिगेथ । जि जये । लिटि थलि क्रादिनियमात्प्राप्तस्येटोऽचस्ता-

स्वत्थल्यनिटो नित्यं । पा० ७. २. ६१. । इति प्रतिषेधः । सन्लिटोर्जेरित्यभ्यासादुत्तरस्य जकारस्य कुत्वं । रुरोधिथ । क्रादिनियमादिट् । आजा । सुपां सुलुगिति सप्तमीबहुवचनस्य डादेशः । शिशीमसि । शो तनूकरणे । बहुलं छंदसीति विकरणस्य श्लुः । आदेच इत्यात्वं । द्विर्वचने बहुलं छंदसीत्यभ्यासस्येत्वं । ई हल्यघोरितीकारांतादेशः । इदंतो मसिः ॥

एकादशीमृचमाह ॥

विश्वाहेंद्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजं ।

तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ ११ ॥

विश्वाहा । इंद्रः । अधिऽवक्ता । नः । अस्तु । अपरिऽह्वृताः । सनुयाम । वाजं ।

तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ ११ ॥

व्याख्यातेयं रोहिच्छ्यावेति वर्गे । इंद्रः सर्वेष्वहःस्वस्माकं पक्षपातेन वक्ता भवतु । वयं चाकुटिलगतयः संत इंद्रेण दत्तमन्नं लभामहे । यदस्माभिः प्रार्थितमस्मदीयं तन्मित्रादयः पूजितं कुर्वंतु ॥

॥ इति प्रथमस्य सप्तमे पंचदशो वर्गः ॥

तत्त इत्यष्टर्चं दशमं सूक्तं कुत्सस्यार्षमैंद्रं त्रैष्टुभं । तथा चानुक्रांतं ॥ तत्तेऽष्टाविति । तृतीये छंदोमे निष्केवल्य इदं सूक्तं निविद्धानं । विश्वजित इति खंडे सूचितं । तत्त इंद्रियमिति निष्केवल्यं । आ० ८. ७. । इति ॥

तत्र प्रथमामृचमाह ॥

तत्त इंद्रियं परमं पराचैरधारयंत कवयः पुरेदं ।

क्षमेदमन्यद्दिव्य१न्यदस्य समी पृच्यते समनेव केतुः ॥ १ ॥

तत् । ते । इंद्रियं । परमं । पराचैः । अधारयंत । कवयः । पुरा । इदं ।

क्षमा । इदं । अन्यत् । दिवि । अन्यत् । अस्य । सं । ईमिति । पृच्यते । समनाऽइव ।
केतुः ॥ १ ॥

हे इंद्र ते त्वदीयं परममुत्कृष्टं तत्प्रसिद्धमिदं वर्तमानमिंद्रियं बलं पुरा पूर्वस्मिन्काले कवयः क्रांतदर्शिनः स्तोतारः पराचैः पराचीनं पराङ्मुखं । यद्वा

पराचैः परांचनैः परागमनैर्युक्तं । यद्वा । अभिमुखमेवाधारयंत । धृतवंतः । अपि च । अस्येंद्रस्यान्यदेकमिदमग्न्याख्यं ज्योतिः क्षमा क्षमायां भूमौ वर्तते । अन्यदप्येकं सूर्याख्यं दिवि द्युलोके । ईं तदिदमुभयविधमिंद्रस्य ज्योतिः संपृच्यते । परस्परं संयुज्यते । रात्रावादित्याग्निना संयुक्तो भवति । अग्निं वावादित्यः सायं प्रविशति तस्मादग्निर्दूरान्नक्तं ददृशे इति श्रुतेः । अहनि त्वग्निः सूर्येण संगच्छते । उद्यंतं वावादित्यमग्निरनुसमारोहति । तस्माद्धूम एवाग्नेर्दिवा ददृशे इति श्रुतेः । अनयोः परस्परसंगमने दृष्टांतः । समनेव केतुः । समनशब्दः संग्रामवाची । यथा समने संग्रामे युध्यमानयोरुभयोः केतुर्ध्वजो ध्वजांतरेण संयुज्यते तद्वत् ॥ इंद्रियं । इंद्रस्य लिंगं बलं । इंद्रियमिंद्रलिंगमिति घच्प्रत्ययांतो निपात्यते । पराचैः । अव्ययमेतत् उच्चैर्नीचैरिति यथा । यास्कस्त्वाह । पराचैः परांचनैः । नि॰ ११.२५. । इति । क्षमा । सुपां सुलुगिति सप्तम्या लुक् । ईं । ईमो मलोपः सांहितिकश्छांदसः । समनेव । षम ष्टम अवैक्लव्ये । अन्येभ्योऽपि दृश्यते । पा॰ ३.३.१३०. । इति युच् । सुपां सुलुगिति सप्तम्या आकारः । इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेति समासः ॥

द्वितीयामृचमाह ॥

स धारयत्पृथिवीं पप्रथच्च वज्रेण हत्वा निरपः ससर्ज ।
अहन्नहिमभिनद्रौहिणं व्यहन्व्यंसं मघवा शचीभिः ॥ २ ॥

सः । धारयत् । पृथिवीं । पप्रथत् । च । वज्रेण । हत्वा । निः । अपः । ससर्ज ।
अहन् । अहिं । अभिनत् । रौहिणं । वि । अहन् । विऽअंसं । मघऽवा । शचीभिः ॥ २ ॥

स इंद्रः पृथिवीमसुरैः पीडितां भूमिं धारयत् । धृतवान् । पीडाराहित्येन स्थितामकरोदित्यर्थः । तदनंतरं पप्रथच्च । भूमिं विस्तीर्णामकरोत् । अपि च वज्रेणायुधेन हंतव्यान्वृत्रादीन्हत्वापो वृष्ट्युदकानि निःससर्ज । मेघान्निर्गमयामास । एतदेव स्पष्टीक्रियते । अहिमंतरिक्षे वर्तमानं मेघमहन् । वज्रेण वर्षणार्थमताडयत् । रौहिणं । रौहिणो नाम कश्चिदसुरः । तं च व्यभिनत् । विदारयत् । अपि च । मघवा धनवानिंद्रः शचीभिरात्मीयैर्युद्धकर्मभिर्व्यंसं विगतभुजं वृत्रासुरमहन् । अवधीत् ॥ पप्रथत् । पृथुं करोति प्रथयति । तत्करोतीति णिच् । णाविष्ठवत्प्रातिपदिकस्य कार्यमिति वचनाद् ऋतो हलादेर्लघोरिति ऋकारस्य रत्वं । टेरिति टिलोपः । तस्य स्थानिवद्भावाद्वृद्ध्यभावः । प्रथयतेर्लुङि चङि णिलोपः ।

द्विर्वचने चङ्यन्यतरस्यामिति चङः पूर्वस्योदात्तत्वं। न णिलोपस्य स्थानिवत्त्वं न पदांतेत्यादिना स्वरविधिं प्रति तन्निषेधात्। पूर्वपदस्यासमानवाक्यस्थत्वान्निघाताभावः ॥

तृतीयामृचमाह ॥

स जातूभर्मा श्रद्दधान ओजः पुरो विभिंदन्नचरद्वि दासीः ।
विद्वान्वज्रिन्दस्यवे हेतिमस्यार्यं सहो वर्धया द्युम्नमिंद्र ॥ ३ ॥

सः। जातूऽभर्मा। श्रत्ऽदधानः। ओजः। पुरः। विऽभिंदन्। अचरत्। वि। दासीः।
विद्वान्। वज्रिन्। दस्यवे। हेतिं। अस्य। आर्यं। सहः। वर्धय। द्युम्नं। इंद्र ॥ ३ ॥

जातूभर्मा। जातू इत्यशनिमाचक्षते। भर्मायुधं। अशनिरूपमायुधं यस्य स तथोक्तः। यद्वा। जातानां प्रजानां भर्ता। ओज ओजसा बलेन निष्पाद्यं कार्यं श्रद्दधानः। आदरातिशयेन कामयमानः। एवंभूतः स इंद्रो दासीर्दस्युसंबंधीनि पुरः पुराणि विभिंदन् विनाशयन्व्यचरत्। विविधमगच्छत्। हे वज्रिन्वज्रवन्निंद्र विद्वान् स्तुतीर्विजानंस्त्वमस्य स्तोतुर्दस्यव उपक्षयकारिणे शत्रवे हेतिमायुधं विसृजेति शेषः। अपि च हे इंद्र। आर्यं सहः। आर्या विद्वांसः स्तोतारः। तदीयं बलं वर्धय। अतिवृद्धं कुरु। तथा द्युम्नं तदीयं यशश्च प्रवर्धय ॥ जातूभर्मा। जनी प्रादुर्भावे। अन्येष्वपि दृश्यत इति दृशिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात्केवलादपि डप्रत्ययः। जांस्तूर्वतीति जातूः। तुर्वी हिंसार्थः। क्विपि राल्लोप इति वलोपः। भ्रियत इति भर्म। अन्येभ्योऽपि दृश्यंत इति मनिन्। जातूर्भर्म यस्य। छांदसो रेफलोपः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। पक्षांतरे तु जनेर्निष्ठा। जनसनखनामित्यात्वं। जातं सर्वं भर्म भर्तव्यं येन। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। वर्णव्यापत्त्याकारस्य चोकारः ॥

चतुर्थीमृचमाह ॥

तदूचुषे मानुषेमा युगानि कीर्तेन्यं मघवा नाम बिभ्रत् ।
उपप्रयन्दस्युहत्याय वज्री यद्ध सूनुः श्रवसे नाम दधे ॥ ४ ॥

तत्। ऊचुषे। मानुषा। इमा। युगानि। कीर्तेन्यं। मघऽवा। नाम। बिभ्रत्।
उपऽप्रयन्। दस्युऽहत्याय। वज्री। यत्। ह। सूनुः। श्रवसे। नाम। दधे ॥ ४ ॥

नाम शत्रूणां नामकं तदिंद्रस्य बलमूचुष उक्तवते स्तुवते यजमानाय कीर्तेन्यं कीर्तनीयं स्तुत्यं । नामकं तद्बलं बिभ्रत् धारयन्मघवा धनवानिंद्रो मानुषा मनुष्याणां संबंधीनीमेमानि दृश्यमानानि युगान्यहोरात्रसंघनिष्पाद्यानि कृतत्रेतादीनि सूर्यात्मना निष्पादयतीति शेषः । किं पुनस्तन्नाम । दस्युहत्याय दस्यूनां वृत्रादीनां हननायोपप्रयन् गृहसमीपान्निर्गच्छन् वज्री वज्रवान्सूनुः शत्रूणां प्रेरयितेंद्रो यद्य यत्खलु नाम शत्रूणां नामकं श्रवसे जयलक्षणाय यशसे दधे धृतवान् ॥ ऊचुषे । ब्रूञ् व्यक्तायां वाचि । ब्रुवो वचिः । लिटः क्वसुः । वचिस्वपीत्यादिना संप्रसारणं । चतुर्थ्येकवचने भसंज्ञायां वसोः संप्रसारणमिति संप्रसारणं । शासिवसिघसीनां चेति षत्वं । क्वसुप्रत्ययाद्युदात्तत्वं । कीर्तेन्यं । कॄत संशब्दने । कृत्यार्थे तवैकेनिति केन्यप्रत्ययः । मघवा । मघशब्दाच्छंदसीवनिपाविति मत्वर्थीयो वनिप् । बिभ्रत् । डुभृञ् धारणपोषणयोः । शतरि जुहोत्यादित्वाच्छपः श्लुः । भृञामिदित्यभ्यासस्येत्वं । नाभ्यस्ताच्छतुरिति नुमागमप्रतिषेधः । अभ्यस्ता-नामादिरित्याद्युदात्तत्वं ॥

पंचमीमृचमाह ॥

तदस्येदं पश्यता भूरि पुष्टं श्रदिंद्रस्य धत्तन वीर्याय ।

स गा अविंदत्सो अविंददश्वान्स ओषधीः सो अपः स वनानि ॥ ५ ॥

तत् । अस्य । इदं । पश्यत । भूरि । पुष्टं । श्रत् । इंद्रस्य । धत्तन । वीर्याय ।

सः । गाः । अविंदत् । सः । अविंदत् । अश्वान् । सः । ओषधीः । सः । अपः । सः । वनानि ॥ ५ ॥

हे ऋत्विग्यजमानलक्षणा जनाः । अस्येंद्रस्य तदिदं वीर्यं पुष्टं प्रवृद्धं । अत एव भूरि विस्तीर्णं पश्यत । आलोकयत । तस्मै वीर्याय श्रत् धत्तन । बहुमानं कुरुत । किं पुनस्तद्वीर्यमिति चेत् उच्यते । स इंद्रः पणिभिरपहृता गा येन वीर्येणाविंदत् अलभत । तथा तैरपहृतानश्वान्स इंद्रो येनाविंदत् । अपि च स इंद्र ओषधीरोषध्युपलक्षितां सर्वां भूमिं येन वीर्येणालभत । तथा वृत्रेण निरुद्धा अपो वृष्ट्युदकानि स इंद्रो येनालभत । तथा वनानि वननीयानि संभजनी-यानि धनानि स इंद्रो येन वीर्येण प्राप्नोत् ॥ धत्तन । तप्तनप्तनथनाश्चेति तस्य तनादेशः । अविंदत् । विद्लृ लाभे । शे मुचादीनामिति नुम् ॥

॥ इति प्रथमस्य सप्तमे षोडशो वर्गः ॥

षष्ठीमृचमाह ॥

भूरिकर्मणे वृषभाय वृष्णे सत्यशुष्माय सुनवाम सोमं।
य आदृत्या परिपंथीव शूरोऽयज्वनो विभजन्नेति वेदः ॥ ६ ॥
भूरिऽकर्मणे। वृषभाय। वृष्णे। सत्यऽशुष्माय। सुनवाम। सोमं।
यः। आऽदृत्य। परिपंथीऽइव। शूरः। अयज्वनः। विऽभजन्। एति। वेदः ॥ ६ ॥

भूरिकर्मणे बहुविधेन शत्रुवधादिरूपेण कर्मणा युक्ताय वृषभाय वृषभवत्सर्वेषु देवेषु श्रेष्ठाय वृष्णे सेचनसमर्थाय सत्यशुष्मायावितथबलायेंद्राय तदर्थं सोमं सुनवाम। होमार्थं रसरूपं करवाम। शूरः शौर्योपेतो य इंद्र आदृत्य धनविषयमादरं कृत्वायज्वनोऽयजमानस्य वेदो धनं विभजन्। तस्मादयजमानाद्विभक्तं कुर्वन्नपहरन्नेति। यजमानेभ्यस्तद्धनं दातुं गच्छति। तत्र दृष्टांतः। परिपंथीव। यथा मार्गनिरोधकश्चौरो गच्छतां पुण्यपुरुषाणां धनं बलात्कारेणापहृत्य गच्छति। तद्वत् ॥ आदृत्य। दृङ् आदरे। समासेऽनञ्पूर्वे क्त्वो ल्यप्। तस्य स्थानिवद्भावेन कृत्त्वे सति ह्रस्वस्य पिति कृतीति तुक्। परिपंथी। छंदसि परिपंथिपरिपरिणौ पर्यवस्थातरीतीनिप्रत्ययांतो निपात्यते ॥

सप्तमीमृचमाह ॥

तदिंद्र प्रेव वीर्यं चकर्थ यत्ससंतं वज्रेणाबोधयोऽहिं।
अनु त्वा पत्नीर्हृषितं वयश्च विश्वे देवासो अमदन्ननु त्वा ॥ ७ ॥
तत्। इंद्र। प्रऽइव। वीर्यं। चकर्थ। यत्। ससंतं। वज्रेण। अबोधयः। अहिं।
अनु। त्वा। पत्नीः। हृषितं। वयः। च। विश्वे। देवासः। अमदन्। अनु। त्वा ॥ ७ ॥

हे इंद्र तद्वीर्यं वीरकर्म प्रेव चकर्थ। प्रख्यातमिवाकार्षीः। किं पुनस्तद्वीर्यं। ससंतं स्वपंतं मदोन्मत्तमहिं वृत्रं वज्रेण कुलिशेन यद्येन वीर्येण त्वमबोधयः। प्रबुद्धः सन्मया सह युद्धं करोत्विति हृषितं तादृशस्य वृत्रस्य हननेन प्राप्तहर्षं त्वामनु पश्चात्पत्नीर्देवपत्न्य अमदन्। हर्षं प्राप्ताः। अपि च वयश्च गमनशीला मरुतोऽपि तथा विश्वे देवासोऽन्ये च सर्वे देवास्त्वामनु पश्चादमदन्। अमाद्यन् ॥ ससंतं। षस स्वप्ने। अदादित्वाच्छपो लुक्। पत्नीः। वा छंदसीति पूर्वसवर्णदीर्घत्वं। अमदन्। मदी हर्षे। व्यत्ययेन शप् ॥

अष्टमीमृचमाह ॥

शुष्णं पिप्रुं कुयवं वृत्रमिंद्र यदावधीर्वि पुरः शंबरस्य ।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ ८ ॥

शुष्णं । पिप्रुं । कुयवं । वृत्रं । इंद्र । यदा । अवधीः । वि । पुरः । शंबरस्य ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ ८ ॥

हे इंद्र त्वं शुष्णादींश्चतुरोऽसुरान्यद्यदावधीः । हतवानसि । तदानीं शंबरस्यासुरस्य पुरो नगराणि विदारितवानसि । असुराणां मुख्येषु हतेष्वन्यान्यप्यसुरपुराणि विदीर्णान्यासन्नित्यर्थः । यदनेन सूक्तेन प्रार्थितमस्मदीयं तन्मित्रादयो मामहंतां । पूजितं कुर्वंतु ॥ शुष्णं । शुष शोषणे । अंतर्भावितण्यर्थात् तृषिशुषिरसिभ्यः कित्चेति नप्रत्ययः । निदित्यनुवृत्तेराद्युदात्तत्वं । पिप्रुं । पृ पालनपूरणयोः । पृ इत्येके । औणादिकः कुप्रत्ययः । छंदस्युभयथेति तस्य सार्वधातुकत्वे सति शप् । जुहोत्यादित्वात् श्लुः । अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं । कुयवं । यवो यवनं मिश्रणं । कुत्सितं यवनमस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । शंबरस्य । शमयतीति शंब आयुधं । शमेर्वन् । उ॰ ४. ९६. । ततो मत्वर्थीयो रप्रत्ययः ॥

॥ इति प्रथमस्य सप्तमे सप्तदशो वर्गः ॥

योनिरिति नवर्चमेकादशं सूक्तं कुत्सस्यार्षं त्रैष्टुभमैंद्रं । योनिर्नवेत्यनुक्रांतं । सूक्तविनियोगो लैंगिकः ॥

तत्र प्रथमामृचमाह ॥

योनिष्ट इंद्र निषदे अकारि तमा नि षीद स्वानो नार्वा ।
विमुच्या वयोऽवसायाश्वान्दोषा वस्तोर्वहीयसः प्रपित्वे ॥ १ ॥

योनिः । ते । इंद्र । निऽसदे । अकारि । तं । आ । नि । सीद । स्वानः । न । अर्वा ।
विऽमुच्य । वयः । अवऽसाय । अश्वान् । दोषा । वस्तोः । वहीयसः । प्रऽपित्वे ॥ १ ॥

हे इंद्र योनिर्वेद्याख्यं स्थानं ते तव निषदे निषदनायोपवेशनायाकारि । कृतमस्माभिः प्रकल्पितमभूत् । तं योनिमानिषीद । शीघ्रमागत्य तत्रोपविश । शीघ्रागमने दृष्टांतः । स्वानो नार्वा । अर्वेत्यश्वनाम । यथाश्वः स्वानो हेषाशब्दं

कुर्वन् स्वकीयं स्थानं शीघ्रमागच्छति तद्वत्। किं कृत्वा। वयोऽश्वबंधनार्थान् रश्मीन्विमुच्य। रथाद्विश्लिष्य। तथाश्वान् रथे योजितांश्च तुरगानवसाय विमुच्य। अत्र निरुक्तं। अवसायाश्वानिति स्यतिरुपसृष्टो विमोचने। नि० १. १७। इति। कीदृशानश्वान्। प्रपित्वे। यागकाले प्राप्ते। प्रपित्वे प्राप्तेऽभीकेऽभ्यक्ते। नि० ३. २०। इति यास्कः। दोषा रात्रौ वस्तोरहनि च वहीयसः। आदरातिशयेन वोढ्न्॥ निषदे। सदेः संपदादिलक्षणे भावे क्विप्। स्वानः। स्यमु स्वन ध्वन शब्दे। बहुलवचनात्कर्तरि घञ्। कर्षात्वत इत्यंतोदात्तत्वं। वयः। वियंति रथेन सह संगच्छंत इति विशब्देन रश्मय उच्यंते। वी गत्यादिषु। औणादिक इप्रत्ययः। टिलोपश्च। द्वितीयार्थे प्रथमा। अवसाय। षो अंतकर्मणि। आदेच इत्यात्वं। समासेऽनञ्पूर्वे इति क्त्वो ल्यबादेशः। वहीयसः। वह प्रापणे। तृजंताद्वोढृशब्दात्तुश्छंदसीतीयसुन्। तुरिष्ठेमेयःस्विति तृलोपे कर्तव्ये ढत्वधत्वष्टुत्वढलोपानामसिद्धत्वात्तदाश्रितस्यौत्वस्याप्यभावे तृलोप एव क्रियते॥

द्वितीयामृचमाह॥

ओ त्ये नर इंद्रमूतये गुर्नू चित्तान्सद्यो अध्वनो जगम्यात्।
देवासो मन्युं दासस्य श्चम्नन्ते न आ वक्षन्त्सुविताय वर्णं॥२॥

ओ इति। त्ये। नरः। इंद्रं। ऊतये। गुः। नु। चित्। तान्। सद्यः। अध्वनः। जगम्यात्।
देवासः। मन्युं। दासस्य। श्चम्नन्। ते। नः। आ। वक्षन्। सुविताय। वर्णं॥२॥

त्ये ते नरो यज्ञस्य नेतारो यजमाना ऊतये रक्षणायेंद्रं। ओ आ उ इत्येतन्निपातद्वयसमुदाय आकारार्थः। आगुः। आगच्छंति। स चेंद्र आगतांस्तान् नू चित्क्षिप्रं सद्यस्तदानीमेवाध्वनोऽनुष्ठानमार्गाज्जगम्यात्। गमयतु। प्रापयतु। देवासः सर्वे देवा दासस्योपक्षपयितुरसुरस्य मन्युं क्रोधं श्चम्नन्। भक्षयंतु। हिंसंत्वित्यर्थः। अपि च ते देवा नोऽस्माकं सुविताय सुष्ठु प्राप्तव्याय यज्ञाय वर्णमनिष्टनिवारकमिंद्रमावक्षन्। आवहंतु। आनयंतु॥ जगम्यात्। गमेरंतर्भावितण्यर्थात् लिङि बहुलं छंदसीति शपः श्लुः। श्चम्नन्। चमु अदने। लेटि व्यत्ययेन श्ना। शकारोपजनश्छांदसः। यद्वा श्चम्नातिः प्रकृत्यंतरं हिंसार्थं द्रष्टव्यं। वक्षन्। वह प्रापणे। लेटि सिब्बहुलं लेटीति सिप्। ढत्वकत्वषत्वानि। सुविताय। सुपूर्वादेतेः कर्मणि निष्ठा। तन्वादित्वादुवङ्। सूपमानात् क्त इत्युत्त-

रपदांतोदात्तत्वं । वर्णं । वृञ् वरणे । अस्मादंतर्भावितण्यर्थात्कृवृजृसिद्रुपण्यनिस्वपिभ्यो नित् । उ॰ ३. १०.। इति नप्रत्ययः । नित्त्वादाद्युदात्तत्वं ॥

तृतीयामृचमाह ॥

अव त्मना भरते केतवेदा अव त्मना भरते फेनमुदन् ।
क्षीरेण स्नातः कुयवस्य योषे हते ते स्यातां प्रवणे शिफायाः ॥ ३ ॥

अव । त्मना । भरते । केतऽवेदाः । अव । त्मना । भरते । फेनं । उदन् ।
क्षीरेण । स्नातः । कुयवस्य । योषे इति । हते इति । ते इति । स्यातां । प्रवणे ।
शिफायाः ॥ ३ ॥

केतवेदाः केतं ज्ञातं वेदः परेषां धनं येन स तादृशः कुयवनामासुरस्त्मनात्मना स्वयमेवावभरते । ज्ञातं परेषां धनमपहरति । अपि च सोऽसुर उदन्नुदकेऽतर्वर्तमानः सन्फेनं फेनयुक्तमुदकमात्मना स्वयमेवावभरते । अपहरति । क्षीरेण क्षरणशीलेन तेनापहृतेनोदकेन कुयवस्यासुरस्य योषे भार्ये स्नातः । स्नानं कुर्वाते । तादृश्यौ स्त्रियौ शिफायाः । शिफा नाम नदी । तस्याः प्रवणे निम्ने प्रवेष्टुमशक्येऽगाधप्रदेशे हते नष्टे स्यातां । भवेतां । हे इंद्र त्वं परेषां धनमपहृत्यान्यैर्दुरवगाह उदकस्य मध्ये वर्तमानं कुयवं सकुटुंबमवधीरित्यर्थः ॥ त्मना । मंत्रेष्वाङ्यादेरात्मन इत्याकारलोपः । भरते । हृञ् हरणे । हृग्रहोर्भ इति भत्वं । केतवेदाः । कित ज्ञाने । कर्मणि घञ् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । उदन् । पद्दन्नित्यादिनोदकशब्दस्योदन्नादेशः । सुपां सुलुगिति सप्तम्या लुक् ॥

चतुर्थीमृचमाह ॥

युयोप नाभिरुपरस्यायोः प्र पूर्वाभिस्तिरते राष्टि शूरः ।
अंजसी कुलिशी वीरपत्नी पयो हिन्वाना उदभिर्भरंते ॥ ४ ॥

युयोप । नाभिः । उपरस्य । आयोः । प्र । पूर्वाभिः । तिरते । राष्टि । शूरः ।
अंजसी । कुलिशी । वीरऽपत्नी । पयः । हिन्वानाः । उदऽभिः । भरंते ॥ ४ ॥

उपरस्योदकमध्य उप्तस्यावस्थितस्यायोः परेषामुपद्रवार्थमितस्ततो गच्छतः कुयवस्यासुरस्य नाभिः संनद्धमावसनस्थानं युयोप । गूढमासीत् । यथान्यैर्न दृश्यते सोऽसुरस्तथाकरोदित्यर्थः । अपि च । पूर्वाभिः पूरयित्रीभिरात्मनापहृ-

ताभिरद्भिः प्रतिरते। सोऽसुरः प्रवर्धते। स च शूरः शौर्योपेतो राष्टि। राजते च। आत्मीयेन शौर्येण लोके प्रख्यातो भवतीत्यर्थः। तमिममसुरमंजस्यांजस्योपेता कुलिशी कुलं शातयंती वीरपत्नी वीरस्य पालयित्री। एतत्संज्ञिकास्तिस्रो नद्यः पयः पयसा तत्संबंधिना सारभूतेनोदकेन हिन्वानाः प्रीणयंत्य उदभिरात्मीयैरुदकैर्भरंते। धारयंति ॥ युयोप। युप विमोहने। नाभिः। नहो भश्चेतीञ्प्रत्ययः। राष्टि। राजृ दीप्तौ। बहुलं छंदसीति शपो लुक्। व्रश्चादिना षत्वे ष्टुत्वं। पयः। सुपां सुलुगिति तृतीयाया लुक्। हिन्वानाः। हिवि: प्रीणनार्थः। इदित्त्वान्नुम्। अस्मात्ताच्छीलिकश्चानश्। आगमानुशासनस्यानित्यत्वान्नुगभावः। चानशो लसार्वधातुकत्वाभावात्तत्स्वराभावे चित्स्वर एव शिष्यते ॥

पंचमीमृचमाह ॥

प्रति यत्स्या नीथादर्शि दस्योरोको नाच्छा सदनं जानती गात्।
अध स्मा नो मघवञ्चर्कृतादिन्मा नो मघेव निष्षपी परा दाः ॥ ५ ॥

प्रति। यत्। स्या। नीथा। अदर्शि। दस्योः। ओकः। न। अच्छ। सदनं। जानती। गात्।
अध। स्म। नः। मघऽवन्। चर्कृतात्। इत्। मा। नः। मघाऽइव। निष्षपी।
परा। दाः ॥ ५ ॥

यद्यदा नीथा नयनहेतुभूता स्या सा पदवी प्रत्यदर्शि। अस्माभिर्दृष्टाभूत्। सा च पदवी दस्योरुपक्षपयितुः कुयवस्यासुरस्य सदनं गृहमच्छाभिमुख्येन गात्। गता प्राप्ता। तत्र दृष्टांतः। जानती स्वकीयं वत्समभिजानती गौरोको न। निवासस्थानं स्वकीयं गोष्ठं यथा ऋजु प्राप्नोति। तद्वन्मार्गोऽप्यसुरगृहं प्राप्त इत्यर्थः। अध स्म अथानंतरमेव हे मघवन्धनवन्निंद्र चर्कृतात्पुनःपुनस्तेनासुरेण कृतादुपद्रवान्नोऽस्मान्रक्षेति शेषः। इदित्यवधारणे। अस्मान्रक्षैव नोऽस्मान्मा परादाः। मा परित्याक्षीः। अस्माभिर्ज्ञातेन मार्गेण गत्वास्मदुपद्रवकारिणमसुरं जहीति तात्पर्यार्थः। तत्र व्यतिरेके दृष्टांतोऽभिधीयते। मघेव निष्षपी। विनिर्गतसपो विनिर्गतशेपो यथेष्टाचारी दासीपतिर्मघेव यथा धनान्यस्थाने परित्यजति तथास्मान्मा परित्याक्षीरित्यर्थः। अत्र निरुक्तं। निष्षपी स्त्रीकामो भवति विनिर्गतपसाः। पसः सपतेः स्पृशतिकर्मणः। मा नो मघेव निष्षपी परा दाः। स यथा धनानि विनाशयति मा नस्त्वं तथा परा दाः। नि॰ ५.१६.।

इति ॥ नीथा । णीञ् प्रापणे । हनिकुषिनीरमिकाशिभ्यः क्थन्निति करणे क्थन्प्रत्ययः । गात् । एतेर्लुङीणो गा लुङीति गादेशः । गातिस्थेति सिचो लुक् । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । चर्कृतात् । करोतेर्यङ्लुगंतान्निष्ठेति क्तप्रत्ययः । मघाऽइव । शेश्छंदसीति शेर्लोपः । निष्षपी । षप समवाये । सपति समवैति योन्या संगच्छत इति सपः शेपः । पचाद्यच् । निर्गतो नित्योद्भूतः सपः शेपो यस्य स स्त्रीव्यसनी निष्षपः । वर्णव्यापत्त्या ईकारः । दाः । डुदाञ् दाने । लुङि गातिस्थेति सिचो लुक् । न माङ्योग इत्यडभावः ॥

॥ इति प्रथमस्य सप्तमेऽष्टादशो वर्गः ॥

षष्ठीमृचमाह ॥

स त्वं न॑ इंद्र॒ सूर्ये॒ सो अ॒प्स्व॑नागा॒स्त्व आ भ॑ज जीवशं॒से ।
मांत॑रां भुज॒मा री॑रिषो नः॒ श्रद्धि॑तं ते म॒हत इं॑द्रि॒याय॑ ॥ ६ ॥

सः । त्वं । नः॒ । इं॒द्र॒ । सूर्ये॑ । सः । अ॒प्ऽसु । अ॒ना॒गाः॒ऽत्वे । आ । भ॒ज । जी॒व॒ऽशं॒से ।
मा । अं॒त॑रां । भु॒जं॑ । आ । रि॒रि॒षः॒ । नः॒ । श्रद्धि॑तं । ते॒ । म॒ह॒ते । इं॒द्रि॒याय॑ ॥ ६ ॥

हे इंद्र स त्वं नोऽस्मान्सूर्ये सर्वस्य प्रेरक आदित्य आभज । आभाजय । आभिमुख्येन भक्तान्संभक्तान्कुरु । तथा स त्वमप्स्वब्देवतास्वस्मानाभाजय । अपि च जीवशंसे जीवैः प्राणिभिः शंसनीये कामयितव्येऽनागास्त्वेऽपापत्वे पापराहित्येऽस्मानाभाजय । अपि च नोऽस्माकमंतरां गर्भरूपेणांतर्वर्तमानां भुजं पालयित्रीं प्रजामा समंतान्मा रीरिषः । मा हिंसीः । ते तव महते प्रभूतायेंद्रियाय बलाय श्रद्धितं । अस्माभिः श्रद्धानं कृतं । त्वदीयं बलं बहुमानपूर्वकं स्तुम इत्यर्थः । तस्मात्तादृशबलयुक्तस्त्वं मा रीरिष इति पूर्वेण संबंधः ॥ अनागास्त्वे । न विद्यत आगः पापं यस्य स अनागः । तस्य भावस्तत्त्वं । छांदस उपधादीर्घः । जीवशंसे । शंसु स्तुतौ । कर्मणि घञ् । थाथादिनोत्तरपदांतोदात्तत्वं । भुजं । भुनक्ति पालयतीति भुक् प्रजा । क्विप् । रीरिषः । रिष हिंसायां । स्वार्थे णयंतादस्माल्लुङि चङि णिलोप उपधाह्रस्वत्वादीनि । छांदसं पदकालीनमभ्यासह्रस्वत्वं । श्रद्धितं । श्रच्छब्दस्य ऊर्यादित्वेन । पा० १. ४. ६१. । गतित्वाद्गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वं ॥

सप्तमीमृचमाह ॥

अधा मन्ये श्रत्ते अस्मा अधायि वृषा चोदस्व महते धनाय ।
मा नो अकृते पुरुहूत योनाविंद्र क्षुध्यद्भ्यो वय आसुतिं दाः ॥ ७ ॥

अध । मन्ये । श्रत् । ते । अस्मै । अधायि । वृषा । चोदस्व । महते । धनाय ।
मा । नः । अकृते । पुरुऽहूत । योनौ । इंद्र । क्षुध्यत्ऽभ्यः । वयः । आऽसुतिं । दाः ॥ ७ ॥

हे इंद्र अध अथानंतरं मन्ये । त्वां मनसा जानामि । ते तवास्मै बलाय श्रदधायि । अस्माभिः श्रद्धा कृता । त्वदीयबलविषयमादरातिशयेन स्तोत्रं कृतमित्यर्थः । वृषा कामानां वर्षिता स त्वं महते प्रौढाय धनाय चोदयस्व । अस्मान्प्रेरय । हे पुरुहूत । पुरुभिर्बहुभिर्यजमानैराहूतेंद्र । अकृतेऽनिष्पादिते धनशून्ये योनौ । गृहनामैतत् । गृहे नोऽस्मान्मा धाः । निधेहि । धनधान्यपूर्णे गृहेऽस्मान्वासयेत्यर्थः । अपि च हे इंद्र क्षुध्यद्भ्यो बुभुक्षितेभ्योऽन्येभ्योऽपि स्तोतृभ्यो वयोऽन्नमासुतिं पेयं क्षीरादिकं च दाः । देहि ॥ अधायि । दधातेः कर्मणि लुङि च्लेश्चिण् । आतो युक् चिण्कृतोरिति युक् । क्षुध्यद्भ्यः । क्षुध बुभुक्षायां । दिवादित्वात् श्यन् । निघ्नादाद्युदात्तत्वं ॥

अष्टमीमृचमाह ॥

मा नो वधीरिंद्र मा परा दा मा नः प्रिया भोजनानि प्र मोषीः ।
आंडा मा नो मघवञ्छक्र निर्भेन्मा नः पात्रा भेत्सहजानुषाणि ॥ ८ ॥

मा । नः । वधीः । इंद्र । मा । परा । दाः । मा । नः । प्रिया । भोजनानि । प्र । मोषीः ।
आंडा । मा । नः । मघऽवन् । शक्र । निः । भेत् । मा । नः । पात्रा । भेत् । सहऽजानुषाणि ॥ ८ ॥

हे इंद्र नोऽस्मान्मा वधीः । मा हिंसीः । सर्वदा रक्षेत्यर्थः । अपि च मा परादाः । मा परित्याक्षीः । परादानं परित्यागः । अस्मत्कृतां पूजां सर्वदा गृहाणेत्यर्थः । अपि च नोऽस्माकं प्रिया प्रियाणीप्सितानि भोजनान्युपभोग्यानि धनानि मा प्रमोषीः । मापहार्षीः । अस्मास्वेव धनानि यथा स्युस्तथा कुर्वित्यर्थः । तथा हे मघवन् धनवन् शक्र सर्वकार्यशक्तेंद्र नोऽस्माकमांडांडसंबंधीनि गर्भरूपेण निषिक्तान्यपत्यानि मा भेत् । मा भिनः । गर्भरूपेणावस्थितानस्मत्पुत्रान्रक्षेत्यर्थः । मा च नः पात्रा । पतंति गच्छंति गमनसमर्थानि यानि तान्यपत्यानि

पात्राणि। तानि च मा भेत्। मा भिनः। सहजानुषाणि। जानुभ्यां यानि भूमिं सनंति गच्छंतीत्यर्थः। तानि जानुषाणि। तैः सहितानि मा विनीनशः। यद्वा। नोऽस्माकं सहजानुषाण्याधाने सहोत्पन्नानि पात्रा पात्राणि स्रुवादीनि मा निर्भेत्। मा भिनः ॥ वधीः। हंतेर्माङि लुङि चेति वधादेशः। स चादंतः। सिच्। अतो लोप इत्यकारलोपः। तस्य स्थानिवद्भावादतो हलादेर्लघोरिति वृद्ध्यभावः। इट ईटीति सिचो लोपः। मोषीः। मुष स्तेये। लुङि सिच इट्। नेटीति वृद्धिप्रतिषेधः। भेत्। भिदिर् विदारणे। लङि सिपि बहुलं छंदसीति विकरणस्य लुक्। लघूपधगुणः। हल्ङ्याब्भ्य इति सिचो लोपः ॥

माध्यंदिने सवनेऽर्वाङेहीत्येषा पोतुः प्रस्थितयाज्या। सूचितं च। अर्वाङेहि सोमकामं त्वाहुस्त्वायं सोमस्त्वमेह्यर्वाङ्। आ० ५. ५.। इति ॥

तामेतां सूक्ते नवमीमृचमाह ॥

अर्वाङेहि सोमकामं त्वाहुरयं सुतस्तस्य पिबा मदाय।
उरुव्यचा जठर आ वृषस्व पितेव नः शृणुहि हूयमानः ॥ ९ ॥

अर्वाङ्। आ। इहि। सोमऽकामं। त्वा। आहुः। अयं। सुतः। तस्य। पिब। मदाय।
उरुऽव्यचाः। जठरे। आ। वृषस्व। पिताऽइव। नः। शृणुहि। हूयमानः ॥ ९ ॥

हे इंद्र त्वमर्वाङ् अस्मदभिमुखः सन् एहि। आगच्छ। किं कारणमिति चेत्। यस्मात्त्वां सोमकामं सोमविषयाभिलाषमाहुः। पुराविदः कथयंति। अयमस्मदीयः सोमः सुतः। ऋत्विग्भिरभिषुतः। अत आगच्छेत्यर्थः। आगत्य च मदाय हर्षार्थं तस्य तमस्मदीयमभिषुतं सोमं पिब। एतदेव स्पष्टीक्रियते। उरुव्यचाः। उरु विस्तीर्णं व्यचो व्यापनं यस्य तादृशो महावयवो भूत्वा जठर आत्मीय उदर आवृषस्व। सोममासिंच। आ समंतात्पूरयेत्यर्थः। एवंभूतस्त्वं हूयमानः स्तुतिभिराहूयमानः सन् पितेव पुत्राणां वाक्यानि शृणोति तथा नोऽस्माकं वाक्यानि शृणुहि। शृणु ॥ सोमकामं। सोमविषयः कामोऽभिलाषो यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। आहुः। ब्रुवः पंचानामादित आहो ब्रुव इति णलुसादेशो धातोराहादेशश्च। तस्य। क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी। मदाय। मदी हर्षे। मदोऽनुपसर्ग इति भावेऽप्। उरुव्यचाः। व्यच व्याजीकरणे। औणादिकोऽसिप्रत्ययः। व्यचेः कुटादित्वमनसीति

वचनात् ङित्त्वाभावेन संप्रसारणाभावः। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। यद्वा। उरु विचति व्याप्नोतीत्युरुव्यचाः। कृदुत्तरपदप्रकृतिस्वरत्वं। वृषस्व। वृष सेचने। व्यत्ययेनात्मनेपदश्नप्रत्ययौ। भृणुहि। भ्रुभृणुपृकृवृभ्य इति सेर्हिः॥

॥ इति प्रथमस्य सप्तम एकोनविंशो वर्गः॥

चंद्रमा इत्येकोनविंशत्यृचं द्वादशं सूक्तं। अपां पुत्रस्य त्रितस्य कूपे पतितस्य कुत्सस्य वार्षं। तथा चोभयोः कूपपात आम्नायते। त्रितः कूपेऽवहितः काटे निबाळ्ह ऋषिरह्वदूतय इति च। त्रितस्य चापां पुत्रत्वं तैत्तिरीया स्पष्टमामनंति। तत एकतोऽजायत इति स द्वितीयमभ्यपातयत् ततो द्वितोऽजायत स तृतीयमभ्यपातयत् ततस्त्रितोऽजायत। यदद्भ्योऽजायंत तदाप्यानामाप्यत्वमिति। तमेतमाप्यं त्रितस्तद्वेदाप्य इति तकारोपजनेन वयमधीमह इति। अंत्या त्रिष्टुप्। सं मा तपंतीत्येषा यवमध्या महाबृहती। आद्यौ द्वावष्टाक्षरौ पादौ द्वादशाक्षरस्तृतीयस्ततो द्वावष्टाक्षरौ सा यवमध्या महाबृहती। चत्वारोऽष्टका जागतश्च महाबृहतीत्युक्ता मध्ये चेद्यवमध्येत्युक्तलक्षणोपेतत्वात्। अनु० १. ९.। शिष्टाः पंक्तयः। विश्वे देवा देवता। तथा चानुक्रांतं। चंद्रमा एकोनाप्त्यस्त्रितो वा वैश्वदेवं हि पांक्तमंत्या त्रिष्टुबष्टमी महाबृहती यवमध्येति। हीत्यभिधानादित्मादीनि त्रीणि सूक्तानि वैश्वदेवानि। विनियोगः। अत्र शाट्यायनिन इतिहासमाचक्षते। एकतो द्वितस्त्रित इति पुरा त्रय ऋषयो बभूवुः। ते कदाचिन्मरुभूमावरण्ये वर्तमानाः पिपासया संतप्तगात्राः संत एकं कूपमविंदन्। तत्र त्रिताख्य एको जलपानाय कूपं प्राविशत्। स्वयं पीत्वेतरयोश्च कूपादुदकमुद्धृत्य प्रादात्। तौ तदुदकं पीत्वा त्रितं कूपे पातयित्वा तदीयं धनं सर्वमपहृत्य कूपं च रथचक्रेण पिधाय प्रास्थिषातां। ततः कूपे पतितः स त्रितः कूपादुत्तरीतुमशक्नुवन्सर्वे देवा मामुद्धरंत्विति मनसा सस्मार। ततस्तेषां स्तावकमिदं सूक्तं ददर्श। तत्र रात्रौ कूपस्यांतश्चंद्रमसो रश्मीन्पश्यन्परिदेवयते॥

तत्र प्रथमामृचमाह॥

चंद्रमा अप्स्व१ंतरा सुपर्णो धावते दिवि।

न वो हिरण्यनेमयः पदं विंदंति विद्युतो वित्तं मे अस्य रोदसी॥१॥

चंद्रमाः । अप्ऽसु । अंतः । आ । सुऽपर्णः । धावते । दिवि ।

न । वः । हिरण्यऽनेमयः । पदं । विंदंति । विऽद्युतः । वित्तं । मे । अस्य । रोदसी इति ॥ १ ॥

अप्स्वांतरिक्षासु । उदकमये मंडलेऽतर्मध्ये वर्तमानः सुपर्णः शोभनपतनः । यद्वा सुपर्ण इति रश्मिनाम । सुषुम्णाख्येन सूर्यरश्मिना युक्तश्चंद्रमा दिवि द्युलोक आ धावते । आङ् मर्यादायां । एकेनैव प्रकारेण धावते । शीघ्रं गच्छति । तादृशस्य चंद्रमसः संबंधिनो हे हिरण्यनेमयः सुवर्णसदृशपर्यंताः । यद्वा हितरमणीयप्रांता विद्युतो विद्योतमाना रश्मयो वो युष्माकं पदं पादस्थानीयमयं न विंदंति । मदीयानींद्रियाणि कूपेनावृतत्वान्न लभंते । अत इदमनुचितं । तस्मात्कूपान्मामुत्तारयतेत्यर्थः । अपि च । हे रोदसी द्यावापृथिव्यौ मे मदीयमस्येदं स्तोत्रं वित्तं । जानीतं । यद्वा मदीयं कूपपतनरूपं यदिदं दुःखं तदवगच्छतं । मदीयं स्तोत्रं श्रुत्वा मदीयं दुःखं ज्ञात्वा वास्मात्कूपान्मामुत्तारयतमित्यर्थः ॥ चंद्रमाः । चंद्रमाह्लादनं सर्वस्य जगतो निर्मिमीत इति चंद्रमाः । चंद्रे माङो डिदित्यसुन् । दासीभारादिषु पाठात्पूर्वपदप्रकृतिस्वरत्वं । धावते । सृ गतौ । पाघ्रेत्यादिना वेगितायां धावादेशः । व्यत्ययेनात्मनेपदं । वित्तं । विद ज्ञाने । लोट्यदादित्वाच्छपो लुक् । पादादित्वात्तिङ्ङतिङ इति निघाताभावः । अस्य । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । ऊडिदमिति विभक्तेरुदात्तत्वं ॥

द्वितीयामृचमाह ॥

अर्थमिद्वा उ अर्थिन आ जाया युवते पतिं ।

तुंजाते वृष्ण्यं पयः परिदाय रसं दुहे वित्तं मे अस्य रोदसी ॥ २ ॥

अर्थं । इत् । वै । ऊं इति । अर्थिनः । आ । जाया । युवते । पतिं ।

तुंजाते इति । वृष्ण्यं । पयः । परिऽदाय । रसं । दुहे । वित्तं । मे । अस्य । रोदसी इति ॥ २ ॥

अर्थिनो धनमपेक्षमाणाः पुरुषा अर्थमिद्वै अपेक्षितं धनं प्राप्नुवंत्येव । नाहं प्राप्नोमि । उ इत्येतत्पादपूरणं । अपि च जायान्यदीया भार्या पतिं स्वपतिमायुवते । आभिमुख्येन प्राप्नोति । मदीया तु मद्विरहाद्गतासीत् । अपि च संयुक्तौ तौ जायापती वृष्ण्यं वीर्यरूपं पय उदकं तुंजाते । प्रजननायान्योन्यसंघट्टनेन प्रेरयतः । तदनंतरं रसं पुरुषस्य सारभूतं वीर्यं परिदाय गर्भाशयेनादाय गर्भरूपेण

धृत्वा दुहे। दुग्धे। पुत्ररूपेण जनयति। मम तु पुत्रोऽपि नोत्पद्यते। अत इदं मदीयं दुःखं हे द्यावापृथिव्यौ जानीतं॥ उ। ऊ इति शाकल्यस्य मतेन प्रगृह्यत्वात् प्लुतप्रगृह्या अचीति प्रकृतिभावः। युवते। यु मिश्रणे। व्यत्ययेनात्मनेपदं। शब्लुकि प्राप्ते व्यत्ययेन शः। तुंजाते। तुजि पिजि हिंसाबलदाननिकेतनेषु। इदित्त्वान्नुम्। व्यत्ययेन श्नम्। श्नान्नलोपः। दुहे। दुह प्रपूरणे। लोपस्त आत्मनेपदेष्विति तलोपः॥

तृतीयामृचमाह॥

मो षु देवा अदः स्व१रव पादि दिवस्परि।
मा सोम्यस्य शंभुवः शूने भूम कदा चन वित्तं मे अस्य रोदसी॥३॥

मो इति। सु। देवाः। अदः। स्वः। अव। पादि। दिवः। परि।
मा। सोम्यस्य। शंऽभुवः। शूने। भूम। कदा। चन। वित्तं। मे। अस्य। रोदसी इति॥३॥

हे देवाः स्वः स्वर्गे वर्तमानमदस्तदस्मदीयं पितृपितामहप्रपितामहात्मकं संतानं दिवस्परि दिवस्योपरि वर्तमानं मो षु मैवावपादि। अवपन्नं विपन्नं प्रभ्रष्टं मा भूत् मम पुत्राभावात्। पुत्रेण लोकाञ्जयति नापुत्रस्य लोकोऽस्तीति श्रुतेः। अतो वयं सोम्यस्य सोमपानार्हस्य पितृगणस्य शंभुवः सुखस्य भावयितुः पुत्रस्य शूने अपगमने कदाचन कदाचिदपि मा भूम। युष्मत्प्रसादान्मम पुत्रा जायंतां। अतो मामस्माद्दुःखादुत्तारयतेत्यर्थः। हे द्यावापृथिव्यौ युवां च मदीयं विज्ञापनं जानीतं॥ मो। मा उ इति निपातद्वयसमुदायो मैवेत्यस्यार्थे। सु इत्येतदवधारणे। सुञ इति षत्वं। पादि। पद गतौ। चिण् ते पदः। पा० ३.१.६०। इति कर्तरि लुङि च्लेश्चिणादेशः। दिवः। ऊडिदमिति विभक्तेरुदात्तत्वं। पंचम्याः परावध्यर्थ इति विसर्जनीयस्य सत्वं। सोम्यस्य। सोममर्हति यः। पा० ४.४.१३७। इति यप्रत्ययः। शंभुवः। भवतेरंतर्भावितण्यर्थात्क्विप्। शूने। टुओश्वि गतिवृद्ध्योः। भावे निष्ठा। श्वीदितो निष्ठायामितीट्प्रतिषेधः। वचिस्वपीत्यादिना संप्रसारणं। ओदितश्चेति निष्ठानत्वं। व्यत्ययेनाद्युदात्तत्वं। वृषादिर्वा द्रष्टव्यः॥

चतुर्थीमृचमाह॥

यज्ञं पृच्छाम्यवमं स तद्दूतो वि वोचति।
क्व ऋतं पूर्व्यं गतं कस्तद्बिभर्ति नूतनो वित्तं मे अस्य रोदसी॥४॥

यज्ञं। पृच्छामि। अवमं। सः। तत्। दूतः। वि। वोचति।
क्व। ऋतं। पूर्व्यं। गतं। कः। तत्। बिभर्ति। नूतनः। वित्तं। मे। अस्य। रोदसी इति ॥४॥

यज्ञं यजनीयमवमं सर्वेषां देवानामादिभूतं। अग्निर्मुखं प्रथमो देवताना-मिति श्रुतेः। अग्निर्वै देवानामवम इति ब्राह्मणाच्च। तमग्निं पृच्छामि। यन्मया पृष्टं तद्देवानां दूतः सोऽग्निर्विवोचति। विविच्य कथयतु। किं पुनस्तत्पृच्छ्यत इति तदुच्यते। हे अग्ने त्वदीयं पूर्व्यं पूर्वकालीनमृतं भद्रं स्तोतृभ्यः कृतं श्रेयः क्व गतं। कुत्रेदानीं वर्तते। नूतनो नवतरस्त्वत्तोऽन्यः कः पुरुषस्तद्भद्रं बिभर्ति। धारयति। यदि त्वय्यवर्तिष्यत ममेदृशी दशापि नाभविष्यत्। अतस्तत् क्व गतमिति कथय ॥ वोचति। वच परिभाषणे। लेट्यडागमः। वच उमिति व्यत्ययेन धातोरुमागमः। क्व। किमोऽदिति सप्तम्यर्थेऽत्। क्वातीति किमः क्वादेशः। तित्स्व-रित इति स्वरितत्वं। परेण सह ऋत्यक इति प्रकृतिभावः ॥

पंचमीमृचमाह ॥

अमी ये देवा स्थन त्रिष्वा रोचने दिवः।
कद्व ऋतं कदनृतं क्व प्रत्ना व आहुतिर्वित्तं मे अस्य रोदसी ॥५॥
अमी इति। ये। देवाः। स्थन। त्रिषु। आ। रोचने। दिवः।
कत्। वः। ऋतं। कत्। अनृतं। क्व। प्रत्ना। वः। आऽहुतिः। वित्तं। मे। अस्य। रोदसी
इति ॥५॥

हे देवाः। त्रिषु पृथिव्यादिषु स्थानेषु येऽमी यूयं स्थन। वर्तमाना भवथ। यानि स्थानानि दिवो द्योतमानस्य सूर्यस्य आ रोचने दीप्तिविषये वर्तंते। सूर्यप्रकाश्येषु स्थानेष्वित्यर्थः। तेषां वो युष्माकं संबंधि स्तोतृविषयमृतं सत्यं कत्। कस्मिन्देशे वर्तते। अनृतं द्वेष्टृविषयमसत्यं च कत् कुत्र गतं। अपि च प्रत्ना चिरकालीना वो युष्माकं संबंधिन्याहुतिर्मया पूर्वमनुष्ठितो यागः क्व कुत्रासीत्। ईदृग्भूतदुःखानुभावेन मया पूर्वमनुष्ठितो यागसमूहो युष्मान्न प्राप्नो-दित्यनुमिमे। अन्यत्पूर्ववत् ॥ स्थन। तप्तनप्तनथनाश्चेति तशब्दस्य थनादेशः। कत्। क्वशब्दस्य वर्णव्यापत्त्या कद्भावः ॥

॥ इति प्रथमस्य सप्तमे विंशो वर्गः ॥

षष्ठीमृचमाह ॥

कद्व ऋतस्य धर्णसि कद्वरुणस्य चक्षणं ।

कदर्यम्णो महस्पथाति क्रामेम दूढ्यो वित्तं मे अस्य रोदसी ॥ ६ ॥

कत् । वः । ऋतस्य । धर्णसि । कत् । वरुणस्य । चक्षणं ।

कत् । अर्यम्णः । महः । पथा । अति । क्रामेम । दुःऽध्यः । वित्तं । मे । अस्य । रोदसी इति ॥ ६ ॥

हे देवा वो युष्माकं संबंधिन ऋतस्य सत्यस्याभिमतफलप्रापणस्य धर्णसि धारणं कत् । कुत्र गतं । वरुणस्यानिष्टनिवारकस्य देवस्य चक्षणमनुग्रहदृष्ट्या दर्शनं कत् । क्व गतं । महो महतो महानुभावस्यार्यम्णोऽरीणां नियंतुरेतत्संज्ञकस्य देवस्य संबंधिना पथा शोभनमार्गेणेष्टदेशप्रापणं कत् । क्व गतं । एतत्सर्वं युष्मास्वेव वर्तते । न कुत्रापि गतं । अतो वयं दूढ्यो दुर्धियः पापबुद्धीनस्मदनिष्टाचरणपरान् शत्रूनतिक्रामेम । अतितरेम । तैः कृतादस्मात्कूपपातलक्षणाद्दुःखाद्वयमुत्तीर्णा भवेम । हे द्यावापृथिव्यौ मदीयमिदं जानीतं ॥ धर्णसि । धृञ् धारणे । सानसिधर्णसिपर्णसीत्यादिनासिच्प्रत्ययांतो निपात्यते । अर्यम्णः । षष्ठ्येकवचनेऽल्लोपोऽन इत्यकारलोपः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं । महः । महतोऽच्छब्दलोपश्छांदसः । यद्वा मह पूजायां । क्विप् । उभयथापि सावेकाच इति विभक्तेरुदात्तत्वं । दूढ्यः । पृषोदरादिः । ध्यै चेति तत्र पाठाद्दुरो रेफस्योत्वं । उत्तरपदादेः ष्टुत्वं च । उदात्तस्वरितयोर्यण इति स्वरितत्वं ॥

सप्तमीमृचमाह ॥

अहं सो अस्मि यः पुरा सुते वदामि कानि चित् ।

तं मा व्यंत्याध्यो३ वृको न तृष्णजं मृगं वित्तं मे अस्य रोदसी ॥ ७ ॥

अहं । सः । अस्मि । यः । पुरा । सुते । वदामि । कानि । चित् ।

तं । मा । व्यंति । आऽध्यः । वृकः । न । तृष्णऽजं । मृगं । वित्तं । मे । अस्य । रोदसी इति ॥ ७ ॥

हे देवाः पुरा पूर्वस्मिन्काले सुते युष्मद्यागार्थं सोमेऽभिषुते कानि चित् कतिपयानि स्तोत्राणि योऽहं वदामि । उक्तवानस्मि । स एवाहमस्मि न त्वन्यः कश्चित् । तस्मात्किमर्थं मां परित्यजथ । तं तादृशं मामाध्योऽभिलषितपुत्राद्य-

प्राप्ता जनिता मानस्यो व्यथा व्यंति। भक्षयंति। तत्र दृष्टांतः। तृष्णजं जाततृष्णं पिपासंतमुदकं प्रति गच्छंतं मृगं वृको न। यथारण्यश्वा मध्ये मार्गे गच्छंतं भक्षयति तद्वत्। अन्यत्पूर्ववत् ॥ व्यंति। वी गत्यादिषु। अदादित्वाच्छपो लुक्। तन्वादीनां छंदसि बहुलमुपसंख्यानमिति बहुलवचनाद्यण्। आध्यः। आधीयते मनसि स्थाप्यत इत्याधिः। उपसर्गे घोः किः। आतो लोप इटि चेत्याकारलोपः। जसादिषु छंदसि वावचनमिति जसि चेति गुणस्य विकल्पनादभावे यणादेशः। तृष्णजं। तृष पिपासायां। स्वपितृषोर्नजिङिति नजिङ्। पदकारस्त्वेवं मन्यते। अन्येष्वपि दृश्यत इति दृशिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात्केवलादपि जनेर्ड-प्रत्ययः। तृष्णा जाता यस्य। ङ्यापोः संज्ञाछंदसोर्बहुलमिति ह्रस्वत्वं ॥

अष्टमीमृचमाह ॥

सं मा॑ तपंत्य॒भितः॑ स॒पत्नी॑रिव॒ पर्श॑वः ।
मूषो॒ न शि॒श्ना व्य॑दंति मा॒ध्यः॑ स्तो॒तारं॑ ते शतक्रतो वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥ ८ ॥

सं। मा। तपं॑ति। अ॒भितः॑। स॒पत्नीः॑ऽइव। पर्श॑वः।
मूषः॑। न। शि॒श्ना। वि। अ॒दं॒ति॒। मा॒। आ॒ऽध्यः॑। स्तो॒तारं॑। ते॒। श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो। वि॒त्तं। मे॒। अ॒स्य। रो॒द॒सी॒ इति॑ ॥ ८ ॥

ऐंद्र्येषा। हे इंद्र पर्शवः पार्श्वास्थीनि। अत्र सामर्थ्यात्पर्शुस्थानीयाः कूप-भित्तयो मा मामभितः सर्वतः संतपंति। सम्यक् पीडयंति। तत्र दृष्टांतः। सपत्नीरिव। समान एकः पतिर्यासां ताः सपत्न्यो यथैकं पतिमभितः पीडयंति। परस्परं वा पीड्यंते। हे शतक्रतो बहुविधकर्मन् बहुविधप्रज्ञ वेंद्र ते तव स्तोतारं मामाध्योऽसंपद्यमानैर्यागदानादिभिरुत्पादिता मानस्यः पीडा व्यदंति। विविधं भक्षयंति। तत्र दृष्टांतः। मूषो न। यथा मूषिका शिश्ना शिश्नानि कुविंदेन वापितान्यन्नरसेनालिप्तानि सूत्राणि भक्षयंति। यद्वा शिश्नशब्देन प्रजननमे-वोच्यते। तच्चोपचारात्पुच्छे वर्तते। यथा स्वकीयानि पुच्छानि घृततैलादिभांडे प्रक्षिप्योर्ध्वमुत्कृष्य व्यदंति। लिहंतीत्यर्थः। एवं मामाधयो भक्षयंति। न चैतत् हे इंद्र तव स्तोतुर्न्याय्यं। तस्मात्कूपान्मामुत्तारय। अन्यत्समानं ॥ अत्र निरुक्तं। संतपंति मामभितः सपत्न्य इवेमाः पर्शवः कूपपर्शवो मूषिका इवास्नातानि सूत्राणि व्यदंति। स्वांगाभिधानं वा स्यात्। शिश्नानि व्यदंतीति। नि० ४.६.। इति।

सपत्नीः । नित्यं सपत्न्यादिषु । पा० ४.१.३५. । इति पतिशब्दस्य नकारांतादेशः । ङीप् । वा छंदसीति पूर्वसवर्णदीर्घत्वं । मूषः । मुष स्तेये । क्विपि छांदसो दीर्घः । तथा च यास्कः । मूषो मूषिका इत्यर्थो मूषिकाः पुनर्मुष्णातेर्मूषोऽप्येतस्मादेव । नि० ४.५. । इति । शिश्ना । ष्णा शौचे । घञर्थे कविधानमिति कः । स्थास्ना-गापाव्यधिहनियुध्यर्थमिति कः । वर्णव्यापत्त्या सकारस्य शकारः । कृञादीनां के द्वे भवत इति वक्तव्यं । पा० ६.१.१२.२. । इति द्विर्वचनं । बहुलं छंदसी-त्यभ्यासस्येत्वं ॥

नवमीमृचमाह ॥

अमी ये सप्त रश्मयस्तत्रा मे नाभिराततो ।
त्रितस्तद्वेदाप्त्यः स जामित्वाय रेभति वित्तं मे अस्य रोदसी ॥ ९ ॥

अमी इति । ये । सप्त । रश्मयः । तत्र । मे । नाभिः । आऽतता ।
त्रितः । तत् । वेद । आप्त्यः । सः । जामिऽत्वाय । रेभति । वित्तं । मे । अस्य । रोदसी इति ॥ ९ ॥

येऽमी द्युलोके वर्तमानाः सप्तसंख्याका रश्मयः सूर्यस्य किरणाः संति तत्र तेषु सूर्यरश्मिष्वध्यात्मं सप्तप्राणरूपेण वर्तमानेषु मे मदीया नाभि-राततो संबद्धा । ऋषिरात्मानमेव परोक्षतया निर्दिशति । त्रितस्तीर्णतमस्ति-रस्कृताज्ञान आप्त्योऽपां पुत्र ऋषिस्तत्पूर्वोक्तं वृत्तांतं वेद जानाति नान्यः । स जानन्नृषिर्जामित्वाय कूपान्निर्गंतृत्वाय रेभति । तान् रश्मीन् स्तौति । अन्यत्स-मानं ॥ आतता । तनोतेः कर्मणि निष्ठा । अनुदात्तोपदेशेत्यादिनानुनासिक-लोपः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । जामित्वाय । जमतिर्गतिकर्मा । जमति गच्छतीति जामिः । औणादिक इण्प्रत्ययः । तस्य भावस्तत्त्वं । रेभति । रेभृ शब्दे । भौवादिकः ॥

दशमीमृचमाह ॥

अमी ये पंचोक्षणो मध्ये तस्थुर्महो दिवः ।
देवत्रा नु प्रवाच्यं सध्रीचीना नि वावृतुर्वित्तं मे अस्य रोदसी ॥ १० ॥

अमी इति । ये । पंच । उक्षणः । मध्ये । तस्थुः । महः । दिवः ।
देवऽत्रा । नु । प्रऽवाच्यं । सध्रीचीनाः । नि । ववृतुः । वित्तं । मे । अस्य । रोदसी इति ॥ १० ॥

उक्षणः सेक्तारः कामाभिवर्षकाः पंच। तत्र इंद्रस्तद्वरुणस्तदग्निस्तदर्यमा तत्स-
विता चनो धादित्यद्वेचेन प्रतिपादिताः पंचसंख्याका देवाः। यद्वा। अग्निर्वायुः
सूर्यश्चंद्रमा विद्युदित्येवं पंचसंख्याकाः। तथा च शाट्यायनकं। एतान्येव पंच
ज्योतींषि यान्येषु लोकेषु दीप्यंते। अग्निः पृथिव्यां वायुरंतरिक्षे च आदित्यो दिवि
चंद्रमा नक्षत्रे विद्युदप्स्विति। नक्षत्रे नक्षत्रलोके। अप्सु मेघस्थोदकेषु। तैत्ति-
रीयेऽप्येवमाम्नातं। अग्निः पृथिव्यां वायुरंतरिक्षे च सूर्यो दिवि चंद्रमा दिक्षु नक्ष-
त्राणि स्वर्लोक इति। येऽमी पंचसंख्याका देवा महो दिवो महतो विस्तीर्णस्य
द्युलोकस्य मध्ये तस्थुः। तिष्ठंति। आसते। देवत्रा देवेषु नु क्षिप्रं प्रवाच्यं प्रशं-
सनीयं देवानां योग्यं मदीयं स्तोत्रं प्रति सध्रीचीनाः सहांचंतो युगपदागच्छंतस्ते
देवा मदीयं परिचरणं स्वीकुर्वंति। तदनंतरं निवावृतुः। तृप्ताः संतो निवर्तंते च।
अन्यत्समानं ॥ उक्षणः। वा षपूर्वस्य निगम इत्युपधादीर्घाभावः। देवत्रा। देवम-
नुष्येत्यादिना सप्तम्यर्थे त्राप्रत्ययः। प्रवाच्यं। वाचयतेरचो यदिति यत्। णेरनि-
टीति णिलोपः। यतोऽनाव इत्याद्युदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वं। सध्रीचीनाः।
सहांचंतीति सध्र्यंचः। त एव सध्रीचीनाः। सहपूर्वादंचतेर्ऋत्विगित्यादिना क्विन्।
अनिदितामिति नलोपः। सहस्य सध्रिरिति सध्र्यादेशः। विभाषांचेरदिक्स्त्रि-
यामिति स्वार्थे खप्रत्ययः। वावृतुः। वृतु वर्तने। छंदसि लुङ्लङ्लिट इति
वर्तमाने लिट्। व्यत्ययेन परस्मैपदं। अन्येषामपि दृश्यत इति संहितायां-
मभ्यासस्य दीर्घत्वं ॥

॥ इति प्रथमस्य सप्तम एकविंशो वर्गः ॥

एकादशीमृचमाह ॥

सुपर्णा एत आसते मध्य आरोधने दिवः।
ते सेधंति पथो वृकं तरंतं यह्वतीरपो वित्तं मे अस्य रोदसी ॥ ११ ॥
सुऽपर्णाः। एते। आसते। मध्ये। आऽरोधने। दिवः।
ते। सेधंति। पथः। वृकं। तरंतं। यह्वतीः। अपः। वित्तं। मे। अस्य। रोदसी इति ॥ ११ ॥

सुपर्णाः। रश्मिनामैतत्। शोभनपतना एते सूर्यरश्मय आरोधने सर्वस्या-
वरके व्याप्ते दिवोऽतरिक्षस्य मध्य आसते। वर्तंते। ते सूर्यरश्मयः पथो मार्गाद्वृ-
कमरण्यश्वानं सेधंति। निषेधंति निवारयंति। कीदृशं। यह्वतीर्महतीरपस्तरंतं।

अतिक्रामंतं। कूपपतनात्पूर्वं चितं दृष्ट्वैनं भक्षयितुं कश्चिदरण्यश्वा महतीं नदीं तितीर्षुराजगाम। स च सूर्यरश्मीन्दृष्ट्वायमवसरो न भवतीति निववृते। अतो रश्मयो वृकं निषेधंतीत्युच्यते। यास्कपक्षे त्वाप इत्यंतरिक्षनाम। यह्वतीरपो महदंतरिक्षं। पथः पथा द्वादशरश्म्यात्मना मार्गेण तरंतं वृकं चंद्रमसं सूर्यरश्मयो निषेधंति। अहनि हि सूर्यरश्मिभिर्निरुद्धश्चंद्रमा निःप्रभो दृश्यते। अतो निःप्रभं कुर्वंतीत्यर्थः॥ आरोधने। आरुध्यत आव्रियतेऽनेनेत्यारोधनं। करणे ल्युट्। सेधंति। षिधु गत्यां। अयं केवलोऽपि निपूर्वार्थे द्रष्टव्यः। पथः। पंचम्येकवचने भस्य टेर्लोप इति टिलोपः। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। यास्कपक्षे तु तृतीयार्थे व्यत्ययेन पंचमी। यह्वतीः। यह्व इति महन्नाम। अस्मादाचारार्थे सर्वप्रातिपदिकेभ्य इति क्विप्। ततो लटः शतृ। उगितश्चेति ङीप्। आगमानुशासनस्यानित्यत्वान्नुमभावः। शतुरनुम इति नदीस्वरो व्यत्ययेन न प्रवर्तते॥

द्वादशीमृचमाह॥

नव्यं तदुक्थ्यं हितं देवासः सुप्रवाचनं।
ऋतमर्षंति सिंधवः सत्यं तातान सूर्यो वित्तं मे अस्य रोदसी॥ १२॥
नव्यं। तत्। उक्थ्यं। हितं। देवासः। सुऽप्रवाचनं।
ऋतं। अर्षंति। सिंधवः। सत्यं। ततान। सूर्यः। वित्तं। मे। अस्य। रोदसी इति॥ १२॥

हे देवासो देवाः। नव्यं नवतरमुक्थ्यं प्रशस्यं स्तुत्यर्हं सुप्रवाचनं सुष्ठु ऋत्विग्भिर्वाचयितुं शक्यं। एवंभूतं तद्भवदीयं बलं हितं। युष्मासु निहितं। अतो युष्मदीयेन बलेन सिंधवः स्यंदनशीला नद्य ऋतमुदकमर्षंति। आलस्यराहित्येन सर्वदा प्रेरयंति। अशोष्याः सत्यः प्रवहंतीत्यर्थः। तथा सूर्यः सत्यं सर्वदा विद्यमानं स्वकीयं तेजस्ततान। आतनोति विस्तारयति। अन्यत्समानं॥ सुप्रवाचनं। वच परिभाषणे। अस्माण्ण्यंतादन्येभ्योऽपि दृश्यत इति खलर्थे युच्। अर्षंति। अर्तेर्लेटि सिब्बहुलं लेटीति सिप्। गुणः। तातान। अन्येषामपि दृश्यत इति संहितायामभ्यासस्य दीर्घत्वं॥

त्रयोदशीमृचमाह॥

अग्ने तव त्यदुक्थ्यं देवेष्वस्त्याप्यं।
स नः सत्तो मनुष्वदा देवान्यक्षि विदुष्टरो वित्तं मे अस्य रोदसी॥ १३॥

अग्ने । तव । त्यत् । उक्थ्यं । देवेषु । अस्ति । आप्यं ।
सः । नः । सत्तः । मनुष्वत् । आ । देवान् । यक्षि । विदुःऽतरः । वित्तं । मे । अस्य ।
रोदसी इति ॥ १३ ॥

हे अग्ने तवोक्थ्यं प्रशस्यं त्यत् स्तुतिप्रसिद्धमाप्यं । आपिर्बंधुः । तस्य भावः । बांधवं देवेषु दानादिगुणयुक्तेष्विंद्रादिष्वस्ति । विद्यते । तस्मात्स तादृशो विदुष्टरो विद्वत्तरस्त्वं नोऽस्माकं यज्ञे सत्तो निषण्णः सन्देवांस्तानिंद्रादीन् आ शास्त्रमर्यादया यक्षि । यज । हविर्भिः पूजय । तत्र दृष्टांतः । मनुष्वत् । यथा मनूनां यज्ञे तद्वत् । अन्यत्पूर्ववत् ॥ आप्यं । आप्लृ व्याप्तौ । अस्माण्ण्यंताद्च इरितीप्रत्ययः । ब्राह्मणादित्वात् ष्यञ् । सत्तः । नसत्तनिषत्तेति निपातनान्निष्ठानत्वाभावः । छांदसो निशब्दलोपो द्रष्टव्यः । मनुष्वत् । मनेरौणादिक उसिप्रत्ययः । तत्र तस्येवेति षष्ठ्यर्थे वतिः । नभोऽङ्गिरोमनुषां वत्युपसंख्यानं । पा० १.४.१८.२. । इति भत्वेन पदत्वाभावाद्रुत्वाद्यभावः । यक्षि । बहुलं छंदसीति शपो लुक् । व्रश्चादिषत्वे कुत्वं । विदुष्टरः । विद्वस्शब्दात्तरप्ययस्मयादित्वेन भत्वाद्वसोः संप्रसारणमिति संप्रसारणं । शासिवसिघसीनां चेति षत्वं ॥

चतुर्दशीमृचमाह ॥

सत्तो होता मनुष्वदा देवाँ अच्छा विदुष्टरः ।
अग्निर्हव्या सुषूदति देवो देवेषु मेधिरो वित्तं मे अस्य रोदसी ॥ १४ ॥
सत्तः । होता । मनुष्वत् । आ । देवान् । अच्छ । विदुःऽतरः ।
अग्निः । हव्या । सुसूदति । देवः । देवेषु । मेधिरः । वित्तं । मे । अस्य । रोदसी इति ॥ १४ ॥

मनुष्वत् मनोरिवास्माकं यज्ञे सत्तो निषण्णो होता देवानामाह्वाता विदुष्टरो विद्वत्तरो देवो दानादिगुणयुक्तो देवेषु सर्वेष्विंद्रादिषु मध्ये मेधिरो मेधावी । एवंभूतोऽग्निस्तान्देवानच्छाभिमुख्येन हव्या हव्यान्यस्मदीयानि हवींषि । मर्यादायामाकारः । शास्त्रमर्यादया यथाशास्त्रं सुषूदति । प्रेरयतु । अन्यत्समानं ॥ सुषूदति । षूद क्षरणे । लेट्यडागमः । बहुलं छंदसीति शपः श्लुः । मेधिरः । मेधारथाभ्यामिरन्निरचौ वक्तव्याविति मत्वर्थीय इरन् ॥

पंचदशीमृचमाह ॥

ब्रह्मा कृणोति वरुणो गातुविदं तमीमहे ।

व्यूर्णोति हृदा मतिं नव्यो जायतामृतं वित्तं मे अस्य रोदसी ॥ १५ ॥

ब्रह्म । कृणोति । वरुणः । गातुऽविदं । तं । ईमहे ।

वि । ऊर्णोति । हृदा । मतिं । नव्यः । जायतां । ऋतं । वित्तं । मे । अस्य । रोदसी इति ॥ १५ ॥

यो वरुणोऽनिष्टस्य निवारयिता देवो ब्रह्म परिवृढं तद्रक्षणरूपं कर्म कृणोति करोति । तं तादृशं गातुविदं गातोर्मार्गस्य दुःखनिवारकस्य लंभयितारं वरुणमीमहे । अभिमतफलं याचामहे । ईमह इति याञ्चाकर्मा । तस्मै वरुणायायमस्मदीयः स्तोता हृदा हृदयेन मतिं मननीयां स्तुतिं व्यूर्णोति । विवृणोति प्रकाशयति । उच्चारयतीत्यर्थः । सोऽयं नव्यः स्तुत्यो वरुणोऽस्माकमृतं जायतां । सत्यभूतोऽस्तु ॥ ब्रह्मा । अन्येषामपि दृश्यत इति सांहितिको दीर्घः । गातुविदं । विद्लृ लाभे । अंतर्भावितण्यर्थात्क्विप् । ईमहे । ईङ् गतौ । बहुलं छंदसीति विकरणस्य लुक् । हृदा । पद्दन्नित्यादिना हृदयशब्दस्य हृदादेशः ॥

॥ इति प्रथमस्य सप्तमे द्वाविंशो वर्गः ॥

षोडशीमृचमाह ॥

असौ यः पंथा आदित्यो दिवि प्रवाच्यं कृतः ।

न स देवा अतिक्रमे तं मर्तासो न पश्यथ वित्तं मे अस्य रोदसी ॥ १६ ॥

असौ । यः । पंथाः । आदित्यः । दिवि । प्रऽवाच्यं । कृतः ।

न । सः । देवाः । अतिऽक्रमे । तं । मर्तासः । न । पश्यथ । वित्तं । मे । अस्य । रोदसी इति ॥ १६ ॥

पंथाः सततगामी । यद्वा ब्रह्मलोकं गच्छतामुपासकानां मार्गभूतः । सूर्यद्वारेण ते विरजाः प्रयांतीति श्रुतेः । एवंभूतो योऽसावादित्यो दिवि द्युलोके प्रवाच्यं प्रकर्षेण वचनं यथा भवति तथा कृतो निर्मितः । यथा सर्वैः प्राणिभिर्दृश्यते तथा वर्तमान इत्यर्थः । हे देवाः सोऽयमादित्यो युष्माभिरपि नातिक्रमे । अतिक्रमितुं न शक्यः । युष्मज्जीवनस्य तदायतत्वात् । सति हि सूर्ये

वसंतादयः काला निष्पद्यंते। कालेषु च यागाः क्रियंते। यागेषु च सत्सु भवतां जीवनं। अतो युष्माभिरपि नासावतिक्रमितव्यः। एवं च सति हे मर्तासः पापकृतो मनुष्याः। तं महानुभावं सूर्यं न पश्यथ। सूर्यं न जानीथः। एतच्च कूपे पातयित्वा निर्गतावेकतद्वितौ प्रति निंदनं। अहमेव मंत्रद्रष्टा तं सूर्यं जानामि। पापकृतौ युवां न जानीथ इति॥ पंथाः। पत्लृ गतौ। पतेस्थ चेतीनिप्रत्ययः। पथिमथ्यृभुक्षामादित्यात्वं। इतोऽत्सर्वनामस्थाने। पा० ७.१.८६.। इत्यत्वं। इकारस्य लोपः। पथिमथोः सर्वनामस्थान इत्याद्युदात्तत्वं। प्रवाच्यं। वक्तेर्ण्यंतादचो यदिति भावे यत्। यतोऽनाव इत्याद्युदात्तत्वं। अतिक्रमे। क्रमु पादविक्षेपे। कृत्यार्थे तवैकेनिति केन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं॥

सप्तदशीमृचमाह॥

त्रितः कूपेऽवहितो देवान्हवत ऊतये।
तच्छुश्राव बृहस्पतिः कृण्वन्नंहूरणादुरु वित्तं मे अस्य रोदसी॥१७॥

त्रितः। कूपे। अवऽहितः। देवान्। हवते। ऊतये।
तत्। शुश्राव। बृहस्पतिः। कृण्वन्। अंहूरणात्। उरु। वित्तं। मे। अस्य। रोदसी इति॥१७॥

कूपेऽवहितः पातितस्त्रित एतत्संज्ञ ऋषिरूतये रक्षणाय देवान्हवते। स्तुतिभिराकारयति। यदेतत्त्रितस्याह्वानं बृहस्पतिर्बृहतां महतां देवानां रक्षक एतत्संज्ञो देवस्तदाह्वानं शुश्राव। श्रुतवान्। किं कुर्वन्। अंहूरणादंहसः पापरूपादस्मात्कूपपातादुन्नीयोरु विस्तीर्णं शोभनं कृण्वन् कुर्वन्॥ हवते। ह्वयतेर्लटि बहुलं छंदसीति संप्रसारणं। शब्गुणावादेशाः। ऊतये। ऊतीयूतीत्यादिना क्तिन उदात्तत्वं। बृहस्पतिः। तद्बृहतोः करपत्योरिति पारस्करादिषु पाठात् सुट्तलोपौ। उभे वनस्पत्यादिष्विति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं। अंहूरणात्। अहि गतौ। इदित्त्वान्नुम्। खर्जिपिंज्यादिभ्य ऊरोलचौ। उ० ४.९१.। इति भाव ऊरप्रत्ययः। दुःखप्राप्तिहेतुभावा गतिरस्यास्तीति पामादिलक्षणो मत्वर्थीयो नः। पा० ५.२.१००.। आङ्पूर्वाद्धंतेर्वा रूपमुन्नेयं॥

अष्टादशीमृचमाह ॥

अरुणो मा सकृद्वृकः पथा यंतं ददर्श हि ।
उज्जिहीते निचाय्या तष्टेव पृष्ट्यामयी वित्तं मे अस्य रोदसी ॥१८॥

अरुणः । मा । सकृत् । वृकः । पथा । यंतं । ददर्श । हि ।
उत् । जिहीते । निऽचाय्य । तष्टाऽइव । पृष्टिऽआमयी । वित्तं । मे । अस्य । रोदसी
इति ॥१८॥

अरुणवर्णो लोहितवर्णो वृकोऽरण्यश्वा सकृदेकवारं पथा यंतं मार्गेण गच्छंतं मा मां ददर्श हि । दृष्टवान् । हि पादपूरणं । निचाय्य दृष्ट्वा च मां जिघृक्षुः सन् उज्जिहीते । उद्गच्छति स्म । तत्र दृष्टांतः । तष्टेव पृष्ट्यामयी । यथा तक्षणजनितपृष्ठक्लेशस्तष्टा वर्धकिस्तदपनोदनायोर्ध्वाभिमुखो भवति तद्वत् । हे द्यावापृथिव्यौ मदीयमिदं दुःखं वित्तं । जानीतं । यद्वा । वृक इति विवृतज्योतिष्कश्चंद्रमा उच्यते । अरुण आरोचमानः कृत्स्नस्य जगतः प्रकाशकः । मासकृत् मासार्द्धमासर्त्वयनसंवत्सरादीन्कालविशेषान्कुर्वन् । तिथिविभागज्ञानस्य चंद्रगत्यधीनत्वात् । स चंद्रमा आकाशमार्गे यंतं गच्छंतं नक्षत्रगणं ददर्श । हिरवधारणे । नक्षत्रगणमेव ददर्श न कूपपतितं मामित्यनादरो द्योत्यते । यदि मां पश्येत् उद्धरेत्कूपात् । निचाय्य नक्षत्रगणं दृष्ट्वा चोज्जिहीते । येन नक्षत्रेण संयुज्यते तेन सहोद्गच्छति । न मामभिगच्छतीत्यर्थः । अन्यत्पूर्ववत् ॥ अत्र मासकृदिति यास्क एकं पदं मन्यते शाकल्यस्तु पदद्वयं । तस्मिन्पक्षेऽयमर्थः । दक्षप्रजापतेर्दुहितृभूताः स्वभार्या अश्विन्याद्यास्तारकाः पुनःपुनर्ददर्श । मां सकृदेव पश्यतीति सकृद्दृष्ट्वा चोज्जिहीते । ताराभिः सहोर्ध्वमेव गच्छति । न मां कूपादुत्तारयति । अत इदमनुचितं । हे द्यावापृथिव्यौ मदीयमिमं वृत्तांतं जानीतं ॥ अत्र निरुक्तं । वृकश्चंद्रमा भवति विवृतज्योतिष्को वा विकृतज्योतिष्को वा विक्रांतज्योतिष्को वा । अरुण आरोचनो मासकृन्मासानां चार्द्धमासानां च कर्ता भवति चंद्रमा वृकः पथा यंतं ददर्श नक्षत्रगणमभिजिहीते निचाय्य येन येन योक्ष्यमाणो भवति चंद्रमास्तक्ष्णुवन्निव पृष्ठरोगी । नि॰ ५.२०. । इति ॥ सकृत् । एकस्य सकृच्च । पा॰ ५.४.१९. । इति क्रियाभ्यावृत्तिगणने निपातितः । वृकः । वृञ् वरणे । सृवृभूशुषिमुषिभ्यः किदिति कप्रत्ययः । जिहीते । ओहाङ् गतौ । जौहोत्यादिकः । भृञामिदित्यभ्यासस्येत्वं । निचाय्या । चायृ पूजानिशामनयोः । अत्र दर्शनार्थो धातूनामनेकार्थ-

त्वात्। समासेऽनञ्पूर्वे क्त्वो ल्यप्। पृष्ट्यामयी। स्पृश स्पर्शने। स्पृश्यतेऽनेनेति स्पृष्टिः। छांदसो वर्णलोपः। पृष्टावामयः पृष्ट्यामयः। तद्वान् पृष्ट्यामयी ॥

एकोनविंशीमृचमाह ॥

एनांगूषेण वयमिंद्रवंतोऽभि ष्याम वृजने सर्ववीराः।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ १९ ॥
एना। आंगूषेण। वयं। इंद्रऽवंतः। अभि। स्याम। वृजने। सर्वऽवीराः।
तत्। नः। मित्रः। वरुणः। ममहंतां। अदितिः। सिंधुः। पृथिवी। उत। द्यौः ॥ १९ ॥

एनानेनांगूषेणाघोषणयोग्येन स्तोत्रेण हेतुभूतेनेंद्रवंतोऽनुग्राहकेणेंद्रेण युक्ताः सर्ववीराः सर्वैर्वीरैः पुत्रैः पौत्रादिभिश्चोपेताः संतो वयं वृजने संग्रामेऽभिष्याम। शत्रूनभिभवेम। तदिदमस्मदीयं वचनं मित्रादयो मामहंतां। पूजयंतु। पालयंत्वित्यर्थः। उतशब्दो देवतासमुच्चये। अत्र यास्कः। आंगूष स्तोम आघोषः। अनेन स्तोमेन वयमिंद्रवंतः। नि० ५.११.। इति ॥ एना। द्वितीयाटौःस्वेन इति तृतीयायामिदम एनादेशः। सुपां सुलुगिति विभक्तेराजादेशः। चित्स्वरेणांतोदात्तत्वं। आंगूषेण। आङ्पूर्वाद्घुषेः कर्मणि घञ्। आङो ङकारलोपाभावश्छांदसः। घोषशब्दस्य गूषभावश्च पृषोदरादित्वात्। थाथादिनोत्तरपदांतोदात्तत्वं। स्याम। अस्तेः प्रार्थनायां लिङि श्नसोरल्लोप इत्यकारलोपः। उपसर्गप्रादुर्भ्यामस्तिर्यच्पर इति षत्वं ॥

॥ इति प्रथमस्य सप्तमे त्रयोविंशो वर्गः ॥
॥ इति प्रथमे मंडले पंचदशोऽनुवाकः ॥

षोडशेऽनुवाके सप्तदश सूक्तानि। तत्रेंद्रमिति सप्तर्चं प्रथमं सूक्तं। अत्रानुक्रम्यते। इंद्रं मित्रं सप्त त्रिष्टुबंतमिति। अनुवर्तमानत्वात्कुत्स ऋषिः। त्रितस्तु वाविशिष्टत्वात्तत्रैव विकल्पितो नानुवर्तते। अंत्या त्रिष्टुप्। शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः। विश्वे देवा देवतेत्युक्तं। विनियोगो लैंगिकः ॥

तत्र प्रथमामृचमाह ॥

इंद्रं मित्रं वरुणमग्निमूतये मारुतं शर्धो अदितिं हवामहे।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ १ ॥

इंद्रं। मित्रं। वरुणं। अग्निं। ऊतये। मारुतं। शर्धः। अदितिं। हवामहे।
रथं। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्। नः। अंहसः। निः। पिपर्तन ॥१॥

ऊतये रक्षणाय वयमिंद्रादीन्मारुतं शर्धो मरुत्समूहरूपं बलं च हवामहे। आह्वयामहे। वसवो निवासयितारः सुदानवः शोभनदाना इंद्रादयो विश्वस्मात्सर्वस्मादंहसः पापान्नोऽस्मान्निष्पिपर्तन। निर्गमय्य पालयत। तत्र दृष्टांतः। रथं न दुर्गात्। गंतुमशक्यान्निम्नोन्नतात्स्थानात्सारथयो यथा रथं पालयंति। तद्वत् ॥ पिपर्तन। पॄ इत्येके। लोटि तप्तनप्तनथनाश्चेति तस्य तनबादेशः। पित्त्वेन ङित्त्वाभावाद्गुणः। अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं ॥

द्वितीयामृचमाह ॥

त आदित्या आ गता सर्वतातये भूत देवा वृत्रतूर्येषु शंभुवः।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥२॥

ते। आदित्याः। आ। गत। सर्वऽतातये। भूत। देवाः। वृत्रऽतूर्येषु। शंऽभुवः।
रथं। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्। नः। अंहसः। निः। पिपर्तन ॥२॥

हे आदित्या अदितेः पुत्रा देवाः। ते यूयं सर्वतातये सर्वैर्वीरपुरुषैस्तताय विस्तारिताय युद्धाय। युद्धेऽस्माकं साहाय्यं कर्तुमित्यर्थः। आगत। आगच्छत। अपि च वृत्रतूर्येषु। संग्रामनामैतत्। संग्रामेषु शंभुवः सुखस्य भावयितारो भूत। भवत ॥ गता। गमेर्लोटि बहुलं छंदसीति शपो लुक् ॥

तृतीयामृचमाह ॥

अवंतु नः पितरः सुप्रवाचना उत देवी देवपुत्रे ऋतावृधा।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥३॥

अवंतु। नः। पितरः। सुऽप्रवाचनाः। उत। देवी इति। देवपुत्रे इति देवऽपुत्रे। ऋतऽवृधा।
रथं। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्। नः। अंहसः। निः। पिपर्तन ॥३॥

नोऽस्मान्पितरोऽग्निष्वात्तादयोऽवंतु। रक्षंतु। कीदृशाः। सुप्रवाचनाः। सुखेन प्रवक्तुं स्तोतुं शक्याः। उत अपि च देवपुत्रे देवाः सर्वे पुत्रस्थानीया ययोस्ते

ऋतावृधा ऋतस्य सत्यस्य वा यज्ञस्य वा वर्धयित्र्यौ देवी देवनादिगुणयुक्ते द्यावापृथिव्यावस्मान्रक्षतां। अन्यत्समानं॥ देवी। वा छंदसीति पूर्वसवर्णदीर्घत्वं। ऋतावृधा। वृधेरंतर्भावितण्यर्थात् क्विप्। सुपां सुलुगिति विभक्तेराकारः॥

चतुर्थीमृचमाह॥

नराशंसं वाजिनं वाजयन्निह क्षयद्वीरं पूषणं सुम्नैरीमहे।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन॥४॥
नराशंसं। वाजिनं। वाजयन्। इह। क्षयत्ऽवीरं। पूषणं। सुम्नैः। ईमहे।
रथं। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्। नः। अंहसः। निः। पिपर्तन॥४॥

नराशंसं नरैः शंसनीयं वाजिनमन्नवंतमग्निं वाजयन् उपक्षयन् प्रज्वलयन्निहास्मिन्काले स्तौमीति शेषः। तथा क्षयद्वीरमतिबलिनं। यस्मिन्सर्वे वीराः क्षीयंते। एवंरूपं पूषणं पोषकं देवं सुम्नैः सुखकरैः स्तोत्रैर्हेतुभूतैरीमहे। याचामहे। अभीष्टं प्रार्थयामहे॥ नराशंसं। उभे वनस्पत्यादिष्विति युगपदुभयपदप्रकृतिस्वरत्वं। नरशब्द ऋदोरबित्यबंत आद्युदात्तः। निपातनाद्दीर्घः। शंसशब्दो घञंत आद्युदात्तः। वाजयन्। वज व्रज गतौ। अस्माण्णिच्। क्षयद्वीरं। क्षि क्षये। लटः शतृ। शपि प्राप्ते व्यत्ययेन शः। तस्य छंदस्युभयथेत्यार्धधातुकत्वेन ङित्त्वाभावाद्गुणावादेशौ। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः। अतो गुण इति पररूपत्व एकादेश उदात्तेनेत्येकादेश उदात्तः। क्षयंतो वीरा यस्मिन्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥

पंचमीमृचमाह॥

बृहस्पते सदमिन्नः सुगं कृधि शं योर्यत्ते मनुर्हितं तदीमहे।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन॥५॥
बृहस्पते। सदं। इत्। नः। सुऽगं। कृधि। शं। योः। यत्। ते। मनुःऽहितं। तत्। ईमहे।
रथं। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्। नः। अंहसः। निः। पिपर्तन॥५॥

बृहस्पते सदमित् सदैवा नोऽस्माकं सुगं। सुखनामैतत्। सुखं कृधि। कुरु। अपि च ते तव स्वभूतं शं शमनीयानां रोगाणामुपशमनं योः पृथक्कर्तव्यानां भयानां यावनं पृथक्करणं मनुर्हितं मनुना ब्रह्मणा हितं त्वय्यवस्थापितं। यद्वा

मनुष्याणामनुकूलं। एवंविधं शमनं यावनं च यदस्ति तदीमहे। याचामहे॥ सुगं। सुष्ठु गम्यतेऽस्मिन्निति सुगं। सुदुरोरधिकरण इति गमेर्डः। शं योरित्येतत्पदद्वयं यास्केनैव व्याख्यातं। शमनं च रोगाणां यावनं च भयानामिति। मनुर्हितं। मनेरौणादिक उसिन्प्रत्ययः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं॥

षष्ठीमृचमाह॥

इंद्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाळ्ह ऋषिरह्वदूतये।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन॥ ६॥

इंद्रं। कुत्सः। वृत्रऽहनं। शचीऽपतिं। काटे। निऽबाळ्हः। ऋषिः। अह्वत्। ऊतये।
रथं। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्। नः। अंहसः। निः। पिपर्तन॥ ६॥

काट इति कूपनाम। तस्मिन्निबाळ्हो निपातितः कुत्स ऋषिरूतये रक्षणायेंद्रमह्वत्। आह्वयति स्म। कीदृशं। वृत्रहणं। वृत्राणां शत्रूणां हंतारं। शचीपतिं। शचीति कर्मनाम। सर्वेषां कर्मणां पालयितारं। यद्वा शच्या देव्या भर्तारं॥ शचीपतिं। वनस्पत्यादिषु पाठादुभयपदप्रकृतिस्वरत्वं। शचीशब्दः शार्ङ्गरवादिङीनंत आद्युदात्तः। निबाळ्हः। बाहृ प्रयत्ने। नीत्युपसर्गवशात्पतने वर्तते। निष्ठायामनित्यमागमशासनमितीडभावः। ढत्वधत्वादीनि। यद्वा क्षुब्धस्वांतेत्यादौ। पा० ७. २. १८.। भृशार्थ इडभावो निपात्यते। अत्र च वाढशब्दो भृशत्वोपेते पतने सामर्थ्याद्वर्तते। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। अह्वत्। लिपिसिचिह्वश्चेति लुङि च्लेरङादेशः। आतो लोप इटि चेत्याकारलोपः॥

सप्तमीमृचमाह॥

देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन्।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः॥ ७॥

देवैः। नः। देवी। अदितिः। नि। पातु। देवः। त्राता। त्रायतां। अप्रऽयुच्छन्।
तत्। नः। मित्रः। वरुणः। ममहंतां। अदितिः। सिंधुः। पृथिवी। उत। द्यौः॥ ७॥

देवी दानादिगुणयुक्तादितिरखंडनीयादीना वा देवमाता देवैर्दानादिगुणयुक्तैः स्वकीयैः पुत्रैः सह नोऽस्मान्निपातु। नितरां रक्षतु। देवो दीप्यमानस्त्राता

सर्वेषां रक्षकः सविताप्रयुच्छन् अप्रमाद्यन् अस्मद्रक्षणे जागरूकः सन् त्रायतां। अस्मान्पालयतु। यदनेन सूक्तेनास्माभिः प्रार्थितं नोऽस्मदीयं तन्मित्रादयः षट् देवता मामहंतां। पूजयंतु ॥ त्रायतां। त्रैङ् पालने। भौवादिकः। अप्रयुच्छन्। युच्छ प्रमादे। अस्माल्लटः शतृ। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य सप्तमे चतुर्विंशो वर्गः ॥

यज्ञो देवानामिति तृचं द्वितीयं सूक्तं कुत्सस्यार्षं त्रैष्टुभं वैश्वदेवं। यज्ञस्तृचमित्यनुक्रांतं। विनियोगो लैंगिकः ॥

तत्र प्रथमामृचमाह ॥

यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयंतः।

आ वोऽर्वाची सुमतिर्ववृत्यादंहोश्चिद्या वरिवोवित्तरासत् ॥ १ ॥

यज्ञः। देवानां। प्रति। एति। सुम्नं। आदित्यासः। भवत। मृळयंतः।

आ। वः। अर्वाची। सुऽमतिः। ववृत्यात्। अंहोः। चित्। या। वरिवोवित्ऽतरा। असत् ॥ १ ॥

अस्मदीयो यज्ञो देवानामिंद्रादीनां सुम्नं सुखं प्रत्येति। प्राप्नोतु। अपि च हे आदित्यास आदित्या मृळयंतोऽस्मान्सुखयंतो भवत। तथा वो युष्माकं सुमतिः शोभना मतिर्भक्तानुग्रहपरा बुद्धिरर्वाच्यस्मदभिमुख्याववृत्यात्। आवर्ततां। या मतिरंहोश्चित् दारिद्र्यं प्राप्तस्यापि पुरुषस्य वरिवोवित्तरा। वरिव इति धननाम। अतिशयेन धनस्य लंभयित्र्यसत्। भवेत्। सैषा मतिरस्मान्रक्षितुं वर्ततामित्यर्थः ॥ भवता। आमंत्रितं पूर्वमविद्यमानवदित्यादित्यास इति पादादौ वर्तमानस्यामंत्रितस्याविद्यमानवत्त्वेनास्य पादादित्वात् अपादादाविति पर्युदासान्निघाताभावः। मृळयंतः। मृड सुखने। ण्यंताल्लटः शतृ। छंदस्युभयथेति शतुरार्धधातुकत्वेनादुपदेशाल्लसार्वधातुकानुदात्तत्वाभावे शतुः स्वरः शिष्यते। ववृत्यात्। वृतु वर्तने। लिङि व्यत्ययेन परस्मैपदं। बहुलं छंदसीति शपः श्लुः। अंहोः। अहि गतौ। इदित्त्वान्नुम्। औणादिक उप्रत्ययः। वरिवोवित्तरा। विद्लृ लाभे। अस्मादंतर्भावितण्यर्थात् क्विप्। तत आतिशायनिकस्तरप्। असत्। असु भुवि। लेट्यडागमः ॥

द्वितीयामृचमाह ॥

उप नो देवा अवसा गमंत्वंगिरसां सामभि स्तूयमानाः ।
इंद्र इंद्रियैर्मरुतो मरुद्भिरादित्यैर्नो अदितिः शर्म यंसत् ॥ २ ॥

उप । नः । देवाः । अवसा । आ । गमंतु । अंगिरसां । सामऽभिः । स्तूयमानाः ।
इंद्रः । इंद्रियैः । मरुतः । मरुत्ऽभिः । आदित्यैः । नः । अदितिः । शर्म । यंसत् ॥ २ ॥

देवा दानादिगुणयुक्ताः सर्वे देवा अवसा रक्षणेनास्मभ्यं दातव्येनान्नेन वा युक्ता नोऽस्मान् स्तोतृनुपगमंतु । उपगच्छंतु प्राप्नुवंतु । कथंभूताः । अंगिरसामेतत्संज्ञकानामृषीणां संबंधिभिः सामभिः प्रगीतैर्मंत्रैः स्तूयमानाः । अपि च । इंद्र इंद्रियैः । धननामैतत् । स्वसंबंधिभिरस्मभ्यं दातव्यैर्धनैः सहास्मानागच्छतु । तथा मरुतः सप्तगणरूपा एकोनपंचाशत्संख्याका ईदृङ् चान्यादृङ् चेत्येवमादिनामानो देवा मरुद्भिः स्वावयवभूतैः प्राणापानादिरूपेण वर्तमानैर्वायुभिः सहास्मानागच्छंतु । तथादितिरखंडनीयादीना वा देवमातादित्यैः स्वकीयैः पुत्रैः सह नोऽस्मभ्यं शर्म सुखं यंसत् । यच्छतु ॥ गमंतु । लोटि बहुलं छंदसीति शपो लुक् । छंदस्युभयथेति ङेरार्धधातुकत्वेन ङित्त्वाभावाद्गमहनेत्यादिनोपधालोपाभावः । यंसत् । यम उपरमे । लेट्यडागमः । सिब्बहुलं लेटीति सिप् ॥

तृतीयामृचमाह ॥

तन्न इंद्रस्तद्वरुणस्तदग्निस्तदर्यमा तत्सविता चनो धात् ।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ ३ ॥

तत् । नः । इंद्रः । तत् । वरुणः । तत् । अग्निः । तत् । अर्यमा । तत् । सविता । चनः । धात् ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ ३ ॥

यदस्माभिः प्रार्थ्यमानमन्नमस्ति । चन इत्यन्ननाम । तत्तादृशं चनोऽन्नं नोऽस्मभ्यमिंद्रो धात् । दधातु । ददातु । एवं तद्वरुण इत्यादावपि योज्यं । तदिदमिंद्रादिभिर्दत्तमस्मदीयमन्नं मित्रादयो मामहंतां । पूजयंतु पालयंत्वित्यर्थः ॥ चनः । चायृ पूजानिशामनयोः । चायतेरन्ने ह्रस्वश्चेत्यसुन् नुडागमश्च धातोर्ह्रस्वत्वं च । वलि लोपः । नित्त्वादाद्युदात्तत्वं । धात् । छंदसि लुङ्लङ्लिट इति प्रार्थनायां लुङ् । गातिस्थेति सिचो लुक् ॥

॥ इति प्रथमस्य सप्तमे पंचविंशो वर्गः ॥

य इंद्राग्नी इति त्रयोदशर्चं तृतीयं सूक्तं कुत्सस्यार्षं त्रैष्टुभमैंद्राग्नं। तथा चानुक्रांतं। य इंद्राग्नी सप्तोनैंद्राग्नं त्विति। विनियोगो लैंगिकः ॥

तत्र प्रथमामृचमाह ॥

य इंद्राग्नी चित्रतमो रथो वामभि विश्वानि भुवनानि चष्टे।
तेना यातं सरथं तस्थिवांसाथा सोमस्य पिबतं सुतस्य ॥ १ ॥
यः। इंद्राग्नी इति। चित्रऽतमः। रथः। वां। अभि। विश्वानि। भुवनानि। चष्टे।
तेन। आ। यातं। सऽरथं। तस्थिऽवांसा। अथ। सोमस्य। पिबतं। सुतस्य ॥ १ ॥

हे इंद्राग्नी चित्रतमोऽतिशयेन चायनीयो वां युवयोः संबंधी यो रथो विश्वानि भुवनानि भूतजातान्यभिचष्टे। आभिमुख्येन पश्यति। सुवर्णमयत्वात् रत्नखचितत्वाच्च स्वप्रभाभिः कृत्स्नं जगद्भासयतीत्यर्थः। तेन रथेनायातं। अस्मद्यज्ञमागच्छतं। तत्किं पर्यायेण। नेत्याह। सरथं समानमेकं रथं तस्थिवांसा युगपदेवास्थितवंतौ युवामागच्छतं। न पर्यायेणेत्यर्थः। अथागमनानंतरं सुतस्य ऋत्विग्भिरभिषुतं सोमस्य सोमं स्वांशलक्षणं तदेकदेशं वा पिबतं ॥ वां। युष्मदस्मदोः षष्ठीचतुर्थीत्यादिना षष्ठीद्विवचनस्य वामादेशः। सर्वानुदात्तत्वं। चष्टे। चक्षिङ् व्यक्तायां वाचि। अत्र प्रकाशनार्थः। अदादित्वाच्छपो लुक्। स्कोः संयोगाद्योरिति कलोपः। तास्यनुदात्तेदिति लसार्वधातुकानुदात्तत्वे धातुस्वरः शिष्यते। यद्वृत्तान्नित्यमिति निघातप्रतिषेधः। सरथं। समानश्चासौ रथश्च सरथः। समानस्य छंदसीति सभावः। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। तस्थिवांसा। ष्ठा गतिनिवृत्तौ। लिटः क्वसुः। द्विर्वचने शर्पूर्वाः खयः। वस्वेकाजाद्घसामितीडागमः। आतो लोप इटि चेत्याकारलोपः। सुपां सुलुगित्याकारः। सोमस्य। क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी ॥

द्वितीयामृचमाह ॥

यावदिदं भुवनं विश्वमस्त्युरुव्यचा वरिमता गभीरं।
तावाँ अयं पातवे सोमो अस्त्वरमिंद्राग्नी मनसे युवभ्यां ॥ २ ॥
यावत्। इदं। भुवनं। विश्वं। अस्ति। उरुऽव्यचा। वरिमता। गभीरं।
तावान्। अयं। पातवे। सोमः। अस्तु। अरं। इंद्राग्नी इति। मनसे। युवऽभ्यां ॥ २ ॥

विश्वं सर्वमिदं भुवनं जगद्यावदस्ति यावत्प्रमाणं भवति। कीदृशं। उरुव्यचा। विस्तीर्णव्यापनं। सर्वव्यापकमित्यर्थः। तथा वरिमता वरिम्णोरुत्वेनात्मीयेन गौरवेण गभीरं गाभीर्योपेतं। हे इंद्राग्नी पातवे युवाभ्यां पातुं सोमस्तावानस्तु। तावत्प्रमाणो भवतु। तथा मनसे युवयोरंतःकरणायारं स सोमः पर्याप्तो भवतु॥ उरुव्यचा। व्यच व्याजीकरणे। असुन्। व्यचेः कुटादित्वमनसीति वचनात् ङित्त्वाभावेन संप्रसारणाभावः। स्वमोर्नपुंसकात्। पा॰ ७.१.२३. इति सोर्लुकि प्राप्ते सुपां सुलुगिति व्यत्ययेन डादेशः। वरिमता। पृथ्वादिभ्य इमनिज्वेत्युरुशब्दात्तस्य भाव इत्यर्थ इमनिच्। प्रियस्थिरेत्यादिनोरुशब्दस्य वरादेशः। पुनरपि भावप्रत्ययोत्पत्तिश्छांदसी। सुपां सुलुगिति तृतीयाया लुक्। यद्वा तृतीयायाश्छांदसस्तुडागमः। तावान्। तत्परिमाणमस्य यत्तदेतेभ्यः परिमाणे वतुप्। पा॰ ५.२.३९. आ सर्वनाम्न इत्यात्वं। पातवे। पा पाने। तुमर्थे सेसेनिति तवेन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं। अरं। वालमूललघ्वलमंगुलीनां वा लो रमापद्यत इति वक्तव्यमिति लत्वविकल्पः। युवभ्यां। व्यत्ययेनात्वाभावे शेषे लोप इति दकारलोपः॥

तृतीयामृचमाह॥

चक्राथे हि सध्र्य१ङ्नाम भद्रं सध्रीचीना वृत्रहणा उत स्थः।
ताविंद्राग्नी सध्र्यंचा निषद्या वृष्णः सोमस्य वृषणा वृषेथां॥३॥

चक्राथे इति। हि। सध्र्यक्। नाम। भद्रं। सध्रीचीना। वृत्रऽहना। उत। स्थः।
तौ। इंद्राग्नी इति। सध्र्यंचा। निऽसद्य। वृष्णः। सोमस्य। वृषणा। आ। वृषेथां॥३॥

हे इंद्राग्नी भद्रं कल्याणं नाम स्वकीयं नामधेयं सध्र्यक् सहगतमिंद्राग्नी इत्येवं संयुक्तं चक्राथे। युवां कृतवंतौ। उत अपि च हे वृत्रहणौ वृत्रस्यासुरस्य हंताराविंद्राग्नी सध्रीचीना सहांचंतौ वृत्रवधार्थं संगच्छंतौ स्थः। भवथः। हि यस्मादेवं तस्माद्धे वृषणा कामानां वर्षितारावद्राग्नी तौ युवां सध्र्यंचौ सहितावेव संतौ निषद्य वेद्यामुपविश्य वृष्णः सेक्तुः सोमस्यात्मीयं भागमावृषेथां। स्वकीय उदरे आसिंचेथां॥ सध्र्यक्। सहशब्दोपपदादंचतेर्ऋत्विगित्यादिना क्विन्। अनिदितामिति नलोपः। सहस्य सध्रिः। अद्रिसध्र्योरंतोदात्तनिपातनं कृत्स्वरनिवृत्त्यर्थमिति वचनात्सध्र्यादेशोऽंतोदात्तः। यणादेश उदात्तस्वरितयोर्यण इति स्वरितत्वं। सध्रीचीना। विभाषांचेरदिक्स्त्रियामिति स्वार्थे खः। सुपां सुलुगिति

विभक्तेराजादेशः। वृत्रहणौ। संहितायामावादेशे लोपः शाकल्यस्येति वलोपः। वृषेथां। वृष सेचने। व्यत्ययेन श आत्मनेपदं च ॥

चतुर्थीमृचमाह ॥

समिद्धेष्वग्निष्वानजाना यतस्रुचा बर्हिरु तिस्तिराणा।
तीव्रैः सोमैः परिषिक्तेभिरर्वागेंद्राग्नी सौमनसाय यातं ॥४॥

संऽईद्धेषु। अग्निषु। आनजाना। यतऽस्रुचा। बर्हिः। ऊं इति। तिस्तिराणा।
तीव्रैः। सोमैः। परिऽसिक्तेभिः। अर्वाक्। आ। इंद्राग्नी इति। सौमनसाय। यातं ॥४॥

अग्निषु गार्हपत्यादिष्वन्वाधानादिना समिद्धेषु सम्यगिद्धेषु दीप्तेषु सत्स्वानजाना हवींष्याज्येनांजंतौ यतस्रुचा तदनंतरं यागार्थं गृहीतस्रुचौ बर्हिरु वेद्यां बर्हिरपि तिस्तिराणा आस्तीर्णं कृतवंतावध्वर्युप्रतिप्रस्थातारावेवंभूतावभूतां। तथा सति हे इंद्राग्नी तीव्रैः क्षिप्रं मदकरैः परिषिक्तेभिः परितः सर्वेषु ग्रहचमसादिष्वासिक्तैः सोमैर्हेतुभूतैरर्वाक् अस्मदभिमुखमायातं। आगच्छतं। किमर्थं। सौमनसाय सौमनस्याय। अस्माकमनुग्रहायेत्यर्थः ॥ आनजाना। अंजू व्यक्तिम्रक्षणकांतिगतिषु। लिटः कानच्। अनिदितामिति नलोपः। द्विर्भावेऽत आदेरित्यभ्यासस्य दीर्घः। तस्मान्नुट् द्विहल इत्यद्विहलोऽपि व्यत्ययेन नुट्। तिस्तिराणा। स्तृञ् आच्छादने। पूर्ववत्कानच्। ॠत इद्धातोरितीत्वं। द्विर्वचने शर्पूर्वाः खयः। सुपां सुलुगिति विभक्तेराकारः। चित्त्वादंतोदात्तत्वं ॥

पंचमीमृचमाह ॥

यानींद्राग्नी चक्रथुर्वीर्याणि यानि रूपाण्युत वृष्ण्यानि।
या वां प्रत्नानि सख्या शिवानि तेभिः सोमस्य पिबतं सुतस्य ॥५॥

यानि। इंद्राग्नी इति। चक्रथुः। वीर्याणि। यानि। रूपाणि। उत। वृष्ण्यानि।
या। वां। प्रत्नानि। सख्या। शिवानि। तेभिः। सोमस्य। पिबतं। सुतस्य ॥५॥

हे इंद्राग्नी यानि वीर्याणि वृत्रवधादिरूपाणि चक्रथुः कृतवंतौ युवां यानि च रूपाणि निरूप्यमाणानि गवाश्वादीनि भूतजातानि कृतवंतौ। इंद्राग्निभ्यां हि सर्वं जगत्सृज्यते। इंद्रः सूर्यात्मना वृष्टिं सृजति धारवृष्ट्युत्पादकः। वृष्टेः सकाशात्सर्वे प्राणिन उत्पद्यंते। उत अपि च यानि वृष्ण्यानि वृष्णि भवानि

वृष्टिप्रदानादिरूपाणि कर्माणि कृतवंतौ युवां । तथा वां युवयोः संबंधीनि प्रत्नानि चिरंतनानि शिवानि शोभनानि या यानि सख्या सखित्वानि संति । तेभिस्तैः सर्वैः सहितौ युवां सुतस्य सोमस्याभिषुतं सोमं पिबतं ॥ सख्या । सख्युर्भावः सख्यं । सख्युर्य इति यप्रत्ययः । शेश्छंदसि बहुलमिति शेर्लोपः । तेभिः । बहुलं छंदसीति भिस ऐसभावः । सावेकाच इति प्राप्तस्य विभक्त्युदात्तत्वस्य न गोश्वन्साववर्णेति प्रतिषेधः ॥

॥ इति प्रथमस्य सप्तमे षड्विंशो वर्गः ॥

षष्ठीमृचमाह ॥

यदब्रवं प्रथमं वां वृणानो३ऽयं सोमो असुरैर्नो विहव्यः ।
तां सत्यां श्रद्धामभ्या हि यातमथा सोमस्य पिबतं सुतस्य ॥ ६ ॥

यत् । अब्रवं । प्रथमं । वां । वृणानः । अयं । सोमः । असुरैः । नः । विऽहव्यः ।
तां । सत्यां । श्रद्धां । अभि । आ । हि । यातं । अथ । सोमस्य । पिबतं । सुतस्य ॥ ६ ॥

हे इंद्राग्नी प्रथमं कर्मोपक्रम एव वां युवां वृणानः संभजमानो यदब्रवं सोमेन प्रीणयिष्यामीति यदवोचं । सत्यां यथार्थां तां श्रद्धां श्रद्धयादरातिशयेन कृतामुक्तिमभ्यभिलक्ष्य आ हि यातं । आगच्छतमेव नोदासाथां । अथागमनानंतरमभिषुतं सोमं पिबतं । तथा सत्यमसुरैर्हविषां प्रक्षेपकैर्ऋत्विग्भिरयं नोऽस्माकं सोमो विहव्यो विशेषेण होतव्यो भवति । इतरथा व्यर्थः स्यात् । तस्मादिंद्राग्नी आगच्छतमित्यर्थः ॥ वृणानः । वृञ् संभक्तौ । लिटः शानच् । श्नाभ्यस्तयोरात इत्याकारलोपः । असुरैः । असु क्षेपणे । असेरुरन्नित्युरन्प्रत्ययः । विहव्यः । हु दानादनयोः । अचो यत् । गुणः । धातोस्तन्निमित्तस्यैवेत्यवादेशः । यतोऽनाव इत्याद्युदात्तत्वं । कृदुत्तरपदप्रकृतिस्वरत्वं ॥

सप्तमीमृचमाह ॥

यदिंद्राग्नी मदथः स्वे दुरोणे यद्ब्रह्मणि राजनि वा यजत्रा ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ ७ ॥

यत् । इंद्राग्नी इति । मदथः । स्वे । दुरोणे । यत् । ब्रह्मणि । राजनि । वा । यजत्रा ।
अतः । परि । वृषणौ । आ । हि । यातं । अथ । सोमस्य । पिबतं । सुतस्य ॥ ७ ॥

यजत्रा यष्टव्यौ हे इंद्राग्नी स्वे दुरोणे स्वकीये गृहे निवासस्थाने यद्यदि मदथः। हृष्यथः। यद्यदि ब्रह्मणि ब्राह्मणेऽन्यस्मिन्यजमाने हविःस्वीकरणायागत्य हृष्यथः। यदि वा राजनि क्षत्रिये युद्धे साहाय्यं कर्तुमागत्य हृष्यथः। अतः परि परितोऽस्मात्सर्वस्मात्स्थानात् हे वृषणौ कामानां वर्षिताराविंद्राग्नी आयातं हि। आगच्छतमेव। औदासीन्यं मा कार्ष्टं। अन्यत्पूर्ववत् ॥ मदथः। मदी हर्षे। व्यत्ययेन शप्। यजत्रा। अमिनक्षीत्यादिना यजतेः कर्मण्यत्रन्। सुपां सुलुगिति विभक्तेराकारः ॥

अष्टमीमृचमाह ॥

यदिंद्राग्नी यदुषु तुर्वशेषु यद्द्रुह्युष्वनुषु पूरुषु स्थः।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ ८ ॥
यत्। इंद्राग्नी इति। यदुषु। तुर्वशेषु। यत्। द्रुह्युषु। अनुषु। पूरुषु। स्थः।
अतः। परि। वृषणौ। आ। हि। यातं। अथ। सोमस्य। पिबतं। सुतस्य ॥ ८ ॥

अत्र यदुष्वित्यादीनि पंच मनुष्यनामानि। हे इंद्राग्नी यद्यदि यदुषु नियतेषु परेषामहिंसकेषु मनुष्येषु स्थः। भवथः। वर्तेथे। यदि वा तुर्वशेषु हिंसकेषु मनुष्येषु वर्तेथे। यद्यदि वा द्रुह्युषु द्रोहं परेषामुपद्रवमिच्छत्सु मनुष्येषु वर्तेथे। यदि वानुषु प्राणत्सु सफलैः प्राणैर्युक्तेषु ज्ञातृष्वनुष्ठातृषु मनुष्येषु। अन्येषां हि प्राणा निःफला ज्ञानहीनत्वादनुष्ठानाभावाच्च। तेषु यदि भवथः। तथा पूरुषु कामैः पूरयितव्येष्वन्येषु स्तोतृजनेषु यदि भवथः। अतः सर्वस्मात्स्थानात् हे कामाभिवर्षकाविंद्राग्नी आगच्छतं। अनंतरमभिषुतं सोमं पिबतं ॥ यदुषु। यम उपरमे। नियम्यंत इंद्रियाण्येभिरिति यदवः। यमेर्दुक् चेति कुप्रत्ययो दुगागमश्च। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः। तुर्वशेषु। तुर्वी हिंसार्थः। औणादिकोऽशप्रत्ययः। द्रुह्युषु। द्रुह जिघांसायां। संपदादिलक्षणो भावे क्विप्। द्रुहं परेषामिच्छंति। छंदसि परेच्छायामपीति क्यच्। क्याच्छंदसीत्युप्रत्ययः। अनुषु। अन प्राणने। अणश्च। उ० १.८.। इति विधीयमान उप्रत्ययो बहुलवचनादस्मादपि भवति। निदित्यनुवृत्तेराद्युदात्तत्वं। पूरुषु। पूरी आप्यायने। पूर्यंत इति पूरवः। औणादिक उप्रत्ययः ॥

नवमीमृचमाह ॥

यदिंद्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ ९ ॥

यत् । इंद्राग्नी इति । अवमस्यां । पृथिव्यां । मध्यमस्यां । परमस्यां । उत । स्थः ।
अतः । परि । वृषणौ । आ । हि । यातं । अथ । सोमस्य । पिबतं । सुतस्य ॥ ९ ॥

हे इंद्राग्नी अवमस्यां पृथिव्यां सन्निकृष्टायामस्यां भूम्यां यद्यदि स्थः । वर्तमानौ भवथः । यदि वा मध्यमस्यां पृथिव्यामंतरिक्षलोके । अत्र पृथिवीशब्दस्त्रिष्वपि लोकेषु वर्तते । यथा यो द्वितीयस्यां तृतीयस्यां पृथिव्यामस्यायुषा नाक्षेति । उत अपि च परमस्यामुत्कृष्टायां दूरे वर्तमानायां पृथिव्यां द्युलोके यदि वा वर्तेथे । अतः सर्वस्मात्स्थानात् हे वृषणावागच्छतं । आगमानंतरं सुतं सोमं पिबतं ॥ अवमस्यां । अवमशब्दादुत्तरस्य ङेर्व्यत्ययेन स्याडागमः । एवमुत्तरत्रापि ॥

दशमीमृचमाह ॥

यदिंद्राग्नी परमस्यां पृथिव्यां मध्यमस्यामवमस्यामुत स्थः ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ १० ॥

यत् । इंद्राग्नी इति । परमस्यां । पृथिव्यां । मध्यमस्यां । अवमस्यां । उत । स्थः ।
अतः । परि । वृषणौ । आ । हि । यातं । अथ । सोमस्य । पिबतं । सुतस्य ॥ १० ॥

पूर्ववद्व्याख्येयं । एतावांस्तु विशेषः । पूर्वं भूम्यादिषु त्रिषु लोकेषु याविंद्राग्नी तावागच्छतमित्युक्तं । इदानीं तु द्युप्रभृतिष्ववरोहक्रमेण वर्तमानेषु त्रिषु लोकेषु याविंद्राग्नी वर्तेते तावागच्छतामिति प्रार्थ्यते ॥

एकादशीमृचमाह ॥

यदिंद्राग्नी दिवि ष्ठो यत्पृथिव्यां यत्पर्वतेष्वोषधीष्वप्सु ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ ११ ॥

यत् । इंद्राग्नी इति । दिवि । स्थः । यत् । पृथिव्यां । यत् । पर्वतेषु । ओषधीषु । अप्ऽसु ।
अतः । परि । वृषणौ । आ । हि । यातं । अथ । सोमस्य । पिबतं । सुतस्य ॥ ११ ॥

हे इंद्राग्नी दिवि द्युलोके यद्यदि स्थः । भवथः । यदि वा पृथिव्यां भूलोके यदि वा पर्वतेषु मेर्वादिषु मेघेषु वा । तथा ओषधीषु तिलमाषव्रीह्यादिष्वप्सूदकेषु चानुग्राहकतया यदि वा स्थः । हे कामाभिवर्षकौ युवामतः सर्वस्मात्स्थानादागच्छतं । आगत्य चाभिषुतं सोमं पिबतं ॥ पृथिव्यां । उदात्तयण इति विभक्तेरुदात्तत्वं । ओषधीषु । ओषः पाक आसु धीयत इति ओषधयः । कर्मण्यधिकरणे चेति किप्रत्ययः । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं । तत्र घञंतमाद्युदात्तं । ओषधेश्च विभक्तावप्रथमायामिति दीर्घः ॥

द्वादशीमृचमाह ॥

यदिंद्राग्नी उदिता सूर्यस्य मध्ये दिवः स्वधया मादयेथे ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ १२ ॥
यत् । इंद्राग्नी इति । उत्ऽइता । सूर्यस्य । मध्ये । दिवः । स्वधया । मादयेथे इति ।
अतः । परि । वृषणौ । आ । हि । यातं । अथ । सोमस्य । पिबतं । सुतस्य ॥ १२ ॥

हे इंद्राग्नी उदिता उदितस्योदयं प्राप्तस्य सूर्यस्यादित्यस्य संबंधिनो दिवो द्योतमानस्यांतरिक्षस्य मध्ये मध्यमभागे स्वधयात्मीयेन तेजसा हविर्लक्षणेनान्नेन वा यद्यस्मात्कारणान्मादयेथे । तृप्तौ भवथः । तस्मात्कारणादतः सर्वस्मादंतरिक्षभागात् हे कामाभिवर्षकाविंद्राग्नी आगच्छतं । आगमनानंतरमभिषुतं सोमं पिबतं ॥ उदिता । सुपां सुलुगिति षष्ठ्या डादेशः । दिवः । ऊडिदमिति विभक्तेरुदात्तत्वं । मादयेथे । मद तृप्तियोगे । चुरादिरात्मनेपदी ॥

त्रयोदशीमृचमाह ॥

एवेंद्राग्नी पपिवांसा सुतस्य विश्वास्मभ्यं सं जयतं धनानि ।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ १३ ॥
एव । इंद्राग्नी इति । पपिऽवांसा । सुतस्य । विश्वा । अस्मभ्यं । सं । जयतं । धनानि ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ १३ ॥

हे इंद्राग्नी सुतस्याभिषुतं सोममेव एवं पपिवांसा पीतवंतौ युवामस्मभ्यं विश्वा सर्वाणि धनानि संजयतं । प्रयच्छतं । यदनेन सूक्तेन प्रार्थितं तन्मि-

षादयो मामहंतां। पूजयंतु॥ पपिवांसा। पा पाने। लिटः क्वसुः। वस्वेकाजाद्धसामितीडागमः॥

॥ इति प्रथमस्य सप्तमे सप्तविंशो वर्गः॥

वि हीत्यष्टर्चं चतुर्थं सूक्तं। अनुक्रांतं च वि ह्यष्टाविति। ऋष्याद्याः पूर्ववत्। सूक्तविनियोगो लैंगिकः॥

तत्र प्रथमामृचमाह॥

वि ह्यख्यं मनसा वस्य इच्छन्निंद्राग्नी ज्ञास उत वा सजातान्।
नान्या युवत्प्रमतिरस्ति मह्यं स वां धियं वाजयंतीमतक्षं॥१॥

वि। हि। अख्यं। मनसा। वस्यः। इच्छन्। इंद्राग्नी इति। ज्ञासः। उत। वा। सऽजातान्।
न। अन्या। युवत्। प्रऽमतिः। अस्ति। मह्यं। सः। वां। धियं। वाजऽयंतीं। अतक्षं॥१॥

हे इंद्राग्नी वस्यः प्रशस्तं धनमिच्छन् कामयमानोऽहं ज्ञासो ज्ञातीन् उत वा अपि वा सजातान्। समानजन्मानो ज्ञातिव्यतिरिक्ता बांधवास्तांश्च मनसा बुद्ध्या वि ह्यख्यं। युवामेव ज्ञातिरूपेण बंधुरूपेण च व्यज्ञासिषं। ते हि धनस्य दातारो भवंति। अपि च युवत् युवाभ्यामन्या अन्येन केनचिन्मह्यं दत्ता प्रमतिः प्रकृष्टा बुद्धिर्नास्ति। मदीया यैषा प्रकृष्टा बुद्धिः सा युवाभ्यामेव दत्ता। स तादृश्या बुद्ध्या युक्तोऽहं वां युवयोः संबंधिनीं वाजयंतीमन्नमस्मभ्यमिच्छंतीं धियं ध्यानेन निष्पन्नां स्तुतिमतक्षं। अकार्षं॥ अख्यं। लुङ्स्यतिवक्तिख्यातिभ्योऽङिति च्लेरङादेशः। वस्यः। वसुशब्दादीयसुन्। टेरिति टिलोपः। छांदस ईकारलोपः। ज्ञासः। सुखदुःखादिकं साम्येन जानंतीति ज्ञासो ज्ञातयः। ज्ञा अवबोधने। औणादिकोऽसुन्। व्यत्ययेन विभक्तेरुदात्तत्वं। युवत्। सुपां सुलुगिति विभक्तेर्लुक्। द्व्यर्थाभिधायकत्वाद्युवावौ द्विवचन इति युष्मदो मपर्यंतस्य युवादेशः॥

द्वितीयामृचमाह॥

अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात्।
अथा सोमस्य प्रयती युवभ्यामिंद्राग्नी स्तोमं जनयामि नव्यं॥२॥

अश्रवं। हि। भूरिदावत्ऽतरा। वां। विऽजामातुः। उत। वा। घ। स्यालात्।
अथ। सोमस्य। प्रऽयती। युवऽभ्यां। इंद्राग्नी इति। स्तोमं। जनयामि। नव्यं॥२॥

हे इंद्राग्नी वां युवां भूरिदावत्तरातिशयेन बहुविधधनस्य दातारावित्यश्रवं हि। अश्रौषं खलु। कस्मात्पुरुषात्। विजामातुः। श्रुताभिरूप्यादिभिर्गुणैर्विहीनो जामाता यथा कन्यावते बहुधनं प्रयच्छति कन्यालाभार्थं ततोऽप्यतिशयेन दाताराविंद्राग्नी इत्यर्थः। उत वा अपि च स्यालात्। स्यं शूर्पं। तस्माल्लाजानावपति विवाहकाल इति स्यालः कन्याभ्राता। स यथा भगिनीप्रीत्यर्थं बहु धनं प्रयच्छति ततोऽप्यतिशयेन दातारावींद्राग्नी। घेति पादपूरणे। तथा च सत्यथानंतरं हे इंद्राग्नी युवाभ्यां सोमस्य प्रयती अभिषुतस्य सोमस्य प्रदानेन सह नव्यं नवतरं प्रत्ययं स्तोमं स्तोत्रं जनयामि। निष्पादयामि। अत्र निरुक्तं। अश्रौषं हि बहुदातृतरौ वां विजामातुरसुसमाप्ताज्जामातुः। विजामातेति शश्वद्दाक्षिणाजाः क्रीतापतिमाचक्षतेऽसुसमाप्त इव वरोऽभिप्रेतो जामाता जा अपत्यं तन्निर्माता। उत वा घा स्यालादपि च स्यालात् स्याल आसन्नः संयोगेनेति नैदानाः। स्याल्लाजानावपतीति वा। लाजा लाजतेः स्यं शूर्पं स्यतेः। शूर्पमशनपवनं शृणातेः शम्नातेर्वा। अथा सोमस्य प्रदानेन युवाभ्यामिंद्राग्नी स्तोमं जनयामि नव्यं नवतरं। नि० ६.९.। इति॥ अश्रवं। श्रु श्रवणे। लङ्युत्तमपुरुषैकवचने बहुलं छंदसीति विकरणस्य लुक्। भूरिदावत्तरा। डुदाञ् दाने। आतो मनिन्निति वनिप्। अतिशयेन भूरिदावा भूरिदावत्तरः। भूरिदाव्नस्तुट् वक्तव्य इति तरपस्तुट्। पदसंज्ञायां नलोपः। सुपां सुलुगिति विभक्तेराकारः। घा। ऋचि तुनुघेत्यादिना संहितायां दीर्घत्वं। अथा निपातस्य चेति। प्रयती। यम उपरमे। क्तिन्यनुदात्तोपदेशेत्यादिनानुनासिकलोपः। तादौ चेति गतेः प्रकृतिस्वरत्वं। युवभ्यां। सर्वे विधयश्छंदसि विकल्प्यंत इति युष्मदस्मदोरनादेश इत्यात्वाभावः। शेषे लोप इति दकारलोपः॥

तृतीयामृचमाह॥

मा छेद्म रश्मीँरिति नाधमानाः पितॄणां शक्तीरनुयच्छमानाः।
इंद्राग्निभ्यां कं वृषणो मदंति ता ह्यद्री धिषणाया उपस्थे॥ ३॥

मा। छेद्म। रश्मीन्। इति। नाधमानाः। पितॄणां। शक्तीः। अनुऽयच्छमानाः।
इंद्राग्निऽभ्यां। कं। वृषणः। मदंति। ता। हि। अद्री इति। धिषणायाः। उपऽस्थे॥ ३॥

रश्मीन्। रश्मिशब्दो रज्जुवाची। यथा रश्मयो दीर्घा अविच्छिन्ना भवंति।

एवमविच्छिन्नान्पुत्रपौत्रादीन् मा छेद्म । मा विच्छिन्नान्कुर्मेति बुद्ध्या नाधमाना इंद्राग्न्योः सकाशात्तथाविधान्पुत्रादीन्याचमानाः । तदनंतरं पितॄणां शक्तीः शक्त्युत्पादकान्वीर्योत्पादकांस्तान्पुत्रादीननुयच्छमाना अनुक्रमेण नियतान् कुर्वंतो वृषणः सेक्तारः पुत्रोत्पादनसमर्थाः । सपत्नीका इत्यर्थः । एवंभूता यजमाना इंद्राग्निभ्यां कं सुखं यथा भवति तथा मदंति । स्तुवंति । हि यस्माददद्री शत्रून्हणंतौ हिंसंतौ विदारयंतौ ताविंद्राग्नी धिषणायाः स्तुत्या उपस्थ उपस्थाने समीपे भवतः । तस्मात्तत्सांनिध्याय स्तुवंतीति भावः । यद्वा निपातानामनेकार्थत्वात् हिशब्दो यदेत्यर्थः । यदा ताविंद्राग्नी उद्दिश्याद्री अभिषवसाधनभूता ग्रावाणो धिषणाया उपस्थे । धिषणाधिषवणचर्म । तस्योपरिष्टादिंद्राग्न्यर्थं सोममभिषुण्वंति । तदा तदा यजमाना स्तुवंतीति योजनीयं ॥ छेद्म । छिदिर् द्वैधीकरणे । लङि बहुलं छंदसीति विकरणस्य लुक् । छंदस्युभयथेत्यार्द्धधातुकत्वेन ङित्त्वाभावाल्लघूपधगुणः । न माङ्योग इत्यडभावः । रश्मीन् । दीर्घादटि समानपाद इति संहितायां नकारस्य रुत्वं । अत्रानुनासिकः पूर्वस्य तु वेतीकारः सानुनासिकः । नाधमानाः । णाधृ याच्ञायां । पितॄणां । नामन्यतरस्यामिति नाम उदात्तत्वं । मदंति । मदि स्तुतौ । आगमानुशासनस्यानित्यत्वान्नुमभावः । व्यत्ययेन परस्मैपदं ॥

चतुर्थीमृचमाह ॥

युवाभ्यां देवी धिषणा मदायेंद्राग्नी सोममुशती सुनोति ।
तावश्विना भद्रहस्ता सुपाणी आ धावतं मधुना पृंक्तमप्सु ॥ ४ ॥
युवाभ्यां । देवी । धिषणा । मदाय । इंद्राग्नी इति । सोमं । उशती । सुनोति ।
तौ । अश्विना । भद्रऽहस्ता । सुपाणी इति सुऽपाणी । आ । धावतं । मधुना ।
पृंक्तं । अप्ऽसु ॥ ४ ॥

हे इंद्राग्नी युवाभ्यां मदाय युवयोर्हर्षाय देवी द्योतमानोशती युवां कामयमाना धिषणा मंत्ररूपा वाक् सोममभिषुणोति । यद्वा धिषणाधिषवणचर्म । द्योतमानं तद्युवयोर्मदं कामयमानं सत्सोममभिषुणोति । ग्रावभिः स्वस्मिन्नभिषवात्तस्याभिषवकर्तृत्वं । अश्विनाश्ववंतौ भद्रहस्ता शोभनदोर्दंडौ सुपाणी । मणिबंधादूर्द्ध्वभागः पाणिः । शोभनपाणी । एवंभूतौ हे इंद्राग्नी तौ युवामाधावतं ।

शीघ्रमागच्छतं । आगत्य चाप्सूदकेषु वर्तमानेन मधुना माधुर्योपेतेन सारांशेन पृंक्तं । अस्मदीयं सोमं संयोजयतं । यद्वा । अप्सु वसतीवरीषु मधुना माधुर्यं संयोजयतं । विभक्तिव्यत्ययः ॥ युवाभ्यां । षष्ठ्यर्थे चतुर्थी । उशती । वश कांतौ । अदादित्वाच्छपो लुक् । ग्रहिज्यादिना संप्रसारणं । उगितश्चेति ङीप् । शतुरनुम इति नद्या उदात्तत्वं । पृङ्क्तं । पृची संपर्के । रौधादिकः । लोटि थसस्तं । श्नसोरल्लोपः । अनुस्वारपरसवर्णौ । न चाचः परस्मिन्नित्यल्लोपस्य स्थानिवत्त्वं न पदांतेत्यादिना निषेधात् ॥

पंचमीमृचमाह ॥

युवामिंद्राग्नी वसुनो विभागे तवस्तमा शुश्रव वृत्रहत्ये ।
तावासद्या बर्हिषि यज्ञे अस्मिन्प्र चर्षणी मादयेथां सुतस्य ॥ ५ ॥
युवां । इंद्राग्नी इति । वसुनः । विऽभागे । तवःऽतमा । शुश्रव । वृत्रऽहत्ये ।
तौ । आऽसद्य । बर्हिषि । यज्ञे । अस्मिन् । प्र । चर्षणी इति । मादयेथां । सुतस्य ॥ ५ ॥

हे इंद्राग्नी वसुनो धनस्य विभागे स्तोतृभ्यो दातुं विभजने तात्पर्येण वर्तमानौ युवां वृत्रहत्ये वृत्रस्यासुरस्य हनने तवस्तमातिशयेन बलिनौ प्रवृद्धतमौ वा शुश्रव । अश्रौषं । हे चर्षणी सर्वस्य द्रष्टाराविंद्राग्नी तौ युवामस्मदीयेऽस्मिन्यज्ञे बर्हिषि वेद्यामास्तीर्णे दर्भे आसद्योपविश्य सुतस्याभिषुतस्य सोमस्य पानेन प्रमादयेथां । प्रकर्षेण तृप्तौ भवतं ॥ विभागे । भज सेवायां । भावे घञ् । चजोः कु घिण्ण्यतोरिति कुत्वं । थाथादिनोत्तरपदांतोदात्तत्वं । तवस्तमा । तव इति बलनाम । लुप्तमत्वर्थीयादेतस्मादातिशायनिकस्तमप् । यद्वा तवतिर्वृद्ध्यर्थः । सौत्रो धातुः । तस्मादौणादिकः कर्तर्यसिप्रत्ययः । सुपां सुलुगिति विभक्तेः पूर्वसवर्णदीर्घत्वं । वृत्रहत्ये । हनस्त चेति हंतेर्भावे क्यप् । तत्संनियोगेन तकारांतादेशश्च । कृदुत्तरपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य सप्तमेऽष्टाविंशो वर्गः ॥

ऐंद्राग्नस्य पशोर्हविषः प्र चर्षणिभ्य इत्येषा याज्या । प्रदान्नानामिति खंडे सूचितं । प्र चर्षणिभ्यः पृतनाहवेष्वा देवो यातु सविता सुरत्नः । आ० ३. ७. । इति ॥

तामेतां सूक्ते षष्ठीमृचमाह ॥

प्र चर्षणिभ्यः पृतनाहवेषु प्र पृथिव्या रिरिचाथे दिवश्च ।

प्र सिंधुभ्यः प्र गिरिभ्यो महित्वा प्रेंद्राग्नी विश्वा भुवनात्यन्या ॥ ६ ॥

प्र । चर्षणिऽभ्यः । पृतनाऽहवेषु । प्र । पृथिव्याः । रिरिचाथे इति । दिवः । च ।

प्र । सिंधुऽभ्यः । प्र । गिरिऽभ्यः । महिऽत्वा । प्र । इंद्राग्नी इति । विश्वा । भुवना ।

अति । अन्या ॥ ६ ॥

पृतनाहवेषु पृतनासु संग्रामेषु रक्षणार्थमाह्वानेषु सत्सु हे इंद्राग्नी आगतवंतौ युवां चर्षणिभ्यः सर्वेभ्योऽपि मनुष्येभ्यो महित्वा महत्त्वेन प्ररिरिचाथे । अतिरिच्येथे । सर्वाधिकौ भवथ इत्यर्थः । अत्रोपसर्गवशाद्धातुः स्वाभिधेयविपरीतमर्थमाचष्टे यथा प्रस्सरणं प्रस्थानमिति । तथा पृथिव्याः सर्वस्या भूमेश्च प्ररिरिचाथे । एवं द्युप्रभृतिभ्योऽपि । सिंधवः स्यंदनशीला आपः । गिरयः पर्वताः । अपि च हे इंद्राग्नी विश्वा भुवना सर्वाणि भूतजातान्यन्योक्तव्यतिरिक्तानि यानि संति तान्यतीत्य प्ररिरिचाथे । अधिकौ भवथः ॥ पृतनाहवेषु । पृतनासु हवः पृतनाहवः । ह्वेञो भावेऽनुपसर्गस्येत्यप् संप्रसारणं च । व्यत्ययेन थाथादिस्वराभावे कृदुत्तरपदप्रकृतिस्वरत्वं । रिरिचाथे । रिचिर् विरेचने । छंदसि लुङ्लङ्लिट इति वर्तमाने लिट् । यद्वा लड्येव बहुलं छंदसीति विकरणस्य श्लुः । महित्वा । मह पूजायां । औणादिक इन्प्रत्ययः । तस्य भावो महित्वं । सुपां सुलुगिति तृतीयाया डादेशः ॥

पूर्वोक्त एव पशावाभरतमित्येषा पुरोडाशस्यानुवाक्या । सूचितं च । आ भरतं शिक्षतं वज्रबाहू उभा वामिंद्राग्नी आहुवध्यै । आ० ३. ७. । इति ॥

तामेतां सूक्ते सप्तमीमृचमाह ॥

आ भरतं शिक्षतं वज्रबाहू अस्माँ इंद्राग्नी अवतं शचीभिः ।

इमे नु ते रश्मयः सूर्यस्य येभिः सपित्वं पितरो न आसन् ॥ ७ ॥

आ । भरतं । शिक्षतं । वज्रबाहू इति वज्रऽबाहू । अस्मान् । इंद्राग्नी इति । अवतं । शचीभिः ।

इमे । नु । ते । रश्मयः । सूर्यस्य । येभिः । सऽपित्वं । पितरः । नः । आसन् ॥ ७ ॥

हे वज्रबाहू वज्रहस्ताविंद्राग्नी आभरतं । अस्मदर्थं धनमाहरतं । आहृत्य च

शिक्षतं । अस्मभ्यं दत्तं । शिक्षतिर्दानकर्मा । अपि च । नोऽस्माननुष्ठातॄन् शचीभिः । कर्मनामैतत् । आत्मीयैः कर्मभिरवतं । रक्षतं । किं च सूर्यात्मन इंद्रस्य येभी रश्मिभिर्यैरर्चिभिर्नोऽस्माकं पितरः पूर्वपुरुषाः सपित्वं सहप्राप्तव्यं स्थानमासन् । ब्रह्मलोकमगच्छन् । अर्चिरादिमार्गेण हि ब्रह्मलोकमुपासका गच्छंति । तथा च श्रूयते । तेऽर्चिषमभिसंभवंत्यर्चिषोऽहरिति । यद्वा येभी रश्मिभिः सपित्वं समवेतत्वमध्यगच्छन् । ते रश्मय इमे नु इदानीमस्माभिर्दृश्यमाना एत एव खलु । सूर्यात्मन इंद्रस्य ये रश्मयस्त एवाग्नेरपि । तथा च श्रूयते । अग्निं वावादित्यः सायं प्रविशति तस्मादग्निर्दूरान्नक्तं ददृश इति । तस्मात्सूर्यस्य रश्मीनां स्तवनेनेंद्राग्न्योरुभयोरपि स्तुतिः सिद्धा ॥ भरतं । हृग्रहोर्भ इति भत्वं । शिक्षतं । शिक्ष विद्योपादाने । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे शपः पित्वादनुदात्तत्वं । धातुस्वरः शिष्यते । तिङः परत्वान्निघाताभावः । सपित्वं । आप्लृ व्याप्तौ । अस्मात्सशब्दोपपदात्कृत्यार्थे तवैकेनिति त्वन्प्रत्ययः । पृषोदरादित्वाद्धातोः पिभावः । यद्वा षप समवाये । इन् सर्वधातुभ्य इतीन् । सपेर्भावः सपित्वं । आसन् । अस गतिदीप्त्यादानेषु । लङ्याडागम उदात्तः । यद्वृत्तान्नित्यमिति निघाताभावः ॥

अष्टमीमृचमाह ॥

पुरंदरा शिक्षतं वज्रहस्तास्माँ इंद्राग्नी अवतं भरेषु ।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ ८ ॥
पुरंऽदरा । शिक्षतं । वज्रऽहस्ता । अस्मान् । इंद्राग्नी इति । अवतं । भरेषु ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ ८ ॥

हे वज्रहस्ता हस्तेन गृहीतवज्रौ । पुरंदरा असुरपुराणां दारयिताराविंद्राग्नी शिक्षतं । अस्मदपेक्षितं धनं प्रयच्छतं । अपि च भरेषु संग्रामेष्वस्मानवतं । रक्षतं । यदनेन सूक्तेन प्रार्थितं तदस्मदीयं मित्रादयो मामहंतां । पूजयंतां ॥ पुरंदरा । पूःसर्वयोर्दारिसहोरिति खच् । वाचंयमपुरंदरौ चेति निपातनादम् । सुपां सुलुगिति विभक्तेराकारः ॥

॥ इति प्रथमस्य सप्तम एकोनत्रिंशो वर्गः ॥

ततं म इति नवर्चं पंचमं सूक्तं कुत्सस्यार्षं ऋभुदेवताकं । पंचमीनवम्यौ

त्रिष्टुभौ । शिष्टाः सप्त जगत्यः । तथा चानुक्रांतं । ततं नवाभेवं तु पंचम्यंते त्रिष्टुभाविति ॥ अभिप्लवषडहस्य चतुर्थेऽहनि वैश्वदेवशस्त्र इदमार्भवं निविद्धानं । सूचितं च तृतीयस्येति खंडे । ततं मे अप इति वैश्वदेवं । आ० ७.७.। इति ॥

तत्र प्रथमामृचमाह ॥

ततं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते ।
अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समु तृप्णुत ऋभवः ॥ १ ॥

ततं । मे । अपः । तत् । ऊं इति । तायते । पुनरिति । स्वादिष्ठा । धीतिः । उचथाय । शस्यते ।
अयं । समुद्रः । इह । विश्वऽदेव्यः । स्वाहाऽकृतस्य । सं । ऊं इति । तृप्णुत । ऋभवः ॥ १ ॥

हे ऋभवो मे मयापोऽग्निष्टोमादिरूपं कर्म ततं विस्तारितं । बहुशः पूर्वमनुष्ठितं । तदु तदेव पुनस्तायते । विस्तार्यते । अनुष्ठीयत इत्यर्थः । तत्र स्वादिष्ठा स्वादुतमातिशयेन प्रीतिकरी धीतिः स्तुतिश्चोचथाय स्तुत्याय शस्यते । पठ्यते । अपि च । इहास्मिन्यागे समुद्रः समुंदनशीलोऽयं सोमरसो विश्वदेव्यः सर्वेभ्यो देवेभ्यः पर्याप्तो यथा भवति तथा संपादितः । तस्य स्वाहाकृतस्य स्वाहाकारेणाग्नौ प्रक्षिप्तस्य सोमस्य पानेन समु तृप्णुत । सम्यगेव तृप्ता भवत ॥ ततं । तनु विस्तारे । निष्ठायां यस्य विभाषेतीट्प्रतिषेधः । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः । अपः । आप्लृ व्याप्तौ । आपः कर्माख्यायां ह्रस्वो नुट् चेत्यसुन् धातोर्ह्रस्वश्च । तायते । तनोतेर्यकि । पा० ६.४.४४.। इत्यात्वं । स्वादिष्ठया । स्वादुशब्दादातिशायनिक इष्ठन् । टेरिति टिलोपः । उचथाय । वच परिभाषणे । औणादिकोऽथक्प्रत्ययः । वचिस्वपीत्यादिना संप्रसारणं । समुद्रः । उंदी क्लेदने । स्फायितंचीत्यादिना रक् । अनिदितामिति नलोपः । विश्वदेव्यः । देवार्हो भागो देव्यः । छंदसि चेति यप्रत्ययः । विश्वे सर्वे देव्या यस्मिन्सोमे । बहुव्रीहौ विश्वं संज्ञायामिति व्यत्ययेनासंज्ञायामपि पूर्वपदांतोदात्तत्वं । स्वाहाकृतस्य । स्वाहाशब्दस्य ऊर्यादित्वेन गतित्वाद्गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वं । तृप्णुत । तृप प्रीणने । स्वादिभ्यः श्नुः । ऋभव इत्यनेन संहितायामृत्यक इति प्रकृतिभावः ॥

द्वितीयामृचमाह ॥

आभोगयं प्र यदिच्छंत ऐतनापाकाः प्रांचो मम के चिदापयः ।
सौधन्वनासश्चरितस्य भूमनागच्छत सवितुर्दाशुषो गृहं ॥ २ ॥

आऽभोगयं। प्र। यत्। इच्छंतः। ऐतन। अपाकाः। प्रांचः। मम। के। चित्। आपयः।
सौधन्वनासः। चरितस्य। भूमना। अगच्छत। सवितुः। दाशुषः। गृहं ॥ २ ॥

हे ऋभवः। अपाका अपरिपक्वज्ञानाः प्रांचः पूर्वकालीना ममापयः प्रापयितारो मदीया ज्ञातयः केचित् एवंभूता ये केचन यूयमाभोगयमुपभोग्यं सोममिच्छंतो यद्यदा प्रैतन। तपश्चरितुमरण्यं गतवंतः। ऋभवो हि सुधन्वन आंगिरसस्य पुत्राः। तदुक्तं यास्केन। ऋभुर्विभ्वा वाज इति सुधन्वन आंगिरसस्य त्रयः पुत्रा बभूवुः। नि॰ ११. १६.। इति। कुत्सोऽप्यांगिरसः। अतस्तेन मदीया ज्ञातय इत्युक्तं। हे सौधन्वनासः सुधन्वनः पुत्राः। तदानीं चरितस्य समुपार्जितस्य तपसो भूमना भूम्ना बहुत्वेन दाशुषो हवींषि दत्तवतः सवितुः सोमाभिषवं कुर्वतो यजमानस्य संबंधि यज्ञगृहमगच्छत। तपसा लब्धसोमाः संतः कृतपाना यूयं गतवंतः। यद्वा। दाशुषः प्रातःसवनादिष्वग्न्यादिभिरपसारितेभ्य ऋभुभ्यः सोमपानं दत्तवतः सवितुर्गृहं निवासस्थानं तृतीयसवनाख्यमगच्छत। प्राप्ताः। एतत्सर्वमार्भवं शंसतीत्यादौ विस्पष्टमाम्नातं ॥ आभोगयं। आ समंताद्भोग आभोगः। तदर्हं आभोगयः। छंदसि चेति यः। यस्येति चेति लोपाभावश्छांदसः। व्यत्ययेन प्रत्ययात्पूर्वस्योदात्तत्वं। यद्वा। आङ्पूर्वाद्भुजेरौणादिकः कर्मणि इप्रत्ययः कुत्वं च। अमि व्यत्ययेन गुणः। ऐतन। इण् गतौ। लङि मध्यमबहुवचनस्य थस्य तादेशः। तप्तनप्तनथनाश्चेति तस्य तनबादेशः। आडागमो वृद्धिश्च। आपयः। आप्नोतेरौणादिक इप्रत्ययः। भूमना। बहुशब्दात्पृथ्वादिलक्षण इमनिच्। बहोर्लोपो भू च बहोरितीकारलोपो बहोर्भूभावश्च। संज्ञापूर्वकस्य विधेरनित्यत्वादल्लोपाभावः ॥

तृतीयामृचमाह ॥

तत्सविता वोऽमृतत्वमासुवदगोह्यं यच्छ्रवयंत ऐतन।
त्यं चिच्चमसमसुरस्य भक्षणमेकं संतमकृणुता चतुर्वयं ॥ ३ ॥

तत्। सविता। वः। अमृतऽत्वं। आ। असुवत्। अगोह्यं। यत्। श्रवयंतः। ऐतन।
त्यं। चित्। चमसं। असुरस्य। भक्षणं। एकं। संतं। अकृणुत। चतुःऽवयं ॥ ३ ॥

हे ऋभवस्तदानीं सविता सर्वस्य प्रेरको देवो वो युष्माकममृतत्वं देवत्वमासुवत्। आभिमुख्येन प्रेरितवान्। दत्तवानित्यर्थः। यद्यदा यूयमगोह्यं गूहितुमशक्यं

सर्वैर्दृश्यमानं सवितारं श्रवयंतोऽपेक्षितं सोमपानं विज्ञापयंतः संत ऐतन। आगच्छत। तदानीमिति पूर्वेणान्वयः। यस्माद्यूयं देवैराज्ञापिताः संतोऽसुरस्य त्वष्टुः संबंधि। निर्मितमित्यर्थः। भक्षणं सोमपानसाधनं त्यं तं चमसमेकं चित् असहायमेव संतं चतुर्वयं चतुर्व्यूहमकृणुत। कृतवंतः। सृष्ट्यादौ त्वष्ट्रा कृतं चमसं होतृचमसादिमुख्यचमसचतुष्टयरूपेण ऋभवः कृतवंत इत्यर्थः॥ असुवत्। षू प्रेरणे। तौदादिकः। श्रवयंतः। श्रु श्रवणे। छांदसो वृद्ध्यभावः। ऐतन। लङि मध्यमबहुवचनस्य तादेशे तप्तनप्तनथनाश्चेति तनबादेशः। भक्षणं। करणे ल्युट्। अकृणुता। कृवि हिंसाकरणयोश्च। लङि मध्यमबहुवचने धिन्विकृण्व्योरच्चेत्यु-प्रत्ययः। चतुर्वयं। वया अवयवाः। चत्वारोऽवयवा यस्य स तथोक्तः॥

चतुर्थीमृचमाह॥

विष्ट्वी शमी तरणित्वेन वाघतो मर्तासः संतो अमृतत्वमानशुः।
सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यंत धीतिभिः॥४॥

विष्ट्वी। शमी। तरणिऽत्वेन। वाघतः। मर्तासः। संतः। अमृतऽत्वं। आनशुः।
सौधन्वनाः। ऋभवः। सूरऽचक्षसः। सवत्सरे। सं। अपृच्यंत। धीतिऽभिः॥४॥

वाघतः। ऋत्विङ्नामैतत्। अत्र च सामर्थ्यात्तद्वंतो लक्ष्यंते। ऋत्विग्भिरुपेता ऋभवः। शमी। कर्मनामैतत्। यागदानादीनि कर्माण्यन्यान्यप्येकं चमसं चतुरः कृणोतनेत्यादिना देवैरुक्तानि कर्माणि तरणित्वेन। तरणिरिति क्षिप्रनाम। क्षिप्रत्वेन शीघ्रेण विष्ट्वी। यद्यप्येतत्कर्मनाम तथाप्यत्र क्रियापरं व्याप्य कृत्वेत्यर्थः। एवं कर्माणि कृत्वा मर्तासो मनुष्या अपि संतोऽमृतत्वं देवत्वमानशुः। आनशिरे। कृतैः कर्मभिर्लेभिरे। देवत्वं प्राप्य च सौधन्वनाः सुधन्वनः पुत्राः सूरचक्षसः सूर्यसमानप्रकाशाः सूर्यसदृशज्ञाना वा ते ऋभवः संवत्सरे संवत्सरावयवभूते वसंतादिकालेऽनुष्ठेये धीतिभिरग्निष्टोमादिकर्मभिः समपृच्यंत। संयुक्ता अभवन्। हविर्भागार्हा बभूवुरित्यर्थः। अत्र निरुक्तं। कृत्वा कर्माणि क्षिप्रत्वेन वोढारो मेधाविनो वा मर्तासः संतोऽमृतत्वमानशिरे सौधन्वना ऋभवः सूरख्याना वा सूरप्रज्ञा वा संवत्सरे समपृच्यंत धीतिभिः कर्मभिर्ऋभुर्विभ्वा वाज इति सुधन्वन आंगिरसस्य त्रयः पुत्रा बभूवुः। नि० ११. १६.। इति॥ विष्ट्वी। विषॢ व्याप्तौ। स्नात्व्यादयश्चेति क्त्वाप्रत्ययस्य ईकारांतादेशः। शमी। सुपां सुलुगिति

शसो लुक्। आनशुः। अशू व्याप्तौ। व्यत्ययेन परस्मैपदं। अश्नोतेश्चेत्यभ्यासादुत्तरस्य नुडागमः। अपृच्यंत। पृची संपर्के। कर्मणि लङ् ॥

पंचमीमृचमाह ॥

क्षेत्रमिव वि ममुस्तेजनेनँ एकं पात्रमृभवो जेहमानं।
उपस्तुता उपमं नाधमाना अमर्त्येषु श्रव इच्छमानाः ॥ ५ ॥

क्षेत्रंऽइव। वि। ममुः। तेजनेन। एकं। पात्रं। ऋभवः। जेहमानं।
उपऽस्तुताः। उपऽमं। नाधमानाः। अमर्त्येषु। श्रवः। इच्छमानाः ॥ ५ ॥

उपस्तुताः समीपस्थैर्ऋषिभिः स्तुता ऋभवो जेहमानं होमक्रियां प्रति प्रयतमानमेकमसहायं पात्रं पानसाधनं त्वष्ट्रा निर्मितं चमसं मानदंडेन क्षेत्रमिव भूमिमिव तेजनेन तीक्ष्णेन शस्त्रेण चमसचतुष्टयरूपेण कर्तुं विममुः। विशेषेण मानं कृतवंतः। किमिच्छंतः। उपमं सर्वेषामुपमानभूतं प्रशस्तं सोमलक्षणमन्नं नाधमानाः। याचमानाः। एतदेव विवृणोति। अमर्त्येषु मरणरहितेषु देवेषु मध्ये श्रवो हविर्लक्षणमन्नमिच्छमानाः। इच्छंतः। देवैः सह सोमपानं कामयमानास्तल्लाभाय चतुरश्चमसानकार्षुरित्यर्थः ॥ ममुः। माङ् माने शब्दे च। व्यत्ययेन परस्मैपदं। तेजनेन। अणोऽप्रगृह्यस्यानुनासिक इत्यनवसाने व्यत्ययेनाकारस्यानुनासिक्यं। ईषा अक्षादित्वात्प्रकृतिभावः। जेहमानं। वेहृ जेहृ वाहृ प्रयत्ने। भौवादिकः। अनुदात्तेत्त्वादात्मनेपदं। उपस्तुताः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। उपमं। माङ् माने। आतश्चोपसर्ग इति कप्रत्ययः। इच्छमानाः। व्यत्ययेनात्मनेपदं ॥

॥ इति प्रथमस्य सप्तमे त्रिंशो वर्गः ॥

षष्ठीमृचमाह ॥

आ मनीषामंतरिक्षस्य नृभ्यः स्रुचेव घृतं जुहवाम विद्मना।
तरणित्वा ये पितुरस्य सश्चिर ऋभवो वाजमरुहन्दिवो रजः ॥ ६ ॥

आ। मनीषां। अंतरिक्षस्य। नृऽभ्यः। स्रुचाऽइव। घृतं। जुहवाम। विद्मना।
तरणिऽत्वा। ये। पितुः। अस्य। सश्चिरे। ऋभवः। वाजं। अरुहन्। दिवः। रजः ॥ ६ ॥

अंतरिक्षस्यांतरिक्षलोकस्य मध्यमस्थानस्य संबंधिभ्यो नृभ्यो यज्ञस्य नेतृभ्य

ऋभुभ्यः। ऋभवो हि यज्ञस्य नेतारः। तेन हि देवत्वं प्राप्ताः। यद्वा। अंतरिक्षस्य लोकस्य नेतृभ्यः। मध्यमे स्थाने ह्येते पठ्यंते। तादृशेभ्यः सुचेव यथा सुचा जुह्वा घृतं क्षरणशीलाज्योपेतं हविराजुहवाम। मर्यादायामाकारः। यथाशास्त्रं प्रयच्छाम। एवमेव मनीषां स्तुतिं विद्मना वेदनेन कुर्म इति शेषः। अपि च ये ऋभवः पितुः सर्वस्य जगतः पालकस्यास्य सूर्यस्य तरणित्वा तरणित्वानि तरणकौशलानि सश्चिरे। सूर्यरश्मिभूताः संतः प्रापुः। तदुक्तं। आदित्यरश्मयोऽप्यृभव उच्यंत इति। ते ऋभवो दिवो रजः। रजःशब्दो लोकवाची। द्योतमानस्य स्वर्गाख्यस्य लोकस्य संबंधिनं वाजं सोमलक्षणमन्नमरुहन्। यागदानादिभिः कर्मभिरन्यैश्च देवोक्तैश्चमसचतुष्टयकरणादिकैः प्राप्नुवन्॥ सुचेव। सावेकाच इति विभक्तेरुदात्तत्वं। जुहवाम। हु दानादनयोः। लोट्याडुत्तमस्य पिच्चेत्याडागमः। विद्मना। विद ज्ञाने। औणादिको मनिः। न संयोगाद्वमंतादित्यल्लोपाभावः। तरणित्वा। तॄ प्लवनतरणयोः। अर्तिसृधृधम्यश्यवितृभ्योऽनिरिति कर्तर्यनिप्रत्ययः। तस्य भावस्तरणित्वं। शेश्छंदसि बहुलमिति शेर्लोपः। सश्चिरे। ग्लुंच षस्ज गतावित्यत्र सश्चिमप्येके पठंति। व्यत्ययेनात्मनेपदं। द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति वचनाद्द्विर्वचनाभावः। इरेचश्चित्त्वादंतोदात्तत्वं। यद्वृत्तान्नित्यमिति निघातप्रतिषेधः। अरुहन्। रुह बीजजन्मनि प्रादुर्भावे च। लुङि कृमृदृरुहिभ्यश्छंदसीति च्लेरङादेशः। दिवः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। रजः। रंज रागे। रजंत्यस्मिन्निति रजो लोकः। तदुक्तं लोका रजांस्युच्यंत इति। औणादिकोऽधिकरणेऽसुन्। रजकरजनरजःसूपसंख्यानमिति नलोपः। सुपां सुलुगिति षष्ठ्या लुक्॥

सप्तमीमृचमाह॥

ऋभुर्न इंद्रः शवसा नवीयानृभुर्वाजेभिर्वसुभिर्वसुर्ददिः।

युष्माकं देवा अवसाहनि प्रियेऽ३भि तिष्ठेम पृत्सुतीरसुन्वतां॥७॥

ऋभुः। नः। इंद्रः। शवसा। नवीयान्। ऋभुः। वाजेभिः। वसुऽभिः। वसुः। ददिः।

युष्माकं। देवाः। अवसा। अहनि। प्रिये। अभि। तिष्ठेम। पृत्सुतीः। असुन्वतां॥७॥

ऋभुर्विभ्वा वाज इति त्रयः सुधन्वनः पुत्राः। तत्र शवसा बलेन नवीयान् नवतरः प्रशस्ततर ऋभुर्नोऽस्माकमिंद्रः परमेश्वरः। अस्माकं रक्षक इत्यर्थः।

यद्वा । इंद्र एव प्रसंगादुरु भातीति नैरुक्तव्युत्पत्त्या ऋभुरिति स्तूयते । अपि च । वाजेभिर्वाजैरस्मभ्यं दातव्यैरन्नैर्वसुभिर्निवासहेतुभिर्धनैश्च ऋभुर्वसुरस्माकं निवासयिता । अत एव ददिस्तेषामन्नानां धनानां च दाता भवतु । परोऽर्धर्चः प्रत्यक्षकृतः । हे देवा दानादिगुणयुक्ता ऋभुप्रभृतयः । युष्माकं संबंधिनावसा रक्षणेन युक्ते प्रियेऽस्माकमनुकूलेऽहनि दिवसे वर्तमाना वयमसुन्वतां सुन्वद्यजमानविरोधिनां शत्रूणां पृत्सुतीः सेना अभितिष्ठेम ॥ नवीयान् । नवशब्दादातिशायनिक ईयसुन् । वाजेभिः । बहुलं छंदसीति भिस ऐसभावः । वसुः । वस निवासे । अस्मादंतर्भावितण्यर्थात् शृस्वृस्निहीत्यादिनोप्रत्ययः । निदित्यनुवृत्तेराद्युदात्तत्वं । ददिः । डुदाञ् दाने । आदृगमहन इति किप्रत्ययः । लिड्वद्भावादि । आतो लोप इटि चेत्याकारलोपः ॥

अष्टमीमृचमाह ॥

निश्चर्मण ऋभवो गामपिंशत सं वत्सेनासृजता मातरं पुनः ।
सौधन्वनासः स्वपस्यया नरो जिव्री युवाना पितराकृणोतन ॥ ८ ॥

निः । चर्मणः । ऋभवः । गां । अपिंशत । सं । वत्सेन । असृजत । मातरं । पुनरिति ।
सौधन्वनासः । सुऽअपस्यया । नरः । जिव्री इति । युवाना । पितरा । अकृणोतन ॥ ८ ॥

पुरा कस्यचिदृषेर्धेनुर्मृता । स ऋषिस्तस्या धेनोर्वत्सं दृष्ट्वा ऋभुं तुष्टाव । ऋभवस्तत्सदृशीमन्यां धेनुं कृत्वा तदीयेन चर्मणा संवीय तेन वत्सेन समयोजयन्निति । अयमर्थः पूर्वार्धे प्रतिपाद्यते । हे ऋभवो यूयं चर्मणश्चर्मणा त्वचा । तृतीयार्थे षष्ठी । गां धेनुं निरपिंशत । निःशेषेणाश्लिष्टां संयुक्तामकुरुत । तदनंतरं मातरं तां गां पुनर्वत्सेन समसृजत । संसृष्टामकुरुत । समगमयतेति यावत् । अपि च हे सौधन्वनासः सुधन्वन आंगिरसस्य पुत्राः । नरो यज्ञस्य नेतार ऋभवः स्वपस्यया शोभनकर्मेच्छया । यागदानाद्याचरणेनेति यावत् । जिव्री जीर्णौ वृद्धौ पितरा मातापितरौ युवाना पुनर्यौवनोपेतावकृणोतन । यूयमकृद्धं ॥ अपिंशत । पिश अवयवे । तौदादिकः । शे मुचादीनामिति नुम् । सौधन्वनासः । सुधन्वनः पुत्राः सौधन्वनाः । अन् । पा॰ ६. ४. १६७. । इति प्रकृतिभावः । आज्जसेरसुक् । आमंत्रितस्येत्याद्युदात्तत्वं । स्वपस्यया । शोभनमपः स्वपः । तदिच्छा स्वपस्या । सुप आत्मनः क्यच् । अ प्रत्ययादिति भावेऽकार-

प्रत्ययः। जिव्री। जूष् वयोहानौ। जृस्तृजागृभ्यः क्विन्। ऋत इद्धातोरितीत्वं। रेफवकारयोः स्थानविपर्ययः। बहुलवचनाद्धलि चेति दीर्घाभावः। निल्वादाद्युदात्तत्वं। युवाना। सुपां सुलुगिति विभक्तेराकारः। पितरा। पिता च माता च पितरौ। पिता मात्रा। पा० १. २. ७०.। इति पिता शिष्यते। पूर्ववद्विभक्तेराकारः। अकृणोतन। कृवि हिंसाकरणयोश्च। इदित्वान्नुम्। धिन्विकृण्व्योरश्चेत्युप्रत्ययः। तत्संनियोगेन वकारस्य चाकारः। अतो लोपे सति तस्य स्थानिवद्भावाल्लघूपधगुणाभावः। लङ्मध्यमबहुवचनस्य तशब्दस्य तप्तनप्तनथनाश्चेति तनबादेशः। तस्य पित्त्वेन ङित्त्वाभावाद्गुणः॥

नवमीमृचमाह॥

वाजे॑भिर्नो॒ वाज॑सातावविड्ढ्यृभु॒माँ इं॑द्र चि॒त्रमा द॑र्षि॒ राधः॑।
तन्नो॑ मि॒त्रो वरु॑णो मामहंता॒मदि॑तिः॒ सिंधुः॑ पृथि॒वी उ॒त द्यौः॥ ९॥

वाजे॑भिः। नः॒। वाज॑ऽसातौ। अ॒वि॒ड्ढि॒। ऋ॒भु॒ऽमान्। इं॒द्र॒। चि॒त्रं। आ। द॒र्षि॒। राधः॑।
तत्। नः॒। मि॒त्रः। वरु॑णः। म॒म॒हं॒ता॒म्। अदि॑तिः। सिंधुः॑। पृ॒थि॒वी। उ॒त। द्यौः॥ ९॥

हे इंद्र ऋभुमान्। ऋभुर्विभ्वा वाज इति त्रयोऽप्यृभुशब्देनोपचारादत्रोच्यंते। तैर्युक्तस्त्वं वाजसातौ वाजस्यान्नस्य संभजने निमित्तभूते सति वाजेभिरन्नैरविड्ढि। अस्मान्व्याप्नुहि। यद्वा वाजसातिरिति संग्रामनाम। वाजसातौ संग्रामे वाजेभिर्वाजेन युक्तैरश्वैरविड्ढि। अस्मान् रक्ष। अपि च। चित्रं चायनीयं राधो धनमादर्षि। अस्मभ्यं दातुमाद्रियस्व। तृतीयसवने ऋभुभिः सहेंद्रस्यावस्थानात् प्रसंगादत्रेंद्रस्तुतिः। यदेतदस्माभिः प्रार्थितमस्मदीयं तन्मित्रादयो मामहंतां। पूजयंतां॥ वाजसातौ। वन षण संभक्तौ। भावे क्तिन्। जनसनखनां सञ्झलोरित्यात्वं। वाजानां सातिर्यस्मिन्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। अविड्ढि। विष्लृ व्याप्तौ। लोटो हिः। बहुलं छंदसीति शपो लुक्। हुझल्भ्यो हेर्धिः। ष्टुत्वजश्त्वे। छंदस्यपि दृश्यत इति दृशिग्रहणाल्लोट्यडागमः। यद्वा। अवतेर्लोटि सिब्बहुलं लेटीति बहुलवचनाद्विकरणः सिप्। तस्यार्धधातुकत्वादिट्। आदेशप्रत्यययोरिति षत्वं। धित्वादि पूर्ववत्। ऋभुमान्। ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं। दर्षि। दृङ् आदरे। लोटि व्यत्ययेन परस्मैपदं। बहुलं छंदसीति विकरणस्य लुक्॥

॥ इति प्रथमस्य सप्तम एकत्रिंशो वर्गः॥

तक्षन्निति पंचर्चं षष्ठं सूक्तं कुत्सस्यार्षमार्भवं। पंचमी त्रिष्टुप्। शिष्टाश्चतस्रो जगत्यः। तथा चानुक्रांतं। तक्षन् पंचांत्या त्रिष्टुप्। अग्निष्टोमे वैश्वदेवशस्त्र इदं सूक्तमार्भवं निविद्धानं। सूचितं च। तक्षन्रथमयं वेनश्चोदयत्पृश्निगर्भा। आ० ५. १८.। इति ॥

तत्र प्रथमामृचमाह ॥

तक्ष॒न्रथं॑ सु॒वृतं॑ विद्म॒नाप॑स॒स्तक्ष॒न्हरी॑ इंद्र॒वाहा॒ वृष॑ण्वसू।
तक्ष॑न्पि॒तृभ्या॑मृ॒भवो॒ युव॒द्वय॒स्तक्ष॑न्व॒त्साय॑ मा॒तरं॑ सचा॒भुवं॑ ॥१॥

तक्ष॑न्। रथं॑। सु॒ऽवृतं॑। वि॒द्म॒नाऽअ॑पसः। तक्ष॑न्। हरी॒ इति॑। इं॒द्र॒ऽवाहा॑। वृष॑ण्वसू॒ इति॒ वृष॑ण्ऽवसू।
तक्ष॑न्। पि॒तृऽभ्यां॑। ऋ॒भवः॑। युव॑त्। वयः॑। तक्ष॑न्। व॒त्साय॑। मा॒तरं॑। स॒चा॒ऽभुवं॑ ॥१॥

विद्मनापस उत्कृष्टेन ज्ञानेन निष्पाद्यकर्माणो लाभवत्कर्माणो वा ऋभवो रथमश्विनोरारोहणार्थं सुवृतं शोभनवर्तनं सुचक्रं वा तक्षन्। अकुर्वन्। तथेंद्रवाहा इंद्रस्य वाहनभूतौ हरी हरणशीलावेतत्संज्ञकावश्वौ तक्षन्। कृतवंतः। कीदृशौ। वृषण्वसू। सेचनसमर्थेन दृढतरेण धनेन बलेन वा युक्तौ। अपि च। पितृभ्यां स्वकीयाभ्यां मातापितृभ्यां वृद्धाभ्यां युवद्यौवनोपेतं वय आयुर्ऋभवस्तक्षन्। कृतवंतः। तथा वत्साय मातरं गां सचाभुवं सहभुवं सह वर्तमानां तक्षन्। अकुर्वन् ॥ तक्षन्। तक्षू त्वक्षू तनूकरणे। लङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। सुवृतं। शोभनं वर्तत इति सुवृत्। वृतु वर्तने। क्विप् चेति क्विप्। विद्मनापसः। विद ज्ञाने। अन्येभ्योऽपि दृश्यंत इति दृशिग्रहणाद्भावे मनिन्। संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावः। बहुलवचनादलुक्। यद्वा। विद्लृ लाभे। औणादिको भावे मक्। ततः पामादिलक्षणो नप्रत्ययः। विद्मनं लाभवदपः कर्म येषां। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। छांदसः पूर्वसवर्णदीर्घः। इंद्रवाहा। इंद्रं वहत इतींद्रवाहौ। वहश्चेति ण्विप्रत्ययः। अत उपधाया इति वृद्धिः। सुपां सुलुगिति विभक्तेराकारः। वृषण्वसू। वृष सेचने। कनिन्युवृषितक्षीत्यादिना कनिन्। नित्वादाद्युदात्तत्वं। वृषण्वस्वश्वयोरुपसंख्यानं। पा० १. ४. १८. ३.। इति वसुशब्द उत्तरपदे वृषण्भावः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। युवत्। अत्र युवत्शब्दः सामर्थ्यात्पूर्ववत्प्रवृत्तिनिमित्तं युवत्वमात्रमाचष्टे। तदस्मिन्नस्तीति युवत्। छांदसो वर्णलोपः ॥

द्वितीयामृचमाह ॥

आ नो यज्ञाय तक्षत ऋभुमद्वयः क्रत्वे दक्षाय सुप्रजावतीमिषं।
यथा क्षयाम सर्ववीरया विशा तन्नः शर्धाय धासथा स्विंद्रियं ॥ २ ॥

आ। नः। यज्ञाय। तक्षत। ऋभुऽमत्। वयः। क्रत्वे। दक्षाय। सुऽप्रजावतीं। इषं।
यथा। क्षयाम। सर्वऽवीरया। विशा। तत्। नः। शर्धाय। धासथ। सु। इंद्रियं ॥ २ ॥

हे ऋभवः। नोऽस्माकं यज्ञाय यज्ञार्थं ऋभुमदुरुभासनयुक्तं वयो हविर्लक्षणमन्नमातक्षत। आ समंतादुत्पादयत। एतदेव विव्रियते। क्रत्वे क्रतवेऽस्मदीयाय कर्मणे दक्षाय बलाय च। तादर्थ्ये चतुर्थी। एतदुभयार्थं सुप्रजावतीं शोभनाभिः पुत्रपौत्रादिलक्षणाभिः प्रजाभिर्युक्तामिषमन्नमातक्षतेति शेषः। अपि च। सर्ववीरया सर्ववीरैः पुत्रादिभिरुपेतया विशा प्रजया सह यथा येन प्रकारेण क्षयाम। सुखेन निवसाम। तन्नाहशमिंद्रियं। धननामैतत्। धनं नोऽस्मभ्यं शर्धाय बलार्थं सु धासथ। सुष्ठु धत्त। प्रयच्छतेत्यर्थः ॥ ऋभुमत्। उरु भातीति नैरुक्तव्युत्पत्त्या ऋभुशब्दः प्रकाशमात्रवाची। ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं। क्रत्वे। जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणाभावे यणादेशः। क्षयाम। क्षि निवासगत्योः। व्यत्ययेन शप्। धासथा। धाञो लेट्यडागमः। सिब्बहुलं लेटीति सिप्। अन्येषामपि दृश्यत इति संहितायां दीर्घत्वं ॥

तृतीयामृचमाह ॥

आ तक्षत सातिमस्मभ्यमृभवः सातिं रथाय सातिमर्वते नरः।
सातिं नो जैत्रीं सं महेत विश्वहा जामिमजामिं पृतनासु सक्षणिं ॥ ३ ॥

आ। तक्षत। सातिं। अस्मभ्यं। ऋभवः। सातिं। रथाय। सातिं। अर्वते। नरः।
सातिं। नः। जैत्रीं। सं। महेत। विश्वहा। जामिं। अजामिं। पृतनासु। सक्षणिं ॥ ३ ॥

हे नरो यज्ञस्य नेतार ऋभवः। अस्मभ्यमनुष्ठातृभ्यः सातिं संभजनीयमन्नं धनं वातक्षत। आ समंतात्कुरुत। तथास्मदीयाय रथाय रंहणशीलाय पुत्रादये रथायैव वा सातिं संभजनीयं धनमातक्षत। तथार्वतेऽश्वाय सातिं संभजनीयमन्नं धनं वाश्वयोग्यमातक्षतेत्येव। किंच। विश्वहा सर्वेष्वहःसु नोऽस्माकं जैत्रीं जयशीलामपरिमितत्वेन सर्वाधिकां सातिं संभजनीयं धनं संमहेत। सर्वो

जनः सम्यक् पूजयतु। वयं च पृतनासु संग्रामेषु जामिं सहजातमजामिं सहानुत्पन्नं शत्रुं वा सक्षणिमस्मानभिभवंतं युष्मत्प्रसादादभिभवेमेति शेषः ॥ सातिं। ऊतियूतिसातीत्यादिना क्तिन उदात्तत्वं। महेत। मह पूजायां। सक्षणिं। षह अभिभवे। औणादिकः सनिप्रत्ययः। ढत्वकत्वषत्वानि ॥

चतुर्थीमृचमाह ॥

ऋभुक्षणमिंद्रमा हुव ऊतयं ऋभून्वाजान्मरुतः सोमपीतये।
उभा मित्रावरुणा नूनमश्विना ते नो हिन्वंतु सातये धिये जिषे ॥४॥

ऋभुक्षणं। इंद्रं। आ। हुवे। ऊतये। ऋभून्। वाजान्। मरुतः। सोमऽपीतये।
उभा। मित्रावरुणा। नूनं। अश्विना। ते। नः। हिन्वंतु। सातये। धिये। जिषे ॥४॥

ऋभुक्षणं। महन्नामैतत्। महांतमिंद्रमा हुवे। आह्वयामि। किमर्थं। ऊतये। रक्षणार्थं। तथा ऋभून्वाजान्। ऋभुर्विभ्वा वाज इति त्रयः सुधन्वनः पुत्राः। तत्र प्रथमोत्तमवाचकशब्दाभ्यां मध्यमोऽपि लक्ष्यते। अतः शब्दद्वयेन त्रयोऽप्युच्यंते। तदुक्तं यास्केन। प्रथमोत्तमाभ्यां बहुवन्निगमा भवंति न मध्यमेन। नि० ११.१६.। इति। एवंविधानृभून्मरुतश्च सोमपीतये सोमपानायाह्वयामि। तथोभा युगलरूपेण संहत्य वर्तमानौ द्वौ मित्रावरुणावश्विनौ च नूनमवश्यं सोमपानायाह्वयामीति शेषः। अपि च। आहूताश्चेंद्रादयो नोऽस्मान् हिन्वंतु। प्रेरयंतु गमयंत्वित्यर्थः। किमर्थं। सातये। संभजनीयाय धनाय। धिये। धनसाध्याय कर्मणे। जिषे। जेतुं शत्रूणां जयार्थं च ॥ ऋभुक्षणं। उरुभासमाने स्थाने क्षियति निवसतीत्यृभुक्षाः। उरुपूर्वाद्भातेर्मृगय्वादयश्चेति कुप्रत्ययः। आतो लोप इटि चेत्याकारलोपः पूर्वपदस्य ऋभावश्च। ऋभुशब्दोपपदात्क्षि निवासगत्योरित्यस्मात्पतेस्थ चेति विधीयमान इनिप्रत्ययो बहुलवचनाद्भवति। टिलोपः। इतोऽत्सर्वनामस्थान इत्यत्वमिकारस्य। वा षपूर्वस्य निगम इति विकल्पनादुपधादीर्घाभावः। यद्वा अर्तेर्भुक्षिनक्। कित्त्वाद्गुणाभावः। अत एव नावगृह्यते। पीतये। पा पाने। स्थागापापचो भाव इति भावे क्तिन्। घुमास्थेतीत्वं। दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं। हिन्वंतु। हि गतौ वृद्धौ च। अस्मादंतर्भावितण्यर्थाल्लोटि स्वादित्वात् श्नुः। जिषे। जि जये। तुमर्थे सेसेनिति क्सेप्रत्ययः ॥

पंचमीमृचमाह ॥

ऋभुर्भराय सं शिशातु सातिं समर्यजिद्वाजो अस्माँ अविष्टु ।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ ५ ॥

ऋभुः । भराय । सं । शिशातु । सातिं । समर्यऽजित् । वाजः । अस्मान् । अविष्टु ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ ५ ॥

ऋभुः प्रथमोऽस्माकं सातिं संभजनीयं धनं भराय संग्रामार्थं संशिशातु । सम्यक् तीक्ष्णीकरोतु । संग्रामोचितं धनमस्मभ्यं प्रयच्छत्वित्यर्थः । तथा समर्यजित् । मर्या मनुष्याः । तैः सह वर्तत इति समर्यः संग्रामः । तत्र शत्रूणां जेता वाज एतत्संज्ञस्तृतीयश्चास्मान् स्तोतॄनविष्टु । अवतु । संग्रामाद्रक्षत्वित्यर्थः । यदनेन सूक्तेन प्रार्थितमस्मदीयं तन्मित्रादयो मामहंतां । पूजयंतु ॥ शिशातु । शो तनूकरणे । बहुलं छंदसीति विकरणस्य श्लुः । आदेच इत्यात्वं । द्विर्भावः । ह्रस्वत्वेन बहुलं छंदसीत्यभ्यासस्येत्वं । अविष्टु । अवतेर्लोटि सिब्बहुलं लेटीति बहुलग्रहणात्सिप् । इडागमः । षत्वष्टुत्वे ॥

॥ इति प्रथमस्य सप्तमे द्वात्रिंशो वर्गः ॥

ईळे इति पंचविंशत्यृचं सप्तमं सूक्तं । आंगिरसस्य कुत्सस्यार्षं । चतुर्विंशीपंचविंश्यौ त्रिष्टुभौ शिष्टास्त्रयोविंशतिर्जगत्यः । आद्यः पादो द्यावापृथिव्यः । द्वितीय आग्नेयः । शिष्टं सूक्तमाश्विनं । तथा चानुक्रांतं । ईळे पंचाधिकाश्विनमाद्यौ पादौ लिंगोक्तदेवतावंत्ये त्रिष्टुभाविति ॥ प्रवर्ग्येऽभिष्टवेऽप्येतत्सूक्तं । सूत्रितं च । ग्रावाणेवेळे द्यावापृथिवी इति । आ० ४.६. । इति ॥ प्रातरनुवाके चाश्विने क्रतौ जागते छंदस्येतत्सूक्तं । सूत्रितं च । अगन्महातारिष्मेळे द्यावापृथिवी इति जागतं । आ० ४.१५. । इति ॥ आश्विनशस्त्रेऽप्येतत् प्रातरनुवाकन्यायेनातिदेशात् ॥ तथाप्तोर्यामे संति चत्वार्यतिरिक्तोक्थानि । तत्राच्छावाकातिरिक्तोक्थ एतत्सूक्तं यस्य पशव इति खंडे सूत्रितं । ईळे द्यावापृथिवी उभा उ नूनं । आ० ९.११. । इति ॥

तत्र प्रथमामृचमाह ॥

ईळे द्यावापृथिवी पूर्वचित्तयेऽग्निं घर्मं सुरुचं यामन्निष्टये।
याभिर्भरे कारमंशाय जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतं ॥ १ ॥

ईळे। द्यावापृथिवी इति। पूर्वऽचित्तये। अग्निं। घर्मं। सुऽरुचं। यामन्। इष्टये।
याभिः। भरे। कारं। अंशाय। जिन्वथः। ताभिः। ऊं इति। सु। ऊतिऽभिः।
अश्विना। आ। गतं ॥ १ ॥

अहं द्यावापृथिवी द्यावापृथिव्यावीळे। स्तौमि। किमर्थं। पूर्वचित्तये। पूर्वमेवाश्विनोः प्रज्ञापनाय। ते ह्यश्विनौ प्रत्यासन्ने। यद्वा द्यावापृथिवी अश्विनौ स्तौमि पूर्वचित्तये। अन्यदीयात्स्तोत्रात्पूर्वमेवास्मदीयस्य स्तोत्रस्य प्रबोधनाय। तथा चोक्तं। तत्कावश्विनौ द्यावापृथिव्यावित्येक इति। अपि च। यामन् यामन्यश्विनोरागमने सतीष्टये तदीययागार्थमाहवनीयरूपेण स्थापितमग्निं स्तौमीति शेषः। कीदृशमग्निं। घर्मं। प्रवृंजनेन दीप्तं। सुरुचं। अत एव शोभनकांतियुक्तं। हे अश्विनौ भरे। संग्रामनामैतत्। संग्रामेऽंशाय युष्मदीयभागाय जयप्राप्त्यर्थं याभिरूतिभिः पालनैः सहागत्य कारं। कारशब्दः शंखवाची। तेन ह्यभियुक्ताः संगिरंते। कारं शब्दकारिणं शंखं जिन्वथः। मुखेनापूरयथः। ताभिस्तादृशैरूतिभिः पालनैः सह। उ इति समुच्चये। अस्मानपि सुष्ठागतं। आगच्छतं ॥ ईळे। ईड स्तुतौ। उत्तमैकवचनमिट्। अदादित्वाच्छपो लुक्। अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः। द्यावापृथिवी। द्यौश्च पृथिवी च। दिवो द्यावेति द्यावादेश आद्युदात्तो निपातितः। पृथिवीशब्दो ङीषंतोऽंतोदात्तः। देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं। अपृथिवीति पर्युदासान्नोत्तरपदेऽनुदात्तादाविति निषेधाभावः। वा छंदसीति पूर्वसवर्णदीर्घत्वं। पूर्वचित्तये। चिती संज्ञाने। अस्मादंतर्भावितण्यर्थाद्भावे क्तिन्। मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं। सुरुचं। रुच दीप्तावभिप्रीत्यां च। संपदादिलक्षणो भावे क्विप्। शोभना रुक् यस्य। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। यामन्। या प्रापणे। आतो मनिन्निति कृत्यल्युटो बहुलमिति बहुलवचनाद्भावे मनिन्। कारं। क्रियतेऽनेनेति कारः। करणे घञ्। कर्षात्वत इत्यंतोदात्तत्वं। जिन्वथः। जिवि प्रीणनार्थः। अत्र प्रीणनहेतुभूतमापूरणं लक्ष्यते। धनेनापूरितो हि पुरुषः प्रीतो भवति। इदित्त्वान्नुम्। भौवादिकः। शपः पित्त्वादनुदात्तत्वं। तिङोऽदुपदेशाल्लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। यद्वृत्ताद्नि-

त्यमिति निघातप्रतिषेधः। तत्र हि व्यवहितेऽपि कार्यमिष्यत इत्युक्तं। ऊ षु। इकः सुञीति दीर्घत्वं। सुञ इति षत्वं। ईषाअक्षादित्वात्सुञ उकारस्य प्रकृतिभावः। ऊतिभिः। अवतेर्भावे क्तिन्। ज्वरत्वरेत्यादिना वकारस्योपधायाश्च ऊट्। ऊतियूतीत्यादिना निपातनात् क्तिन उदात्तत्वं। गतं। गमेर्लोटि बहुलं छंदसीति विकरणस्य लुक्। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः॥

द्वितीयामृचमाह॥

युवोर्दानाय सुभरा असश्चतो रथमा तस्थुर्वचसं न मंतवे।
याभिर्धियोऽवथः कर्मन्निष्टये ताभिरू षु ऊतिभिरश्विना गतं॥२॥

युवोः। दानाय। सुऽभराः। असश्चतः। रथं। आ। तस्थुः। वचसं। न। मंतवे।
याभिः। धियः। अवथः। कर्मन्। इष्टये। ताभिः। ऊं इति। सु। ऊतिऽभिः।
अश्विना। आ। गतं॥२॥

सुभराः शोभनस्तोत्रभरणा असश्चतोऽन्यत्रानासक्ताः स्तोतारो हे अश्विनौ युवोर्युवयो रथमातस्थुः। आतिष्ठंति। प्राप्नुवंति। किमर्थं। दानाय। युष्मत्कर्तृकदानार्थं। धनलाभायेत्यर्थः। तत्र दृष्टांतः। वचसं न। यथा न्यायोपेतेन वचसा वाक्येन युक्तं विपश्चितं मंतवे बुभुत्सितार्थप्रतिपत्तये स्तोतारः प्राप्नुवंति तद्वत्। अपि च। कर्मन् कर्मणीष्टये यागार्थं प्रवृत्तान्धियो ध्यातॄन्विशिष्टज्ञानोपेतान्याभिरूतिभिः पालनैरवथः। युवां रक्षथः। ताभिरित्यादि पूर्ववत्॥ वचसं। अर्शआदित्वान्मत्वर्थीयोऽच्। मंतवे। मन ज्ञाने। कमिमनिजनीत्यादिना तुप्रत्ययः। धियः। ध्यायंतीति धियः स्तोतारः। ध्यै चिंतायां। क्विप् चेति क्विप्। चशब्देन दृशिग्रहणानुकर्षणात्संप्रसारणं। कर्मन्। सुपां सुलुगिति सप्तम्या लुक्। न ङिसंबुद्ध्योरिति नलोपप्रतिषेधः॥

तृतीयामृचमाह॥

युवं तासां दिव्यस्य प्रशासने विशां क्षयथो अमृतस्य मज्मना।
याभिर्धेनुमस्वं१ पिन्वथो नरा ताभिरू षु ऊतिभिरश्विना गतं॥३॥

युवं। तासां। दिव्यस्य। प्रऽशासने। विशां। क्षयथः। अमृतस्य। मज्मना।
याभिः। धेनुं। अस्वं। पिन्वथः। नरा। ताभिः। ऊं इति। सु। ऊतिऽभिः।
अश्विना। आ। गतं॥३॥

हे नरा नेतारावश्विनौ दिव्यस्य दिवि भवस्य स्वर्गसमुत्पन्नस्यामृतस्य सोमस्य पानेनोत्पन्नेन मज्मना बलेन युक्तौ युवां तासां यास्त्रिषु लोकेषु वर्तंते तासां सर्वासां विशां प्रजानां प्रशासने प्रकृष्टानुशासने शिक्षणे क्षयथः। ऐश्वर्यकर्मायं। ईशाथे। समर्थौ भवथः। यद्वा मज्मनान्येषामसाधारणेन बलेन विशां प्रजानां दिविभवस्यामृतस्य वृष्ट्युदकस्य प्रशासने प्रदानेन क्षयथः। ईश्वरौ भवथः। अपि च। याभिरूतिभी रक्षाभिरस्वं प्रसवासमर्थां धेनुं गां शयुनाम्ने ऋषये पिन्वथः। सिंचथः। पयसा पूरितवंतावित्यर्थः। ताभिरूतिभिरित्यादि पूर्ववत्॥ अस्वं। षूङ् प्राणिगर्भविमोचने। सवनं सूः। संपदादिलक्षणो भावे क्विप्। नास्ति सूर्यस्यामित्यसूः। नञ्सुभ्यामित्यत्युत्तरपदांतोदात्तत्वं। अमि ओः सुपीति यणादेशः। उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं। पिन्वथः। पिवि सेचने। इदित्वान्नुम्। भौवादिकः॥

चतुर्थीमृचमाह॥

याभिः परिज्मा तनयस्य मज्मना द्विमाता तूर्षु तरणिर्विभूषति।
याभिस्त्रिमंतुरभवद्विचक्षणस्ताभिरू षु ऊतिभिरश्विना गतं॥४॥

याभिः। परिऽज्मा। तनयस्य। मज्मना। द्विऽमाता। तूर्षु। तरणिः। विऽभूषति।
याभिः। त्रिऽमंतुः। अभवत्। विऽचक्षणः। ताभिः। ऊं इति। सु। ऊतिऽभिः।
अश्विना। आ। गतं॥४॥

परिज्मा परितो गंता वायुस्तनयस्यात्मीयस्य पुत्रस्याग्नेः। अग्निर्हि व्यानवृत्त्यात्मना वर्तमानेन वायुना मथ्यमानः सन् जायते। तथा च श्रूयते। अथ यः प्राणापानयोः संधिः स व्यानः। अतो यान्यन्यानि वीर्यवंति कर्माणि यथाग्नेर्मंथनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्ननपानंस्तानि करोतीति। यद्वा सृष्ट्यादौ वायुसकाशादुत्पन्नत्वादग्नेः पुत्रत्वं। आम्नायते च। वायोरग्निरिति। एवं स्वपुत्रस्याग्नेर्मज्मना बलेन युक्तः सन् द्विमाता द्वयोर्लोकयोर्निर्माता। अग्निः पृथिवीस्थानो वायुरंतरिक्षस्थानः। उभयोर्मिलितयोरुभयनिर्मातृत्वमुपपन्नं। यद्वा द्विमातेति तनयस्य विशेषणं। सुपां सुलुगिति षष्ठ्याः सुः। द्विमातृकस्य द्वाभ्यामरणिभ्यां जातस्य। एवंभूतो वायुर्हे अश्विनावूतिभिर्हेतुभूतैः पालनैस्तूर्षु तरीतृषु धावत्सु मध्ये तरणिरतिशयेन तरीता शीघ्रगामी

विभूषति। व्याप्तो भवति। यद्वा विशेषेण सर्वमलंकरोति। अपि च। त्रिमंतुस्त्रयाणां मंता त्रिविधेषु पाकयज्ञहविर्यज्ञसोमयज्ञेष्वासादितज्ञानः कक्षीवान् याभिर्युष्मदीयाभिरूतिभिर्विचक्षणो विशिष्टज्ञानयुक्तोऽभवत्। ताभिः सर्वाभिरूतिभिरस्मानागच्छतं ॥ परिज्मा। परिपूर्वादज गतिक्षेपणयोरित्यस्मात् श्वन्नुक्षन्नित्यादौ निपात्यते। तूर्षु। तॄ प्लवनतरणयोः। बहुलं छंदसीत्युत्वं। हलि चेति दीर्घः। यद्वा तरतेः क्विप्। ज्वरत्वरेत्यादिना वकारोपधयोरूट्। सावेकाच इति विभक्तेरुदात्तत्वं। विभूषति। भवतेर्लेट्युडागमः। सिब्बहुलं लेटीति सिप्। यद्वा भूष अलंकारे। भौवादिकः। विचक्षणः। अनुदात्तेतश्च हलादेरिति युच्॥

पंचमीमृचमाह ॥

याभी रेभं निवृतं सितमद्भ्य उद्वंदनमैरयतं स्वर्दृशे।
याभिः कण्वं प्र सिषासंतमावतं ताभिरू षु ऊतिभिरश्विना गतं ॥ ५ ॥

याभिः। रेभं। निऽवृतं। सितं। अत्ऽभ्यः। उत्। वंदनं। ऐरयतं। स्वः। दृशे।
याभिः। कण्वं। प्र। सिसासंतं। आवतं। ताभिः। ऊं इति। सु। ऊतिऽभिः।
अश्विना। आ। गतं ॥ ५ ॥

हे अश्विनौ याभिरूतिभी रेभमेतत्संज्ञमृषिं निवृतमसुरैः कूपेऽप्सु निवारितं सितं तदीयैः पाशैर्बद्धमेवंभूतमृषिमद्भ्यः सकाशादुदैरयतं। उदागमयतं। तथा वंदनमेतत्संज्ञमृषिं च तथाभूतमुदैरयतं। किमर्थं। स्वरादित्यं दृशे द्रष्टुं। अपि च कण्वमसुरैरंधकारे प्रक्षिप्तं सिषासंतमालोकं संभक्तुमिच्छंतं याभिरूतिभिः प्रावतं प्रकर्षेण रक्षतं ताभिरित्यादि समानं ॥ रेभं। रेभृ शब्दे। रेभते स्तौतीति रेभः। पचाद्यच्। निवृतं। वृञ् वरणे। अस्मादंतर्भावितण्यर्थात्कर्मणि निष्ठा। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। सितं। षिञ् बंधने। अद्भ्यः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। वंदनं। वदि अभिवादनस्तुत्योः। वंदते स्तौतीति वंदनः। नंद्यादिलक्षणो ल्युः। लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं। स्वरित्येतद्दिवश्चादित्यस्य च साधारणनामधेयं। तदुक्तं यास्केन। स्वरादित्यो भवति सु अरणः सु ईरणः। नि० २. १४.। इति। स्वरादि निपातमव्ययं। पा० १. १. ३७.। इत्यव्ययत्वात्सुपो लुक्। दृशे। दृशे विख्ये चेति दृशेस्तुमर्थे केप्रत्ययांतो निपात्यते। सिषासंतं। वन षण संभक्तौ। सनि सनीवंतर्धेत्यादिना विकल्प-

नादिडभावः । जनसनखनां सञ्झलोरित्यात्वं । द्विर्भावेऽभ्यासस्य ह्रस्वत्वं । सन्यत इतीत्वं ॥

॥ इति प्रथमस्य सप्तमे त्रयस्त्रिंशो वर्गः ॥

षष्ठीमृचमाह ॥

याभिरंतकं जसमानमारणे भुज्युं याभिरव्यथिभिर्जिजिन्वथुः ।
याभिः कर्कंधुं वय्यं च जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतं ॥ ६ ॥

याभिः । अंतकं । जसमानं । आऽअरणे । भुज्युं । याभिः । अव्यथिऽभिः । जिजिन्वथुः ।
याभिः । कर्कंधुं । वय्यं । च । जिन्वथः । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना ।
आ । गतं ॥ ६ ॥

आरणमगाधं तडागादि कूपादि वा । तत्रासुरैः प्रक्षिप्तं जसमानं तैर्हिंस्यमानमंतकं शत्रूणामंतकरमेतत्संज्ञं राजर्षिं हे अश्विनौ याभिरूतिभिरवथः । रक्षथः । तथा भुज्युं सर्वस्य पालकमेतत्संज्ञं समुद्रमध्ये निमग्नं तुग्रस्य पुत्रं राजर्षिं याभिरूतिभी रक्षणहेतुभूताभिरव्यथिभिर्व्यथारहिताभिर्नाभिर्जिजिन्वथुः । युवामतर्पयतं । एतच्च मंत्रांतरे तुग्रो ह भुज्युमश्विनोदमेघ इत्यादिके विस्पष्टयिष्यते । अपि च । कर्कंधुं वय्यं चैतत्संज्ञकौ चासुरौ पीड्यमानौ याभिरूतिभिर्जिन्वथः । प्रीणयथः । गतमन्यत् ॥ जसमानं । जस हिंसायां । यकि प्राप्ते व्यत्ययेन शप् । आरणे । आङ्पूर्वादर्तेर्ल्युट् । जिजिन्वथुः । जिवि प्रीणनार्थः । लिट्युसि रूपं ॥

सप्तमीमृचमाह ॥

याभिः शुचंतिं धनसां सुषंसदं तप्तं घर्ममोम्यावंतमत्रये ।
याभिः पृश्निगुं पुरुकुत्समावतं ताभिरू षु ऊतिभिरश्विना गतं ॥ ७ ॥

याभिः । शुचंतिं । धनऽसां । सुऽसंसदं । तप्तं । घर्मं । ओम्याऽवंतं । अत्रये ।
याभिः । पृश्निऽगुं । पुरुऽकुत्सं । आवतं । ताभिः । ऊं इति । सु । ऊतिऽभिः ।
अश्विना । आ । गतं ॥ ७ ॥

हे अश्विनौ धनसां धनस्य संभक्तारं शुचंतिमेतन्नामानं सुषंसदं । सीदंत्यस्मिन्निति संसद्गृहं । शोभनसंसदं याभिरूतिभिरकुरुतं । तथात्रये याभिश्चोतिभिस्तप्तं

प्रवृंजनेन संतप्तं घर्मं महावीरमोम्यावंतं सुखयुक्तं सुखेन स्प्रष्टुं शक्यमकुरुतं। यद्वा शतद्वारे यंत्रगृहेऽसुरैः पीड्यमानाय घर्मे दीप्तं पीडासाधनमग्निं तप्तं तापकारिणमोम्यावंतं सुखवंतमकुरुतं। यथास्मै सुखं भवति तथा हिमेनोदकेन तमग्निमवारयेथां। यास्कपक्षे त्वत्रये हविषामत्रेऽग्नये हविरुत्पत्त्यर्थं सूर्यकिरणसंतप्तं घर्मं नैदाघमहरोम्यावंतं तृप्तिहेतुवृष्ट्युदकोपेतं कृतवंताविति योज्यं। अपि च याभिरूतिभिः पृश्निगुं पुरुकुत्सं चावतं। अरक्षतं। ताभिः सर्वाभिरूतिभिरस्मानागच्छतं॥ शुचंतिं। शुच दीप्तौ। औणादिको झिच्। धनसां। जनसनखनक्रमगमो विट्। विड्वनोरनुनासिकस्यादित्यात्वं। सुषंसदं। शोभना संसद्यस्य। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। ओम्यावंतं। अवतेरन्येभ्योऽपि दृश्यंत इति मनिन्। ज्वरत्वरेत्यादिना वकारस्योपधायाश्च ऊट्। गुणः। छंदसि चेत्यर्हार्थे यप्रत्ययः। नस्तद्धित इति टिलोपः। ये चाभावकर्मणोरिति प्रकृतिभावस्तु व्यत्ययेन न प्रवर्तते। पृश्निगुं। पृश्नयो नानावर्णा गावो यस्य स तथोक्तः। गोस्त्रियोरुपसर्जनस्येति गोशब्दस्य ह्रस्वत्वं॥

अष्टमीमृचमाह॥

याभिः शचीभिर्वृषणा परावृजं प्रांधं श्रोणं चक्षस एतवे कृथः।
याभिर्वर्तिकां ग्रसिताममुंचतं ताभिरू षु ऊतिभिरश्विना गतं॥८॥

याभिः। शचीभिः। वृषणा। पराऽवृजं। प्र। अंधं। श्रोणं। चक्षसे। एतवे। कृथः।
याभिः। वर्तिकां। ग्रसितां। अमुंचतं। ताभिः। ऊं इति। सु। ऊतिऽभिः। अश्विना।
आ। गतं॥८॥

हे वृषणा कामानां वर्षितारावश्विनौ याभिः शचीभिः कर्मभिः प्रज्ञाभिर्वा परावृजमेतन्नामकमृषिं पंगुं संतमपंगुमकुरुतं। तथांधं दृष्टिरहितं संतमृज्राश्वमृषिं चक्षसे प्रकाशाय सम्यक् चक्षुषा दर्शनाय याभिरूतिभिः प्रकृथः। प्रकर्षेण कुरुथः। याभिश्च श्रोणं विगुणजानुकमेव संतमृषिमेतवे गंतुं प्रकृथः। प्रकर्षेण कृतवंतौ। अपि च। याभिरूतिभिर्वर्तिकां चटकसदृशस्य पक्षिणः स्त्रियं ग्रसितां वृकेण ग्रस्ताममुंचतं। वृकास्यान्निर्मुक्तामकुरुतं। यास्कपक्षे तु वृकेण विवृतज्योतिष्केण सूर्येण याभिर्ग्रस्तां वर्तिकां प्रत्यहमावर्तमानामुषसं तस्मादमोचयतमिति योज्यं। ताभिः सर्वाभिरूतिभिरस्मानभ्यागच्छतं॥ वृषणा। वृष सेचने। कनिन्युवृषीत्या-

दिना कनिन्। परावृजं। वृजी वर्जने। परावृणक्ति तपसा पापं विनाशयतीति परावृक्। क्विप् चेति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं। एतवे। तुमर्थे सेसेनित्ये- तेस्तवेन्प्रत्ययः। कृथः। डुकृञ् करणे। बहुलं छंदसीति विकरणस्य लुक्॥

नवमीमृचमाह॥

याभिः सिंधुं मधुमंतमसश्चतं वसिष्ठं याभिरजरावजिन्वतं।
याभिः कुत्सं श्रुतर्यं नर्यमावतं ताभिरू षु ऊतिभिरश्विना गतं॥९॥

याभिः। सिंधुं। मधुऽमंतं। असश्चतं। वसिष्ठं। याभिः। अजरौ। अजिन्वतं।
याभिः। कुत्सं। श्रुतर्यं। नर्यं। आवतं। ताभिः। ऊं इति। सु। ऊतिऽभिः।
अश्विना। आ। गतं॥९॥

हे अश्विनौ सिंधुं स्यंदनशीलां नदीं मधुमंतं मधुसदृशेनोदकेन पूर्णां याभि- रूतिभिरसश्चतं। अगमयतं। प्रावाहयतमित्यर्थः। हे अजरौ जरारहितावश्विनौ वसिष्ठमृषिं याभिरूतिभिरजिन्वतं। अप्रीणयतं। याभिश्च कुत्सादींस्त्रीनृषी- नावतं। अरक्षतं। ताभिः सर्वाभिरूतिभिरस्मानपि सुष्ठागच्छतं॥ मधुमंतं। मधुशब्दाद्भूम्नि मतुप्। लिंगव्यत्ययः। असश्चतं। सश्चतिर्गतिकर्मा। अस्मादं- तर्भावितण्यर्थाल्लुङ्॥

दशमीमृचमाह॥

याभिर्विश्पलां धनसामथर्व्यं सहस्रमीळ्ह आजावजिन्वतं।
याभिर्वशमश्व्यं प्रेणिमावतं ताभिरू षु ऊतिभिरश्विना गतं॥१०॥

याभिः। विश्पलां। धनऽसां। अथर्व्यं। सहस्रऽमीळ्हे। आजौ। अजिन्वतं।
याभिः। वशं। अश्व्यं। प्रेणिं। आवतं। ताभिः। ऊं इति। सु। ऊतिऽभिः।
अश्विना। आ। गतं॥१०॥

हे अश्विनौ धनसां धनं संभजमानामथर्व्यमगच्छंतीं छिन्नजंघात्वेन गंतुमस- मर्थां। थर्वतिर्गतिकर्मा। विश्पलामेतत्संज्ञामगस्त्यपुरोहितस्य खेलस्य संबं- धिनीं सहस्रमीळ्हे। मीळ्हमिति धननाम। बहुधनोपेत आजौ संग्रामे याभि- रूतिभिरजिन्वतं। गंतुं समर्थामकुरुतं। एतच्च चरित्रं हि वेरिवाच्छेदि पर्ण- मित्यत्र विस्पष्टयिष्यते। याभिश्चाश्व्यमश्वाख्यस्य पुत्रं प्रेणिं स्तुतेः प्रेरयितारं

वशमेतत्संज्ञमृषिमावतं । अरक्षतं । ताभिः सर्वाभिरूतिभिः महास्मानप्या-
गच्छतं ॥ प्रेषिं । प्रेषृ गतिप्रेरणश्लेषणेषु । औणादिक इप्रत्ययः ॥

॥ इति प्रथमस्य सप्तमे चतुस्त्रिंशो वर्गः ॥

एकादशीमृचमाह ॥

याभिः सुदानू औशिजाय वणिजे दीर्घश्रवसे मधु कोशो अक्षरत् ।
कक्षीवंतं स्तोतारं याभिरावतं ताभिरू षु ऊतिभिरश्विना गतं ॥ ११ ॥

याभिः । सुदानू इति सुऽदानू । औशिजाय । वणिजे । दीर्घऽश्रवसे । मधु । कोशः । अक्षरत् ।
कक्षीवंतं । स्तोतारं । याभिः । आवतं । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना ।
आ । गतं ॥ ११ ॥

उशिक्संज्ञा दीर्घतमसः पत्नी । तस्याः पुत्रो दीर्घश्रवा नाम कश्चिदृषिरना-
वृष्ट्यां जीवनार्थमकरोद्वाणिज्यं । स च वर्षणार्थमश्विनौ तुष्टाव । तौ चाश्विनौ
मेघं प्रेरितवंतौ । अयमर्थः पूर्वार्द्धे प्रतिपाद्यते । हे सुदानू शोभनदानावश्विनौ ।
औशिजायोशिक्पुत्राय वणिजे वाणिज्यं कुर्वते दीर्घश्रवस एतत्संज्ञाय ऋषये
याभिर्युष्मदीयाभिरूतिभिर्हेतुभूताभिः कोशो मेघो मधु माधुर्योपेतं वृष्टिजलम-
क्षरत् । असिंचत् । युष्मत्प्रसादादपेक्षिता वृष्टिर्जातेत्यर्थः । अपि च । उशिजः
पुत्रं स्तोतारं कक्षीवंतमेतत्संज्ञमृषिं याभिरूतिभिरावतं । अरक्षतं । ताभिः सर्वा-
भिरूतिभिः सहास्मानप्यागच्छतं ॥ कक्षीवंतं । कक्ष्या रज्जुरश्वस्य । तया युक्तः कक्षी-
वान् । आसंदीवदष्ठीवच्चक्रीवत्कक्षीवदिति निपातनान्मतुपो वत्वं । संप्रसारणं ॥

द्वादशीमृचमाह ॥

याभी रसां क्षोदसोद्नः पिपिन्वथुरनश्वं याभी रथमावतं जिषे ।
याभिस्त्रिशोक उस्रिया उदाजत ताभिरू षु ऊतिभिरश्विना गतं ॥ १२ ॥

याभिः । रसां । क्षोदसा । उद्नः । पिपिन्वथुः । अनश्वं । याभिः । रथं । आवतं । जिषे ।
याभिः । त्रिऽशोकः । उस्रियाः । उत्ऽआजत । ताभिः । ऊं इति । सु । ऊतिऽभिः ।
अश्विना । आ । गतं ॥ १२ ॥

रसा नदी भवति रसतेः शब्दकर्मण इति यास्कः । नि॰ ११.२५. । हे अश्विनौ
याभिरूतिभिर्हेतुभूताभी रसां नदीमनावृष्ट्या जलरहितां क्षोदसा कुलानि संपि-

षतोऽन्न उदकेन पिपिन्वथुः । युवां पूरितवंतौ । तथानश्वमश्वैर्वियुक्तमात्मीयं रथं जिषे जेतुं याभिरूतिभिरावतं । अगमयतं । अपि च याभिरूतिभिः कण्वपुत्रस्त्रिशोक ऋषिरुस्रिया अपहृता गा उदाजत । उदगमयत् । असुरसकाशाल्लेभे । ताभिः सर्वाभिरूतिभिः सहास्मानभ्यागच्छतं ॥ क्षोदसा । क्षुदिर् संपेषणे । औणादिकोऽसुन् । उद्नः । तृतीयैकवचनस्य सुपां सुपो भवंतीति शसादेशः । पद्दन्नित्यादिनोदकशब्दस्योदन्भावः । भसंज्ञायामल्लोपोऽन इत्यकारलोपः । पिपिन्वथुः । पिवि सेचने । इदित्वान्नुम् । जिषे । जि जये । तुमर्थे सेसेनिति क्सेप्रत्ययः । उदाजत । अज गतिक्षेपणयोः ॥

त्रयोदशीमृचमाह ॥

याभिः सूर्यं परियाथः परावति मंधातारं क्षैत्रपत्येष्वावतं ।
याभिर्विप्रं प्र भरद्वाजमावतं ताभिरू षु ऊतिभिरश्विना गतं ॥ १३ ॥
याभिः । सूर्यं । परिऽयाथः । पराऽवति । मंधातारं । क्षैत्रऽपत्येषु । आवतं ।
याभिः । विप्रं । प्र । भरत्ऽवाजं । आवतं । ताभिः । ऊं इति । सु । ऊतिऽभिः ।
अश्विना । आ । गतं ॥ १३ ॥

हे अश्विनौ परावति दूरदेशे स्थितं सूर्यं तमोरूपेण स्वर्भानुनावृतमादित्यं तस्मात्तमसो मोचयितुं याभिरूतिभिः परियाथः । युवां परितो गच्छथः । तथा मंधातारमृषिं क्षैत्रपत्येषु । क्षेत्राणां पतिरधिपतिः क्षेत्रपतिः । तत्संबंधिषु कर्मस्वावतं । अरक्षतं । अपि च याभिरूतिभिर्विप्रं मेधाविनं भरद्वाजमृषिमन्नप्रदानेन प्रावतं । प्रकर्षेणारक्षतं । ताभिः सर्वाभिरूतिभिः सह रक्षणार्थमस्मानभ्यागच्छतं ॥ क्षैत्रपत्येषु । ब्राह्मणादेराकृतिगणत्वात्कर्मण्यर्थे ष्यञ् ॥

चतुर्दशीमृचमाह ॥

याभिर्महामतिथिग्वं कशोजुवं दिवोदासं शंबरहत्य आवतं ।
याभिः पूर्भिद्ये त्रसदस्युमावतं ताभिरू षु ऊतिभिरश्विना गतं ॥ १४ ॥
याभिः । महां । अतिथिऽग्वं । कशःऽजुवं । दिवःऽदासं । शंबरऽहत्ये । आवतं ।
याभिः । पूःऽभिद्ये । त्रसदस्युं । आवतं । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना ।
आ । गतं ॥ १४ ॥

हे अश्विनौ महां महांतमतिथिग्वमतिथिभिर्गंतव्यं कशोजुवमसुरभीत्योदकं प्रवेष्टुं गंतारं । एवंभूतं दिवोदासमेतत्संज्ञकं राजर्षिं शंबरहत्ये । शंबर आयुधं । तद्युक्तः शंबरोऽसुरः । तस्य हनने विषयभूते सति याभिरूतिभिरावतं । अरक्षतं । अपि च याभिरूतिभिः पूर्भिद्ये । पुराणि नगराणि भिद्यंतेऽस्मिन्निति पूर्भिद्यः संग्रामः । तस्मिन् त्रसदस्युमेतत्संज्ञकमृषिं पुरुकुत्सपुत्रमावतं । अरक्षतं । ताभिरित्यादि पूर्ववत् ॥ महां । महांतमित्यस्य छांदसो वर्णलोपः । कशोजुवं । कश इत्युदकनाम । कश गतिशातनयोः । असुन् । कशांस्युदकानि जवतीति कशोजूः । जु इति सौत्रो धातुर्गत्यर्थः । क्विब्वचीत्यादिना क्विब्दीर्घौ । दिवोदासं । दिवश्च दासे षष्ठ्या अलुक् वक्तव्यः । पा० ६. ३. २१. ६. । इत्यलुक् । दिवोदासादीनां छंदस्युपसंख्यानमिति पूर्वपदाद्युदात्तत्वं । शंबरहत्ये । हनस्त चेति हंतेर्भावे क्यप् तत्संनियोगेन तकारांतादेशश्च । कृदुत्तरपदप्रकृतिस्वरत्वं ॥

पंचदशीमृचमाह ॥

याभिर्वम्रं विपिपानमुपस्तुतं कलिं याभिर्वित्तजानिं दुवस्यथः ।
याभिर्व्यश्वमुत पृथिमावतं ताभिरू षु ऊतिभिरश्विना गतं ॥ १५ ॥

याभिः । वम्रं । विऽपिपानं । उपऽस्तुतं । कलिं । याभिः । वित्तऽजानिं । दुवस्यथः ।
याभिः । विऽअश्वं । उत । पृथिं । आवतं । ताभिः । ऊं इति । सु । ऊतिऽभिः ।
अश्विना । आ । गतं ॥ १५ ॥

हे अश्विनौ वम्रं विखनसः पुत्रमेतत्संज्ञमृषिं विपिपानं विशेषेण पार्थिवं रसं पिबंतं याभिरूतिभिररक्षतं । कीदृशं । उपस्तुतं । समीपस्थैः सम्यक् स्तुतमिति स्तूयमानं । तथा वित्तजानिं लब्धभार्यं कलिमेतत्संज्ञमृषिं याभिरूतिभिर्दुवस्यथः । रक्षथः । उत अपि च व्यश्वं विगताश्वं पृथिमेतत्संज्ञं वैनं राजर्षिं याभिरूतिभिरावतं । अरक्षतं । अन्यत्पूर्ववत् ॥ विपिपानं । पा पाने । ताच्छीलिकश्चानश् । बहुलं छंदसीति शपः श्लुः । बहुलं छंदसीत्यभ्यासस्येत्वं । उपस्तुतं । स्तौतेः कर्मणि निष्ठा । प्रवृद्धादित्वादुत्तरपदांतोदात्तत्वं । वित्तजानिं । वित्ता लब्धा जाया येन स तथोक्तः । जायाया निङ् । पा० ५. ४. १३४. । इति समासांतो निङादेशः । लोपो व्योर्वलीति वलि लोपः । बहुव्रीहौ पूर्वपद-

प्रकृतिस्वरत्वं । व्यश्वं । विगतोऽश्वो यस्मात्स तथोक्तः । बहुव्रीहिस्वरेण पूर्वपदस्योदात्तत्व उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं ॥

॥ इति प्रथमस्य सप्तमे पंचत्रिंशो वर्गः ॥

षोडशीमृचमाह ॥

याभिर्नरा शयवे याभिरत्रये याभिः पुरा मनवे गातुमीषथुः ।
याभिः शारीराजतं स्यूमरश्मये ताभिरू षु ऊतिभिरश्विना गतं ॥१६॥

याभिः । नरा । शयवे । याभिः । अत्रये । याभिः । पुरा । मनवे । गातुं । ईषथुः ।
याभिः । शारीः । आजतं । स्यूमऽरश्मये । ताभिः । ऊं इति । सु । ऊतिऽभिः ।
अश्विना । आ । गतं ॥१६॥

हे नरा नेतारावश्विनौ पुरा पूर्वस्मिन्काले शयव एतत्संज्ञकाय ऋषये गातुं दुःखान्निर्गमनलक्षणं मार्गं याभिरूतिभिरीषथुः । युवां वांछितवंतौ । कृतवंतावित्यर्थः । किं तत् । सामर्थ्यात् शयवे चिन्नासत्या शचीभिरित्यस्यामृचि प्रतिपादितं । तथात्रये ऋषये शतद्वारे यंत्रगृहेऽसुरैः पीड्यमानाय संतापकारिणोऽग्नेः शीतेनोदकेन शीतकरणलक्षणं गातुं दुःखनिर्गमनहेतुभूतं मार्गं याभिरूतिभिर्युवामिष्टवंतौ । एतच्च हिमेनाग्निं घ्रंसमवारयेथामित्यादौ प्रसिद्धं । तथा मनव एतन्नाम्ने राजर्षये याभिरूतिभिर्यवादिधान्यवापनादिरूपं गातुं दारिद्र्यनिर्गमनहेतुं मार्गं युवां कृतवंतौ । तथा च मंत्रांतरः । यवं वृकेणाश्विना वपंतेति । अपि च । स्यूमरश्मये । स्यूतः संबद्धा रश्मिर्दीप्तिर्यस्य तस्मै एतत्संज्ञकाय ऋषये याभिरूतिभिः शारीः । शरो नाम वेणुविशेषः । तद्विकारभूता इषूराजतं । शत्रून्प्रति प्रेरयतं । ताभिरूतिभिरित्यादि पूर्ववत् ॥ नरा । नृ नये । ऋदोरप् । सुपां सुलुगिति विभक्तेराकारः । शयवे । शीङ् स्वप्ने । भृमृशीतॄचरीत्यादिनोप्रत्ययः । ईषथुः । इषु इच्छायां । लिट्यथुस्यसवर्णे इति पर्युदासादत् । पा० ६. ४. ७८. । अभ्यासस्येयङादेशाभावे सवर्णदीर्घः । शारीः । विकारार्थे शरशब्दादनुदात्तादेश्चेत्यञ् । टिड्ढाणञिति ङीप् । स्यूमरश्मये । षिवु तंतुसंताने । सिवेरौणादिको मन्प्रत्ययः । च्छ्वोः शूडित्यूट् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

सप्तदशीमृचमाह ॥

याभिः पठर्वा जठरस्य मज्मनाग्निर्नादीदेच्चित इद्धो अज्मन्ना ।
याभिः शर्यातमवथो महाधने ताभिरू षु ऊतिभिरश्विना गतं ॥ १७ ॥

याभिः। पठर्वा। जठरस्य। मज्मना। अग्निः। न। अदीदेत्। चितः। इद्धः। अज्मन्। आ।
याभिः। शर्यातं। अवथः। महाऽधने। ताभिः। ऊं इति। सु। ऊतिऽभिः। अश्विना।
आ। गतं ॥ १७ ॥

हे अश्विनौ जठरस्य। जठरमुदरं भवति जग्धमस्मिन्धीयत इति यास्कः। नि॰ ४.७.। जठरोपलक्षितस्य शरीरस्य मज्मना बलेन युक्तः सन् पठर्वैतत्संज्ञो राजर्षिरज्मन्। संग्रामनामैतत्। अज्मनि संग्रामे युष्मदीयाभिर्याभिरूतिभिरा समंताददीदेत्। अदीप्यत। तत्र दृष्टांतः। चितः काष्ठैरभिचित इद्धो यज्ञगृहे ऋत्विग्भिः प्रज्वालितोऽग्निर्न। यथाग्निः प्रकाशते तद्वदित्यर्थः। अपि च शर्यातं मानवमिंद्रेण सह स्पर्धमानं महाधने। संग्रामनामैतत्। महता धनेनोपेते संग्रामे याभिरूतिभिरवथः। रक्षथः। ताभिरित्यादि गतं ॥ अदीदेत्। दीदेतिश्छांदसो दीप्तिकर्मा। अज्मन्। अज गतिक्षेपणयोः। अजंति क्षिपंत्यस्मिन्बाणानित्यधिकरण औणादिको मनिन्। वलादावार्धधातुके विकल्प इष्यत इति वचनाद्वीभावाभावः। सुपां सुलुगिति सप्तम्या लुक्। महाधने। आन्महत इत्यात्वं ॥

अष्टादशीमृचमाह ॥

याभिरंगिरो मनसा निरण्यथोऽग्रं गच्छथो विवरे गोअर्णसः।
याभिर्मनुं शूरमिषा समावतं ताभिरू षु ऊतिभिरश्विना गतं ॥ १८ ॥

याभिः। अंगिरः। मनसा। निऽरण्यथः। अग्रं। गच्छथः। विऽवरे। गोऽअर्णसः।
याभिः। मनुं। शूरं। इषा। संऽआवतं। ताभिः। ऊं इति। सु। ऊतिऽभिः। अश्विना।
आ। गतं ॥ १८ ॥

अंगिर इत्येतदामंत्रितवाक्याद्बहिर्भूतं तेन चात्मानं संबोध्य स्तुतावृषिं प्रेरयति। हे अंगिरः। अंगिरसां गोत्रज त्वमश्विनौ स्तुहि। हे अश्विनौ मनसा मननीयेन स्तोत्रेण प्रीतौ संतौ युवां याभिरूतिभिर्निरण्यथः। स्तोतॄन् नितरां रमयथः। यद्वा मनसैव करणभूतेन रमयथः। तथा गोअर्णसो गोरूपस्यारणीयस्य

धनस्य पणिभिर्गुहायां निहितस्य विवरे विवरणे गुहाद्वारस्योद्घाटनेन प्रकाशने विषयभूते सति याभिरूतिभिः सह युवामयं सर्वेभ्यो देवेभ्यः पुरस्तान्निरण्यथः। अपि च। शूरं वीर्यवंतं मनुमिषा पृथिव्या गृह्नेन यवादिधान्यरूपेणान्नेन याभिरूतिभिः समावतं। सम्यगरक्षतं। ताभिः सर्वाभिरूतिभिः सहास्मानभ्यागच्छतं॥ निरण्यथः। निरमयथ इत्यस्य वर्णव्यापत्त्यैतद्रूपं। विवरे। ग्रहवृहनिश्चिगमश्चेति भावेऽप्। थाथादिनोत्तरपदांतोदात्तत्वं॥

एकोनविंशीमृचमाह॥

याभिः पत्नीर्विमदाय न्यूहथुरा घ वा याभिररुणीरशिक्षतं।

याभिः सुदास ऊहथुः सुदेव्यं१ताभिरू षु ऊतिभिरश्विना गतं॥ १९॥

याभिः। पत्नीः। विऽमदाय। निऽऊहथुः। आ। घ। वा। याभिः। अरुणीः। अशिक्षतं।

याभिः। सुऽदासे। ऊहथुः। सुऽदेव्यं। ताभिः। ऊं इति। सु। ऊतिऽभिः। अश्विना।

आ। गतं॥ १९॥

हे अश्विनौ विमदायैतन्नाम्ने ऋषये याभिर्युष्मदीयाभिरूतिभिः पत्नीर्भार्याः पुरुमित्रस्य दुहितरं न्यूहथुः। नितरां युवां प्रापितवंतौ। घेति पादपूरणः। तथा याभिरूतिभिररुणीररुणवर्णा आरोचमाना गा आभिमुख्येनाशिक्षतं। अदत्तं। तथा पिजनवपुत्राय सुदासे कल्याणदानाय राज्ञे सुदेव्यं प्रशस्तं धनं याभिरूतिभिरूहथुः। प्रापितवंतौ। ताभिरित्यादि गतं॥ पत्नीः। अमो व्यत्ययेन शसादेशः। न्यूहथुः। वह प्रापणे। अथुसि यजादित्वात्संप्रसारणं। द्विर्वचनादि। सुदासे। शोभनं ददातीति सुदाः। असुन्। सुदेव्यं। दिगादित्वाद्यत्। पा० ४.३.५४.। तित्स्वरित इति स्वरितत्वं॥

विंशीमृचमाह॥

याभिः शंताती भवथो ददाशुषे भुज्युं याभिरवथो याभिरध्रिगुं।

ओम्यावतीं सुभरामृतस्तुभं ताभिरू षु ऊतिभिरश्विना गतं॥ २०॥

याभिः। शंताती इति शंऽताती। भवथः। ददाशुषे। भुज्युं। याभिः। अवथः। याभिः। अध्रिऽगुं।

ओम्याऽवतीं। सुऽभरां। ऋतऽस्तुभं। ताभिः। ऊं इति। सु। ऊतिऽभिः।

अश्विना। आ। गतं॥ २०॥

हे अश्विनौ ददाशुषे हवींषि दत्तवते यजमानाय याभिरूतिभिः शंताती सुखस्य कर्तारौ भवथः। याभिश्चोतिभिर्भुज्युं तुग्रस्य पुत्रमवथः। याभिश्चाध्रिगुं। अध्रिगुर्देवानां शमिता। अध्रिगुश्चापश्च उभौ देवानां शमिताराविति श्रुतेः। अपि च। ऋतस्तुभं। ऋतं सत्यं स्तोभत्युच्चारयतीत्यृतस्तुप्। एतत्संज्ञमृषिं। ओम्यावती। ओम्येति सुखनाम। तद्युक्तां सुभरां सुखेन भरणीयामिषं याभिरूतिभिः प्रापयथः। ताभिः सर्वाभिरूतिभिः सहास्मानयागच्छतं॥ शंताती। शिवशमरिष्टस्य करे। पा० ४.४.१४३.। इति तातिल्प्रत्ययः। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं। ददाशुषे। दाशृ दाने। लिटः क्वसुः। वसोः संप्रसारणमिति संप्रसारणं। शासिवसिघसीनां चेति षत्वं॥

॥ इति प्रथमस्य सप्तमे षट्त्रिंशो वर्गः॥

एकविंशीमृचमाह॥

याभिः कृशानुमसने दुवस्यथो जवे याभिर्यूनो अर्वंतमावतं।
मधु प्रियं भरथो यत्सरड्भ्यस्ताभिरू षु ऊतिभिरश्विना गतं॥ २१॥

याभिः। कृशानुं। असने। दुवस्यथः। जवे। याभिः। यूनः। अर्वंतं। आवतं।
मधुं। प्रियं। भरथः। यत्। सरट्ऽभ्यः। ताभिः। ऊं इति। सु। ऊतिऽभिः।
अश्विना। आ। गतं॥ २१॥

स्वानादिषु सोमपालेषु मध्ये कृशानुरेकः सोमपालः। तथा च तैत्तिरीयकं। हस्तसुहस्तकृशानवः। ते वः सोमक्रयणा इति। तं कृशानुमसने। इषवोऽस्यंतेऽस्मिन्नित्यसनः संग्रामः। तस्मिन्संग्रामे हे अश्विनौ याभिरूतिभिर्दुवस्यथः। रक्षथः। तथा याभिश्च जवे वेगे प्रवृत्तं यूनस्तरुणस्य पुरुकुत्सस्यार्वंतमश्वमावतं। अरक्षतं। अपि च। यन्मधु क्षौद्रं प्रियं सर्वेषामनुकूलवेद्यं तत्सरड्भ्यो मधुमक्षिकाभ्यो याभिश्चोतिभिर्भरथः। संपादयथः। ताभिः सर्वाभिरूतिभिः सहास्मानयागच्छतं॥ असने। असु क्षेपणे। करणाधिकरणयोश्चेत्यधिकरणे ल्युट्। सरड्भ्यः। सृ गतौ। सर्तेरटिः॥

द्वाविंशीमृचमाह॥

याभिर्नरं गोषुयुधं नृषाह्ये क्षेत्रस्य साता तनयस्य जिन्वथः।
याभी रथाँ अवथो याभिरर्वतस्ताभिरू षु ऊतिभिरश्विना गतं॥ २२॥

याभिः। नरं। गोषुऽयुधं। नृऽसह्ये। क्षेत्रस्य। साता। तनयस्य। जिन्वथः।
याभिः। रथान्। अवथः। याभिः। अर्वतः। ताभिः। ऊं इति। सु। ऊतिऽभिः।
अश्विना। आ। गतं ॥ २२ ॥

हे अश्विनौ गोषुयुधं गोविषयं युद्धं कुर्वंतं नरं यज्ञस्य नेतारं यजमानं याभिरूतिभिर्नृषाह्ये नृभिः सोढव्ये संग्रामे जिन्वथः। प्रीणयथः। रक्षथ इत्यर्थः। तथा क्षेत्रस्य गृहादिरूपस्य। तनयस्य धनस्य च साता सातये संभजनार्थं याभिरूतिभिर्यजमानं रक्षथः। याभिश्च यजमानानां रथानवथः। तदीयानर्वतोऽश्वांश्च याभिरवथः। ताभिः सर्वाभिरूतिभिः सहास्मानप्यागच्छतं ॥ गोषुयुधं। युध संप्रहारे। गोषु युध्यत इति गोषुयुत्। तत्पुरुषे कृति बहुलमित्यलुक्। नृषाह्ये। षह मर्षणे। शकिसहोश्चेति यत्। अन्येषामपि दृश्यत इति सांहितिको दीर्घः। कृदुत्तरपदप्रकृतिस्वरत्वं। साता। वन षण संभक्तौ। भावे क्तिन्। जनसनखनां सन्झलोरित्यात्वं। ऊतियूतीत्यादिना क्तिन उदात्तत्वं निपातितं। सुपां सुलुगिति चतुर्थ्या डादेशः। जिन्वथः। जिवि प्रीणनार्थः। भौवादिकः। इदित्वान्नुम्। रथान्। दीर्घादटि समानपाद इति नकारस्य रुत्वं। आतोऽटि नित्यमिति सानुनासिक आकारः ॥

त्रयोविंशीमृचमाह ॥

याभिः कुत्समार्जुनेयं शतक्रतू प्र तुर्वीतिं प्र च दभीतिमावतं।
याभिर्ध्वसंतिं पुरुषंतिमावतं ताभिरू षु ऊतिभिरश्विना गतं ॥ २३ ॥
याभिः। कुत्सं। आर्जुनेयं। शतक्रतू इति शतऽक्रतू। प्र। तुर्वीतिं। प्र। च। दभीतिं। आवतं।
याभिः। ध्वसंतिं। पुरुऽसंतिं। आवतं। ताभिः। ऊं इति। सु। ऊतिऽभिः। अश्विना।
आ। गतं ॥ २३ ॥

हे शतक्रतू बहुविधकर्माणावश्विनौ। आर्जुनेयं। अर्जुन इतींद्रस्य नाम। तथा च वाजसनेयकं। एतद्वा इंद्रस्य गुह्यं नाम यदर्जुन इति। तस्य पुत्रं कुत्सं याभिरूतिभिः प्रावतं। प्रकर्षेणारक्षतं। तथा तुर्वीतिं दभीतिं च याभिरूतिभिः प्रावतं। अपि च। याभिर्ध्वसंतिमेतत्संज्ञं पुरुषंतिमेतन्नामानं च ऋषिमावतं। अरक्षतं। ताभिः सर्वाभिरूतिभिः सहास्मानपि सुष्ठागच्छतं ॥ आर्जुनेयं।

शुभ्रादिभ्यश्च । पा० ४. १. १२३. । इति चशब्दोऽनुक्तसमुच्चयार्थ इत्युक्तत्वात् ढक् । तुर्वीतिं । तुर्वी हिंसार्थः । शत्रूंस्तुर्वतीति तुर्वीतिः । औणादिक ईतिप्रत्ययः । दभीतिं । दंभु दंभे । औणादिकः कीतिप्रत्ययः । ध्वसंतिं । ध्वंसु गतौ च । औणादिको झिङ्प्रत्ययः । अनिदितामिति नलोपः । झोऽंतः । पुरुषंतिं । पुरु सनोति ददातीति पुरुषंतिः । क्तिच्क्तौ च संज्ञायामिति क्तिच् । न क्तिचि दीर्घश्चेत्यनुनासिकलोपोपधादीर्घयोर्निषेधः ॥

चतुर्विंशीमृचमाह ॥

अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषां ।
अद्यूत्येऽवसे नि ह्वये वां वृधे च नो भवतं वाजसातौ ॥ २४ ॥
अप्नस्वतीं । अश्विना । वाचं । अस्मे इति । कृतं । नः । दस्रा । वृषणा । मनीषां ।
अद्यूत्यें । अवसे । नि । ह्वये । वां । वृधे । च । नः । भवतं । वाजऽसातौ ॥ २४ ॥

हे अश्विनौ । अस्मे अस्माकं वाचमप्नस्वतीं । अप्न इति कर्मनाम । विहितैः कर्मभिः संयुक्तां कृतं । कुरुतं । तथा नोऽस्माकं मनीषां बुद्धिं हे वृषणा कामानां वर्षकौ दस्रा शत्रूणामुपक्षपयितारावश्विनौ वेदार्थज्ञानसमर्थां कुरुतं । अपि च । यस्माद्युवामेवंगुणविशिष्टौ तस्माद्वां युवामवसे रक्षणाय निह्वये । नितरामाह्वये । कदा । अद्यूत्ये । द्योतनरहिते प्रकाशनरहिते रात्रेः पश्चिमे यामे । तस्मिन्काले हि प्रातरनुवाकाश्विनशस्त्रयोरिदं सूक्तं पठ्यते । आहूतौ च युवां वाजसातौ वाजस्यान्नस्य संभजने । यद्वा संग्रामनामैतत् । संग्रामे नोऽस्माकं वृधे वर्धनाय भवतं ॥ अप्नस्वतीं । आपः कर्माख्यायां ह्रस्वो नुट् च वेत्यसुन् नुडागमश्च । तदस्यास्तीति मतुप् । मादुपधाया इति मतुपो वत्वं । तसौ मत्वर्थ इति भत्वेन पदत्वाभावाद्रुत्वाद्यभावः । अस्मे । सुपां सुलुगिति षष्ठ्याः शे आदेशः । कृतं । करोतेर्लोटि बहुलं छंदसीति विकरणस्य लुक् । अद्यूत्ये । द्युत दीप्तौ । ऋहलोर्ण्यदिति भावे ण्यत् । वर्णव्यापत्त्या ऊकारः । द्यूत्यं प्रकाशनमस्मिन्नास्तीति बहुव्रीहौ व्यत्ययेनांतस्वरितत्वं । निह्वये । निसमुपविभ्यो ह्व इत्यात्मनेपदं । वृधे । वृधु वृद्धौ । संपदादिलक्षणो भावे क्विप् । सावेकाच इति विभक्तेरुदात्तत्वं ॥

पंचविंशीमृचमाह ॥

द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिः ।

तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ २५ ॥

द्युऽभिः । अक्तुऽभिः । परि । पातं । अस्मान् । अरिष्टेभिः । अश्विना । सौभगेभिः ।

तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ २५ ॥

हे अश्विनौ द्युभिर्दिवसैरक्तुभी रात्रिभिश्चास्मान् स्तोतॄन्परिपातं । परितो रक्षतं । सर्वदास्मान् रक्षतमित्यर्थः । तथारिष्टेभिरहिंसितैः सौभगेभिः सुभगत्वैः सुभगत्वापादकैर्धनैरस्मान्रक्षतं । यदस्माभिः प्रार्थितं नोऽस्मदीयं तन्मित्रादयः षट् देवताः मामहंतां । पूजयंतु । उतशब्दः समुच्चये ॥ द्युभिः । दिव उदित्युत्वं । दिवो झलिति सावेकाच इति प्राप्तस्य विभक्त्युदात्तत्वस्य प्रतिषेधः । अरिष्टेभिः । रिष हिंसायां । निष्ठेति क्तः । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं । बहुलं छंदसीति भिस ऐसभावः । अश्विना । सुपां सुलुगिति विभक्तेराकारः । आमंत्रितस्य चेति सर्वानुदात्तत्वं । सौभगेभिः । शोभनो भगः श्रीर्यस्यासौ सुभगः । तस्य भावः सौभगं । सुभगान्मंत्र इत्युद्गात्रादिषु पाठादञ्प्रत्ययः । हृद्भगसिंध्वंते पूर्वपदस्य चेत्युभयपदवृद्धिर्न भवति तस्य सर्वे विधयश्छंदसि विकल्प्यंत इति विकल्पितत्वात् । पूर्ववदैसभावः । ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं ॥

॥ इति प्रथमस्य सप्तमे सप्तत्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके सप्तमोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

इत्थं सप्तममध्यायं व्याख्यायाष्टमोऽध्यायो व्याख्यातुमारभ्यते। प्रथमे मंडले षोडशेऽनुवाके सप्त सूक्तानि गतानि। इदमिति विंशत्यृचमष्टमं सूक्तं। अत्रानुक्रम्यते। इदं विंशतिरुषस्यं द्वितीयोऽर्धर्चो रात्रेश्चेति। ऋषिश्चान्यस्मादिति परिभाषयानुवृत्तेरांगिरसः कुत्स ऋषिः। अनादेशपरिभाषया त्रिष्टुप् छंदः। उषा देवता द्वितीयस्यार्धर्चस्य रात्रिरपि ॥ प्रातरनुवाक उषस्ये क्रतौ त्रैष्टुभे छंदस्येतत्सूक्तं। सूचितं च। इदं श्रेष्ठं पृथूरथ इति सूक्ते। आ० ४. १४.। इति ॥ आश्विनशस्त्रे चेदं सूक्तं प्रातरनुवाकातिदेशात् ॥

तत्र प्रथमामृचमाह ॥

इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा ।
यथा प्रसूता सवितुः सवायँ एवा रात्र्युषसे योनिमारैक् ॥ १ ॥
इदं। श्रेष्ठं। ज्योतिषां। ज्योतिः। आ। अगात्। चित्रः। प्रऽकेतः। अजनिष्ट। विऽभ्वा।
यथा। प्रऽसूता। सवितुः। सवाय। एव। रात्री। उषसे। योनिं। अरैक् ॥ १ ॥

ज्योतिषां ग्रहनक्षत्रादीनां द्योतमानानां मध्य इदमुषआख्यं ज्योतिः श्रेष्ठं। प्रशस्यतमं। अस्य कोऽतिशय इति चेत् उच्यते। नक्षत्रादिकं ज्योतिः स्वात्मानमेव प्रकाशयति नान्यत्। चंद्रस्तु यद्यप्यन्यत्प्रकाशयति तथापि न विस्पष्टप्रकाशः। औषसं तु ज्योतिर्युगपदेव सर्वस्य जगतोऽंधकारनिराकरणेन विशेषेण प्रकाशकं। अतः प्रशस्यतममित्यर्थः। तादृशं ज्योतिरागात्। पूर्वस्यां दिश्यागमत्। आगते च तस्मिन् चित्रश्चायनीयः प्रकेतोऽंधकारावृतस्य सर्वस्य पदार्थस्य प्रज्ञापकस्तदीयो रश्मिर्विभ्वा विभुर्व्याप्तः सन्नजनिष्ट। प्रादुरभूत्। किंच। यथा रात्री रात्रिः स्वयं सवितुः सूर्यसकाशात्प्रसूता। उत्पन्ना। सूर्यो ह्यस्तं गच्छन् रात्रिं जनयति। तस्मिन्ननस्तमिते रात्रेरुत्पत्त्यभावात्। एवमेव रात्रिरप्युषसे सवायोषस उत्पत्तये तदर्थं योनिं स्थानं स्वकीयापरभागलक्षणमारैक्। आरे-

चितवती । कल्पितवतीत्यर्थः । यद्वा प्रसूता रात्रिसकाशादुत्पन्नोषाः सवितुः सूर्यस्य सवाय प्रसवाय जन्मने यथा भवति । एवं रात्रिरप्युषस उषसो यज्जन्म तदर्थं योनिं स्वापरभागलक्षणं स्थानं कृतवती ॥ अत्र निरुक्तं । इदं श्रेष्ठं ज्योतिषां ज्योतिरागमत् चित्रं प्रकेतनं प्रज्ञाततममजनिष्ट विभूततमं यथा प्रसूता सवितुः प्रसवाय रात्रिरादित्यस्यैवं रात्र्युषसे योनिमरिचत्स्थानं । नि॰ २. १९. । इति ॥ श्रेष्ठं । प्रशस्यशब्दादातिशायनिक इष्ठन् । प्रशस्यस्य श्र इति श्रादेशः । प्रकृत्यैकाच् । पा॰ ६. ४. १६३. । इति प्रकृतिभावाट्टिलोपाभावः । अगात् । एतेर्लुङीणो गा लुङीति गादेशः । गातिस्थेति सिचो लुक् । प्रकेतः । कित ज्ञाने । अंतर्भावितण्यर्थात्कर्मणि घञ् । थाथादिनोत्तरपदांतोदात्तत्वं । अजनिष्ट । जनी प्रादुर्भावे । लुङि सिच इडागमः । विभ्वा । विप्रसंभ्यो ड्वसंज्ञायामिति भावे डुप्रत्ययः । सुपां सुलुगित्यादिना सोराकारादेशः । ओः सुपीति यणादेशस्य न भूसुधियोरिति प्रतिषेधे प्राप्ते छंदस्युभयथेति यणादेशः । व्यत्ययेनाद्युदात्तत्वं । यद्वा विपूर्वाद्भवतेरौणादिको डुनप्रत्ययः । नित्त्वादाद्युदात्तत्वं । प्रसूता । षूङ् प्राणिप्रसवे । कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । सवाय । छंदसि जवसवौ वक्तव्याविति निपातनादच् । चित्त्वादंतोदात्तत्वं । अणोऽप्रगृह्यस्यानुनासिक इति संहितायामकारः सानुनासिकः । एवा । निपातस्य चेति संहितायां दीर्घः । रात्री । रात्रेश्चाजसाविति ङीप् । यस्येति चेतीकारलोपः । आरैक् । रिचिर् विरेचने । लङि बहुलं छंदसीति विकरणस्य लुक् । लघूपधगुणे हल्ङ्याब्भ्य इति तिलोपः । वर्णव्यापत्त्या व्यत्ययेन एकारस्य ऐकारः ॥

द्वितीयामृचमाह ॥

रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः ।
समानबंधू अमृते अनूची द्यावा वर्णं चरत आमिनाने ॥ २ ॥

रुशत्ऽवत्सा । रुशती । श्वेत्या । आ । अगात् । अरैक् । ऊं इति । कृष्णा । सदनानि । अस्याः ।
समानबंधू इति समानऽबंधू । अमृते इति । अनूची इति । द्यावा । वर्णं । चरतः ।
आमिनाने इत्याऽमिनाने ॥ २ ॥

श्वेत्येत्युषसो नामधेयं । रुशती दीप्ता श्वेत्या श्वेतवर्णोषा रुशद्वत्सा रुशद्दीप्तः सूर्यो वत्सो यस्याः सा तथोक्ता । यथा मातुः समीपे वत्सः संचरति । एवमुषसः

समीपे सूर्यस्य नित्यमवस्थानात्तद्वत्सत्वं। अथवा यथा वत्सो मातुः स्तन्यं रसं पिबन्हरति। एवमुषसोऽवश्यायाख्यं रसं पिबन्वत्स इत्युच्यते। तादृशी सत्यागात्। आगतवती। आगताया अस्या उषसः कृष्णा कृष्णवर्णा रात्रिः सदनानि स्थानानि स्वकीयांत्यार्ड्यामलक्षणान्यारैक्। आरेचितवती। कल्पितवती दत्तवतीत्यर्थः। उ इत्येतत्पादपूरणं। अपि च। एते राज्युषसौ समानबंधू समानेनैकेन सूर्याख्येन बंधुना सख्या युक्ते। यद्वा। सूर्येण सह संबद्धे। यथोषा उदेष्यता सूर्येण संबद्धा एवं रात्रिरप्यस्तंयता सूर्येण संबद्धा। अमृते। मरणरहिते कालात्मकतया नित्यत्वात्। अनूची। अन्वंचंत्यौ। प्रथमं रात्रिः पश्चादुषा इत्यनेन क्रमेण गच्छंत्यौ। यद्वा सूर्यगत्यनुसारेण गच्छंत्यौ। एवंभूते वर्णं सर्वेषां प्राणिनां रूपमामिनाने। जरयंत्यौ। यद्वा स्वकीयं रूपं हिंसंत्यौ। उषसा नैशं तमो निवर्त्यते प्रकाशात्मकमुषसो रूपं रात्र्या। एवंविधे सत्यौ द्यावा द्योतमाने चरतः। प्रतिदिवसमावर्तेते। यद्वा द्यावा नभसांतरिक्षमार्गेण चरतः। प्रतिदिवसं गच्छतः। अत्र निरुक्तं। रुशद्वत्सा सूर्यवत्सा रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः। सूर्यमस्या वत्समाह साहचर्याद्रसहरणाद्वा। रुशती श्वेत्यागात्। श्वेत्या श्वततेररिचत्कृष्णा सदनान्यस्याः कृष्णवर्णा रात्रिः कृष्णं कृष्यतेर्निकृष्टो वर्णः। अथैने संस्तौति समानबंधू समानबंधने अमृते अमरणधर्माणावनूची अनूच्याविततेरेतरमभिप्रेत्य द्यावा वर्णं चरतस्ते एव द्यावौ द्योतनादपि वा द्यावा चरतस्तया सह चरत इति स्यादामिनाने आमिन्वाने अन्योन्यस्याध्यात्मं कुर्वाणे। नि० २. २०। इति ॥ श्वेत्या। श्विता वर्णे। अस्मात्सयंतादचो यदिति भावे यत्। णिलोपः। अर्शआदित्वान्मत्वर्थीयोऽच्। अमृते। मृतं मरणमनयोर्नास्तीति बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं। अनूची। अनुपूर्वादंचतेर्ऋत्विगित्यादिना क्विन्। अनिदितामिति नलोपः। अंचतेश्चोपसंख्यानमिति ङीप्। अच इत्यकारलोपे चाविति दीर्घः। अनुदात्तस्य च यत्रोदात्तलोप इति ङीप उदात्तत्वं। सुपां सुलुगिति विभक्तेर्लुक्। आमिनाने। मीङ् हिंसायां। क्र्यादिकः। शानचि मीनातेर्निगम इति ह्रस्वत्वं ॥

तृतीयामृचमाह ॥

समानो अध्वा स्वस्रोरनंतस्तमन्यान्या चरतो देवशिष्टे।
न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे ॥३॥

समानः। अध्वा। स्वस्रोः। अनंतः। तं। अन्याऽअन्या। चरतः। देवशिष्टे इति देवऽशिष्टे। न। मेथेते इति। न। तस्थतुः। सुमेके इति सुऽमेके। नक्तोषसा। सऽमनसा। विरूपे इति विऽरूपे ॥ ३ ॥

स्वस्रोर्भगिन्यो रात्र्युषसोरध्वा संचरणसाधनभूतो मार्गः समानः। एक एव। येनाकाशमार्गेणोषा निर्गच्छति तेनैव रात्रिरपि। स च मार्गोऽनंतः। अवसानरहितः। तं मार्गं देवशिष्टे देवेन द्योतमानेन सूर्येणानुशिष्टे शिक्षिते सत्यावन्यान्या एकैका चरतः। क्रमेण गच्छतः। अपि च। सुमेके शोभनमेहने सर्वेषामुत्पादकत्वात् शोभनप्रजनने नक्तोषासा रात्रिरुषाश्च विरूपे तमःप्रकाशलक्षणाभ्यां विरुद्धरूपाभ्यां युक्ते अपि समनसा समानमनस्के ऐकमत्यं प्राप्ते सत्यौ न मेथेते। परस्परं न हिंस्तः। तथा न तस्थतुः। क्वचिदपि न तिष्ठतः। सर्वदा लोकानुग्रहार्थं गच्छत इत्यर्थः ॥ अन्यान्या। कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यं समासवच्च बहुलमित्यन्यशब्दस्य द्विर्भावः। तस्य परमाम्रेडितमित्याम्रेडितसंज्ञायामनुदात्तं चेत्याम्रेडितानुदात्तत्वं। देवशिष्टे। शासु अनुशिष्टौ। अस्मात्कर्मणि निष्ठा। यस्य विभाषेतीट्प्रतिषेधः। शास इदङ्हलोः। पा० ६. ४. ३४.। इत्युपधाया इत्वं। शासिवसिघसीनां चेति षत्वं। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। मेथेते। मेथृ मेधृ मेधाहिंसनयोः। भौवादिकः। अनुदात्तेत्। सुमेके। मिह सेचने। भावे घञ्। शोभनो मेहो ययोस्ते। व्यत्ययेन ककारः। उत्तरपदस्य ञित्स्वरेणाद्युदात्तत्वं। आद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं। नक्तोषासा। सुपां सुलुगिति विभक्तेराकारः। अन्येषामपि दृश्यत इति संहितायामुपधादीर्घः ॥

चतुर्थीमृचमाह ॥

भास्वती नेत्री सूनृतानामचेति चित्रा वि दुरो न आवः।
प्रार्प्या जगद्व्यु नो रायो अख्यदुषा अजीगर्भुवनानि विश्वा ॥ ४ ॥

भास्वती। नेत्री। सूनृतानां। अचेति। चित्रा। वि। दुरः। नः। आवरित्यावः। प्रऽअर्प्य। जगत्। वि। ऊं इति। नः। रायः। अख्यत्। उषाः। अजीगः। भुवनानि। विश्वा ॥ ४ ॥

भास्वती विशिष्टप्रकाशनयुक्ता। सूनृतेति वाङ्नाम। सूनृतानां वाचां नेत्र्युत्पा-

दयित्री। उषसः प्रादुर्भावानंतरं हि पशुपक्षिमृगादयः सर्वे शब्दं कुर्वंति। एवंभूतोषा अचेति। अस्माभिरज्ञायि। चित्रा चायनीया ज्ञाता सा नोऽस्माकं दुरो द्वाराणि तमसातिरोहितान्यावः। व्यवृणोत्। यथास्माभिर्दृश्यंते तथा तमो निवार्य प्रकाशयतीत्यर्थः। अपि च। जगत्सर्वं भुवनं प्रार्य प्रकाशं गमयित्वा नोऽस्माकं रायो धनानि व्यख्यत्। विशिष्टप्रकाशनयुक्तान्यकरोत्। उ इत्येतत्पादपूरणं। सैषोषा विश्वा भुवनानि सर्वाणि भुवनानि तमसातिरोहितत्वेनाविद्यमानकल्पान्यजीगः। उद्गिरति स्वमुखान्निर्गमयति। स्वकीयेन प्रकाशेन तमो निःसार्य पुनरुत्पन्नानीव करोतीत्यर्थः॥ नेत्री। णीञ् प्रापणे। तृच्। ऋन्नेभ्यो ङीप्। उदात्तयणो हल्पूर्वादिति ङीप उदात्तत्वं। अचेति। चिति संज्ञाने। दुरः। द्वारशब्दस्य रयेर्मतौ बहुलमिति बहुलवचनात्संप्रसारणं। आवः। वृञ् वरणे। लुङि मंत्रे घसेति च्लेर्लुक्। गुणः। हल्ङ्याब्भ्य इति तिलोपः। छंदस्यपि दृश्यत इत्याडागमः। प्रार्य। ऋ गतौ। णावर्तिह्रीत्यादिना पुक्। समासेऽनञ्पूर्वे क्त्वो ल्यप्। अख्यत्। ख्या प्रकथने। लुङ्स्यतिवक्तीत्यादिना च्लेरङादेशः। अजीगः। गॄ निगरणे। लङि तिपि बहुलं छंदसीति विकरणस्य श्लुः। द्विर्वचनोरदत्वहलादिशेषाः। अर्तिपिपर्त्योश्च बहुलं छंदसीत्यभ्यासस्येत्वं। छांदस ईकारः। यद्वा। अस्माण्णयंताल्लुङि चङि द्विर्भावसन्वद्भावेत्वदीर्घाः। छांदसश्चङो लोपः॥

पंचमीमृचमाह॥

जिह्मश्ये३ चरितवे मघोन्याभोगय इष्टये राय उ त्वं।
दभ्रं पश्यद्भ्य उर्विया विचक्ष उषा अजीगर्भुवनानि विश्वा॥५॥
जिह्मऽश्ये। चरितवे। मघोनी। आऽभोगये। इष्टये। राये। ऊं इति। त्वं।
दभ्रं। पश्यत्ऽभ्यः। उर्विया। विऽचक्षे। उषाः। अजीगः। भुवनानि। विश्वा॥५॥

मघोनीत्युषसो नामधेयं। मघोनी धनवत्युषा जिह्मश्ये जिह्मं वक्रं शयानाय पुरुषाय चरितवे चरितुं शयनादुत्थाय स्वापेक्षितं प्रति गंतुं व्युच्छंती भवति। त्वं। अयमेकशब्दपर्यायः सर्वनामशब्दः। यदाह त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तं। नि॰ १.७.। इति। त्वमेकं प्रत्याभोगय आभोग्याय शब्दादिविषयार्थं। तथापरं प्रतीष्टये यागार्थं। तथान्यं प्रति राये धनार्थं च व्युच्छंतीति शेषः। उशब्दश्चार्थे। अपि च दभ्रमल्पं पश्यद्भ्योऽधकारावृतत्वेनेषद्द्रष्टृभ्यो मनुष्येभ्यो

विचक्षे विशिष्टप्रकाशाय व्युच्छंत्युर्विया उर्वी विस्तीर्णोषाः सर्वाणि भूतजातानि तमसातिरोहितान्यजीगः। प्रकाशेनोद्गीर्णानीव करोति ॥ जिह्मश्ये। शीङ् स्वप्ने। जिह्मं शेत इति जिह्मशीः। क्विप् चेति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं। एरनेकाच इति यण्। उदात्तस्वरितयोर्यण इति विभक्तेः स्वरितत्वं। आभोगये। आभोगशब्दाच्चतुर्थ्येकवचने यकारोपजनः। यद्वा। आङ्पूर्वाद्भुजेर्बहुलवचनादौणादिकः किप्रत्ययः कुत्वं च। उर्विया। इयाडियाजीकाराणामुपसंख्यानमित्युर्वीशब्दादुत्तरस्य सोर्डियाजादेशः। विचक्षे। चक्षिङ् व्यक्तायां वाचि। विपूर्वादस्मात्संपदादिलक्षणो भावे क्विप् ॥

॥ इति प्रथमस्याष्टमे प्रथमो वर्गः ॥

षष्ठीमृचमाह ॥

क्षत्राय त्वं श्रवसे त्वं महीया इष्टये त्वमर्थमिव त्वमित्यै।
विसदृशा जीविताभिप्रचक्ष उषा अजीगर्भुवनानि विश्वा ॥ ६ ॥

क्षत्राय। त्वं। श्रवसे। त्वं। महीयै। इष्टये। त्वं। अर्थंऽइव। त्वं। इत्यै।
विऽसदृशा। जीविता। अभिऽप्रचक्षे। उषाः। अजीगः। भुवनानि। विश्वा ॥ ६ ॥

क्षत्राय। धननामैतत्। धनार्थं त्वमेकं प्रत्युषा व्युच्छंतीति शेषः। तथा श्रवसेऽन्नार्थं त्वमेकं प्रति महीयै महत्यै इष्टयेऽग्निष्टोमादिमहायज्ञार्थं त्वमेकं प्रति व्युच्छंती। तथार्थमिवापेक्षितमर्थं प्रतीत्यै गमनार्थं त्वमेकं प्रति व्युच्छंती। अपि च विसदृशा विलक्षणानि नानारूपाणि जीवितानि जीवनोपायभूतानि कृषिवाणिज्यादीन्यभिप्रचक्ष आभिमुख्येन प्रकाशयितुं व्युच्छंत्युषाः सर्वाणि भूतजातानि तमसा निगीर्णान्यजीगः। प्रकाशेनोद्गीर्णानीवाकरोत् ॥ त्वं। त्वसमसिमनेमेत्यानुच्चानि। फि० ४.१०.। इति सर्वानुदात्तत्वं। महीयै। मह्यै। महेरिन् सर्वधातुभ्य इतीन्प्रत्ययः। कृदिकारादक्तिन इति ङीष्। उदात्तयण इति विभक्तेरुदात्तत्वं। छांदस ईकारोपजनः। यद्वा महीशब्दादुत्तरस्य चतुर्थ्येकवचनस्य याडाप इति व्यत्ययेन याडागमः। छांदसमंतोदात्तत्वं। विसदृशा। त्यदादिषु दृशोऽनालोचने कञ्चेत्यत्र समानान्ययोश्चेति वचनाद्दृशेः कञ्। समानस्य छंदसीति सभावः। विगतसादृश्यानि विसदृशानि। शेश्छंदसि बहुलमिति शेर्लोपः।

बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । अभिप्रचक्षे । चक्षेस्तुमर्थे सेसेनिति सेन्प्रत्ययः । स्कोः संयोगाद्योरिति कलोपः । कत्वषत्वे ॥

सप्तमीमृचमाह ॥

एषा दिवो दुहिता प्रत्यदर्शि व्युच्छंती युवतिः शुक्रवासाः ।
विश्वस्येशाना पार्थिवस्य वस्व उषो अद्येह सुभगे व्युच्छ ॥ ७ ॥

एषा । दिवः । दुहिता । प्रति । अदर्शि । विऽउच्छंती । युवतिः । शुक्रऽवासाः ।
विश्वस्य । ईशाना । पार्थिवस्य । वस्वः । उषः । अद्य । इह । सुऽभगे । वि । उच्छ ॥ ७ ॥

दिवो दुहिता व्योम्नो दुहितृस्थानीया । तस्य हि पूर्वाह्णे उषा उत्पद्यते । सैषा व्युच्छंती तमो वर्जयंती प्रत्यदर्शि । सर्वैः प्राणिभिर्दृष्टाभूत् । कीदृशी सा । युवतिः । यावयित्री फलानां पुरुषैः प्रापयित्री । नित्ययौवनोपेता वा । शुक्रवासाः । श्वेतवसना निर्मलदीप्तिर्वा । तथा विश्वस्य सर्वस्य पार्थिवस्य पृथिव्याः संबंधिनो वस्वो धनस्येशाना । ईश्वरी । हे सुभगे शोभनधन उषः । तादृशी त्वमद्यास्मिन्काल इहास्मिन्देवयजनदेशे व्युच्छ । तमांसि विवासय । वर्जयेत्यर्थः ॥ दिवः । ऊडिदमिति विभक्तेरुदात्तत्वं । व्युच्छंती । उच्छी विवासे । विवासो वर्जनं । तौदादिकः । युवतिः । यूनस्तिः । पा॰ ४. १. ७७. । शुक्रवासाः । वस आच्छादने । वस्ते सर्वमाच्छादयतीति प्रकाशो वासः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । ईशाना । ईश ऐश्वर्ये । अदादित्वाच्छपो लुक् । अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । पार्थिवस्य । पृथिव्या ञाञाविति प्राग्दीव्यतीयोऽञ्प्रत्ययः । वस्वः । लिंगव्यत्ययः । घेर्ङितीति गुणस्य जसादिषु छंदसि वावचनमिति विकल्पितत्वादभावे यणादेशः ॥

अष्टमीमृचमाह ॥

परायतीनामन्वेति पाथ आयतीनां प्रथमा शश्वतीनां ।
व्युच्छंती जीवमुदीरयंत्युषा मृतं कं चन बोधयंती ॥ ८ ॥

पराऽयतीनां । अनु । एति । पाथः । आऽयतीनां । प्रथमा । शश्वतीनां ।
विऽउच्छंती । जीवं । उत्ऽईरयंती । उषाः । मृतं । कं । चन । बोधयंती ॥ ८ ॥

परायतीनां परागच्छंतीनामतीतानामुषसां संबंधि पाथोऽंतरिक्षैकदेशलक्षणं

स्थानं। पाथोऽन्तरिक्षं पथा व्याख्यातं। नि॰ ६. ७.। इति यास्कः। अद्यतन्युषा अन्वेति। अनुगच्छति। अतीता उषसो यथा व्युष्टा एवमेवैषापि व्युच्छतीत्यर्थः। तथायतीनामागच्छंतीनां शश्वतीनां बह्वीनामुषसां प्रथमाद्या भवति। एषा यथा वर्तत एवमेवागामिन्योऽप्युषस इत्यर्थः। तादृशी व्युच्छंती तमो वर्जयंती जीवं प्राणिनां जीवात्मानमुदीरयंती शयनादूर्ध्वं प्रेरयंत्युषा मृतं स्वापसमये प्रलीनेंद्रियत्वान्मृतमिव संतं कंचन कमपि पुरुषं बोधयंती पुनरिंद्रियप्रवेशेन चेतनं कुर्वती प्रवर्तत इति शेषः॥ परायतीनां। इण् गतौ। लटः शतृ। इणो यण्। उगितश्चेति ङीप्। आश्छंदसि बहुलमिति नाम उदात्तत्वं॥

नवमीमृचमाह॥

उषो यदग्निं समिधे चकर्थ वि यदावश्चक्षसा सूर्यस्य।
यन्मानुषान्यक्ष्यमाणाँ अजीगस्तद्देवेषु चकृषे भद्रमप्नः॥९॥

उषः। यत्। अग्निं। संऽइधे। चकर्थ। वि। यत्। आवः। चक्षसा। सूर्यस्य।
यत्। मानुषान्। यक्ष्यमाणान्। अजीगरिति। तत्। देवेषु। चकृषे। भद्रं। अप्नः॥९॥

हे उषस्त्वमग्निं गार्हपत्यादिरूपं समिधे समिंधनाय प्रज्वलनार्थं यच्चकर्थ कृतवती। उषःकाले ह्यग्नयो होमार्थमुपसमिध्यंते। अपि च तमसातिरोहितं जगत्सूर्यस्य चक्षसा प्रकाशेन यद्व्यावः। व्यवृणोः। तमसा विश्लिष्टमकरोः। तथा मानुषान्मनोः पुत्रान्मनुष्यान्यक्ष्यमाणान्यागं करिष्यतस्त्वं यदजीगः। पूर्वं तमसा ग्रस्तान्प्रकाशेनोद्गीर्णानिवाकरोः। हे उषो देवेषु मध्ये त्वमेव भद्रं भजनीयं तदेतत्त्रिविधमप्नः कर्म चकृषे। कृतवती॥ आवः। वृञ् वरणे। लुङि मंत्रे घसेति च्लेर्लुक्। गुणे हल्ङ्याब्भ्य इति सिलोपः। छंदस्यपि दृश्यत इत्याडागमः। मानुषान्। मनोर्जातावञ्यतौ षुक् चेत्यञ् षुगागमश्च॥

दशमीमृचमाह॥

कियात्या यत्समया भवाति या व्यूषुर्याश्च नूनं व्युच्छान्।
अनु पूर्वाः कृपते वावशाना प्रदीध्याना जोषमन्याभिरेति॥१०॥

कियति। आ। यत्। समया। भवाति। याः। विऽऊषुः। याः। च। नूनं। विऽउच्छान्।
अनु। पूर्वाः। कृपते। वावशाना। प्रऽदीध्याना। जोषं। अन्याभिः। एति॥१०॥

समयेत्यव्ययं समीपवचनं । उषाः समया भवाति समीपस्था भवतीति यदेतत् तत्कियति काले प्रवृत्तं परिसमाप्तं वेत्याकारः प्रश्नार्थः । तदुक्तं भवति । उषा येन कालेन संयुक्ता स कालः कियान् । तस्य कालस्य किं परिमाणमिति । अनेनोषसोऽनंतत्वमुक्तं । तदेव स्पष्टीकरोति । पुरा या उषसो व्यूषुः । व्युष्टाः संजाताः । नूनमवश्यमितः परं याश्चोषसो व्युच्छान् । व्युच्छंति व्युष्टा भविष्यंति । तत्र पूर्वा व्युष्टा अतीता उषसो वावशाना कामयमानेदानीं वर्तमानोषा अनुकृपते । अनुकल्पते । समर्था भवति । अतीता उषसो यथा प्रकाशमकुर्वन् तद्वदेषापि प्रकाशं करोतीत्यर्थः । तथा प्रदीध्याना प्रकर्षेण दीप्यमानोषा अन्याभिरागामिनीभिरुषोभिर्जोषं सहेति । संगच्छते । आगामिन्योऽप्येतदीयं प्रकाशमनुकुर्वंतीत्यर्थः ॥ कियति । किं परिमाणमस्य । किमिदंभ्यो वो घः । पा० ५.२.४०. । इति घत्वविधानसामर्थ्यात्किम्शब्दादपि परिमाणार्थे वतुब्वकारस्य घत्वं । इदंकिमोरीश्कीति किमः की आदेशः । घस्येयादेशे यस्येति लोपः । प्रत्ययाद्युदात्तत्वं । छांदसः सांहितिको दीर्घः । भवाति । लेट्याडागमः । व्यूषुः । विपूर्वो वसतिर्व्युच्छने वर्तते । लिट्युसि कित्त्वे यजादित्वात्संप्रसारणं द्विर्वचनादि । व्युच्छान् । उच्छी विवासे । विवासो वर्जनं । लेट्याडागमः । संयोगांतस्य लोपः । कृपते । कृपू सामर्थ्ये । व्यत्ययेन शः । वावशाना । वश कांतौ । अस्माद्यङ्लुगंतात्ताच्छीलिकश्चानश् । प्रदीध्याना । दीधीङ् दीप्तिदेवनयोः । लटः शानच् । अदादित्वाच्छपो लुक् । जक्षित्यादयः षट् इत्यभ्यस्तसंज्ञायामभ्यस्तानामादिरित्याद्युदात्तत्वं । गतिसमासे कृदुत्तरपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्याष्टमे द्वितीयो वर्गः ॥

एकादशीमृचमाह ॥

ईयुष्टे ये पूर्वतरामपश्यन्व्युच्छंतीमुषसं मर्त्यासः ।
अस्माभिरू नु प्रतिचक्ष्याभूदो ते यंति ये अपरीषु पश्यान् ॥ ११ ॥

ईयुः । ते । ये । पूर्वऽतरां । अपश्यन् । विऽउच्छंतीं । उषसं । मर्त्यासः ।
अस्माभिः । ऊं इति । नु । प्रतिऽचक्ष्या । अभूत् । ओ इति । ते । यंति । ये ।
अपरीषु । पश्यान् ॥ ११ ॥

ये मर्त्यासो मरणधर्माणो मनुष्या व्युच्छंती विवासयंती पूर्वतरामतिशयेन

पूर्वा विप्रकृष्टामपश्यन्। दृष्टवंतः। ते मनुष्या ईयुः। गताः। तथास्माभिरपि नु इदानीं प्रतिचक्ष्या प्रकर्षेण दृष्टव्याभूत्। जाता। तथापरीषु भाविनीषु रात्रिषु ये मनुष्या एतामुषसं पश्यान् पश्यंति ते। आ उ इति निपातद्वयसमुदायः। तत्र उ इत्येतदवधारणे। एव यंति। आगच्छंत्येव। कालत्रयेऽप्येषा व्याप्य वर्तत इत्यर्थः ॥ ईयुः। इण् गतौ। लिट्युसीणो यणिति यणादेशः। द्विर्वचनेऽचीति तस्य स्थानिवद्भावाद्द्विर्भावे दीर्घ इणः कितीत्यभ्यासदीर्घत्वं। ते। युष्मत्तत-क्षुःष्वंतःपादमिति सकारस्य षत्वं ष्टुत्वं च। मर्त्यासः। आज्जसेरसुक् ॥

द्वादशीमृचमाह ॥

यावयद्द्वेषा ऋतपा ऋतेजाः सुम्नावरी सूनृता ईरयंती।
सुमंगलीर्बिभ्रती देववीतिमिहाद्योषः श्रेष्ठतमा व्युच्छ ॥१२॥

यवयत्ऽद्वेषाः। ऋतऽपाः। ऋतेऽजाः। सुम्नऽवरी। सूनृताः। ईरयंती।
सुऽमंगलीः। बिभ्रती। देवऽवीतिं। इह। अद्य। उषः। श्रेष्ठऽतमा। वि। उच्छ ॥१२॥

यावयद्द्वेषाः। यावयंति असमत्तः पृथक्कृतानि द्वेषांसि द्वेष्टॄणि राक्षसादीनि यया सा तथोक्ता। न ह्युषसि जातायां राक्षसादयोऽवतिष्ठंते यतस्ते निशा-चराः। ऋतपा ऋतस्य सत्यस्य यज्ञस्य वा पालयित्री। ऋतेजा यज्ञार्थं प्रादुर्भूता। सत्यामुषस्यहनि यागादीनि अनुष्ठीयंते। अतो यज्ञार्थं जातेत्युच्यते। सुम्नावरी। सुम्नमिति सुखनाम। तद्वती। सूनृताः। वाङ्नामैतत्। पशुपक्षिमृगादीनां वचां-सीरयंती प्रेरयंत्युत्पादयंती सुमंगलीः सौमंगल्योपेता। पत्या कदाचिदपि न वियुक्तेत्यर्थः। देववीतिं देवैः काममानं यज्ञं बिभ्रती धारयंती हे उषः श्रेष्ठत-मोक्तेन प्रकारेणातिप्रशस्ता त्वमिहास्मिन्देवयजनदेशेऽद्यास्मिन्यागसमये व्युच्छ। विवासय ॥ यावयद्द्वेषाः। यु मिश्रणामिश्रणयोः। अस्माण्ण्यंताल्लटः शतृ। तस्य छंदस्युभयथेत्यार्धधातुकत्वाददुपदेशाल्लसार्वधातुकानुदात्तत्वाभावात्प्रत्ययस्वर एव शिष्यते। पुनर्बहुव्रीहौ स एव स्वरः। छांदसः पदकालीनो ह्रस्वः। ऋतपाः। ऋतं पाति रक्षतीत्यृतपाः। पा रक्षणे। विच्। ऋतेजाः। ऋते निमित्तभूते जायत इत्यृतेजाः। जनी प्रादुर्भावे। जनसनखनक्रमगमो विट्। विड्वनोरनुना-सिकस्यादित्यात्वं। तत्पुरुषे कृति बहुलमित्यलुक्। सुम्नावरी। छंदसीवनिपाविति मत्वर्थीयो वनिप्। वनो र चेति ङीप् नकारस्य रेफादेशश्च। अन्येषामपि

दृश्यत इति दीर्घः । व्यत्ययेन प्रत्ययाद्युदात्तत्वं । सुमंगलीः । सुमंगलात्संज्ञायामिति गौरादिषु पाठात् ङीष् । सर्वे विधयश्छंदसि विकल्प्यंत इति हल्ङ्याब्भ्य इति सुलोपस्य विकल्पितत्वादभावे रुत्वविसर्गौ । देववीतिं । वी गतिप्रजननकांत्यसनखादनेषु । देवैर्वीयते कामयत इति देववीतिर्यज्ञः । कर्मणि क्तिन् । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं ।

त्रयोदशीमृचमाह ॥

शश्वत्पुरोषा व्युवास देव्यथो अद्येदं व्यावो मघोनी ।
अथो व्युच्छादुत्तराँ अनु द्यूनजरामृता चरति स्वधाभिः ॥ १३ ॥

शश्वत् । पुरा । उषाः । वि । उवास । देवी । अथो इति । अद्य । इदं । वि । आवः । मघोनी । अथो इति । वि । उच्छात् । उत्ऽतरान् । अनु । द्यून् । अजरा । अमृता । चरति । स्वधाभिः ॥ १३ ॥

देवी देवनशीलोषाः पुरा पूर्वस्मिन्काले शश्वत् नित्यं संततं व्युवास । व्यौच्छत् । अथो अनंतरमद्यास्मिन्काले मघोनी धनवत्युषास्तमसातिरोहितमिदं सर्वं जगद्व्यावः । विवासितं प्रकाशनेन तमसा वियुक्तमकरोत् । अथो अनंतरमुत्तरानूर्ध्वतरान्भाविनो द्यून् दिवसाननुलक्ष्यागामिष्वपि दिवसेषु व्युच्छात् । व्युच्छति विवासयति । अतः कालत्रयव्यापिनी सोषा अजरा जरारहिता सर्वदैकरूपामृता मरणरहिता च सती स्वधाभिरात्मीयैस्तेजोभिः सह चरति । वर्तते ॥ उवास । वस निवासे । लिट्यभ्यासस्योभयेषामित्यभ्यासस्य संप्रसारणं । आवः । तस्मादेव धातोर्लङि बहुलं छंदसीति विकरणस्य लुक् । हल्ङ्याब्भ्य इति तिलोपः । छंदस्यपि दृश्यत इत्याडागमः । उच्छात् । लेटोऽडाटावित्याडागमः । उत्तरान् । दीर्घादटि समानपाद इति नकारस्य रुत्वं । आतोऽटि नित्यमिति सानुनासिक आकारः । अनु । अनुर्लक्षण इत्यनोः कर्मप्रवचनीयत्वं । अजरा अमृता । तत्र बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं ॥

चतुर्दशीमृचमाह ॥

व्य१ञ्जिभिर्दिव आतास्वद्यौदप कृष्णां निर्णिजं देव्यावः ।
प्रबोधयंत्यरुणेभिरश्वैरोषा याति सुयुजा रथेन ॥ १४ ॥

वि। अंजिऽभिः। दिवः। आतासु। अद्यौत्। अप। कृष्णां। निःऽनिजं। देवी। आवरित्यावः।
प्रऽबोधयंती। अरुणेभिः। अश्वैः। आ। उषाः। याति। सुऽयुजा। रथेन ॥ १४ ॥

दिवो नभसः संबंधिनीष्वातासु। दिङ्नामैतत्। आततासु विस्तीर्णासु दिक्षूषा अंजिभिर्व्यंजकैः प्रकाशकैस्तेजोभिर्व्यद्यौत्। विद्योतते प्रकाशते। सैषा देवी देवनशीला कृष्णां निर्णिजं। निर्णिगिति रूपनाम। रात्रिकृतं कृष्णं रूपमपावः। अपावृणोत्। प्रकाशेन तिरस्कृतवती। अपि च। अरुणेभिररुणैर्लोहितवर्णैरश्वैर्व्यापनशीलैः स्वकीयैः किरणैस्तुरगैर्वा सुयुजा सम्यक् युक्तेन रथेनोषा आयाति। आगच्छति। किं कुर्वती। प्रबोधयंती। सुप्तान्प्राणिनः प्रबुद्धान्कुर्वती ॥ अद्यौत्। द्युत दीप्तौ। लुङ्। द्युद्भ्यो लुङीति परस्मैपदं। व्यत्ययेन च्लेर्लुक्। गुणे प्राप्ते वृद्धिश्छांदसी। यद्वा द्यु अभिगमने। आदादिकः। उतो वृद्धिर्लुकि हलि। पा० ७. ३. ८९.। इति वृद्धिः ॥

देवानां हविःष्वावहंतीत्येषोषसो याज्या। सूचितं च। आ द्यां तनोषि रश्मिभिरावहंती पोष्या वार्याणि न ता अर्वा रेणुक काटो अश्नुते। आ० ६. १४.। इति ॥ तामेतां पंचदशीमृचमाह ॥

आवहंती पोष्या वार्याणि चित्रं केतुं कृणुते चेकिताना।
ईयुषीणामुपमा शश्वतीनां विभातीनां प्रथमोषा व्यश्वैत् ॥ १५ ॥
आऽवहंती। पोष्या। वार्याणि। चित्रं। केतुं। कृणुते। चेकिताना।
ईयुषीणां। उपऽमा। शश्वतीनां। विऽभातीनां। प्रथमा। उषाः। वि। अश्वैत् ॥ १५ ॥

पोष्या यावज्जीवं पोषणसमर्थानि वार्याणि वरणीयानि धनान्यावहंत्यस्मभ्यमानयंती चेकिताना सर्वं जनं प्रज्ञापयंत्युषाश्चित्रं विचित्रमाश्चर्यभूतं चायनीयं वा केतुं प्रज्ञापकं रश्मिं कृत्स्नजगत्प्रकाशनसमर्थं कृणुते। स्वात्मनः प्रकाशात्कुरुते। सैषेयुषीणां गमनवतीनां पूर्वनिष्पन्नानां शश्वतीनां बह्वीनामुषसामुपमा समीपे निर्मितोपमानभूता वा विभातीनां विशेषेण प्रकाशमानानामागामिनीनामुषसां प्रथमाद्या। एवंभूतोषा व्यश्वैत्। तेजसा प्रवृद्धासीत् ॥ पोष्या। पुष पुष्टौ। पोषणं पोषः। भावे घञ्। तत्र भवानि। भवे छंदसीति यत्। यतोऽनाव इत्याद्युदात्तत्वं। शेश्छंदसि बहुलमिति शेर्लोपः। वार्याणि। वृङ् संभक्तौ। ऋहलोर्ण्यत्। ईडवंदवृशंसदुहां ण्यत इत्याद्युदात्तत्वं। चेकिताना।

कित ज्ञाने। अस्माद्यङंताल्लटः शानच्। छंदस्युभयथेति तस्यार्धधातुकत्वादतोलोपयलोपौ। अभ्यस्तानामादिरित्याद्युदात्तत्वं। ईयुषीणां। इण् गतौ। लिटः क्वसुः। द्विर्भावादि। उगितश्चेति ङीप्। वसोः संप्रसारणं। इणो यणिति यणादेशः। दीर्घ इणः कितीत्यभ्यासस्य दीर्घत्वं। शासिवसिघसीनां चेति षत्वं। ङीप्सुपौ पित्त्वादनुदात्तौ। विभातीनां। भा दीप्तौ। अस्माच्छत्रंतात्पूर्ववत् ङीप्। ङ्याश्छंदसि बहुलमिति नाम उदात्तत्वं। अश्वैत्। टुओश्वि गतिवृद्ध्योः। लङि बहुलं छंदसीति विकरणस्य लुक्। गुणे कृते व्यत्ययेनैत्वं॥

॥ इति प्रथमस्याष्टमे तृतीयो वर्गः॥

षोडशीमृचमाह॥

उदीर्ध्वं जीवो असुर्न आगादप प्रागात्तम आ ज्योतिरेति।
आरैक्पंथां यातवे सूर्यायागन्म यत्र प्रतिरंत आयुः॥१६॥

उत्। ईर्ध्वं। जीवः। असुः। नः। आ। अगात्। अप। प्र। अगात्। तमः। आ। ज्योतिः। एति।
अरैक्। पंथां। यातवे। सूर्याय। अगन्म। यत्र। प्रऽतिरंते। आयुः॥१६॥

हे मनुष्या उदीर्ध्वं। शयनं परित्यज्योद्गच्छत। नोऽस्माकमसुः शरीरस्य प्रेरयिता जीवो जीवात्मागात्। आगतवान्। तमोऽपप्रागात्। अपक्रांतं। उषसः प्रकाशे सति सर्वजनीनव्यापारयोगः। तस्मात्परमात्मरूपतया स च जीवस्तदेव ज्योतिरेति। आगच्छति। सूर्याय सूर्यस्य पंथां मार्गमारैक्। विविक्तीकरोति। यातवे गमनाय। तस्मिन्देशेऽगन्म गच्छामो यत्र यस्मिन्देश आयुः। अन्नना-मैतत्। अन्नं प्रतिरंते। प्रपूर्वस्तिरतिर्वर्धनार्थः। उदारा दानेन प्रवर्धयंति॥ ईर्ध्वं। ईर गतौ। आदादिकोऽनुदात्तेत्। आरैक्। रिचिर् विरेचने। लङि बहुलं छंदसीति विकरणस्य लुक्। गुणे व्यत्ययेनैत्वं। पंथां। द्वितीयायामपि पथिमथ्यृभुक्षामादिति व्यत्ययेनात्वं। अगन्म। गमेर्लङि बहुलं छंदसीति विकरणस्य लुक्। म्वोश्चेति मकारस्य नकारः॥

सप्तदशीमृचमाह॥

स्यूमना वाच उदियर्ति वह्निः स्तवानो रेभ उषसो विभातीः।
अद्या तदुच्छ गृणते मघोन्यस्मे आयुर्नि दिदीहि प्रजावत्॥१७॥

स्यूमना । वाचः । उत् । इयर्ति । वह्निः । स्तवानः । रेभः । उषसः । विऽभातीः ।
अद्य । तत् । उच्छ । गृणते । मघोनि । अस्मे इति । आयुः । नि । दिदीहि ।
प्रजाऽवत् ॥ १७ ॥

वह्निः स्तोत्राणां वोढा रेभः । स्तोतृनामैतत् । स्तोतोषसो विभातीस्तमसोऽपनोदनेन प्रकाशमाना उषोदेवताः स्तवानः स्तुवन् वाचो वेदरूपायाः संबंधीनि स्यूमना स्यूमान्यनुस्यूतानि संततान्युक्थान्युदियर्ति । उन्नमयति । उच्चारयति । अतो हे मघोनि मघवत्युषः । अद्यास्मिन्समये गृणते स्तुवते तस्मै पुरुषाय तदुच्छ । दृष्टिनिरोधकतया प्रसिद्धं नैशं तमो विवासय । वर्जय । अस्मे अस्मभ्यं च प्रजावत् प्रजाभिः पुत्रपौत्रादिभिर्युक्तमायुरन्नं निदिदीहि । नितरां प्रकाशय । दीदेतिश्छांदसो दीप्तिकर्मा । प्रयच्छेत्यर्थः ॥ स्यूमना । षिवु तंतुसंताने । अन्येभ्योऽपि दृश्यंत इति दृशिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात्कर्मणि मनिन् । छ्वोः शूडित्यूट् । आङ्याजयारां चोपसंख्यानमिति विभक्तेराङादेशः । यद्वा । औणादिको भावे मक् । पामादिलक्षणो मत्वर्थीयो नः । बंधनयुक्तानीत्यर्थः । शेश्छंदसि बहुलमिति शेर्लोपः । व्यत्ययेनाद्युदात्तत्वं । वाचः । सावेकाच इति ङस उदात्तत्वं । इयर्ति । ऋ गतौ । जौहोत्यादिकः । अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं । स्तवानः । ष्टुञ् स्तुतौ । शानच्यदादित्वाच्छपो लुक् । तस्य छंदस्युभयथेत्यार्धधातुकत्वेन ङित्त्वाभावाद्गुणावादेशौ । व्यत्ययेनाद्युदात्तत्वं । विभातीः । शतुरनुमो नद्यजादी इति ङीप उदात्तत्वं । गृणते । गृ शब्दे । क्र्यादिकः । प्वादीनां ह्रस्वः । पूर्वोक्तेन सूत्रेण विभक्तेरुदात्तत्वं । अस्मे । सुपां सुलुगिति चतुर्थ्याः शे आदेशः ॥

अष्टादशीमृचमाह ॥

या गोमतीरुषसः सर्ववीरा व्युच्छंति दाशुषे मर्त्याय ।
वायोरिव सूनृतानामुदर्के ता अश्वदा अश्नवत्सोमसुत्वा ॥ १८ ॥
याः । गोऽमतीः । उषसः । सर्वऽवीराः । विऽउच्छंति । दाशुषे । मर्त्याय ।
वायोःऽइव । सूनृतानां । उत्ऽअर्के । ताः । अश्वऽदाः । अश्नवत् । सोमऽसुत्वा ॥ १८ ॥

दाशुषे हवींषि दत्तवते मर्त्याय मनुष्याय यजमानाय गोमतीर्गोमत्यो बहुभिर्गोभिर्युक्ताः सर्ववीराः सर्वैः शरणसमर्थैर्वीरैः शूरैर्युक्ता या उषसो व्युच्छंति ।

तमो वर्जयंति। वायोरिव वायुवच्छीघ्रं प्रवर्तमानानां सूनृतानां स्तुतिरूपाणां वाचामुदर्के समाप्तौ। अश्वदा अश्वानां दात्रीस्ता उषसः सोमसुत्वा सोमानामभिषोता यजमानोऽश्नवत्। व्याप्नोतु ॥ दाशुषे। दाशृ दाने। दाश्वान् साह्वानिति क्वसुप्रत्ययांतो निपात्यते। चतुर्थ्येकवचने वसोः संप्रसारणमिति संप्रसारणं। शासिवसिघसीनां चेति षत्वं। अश्नवत्। अशू व्याप्तौ। व्यत्ययेन परस्मैपदं। लेट्यडागमः। इतश्च लोप इतीकारलोपः। सोमसुत्वा। षुञ् अभिषवे। अन्येभ्योऽपि दृश्यंत इति क्वनिप्। ह्रस्वस्य पितीति तुक् ॥

एकोनविंशीमृचमाह ॥

माता देवानामदितेरनीकं यज्ञस्य केतुर्बृहती वि भाहि।
प्रशस्तिकृद्ब्रह्मणे नो व्यु१च्छा नो जने जनय विश्ववारे ॥१९॥

माता। देवानां। अदितेः। अनीकं। यज्ञस्य। केतुः। बृहती। वि। भाहि।
प्रशस्तिऽकृत्। ब्रह्मणे। नः। वि। उच्छ। आ। नः। जने। जनय। विश्वऽवारे ॥१९॥

हे उषस्त्वं देवानां माता जननी। उषसि सर्वे देवाः स्तुत्या प्रबोध्यंते। अतः सा तज्जननवतीत्युच्यते। अत एवादितेर्देवानां मातुरनीकं प्रत्यनीकं प्रतिस्पर्धिनी त्वमित्यर्थः। यद्वा दीव्यंतीति देवा रश्मयः। तेषां निर्मात्री। अदितेरखंडनीयाया भूमेरनीकं मुखं। यथेंद्रियाश्रयत्वान्मुखं प्रकाशकं। एवमुषा भूमेः प्रकाशयित्रीत्यर्थः। यज्ञस्य केतुः केतयित्री ज्ञापयित्री बृहती महती सती विभाहि। प्रकाशस्व। अपि च। प्रशस्तिकृत् सम्यक् स्तुतमिति प्रशंसनं कुर्वती नोऽस्मदीयाय ब्रह्मणे मंत्ररूपाय स्तोत्राय व्युच्छ। विवासय। तदनंतरं हे विश्ववारे विश्वैर्वरणीय उषो नोऽस्मान् जने जनपद आजनय। आभिमुख्येन प्रादुर्भावय। अवस्थापयेत्यर्थः ॥ बृहती। बृहन्महतोरुपसंख्यानमिति ङीप उदात्तत्वं। प्रशस्तिकृत्। शंसु स्तुतौ। भावे क्तिन्। तितुत्रेतीट्प्रतिषेधः। अनिदितामिति नलोपः। तस्मिन्नुपपदे करोतेः क्विप् चेति क्विप्। जनय। जनी प्रादुर्भावे। णिच्युपधावृद्धिः। जनी जृष् क्नसु रंजोऽमंताश्चेति मित्त्वे मितां ह्रस्व इति ह्रस्वत्वं ॥

विंशीमृचमाह ॥

यच्चित्रमप्न उषसो वहंतीजानाय शशमानाय भद्रं।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥२०॥

यत्। चित्रं। अप्नः। उषसः। वहंति। ईजानाय। शशमानाय। भद्रं।
तत्। नः। मित्रः। वरुणः। ममहंतां। अदितिः। सिंधुः। पृथिवी। उत। द्यौः ॥२०॥

चित्रं चायनीयमप्न आप्तव्यं यद्धनमुषसो वहंति। आनयंति। ईजानाय हविर्भिरिष्टवते शशमानाय स्तुतिभिः संभजमानाय पुरुषाय भद्रं भजनीयं तद्भवतीति शेषः। यदनेन सूक्तेनास्माभिः प्रार्थितं तन्मित्रादयः षट् देवता मामहंतां। पूजितं कुर्वंतु ॥ अप्नः। आप्लृ व्याप्तौ। आपः कर्माख्यायां ह्रस्वो नुट् च वेति बहुलग्रहणादकर्माख्यायामप्यसुन्। धातोर्ह्रस्वो नुडागमश्च। ईजानाय। यजतेश्छंदसि लिट्। लिटः कानज्वा। वचिस्वपीत्यादिना संप्रसारणं। द्विर्वचनादि। शशमानाय। शश प्लुतगतौ। ताच्छीलिकश्चानश्। तस्य लसार्वधातुकत्वाभावाददुपदेशाल्लसार्वधातुकस्वराभावे चित्स्वर एव शिष्यते ॥

॥ इति प्रथमस्याष्टमे चतुर्थो वर्गः ॥

इमा रुद्रायेत्येकादशर्चं नवमं सूक्तं कुत्सस्यार्षं। दशम्येकादश्यौ त्रिष्टुभौ। शिष्टा नव जगत्यः। रुद्रो देवता। तथा चानुक्रांतं। इमा एकादश रौद्रं द्वित्रिष्टुबंतमिति ॥ शूलगवादिषु रुद्रदेवत्येषु कर्मस्वनेन सूक्तेन दिगुपस्थेया। तथा च सूत्रितं। कद्रुद्रायेमा रुद्राया ते पितरिमा रुद्राय स्थिरधन्वने गिर इति सर्वरुद्रयज्ञेषु दिशामुपस्थानमिति ॥

तत्र प्रथमामृचमाह ॥

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः।
यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरं ॥१॥

इमाः। रुद्राय। तवसे। कपर्दिने। क्षयत्ऽवीराय। प्र। भरामहे। मतीः।
यथा। शं। असत्। द्विऽपदे। चतुःऽपदे। विश्वं। पुष्टं। ग्रामे। अस्मिन्। अनातुरं ॥१॥

रुद्राय। रोदयति सर्वमंतकाल इति रुद्रः। यद्वा रुत्संसाराख्यं दुःखं। तद्द्रावयत्यपगमयति विनाशयतीति रुद्रः। यद्वा रुतः शब्दरूपा उपनिषदः। ताभिर्द्रूयते गम्यते प्रतिपाद्यत इति रुद्रः। यद्वा रुत् शब्दात्मिका वाणी तत्प्रतिपाद्यात्मविद्या वा। तामुपासकेभ्यो राति ददातीति रुद्रः। यद्वा रुणद्ध्यावृणोतीति रुदंधकारादि। तद्दृणाति विदारयतीति रुद्रः। यद्वा कदाचिद्देवासुरसंग्रामेऽग्न्यात्मको

रुद्रो देवैर्निक्षिप्तं धनमपहृत्य निरगात्। असुराञ्जित्वा देवा एनमन्विष्य दृष्ट्वा धनमपहरन्। तदानीमरुदत्। तस्माद्रुद्र इत्याख्यायते। तथा च तैत्तिरीयकं। सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति। तस्मै रुद्राय मतीर्मननीया इमा स्तुतीः प्रभरामहे। प्रकर्षेण निष्पादयामः। कीदृशाय। तवसे। प्रवृद्धाय। कपर्दिने। जटिलाय। क्षयद्वीराय। क्षयंतो विनश्यंतो वीरा यस्मिन् तादृशाय। यद्वा क्षयतिरैश्वर्यकर्मा। क्षयंतः प्राप्तैश्वर्या वीरा मरुद्गणाः पुत्रा यस्य तस्मै। यथा येन प्रकारेण शं शमनीयानां रोगाणामुपशमनं द्विपदेऽस्मदीयाय मनुष्याय चतुष्पदे गवाश्वप्रभृतये चासत् भवेत् तेन प्रकारेण स्तुतीः कुर्म इत्यर्थः। अतोऽस्मिन्नस्मदीये ग्रामे वर्तमानं विश्वं सर्वं प्राणिजातमनातुरं। आतुरा रुग्णाः। तै रहितं सत् पुष्टं प्रवृद्धं भवतु ॥ रुद्राय। रोदेर्णिलुक् चेति रक्। तवसे। तवतिर्वृद्ध्यर्थः। सौत्रो धातुः। औणादिकोऽसिप्रत्ययः। क्षयद्वीराय। क्षि क्षये। लटः शतृ। छंदस्युभयथेति शतुरार्धधातुकत्वेनादुपदेशाल्लसार्वधातुकानुदात्तत्वा-भावात्तस्यैव स्वरः शिष्यते। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। असत्। अस भुवि। लेट्यडागमः। इतश्च लोप इतीकारलोपः। द्विपदे। द्वौ पादावस्य। संख्या-सुपूर्वस्येति पादशब्दस्यांत्यलोपः समासांतः। चतुर्थ्येकवचने भसंज्ञायां पादः पदिति पद्भावः। एकदेशविकृतस्यानन्यत्वात् द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहा-वित्युत्तरपदाद्युदात्तत्वं। चतुष्पदे। स्वरवर्जं पूर्ववत्। बहुव्रीहौ पूर्वपदप्रकृति-स्वरत्वं। पूर्वपदं च त्रेः संख्याया इत्याद्युदात्तं ॥

रुद्रदेवत्ये पशौ वपापुरोडाशयोर्मृळा नो रुद्रेत्यादिके द्वे अनुवाक्ये। तथा च सूचितं। मृळा नो रुद्रोत नो मयस्कृधीति द्वे आ ते पितर्मरुतां सुम्नमेतु। आ० ३. ८.। इति ॥ तयोराद्यां सूक्ते द्वितीयामृचमाह ॥

मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते।
यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥ २ ॥

मृळ। नः। रुद्र। उत। नः। मयः। कृधि। क्षयत्ऽवीराय। नमसा। विधेम। ते।
यत्। शं। च। योः। च। मनुः। आऽयेजे। पिता। तत्। अश्याम। तव। रुद्र।
प्रऽनीतिषु ॥ २ ॥

हे रुद्र नोऽस्मभ्यमस्मदर्थं मृळ। त्वं सुखयिता भव। उत अपि च तदनंतरं

नोऽस्माकं मयः सुखं कृधि। कुरु। वयं च क्षयद्वीराय क्षयितसर्ववीरं प्राप्तैश्वर्यैर्मरुद्भिर्युक्तं वा ते त्वां नमसा हविर्लक्षणेनान्नेन नमस्कारेण वा विधेम। परिचरेम। विधतिः परिचरणकर्मा। अपि च। पितोत्पादको मनुः स्वकीयाभ्यः प्रजाभ्यः शं रोगाणां शमनं योश्च भयानां यावनं च यदेतद्द्वयमायेजे। देवेभ्यः सकाशात्प्राप्य दत्तवान्। हे रुद्र तव प्रणीतिषु प्रकृष्टनयनेषु सत्सु तद्वयमश्याम। व्याप्नुयाम ॥ मृळा। मृड सुखने। तौदादिकः। द्व्यचोऽतस्तिङ इति संहितायां दीर्घः। कृधि। करोतेर्लोटि बहुलं छंदसीति विकरणस्य लुक्। श्रुशृणुपृकृवृभ्यश्छंदसीति हेर्धिः। अतः कृकमीति मयसो विसर्जनीयस्य सत्वं। क्षयद्वीराय। क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी। विधेम। विध विधाने। तौदादिकः। आयेजे। यज देवपूजासंगतिकरणदानेषु। लिटि संज्ञापूर्वकस्य विधेरनित्यत्वात्संप्रसारणाभाव एत्वाभ्यासलोपौ। अश्याम। अशू व्याप्तौ। व्यत्ययेन परस्मैपदं। बहुलं छंदसीति विकरणस्य लुक् ॥

तृतीयामृचमाह ॥

अ॒श्याम॑ ते सुम॒तिं दे॑वय॒ज्यया॑ क्ष॒यद्वी॑रस्य॒ तव॑ रुद्र मीढ्वः।
सु॒म्ना॒यन्निद्विशो॑ अ॒स्माक॒मा च॒रारि॑ष्टवीरा जुहवाम ते ह॒विः ॥ ३ ॥
अ॒श्याम॑। ते। सु॒ऽम॒तिं। दे॒व॒ऽय॒ज्यया॑। क्ष॒यत्ऽवी॑रस्य। तव॑। रु॒द्र॒। मी॒ढ्वः॒।
सु॒म्न॒ऽयन्। इत्। विशः॑। अ॒स्माक॑। आ। च॒र॒। अरि॑ष्टऽवीराः। जु॒ह॒वा॒म॒। ते॒। ह॒विः ॥ ३ ॥

हे मीढ्वः सेक्तः कामाभिवर्षक नित्यतरुण वा रुद्र क्षयद्वीरस्य क्षयितप्रतिपक्षस्य मरुद्भिर्युक्तस्य वा तव सुमतिं शोभनां कल्याणीमनुग्रहात्मिकां बुद्धिं ते त्वत्संबंधिनो वयं देवयज्यया देवयागेन त्वद्देवत्येन यज्ञेनाश्याम। प्राप्नुवाम। त्वं चास्माकं विशः प्रजा अभिलक्ष्याचर। आगच्छ। किं कुर्वन्। सुम्नायन्नित्। सुम्नमिति सुखनाम। तासां प्रजानां सुखमिच्छन्नेव। सुखप्रद एव भवेत्यर्थः। ततो वयमरिष्टवीराः। वीर्याज्जायंत इति वीराः प्रजाः। अरिष्टा अहिंसिता वीरा येषां तथाभूताः संतस्ते तुभ्यं हविश्चरुपुरोडाशादिकं जुहवाम। चोदित आधार प्रक्षिपाम ॥ सुमतिं। मतिर्मननं। शोभनं मननं यस्यां बुद्धौ सा सुमतिः। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। देवयज्यया। छंदसि निष्टर्क्येत्यादौ यजेर्यप्रत्ययो निपात्यते स्त्रीलिंगता च। मीढ्वः। मिह सेचने। दाश्वान्

साह्वान् मीढ्वानिति क्वसुप्रत्ययांतो निपातितः। संबुद्धौ मतुवसो रुरिति रुत्वं। सुम्नायन्। सुम्नं परेषामिच्छति। छंदसि परेच्छायामपीति क्यच्। न छंदस्यपुत्रस्येतीत्वदीर्घयोर्निषेधः। देवसुम्नयोर्यजुषि काठके। पा० ७. ४. ३८.। इति विधीयमानमात्वं व्यत्ययेनात्रापि द्रष्टव्यं ॥

चतुर्थीमृचमाह ॥

त्वेषं वयं रुद्रं यज्ञसाधं वंकुं कविमवसे नि ह्वयामहे।
आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे ॥४॥
त्वेषं। वयं। रुद्रं। यज्ञऽसाधं। वंकुं। कविं। अवसे। नि। ह्वयामहे।
आरे। अस्मत्। दैव्यं। हेळः। अस्यतु। सुऽमतिं। इत्। वयं। अस्य। आ। वृणीमहे ॥४॥

अवसे रक्षणाय रुद्रं महादेवं निह्वयामहे। नितरामाह्वयामः। कीदृशं। त्वेषं दीप्तं यज्ञसाधं यज्ञस्य साधयितारं। एष हि यज्ञं स्विष्टं करोति। तथा च तैत्तिरीयके देवा वै यज्ञाद्रुद्रमंतरायन्नित्युपक्रम्याम्नातं। स्विष्टं वैष्णव इदं भविष्यति यदिमं राधयिष्याम इति स्विष्टकृतः स्विष्टकृत्त्वमिति। वंकुं। कुटिलगंतारं कविं क्रांतदर्शिनं। स च रुद्रो दैव्यं देवस्य द्योतमानस्य संबंधिनं हेळः क्रोधमस्मदारेऽस्मत्तो दूरदेशेऽस्यतु। प्रेरयतु। अस्य महादेवस्य सुमतिमित् शोभनामनुग्रहरूपां बुद्धिमेव वयमावृणीमहे। आभिमुख्येन संभजामहे॥ यज्ञसाधं। यज्ञं साधयतीति यज्ञसात्। षिधु संराद्धौ। सिध्यतेरपारलौकिक इत्यात्वं। यद्वा राध साध संसिद्धौ। अस्माण्यंतात् क्विप्। वंकुं। वकि कौटिल्ये। औणादिक उप्रत्ययः। निह्वयामहे। निसमुपविभ्यो ह्व इत्यात्मनेपदं। दैव्यं। देवाद्यञञाविति प्राग्दीव्यतीयो यञ्। अस्यतु। असु क्षेपणे। दैवादिकः। वृणीमहे। वृङ् संभक्तौ। क्र्यादिकः॥

पंचमीमृचमाह ॥

दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे।
हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म छर्दिरस्मभ्यं यंसत् ॥५॥
दिवः। वराहं। अरुषं। कपर्दिनं। त्वेषं। रूपं। नमसा। नि। ह्वयामहे।
हस्ते। बिभ्रत्। भेषजा। वार्याणि। शर्म। वर्म। छर्दिः। अस्मभ्यं। यंसत् ॥५॥

वराहं वराहारमुत्कृष्टभोजनं। यद्वा वराहवदृढांगं। अरुषमारोचमानं कपर्दिनं जटाभिर्युक्तं त्वेषं तेजसा दीप्यमानं रूपं निरूपणीयं वेदांतैरधिगम्यं। एवंभूतं रुद्रं नमसा हविर्लक्षणेनान्नेन नमस्कारेण वा दिवो द्युलोकसकाशान्निह्वयामहे। नितरामाह्वयामः। स आहूतो रुद्रो हस्ते स्वकीये बाहौ वार्याणि सर्वैर्वरणीयानि भेषजा भैषज्यानि रोगशमनहेतुभूतानि बिभ्रत् धारयन् अस्मभ्यं स्तोतृभ्यः शर्मारोग्यलक्षणं सुखं वर्मायुधानां निवारकं कवचं छर्दिः। गृहनामैतत्। गृहं च यंसत्। प्रयच्छतु॥ बिभ्रत्। डुभृञ् धारणपोषणयोः। जौहोत्यादिकः। लटः शतृ। भृञामिदित्यभ्यासस्येत्वं। भेषजा। भिषज् चिकित्सायां। कंड्वादिः। पचाद्यच्। अतोलोपयलोपौ। सुमंगलभेषजाच्चेति निपातनाद्रूपसिद्धिः। शेश्छंदसि बहुलमिति शेर्लोपः। वार्याणि। वृङ् संभक्तौ। ऋहलोर्ण्यत्। ईडवंदेत्याद्युदात्तत्वं। छर्दिः। उछृदिर् दीप्तिदेवनयोः। छृद्यते दीप्यते सुवर्णादिभिर्धनैः प्रकाश्यत इति छर्दिर्गृहं। अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः। यंसत्। यम उपरमे। लेट्यडागमः। सिब्बहुलं लेटीति सिप्। इतश्च लोप इतीकारलोपः॥

॥ इति प्रथमस्याष्टमे पंचमो वर्गः॥

षष्ठीमृचमाह॥

इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनं।
रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ॥ ६॥

इदं। पित्रे। मरुतां। उच्यते। वचः। स्वादोः। स्वादीयः। रुद्राय। वर्धनं।
रास्व। च। नः। अमृत। मर्तऽभोजनं। त्मने। तोकाय। तनयाय। मृळ॥ ६॥

इदं स्तुतिलक्षणं वचो मरुतामेकोनपंचाशत्संख्याकानां देवविशेषाणां पित्रे जनकाय रुद्रायेश्वरायोच्यते। उच्चार्यते। कीदृशं। स्वादोः स्वादीयः। रसवतो मधुघृतादेरपि स्वादुतरं। अतिशयेन हर्षजनकमित्यर्थः। वर्धनं। स्तुत्यस्य प्रवर्धकं। स्तोत्रेण हि देवता हृष्टा सती प्रवर्धते। रुद्रस्य च मरुतां पितृत्वमेवमाख्यायते। पुरा कदाचिदिंद्रोऽसुराञ्जिगाय। तदानीं दितिरसुरमातेंद्रहननसमर्थं पुत्रं कामयमाना तपसा भर्तुः सकाशाद्गर्भं लेभे। इमं वृत्तांतमवगच्छन्निंद्रो वज्रहस्तः सन् सूक्ष्मरूपो भूत्वा तस्या उदरं प्रविश्य तं गर्भं सप्तधा बिभेद। पुनरप्येकैकं सप्तखंडमकरोत्। ते सर्वे गर्भैकदेशा योनेर्निर्गत्यारुदन्। एतस्मिन्नवसरे लीलार्थं

गच्छंतौ पार्वतीपरमेश्वराविमान्ददृशतुः । महेशं प्रति पार्वत्येवमवोचत् । इमे मांसखंडा यथा प्रत्येकं पुत्राः संपद्यंतामेवं त्वया कार्यं मयि चेत्प्रीतिरस्तीति । स च महेश्वरस्तान्समानरूपान् समानवयसः समानालंकारान्पुत्रान्कृत्वा गौर्यै प्रददौ तवेमे पुत्राः संत्विति । अतः सर्वेषु मारुतेषु सूक्तेषु मरुतो रुद्रपुत्रा इति स्तूयंते । रौद्रेषु च मरुतां पिता रुद्र इति । अपि च हे अमृत मरणरहित रुद्र मर्तभोजनं मर्तानां मनुष्याणां भोगपर्याप्तमन्नं नोऽस्मभ्यं रास्व । प्रयच्छ । तथा त्मने आत्मने । द्वितीयार्थे चतुर्थी । मां । तोकाय तोकं पुत्रं । तनयाय तनयं तत्पुत्रं च मृळ । सुखय ॥ पित्रे । उदात्तयण इति विभक्तेरुदात्तत्वं । रास्व । रा दाने । व्यत्ययेनात्मनेपदं । त्मने । मंत्रेष्वाङ्यादेरात्मन इत्यत्राङोऽन्यत्रापि छंदसि दृश्यत इति वचनादात्मन आकारलोपः ॥

सप्तमीमृचमाह ॥

मा नो॑ म॒हान्त॑मु॒त मा नो॑ अर्भ॒कं मा न॒ उक्ष॑न्तमु॒त मा न॑ उक्षि॒तं ।
मा नो॑ वधीः पि॒तरं॒ मोत मा॒तरं॒ मा नः॑ प्रि॒यास्त॒न्वो॑ रुद्र रीरिषः ॥ ७ ॥

मा । नः॒ । म॒हान्तं॑ । उ॒त । मा । नः॒ । अ॒र्भ॒कं । मा । नः॒ । उक्ष॑न्तं । उ॒त । मा । नः॒ । उ॒क्षि॒तं ।
मा । नः॒ । व॒धीः॒ । पि॒तरं॑ । मा । उ॒त । मा॒तरं॑ । मा । नः॒ । प्रि॒याः । त॒न्वः॑ । रु॒द्र॒ । रि॒रि॒षः॒ ॥ ७ ॥

हे रुद्र नोऽस्माकं मध्ये महांतं वृद्धं मा वधीः । मा हिंसीः । उत अपि च नोऽस्माकमर्भकं बालं मा हिंसीः । तथा नोऽस्माकं मध्य उक्षंतं सेक्तारं मध्यवयस्कं युवानं मा वधीः । उत अपि च नोऽस्माकमुक्षितं गर्भरूपेण स्त्रीषु निषिक्तमपत्यं मा वधीः । तथा नोऽस्माकं पितरं जनकं मा वधीः । उत अपि च मातरं जननीं मा वधीः । तथा नोऽस्माकं प्रियाः स्नेहविषयास्तन्वः शरीराणि तनूषु भवाः प्रजा वा हे रुद्र मा रीरिषः । मा हिंसीः ॥ वधीः । हंतेर्माङि लुङि चेति वधादेशः । स चादंतः । सिच इट् । अतो लोपस्य स्थानिवद्भावाद्वृद्ध्यभावः । रीरिषः । रिष हिंसायां । ण्यंताल्लुङि चङि णिलोपोपधाह्रस्वत्वादीनि । छांदसः पदकालीनोऽभ्यासह्रस्वः ॥

अष्टमीमृचमाह ॥

मा न॑स्तो॒के तन॑ये॒ मा न॑ आ॒यौ मा नो॒ गोषु॒ मा नो॒ अश्वे॑षु रीरिषः ।
वी॒रान्मा नो॑ रुद्र भामि॒तो व॑धीर्ह॒विष्म॑न्तः॒ सद॒मित्त्वा॑ हवामहे ॥ ८ ॥

मा। नः। तोके। तनये। मा। नः। आयौ। मा। नः। गोषु। मा। नः। अश्वेषु। रिरिषः।
वीरान्। मा। नः। रुद्र। भामितः। वधीः। हविष्मंतः। सदं। इत्। त्वा। हवामहे ॥ ८ ॥

हे रुद्र नोऽस्माकं तोकादिविषये मा रीरिषः। मा हिंसीः। तोकशब्दः पुत्रवाची। तनयस्तत्पुत्रः। आयुरित्यंतोदात्तो मनुष्यनाम। पुत्रपौत्रव्यतिरिक्तो नोऽस्मदीयो मनुष्यस्तस्मिन् गोषु पश्वादिष्वश्वेषु च मा रीरिषः। हिंसां मा कृथाः। तथा हे रुद्र वीरान् विक्रांतान् शौर्योपेतानस्मदीयान् भामितः क्रुद्धः सन् मा वधीः। मा हिंसीः। वयं च हविष्मंतो हविर्भिर्युक्ताः संतः सदमित् सर्वदैव त्वां हवामहे। आह्वयामहे ॥ आयौ। इण् गतौ। छंदसीण इत्युण्-प्रत्ययः। भामितः। भाम क्रोधे क्रोधिकरणे चेति कर्तरि क्तः। हवामहे। ह्वेञो लटि बहुलं छंदसीति संप्रसारणं ॥

देवसुवां हविःषु रुद्रस्य पशुपतेर्याग उप ते स्तोमानित्यादिके याज्यानुवाक्ये। सूचितं च। उप ते स्तोमान् पशुपा इवाकरिमिति द्वे। आ० ४.११.। इति ॥

तयोराद्यां सूक्ते नवमीमृचमाह ॥

उप ते स्तोमान्पशुपा इवाकरं रास्वा पितर्मरुतां सुम्नमस्मे।
भद्रा हि ते सुमतिर्मृळयत्तमाथा वयमव इत्ते वृणीमहे ॥ ९ ॥

उप। ते। स्तोमान्। पशुपाःऽइव। आ। अकरं। रास्व। पितः। मरुतां। सुम्नं। अस्मे इति।
भद्रा। हि। ते। सुऽमतिः। मृळयत्ऽतमा। अथ। वयं। अवः। इत्। ते। वृणीमहे ॥ ९ ॥

हे रुद्र स्तोमान् स्तुतिरूपान्मंत्रान् ते तुभ्यमुपाकरं। उपाकरोमि। समर्पयामि। तत्र दृष्टांतः। पशुपा इव। यथा पशूनां पालयिता गोपः प्रातः-काले स्वस्मै समर्पितान्पशून् सायंकाले स्वामिभ्यः प्रत्यर्पयति। एवं त्वत्सका-शाल्लब्धान् स्तुतिरूपान्मंत्रान् स्तुतिसाधनतया तुभ्यं प्रत्यर्पयामीत्यर्थः। हे मरुतां पितः। मरुत्संज्ञानां देवानामुत्पादक रुद्र नोऽस्मभ्यं सुम्नं सुखं रास्व। देहि। अपि च ते त्वदीया सुमतिः कल्याणी बुद्धिर्मृळयत्तमा। अतिशयेन सुखयि-तृतमा। अत एव भद्रा भजनीया हि। यस्मादेवं तस्मात् अथानंतरं वयं ते त्वदीयमवो रक्षणं वृणीमहे। संभजामहे ॥ अकरं। छंदसि लुङ्लङ्लिट इति वर्तमाने लुङ्। कृमृदृरुहिभ्य इति च्लेरङादेशः। ऋदृशोऽङि गुणः। पितर्मरुतां। परमपि छंदसीति परस्याः षष्ठ्याः पूर्वामंत्रितानुप्रवेशे सत्यामंत्रितस्य चेति

पदद्वयमप्यनुदात्तं। अस्मे। सुपां सुलुगिति चतुर्थीबहुवचनस्य शे आदेशः। मृळयत्तमा। मृड सुखने। अस्माण्ण्यंताल्लटः शतृ। तस्य छंदस्युभयथेत्यार्द्धधातुकत्वाल्लसार्वधातुकानुदात्तत्वाभावे प्रत्ययस्वरः शिष्यते ॥

दशमीमृचमाह ॥

आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु।

मृळा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः ॥१०॥

आरे। ते। गोऽघ्नं। उत। पुरुषऽघ्नं। क्षयत्ऽवीर। सुम्नं। अस्मे इति। ते। अस्तु।

मृळ। च। नः। अधि। च। ब्रूहि। देव। अध। च। नः। शर्म। यच्छ। द्विऽबर्हाः ॥१०॥

हे क्षयद्वीर क्षयितसर्वशत्रुजन रुद्र ते त्वदीयं गोघ्नं यद्गोहननं यद्वा गोहननसाधनमायुधं। उत अपि च पुरुषघ्नं पुरुषहननं तत्साधनमायुधं वा तदुभयमारे दूरेऽस्मत्तो विप्रकृष्टदेशे भवतु। अस्मे अस्मासु ते त्वदीयं सुम्नं सुखमस्तु। भवतु। अपि च नोऽस्माकं मृळ। सुखसिद्ध्यर्थं प्रसन्नो भव। हे देव द्योतमान रुद्र नोऽस्मानधि ब्रूहि च। अधिवचनं पक्षपातेन वचनं ब्राह्मणायाधिब्रूयादिति यथा। अध च अथानंतरं च द्विबर्हा द्वयोः स्थानयोः पृथिव्यामंतरिक्षे च परिवृढः। यद्वा द्वयोर्दक्षिणोत्तरमार्गयोर्ज्ञानकर्मणोर्वा परिवृढः स्वामी स त्वं नोऽस्मभ्यं शर्म सुखं यच्छ। देहि ॥ गोघ्नं। हन हिंसागत्योः। अस्माद्धत्रर्थे कविधानमिति भावे करणे वा कप्रत्ययः। गमहनेत्युपधालोपः। हो हंतेरिति कुत्वं। द्विबर्हाः। वृह वृहि वृद्धौ। द्वयोः स्थानयोर्वर्हते प्रवर्धत इति द्विबर्हाः। असुन्। कृदुत्तरपदप्रकृतिस्वरत्वं ॥

एकादशीमृचमाह ॥

अवोचाम नमो अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान्।

तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥११॥

अवोचाम। नमः। अस्मै। अवस्यवः। शृणोतु। नः। हवं। रुद्रः। मरुत्वान्।

तत्। नः। मित्रः। वरुणः। ममहंतां। अदितिः। सिंधुः। पृथिवी। उत। द्यौः ॥११॥

अवस्यवोऽवोऽन्नं रक्षणं वेच्छंतो वयमवोचाम। एतत्सूक्तरूपं स्तोत्रमवादिष्म। अस्मै रुद्राय नमो नमस्कारोऽस्तु। मरुत्वान्मरुद्भिः स्वकीयैः पुत्रैर्युक्तो

रुद्रश्च नोऽस्माकं हवमाह्वानं शृणोतु। स्वीकरोतु। यदस्माभिरुक्तं नोऽस्मदीयं तत्सर्वं मित्रादयः षट् देवता मामहंतां। पूजयंतु। उतशब्दोऽप्यर्थः॥ अवोचाम। ब्रूञ् व्यक्तायां वाचि। लुङि ब्रुवो वचिः। अस्यतिवक्तीत्यादिना च्लेरङादेशः। वच उमित्युमागमः। अवस्यवः। अव रक्षणे। भावेऽसुन्। सुप आत्मनः क्यच्। क्याच्छंदसीत्युप्रत्ययः। हवं। भावेऽनुपसर्गस्येत्यप् संप्रसारणं च। मरुत्वान्। झय इति मतुपो वत्वं। तसौ मत्वर्थ इति भत्वेन पदत्वाभावाज्जश्त्वाभावः॥

॥ इति प्रथमस्याष्टमे षष्ठो वर्गः॥

चित्रमिति षड़्चं दशमं सूक्तं कुत्सस्यार्षं त्रैष्टुभं सूर्यदेवताकं। तथा चानुक्रांतं। चित्रं षट् सौर्यमिति॥ आश्विनशस्त्रे सूर्योदयादूर्ध्वं सौर्याणि सूक्तानि शंसनीयानि। तत्रेदं सूक्तं शंसनीयं। सूचितं च। चित्रं देवानां नमो मित्रस्येति॥ आदितस्तिस्र ऋचः सौर्यस्य पशोर्वपापुरोडाशहविषां क्रमेणानुवाक्याः। ततो द्वे वपापुरोडाशयोर्याज्ये। तथा च सूचितं। चित्रं देवानामुदगादनीकमिति पंच शं नो भव चक्षसा शं नो अह्ना। आ० ३. ८.। इति॥ अतिमूर्तिनाम्न्येकाहे शुनासीर्ये पर्वणि च सूर्यस्य हविषश्चित्रं देवानामित्येषा याज्या। सूचितं च तरणिर्विश्वदर्शतश्चित्रं देवानामुदगादनीकमिति याज्यानुवाक्याः। आ० ९. ८.। इति॥ तामेतां प्रथमामृचमाह॥

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च॥१॥
चित्रं। देवानां। उत्। अगात्। अनीकं। चक्षुः। मित्रस्य। वरुणस्य। अग्नेः।
आ। अप्राः। द्यावापृथिवी इति। अंतरिक्षं। सूर्यः। आत्मा। जगतः। तस्थुषः। च॥१॥

देवानां। दीव्यंतीति देवा रश्मयः। तेषां। देवजनानामेव वानीकं तेजःसमूहरूपं चित्रमाश्चर्यकरं सूर्यस्य मंडलमुदगात्। उदयाचलं प्राप्तमासीत्। कीदृशं। मित्रस्य वरुणस्याग्नेश्च। उपलक्षणमेतत्। तदुपलक्षितानां जगतां चक्षुः प्रकाशकं। चक्षुरिंद्रियस्थानीयं वा। उदयं प्राप्य च द्यावापृथिवी दिवं पृथिवीमंतरिक्षं चाप्राः। स्वकीयेन तेजसा आ समंतादपूरयत्। ईदृग्भूतमंडलांतर्वर्ती सूर्योऽतर्यामितया सर्वस्य प्रेरकः परमात्मा जगतो जंगमस्य तस्थुषः स्थावरस्य चात्मा स्वरूपभूतः। स हि सर्वस्य स्थावरजंगमात्मकस्य कार्यवर्गस्य कारणं।

कारणाच्च कार्यं नातिरिच्यते। तथा च पारमर्षं सूत्रं। तदनन्यत्वमारंभणशब्दादिभ्य इति। यद्वा। स्थावरजंगमात्मकस्य सर्वस्य प्राणिजातस्य जीवात्मा। उदिते हि सूर्ये मृतप्रायं सर्वं जगत्पुनश्चेतनयुक्तं सदुपलभ्यते। तथा च श्रूयते। योऽसौ तपन्नुदेति स सर्वेषां भूतानां प्राणानादायोदेतीति ॥ आप्राः। प्रा पूरणे। लङि पुरुषव्यत्ययः। अदादित्वाच्छपो लुक्। जगतः। गमेर्द्वे चेति क्विप् द्विर्वचनं च। गमः क्वावित्यनुनासिकलोपः। तस्थुषः। तिष्ठतेर्लिटः क्वसुः। द्विर्वचने शर्पूर्वाः खयः। षष्ठ्येकवचने वसोः संप्रसारणमिति संप्रसारणं। आतो लोप इटि चेत्याकारलोपः। शासिवसीति षत्वं ॥

द्वितीयामृचमाह ॥

सूर्यो॑ दे॒वीमु॒षसं॒ रोच॑मानां॒ मर्यो॒ न योषा॑म॒भ्ये॑ति प॒श्चात्।
यत्रा॒ नरो॑ देव॒यंतो॑ यु॒गानि॑ वित॒न्वते॒ प्रति॑ भ॒द्राय॑ भ॒द्रं ॥ २ ॥

सूर्यः॑। दे॒वीं। उ॒षसं॑। रोच॑मानां। मर्यः॑। न। योषां॑। अ॒भि। ए॒ति। प॒श्चात्।
यत्र॑। नरः॑। दे॒व॒ऽयंतः॑। यु॒गानि॑। वि॒ऽत॒न्वते॑। प्रति॑। भ॒द्राय॑। भ॒द्रं ॥ २ ॥

सूर्यो देवीं दानादिगुणयुक्तां रोचमानां दीप्यमानामुषसं पश्चादभ्येति। उषसः प्रादुर्भावानंतरं तामभिलक्ष्य गच्छति। तत्र दृष्टांतः। मर्यो न योषां। यथा कश्चिन्मनुष्यः शोभनावयवां गच्छंतीं युवतिं स्त्रियं सततमनुगच्छति तद्वत्। यत्र यस्यामुषसि जातायां देवयंतो देवं द्योतमानं सूर्यं यष्टुमिच्छंतो नरो यज्ञस्य नेतारो यजमाना युगानि। युगशब्दः कालवाची। तेन च तत्र कर्तव्यानि कर्माणि लक्ष्यंते यथा दर्शपूर्णमासाविति। अग्निहोत्रादीनि कर्माणि वितन्वते। विस्तारयंति। यद्वा। देवयंतो देवयागार्थं धनमात्मन इच्छंतो यजमानपुरुषा युगानि हलावयवभूतानि कर्षणाय वितन्वते। प्रसारयंति। तामुषसमनुगच्छतीत्यर्थः। एवंविधं भद्रं कल्याणं सूर्यं प्रति भद्राय कल्याणरूपाय कर्मफलाय स्तुम इति शेषः। यद्वा। देवयंतो देवकामा यजमाना युगानि युग्मानि भूत्वा पत्नीभिः सहिताः संतो भद्रं कल्याणमग्निहोत्रादिकं कर्म भद्राय तत्फलार्थं प्रति प्रत्येकं यस्यामुषसि प्रवृत्तायां वितन्वते। विस्तारयंति ॥ मर्यः। मृङ् प्राणत्यागे। छंदसि निष्टर्क्येत्यादौ यत्प्रत्ययांतो निपात्यते। यतोऽनाव इत्याद्युदात्तत्वं। युगानि। युजेः कर्मणि घञ्। युगशब्दः कालविशेषे रथाद्युपकरणे चेत्युञ्छादिषु पाठादुणाभा-

वोऽंतोदात्तत्वं च । वितन्वते । तनु विस्तारे । तनादिकृञ्भ्य उः । सहेति योगविभागान्निङोपसर्गस्य समासे सति समासस्येत्यंतोदात्तत्वं ॥

तृतीयामृचमाह ॥

भद्रा अश्वा हरितः सूर्यस्य चित्रा एतग्वा अनुमाद्यासः ।
नमस्यंतो दिव आ पृष्ठमस्थुः परि द्यावापृथिवी यंति सद्यः ॥ ३ ॥
भद्राः । अश्वाः । हरितः । सूर्यस्य । चित्राः । एतऽग्वाः । अनुऽमाद्यासः ।
नमस्यंतः । दिवः । आ । पृष्ठं । अस्थुः । परि । द्यावापृथिवी इति । यंति । सद्यः ॥ ३ ॥

भद्राः कल्याणाः । अश्वा एतग्वा इत्येतदुभयमश्वनाम । तत्रैकं क्रियापरं योजनीयं । अश्वास्तुरगा व्यापनशीला वा हरितो हर्तारश्चित्रा विचित्रावयवा अनुमाद्यासोऽनुक्रमेण सर्वैः स्तुत्या मादनीयाः । एवंभूताः सूर्यस्यैतग्वा अश्वाः । यद्वा । एतं गंतव्यं मार्गं गंतारोऽश्वाः । एतं शवलवर्णं नीलवर्णं वा प्राप्नुवंतोऽश्वा नमस्यंतोऽस्माभिर्नमस्यमानाः संतो दिवोऽंतरिक्षस्य पृष्ठमुपरिप्रदेशं पूर्वभागलक्षणमास्थुः । आतिष्ठंति प्राप्नुवंति । यद्वा । हरितो रसहरणशीला रश्मयो भद्रादिलक्षणविशिष्टा दिवः पृष्ठं नभःस्थलमातिष्ठंति । आस्थाय च द्यावापृथिवी द्यावापृथिव्यौ सद्यस्तदानीमेवैकेनाह्ना परियंति । परितो गच्छंति । व्याप्नुवंतीत्यर्थः ॥ अश्वाः । अशू व्याप्तौ । अशिप्रुषीत्यादिना क्वन् । एतग्वाः । इण गतौ । असिहसीत्यादिना कर्मणि तन्प्रत्ययः । गमेरौणादिको भावे डुप्रत्ययः । एतमेतव्यं प्रति ग्वो गमनं येषां ते तथोक्ताः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । अनुमाद्यासः । मदि स्तुतौ । अस्मात्ण्यंतादचो यत् । यतोऽनाव इत्याद्युदात्तत्व । नमस्यंतः । नमोवरिव इति पूजार्थे क्यच् । व्यत्ययेन कर्मणि शतृप्रत्ययः । अस्थुः । तिष्ठतेश्छांदसो वर्तमाने लुङ् । गातिस्थेति सिचो लुक् । आत इति झेर्जुस् ॥

चतुर्थीमृचमाह ॥

तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सं जभार ।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥ ४ ॥
तत् । सूर्यस्य । देवऽत्वं । तत् । महिऽत्वं । मध्या । कर्तोः । विऽततं । सं । जभार ।
यदा । इत् । अयुक्त । हरितः । सधऽस्थात् । आत् । रात्री । वासः । तनुते । सिमस्मै ॥ ४ ॥

सूर्यस्य सर्वप्रेरकस्यादित्यस्य तद्देवत्वमीश्वरत्वं। स्वातंत्र्यमिति यावत्। महित्वं महत्त्वं माहात्म्यं च तदेव। तच्छब्दश्रुतेर्यच्छब्दाध्याहारः। यत्कर्तोः। कर्मनामैतत्। प्रारब्धापरिसमाप्तस्य कृष्यादिलक्षणस्य कर्मणो मध्या मध्येऽपरिसमाप्त एव तस्मिन्कर्मणि विततं विस्तीर्णं स्वकीयं रश्मिजालमस्तं गच्छन् सूर्यः संजभार। अस्माल्लोकात्स्वात्मन्युपसंहरति। कर्मकरश्च प्रवृत्तमपरिसमाप्तमेव विसृजत्यस्तं यंतं सूर्यं दृष्ट्वा। ईदृशं स्वातंत्र्यं महिमा च सूर्यव्यतिरिक्तस्य कस्यास्ति। न कस्यापि। सूर्य एवेदृशं स्वातंत्र्यं महिमानं चावगाहते। अपि च। इदित्यवधारणे। यदेत् यस्मिन्नेव काले हरितो रसहरणशीलान्स्वरश्मीन् हरिद्वर्णानश्वान्वा सधस्थात्सहस्थानादस्मात्पार्थिवाल्लोकादादायायुक्त। अन्यत्र संयुक्तान्करोति। यद्वा युजिः केवलोऽपि विपूर्वो द्रष्टव्यः। यदेवासौ स्वरश्मीनश्वान्वा सधस्थात्। सह तिष्ठंत्यस्मिन्निति सधस्थो रथः। तस्मादयुक्त। अमुंचत्। आत् अनंतरमेव रात्री निशा वास आच्छादयितृ तमः सिमस्मै। सिमशब्दः सर्वशब्दपर्यायः। सप्तम्यर्थे चतुर्थी। सर्वस्मिन् लोके तनुते। विस्तारयति। यद्वा वासो वासरमहः। तत्सर्वस्माल्लोकादपनीय रात्री तमस्तनुते॥ अत्र निरुक्तं। तत्सूर्यस्य देवत्वं तन्महित्वं मध्ये यत्कर्मणां क्रियमाणानां विततं संह्रियते यदासावयुक्त हरणानादित्यरश्मीन्हरितोऽश्वानिति वाथ रात्री वासस्तनुते सिमस्मै वासरमहरवयुवती सर्वस्मात्। नि० ४. ११.। इति॥ महित्वं। मह पूजायां। औणादिक इन्प्रत्ययः। तस्य भावस्त्वतलौ। मध्या। मध्यशब्दात्सप्तम्येकवचनस्य सुपां सुलुगिति डादेशः। कर्तोः। करोतेरौणादिकस्तोसुन्प्रत्ययः। विततं। विपूर्वात्तनोतेः कर्मणि निष्ठा। उदित्त्वेन क्त्वाप्रत्यय इटो विकल्पनाद्यस्य विभाषेतीट्प्रतिषेधः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। जभार। हृग्रहोर्भ इति भत्वं। अयुक्त। युजेर्लुङि झलो झलीति सिचो लोपः। सधस्थात्। घञर्थे कविधानमित्यधिकरणे कप्रत्ययः। सध मादस्थयोश्छंदसीति सधादेशः। दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं। रात्री। रात्रेश्चाजसाविति ङीप्॥

पंचमीमृचमाह॥

तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे।
अनंतमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरंति॥५॥

तत्। मित्रस्यं। वरुणस्य। अभिऽचक्षे। सूर्यः। रूपं। कृणुते। द्योः। उपऽस्थे।
अनंतं। अन्यत्। रुशंत्। अस्य। पाजः। कृष्णं। अन्यत्। हरितः। सं। भरंति ॥ ५ ॥

तत्तदानीमुदयसमये मित्रस्य वरुणस्यैतदुभयोपलक्षितस्य सर्वस्य जगतोऽभिचक्ष आभिमुख्येन दर्शनाय द्योर्नभस उपस्थ उपस्थाने मध्ये सूर्यः सर्वस्य प्रेरकः सविता रूपं सर्वस्य निरूपकं प्रकाशकं तेजः कृणुते। कृणोति। अपि च। अस्य सूर्यस्य हरितो रसहरणशीला रश्मयो हरिद्वर्णा अश्वा वानंतमवसानरहितं कृत्स्नस्य जगतो व्यापकं रुशद्दीप्यमानं श्वेतवर्णं पाजः। बलनामैतत्। बलयुक्तमतिबलस्यापि नैशस्य तमसो निवारणे समर्थमन्यत्तमसो विलक्षणं तेजः संभरंति। अहनि स्वकीयागमनेन निष्पादयंति। तथा कृष्णं कृष्णवर्णमन्यत्तमः स्वकीयापगमनेन रात्रौ। अस्य रश्मयोऽप्येवं कुर्वंति किमु वक्तव्यं तस्य माहात्म्यमिति सूर्यस्य स्तुतिः ॥ अभिचक्षे। संपदादिलक्षणो भावे क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं। द्योः। ङसिङसोश्च। पा० ६. १. ११०.। इति पूर्वरूपता। उपस्थे। घञर्थे कविधानमिति कप्रत्ययः। गतिकारकोपपदात्कृत्। आतोऽनुपसर्गे कः ... मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं। पाजः। पाति रक्षतीति पाजो बलं। पातेर्बले जुट् च। उ० ४. २०४.। इत्यसुन् जुडागमश्च। छांदसो मत्वर्थीयस्य विनो लोपः ॥

षष्ठीमृचमाह ॥

अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात्।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ ६ ॥

अद्य। देवाः। उत्ऽइता। सूर्यस्य। निः। अंहसः। पिपृत। निः। अवद्यात्।
तत्। नः। मित्रः। वरुणः। ममहंतां। अदितिः। सिंधुः। पृथिवी। उत। द्यौः ॥ ६ ॥

हे देवा द्योतमानाः सूर्यरश्मयः। अद्यास्मिन्काले सूर्यस्यादित्यस्योदिता उदितावुदये सतीतस्ततः प्रसरंतो यूयमस्मानंहसः पापान्निष्पिपृत। निष्कृष्य पालयत। यदिदमस्माभिरुक्तं नोऽस्मदीयं तन्मित्रादयः षट् देवता मामहंतां। पूजयंतु। अनुमन्यंतां। रक्षंत्विति यावत्। मित्रः प्रमीतेस्त्रायकोऽहरभिमानी देवः। वरुणोऽनिष्टानां निवारयिता रात्र्यभिमानी। अदितिरखंडनीयादीना वा देवमाता। सिंधुः स्यंदनशीलोदकाभिमानिनी देवता। पृथिवी भूलोकस्या-

धिष्ण्यावी। द्यौर्द्युलोकस्य। उतशब्दः समुच्चये ॥ अद्या। निपातस्य चेति संहितायां दीर्घत्वं। उदिता। उत्पूर्वादेतेर्भावे क्तिन्। सुपां सुलुगिति डादेशः। तादौ चेति गतेः प्रकृतिस्वरत्वं। पिपृता। पृ पालनपूरणयोः। पृ इत्येके। लोटि जुहोत्यादित्वाच्छपः श्लुः। द्विर्वचनोरदत्वहलादिशेषाः। अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं। सार्वधातुकमपिदिति तशब्दस्य ङित्वे सति ऋचि तुनुघेत्यादिना संहितायां दीर्घः ॥

॥ इति प्रथमस्याष्टमे सप्तमो वर्गः ॥

॥ इति प्रथमे मंडले षोडशोऽनुवाकः ॥

सप्तदशेऽनुवाके पंच सूक्तानि। तत्र नासत्याभ्यामिति पंचविंशत्यृचं प्रथमं सूक्तं। उशिक्संज्ञायामंगराजस्य महिष्या दास्यां दीर्घतमसोत्पादितः कक्षीवानस्य सूक्तस्य ऋषिः। त्रिष्टुप् छंदः। अश्विनौ देवता। तथा चानुक्रांतं। नासत्याभ्यां पंचाधिका कक्षीवान्दैर्घतमस उशिक्प्रसूत आश्विनं वा इति। तुह्यादिपरिभाषयेदमादीनि पंच सूक्तान्यश्विदेवत्यानि ॥ प्रातरनुवाकस्याश्विने क्रतौ त्रैष्टुभे छंदसीदमादीनि त्रीणि सूक्तानि। अथाश्विन इति खंडे सूचितं। ग्रावाणेव नासत्याभ्यामिति त्रीणि। आ० ४.१५.। इति ॥ आश्विनशस्त्रे चैतानि शस्यानि प्रातरनुवाकन्यायेनेत्यतिदिष्टत्वात् ॥

तत्र प्रथमामृचमाह ॥

नासत्याभ्यां बर्हिरिव प्र वृंजे स्तोमाँ इयर्म्यभ्रियेव वातः।
यावर्भगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन ॥ १ ॥
नासत्याभ्यां। बर्हिःऽइव। प्र। वृंजे। स्तोमान्। इयर्मि। अभ्रियाऽइव। वातः।
यौ। अर्भगाय। विऽमदाय। जायां। सेनाऽजुवा। निऽऊहतुः। रथेन ॥ १ ॥

बर्हिरिव यथा कश्चिद्यजमानो यागार्थं बर्हिः प्रवृंजे। प्रकर्षेणान्यूनानतिरिक्तं यागाय पर्याप्तं दर्भं वृंक्ते। छिनत्ति। संपादयतीति यावत्। एवमहं नासत्याभ्यामश्विभ्यां स्तोमान् स्तुतीरियर्मि। संपादयामि। एतदेव विशदीक्रियते। अभ्रियेव। यथाभ्रियाण्यभ्रेषु मेघेष्ववस्थितान्युदकानि वातो वायुर्वर्षणार्थं बहुशः प्रेरयति। एवमहमश्विभ्यां स्तोत्राणीयर्मि। बहुशः प्रेरयामि। कीदृशावश्विनौ। अर्भगाय बालाय स्वयंवरलब्धभार्याय विमदायैतत्संज्ञाय राजर्षये मध्ये मार्गे

स्वयंवरार्थमागतैस्तामलभमानैरन्यैर्नृपैः सह योद्धुमशक्नुवते ऽपि तस्मै सेनाजुवा शत्रुसेनायाः प्रेरकेण शत्रुभिर्दुःप्रापेण रथेन यावश्विनौ जायां भार्यां परैरनुक्रांतां न्यूहतुः। शत्रून्विहत्य तदीयं गृहं प्रापयामासतुः। ताभ्यामित्यर्थः॥ नासत्याभ्यां। सत्सु भवौ सत्यौ। न सत्यावसत्यौ। न असत्यौ नासत्यौ। नभ्राण्नपादित्यादिना नञः प्रकृतिभावः। अव्ययपूर्वपदप्रकृतिस्वरत्वं। वृंजे। वृजी वर्जने। आदादिकः। इदित्त्वान्नुम्। लोपस्त आत्मनेपदेष्विति तलोपः। इयर्मि। ऋ गतौ। जौहोत्यादिकः। अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं। अभ्यासस्यासवर्णे इतीयङ्। अभ्रियेव। समुद्राभ्राद्घ इति भवार्थे घः। घस्येयादेशः। शेश्छंदसि बहुलमिति शेर्लोपः। अर्भगाय। अर्तिगृभ्यां भन्नित्यर्तेर्भन्। अर्भ एवार्भकः। संज्ञायां कन्। पा० ५. ३. ८७.। छांदसो गकारः। अपर आह। अर्भमल्पं गायति शब्दयतीत्यर्भगः। कै गै शब्दे। गापोष्टक्। पा० ३. २. ८.। आतो लोप इटि चेत्याकारलोपः। तदेतत्पादकृतः शाकल्यस्याभिमतं। सेनाजुवा। जु इति सौत्रो धातुर्गत्यर्थः। अस्मादंतर्भावितण्यर्थात् क्विब्वचिप्रच्छीत्यादिना क्विब्दीर्घौ। तन्वादित्वादुवङ्। न्यूहतुः। वह प्रापणे। लिट्यतुसि यजादित्वात्संप्रसारणं। यद्वृत्तान्नित्यमिति निघातप्रतिषेधः॥

द्वितीयामृचमाह॥

वीळुपत्मभिराशुहेमभिर्वा देवानां वा जूतिभिः शाशदाना।

तद्रासभो नासत्या सहस्रमाजा यमस्य प्रधने जिगाय॥२॥

वीळुपत्मऽभिः। आशुहेमऽभिः। वा। देवानां। वा। जूतिऽभिः। शाशदाना।

तत्। रासभः। नासत्या। सहस्रं। आजा। यमस्य। प्रऽधने। जिगाय॥२॥

वीळुपत्मभिः। वीळु इति बलनाम। बलवदुत्पतनैः। आशुहेमभिः शीघ्रगमनैः। वाशब्दः समुच्चये। हे नासत्याश्विनौ। एवंभूतैरश्वैश्च देवानामिंद्रादीनां जूतिभिः प्रेरणैश्च शाशदाना शाशद्यमानयोरत्यर्थं प्रेर्यमाणयोर्युवयोर्वाहनभूतो यो रासभः प्रजापतिना दत्तः स यमस्य वैवस्वतस्य प्रीतिकरे प्रधने प्रकीर्णधनोपेत आजा आजौ संग्रामे तच्छत्रूणां सहस्रं जिगाय। जितवान्। वैवस्वतो हि बहूनां मरणहेतुना संग्रामेण तुष्टो भवति। यद्वा। जेतव्यत्वेन प्रजापतिनाभिहितमृक्सहस्रं शीघ्रगमनयुक्तो रासभो जिगाय। जयेनालभत। अन्येभ्यो देवेभ्यः पूर्वमेवाजिं प्राप्य युवां जयं प्रापयामास। तथा चास्मिन्नर्थे प्रजापतिर्वै सोमाय

राज्ञे दुहितरं प्रायच्छदित्यादिकं ब्राह्मणमनुसंधेयं ॥ वीळुपत्मभिः । वीळु बलवत्पतंतीति वीळुपत्मानः । आशुहेमभिः । आशु शीघ्रं हिन्वंति गच्छंतीत्याशुहेमानः । तैः । हि गतौ वृद्धौ च । अन्येभ्योऽपि दृश्यंत इति मनिन् । कृदुत्तरपदप्रकृतिस्वरत्वं । जूतिभिः । ऊतियूतिजूतीत्यादिना क्तिन उदात्तत्वं । शाशदाना । शद्लृ शातने । अत्र गत्यर्थो धातूनामनेकार्थत्वात् । अस्माद्यङंताल्लटः शानच् । तस्य छंदस्युभयथेत्यार्द्धधातुकत्वाच्छ्यनभावः । अतोलोपयलोपौ । अभ्यस्तानामादिरित्याद्युदात्तत्वं । सुपां सुलुगिति षष्ठ्याः पूर्वसवर्णदीर्घः । आजा । तेनैव सूत्रेण डादेशः । जिगाय । जि जये । सन्लिटोर्जेरित्यभ्यासादुत्तरस्य कुत्वे गकारः ॥

तृतीयामृचमाह ॥

तुग्रो॑ ह भु॒ज्युम॑श्विनोदमे॒घे र॒यिं न कश्चि॑न्ममृ॒वाँ अवा॑हाः ।
तमू॑हथुर्नौ॒भिरा॑त्म॒न्वती॑भिरंतरिक्ष॒प्रुद्भि॒रपो॑दकाभिः ॥ ३ ॥

तुग्रः॑ । ह॒ । भु॒ज्युं । अ॒श्वि॒ना॒ । उ॒द॒ऽमे॒घे । र॒यिं । न । कः । चि॒त् । म॒मृ॒ऽवान् । अव॑ । अ॒हाः॒ ।
तं । ऊ॒ह॒थुः॒ । नौ॒भिः । आ॒त्म॒न्ऽवती॑भिः । अं॒त॒रि॒क्ष॒प्रुत्ऽभिः॑ । अप॑ऽउदकाभिः ॥ ३ ॥

अत्रेयमाख्यायिका । तुग्रो नामाश्विनोः प्रियः कश्चिद्राजर्षिः । स च द्वीपांतरवर्तिभिः शत्रुभिरत्यंतमुपद्रुतः सन् तेषां जयाय स्वपुत्रं भुज्युं सेनया सह नावा प्राहैषीत् । सा च नौर्मध्ये समुद्रमतिदूरं गता वायुवशेन भिन्नासीत् । तदानीं स भुज्युः शीघ्रमश्विनौ तुष्टाव । तौ च स्तुतौ सेनया सहितमात्मीयासु नौष्वारोप्य पितुस्तुग्रस्य समीपं त्रिभिरहोरात्रैः प्रापयामासतुरिति । अयमर्थ इदमादिकेन तृचेन प्रतिपाद्यते । हशब्दः प्रसिद्धौ । तुग्रः खलु पूर्वं शत्रुभिः पीडितः सन् तज्जयार्थमुदमेघे । उदकैर्मिह्यते सिच्यत इत्युदकमेघः समुद्रः । तस्मिन्भुज्युमेतत्संज्ञं प्रियं पुत्रमवाहाः । नावा गंतुं पर्यत्याक्षीत् । तत्र दृष्टांतः । ममृवान् म्रियमाणः सन्धनलोभी कश्चिन्मनुष्यो रयिं न । यथा धनं परित्यजति तद्वत् । हे अश्विनौ तं च भुज्युं मध्ये समुद्रं निमग्नं नौभिः पितृसमीपमूहथुः । युवां प्रापितवंतौ । कीदृशीभिः । आत्मन्वतीभिः । आत्मीयाभिः । युवयोः स्वभूताभिरित्यर्थः । यद्वा धृतिरात्मा । धारणवतीभिरित्यर्थः । अंतरिक्षप्रुद्भिः । अतिस्वच्छत्वादंतरिक्षे जलस्योपरिष्टादेव गंत्रीभिः । अपोदकाभिः । सुश्लिष्टत्वादपगतोदकाभिः । अप्रविष्टोदकाभिरित्यर्थः ॥ उदमेघे । मिह सेचने । कर्मणि घञ् । न्यंक्वादीनां चेति

कुत्वं। उदकस्योदः संज्ञायां। थाथादिनोत्तरपदांतोदात्तत्वं। ममृवान्। मृङ् प्राणत्यागे। लिटः क्वसुः। क्रादिनियमात्प्राप्तस्येटो वस्वेकाजाद्घसामिति नियमादभावः। अहाः। ओहाक् त्यागे। लुङ्। तिपि च्लेः सिच्। आगमानुशासनस्यानित्यत्वात्सगिटौ न क्रियेते। बहुलं छंदसीतीडभावः। हल्ङ्याब्भ्य इति तिलोपः। रुत्वविसर्गौ। यद्वा मंत्रे घसेति च्लेर्लुक्। च्लेर्लुप्तत्वादिण् न क्रियते। नौभिः। सावेकाच इति विभक्तेरुदात्तत्वं। आत्मन्वतीभिः। आत्मनो मतुप्। मादुपधाया इति वत्वं। अनो नुडिति नुट्। नलोपः। ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं। अंतरिक्षप्रुद्भिः। प्रुङ् गतौ। क्विप् चेति क्विप्॥

चतुर्थीमृचमाह॥

तिस्रः क्षपस्त्रिरहातिव्रजद्भिर्नासत्या भुज्युमूहथुः पतंगैः।
समुद्रस्य धन्वन्नार्द्रस्य पारे त्रिभी रथैः शतपद्भिः षळश्वैः॥४॥

तिस्रः। क्षपः। त्रिः। अहा। अतिव्रजत्ऽभिः। नासत्या। भुज्युं। ऊहथुः। पतंगैः।
समुद्रस्य। धन्वन्। आर्द्रस्य। पारे। त्रिऽभिः। रथैः। शतपत्ऽभिः। षट्ऽअश्वैः॥४॥

हे नासत्यौ सेनया सहोदके निमग्नं भुज्युं तिस्रः क्षपस्त्रिसंख्याका रात्रीस्त्रिरहा त्रिवारमावृत्तान्यहानि चातिव्रजद्भिरतिक्रम्य गच्छद्भिरेतावंतं कालमतिव्याप्य वर्तमानैः पतंगैः पतद्भिस्त्रिभिस्त्रिसंख्याकै रथैरूहथुः। युवामूढवंतौ। क्वेति चेत् उच्यते। समुद्रस्यांबुराशेर्मध्ये धन्वन् धन्वनि जलवर्जित प्रदेशे। आर्द्रस्योदकेनार्द्रीभूतस्य समुद्रस्य पारे तीरदेशे च। कथंभूतै रथैः। शतपद्भिः। शतसंख्याकैश्चक्रलक्षणैः पादैरुपेतैः। षळश्वैः। षड्भिरश्वैर्युक्तैः॥ तिस्रः। त्रिचतुरोः स्त्रियामिति त्रिशब्दस्य तिसृ आदेशः। स चांतोदात्तः। अचि र ऋत इति रेफादेश उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं। क्षपः। विभक्त्यंतस्य छांदसं ह्रस्वत्वं। यद्वा। शस्यात इति योगविभागाद्धातोरप्याकारलोपः। अहा। शेश्छंदसि बहुलमिति शेर्लोपः। पतंगैः। पतॢ गतौ। पतेरंगच्। उ॰ १. ११८.। धन्वन्। धविर्गत्यर्थः। इदित्त्वान्नुम्। कनिन्युवृषीत्यादिना कनिन्। सुपां सुलुगिति सप्तम्या लुक्। शतपद्भिः। शतं पादा येषां। संख्यासुपूर्वस्येति पादशब्दस्यांत्यलोपः समासांतः। अयस्मयादित्वेन भत्वात्पादः पदिति पद्भावः। यद्वा पादसमानार्थः पच्छब्दः प्रकृत्यंतरं द्रष्टव्यं॥

पंचमीमृचमाह ॥

अनारंभणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे ।
यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसं ॥ ५ ॥

अनारंभणे । तत् । अवीरयेथां । अनास्थाने । अग्रभणे । समुद्रे ।
यत् । अश्विना । ऊहथुः । भुज्युं । अस्तं । शतऽअरित्रां । नावं । आतस्थिऽवांसं ॥ ५ ॥

हे अश्विनौ । अनारंभणे आलंबनरहिते समुद्रे तत्कर्मावीरयेथां । विक्रांतं कृतवंतौ युवां । अनारंभणत्वमेव स्पष्टीकरोति । अनास्थाने । आस्थीयतेऽस्मिन्नित्यास्थानो भूप्रदेशः । तद्रहिते स्थातुमशक्ये जल इत्यर्थः । अग्रभणेऽग्रहणे । हस्तेन ग्राह्यं शाखादिकमपि यत्र नास्ति तस्मिन्नित्यर्थः । किं पुनस्तत्कर्म । भुज्युं समुद्रे मग्नं शतारित्रां बह्वरित्रां । यैः काष्ठैः पार्श्वतो बद्धैर्जलालोडने सति नौः शीघ्रं गच्छति तान्यरित्राणि । ईदृशीं नावमातस्थिवांसमास्थितवंतमारूढवंतं कृत्वास्तं । गृहनामैतत् । पितुस्तुग्रस्य गृहं प्रति यदूहथुः । तत्प्रापणमन्यैर्दुःशक्यं युवां समुद्रमध्ये कृतवंतावित्यर्थः ॥ अनारंभणे । आरभ्यत इत्यारंभणं । कृत्यल्युटो बहुलमिति कर्मणि ल्युट् । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । अवीरयेथां । शूर वीर विक्रांतौ । चुरादिरात्मनेपदी । अनास्थानाग्रभणयोः पूर्ववल्ल्युट्स्वरौ । अयं तु विशेषः । हग्रहोर्भ इति भत्वं । अस्तं । अस्यतेऽस्मिन् सर्वमित्यस्तं गृहं । असिहसीत्यादिना तन्प्रत्ययः । शतारित्रां । ऋ गतौ । अर्तिलूधूसू इति करण इत्रप्रत्ययः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्याष्टमेऽष्टमो वर्गः ॥

षष्ठीमृचमाह ॥

यमश्विना ददथुः श्वेतमश्वमघाश्वाय शश्वदित्स्वस्ति ।
तद्वां दात्रं महि कीर्तेन्यं भूत्पैद्वो वाजी सदमिद्धव्यो अर्यः ॥ ६ ॥

यं । अश्विना । ददथुः । श्वेतं । अश्वं । अघऽअश्वाय । शश्वत् । इत् । स्वस्ति ।
तत् । वां । दात्रं । महि । कीर्तेन्यं । भूत् । पैद्वः । वाजी । सदं । इत् । हव्यः । अर्यः ॥ ६ ॥

अत्रेदमाख्यायते । पेदुर्नाम कश्चित् स चाश्विनौ तुष्टाव । तस्मै प्रीतौ कंचिच्छ्वेतवर्णमश्वं दत्तवंतौ । स चाश्वस्तस्मै प्रौढं जयं चकारेति । एतदत्र

प्रतिपाद्यते। हे अश्विनौ युवामघाश्वायाहंतव्याश्वाय पेदुनाम्ने राजर्षये यं श्वेत-वर्णमश्वं ददथुः। दत्तवंतौ। सोऽश्वस्तस्मै स्वस्ति जयलक्षणं मंगलं शश्वदित् नित्यमेव चकार। वां युवयोस्तद्दात्रं दानं महि महत् अतिगंभीरं। अत एव कीर्तेन्यं सर्वैः कीर्तनीयं प्रशस्यं भूत्। अभूत्। तस्मात्पैद्वः पेदोः संबंधी पतन-शीलः शीघ्रगामी वार्यः शत्रूणां प्रेरयिता युद्धेषु प्रेरयितव्यो वा वाजी वेजन-वान्सोऽश्वः सदमित् सदैव हव्योऽस्माभिराह्वातव्यः ॥ दात्रं। ददातेर्भाव औणादिकस्त्रप्रत्ययः। महि। मह पूजायां। इन् सर्वधातुभ्य इतीन्। कीर्तेन्यं। कृत संशब्दने। कृत्यार्थे तवैकेन्केन्यत्वन इति केन्यप्रत्ययः। ऋृत इद्धातोरितीत्वं। भूत्। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। पैद्वः। पेदोः संबंधी। तस्येदमित्यण्। छांदसो वर्णलोपः। हव्यः। ह्वयतेरचो यदिति यत्। बहुलं छंदसीति संप्रसारणं। गुणो धातोस्तन्निमित्तस्यैवेत्यवादेशः। अर्यः। ऋ गतौ। अघ्न्यादयश्चेत्यौणादिको यत्। व्यत्ययेनांतोदात्तत्वं ॥

सप्तमीमृचमाह ॥

युवं नरा स्तुवते पज्रियाय कक्षीवते अरदतं पुरंधिं।
कारोतराच्छफादश्वस्य वृष्णः शतं कुंभाँ असिंचतं सुरायाः ॥ ७ ॥
युवं। नरा। स्तुवते। पज्रियाय। कक्षीवते। अरदतं। पुरंऽधिं।
कारोतरात्। शफात्। अश्वस्य। वृष्णः। शतं। कुंभान्। असिंचतं। सुरायाः ॥ ७ ॥

अत्रेयमाख्यायिका। कक्षीवानृषिः पुरा तमसातिरोहितज्ञानः सन् ज्ञानार्थ-मश्विनौ तुष्टाव। तस्मा अश्विनौ प्रभूतां धियं दत्तवंताविति तदाह। हे नरा नेतारावश्विनौ युवं युवां पज्रियाय। पज्रा इत्यंगिरसामाख्या पज्रा वा अंगिरस इत्याम्नातत्वात्। तेषां कुले जाताय कक्षीवते। कक्ष्या रज्जुरश्वस्य। तद्वते तत्संज्ञाय स्तुवते युवयोः स्तुतिं कुर्वते मह्यं पुरंधिं प्रभूतां धियं बुद्धिमरदतं। व्यलिखतं। यथा सर्वार्थगोचरा भवति तथा कृतवंतावित्यर्थः। अपि च कारोतरात् कारोतरो नाम वैदलश्चर्मवेष्टितो भाजनविशेषो यस्मिन्सुरायाः स्रावणं क्रियते। लुप्तोपममेतत्। कारोतराद्यथा सुरायाः संपादकास्तां स्रावयंति एवमेव युवां वृष्णः सेचनसमर्थस्य युष्मदीयस्याश्वस्य शफात् खुरात् सुरायाः शतं कुंभान् असंख्यातान्सुराघटानसिंचतं। अक्षारयतं। यद्वा सिंचतिः पूरणार्थः। कारोतरस्थानीयाद्युष्मदीयाश्वखुरात् या सुरा प्रवहति तयासंख्यातान् घटानसिंचतं।

अपूरयतं। ये जनाः सौत्रामण्यादिकर्मणि युष्मद्यागाय सुरां याचंते तेषामित्यर्थः॥ स्तुवते। स्तौतेर्लटः शतृ। अदादित्वाच्छपो लुक्। शतुरनुम इति विभक्तेरुदात्तत्वं। पज्रियाय। पज्रशब्दाच्छैषिको घच्। कक्षीवते। आसंदीवदष्ठीवच्चक्रीवत्कक्षीवदिति निपातनात् कक्ष्याशब्दस्य संप्रसारणं वत्वं च। अरदतं। रद विलेखने। पुरंधिं। पुरंधिर्बहुधीरिति यास्कः। नि० ६. १३.। पृषोदरादित्वात्पुरंधिभावः। यद्वा पुरं पूरयितव्यं सर्वविषयजातमस्यां धीयतेऽवस्थाप्यत इति पुरंधिर्बुद्धिः। कर्मण्यधिकरणे चेति दधातेः किप्रत्ययः। तत्पुरुषे कृति बहुलमिति बहुलवचनादलुक्। इदं तु व्युत्पत्तिमात्रं वस्तुतः पृषोदरादिरेव। असिंचतं। षिचिर् क्षरणे। तौदादिकः। शे मुचादीनामिति नुम्॥

अष्टमीमृचमाह॥

हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तं।
ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति॥८॥
हिमेन। अग्निं। घ्रंसं। अवारयेथां। पितुऽमतीं। ऊर्जं। अस्मै। अधत्तं।
ऋबीसे। अत्रिं। अश्विना। अवऽनीतं। उत्। निन्यथुः। सर्वऽगणं। स्वस्ति॥८॥

अत्रेदमाख्यानं। अत्रिमृषिमसुराः शतद्वारे पीडायंत्रगृहे प्रवेश्य तुषाग्निनाबाधिषत। तदानीं तेन ऋषिणा स्तुतावश्विनावग्निमुदकेनोपशमय्य तस्मात्पीडागृहादविकलेंद्रियवर्गं संतं निरगमयतामिति। तदेतत्प्रतिपाद्यते। हे अश्विनौ हिमेन हिमवच्छीतेनोदकेन घ्रंसं दीप्यमानमत्रेर्बाधनार्थमसुरैः प्रक्षिप्तं तुषाग्निमवारयेथां। युवां निवारितवंतौ। शीतीकृतवंतावित्यर्थः। अपि च। अस्मा असुरपीडया कार्श्यं प्राप्तायात्रये पितुमतीं। पितुरित्यन्ननाम। अन्नयुक्तमूर्जं बलप्रदं रसात्मकं क्षीरादिकमधत्तं। पुष्ट्यर्थं प्रायच्छतं। ऋबीसेऽपगतप्रकाशे पीडायंत्रगृहेऽवनीतमवाङ्मुखतयासुरैः प्रापितमत्रिं सर्वगणं। गणः समूहः सर्वेषामिंद्रियाणां पुत्रादीनां वा गणेनोपेतं स्वस्ति अविनाशो यथा भवति तथोन्निन्यथुः। तस्माद्गृहादुन्नमय्य युवां स्वगृहं प्रापितवंतौ। यद्वा। हिमेन शीतेन वृष्ट्युदकेनाग्निमग्निवत्तीक्ष्णं घ्रंसं। अहर्नामैतत्। सामर्थ्यान्निदाघकालीनमहरवारयेथां। तस्याहस्तैक्ष्ण्यं निवारितवंतौ। अपि च। अस्मा अत्रये पितुमतीं चरुपुरोडाशादिलक्षणान्नोपेतमूर्जं बलकरं रसात्मकमुपस्तरणाभिघारणात्मकं

घृतमधत्तं । वृष्ट्युत्पादनेनाग्नेर्योगार्थं हवींषि निष्पादितवंताविर्त्यथः । ऋबीसेऽपगततेजस्के पृथिवीद्रव्येऽवनीतमोषधीनामुत्पादनायावस्ताब्नीतं । पार्थिवाग्निना परिपक्का उदकेन क्लिन्ना ह्योषधिवनस्पतयो विरोहंति । अत्रिं हविषामत्तारमोषधिवनस्पत्यादीनां वा । एवंविधमग्निं सर्वगणं व्रीह्याद्योषधिगणोपेतं हे अश्विनौ युवां स्वस्ति अविनाशो यथा भवति तथोन्निन्यथुः । व्रीह्याद्योषधिवनस्पतिरूपेण भूमेरुपरिष्टान्नीतवंतौ । कारणात्मना पार्थिवाग्नौ वर्तमानं सर्वमोषधिवनस्पत्यादिकमश्विनौ प्रकर्षेण व्यक्तीकृतवंताविर्त्यथः । अयं पक्षो यास्केन हिमेनोदकेनेत्यादिनोक्तः । नि० ६. ३६. ॥ पितुमंतीं । ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं । ऋबीसे । अत्र यास्कः । ऋबीसमपगतभासमपचितभासमपहृतभासं गतभासं वेति । नि० ६. ३५. । पृषोदरादित्वादभिमतरूपस्वरसिद्धिः । अत्रिं । अद भक्षणे । अदेस्त्रिनि चेति चशब्दात्त्रिप् । अवनीतं । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । स्वस्ति । अस भुवि । भावे क्तिन् । छंदस्युभयथेति सार्वधातुकत्वादस्तेर्भूभावाभावः ॥

नवमीमृचमाह ॥

परावतं नासत्यानुदेथामुच्चाबुध्नं चक्रथुर्जिह्मबारं ।
क्षरन्नापो न पायनाय राये सहस्राय तृष्यते गोतमस्य ॥ ९ ॥
परा । अवतं । नासत्या । अनुदेथां । उच्चाऽबुध्नं । चक्रथुः । जिह्मऽबारं ।
क्षरन् । आपः । न । पायनाय । राये । सहस्राय । तृष्यते । गोतमस्य ॥ ९ ॥

अत्रेदमाख्यानं । कदाचिन्मरुभूमौ वर्तमानस्य स्तोतुर्गोतमस्य ऋषेः समीपं देशांतरे वर्तमानं कूपमुत्खायाश्विनौ प्रापयतां । प्रापय्य च तं कूपं स्नानपानादिसौकर्यायोपरिमूलमधोबिलमवस्थापयतामिति तदेतदाह । हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ नासिकाप्रभवौ वा । एतत्संज्ञावश्विनौ युवामवतं । कूपनामैतत् । अवस्तात्ततं कूपं परानुदेथां । गोतमस्य ऋषेः समीपे प्रेरिषाथां । तदनंतरं तं कूपमुच्चाबुध्नं । उच्चैरुपरिष्टाद्बुध्नो मूलं यस्य स तथोक्तः । जिह्मबारं । जिह्ममधस्ताद्वर्तमानं तथा वक्रं बारं द्वारं यस्य स तथोक्तः । एवंगुणविशिष्टं चक्रथुः । युवामकृषाथां । तस्मात्कूपात्तृष्यते पिपासतो गोतमस्य पायनाय पानार्थमापो न आपश्च । अयं नशब्दश्चार्थे । क्षरन् । प्रवाहरूपेण निरगमन् ।

कीदृशस्य। राये। हवींषि दत्तवतः। सहस्राय सहनशीलाय। यद्वा। सहस्रसंख्याकाय राये धनाय। एतत्संख्यधनलाभार्थं चाक्षरन् ॥ अनुदेयीं। णुद् प्रेरणे। तौदादिकः। जिह्मबारं। ह्वारशब्दस्य पृषोदरादित्वाह्वारादेशः। क्षरन्। क्षर संचलने। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। शपः पित्त्वादनुदात्तत्वं। तिङो लसार्वधातुकस्वरेण धातुस्वरः। पायनाय। हेतुमति णिच्। शाच्छासाह्वेति युक्। भावे ल्युट्। राये। रा दाने। राति ददातीति राः। रातेर्डैः। उ० २.६५.। ऊडिदमिति विभक्तेरुदात्तत्वं। तृष्यते। ञितृषा पिपासायां। श्यन्। लटः शतृ। श्यनो नित्त्वादाद्युदात्तत्वं। षष्ठ्यर्थे चतुर्थी वक्तव्येति चतुर्थी ॥

दशमीमृचमाह ॥

जुजुरुषो नासत्योत वव्रिं प्रामुंचतं द्रापिमिव च्यवानात्।
प्रातिरतं जहितस्यायुर्दस्रादित्पतिमकृणुतं कनीनां ॥ १० ॥
जुजुरुषः। नासत्या। उत। वव्रिं। प्र। अमुंचतं। द्रापिंऽइव। च्यवानात्।
प्र। अतिरतं। जहितस्य। आयुः। दस्रा। आत्। इत्। पतिं। अकृणुतं। कनीनां ॥ १० ॥

अत्रेदमाख्यानं। वलीपलितादिभिरुपेतो जीर्णांगः पुत्रादिभिः परित्यक्तश्च्यवनाख्य ऋषिरश्विनौ तुष्टाव। स्तुतावश्विनौ तस्मै ऋषये जरामपगमय्य पुनर्यौवनमकुरुतामिति। तदेतदाह। हे नासत्यावश्विनौ जुजुरुषो जीर्णात् च्यवानात् च्यवनाख्यादृषेः सकाशाद्वव्रिं कृत्स्नं शरीरमावृत्यावस्थितां जरां प्रामुंचतं। प्रकर्षेणामोचयतं। तत्र दृष्टांतः। द्रापिमिव। द्रापिरिति कवचस्याख्या। यथा कश्चित्कवचं कृत्स्नशरीरव्यापकं धृत्वा पश्चाच्छरीरात्पृथक्करोति। तद्वत्। उत अपि च हे दस्रा एतत्संज्ञौ दर्शनीयौ वाश्विनौ जहितस्य पुत्रादिभिः परित्यक्तस्य ऋषेरायुर्जीवनं प्रातिरतं। प्रावर्धयतं। प्रपूर्वस्तिरतिर्वर्धनार्थः। आदित् अनंतरमेव युवानं संतं कनीनां कन्यानां पतिं भर्तारमकृणुतं। अकुरुतं ॥ जुजुरुषः। जॄष् वयोहानौ। लिटः क्वसुः। बहुलं छंदसीत्युत्वं। द्विर्भावः। पंचम्येकवचने वसोः संप्रसारणमिति संप्रसारणं। शासिवसिघसीनां चेति षत्वं। वव्रिं। वृञ् वरणे। आदृगमहन इति किप्रत्ययः। जहितस्य। ओहाक् त्यागे। कर्मणि निष्ठा। तस्य छंदस्युभयथेति सार्वधातुकत्वाद्यक्। तस्य बहुलं छंदसीति श्लुः। जहातेश्च

। पा० ६. ४. ११६.। इतीत्वं । कनीनां । रयेर्मतौ बहुलमिति बहुलवचनात्कन्या-शब्दस्याच संप्रसारणं ॥

॥ इति प्रथमस्याष्टमे नवमो वर्गः ॥

एकादशीमृचमाह ॥

तद्वां नरा शंस्यं राध्यं चाभिष्टिमन्नासत्या वरूथं ।
यद्विद्वांसा निधिमिवापगूळ्हमुद्दर्शतादूपथुर्वंदनाय ॥ ११ ॥
तत् । वां । नरा । शंस्यं । राध्यं । च । अभिष्टिऽमत् । नासत्या । वरूथं ।
यत् । विद्वांसा । निधिंऽइव । अपऽगूळ्हं । उत् । दर्शतात् । ऊपथुः । वंदनाय ॥ ११ ॥

अत्रेदमाख्यानं । वंदनो नाम कश्चिदृषिः । स चासुरैः कूपे निखात उत्तरी-तुमशक्नुवन्नश्विनावस्तौत् । तमश्विनौ कूपादुन्निन्यतुरिति तदाह । नरा अरोग्यस्य नेतारौ हे नासत्यावश्विनौ वां युवयोः संबंध्यभिष्टिमदभ्येषणयुक्तमाभिमुख्येन प्राप्तव्यं तथा वरूथं वरणीयं कामयितव्यं तत्कर्म शंस्यं । अस्माभिः प्रशंसनीयं । राध्यं । आराधनीयं च । किं पुनस्तत्कर्म । विद्वांसा जानंतौ युवां निधिमिव नि-क्षिप्तं धनमिवापगूळ्हमरण्ये निर्जने देशे कूपमध्येऽसुरैर्निगूढं वंदनाय वंदनमृषिं दर्शतादध्वगैः पिपासुभिर्द्रष्टव्यात्कूपादुदूपथुः । उदहार्ष्ट । एवं यदेतत्कूपादुद्धरणं तदित्यर्थः ॥ शंस्यं । शंसु स्तुतौ । अस्मादयंतादचो यदिति यत् । यतोऽनाव इत्याद्युदात्तत्वं । अभिष्टिमत् । अभिपूर्वादिष गतावित्यस्माद्भावे क्तिन् । मंत्रे वृषेषेति क्तिन उदात्तत्वं । कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । शकंध्वा-दित्वात्पररूपत्वं । तादौ चेति तु गतिस्वरस्य सर्वविधीनां छंदसि विकल्पितत्वा-दप्रवृत्तिः । ततो मतुप् । अंतोदात्तादुत्तरस्य तस्य ह्रस्वनुड्भ्यामित्युदात्तत्वं । वरूथं । जॄवृञ्भ्यामूथन् । विद्वांसा । सुपां सुलुगिति विभक्तेराकारः । अपगूळ्हं । गुहू संवरणे । कर्मणि निष्ठा । यस्य विभाषेतीट्प्रतिषेधः । ढत्वधत्वष्टुत्वढलोपदीर्घाः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । दर्शतात् । भृमृदृशीत्यादिनातच् । ऊपथुः । टुवप् बीजतंतुसंताने । लिट्यथुसि यजादित्वात्संप्रसारणं । द्विर्वचनादि । वंद-नाय । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी ॥

द्वादशीमृचमाह ॥

तद्वां नरा सनये दंसं उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिं ।
दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाच ॥ १२ ॥

तत् । वां । नरा । सनये । दंसः । उग्रं । आविः । कृणोमि । तन्यतुः । न । वृष्टिं ।
दध्यङ् । ह । यत् । मधु । आथर्वणः । वां । अश्वस्य । शीर्ष्णा । प्र । यत् । ईं । उवाच ॥ १२ ॥

अत्रेयमाख्यायिका । इंद्रो दधीचे प्रवर्ग्यविद्यां मधुविद्यां चोपदिश्य यदीमामन्यस्मै वक्ष्यसि शिरस्ते छेत्स्यामीत्युवाच । ततोऽश्विनावश्वस्य शिरश्छित्त्वा दधीचः शिरः प्रच्छिद्यान्यत्र निधाय तत्राश्व्यं शिरः प्रत्यधत्तां । तेन च दध्यङ् ऋचः सामानि यजूंषि च प्रवर्ग्यविषयाणि मधुविद्याप्रतिपादकं ब्राह्मणं चाश्विनावध्यापयामास । तदिंद्रो ज्ञात्वा वज्रेण तच्छिरोऽच्छिनत् । अथाश्विनौ तस्य स्वकीयं मानुषं शिरः प्रत्यधत्तामिति शाट्यायनवाजसनेययोः प्रपंचेनोक्तं । तदेतत्प्रतिपाद्यते । हे नरा नरावश्विनौ वां युवयोः संबंध्युग्रमुद्गूर्णमन्यैर्दुःशकं दंसः । कर्मनामैतत् । युवाभ्यां पुरा कृतं तत्कर्म सनये धनलाभार्थमाविष्कृणोमि । प्रकटीकरोमि । तत्र दृष्टांतः । तन्यतुर्न । यथा मेघस्थः शब्दो वृष्टिं मेघांतर्वर्तमानमुदकं प्रवर्षणेन सर्वत्र प्रकटयति तद्वत् । किं तत्कर्म । अथर्वणः पुत्रो दध्यङ् एतत्संज्ञ ऋषिरश्वस्य शीर्ष्णा युष्मत्सामर्थ्येन प्रतिहितेन शिरसा वां युवाभ्यामीमिमां मधुविद्यां यद्ध यदा खलु प्रोवाच । प्रोक्तवान् । तदानीमश्वस्य शिरसः संधानलक्षणं पुनर्मानुषस्य शिरसः प्रतिसंधानलक्षणं च यद्भवदीयं कर्म तदाविष्कृणोमीत्यर्थः ॥ सनये । षणु दाने । खनिकष्यंज्यसिवसिवनिसनिध्वनिग्रंथिचरिभ्यश्चेतीप्रत्ययः । तन्यतुः । तनु विस्तारे । ऋतन्यंजीत्यादिना यतुच् । यद्वा स्तन शब्दे । बाहुलकाद्यतुच् । छांदसः सलोपः । वृष्टिं । वृषते सिच्यतेऽनेनेति वृष्टिः । मंत्रे वृषेत्यादिना क्तिन उदात्तत्वं । आथर्वणः । अपत्यार्थेऽण्यन्निति प्रकृतिभावाट्टिलोपाभावः । शीर्ष्णा । शीर्षन् छंदसि । पा० ६. १. ६०. । इति शिरःशब्दपर्यायः शीर्षन्शब्दोऽंतोदात्तो निपात्यते । अल्लोपे सत्युदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं ॥

त्रयोदशीमृचमाह ॥

अजोहवीन्नासत्या करा वां महे यामन्पुरुभुजा पुरंधिः ।

श्रुतं तच्छासुरिव वध्रिमत्या हिरण्यहस्तमश्विनावदत्तं ॥१३॥

अजोहवीत् । नासत्या । करा । वां । महे । यामन् । पुरुऽभुजा । पुरंऽधिः ।

श्रुतं । तत् । शासुःऽइव । वध्रिऽमत्याः । हिरण्यऽहस्तं । अश्विनौ । अदत्तं ॥१३॥

वध्रिमती नाम कस्यचिद्राजर्षेः पुत्री नपुंसकभर्तृका । सा पुत्रलाभार्थमश्विनावाजुहाव । तदाह्वानं श्रुत्वाश्विनावागत्य तस्यै हिरण्यहस्ताख्यं पुत्रं ददतुः । तदेतदाह । पुरुभुजा बहूनां पालकौ प्रभूतहस्तौ वा हे नासत्यावश्विनौ महे महनीये पूजनीये यामन् यामनि । याति गच्छतीति यामन् स्तोत्रं । तस्मिन्सति कराभिमतफलस्य कर्तारौ वां युवां पुरंधिर्बहुधीर्वध्रिमती । वध्रिः पुत्रोत्पादनाशक्तः पंडकः । तद्वती । एतत्संज्ञा राजपुत्र्यजोहवीत् । पुनःपुनः स्तुत्वा पुत्रलाभार्थमाहूतवती । युवां च वध्रिमत्यास्तदाह्वानं श्रुतं । शृणुतं । तत्र दृष्टांतः । शासुरिव । यथा शासुराचार्यस्य वचनं शिष्योऽवहितः सन्नैकाग्र्येण शृणोति तद्वत् । श्रुत्वा च हे अश्विनौ तस्यै हिरण्यहस्तं सुवर्णमयपाणिं हितरमणीयपाणिं वा । एतत्संज्ञं पुत्रमदत्तं । प्रायच्छतं ॥ अजोहवीत् । ह्वयतेर्यङ्लुगंताल्लङ् । यङो वेति तिप ईडागमः । करा । करोतेः पचाद्यच् । सुपां सुलुगिति विभक्तेराकारः । यामन् । आतो मनिन्क्वनिब्वनिपश्चेति मनिन् । सुपां सुलुगिति सप्तम्या लुक् । श्रुतं । लङि बहुलं छंदसीति विकरणस्य लुक् । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । शासुः । शास्तुः । शासु अनुशिष्टौ । शंसिशमिशामीत्यादिना संज्ञायां तृन् । इडभावः । छांदसस्तलोपः ॥

चतुर्दशीमृचमाह ॥

आस्नो वृकस्य वर्तिकामभीके युवं नरा नासत्यामुमुक्तं ।

उतो कविं पुरुभुजा युवं ह कृपमाणमकृणुतं विचक्षे ॥१४॥

आस्नः । वृकस्य । वर्तिकां । अभीके । युवं । नरा । नासत्या । अमुमुक्तं ।

उतो इति । कविं । पुरुऽभुजा । युवं । ह । कृपमाणं । अकृणुतं । विऽचक्षे ॥१४॥

वर्तिका चटकसदृशस्य पक्षिणः स्त्री । तामरण्ये वर्तमानेन शुना ग्रस्तां

पुरा किलाश्विनावमोचयतां। तदेतदाह। हे नरा नेतारौ नासत्यावश्विनौ युवं युवामभीकेऽभिगते वृकवर्तिकयोः संग्रामे वृकस्य विकर्तकस्य शुन आस्न आस्याद्वर्तिकां चटकसदृशीममुमुक्तं। अमोचयतं। यास्कस्त्वाह। नि ०५. २१। पुनः पुनर्वर्तते प्रतिदिवसमावर्तत इति वर्तिकोषाः। तां वृकेनावरकेण सर्वजगत्प्रकाशेनाच्छादयित्रा सूर्येण ग्रस्तां ॥ आस्नः। पद्दन्नित्यादिनास्यस्यासन्नादेशः। अल्लोपोऽन इत्यकारलोप उदात्तनिवृत्तिस्वरेणोडिदमिति विभक्तेरुदात्तत्वं। अमुमुक्तं। मुचेरंतर्भावितण्यर्थाल्लङि बहुलं छंदसीति विकरणस्य श्लुः। कृपमाणं। कृपिः स्तुतिकर्मा तुदादिषु द्रष्टव्यः। विकरणस्वरे प्राप्ते वृषादीनां चेत्याद्युदात्तत्वं। विचक्षे। तुमर्थे सेसेनिति सेन्प्रत्ययः। स्कोः संयोगाद्योरिति सलोपः ॥

पंचदशीमृचमाह ॥

चरित्रं हि वेरिवाच्छेदि पर्णमाजा खेलस्य परितक्म्यायां।
सद्यो जंघामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तं ॥ १५ ॥

चरित्रं। हि। वेःऽइव। अच्छेदि। पर्णं। आजा। खेलस्य। परिऽतक्म्यायां।
सद्यः। जंघां। आयसीं। विश्पलायै। धने। हिते। सर्तवे। प्रति। अधत्तं ॥ १५ ॥

अगस्त्यपुरोहितः खेलो नाम राजा। तस्य संबंधिनी विश्पला नाम स्त्री संग्रामे शत्रुभिश्छिन्नपादासीत्। पुरोहितेनागस्त्येन स्तुतावश्विनौ रात्रावागत्यायोमयं पादं समधत्तां। तदेतदाह। आजा आजौ संग्रामेऽगस्त्यपुरोहितस्य खेलस्य संबंधिन्या विश्पलाख्यायाश्चरित्रं चरणं वेरिव वेः पक्षिणः पर्णं पतत्रमिवाच्छेदि हि। पुरा छिन्नमभूत्खलु। हे अश्विनौ युवामगस्त्येन स्तुतौ संतौ परितक्म्यायां। परितक्म्या रात्रिः परित एनां तकतीति यास्कः। नि० ११. २५। एनामुभयतः सूर्यो गच्छतीति तस्यार्थः। रात्रावागत्य सद्यस्तदानीमेव हिते शत्रुषु निहिते धने जेतव्ये विषयभूते सति सर्तवे सर्तुं गंतुं विश्पलाया आयसीमयोमयीं जंघां जंघोपलक्षितं पादं प्रत्यधत्तं। संधानमेकीकरणं कृतवंतावित्यर्थः ॥ चरित्रं। अर्तिलूधूसूखनसहचर इत्र इति करण इत्रः। आजा। सुपां सुलुगिति विभक्तेर्डादेशः। आयसीं। अयःशब्दाद्विकारार्थे प्राणिरजतादिभ्योऽञ्। पा० ४. ३. १५४। टिड्ढाणञिति ङीप् ॥

॥ इति प्रथमस्याष्टमे दशमो वर्गः ॥

षोडशीमृचमाह ॥

शतं मेषान्वृक्ये चक्षदानमृज्राश्वं तं पितांधं चकार।
तस्मा अक्षी नासत्या विचक्ष आधत्तं दस्रा भिषजावनर्वन् ॥ १६ ॥
शतं। मेषान्। वृक्ये। चक्षदानं। ऋज्रऽअश्वं। तं। पिता। अंधं। चकार।
तस्मै। अक्षी इति। नासत्या। विऽचक्षे। आ। अधत्तं। दस्रा। भिषजौ। अनर्वन् ॥ १६ ॥

वृषागिरः पुत्र ऋज्राश्वो नाम राजर्षिः। तस्य समीपेऽश्विनोर्वाहनभूतो रासभो वृकी भूत्वावतस्थे। स च तस्या आहारार्थमेकोत्तरशतसंख्याकान्पौरजनानां स्वभूतान्मेषान् शकलीकृत्य प्रददौ। ऋज्राश्वः शतमेकं च मेषानिति मंत्रांतरे दर्शनात्। एवं पौराणामहिते प्रवृत्तं पिता शापेन नेत्रहीनमकरोत्। तेन स्तूयमानावश्विनावस्मद्वाहननिमित्तमस्यांधता जातेति जानंतौ तस्मा अक्षिणी प्रायच्छतामिति तदेतदाह। अत्र तच्छब्दश्रुतेर्यच्छब्दाध्याहारः। य ऋज्राश्वः शतं शतसंख्याकान्मेषान्वृक्य आत्मनोपोषितायै वृकस्त्रियै शकलीकृत्य प्रादात् तं चक्षदानं। क्षदतिरत्रकर्मात्र शकलीकरणार्थः। शकलीकृत्य दत्तवंतं तमृज्राश्वं पिता शापेनांधं दृष्टिहीनं चकार। कृतवान्। हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ वा भिषजौ देवानां वैद्यभूतौ। अश्विनौ वै देवानां भिषजाविति श्रुतेः। दस्रा दर्शनीयावेतत्संज्ञौ वा हे अश्विनौ। अनर्वन् अनर्वणी द्रष्टव्यं प्रति पितृशापाद्गमनरहिते अक्षी चक्षुषी विचक्षे विविधं द्रष्टुं समर्थे तस्मै ऋज्राश्वायाधत्तं। व्यधत्तं। अकुरुतं ॥ वृक्ये। वृकोऽरण्यश्वा। तस्य स्त्री वृकी। जातेरस्त्रीविषयादिति ङीष्। जसादिषु छंदसि वावचनमिति चतुर्थ्येकवचनस्याडभावे यणादेश उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं। चक्षदानं। क्षदेर्लिटः कानच्। चित्स्वरः। अक्षी। ई च द्विवचन इति परत्वादक्षशब्दस्येकारांतादेशः। स चोदात्तः। तस्मिन्कृते सकृद्गतौ विप्रतिषेध इति परिभाषया पुनर्नुम् न भवति। विचक्षे। संपदादिलक्षणो भावे क्विप्। अनर्वन्। ऋ गतौ। अन्येभ्योऽपि दृश्यंत इति दृशिग्रहणस्य विध्यंतरोपसंग्रहार्थत्वाद्भावे वनिप्। अर्व गमनं विषयं प्रत्यनयोर्नास्तीति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। सुपां सुलुगिति द्विवचनस्य लुक्। छांदसो नलोपाभावः ॥

सप्तदशीमृचमाह ॥

आ वां रथं दुहिता सूर्यस्य कार्ष्मेवातिष्ठदर्वता जयंती ।
विश्वे देवा अन्वमन्यंत हृद्भिः समु श्रिया नासत्या सचेथे ॥ १७ ॥

आ । वां । रथं । दुहिता । सूर्यस्य । कार्ष्मऽइव । अतिष्ठत् । अर्वता । जयंती ।
विश्वे । देवाः । अनु । अमन्यंत । हृत्ऽभिः । सं । ऊं इति । श्रिया । नासत्या ।
सचेथे इति ॥ १७ ॥

सविता स्वदुहितरं सूर्याख्यां सोमाय राज्ञे प्रदातुमैच्छत् । तां सूर्यां सर्वे देवा वरयामासुः । तेऽन्योन्यमूचुः । आदित्यमवधिं कृत्वाजिं धावाम । योऽस्माकं मध्य उज्जेष्यति तस्येयं भविष्यतीति । तत्राश्विनावुदजयतां । सा च सूर्या जितवतोस्तयो रथमारुरोह । अत्र प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छदित्यादिकं ब्राह्मणमनुसंधेयं । इदं चाख्यानं सूर्याविवाहस्य स्तावकेन सत्येनोत्तभिता भूमिरिति सूक्तेन विस्पष्टयिष्यते । हे अश्विनौ वां युवयो रथं कार्ष्मेव । कार्ष्मशब्दः काष्ठवाची । यथा काष्ठमाजिधावनस्यावधितया निर्दिष्टं लक्ष्यमाशुगामी कश्चित्सर्वेभ्यो धावद्भ्यः पूर्वं प्राप्नोति । एवमेव सर्वेभ्यो देवेभ्यः पूर्वमर्वता शीघ्रमवधिं प्राप्नुवता युष्मदीयेनाश्वेन करणभूतेन युवाभ्यां जयंती जीयमाना सूर्यस्य सवितुर्दुहितातिष्ठत् । आरूढवती । विश्वे सर्वे इतरे देवा एतदारोहणस्थानं हृद्भिर्हृदयैरन्वमन्यंत । अन्वजानन् । तदानीं हे नासत्यावश्विनौ श्रिया सूर्यासहस्रलाभरूपया संपदा कांत्या वा युवां संसचेथे । संगच्छेथे ॥ जयंती । व्यत्ययेन कर्मणि शतृप्रत्ययः । हृद्भिः । पद्दन्नित्यादिना हृदयशब्दस्य हृद्भावः । सचेथे । षच समवाये । स्वरितेत्त्वादात्मनेपदं ॥

अष्टादशीमृचमाह ॥

यदयातं दिवोदासाय वर्तिर्भरद्वाजायाश्विना हयंता ।
रेवदुवाह सचनो रथो वां वृषभश्च शिंशुमारश्च युक्ता ॥ १८ ॥

यत् । अयातं । दिवःऽदासाय । वर्तिः । भरत्ऽवाजाय । अश्विना । हयंता ।
रेवत् । उवाह । सचनः । रथः । वां । वृषभः । च । शिंशुमारः । च । युक्ता ॥ १८ ॥

हे अश्विनौ हयंता स्तुतिभिराहूयमानौ युवां भरद्वाजाय संभ्रियमाणहविर्ल-

क्षणान्नाय यजमानाय दिवोदासायैतत्संज्ञाय राजर्षयेऽभीष्टं फलं दातुं वर्तिस्त्वदीयं गृहं यद्यदायातं। अगच्छतं। तदानीं रेवद्धनयुक्तमन्नं वां युवयोः सचनः सेवनो रथ उवाह। तस्मै दिवोदासाय प्रापयामास। अपि च तस्मिन्रथे वृषभोऽनड्वान् शिंशुमारो ग्राहश्च परस्परविरुद्धावपि स्वसामर्थ्यप्रकटनाय युक्ता। वाहनतया संयुक्तावास्तां॥ दिवोदासाय। दिवश्च दासे षष्ठ्या अलुग्वक्तव्य इत्यलुक्। दिवोदासादीनां छंदस्युपसंख्यानमिति पूर्वपदाद्युदात्तत्वं। भरद्वाजाय। भृञ् भरणे। अस्माद्व्यत्ययेन कर्मणि शतृप्रत्ययः। शतुश्छंदस्युभयथेत्यार्द्धधातुकत्वेन लसार्वधातुकानुदात्तत्वाभावात्प्रत्ययाद्युदात्तत्वं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। हयंता। ह्वेञः कर्मणि लटो व्यत्ययेन शतृ। बहुलं छंदसीति संप्रसारणं। शपि गुणे छांदसोऽयादेशः। रेवत्। रयिशब्दान्मतुप्। रयेर्मतौ बहुलमिति संप्रसारणं। छंदसीर इति मतुपो वत्वं। रयिशब्दाच्चेति मतुप उदात्तत्वं। सचनः। षच सेवने। अनुदात्तेतश्च हलादेरिति युच्। युक्ता। सुपां सुलुगिति विभक्तेराकारः॥

एकोनविंशीमृचमाह॥

र॒यिं सु॑क्ष॒त्रं स्व॑प॒त्यमायुः॑ सु॒वीर्यं॒ नास॑त्या॒ वहं॑ता।
आ ज॒ह्नावी॒ सम॑नसो॒प वाजै॒स्त्रिरह्नो॑ भा॒गं दध॑तीमयातं॥१९॥

र॒यिं। सु॒ऽक्ष॒त्रं। सु॒ऽअ॒प॒त्यं। आयुः॑। सु॒ऽवीर्यं॑। नास॑त्या। वहं॑ता।
आ। ज॒ह्नावी॑। स॒ऽमन॑सा। उप॑। वाजैः॑। त्रिः। अह्नः॑। भा॒गं। दध॑ती। अ॒या॒त॒म्॥१९॥

हे नासत्यावश्विनौ सुक्षत्रं शोभनबलं रयिं धनं स्वपत्यं शोभनैः पुत्रादिभिरुपेतं सुवीर्यं शोभनवीर्योपेतमायुः। अन्ननामैतत्। एवंगुणविशिष्टमन्नं च वहंता धारयंतौ युवां समनसा समानमनस्कौ संतौ जह्नावी जह्नोर्महर्षेः संबंधिनीं प्रजामायातं। आभिमुख्येनागच्छतं। कीदृशीं। वाजैर्हविर्लक्षणैरन्नैरुपेतां। अह्नः। अत्राहःशब्देन तत्रानुष्ठेयः सोमयागो लक्ष्यते। तस्य प्रातःसवनादिरूपेण त्रिधा विभक्तं भागमंशं दधती बिभ्रती। अनुसवनं हविर्भिर्यजमानामित्यर्थः॥ सुक्षत्रं। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। सुवीर्यं। वीरवीर्यौ चेति बहुव्रीहावुत्तरपदाद्युदात्तत्वं। जह्नावी। जह्नुशब्दात्तस्येदमित्यर्थेऽण्। टिड्ढाणञिति ङीप्। जाह्नवीह्रस्वदीर्घयोर्विनियमः पृषोदरादित्वात्। उक्तं च। वर्णागमो वर्णविपर्ययश्चेति। अत एव मध्योदात्तत्वं॥

विंशीमृचमाह ॥

परिविष्टं जाहुषं विश्वतः सीं सुगेभिर्नक्तमूहथू रजोभिः ।
विभिंदुना नासत्या रथेन वि पर्वताँ अजरयू अयातं ॥ २० ॥

परिऽविष्टं । जाहुषं । विश्वतः । सीं । सुऽगेभिः । नक्तं । ऊहथुः । रजःऽभिः ।
विऽभिंदुना । नासत्या । रथेन । वि । पर्वतान् । अजरयू इति । अयातं ॥ २० ॥

जाहुषो नाम कश्चिद्राजा। विश्वतः सर्वतः परिविष्टं शत्रुभिः परिवृतं तं राजानं हे नासत्यावश्विनावजरयू जरारहितौ नित्यतरुणौ युवां विभिंदुना विशेषेण सर्वस्य भेदकेनात्मीयेन रथेन नक्तं रात्रौ सुगेभिः सुष्ठु गंतुं शक्यै रजोभी रंजकैर्मार्गैरूहथुः । तस्माच्छत्रुसमूहान्निरगमयतं । सीमित्येतत्पादपूरणं । निर्गतेन तेन सह पर्वतान् शत्रुभिरारोढुमशक्यान् शिलोच्चयान्व्ययातं । विशेषेणागच्छतं ॥ परिविष्टं । विश प्रवेशने । कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । सुगेभिः । सुदुरोरधिकरण इति गमेर्डः । विभिंदुना । भिदिर् विदारणे । औणादिक उप्रत्ययो नुमागमश्च । अजरयू । न जरा अजरा । तामात्मन इच्छतीति सुप आत्मनः क्यच् । न छंदस्यपुत्रस्येतीत्वदीर्घयोर्निषेधः । क्याच्छंदसीत्युप्रत्ययः ॥

॥ इति प्रथमस्याष्टम एकादशो वर्गः ॥

एकविंशीमृचमाह ॥

एकस्या वस्तोरावतं रणाय वशमश्विना सनये सहस्रा ।
निरहतं दुच्छुना इंद्रवंता पृथुश्रवसो वृषणावरातीः ॥ २१ ॥

एकस्याः । वस्तोः । आवतं । रणाय । वशं । अश्विना । सनये । सहस्रा ।
निः । अहतं । दुच्छुनाः । इंद्रऽवंता । पृथुऽश्रवसः । वृषणौ । अरातीः ॥ २१ ॥

हे अश्विनौ वशमेतत्संज्ञमृषिमेकस्या वस्तोरेकस्याह्नो रणाय रमणीयाय सहस्रा सहस्रसंख्याकाय सनये धनलाभायावतं । अरक्षतं । स ऋषिः प्रत्यहं यथा सहस्रसंख्यं धनं लभते तथा रक्षितवंतावित्यर्थः । अपि च हे वृषणा कामानां वर्षितारावश्विनौ । इंद्रवंता इंद्रेण संयुक्तौ युवां दुच्छुना दुष्टसुखान्दुःखस्य कर्तृन् पृथुश्रवसो विस्तीर्णयशसोऽरातीः शत्रून्निरहतं । निःशेषेणाव-

धिष्टं । यद्वा कानीनस्य पृथुश्रवःसंज्ञस्य राज्ञः शतूनिति योज्यं ॥ सहस्रा । सुपां सुलुगिति चतुर्थ्या डादेशः । अहतं । लङि घसस्लं । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः । दुच्छुनाः । शुनमिति सुखनाम । दुष्टं सुखं यासां तास्तथोक्ताः । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं ॥

द्वाविंशीमृचमाह ॥

शरस्य चिदार्चत्कस्यावतादा नीचादुच्चा चक्रथुः पातवे वाः ।

शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गां ॥ २२ ॥

शरस्य । चित् । आर्चत्ऽकस्य । अवतात् । आ । नीचात् । उच्चा । चक्रथुः । पातवे । वारिति वाः ।

शयवे । चित् । नासत्या । शचीभिः । जसुरये । स्तर्यं । पिप्यथुः । गां ॥ २२ ॥

आर्चत्कस्य ऋचत्कपुत्रस्य शरस्यैतत्संज्ञस्यापि स्तोतुः पिपासितस्य पातवे पानार्थं नीचान्नीचीनादवतात्कूपादुच्चा उच्चैरुपरिष्ठाद्वारुदकं हे अश्विनौ युवामाचक्रथुः । आभिमुख्येन कृतवंतौ । तथा हे नासत्यावश्विनौ शचीभिर्युष्मदीयैः कर्मभिः परिचरणैर्जसुरये श्रांताय शयवे चित् शयुनाम्ने ऋषये स्तर्यं निवृत्तप्रसवां गामग्निहोत्रार्थस्य पयसो दोग्ध्रीं पिप्यथुः । पयसा युवामापूरितवंतौ ॥ पातवे । पा पाने । तुमर्थे सेसेनिति तवेन्प्रत्ययः । जसुरये । जसु हिंसायां । जसिसहोरुरिन् । उ० २.७२. । स्तर्यं । स्तीर्यत आच्छाद्यते प्रसवसामर्थ्याभावेनेति स्तरीः । अवितृस्तृतंत्रिभ्य ईरितीकारप्रत्ययः । वा छंदसीत्यमि पूर्वत्वस्य विकल्पितत्वादभावे यणादेशः । उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं । पिप्यथुः । प्यायी वृद्धौ । लिटि व्यत्ययेन परस्मैपदं । लिड्यङोश्च । पा० ६.१.२९. । इति पीभावः ॥

त्रयोविंशीमृचमाह ॥

अवस्यते स्तुवते कृष्णियाय ऋजूयते नासत्या शचीभिः ।

पशुं न नष्टमिव दर्शनाय विष्णाप्वं ददथुर्विश्वकाय ॥ २३ ॥

अवस्यते । स्तुवते । कृष्णियाय । ऋजुऽयते । नासत्या । शचीभिः ।

पशुं । न । नष्टंऽइव । दर्शनाय । विष्णाप्वं । ददथुः । विश्वकाय ॥ २३ ॥

अवस्यतेऽवनं रक्षणमात्मन इच्छते स्तुवते स्तुतिं कुर्वते कृष्णियाय । कृष्णो नाम कश्चित् तस्य पुत्राय ऋजूयत आर्जवमिच्छते विश्वकायैतत्संज्ञाय ऋषये हे नासत्यौ युवां शचीभिरात्मीयैः कर्मभिर्विष्णाप्वं नाम विनष्टं पुत्रं दर्शनाय दर्शनार्थं ददथुः । दत्तवंतौ । तत्र दृष्टांतः । पशुं न नष्टमिव । एक उपमार्थीयः पूरकः । यथा कश्चिद्विनष्टं पशुं स्वामिनो दृष्टिपथं प्रापयति तद्वत् ॥ अवस्यते । अवस्शब्दात्सुप आत्मनः क्यच् । शतुरनुम इति विभक्तेरुदात्तत्वं । कृष्णियाय । कृष्णशब्दादपत्यार्थे छांदसो घच् ॥

चतुर्विंशीमृचमाह ॥

दश रात्रीरशिवेना नव द्यूनवनद्धं श्नथितमप्स्वं१ंतः ।
विप्रुतं रेभमुदनि प्रवृक्तमुन्निन्यथुः सोममिव स्रुवेण ॥ २४ ॥

दश । रात्रीः । अशिवेन । नव । द्यून् । अवऽनद्धं । श्नथितं । अप्ऽसु । अंतरिति ।
विऽप्रुतं । रेभं । उदनि । प्रऽवृक्तं । उत् । निन्यथुः । सोमंऽइव । स्रुवेण ॥ २४ ॥

पुरा खलु रेभमृषिं पाशैर्बद्धासुराः कूपे कस्यचिद्दिवसस्य सायंकाले प्रचिक्षिपुः । स चाश्विनौ स्तुवन् दश रात्रीर्नवाहानि च कूपमध्ये तथैवावतस्थे । दशमेऽहनि प्रातरश्विनौ तं कूपादुदतारयतामिति तदाह । अप्सु कूपांतर्वर्तमानास्वंतर्मध्येऽसुरैः पातितमशिवेन दुःखहेतुना दाम्नावनद्धं बद्धं श्नथितं शत्रुभिर्हिंसितं दश रात्रीर्दशसंख्याका निशा नव द्यून् नवसंख्याकान्यहानि च । अत्यंतसंयोगे द्वितीया । एतावंतं कालं तत्रैव कूपेऽवस्थितं । अत एवोदन्युदके विप्रुतं विप्लुतं व्याक्षिप्तसर्वांगं । प्रवृक्तं । लुप्तोपममेतत् । प्रवृंजनेन संतप्तं घर्ममिव व्यथया संतप्यमानं । एवंभूतं रेभं हे अश्विनौ युवामुन्निन्यथुः । तस्मात्कूपादुन्नीतमुत्तीर्णं कृतवंतौ । तत्र दृष्टांतः । सोममिव । यथाग्निहोत्रहोमार्थमभिषुतं सोमरसं कूपसदृशेऽग्निहोत्रस्थालीमध्ये वर्तमानं स्रुवेणाध्वर्युरुन्नयत्यूर्ध्वं नयति तद्वत् ॥ अवनद्धं । णह बंधने । कर्मणि निष्ठा । नहो धः । पा॰ ८. २. ३४. । झषस्तथोर्धोऽध इति निष्ठातकारस्य धत्वं । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । श्नथितं । श्नथ हिंसार्थः । निष्ठा । विप्रुतं । प्रुङ् गतौ । अवनद्धवत्प्रत्ययस्वरौ कपिलकादित्वाल्लत्वविकल्पः । उदनि । पद्दन्नित्यादिनोदकशब्दस्योदन्भावः ॥

पंचविंशीमृचमाह ॥

प्र वां दंसांस्यश्विनाववोचमस्य पतिः स्यां सुगवः सुवीरः ।
उत पश्यन्नश्नुवन्दीर्घमायुरस्तमिवेज्जरिमाणं जगम्यां ॥ २५ ॥

प्र । वां । दंसांसि । अश्विनौ । अवोचं । अस्य । पतिः । स्यां । सुऽगवः । सुऽवीरः ।
उत । पश्यन् । अश्नुवन् । दीर्घं । आयुः । अस्तंऽइव । इत् । जरिमाणं । जगम्यां ॥ २५ ॥

एवमनेन सूक्तेनाश्विनोर्महिमानं प्रशस्याधुना मंत्रद्रष्टा स्वाभीष्टं प्रार्थयते । हे अश्विनौ वां युवयोर्दंसांसि पुरा कृतानि कर्माणि प्रावोचं । इत्यमुक्तवानस्मि । सोऽहं सुगवः शोभनगोयुक्तः सुवीरः शोभनवीरश्च भूत्वास्य राष्ट्रस्य पतिरधिपतिः स्यां । भवेयं । उत अपि च पश्यन् अक्षिभ्यां पश्यन् । उपलक्षणमेतत् । सर्वैरिंद्रियैः स्वस्वविषयसमर्थैर्दीर्घं वर्षशतरूपेणायतमायुर्जीवितं चाश्नुवन् प्राप्नुवन्नहमस्तमिव यथा गृहं स्वामी निःकंटकं प्रविशति एवं जरिमाणं जरां जगम्यां । कंटकराहित्येन प्राप्नुयां । वृद्धः संश्चिरकालं निवसेयमित्यर्थः ॥ स्यां । अस्तेः प्रार्थनायां लिङ् । यासुट् । श्नसोरल्लोप इत्यकारलोपः । अश्नुवन् । अशू व्याप्तौ । व्यत्ययेन शतृ । जरिमाणं । जॄष् वयोहानौ । अस्मादौणादिक इमनिच् । जगम्यां । गमेः प्रार्थनायां लिङि बहुलं छंदसीति विकरणस्य श्लुः ॥

॥ इति प्रथमस्याष्टमे द्वादशो वर्गः ॥

मध्व इति पंचविंशत्यृचं द्वितीयं सूक्तं । औशिजस्य कक्षीवत आर्षं त्रैष्टुभमाश्विनं । मध्व इत्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तो विनियोगः ॥

तत्र प्रथमामृचमाह ॥

मध्वः सोमस्याश्विना मदाय प्रत्नो होता विवासते वां ।
बर्हिष्मती रातिर्विश्रिता गीरिषा यातं नासत्योप वाजैः ॥ १ ॥

मध्वः । सोमस्य । अश्विना । मदाय । प्रत्नः । होता । आ । विवासते । वां ।
बर्हिष्मती । रातिः । विऽश्रिता । गीः । इषा । यातं । नासत्या । उप । वाजैः ॥ १ ॥

हे अश्विनौ मध्वो मधुना माधुर्योपेतेन सोमस्य सोमेन मदाय युवयोर्मदार्थं

प्रत्नश्चिरंतनो होता होमनिष्पादको यजमानो वां युवामा विवासते। विवासतिः परिचरणकर्मा। आङ् मर्यादायां। यथाशास्त्रं परिचरति। अपि च रातिर्दातव्यं हविर्बर्हिष्मती। आस्तीर्णेन बर्हिषा युक्तं। युष्मदर्थं बर्हिष्यासादितमित्यर्थः। तथा गीः स्तुतिलक्षणा वाक् च विश्रिता ऋत्विक्षु समवेता। तैः स्तुतिरस्मि क्रियत इत्यर्थः। अतो हे नासत्यावश्विनौ। इषास्मभ्यं दातव्येनान्नेन वाजैर्बलैश्च सह युवामुपयातं। अस्मत्समीपं प्राप्नुतं॥ मध्वः। सुपां सुपो भवंतीति तृतीयार्थे षष्ठी। जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणाभावे यणादेशः। मदाय। मदी हर्षे। मदोऽनुपसर्ग इत्यप्। रातिः। रा दाने। कर्मणि क्तिन्। मंत्रे वृषेषेत्यादिना तस्योदात्तत्वं। विश्रिता। श्रिञ् सेवायां। कर्मणि निष्ठा। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं॥

द्वितीयामृचमाह॥

यो वामश्विना मनसो जवीयान्रथः स्वश्वो विश आजिगाति।
येन गच्छथः सुकृतो दुरोणं तेन नरा वर्तिरस्मभ्यं यातं॥ २॥

यः। वां। अश्विना। मनसः। जवीयान्। रथः। सुऽअश्वः। विशः। आऽजिगाति।
येन। गच्छथः। सुऽकृतः। दुरोणं। तेन। नरा। वर्तिः। अस्मभ्यं। यातं॥ २॥

हे अश्विनौ वां युवयोः स्वभूतो मनसो जवीयान् मनसोऽप्यतिशयेन वेगवान् स्वश्वः शोभनाश्व एवंभूतो यो रथो विशः प्रजा आजिगाति। आभिमुख्येन गच्छति। येन रथेन सुकृतः शोभनं यागं कुर्वतो यजमानस्य दुरोणं देवयजनलक्षणं गृहं गच्छथः। हे नरा नेतारावश्विनौ तेन रथेनास्मभ्यमस्माकं वर्तिर्वर्तनाधिकरणं गृहं यातं। आगच्छतं॥ जवीयान्। जवोऽस्यास्तीति जववान्। तदस्यास्तीति मतुप्। तत आतिशायनिक ईयसुन्। विन्मतोर्लुक्। टेरिति टिलोपः। जिगाति। गा स्तुतौ। जौहोत्यादिकः। गतिकर्मसु पाठाद्गत्यर्थः। बहुलं छंदसीत्यभ्यासस्येत्वं॥

तृतीयामृचमाह॥

ऋषिं नरावंहसः पांचजन्यमृबीसादत्रिं मुंचथो गणेन।
मिनंता दस्योरशिवस्य माया अनुपूर्वं वृषणा चोदयंता॥ ३॥

ऋषिं । नरौ । अंहसः । पांचऽजन्यं । ऋबीसात् । अभि । मुंचथः । गणेन ।
मिनंता । दस्योः । अशिवस्य । मायाः । अनुऽपूर्वं । वृषणा । चोदयंता ॥ ३ ॥

हिमेनाग्निमित्यनयोक्त एवार्थः पुनः प्रकारांतरेणानया प्रतिपाद्यते । अतस्तत्रोक्तं सर्वमत्रापि द्रष्टव्यं । अक्षरार्थस्तु हे नरौ नेतारौ वृषणा कामानां वर्षितारावश्विनौ पांचजन्यं । निषादपंचमाश्चत्वारो वर्णाः पंच जनाः । तेषु भवं । स्वर्भानुना गृहीतममुं सूर्यं मोचयन्नत्रिः सर्वेषां हिताचरणात्तत्र भव इत्युच्यते । तादृशमृषिमंहसः पापरूपादृबीसात् शतद्वारे यंत्रगृहेऽत्रेः पीडार्थमसुरैः प्रक्षिप्तात्तुषाग्नेः सकाशाद्गणेनेंद्रियवर्गेण पुत्रपौत्रादिगणेन वा सह मुंचथः । अमोचयतं । किं कुर्वंतौ । मिनंता शत्रून् हिंसंतौ दस्योरुपक्षपयितुरशिवस्य दुःखकारिणोऽसुरस्य संबंधिनीस्तस्मिन्नत्रौ प्रयुक्ता मायाश्चानुपूर्वमानुपूर्व्येण चोदयंता प्रेरयंतौ निवारयंतौ ॥ पांचजन्यं । बहिर्देवपंचजनेभ्यश्चेति वक्तव्यमिति भवार्थे ञ्यः । मिनंता । मीञ् हिंसायां । क्र्यादिकः । लटः शतृ । मीनातेर्निगम इति ह्रस्वत्वं ॥

चतुर्थीमृचमाह ॥

अश्वं न गूळ्हमश्विना दुरेवैर्ऋषिं नरा वृषणा रेभमप्सु ।
सं तं रिणीथो विप्रुतं दंसोभिर्न वां जूर्यंति पूर्व्या कृतानि ॥ ४ ॥

अश्वं । न । गूळ्हं । अश्विना । दुःऽएवैः । ऋषिं । नरा । वृषणा । रेभं । अप्ऽसु ।
सं । तं । रिणीथः । विऽप्रुतं । दंसःऽभिः । न । वां । जूर्यंति । पूर्व्या । कृतानि ॥ ४ ॥

नरा नेतारौ वृषणा कामानां वर्षकौ हे अश्विनौ दुरेवैर्दुष्प्रापैरसुरैरप्सु कूपस्थेषूदकेषु गूळ्हं निगूढं निखातं रेभमृषिं कूपादुन्नीय विप्रुतं विश्लिष्टावयवं तमश्वं न व्याधितमश्वमिव दंसोभिरात्मीयैर्भेषज्यरूपैः कर्मभिः संरिणीथः । समधत्तं । सर्वैरवयवैरुपेतमकुरुतमित्यर्थः । वां युवयोः संबंधीनि पूर्व्या चिरंतनानि कृतानि कर्माणि न जूर्यंति । न हि जीर्णानि भवंति ॥ दुरेवैः । दुरुपसृष्टादेतेरीषद्दुःसुष्विति खल् । रिणीथः । री गतिरेषणयोः । क्र्यादिकः । प्वादीनां ह्रस्वः । जूर्यंति । जूष् वयोहानौ । दैवादिकत्वाच्छ्यन् । बहुलं छंदसीत्युत्वं । हलि चेति दीर्घः ॥

पंचमीमृचमाह ॥

सुषुप्वांसं न निर्ऋतेरुपस्थे सूर्यं न दस्रा तमसि क्षियंतं ।
शुभे रुक्मं न दर्शतं निखातमुदूपथुरश्विना वंदनाय ॥ ५ ॥

सुसुप्वांसं । न । निःऽऋतेः । उपऽस्थे । सूर्यं । न । दस्रा । तमसि । क्षियंतं ।
शुभे । रुक्मं । न । दर्शतं । निऽखातं । उत् । ऊपथुः । अश्विना । वंदनाय ॥ ५ ॥

निर्ऋतिरिति भूनाम । निर्ऋतेः पृथिव्या उपस्थ उत्संगे सुषुप्वांसं सुप्तवंतं पुरुषमिव । कूपमध्ये शयानं सूर्यं न सूर्यमिव तमसि कूपांतर्गतांधकारे क्षियंतं निवसंतं सूर्यमिव । तेजस्विनमित्यर्थः । शुभे शोभनार्थं निर्मितं रुक्मं न रोचमानं सुवर्णमयाभरणमिव दर्शतं दर्शनीयं । एवंगुणविशिष्टं कूपेऽसुरैर्निखातं वंदनाय वंदनमृषिं हे दस्रा दर्शनीयावश्विनौ युवामुदूपथुः । उद्धृतवंतौ ॥ सुषुप्वांसं । ञिष्वप शये । लिटः क्वसुः । वचिस्वपीत्यादिना संप्रसारणं द्विर्वचनादि । उपस्थे । उपपूर्वात्तिष्ठतेर्घञर्थे कविधानमित्यधिकरणे कप्रत्ययः । मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं । वंदनाय । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी ॥

॥ इति प्रथमस्याष्टमे त्रयोदशो वर्गः ॥

षष्ठीमृचमाह ॥

तद्वां नरा शंस्यं पज्रियेण कक्षीवता नासत्या परिज्मन् ।
शफादश्वस्य वाजिनो जनाय शतं कुंभाँ असिंचतं मधूनां ॥ ६ ॥

तत् । वां । नरा । शंस्यं । पज्रियेण । कक्षीवता । नासत्या । परिऽज्मन् ।
शफात् । अश्वस्य । वाजिनः । जनाय । शतं । कुंभान् । असिंचतं । मधूनां ॥ ६ ॥

हे नरा नेतारौ नासत्यावश्विनौ परिज्मन् परिगमनेऽभीष्टस्य प्रापणे निमित्तभूते सति पज्रियेण पज्राणामंगिरसां कुले जातेन कक्षीवता मया वां युवयोः संबंधि तत्कर्म शंस्यं । प्रकर्षेण शंसनीयं । तच्छब्दश्रुतेर्यच्छब्दाध्याहारः । यज्जनायापेक्षमाणाय पुरुषाय वाजिनो वेगवतस्त्वदीयस्याश्वस्य शफान्निर्गतैर्मधूनां मधुभिः शतसंख्याकान्कुंभानसिंचतं । अपूरयतं । सिंचतिरत्र पूरणार्थः । यदेतन्मधुना पूरणं तच्छंस्यमित्यर्थः ॥

सप्तमीमृचमाह ॥

युवं नरा स्तुवते कृष्णियाय विष्णाप्वं ददथुर्विश्वकाय ।
घोषायै चित्पितृषदे दुरोणे पतिं जूर्यंत्या अश्विनावदत्तं ॥ ७ ॥

युवं । नरा । स्तुवते । कृष्णियाय । विष्णाप्वं । ददथुः । विश्वकाय ।
घोषायै । चित् । पितृऽसदे । दुरोणे । पतिं । जूर्यंत्यै । अश्विनौ । अदत्तं ॥ ७ ॥

हे नरा नेतारावश्विनौ युवं युवां स्तुवते स्तोत्रं कुर्वते कृष्णियाय कृष्णाख्यस्य पुत्राय विश्वकाय विष्णाप्वं ददथुः । विष्णाप्वं नाम विनष्टं पुत्रं दत्तवंतौ । घोषा नाम ब्रह्मवादिनी कक्षीवतो दुहिता । सा कुष्ठिनी सती कस्मै चिद्वरायादत्ता पितृगृहे निषण्णा जीर्णासीत् । साश्विनोरनुग्रहान्नष्टकुष्ठा सती पतिं लेभे । तदेतदाह । हे अश्विनौ पित्रा संबद्धे दुरोणे स्वकीयजनकगृहे कुष्ठरोगेण भर्तारमप्राप्य पितृषदे पितृसमीपे निषण्णायै जूर्यंत्यै जरां प्राप्नुवत्यै घोषायै चित् एतत्संज्ञायै ब्रह्मवादिन्या अपि रोगोपशमनेन पतिं भर्तारमदत्तं । युवां दत्तवंतौ ॥ पितृषदे । षद्लृ विशरणादिषु । क्विप् चेति क्विप् । जूर्यंत्यै । जॄष् वयोहानौ । लटः शतृ । दिवादित्वाच्छ्यन् । बहुलं छंदसीत्युत्वं । हलि चेति दीर्घः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे श्यनो नित्त्वादाद्युदात्तत्वं ॥

अष्टमीमृचमाह ॥

युवं श्यावाय रुशंतीमदत्तं महः क्षोणस्याश्विना कण्वाय ।
प्रवाच्यं तद्वृषणा कृतं वां यन्नार्षदाय श्रवो अध्यधत्तं ॥ ८ ॥

युवं । श्यावाय । रुशंती । अदत्तं । महः । क्षोणस्य । अश्विना । कण्वाय ।
प्रऽवाच्यं । तत् । वृषणा । कृतं । वां । यत् । नार्षदाय । श्रवः । अधिऽअधत्तं ॥ ८ ॥

हे अश्विनौ युवं युवां श्यावाय कुष्ठरोगेण श्यामवर्णाय ऋषये रुशंती दीप्तत्वचं स्त्रियमदत्तं । प्रायच्छतं । अपि च । क्षोणस्य क्षोणाय दृष्टिराहित्येन गंतुमशक्तायैकस्मिन्नेव स्थाने निवसते कण्वाय ऋषये महस्तेजस्तेजसं चक्षुरिंद्रियमदत्तमिति शेषः । तथा हे वृषणा कामानां वर्षितारौ वां युवयोस्तत्कृतं कर्म प्रवाच्यं । प्रकर्षेण वाचनीयं शंसनीयं । नार्षदाय नृषदपुत्राय बधिराय ऋषये श्रवः श्रवणेंद्रियं यदध्यधत्तं । दत्तवंतौ स्थ इति यत् तदित्यर्थः । अपर आह ।

ब्राह्मण्यस्य परीक्षार्थमसुराः कक्षमृषिं गूढे तमसि निदधुः । अत्रैव स्थितः सन् व्युष्टामुषसं विजानीहि यदि त्वं ब्राह्मणोऽसीति । तमश्विनावागत्योचतुः । व्युष्टायां हर्म्यस्योपरि वीणां वादयंतावावामागमिष्यावः । तं शब्दं श्रुत्वा व्युष्टामुषसं ब्रूहि । तदेतत्प्रतिपाद्यते । हे वृषणा कामानां वर्षितारावश्विनौ वां युवयोस्तत्कृतं कर्म प्रवाच्यं प्रशंसनीयं । यन्नार्षदाय नृषदपुत्राय कक्षाय क्षोणस्य । क्षोणः शब्दकारी वीणाविशेषः । महो महतः क्षोणस्य श्रवः शब्दमध्यधत्तं । उषसो विज्ञानार्थमधिकमकुरुतं ॥ महः । मह पूजायां । अस्मादौणादिकोऽसिप्रत्ययः । पक्षांतरे तु महच्छब्दात् षष्ठ्येकवचने छांदसोऽल्लोपः । वृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वं । यद्वा । क्विबंतात् षष्ठ्येकवचनं । क्षोणस्य । क्षि निवासगत्योः । कृत्यल्युटो बहुलमिति कर्तरि ल्युट् । पृषोदरादित्वात् क्षोणभावः । तदुक्तं यास्केन । क्षोणस्य क्षयणस्य । नि० ६. ६. । इति । पक्षांतरे तु टुक्षु शब्द इत्यस्मादौणादिको नप्रत्ययः । नार्षदाय । ऋष्यंधकेत्यण् ॥

नवमीमृचमाह ॥

पुरू वर्पांस्यश्विना दधा॑ना॒ नि पे॒दव॑ ऊहथु॒राशु॒मश्वं॑ ।
सहस्र॒सां वा॒जिन॒मप्र॑तीत॒महि॒हनं॑ श्रव॒स्य॑१ं॒ तरु॑त्रं ॥ ९ ॥

पुरु । वर्पांसि । अ॒श्विना॑ । दधा॑ना । नि । पे॒दवे॑ । ऊ॒ह॒थुः॒ । आ॒शुं । अश्वं॑ ।
स॒ह॒स्र॒ऽसां । वा॒जिनं॑ । अप्र॑तिऽइतं । अ॒हि॒ऽहनं॑ । श्र॒व॒स्यं॑ । तरु॑त्रं ॥ ९ ॥

हे अश्विनौ पुरू पुरूणि बहूनि वर्पांसि । रूपनामैतत् । आत्मीयैः कर्मभिः कृतानि रूपाणि दधाना धारयंतौ युवामाशुं शीघ्रगामिनमश्वं पेदवे पेदुनाम्ने स्तुवते न्यूहथुः । नितरां प्रापितवंतौ दत्तवंतावित्यर्थः । कीदृशमश्वं । सहस्रसां । सहस्रसंख्याकस्य धनस्य सनितारं दातारं । वाजिनं । बलवंतं । अत एवाप्रतीतं । शत्रुभिरप्रतिगतं । अहिहनं । अहीनामागत्य हंतॄणां शत्रूणां शत्रून्वा हंतारं । श्रवस्यं । श्रवः श्रवणीयं स्तोत्रं । तत्र भवं स्तुतिविषयमित्यर्थः । तरुत्रं । तरितारं ॥ वर्पांसि । वृञ् वरणे । वृञ्शीङ्भ्यां रूपस्वांगयोः पुट् चेत्यसुन् । पुडागमश्च । दधाना । दधातेर्लटः शानच् । अभ्यस्तानामादिरित्याद्युदात्तत्वं । सहस्रसां । षण दाने । जनसनखनेति विट् । विड्वनोरनुनासिकस्यादित्यात्वं । श्रवस्यं । श्रवस्शब्दाद्भवे छंदसीति यत् । तित्स्वरितः । तरुत्रं । तॄ प्लवनतरणयोः ।

अशिचादिभ्य इन्नोचौ । उ॰ ४. १७४. । इत्युचप्रत्ययः । व्यत्ययेनाद्युदात्तत्वं । यज्ञा । यसितस्कभितेत्यादौ निपातनात्तृनंतान्नत्तृशब्दादमि संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावे यण् । नित्स्वरेणाद्युदात्तत्वं ॥

दशमीमृचमाह ॥

एतानि॑ वां श्रव॒स्या॑ सुदानू॒ ब्रह्मां॑गू॒षं सद॑नं॒ रोद॑स्योः ।
यद्वां॑ प॒ज्रासो॑ अश्विना॒ हवं॑ते या॒तमि॒षा च॑ वि॒दुषे॑ च॒ वाजं॑ ॥ १० ॥

एतानि॑ । वां॒ । श्र॒व॒स्या॑ । सु॒दा॒नू॒ इति॑ सु॒ऽदा॒नू॒ । ब्रह्म॑ । आ॒ङ्गू॒षं । सद॑नं । रोद॑स्योः ।
यत् । वां॒ । प॒ज्रासः॑ । अ॒श्वि॒ना॒ । हवं॑ते । या॒तं । इ॒षा । च॒ । वि॒दुषे॑ । च॒ । वाजं॑ ॥ १० ॥

हे सुदानू शोभनदानावश्विनौ युवां युवयोः संबंधीन्येतानि समनंतरोक्तानि वीर्याणि श्रवस्या श्रवणीयानि सर्वैर्ज्ञातव्यानि भवंति । तदर्थं रोदस्योर्द्यावापृथिव्यात्मना वर्तमानयोर्युवयोः । उक्तं च यास्केन । तत्कावश्विनौ द्यावापृथिव्यावित्येक इति । तथा च तैत्तिरीयकं । इमे अश्विना संवत्सरोऽग्निर्वैश्वानर इति । तयोर्युवयोः सदनं स्तोतृसमीपे निवेशनं प्रसादनहेतुभूतं वांगूषमाघोषणीयं ब्रह्म मंत्ररूपं स्तोत्रं निष्पन्नमिति शेषः । यद्यदा पज्रासोऽगिरसां गोत्रोत्पन्ना यजमाना हे अश्विनौ वां युवां हवंते । स्तुतिभिरात्मरक्षणार्थमाह्वयंति । तदानीमिषा दातव्येनान्नेन सहा यातं । आगच्छतं च विदुषे युष्मद्विषयं स्तोत्रं जानते मह्यं च वाजमन्नं बलं वा प्रयच्छतमिति शेषः ॥ यातं । चवायोगे प्रथमेति निघातप्रतिषेधः । विदुषे । विद ज्ञाने । विदेः शतुर्वसुः । वसोः संप्रसारणमिति संप्रसारणं । शासिवसिघसीनां चेति षत्वं ॥

॥ इति प्रथमस्याष्टमे चतुर्दशो वर्गः ॥

एकादशीमृचमाह ॥

सू॒नोर्मानें॑नाश्विना गृणा॒ना वाजं॒ विप्रा॑य भुरणा॒ रदं॑ता ।
अ॒गस्त्ये॒ ब्रह्म॑णा वावृधा॒ना सं वि॒श्पलां॑ नासत्यारिणीतं ॥ ११ ॥

सू॒नोः । माने॑न । अ॒श्वि॒ना॒ । गृ॒णा॒ना । वाजं॑ । विप्रा॑य । भु॒र॒णा॒ । रदं॑ता ।
अ॒गस्त्ये॑ । ब्रह्म॑णा । व॒वृ॒धा॒ना । सं । वि॒श्पलां॑ । ना॒स॒त्या॒ । अ॒रि॒णी॒तं॒ ॥ ११ ॥

भुरणा भर्तारौ पोषकौ नासत्या सत्यस्वभावौ हे अश्विनौ सूनोः कुंभात्प्रसूतस्यागस्त्यस्य खेलपुरोहितस्य संबंधिना मानेन स्तुत्यस्य परिच्छेदकेन स्तोत्रेण गृणाना स्तूयमानौ विप्राय मेधाविने भरद्वाजाय ऋषये वाजमन्नं रदंता विलिखंतौ निष्पादयंतौ युवां विश्पलां संग्रामे छिन्नजंघां खेलस्य संबंधिनीं स्त्रियं समरिणीतं। पुनरस्या जंघया समयोजयतं। तृतीयेन पादेन प्रथमपादोक्तोऽर्थो विव्रियते। अगस्त्ये ऋषौ ब्रह्मणा मंत्ररूपेण स्तोत्रेण ववृधाना प्रवर्धिताविति ॥ गृणाना। गृ शब्दे। व्यत्ययेन कर्मणि कर्तृप्रत्ययः। प्वादीनां ह्रस्वः। भुरणा। भुरण धारणपोषणयोः। कंड्वादिः। पचाद्यच्। अतोलोपयलोपौ। सुपां सुलुगिति विभक्तेराकारः। आमंत्रितनिघातः। विप्रायेत्यस्य रदंतेत्यनेनासामर्थ्यान्न परांगवद्भावत्वं। वावृधाना। वृधेर्लिटः कानच्। संहितायां छांदसमभ्यासस्य दीर्घत्वं। तुजादित्वे हि तूतुजान इतिवत् पदकालेऽपि स्यात्। अरिणीतं। री गतिरेषणयोः। क्र्यादिकः। प्वादीनां ह्रस्वः ॥

द्वादशीमृचमाह ॥

कुह यांता सुष्टुतिं काव्यस्य दिवो नपाता वृषणा शयुत्रा।
हिरण्यस्येव कलशं निखातमुदूपथुर्दशमे अश्विनाहन् ॥ १२ ॥

कुह। यांता। सुऽस्तुतिं। काव्यस्य। दिवः। नपाता। वृषणा। शयुऽत्रा।
हिरण्यस्यऽइव। कलशं। निऽखातं। उत्। ऊपथुः। दशमे। अश्विना। अहन् ॥ १२ ॥

पुरा खलूशनसः स्तुतिं गच्छंतावश्विनौ मार्गमध्ये कूपे पतितं रेभं दृष्ट्वा तं कूपादुदतारयतां। तदानीमश्विभ्यां गंतव्यं काव्यस्य निवासस्थानमजानन्नृषिरश्विनौ पृच्छति। हे दिवो नपाता द्योतमानस्य सूर्यस्य पुत्रौ वृषणा कामाभिवर्षकावश्विनौ कुह कुत्र शयुत्रा शयने निवासस्थाने वर्तमानस्य काव्यस्य भार्गवस्य सुष्टुतिं शोभनां स्तुतिं श्रोतुं यांता गच्छंतौ। यद्वा। शयुत्रेत्येतदश्विनोर्विशेषणं। शयुनाम्नस्त्रायकौ युवां। हिरण्यस्येव कलशं यथा हिरण्यपूरितं कलशं भूम्यां निक्षिप्तं सर्वैर्दुर्ज्ञातं कश्चिदभिज्ञ उद्धरति। एवमसुरैः कूपे निखातं दश रात्रीर्नवाहानि च तत्रैव निवसंतं रेभमवगत्य दशमेऽहन् अहन्युदूपथुः। कूपादुन्नीतवंतौ। किं तन्निवासस्थानमिति प्रश्नः। रेभस्यानुक्तावपि दश रात्रीरशिवेनेति मंत्रांतरसामर्थ्यात्प्रतीतिः। यद्वा। काव्यस्य स्तुतिं प्रति गच्छंतौ युवां कुह कस्मिन्स्थाने

रेभं युवामुन्निन्यथुरिति प्रश्नः ॥ कुह । वा ह च छंदसीति सप्तम्यर्थे हप्रत्ययः । दिवो नपाता । सुबामंत्रिते परांगवत्स्वर इति परांगवद्भावेन षष्ठ्यंतस्यामंत्रितानुप्रवेशादामंत्रितस्य चेति पदद्वयसमुदायस्य षाष्ठिकमाद्युदात्तत्वं । पादादित्वादाष्टमिकनिघाताभावः । नपादित्यपत्यनाम.। न पातयतीति नपात् । नभ्राण्नपादिति नञः प्रकृतिभावः । सुपां सुलुगिति विभक्तेराकारः । शयुत्रा । अशित्रादिभ्य इत्रोत्राविति शीङ उत्रः । यद्यंतोदात्तता न स्यात् तर्ह्येवं शयुं त्रायेते इति शयुत्रौ । त्रैङ् पालने । आदेच इत्यात्वं । आतोऽनुपसर्गे कः । अत एव व्युत्पत्त्यनवधारणादनवग्रहः । निखातं । खनु अवदारणे । अस्मात्कर्मणि निष्ठा । यस्य विभाषेतीट्प्रतिषेधः । जनसनखनां सन्झलोरित्यात्वं । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । अहन् । सुपां सुलुगिति सप्तम्या लुक् । न ङिसंबुद्ध्योरिति नलोपप्रतिषेधः ॥

त्रयोदशीमृचमाह ॥

युवं च्यवानमश्विना जरंतं पुनर्युवानं चक्रथुः शचीभिः ।

युवो रथं दुहिता सूर्यस्य सह श्रिया नासत्यावृणीत ॥ १३ ॥

युवं । च्यवानं । अश्विना । जरंतं । पुनः । युवानं । चक्रथुः । शचीभिः ।

युवोः । रथं । दुहिता । सूर्यस्य । सह । श्रिया । नासत्या । अवृणीत ॥ १३ ॥

हे अश्विनौ युवं युवां शचीभिरात्मीयैर्भैषज्यलक्षणैः कर्मभिर्जरंतं जीर्यंतं च्यवानं स्तुतीनां च्यावयितारमेतत्संज्ञमृषिं युवानं पुनर्यौवनोपेतं चक्रथुः । कृतवंतौ । अपि च । हे नासत्यावश्विनौ युवोर्युवयो रथं सूर्यस्य दुहिता सूर्याख्या श्रिया सह ऋक्सहस्ररूपया संपदा कांत्या वा सहावृणीत । समभजत । आगत्यारूढवतीत्यर्थः । आ वां रथं दुहितेत्यत्र लिखितमाख्यानमत्रापि द्रष्टव्यं ॥ जरंतं । जॄष् वयोहानौ । व्यत्ययेन शप् । युवोः । युष्मच्छब्दात् षष्ठीद्विवचने व्यत्ययेन योऽचीति यत्वाभावे सति शेषे लोप इति दकारलोपः । अतो गुण इति पररूपत्वं । एकादेश उदात्तेनोदात्तः । अवृणीत । वृङ् संभक्तौ । क्र्यादिकः ॥

चतुर्दशीमृचमाह ॥

युवं तुग्राय पूर्व्येभिरेवैः पुनर्मन्यावभवतं युवाना ।

युवं भुज्युमर्णसो निः समुद्राद्विभिरूहथुर्ऋज्रेभिरश्वैः ॥ १४ ॥

युवं। तुग्राय। पूर्व्येभिः। एवैः। पुनःऽमन्यौ। अभवतं। युवाना।
युवं। भुज्युं। अर्णसः। निः। समुद्रात्। विऽभिः। ऊहथुः। ऋज्रेभिः। अश्वैः ॥ १४॥

हे युवाना दुःखानां यावयितारावश्विनौ युवं युवां पूर्व्येभिः। पुराणनामैतत्। पूर्वकालीनैश्चिरंतनैरेवैः स्तुत्यं प्रति गंतृभिः स्तोत्रैस्तुग्राय भुज्योर्जनकस्य संबंधिभिः पुनर्मन्यौ यथा भुज्योः समुद्रगमनात्पूर्वं युवां स्तोतव्यौ तथा पुनरपीदानीं स्तोतव्यावभवतं। यदा युवां समुद्रमध्ये सेनया सह निमग्नं भुज्युं तुग्रस्य पुत्रमर्णसोऽर्णस्वतः प्रौढोदकयुक्तात्समुद्रादंबुराशेः सकाशाद्विभिर्गंतृभिर्नौभिर्ऋज्रेभिः शीघ्रगतियुक्तैरश्वैश्च निरूहथुः। निर्गमय्य पितृसमीपं प्रापितवंतौ। तदानीं पुनरप्यतिशयेन स्तोतव्यौ जातावित्यर्थः। तुग्रो ह भुज्युमित्यत्रोक्तमाख्यानमत्राप्यनुसंधेयं ॥ एवैः। इण् गतौ। इण्शीङ्भ्यां वन्। पुनर्मन्यौ। मन ज्ञाने। अत्र स्तुत्यर्थः। मन्यते स्तौतीति मना स्तुतिः। पचाद्यच्। छंदसि चेत्यर्हार्थे यः। युवाना। यु मिश्रणामिश्रणयोः। कनिन्युवृषीत्यादिना कनिन्। सुपां सुलुगिति विभक्तेराकारः। अर्णसः। अर्णस्शब्दादुत्पन्नस्य मत्वर्थीयस्य बहुलं छंदसीति बहुलग्रहणाल्लोपः। सर्वे विधयश्छंदसि विकल्प्यंत इति विभक्त्युदात्तस्य विकल्पनादभावः। ऋज्रेभिः। ऋज गतिस्थानार्जनोपार्जनेषु। ऋज्रेंद्रेत्यादौ रक्प्रत्ययांतो निपातितः। बहुलं छंदसीति भिस ऐसभावः ॥

पंचदशीमृचमाह ॥

अजोहवीदश्विना तौग्र्यो वां प्रोळ्हः समुद्रमव्यथिर्जगन्वान्।
निष्टमूहथुः सुयुजा रथेन मनोजवसा वृषणा स्वस्ति ॥ १५॥
अजोहवीत्। अश्विना। तौग्र्यः। वां। प्रऽऊळ्हः। समुद्रं। अव्यथिः। जगन्वान्।
निः। तं। ऊहथुः। सुऽयुजा। रथेन। मनःऽजवसा। वृषणा। स्वस्ति ॥ १५॥

हे अश्विनौ वां युवां तौग्र्यस्तुग्रपुत्रः प्रोळ्हः पित्रा प्रापितः समुद्रमब्धिं जगन्वान्भुज्युरुदके निमग्नोऽप्यव्यथिर्व्यथां पीडामप्राप्त एव सन्नजोहवीत्। स्तुतिभिराह्वयत्। तमाह्वातारं हे मनोजवसा मनोवद्वेगयुक्तौ वृषणा कामाभिवर्षकावश्विनौ सुयुजा सुष्ठ्वश्वैर्युक्तेन रथेन स्वस्ति क्षेमं यथा भवति तथा निरूहथुः। जलान्निर्गमय्य युवां पितृगृहं प्रापितवंतौ ॥ जगन्वान्। गमेर्लिटः क्वसुः। वि-

भाषा गमहनविदविशामिति विकल्पनादिडभावः। म्वोश्चेति मकारस्य नकारः। निष्टं। युष्मत्तत्ततक्षुःष्वंतःपादमिति मूर्धन्यः। मनोजवसा। मनसो जव इव जवो ययोस्तौ तथोक्तौ। सुपां सुलुगिति विभक्तेराकारः। पादादित्वादामंत्रितनिघाताभावे षाष्ठिकमाद्युदात्तत्वं॥

॥ इति प्रथमस्याष्टमे पंचदशो वर्गः॥

षोडशीमृचमाह॥

अजोहवीदश्विना वर्तिका वामास्नो यत्सीममुंचतं वृकस्य।
वि जयुषा ययथुः सान्वद्रेर्जातं विष्वाचो अहतं विषेण॥१६॥

अजोहवीत्। अश्विना। वर्तिका। वां। आस्नः। यत्। सीं। अमुंचतं। वृकस्य।
वि। जयुषा। ययथुः। सानु। अद्रेः। जातं। विष्वाचः। अहतं। विषेण॥१६॥

आस्नो वृकस्येत्यर्धर्चे यदुक्तं तदत्र पूर्वार्धेन प्रतिपाद्यते। वर्तिका चटकसदृशस्य पक्षिणः स्त्री वृकेनारण्यश्वुना ग्रस्ता सती हे अश्विनौ वां युवां तदाजोहवीत्। आहूतवती। यत्सीं यदा खलु वृकस्यास्न आस्यादमुंचतं। वर्तिकाममोचयतं। अपि च। युवां जयुषा जयशीलेन रथेनाद्रेः पर्वतस्य सानु समुच्छ्रितप्रदेशं वि ययथुः। शत्रुभिरावेष्टितं जाहुषाख्यं स्तोतारं शत्रुसमूहान्निर्गमय्य तेन सहान्यैर्गंतुमशक्यं पर्वताग्रं गतवंतावित्यर्थः। तदुक्तं परिविष्टं जाहुषमित्यत्र। तथा विष्वाचो विविधगतियुक्तस्यैतत्संज्ञस्यासुरस्य जातमुत्पन्नमपत्यं विषेण क्ष्वेडेनाहतं। युवां हतवंतौ। यद्वा। वर्तते प्रतिदिवसमावर्तत इति वर्तिकोषाः। वृक इति विवृतज्योतिष्कः सूर्य उच्यते। तेन ग्रस्ता सती सा हे अश्विनौ युवामजोहवीत्। आह्वयत्। यदा खलु युवां वृकस्य सूर्यस्यास्न आस्यस्थानीयान्मंडलादमुंचतं। अमोचयतं। सूर्येणैकीभूतामुषसं पृथक्कृत्योदयात्पूर्वं रात्रेरपरभागे स्थापितवंतावित्यर्थः। तथा च यास्कः। आदित्योऽपि वृक उच्यते यदावृंक्ते। आह्वयदुषा अश्विनावादित्येनाभिग्रस्ता तामश्विनौ प्रमुमुचतुरित्याख्यानं। नि० ५.२१.। इति। अपि च। जयुषा जयशीलेन रथेनाद्रेर्मेघस्य सानु समुच्छ्रितप्रदेशं वृष्टिचिकीर्षया विशेषेण ययथुः। युवां गतवंतौ। गत्वा च विष्वाचो विविधगतियुक्तस्य मेघस्य संबंधिना विषेणोदकेन जातमुत्पन्नं सर्वं भूतजातमहतं। अगमयतं। वृष्टिं कृतवंतावित्यर्थः॥ अजोहवीत्। ह्वयतेर्यङ्लु-

गंतात्लङि तिपि यङो वेतीडागमः। अभ्यस्तस्य चेति द्विर्वचनात्पूर्वमेव ह्वयतेः संप्रसारणं। आसः। पद्दन्नित्यादिनास्यशब्दस्यासन्नादेशः। अल्लोपोऽन इत्यकारलोपः। जयुषा। जि जये। औणादिक उसिप्रत्ययः। विष्वाचः। विषुनाभिमुख्येनांचतीति विग्रहः। ऋत्विगित्यादिना क्विन्। अच इत्यकारलोपः। चाविति दीर्घः। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वे प्राप्ते चावित्यंतोदात्तत्वं। अहतं। हन हिंसागत्योः। लङ्अदादित्वाच्छपो लुक्। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः॥

सप्तदशीमृचमाह॥

शतं मेषान्वृक्ये मामहानं तमः प्रणीतमशिवेन पित्रा।
आक्षी ऋज्राश्वे अश्विनावधत्तं ज्योतिरंधाय चक्रथुर्विचक्षे॥१७॥

शतं। मेषान्। वृक्ये। ममहानं। तमः। प्रऽनीतं। अशिवेन। पित्रा।
आ। अक्षी इति। ऋज्रऽअश्वे। अश्विनौ। अधत्तं। ज्योतिः। अंधाय। चक्रथुः।
विऽचक्षे॥१७॥

शतं मेषान्वृक्ये चक्षुदानमित्यत्र यदाख्यानमवादिष्म तदत्राप्यनुसंधेयं। शतं शतसंख्याकान्मेषान्वृक्ये वृकीरूपेणावस्थितायाश्विनोर्वाहनाय रासभाय ममहानं पूजितवंतमाहारार्थं समर्पितवंतं। अशिवेनासुखकारिणा पित्रा स्वकीयेन जनकेन तमो दृष्टिराहित्येन कृतमंधं प्रणीतं प्रापितमृज्राश्वं चक्षुष्मंतमश्विनावकुरुतामिति शेषः। एतदेव विशदयति। हे अश्विनौ अक्षी पितृशापान्नष्टे चक्षुषी ऋज्राश्वे एतत्संज्ञके राजर्षावाधत्तं। पुनर्दर्शनसमर्थे अकुरुतं। एतदेवाह। अंधाय दृष्टिहीनाय ज्योतिः प्रकाशकं चक्षुः विचक्षे विविधं जगद्द्रष्टुं चक्रथुः। युवां कृतवंतौ॥ मामहानं। मह पूजायां। लिटः कानच्। संहितायां छांदसमभ्यासस्य दीर्घत्वं। प्रणीतं। प्रपूर्वान्नयतेः कर्मणि निष्ठा। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। पित्रा। उदात्तयण इति विभक्तेरुदात्तत्वं। अक्षी। अक्षिशब्दात् द्विवचने नुमागमश्च प्राप्नोति। ई च द्विवचन इतीकारांतादेशश्च। परत्वादीकारादेशः। कृते तस्मिन् सकृद्गतपरिभाषया पुनर्न भवति। उदात्तनिवृत्तेरीकारस्योदात्तत्वं॥

अष्टादशीमृचमाह ॥

शुनमंधाय भरमह्वयत्सा वृकीरश्विना वृषणा नरेति ।
जारः कनीनं इव चक्षदान ऋज्राश्वः शतमेकं च मेषान् ॥ १८ ॥
शुनं । अंधाय । भरं । अह्वयत् । सा । वृकीः । अश्विना । वृषणा । नरा । इति ।
जारः । कनीनःऽइव । चक्षदानः । ऋज्रऽअश्वः । शतं । एकं । च । मेषान् ॥ १८ ॥

शुनमिति सुखनाम । भरं पोषणहेतुभूतं चक्षुरिंद्रियेण निष्पाद्यं सुखमंधाय दृष्टिहीनाय तस्मा ऋज्राश्वायेच्छंती सा वृकीर्हे अश्विनावश्वयुक्तौ कृत्स्नं जगद्व्याप्नुवंतौ वा वृषणा हे वृषणौ कामानां वर्षितारावित्येवं संबोध्य नरा नेतारावश्विनावह्वयत् । आहूतवती । आह्वयंत्यास्तस्याः कोऽभिप्राय इति चेत् तदुच्यते । कनीन इव । यथा प्राप्तयौवनः कामुको जारः पारदारिकः सन् परस्त्रियं सर्वं धनं प्रयच्छति । एवमृज्राश्वो मह्यं शतमेकं चैकोत्तरशतसंख्याकान्मेषान्पौरजनानां स्वभूतानपहृत्य चक्षदानः शकलीकुर्वन् प्रादात् । तेनेदृशीं दुर्दशां प्राप्त इति ॥ कनीनः । युवशब्दादिष्ठनि युवाल्पयोः कनन्यतरस्यां । पा० ५. ३. ६४. । इति युवशब्दस्य कनादेशः । व्यत्ययेनेष्ठनः स्वादेशः । यद्वा । कन दीप्तिकांतिगतिषु । अस्मादौणादिक ईनप्रत्ययः ॥

एकोनविंशीमृचमाह ॥

मही वामूतिरश्विना मयोभूरुत स्रामं धिष्ण्या सं रिणीथः ।
अथा युवामिदह्वयत्पुरंधिरागच्छतं सीं वृषणाववोभिः ॥ १९ ॥
मही । वां । ऊतिः । अश्विना । मयःऽभूः । उत । स्रामं । धिष्ण्या । सं । रिणीथः ।
अथ । युवां । इत् । अह्वयत् । पुरंऽधिः । आ । अगच्छतं । सीं । वृषणौ । अवःऽभिः ॥ १९ ॥

हे अश्विनौ वां युवयोर्मही महत्यूतिः पालनं मयोभूर्मयसः सुखस्य भावयित्री । उत अपि च हे धिष्ण्या । धिषणा स्तुतिलक्षणा वाक् । तया स्तोतव्यौ स्रामं व्याधितं पुरुषं विश्लिष्टांगमत्र्यादिकं संरिणीथः । संगतावयवं कुरुथः । उत अपि च युवामित् युवामेव पुरंधिर्बहुधीर्घोषा विश्पला वाह्वयत् । रोगोपशमनार्थमाहूतवती । हे वृषणौ कामानां वर्षितारावश्विनौ अवोभी रक्षणैः सहागच्छतं । आभिमुख्येन सीमेनां प्राप्तवंतौ ॥ मही । महती । छांदसो

वर्णलोपः । यद्वा । महेरीणादिक इन् । कृदिकारादक्तिन इति ङीष् । मयोभूः । भवतेरंतर्भावितण्यर्थात् क्विप् । रिणीथः । री गतिरेषणयोः । क्र्यादिकः । प्वादीनां ह्रस्व इति ह्रस्वत्वं ॥

विंशीमृचमाह ॥

अधेनुं दस्रा स्तर्यं१ विषक्तामपिन्वतं शयवे अश्विना गां ।
युवं शचीभिर्विमदाय जायां न्यूहथुः पुरुमित्रस्य योषां ॥ २० ॥
अधेनुं । दस्रा । स्तर्यं । विऽसक्तां । अपिन्वतं । शयवे । अश्विना । गां ।
युवं । शचीभिः । विऽमदाय । जायां । नि । ऊहथुः । पुरुऽमित्रस्य । योषां ॥ २० ॥

हे दस्रा दर्शनीयावश्विनौ विषक्तां विशेषेण सक्तावयवां । कृशावयवामित्यर्थः । अत एव स्तर्यं निवृत्तप्रसवां । अत एवाधेनुमदोग्ध्रीं । एवंभूतां गां शयव एतत्संज्ञाय ऋषयेऽपिन्वतं । पयसापूरयतं । अपि च । पुरुमित्रस्य । पुरुमित्रो नाम कश्चिद्राजा । तस्य योषां कुमारीं शचीभिरात्मीयैः कर्मभिर्विमदायैतत्संज्ञाय ऋषये शत्रुभिः सह योद्धुमशक्ताय युवां न्यूहथुः । विमदस्य गृहं प्रापितवंतौ ॥ स्तर्यं । स्तृञ् आच्छादने । अवितॄस्तृतंत्रिभ्य ईरितीकारप्रत्ययः । वा छंदसीत्यमि पूर्वस्य विकल्पनादभावे यणादेशः । उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं । विषक्तां । षंज संगे । कर्मणि निष्ठा । अनिदितामिति नलोपः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । अपिन्वतं । पिवि सेचने । इदित्वान्नुम् । भौवादिकः । पुरुमित्रस्य । पुरूणि मित्राणि यस्य । संज्ञायां मित्राजिनयोः । पा० ६. २. १६५. । इति बहुव्रीहावुत्तरपदांतोदात्तत्वं ॥

॥ इति प्रथमस्याष्टमे षोडशो वर्गः ॥

एकविंशीमृचमाह ॥

यवं वृकेणाश्विना वपंतेषं दुहंता मनुषाय दस्रा ।
अभि दस्युं बकुरेणा धमंतोरु ज्योतिश्चक्रथुरार्याय ॥ २१ ॥
यवं । वृकेण । अश्विना । वपंता । इषं । दुहंता । मनुषाय । दस्रा ।
अभि । दस्युं । बकुरेण । धमंता । उरु । ज्योतिः । चक्रथुः । आर्याय ॥ २१ ॥

आर्याय विदुषे । मनुषशब्दो मनुशब्दपर्यायः । मनुषाय मनवे मनोरर्थं हे

दस्रा दर्शनीयावश्विनौ वृकेण लांगलेन कर्षकैः कृष्टदेशे यवं यवाद्युपलक्षितं सर्वं धान्यजातं वपंता वापयंतौ। तथेषं। अन्ननामैतत्। तत्कारणभूतं वृष्ट्युदकं च दुहंता मेघात्क्षारयंतौ। तथा दस्युमुपक्षयकारिणमसुरं पिशाचादिकं बकुरेण। बकुरो नाम भासमानो वज्रः। तेनाभिधमंता। धमतिर्वधकर्मा। अभिघ्नंतौ। एवं त्रिविधं कर्म कुर्वंतौ युवामुरु विस्तीर्णं ज्योतिः स्वकीयं तेजो माहात्म्यं चक्रथुः। कृतवंतौ दर्शितवंतावित्यर्थः। यद्वा। त्रिविधकर्माचरणेनार्याय विदुषे मनवे विस्तीर्णं सूर्याख्यं ज्योतिश्चक्रथुः। कृतवंतौ। जीवन् हि सूर्यं पश्यति। तद्धेतुभूतानि त्रीणि कर्माणि युवाभ्यां कृतानीति भावः। अत्र निरुक्तं। बकुरो भास्करो भयंकरो भासमानो द्रवतीति वा। यवमिव वृकेणाश्विनौ निवपंतौ। वृको लांगलं भवति विकर्तनादित्यादिकमनुसंधेयं। नि॰ ६. २६.॥ मनुषाय। मनेरौणादिक उषन्प्रत्ययः॥

द्वाविंशीमृचमाह॥

आथर्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयतं।

स वां मधु प्र वोचदृतायन्त्वाष्ट्रं यद्दस्रावपिकक्ष्यं वां॥२२॥

आथर्वणाय। अश्विना। दधीचे। अश्व्यं। शिरः। प्रति। ऐरयतं।

सः। वां। मधु। प्र। वोचत्। ऋतऽयन्। त्वाष्ट्रं। यत्। दस्रौ। अपिऽकक्ष्यं। वां॥२२॥

तद्वां नरा सनय इत्यत्रोक्तमाख्यानमिहाप्यनुसंधेयं। हे अश्विनौ आथर्वणायाथर्वणः पुत्राय दधीचे दध्यङ्नाम्ने महर्षयेऽश्व्यमश्वसंबंधि शिरः प्रत्यैरयतं। प्रत्यधत्तं। तदीयं मानुषं शिरः प्रच्छिद्यान्यत्र विधायाश्व्येन शिरसा तमृषिं समयोजयतमित्यर्थः। स च वां युवाभ्यां प्रवर्ग्यविद्यां मधुविद्यां च वक्ष्यामीति पुरा कृतां प्रतिज्ञां ऋतायन् सत्यामात्मन इच्छन् मधु मधुविद्यां त्वाष्ट्रं त्वष्टुरिंद्राल्लब्धं प्रवोचत्। प्रोक्तवान्। हे दस्रा दर्शनीयावश्विनौ वां युवयोः संबंधि यदपिकक्ष्यं छिन्नस्य यज्ञशिरसः कक्षप्रदेशेन पुनःसंधानभूतं प्रवर्ग्यविद्याख्यं रहस्यं तदपि वां युवाभ्यां प्रावोचदित्यर्थः॥ दधीचे। अंचतेर्ऋत्विगित्यादिना क्विन्। अनिदितामिति नलोपः। चतुर्थ्येकवचनेऽच इत्यकारलोपे चाविति दीर्घत्वं। उदात्तनिवृत्तिस्वरेण विभक्त्युदात्तत्वे प्राप्ते तस्यापवादत्वेन चाविति विभक्तेः पूर्वस्योदात्तत्वं प्राप्तं। तस्याप्ययमपवादः। अंचेश्छंदस्यसर्वनामस्थानमिति विभक्त्युदात्तत्वं॥

त्रयोविंशीमृचमाह ॥

सदा कवी सुमतिमा चक्रे वां विश्वा धियो अश्विना प्रावतं मे।
अस्मे रयिं नासत्या बृहंतमपत्यसाचं श्रुत्यं रराथां ॥२३॥

सदा। कवी इति। सुऽमतिं। आ। चक्रे। वां। विश्वाः। धियः। अश्विना। प्र। अवतं। मे।
अस्मे इति। रयिं। नासत्या। बृहंतं। अपत्यऽसाचं। श्रुत्यं। रराथां ॥२३॥

हे कवी क्रांतदर्शिनौ मेधाविनावश्विनौ वां युवयोः सुमतिं कल्याणीमनुग्रहात्मिकां बुद्धिं सदा सर्वदाचक्रे। आभिमुख्येन प्रार्थये। मे मदीयानि विश्वा धियः सर्वाणि कर्माणि युवां प्रावतं। प्रकर्षेण रक्षतं। अपि च। अस्मे अस्मभ्यं हे नासत्यावश्विनौ बृहंतं महांतमपत्यसाचमपत्यैः पुत्रादिभिः समवेतं श्रुत्यं प्रशंसनीयमुत्कृष्टं रयिं धनं रराथां। प्रयच्छतं॥ चक्रे। कै गै शब्दे। व्यत्ययेनात्मनेपदं। लिट्युत्तमैकवचने रूपं। अस्मे। सुपां सुलुगिति चतुर्थीबहुवचनस्य शे आदेशः। अपत्यसाचं। अपत्यैः सह सचते संगच्छत इत्यपत्यसाच्। छांदसो णिवः। श्रुत्यं। श्रुतिः स्तुतिः। तत्र भवं श्रुत्यं। भवे छंदसीति यत्। यतोऽनाव इत्याद्युदात्तत्वं। रराथां। रा दाने। लोटि व्यत्ययेनात्मनेपदं। बहुलं छंदसीति शपः श्लुः॥

चतुर्विंशीमृचमाह ॥

हिरण्यहस्तमश्विना रराणा पुत्रं नरा वध्रिमत्या अदत्तं।
त्रिधा ह श्यावमश्विना विकस्तमुज्जीवस ऐरयतं सुदानू ॥२४॥

हिरण्यऽहस्तं। अश्विना। रराणा। पुत्रं। नरा। वध्रिऽमत्याः। अदत्तं।
त्रिधा। ह। श्यावं। अश्विना। विऽकस्तं। उत्। जीवसे। ऐरयतं। सुदानू इति सुऽदानू ॥२४॥

रराणा रममाणौ दातारौ वा नरा नेतारौ हे अश्विनौ हिरण्यहस्तं नाम पुत्रं वध्रिमत्या एतत्संज्ञायै ब्रह्मवादिन्या अदत्तं। प्रायच्छतं ह। अपि च। हे सुदानू शोभनदानावश्विनौ त्रिधा त्रेधा विकस्तं विच्छिन्नं श्यावाख्यमृषिं जीवसे जीवितुमुदैरयतं। असुरैस्त्रेधा खंडितं शरीरं पुनरेकीकृत्योदगमयतमित्यर्थः॥ रराणा। रमतेः शानचि बहुलं छंदसीति शपः श्लुः। व्यत्ययेन मकारस्यात्वं। रातेर्वा

व्यत्ययेन शानच्। पूर्ववत् श्नुः। वध्रिमत्याः। चतुर्थ्यर्थे बहुलं छंदसीति षष्ठी। जीवसे। जीव प्राणधारणे। तुमर्थे सेसेनित्यसेप्रत्ययः ॥

पंचविंशीमृचमाह ॥

एतानि वामश्विना वीर्याणि प्र पूर्व्याण्यायवोऽवोचन्।
ब्रह्म कृण्वंतो वृषणा युवभ्यां सुवीरासो विदथमा वदेम ॥ २५ ॥
एतानि। वां। अश्विना। वीर्याणि। प्र। पूर्व्याणि। आयवः। अवोचन्।
ब्रह्म। कृण्वंतः। वृषणा। युवऽभ्यां। सुऽवीरासः। विदथं। आ। वदेम ॥ २५ ॥

अश्विना हे अश्विनौ वां युवयोः संबंधीनि पूर्व्याणि प्रत्नान्येतानीदानीं मयोक्तानि वीर्याणि वीरकर्माण्यायवो मनुष्या मदीयाः पित्रादयः प्रावोचन्। उक्तवंतः। वयं च हे वृषणा कामाभिवर्षकावश्विनौ युवाभ्यां ब्रह्म मंत्रात्मकं स्तोत्रं कृण्वंतः कुर्वतः सुवीरासः सुवीराः शोभनैर्वीरैः पुत्रादिभिरुपेताः संतो विदथं यज्ञमावदेम। आभिमुख्येन स्तुतीरुच्चारयाम। यद्वा। विदथं वेदयंतमतिथिं तदपेक्षितप्रदानेनावदेम। आभिमुख्येन प्रियपूर्विकां वाचमुच्चारयाम ॥ कृण्वंतः। कृवि हिंसाकरणयोश्च। इदित्त्वान्नुम्। लटः शतृ। धिन्विकृण्व्योरच्चेत्युप्रत्ययः। अकारांतादेशश्च। अतो लोपे सति स्थानिवद्भावाल्लघूपधगुणाभावः। सुवीरासः। शोभना वीरा येषां ते तथोक्ताः। आज्जसेरसुक्। वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं। विदथं। विद ज्ञाने। रुदिविदिभ्यां कित्त्यथप्रत्ययः ॥

॥ इति प्रथमस्याष्टमे सप्तदशो वर्गः ॥

आ वामित्येकादशर्चं तृतीयं सूक्तं कक्षीवत आर्षं त्रैष्टुभमाश्विनं। तथा चानुक्रांतं। आ वामेकादशेति। पूर्वसूक्ताभ्यां सह प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

तत्र प्रथमामृचमाह ॥

आ वां रथो अश्विना श्येनपत्वा सुमृळीकः स्ववाँ यात्वर्वाङ्।
यो मर्त्यस्य मनसो जवीयान्त्रिवंधुरो वृषणा वातरंहाः ॥ १ ॥
आ। वां। रथः। अश्विना। श्येनऽपत्वा। सुऽमृळीकः। स्वऽवान्। यातु। अर्वाङ्।
यः। मर्त्यस्य। मनसः। जवीयान्। त्रिऽवंधुरः। वृषणा। वातऽरंहाः ॥ १ ॥

हे अश्विनौ वां युवयोः स्वभूतो रथोऽर्वाङ् अस्मदभिमुख आयातु। आगच्छतु। कीदृशो रथः। श्येनपत्वा। श्येना इत्यश्वनाम। शंसनीयगमनैरश्वैः पतन् गच्छन्। यद्वा। श्येनः पक्षी। स इव शीघ्रं पतन्। सुमृळीकः। शोभनसुखयुक्तः। स्ववान्। धनवान्। हे वृषणौ कामानां वर्षितारावश्विनौ यो युष्मदीयो रथो मर्त्यस्य मनुष्यस्य मनसो जवीयान्। अतिशयेन वेगवान्। तद्यथा वेगेन कृत्स्नं जगद्व्याप्नोति ततोऽप्यतिशयेन क्षणमात्रादेव सर्वं जगत्पर्यटतीत्यर्थः। त्रिवंधुरः। वंधुरं वेष्टितं सारथेः स्थानं। त्रिप्रकारेण वंधुरेण युक्तः। वातरंहाः। वातस्य वायो रंहा वेग इव वेगो यस्य स तथोक्तः। अनेनाप्रतिहतगतित्वमुच्यते। स रथ इति पूर्वत्रान्वयः॥ श्येनपत्वा। पत्लृ गतौ। अन्येभ्योऽपि दृश्यंत इति वनिप्। दासीभारादिः। यद्वा। दृशिग्रहणस्य विध्यंतरोपसंग्रहार्थत्वाद्भावे वनिप्। ततो बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। जवीयान्। जवोऽस्यास्तीति जववान्। अतिशयेन जववान्। आतिशायनिक ईयसुन्। विन्मतोर्लुक्। टेरिति टिलोपः॥

द्वितीयामृचमाह॥

त्रिवंधुरेण त्रिवृता रथेन त्रिचक्रेण सुवृता यातमर्वाक्।
पिन्वतं गा जिन्वतमर्वतो नो वर्धयतमश्विना वीरमस्मे॥२॥
त्रिऽवंधुरेण। त्रिऽवृता। रथेन। त्रिऽचक्रेण। सुऽवृता। आ। यातं। अर्वाक्।
पिन्वतं। गाः। जिन्वतं। अर्वतः। नः। वर्धयतं। अश्विना। वीरं। अस्मे इति॥२॥

त्रिवंधुरेण। वंधुरं सारथिस्थानं। त्रिप्रकारवंधुरोपेतेन त्रिवृता त्रिधा वर्तमानेन त्रिचक्रेण चक्रत्रयोपेतेन सुवृता शोभनं गच्छता रथेनार्वाक् अस्मदभिमुखमायातं। आगच्छतं। आगत्य चास्मदीया गाः पिन्वतं। पयसा पूरयतं। नोऽस्माकमर्वतोऽश्वान् जिन्वतं। प्रीणयतं। अपि च। हे अश्विनौ अस्मे अस्माकं वीरं पुत्रादिकं वर्धयतं। प्रवृद्धं कुरुतं॥ त्रिचक्रेण। त्रीणि चक्राणि यस्य स तथोक्तः। त्रिचक्रादीनां छंदस्युपसंख्यानमित्युत्तरपदांतोदात्तत्वं॥

तृतीयामृचमाह॥

प्रवद्यामना सुवृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः।
किमंग वां प्रत्यवर्तिं गमिष्ठाहुर्विप्रासो अश्विना पुराजाः॥३॥

प्रवत्ऽयामना। सुऽवृता। रथेन। दस्रौ। इमं। शृणुतं। श्लोकं। अद्रेः।
किं। अंग। वां। प्रति। अवर्तिं। गमिष्ठा। आहुः। विप्रासः। अश्विना। पुराऽजाः ॥३॥

हे दस्रौ दर्शनीयावश्विनौ प्रवद्यामना प्रकृष्टगमनेन शीघ्रगामिना सुवृता शोभनवर्तनेन रथेनागत्याद्रेरादरं कुर्वतः स्तोतुरिमं श्लोकं स्तुतिलक्षणामिमां वाचं शृणुतं। अंगाश्विना हे अश्विनौ पुराजाः पूर्वजाताश्चिरंतना विप्रासो मेधाविनो वां युवामवर्तिं स्तोतॄणां दारिद्र्यं प्रति तत्परिहर्तुं गमिष्ठा गंतृतमावाहुः। कथयंति। किंशब्दः प्रदर्शनफलप्रश्ने वर्तते। किं न कथयंति। कथयंत्येव सर्वे। तथा सत्यागंतव्यमिति ॥ प्रवद्यामना। स्वोपसृष्टे धात्वर्थे वर्तमानात्प्रशब्दादुपसर्गाच्छंदसि धात्वर्थ इति वतिः। या प्रापणे। आतो मनिन्निति बहुलवचनाद्भावे मनिन्। ततो बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। अद्रेः। दृङ् आदरे। आङ्पूर्वादस्मादौणादिकः क्रिप्रत्यय आङो ह्रस्वश्च। गमिष्ठा। गंतृशब्दात्तुश्छंदसीतीष्ठन्। तुरिष्ठेमेयःस्विति तृलोपः। सुपां सुलुगिति विभक्तेराकारः। आहुः। प्रत्ययस्वरः। पादादित्वान्निघाताभावः ॥

चतुर्थीमृचमाह ॥

आ वां श्येनासो अश्विना वहंतु रथे युक्तास आशवः पतंगाः।
ये अप्तुरो दिव्यासो न गृध्रा अभि प्रयो नासत्या वहंति ॥४॥
आ। वां। श्येनासः। अश्विना। वहंतु। रथे। युक्तासः। आशवः। पतंगाः।
ये। अप्ऽतुरः। दिव्यासः। न। गृध्राः। अभि। प्रयः। नासत्या। वहंति ॥४॥

हे अश्विनौ रथे युक्तासः सारथिना वहनप्रदेशे योजिता आशवो व्याप्नुवंतः पतंगाः पतनसमर्थाः श्येनासः शंसनीयगमना अश्वा वां युवामावहंतु। अस्मत्समीपमानयंतु। येऽश्वा अप्तुर आप इव त्वरोपेता दिव्यासो न गृध्रा अंतरिक्षे वर्तमाना गृध्राख्याः पक्षिण इव शीघ्रं गच्छंतो हे नासत्यौ युवां प्रयो हविर्लक्षणमन्नमभिलक्ष्य वहंति। प्रापयंति। तादृशा इति पूर्वत्र संबंधः ॥ अप्तुरः। तुर त्वरणे। अप्शब्दोपपदादस्मात् क्विप् चेति क्विप् ॥

पंचमीमृचमाह ॥

आ वां रथं युवतिस्तिष्ठदत्र जुष्ट्वी नरा दुहिता सूर्यस्य ।
परि वामश्वा वपुषः पतंगा वयो वहंत्वरुषा अभीके ॥ ५ ॥

आ । वां । रथं । युवतिः । तिष्ठत् । अत्र । जुष्ट्वी । नरा । दुहिता । सूर्यस्य ।
परि । वां । अश्वाः । वपुषः । पतंगाः । वयः । वहंतु । अरुषाः । अभीके ॥ ५ ॥

हे नरा नेतारावश्विनौ युवतिस्तरुणी सूर्यस्य दुहिता जुष्ट्वी प्रीता सती वां युवयोरत्रेमं रथमातिष्ठत् । आरूढवती । तया सहितौ वां युवामश्वा अभीके गृहसमीपे तं रथं परिवहंतु । परिप्रापयंतु । कीदृशा अश्वाः । वपुषः । वपुरिति रूपस्य शरीरस्य वा नामधेयं । तद्वंतः । छांदसो मत्वर्थीयस्य लोपः । पतंगाः । उत्पतनसमर्थाः । वयः । गच्छंतः । अरुषाः । आरोचमाना हिंसकरहिता वा ॥ अत्र । इतराभ्योऽपि दृश्यंत इति दृशिग्रहणाद्भवदाद्ययोगेऽपीदंशब्दाद्विभक्त्यर्थे त्रल्प्रत्ययः । जुष्ट्वी । जुषी प्रीतिसेवनयोः । औणादिकः क्तुप्रत्ययः । वोतो गुणवचनादिति ङीष् ॥

॥ इति प्रथमस्याष्टमेऽष्टादशो वर्गः ॥

षष्ठीमृचमाह ॥

उद्वंदनमैरतं दंसनाभिरुद्रेभं दस्रा वृषणा शचीभिः ।
निष्टौग्र्यं पारयथः समुद्रात्पुनश्च्यवानं चक्रथुर्युवानं ॥ ६ ॥

उत् । वंदनं । ऐरतं । दंसनाभिः । उत् । रेभं । दस्रा । वृषणा । शचीभिः ।
निः । तौग्र्यं । पारयथः । समुद्रात् । पुनरिति । च्यवानं । चक्रथुः । युवानं ॥ ६ ॥

हे अश्विनौ वंदनमेतत्संज्ञमृषिं दंसनाभिरात्मीयैः कर्मभिः कूपादुदैरतं । उदैरयतं । उदगमयतं । हे दस्रा दर्शनीयौ वृषणा कामानां वर्षितारावश्विनौ शचीभिः कर्मभी रेभमेतत्संज्ञमृषिं दश रात्रीर्नवाहानि च कूपे निवसंतं तस्मादुदैरयतं । उदतारयतं । तथा तौग्र्यं तुग्रस्य पुत्रं भुज्युं समुद्रे निमग्नमात्मीयाभिर्नौभिरश्वैश्च समुद्रान्निष्पारयथः । तीरदेशं प्रापितवंतौ । तथा च्यवानं च्यवनमृषिं जीर्णं पुनर्युवानं यौवनोपेतं चक्रथुः । कृतवंतौ ॥ ऐरतं । ईर गतौ कंपने च । ण्यंताल्लङि छंदस्युभयथेति शप आर्धधातुकत्वाण्णेरनिटीति णिलोपः ॥

सप्तमीमृचमाह ॥

युवमत्रयेऽवनीताय तप्तमूर्जमोमानमश्विनावधत्तं ।
युवं कण्वायापिरिप्ताय चक्षुः प्रत्यधत्तं सुष्टुतिं जुजुषाणा ॥ ७ ॥
युवं । अत्रये । अवऽनीताय । तप्तं । ऊर्जं । ओमानं । अश्विनौ । अधत्तं ।
युवं । कण्वाय । अपिऽरिप्ताय । चक्षुः । प्रति । अधत्तं । सुऽस्तुतिं । जुजुषाणा ॥ ७ ॥

हे अश्विनौ युवं युवामवनीताय शतद्वारे पीडायंत्रगृहेऽवस्तान्नीतायात्रये तप्तं पीडार्थं प्रक्षिप्तं तुषाग्निं शीतेनोदकेनावारयेथां । अपि च । अस्मा अत्रय ओमानं सुखकरमूर्जं रसवदन्नमधत्तं । प्रायच्छतं । तथा सुष्टुतिं शोभनां स्तुतिं जुजुषाणा सेवमानौ युवामपिरिप्तायासुरैर्ब्राह्मण्यपरीक्षार्थमिहासीनः सन् व्युष्टामुषसं जानीहीत्यंधकारवति गृहे प्रवेशिताय कण्वाय ऋषये चक्षुर्व्युष्टाया उषसः प्रकाशकं वीणाशब्दं प्रत्यधत्तं । कृतवंतौ । यद्वा । अपिरिप्ताय पटलेन पिहितदृष्टय एवंविधाय कण्वाय चक्षुरिंद्रियं प्रत्यधत्तं । प्रत्यस्थापयतं ॥ ओमानं । अवतेरौणादिको मनिः । ज्वरत्वरेत्यादिना वकारस्योपधायाश्च ऊट् । गुणः । अपिरिप्ताय । लिप उपदेहे । अस्मात्कर्मणि निष्ठा । कपिलकादित्वाल्लत्वविकल्पः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । जुजुषाणा । जुषी प्रीतिसेवनयोः । छांदसो लिट् । लिटः कानज्वा । सुपां सुलुगिति विभक्तेराकारः ॥

अष्टमीमृचमाह ॥

युवं धेनुं शयवे नाधितायापिन्वतमश्विना पूर्व्याय ।
अमुंचतं वर्तिकामंहसो निः प्रति जंघां विश्पलाया अधत्तं ॥ ८ ॥
युवं । धेनुं । शयवे । नाधिताय । अपिन्वतं । अश्विना । पूर्व्याय ।
अमुंचतं । वर्तिकां । अंहसः । निः । प्रति । जंघां । विश्पलायाः । अधत्तं ॥ ८ ॥

अश्विना हे अश्विनौ युवं युवां पूर्व्याय पुरातनाय नाधिताय याचमानाय शयव एतत्संज्ञाय ऋषये धेनुं निवृत्तप्रसवामदोग्ध्रीमपिन्वतं । पयसासिंचतं । सर्वदा पयस्विनीमकुरुतमित्यर्थः । अपि च । वर्तिकां वृकेण ग्रस्तां चटकसदृशीं शकुनिमंहसो वृकास्यलक्षणात्पापान्निरमुंचतं । निरमोचयतं । यद्वा । पुनः पुनर्वर्तत इति वर्तिकोषाः । तामादित्येनाभिग्रस्तां युवाममोचयतं । तथा विश्प-

लायै संग्रामे छिन्नजंघाया अगस्त्यपुरोहितस्य खेलस्य संबंधिन्या एतत्संज्ञायै स्त्रिया आयसीं जंघां प्रत्यधत्तं। प्रत्यस्थापयतं समयोजयतमित्यर्थः ॥

नवमीमृचमाह ॥

युवं श्वेतं पेदव इंद्रजूतमहिहनमश्विनादत्तमश्वं।
जोहूत्रमर्यो अभिभूतिमुग्रं सहस्रसां वृषणं वीड्वंगं ॥ ९ ॥

युवं। श्वेतं। पेदवे। इंद्रऽजूतं। अहिऽहनं। अश्विना। अदत्तं। अश्वं।
जोहूत्रं। अर्यः। अभिऽभूतिं। उग्रं। सहस्रऽसां। वृषणं। वीळुऽअंगं ॥ ९ ॥

अश्विना हे अश्विनौ पेदवे पेदुनाम्ने राज्ञे युवं युवां श्वेतवर्णं कंचिदश्वमदत्तं। प्रायच्छतं। कीदृशं। इंद्रजूतं। इंद्रेण युवाभ्यां गमितं दत्तमित्यर्थः। अहिहनं। शत्रूणां हंतारं। जोहूत्रं। अतिशयेन संग्रामेष्वाह्वातारं। अर्योऽरेः शत्रोरभिभूतिमभिभावुकं। उग्रमुद्गूर्णं वीर्यवंतमित्यर्थः। सहस्रसां। सहस्रसंख्याकस्य धनस्य संभक्तारं दातारं वा। वृषणं। सेक्तारं युवानमित्यर्थः। वीड्वंगं। दृढांगं॥ इंद्रजूतं। जु इति सौत्रो धातुर्गत्यर्थः। अस्मादंतर्भावितण्यर्थात्कर्मणि निष्ठा। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। जोहूत्रं। ह्वयतेर्यङ्लुगंतादौणादिकस्त्रप्प्रत्ययः। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते। अर्यः। अरिशब्दात् षष्ठ्येकवचने जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणस्य विकल्पितत्वादभावे यणादेशः। उदात्तयण इति विभक्तेरुदात्तत्वं। अभिभूतिं। अभिभूयतेऽनेनेत्यभिभूतिः। करणे क्तिन्। तादौ चेति गतेः प्रकृतिस्वरत्वं। सहस्रसां। सनोतेः सनतेर्वा जनसनखनेति विट्। विड्वनोरनुनासिकस्यादित्यात्वं॥

दशमीमृचमाह ॥

ता वां नरा स्ववसे सुजाता हवामहे अश्विना नाधमानाः।
आ न उप वसुमता रथेन गिरो जुषाणा सुविताय यातं ॥ १० ॥

ता। वां। नरा। सु। अवसे। सुऽजाता। हवामहे। अश्विना। नाधमानाः।
आ। नः। उप। वसुऽमता। रथेन। गिरः। जुषाणा। सुविताय। यातं ॥ १० ॥

नरा नेतारौ हे अश्विनौ सुजाता शोभनजन्मानौ ता वां तौ युवां नाधमाना

धनं याचमाना वयं स्तोतारोऽवसे रक्षणार्थं सु हवामहे। शोभनमाह्वयामहे। गिरः स्तुतीर्जुषाणा सेवमानौ युवां वसुमता धनयुक्तेन रथेन नोऽस्मानुपायातं। उपागच्छतं। किमर्थं। सुविताय। सुष्ठु प्राप्तव्याय धनाय। सुखाय वा॥ सुजाता। शोभनं जातं जन्म ययोस्तौ सुजातौ। सुपां सुलुगिति विभक्तेराकारः। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। नाधमानाः। नाधृ याच्ञायां। जुषाणा। जुषी प्रीतिसेवनयोः। ताच्छीलिकश्चानश्। तुदादित्वाच्छः। पूर्ववद्विभक्तेराकारः। सुविताय। सुपूर्वादेतेः कर्मणि निष्ठा। तन्वादित्वादुवङ्। सूपमानात् क्त इत्युत्तरपदांतोदात्तत्वं॥

एकादशीमृचमाह॥

आ श्येनस्य जवसा नूतनेनास्मे यातं नासत्या सजोषाः।
हवे हि वामश्विना रातहव्यः शश्वत्तमाया उषसो व्युष्टौ॥११॥
आ। श्येनस्य। जवसा। नूतनेन। अस्मे इति। यातं। नासत्या। सऽजोषाः।
हवे। हि। वां। अश्विना। रातऽहव्यः। शश्वत्ऽतमायाः। उषसः। विऽउष्टौ॥११॥

हे नासत्या नासत्यावश्विनौ सजोषाः सजोषसौ समानप्रीतियुक्तौ श्येनस्य शंसनीयं गच्छतोऽश्वस्य नूतनेन नवतरेण प्रत्यग्रेण जवसा वेगेन सहितौ युवामस्मे अस्मानायातं। आगच्छतं। अश्विना हे अश्विनौ रातहव्यो वां युवाभ्यां दातव्येन हविषा युक्तः सन् शश्वत्तमायाः कालात्मकतया नित्याया उषसो व्युष्टौ विवासनसमये वां युवां हवे। आह्वयामि। हिर्हेतौ। हि यस्मादेवं तस्मादायातमित्यर्थः॥ अस्मे। सुपां सुलुगिति शसः शे आदेशः। सजोषाः। तेनैव द्विवचनस्य सु आदेशः। हवे। ह्वेञो लडुत्तमैकवचने बहुलं छंदसीति संप्रसारणं। शप्गुणावादेशाः। शश्वत्तमायाः। उत्तमशश्वत्तमौ सर्वत्रेत्युञ्छादिषु पाठादंतोदात्तत्वं॥

॥ इति प्रथमस्याष्टम एकोनविंशो वर्गः॥

आ वां रथमिति दशर्चं चतुर्थं सूक्तं दैर्घतमसस्य कक्षीवत आर्षं जागतमाश्विनं। तथा चानुक्रांतं। आ वां रथं दश जागतमिति॥ प्रातरनुवाकाश्विने क्रतौ जागते छंदसीदं सूक्तमाश्विनशस्त्रे च। तथा च सूचितं। आ वां रथमभूदिदं यो वां परिज्मेति चीणि। आ॰ ४.१५.। इति॥

तत्र प्रथमामृचमाह ॥

आ वां रथं पुरुमायं मनोजुवं जीराश्वं यज्ञियं जीवसे हुवे।
सहस्रकेतुं वनिनं शतद्वसुं श्रुष्टीवानं वरिवोधामभि प्रयः ॥१॥

आ। वां। रथं। पुरुऽमायं। मनःऽजुवं। जीरऽअश्वं। यज्ञियं। जीवसे। हुवे।
सहस्रऽकेतुं। वनिनं। शतत्ऽवसुं। श्रुष्टीऽवानं। वरिवःऽधां। अभि। प्रयः ॥१॥

हे अश्विनौ वां युवयो रथं जीवसे जीवनार्थं प्रयो हविर्लक्षणमन्नमभिलक्ष्याहुवे। आह्वयामि। कीदृशं। पुरुमायं। बहुविधाश्चर्यं बहुविधकर्माणं वा। मनोजुवं। मन इव शीघ्रं गच्छंतं। जीराश्वं। जववदश्वोपेतं। यज्ञियं। यज्ञेष्वाह्वातुमर्हं। सहस्रकेतुं। अनेकध्वजं सहस्रस्य धनस्य केतयितारं ज्ञापयितारं वा। वनिनं। वनमित्युदकनाम। तद्वंतं। शतद्वसुं। शतसंख्याकैर्धनैर्युक्तं। श्रुष्टीवानं। श्रुष्टीति क्षिप्रनाम। क्षिप्रं संभजमानं। यद्वा सुखवंतं। वरिवोधां। वरिव इति धननाम। वरिवसो धनस्य दातारं ॥ पुरुमायं। बहुव्रीहौ चित्रक्रादित्वादंतोदात्तत्वं। यद्वा। तत्पूर्वादर्शआदित्वादच्। जीराश्वं। जु इति गत्यर्थः सौत्रो धातुः। जोरी चेति रक् ईकारांतादेशश्च। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। यज्ञियं। यज्ञर्त्विग्भ्यां घखञावित्यर्हार्थे घप्रत्ययः। हुवे। ह्वेञो लटि बहुलं छंदसीति संप्रसारणं। लुगित्यनुवृत्तौ बहुलं छंदसीति शपो लुक्। उवङ्। शतद्वसुं। शतवसुं। छांदसस्तकारोपजनः ॥

द्वितीयामृचमाह ॥

ऊर्ध्वा धीतिः प्रत्यस्य प्रयामन्यधायि शस्मन्त्समयंत आ दिशः।
स्वदामि घर्मं प्रति यंत्यूतय आ वामूर्जानी रथमश्विनारुहत् ॥२॥

ऊर्ध्वा। धीतिः। प्रति। अस्य। प्रऽयामनि। अधायि। शस्मन्। सं। अयंते। आ। दिशः।
स्वदामि। घर्मं। प्रति। यंति। ऊतयः। आ। वां। ऊर्जानी। रथं। अश्विना। अरुहत् ॥२॥

अस्य रथस्य प्रयामनि प्रगमने सति शस्मन् अश्विनोः शंसने स्तवने धीतिरस्मदीया बुद्धिरूर्ध्वोन्मुखा प्रत्यधायि। प्रत्यस्थायि। तदनंतरं दिशो देष्टव्याः स्तुतयोऽपि समयंते। अश्विभ्यां संगच्छंते। आकारः समुच्चये। अहं च स्तोता

घर्मं महावीरस्थं यद्वा क्षरणशीलाज्यादिकं हविः स्वदामि । स्वादूकरोमि । ऊतयोऽवितारो रक्षका ऋत्विजश्च प्रति यंति । घर्मं प्रति गच्छंति संस्कारार्थं । अपि च हे अश्विनौ वां युवयो रथमूर्जानी सूर्यस्य दुहितारुहत् । आरूढवती ॥ प्रयामनि । या प्रापणे । आतो मनिन्निति कृत्यल्युटो बहुलमिति बहुलवचनाद्भावे मनिन् । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं । शस्मन् । शंसु स्तुतौ । अन्येभ्योऽपि दृश्यंत इति मनिन् । दृशिग्रहणस्य विध्यंतरोपसंग्रहार्थत्वादुपधानकारलोपः । सुपां सुलुगिति सप्तम्या लुक् । अयंते । अय पय गतौ । भौवादिकोऽनुदात्तेत् । ऊतयः । क्तिच्क्तौ च संज्ञायामित्यवतेः कर्तरि क्तिच् । ज्वरत्वरेत्यादिना वकारोपधयोरूठ् । अरुहत् । कृमृदृरुहिभ्य इति च्लेरङादेशः ॥

तृतीयामृचमाह ॥

सं यन्मिथः पस्पृधानासो अग्मत शुभे मखा अमिता जायवो रणे ।
युवोरह प्रवणे चेकिते रथो यदश्विना वहथः सूरिमा वरं ॥ ३ ॥
सं । यत् । मिथः । पस्पृधानासः । अग्मत । शुभे । मखाः । अमिताः । जायवः । रणे ।
युवोः । अह । प्रवणे । चेकिते । रथः । यत् । अश्विना । वहथः । सूरिं । आ । वरं ॥ ३ ॥

मखा मखवंतो यज्ञोपेता अमिता अपरिमिता जायवो जयशीला मनुष्या रणे संग्रामे शुभे शोभनाय धनाय तदर्थं मिथः पस्पृधानासोऽन्योन्यं स्पर्धमाना यद्यदा समग्मत । संगच्छंते । तदानीं हे अश्विना अश्विनौ युवोरह युवोरेव रथः प्रवणे प्रकर्षेण संभजनीये भूतले चेकिते । ज्ञायते । देवेषु मध्ये युवामेव रक्षणार्थं शीघ्रं रथेनागच्छथ इत्यर्थः । यद्येन रथेन सूरिं स्तोतारं प्रति वरं श्रेष्ठं धनमावहथः । प्रापयथः । स रथ इत्यर्थः ॥ पस्पृधानासः । स्पर्ध संघर्षे । छांदसो लिट् । तस्य लिटः कानजादेशः । छांदसं रेफस्य संप्रसारणमकारलोपश्च । अग्मत । गमेश्छांदसो लङ् । समो गम्यृच्छिभ्यामित्यात्मनेपदं । बहुलं छंदसीति शपो लुक् । झस्यादादेशः । गमहनेत्युपधालोपः । मखाः । मखो यज्ञः । अर्शआदित्वादच् । जायवः । जि जये । कृवापाजीत्यादिनोण् । चेकिते । कित ज्ञाने । अस्माद्यङंताच्छांदसो वर्तमाने लिट् । अतोलोपयलोपौ । यत् । सुपां सुलुगिति तृतीयाया लुक् ॥

चतुर्थीमृचमाह ॥

युवं भुज्युं भुरमाणं विभिर्गतं स्वयुक्तिभिर्निवहंता पितृभ्य आ।
यासिष्टं वर्तिर्वृषणा विजेन्य१ंदिवोदासाय महि चेति वामवः ॥४॥

युवं। भुज्युं। भुरमाणं। विऽभिः। गतं। स्वयुक्तिऽभिः। निऽवहंता। पितृऽभ्यः। आ।
यासिष्टं। वर्तिः। वृषणा। विऽजेन्यं। दिवःऽदासाय। महि। चेति। वां। अवः ॥४॥

वृषणा कामानां वर्षितारौ हे अश्विनौ युवं युवां भुरमाणं विभिरश्वैर्भ्रियमाणं गतं समुद्रं निमग्नं भुज्युं तुग्रपुत्रं स्वयुक्तिभिः स्वयमेव युज्यमानैरश्वैर्नौविशेषैश्च निवहंता नितरां वहंतौ पितृभ्य आ। आङ् मर्यादायां। यत्र पितरस्तुग्रादय आसते तावत्पर्यंतमित्यर्थः। विजेन्यमिति दूरस्थं। दूरे वर्तमानं वर्तिस्तुग्रस्य गृहं प्रति यासिष्टं। अगच्छतं। अपि च। दिवोदासाय राज्ञे कृतं युवयोः संबंध्यवो रक्षणं शंबरहननरूपं महि महद्गंभीरं चेति। अस्माभिर्ज्ञायते॥ भुरमाणं। डुभृञ् धारणपोषणयोः। कर्मणि लटः शानच्। व्यत्ययेन शः। बहुलं छंदसीत्युत्वं। पितृभ्य आ। मर्यादायामाङः कर्मप्रवचनीयसंज्ञा। पा० १.४.८९. पंचम्यपाङ्परिभिः। पा० २.३.१०. इति पंचमी। यासिष्टं। या प्रापणे। यमरमनमातां सक् चेति सगागमः। सिच इडागमः। विजेन्यं। विजनो दूरदेशः। तत्र भवं विजेन्यं। भवे छंदसीति यत्। तित्स्वरित इति स्वरितत्वं ॥

पंचमीमृचमाह ॥

युवोरश्विना वपुषे युवायुजं रथं वाणी येमतुरस्य शर्ध्यं।
आ वां पतित्वं सख्याय जग्मुषी योषावृणीत जेन्या युवां पती ॥५॥

युवोः। अश्विना। वपुषे। युवाऽयुजं। रथं। वाणी इति। येमतुः। अस्य। शर्ध्यं।
आ। वां। पतिऽत्वं। सख्याय। जग्मुषी। योषा। अवृणीत। जेन्या। युवां। पती इति ॥५॥

अश्विना हे अश्विनौ युवोर्युवयोर्वाणी वननीयौ प्रशस्यावश्वौ युवायुजं युवाभ्यां युज्यमानं रथमाजिधावनसमयेऽस्य रथस्य यच्छर्ध्यं प्राप्यमादित्याख्यमवधिभूतं लक्ष्यं वपुषे शोभनार्थं तद्येमतुः। सर्वेभ्यो देवेभ्यः पूर्वं प्रापयामासतुः। तदनंतरं चाजग्मुष्यागतवती जेन्याजिधावनेन जीयमाना योषा सूर्या सख्याय

सखित्वाय युवां युवयोः पतित्वमवृणीत । कथमिति । मम युवामेव पती भर्ताराविति ॥ युवोः । षष्ठीद्विवचने योऽचीति यत्वस्य सर्वविधीनां छंदसि विकल्पितत्वाद्भावे शेषे लोप इति दकारलोपः । अतो गुण इति पररूपत्वं । युवायुजं । युवावौ द्विवचन इति द्व्यर्थाभिधायकस्य युष्मच्छब्दस्याविभक्तावपि व्यत्ययेन युवादेशः । शर्ध्यं । शृधु प्रसहने । ऋहलोर्ण्यत् इति ण्यत् । यतोऽनाव इत्याद्युदात्तत्वं । जग्मुषी । गमेर्लिटः क्वसुः । उगितश्चेति ङीप् । वसोः संप्रसारणमिति संप्रसारणं । गमहनेत्युपधालोपः । जेन्या । जि जये । औणादिक एन्यप्रत्ययष्टिलोपश्च ॥

॥ इति प्रथमस्याष्टमे विंशो वर्गः ॥

षष्ठीमृचमाह ॥

युवं रेभं परिषूतेरुरुष्यथो हिमेन घर्मं परितप्तमत्रये ।
युवं शयोरवसं पिप्यथुर्गवि प्र दीर्घेण वंदनस्तार्यायुषा ॥ ६ ॥

युवं । रेभं । परिऽसूतेः । उरुष्यथः । हिमेन । घर्मं । परिऽतप्तं । अत्रये ।
युवं । शयोः । अवसं । पिप्यथुः । गवि । प्र । दीर्घेण । वंदनः । तारि । आयुषा ॥ ६ ॥

हे अश्विनौ युवं युवां रेभमृषिं परिषूतेः परितः प्रेरकादुपद्रवादुपपतनाद्वोरुष्यथः । अरक्षथः । उरुष्यती रक्षाकर्मेति यास्कः । तथात्रये ऋषये परितप्तं परितस्तप्तं घर्ममसुरैः पीडार्थं प्रक्षिप्तं दीप्यमानं तुषाग्निं हिमेन शीतेनोदकेनावारयेथां । यद्वा हविषामत्रये भक्षयित्रेऽग्नये परितप्तं सूर्यकिरणैः संतप्तं घर्मं । अहर्नामैतत् । अहर्हिमेन वृष्ट्युदकेन हविःसंपादकव्रीह्याद्युत्पत्त्यर्थमवारयेथां । अपि च । शयोरेतत्संज्ञस्य ऋषेर्गवि निवृत्तप्रसवायां धेनाववसं रक्षकं पयो युवं युवां पिप्यथुः । प्रवर्धितवंतौ । तथा जीर्णागो वंदन ऋषिर्दीर्घेणायुषा प्रतारि । युवाभ्यां प्रवर्धितः । प्रपूर्वस्तिरतिर्वर्धनार्थः ॥ अवसं । अवतेरौणादिकोऽसच् । पिप्यथुः । प्यायी वृद्धौ । व्यत्ययेन परस्मैपदं । लिड्यङोश्चेति पीभावः ॥

सप्तमीमृचमाह ॥

युवं वंदनं निर्ऋतं जरण्यया रथं न दस्रा करणा समिन्वथः ।
क्षेत्रादा विप्रं जनथो विपन्यया प्र वामत्र विधते दंसना भुवत् ॥ ७ ॥

युवं। वंदनं। निःऽऋतं। जरण्यया। रथं। न। दस्रा। करणा। सं। इन्वथः।
क्षेत्रात्। आ। विप्रं। जनथः। विपन्यया। प्र। वां। अत्रं। विधते। दंसना। भुवत्॥७॥

हे दस्रावश्विनौ युवं युवां जरण्यया जरया निर्ऋतं निःशेषेण प्राप्तं वंदनमृषिं करणा कर्मणां कर्तारौ शिल्पकुशलौ युवां समिन्वथः। समधत्तं। पुनर्युवानमकुरुतं। तत्र दृष्टांतः। रथं न। यथा कश्चिच्छिल्पी जीर्णं रथं पुनरप्यभिनवं करोति तद्वत्। अपि च। विपन्यया स्तुत्या गर्भस्थेन वामदेवेन स्तुतौ संतौ क्षेत्रादा। आकारः समुच्चये। मातुरुदरलक्षणाज्जन्मस्थानाद्विप्रं मेधाविनं तमृषिं जनथः। जनयथश्च। तथा वां युवयोर्दंसना रक्षणात्मकं कर्मात्रास्मै विधते परिचरते यजमानाय प्रभुवत्। प्रभवतु। रक्षितुं समर्थं भवतु॥ निर्ऋतं। ऋ गतौ। कर्मणि निष्ठा। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। जरण्यया। जरणक्रियार्हा जरण्या। अंत्यावस्थाच्छंदसि चेति यः। करणा। करोतेरन्येभ्योऽपि दृश्यत इति युच्। इन्वथः। इवि व्याप्तौ। इदित्वान्नुम्। भौवादिकः। जनथः। जनी प्रादुर्भावे। णिच्युपधावृद्धिः। जनी जॄष् क्नसु रंजोऽमंताश्चेति मित्त्वान्मितां ह्रस्व इति ह्रस्वत्वं। छंदस्युभयथेति शप आर्धधातुकत्वाणेरनिटीति णिलोपः। विपन्यया। पन स्तुतौ। अघ्न्यादयश्चेति भावे यत्। व्यत्ययेनांतोदात्तत्वं। विधते। विध विधाने। तौदादिकः। लटः शतृ। शतुरनुम इति विभक्तेरुदात्तत्वं। भुवत्। भवतेर्लेट्यडागमः। बहुलं छंदसीति शपो लुक्। भूसुवोस्तिङीति गुणप्रतिषेधः॥

अष्टमीमृचमाह॥

अगच्छतं कृपमाणं परावति पितुः स्वस्य त्यजसा निबाधितं।
स्वर्वतीरित ऊतीर्युवोरह चित्रा अभीके अभवन्नभिष्टयः॥८॥

अगच्छतं। कृपमाणं। पराऽवति। पितुः। स्वस्य। त्यजसा। निऽबाधितं।
स्वःऽवतीः। इतः। ऊतीः। युवोः। अह। चित्राः। अभीके। अभवन्। अभिष्टयः॥८॥

हे अश्विनौ परावति दूरदेशे समुद्रमध्ये स्वस्य पितुस्तुग्रस्य त्यजसा त्यागेन निबाधितं पीडितं भुज्युं कृपमाणं युवां स्तुवंतमगच्छतं। युवां रक्षणार्थं गतवंतौ। यस्मादेवं तस्मात् हे अश्विनौ स्वर्वतीः स्वर्वत्यः शोभनगमनयुक्ता इत इतो मुखाच्चित्राश्चायनीया युवोरह युवयोरेवोतीरूतयो रक्षा अभीके समीपेऽभिष्टयः सर्वैः प्राणिभिरभ्येषणीया अभवन्। भवंति॥ कृपमाणं। कृपतिः स्तुतिकर्मा।

अयं च तुदादिर्द्रष्टव्यः । स्वर्वतीः । सुपूर्वादर्तेर्भावे विच् । ततो मतुप् । छंदसीर इति मतुपो वत्वं । अभिष्टयः । इषु इच्छायां । भावे क्तिन् । शकंध्वादित्वात्पररूपत्वं ॥

नवमीमृचमाह ॥

उत स्या वां मधुमन्मक्षिकारपन्मदे सोमस्यौशिजो हुवन्यति ।
युवं दधीचो मन आ विवासथोऽथा शिरः प्रति वामश्व्यं वदत् ॥ ९ ॥

उत । स्या । वां । मधुऽमत् । मक्षिका । अरपत् । मदे । सोमस्य । औशिजः । हुवन्यति ।
युवं । दधीचः । मनः । आ । विवासथः । अथ । शिरः । प्रति । वां । अश्व्यं । वदत् ॥ ९ ॥

उत अपि च हे अश्विनौ मधुमन्मधुमंतौ वां युवां स्या सा मक्षिका सरघा मधुकामा सत्यरपत् । अस्तौत् । तथौशिज उशिजः पुत्रः कक्षीवान् सोमस्य पानेन युवयोर्मदे हर्षे निमित्तभूते सति हुवन्यति । युवामाह्वयति । युवं युवां च तस्यै मक्षिकायै मधु दातुं मधुविद्यार्थिनौ संतौ दधीच आथर्वणस्य ऋषेर्मनश्चित्तं शुश्रूषया आविवासथः । पर्यचरतं । अथानंतरं तस्मिन्प्रीते सत्यश्व्यं युवाभ्यां प्रतिहितमश्वस्य संबंधि यच्छिरस्तद्वां युवां प्रति मधुविद्यामवदत् । स ऋषिराश्वेन शिरसोपदिष्टवानित्यर्थः ॥ मधुमत् । सुपां सुलुगिति विभक्तेर्लुक् । अरपत् । रप लप व्यक्तायां वाचि । मदे । मदी हर्षे । मदोऽनुपसर्ग इति भावेऽप् । हुवन्यति । ह्वेञ् स्पर्धायां शब्दे च । ल्युट् चेति भावे ल्युट् । बहुलं छंदसीति संप्रसारणं । हवनमात्मन इच्छति । सुप आत्मनः क्यच् । अंत्यलोपश्छांदसः । वर्णव्यापत्त्योत्वं । अश्व्यं । अश्वे भवमश्व्यं । भवे छंदसीति यत् ॥

दशमीमृचमाह ॥

युवं पेदवे पुरुवारमश्विना स्पृधां श्वेतं तरुतारं दुवस्यथः ।
शर्यैरभिद्युं पृतनासु दुष्टरं चर्कृत्यमिंद्रमिव चर्षणीसहं ॥ १० ॥

युवं । पेदवे । पुरुऽवारं । अश्विना । स्पृधां । श्वेतं । तरुतारं । दुवस्यथः ।
शर्यैः । अभिऽद्युं । पृतनासु । दुस्तरं । चर्कृत्यं । इंद्रंऽइव । चर्षणिऽसहं ॥ १० ॥

अश्विना हे अश्विनौ पेदवे पेदुनाम्ने राज्ञे पुरुवारं बहुभिर्वरणीयं स्पृधां संग्रामे स्पर्धमानानां शत्रूणां तरुतारं तारकं श्वेतं शुभ्रवर्णमिंद्राल्लब्धमश्वं युवं

युवां दुवस्यथः। दत्तवंतौ। पुनरपि कीदृशं। शर्यैः। शीर्यंत इति शर्या योद्धारः। तैः पृतनासु संग्रामेषु दुस्तरं। तरीतुमशक्यं। अभिद्युं। अभिगतदीप्तिं। चर्कृत्यं। सर्वेषु कार्येषु पुनः पुनः प्रयोज्यं। इंद्रमिव चर्षणीसहं। इंद्रो यथा शत्रूनभिभवति एवं शत्रुजनानामभिभवितारमित्यर्थः ॥ स्पृधां। स्पर्ध संघर्षे। क्विप् चेति क्विप्। चशब्देन दृशिग्रहणानुकर्षणात्तस्य च विध्यंतरोपसंग्रहार्थत्वादकारस्य लोपो रेफस्य च संप्रसारणं। सावेकाच इति विभक्तेरुदात्तत्वं। तरुतारं। तॄ प्लवनतरणयोः। अस्मात्तृचि ग्रसितस्कभितस्तभितेत्यादौ निपातनाद्रूपसिद्धिः। चर्कृत्यं। करोतेर्यङ्लुगंताद्विभाषा कृवृषोरिति क्यप्। ततस्तुक् ॥

॥ इति प्रथमस्याष्टम एकविंशो वर्गः ॥

का राधदिति द्वादशर्चं पंचमं सूक्तं। अत्रानुक्रम्यते। का राधद्द्वादशांत्या दुःस्वप्ननाशिन्याद्या गायत्री द्वितीया ककुप् तृतीयाचतुर्थ्यौ काविराण्नष्टरूप्यौ पंचमी तनुशिरा षष्ठ्यक्षरैरुष्णिग्विष्टारबृहती कृतिर्विराट् तिस्रो गायत्र्य इति। अस्यायमर्थः। अनुवृत्तेरौशिजो दैर्घतमसः कक्षीवानृषिः। आद्या गायत्री। विद्वांसावित्येषा ककुप् मध्यमपादस्य द्वादशाक्षरत्वात्। मध्यमश्चेत्ककुबिति हि तल्लक्षणं। तृतीया ता विद्वांसेत्येषा काविराट्। नवकयोर्मध्ये जागतः काविराडित्युक्तलक्षणोपेतत्वात्। चतुर्थी विपृच्छामीत्येषा नष्टरूपी। नववैराजत्रयोदशैर्नष्टरूपीत्युक्तलक्षणोपेतत्वात्। प्र या घोष इत्येषा पंचमी तनुशिरा। एकादशिनोः परः षट्कस्तनुशिरेत्युक्तलक्षणोपेतत्वात्। श्रुतं गायत्रमित्येषा षष्ठी यद्यपि पादसंख्ययोष्णिङ्न भवति तथाप्यक्षरसंख्ययोष्णिक्। युवं हीति सप्तमी विष्टारबृहती। अष्टिनोर्मध्ये दशकौ विष्टारबृहतीति तल्लक्षणोपेतत्वात्। मा कस्मा इत्यष्टमी कृतिः। जागतावष्टकश्च कृतिरित्युक्तलक्षणसद्भावात्। दुहीयन्मित्रेति नवमी विराट्। दशम्याद्यास्तिस्रो गायत्र्यः। आश्विनं वै इति वैशब्दप्रयोगात्तुह्यादिपरिभाषयेदमपि सूक्तमाश्विनं। अथ स्वप्नस्येत्यंत्यया दुःस्वप्ननाशनं प्रतिपाद्यते। अतो या तेनोच्यते सा देवतेति न्यायेन तदेव देवता ॥ सूक्तविनियोगो लैंगिकः। घर्माभिष्टव आदितो नवर्चो विनियुक्ताः। सूत्र्यते हि। का राधद्धोत्राश्विना वामिति नवाभात्यग्निः। आ॰ ४. ६.। इति ॥ का राधद्धोत्राश्विना वामिति नवविछंदस इत्यादिकं ब्राह्मणमनुसंधेयं ॥

तत्र प्रथमामृचमाह ॥

का राधद्धोत्राश्विना वां को वां जोष उभयोः। कथा विधात्यप्रचेताः ॥ १ ॥

का। राधत्। होत्रा। अश्विना। वां। कः। वां। जोषे। उभयोः। कथा। विधाति। अप्रऽचेताः ॥ १ ॥

अश्विना हे अश्विनौ वां युवां का होत्रा। वाङ्नामैतत्। कीदृशी स्तुतिलक्षणा वाक् राधत्। आराधयति। प्रीतौ करोति। युवयोर्माहात्म्यानुरूपा स्तुतिर्नास्तीत्यर्थः। किंच वां युवयोरुभयोर्जोषे जोषणे सेवने प्रीणने वा समर्थः कः स्तोता विद्यते। युष्मद्गुणाभिज्ञः कश्चिदपि नास्तीत्यर्थः। अप्रचेता युवयोर्माहात्म्यमजानंश्च कथा केन प्रकारेण विधाति। युवां परिचरति। युष्मद्विषयं परिचरणमपि कर्तुं न शक्यत इत्यर्थः॥ राधत्। राध साध संसिद्धौ। लेटोऽडागमः। जोषे। जुषी प्रीतिसेवनयोः। भावे घञ्। ञित्वादाद्युदात्तत्वं। कथा। था हेतौ च छंदसीति किंशब्दात्प्रकारवचने थाप्रत्ययः। किमः क इति कादेशः। विधाति। विध विधाने। तौदादिकः। लेटोऽडागमः। अप्रचेताः। प्रकृष्टं चेतो यस्यासौ प्रचेताः। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं ॥

द्वितीयामृचमाह ॥

विद्वांसाविद्दुरः पृच्छेदविद्वानित्थापरो अचेताः। नू चिन्नु मर्ते अक्रौ ॥ २ ॥

विद्वांसौ। इत्। दुरः। पृच्छेत्। अविद्वान्। इत्था। अपरः। अचेताः। नु। चित्। नु। मर्ते। अक्रौ ॥ २ ॥

इत्थेत्थमनेन पूर्वोक्तप्रकारेणाविद्वान् अज्ञः स्तोता विद्वांसावित् सर्वज्ञावश्विनावेव दुरो द्वाराणि स्तुतिपरिचरणयोरुपायभूतान्मार्गान्पृच्छेत्। प्रष्टुमर्हति। अपरोऽश्विभ्यामन्यः सर्वोऽप्यचेताः। यस्माच्चेतसा ज्ञानेन रहितस्तस्मादश्विनावेव पृच्छेदित्यर्थः। तौ चाक्रौ शत्रुभिरनाक्रांतावश्विनौ नू चित् क्षिप्रमेव मर्ते मनुष्ये स्तोतरि भक्तानुग्रहकतया सनिं धत्त इति वाक्यशेषः॥ इत्था। था हेतौ च छंदसीति थाप्रत्ययः। इदम इश्। एतेतौ रथोः। पा॰ ५.३.४.। इतीद्भावः। यदि था हेतौ चेत्यत्रेदम्शब्दस्य नानुवृत्तिस्तदानीमिदमस्थमुः। एतदंतात्परस्या विभक्तेर्व्यत्ययेन सुपां सुलुगिति विभक्तेर्डादेशः। अक्रौ। क्रमु पादविक्षेपे। अस्मात् नञ्युपपदे कृत्यल्युटो बहुलमिति बहुलवचनात्कर्मण्यपि जनसनखनक्रमगमो

विडिति विट् । विड्वनोरनुनासिकस्यादित्यात्वं । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं ॥

तृतीयामृचमाह ॥

ता विद्वांसा हवामहे वां ता नो विद्वांसा मन्म वोचेतमद्य ।
प्रार्चद्दयमानो युवाकुः ॥ ३ ॥

ता । विद्वांसा । हवामहे । वां । ता । नः । विद्वांसा । मन्म । वोचेतं । अद्य ।
प्र । आर्चत् । दयमानः । युवाकुः ॥ ३ ॥

हे अश्विनौ विद्वांसा सर्वज्ञौ ता वां तौ युवां हवामहे । आह्वयामहे । तावाहूतौ विद्वांसाभिज्ञौ युवां नोऽस्मभ्यं मन्म मननीयं ज्ञातव्यं स्तोत्रमद्यास्मिन्काले वोचेतं । ब्रुवाणौ भूयास्तं । स चाहं युवाकुर्युवां कामयमानः स्तुत्या संयोजयन्वा दयमानो युवाभ्यां हविः प्रयच्छन् प्रार्चत् । प्रकर्षेण स्तौमि ॥ ता । सुपां सुलुगिति विभक्तेराकारः । वोचेतं । ब्रूञ् व्यक्तायां वाचि । ब्रुवो वचिः । लिङ्याशिष्यङ् । वच उमित्युमागमः । आर्चत् । अर्च पूजायां । भौवादिकः । तिङां तिङो भवंतीति मिपस्तिबादेशः । दयमानः । दय दानगतिरक्षणहिंसादानेषु । शपः पित्त्वादनुदात्तत्वं । शानचो लसार्वधातुकस्वरेण धातुस्वरः शिष्यते । युवाकुः । युवां कामयत इति युवाकुः । मितद्र्वादिभ्य उपसंख्यानमिति डुप्रत्ययः । अविभक्तावपि व्यत्ययेन युवावौ द्विवचन इति युवादेश आत्वं च । यद्वा यु मिश्रणे । औणादिकः काकुप्रत्ययः ॥

चतुर्थीमृचमाह ॥

वि पृच्छामि पाक्या३ न देवान्वषट्कृतस्याद्भुतस्य दस्रा ।
पातं च सह्यसो युवं च रभ्यसो नः ॥ ४ ॥

वि । पृच्छामि । पाक्या । न । देवान् । वषट्ऽकृतस्य । अद्भुतस्य । दस्रा ।
पातं । च । सह्यसः । युवं । च । रभ्यसः । नः ॥ ४ ॥

हे अश्विनौ युवां विपृच्छामि । विशेषेण प्रष्टुमिच्छामि । पाक्या न । पक्कव्यप्रज्ञानान् परिपक्कमतीनन्यान्देवान् न पृच्छामि । किंतु युवामेव सर्वज्ञौ पृच्छामीत्यर्थः । हे दस्रा दर्शनीयौ तौ युवां वषट्कृतस्य वषट्कारेणाग्नौ हुतस्याद्भु-

तस्याश्चर्यभूतस्य महतः सह्यसोऽतिशयेन बलवतो बलोत्पादकस्य सोमस्य स्वांशलक्षणमेकदेशं पातं च। नोऽस्मांश्च रभ्यसोऽतिशयेन रभस्विनः प्रौढोद्यमान्कुरुतं ॥ पाक्या। पचेर्ऋहलोर्ण्यत्। चजोः कु घिण्यतोरिति कुत्वं। तित्स्वरः। सुपां सुलुगिति विभक्तेर्डादेशः। वषट्कृतस्य। वषट्शब्दस्योर्यादित्वेन गतित्वाद्गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। पातं। पा पाने। बहुलं छंदसीति शपो लुक्। सह्यसः। सहतेऽभिभवत्यनेनेति सहो बलं। असुन्। तदस्यास्तीति सहस्वी। मत्वर्थीयो विनिः। तत आतिशायनिक ईयसुन्। विन्मतोर्लुक्। छांदस ईकारलोपः। रभ्यसः। रभ राभस्ये। राभस्यं कार्योपक्रमः। पूर्ववत्प्रक्रियोन्नेया ॥

पंचमीमृचमाह ॥

प्र या घोषे भृगवाणे न शोभे यया वाचा यजति पज्रियो वां।

प्रैषयुर्न विद्वान् ॥ ५ ॥

प्र। या। घोषे। भृगवाणे। न। शोभे। यया। वाचा। यजति। पज्रियः। वां।

प्र। इषऽयुः। न। विद्वान् ॥ ५ ॥

हे अश्विनौ प्र भवति समर्था भवति सा वाक् या वाक् युष्मत्स्तुतिरूपा घोषे घोषाख्यायाः पुत्रे सुहस्त्याख्ये ऋषौ भृगवाणे न भृगौ च शोभे। शोभते। यया च स्तुतिलक्षणया वाचा पज्रियः। पज्रा अंगिरसः। तेषां कुलोत्पन्नः कक्षीवान्वां युवां यजति। स्तौति। सापि शोभत इत्यर्थः। इषयुर्न। इषमन्नमात्मनः कामयमानश्च विद्वान् स्तुत्यभिज्ञः कक्षीवानृषिः प्र भवतु। युष्मदनुग्रहात्संपूर्णकामो भवत्वित्यर्थः ॥ घोषे। घोषा नाम काचिद्ब्रह्मवादिनी कक्षीवतः पुत्री। अत्रोपचारात्तद्वाचकं प्रातिपदिकं पुत्रे वर्तते। भृगवाणे। चिरंतनो भृगुरिवाचरति। सर्वप्रातिपदिकेभ्य इति क्विप्। धातुसंज्ञायां व्यत्ययेन लटः शानच्। शबादि। आगमानुशासनस्यानित्यत्वान्मुगभावः। वृषादिः। शोभे। शुभ दीप्तौ। लोपस्त आत्मनेपदेष्विति तलोपः। इषयुः। इष गतौ। इष्यति गच्छतीतीषमन्नं। इगुपधलक्षणः कः। यद्वा। इषु इच्छायां। इष्यते सर्वैः प्राणिभिरितीषमन्नं। व्यत्ययेन कर्मणि कर्तृप्रत्ययः। प्रशब्देन संहितायां प्रादूहोढोढ्येषैष्येषु वृद्धिर्वक्तव्या। पा० ६.१.८९.३.। इति वृद्धिः ॥

॥ इति प्रथमस्याष्टमे द्वाविंशो वर्गः ॥

षष्ठीमृचमाह ॥

श्रुतं गायत्रं तकवानस्याहं चिद्धि रिरेभाश्विना वां।
आक्षी शुभस्पती दन् ॥ ६ ॥

श्रुतं। गायत्रं। तकवानस्य। अहं। चित्। हि। रिरेभ। अश्विना। वां।
आ। अक्षी इति। शुभः। पती इति। दन् ॥ ६ ॥

हे अश्विना अश्विनौ गायत्रं गातव्यं गायत्रीयुक्तं गायत्रसाम्ना निष्पन्नं निष्पाद्यं वा स्तोत्रं तकवानस्य स्खलद्गतेरंधस्य ऋज्राश्वस्य संबंधि श्रुतं। शृणुतं। अहं चित् अहमिव वां युवां स हि रिरेभ। स्तुतवान्। किं कुर्वन्। हे शुभस्पती शोभनस्य कर्मणः पालयितारौ जलस्य वा स्वामिनौ अक्षी युवाभ्यामादन्। चक्षुषी आददानः। तस्मा इव मह्यमप्यभिमतफलं प्रयच्छतमिति भावः॥ श्रुतं। श्रु श्रवणे। लङि बहुलं छंदसीति विकरणस्य लुक्। तकवानस्य। तक गतौ। अत्र गतिसामान्यवाचिना तद्विशेषो मंदगतिर्लक्ष्यते। औणादिक उप्रत्ययः। भृगवाण इतिवत् प्रक्रियोन्नेया। रिरेभ। रेभृ शब्दे। अक्षी। ई च द्विवचन इत्यक्षिशब्दस्य ईकारांतादेशः। स चोदात्तः। शुभस्पती। सुबामंत्रिते परांगवत्स्वर इति षष्ठ्यंतस्य परांगवद्भावात्पदद्वयसमुदायस्याष्टमिकामंत्रितानुदात्तत्वं। दन्। आङ्पूर्वाद्ददातेराङो दोऽनास्यविहरणे। पा० १. ३. २०.। इत्यात्मनेपदं। व्यत्ययेन शतृ। जुहोत्यादित्वात् श्लुः। द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति वचनाद्विर्वचनाभावः। छंदस्युभयथेत्युभयथाश्रयणात् शतुः सार्वधातुकत्वेन ङित्त्वं। आर्द्धधातुकत्वादातो लोप इटि चेत्याकारलोपः॥

सप्तमीमृचमाह ॥

युवं ह्यास्तं महो रन्युवं वा यन्निरततंसतं।
ता नो वसू सुगोपा स्यातं पातं नो वृकादघायोः ॥ ७ ॥

युवं। हि। आस्तं। महः। रन्। युवं। वा। यत्। निःऽअततंसतं।
ता। नः। वसू इति। सुऽगोपा। स्यातं। पातं। नः। वृकात्। अघऽयोः ॥ ७ ॥

हे अश्विनौ महो महतो धनस्य रन् रातारौ दातारौ युवं युवां कंचनास्तं। --- निरततंसतं। धनानि निरगमयतं। रक्षकौ विनाशकावपि युवामेवेत्यर्थः।

हे वसू वासयितारावश्विनौ तादृशौ युवां नोऽस्माकं सुगोपा सुष्ठु गोपायितारौ रक्षितारौ स्यातं। भवतं। अपि च। नोऽस्मानघायोरघं पापफलमस्माकमिच्छतो वृकात्स्तेनात्पातं। रक्षतं॥ महः। महतः। छांदसोऽच्छब्दलोपः। रन्। दन्निविवत्प्रक्रियोन्नेया। व्यत्ययेनैकवचनं। निरततंसतं। तसि अलंकारे। अस्मात्स्यंताल्लुङि णिश्रिद्रुसुभ्य इति चेश्चङ् द्विर्वचनादि च। गुरुसंज्ञाया लघुसंज्ञया बाधितत्वात्सन्वद्भावाभावः। सुगोपा। सुपां सुलुगिति विभक्तेर्लुक्। अघायोः। अघं परेषामिच्छति छंदसि परेच्छायामिति क्यच्। अश्वाघस्यादित्यात्वं। क्याच्छंदसीत्युप्रत्ययः॥

अष्टमीमृचमाह॥

मा कस्मै धातमभ्यमित्रिणे नो माकुत्रा नो गृहेभ्यो धेनवो गुः।
स्तनाभुजो अशिश्वीः॥ ८॥
मा। कस्मै। धातं। अभि। अमित्रिणे। नः। मा। अकुत्र। नः। गृहेभ्यः। धेनवः। गुः।
स्तनऽभुजः। अशिश्वीः॥ ८॥

हे अश्विनौ अमित्रिणे। अमित्रं मित्रराहित्यं। तद्वते कस्मै चिदपि शत्रवे नोऽस्मान्माभिधातं। आभिमुख्येन मावस्थापयतं। अपि च नोऽस्माकं गृहेभ्यः सकाशात्स्तनाभुजः स्तनैर्वत्सान्मनुष्यांश्च पालयंत्यो धेनवो गावोऽशिश्वीः शिशुना वत्सेन विरहिता अस्मदीये गृहेऽशयाना वा सत्योऽकुत्र चिदस्माभिरगम्ये प्रदेशे मा गुः। मा गच्छंतु॥ धातं। धात्रो माङि लुङि गातिस्थेति सिचो लुक्। न माङ्योग इत्यडभावः। अकुत्र। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। गुः। इण् गतौ। इणो गा लुङीति गादेशः। गातिस्थेति सिचो लुक्। आत इति झेर्जुस्। स्तनाभुजः। भुज पालनाभ्यवहारयोः। स्तनैर्भुंजंति पालयंतीति स्तनाभुजः। क्विप्। अन्येषामपि दृश्यत इति सांहितिको दीर्घः। अशिश्वीः। सख्यशिश्वीति भाषायां। पा॰ ४. १. ६२.। इति छंदस्यपि व्यत्ययेन निपातनं द्रष्टव्यं। यद्वा। शिशुरस्यास्तीति शिश्वी। छंदसीवनिपाविति मत्वर्थीय ईकारः। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं। वा छंदसीति पूर्वसवर्णदीर्घः। अथवा। शीङ् स्वप्ने। उत्सर्गश्छंदसीति किप्रत्ययः। द्विर्वचनहृस्वत्वे। एरनेकाच इति यण्। छांदसो वकारः। पूर्ववत्समासस्वरौ॥

नवमीमृचमाह ॥

दुहीयन्मित्रधितये युवाकु राये च नो मिमीतं वाजवत्यै ।
इषे च नो मिमीतं धेनुमत्यै ॥ ९ ॥

दुहीयन् । मित्रऽधितये । युवाकु । राये । च । नः । मिमीतं । वाजऽवत्यै ।
इषे । च । नः । मिमीतं । धेनुऽमत्यै ॥ ९ ॥

हे अश्विनौ युवाकु युवां कामयमानाः स्तुतिभिर्यावयितारः संयोजयितारो वा स्तोतारो मित्रधितये मित्राणां बंधुजनानां धारणार्थं दुहीयन् । युष्मत्सकाशाद्धनानि दुहंति प्राप्नुवंति । अतो नोऽस्मानपि वाजवत्यै वाजयुक्ताय च राये धनाय मिमीतं । कुरुतं । तथा धेनुमत्यै धेनुभिर्युक्तायेषेऽन्नाय च नोऽस्मान्मिमीतं । कुरुतं । अस्मभ्यं स्तोतृभ्यो बलयुक्तं धनं गोयुक्तमन्नं च प्रयच्छतमित्यर्थः ॥ दुहीयन् । दुह प्रपूरणे । दुहिर्दोहः । इगुपधात्किदिति भाव इप्रत्ययः । दुहिमात्मन इच्छति दुहीयति । सुप आत्मनः क्यच् । दुहीयतेर्लेट्यडागमः । इतश्च लोप इतीकारलोपः । यद्वा । दुहेर्लिङि झस्य रन् । पा० ३. ४. १०५. । इति व्यत्ययेन रनादेशाभावे रूपमेतत् । छांदसोऽंत्यलोपः । यद्वा रनादेशे कृते छांदसो रेफस्य यकारः । अत एव व्युत्पत्त्यनवधारणान्नावगृह्णंति । युवाकु । सुपां सुलुगिति जसो लुक् । मिमीतं । माङ् माने शब्दे च । जौहोत्यादिकः । व्यत्ययेन परस्मैपदं । भृञामिदित्यभ्यासस्येत्वं । चवायोगे प्रथमेति निघातप्रतिषेधः ॥

दशमीमृचमाह ॥

अश्विनोरसनं रथमनश्वं वाजिनीवतोः । तेनाहं भूरि चाकन ॥ १० ॥

अश्विनोः । असनं । रथं । अनश्वं । वाजिनीऽवतोः । तेन । अहं । भूरि । चाकन ॥ १० ॥

वाजिनीवतोः । वाजोऽन्नं बलं वा । तद्वत्क्रियावतोरश्विनोरनश्वमश्वरहितमश्वराहित्येऽपि सामर्थ्यातिशयेन गच्छंतं रथमसनं । अहं स्तोता समभजं । तेन च रथेन भूरि प्रभूतं श्रेयश्चाकन । कामये ॥ असनं । वन षण संभक्तौ । लङ् । चाकन । कन दीप्तिकांतिगतिषु । छांदसो लिट् । णलुत्तमो वेति णित्वस्य विकल्पनाद्वृद्ध्यभावः । तुजादित्वादभ्यासस्य दीर्घत्वं ॥

एकादशीमृचमाह ॥

अयं समह मा तनूह्याते जनाँ अनु । सोमपेयं सुखो रथः ॥ ११ ॥

अयं । समह । मा । तनु । ऊह्याते । जनान् । अनु । सोमऽपेयं । सुऽखः । रथः ॥ ११ ॥

हे समह धनेन सहित हे रथ अयं पुरोवर्ती त्वं मा मां तनु । विस्तारय । पुत्रपौत्रधनादिभिः समृद्धं कुरु । यद्वा । अयमानं त्वां प्राप्नुवंतं मामिति योज्यं । स च सुखः शोभनावकाशः सुखहेतुर्वा रथो जनाननु स्तोतृजनेषु सोमपेयं सोमपानं प्रत्यूह्याते । उह्यते । अश्विभ्यां नीयते । अतोऽश्विभ्यां यद्दीयते तत्सर्वं रथ एव ददातीति रथं संबोध्य प्रार्थना ॥ अयं । इदोऽय् पुंसि । पा० ७. २. १११. । यद्वा अय पय गतौ । पचाद्यच् । समह । मघमिति धननाम । मघेन सह वर्तत इति समघः । छांदसो वर्णविकारः । यद्वा । मह पूजायां । महयति पूजयतीति महो धनं । पचाद्यच् । ऊह्याते । वह प्रापणे । कर्मणि लेट्याडागमः । यजादित्वात्संप्रसारणं । तस्य छांदसो दीर्घः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे यक एव स्वरः शिष्यते । सोमपेयं । पा पाने । अचो यदिति भावे यत् । ईद्यतीति ईकारादेशः । यतोऽनाव इत्याद्युदात्तत्वं । कृदुत्तरपदप्रकृतिस्वरत्वं ॥

द्वादशीमृचमाह ॥

अध स्वप्नस्य निर्विदेऽभुंजतश्च रेवतः । उभा ता बस्रि नश्यतः ॥ १२ ॥

अध । स्वप्नस्य । निः । विदे । अभुंजतः । च । रेवतः । उभा । ता । बस्रि । नश्यतः ॥ १२ ॥

अधेदानीं प्रभातसमये स्वप्नस्य स्वप्नं प्रति निर्विदे । निर्विण्णोऽस्मि । तथाभुंजतः परानरक्षतो रेवतो धनवतश्च पुरुषस्य एवंभूतं पुरुषं प्रत्यपि निर्विण्णोऽस्मि । यतस्तावुभौ बस्रि क्षिप्रं नश्यतः । नाशं प्राप्नुतः । स्वप्नदृष्टः पदार्थः प्रातर्नोपलभ्यते कदर्यस्येव धनमभुक्तमदत्तं सत् क्षिप्रमेव नश्यति । तदुभयविषयो निर्वेदो मां बाधत इत्यर्थः । अत्र स्वप्नमात्रस्यासत्त्वप्रतिपादनेन दुःस्वप्नस्याप्यसद्भावः प्रतिपादितः । अत एषा दुःस्वप्ननाशिनीति युज्यते ॥ स्वप्नस्य । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । विदे । विद्लृ लाभे । आगमानुशासनस्यानित्यत्वान्नुमभावः । रेवतः । रयिशब्दान्मतुप् ।

रयेर्मतौ बहुलमिति संप्रसारणं। छंदसीर इति मतुपो वत्वं। रेशब्दाच्च मतुप उदात्तत्वमिति तस्योदात्तत्वं। उभा ता। उभयत्र सुपां सुलुगित्याकारः॥

॥ इति प्रथमस्याष्टमे त्रयोविंशो वर्गः॥

॥ इति प्रथमे मंडले सप्तदशोऽनुवाकः॥

अष्टादशेऽनुवाके षट् सूक्तानि। तत्र कदित्थेति पंचदशर्चं प्रथमं सूक्तं। अत्रानुक्रम्यते। कदित्था पंचोना वैश्वदेवं वेति। अनुवर्तमानः कक्षीवानृषिः। अनादेशपरिभाषया त्रिष्टुप्। विश्वे देवा इंद्रो वा देवता॥ विनियोगो लैंगिकः॥

तत्र प्रथमामृचमाह॥

कदित्था नूँः पात्रं देवयतां श्रवद्गिरो अंगिरसां तुरण्यन्।
प्र यदानड्विश आ हर्म्यस्योरु क्रंसते अध्वरे यजत्रः॥१॥

कत्। इत्था। नॄन्। पात्रं। देवऽयतां। श्रवत्। गिरः। अंगिरसां। तुरण्यन्।
प्र। यत्। आनट्। विशः। आ। हर्म्यस्य। उरु। क्रंसते। अध्वरे। यजत्रः॥१॥

नूँः पात्रं नॄन्पाता नृणां स्तुतेर्नेतॄणां पुरुषाणां रक्षणशील इंद्रस्तुरण्यन् गोरूपं धनं प्रेरयन् देवयतां देवं द्योतमानं दानादिगुणयुक्तं वेंद्रमात्मन इच्छता-मंगिरसामृषीणामस्माकमित्थेत्थं प्रयुज्यमाना गिरः स्तुतीः कत् कदा कस्मिन्काले श्रवत्। शृणुयात्। यद्यदा स इंद्रो हर्म्यस्य हर्म्योपलक्षितगृहेण युक्तस्य यजमानस्य संबंधिनो विश ऋत्विग्लक्षणान्मनुष्यानाभिमुख्येन प्रानट्। प्राप्नोति। तदानी-मध्वरेऽस्मदीये यज्ञे यजत्रो यष्टव्यः सन् उरु बहुलं क्रंसते। क्रमते। स्वयमे-वोत्सहत इत्यर्थः॥ कत्। कदा। अंत्यलोपश्छांदसः। नूँः पात्रं। नॄन् पे। पा० ८. ३. १०.। इति संहितायां नकारस्य रुत्वं। अत्रानुनासिकः पूर्वस्य तु वेत्यृकारः सानुनासिकः। पात्रं। पा रक्षणे। ताच्छीलिकस्तृन्। व्यत्ययेन सोरमादेशः। संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावे यण्। देवयतां। सुप आत्मनः क्यच्। ततो लटः शतृ। शतुरनुम इति विभक्तेरुदात्तत्वं। श्रवत्। श्रु श्रवणे। लेट्य-डागमः। बहुलं छंदसीति विकरणस्य लुक्। तुरण्यन्। तुरण त्वरायां। कंड्वादिः। आनट्। अश्नोतेर्लङि व्यत्ययेन परस्मैपदं। अशौ प्राप्तौ व्यत्ययेन श्नम्विकरणः। व्रश्चादिषत्वे जश्त्वं। आडागमः। हर्म्यस्य। हर्म्यशब्दादर्शआदित्वादच्। क्रंसते।

क्रमु पादविक्षेपे। वृत्तिसर्गतायनेषु क्रमः। पा॰ १.३.३८.। इत्यात्मनेपदं। लेट्यडागमः। सिब्बहुलं लेटीति सिप्। यजत्रः। अमिनक्षीत्यादिना यजेरत्रन्प्रत्ययः॥

द्वितीयामृचमाह ॥

स्तंभीद्ध द्यां स धरुणं प्रुषायदृभुर्वाजाय द्रविणं नरो गोः।
अनु स्वजां महिषश्चक्षत व्रां मेनामश्वस्य परि मातरं गोः ॥ २॥
स्तंभीत्। ह। द्यां। सः। धरुणं। प्रुषायत्। ऋभुः। वाजाय। द्रविणं। नरः। गोः।
अनु। स्वऽजां। महिषः। चक्षत। व्रां। मेनां। अश्वस्य। परि। मातरं। गोः ॥२॥

स इंद्रो द्यां द्युलोकं स्तंभीद्ध। स्तभ्नाति खलु। तथा गोः पणिभिरपहृतस्य गोसमूहस्य वज्रस्योदकस्य किरणसमूहस्य वा नरो नेता। स इंद्र ऋभुः सूर्यात्मनोरु विस्तीर्णं भासमानः सन् द्रविणं सर्वैः प्राणिभिरभिद्रवणीयं धरुणं। उदकनामैतत्। सर्वस्य धारकं वृष्ट्युदकं वाजायान्नार्थं बलार्थं वा प्रुषायत्। प्रुष्णाति सिंचति प्रवर्षतीत्यर्थः। अपि च। महिषः। महन्नामैतत्। महान्सूर्यरूपींद्रः स्वजां स्वसकाशादुत्पन्नां व्रां। वृणोति तमसा सर्वमाच्छादयतीति व्रा रात्रिः। यद्वा। प्रकाशेन वृणोतीति व्रा उषाः। तामनु चक्षत। चष्टिः पश्यतिकर्मा। अनु पश्चात्पश्यति प्रकाशते। स्वयं प्रौढप्रकाशोऽपि स्वगत्या निष्पादिताया रात्रेरुषसश्च पश्चादुदेतीत्यर्थः। अपि चेदमपरमाश्चर्यं यदयमश्वस्य मेनां। स्त्रीनामैतत्। स्त्रियं वडवां गोर्मातरं जननीं। परिर्वैपरीत्ये। विपरीतामकरोत्। कदाचिदिंद्रो लीलयाश्वायां गामुत्पादयामास। तदत्र प्रतिपाद्यते मंत्रांतरे चेंद्रवाक्यरूपेणैतद्विस्पष्टमवगम्यते॥ धरुणं। धारेर्णिलुक् चेत्युनप्रत्ययः। प्रुषायत्। प्रुष प्लुष स्नेहनसेचनपूरणेषु। क्र्यादिकः। लेट्यडागमः। छंदसि शायजपीत्यहावपि श्नाप्राप्तौ शायजादेशः। नरः। नृ नये। बहुलवचनादृदोरबिति कर्तर्यप्। चक्षत। चक्षिङ् व्यक्तायां वाचि। छांदसो लङ्। बहुलं छंदसीति शपो लुगभावः॥

तृतीयामृचमाह ॥

नक्षद्धवंमरुणीः पूर्व्यं राट् तुरो विशामंगिरसामनु द्यून्।
तक्षद्वज्रं नियुतं तस्तंभद्द्यां चतुष्पदे नर्याय द्विपादे ॥ ३॥

नक्षत् । हवं । अरुणीः । पूर्व्यं । राट् । तुरः । विशां । अंगिरसां । अनु । द्यून् ।
तक्षत् । वज्रं । निऽयुतं । तस्तंभत् । द्यां । चतुःऽपदे । नर्याय । द्विऽपादे ॥ ३ ॥

अरुणीररुणवर्णा आरोचमाना वोषसो राट् राजयन्प्रकाशयन्सूर्यात्मेंद्रः पूर्व्यं पूर्वैर्ऋषिभिः प्रयुक्तं हवमिदानीमस्माभिः क्रियमाणमाह्वानं नक्षत् । नक्षतु । शृणोतु । कीदृशः । अनु द्यून् अनुदिवसं विशां मनुष्याणामंगिरसामृषीणां स्तोतॄणां तुरः । धनस्य प्रेरयिता । अपि च स इंद्रो वज्रं स्वकीयमायुधं नियुतं हंतव्येन सह नितरां युक्तं तक्षत् । अकरोत् । तथा द्यां द्युलोकं तस्तंभत् । अस्तंभयत् । यथाधो न पतति तथाकरोदित्यर्थः । किमर्थं । नर्याय नृभ्यो हिताय चतुष्पदे गवाश्वादये द्विपादे मनुष्याय च । एतदुभयार्थमित्यर्थः ॥ नक्षत् । नक्ष गतौ । लेट्यडागमः । पूर्व्यं । पूर्वैः कृतमिनियौ चेति यप्रत्ययः । राट् । राजृ दीप्तौ । अस्मादंतर्भावितण्यर्थात् क्विप् । तुरः । तुर त्वरणे । इगुपधलक्षणः कः । तक्षत् । तक्षू त्वक्षू तनूकरणे । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । तस्तंभत् । ष्टभि स्कभि गतिप्रतिबंधे । अस्माण्ण्यंताल्लुङि चङि रूपं । चङ्यन्यतरस्यामित्युपोत्तमस्योदात्तत्वं । पूर्वपदस्यासमानवाक्यस्थत्वान्निघाताभावः । चतुष्पदे । चत्वारः पादा अस्य । संख्यासुपूर्वस्येति पादशब्दस्यांत्यलोपः समासांतः । चतुर्थ्येकवचने भसंज्ञायां पादः पदिति पद्भावः । द्विपादे । पूर्ववत्प्रक्रिया । अयं तु विशेषः । अयस्मयादित्वेन पदत्वाद्भसंज्ञाया अभावे पद्भावाभावः । द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहावित्युत्तरपदांतोदात्तत्वं ॥

चतुर्थीमृचमाह ॥

अस्य मदे स्वर्यं दा ऋतायापीवृतमुस्रियाणामनीकं ।
यद्ध प्रसर्गे त्रिककुम्निवर्तदप द्रुहो मानुषस्य दुरो वः ॥ ४ ॥
अस्य । मदे । स्वर्यं । दाः । ऋताय । अपिऽवृतं । उस्रियाणां । अनीकं ।
यत् । ह । प्रऽसर्गे । त्रिऽककुप् । निऽवर्तत् । अप । द्रुहः । मानुषस्य । दुरः । वरिति वः ॥ ४ ॥

हे इंद्र अस्य सोमस्य पानेन मदे हर्षे सत्यृताय यज्ञार्थं स्वर्यं स्तुत्यमपीवृतं पणिभिर्गुहासु निगूढमुस्रियाणां गवामनीकं संघं दाः । अंगिरोभ्यो दत्तवानसि । उत्तरार्धः परोक्षकृतः । यद्ध यदा खलु प्रसर्गे युद्धे त्रिककुप् त्रिषु लोकेषूच्छ्रित इंद्रो निवर्तत् । नितरां वर्तेत । तदानीं स इंद्रो द्रुहो द्रोग्धुर्मानुषस्य मनोः संबं-

धिनोऽसुरस्य पणेः संबंधीनि दुरो द्वाराणि गवामनिर्गमनाय पिहितान्यपवः। अपवृणोति। उद्घाटयति ॥ स्वर्यं। स्वृ शब्दोपतापयोः। ऋहलोर्ण्यत्। संज्ञापूर्वकस्य विधेरनित्यत्वाद्वृद्ध्यभावः। अपीवृतं। अपिपूर्वाद्वृणोतेः कर्मणि निष्ठा। निपातस्य चेति पूर्वपदस्य दीर्घत्वं। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। प्रसर्गे। प्रकर्षेण सृज्यंते विमुच्यंतेऽस्मिन्निषव इति प्रसर्गः। अधिकरणे घञ्। कृदुत्तरपदप्रकृतिस्वरत्वं। छांदसस्याथादिस्वराभावः। निवर्तत्। वृतु वर्तने। लेटोऽडागमः। व्यत्ययेन परस्मैपदं। वः। वृञ् वरणे। छांदसो लुङि मंत्रे घसेति च्लेर्लुक्। गुणे हल्ङ्यादिलोपः ॥

पंचमीमृचमाह ॥

तुभ्यं पयो यत्पितरावनीतां राधः सुरेतस्तुरणे भुरण्यू।
शुचि यत्ते रेक्ण आयजंत सबर्दुघायाः पय उस्रियायाः ॥ ५ ॥

तुभ्यं। पयः। यत्। पितरौ। अनीतां। राधः। सुऽरेतः। तुरणे। भुरण्यू इति।
शुचि। यत्। ते। रेक्णः। आ। अयजंत। सबःऽदुघायाः। पयः। उस्रियायाः ॥ ५ ॥

हे इंद्र तुरणे क्षिप्रकारिणे तुभ्यं भुरण्यू कृत्स्नं जगत्पोषयंत्यौ पितरावुत्पादयंत्यौ द्यावापृथिव्यौ यद्यदा पयः सांनाय्यलक्षणं हविरनीतां। गोष्वनयतां। न्यधिषातामित्यर्थः। कीदृशं पयः। राधः। राधकं समृद्धिकरं। सुरेतः। शोभनरेतस्कं। कृत्स्नजगदुत्पादनशक्तमित्यर्थः। हविषः सकाशाद्धि जगदुत्पद्यते। अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति। यद्यदा च द्यावापृथिवीभ्यां गोष्वानीतं शुचि शुद्धं सबर्दुघायाः क्षीरस्य दोग्ध्र्या उस्रियाया गोः पयो रेक्णः। धननामैतत्। धनवदतिप्रियं। यद्वा। अतिरिक्तं प्रवृद्धं। एवंविधं हविस्तुभ्यमायजंत। आभिमुख्येन यजमानाः प्रायच्छन्। तदानीं दुरो मानुषस्य द्वाराण्यपवृणोतीति पूर्वया संबंधः ॥ अनीतां। णीञ् प्रापणे। लङि बहुलं छंदसीति शपो लुक्। सुरेतः। सोर्मनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वं। तुरणे। तुरण त्वरायां। कंड्वादिः। क्विप् चेति क्विप्। अतोलोपयलोपौ। भुरण्यू। भुरण धारणपोषणयोः। अयमपि कंड्वादिः। औणादिक उप्रत्ययः ॥

॥ इति प्रथमस्याष्टमे चतुर्विंशो वर्गः ॥

षष्ठीमृचमाह ॥

अध प्र जज्ञे तरणिर्ममत्तु प्र रोच्यस्या उषसो न सूरः ।
इंदुर्येभिराष्ट स्वेदुहव्यैः स्रुवेण सिंचन् जरणाभि धाम ॥ ६ ॥

अध । प्र । जज्ञे । तरणिः । ममत्तु । प्र । रोचि । अस्याः । उषसः । न । सूरः ।
इंदुः । येभिः । आष्ट । स्वऽइदुहव्यैः । स्रुवेण । सिंचन् । जरणा । अभि । धाम ॥ ६ ॥

अथेदानीमयमिंद्रः स्तुतिभिः प्रीयमाणः सन् प्रजज्ञे । प्रकर्षेण प्रादुर्बभूव । स तरणिः शत्रूणां तारकोऽस्मान्ममत्तु । मादयतु । स च प्ररोचि । प्रकृष्टं रोचते । तत्र दृष्टांतः । अस्या अस्माभिर्दृश्यमानाया उषसः समीपे वर्तमानः सूरो न । सूर्य इव । जरणा जरणीयः स्तोतव्य इंदुः सोमो धामाहवनीयलक्षणं स्थानमभिलक्ष्य स्रुवेण सिंचन् सिच्यमानः सन् स्वेदुहव्यैः स्वभूतसमृद्धहविष्कैर्येभिर्येरस्माभिराष्ट । आशित आसीत् । तानस्मान्मादयत्वित्यर्थः ॥ जज्ञे । जनी प्रादुर्भावे । लिटि गमहनेत्युपधालोपः । ममत्तु । मदी हर्षे । बहुलं छंदसीति विकरणस्य श्लुः । रोचि । रुच दीप्तौ । छांदसो वर्तमाने लुङ् । व्यत्ययेन च्लेश्चिणादेशः । आष्ट । अश भोजने । कर्मणि लङि बहुलं छंदसीति विकरणस्य लुक् । व्रश्चादिषत्वे ष्टुत्वं । आडागमः । यद्वृत्तान्नित्यमिति निघातप्रतिषेधः । स्वेदुहव्यैः । इदि परमैश्वर्ये । औणादिक उप्रत्ययः । अनित्यमागमशासनमिति नुमभावः । इदूनि प्रभूतानि च तानि हव्यानि स्वभूतानि च हव्यानि येषां । यद्वा । ञिइंधी दीप्तौ । स्वायत्तानींदूनीद्धानि हव्यानि येषां । अथवा । स्वभूतमिदं पुरोवर्ति हव्यं हविर्येषां ते तथोक्ताः । पृषोदरादित्वादभिमतरूपसिद्धिः । सिंचन् । षिच् क्षरणे । व्यत्ययेन कर्मणि कर्तृप्रत्ययः । शे मुचादीनामिति नुम् । जरणा । जरतिः स्तुतिकर्मा । अस्मात्कर्मणि ल्युट् । सुपां सुलुगिति विभक्तेराकारः । व्यत्ययेन लित्स्वराभावः ॥

सप्तमीमृचमाह ॥

स्विध्मा यद्वनधितिरपस्यात्सूरो अध्वरे परि रोधना गोः ।
यद्ध प्रभासि कृत्व्याँ अनु द्यूननर्विशे पश्विषे तुराय ॥ ७ ॥

सुऽइध्मा । यत् । वनऽधितिः । अपस्यात् । सूरः । अध्वरे । परि । रोधना । गोः ।
यत् । ह । प्रऽभासि । कृत्व्यान् । अनु । द्यून् । अनर्विशे । पशुऽइषे । तुराय ॥ ७ ॥

यदि स्विध्मा सुदीप्तास्या वनधितिर्वने छेत्तव्ये वृक्षसमूहे निधातव्या श
पस्यात् । अपो विशसनात्मकं स्वकीयं कर्म कर्तुमिच्छेत् तदानीं सूरः
कोऽध्वर्युरध्वरे यज्ञे गोः पशो रोधना रोधनाय यूपे नियोजनाय परि भव
समर्थो भवति । यद्वा । स्विध्मा सूर्यकिरणैः सुदीप्ता वनधितिः । वनमुदक
धीयत इति वनधितिर्मेघमाला । सा यद्यदापस्यात् अपः प्रवर्षणलक्षणं
करोति । तदानीं सूरः प्रेरक इंद्रोऽध्वरे यज्ञस्य निमित्तभूतेऽध्वर्तव्येऽहिंसितव्ये
रिक्षे वर्तमानः सन् गोर्वृष्ट्युदकस्य रोधना रोधनान्यावरणानि परि प
निवारयतीति शेषः । उत्तरार्द्धः प्रत्यक्षकृतः । हे इंद्र सूर्यात्मना वर्तमा
कृत्व्यान् । कृत्वीति कर्मनाम । कर्मसु साधून् द्यून् दिवसाननुलक्ष्य यद्व
खलु प्रभासि । प्रकर्षेण दीप्यसे । तदानीमनर्विशेऽनसा शकटेनेंधनाद्याहरणा
रण्यं प्रविशते । यद्वा । गंतव्यं स्थलं प्रति गंतुमशक्ताय पुरुषाय पश्विषे पश्
रयते तुराय त्वरमाणाय गोपालाय च सिध्येदभिमतमिति वाक्यशेषः ॥ स्विध
शोभनमिध्मं दीप्तमास्यं दीप्तिर्वा यस्याः सा तथोक्ता । नञ्सुभ्यामित्युत्तरपदां
दात्तत्वं । अपस्यात् । अपसशब्दात्सुप आत्मनः क्यच् । लेट्याडागमः । रोध
रुधिर् आवरणे । ल्युट् चेति भावे ल्युट् । शेश्छंदसि बहुलमिति शेर्लो
अनर्विशे । अनसा विशति प्राप्नोतीत्यनर्विट् । विशतेः क्विप् । अहरादि
पत्यादिषूपसंख्यानमिति सकारस्य रेफादेशः । यद्वा । अर्तेः कर्मणि विच् ।
गंतव्यं प्रति विशति प्राप्नोतीत्यर्विट् । न अर्विट् अनर्विट् । अव्ययपूर्व
कृतिस्वरत्वं । अत एव व्युत्पत्त्यनवधारणादनवग्रहः । पश्विषे । इष गतौ । अस
दंतर्भावितण्यर्थात् क्विप् ॥

अष्टमीमृचमाह ॥

अष्टा महो दिव आदो हरी इह द्युम्नासाहमभि योधान उत्सं ।
हरिं यत्ते मंदिनं दुक्षन्वृधे गोरभसमद्रिभिर्वाताप्यं ॥ ८ ॥

अष्टा । महः । दिवः । आदः । हरी इति । इह । द्युम्नऽसहं । अभि । योधानः । उत्सं
हरिं । यत् । ते । मंदिनं । धुक्षन् । वृधे । गोऽरभसं । अद्रिऽभिः । वाताप्यं ॥ ।

हे इंद्र महो महतो दिवो मदकरस्य सोमस्याष्टा भोक्तारौ हरी स्वकीया
श्वाविहास्मिन्कर्मण्यादः पीतशेषं सोमं पायय । तथा द्युम्नासाहं द्युम्नस्यास्मदीय
धनस्याभिभवितारमुत्समुत्स्रावयितारं शत्रुं योधानो योधनशीलस्त्वमभिभव

यद्यदा ते तव वृधे वर्धनाय हरिं मनोहरं मंदिनं मदकरं गोरभसं। अत्र गोशब्दः पयसि वर्तते । पयो बलं । तद्वद्वेगवंतं वीर्यवंतमित्यर्थः । वाताप्यं । वातेन प्राप्तव्यं वाततुल्येन शीघ्रकारिणा त्वया पातव्यमित्यर्थः । एवंविधं सोममद्रिभिर्यावभिर्धुक्षन् । दुहंति । ऋत्विजोऽभिषुण्वंति तदानीमष्टेति पूर्वत्र संबंधः ॥ अष्टा । अश भोजने । तृच् । आगमानुशासनस्यानित्यत्वादिडभावः । धुक्षन् । पदकालीनो भष्भावश्छांदसः ॥

नवमीमृचमाह ॥

त्वमायसं प्रति वर्तयो गोर्दिवो अश्मानमुपनीतमृभ्वा ।

कुत्साय यत्र पुरुहूत वन्वञ्छुष्णमनंतैः परियासि वधैः ॥ ९ ॥

त्वं । आयसं । प्रति । वर्तयः । गोः । दिवः । अश्मानं । उपऽनीतं । ऋभ्वा ।

कुत्साय । यत्र । पुरुऽहूत । वन्वन् । शुष्णं । अनंतैः । परिऽयासि । वधैः ॥ ९ ॥

हे इंद्र त्वं गोर्गंतुः शुष्णस्यासुरस्य वधार्थमायसमयोमयं वज्रं प्रति वर्तयः । आभिमुख्येन व्यसृजः । कीदृशं वज्रं । दिवो द्युलोकादृभ्वा दीप्तेन त्वष्ट्रोपनीतं । आनीतं । अश्मानं । शीघ्रं शत्रोर्व्यापकं । यत्र यदा हे पुरुहूत पुरुभिर्बहुभिः स्तोतृभिराहूतेंद्र कुत्सायैतत्संज्ञाय ऋषये शुष्णं शोषकमसुरमनंतैर्निरवधिकैर्वधैर्हननसाधनैरायुधैर्वन्वन् हिंसन् परियासि। परितो गच्छसि। तदानीं तद्वधार्थं वज्रं प्रत्यवर्तय इत्यर्थः ॥ अश्मानं। अशू व्याप्तौ। अन्येभ्योऽपि दृश्यंत इति मनिन्। ऋभ्वा। जसादिषु छंदसि वावचनमिति नाभावस्य विकल्पितत्वादभावे यणादेशः। वन्वन्। वनु याचने। अत्र हिंसार्थः। तथा च यास्कः। वनुष्यतिर्हंतिकर्मानवगतसंस्कारो भवतीति। वधैः। हनश्च वध इति हंतेः करणेऽप् तत्संनियोगेन वधादेशश्च। सचादंतोऽंतोदात्तः। तस्यातो लोपे सत्युदात्तनिवृत्तिस्वरेण प्रत्ययस्योदात्तत्वं ॥

दशमीमृचमाह ॥

पुरा यत्सूरस्तमसो अपीतेस्तमद्रिवः फलिगं हेतिमस्य ।

शुष्णस्य चित्परिहितं यदोजो दिवस्परि सुग्रथितं तदादः ॥ १० ॥

पुरा । यत् । सूरः । तमसः । अपिऽइतेः । तं । अद्रिऽवः । फलिऽगं । हेतिं । अस्य ।

शुष्णस्य । चित् । परिऽहितं । यत् । ओजः । दिवः । परि । सुऽग्रथितं । तत् । आ ।

अदरित्यदः ॥ १० ॥

पुरा यद्यदा सूरः सूर्यस्तमसस्तमोरूपस्य शुष्णस्यासुरस्यापीतेः संग्रामान्मु
क्तोऽभवदिति शेषः। तदानीं हे अद्रिवः। आदृणात्यनेनेत्यद्रिर्वज्रः। तद्वन्निं
तं फलिगं। मेघनामैतत्। मेघरूपेणावृण्वंतं हेतिं हंतारं शुष्णमसुरमस्य। निर
सितवानसि। यद्वा। अस्य शुष्णस्यासुरस्य हेतिं हननसाधनमायुधं फलिग
मेघलक्षणं प्राभांक्षीरिति शेषः। तथा शुष्णस्य चित् शोषयितुरसुरस्य च
यदोज आच्छादकं बलं दिवस्परि द्योतमानस्य सूर्यस्योपरि परिहितमाच्छा
दितं सुग्रथितं सुष्ठु सूर्ये सक्तं तदोजस्तस्मात्सूर्यादादः। आदृणाः। विश्लि
कृतवानसीत्यर्थः॥ अद्रिवः। छंदसीर इति मतुपो वत्वं। मतुवसो रुरिति नकारस्य
रुत्वं। हेतिं। कृत्यल्युटो बहुलमिति बहुलवचनाद्धंतेः कर्तरि क्तिन्। ऊतियू
तीत्यादौ निपातनाद्रूपसिद्धिरंतोदात्तत्वं च। अस्य। असु क्षेपणे। लटः सिप्
तस्य व्यत्ययेन ह्यादेशः। अतो हेरिति हेर्लुक्। दिवस्परि। पंचम्याः परावध्यर्थे
इति विसर्जनीयस्य सत्वं। अदः। दॄ विदारणे। लङि सिप्। बहुलं छंदसीति
विकरणस्य लुक्। गुणे हल्ङ्याब्भ्य इति सिलोपः॥

॥ इति प्रथमस्याष्टमे पंचविंशो वर्गः ॥

एकादशीमृचमाह ॥

अनु॑ त्वा म॒ही पाज॑सी अ॒च॒क्रे द्यावा॒क्षामा॑ मदतामिंद्र॒ कर्म॑न्।
त्वं वृ॒त्रमा॒शया॑नं सि॒रासु॑ म॒हो वज्रे॑ण सिष्वपो व॒राहु॑म् ॥ ११ ॥
अनु॑। त्वा॒। म॒ही इति॑। पाज॑सी इति॑। अ॒च॒क्रे इति॑। द्यावा॒क्षामा॑। म॒द॒ता॒म्। इं॒द्र॒। कर्म॑न्।
त्वं। वृ॒त्रं। आऽशया॑नं। सि॒रासु॑। म॒हः। वज्रे॑ण। सि॒स्व॒पः। व॒राहु॑म् ॥ ११ ॥

हे इंद्र मही मह्यौ महत्यौ पाजसी बलवत्यावचक्रे अचक्रमाणे सर्वत्र व्याप
वर्तमाने द्यावाक्षामा द्यावापृथिव्यौ कर्मन् वृत्रवधादिलक्षणे कर्मणि प्रवृ
त्वामनु मदतां। हृष्टमकुरुतां। अन्वमन्येतां वा। तथा च तैत्तिरीयकं। र
आभ्यामेव प्रसूत इंद्रो वृत्रमहन्निति। तदनंतरं त्वमाशयानं आ समंताद्व्याप
वर्तमानं वराहुं वराहारं वृत्रमसुरं सिरासु सरणशीलास्वप्सु महो महता वज्रेण
हत्वा सिष्वपः। अस्वापयः। पातितवानित्यर्थः॥ मही। सुपां सुलुगिति
विभक्तेः पूर्वसवर्णदीर्घः। पाजसी। पाजस्शब्दो बलवाचको लक्षणया च तद्वति
वर्तते। इयाडियाजीकाराणामुपसंख्यानमिति विभक्तेरीकारादेशः। द्यावाक्षामा

द्यौश्च क्षामा च। दिवो द्यावेति द्यावादेशः। देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं। सुपां सुलुगिति विभक्तेर्लुक्। मदतां। मदी हर्षे। व्यत्ययेन शप्। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। महः। महतः। करणे शेषत्वेन विवक्षिते षष्ठी। अच्छब्दलोपश्छांदसः। सिष्वपः। ञिष्वप् शये। अस्माण्ण्यंतात् लुङि चङि संज्ञापूर्वकस्य विधेरनित्यत्वात् स्वापेश्चङि। पा० ६. १. १८.। इति संप्रसारणं न क्रियते॥

द्वादशीमृचमाह॥

त्वमिंद्र नर्यो याँ अवो नॄन्तिष्ठा वातस्य सुयुजो वहिष्ठान्।
यं ते काव्य उशना मंदिनं दाद्वृत्रहणं पार्यं ततक्ष वज्रं॥१२॥

त्वं। इंद्र। नर्यः। यान्। अवः। नॄन्। तिष्ठ। वातस्य। सुऽयुजः। वहिष्ठान्।
यं। ते। काव्यः। उशना। मंदिनं। दात्। वृत्रऽहनं। पार्यं। ततक्ष। वज्रं॥१२॥

हे इंद्र नर्यो नृभ्यो हितस्त्वं यान्नॄन्नेतॄनश्वानवः। अवसि रक्षसि। तान्वातस्य तुल्यान् तद्वच्छीघ्रं गच्छतः सुयुजः शोभनं रथेन युज्यमानान्वहिष्ठान् अतिशयेन वोढॄनश्वान्तिष्ठ। आरोहेत्यर्थः। काव्यः कवेः पुत्र उशना मंदिनं मदकरं यं वज्रं ते तुभ्यं दात्। दत्तवान्। तं वज्रं वृत्रहणं वृत्रस्यासुरस्य घातकं पार्यं शत्रूणां पारणेऽतिक्रमणे समर्थं च ततक्ष। तनूकृतवानसि॥ अवः। अवतेर्लेट्यडागमः। इतश्च लोप इतीकारलोपः। वहिष्ठान्। वोढृशब्दात्तुश्छंदसीतीष्ठन्। तुरिष्ठेमेयःस्विति तृलोपः। पार्यं। पार तीर कर्मसमाप्तौ। अस्माण्ण्यंतादचो यदिति यत्। ततक्ष। तक्षू त्वक्षू तनूकरणे। पुरुषव्यत्ययः॥

त्रयोदशीमृचमाह॥

त्वं सूरो हरितो रामयो नॄन्भरच्चक्रमेतशो नायमिंद्र।
प्रास्य पारं नवतिं नाव्यानामपि कर्तमवर्तयोऽयज्यून्॥१३॥

त्वं। सूरः। हरितः। रमयः। नॄन्। भरत्। चक्रं। एतशः। न। अयं। इंद्र।
प्रऽअस्य। पारं। नवतिं। नाव्यानां। अपि। कर्तं। अवर्तयः। अयज्यून्॥१३॥

हे इंद्र सूरः सूर्यात्मना वर्तमानस्त्वं हरितो हरिद्वर्णान्नॄन्नेतॄनश्वान्। यद्वा रसहरणशीलान् रश्मीन् रामयः। उपारमयः। एतशो न। एतश इति सूर्या-

श्वस्याख्या। तथा च श्रूयते। एतशेन त्वा सूर्यो देवता गमयत्विति। नशब्दश्चार्थे। एतशश्च रथस्य चक्रं भरत्। प्रावहत्। अपि च। त्वं नाव्यानां नावा तार्याणां नदीनां नवतिं नवतिसंख्यामतीत्य वर्तमानं पारं तीरदेशं। सप्तम्यर्थे द्वितीया। तीरदेशेऽयज्यून् अयजमानान् यज्ञविहीनानसुरादीन् प्रास्य प्रक्षिप्य तत्र कर्तमवर्तयः। कर्तव्यमपि कृत्वा तानयजमानानवर्तयः। प्रापयः॥ रामयः। लङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। अन्येषामपि दृश्यत इति सांहितिको दीर्घः। प्रास्य। असु क्षेपणे। अस्मात् ल्यपि रूपं। नाव्यानां। नौवयोधर्मेत्यादिना यत्। तित्स्वरित इति स्वरितत्वं॥

चतुर्दशीमृचमाह॥

त्वं नो॑ अ॒स्या इं॑द्र दु॒र्हणा॑याः पा॒हि व॑ज्रिवो दुरि॒ताद॒भीके॑।
प्र नो॒ वाजा॑न्र॒थ्यो॒३॒॑ अश्व॑बुध्यानि॒षे यं॑धि॒ श्रव॑से सू॒नृता॑यै॥१४॥

त्वं। नः॒। अ॒स्याः॒। इं॒द्र॒। दुः॒ऽहना॑याः। पा॒हि। व॒ज्रि॒ऽवः॒। दुः॒ऽइ॒तात्। अ॒भीके॑।
प्र। नः॒। वाजा॑न्। र॒थ्यः॑। अश्व॑ऽबुध्यान्। इ॒षे। यं॒धि॒। श्रव॑से। सू॒नृता॑यै॥१४॥

हे वज्रिवो वज्रवन्निंद्र त्वं दुर्हणाया दुःखेन हंतव्याया अस्या अवृत्तेर्दारिद्र्यान्नोऽस्मान्पाहि। रक्ष। तथा दुरितात्पापादभीकेऽभिप्राप्ते समीपवर्तिनि संग्रामेऽस्मान्रक्ष। अपि च। नोऽस्मभ्यं रथ्यो रथयुक्तान् अश्वबुध्यान् अश्वानां बोधकान्। अश्वा यावद्भिर्लभ्यंते तावदित्यर्थः। यद्वा। अश्वबुध्नान्। छांदसो वर्णविकारः। अश्वमूलान् अश्वप्रमुखानित्यर्थः। सर्वं हि धनमश्वमूलं दासापवर्गं। यथोक्तं दासप्रवर्गं रयिमश्वबुध्यमिति। एवंविधान्वाजान् धनानि प्रयंधि। प्रयच्छ। किमर्थं। इषे। अन्नार्थं। श्रवसे। कीर्त्यर्थं। सूनृतायै। सूनृता प्रियसत्यात्मिका वाक्। तदर्थं च॥ दुर्हणायाः। ईषद्दुःसुष्विति हंतेः कर्मणि खल्। पाहि। पादादित्वान्निघाताभावः। वज्रिवः। वज्रोऽस्यास्तीति वज्री हस्तः। तद्वान् वज्रिवान्। छंदसीर इति मतुपो वत्वं। संबुद्धौ मतुवसो रुरिति नकारस्य रुत्वं। रथ्यः। छांदसीवनिपाविति रथशब्दान्मत्वर्थीय ईकारः। यंधि। यम उपरमे। बहुलं छंदसीति विकरणस्य लुक्। वा छंदसीति हेः पित्वेन ङित्त्वाभावादङितश्चेति हेर्धिः॥

पंचदशीमृचमाह ॥

मा सा ते अस्मत्सुमतिर्वि दसद्वाजप्रमहः समिषो वरंत ।
आ नो भज मघवन्गोष्वर्यो मंहिष्ठास्ते सधमादः स्याम ॥ १५ ॥

मा । सा । ते । अस्मत् । सुऽमतिः । वि । दसत् । वाजऽप्रमहः । सं । इषः । वरंत ।
आ । नः । भज । मघऽवन् । गोऽषु । अर्यः । मंहिष्ठाः । ते । सधऽमादः । स्याम ॥ १५ ॥

हे वाजप्रमहः । वाजैर्धनैः प्रमहनीयेंद्र ते त्वदीया सा सुमतिः शोभनानुग्रहरूपा बुद्धिरस्मत् अस्मासु मा विदसत् । मा विशुष्यतु । तथेषोऽन्नान्यस्मान् संवरंत । संवृतान्कुर्वंतु । हे मघवन् धनवन्निंद्र अर्यो धनपतिस्त्वं नोऽस्मान् गोष्वाभज । प्रापय । ते तव मंहिष्ठा अतिशयेन स्तुतिभिः प्रवर्धयितारो वयं सधमादः स्याम । पुत्रपौत्रादिभिः सह माद्यंतो भवेम ॥ अस्मत् । सुपां सुलुगिति सप्तम्या लुक् । दसत् । दसु उपक्षये । माङि लुङि पुषादित्वादङ् । वाजप्रमहः । वाजैर्धनैः प्रकृष्टं महस्तेजो यस्य स तथोक्तः । पादादित्वादाष्टमिकनिघाताभावः । षाष्ठिकमामंत्रिताद्युदात्तत्वं । वरंत । वृञ् वरणे । व्यत्ययेन शप् । गोषु । सावेकाच इति प्राप्तस्य विभक्त्युदात्तत्वस्य न गोश्वन् साववर्णेति प्रतिषेधः । अर्यः । अर्यः स्वामिवैश्ययोरिति निपात्यते । अर्यस्य स्वाम्याख्या चेदित्यंतोदात्तत्वं । मंहिष्ठाः । महि वृद्धौ । इदित्वान्नुम् । अस्मादंतर्भावितण्यर्थात्तृच् । तुश्छंदसीतीष्ठन् । तुरिष्ठेमेयःस्विति तृलोपः । सधमादः । मद तृप्तियोगे । चौरादिकः । सह माद्यंते तृप्ता भवंतीति सधमादः । क्विप् चेति क्विप् । जस् । सध मादस्थयोश्छंदसीति सहस्य सधादेशः ॥

॥ इति प्रथमस्याष्टमे षड्विंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टकेऽष्टमोऽध्यायः समाप्तः ॥

॥ प्रथमाष्टकः समाप्तः ॥